११७०

अथबृहज्ज्योतिषार्णवोक्तमासमाहात्म्यस्तबकप्रा०

158/2


सूत
शौनक
मास देवता
पुण्य कीर्ति
माण्डव्य
सर्व देवाः
विष्णु
अयोध्या
प्रेताः
भिल्लाः
शंभुब्रा
देवता
करिकोहल
पिंजरा
राम

स्वनामतस्तुमासःस्यात्द्विवर्णस्तुद्विदोरिति ॥ नाभ्यूर्ध्वः
श्वेतकृष्णगःपिंगलोचनमूहूजः १ सूर्यचंद्रान्वितःसोधंप्रतिमासं
तुपूत्पते ॥ स्वनामपूर्वकैर्मंत्रैर्होमपूजास्नानकैः २

अथमासस्तबके वक्ष्यमाण मासमाहात्म्यानुक्रमः

१ अथचैत्रमासमाहात्म्यं
२ अथवैशाखमासमाहात्म्यं
३ अथज्येष्ठमासमाहात्म्यं
४ अथआषाढमासमाहात्म्यं
५ अथश्रावणमासमाहात्म्यं
६ अथभाद्रपदमासमाहात्म्यं
७ अथाश्विनमासमाहात्म्यं
८ अथकार्तिकमासमाहात्म्यं
९ अथमार्गशीर्षमाहात्म्यं
१० अथपौषमासमाहात्म्यं
११ अथमाघमासमाहात्म्यं
१२ अथफाल्गुनमासमाहात्म्यं
१३ अथपुरुषोत्तममासमाहात्म्यं
१४ अथक्षयमासविधानं·
१५ अथधनुर्मासमाहात्म्यं
१६ अथकोकिलमासमाहात्म्यं
१७ अथसंसर्पमासमाहात्म्यं
१८ अथचातुर्मासमाहात्म्यं

अथउपोद्घाताध्यायानुक्रमः १ मंगलाचरणं·
द्वादशमासानांमध्वादिनामानिसार्थानि·
द्वादशमासानांनक्षत्राश्रितनामानि·
मासानांचांद्रसावनसौरनाक्षत्रेतिभेदचतुष्टयं
अथप्रत्येकमासानांकृत्यमाह·
दैवमासमनुष्यमासनिर्णयः
वैदिकस्मार्तपौराणसौतमासानांनिर्णयः
अधिकमासक्षयमासलक्षणं·
कोकिलमासलक्षणं· संसर्पमासलक्षणं·
चातुर्मास्यव्रतारंभावसानकालनिर्णयः
धनुर्मासलक्षणं २ अथचैत्राद्यष्टादशमासानामध्यायसंख्यांपुराणादिप्रमाणंचाह ३ द्वादशमासानांसूर्याः
३ द्वादशमासानांदेवता· ३ द्वादशमासानांदेव्यः·
मासस्वरूपं ३॥ इतिबृहज्ज्योतिषार्णवधर्मस्कंधेचतुर्थेमासस्तबकेउपोद्घाताध्यायःप्रथमः १

अथचैत्रमाहात्म्येपदार्थानुक्रमः

अध्याय· विषय·

१ मंगलाचरणंततोशौनकप्रश्नः· चैत्रमासप्रशंसा·
२ ग्रामाद्बहिर्जलेचैत्रेस्नानमाहात्म्यप्रतिपादनंस्नानकालश्च
३ चैत्रेकमुद्दिश्यव्रतंकर्तव्यंकिंदानंकिंफलंकस्मिन्तीर्थेचस्नानंकर्तव्यमितिप्रश्नेपुण्यकीर्तिकथानकमाह·सूतःततःवनेभ्रममाणस्यपुण्यकीर्तिनृपस्यमांडव्यऋषिणासहसमागमः आगमने·प्रश्नः
४ ऋषिःचैत्रेसरयूस्नानार्थंगच्छामीत्युवाचततोमाहात्म्यश्रवणोत्सुकंनृपंप्रतिचैत्रव्रतकर्तुःवर्ज्यावर्ज्यत्वमाह·
५ सर्वमासेषुचैत्रस्यआधिक्यत्वंवर्णयितुंरावणादिराक्षसपीडितैर्देवैर्विष्णोःस्तुतिःकृताततोऽहमवतारंगृहीष्यामीत्युवाच·
६ श्रीरामजन्मोत्सववर्णनं अयोध्यायांरामतीर्थमहिमा·
७ स्नानकालःचैत्रव्रतारंभविसर्जनयोःकालप्रमाणेप्रकारत्रयमाह आह्निकवर्णनेप्रातःस्मरणादिमलोत्सर्गांतविधिवर्णनं

८ मलोत्सर्गादिदंतशुद्धिविधानं
९ पूजाविधिवर्णनेनिंद्यग्राह्यपुष्पाणिस्नानविधिःपृथिव्यांयत्रकुत्रापिचैत्रेरामतीर्थमहिमा·
१० द्वादशतिलकधारणविधिः शैवानांविभूतिधारणविधिः द्वादशमासानांदेवता कथनंराममहिमा·
११ रामस्यषोडशोपचारपूजाकथनं
१२ ततोऽवसिष्ठपूजातुलस्यश्वत्थादिपूजातिलतर्पणंच
१३ चैत्रमासव्रतनियमाः
१४ चैत्रव्रतिनांभोजनोत्तरंकृत्यंचैत्रेदानानि
१५ चैत्रेअयोध्यायांसरयूमध्यस्थरामतीर्थमहिमाकथनं
१६ सर्वपृथिव्यांरामचंद्रकृततीर्थानांवर्णनं
१७ संतानप्राप्त्यर्थंपुण्यकीर्तिनृपेणचैत्रेअयोध्यायांस्नानंकृतंतन्माहात्म्यप्रतिपादिकानृसिंहविप्रकथा·
१८ पिशाचत्रयमुक्तिः
१९ कर्कशनामकभिक्षुःशंभुब्राह्मणंप्रतिस्नानमाहात्म्यंपृच्छति सवदति तावताघोरराक्षसस्यागमनं ततस्तस्यमुक्तिःसच सवृत्तांतंपूर्वजन्मोत्थमवदत् तांबूलदानमहिमा·
२० चैत्रेदानानितिथीनांउत्तरोत्तरं वैशिष्ट्यवर्णनं रामजन्मोत्सवविधिः रामायणपारायणमहिमा·
२१ गौरीव्रतविधिः
२२ त्रयोदशीचतुर्दशीपौर्णिमातिथित्रयमाहात्म्यकथनं
२३ चैत्रव्रतोद्यापनविधिःचापनादिदानानिमासव्रतसमाप्त्यनंतरंत्रिजटाप्रीतयेस्नानं कर्तव्यंअन्यथाफलहानि·
२३ रंगपंचमीमहिमा·
२४ प्रतिमासंरामनवमीव्रतमाहात्म्यंकरिकोहलकथा·
२५ तयोःपूर्ववृत्तांततोप्रतिपुनरागच्छ इति· शंभोःशपथः शंभुकार्पटिकसमागमः ततः शंभुनाकार्पटिकमुखात्स्वपितुःदुर्गतिंज्ञात्वा पश्चात्तापःकृतः·
२६ ततःशंभोः अयोध्यायांगमनंअयोध्याशोभावर्णनं
२७ शंभोः अयोध्यायात्रायांअन्नदानात्पितुःपिशाचत्वमुक्तिर्जाता·
२८ यात्रांकृत्वामध्येमार्गकरिकोहलयोःद्विनद्वयजंपुण्यंदत्वामुक्तिंचकारततःराक्षसस्यमुक्तिः ततोशंभोःस्वग्रामप्रतिगमनं·नृसिंहविप्रस्यस्वपुरंप्रतिगमनं
२९ पुण्यकीर्तेःअयोध्यायात्राप्रभावेणपुत्रप्राप्तिःपंचविधस्नानविधिः
३० त्रिजटाख्यानंतस्यैवरदानंमाहात्म्यश्रवणमहिमाश्लोकसंख्या

इतिचैत्रमाहात्म्यंसमाप्तम्·

इतिचैत्रमाहात्म्यानुक्रमणिकास॰

यह ग्रंथ सन १८६७ के २५ वे कायदेके प्रमाणसें रजिष्टरकरके सुबतरोंसें हक्क ग्रंथकर्त्ता मालक हरिकृष्ण शास्त्री
इनोने अपनेपास रखाहे·

श्रीगणेशायनमः आदिनारायणोब्रह्मविष्णुरुद्रादिदेवताः यस्यानुवर्तिनस्तस्मैनमोगोलोकवासिने १ अथात्रबृहज्ज्योतिषार्णवग्रंथनिबंधनकर्ताधर्मस्कंधांतर्गतंचतुर्थमासमाहात्म्यस्तबकंचिकीर्षुरशेषप्रत्यूहव्यूहव्यपोहायाभिमतदेवतानमस्कारलक्षणंमंगलमाचरति वृषेति वृष मूषकः वाहनंयस्यसचासौविघ्नेशश्चतंधर्मोवृषोवृषः श्रेष्ठोवृषोगौर्मूषकोवृषइतिशब्दरत्नप्रदीपकोशः ततः उपासनास्तबककथनानंतरंशेषंस्पष्टं १ २ तेषांमासानांमाहात्म्यंतस्यविबुद्धयेज्ञानाय ३ अथमध्वादिद्वादशमासानांनामान्याह मधुरितिमन्यतेजानातीतिमधुः मनिजनिभ्यांधातोश्चेत्युः

श्रीगणेशायनमः वृषवाहनविघ्नेशंशिखिवाहांसरस्वतीम् स्वेष्टंश्रीवटुकंनत्वापितरंव्यंकटंततः १ श्रीगोतमकु
लोत्पन्नोज्योतिर्विद्व्यंकटात्मजः हरिकृष्णःकरोम्यत्रमाससमाहात्म्यसंग्रहम् २ पुराणादीन्विचालोक्यतन्माहात्म्य
विबुद्धये तत्रादौकिंचिदेवात्रमासनिर्णयउच्यते ३ मधुस्तथामाधवसंज्ञकश्चशुक्रः शुचिश्चाथनभोनभस्यौ तथे
षऊर्जश्चसहःसहस्यौतपस्तपस्यावितिलेक्रमेण ४ यस्मिन्मासेपौर्णिमासीयेनधिष्ण्येनसंयुता तन्नक्षत्राह्वयो
मासःपौर्णमासीतदाह्वया ५ तद्यथा चैत्रवैशाखज्येष्ठाश्चत्याशाढःश्रावणस्तथा भाद्रपदश्चाश्विनश्चकार्ति
कोमार्गशीर्षकः पौषोमाघःफाल्गुनेतिमासनामानिचक्रमात् ६

मधुरेवमाधवः ज्ञानवान्प्रज्ञादित्वादण् शोचंतिपांथाअत्रशुक्रः अत्युष्णत्वात् शोचंतिपांथाअत्रशुचिः अत्यासारात् नभ्यस्तिहिनस्तिपांथानितिनभः नभसिसाधुः नभस्यइष्यतेगमयेतिपांथानितीषः ऊर्जयंति बलिनोभवंतिप्राणिनोत्रऊर्जः सहतेइतिसहः अच् सहतेलोकोस्मिन्शीतमितिसहाः सहसिसाधुः सहस्यः तपतीतितपाः तपसिसाधुःतपस्यः एवंमासशब्दार्थोबोध्यः ४ येनधिष्ण्येननक्षत्रेणसंयुतापौर्णमासीतन्नक्षत्रनाम्नामासः प्रोक्तः पौर्णमासीपूर्णिमा अथतन्नामकीर्त्तयायथा चित्रानक्षत्रेणयुक्ता पौर्णमासीचैत्री सास्मिन्मासइतिसमासश्चैत्रः नक्षत्रेणयुक्तः कालः इत्यणि सास्मिन् पौर्णमासीतिपुनरण् एवंसर्वत्रबोध्यम् ५ ६

मासानांभेदचतुष्टयमाह दर्शावधिर्मासः चांद्रसंज्ञकः खत्रिवासरैः त्रिंशाद्दिनैः सावनसंज्ञकः सूर्यसंक्रांतिभोगेनसौरमासः प्रतिदिनमेकैकंक्रमेण अश्विनीमारभ्यरेवत्यंतं चंद्रस्यसप्तविंशातिनक्षत्रभोगेननाक्षत्रमासः ७ अथप्रत्येकमासानांकृत्यमाह वर्षायनर्तुयुगपूर्वकमितितुहिनांशुमानात् चंद्रमानात् तथाचार्ष्टिषेणिः विवाहादौस्मृतः सौरोयज्ञादौसावनःस्मृतः वार्षिकेपितृकार्येचमासश्चांद्रोविधीयते स्कांदे सौरमास्युदयेमा

चांद्रोदर्शावधिर्मासः सावनःखत्रिवासरैः सौरोर्कराशिभोगेननाक्षत्रोविधुभैःक्रमात् ७ शिरोमणौ वर्षायनर्त्तुयुगपूर्वकमत्रसौरान्मासास्तथाचतिथयस्तुहिनांशुमानात् यत्कृच्छ्रसूतकचिकित्सितवासराद्यंतत्सावनाद्घटिकादिकमार्क्षमानात् ८ गर्गः पौर्णमास्यवसानःस्यान्मासोदवक्रतुस्तथा दर्शांतोमानुषाख्येतौविंध्यादुत्तरयाम्यगौ ९ आर्ष्टिषेणिः दर्शांतोवैदिकोमासोराकांतःस्मार्त्तउच्यते पौराणोहरिघस्रांतःसौतउत्पत्तिपूर्वकः १० संक्रांतिद्वयसंयुक्तःक्षयमासःस्मृतोबुधैः संक्रांतिरहितोमासायोधिमासःसउच्यते ११ यस्मिन्वर्षेऽधिमासःस्यादाषाढस्तुतदान्नाहि कोकिलाख्याभवेन्मासोत्यंतिपुण्यफलप्रदः १२ स्कांदे शुचिमासाधिकोयस्मिन्वर्षेचैवप्रजायते तस्मिन्नेवव्रतंकार्यंनान्यवर्षेकदाचन १३ संक्रांतिरहितंसर्वंशुचिमासंपरित्यजेत् ससंक्रांतिशुचौमासि पौर्णिमास्यांनारद १४ यावच्छ्रावणमासस्यपौर्णिमाख्यातिथिर्भवेत् तावत्कालंव्रतंकार्यंयोषिद्भिःपतिदैवतं १५ भविष्योत्तरे वर्षेयस्मिन्दैवयोगादाश्विनद्वितयंभवेत् तदाशोकव्रतंकार्यंमासमेकंस्करवासये १६ वर्षेचयस्मिन्द्वौ देवीभवेतामधिमासकौ ससर्पाख्यःप्रथमजोमलसंज्ञस्तथोत्तरः १७

संचांद्रस्तुपितृकर्मणि यज्ञेसावनमित्याहुरार्क्षंसर्वेव्रतेषुच कस्मलतायां चांद्रेविवाहयज्ञादिगर्भकृत्यादिसावने नाक्षत्रेघनगर्भादिसौरेखेचरकर्मचेत्यादिविकल्पव्यवस्थादेशभेदेनविज्ञेया ८ विंध्यात् विंध्याचलपर्वतात् ९ राकांतःपूर्णिमांतः हरिघस्रांतःसूतिकायांभवःसौतः १० क्षयमासादिमासज्ञानमाह संक्रांतीति ११ कोकिलमासस्यज्ञा

नमाहस्पष्टं १२ शुचिराषाढः १३ पौर्णींपूर्णिमां १४ १५ संसर्पमासज्ञानमाहस्पष्टोर्थः १६ १७ १८ १९ स्तोकायुषामल्पायुषां २० २१ चातु
र्मास्यव्रतग्रहणविसर्जनकालमाह चातुर्मास्यव्रतानामितिपरिकल्पनंनिश्चयं २२ उपक्रममारंभः २३ २४ २५ चापार्कप्रवेशादिनतः धनसंक्रांतिप्रवे-

सम्यक्सर्पतिसर्वेषुपुण्यकर्मसुयःसदा अतःसंसर्पसंज्ञोयंमासःपुण्यैरवाप्यते १८ आश्विनेमासिसंसर्पयुतेष
ष्टिदिनात्मके कार्यव्रतोत्तमामिदंशोकदारिद्र्यनाशनम् १९ स्तोकायुषांनृणामतदाश्विनाद्वितयंकलौ सुदुर्लभमिति-
ज्ञात्वाश्रद्धयाव्रतमाचरेत् २० अशोकस्यव्रतंकार्यंद्वात्रिंशद्दिवसेषुच पूर्वाश्विनेशुक्लपक्षैकादश्यामारभेद्व्रतं २१ अंत्या
श्विनेपूर्णिमायांकुर्याद्व्रतसमापनं चातुर्मास्यव्रतानांचकुर्वीतपरिकल्पनं २२ व्रतप्रारंभकालास्तुप्रोक्ताःपंचैवविष्णुना
उपक्रमंचतुर्मासव्रतानांचनरःशुचौ २३ एकादशीद्वादशीचपौर्णमासीतथाष्टमी कर्कटाचैवसंक्रांतिस्तेषुकुर्याद्यथावि
धि २४ कार्तिकेशुक्लपक्षेतुद्वादश्यांतत्समापयेत् चत्वारोवार्षिकामासादेवस्योत्थापनावधि २५ सौरमानेनचापार्कप्र-
वेशादिनतःसुधीः यावन्मकरपर्यंतंधनुर्मासव्रतंचरेत् २६ अर्केशुक्रेकुजेपातेवैधृतौद्वादशीदिने धनुर्मासार्चनान्नृ-
णांकोटिकोटिगुणोत्तरं २७ एवमष्टादशानांचमासानांनिर्णयोमया संक्षेपेणप्रकथितोह्यथाध्यायादिकंब्रुवे २८
अथचैत्रस्यमाहात्म्यंत्रिंशदध्यायसंमितं भविष्योत्तरकेप्रोक्तमानंदलेशसंयुतं २९ ततोवैशाखमाहात्म्यंस्कांदोक्तंब
हुविस्तरम् पंचविंशाध्याययुक्तंपाद्मलेशसमन्वितं ३० अथाग्रेज्येष्ठमाहात्म्यंत्रिंशदध्यायसंमितम् भविष्योत्त
रकेप्रोक्तंतदेवात्रप्रकथ्यते ३१

शादिनमारभ्यमकरसंक्रमपर्यंतंसौरमासंधनुर्मासव्र
तमाचरेदिति २६ तत्रापिविशेषपर्वाण्याह पुण्यमितिशेषः २७ अध्यायादिकं अध्यायसंख्या आदिशब्देनपुराणप्रमाणमपि २८
आनंदलेशसंयुतं आनंदरामायणसारांशसहितम् २९ ३० ३१ ६ ६ ६

३२ ३३ ३४ ३५ ३६ स्कांदीयसारोद्धारोक्तं स्कंदपुराणांतर्गतसारोद्धारोक्तं पाद्म्यादिलेशसंयुतं पद्मपुराणब्रह्मपुराणाद्युक्तसारांशसहितं
३७ अपरंअध्यायाःसंति ३८ ३९ अथवायुप्रोक्तं ४० भविष्योक्तंनामपंचपर्वात्मकभविष्योपपुराणोक्तंनतुभविष्योत्तरमहापुराणप्रोक्तं ४१ झिं

अतः परंप्रवक्ष्यामित्याषाढस्यमहात्मकं एकोनत्रिंशदध्यायैः स्कांदोक्तंसुमनोहरं ३२ ततः श्रावणमाहात्म्यंत्रिंशद
ध्यायसंमितं अतिचित्रकथायुक्तंस्कांदोक्तंसुमनोहरं ३३ अथभाद्रपदस्यैवमाहात्म्यंचातिसुंदरं भविष्योत्तरकेप्रोक्तं
त्रिंशदध्यायसंयुतं ३४ स्कांदलेशेनसहितंततोग्रेचाश्विनाख्यकं वक्ष्यामिमासमाहात्म्यंदेवीपूजनसंयुतं ३५ प्रोक्तंभवि
ष्योत्तरेयत्त्रिंशदध्यायसंयुतं अनेकलेशसहितंमनोहरकथायुतं ३६ अतः परंकार्तिकस्यमाहात्म्यंकथयाम्यहं स्कांदी
यसारोद्धारोक्तंपाद्म्यादिलेशसंयुतं ३७ चतुर्विंशतिरध्यायास्तथासंत्यपिचापरे मार्गशीर्षस्यमाहात्म्यंषोडशाध्या
यसंमितं ३८ प्रोक्तंस्कंदपुराणेयत्तदेवप्रोच्यतेत्रहि ततः पौषस्यमाहात्म्यंस्कांदोक्तंप्रवदाम्यहं ३९ युक्तंपंचदशाध्याये
स्यमाघमहात्म्यकं त्रिंशदध्यायसहितंवायुप्रोक्तंसविस्तरं ४० तथाभविष्यपाद्म्यादिलेशेनचसमन्वितं अथफाल्गु
नमाहात्म्यंभविष्योक्तंमहाद्भुतं ४१ कथितंतत्रचाध्यायाःप्रोक्ताश्चझिंझिसंमिताः ततोहास्यरसैर्युक्तंमाहात्म्यंफा
ल्गुनोद्भवं ४२ अध्यायपंचकेनैवमन्मथोक्तंभविष्यति ततोग्राधिकमाहात्म्यंप्रोच्यतेबहुविस्तरं ४३ एकत्रिंशैस्तथा
ध्यायैः पुराणंसारसंयुतं ततोग्रेचभविष्योक्तंधनुर्मासमहात्म्यकं ४४ चतुरध्यायसंयुक्तमपरंचापितत्रहि पंचाध्या
यसमायुक्तंपंचरात्रागमोदितं ४५ एवंनवाध्याययुक्तमेकत्रिंशोस्ततःपरं कोकिलमासमाहात्म्यंस्कांदोक्तंप्रवदाम्यहं ४६

झीसंमिताः एकोनचत्वारिंशत्संख्याकाः झिंझीशब्देन एकोनचत्वारिंशत्संख्यास्वरशास्त्रेप्रसिद्धा ४२ मन्मथोक्तंमन्मथसंहितोक्तं अधिकमाहात्म्यंपुरु
षोत्तममासमाहात्म्यं ४३ पुराणसारसंयुतं पुराणसारसमुच्चयोक्तंभविष्यपद्मकालिकास्कंदनारदादिपुराणोक्तसारांशसहितमित्यर्थः ४४ ४५ ४६

०	नामानि	नामानि	सूर्याः	देव्यः	देवताः
१	चैत्रमासः	मधुः	वेदांगः	रमा·	विष्णुः
२	वैशाखः	माधवः	भानुः	मोहिनी·	मधुसूदन·
३	ज्येष्ठः	शुक्रः	इंद्रः	पद्माक्षी·	त्रिविक्रम·
४	आषाढः	शुचिः	रविः	कमला·	वामन·
५	श्रावणः	नभः	गभस्तिः	कांतिमती·	श्रीधरः
६	भाद्रपदः	नभस्यः	यमः	अपराजिता	हृषीकेशः
७	आश्विनः	स्वर्णरेताः	पद्मावलिः	इषा	पद्मनाभः
८	कार्तिकः	ऊर्जः	दिवाकरः	राधा·	दामोदरः
९	मार्गशीर्षः	सहः	मित्रः	विशालाक्षी	केशवः
१०	पौषः	सहस्यः	विष्णुः	लक्ष्मीः	नारायणः
११	माघः	तपः	अरुणः	रुक्मिणी·	माधवः
१२	फाल्गुनः	तपस्यः	सूर्यः	धात्री·	गोविंदः

तथैवविंशैरध्यायैस्संसपोख्यमहात्मकं भविष्योत्तरकेप्रोक्तंतदिहाद्यप्रकथ्यते ४६ ततोग्रेचचतुर्मासमाहात्म्यंप्रवदाम्यहम् मार्कंडेयेतथास्कांदेवाराहेचपुराणके ४७ यदुक्तंतस्यसारांशसारोद्धाराख्यसंज्ञकम् पंचाशतैस्तथाध्यायैः कथानकसमन्वितम् ४८ एवंप्रोक्तोमयासम्यक्माहात्म्याध्यायसंक्रमः॥ज्योतिषार्णवमध्यस्थधर्मस्कंधेमहाद्भुते ४९ अरुणोमाघमासेतुसूर्योवैफाल्गुनेतथा चैत्रमासेतुवेदांगोभानुर्वैशाखएवच ५० ज्येष्ठमासेतपेदिंद्रःआषाढेतपतेरविः गभस्तिःश्रावणेमासेयमोभाद्रपदेतथा ५१ स्वर्णरेताश्चाश्वयुजिकार्तिकेचदिवाकरः मार्गशीर्षेतपेन्मित्रःपौषेविष्णुःसनातनः ५२ इत्येतेद्वादशादित्यामासनामान्यनुक्रमात् केशवंमार्गशीर्षेतुपौषेनारायणंविदुः ५३ माधवंमाघमासेतुगोविंदमथफाल्गुने चैत्रेविष्णुंतथाविंद्याद्वैशाखेमधुसूदनं ५४ त्रिविक्रमंतथाज्येष्ठआषाढेवामनंविदुः श्रावणेश्रीधरंविद्याद्धृषीकेशंतुभाद्रके ५५ आश्विनेपद्मनाभंचऊर्जेदामोदरंविदुः मार्गशीर्षेविशालाक्षीपौषेलक्ष्मीश्चदेवता ५६ माघेतुरुक्मिणीप्रोक्ताधात्रीवैफाल्गुनेस्मृता चैत्रेमासेरमादेवीवैशाखेमोहिनीतथा ५७

५७ ५८ ५९ ६० ६१ ६२ इतिहरिकृष्णविनिर्मितायांदशोद्धारटीकायांप्रथमोध्यायः १ इहखलुभगवान्ज्ञानानंदाद्यनंतगुणपरिपूर्णः परमकारुणिकः श्रीवेदव्यासः सकलपुरुषार्थसाधनप्रकाशकस्यानंतवेदमहार्णवस्यतत्त्वज्ञानार्थमष्टादशपुराणान्यष्टादशोपपुराणादीनिचकारतथाचोक्तंव्याचक्रेचित्रगुह्येशातपथस्त्वदयंयः पुराणेतिहासैरित्यादि तेषुचकलिरूपाजगरगिलितानांअतएवस्वधर्मत्यागिनांमंदानांयोग्यप्राणिनांसंसृतिदुःखनिवारणार्थंव्रतस्नानदानजपादिनापापक्षयपूर्वकचित्तशुद्धिद्वारास्वरूपानंदाविर्भावलक्षणमोक्षसुखप्राप्तयेचैत्राद्यष्टादशमासमाहात्म्यानिचकार तत्रादौ निखिलनिगमार्थ सारभूतंचैत्रमाहात्म्यप्रतिपादकंप्रकरणं रामकथामृतमयंसरइवपृथिव्यांप्रतिष्ठापयामासग्रंथादौमंगलमाचरणीयमित्यन्यान्पौराणिका

पद्माक्षीज्येष्ठमासेतुआषाढेकमलेतिच कांतिमतीश्रावणेचभाद्रमास्यपराजिता ५८ पद्मावत्याश्विनेदेवीराधादेवीतुकार्तिके ५९ स्वनामतस्तुमासस्याद्विवर्णस्तुद्विदोरिति नाभ्यूर्ध्वाधः श्वेतकृष्णः पिंगलोचनमूर्द्धजः ६० सूर्यचंद्रान्वितः सोयप्रतिमासंतुपूज्यते स्वनामपूर्वकंमंत्रैर्होमपूजावसानकैः ६१ मासमाहात्म्याभिधान स्तवकेचतुर्यके उपोद्घातप्रसंगाख्योऽत्राध्यायःप्रथमोऽभवत् ६२ इतिश्रीगुर्जरव्यंकटरामात्मजहरिकृष्णविनिर्मितेबृहज्ज्योतिषार्णवे अष्टमेधर्मस्कंधेमासमाहात्म्यस्तवकेउपोद्घाताध्यायः १ ॥ अथचैत्रमासमाहात्म्यप्रारंभः ॥ ॥ ॥नारायणंनमस्कृत्यनरंचैवनरोत्तमम् देवींसरस्वतींचैवततोजयमुदीरयेत् १

नुपशिक्षयन्स्वयमाचरतिनारायणमिति अत्रनारायणपदेनांतर्यामिजलशायिश्रीकृष्णग्रहणात् तदुक्तंनारोजीवसमूहः स्यादयनंतत्प्रवर्तनमित्यंतर्यामिनोग्रहणंतथा आपोनाराइतिप्रोक्ता आपोवैनरसूनवः अयनंतस्यताःपूर्वंतेननारायणस्मृतइति जलशायिनोग्रहणं इतरयोरुक्तप्रसिद्धं यथाश्रीभागवतेताविमौवैभगवतोहरेरंशाविहागतौभारव्ययायचभुवः कृष्णौयदुकुरूद्वहौ तंत्रेच अर्जुनेतुनरोवेशः कृष्णोनारायणः स्वयमितिनरपदेनहिरण्यगर्भव्यष्टिजीवसुन्यर्ज्जुनानांग्रहणंनरोऽजेमनुजेऽर्जुनेइतिमेदिनीकोशः नरोत्तमंनृन्उत्तमयतिश्रवणादिनाश्रे

३

श्रेष्ठत्वंगमयतीति नरोत्तमोव्यासः तत्संप्रदायप्रवर्तकत्वात्तंचनमस्कृत्यदेवींसरस्वतींतदुपदेशाद्व्यांसरस्वतींवाचंदेवींद्योतनात्मिकांचनमस्कृत्यव्यासमिति पाठेनरोत्तममितिप्रत्येकंसंबंधनीयंजयत्यनेनाविद्यांतत्कार्यंसंसारंचेतिजयोग्रंथस्तमुदीरयेदितिशिक्षाजयशब्दस्यार्थोभविष्योत्तरे विष्णुधर्मादिशास्त्राणिशिवधर्माश्चभारत कार्ष्णंचपंचमोवेदोयन्मयाभारतंस्मृतं सीतारामादिधर्माश्चमानवोक्तामहीपते जयेतिनामचैतेषांप्रवदंतिमनीषिणः इति १ हेमुनीश्वर हेरोमहर्षण एतन्माहात्म्यवक्तासूतः रोमहर्षणः यतोभविष्योत्तरपुराणवक्तारोमहर्षणः तथाचोक्तंपाद्मे ब्राह्मंपाद्मंवैष्णवंचकूर्ममात्स्यचवामनं वाराहंब्रह्मवैवर्तंनारदीयंभविष्यकं आग्नेयमष्टौवैसूताच्छुश्रुवुर्लोमहर्षणात् एतानितुपुराणानिद्वापारांतेश्रुतेनहि शौनकाद्यैर्मु

ऋषयऊचुः कथितास्तेकथाब्रह्मन्नानाविस्मयकारकाः इदानींश्रोतुमिच्छामस्तत्त्वंवदमुनीश्वर २ मासाश्चद्वादशप्रोक्तास्तेषांमध्येवरश्चकः यस्मिन्स्नानेनदानेनसर्वमासफलंलभेत् ३ सूतउवाच भोभोऋषिवराःसर्वेयूयंधन्यास्तपस्विनः भवद्भिःपरमःप्रश्नःकृतोलोकोपकारकः ४ सावधानेनमनसाशृणुध्वंप्रोच्यतेमया मासानांप्रथमोमासश्चैत्रमासस्तुकथ्यते ५ दानयज्ञव्रतसमःसर्वकामप्रदःस्मृतः यस्मिन्स्नानंचदानंचभवेत्कोटिगुणाधिकम् ६ तीर्थेषुप्रथमंयद्वत्कीर्त्यतेपुष्करंशुभम् नदीषुप्रथमायद्वत्स्वर्धुनीसंप्रगीयते ७ भास्करःप्रथमोयद्वत्प्रोच्यतेग्रहमंडले तिथीषुप्रथमायद्वद्बहुलाप्रतिपत्तिथिः ८

निवरैर्यज्ञारंभास्सुरैवहीति २ ३ ऋषिवराःऋषिश्रेष्ठाःपरमःश्रेष्ठः ४ मासानांद्वादशमासानांमध्येऽयंप्रथमःचैत्रमासः चित्रयायुक्ताचैत्रीपूर्णिमातयायुक्तश्चैत्रः सएवमासः चैत्रोमोहनिकः कामसखश्च फाल्गुनानुजःचैत्रिकश्चेतिकोशः अब्दस्यारंभत्वादयमेवप्रथमःकथ्यतइति ५ ६ स्वर्धुनीभागीरथी ७ बहुलाप्रतिपत्कृष्णपक्षस्यप्रतिपत् असितोबहुलःकृष्णःशुक्लेतरसितेतरइतिकोशः प्रतिपत्तिथ्याधिक्यसंमाननाच्चप्रायःदुत्तरदेशनिवासिनांमतेनेत्यवगंतव्यंतेषांतद्दिनतएवमासारंभःसत्वात् ८

९ १० सुरैरर्चितःपूजितः ११ १२ १३ सुहृदांसंबंधिनां १४ लोहानांधातूनां १५ १६ मीनेमीनसंक्रांतौअरुणोदयलक्षणंपंचपंच

संवत्सरेषुसर्वेषुयद्वत्तुप्रभवःस्मृतः तद्वच्चैत्रश्चमासेषुसर्वेषुप्रथमःस्मृतः ९ मासानांप्रथमोमासश्चैत्रमासःप्र
कीर्त्यते मातृवत्सर्वजीवानांसदैवेष्टफलप्रदः १० धर्मसारःक्रियासारस्तपःसारःसुरार्चितः सर्वदासर्वजीवा
नांमहापातकनाशनः ११ विद्यानांवेदविद्येवमंत्राणांप्रणवोयथा भूरुहाणांसुरतरुर्धेनूनांकामगौर्यथा १२
शेषोयथाचनागानांपक्षिणांगरुडोयथा देवानांचयथाविष्णुर्वर्णानांब्राह्मणोयथा १३ प्राणश्चप्रियवस्तूनां
भार्येवसुहृदांयथा पुष्पेषुचयथापद्मंसरसांमानसंयथा १४ आयुधानांयथावज्रंलोहानांकांचनंयथा वैष्ण
वानांयथारुद्रोरत्नानांकौस्तुभोयथा १५ मासानांधर्महेतूनांचैत्रमासस्तथास्मृतः नानेनसदृशोलोकेविष्णुप्री
तिविधायकः १६ चैत्रस्नानेचनिरतोमीनेप्रागरुणोदयात् लक्ष्मीसहायोभगवान्प्रीतिंतस्मिन्करोत्यलम् १७
जंतूनांप्रीणनंयद्वदन्नेनैवाहिजायते तद्वच्चैत्रेतुस्नानेनविष्णुःप्रीणात्यसंशयः १८ यश्चैत्रस्नाननिरतान्जनान्दृ
ष्ट्वानुमोदते तावत्तापिविमुक्ताघोविष्णुलोकेमहीयते १९ सकृत्स्नात्वामीनसंस्थेसूर्येप्रातःकृताह्निकः महापा
पविनिर्मुक्तोविष्णोःसायुज्यमाप्नुयात् २० एवंप्रभावःखलुभोमुनीश्वराःश्रीचैत्रमासस्यमयाप्रकीर्तितः स्नास्यं
तियेतत्रनरामहाधियस्तेस्वर्गलोकेबहुभोगभागिनः २१ इतिश्रीभविष्योत्तरपुराणेअयोध्याखंडेचैत्र
माहात्म्येचैत्रमासवर्णनंनामप्रथमोऽध्यायः १

उषःकालःषट्पंचैवारुणोदयः सप्तपंचभवेत्प्रातः शेषःसूर्योदयःस्मृतइति १७ प्रीणनंतर्पणंतृप्तिःप्रीणातिसंतुष्टोभवति १८ अनुमोदते अनु
मोदनंकरोति तावत्तानुमोदनमात्रेणतपः १९ २० २१ इतिटीकायांप्रथमोऽध्यायः १ ६२ ६९

१ २ ३ ४ ५ ६ ७ अशनात्तुल्याभोजनतुल्या ८ मासमितिशेषः ९ १० ११ अव्रतेनव्रताचरणंविनारुरुर्नाम अतिक्रूरसत्वाप देशः रुरोः इयंरौरवीतां १२ नद्यादाविनिशेषः १३ कूटचित्तः कुटिलांतःकरणः केवलसंकल्पमात्रकः स्नानंकरोमि दानंदास्यामीतिवाचकः न

ऋषयऊचुः भोभोसूतमुनिश्रेष्ठयस्त्वयाकथितःशुभः चैत्रमासप्रभावश्चश्रुतोस्माभिश्चसादरात् १ इदानींप्रष्टुमिच्छामःपुनश्चैत्रस्यवर्णनम् विशेषात्सर्वपापानांनाशकारणमुत्तमम् २ तत्त्वंवद महाभागकृपयास्माकमादरात् नैत्वद्गुणसमोवक्ताजगत्यांविद्यतेमुने ३ सूतउवाच शृण्वंतुमुनयःसर्वेचैत्रमासस्यवर्णनं भवद्भिश्चैवयत्स्पृष्टं प्रोच्यतेतन्मयाधुना ४ नचैत्रेणसमोमासोनकृतेनसमोयुगः नचवेदसमं शास्त्रंनतीर्थंपुष्करोपमं ५ नजलेनसमंदानंनसुखंभार्ययासमं नकृतेस्तुसमंवित्तंनलाभोजीवितात्परः ६ नतपोनशनात्तुल्यंनदानात्परमंसुखम् नधर्मस्तुदयातुल्योनज्योतिश्चक्षुषासमं ७ नतृप्तिरशनात्तुल्यानवाणिज्यंकृषेःसमम् नधर्मेणसमंवित्तं नसत्येनसमंयशः ८ नारोग्यसममुत्थानंनत्राताकेशवात्परः नहिचैत्रसमंलोकेपवित्रंकवयोविदुः ९ सर्वेषांचैवमासानामुत्तमागमकीर्तितं यथेंद्रियाणांसर्वेषांशिरःश्रेष्ठंप्रकीर्त्यते १० चैत्रमासेनरैःकार्यंप्रातःस्नानंविधानतः नियमश्चविधातव्योयथाशक्त्याव्रतंचरेत् ११ अव्रतेननयेद्यस्तुमधुमासंमहाशुभम् रौरवीयातनाभुक्त्वातिर्यग्योनिंसगच्छति १२ स्नानार्थंचैत्रमासेयःपादमेकंचलेद्यदि सोश्वमेधशतानांचफलंप्राप्नोत्यसंशयः१३ अथवाकूटचित्तस्तुकुर्यात्संकल्पमात्रकम् सोपिक्रतुशतंपुण्यंलभत्येवनसंशयः १४ योगच्छेद्धनुरायामस्नातुंमीनगतेरवौ सर्वबाधाविनिर्मुक्तोविष्णुलोकंसगच्छति १५

तुदातास्नातान्च सोपिक्रतुशतंपुण्यंलभतेइत्यर्थः १४ धनुरायामंधनुर्निक्षेपपरिमितदूरंजलाश्रयंप्रति १५ ६ ६

स्वग्रामनिकटे तीर्थनद्याद्यभावेपि स्वल्पजलाशयेबाह्येएवस्नानार्थंगच्छेदित्याह त्रैलोक्येति १६ १७ १८ १९ २० २१ २२ इतिटी·

त्रैलोक्येयानितीर्थानि ब्रह्मांडांतर्गतानिच तानिसर्वाणिचैत्रेस्मिन्संतिबाह्यजलेल्पके १६ तावद्गर्जंतिपापा
निगर्जंतियमशासने यावन्नकुरुतेजंतुश्चैत्रेस्नानंजलाशये १७ तीर्थादिदेवताःसर्वाश्चैत्रेमासिमुनीश्वराः ब
हिर्जलंसमाश्रित्यसदासन्निहिताःशुभाः १८ सूर्योदयंसमारभ्ययावत्षड्घटिकावधि तिष्ठंतिचाज्ञयाविष्णो
र्नराणांहितकाम्यया १९ तत्राप्यकुर्वतःस्नानंशापंदत्वासुदारुणं स्वस्थानंयांतिशीघ्रंहितस्मात्स्नानंसमाचरेत्
२० तस्मादयंचैत्रमासःशेषशायिप्रियःसदा अव्रतेननयेद्यस्तुचांडालश्चसजायते २१ एवंमहत्सौख्यविवृद्धि
कारीश्रीचैत्रमासस्त्रयास्मृतोहि स्नानेनयस्मिन्सकलाघनाशःप्रकीर्तितःश्रेष्ठमुनीश्वरैर्हि २२ इतिश्रीभ
विष्योत्तरपुराणे अयोध्याखंडेचैत्रमाहात्म्येचैत्रस्नानकालवर्णनंनामद्वितीयोऽध्यायः २ ऋषयऊचुः
किंदानंकिंफलंतत्रकमुद्दिश्यचरेद्व्रतम् कस्मिंस्तीर्थेचकर्तव्यंचैत्रस्नानंमहाफलम् १ कृतंकेनपुरासूतचैत्रस्ना
नंमहाफलं कोविधिश्चकदारंभःसर्वंविस्तरतोवद २ सूतउवाच सौराष्ट्रविषयेकश्चिद्राजापरमधार्मिकः
पुण्यकीर्तिरितिख्यातःसर्वशस्त्रास्त्रभृज्जयी ३ चंद्राननेतिनामासीद्दयितातस्यभूभृतः पातिव्रत्येनधर्मेण
तोषयंतीपतिंसदा ४ अनपत्यःसराजाथबहुचिंतापरायणः भार्ययासहितोराजारंतुंबलसमन्वितः ५
ययौवनेमहारम्येनानाद्रुमविराजिते नानापक्षिशताकीर्णेबहुश्वापदसेविते ६

कायांद्वितीयोऽध्यायः २ ध कंदेवं १ २ सौराष्ट्रविषये सौराष्ट्रदेशे पश्चिमसमुद्रतीरे द्वारकानिकटे ३ ४ रंतुंरमणंकर्तुं
क्रीडांकर्तुंबलसमन्वितः ५ श्वापदाः गजसिंहमृगव्याघ्रादयः ६ ध ध ध ध

रसाल आम्रवृक्षः अर्जुनःअर्जुनसादडा इतिप्रसिद्धः वृक्षभेदःदर्भभेदः तृणविशेषश्च भूनिंबः किराइतःजंबुःप्रसिद्धः प्लक्षः पिंपरीवृक्षः आम्लवेतसोनिंबुभेदः ७
शालःसागवृक्षः क्षुद्रफणसवृक्षः चारोलीवृक्षो वा तालः ताडवृक्षः हिंतालः कंटकताडवृक्षः नलदःजटामांसी शेषंस्पष्टं ८ शाल्मली सांवरीवृक्षः ९ १०

सभार्यःशिबिकारूढःपश्यन्वनमनुत्तमं रसालार्जुनभूनिंबूजंबुप्लक्षाम्लवेतसैः ७ शालैस्तालैस्तमालैश्चहिंतालैःसर्वतोवृत
नलदैर्वेणुगुफाभिःकेतकीभिर्विराजितं ८ शाल्मलीतिंटिणीबीजपूरैर्दाडिमष्टाहितं पनसैःकदलीभिश्चनानावल्लि
विराजितं ९ करवीरैलमारैश्चखर्जूरीवृक्षमंडितं जातिपत्रीलवंगादिनानातरुविराजितं १० सारिकाबककारंड
कोकिंकेकाशताकुलं कपोतापिकचाषैश्चसर्वतोपिविराजितं ११ नदीशतसमाक्रांतंनानागिरिविराजितं तटाकैर्विविधैश्च
नानाद्विजनिषेवितं १२ कौतुकान्दर्शयन्पत्न्यैपुण्यकीर्तिर्नृपोत्तमः शनैःशनैःसविंध्याद्रेःशिखरंप्रतिचाययौ
१३ दृष्ट्वातत्रसरःश्रेष्ठंरम्यंपरमसुंदरं समुद्रप्रतिमंदिव्यंहेमपंकेरुहान्वितम् १४ नानावृक्षशताकीर्णंबहुपक्षिविनादितं
तत्रराजापुण्यकीर्तिर्विंध्याद्रेःशिखरेशुभे १५ स्फटिकैश्चित्रितेदेशेस्वावासमकरोत्ततः सैन्येनभार्यायुक्तः
स्त्रीसहस्रसमाकुलः १६ कियत्कालंनृपस्तत्रतस्थौक्रीडन्सभार्यया एतस्मिन्नंतरेतत्रमाध्यान्हेतत्सरोवरे
१७ ययौमार्गेणमांडव्यःसहस्रमुनिसंयुतः पुण्यकीर्तिश्चतंदृष्ट्वाप्रत्युत्थायमुनीश्वरं १८ ऋषिभिःसहितं
नत्वाऽऽसनेतान्संन्यवेशयत् पादावनेजनंतेषांराजाकृत्वासभार्यया १९ चंदनैःशीतलैर्लेपंचक्रेतुशांमनोरमं
चूतजंबुकपित्थादिनानाफलपुरःसरम् २० उपचारैःषोडशभिःपूजयामासतान्मुनीन् वीजयन्व्यजनेनापिसूपविष्टान्
मुनीश्वरान् २१ पप्रच्छराजाविनयात्बद्धकरसंपुटः कुतआगमनंजातंगम्यतेक्वइतःपरम् २२

केकीमयूरस्तस्य केकामयूरध्वनिः पिकःकोकिलः ११ १२ १३ हेमपंकेरुहान्वितंसुवर्णकमलैर्युतं १४ १५ १६ १७ १८ १९ २० २१ २२

२३ इतिटीकायांतृतीयोऽध्यायः३ ब्रह्मादिर्ब्रह्मागिरिःयत्रत्र्यंबकेश्वरःस्थितःस्तस्य १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२

श्रुत्वामुनीनांचकदंबकेनयद्भाषितंगोप्रतिपालकेन प्रोवाचमांडव्यमुनिश्चहर्षात्पृथ्वीपतिंवाक्यमतिप्रशस्तं २३ इतिश्रीभविष्योत्तरपुराणेअयोध्याखंडेचैत्रमाहात्म्येराजमांडव्यसमागमोनामतृतीयोऽध्यायः३ मांडव्यउवाच शृणुराजन्प्रवक्ष्यामियत्पृष्टंभवतानघ ब्रह्मादेर्दर्शनंकृत्वाचागताःस्मस्तवांतिकं १ इदानींगम्यतेराजन्चैत्रस्नानार्थमादरात् विचित्रेसरयूतीरेश्चैवायोध्यापुरींप्रति २ इतिमांडव्यमुनिनायत्प्रोक्तंवचनंशुभं पुण्यकीर्तिश्चतच्छ्रुत्वापुनःपप्रच्छसादरं ३ पुण्यकीर्तिरुवाच भोमांडव्यमुनिश्रेष्ठयत्प्रोक्तंप्रभुणात्वया मधुमासेवगाहार्थमयोध्यागम्यतेमया ४ अत्रजातोस्तिसंदेहोमुनेत्वंतंनिवारय कथंसर्वेषुमासेषुचैत्रमासस्त्वयास्मृतः ५ कथंस्नानंचैत्रमासेकर्तव्यंचेतिमांवद इतिश्रुत्वानृपणोक्तंमांडव्यःपुनरब्रवीत् ६ सम्यगुक्तंत्वयाराजन्शृणुष्वावहितोभव चैत्रमाससमोमासोनभूतोनभविष्यति ७ यथाविष्णुसमोदेवोनभूतोनभविष्यति। यथामूलंहिवृक्षस्यप्रधानंसर्वदोच्यते ८ तथामासेषुसर्वेषुमधुमासःप्रकथ्यते यत्कृतंमधुमासेवैयदास्यान्मीनगोरविः ९ सर्वंतदक्षयंविद्यान्नात्रकार्याविचारणा स्नानंदानजपोहोमःश्राद्धंचपितृतर्पणं १० देवपूजादिकंसर्वंभवेत्कोटिगुणंमधौ तस्मात्सर्वप्रयत्नेनस्नातव्यंमधुमासके ११ यथागृहंसर्वगुणोपपन्नंनशोभतेहीनपरिच्छदंनृप तथान्यमासेषुकृतोहिधर्मश्चैत्रेणहीनश्चवृथैवयाति १२ यथैवकन्यासकलैश्चलक्षणैर्युक्तापिजीवत्पतिलक्षणोज्झिता तथान्यमासेषुकृतोहिधर्मश्चैत्रेणहीनश्चवृथैवयाति १३ शाकंतुयद्वल्लवणेनहीनंनशोभतेसर्वगुणोपपन्नं तथान्यमासेषुकृतोहिधर्मश्चैत्रेणहीनश्चवृथैवयाति १४

यथासकलैर्लक्षणैर्युक्ताकन्याजीवत्पतिलक्षणोज्झिताजीवत्पतिलक्षणेनकुंकुमकज्जलादिसौभाग्यलक्षणेनउज्झितात्यक्तानशोभतेतथा १३ १४ ६ ६

ललनास्त्री यथाललामैर्भालस्यकुंकुमतिलकैः कुसुमैः पुष्पैश्चयथा न शोभते एवंचैत्रेणचैत्रमासधर्मेणविनान्यमासकृतधर्मोपि १५ १६ कृष्ण
भक्तेनाप्येतद्व्रतमवश्यंकर्त्तव्यमित्याह ननंदसूनोरिति १७ १८ १९ कांस्यभोजीकांस्यपात्रेभोजनकर्ता अश्रुतसत्कथः नश्रुता अश्रुता अश्रु

यथाललामैःकुसुमैर्नभासतेवस्त्रेणहीनाललनाचराजन् तथान्यमासेषुकृतोहिधर्मश्चैत्रेणहीनश्चवृथैवयाति
१५ तस्मात्सर्वप्रयत्नेनयेनकेनापिदेहिना चैत्रमासस्ययोधर्मःकर्त्तव्यइतिनिश्चयः १६ ननदसूनोःपृथगस्तिरामो
नरामतोन्योवसुदेवसूनुः अतस्त्वयोध्यापुरपालकस्यचैत्रेतुकार्योविधिर्वस्त्रपूजने १७ जानकीकान्तमुद्दिश्यमीनसंस्थे
दिवाकरे प्रातःस्नात्वाजपेद्राममन्यथानरकंव्रजेत् १८ चैत्रमासोहिसकलोसीताराघवदैवतः यद्यत्कर्महितत्सर्वंतमुद्दि
श्यचरेन्नरः १९ चैत्रेयःकांस्यभोजीहितथाचाश्रुतसत्कथः अस्नाताश्चाप्यदाताचनरकान्संविंदति २० तैलाभ्यंगंदिवा
स्वापंतथावैकांस्यभोजनं खट्वांनिद्रांगृहेस्नानंनिषिद्धस्यचभक्षणं २१ चैत्रेतुवर्जयेदष्टौहिभुक्तंनिशिभोजनं चैत्र-
मासेतुमध्यान्हेश्रांतानांचद्विजन्मनां २२ पादावनेजनंकुर्यात्तद्व्रतंतुव्रतोत्तमम् मस्तकेधारयेच्चापस्तत्पादस्पर्शसंभ
वाः २३ एवंहिसर्वेषुचचैत्रमासोमासेषुपुण्योपचयप्रदाता प्रोक्तोमयाभोनृपपुण्यकीर्ते भुक्तिंचमुक्तिंचददातिस
वान् २४ इतिश्रीभविष्योत्तरपुराणेअयोध्याखंडेचैत्रमाहात्म्येचैत्रश्रेष्ठत्ववर्णनंनामचतुर्थोऽध्यायः ४ ॥
पुण्यकीर्तिरुवाच किमर्थंमधुमासोहिसर्वमासेषुचाधिकः तन्मांडव्यसमाख्याहिकृपांकृत्वाममोपरि १ मांड
व्यउवाच शृणुराजन्पुण्यकीर्तेचैत्राधिक्यस्यकारणं यत्पृष्टंचत्वयापुण्यंमहापातकनाशनम् २

नासत्कथाईश्वर
संबंधिनीकथायेनअस्नातोनबहिर्जलस्नाता २० निषिद्धस्यमासकुलित्थमसूरादिधान्यस्यमूलकादिजंबीरादिफलशाकाद्यामिषस्य २१ अष्टौवर्जयेदिति
पूर्वेणसंबंधः २२ तत्पादस्पर्शसंभवाश्चापः तत्पादप्रक्षालनजलंमस्तकेधारयेत् २३ २४ इतिटीकायां ४ आधिकः आधिकपुण्यप्रदाता १ २

३ ४ अमरत्वंवरंवव्रेतदाब्रह्मा अमरत्वंनप्रादादुवाचच ५ सर्वैर्जनैः सर्वजंतुभिः मरुद्गणैः देवैः ६ इंद्रंयदस्याभिलाषेतपसितस्मे देवप्रेषितया वाणीरूपयासरस्वत्याविमोहितंवहुनिद्रापदंयाच्यमानंकुंभकर्णंप्राह ७ ८ रजोगुणयुक्तोरावणः कुंभकर्णस्तामसः विभीषणस्तु केवलः सात्विकः अत

पुराराक्षसवंशेतुसमुत्पन्नामहाबलाः रावणःकुंभकर्णश्चविभीषणइतित्रयः ३ तैस्तप्तंचतपःश्रेष्ठंतोषितश्चतुराननः ददौतेषांवरान्ब्रह्मातान्शृणुष्वनृपोत्तम ४ रावणश्चवरंरम्यंवव्रेब्रह्माणमुत्तमम् अमरत्वनसप्रादात्ततोब्रह्माब्रवीद्वचः ५ यज्जातंनश्यतिक्षिप्रंतत्सर्वंकालपर्ययात् अतोमनुष्यहीनैस्त्वंजनैःसर्वैर्मरुद्गणैः ६ अवध्योभव वीर्येणमहत्ख्यातिंगमिष्यति कुंभकर्णंततःप्राहसरस्वत्याविमोहितः ७ बहुनिद्रांयाच्यमानंषण्मासांनिद्रितोभव षण्माससंभवोयोहिआहारस्तवभोसुर ८ निद्रांतेदिवसेत्वेकेभविष्यतिनसंशयः ततोविभीषणंप्राहसात्विकंचतुराननः ९ हरिभक्तिंयाच्यमानंसत्यधर्मपरायण नारायणःसदातेस्तुहृदयेभोविभीषण १० इत्युक्त्वाप्रययौब्रह्मा सत्यलोकंसनातन रावणःकुंभकर्णश्चगर्वितौतद्वरादुभौ ११ त्रैलोक्यंपीडयंतौतौयज्ञविघ्नविधायिनौ चक्रतुःसागरेवासंरम्येवैत्रिकुटाचले १२ लंकायांराक्षसेंद्राणांराजधान्यांबलैःसह देवान्स्ववशगान्कृत्वारावणश्चातिगर्वितः १३ निघ्नन्ऋषीन्जनान्सर्वान्पीडयन्जगतीतलं तद्बलेनहिपुष्टांगाराक्षसास्तलवासिनः १४ पृथिवींप्रययुःसर्वेनानोपद्रवकारिणः तेषांभारेणखिन्नासाजगतीक्षीरनीरधिं १५ प्रययौशरणंविष्णुंदिव्यस्त्रीरूपधारिणी प्रार्थयामासतंकृष्णंततःप्रोवाचतांहरिः १६ किंकार्यंवदभोदेविकिमर्थमिहचागता साप्रोवाचमहाविष्णुंभूर्भारं नसहाम्यहं १७ मज्जामिजलमध्येहिप्राणांस्त्यक्ष्यामिनिश्चितं इतितस्यावचःश्रुत्वाज्ञात्वाब्रह्मोदितंवरं १८

एवसात्विकंतं ९ सागरेत्रिकुटाचलेसमुद्रमध्यस्थत्रिकुटाचले १२ १३ तलवासिनःपातालवासिनः १४ तेषांदुष्टदैत्यानां १५ १६ १७ १८

१९ २० २१ तत्रक्षीरसमुद्रे २२ २३ २४ रुद्रादिभिः रुद्रगणादिभिः २५ इतिटीकायांपंचमोऽध्यायः ५ छ

जगतींश्रीहरिःप्राहमादेहंत्यजसुंदरी अवतारंग्रहिष्यामिनरजन्मनित्वत्कृते १९ भूभारंसंहरिष्यामिसंवाधि
ष्यामिरावणं यथास्थानंसुखंगच्छमारवेदंभजभामिनी २० इतिसावचनंश्रुत्वावासुदेवस्यपावनी पृथ्वीययौनिजं
स्थानंकिंचिद्धर्षसमन्विता २१ श्रीकृष्णोपिक्षणंध्यात्वादेवान्सस्मारचेतसि ततोब्रह्मादिकाःसर्वेययुस्तत्रक्षणेनहि
२२ नत्वानारायणंदेवंप्रबद्धकरसंपुटाः स्थिताश्चेंद्रेणसहितास्तुतिंकृत्वापुनःपुनः २३ तान्प्रोवाचहरिःसाक्षा
दवतारंनृजन्मनि अधुनाहंग्रहीष्यामिभूभारहरणायवै २४ सर्वेमरुद्भिःकपिरूपधृग्भिःयुद्धेजगत्यांममतत्सहा
य्यम् रुद्रादिभिर्वैकरणीयमत्रतरावणंभ्रातृबलंहनिष्ये २५ इतिश्रीभविष्योत्तरपुराणेअयोध्याखंडेचै
त्रमाहात्म्येहरिपृथ्वीसंवादोनामपंचमोऽध्यायः ५ मांडव्यउवाच इतिब्रह्मादिकानुक्त्वावासुदेवस्त
दानृप अयोध्यापालकस्याथराज्ञोदशरथस्यहि १ कौसल्यायास्तुभार्यायाजठरान्निर्गतोबहिः चैत्रमासिसि
तेपक्षेनवम्यांपरमेदिने २ मध्याह्नेप्रकटोजातःश्रीरामोराजसद्मनि आनंदश्चतदाजातःसर्वत्रजगतीतले
३ देवदुंदुभयोनेदुःपुष्पवृष्टिःशुभापतत् राजसद्मनिवाद्यानांसंघानेदुःपृथक्पृथक् ४ ननृतुश्चाप्सरारम्या
जगुर्गीतमनोरमम् तदासर्वेहिभूमिस्थाजनाद्रष्टुंशिशुंशुभं ५ प्रययुर्नृपजंबालंदृष्ट्वामुदमवाप्नुयुः नानाविमा-
नमारूढादिविदेवाःसवासवाः ६ मिलिताराघवंद्रष्टुंकौसल्याजठरोद्भवम् ब्रह्मारुद्रश्चसूर्यश्चदेवेंद्रादिसुराःशुभाः
७ उत्सवान्विदधुःसर्वेतदाश्रीरामजन्मनि एवमुत्साहसमयेदेवाहर्षाद्दिविस्थिताः ८

१ २ ३ संघाःसमूहाः ४ ५ अवाप्नुयुः ६ ७ ८ छ छ छ

९ १० अयंतवजन्ममासकालः ११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२ २३

मासस्त्व॰

नमस्कृत्यरामचंद्रंतुष्टुवुर्विविधैःस्तवैः प्रोचुस्तदासुराःसर्वेहर्षाद्देवंरघूत्तमं ९ अद्यधन्यावयंदेवमुक्ताश्चासुर-
जाद्भयात् यस्मिन्मासेत्वयादेवह्यवतारःकृतोभुवि १० अस्माकंहर्षकालोयंदेवदेवकृपानिधे तस्माद्दयंसदापुण्यःश्रे
ष्ठःकालोभविष्यति ११ त्वंचाप्यंगीकुरुष्वाद्यदेहत्यस्मैसुखहन्वरान् इतितेषांवचःश्रुत्वादेवानांराघवःशुभं १२ तुतोषनितरां
तेषुदेवेषुभगवान्हरिः सम्यक्प्रोक्तंसुराःसर्वेयत्त्रैलोक्योपकारकं १३ भवद्भिःप्रार्थितोह्यत्तुहर्षकालेमहत्तमे शृणुध्वंव
चनमेद्ययद्धर्षात्प्रोच्यतेमया १४ सर्वेषामेवमासानांश्रेष्ठश्चायंभविष्यति वैशाखात्कार्तिकःश्रेष्ठःकार्तिकान्माघएवच
१५ माघमासाद्वरश्चायंचैत्रमासोभविष्यति चैत्रमासेकृतंदत्तंहुतंस्नानंविचिंतितं १६ सर्वंकोटिगुणंप्रोक्तमयोध्यायांवि
शेषतः यच्छ्रेयश्चाश्वमेधेनगोमेधेनचयत्फलं १७ यत्फलंसोमयागेनतच्चैत्रेस्नानमात्रतः सूर्यग्रहेकुरुक्षेत्रेयच्छ्रेयःस्नानदा
नतः १८ तच्छ्रेयःस्यान्मधौस्नानादयोध्यायांसुरोत्तमाः अत्रवैसरयूतीरेरावणंलोकरावणं १९ हत्वातत्पापशांत्यर्थंकरिष्या
मिक्रतुंशुभं यत्रयागसमाप्तिर्हिभविष्यतिसुरोत्तमाः २० तत्तीर्थंममनाम्नाहिख्यातिंश्रेष्ठांगमिष्यति अयोध्यायांराम-
तीर्थेसरयूजलमध्यगे २१ चैत्रस्नानंप्रकुर्वाणास्तेनरामोक्षभागिनः यथामाघःप्रयागेहिस्नातव्यःसुखमिच्छता २२ कार्ति-
कोपियथाकाश्यांपंचगंगाजलेस्मृतः द्वारकायांयथाप्रोक्तोवैशाखोमाधवप्रियः २३ अयोध्यायांरामतीर्थेतथाचैत्रोभवि
ष्यति २४ चैत्रमासेतुसंप्राप्तेसर्वेदेवाःसवासवाः बहिर्जलंसमाश्रित्यतिष्ठध्वंहिममाज्ञया २५ एवंहरिस्तान्मघवादिका
न्सुरानुक्त्वासुरैस्तैश्चनमस्कृतोबभौ वृषेंद्रमारुह्यशिवोनिजस्थलंययौसुरास्तेपिययुर्निजंस्थलं २६

२४ सवासवाः सेंद्राः २५ २६ ६९ ६९ ६९ ६९

इतिटीकायांषष्ठः ६ १ २ ३ ४ ५ ६ ७ ८ व्रतस्यप्रारंभकरणेविसर्जनेचकालप्रमाणेप्रकारत्रयमाह फाल्गुनस्येत्यादिना ९ १० ११ १२ व्रतग्रहणसंकल्पसमयेदेशकालाद्युच्चार्यनियमप्रार्थनामंत्रावाहद्वाभ्यांसीताकांतेत्यादिना १३ १४ १५ इष्टदेवतास्मृत्वाप्रातःस्मरणंकृत्वा १६

इतिश्रीभविष्योत्तरपुराणेअयोध्याखंडेचैत्र०चैत्रमासवरप्रदानंनामषष्ठोऽध्यायः ६ मांडव्यउवाच तस्मात्सर्वेषु मासेषुमुख्यश्चैत्रःप्रकीर्त्यते मासादौःप्रथमःसर्वैःप्रोच्यतेहिवरान्नरैः १ चैत्रमासिप्रकर्तव्यंतस्मात्स्नानंनरोत्तमैः अरुणोदयवेलायां यावत्सूर्यस्यदर्शनं २ तावत्स्नानंप्रशंसंतिमुनयस्तत्ववादिनः निर्णयंतत्रराजेंद्रप्रवदामिचतंशृणु ३ षण्नाड्यधिकपंचाशद्यदासूर्योदयाद्भवेत् अरुणोदयकालोसौनतोनाडीत्रयावधि ४ सूर्योदयस्ततश्चोर्ध्वंघटिकामात्रएवहि प्रोक्तोमुनिवरैःश्रेष्ठैःसर्वशास्त्रार्थपारगैः ५ यदालंकापुरीमध्येभवेत्सूर्यस्यदर्शनं कालोवारप्रवृत्त्याख्योमुनिभिःपरिकीर्तितः ६ एवंप्रोक्तोमहाराजचैत्रमासःशुभावहः विस्तरेणमयावक्तुंशक्यतेनाविमुक्तिदः ७ पुण्यकीर्तिरुवाच महाफलंत्वयाप्रोक्तंचैत्रेस्नानान्मुनीश्वर तस्यस्नानविधिंसम्यङ्क्रियमाणंपिमेवद ८ मांडव्यउवाच फाल्गुनस्यचमासस्ययाशुक्लादशमीतिथिः तस्यांकुर्याच्चसंकल्पंयावत्स्याद्दशमीसुधीः ९ तावत्स्नानंविधातव्यमितिकेषांमतंस्मृतं फाल्गुन्याःपूर्णिमायाश्चयावच्चैत्रीतुपूर्णिमा १० चैत्रस्नानंहितावत्तुकर्तव्यंनात्रसंशयः यावन्मीनगतोभानुर्मेषराशिंगमिष्यति ११ स्नातव्यंचमधौतावदितिसर्वत्रनिर्णयः संकल्पःप्रथमंकार्योव्रतिनापावनेदिने १२ सीताकांतमहाविष्णोदीनाथप्रतिपालक त्वत्प्रीत्यर्थंकरिष्यामिचैत्रस्नानंमहाशुभं १३ यानिकानिचपापानिनानाजन्मकृतानिच तानित्वंनाशयक्षिप्रंचैत्रस्नानेनमेहरे १४ इतिसंकल्प्यपश्चात्तुप्रकुर्यान्नियमान्शुभान् रात्र्यांतुर्यविशेषायामुत्तिष्ठेच्चसदाव्रती १५ प्रक्षाल्यपाणिपादौचनत्वाचम्यभक्तितः सुखासीनस्ततःस्मृत्वास्वकीयामिष्टदेवतां १६ प्रागुदीचींव्रजेद्ग्रामाद्बहिःसोदकभाजनः जलप्रवाहात्तीर्थाद्वादेवतायतनादपि १७

सोदकभाजनःजलपूरितपात्रसहितः तीर्थस्यजलेनमूत्रपुरीषोत्सर्गशुद्धिकरणनिषेधात्साकृतजलाभावेतीर्थस्थजलेनैवसर्वव्यवहारेपात्रेतीर्थस्यंजलंगृहीत्वामुखेनोच्छिष्टंकृत्वा शेषेण मूत्रपुरीषोत्सर्गशुद्धि

करणेनदोषइत्यर्थः मलोत्सर्गकरणेदेशस्थलनियममाहजलप्रवाहादित्यादिना १७ चतुःशतहस्तमितंस्थानंनल्वसंज्ञकं किष्कुर्हस्त वितस्तौचनल्वः किष्कुचतुःशतमित्युभयत्राप्यमरः अतएवपुरीषोत्सर्गेनल्वस्यार्द्धंनामद्विशतहस्तपरिमितांभूमिंत्यजेत् मूत्रेशतहस्तपरिमितांष्ठीवननाशिकामलत्यागेपंचाशद्धस्तपरिमितांउच्छिष्टलेपत्यागेपंचविंशतिहस्तपरिमितांभूमिंत्यजेदिति १८ १९ २० पूर्वोक्तस्थलनिर्णयस्यापवादमाहव्याघ्रेत्यादिना २१ मूत्रोत्सर्गविधिमाह ब्रह्म

नल्वस्यार्द्धंततोप्यर्द्धंतस्याप्यर्द्धंततोर्द्धकं त्यजेत्पुरीषमूत्रेचक्रमान्निष्ठीवनादिके १८ उच्छिष्टलेपसंत्यागेरथ्यायांवृक्षसन्निधौ मलंनैवोत्सृजेन्मूत्रंकृष्णभूमौबिलेयवा १९ वासयोग्यगृहेवापिगोष्ठेवाचत्वरेपिवा स्मशानेयज्ञभूमौवामलमूत्रंनचोत्सृजेत् २० व्याघ्रदस्युभयेऽरण्येवृक्षगुल्मेभयंकरे शक्तोपिचप्रवाहादिसमीपेमलमुत्सृजेत् २१ आतुरोजरठश्चार्द्धिनतदादोषभाग्भवेत् पात्रंचदक्षिणेकृत्वाब्रह्मसूत्रंचपृष्ठतः २२ अथवाकर्णसंस्थंचकृत्वाचैवह्युदङ्मुखः तृणैःशुष्कचयैर्भूमिमाच्छाद्यमलमुत्सृजेत् २३ विदारयेन्मलंतत्तुकृम्यनुत्पत्तिहेतवे मौनीचाधोमुखीभूत्वाशिरःप्रावृत्यवाससा २४ वक्त्रंनियम्यवस्त्रेणष्ठीवनःश्वासवर्जितः गृहीतशिश्नश्चोत्थायगृहीतशौचमृत्तिकः २५ हस्तत्रयस्थितपश्चादादायांभःकमंडलुं लोष्ठशौचविधायादौ जलशौचंसमाचरेत् २६ एवंमलोत्सर्गविधिःसमस्तोयथाक्रमंभोजगतीशराजन् प्रोक्तोमयातेयशसेशृणुष्वशौचक्रमंवेसकुलवदिष्ये २७ इतिश्रीभविष्योत्तरपुराणेअयोध्याखंडेचैत्रमाहात्म्येमलोत्सर्गविधिर्नामसप्तमोऽध्यायः ७ छ

माडव्यउवाच ततोमृदसमादायशक्द्भूमिसमुद्भवां गंधलेपक्षयकरंशौचंकुर्यादतंद्रितः १ सकृल्लिंगेप्रदद्यात्तामर्द्धामलकमात्रतः पंचकृत्वस्तथापानेलिप्त्वासाड्चधावयेत् २ ततःस्थानांतरंगत्वावामेदद्यान्मृदोदश उभयोःसप्तकृत्वःस्यात्पंचपंचपादयोः ३

सूत्रंयज्ञोपवीतं २२ २३ २४ २५ २६ इतिटीकायांसप्तमोऽध्यायः ७ अतंद्रितः अनालस्यः

१ तांमृत्तिकांअपानेगुदे पंचकृत्वः पंचवारंलिप्त्वा २ प्रथमतःवामेवामहस्तेदशवारंमृत्तिकांदद्यात् पुनःउभयोर्हस्तयोःसप्तवारं पादयोःपंचपंचवारं ३

मूत्रोत्सर्गेमेहनेलिंगेसकृदेकवारं वामेवामहस्तेत्रिः पुनर्द्वयोर्हस्तयोर्द्विवारंपादयोरपिद्विवारंमृत्तिकास्मृता ४ महारात्र्यामर्द्धरात्र्यां मूत्रपुरीषोत्सर्गेपूर्वोक्त
नियमस्यार्द्धविधिंकुर्यात् पथिमार्गेप्रवासे ५ एतदाश्रमपरत्वेनमृत्तिकादिग्रहणविधानंउत्तरोत्तरविशेषदेहांतः करणयोः शुद्धिप्रदर्शनार्थमित्यर्थः ६
किंचव्रतदानजपानुष्ठानादिसत्कर्मकरणेपूर्वोक्तमेतच्छौचंकार्यं अन्यथागंधलेपक्षयपर्यंतंशौचमितितात्पर्यं उक्तंचकाष्ठभारशतेनापिमृद्भारैश्चनगोप

मैथुनेप्येवमेवस्यान्मूत्रेस्यान्मेहनेसकृत् त्रिर्वामेद्विर्द्वयोर्द्विर्द्विः पादयोर्मृत्तिकाःस्मृताः ४ महारात्र्यामेतदर्द्धंतदर्द्धंपथिच
स्मृतं आतुरेनियमोनास्तिमहापदितथैवच ५ एतच्छौचंगृहस्थस्यद्विगुणंब्रह्मचारिणः वानप्रस्थस्यत्रिगुणंयतीनांचचतुर्गुणं
६ तत्कर्मानुष्ठितेशौचमेवंकार्यंप्रयत्नतः गंधलेपक्षयकरमन्यथापरिकीर्तितं ७ एवंस्त्रीणांचशूद्राणामनुलोमविलोमिनां
व्रतादौद्विगुणंकार्यंसर्वैःपुण्याभिवृद्धये ८ शौचहीनेनयत्कर्मशुभमेवाशुभंकृतं तच्चकर्मभवेत्पापंतस्माच्छौचंसमाचरेत्
९ शौचकर्मविहीनस्यसमस्तानिष्फलाःक्रियाः दंतशुद्धिंततःकुर्याच्छुद्धकाष्ठेनयत्नतः १० मुखशुद्धिविहीनस्यनमंत्राःफ
लदायकाः दंतजिह्वाविशुद्धिंचततःकुर्यात्प्रयत्नतः ११ आयुर्बलंयशोवर्चःप्रजाःपशुवसूनिच ब्रह्मप्रज्ञांचमेधांचत्वन्नोदेहि
वनस्पते १२ इतिमंत्रंसमुच्चार्यद्वादशांगुलमात्रकं कनिष्ठाग्रसमंस्थूलंवर्तुलंत्यव्रणंऋजु १३ कार्पासींतुबरींवेणुतिंतिणीं
चविवर्जयेत् कषायकटुतिक्तेनान्वितान्विद्याच्चतुर्दशी १४ प्रतिपद्दर्शनवमीषष्ठीश्चार्कदिनेष्वपि चंद्रसूर्योपरागेचनकुर्या
द्दंतधावनं १५ उपोषणाहेश्राद्धाहेप्यमायारविसंक्रमे वर्जयित्वादंतकाष्ठमुखशुद्धिंव्रतीचरेत् १६ निषिद्धेदिवसेकुर्याद्गंडूषान्
द्वादशैवतु तृणपर्णैःसदाकुर्यादमामेकादशींविना १७

मैःआमृत्योराचरच्छौचंभावहीनोनशुद्ध्यतीतिभावोत्रबाह्याभ्यंतरशुद्धिकार
णंनान्यदिति ७ अनुलोमविलोमिनांसूतांबष्ठादिद्वादशमिश्रजातीनां ८ शौचस्यावश्यकतामाहत्रिभिः ९ १० ११ १२ दंतकाष्ठमितिशेषः १३ दंतका
ष्ठेवर्ज्यवृक्षानाह कार्पासीमिति निंद्यान् अर्केरंडकंटकादियुक्तान्काष्ठेनदंतधावनेवर्ज्यतिथिनाह १४ काष्ठेनेतिशेषः १५ मृत्तिकादिनेतिशेषः १६ १७

भूनिंबःकिराततिक्तः निर्गुंडीप्रसिद्धा ब्रह्मवृक्षःपलाशः रक्तागस्त्यवृक्षश्चविडंगोविडिंगःप्रसिद्धः आदिशब्देनजयपालाद्यत्युष्णवृक्षान् १८ १९ २०
आकूर्परौकराविनिहस्तप्रक्षालनेहस्तस्यमध्यभागपर्यंतंहस्तप्रक्षालनंकुर्यादित्यर्थः २१ २२ २३ आलयेदेवतालये २४ २५ अन्यान्गायकानपि

कंटकीवृक्षभूनिंबनिर्गुंडीब्रह्मवृक्षकाः वटैरंडविडंगाद्यान्वर्जयेद्दंतधावने १८ सामिधःक्षीरवृक्षस्थतथान्यतरुसंभवाः
ग्रहणीयाःप्रयत्नेनकार्यंदंतविशोधनं १९ आत्मनःशुद्धिकामार्थंदंतानांचविशुद्धये दंतशुद्धिंकरिष्यामिप्रसन्नोभवराघव २०
एवंदंतान्विशोध्याथजलैःप्रक्षालनंचरेत् सकर्णंतुमुखंप्राक्करावाकूर्परौस्मृतौ २१ आजानुक्षालयेत्पादौगुदंसांडंतुधावयेत्
आचम्यचततोगच्छेत्स्वगृहंप्रतिसद्व्रती २२ गंधान्पुष्पाणितांबूलंगृहीत्वाभक्तितत्परः प्रबोधार्थंहिरामस्यगृहंगच्छेत्सदाव्रती
२३ ततोरामस्यविष्णोर्वाप्यथवाशंकरस्यच तदभावेचसर्वेषामालयेपूजयेत्सुरान् २४ तत्रदेवस्यपाद्यादीनुपचारान्प्रक-
ल्पयेत् पूज्यस्तुत्वापुनर्नत्वाकुर्याद्गीतादिमंगलान् २५ पुष्पैर्गंधैःसतांबूलैर्गायकानपिचार्चयेत् देवालयेगानपरायतस्तोविष्णु-
मूर्तयः २६ तपांसियज्ञादानानिकृतादिषुजगद्गुरोः तुष्टिदानिकलौतस्माद्भक्त्यागानंप्रशस्यते २७ एवंमयातेनृपतेसवि-
स्तरंसादंतशुद्धिश्चनिवेदिताशुभा प्रोक्तंप्रबोधार्थमपिप्रपूजनंगानप्रभावंशृणुचाद्यवक्ष्ये २८ इतिश्रीभविष्योत्तरपुरा-
णेअयोध्याखंडेचैत्रमाहात्म्येदंतशुद्धिविधाननामाष्टमोऽध्यायः ८ छ मांडव्यउवाच कथंवदसिदेवेशमयापृष्टस्तुपा-
र्थिव विष्णोरेवतदाप्राहमद्भक्तिपरितोषितः १ नाहंवसामिवैकुंठेयोगीनांहृदयेरवौ मद्भक्तायत्रगायंतितत्रतिष्ठामिभोमुने २
तेषांपूजादिकंगंधपुष्पादिक्रियतेनरैः तेनप्रीतिंपरांप्राप्यनतथामत्प्रपूजनात् ३ मत्पुराणकथांश्रुत्वामद्भक्तानांचगायनम् नि-
दंतियेनरामूढास्तेमद्द्वेष्याभवंतिहि ४

वाचयेत् यूयमपिगानंकुरुतेतिवदेदित्यर्थः २६ जगद्गुरोःविष्णोःतुष्टिदानिसंतोषकराणि कलौतु
नामकीर्तनमेवयस्मात्कलौतद्धरिकीर्तनमितिवचनात् तस्मात्कलौभक्त्यागानंप्रशस्यते २७ इतिटीकायांअष्टमः ८ छ १ २ तेषांमद्भक्तानां ३ ४

५ शिरीषः शिरसइतिप्रसिद्धः उन्मत्तो धत्तूरः गिरिजामोगरीपुष्पं शाल्मलीभवंसावरीवृक्षोत्पन्नंपुष्पं कर्णिकालघुश्वेतजुईकंटकशेवतीवाअक्षतैर्यवैःतदुक्तंव्रता
केंअक्षतास्तुयवाप्रोक्ताइति ६ जपाजास्वंदः कुंदावृहत्श्वेतजाई ७ मुनिपुष्पैः अगस्तिपुष्पैः ८ ९ १० ११ १२ मानुषेमनुष्यकृतेतडागादिकेदेवखाते

एवंविष्णुस्त्वमांप्राह तस्माद्गानंप्रकारयेत् तालवेणुमृदंगादिध्वनियुक्तंसनर्तकं ५ शिरीषोन्मत्तगिरिजामल्लिकाशाल्मलीभ
वैः अर्कजैःकर्णिकारैश्चविष्णुर्नार्च्यस्तथाक्षतैः ६ जपाकुंदशिरीषैश्चकथिकामालतीभवैः केतकीभवपुष्पैश्चनैवार्च्यःशंक
रस्तथा ७ गणेशंतुलसीपत्रैर्दुर्गांनैवतुदुर्वया मुनिपुष्पैस्तथासूर्यंलक्ष्मीकामोनचार्चयेत् ८ येभ्योन्यानिप्रसूनानिपूजाया
मुत्तमानिच अर्हणीयानिव्रतिभिर्यथाऋतुभवानिहि ९ एवंपूजाविधिंकृत्वादेवदेवंक्षमापयेत् मंत्रहीनंक्रियाहीनंभक्तिहीनं
सुरेश्वर १० यत्पूजितंमयादेवपरिपूर्णंतदस्तुमे ततःप्रदक्षिणांकृत्वादंडवत्प्रणिपत्यच ११ पुनःसमाप्यदेवेशंगायनाद्यंसमाप
येत् नाडिद्वयावशिष्टायांरात्र्यांगच्छेज्जलाशयं १२ तिलदर्भाक्षतापुष्पगंधाद्यैःसहितःशुचिः मानुषेदेवखातेचनद्यामथच
संगमे १३ क्रमाद्दशगुणंस्नानंतीर्थेतद्द्विगुणंस्मृतं पृथिव्यांसर्वदेशेषुनानाक्षेत्राणिभोनृप १४ रामतीर्थाभिषक्तेतेश्रीराघवकृ
तानिहि यत्रयत्रवरंतीर्थंरामतीर्थंमहच्छुभं १५ तत्रतत्रमधुस्नानंकर्तव्यंसर्वदानरैः अन्यतीर्थेमधुस्नानाद्यत्फलंप्राप्यतेनरैः
१६ तत्फलंकोटिगुणितंरामतीर्थेमधौस्मृतं विष्णुंस्मृत्वाततःकुर्यात्संकल्पंसवनस्यच १७ तीर्थादिदेवताभ्यश्चक्रमादर्घ्यादि
दापयेत् नमःकमलनाभायनमस्तेजलशायिने १८ नमस्तेस्तुहृषीकेशगृहाणार्घ्यंनमोस्तुते जानकीकांतहेरामचैत्रेमीनगते
रवौ १९ प्रातःस्नानंकरिष्यामिनिर्विघ्नंकुरुराघव चैत्रेद्यमीनगेभानौप्रातःस्नानपरायणः २० अर्घ्यंतेहंप्रदास्यामिगृहाणरघुना
यक गंगाद्याःसरितःसर्वास्तीर्थानिजलदानदाः २१

अकृत्रिमेजलाशयेके १३ तीर्थेमहातीर्थेशंखोद्धारपुष्करमणिकर्णिकाइंद्रद्युम्नपुष्करिण्यादि
के १४ मधुमासेअयोध्यानिकटस्थसरयूरामतीर्थयोरलाभेयत्रकुत्रापिक्षेत्रस्थरामतीर्थेएवस्नानंकुर्यात्नपृथिव्यांरामतीर्थंविनाक्षेत्रमस्तीतिभावः १५ १६ सवनस्यस्नानस्य १७ १८ १९ २० २१

२२ २३ २४ २५ २६ २७ अन्यतीर्थैरामतीर्थावाहनकर्तव्यतामाह तीर्थमध्येमलस्नानमादौकृत्वापश्चादंजलिपुटमध्येजलंगृहीत्वाअयोध्येसरयू-श्रेष्ठेरामतीर्थमहत्तम स्नानकालेसन्निधिंमेदर्शयस्वरघूत्तमेतिमंत्रंपठित्वा तज्जलंजलमध्येनिक्षिप्यस्नात्वाजलतर्पणंअर्घ्यादिकंचदद्यात् २८सितंश्वेतं २९

प्रतिगृह्यमयादत्तमर्घ्यंसम्यक्प्रसीदच ब्रह्माद्यादेवताःसर्वाऋषयोपेचवैष्णवाः २२ तेगृण्हंतुमयादत्तमर्घ्यंसम्यक्प्रसीदश ऋषभःपापिनांशास्तात्वंयमःसमदर्शन २३ गृहाणार्घ्यंमयादत्तंयथोक्तफलदोभव अयोध्येसरयूश्रेष्ठेरामतीर्थमहत्तम २४ गृण्हंत्वर्घ्यंमयादत्तंयूयंसम्यक्प्रसीदथ इतिचार्घ्यंसमर्प्याथपश्चात्स्नानंसमाचरेत् २५ अन्यतीर्थेषुसर्वत्रस्मृत्वानांसरयूंनदीं अयोध्यारामतीर्थंचचैत्रस्नानंचरेत्ततः २६ रामतीर्थंनवैयत्रयत्रायोध्यापुरीनच यत्रसासरयूर्नास्तितत्रस्मृत्वावगाहयेत् २७ तीर्थंकृत्वाराममूर्तेस्तीर्थमध्येतुतान्क्षिपेत् स्मृत्वात्रयंपूर्वमुक्तंपश्चात्स्नानंसमाचरेत् २८ एवंहितीर्थमधुमज्जनेवैकृत्वासमस्तजलतर्पणंतु वस्त्रंसितंतत्परिधायशुद्धंरम्यासनेचोपविशेद्व्रतस्थः २९ इतिश्रीभविष्योत्तरपुराणेअयोध्याखंडेचैत्रमाहात्म्येस्नानविधिर्नामनवमोऽध्यायः ९ छ माण्डव्यउवाच तिलकान्द्वादशततोगोपीचंदनसंभवान् स्वदेहेधारयेद्विप्रस्तेकथ्यंतेमयाधुना १ करेवामेमृदंघृष्ट्वाजलेनद्वारकोद्भवां तिलकंधारयिष्यामिचेतिसंकल्पयेत्ततः २ गायत्र्यावायमूलेनमंत्रयित्वाप्रयत्नतः मृत्तिकेधारयिष्यामिभक्त्यात्वांकेशवप्रिये ३ त्वयास्पृष्टोगमिष्यामिविष्णुलोकंसनातनं गायत्र्यामूलमंत्राभ्यांदशकृत्वस्त्रिरेववा ४ मंत्रयित्वाततोभक्त्यातिलकान्धारयेत्सुधीः द्विषट्चतुर्द्व्येकसंख्यान्विप्राद्याविभृयुःक्रमात् ५ ललाटमध्योदरहृत्कंठेषुपार्श्वेभुजेकर्णमूलेचदक्षे तद्वद्वामेपृष्ठमध्येचमूर्ध्निशक्त्वेन्यसेत्केशवादीनितेषु ६

इतिटीकायांनवमः ९ छ १ २ ३ मूलमंत्राभ्यांॐनमोभगवतेवासुदेवाय ॐनमोविष्णवेइतिद्वाभ्यां ४ द्विषट्द्वादशस्थानेषुब्राह्मणः चतुस्थलेचतुष्टयेक्षत्रियः द्विस्थलेवैश्यः ललाटाख्येकस्थलेशूद्रः एतेक्रमात्बिभृयुः ५ ६ छ छ

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

तत्रद्वादशस्थानान्याह ललाटेकेशवं उदरेनारायणं हृदयेमाधवंदक्षिणकुक्षौगोविंदं दक्षभुजेविष्णुंदक्षकर्णमूलेमधुसूदनं वामकुक्षौत्रिविक्रमंवामभुजेवामनं
वामकर्णमूलेश्रीधरंपृष्ठेहृषीकेशं कंठमध्येपद्मनाभं मूर्ध्निदामोदरंन्यसेत् गोपीचंदनंधारयेत् अथशुक्लपक्षक्रमः ६ कृष्णपक्षेसंकर्षणंवासुदेवंप्रद्युम्नंअ

संकर्षणादीन्यथकृष्णपक्षेनामानिविष्णोर्ब्राह्मणोद्वादशैव ललाटहृद्बाहुषुक्षत्रजातोवैश्योललाटेहृदयेचशूद्रः ७ लला
टएवैकमथात्रनामान्युक्तक्रमेणैवसदैवविन्यसेत् एवंतुवैष्णवैःकार्यंतिलकानांचधारणम् ८ शैवादीनांविधिंराजन्शृणुत
त्वमयोच्यते हैमजांभूतिमादायसद्योजातादिमंत्रकैः ९ मानस्तोकेतिमंत्रेणतत्तद्वर्णोक्तसंख्यकान् तर्जन्यनामिकामध्यांगुलिभिस्त्रि
लकान्धरेत् १० एवंविधायपुंड्राणिपश्चात्संध्यांसमाचरेत् श्राद्धंसंध्याजपोहोमःस्वाध्यायःपितृतर्पणं ११ व्यर्थंभवतितत्सर्वंविना
पुंड्रैस्तुयत्कृतं स्त्रियोवापुरुषोवापिविनापुंड्रंकदाचन १२ नकुर्युःसकृतंकर्मक्रियमाणंवृथाभवेत् सुवासिन्योपिबिभृयुस्तिल
कोपरिकुंकुमं १३ पश्चात्कुर्युःशुभंकर्मगृहकार्याणियानिच अनामिकाशांतिकरीमध्यमायुःकरीभवेत् १४ अंगुष्ठःपुष्टिदःप्रोक्तः
स्तर्जनीमोक्षदायिनी तत्तदंगुलिनाकुर्यात्तत्कामोर्ध्वपुंड्रकं १५ कृत्वासंध्यांतुसंपाद्यप्रातःकालसमीरितां अग्निहोत्रोदितंहोमं
हुत्वावैभार्ययासह १६ प्रातःकालोदितंकर्मसमाप्यार्च्योहरिःपुनः केशवोमार्गशीर्षेहिपरमंदैवतंस्मृतं १७ नारायणःपौषमासेमा
घेश्रीमाधवःस्मृतः गोविंदःफाल्गुनेप्रोक्तश्चैत्रेविष्णुश्चदैवतं १८ वैशाखेमधुहाप्रोक्तोज्येष्ठमासेत्रिविक्रमः आषाढेवामनःप्रोक्तः
श्रावणेश्रीधरःस्मृतः १९ हृषीकेशोभाद्रपदेपद्मनाभस्तथाश्विने दामोदरःकार्तिकेस्याद्देवतापापनाशिनी २० तस्माच्चैत्रेमहावि
ष्णोःपूजनंतुप्रकारयेत् सविष्णुश्चैत्रमासेचेत्यवतारंचकारह २१

निरुद्धं पुरुषोत्तमं अधोक्षजंनारसिंहं अच्युतंजनार्दनंउपेंद्रंहरिं
कृष्णं एवंद्वादशनामभिःगोपीचंदनंधारयेत् अयंब्राह्मणविषयः क्षत्रियेणललाटहृदयेबाहुद्वये वैश्येनललाटे·हृदयेइति ७ ८ ९ १० ११
१२ १३ पुंड्रकरणे अंगुलीनियममाह १४ तत्तत्कामःउर्ध्वपुंड्रकमितिच्छेदःसंधिरार्षः १५ १६ १७ १८ १९ २० २१

अवतारंचकारेति पूर्वेणान्वयः तस्यश्रेष्ठत्वमाह अवतारात्ह्यनेकाश्चतेषुमुख्याद्दशस्मृताः दशावतारमध्येपिरामकृष्णौमहत्तमौ तयोरपिवरः पूर्वःसत्यसंधोरघूत्तमः एकपत्नीव्रतोवीरस्त्वेकबाणोनृपोत्तमः सप्तद्वीपपतिःश्रीमान् छत्रचामररंजितः एवंज्ञात्वोपासनात्रग्राह्याश्रीराघवस्यचेति २२ २३ २४ २५ २६ सीतारामंप्रपूजयेदित्यत्रविशेषमाह आनंदरामायणेनवायतनपूजा साश्रेष्ठाज्ञेयाशुभप्रदा यापंचायतनीपूजाज्ञेयासामध्यमात्रहि त्रिदैवत्यानुयापूजाकनिष्ठासानिगद्यते अतिकनिष्ठापूजासाद्विदैवत्यास्मृताऽत्रहि सीतानुजौविनापूजारामस्यैकस्यनाचरेत् कृताचेद्विघ्नकर्त्रीस्यादिति

कौसल्याजठराद्रामनाम्नाभूभारशांतये तस्मात्तद्रूपधृग्विष्णोःपूजनंचात्रकीर्तितं २२ द्विभुजंसीतयायुक्तंचापबाणधृता
युधं दिव्यालंकारसंयुक्तंपीतकौशेयवाससं २३ सलक्ष्मणंसशत्रुघ्नंभरतेनसमन्वितं हनुमत्सेवितपदंसिंहासनविराजितं २४
सितच्छत्रसमायुक्तंदिव्यचामरवीजितं वीभीषणसमायुक्तंसुग्रीवपरिवंदितं २५ जांबुवतावंदितंचत्वंगदेनपरिष्टुतं अयोध्या
वासिनंराममेवंध्यायेत्सदाव्रती २६ उपचारैःषोडशभिःसीतारामंप्रपूजयेत् आवाहनंत्वासनंचपाद्यमर्घ्यंतथैवच २७ ततस्त्वाच
मनंप्रोक्तंस्नानंवस्त्रंतथास्मृतं ब्रह्मसूत्रमलंकारंदशमंगंधलेपनं २८ पुष्पंधूपंतथादीपंनैवेद्यश्चतथास्मृतः तांबूलंदक्षिणाचे
त्युपचाराश्चषोडश २९ एवंमयातेतिलकप्रधारणंतथाहिमासोद्भवदैवतानि प्रोक्तानिराजन्नृपपुण्यकीर्ते पूजाविधानंशृणु
चाथवक्ष्ये ३० इतिश्रीभविष्योत्तरपुराणेअयोध्याखंडेचैत्रमा० तिलकधारणादिवर्णनंनामदशमोऽध्यायः १०

नवायतनदेवताका इत्यपेक्षायांसीताद्यंगदांताःपूर्वोक्ताः अथतेषांस्थानज्ञानाभावेकथंपूजनीयाअतस्तेषांस्थानानि कृत्यानिचाह मुक्ताछत्रधरंलक्ष्मणंरामस्यपृष्ठभागेस्थापयेत्पूजयेच्च एवंचित्रितव्यजनधरंशत्रुघ्नंरामवामपार्श्वेरुक्ममंडितचमरधरंभरतंरामदक्षिणपार्श्वेरामपादुकाद्वयधरंहनुमंतंरामपुरतःदर्पणधरंविभीषणंरामस्यैशान्येजलपात्रधरंसुग्रीवंरामस्यवायुभागेवस्त्रकौशेयधरं जांबुवंतं रामस्यनैर्ऋत्यभागेतांबूलपात्रधरंअंगदं रामस्याग्नेयभागेएवंसंस्थाप्यपूजयेदित्यर्थः २७ २८ २९ ३० इतिटीकायांदशमोऽध्यायः १० ६९ ६९ ६९

पद्मानिलेखयेदित्यत्र कानिपद्मानितत्रमध्यपद्मसहितानिरामभद्राण्याह आनंदरामायणेशृणुशिष्यप्रवक्ष्यामिभद्राणांरचनाःशुभाः अत्रोपास्याराममुद्रारुद्रस्योपासकःस्मृतः रामनाम्नाभद्रमुक्तंरामचंद्रप्रपूजने पंक्तयोर्केमितास्तत्रसर्वा द्वादशपादजाः तासुपूर्वादिगारभ्यक्रमेणैवमपूरयेत् प्रथमासप्तमीचोभेपंक्ती कृष्णेनपूरयेत् ऊर्ध्वाधःपंचपंचैवपंक्तय स्तत्क्रमंब्रुवे तदधश्चद्वितीयायाःप्रथमंचद्वितीयकं चतुर्थसप्तमंषष्ठंत्वष्टमंनवमंतथा तथैकादशमंचापि कृष्णवर्णानिपूरयेत् तदधस्तृतीयायाश्चतुर्थंषष्ठसप्तमौ तथैकादशमंचापिकृष्णावर्णानिपूरयेत् चतुर्थ्यास्तदधश्चापिप्रथमंचद्वितीयकं चतुर्थंसप्तमंषष्ठंनवमंरुद्रसंमितं तदधःपंचमायाश्चप्रथमंचद्वितीयकं चतुर्थंचतथाषष्ठंनवमैकादशेतथा राजेतिद्व्यक्षरेशुक्लेद्रष्टव्येपंचपंक्तिषु पंचपंक्तिष्वधश्चाथप्रथमायाश्चपूर्ववत् तदधश्चद्वितीयायाःप्रथमंचद्वितीयकं चतुर्थंसप्तमंषष्ठंनवमंदशमंतथा तथाचैवद्वादशमंकृष्णावर्णानिपूरयेत् तृतीयायाश्चतुर्थंचषष्ठमर्कंचसप्तमे चतुर्थ्याःप्रथमंषष्ठद्वितीयंचचतुर्थकं अष्टमंनवमंचार्कंदशमंचापिपूरयेत् पंचमायाद्वितीयंचप्रथमंचचतुर्थकं षष्ठमर्कमष्टमंचसप्तमंदशमंतथा नवमंकृष्णवर्णानिरामेतिद्वे

मांडव्यउवाच   तीर्थेदेवालयेवापिगोष्ठेपुण्यस्थलेषुच लिप्त्वाभूमिंगोमयेनततःपद्मानिलेखयेत् १

वलोकयेत् राजारामेतिचत्वारित्यक्षराणिनिरीक्षयेत् व्यत्ययाद्रामराजेतिबुद्ध्याकार्येऽक्षरेनरैः अथवारामनामेतितृतीयंनामकारयेत् विशेषंतत्रवक्ष्यामित्यधःपंचस्वपंक्तिषु पंक्तेश्चतुर्थ्याःप्रथमंपदंकृष्णंनकारयेत् नाकारस्तेनद्रष्टव्योरामनामावलोकयेत् अथवारामरामेतिविशेषश्चोर्ध्वपंक्तिषु प्रथमापूर्ववत्ज्ञेयाद्वितीयायास्ततःपरं प्रथमंचद्वितीयंचतृतीयंपंचमंतथा अष्टमंनवमषष्ठतथैकादशमंत्वपि तृतीयायाःप्रथमंचरुद्रंषष्ठंचपंचमं चतुर्थ्याःप्रथमंचैवद्वितीयंचतृतीयकं पंचमंसप्तमंचापित्वष्टमंनवमंतथा तथैकादशमंचापिकृष्णंवर्णानिपूरयेत् पंचमायाःप्रथमंचाद्वितीयंचतृतीयकं पंचमंसप्तमंषष्ठंत्वष्टमंनवमंतथा तथैकादशमंचापिरमेतिद्व्यक्षरेसिते नामान्येतानिचत्वारिचतुःपार्श्वेषुयोजयेत् लघुमुद्रान्वितंरामलिंगाख्यंभद्रमुच्यते मयाशिष्याधुनानंतुत्वंशृणुस्वस्थमानस तिर्यगूर्ध्वमेकपंचाशद्रेखास्तत्सदक्षुचसप्तसप्तपदांतेद्वौपरिधीपीतवर्णकौकार्यौतत्रकोणदेशेष्विंदुस्त्रिपदशक्लकः शृंखलतुपदा कृष्णात्रयोदशपदालताहरितेशोवसुपदःकृष्णवर्णःप्रकारयेत् त्रिपदंलोहितंज्ञेयंभद्रस्तन्मस्तकस्थितंषष्टिपादात्मिकामुद्रातत्रेंद्रयमदिक्स्थितेत्युक्तापंक्तिकोणकोष्ठा-

न् सिंधुसिंधुमितान् तथासिंध्वन्तुपंक्तिद्वेसमतमायाःपंक्तेःपदंत्वधः मषिणापूरयेत्तत्रभानिरामेतितमदंतत्रादावग्निमुद्रास्ततसीमापरिधयस्तथारक्तालिंगद्वयं
भद्रंतथालिंगोपरिस्थितंपदद्वयंपीतवर्णंवीथीवल्यानियोजयेत् द्वितीयेत्वेकमुद्राह्वोपरिधीद्वौशिवौमतौभद्रंनवपदंलिंगवल्योर्मध्येरसात्मकंभद्रंपीतलिंगो
परिरक्तंतुर्यपदात्मकंलिंगस्कंधपदेद्वेद्वेहस्तिवेवीथीकापित्वभद्राणित्रीणिज्ञेयानिपीतद्वेलोहितेत्राद्वितत्तोतः सर्वतोभद्रंकार्यंतत्रतुवापिकाचतुर्विंशपदाभद्रमंक
कोष्ठलतेशिकात्रिपदोब्जः पंचपदाशृंखलापरिधिस्ततः मध्येपद्मंरक्तवर्णंरचयेद्वाविचित्रितंपीतशुक्लरक्तकृष्णाद्यैतेपरिधयोमताः एतत्षोडशमुद्राभिः

सितरक्तहरित्पीतनीलकृष्णादिसंभवैः नानावर्णैश्चित्रितानितत्रपूजांसमारभेत् २ प्राङ्मुखःस्वरवमासीनोधृतपद्मासः
नोघ्नती शंखोदकेनोपचारान्पूजायाःप्रोक्षयेत्ततः ३ शालिग्रामशिलासंस्थमथवाधातुसंभवं पाषाणनिर्मितंरामंध्यायेत्
पूर्वोक्तमार्गतः ४ सीतारामसमागच्छमदग्रेत्वंस्थिरोभव गृहाणपूजांमद्दत्तांकृतमावाहनंतव ५ हिरण्मयंरत्नयुक्तंनानाचित्र
विचित्रितं सिंहासनंसवस्त्रंतेह्यासनार्थंददाम्यहं ६ चंदनागरुसंयुक्तैर्जलैस्तीर्थसमुद्भवैः पाद्यंगृहाणश्रीराममयादत्तंप्रसी
द त्व ७ पुष्करादिषुतीर्थेषुगंगादिषुसरित्सुच यत्तोयंतन्मयानीतंदत्तमर्घ्यंगृहाणभो ८ सुगंधवासितंतोयंबहुतीर्थसमु
द्भवं आचमनार्थमानीतंगृहाणत्वंसुरेश्वर ९ हारिद्राकुंकुमैर्युक्तंसुगंधद्रव्यमिश्रितं सुगंधस्नेहसंमिश्रमुद्वर्तनंमयाकृतं १०
कामधेनूद्भवंक्षीरंनादिव्यात्यतिसुंदरं कपिलायाघृतंश्रेष्ठंमधुविंध्याद्रिसंभवं ११ शीतोपलसमानाभसितायुक्तंमनोहरं पंचा
मृतंमयानीतंस्नानार्थंत्वंगृहाणभो १२

रामलिंगाख्यभद्रकं सदानंदमयंरामंविज्ज्योतिषमनामयं सर्वावभासकंनित्यंस्वात्मानंसमुपास्म
हे तस्मिन्यत्सर्वतोभद्रंतद्दपंतत्समकीर्तितं तत्रपद्ममष्टपत्रंसकेशरस्ककर्णिकंतत्स्थानंरामलिंगस्यध्यानार्थंपरिकल्पितमितिएवंअष्टोत्तरसहस्ररामलिंगतोभद्रा
दिभेदाःसंतितेत्रग्रंथविस्तारभयान्नोच्यंतइति १ २ ३ प्रतिमाया अष्टविधत्वमाह शैलीदारुमयीलौहीलेप्यालेख्याचसैकती मनोमयीमणिमयीप्रति
माष्टविधास्मृतेति ४ अथवाहनादिपूजामंत्रानाह स्पष्टोर्थः ५ ६ ७ ८ ९ १० ११ १२ छ

१३ १४ १५ १६ १७ १८ २५ वनस्पतेरयंवानस्पत्यः आवघ्राणंकर्तुंयोग्यः आघ्रेयः २६ २७ २८ जातिर्जातिफलं तुर्यंचतुर्थं खदिरं तृतीयस्य अनुक्तत्वाच्चूर्णंग्राह्यमिति जातिफलस्यसाहचर्यादेलालवंगादिकमपिबोध्यम् २९ ३० ६९ ६९

गंगाचयमुनाचैवगोदावरीसरस्वती नर्मदासिंधुकावेरीसरयूर्गंडकीतथा १३ ताम्रपर्णीभीमरथीकृष्णावेणीमहानदी गोमतीसागराःसप्तपयोष्णीभवनाशिनी १४ पूर्णातापीतुंगभद्रादिप्रावेगवतीतथा पिनाकीप्रवरासिंधुफेनास्तेपिनदाः शुभाः १५ इत्यादिसर्वतीर्थेषुयत्तोयंवर्ततेशुभं तन्मयानीतमद्यात्रस्नानंकुरुरघूत्तम १६ पुनराचमनरम्यंसर्वतीर्थसमुद्भवं गृहाणरघुनाथत्वंदीयतेयन्मयातव १७ सुवर्णतंतुभिश्चित्रंपीतकोशेयसंभवम् वस्त्रयुग्मंप्रदास्यामिगृहाणरघुनायक १८ शुद्धंहेममयंरम्यंनवतंतुसमुद्भवं ब्रह्मग्रंथिसमायुक्तंब्रह्मसूत्रंप्रगृह्यतां १९ मुकुटकुंडलेरम्येमुद्रिकाःककणेतथा नूपुरेरसनामालाःकेयूरेरत्नमंडिते २० इत्यादीन्परमान्दिव्यान्स्वर्णमाणिक्यनिर्मितान् त्वदर्थंचमयानीतानलंकारान्गृहाणभो २१ छत्रंचव्यजनरम्यंचामरद्वयसंयुतं त्वदर्थंचमयानीतंगृह्णीष्वारिपुसूदन २२ सुगंधंचंदनंदिव्यंकृष्णागरुविमिश्रितं रक्तचंदनसंयुक्तंचंदनप्रतिगृह्यताम् २३ अक्षताश्चवरादिव्यामुक्ताफलविनिर्मिताः कस्तूर्याकुंकुमेनाक्तागृहाणपरमेश्वर २४ माल्यादीनिसुगंधीनिमालत्यादीनवैप्रभो मयाहृतानिपूजार्थंगृहाणरघुनायक २५ वानस्पत्योरसोधूपो गंधाढ्योगंधउत्तमः आघ्रेयःसर्वदेवानांधूपोयंप्रतिगृह्यताम् २६ साज्यंत्रिवर्तिसंयुक्तंवह्निनायोजितंमया दीपंगृहाणभोरामत्रैलोक्यतिमिरापह २७ भक्ष्यंभक्तेनसंयुक्तंपायसंघृतसंयुतं शर्करामधुसंयुक्तंनैवेद्यंप्रतिगृह्यताम् २८ पूगीफलसमायुक्तंनागवल्लिदलैर्युतं जातितूर्यसमायुक्तंतांबूलप्रतिगृह्यताम् २९ हिरण्यब्रह्मसंभूतवह्नितेजःसमुद्भवम् दीयतेदक्षिणार्थंतेगृह्णीष्वरघुनंदन ३०

३१ इतिटीकायांएकादशः ११ १ मंदारशब्देनपारिजातादिकल्पवृक्षपुष्पाणिग्राह्याणिविष्णुपूजनेअर्कस्यनिषेधात् दमनः भाषायांदवणोतिप्रोक्तः मुनि॰

एवंमयाषोडशश्चोपचाराःसविस्तरंतेकथिता नृपात्र आवाहनाद्याश्चहिदक्षिणांताःशेषांचपूजांसकलांतुवक्ष्ये ३१ इतिश्रीभविष्योत्तरपुराणेअयोध्याखंडेचैत्रमाहात्म्येषोडशोपचारविस्तारोनामैकादशोऽध्यायः ११ मांडव्यउवाच पंचवर्तिसमायुक्तंकपिलाज्यविमिश्रितं वन्हिनायोजितंरम्यंगृण्हीष्वत्वंनिराजनं १ जातीचंपकमंदारोकेतकीतुलसीतथा दमनोमुनिकुंदश्चानंतश्चेतिवैनव २ एभिर्नवविधैःपुष्पैर्मंत्रपुष्पाणिराघव मयार्पितानिगृण्हीष्वप्रसीदपरमेश्वर ३ यानिकानिचपापानिजन्मांतरकृतानिच तानिसर्वाणिनश्यंतुप्रदक्षिणपदेपदे ४ उरसाशिरसादृष्ट्यामनसावचसातथा पद्भ्यांकराभ्यांजानुभ्यांसाष्टांगंचनमोस्तुते ५ आवाहनंनजानामिनजानामिविसर्जनं पूजांचैवनजानामिक्षम्यतापरमेश्वर ६ मंत्रहीनंक्रियाहीनंभक्तिहीनंरघूत्तम यत्पूजितंमयादेवपरिपूर्णंतदस्तुमे ७ तीर्थादिदेवान्संस्मृत्यपुनरर्घ्यंप्रदापयेत् गंधपुष्पफलैर्युक्तंभक्त्यातत्परमानसः ८ व्रतिनश्चैत्रमासेस्मिन्स्नातस्यविधिवन्मम गृहाणार्घ्यंमयादत्तंसीतयारघुनंदन ९ ततश्चब्राह्मणान्भक्त्यापूजयेद्वेदपारगान् गंधपुष्पैःसतांबूलैःप्रणमेच्चपुनःपुनः १० तीर्थानिदक्षिणेपादेवेदास्तन्मुखमाश्रिताः सर्वांगेष्वाश्रितादेवाःपूजितास्तेतदर्चया ११ अव्यक्तरूपिणोविष्णोःस्वरूपंब्राह्मणाभुवि नावमान्यानोविरोध्याःकदाचिच्छुभमिच्छता १२ ततोहरिप्रियांदेवींतुलसींपूजयेद्व्रती प्रदक्षिणानमस्कारान्कुर्यादेकाग्रमानसः १३ देवैस्त्वंनिर्मितापूर्वमर्चितासिमुनीश्वरैः नमोनमस्तेतुलसिपापंहरहरिप्रिये १४ मुनिवृक्षपूजयित्वागोश्वत्थौतुप्रपूजयेत् ततोग्रेवक्ष्यमाणानिनानादानानिविस्तरात् १५

रगस्तिपुष्पंकुंदंबृहज्जातिपुष्पंअनंतपुष्पंविष्णुक्रांता २ ३ ४ ५ ६ ७ ८ ९ ब्राह्मणप्रशंसामाहत्रिभिः १० ११ १२ १३ १४ १५

रामकथा रामायणकथा वाचैत्रमाहात्म्यप्रशंसिनी चैत्रमाहात्म्यकथा १६ व्यासास्यात् श्रीवेदव्यासमुखात् विनिर्गता व्यासोक्ता इत्यर्थः ननुदेशभाषारचितरामकथातच्छ्रवणस्यनिषेधात् तदुक्तंपाद्मेनदेशभाषारचितंग्रंथंश्रुत्वाफललभेदिति १७ योगान् योगिनः १८ १९ २० २१

यथाशक्तिप्रदेयानिव्रतिनाव्रतपूर्तये ततोरामकथादिव्याचैत्रमासप्रशंसिनी १६ श्रोतव्याचप्रयत्नेनव्यासास्याच्चविनिर्गता तदुक्ताचारनियमाःकार्याश्चैवव्रतोद्भवाः १७ ब्राह्मणान्समुनीन्योगान्व्यासंचैवप्रपूजयेत् ततःशिष्टान्यतीन्सर्वान्वानप्रस्थाश्रितान्द्विजान् १८ पूजयेच्चयथाशक्तिततोगच्छेज्जलाशयम् स्नात्वामध्यान्हसमयेसंध्यांकृत्वा यथाविधि १९ तर्पयेच्चसुरान्सर्वानृषीन्सर्वांश्चतर्पयेत् ततःसर्वान्पितॄंश्चापितर्पयेत्तिलसंयुतं २० कृत्वापसव्यंपूर्वंतुहस्तन्यस्तपवित्रकः यावतश्चैत्रमासोहिवर्त्ततेपितृतर्पणे २१ तिलास्तत्संख्यकाह्यानिपितरःस्वर्गवासिनः ततोनिमंत्र्याविप्रान्वैयथाशक्तियतीन्शुभान् २२ स्वगृहंचततोगत्वाव्रतीसंतुष्टमानसः समर्पयित्वानैवेद्यंसुरेभ्यःप्रमदाकृतम् २३ संस्कारार्थंहिचान्नस्यवैश्वदेवंततश्चरेत् बलिदानंततोदत्वा दत्वाकाकबलिंबहिः २४ लक्षयेदातिथेर्मार्गंयावद्गोदोहनंभवेत् तस्मिन्कालेतुयःप्राप्तोह्यतिथिःसहरिश्चसः २५ अदृष्टपूर्वमार्गस्थःप्राप्तस्तात्कालिकश्चयः तंमत्वावासुदेवंहिनत्वाचैवपुनःपुनः २६ आसनेचोपविश्याथपूजयेत्तंयथाविधि पादावनेजनंकृत्वाधारयेन्मस्तकेनिजे २७ निमंत्रितान्समाहूययतीन्विप्रान्समर्चयेत् प्रथमंविप्रतीर्थंहियतितीर्थंततःस्मृतं २८ देवतीर्थंततोग्राह्यमेवंतीर्थविनिर्णयः ततस्तान्पूजयेत्सर्वानुपचाराष्टसंयुतैः २९ द्रव्यैर्नानाविधैःश्रेष्ठैर्भक्त्यानत्वापुनःपुनः गंधाःपुष्पाणिधूपंचदीपंनैवेद्यमेवच ३०

यतीन्स्वधर्मपालनेयत्नशीलान् चकारात् यतीन् संन्यासिनश्च २२ २३ २४ २५ २६ २७ २८ २९ ब्राह्मणपूजने अष्टोपचारानाह गंधपुष्पाणीति ३० ६९ ६९ ६९

पतिपूजनेषडुपचारानाह ३१ ब्रह्मपत्रेषुपालाशपत्रेषु ३२ सहेतिशेषः अयंनित्यपूजाविधिः चैत्रव्रतिनांप्रोक्तः नवम्यांविशेषोग्रे व्रतस्तबकेप्रो
क्तोद्रष्टव्यः इतिटीकायांद्वादशः १२ १ क्षौद्रमधुसौवीरकं बदरीफलकांजिकंच राजमाषा हरितमाषाः चवलासंज्ञकं धान्यंवाअआदिशब्देनमसूरस्तु

फलंरम्यंचतांबूलंदक्षिणाचेतिचाष्टहि तांबूलदक्षिणाहीनंकार्यंवैयतिपूजनं ३१ कदलीब्रह्मपत्रेषुमधुपत्रेषुचव्रती
करोतुभोजनंचैवकांस्यपात्रंविवर्जयेत् ३२ एवंकृत्वापूजनंमासिचैत्रेअह्निष्ठानान्यासिनांभूरुहाणाम् ततःसोत्र
वक्ष्यमाणैर्विचित्रैर्वालैरिष्टैर्भोजनंवैकरोतु ३३ इतिश्रीभविष्योत्तरपुराणेअयोध्याखंडेचैत्रमाहात्म्येपंचमहाय
ज्ञवर्णनंनामद्वादशोऽध्यायः १२ श्रीमाण्डव्यउवाच इदानींतेप्रवक्ष्यामिनियमान्व्रतिनामधो येकार्यास्तान्
शृणुत्वंहिपुण्यकीर्तेनृपोत्तम १ सर्वाण्येतानिमांसानिक्षौद्रंसौवीरकंतथा राजमाषादिकंचापिचैत्रस्नायीनभक्षयेत्
२ परान्नंचपरद्रोहंपरदारगमंतथा तीर्थंविनासदेवंहव्रतीवासंविवर्जयेत् ३ द्विदलंतिलतैलंचतथान्नंशल्यदूषितं
भावदुष्टंशब्ददुष्टंचैत्रस्नायीविवर्जयेत् ४ देववेदद्विजातीनांगुरुगोव्रतिनांतथा स्त्रीराजमहतांनिंदांमाकरोतुम
धुव्रती ५ प्राण्यंगेष्वामिषंचूर्णंफलेजंबीरमामिषं धान्येमसूरिकाप्रोक्ताश्वान्नंपर्युषितंतथा ६ अजागोमहिषीदुग्धा
दन्यत्दुग्धादिचामिषं द्विजक्रीतारसाःसर्वेलवणंभूमिजंतथा ७ ताम्रपात्रस्थितंगव्यंजलंपल्वलसंस्थितं आत्मार्थंपा
चितंचान्नंत्वामिषंतत्स्मृतंबुधैः ८ ब्रह्मचर्यमधःशायी पत्रावल्यांचभोजनं चतुर्थकालेभुंजीत कुर्यादेवंसदाव्रती ९

द्रधान्यादिकंच २ परगृहमितिशेषः शल्येनकीटास्थिकेशादिनादूषितम् ४ ५ प्राण्यंगंचूर्णं प्राणिमात्रस्यशरीरमांसखंडं आमिषं
६ भूमिजंसमुद्रजलं विनाकेवलक्षारभूम्युत्पन्नंलवणंआमिषं ७ गव्यंगोदधिदुग्धादिकम् पल्वलमल्पसरः तत्रस्थंजलं आ-
मिषं ८ ९ ५ ६ ६२ ५ ६

संवत्सरप्रतिपत् संवत्सरारंभः तत्रकालात्मपूजनं अस्यामेव आरोग्यव्रतं विद्याव्रतं तिलकव्रतं नवरात्रीव्रतारंभश्चकुर्यात् १० अस्यांतृतीयायांसौभाग्यशयनव्रतं गौर्यांदोलोत्सवः मनोरथतृतीयाव्रतं अरुंधतीव्रतंचकुर्यात् ११ अलांबुभाषायांदुधैयावादुध्याभोपलाइतिख्यातं बृहती डोरलीफलंश्लेष्मातकं भाषायांभोकरे इतिख्यातं कलिंगभाषायांकलिंगडे वातरबुजइतिख्यातं १२ पतितकाश्च अव्रतकाश्चपतिताव्रतकास्तैः द्विजान् ब्राह्मणान्-

संवत्सरप्रतिपदीतैलाभ्यंगंतुकारयेत् चैत्रस्नायीनरोन्यत्रतैलाभ्यंगंनकारयेत् १० चैत्रस्यासितपक्षस्यतृतीयायां
तुयोषिताः अभ्यंगस्वविधातव्योनान्यत्रमधुमासके ११ अलाबुंचापिवृंताकंकूष्मांडंबृहतीफलं श्लेष्मातकंकलिं-
गंचकपित्थंचैववर्जयेत् १२ रजस्वलांत्यजंम्लेंच्छैःपतिताव्रतकैःसह द्विजद्विड्वेदबाह्यैश्चनवदेत्सर्वदाव्रती १३ प-
लांडुंलशुनंचैवछत्राकंगृंजनंतथा नालिकामूलकंशिग्रुंवर्जयेत्तुमधुव्रती १४ एभिर्दृष्टंस्वकाकैश्चसूतकान्नंचवर्जयेत्
द्विपाचितंचदग्धान्नंनैवाद्याद्वैमधुव्रती १५ एतानिवर्जयेन्नित्यंव्रतीसर्वव्रतेष्वपि कृच्छ्राद्यंचमकुर्वीतस्वशक्त्यारामतुष्टये
१६ क्रमात्कूष्मांडबृहतीछत्राकंमूलकंतथा श्रीफलंचकलिंगंचफलंधात्रीभवंतथा १७ नारिकेलमलाबुंचपटोलंबदरीफ-
लं चर्मवृंताकंकिवल्लीशाकंतुलसिजंतथा १८ शाकान्येतानिवर्ज्यानिक्रमात्प्रतिपदादिषु धात्रीफलंरवौतद्वद्वर्जयेत्सर्वदा
गृही १९ येभ्योऽन्यद्वर्जयेत्किंचित्तद्रामप्रीतयेनरैः तत्पुनर्ब्राह्मणेदत्वाभक्षयेत्सर्वदैवहि २० एवमेवहिमाघेपिवैशाखेका-
र्तिकेपिच सर्वेष्वपिचमासेषुकुर्याद्वैनियमंव्रती २१ ऊष्णोदकंचतांबूलंतैलंमैथुनमेवच दिवास्वापंकांस्यभोज्यंद्यू-
तंव्यायाममेवच २२

द्विषंतितेद्विजद्विषः १३ छत्राकंभाषायांलघुबाबलिनालिकानारिकेलपुष्पं १४ धृष्टंनासिकयाअवघ्रातं द्विपाचितंद्विवारंपाचितं १५ कृच्छ्राद्यंकृच्छ्रादिव्रतंधर्मशास्त्रप्रसिद्धं १६ क्रमात्प्रतिपदादिपंचदशतिथिषुकूष्मांडमित्यादिनानामानिपूर्वोक्तानि १७ चर्ममसूरं १८ १९ २० २१ व्यायामोभ्रमणंश्रमकरणंच २२

मर्दनंतैलादिनाभ्यंगमर्दनं २३ २४ २५ शतयाजकः शतयज्ञकर्ता २६ २७ २८ २९ ३० ३१ ३२ ३३

क्रीडांशरीरसंस्कारंश्मश्रुकर्मचमर्दनं पाखंडालापवारस्त्रीनटनाट्यविलोकनं २३ मांसंपरान्नंमाषान्नंहिंसादिर्भोजनं तथा वर्जनीयानियत्नेनचैत्रस्नानव्रतस्थितैः २४ यथोक्तकारिणंदृष्ट्वाचैत्रव्रतकरंनरम् यमदूताःपलायंतेगजाःसिंहार्दितायथा २५ एकश्चैत्रव्रतस्नायीह्यपरःशतयाजकः तयोःपूर्वोवरःप्रोक्तोह्यपरःक्लेशभाक्पुनः २६ यज्ञकृत्प्राप्नुयात्स्वर्गंवैकुंठंचमधुव्रती स्वर्गपातात्पुनर्दुःखंचैत्रस्नायीनजन्मभाक् २७ भुक्तिमुक्तिप्रदानीहयानिक्षेत्राणिभूतले वसंतितानितद्धृदिचैत्रस्नानविधायिनः २८ दुःस्वप्नोदुष्कृतंकिंचिन्मनोवाक्कायकर्मजं मधुस्नानपरंदृष्ट्वानश्यातिक्षयंक्षणात् २९ चैत्रेतुव्रतिनःपुंसोरक्षार्थंप्राहिणोत्करान् महाविष्णुश्चतेसर्वेरक्षंतिस्मदिवानिशम् ३० रक्षांकुर्वंतिशक्राद्याराज्ञानंकिंकरायथा विष्णुव्रतकरानित्यंयत्रतिष्ठतिपूजिताः ३१ ग्रहभूतपिशाचाद्यानैवतिष्ठंतितत्रवै चैत्रस्नानफलंवक्तुंनसमर्थोस्मिभोनृप ३२ रामाप्रियंसकलकल्मषनाशनंचसत्पुत्रपौत्रधनधान्यविवृद्धिकारी चैत्रव्रतंसनियमंकुरुतेमनुष्याःकिंतस्यतीर्थपरिसेवनदेहदंडैः ३३ इतिश्रीभविष्योत्तरपुराणेअयोध्याखंडेचैत्रमाहात्म्येचैत्रव्रतनियमकथनंनामत्रयोदशोऽध्यायः १३ छ माडव्यउवाच इदानींतेप्रवक्ष्यामिभोजनादुत्तरंविधिम् तंश्रृणुष्वनृपश्रेष्ठपुण्यकीर्तेःसुखप्रदम् १ भोजनंचैवसंपाद्यसुखशय्यांविधायच एलालवंगबिम्बादियतिभ्योमुखशुद्धये २ दत्वातान्वंदयित्वाचततस्तांश्चविसर्जयेत् तांबूलंश्चप्रदातव्योविप्रेभ्यस्तदनंतरम् ३ दक्षिणांचततोदत्वाततस्तांश्चविसर्जयेत् ततोनानाचरित्राणिविष्णोःशृण्वन्दिनक्षयः ४

इतिटीकायांत्रयोदशः १३ छ १ बिम्बासुंठीशीतादिव्याधिशमनार्थंआदिशब्देनमरिचिसैंधवादिकंचअन्नपचनार्थं २ ३ ४

५ ६ वासंतिकींवसंतपूजां ७ ८ ९ अष्टोपचारकैः गंधपुष्पाणि धूपंच दीपंनैवेद्यमेवच फलंरम्यंचतांबूलोदक्षिणांचेतिचाष्ट
कमिति १० सिकताशर्करा ११ पंचखाद्यंखर्जूराकोड बादामादिकं १२ १३ १४ १५ १६ १७

नीत्वासंध्यांततः कृत्वानिशाहोमंचकारयेत् देवान्संपूजयेदष्टप्रकारैः पूर्वसूचितैः ५ नीराजनंमहत्कृत्वादेवान्स
म्यक्प्रसादयेत् नानोपचारैःसद्विप्रान्पुनःशक्त्याप्रतोषयेत् ६ पूजावासांतिकींकर्त्तुंमंडपान्कारयेच्छुभान् नानावृ
क्षोद्भवैःपत्रैराच्छाद्यसद्नागणा ७ तन्मंडपाधोभूम्यांतुजलैर्भूमिंतुसेचयेत् प्रसार्यसिकतास्तत्रस्थूलशर्करवर्जिताः
८ आच्छाद्यचासितैर्वस्त्रैस्तत्रविप्रान्प्रपूजयेत् प्रक्षालयित्वापादांतुसीतलैर्निर्मलैर्जलैः ९ पादावनेजनजलंमस्त
केधारयेद्व्रती चर्चयित्वाचंदनेनविप्रानष्टोपचारकैः १० पूजयेच्चव्रतीसम्यक्चैंऽव्रतफलाप्तये वितुषान्चण-
कान्रम्यान्जलार्द्रान्सिकतायुतान् ११ पंचखाद्यादिसंमिश्रान्नैवेद्यार्थंददेद्व्रती ततोरंभाफलान्येवताम्रपा-
त्रस्थितानिच १२ गोधूमधान्ययुक्तानिदक्षिणाभिश्चषोडश वस्त्रेणाच्छादयित्वातुतेभ्यःप्रत्येकमर्पयेत् १३ पान
कंतुततोदत्वारम्यंमरिचमिश्रितं शर्करासहितंयोग्यंरवितापोपशांतये १४ ततोहीक्षुरसान्दद्याद्दद्याद्वैनारसान्शु
भान् दद्याज्जंबीरफलजान्रसान्दिव्यान्कृभावहान् १५ जंबूफलानिवैदत्वातांबूलादिसमर्पयेत् निक्षिप्यपुष्प
हारान्हिकंठेचैवव्रतीनरः १६ प्रत्येकंद्विजवर्येभ्योदत्वाव्यंजनमुत्तमम् नानोपचारसंयुक्तोजलकुंभश्चदीयतां १७ उर्वा
रुकफलैर्युक्तःसवस्त्रश्चसदक्षिणः ततोनत्वाचतान्सर्वान्भूसुरान्हिविसर्जयेत् १८ एवंवासंतिकींपूजांकृत्वाचैव
व्रतीनरः सार्द्धयामंविलंघ्याथशयेद्भूम्यांजितेंद्रियः १९

उर्वारुकफलैः भाषायांकांकडीतैः १८ एवंवासंतिकींवसंतपूजांकृत्वासार्द्धयामरात्र्यनंतरंस्वपेदिति अत्र विशेषः विधानमालायां १९

२० २१ २२ २३ २४ २५ २६ अध्वगानांमार्गचारिणां २७ यःसलिलाकांक्षीतस्मैसलिलंदेयंएवमग्रेपिसंबं

संस्मरन्सकलान्देवान्शयीतसहभार्यया जलेरक्षतुवाराहः स्थलेरक्षतुवामनः २० अटव्यांनारसिंहश्चस
र्वतःपातुराघवः हनूमानंजनीसूनुर्वायुपुत्रोमहाबलः २१ रामेष्ठःफाल्गुनसखः पिंगाक्षोऽमितविक्रमः उ
दधिक्रमणश्चैवसीताशोकनिवारणः २२ लक्ष्मणप्राणदाताचदशग्रीवस्यदर्पहा एवंद्वादशनामानिकपींद्र
स्यमहात्मनः २३ सायंकालेप्रभातेचनिद्राकालेचयःपठेत् सर्वविघ्नहरेत्तस्यसत्यंसत्यंवदाम्यहम् २४
एवंस्मृत्वादक्षिणस्यांप्राच्यांवाथसदानरः स्वशिरःस्थापयित्वातु करोतुशयनंततः २५ एवंनित्यंविधिःप्रोक्तो
पुण्यकीर्तेमयातव इदानींसर्वदानानिवक्ष्येचैत्रोद्भवानिहि २६ मार्गेध्वगानांयोमर्त्यःप्रपादानंचचैत्रके मा
र्गेछायांतुयःकुर्यात्सस्वर्गेचमहीयते २७ सलिलंसलिलाकांक्षीछायांच्छायामपीच्छति व्यजनंव्यजनाकां
क्षीदेयंतस्मात्तुचैत्रके २८ जलंछत्रंचव्यजनंदानंमीनेविशिष्यते चैत्रमासेतुसंप्राप्तेब्राह्मणायकुटुंबिने
२९ अदत्वोदककुंभंतुचातकोभुविजायते चैत्रेदेयंजलंचान्यंदूयाशय्यामनोरमा ३० आदर्शदानंतांबूलगु
डदानंचकारयेत् घृतयुक्तकांस्यपात्रदानमिक्षुरसस्यच ३१ गोधूमत्तुबरीदानदानंदध्योदनस्यच तथाश्री
फलदानंचदानंचूतफलस्यच ३२

धनीयम् २८ २९ ३० ३१ ३२ छ छ छ

भेषकंयतिवस्त्रं ३३ ३४ इतिटीकायांचतुर्दशः १४ १ २ ३ ४ ५ महाधीनां महापापिनं

सूक्ष्मवस्त्रंपुस्तकंचभेषकंचकमंडलुम् यतीनांदंडदानंवैतैलदानंमठेषुच ३३ हेपुण्यकीर्तेनृपतेमयावैप्रोक्तानिदा-
नानितुचैत्रमासे विधिश्चसर्वःकथितोमधोर्हिकिंसास्पृहातेश्रवणेस्तिचित्ते ३४ इतिश्रीभविष्योत्तरपुराणेअयोध्या
खंडेचैत्रमाहात्म्येदानविधिर्नामचतुर्दशोऽध्यायः १४ पुण्यकीर्तिरुवाच हेमांडव्यत्वयाचैत्रमासस्यमहिमाशु-
भः कथितःपरमःपुण्यःसर्वेषांमुकुटोपमः १ कस्मिन्तीर्थेतुकर्तव्यंचैत्रस्नानंमहाघहृत् तत्तीर्थंचममाख्या
हिविस्तरेणमुनीश्वर २ मांडव्यउवाच शृणुराजन्प्रवक्ष्यामिचैत्रेतीर्थवरंशुभम् अयोध्यानगरीमध्येस
रयूमध्यमंडिते ३ रामतीर्थमितिख्यातंतच्चात्रदुर्लभंनृणाम् पृथिव्यांयानितीर्थानितानितीर्थानिचैत्रके ४
श्रीरामनगरींस्नातुमायांतिप्रतिवत्सरम् फाल्गुनीपौर्णिमारभ्यस्थित्वायोध्यापुरींप्रति ५ चैत्रस्नानंप्रकुर्वंतियावच्चै-
त्रीतुपूर्णिमा महाघानांमहाघंहियत्सांवत्सरिकंनिजम् ६ चैत्रस्नानेनवैदग्ध्वातत्तोयांतियथास्थले नायोध्यासदृशीचा
न्यापुरीब्रह्मांडगोलके ७ शरयूसदृशंतीर्थंनचैत्रेतुस्मृतंबुधैः यथामाघेप्रयागेहिस्नातव्यंफलमिच्छता ८ अयोध्या
यांरामतीर्थेतथाचैत्रःप्रकीर्तितः कार्तिकेपियथाकाश्यांपंचगंगाजलेस्मृतः ९ अयोध्यायांरामतीर्थेतथाचैत्रःप्र
कीर्तितः द्वारकायांयथाप्रोक्तोवैशाखोगोमतीजले १० अयोध्यायांरामतीर्थेतथाचैत्रःप्रकीर्तितः प्रयागेमास-
मात्रेणयत्फलंमाघमज्जनात् ११ अयोध्यायांरामतीर्थेसकृत्स्नातेनतन्माधौ वैशाखद्वादशभवंपुण्यंयद्गोमतीजले
१२ तत्पुण्यंशरयूतोयेऽयोध्यायांप्राप्यतेनरैः चैत्रमासेत्रिभिःस्नानैःरामतीर्थेनसंशयः १३

६ ७ ८ ९ १० ११ १२ १३ छ छ छ

१४ १५ १६ १७ १८ १९ २० २१ २२ २३ २४ २५

कार्तिकेपंचगंगायांयैःस्नानंद्वादशाब्दकम् अयोध्यायांरामतीर्थेचैत्रेपक्षेणतत्फलम् १४ अयोध्यादुर्लभाचै
त्रेनराणांपापकारिणाम् तावद्गर्जंतिपापानियावद्दृष्टानसापुरी १५ सूर्यवंशोद्भवेनात्रराज्ञासासरयूनदी समानीता
त्रयागार्थमयोध्यानगरींप्रति १६ मानसात्सरसःश्रेष्ठात्समानीताचसत्वरम् सरयूश्चेतिनाम्नासासर्वलोकेषुकथ्य-
ते १७ श्रेष्ठायोध्यापुरीपूर्वंविशेषात्सरयूजलात् तत्रापिरामतीर्थेनतन्नृणांमुक्तिकारकम् १८ अयोध्यामथुरामाया
काशीकांतीह्यवंतिका पुरीद्वारावतीचैवसप्तैतामोक्षदायकाः १९ विद्धित्वंजगतीपालसर्वासुनगरीषुच प्रथमंकीर्त्य
तेसर्वैर्यासाश्रेष्ठापुरीतिच २० यस्यांमृतानांजंतूनांनपुनर्जन्मसंभवः दृष्टायोध्यापुरीयेनध्याताचित्तेस्मृतापिवा
२१ अयोध्यानाशयेत्पापंसप्तजन्मसमुद्भवं अयोध्यानगरीमध्येबहुतीर्थानिसंतिहि २२ तथापिरामतीर्थस्यसदृ
शंनकचित्स्मृतं तस्मात्सर्वप्रयत्नेनराजन्सासरयूःशुभा २३ अयोध्यानगरीमध्येचैत्रमासेविशेषतः चैत्रमासेतुसं
प्राप्तेस्नानार्थंसरयूंनदीं २४ अयोध्यायांरामतीर्थेसमागच्छंतितान्शृणु इंद्राद्याःसकलादेवावसिष्ठाद्यामुनीश्वराः
२५ शेषाद्याःसकलानागागंधर्वाःपर्वताःखगाः भागीरथ्यादिसरितःसागराःसप्तवैनदाः २६ पुष्कराद्यानितीर्थानिगौर्या
दिसकलास्त्रियः किन्नरागुह्यकाःसिद्धाःसाध्याश्चाप्सरसस्तथा २७ दिवोदासादिकाभूपायेयेश्रेष्ठाःशुभावहाः लो
कपालाश्चादिक्पालारसातलनिवासिनः २८ स्थावराजंगमाःसर्वेनानारूपधराःशुभाः नाकलोकोद्भवाःसर्वेमर्त्यलोकस्थि
ताश्चये २९ तेसर्वेपिसमायांतिचैत्रेयोध्यापुरींप्रति तस्यांस्थित्वामासमात्रंकृत्वास्नानंमधौवरम् ३०

नदाः शोणभद्रादयः २६ २७ दिवोदासः काशिक्षेत्रस्थः २८ २९ ३० ६९ ६९

यथास्थलंस्वस्वस्थानंयाति ३१ ३२ ३३ ३४ ३५ इतिटीकायांपंचदशः १५ छ १ २ ३ ४

हस्ताचैत्रस्यपूर्णायांतथाश्रीरामजन्मनि नानाविधानुत्सवान्हिततोयांतियथास्थलम् ३१ तस्मात्सर्वप्रयत्ने
नचैत्रेमासिनरोत्तमैः अयोध्यासर्वदासेव्याइहामुत्रफलप्रदा ३२ अयोध्यासदृशंतीर्थंचैत्रमासेनृपोत्तम सर्व
पापक्षयकरंनभूतंनभविष्यति ३३ यत्रश्रीराघवःसाक्षादवतारंचकारह तत्तीर्थसदृशंतीर्थंपृथिव्यांनहिवर्त्त
ते ३४ एवमयाश्रीरघुवीरपुर्याःसविस्तरंतेकथितःप्रभावः तथाव्रतहेंसरयूमहत्त्वश्रीरामतीर्थंकथितंचचैत्रे
३५ इतिश्रीभविष्योत्तरपुराणेअयोध्याखंडेचैत्रमाहात्म्येअयोध्यापुरीवर्णनंनामपंचदशोऽध्यायः १५
पुण्यकीर्तिरुवाच हेमांडव्यमुनिश्रेष्ठयत्त्वयापरिकीर्तितम् अयोध्यायांरामतीर्थंतथासासरयूनदी
१ तत्तीर्थंनसमीपस्थंजनानांदूरवासिनाम् तैश्चैत्रमासिस्नानार्थंकउपायोविधीयताम् २ क्वतीर्थेतैश्चस्नान
व्यंतद्वदस्वमुनीश्वर मांडव्यउवाच शृणुराजन्प्रवक्ष्यामिनानादेशेषुयेजनाः ३ तेषांस्नानंकथंसिद्ध्येत्तद्वदामि
शृणुष्वतत् ज्ञात्वाचैत्रसमीपस्थंमुक्त्वाकार्याणिमानवैः ४ सहस्राण्यपिगंतव्यमवश्यायोध्यापुरीमति अशक्तानां
चवृद्धानांदरिद्राणांचरोगिणाम् ५ अयोध्यानगरींगंतुमशक्तानान्नृजन्मिनाम् तेषांतुचैत्रस्नानार्थमुपायंव-
च्मितच्छृणु ६ अयोध्यायांयदाभावोतदारामकृतानिच पृथिव्यांयानितीर्थानितत्रस्नानंविधीयताम् ७ पुण्यकीर्तिरु
वाच रामचंद्रेणभूम्यांहिकतितीर्थानिवैकदा कृतानितानिसर्वाणिविस्तराद्वक्तुमर्हसि ८ मांडव्यउवाच यदासरावणंहं
तुंरामचंद्रश्चदंडके ययौनिजपितुर्वाक्यात्सबधुःसहभार्यया ९ स्थित्वाचतुर्दशाब्दानितीर्थानिसकलान्यपि चकारनिजना
म्नाहिशृणुतानिनृपोत्तम १०

५ ६ ७ ८ ९ १० छ छ छ

तत्कालात् चतुर्दशवर्षपर्यंतंदंडकारण्यवास कालादन्यकालेरावणंहत्वा अयोध्यायामागमनानंतरंचतुर्दिक्षुयात्राकरणकाले ११ १२ मुद्गलाश्रमे

तत्कालादन्यकालेपियत्रयत्ररघूत्तमः भूम्यांगतस्तत्रतत्रचकारनिजकीर्तये ११ तीर्थानिवहुधाराजन्मुक्त्यर्थंसर्व
देहिनाम् चैत्रस्नानंतेषुकार्यंनरैस्तानिनृपशृणु १२ नैमिषेरामचंद्रस्यतीर्थमस्तिमहाह्रदे हरिद्वारेप्रयागेचगया
यांमुद्गलाश्रमे १३ क्षेत्रेहरिहरेरम्येकाश्यांगंगाब्धिसंगमे वैजनाथस्यक्षेत्रेहिजगन्नाथस्थलेशुभे १४ वैकुंठाख्य
नदीतीरेजरासंधपुरेतथा सीताकुंडसमीपेतुनेपालाख्येशुभेस्थले १५ विंध्याचलगतायत्रास्थितास्तिगिरिजाशुभा
तत्स्थलेचित्रकूटेहिशृंगवेरपुरेतथा १६ रामनामागिरौतद्वत्तथाचामरकंठके वर्ततेसर्वतीर्थेषुचैत्रेषुजगतीतले
१७ कृतानिरामचंद्रेणतीर्थानिविविधानिच मातृपुर्यांपयोष्ण्यांतुपूर्णायांविरजास्थले १८ तथादेवगिरौरम्येघृ
ष्णेशस्थलेतथा शरभंगाश्रमेचैवसुतीक्ष्णस्याश्रमेतथा १९ अगस्त्याश्रमेचैवपंचवट्यांचत्र्यंबके पुण्यस्तंभेकन्वेशास्य
सान्निधौमध्यमेश्वरे २० प्रवरासंगमेश्रेष्ठेप्रवासेगौतमीतटे रामह्रदेप्रतिष्ठानेरामपुर्यांचचांजके २१ किष्किंधातीर्थसान्निध्ये
गोदासागरसंगमे तथापरायांश्रीरामपुर्यांगोदावरीतटे २२ निवृत्तिसंगमेकृष्णातीरेश्रीमाल्लिकार्जुने वर्त्ततेरा
मतीर्थानिरामचंद्रकृतानिहि २३ पंपासरोवरेऋष्यमूकाद्रौस्वामिसन्निधौ पिनाक्यांतुंगभद्रायांशेषाद्रौतृप्तिपत्तने २४
शिवकांच्यांविष्णुकांच्यांपाक्षितीर्थेरुणाचले शंखमुख्यांचश्रीरंगेकुंभकोणेऽथपट्टने २५ तथावेनवपाषाणेसेतौरामेश्वरांतिके
धनुष्कोटौतथादर्भशयनेसिंधुसंगमे २६ ताम्रपर्णीतटेरम्येतथारामपुरेशुभे कन्याकुमारीनिकटेस्कंदे
चादिकेशवे २७

महाराष्ट्रदेशे १३ १४ १५ १६ रामनामागिरौरामटेकेनागपुरसमीपे १७ १८ १९ २० २१ २२ २३
स्वामिसन्निधौकर्नाटकदेशमध्येकुमारस्वामिसन्निधौ द्रविडदेशेतृप्तिपत्तनेनृपतिग्रामे २४ २५ २६ केरलमलयदेशस्थरामतीर्थान्याह २७

घृतमालाइत्यत्रकृतमालाइतिपाठः समीचीनः लोकप्रसिद्धत्वात् २८ २९ ३० कोंकणदेशस्थरामतीर्थान्याह हरिहरेशेत्यादिना महाराष्ट्रदेश था

घृतमालानदीतीरेपद्मनाभांतिकेशुभे धर्मक्षेत्रेमत्स्यतीर्थेजनार्दनसमीपतः २८ मधुरायांचोलगिरौव्यंकटेशांतिकेतथा
श्रीरंगपट्टनेरम्येरामनाथपुरेवरे २९ सुब्रह्मण्येचगोकर्णेश्रीगिरौपरमेशुभे वर्त्तंतेरामतीर्थानिरामचंद्रकृतानिच ३० हरिहरे
शसंस्थानेधूम्राद्रौचमहाबले कोल्हापुरेमहाश्रेष्ठेकरवीरपुरेतथा ३१ तुलजायाश्चवैक्षेत्रेपांडुरंगांतिकेतथा निरायाःसंगमे
चापिजंबुक्षेत्रांतिकेतथा ३२ सप्तशृंगेरामशय्यागिरौताप्त्यब्धिसंगमे रेवायाःसागरस्यापिसंभेदेपरमेशुभे ३३ प्रभासेद्वारका
यांतुपुष्करेबदरीवने मथुरायांकुरुक्षेत्रेह्यवंत्यांपर्वताव्हये ३४ एवमादिषुतीर्थेषुनानाक्षेत्रेषुभोनृप कृतानिरामतीर्था
निसांतिरामेणसादरम् ३५ एतेषुतीर्थेषुवरेषुचैत्रेयदात्वलाभोरघुवीरपुर्याः स्नानंतदावैकरणीयमत्रयेषांचयद्यत्र
समीपमस्ति ३६ इतिश्रीभविष्योत्तरपुराणेअयोध्याखंडेचैत्रमाहात्म्येनानारामतीर्थवर्णनंनाम षोडशोऽध्या
यः १६ पुण्यकीर्तिरुवाच यदारण्येविदेशेवाबंदिगेहेगतापिवा दुर्गेन्यवशगात्तेवातस्यस्नानकथंभवेत्
१ मांडव्यउवाच यत्रायोध्यापुरीनास्तिस्नानार्थंसरयूर्नच रामतीर्थंनयत्रास्तिकुर्यात्तीर्थांतरेतदा २ अन्य
तीर्थाभिषवणेचिंतयेत्सरयूंनदीं अयोध्यायांरामतीर्थेरामस्नानंतत्स्मरेत् ३ तीर्थेचापिनयेषांहितदासर्वनदीषुच
तदभावेतटाकेषुकूपेवापिप्रकारयेत् ४ अन्यत्तेवच्मिराजेंद्रविपत्तौमानवैर्मुधी राममूर्त्तेश्चतीर्थेहिनिक्षिप्यान्य
जलेषुहि ५ स्नातव्यरामचंद्रस्यध्यानंकृत्वाथवाक्वचित् एवंराजन्मयाप्रोक्तंकिमन्यच्छ्रोतुमिच्छसि ६

न्याह कोल्हापुरे इत्यादिना कोल्हापुरइत्याख्यया प्रसिद्धेकरवीरपुरे ३१ गुर्जरदेशस्थान्याह ताप्त्यब्धिसंगमेत्यादिना ३२ ३३ ३४
३५ इतिटीकायांषोडशः १६ ७ १ २ ३ ४ ५ ६ ७ ७

७ सहेतिशेषः ८ ९ १० अञ्जकाख्येचंद्रपुरेगोदानाभौ भाषायांनांदेडइतिख्यातंतत्समीपे ११ १२ निवासाख्येपुरे भा॰

पुण्यकीर्तिरुवाच श्रुतंत्वन्मुखतःसर्वंचैत्रमासस्यवर्णनम् इदानींतवपृच्छामियेनमेसंततिर्भवेत् ७ मांडव्य
उवाच पुण्यकीर्तेनृपश्रेष्ठगच्छायोध्यांपुरींप्रति भार्ययामासमात्रंहिकुरुचैत्रेवगाहनं ८ संततिंप्राप्स्यसिक्षिप्रंयथा
प्रापपुराद्विजः नृसिंहनामाचैत्रस्यस्नानेनसहभार्यया ९ पुण्यकीर्तिरुवाच कोनृसिंहश्चकुत्रस्थःचैत्रस्नानंकथं॰
कृतम् कथंजातापुत्रलब्धिस्तत्सर्वंत्वंवदाधुना १० मांडव्यउवाच अञ्जकाख्येपुरेश्रेष्ठेगोदानाभौविराजिते
उपाध्यायोपनाम्नाहिद्विजःकाश्यपगोत्रजः ११ नृसिंहाख्यश्चतस्यासील्लक्ष्मीनाम्नीप्रियासती जरयाग्रसितश्चा
पिसंततिंनालभत्सः १२ स्वदोषपरिहारार्थमुपायंकर्तुमुद्यतौ निवासाख्येपुरेगत्वादंपतीमोहिनींशुभां १३ दृष्ट्वादे
व्याश्चतौसेवांनित्यंतत्रप्रचक्रतुः गतेबहुतिथेकालेवरदासामहालया १४ प्रसन्नातंद्विजंभूत्वाप्राहतद्दोषशांतये
हेनृसिंहमहाबुद्धेगच्छायोध्यापुरींप्रति १५ तत्रवैसरयूतोयेरामतीर्थेमहत्तमे चैत्रेमासिवसंतर्तौयदास्यान्मीनगोरविः
१६ चैत्रस्नानंप्रातमेकंकुरुतत्रद्विजोत्तम पातकंसकलंत्यक्त्वापुत्रंप्राप्स्यस्यनुत्तमं १७ इतिदेव्यावचःश्रुत्वाद्विज
श्चिंतापरायणः ययौमार्गेत्वहर्दिध्यायन्नयोध्याख्यापुरींशुभां १८ चिंतयापरयाव्याप्तःकथंगंतुंहिशक्यते मयायोध्यापुरीं
दूरमितःकृष्टंचजीवितं १९ इतिचिंताप्लुतोमार्गेक्वचित्तिष्ठन्क्वचित्स्खलन् भार्यायाश्चकरेधृत्वावृद्धश्चैवंययौद्विजः २०
एवंगोदावरीतीरंगत्वास्नात्वाद्विजोत्तमः राममूर्तिंपुरःस्थाप्यपूजयामासभक्तितः २१ तावत्तस्मैप्रसन्नोभूद्रामोदे
व्याःप्रसादतः द्विजंप्राहरघुश्रेष्ठोभोनृसिंहद्विजोत्तम २२

षायांनेवसाइतिसंज्ञेमहाराष्ट्रदेशेपर्वरानदीतटेस्ति तत्रगत्वा १३ १४ १५ १६ १७ १८ १९ २० २१ २२

२३ २४ २५ २६ २७ सरामत्हृदः साम्राज्यक्षेत्रात् गव्युतिमात्रे पश्चिमेवर्तते २८ २९ ३० ३१

मायोध्यांत्वमितोगच्छशृणुमेवचनंशुभम् इतः पूर्वेत्वदूरंहियोजनत्रयसंमितं २३ प्रतिष्ठानाभिधंक्षेत्रं गोदायाउत्तरेतटे तत्रास्तिरामतीर्थंहिमन्नाम्नाचमयाकृतम् २४ तत्रत्वंगच्छविप्रेंद्रस्नानंशीघ्रंचभार्यया चैत्रमासेवसंतर्तौयदा: स्यान्मीनगोरविः २५ तदाकुरुविशेषेणपूजयित्वाचमांसुभम् पापक्षयःपुत्रलाभोभविष्यतिनसंशयः २६ इत्युक्त्वा रघुवीरस्तत्रैवांतरधीयत यत्रगंगान्हदेरामः प्रसन्नोभूद्द्विजायाहि २७ तस्मात्सवैरामन्हृदोनाम्नासर्वत्रकीर्त्यते तद्रामवचनाद्विप्रः प्रतिष्ठानपुरंययौ २८ मासमेकंचवैस्थित्वाचैत्रस्नानंचकारह सूर्योदयेसमुत्थायकृतशौचादिसत्क्रियः २९ स्नात्वातस्मिन्रामतीर्थेजान्हवीतीर्थमिश्रिते रामचंद्रंस्वर्णगिरौपूजयामासभक्तितः ३० प्रदक्षिणाःस्वर्णगिरेश्चकारनवप्रत्यहम् नवपुष्पैश्चनैवेद्यैःपूजयामासराघवम् ३१ चैत्रशुक्लतृतीयायांयावद्वैशाखसंभवा तृतीयाशीतलागौरीस्नानंचक्रेद्विजप्रिया ३२ एवंमासव्रतंकृत्वासद्विजस्तुष्टमानसः अन्तकंप्रतिमार्गेणययोलक्ष्म्यासमान्वितः ३३ यावन्मार्गेद्विजोगच्छत्तावद्दृष्टास्त्रिभिर्वरैः पिशाचैःक्षुत्तृषाक्रांतैस्तानुद्धार्यसभार्यया ३४ ययौस्वनगरंरम्यंगोदानाभिविराजितं पुत्रंप्रापमहच्छ्रेष्ठंरामदासाख्यंशुभम् ३५ तस्मान्मयातेकथितंवरंहिस्नानंप्रधौतत्सरयूजलेवै पुत्रंसुरूपंसुगुणंवरंत्वंतंप्राप्स्यसिस्वस्यपदस्ययोग्यम् ३६ इतिश्रीभविष्योत्तरपुराणेअयोध्याखंडेचैत्रमाहात्म्येप्रतिष्ठानगतरामतीर्थवर्णनंनामसप्तदशोऽध्यायः १७ पुण्यकीर्तिरुवाच कथंपिशाचयोन्यास्तेमुक्ताविप्रेणवैत्रयः कस्मात्पापाच्चतेसर्वेपैशाचींयोनिमाश्रिताः १

३२ ३३ ३४ ३५ ३६ इतिटीकायांसप्तदशोऽध्यायः १७ १ ५ ५

२ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५

तत्सर्वंविस्तरेणैवश्रोतुमिच्छामितन्मुखात् मांडव्यउवाच. शृणुराजन्प्रवक्ष्यामिरंभानाम्नीवराप्सराः २ चैत्रेस्ना
त्वामहायोध्यांसरयूनिर्मलेजले आर्द्रवस्त्रयुताचारुहास्यालंकारमंडिता ३ गृहीत्वासरयूतोयंरत्नकांचननिर्मिते
पात्रेरामेश्वरंसेतोर्द्रष्टुंमौनेनसाजवात् ४ ययौचाकाशमार्गेणपिशाचायत्रतत्रयः तस्यार्द्रवस्त्रचांचल्याद्बिंदुभिःप्रोक्षि-
ताश्चते ५ क्रूरस्वभावमुत्सृज्यचाश्चर्यंपरमंययुः पूर्वजन्मानुस्मरणमभूत्तेषांतदानृप ६ विस्मयाविष्टचित्तास्तेतांदृष्ट्वाप्स
रसांदिवि बहुधाप्रार्थयामासुस्तस्मात्तांपप्रच्छुसंज्ञया ७ कस्माद्वयंपिशाचाहिजातास्तत्कथ्यतांमम इतितत्कर
कृतसंज्ञाप्रेरितास्तेत्रय स्तदा ८ तेषुद्वौवर्तमानौहि कथयामासतुस्त्वतां शृणुभामिनिचावांहिपूर्वजन्मनिभूसुरात्
९ विरजायांसमुत्पन्नौश्रोत्रियाच्छूरशर्मणः उभावध्ययनंकर्तुंकश्चिन्नारायणाह्वयम् १० शुश्रूषयातोषयित्वागुरुंतत्रैववत
स्यतुः नारायणसुतांचारुरूपांचंद्रनिभाननाम् ११ दृष्ट्वापरस्परमन्यबहुधाप्रार्थ्यतांस्त्रियं आवाभ्यांचाहिसाभुक्ता
तज्ज्ञातंगुरुणाचिरात् १२ आवाभ्यांचददौशापंतस्यैचाप्यशपत्क्रुधा युवांचापिकुमारीयंपिशाचत्वंगमिष्यति १३
ततोस्माभिस्त्रिभिस्तंतुमुनिंनत्वापुनःपुनः शापस्यांतस्ततोलब्धस्तच्छृणुष्वमनोरमे १४ चैत्रमासेनृसिंहाख्यःकश्चि
द्विप्रस्थकानने ददातिस्नानजंपुण्यंतदोद्धारोभविष्यति १५ एवंजाताःपिशाचाहिवयंतद्वस्त्रबिंदुभिः प्रोक्षिताःस्मा
द्यवैजातापूर्वजन्मस्मृतिःशुभा १६ तत्तेषांवचनंश्रुत्वाज्ञात्वाशापस्यमोक्षणम् सांत्वयित्वाकरेणैवशीघ्रंसनृहरिस्त्रिया
१७ आगमिष्यतिमाचिंताकुरुतेति वरांगना ययौरामेश्वरंशीघ्रंपूजयित्वागतादिवम् १८

१६ नृहरिर्नृसिंहाख्यः स्त्रियालक्ष्म्यासह आगमिष्यतिचिंतांमाकुरुतेतिपूर्वेणान्वयः १७ वरांगनारंभाप्सराः १८ ६९ ६९

१९ २० नैजंस्वकीयं २१ सः शंभुः ब्राह्मणः कः यः राक्षसः मुक्तः सः कइति २२ २३ २४ शिवकांतिस्थेएकांबरशिवांतिके २५ २६ २७

चैत्रमासेव्यतिक्रांतेमार्गेसन्नृहरिर्द्विजः भार्ययासहितोदृष्टःपिशाचैस्तैस्त्रिभिस्तदा १९ स्थित्वादूरंचतेसर्वेतमूचुश्चद्वि-
जोत्तमं नैजंवृत्तंसमस्तंहिशापस्यापिविमोक्षणं २० तच्छ्रुत्वानृहरिर्विप्रस्तान्प्रोवाचमुदान्वितः माभैतव्यंपिशाचत्वा-
द्यथाशंभुर्द्विजेनसः २१ राक्षसोमोचितःपूर्वंमोचयिष्याम्यहंतथा पिशाचाऊचुः कःशंभुश्चकदामुक्तोराक्षसःकः
सविस्तरम् २२ कथयस्वद्विजश्रेष्ठकृपांकृत्वातुकौतुकात् नृसिंहउवाच शृणुध्वंकथयिष्यामियद्वृत्तंचपुरातनं २३
शिवकांतिपुरीमध्येकश्चिद्विप्रःशुचिव्रतः शंभुनामाचिरकालंतस्थौतत्रसभार्यया २४ सकदाचिद्दिनेविप्रश्चैकांबरशि-
वांतिके पौराणिकमुखाच्चैत्रमासमाहात्म्यवर्तिनीं २५ कथांश्रोतुंसमायातस्तत्रश्रुत्वामहाफलं अयोध्यायांहिचैत्रस्य
स्नानात्कैवल्यदायकं २६ ततोबहुगतेकालेसंस्मरन्तांकथांशुभां ज्ञात्वासमागतंचैत्रंस्वगृहान्निर्गतस्तदा २७ भार्यया
सहितोविप्रःशनैर्मार्गेणवैययौ नीत्वातांजान्हवींरम्यांयावदग्रेसगच्छति २८ तावद्दृष्टोहिभिल्लेनकर्कशाख्येनकानने
गृहीत्वासशरंचापंधर्षयित्वाचभूस्करं २९ लुलुंठकर्कशःक्रूरोवस्त्रेणैकेनतंद्विजं मुमोचतस्यपाथेयंगृहीत्वासकलशु-
भं ३० द्विजोपिप्रार्थयामासकर्कशंचपुनःपुनः वस्त्रादिकंगृहाणत्वंभक्ष्यापिष्टददस्वमे ३१ तत्तस्यवचनंश्रुत्वामुक्त्वातद्व-
स्त्रबंधनं सर्वंददर्शपाथेयंनानाविधमनुत्तमं ३२ तस्मिन्ददर्शसव्याधोदशरंभाफलानिवै अपक्कान्यपिशुष्कानिततश्चि-
त्तेव्यचारयत् ३३ एभिःफलैर्नमेकार्यंजानामिब्राह्मणोत्तम तर्हिदास्याम्यहंदीनंक्षुधाक्रांतंचसास्त्रियं ३४ इतीनिश्चित्य
सव्याधोददौतानिद्विजन्मने गृहीत्वाभक्षयद्विप्रःप्रारभेभार्ययामधौ ३५

२८ काननेवने धर्षयित्वाबलात्कारंकृ-
त्वा २९ ३० ३१ ३२ रंभाफलानिकदलीफलानि तानिअपक्वानि तत्रापिशुष्कानि ३३ ३४ ३५

३६ तस्मै भिल्लायविप्रायविप्रंप्रतिशुभबुद्धिः आसीत् सशंभुः ब्राह्मणः ३७ इतिटीकायांअष्टादशोऽध्यायः १८ छ १ २

तद्रंभाफलदानेनकर्कशस्यतदाशुभा जाताबुद्धिःक्षणादेवसात्विकीक्रूरतांगता ३६ एवंपिशाचाःसकलास्ततःपरंविप्रायतस्मैशुभबुद्धिरासीत् समागतश्चात्रकुतःसपृष्टवान्विप्रसवैप्राहवनेचकर्कशम् ३७ इतिश्रीभविष्योत्तरपुराणेअयोध्याखंडेचैत्रमाहात्म्येपिशाचनृसिंहसमागमोनामाष्टादशोऽध्यायः १८ छ शंभुरुवाच कांचीपुर्याःसमायातगम्यतेयोध्यकांपुरीम् चैत्रेमासेऽवगाहार्थंसरयूनिर्मलेजले १ इतिविप्रवचःश्रुत्वापुनःप्रपच्छकर्कशः किंलभ्यतेहिस्नानेनतन्मेवदसविस्तरम् २ पुनःप्राहसविप्रेंद्रःकर्कशंभक्तितत्परं स्नानेनमधुमासेहिरघुनाथःप्रसीदति ३ प्रसादात्सकलान्भोगान्लभंतेमानवाभुवि अंतेमोक्षोपिभोभिल्ललभंतेनात्रसंशयः ४ इतिविप्रवचःश्रुत्वापुनःपप्रच्छकर्कशः मोक्षस्वरूपंकथयकृपांकृत्वाममोपरि ५ तत्तस्यवचनंश्रुत्वापत्नींप्राहद्विजोत्तमः पश्यपश्यवरारोहेकौतुकंमहदद्भुतम् ६ यद्रंभाफलदानेनचैत्रेमासिवरानने अयंक्वभिल्लजातीयःक्वप्रश्नश्चेदृशःशुभः ७ मोक्षस्वरूपज्ञानार्थंतस्माद्दानंप्रशस्यते इत्युक्त्वातांप्रियांविप्रःकर्कशंप्राहसादरम् ८ साधुसाधुमहाव्याधसम्यक्प्रश्नःकृतस्त्वया इदानींप्रोच्यतेमोक्षस्वरूपंतन्निशामय ९ समोक्षस्त्वंहिजानीहियतोनास्तिपुनर्भवः इतिविप्रवचःश्रुत्वापुनःपप्रच्छकर्कशः १० तस्यप्राप्तिर्यथास्यान्मेतद्वदस्वद्विजोत्तम शंभुरुवाच शृणुकर्कशतत्प्राप्तिर्यथास्यात्तद्वदामिते ११ दारपुत्रगृहादीनांप्रीतिंमुक्त्वाजनार्दनं दिवारात्रंचिंतयित्वासर्वदेहस्यचालकम् १२ आत्मानंबहुपुण्यौघैर्निर्मलीकृत्यमानसम् तत्स्वरूपेयदातिष्ठेत्समुक्तोनेनरोजनः १३

३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ छ

जवात् वेगात् १४ १५ १६ १७ १८ १९ २० २१ जनस्थानेनासिकक्षेत्रे २२ २३ २४ २५

एवंवदतिविप्रेंद्रेव्याधोमुक्त्वाशरंधनु शंभुपादौजवान्नत्वात्राहित्राहीतिवैवदन् १४ प्रोवाचद्विजवर्यंसव्याधोमामुद्धरे-
तिच एतस्मिन्नंतरेतत्रराक्षसोघोरदर्शनः १५ दुद्रावदीर्घशब्देनयत्रासंस्तेत्रयोवने आयांतंराक्षसंदृष्ट्वाचक्रुस्तेतुपला-
यनम् १६ तावज्जवेनतान्धर्त्तुंनिकटंराक्षसोययौ तंदृष्ट्वाविकटंशंभुस्तुंबिकांसजलांनिजां १७ कृत्वोच्चांप्राक्षिपत्तस्मि-
न्रामचंद्रंस्मरन्मुखे मंत्रितंरामनाम्नावैतत्तोयंमधुमासिच १८ तत्स्पर्शाद्राक्षसस्यापिजातापूर्वभवस्मृतिः ततःस
राक्षसोदूरंस्थित्वाशंभुंव्यजिज्ञपत् १९ मामुद्धरमुनिश्रेष्ठघोराद्राक्षसदेहतः शरणंतेगतोस्म्यद्यजातापूर्वस्मृतिर्मम २०
इतितत्कौतुकंदृष्ट्वाराक्षसंप्राहसद्विजः कस्मात्तेराक्षसत्वंहिजातंतत्त्वंवदाधुना २१ राक्षसःप्राहवेगेनशंभुंवृत्तंनिजंतदा
जनस्थानेपुराचाहंविप्रःकर्मपराङ्मुखः २२ प्रतिग्रहपरःपापीदुर्मार्गव्यसनीसदा एतस्मिन्नंतरेचैत्रेममभार्यासती
शुभा २३ स्नानार्थंरामतीर्थेहिमामपृष्ट्वागृहाद्ययौ सामार्गेचमयादृष्टाधृत्वामार्गेचताशुभा २४ प्रोक्तासाचमयारंडे
मामपृष्ट्वाकुत्रयास्यसि साप्राहभयभीतातुरामतीर्थंप्रगम्यते २५ मधुमासेवगाहार्थंमयादुष्कृतंकृतं एवंश्रुत्वापि-
तद्वाक्यंताडितासामयाबलात् २६ प्रेषितास्वगृहंमार्गात्ततःकालांतरेगते मृतोहंचतदानीतोयमलोकंयमानुगैः २७
चित्रगुप्तोपिमां दृष्ट्वाधिक्कृत्वाचपुनःपुनः यमराजंचवैप्राहधर्षयन्मांस्वगर्जितैः २८ भोधर्मराजपापोयंचैत्रस्नाननि-
वारकः भुक्त्वादौराक्षसींयोनिंनिरयान्भोक्तुमर्हति २९ इतितद्वचनंश्रुत्वायमःप्राहानुगांस्तदा भोभटाराक्षसींयोनिंदी-
यतांनिर्जलेवने ३० पापिनेस्मैचमद्वाक्यात्ततस्तैश्चयमानुगैः दत्वाराक्षसयोनिंमांत्यक्त्वाचात्रगतायमं ३१

२६ २७ धर्षयन् भीषयन् २८ २९ अनु पश्चाद्गच्छंतीति अनुगाः दूताः ३० ३१ छ छ

३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९ इतिटीकायांएकोनविंशोऽध्यायः १९ पिशाचान्प्रतिनृसिंहब्राह्मणउवाच

तदारभ्यवनेचाहंक्षुत्तृषापरिपीडितः पंचत्रिंशत्सहस्राणिवर्षाण्यत्रस्थितश्चिरम् ३२ किंमयासुकृतंपूर्वंकृतंयस्माद्वने
तव संगतिश्चाद्यवैजातासाधुसंगोगतिप्रदः ३३ इतितद्वचनंश्रुत्वाशंभुर्ध्यात्वाक्षणंहृदि ज्ञात्वातत्सुकृतंपूर्वंराक्षसायन्य
वेदयत् ३४ शृणुराक्षसयत्पूर्वंकृतंवैसुकृतंत्वया यस्माज्जातासंगतिर्मेवनेनिर्मानुषेशुभा ३५ एकादश्यांचैत्रशुक्ले
कृत्वान्यच्छ्राद्धभोजनम् तांबूलोदक्षिणायुक्तःकट्यांवस्त्रेलयाधृतः ३६ द्वादश्यांप्रातरुत्थायगत्वास्नानंत्वयाकृतं पति
तःसहितांबूलोविस्मृत्यगौतमीतटे ३७ दक्षिणासहितोदृष्टःसकेनापिद्विजेनवै गृहीतःसहिद्वादश्यांनज्ञातश्चत्वयापु-
नः ३८ तांबूलदानाद्धूरचैत्रमासेजातावनेमेद्यहिसंगतिस्ते तस्मान्मधौराक्षसमानवैर्हितांबूलदानंकरणीयमेतत् ३९
इतिश्रीभविष्योत्तरपुराणेऽयोध्याखंडेचैत्रमाहात्म्येतांबूलदानमाहात्म्यवर्णनंनामैकोनविंशोऽध्यायः १९
९ ९ नृसिंहउवाच इतिशंभोर्वचःश्रुत्वाव्याधःपप्रच्छतंपुनः कानिदानानिकार्याणिचैत्रेतानिवदाधुना
१ शंभुरुवाच शृणुव्याधप्रवक्ष्यामिचैत्रेदानानिमानवैः यानिकार्याणिस्वार्थपरमार्थप्रदानिच २ जीर्णोद्धारोमठानां
चघट्टानांकरणंमधौ प्रासादकरणंचैववापीकूपादिकंस्मृतं ३ मार्गस्थानांछत्रदानंमध्यान्हेतिथिपूजनं करपात्रंयती
नांचगोग्रासंतुगवामपि ४ फलंशाकंचमूलंचकंदंपुष्पंतुचंदनम् उशीरंशीतलंद्रव्यंकर्पूरंकस्तुरीशुभा ५ दीपदानंधे
नुदानंगृहदानंमधौस्मृतं गोरसानांपृथग्दानंयतिब्राह्मणभोजनम् ६ सुवासिनीपूजनंचरामनामप्रलेखनम् पुस्तका
नांतथादानंतथाकुंकुमकेशरं ७ जातीफलंलवंगंचजातिपत्रीवरांगकं धातकीनागरधूपंबीजपूरंकलिंगकम् ८

१ २ घट्टानांकरणंनदीतीर्थादिषुपाषाणेनसोपानकरणंघाटइतिमहाराष्ट्रभाषाप्रोक्तं ३ ४ ५ ६ ७ ८ ९

९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २०

जंबीरंपनसंचैवकपित्थंमातुलिंगकम् कूष्मांडदानमारामकरणंमार्गशोधनं ९ ततोपानत्प्रदानंचगजवाजिरथादिकम्
एतानिचैत्रमासेतुदानानिकथितानिहि १० इतिशंभुवचःश्रुत्वाकर्कशःप्राहतंपुनः चैत्रमासेचकाःपुण्यातिथयस्तानिवद
य ११ शंभुरुवाच त्रिंशच्चतिथयःपुण्याचैत्रमासेवनेचर तथापिहिविशेषोत्रतिथीनांवर्ण्यतेमया १२ चैत्रमासेकृष्ण
पक्षेपंचमीदशमीतथा एकादशीद्वादशीचाशिवरात्रिस्त्वमातथा १३ एताःशुभाश्चैत्रकृष्णेमहापातकनाशनाः इदा
नींचैत्रमासस्थसितपक्षोद्भवाशुभाः १४ वर्ण्यंतेतिथयःश्रेष्ठानराणांहितकाम्यया सांवत्सरप्रतिपदमारभ्यदशमीदिनं १५
यावत्तावच्छुभाःसर्वाःस्नानदानादिकर्माणि यत्कृतंचप्रतिपदिस्नानदानव्रतादिकं १६ द्वितीयायांचतत्प्रोक्तंद्विगुणंना
त्रसंशयः यत्कृतंचद्वितीयायां भक्त्यास्नानादिकंनरैः १७ द्विगुणंतत्तृतीयायांचैत्रमासेसितेनृप एवंसर्वासुतिथिषुयाव
त्स्यान्नवमीशुभा १८ एवंविशेषोज्ञातव्योयथाम्रादिकचर्वणं यथाक्षीरात्दधिप्रोक्तंदध्नसुनवनीतकं १९ नवनीतात्घृ
तंयद्वत्तथातिथिविनिर्णयः चैत्रमासस्तुमासानांतत्रपक्षःसितोवरः २० सितपक्षेक्रमेणैवयावत्सानवमीतिथिः ताव
द्देकैकशःश्रेष्ठाःसर्वासुनवमीवरा २१ यस्यांजातंरामजन्मधर्मसंस्थापनायहि तस्मात्तिथिस्तुसाज्ञेयाकर्मनिर्मूलन
क्षमा २२ तस्यांदत्तंहुतंजप्तंयत्किंचित्सुकृतंशुभम् सर्वंतदक्षयंविद्यान्नात्रकार्याविचारणा २३ प्रतिपद्दिनमारभ्यनवरा
त्रमुपोषयेत् प्रत्यहंरघुवीरस्यपूजनंचैवकारयेत् २४ संवत्सरप्रतिपदिध्वजाःसौधोपरीस्थिताः दिव्यवस्त्रैश्चमाल्यैश्च
मंडिताश्चमनोरमाः २५ रामजन्मसूचनार्थंप्रीत्यर्थंराघवस्यच गृहेगृहेनरैःकार्याःपूजनीयाश्चभक्तितः २६

२१ २२ २३ २४ २५ २६

२७ नानापद्मानीत्यत्रोक्तं: आनंदरामायणे अष्टोत्तरसहस्राख्यं रामतोभद्रमुत्तमं सीताख्यंवालिखेद्भद्रमथवान्यन्मनोरममिति

गृहेदेवालयेवाथ गोष्ठेवृंदावनेशुभे संमार्जनादिकंनित्यंकार्यंचंदनवारिभिः २७ ततोपाषाणचूर्णैश्चनानापद्मादि
कानिहि लेखनीयानिभूम्यातुनीलपीतादिवर्णकैः २८ तस्योपरिमहान्रम्यश्चित्रवर्णश्चमंडपः देयोद्वाराणिचत्वारिकार्या
णितोरणानिहि २९ कदलीस्तंभयुक्तानिचेक्षुदंडयुतानिच नानाघंटाकिंकिणीभिर्ध्वनितान्युज्वलानिच ३० रम्या
दर्शैर्मंडितानिविचित्राणिशुभानिच तस्मिन्हेममयःकार्योमंचकोरत्नमंडितः तस्योपरिमहावस्त्रैःशय्याकार्या
शुभावहा तस्यांषोडशमाषैस्तुप्रतिमाकांचनोद्भवा ३२ द्विभुजारामचंद्रस्यसर्वलक्षणलक्षिता चतुर्विंशतिमाषै
श्चप्रतिमारजतोद्भवा ३३ कौसल्यायास्तथाकृत्वापूजनीयामनोरमा यथावित्तानुसारेणपूजयेत्प्रत्यहंनरः ३४
भेरीमृदंगघोषैश्चतूर्यैर्नृत्यैःसगायनैः नानापक्वान्ननैवेद्यैरुपचारैश्चपूजयेत् ३५ यद्वैवाल्मीकिनागीतंरामायण
मनुत्तमं चतुर्विंशतिसाहस्रंपठनीयंततःशुभम् ३६ प्रतिपद्दिनमारभ्ययावत्तन्नवमीदिनं रामायणंतावदेवपठनी॰
यंप्रयत्नतः ३७ सर्वतीर्थेषुयत्पुण्यंसर्वदानेषुयत्फलं रामायणस्यपठनात्तत्फलंनवरात्रके ३८ श्लोकंवाश्लोकपा
दंवायद्रामायणसंभवम् नवरात्रेपठिष्यंतिचैत्रेतेमोक्षभागिनः ३९

एकादशोध्याये पूर्वमेवोक्ता २८ २९

३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९

चतुर्विंशतिसहस्रवाल्मीकसंज्ञकरामायणस्य पूर्वमुक्तत्वादन्यरामायणस्यापि पारायणंकर्तव्यमित्याह आनंदरामायणे प्रतिपद्दिनमारभ्य यावन्नवमीदिनं आनंदसंज्ञकंरम्यंपठनीयंमनोरमं नवकांडानिनवभिर्दिनैरेवपठेन्नरः दिवसेदिवसेकांडंपठनीयंप्रयत्नतः अथवाप्रत्यहंसर्वाःपठितव्यास्तु द्वाद-

येऽश्वत्थमूलेमुनिवृक्षमूलेतथातुलस्याश्चसमीपदेशे पठंतिरामायणमादरेणचैत्रेनरास्तेसुखिनोभवंति ४० इति श्रीभविष्योत्तरपुराणेअयोध्याखंडेचैत्रमाहात्म्येनवरात्रप्रशंसानामविंशतितमोऽध्यायः २० शंभुरुवाच एवंहि प्रत्यहंकार्यंकौसल्यारामपूजनं सपुत्रकानानारीणांतत्रकार्यंप्रपूजनं १ सपुत्रद्विजवर्याणांविशेषात्पूजनंस्मृतं वस्त्राद्यलंकारयुतांचित्रभोजनभोजितं २ एवंकृत्वाविधिंसर्वंनवम्यांचविशेषतः पूजयित्वारामचंद्रंवाहनारूढमुत्तमं ३ भेरीमृदंगघोषैश्चतूर्यदुंदुभिनिस्वनैः वारस्त्रीकृतनृत्यैश्चगायकानांचगायनैः ४ एवंनानासमुत्साहमंडितंछत्रशोभितं चामरैर्वीज्यमानंचपुष्पकेसंस्थितंवरं ५ रामतीर्थांतिकेनीत्वापंचामृतघटैर्वरैः स्नापयेद्रघुवीरंहि पुण्यतोयैस्ततःपरं ६ रुद्रसूक्तैर्विष्णुसूक्तैःसहस्रैर्नामभिस्तुवा मांगल्यद्रव्यसंमिश्रैर्जलैस्तमभिषेचयेत् ७ मांगल्यवरद्रव्यैश्चस्नानात्तंमंगलाभिधं प्रोच्यतेमंगलस्नानंतच्चैत्रेदुर्लभंनृणाम् ८ तत्पंचामृततीर्थंतुतीर्थमध्येविनिक्षिपेत् तत्रसर्वैर्जनैःशीघ्रंस्नातव्यंतदनंतरं ९ सहस्रावभृथस्नानैर्यत्फलंप्राप्यतेनरैः तत्फलंरामचंद्रस्यमंगलस्नानकारणात् १० पुष्करादिषुतीर्थेषुगंगाद्यासुसरित्सुच प्राप्यतेयत्फलंस्नानान्मंगलस्नानकृच्चतत् ११ एवंरामंतुसंस्नाप्यसीतायुक्तंप्रपूज्यच पुनःपूर्वोक्तवाद्यादिमंगलैरानयेद्गृहं १२ गृहेरामंपुनःपूज्यरामायणकृतंवरं पारायणंसमाप्याथपुस्तकंपूजयेच्छुभं १३

शशेषस्त्वेकः कदामध्येधिकः सोपिपठेन्नरैः अष्टोत्तरशतैःसर्गैः रामकीर्तनमालिका मेरुयुक्तापठेदेवंरामाग्रेनवभिर्दिनैः व्यासादिप्रोक्तमथवारामायणमिहादरादिति ४० इतिटीकायांविंशोऽध्यायः २० १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३

२४ ५ १६ १७ १८ १९ २० २१ दोलकंहिंदोलकमित्यर्थः २२ २३

नानोत्सवैर्दिनंनीत्वाकार्यंजागरणंनिशि दशम्यांप्रातरुत्थायभोजयित्वाद्विजान्बहून् १४ पूजयित्वापुनःसर्वंगुरवेनाद्वि
सर्जयेत् ततःस्वयंसुहृद्भिर्मित्रैःकुर्याद्भोजनमुत्तमम् १५ एवंव्रतंसमाख्यातंचैत्रस्यनवरात्रके अतस्तन्नवरात्रंहिश्रेष्ठंचैत्रेहिके
केश १६ नवरात्रेपिसारामनवमीपरमार्थदा तत्समानातिथिर्नान्याचैत्रमासेवनेचर १७ एवंचैतद्व्रतंप्रोक्तंदिवसैर्नवभिःशु
भम् अन्यच्चापिप्रवक्ष्यामिगौरीव्रतमनुत्तमं १८ चैत्रमासेसितेपक्षेतृतीयायांचनारीभिः स्नात्वामृन्मयदुर्गांहिरम्यांचित्रवि·
चित्रितम् १९ कृत्वाष्टादशधान्यानिवापयेत्तदनंतरं पुष्पवृक्षांश्चशुभांस्तत्रवापयेत्सर्वतस्ततः २० जलयंत्राणिकार्याणि
चित्राण्यपिविलेखयेत् तूर्यद्वाराणिकार्याणिपूर्ववन्मंडपादिकम् २१ कार्यंतत्रघटस्थाप्यसजलपुष्पगुंफितं दोलकंचततो
न्यस्यघटपृष्ठेमहच्छुभं २२ कांचनींराजतींमूर्तिंगौर्याःकृत्वाशुभावहाम् दोलकोपरिसंस्थाप्यमासमेकंप्रपूजयेत् २३ अ
शक्तौताम्रजांकुर्यात्काष्ठजांवापिकारयेत् प्रत्यहंमंगलद्रव्यैःपूज्यासासर्वनारीभिः २४ सुवासिनीपूजनंचकार्यंनित्यंदिने
दिने सुवासिनीनांदेयानिवायनानिशुभानिच २५ वासंतिकायाःपूजायायोविधिःक्रियतेनरैः सुवासिनीपूजनेसकार्यः
स्त्रीभिर्निरंतरम् २६ निरंतरपूजनार्थंयदिशक्तिर्नवर्तते तदाकार्यंचैकदिनेसुभगानांप्रपूजनं २७ सुवासिनीभ्योदेयंहि
प्रत्यहंभोजनंवरं नानापक्वान्नसंयुक्तंघृतपायससंयुतं २८ अलंकाराश्चवस्त्राणिकंचुक्यादिचयच्छुभं भर्तुरायुष्यमिच्छ·
द्भिर्दारैस्तद्देयमुत्तमम् २९ एवंकृत्वामासमात्रंस्नानंतच्छीतलाभिधं स्नातव्यंहिमधौस्त्रीभिस्तृतीयायाःशुभप्रदं ३० क
र्केशउवाच यत्प्रोक्तंशीतलागौरीस्नानंस्त्रीभ्यःशुभावहं कस्मिंस्तीर्थेचतत्कार्यंतत्त्वंवदद्विजोत्तम ३१

२४ २५ २६ २७ २८ २९ ३० ३१ ६५ ६७

३२ ३३ ३४ ३५ ३६ ३७ ३८ इतिटीकायांएकविंशोऽध्यायः २१ १ २

शंभुरुवाच यत्रयत्ररामतीर्थंवर्ततेजगतीतले सीतातीर्थंतत्रतत्रज्ञेयंसीताकृतंनरैः ३२ तस्मिन्सीताभिधेतीर्थेरामतीर्थांतिकेशुभे नारीभिःशीतलागौरीस्नातव्यानात्रसंशयः ३३ एवंस्नात्वामासमात्रंवैशाखेपरमेशुभे सितपक्षेतृतीयायांपूजयित्वाविशेषतः ३४ त्रिंशत्सुवासिनीभ्यस्तुदातव्यंभोजनादिकं गुरुपत्नींनिजांपूज्यतस्यैसर्वंविसर्जयेत् ३५ एवंस्त्रीणाव्रतंप्रोक्तंमासमात्रप्रसंगतः तिथीनांवर्णनमिदंसंक्षेपाच्चमयातव ३६ अथोऽन्यासांतिथीनांतुमहिमानमतःपरम् कथयिष्यामिचैत्रस्यसितपक्षस्यतच्छृणु ३७ यच्चैत्रमासेरघुवीरपूजनंयथामयावैकथितंसविस्तरम् तथाहिगौर्याःशुभपूजनंसदाकुर्वंतितेश्रीहरिलोकवासिनः ३८ इतिश्रीभविष्योत्तरपुराणेअयोध्याखंडेचैत्रमाहात्म्येरामपूजनविधिर्नामैकविंशोऽध्यायः २१ छ शंभुरुवाच चैत्रेमासेसितपक्षेयावैत्येकादशीतिथिः सर्वासुतिथिषुश्रेष्ठाचोपोष्याव्रतिभिःशुभा १ श्रेष्ठासाद्वादशीज्ञेयातस्यांतुयमपूजनम् कार्यंदध्योदनंदत्वाजलकुंभःप्रदीयतां २ अयंहिराक्षसोयस्यांताम्बूलस्यशुभप्रदं दानंचकारयत्पूर्वंकथितंचतवाग्रतः ३ तस्मात्ताम्बूलदानंहिचैत्रेमासिप्रशस्यते विशेषतोपिद्वादश्यांसितपक्षेमहार्थदे ४ देयंप्रयत्नतोरम्यंसोपस्कारंसदक्षिणं भोजनांतेचविप्रायमहासंपत्प्रदायकं ५ तिस्रश्चतिथयःपुण्याश्रेष्ठाश्चैत्रेप्रकीर्तिताः त्रयोदशीतथाभूतापौर्णिमासीतथैवच ६ यासुस्नानंचदानंचसर्ववांछितदायकं यैर्नस्नातोचैत्रमासोनस्नातंनवरात्मकं ७ तैस्त्वांत्यत्रिदिनंस्नात्वाचैत्रस्नानफलंलभेत् तासुश्रेष्ठापौर्णिमाहिसर्वपातकनाशिनी ८ तस्यामुद्यापनंकार्यंचैत्रस्नानफलाप्तये अतःपरंप्रवक्ष्यामिचैत्रोद्यापनकेविधिम् ९

३ ४ ५ ६ ७ ८ ९ छ छ छ

चतुर्दश्यांशुक्लचतुर्दश्यां १० ११ १२ १३ १४ १५ १६ १७ नानामांगल्यकारीणिद्रव्याणि केशप्रसादिनी आदर्शकुंकुमकज्जलादि

यंकृत्वासकलंसर्वंचैत्रस्नानंतुजायते उपोष्यचचतुर्दश्यांपूर्ववन्मंडपादिकं १० कृत्वातस्मिन्धान्यराशौकलशंवारिपूरितं स्था
पयित्वातदुपरिहेमपात्रंसुविस्तृतं ११ पंचरत्नयुतंस्थाप्यंततोवस्त्रंतुस्थापयेत् तस्मिन्सीतायुतंरामंसौवर्णंविधिपूर्वकम्
१२ भ्रातृभिर्वायुपुत्रेणसुग्रीवेणसमन्वितं विभीषणांगदाभ्यांतुतथाजांबवतायुतं १३ पूजयेद्देवदेवेशंपरमंगुर्वनुज्ञया
उपचारैःषोडशभिर्नानाभक्ष्यसमन्वितैः १४ रात्रौजागरणंकुर्यात्गीतवाद्यादिमंगलैः ततस्तुपौर्णमास्यांचसपत्नीकान्द्विजोत्त
मान् १५ त्रिंशन्मितानथैकंवासुशक्त्यावानिमंत्रयेत् ततःस्नात्वापुनःपूज्यसीतारामंविशेषतः १६ नारिकेलानिरम्याणिवंश-
पात्रेषुषोडश पृथक्पृथक्चसर्वेषुस्थापयित्वानरोत्तमैः १७ नानामांगल्यकारीणिक्षिप्यद्रव्याणितत्रहि वस्त्रैर्वाच्छादनीयानि
सूत्रेणापिसमंततः १८ वेष्टनीयानिविप्रेभ्यस्तानिदेयानिमानवैः एवंषोडशविप्रेभ्योदत्वाचैत्रव्रतास्थितैः १९ वायनानिततः
कुर्याद्धोमंव्रतसमाप्तये अतोदेवाइतिद्वाभ्यांजुहुयात्तिलसर्पिषा २० प्रीत्यर्थंरामचंद्रस्यदेवानांचपृथक्पृथक् ततस्तान्भो-
जयेद्विप्रान्पायसान्नादिनाव्रती २१ दक्षिणांचयथाशक्तितेभ्योदत्वाततोनमेत् पुनर्देवंसमभ्यर्च्यदूर्वांश्चतुलसींतथा २२
अश्वत्थमुनिवृक्षंचवटंधात्रींप्रपूजयेत् ततोगांकपिलांतत्रहेमशृंगविराजितां २३ कांतक्षुरांताम्रपृष्ठींदोहपात्रसमन्वितां
संपूजयित्वाविधिवत्कृत्वातांहिप्रदक्षिणां २४ गुरुंव्रतोपदेष्टारंवस्त्रालंकारमंडनैः सपत्नीकंसमभ्यर्च्यततोविप्रान्क्षमापये-
त् २५ युष्मत्प्रसादाद्देवेशःसुप्रसन्नोस्तुवैमम व्रतादस्माच्चयत्पापंसप्तजन्मकृतंमया २६ तत्सर्वंनाशमायातुस्थिरामेचास्तु-
संततिः मनोरथास्तुसकलाःसंतुनित्यममार्चनात् २७ देहांतेवैष्णवस्थानंप्राप्नुयादतिदुर्लभं इतिक्षमाप्यतान्विप्रान्प्रसा
द्यचविसर्जयेत् २८

डानि १८ १९ २० २१ २२ मुनिवृक्षंअगस्तिवृक्षं २३ कांतक्षुरारौप्यक्षुरा २४ २५ २६ २७ २

अर्चांपूजांकपिलासहितांकपिलाधेनुसहितां २९ ३० अन्यानिवक्ष्यमाणानिगृहादीनि ३१ ३२ ३३ ततोदिनत्रयंनामपौर्णिमांतंमासव्रतं·
कृत्वा ततः प्रतिपदाद्वितीयातृतीयाइतिदिनत्रयंत्रिजटाप्रीतये त्रिजटाराक्षसीप्रीतये केवलंस्नानंकुर्यान्नव्रतं वक्ष्यमाणश्रीरामचंद्रस्यवरप्रदानत्वात्

तामर्चांगुरवेदद्याद्रत्नयुक्तांसदाव्रती कपिलासहितांरम्यांप्रतिमाभिःसमन्विताम् २९ ततोदानानिकार्याणिशक्तौसत्यांस
दाव्रती गोभूतिलहिरण्याज्यवासोधान्यगुडानिच ३० रौप्यंलवणमित्याहुर्दशदानानिपंडिताः दशदानानिकार्याणिततो
न्यानिप्रकारयेत् ३१ गृहशय्यागजाश्वांश्चदासीदासरथादिकं शिबिकारामभूम्यादिददातुचमधुव्रती ३२ ततःसुहृत्प्रि
यैर्युक्तःस्वयंभुंजीतभक्तिमान् एवमुद्यापनविधिश्चैत्रस्नानफलाप्तये ३३ सविस्तरश्चकर्तव्यश्चैत्रस्नानपरायणैः ततो-
दिनत्रयंस्नानंत्रिजटाप्रीतयेनरैः ३४ कार्यंतत्रैवयस्मिन्हिचैत्रस्नानकृतंवरं आलस्याद्वाप्रमादाद्वामोहाद्वामानवःसुधीः
३५ नस्नातित्रिजटास्नानंचैत्रस्नानंवृथाभवेत् तस्माद्वश्यकंकार्यंत्रिजटास्नानमादरात् ३६ एवंमयाचैत्रव्रतस्यसर्व
मुद्यापनस्यापिविधानमुक्तं तथातिथीनांचमहात्म्यमुक्तंकानेस्तिचान्याश्रवणेमनीषा ३७ इतिश्रीभविष्योत्तरपुराणेचै
त्रमाहात्म्येअद्यो॰ चैत्रव्रतोद्यापनविधानवर्णनंनामद्वाविंशोऽध्यायः २२ छ॰ भैरवउवाच किमर्थंचैत्रकृष्णासापंच
मीकार्यितात्वया वरिष्ठेतिपुराशंभोतस्याःकथयविस्तरं १ शंभुरुवाच फाल्गुन्यांपौर्णमास्यांतुधुंडासाराक्षसीपुरा न
गरेषुचसर्वेषुपीडयामासबालकान् २ सापुनर्बालकैःसर्वैर्लज्जाकारिवचोक्तिभिः मुखहस्तोद्भवैर्वाद्यैर्धिःकृताधर्षितापिच ३
धूलिभिःशिशुमुक्ताभिर्व्याप्तासापतिताभुवि तस्यांदेहोपरित्यक्तमहाकाष्ठादिभिर्जनैः ४ ज्वालितासापौर्णमास्यांपुरातस्मा
त्तद्दिने प्रतिवर्षंज्वालनीयामंत्रमुक्तातुमानवैः ५

तस्यैस्नानजंपुण्यंदद्यादित्यर्थः एतच्चैत्रसाहचर्यात्सर्वमासव्रतेष्वपि
विज्ञेयमिति ३४ ३५ ३६ ३७ इतिटीकायांद्वाविंशोऽध्यायः २२ छ॰ १ २ ३ ४ ५

६ ७ ८ ९ १० होलिकाभूमिवंदनमंत्रः ११ तुषारसमयेशिशिरऋतौवृत्तेपरावृत्तेगतेसतिप्रातः प्रतिपदायांवसंतऋतौप्राप्तेचंदनेनसह
चूतकुसुमंआम्रपुष्पंसंप्राश्यपिबेद्यः पिबतिसःसमांवर्षपर्यंतंसुखीस्यात् १२ पानसमयेप्रार्थनामंत्रः १३ तस्यामेवचांडालंस्पृष्ट्वावश्यंस्नानंकुर्यादि-

दीपयाम्यद्यतेघोरांचितिंराक्षससत्तमे हितायसर्वजगतांप्रीतयेपार्वतीपतेः ६ असृक्पूतनसंत्रस्तैःकृतास्त्वंहोलिबा
लिशैः अतस्त्वांपूजयिष्यामिभूतेभूतिप्रदाभव ७ इत्युक्त्वादिनराध्योस्तुसंधौतान्ज्वालयेन्नरः पूजयेच्चविशेषेणस-
र्वारिष्टोपशांतये ८ एवंतांहोलिकांपूज्यद्वितीयेदिवसेनरैः प्रवृत्तेमधुमासेतुप्रतिपद्युदितेरवौ ९ कृत्वाचावश्यकार्याणि
संतर्प्यपितृदेवताः वंदयेद्धोलिकाभूमिंसर्वदुःखोपशांतये १० वंदितासिसुरेंद्रेणब्रह्मणाशंकरेणच अतस्त्वंपाहिनो
देविभूतेभूतिप्रदाभव ११ वृत्तेतुषारसमयेसितपंचदश्यांप्रातर्वसंतसमयेसमुपस्थितेच संप्राश्यचूतकुसुमंसहचंदने
नसत्यंहिफल्गुपुरुषोथसमासुखीस्यात् १२ चूतमग्र्यंवसंतस्यमाकंदकुसुमंतव सचंदनंपिबाम्यद्यसर्वकामार्थसिद्ध
ये १३ चैत्रेमासिमहाबाहोकृष्णेतुप्रतिपद्दिने यस्तत्रश्वपचंस्पृष्ट्वास्नानंकुर्यान्नरोत्तमः १४ नतस्यदुरितंकिंचिन्नाधयोव्या
धयस्तदा एतत्तद्दिनंनीत्वाततश्चान्येदिनत्रय १५ नानोत्सवंतुगीताद्यैर्नीत्वाचैवततःपरं पंचम्यांचैत्रकृष्णेतुसौभाग्यद्रव्य
मंगलैः १६ स्नात्वाकिंशुकपुष्पादिकृतरंगैःशुभावहैः चित्रितानिहिवासांसिपरिधायनरोत्तमैः १७ नानासुगंधद्रव्यादिगृ-
हीत्वाचपरस्परं एकैकोपरिसिंचेच्चमहामांगल्यदायकं १८ वसंतोद्भवपुष्पैश्चपूजयेद्धुनायकं नानादानानिदेयानिनिजमां
गल्यहेतवे १९ मिष्टान्नैर्भोजयेद्विप्रान्स्वयंचापिसुहृज्जनैः भोक्तव्यंतुवसंतत्तोपंचम्यामानवैःसुखम् २०

हचैत्रेमासीति १४ १५ सौभाग्यद्रव्यमंगलैः सुगंधतैलहरिद्रादिभिः १६ किंशुकपुष्पादिकृतरंगैःकिंशुकःपालाशःतस्यपुष्पाणिआदि-
शब्देनचूर्णक्षारादिभिः १७ १८ नानादानानिभक्ष्यभोज्यसौभाग्यपदार्थादीनि १९ २० छ छ

वसंततौ वसंतोद्भवपुष्पैः रामचंद्रस्यपूजनाद्वसंतपंचमीतिनरैः प्रोच्यतेपरंत्वियंरंगेनखेलनाद्रंगपंचमीविज्ञेया २१ २२ तस्यरामचंद्रस्यसर्वमासेषु-
पूर्वोक्तमेवपूजनंवर्त्ततेवान २३ २४ प्रतिपक्षजाशुक्लकृष्णजा २५ २६ मंदारःकल्पवृक्षजः २७ दमनः भाषायांदवणः सिंहिरिंगणीपुष्पं २८
मोदककरणं सुधौतानांतंदुलानांपिष्टंसूक्ष्मंविधायच तत्प्रमाणंतत्रजलंस्थाप्यंचुल्ह्यांतुतत्पचेत् अल्पमल्पंविकीर्याथमेलयित्वाघनंपचेत् घ
नीभूतेततोत्तार्यतत्पर्पट्यांसुयुक्तितः पूरणंचविधायाथसिताश्रीफलजंतथा त्रिवृत्प्रांतामर्धचंद्रसमानांकारयेत्सुधीः एवंशष्कुलयःकार्याः पाच्याः स्वेद
नपात्रके एवंचमोदकाकार्याः लड्डुकाश्चानेकधामताःप्रसिद्धाः सर्वलोकेषुविस्तरान्नात्रचोच्यते मंडोबहुविधः तत्रकिंचित्कर्त्तव्यतामाह भर्जिततंदुलमुद्गा-

वसंतपंचमीनाम्न्यतःसाप्रोच्यतेनरैः तस्यांदत्तंहुतंजप्तंसर्वंकोटिगुणंभवेत् २१ अतःप्रोक्तामयाश्रेष्ठापूर्वंसापंचमीतिथिः
चैत्रमासेकृष्णपक्षेसर्वपापप्रणाशिनी २२ कर्कशउवाच यस्त्वयारामचंद्रस्यमधौप्रोक्तंतुपूजनं तस्यसर्वेषुमासेषुपूजनंवर्त-
तेनवा २३ अयंहिममसंदेहःछिंधित्वंद्विजसत्तम शंभुरुवाच सर्वेष्वपिचमासेषुकार्यंरामस्यपूजनं २४ तेषुसर्वेषुमासेषु
नवमीप्रतिपक्षजा तस्यामुपोषणंकृत्वाविशेषाद्रामपूजनं २५ कार्यंनानोपचारैर्हिगीतवाद्यादिमंगलैः कृत्वाजागरणंरात्रौ
प्रभातेऽर्च्यंपुनश्चतं २६ नानानवविधैःपुष्पैःपूजयेद्रघुनायकं जातीचंपकमंदारतुलसीमुनिमालती २७ दमनःकेतकीसिंही
पुष्पाणांनवकंस्मृतं तथानवविधोदेयोनैवेद्योराघवायहि २८ मोदकोलड्डुकोमंडोवटकःफेनिकाशुभा वरान्नमोदनःशाकं
पायसंनवकंस्मृतम् २९

नांसमानंस्थूलचूर्णंचतुर्दशगुणितजलमध्येपाचयेत् पाचनसमयेएवंहिंगुसैंधवधानिकासुंठीमरीचंपिपली एतानि
क्षिप्त्वापक्वाच्चुल्हांसकाशादधःउत्तार्यपृथुपात्रमध्येढालयेदयमष्टगुणोमंडः एवंगोधूमादीनामपिभवंतिमंडाः वटकाः माषादीनांतैलपक्वाःप्रसिद्धाः फेनि
कामाह गोधूमानांधूमसींचकिंचिल्लवणसंयुतांजलेनबहुशोमर्द्यकुट्यकुट्यपुनःपुनः हस्तेनावर्तिकंचैवघृतमन्यदमत्रके स्थाप्यंपश्चात्तुधूमस्याःसूक्ष्मसूत्र
णिकारयेत् हस्तेघृतंलापयित्वायथासूक्ष्मंभवेत्तुतत् यथाकृत्वाचहस्तेतुवेष्ट्यसूत्राणितानितु पश्चात्किंचिद्विस्थितंतत्कृत्वातत्रघृतेपचेत् तृणानांमुष्टिनावर्थरया

कोशातकिजालवत् तृष्याधातुकरीवायश्लेष्मजित्तारफेनिका इति वरान्नंपंचपक्वान्नानि ओदनंभातः शाकंविविधशाकान्नं पायसंप्रसिद्धं एवंनवविधोनैवेद्यः
२९ ३० प्रतिपक्षेनैवशुक्लनवमीमारभ्यद्वादशमासेषुशुक्लकृष्णपक्षेएवंपूर्वोक्तप्रकारेणरामनवमीव्रतंकर्त्तव्यंवाप्रतिमासंशुक्लपक्षेकारयेत् ३१ ३२

एवंकृत्वापूजनंहितनोब्राह्मणभोजनं कृत्वास्वयंतुभुंजीतसकृद्धान्मित्रजनैःसह ३० एवंव्रतंनरैःकार्यंप्रतिपक्षेहिसर्वदा अ
थवाप्रतिमासंहिसितपक्षेचकारयेत् ३१ रामजन्मातिथौशुक्लनवम्यांयेनराःसदा कुर्वंत्युपोषणंरात्रौयेकुर्वंतिहिजागरं ३२ ना·
नोपचारैःश्रीरामंयेर्चयंतिचतद्दिने जीवन्मुक्ताश्चतेज्ञेयास्मृतातेवैष्णवोत्तमाः ३३ एवंमयाकर्कशरामपूजनंसर्वेषुमासेषुनि
वेदितंतव एवंप्रकारेणहियेद्विजोत्तमाः कुर्वंतितेश्रीहरिलोकवासिनः ३४ इतिश्रीभविष्योत्तरपुराणेअयोध्याखंडेचैत्रमा·
हात्म्येहोलिकाख्यानंतथामासपूजनविस्तारोनामत्रयोविंशोऽध्यायः २३ छ शंभुरुवाच तस्मात्सर्वप्रयत्नेनमासिमासि
नरोत्तमैः प्रतिपक्षेपिवाकार्यंसीताराघवपूजनं १ प्रतिमासिसितेपक्षेनवम्यांचनरोत्तमैः सर्वथानाभ्रमश्रीयाद्धुक्त्वाचाद्वाय्यंपांच
रत् २ एवंव्याधत्वयापृष्टंयत्तच्चकथितंमया सविस्तारंकिमन्यत्तेवांछास्तिश्रवणेवद ३ कर्कशउवाच भोविप्रत्वन्मुखात्सर्वंश्रु
तंविस्तरतोमया इदानींहीनजातिस्थंत्वमामुद्धर्तुमर्हसि ४ शंभुरुवाच आगच्छत्वसहैवाद्यमयायोध्यापुरींप्रति सरयूस्नानमा
त्रेणमद्योपापाद्विमोक्ष्यसे ५ इत्युक्त्वाकर्कशंशंभुस्ततःप्रोवाचराक्षसम् भोराक्षसत्वमत्रैवमासमात्रंस्थिरोभव ६ अयोध्यायांप्र
वेशश्चराक्षसानांनविद्यते अतोहंमधुमासेहिस्नात्वातेनपथापुनः ७ यदागच्छामिकांचींत्वांचोद्धरिष्याम्यहंतदा मासंदेहोस्ततेवि
त्तेशपथेनब्रवीम्यहं ८ यत्पापंब्रह्महत्यायास्तथागोपालनिंदनात् नोद्धृत्यत्वांहिगच्छामितर्हितन्मयितिष्ठतु ९ मद्यपानाच्चयत्पापं
हेमस्तेयादिकंचयत् नोद्धृत्यत्वांहिगच्छामितर्हितन्मयितिष्ठतु १० यत्पापंभ्रूणहत्यायास्तथाचैवेत्थमज्जनात् नोद्धृत्यत्वांहिग-
च्छामितर्हितन्मयितिष्ठतु ११ ३३ ३४ इतिटीकायांत्रयोविंशोध्यायः २३ १ २ ३ ४ ५ ६ ७ ८ ९ १० ११

१२ परितश्चासमंतात् १३ १४ १५ १६ मातंगःगजः १७ १८ १९ काश्यांकाशीयात्रानिमित्तंकाशीवासनिमित्तंविघ्नंध्या

इत्यादिशपथैस्तांहिराक्षसंहर्षयन्द्विजः यावत्पश्यतिसर्वत्रतावज्जातंहिकौतुकं १२ व्याधायच्चैत्रमासस्यमाहात्म्यस्योपदे
शतः तरवःफलिनोजाताःपरितोदशयोजनं १३ पत्रैःपुष्पैर्विनम्राश्चस्कंधाधिपवनाबभुः नद्यस्तोयैर्वहंत्यश्चननृतुर्बर्हिणोव
ने १४ तद्दृष्ट्वाकर्कशश्चापिचैत्रमाहात्म्यकीर्तनात् दुर्वनंसुवनंजातंचैत्रंश्रेष्ठममन्यत १५ ततस्तौहित्रयस्तस्माद्वनान्मार्गेण
निर्गताः शनैःशनैरयोध्यायाःपरिपश्यन्वनस्थलीं १६ तावच्छब्दोमहाञ्जातःसिंहमातंगसंभवः यावन्नयंतुमातंगःपृ-
ष्ठेधावंश्चकेसरी १७ एवंतौशंभुसान्निध्यंप्राप्तौकलहकारिणौ मार्गरोधकरौदुष्टौतौदृष्ट्वाशंभुरब्रवीत् १८ पश्यकर्कशविघ्ना
निचैत्रस्नानेपदेपदे संभवंतीतिवैबुध्वाचैत्रस्नानंनलंघयेत् १९ काश्यांविवाहेगीतायांगयायांरामचिंतने चैत्रस्नानेमहादा-
नेविघ्नानिसंभवंतिहि २० एवंवदतिविप्रेंद्रेतौदुष्टौकरिकोहलौ चैत्रनामश्रवात्पूर्वजन्मस्मृतिरभूच्छुभा २१ ततस्तौत्राहित्राही-
तिकृत्वादीर्घमहारवं शरणंद्विजवर्यायजग्मतुःशंभुशर्मणे २२ सोपिशंभुश्चताभ्यांहिस्पृष्टस्तत्कृपयान्वितः किमर्थंदुष्टजाति-
हिप्राप्तौतत्कथ्यतांमम २३ इतिविप्रवचःश्रुत्वाकेसरीवाक्यमब्रवीत् सतोरामेश्वरक्षेत्रेपूर्वजन्मन्यहंद्विजः २४ निंदकःसर्वध-
र्माणांपाखंडोत्त्येकतत्परः कदाचिच्चैत्रमासेतुतत्रश्रीरामसंज्ञके २५ तीर्थेजनसमूहेचश्रुत्वापौराणिकींकथां पौराणिकेण
कथितांचैत्रमाहात्म्यसूचिकां २६ कृतवानिंदनंचाहंवारंवारंपुनःपुनः तन्मत्कृतांनिंदनंचकश्चिद्विप्रस्तपस्थितः २७ शुश्रा
वसकलंदुष्टंतेनशप्तोस्म्यहंतदा क्रूराजातंत्वरंगच्छयदाचैत्रेशकीर्तनं २८ भविष्यतिमहारण्येशापस्यांतस्तदेतिच एवंप्रो
क्तंमयासर्वंपूर्वजन्मानुकीर्तनम् २९

ध्यादिर्ततोभवति विवाहेकलहादिकंगीतायांगीतापाठनियमेगयायांपासविधिपंचचत्वारिंशद्देहिम्यान्ह
करणाग्रहेरामचिंतनेरामनामस्मरणेमहादानेगोभूशय्यादिदानेविघ्नाःसंभवंति २० २१ २२ उवाचेतिशेषः २३ २४ २५ २६ २७ २८
२९

३० ३१ ३२ इतिटीकायांचतुर्विंशोध्यायः २४ छ १ २ ३ ४ ५ ६ ७ ८ ९

तेनशापेनजातोहंकेसरीभयकारकः चैत्रेरामश्रवाज्जाता पूर्वस्मृतिरनुत्तमा ३० इदानींरक्षमांविप्रत्वंचैतात्सिंहदेहतः-
इतिसिंहस्यवृत्तंतुज्ञात्वाकरिणमब्रवीत् ३१ कस्मात्त्वंमातंगगतोसिदुष्टजातोवदस्वाद्यमहाघसंघात् सचापिमातंगवरःसु
मस्तंवृत्तंनिजंचाकथयच्चजीर्णं ३२ इतिश्रीभविष्योत्तरपुराणेअयोध्याखंडेचैत्रमाहात्म्येकरिसिंहाख्यानंनामचतुर्विं
शोऽध्यायः २४ छ मातंगउवाच शृणुविप्रवक्ष्यामिपूर्ववृत्तंमयाकृतं रामनाथपुरेचाहंकावेर्याउत्तरेतटे १ वि
प्रःपरमदुर्वृत्तःसर्वशास्त्रपराङ्मुखः लक्ष्मीमदभराक्रांतःपण्यस्त्रीभोगकारकः २ एकदासुहृदेनाहंभोजनार्थंनिमंत्रि
तः श्राद्धेहंमधुमासेहिशुक्लेश्रीनवमीदिने ३ मयाभुक्तंसुहृद्गेहेनवम्यांहिद्विजसत्तम तेनपापेनजातोस्मिकरिजातोनसंशयः
४ सर्वदाप्रतिमासेपिनवम्यांनहिभोजनं कार्यंविशेषतोरामनवम्यांनिंदितंचतत् ५ इदानींनाहिजानामिकेनपुण्येनतेत्र
वै संगतिस्त्ववनेजातासर्वेषांपरमार्तिहृत् ६ इतितस्यवचःश्रुत्वाशंभुर्ध्यानंविचारयन् ज्ञात्वामातंगपुण्यंतुप्रोवाचकरिणं
द्विजः ७ शृणुमातंगवक्ष्यामियत्पुण्यंचत्वयाकृतं पूर्वजन्मनितत्सर्वंयेनमेसंगतिर्वने ८ जातात्वामुद्धरिष्यामिमाचिंताकुरु
सर्वथा रामनाथपुरेरम्येकावेरीतटशोभिते ९ रामायणकथाचैत्रेश्रुत्वापूर्वंत्वयाक्षणं तेनपुण्येनमेजातासंगतिश्चाद्यतेवने १०
इतिविप्रेणकथितंकरिपुण्यंपुराकृतं श्रुत्वासिंहोपिपप्रच्छनैजपुण्यंद्विजायसः ११ सोपिशंभुःक्षणंध्यात्वाज्ञात्वाकेसरिणाकृ
तं पूर्वजन्मनियत्पुण्यंतत्तस्मैप्रोक्तवान्द्विजः १२ रामेश्वरेमहाक्षेत्रेपुराश्रीनवमीदिने रामतीर्थेत्वयास्नात्वादृष्टोरामेश्वरःशिवः
१३ तेनपुण्येनतेजातासंगतिर्ममकानने इदानींशृणुसिंहत्वंशृणोतुचकरीमहान् १४ १० ११ १२ स्नानेस्नानंकृतम् रा
मेश्वरः त्वयादृष्टः ननुस्थाणुमूर्तेःस्वप्रसादात् स्नानार्थंरामतीर्थेगमनमनुचितमित्युक्तेभोगमूर्तेःसर्वमुचितमिति १३ १४ छ

१५ १६ १७ १८ १९ २० रामलिंगार्थे सेतुरामेश्वरलिंगार्थे २१ २२ २३ २४ २५

अथाहंमधुमासेहिस्नात्वानेनपथापुनः यदागच्छामितांकांचीयुवामुद्धारयाम्यहं १५ मासंदेहोत्रकर्तव्यःशपथैःप्रब्र-
वीम्यहम् संतोषार्थंयुवाभ्यांहिप्रोच्यतेशपथामया १६ परस्त्रीगमनात्पापयत्स्मृतंनिंदितंमहत् युवानोद्धृत्यगच्छामितर्हित
न्मयितिष्ठतु १७ बालस्त्रीघातजपापंतथामित्रवधादिकं युवांनोद्धृत्यगच्छामितर्हितन्मयितिष्ठतु १८ ब्रह्मस्वहरणात्पापंय-
त्स्मृतंमातृनिंदनात् युवांनोद्धृत्यगच्छामितर्हितन्मयितिष्ठतु १९ इत्युक्त्वाद्विजवर्यस्तुस्त्रियाभिल्लेनसंयुतः करिसिंहोवनेस्था
थ्यगच्छन्मार्गेशनैःशनैः २० ददर्शान्यपथायातंश्रेष्ठकार्पटिकोत्तमं वहंतंरामलिंगार्थंश्रेष्ठंभागीरथीजलं २१ शंभुःपप्रच्छतं
नत्वानघःकार्पटिकोत्तमं कुतःसमागतंविप्रगम्यतेक्वेतितद्वद २२ कार्पटिकउवाच प्रयागादागतंविद्धिमांत्वंभूसुरसत्तम
मधुमासेवगाहार्थमयोध्याप्रतिगम्यते २३ इदानींत्वंनिजंवृत्तंवदब्राह्मणसत्तम कुतःसमागतश्चात्रगम्यतेक्वाधुनावद २४
इतितद्वचनंश्रुत्वाशंभुःप्रोवाचतंतदा शिवकांच्याःसमायातमयोध्याप्रतिगम्यते २५ चैत्रमासेवगाहार्थंसत्यंतेकथितंमया इति
शंभुवचःश्रुत्वापुनःकार्पटिकोत्तमः २६ पप्रच्छद्विजवर्यायकौतुकाविष्टमानसः शिवकांच्यांशंभुनामाकश्चिद्विप्रोस्तिभोद्विज २७
तत्तस्यवचनंश्रुत्वापुनःशंभुस्तमब्रवीत् बहवःशंभुनामानिवर्त्ततेद्विजतद्ब्रूहि २८ कार्पटिकउवाच गार्ग्यगोत्रोद्भवधुंदिपुत्रसू-
र्योपनामकं ब्राह्मणंशंभुनामानंजानीषेत्वंनवावद २९ एवंमहाकार्पटिकेणासर्वंगोत्रोपनामादिकमादरेण प्रोक्तंयथातत्त्वसभू-
सुरोपिज्ञात्वानिजंवृत्तमथावदत्तं ३० इतिश्रीभविष्योत्तरपुराणेअयोध्याखंडेचैत्रमाहात्म्येकार्पटिकशंभुसंवादोनामपंच-
विंशोऽध्यायः २५ छ शंभुरुवाच भोभोकार्पटिकश्रेष्ठकिमर्थंनहिपृच्छसि तद्वदस्वसविस्तारंमाशंकांकुरुचात्रहि १

२६ २७ २८ २९ निजंसर्वनामकार्पटिकोक्तोयःशंभुब्राह्मणःसोऽहमेवेतिज्ञात्वा ३० इतिटीकायांपंचविंशोऽध्यायः २५ छ १

२ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ भोद्विज हेशं

कार्पटिकउवाच शृणुविप्रप्रवक्ष्यामियदर्थंपृच्छ्यतेत्वया यदाहंगतवान्गंगासागरंद्रष्टुमादरात् २ सीताकुंडस
मीपेहिदेशेकैकटनामके दृष्टोहंमार्गमध्येचपिशाचेनोग्ररूपिणा ३ मांहंतुंनिकटेप्राप्तंतदृष्ट्वाहंतदाद्विज श्रीरामकीर्त
नंदीर्घंकृतवान्भयकंपितः ४ कीर्तनाद्रामचंद्रस्यसपिशाचःपलायनं मत्तःकृत्वादूरदेशेस्थित्वाशृण्वन्कीर्तनम् ५ तस्मा
ज्ज्ञात्वापूर्वजन्मस्मृतिस्तस्यशुभावहा त्राहित्राहीतिमांप्राहमयापृष्टःपुनश्चसः ६ कस्मात्पिशाचदेहत्वंजातंतद्वदसत्वरं इति
मेवचनंश्रुत्वापिशाचःप्राहमांपुनः ७ कांचीपुर्यांद्विजश्चाहंधुंडिनामापुरास्थितः नान्नदानंमयापूर्वंकृतंस्वल्पमपिक्वचित्
८ तस्मात्पिशाचदेहत्वंप्राप्तंकार्पटिकोत्तमं इतितस्यवचःश्रुत्वापुनःप्रोक्तःसवैमया ९ कथंपिशाचयोन्यास्तुतेमुक्तिश्चभावि
ष्यति ततःपुनःसमाप्राहयदिमेतनयःशुचिः १० चैत्रदर्शेममोद्देशादन्नदानंकरिष्यति भविष्यतिममोद्धारस्तत्क्षणान्ना
त्रसंशयः ११ इतितद्वचनंश्रुत्वापुनःप्रोक्तःसवैमया वर्ततेक्वसुतस्तेहिकिंनामावदमांप्रति १२ ततस्तेनयथाप्रोक्तंगार्ग्यगो
त्रादिकंचयत् तत्प्रोक्तंचमयासर्वंनिकटेतवभोद्विज १३ पिशाचोहिपुनश्चाहंमुक्तश्चास्तद्दाम्यहं रामेशार्थेभोपिशाचनीय·
तेजान्हवीजलम् १४ मयाकरंडमध्येहियदागच्छामिदक्षिणा दिशंकालेनकांच्यांहिप्रवेक्ष्यामियदातदा १५ तवपुत्रायवृ
त्तंहिकथयिष्याम्यहंतव इतिमद्वचनंश्रुत्वासंतोषंपरमंगतः १६ पिशाचःप्राहमांविप्रःस्तुत्वानत्वापुनःपुनः अवश्यमेववक्त
व्यंमद्वृत्तंममसूनवे १७ यथादृष्टंत्वयाचात्रयथाप्रोक्तंमयातव अन्यच्चकथ्यतांतस्मैममपुत्रायसादरम् १८ मधुदर्शे
न्नदानस्यमाहिमाश्रूयतेदिवि अतस्त्वंहिममोद्देशादन्नदानंमधौकुरु १९

द्विज॰ १३ १४ १५ १६ १७ १८ मधुदर्शे चैत्राऽमावास्यायां १९

३०

२० २१ २२ २३ लिंगैर्लक्षणैः २४ कर्कशाख्येनभिल्लेन २५ २६ भवःजन्म २७ पांथः कार्पटिकः दंपतीस्त्रीपुं
सौसभार्यः शंभुः २८ इतिटीकायांषड्विंशोऽध्यायः २६ छ १ २ ३ ४ ५ हाटकेनसुवर्णेन घटि·

एवमुक्त्वापिशाचः सशपथोमांचकारह नन्नूषेस्मरणंकृत्वाममपुत्रायचोद्विज २० भविष्यतिवृथासर्वायात्रात्वमहा
मते इतितद्वचनंश्रुत्वाश्वासयित्वाचतंपुनः २१ निर्गतोस्मिमधौस्नातुमयोध्यांगंतुमादरात् स्नात्वायोध्यापुरीमध्येचै
वस्नानंमहाफलम् २२ यदागच्छामिलांकांचीतदातस्मैवदाम्यहं अतएवमयापृष्टस्तवशंभुर्द्विजोत्तमः २३ गार्ग्यगोत्रा·
दिभिर्लिंगैर्वर्ततेचेहदूरगमा इतिशंभुःपितुर्वृत्तंज्ञात्वामूर्छांगतस्तदा २४ आश्वासितश्चभिल्लेनविप्रप्रोवाचतंपुनः भो
भोकार्पटिकश्रेष्ठनमनोस्तिनराधमः २५ यस्त्वयापृच्छतेशंभुःसोहंविद्धिनसंशयः मयापुत्रेणनकृतंस्वपितुर्मोक्षदा
यकं २६ अन्नदानादिकंकर्मधिग्धिग्मोहिवृथाभवः इदानींतववाक्याद्धिदास्याम्यन्नमधौपितुः २७ एवंशंभुःकार्पटि
कायचोक्त्वाऽयोध्यांरम्यांदूरतोवैददर्श प्रणेमुस्तौदंपतीपांथभिल्लास्ततःशंभुश्चावदत्कर्कशंसः २८ इतिश्रीभविष्यो
त्तरपुराणे अयोध्याखंडेचैत्रमाहात्म्येअयोध्यादर्शनंनामषड्विंशोध्यायः २६ छ शंभुरुवाच पश्यपश्यमहा-
भिल्लमहायोध्यापुरींशुभाम् यस्यांस्नातुंसमायाताद्दश्यंतेकोटिशोजनाः १ जनौघानांध्वनिश्चायंश्रूयतेमेघशब्दव
त् नानाध्वजपताकाश्चदृश्यतेचेंद्रचापवत् २ तथावाद्यध्वनिश्चायंश्रूयतेहिमनोहरः अग्निहोत्रादिधूमौघैर्व्याप्तंपश्यनं
भोगणं ३ कैलासगिरिसाम्यानिपश्यसौधानिकर्कश नवमत्तोलीपरिखावलयीकृतमेखलाम् ४ उत्तुंगहर्म्यविलसत्प
ताकाशतसंकुलां अभ्रंलिहमहासौधसुवर्णकलशोज्वलां ५ पश्यायोध्यापुरींश्रेष्ठांसरयूतीरनादितां हाटकाद्घटितैरत्नख
चितैर्याकपाटकैः ६

तैः रत्नखचितैः रत्नजडितैः कपाटैः संवृत्तैर्नामबद्धैः विवृतैरुद्घाटितैश्चस्वैरंस्वेच्छयाउन्मिषंतीवयात्रअयोध्यालक्ष्यते इत्युत्त
रेणसंबंधः ६

जनान् सुरते सुरतनिमित्तंआह्वयंतीवलक्ष्यतइति ७ अधःकृताधोभुवनांअधःकृतानि अधोभुवनानि यथातांअमरावतींस्वर्गं ८ तिरोहिताअं

संवृतैर्विवृतैःस्वैरमुन्मिषंतीवलक्ष्यते दोधूयमानैर्मरुतापताकांचलचित्रकैः ७ आह्वयंतीवसुरतोलक्ष्यतेपथिकान्जनान्
अधःकृताधोभुवनाजेतुमेकामरावतीम् ८ प्रासादमूलव्याजेनसन्नद्धेवाद्यलक्ष्यते पवित्रेस्मिन्महाक्षेत्रेनिवसंति
तिरोहिताः ९ ब्रह्मेशहरिभिःसर्वेदेवास्तेऋषयोमलाः कुबेरस्पर्धयायत्रचिन्वंतिवसुसंचयान् १० दातुंभोक्तुंसर्वजनाः
स्वधर्मनिरताःसदा येषांप्रक्षालयंतिस्मचरणान्वासवादिकाः ११ तेद्विजाःकस्यनोवंद्यायेयोध्यानगरीस्थिताः कृमिकीट
पतंगानांविनाज्ञानसमाधिभिः १२ अत्रनिर्वाणपदवीसुलभाकेनवर्ण्यते इंद्रनीलमहातुंगप्रतोलीचारुदर्शना १३
रामचंद्रस्यादिव्योयंप्रासादस्तुंगतोरणः प्रतोलीयस्यघटिताकाश्मीरैरुपलैरलं १४ सीतायाश्चमहानेषप्रासादोरत्नतोरणः
नानारत्नैर्मंडितश्चहेमस्तंभविराजितः १५ स्फाटिकैरुपलैश्चित्रसरयूतीरसंस्थितः रामतीर्थसमीपेत्रसीतारामस्य
सुंदरः १६ प्रासादोविमलोभातितप्तकांचननिर्मितः पताकाभिर्विचित्राभिःकलशैःसुविराजितः १७ उत्तप्तजांबूनद
रत्नकुंभःप्रवालवैडूर्यनिबद्धभूमिः हेमप्रतोलीरचितःसएषप्रासादवर्योस्तिहिलक्ष्मणस्य १८ चातुर्ययत्रविश्रांतसकलं
विश्वकर्मणः सोयंभरतराजस्यप्रासादोहेमतोरणः १९ तथाददीप्यमानोयंरत्नभित्तिविनिर्मितः प्रासादोदृश्यतेरम्यः
शत्रुघ्नस्यशुभावहः २० स्पटिकैर्भित्तिभिश्चित्रःप्रोच्चःकनकैरखितः प्रासादोवायुपुत्रस्यदृश्यतेयंमहाशुभः २१ एवं
मुक्ताकर्कशेनपत्न्याकार्पटिकेनच सहितश्चतदाशभुस्तापुरींप्रविवेशसः २२ रामतीर्थेततोगत्वाकृत्वाक्षौरादिकंविधिम्
उपोष्यदिनमेकंहितीर्थेश्राद्धंचकारसः २३

तर्हिताः ९ १० वासवादिकाःइंद्रादयः ११ १२ प्रतोलीग्रामाभ्यंतरमार्गः १३ प्रासादःराज्ञांवासगृहं काश्मीरै रुपलैःपाषाणैः १४ १५ १६ १७ १८ १९ २० कनकंसुवर्णं २१ २२ २३

बंधुर्लक्ष्मणः २४ २५ २६ इतिटीकायांसप्तविंशोऽध्यायः २७ छ १ २ ३ ४ करिकोहलौगजसिंहौ

रामचंद्रंचसंपूज्यबंधुसीतांजनीसुतैः सहितंब्राह्मणांस्तर्प्यचैत्रस्नानंचकारसः २४ अमावास्यांशुभांचैत्रप्राप्तांज्ञात्वा
द्विजोत्तमः मुक्त्यर्थंस्वपितुश्चैकेत्यन्नदानंद्विजायहि २५ तच्चैत्रमासेनिशिनाथसंक्षयेदत्तंपितुर्यच्छुभदंमनोहरं विप्रेण
चान्नंपथिकस्यवाक्यतस्तस्मात्पिशाचःसुरसद्मनिस्थितः २६ इतिश्रीभविष्योत्तरपुराणेअयोध्याखंडेचैत्रमाहात्म्येअ
योध्यावर्णनंनामसप्तविंशोऽध्यायः २७ छ नृसिंहउवाच अयोध्यायांततःशंभुःकृत्वाचैत्रेवगाहनं उद्यापनविधिंचा
पियथोक्तंचचकारसः १ कर्कशोपिमधौस्नात्वामुक्तःपापौघभूधरं अयोध्यानगरीमध्येसाधुवृत्त्यावसच्चिरं २ श्रीरामचिंत
नंकुर्वन्निनायायुश्चसंक्षयं ततःप्रापहरेर्लोकमयोध्यामरणेनसः ३ शंभुश्चापिमधौस्नानंकृत्वाकांचीपुरींपुनः गंतुंप्रवृत्तश्श्री
रामंनत्वायोध्यांपुनःपुनः ४ ययौपूर्वेणमार्गेणयत्रतौकरिकोहलौ स्थापितौशपथैःकृत्वातत्रशंभुःसमागमत् ५ दत्त्वादिन-
द्वयपुण्यंशुभाभ्यांमधुमासजं नैजंकृत्वांजलौतोयंतयोर्मुक्तिंचकारसः ६ ततस्तौकरिसिंहौहिदिव्यमाल्यानुलेपनौ दिव्यंविमा
नमारुह्यविष्णुलोकंगतावुभौ ७ ततोऽग्रेद्विजवर्योपिययौमार्गेणभार्यया यत्रासराक्षसःपूर्वंस्थापितःशपथैर्वने ८ तंदृष्ट्वाराक्ष
सःश्रेष्ठभार्यांप्राहद्विजोत्तमः अयिचंद्राननेरम्येशृणुमेवचनंशुभं ९ यात्वयाशीतलागौरीस्नातावैसरयूजले तस्यैकदिवसस्याद्य
देहिपुण्यंशुभावहं १० राक्षसायहिमद्वाक्याद्गृहीत्वाजलमंजलौ इतिशंभुवचःश्रुत्वापद्मनेत्राकृशोदरी ११ मालतीद्विजपत्नी
साददौपुण्यंनिजंतदा ततःसराक्षसःश्रेष्ठस्त्यक्त्वादेहंमलीनस १२ दिव्यविमानमारुह्यनत्वाभार्यायुतंद्विजं दिव्यमाल्यांबरध
रोहरिलोकंजगामसः १३ शंभुश्चापिप्रियायुक्तोमधुस्नानंविवर्णयन् ययौकांचीपुरींश्रेष्ठांजनान्वृत्तंन्यवेदयत् १४

५ ६ ७ द्विजवर्यःशंभुर्ब्राह्मणः ८ ९ १० ११ मालतीनामकी १२ १३ वृत्तंस्वयात्राजन्यंवृत्तांतं १४

१५ द्वयोःपिशाचयोः दिनद्वयस्यपुण्यंददौतृतीयापिशाचिनीतस्याउद्धारार्थंभार्यांप्राहेत्युत्तरेणान्वयः १६ १७ १८ १९ २० आपृ-

नृसिंहउवाच भोपिशाचयथापृष्टंभवद्भिश्चकथानकं तत्सर्वंचमयाख्यातंराक्षसस्यकथादिकं १५ इत्युक्त्वानृहरिर्विप्रोगृही
त्वाचांजलौजलं ददौदिनद्वयस्याथपुण्यंचैत्रकृतंनिजं १६ ततःप्रोवाचभार्यांतुरम्येचंद्रप्रभेप्रिये यात्वयासीत्तलागौरीस्नातासी
ताकृतेवरे १७ तीर्थेतस्यादिनैकस्यदेहिपुण्यंशुभानने पिशाचिन्यैसमुद्धर्तुंमाविचारोस्तुतेहृदि १८ इतिभर्तुर्वचःश्रुत्वारम्यंप
कजलोचना लक्ष्मीनाम्नीविप्रपत्नीददौपुण्यंनिजंतदा १९ ततःपिशाचास्तेसर्वेमुक्ताःशीघ्रंशुभावहाः निजरूपाणिवैप्रापुःप्रणे
मुर्नृहरिंजवात् २० नत्वास्तुत्वापुनर्नत्वानृहरिंचप्रियायुतं आपृच्छ्याजग्मिरेसर्वेनैजंनैजंयथास्थलं २१ नृहरिश्चप्रियायुक्तोऽब्जकंप्र
तिसमाययौ चैत्रस्नानेनपुत्रश्चरामदासाभिधोमहान् २२ जातःपरमगंभीरःसीतारामैकमानसः माडव्यउवाच एवंराजन्मया
प्रोक्तंयत्पृष्टंचत्वयापुरा २३ तस्मान्मयातेनृपतेवगाहनंप्रोक्तंमधौतत्सरयूजलेशुभे पुत्रार्थमन्यन्नहिकिंचिदस्तिवैदानंव्रतंपुत्रकर
जवैनहि २४ इतिश्रीभविष्योत्तरपुराणेअयोध्याखंडेचैत्रमाहात्म्येपिशाचोद्धरणंनामाष्टाविंशोऽध्यायः २८ सूतउवा
च एवंरम्यांकथांतत्रमांडव्यश्चनृपायहि कथयामासतांसर्वांवायसावृक्षसंस्थिताः १ अष्टोत्तरशताःसर्वेश्रुत्वाजाताःसिताः
शुभाः राजहंसत्वमापन्नास्तेदृष्टाःपुण्यकीर्तिना २ ज्ञात्वाश्रवणजंपुण्यंराजाहर्षसमन्वितः पूजयामासमांडव्यंनानाविभव-
मंगलैः ३ पुण्यकीर्तिस्ततःशीघ्रममात्यान्प्रतिसादरं सर्ववृत्तंनिवेद्याथप्रेषयामासतान्पुरं ४ राज्यसंरक्षणार्थायततःसैन्येन-
संयुतः विसर्जयित्वामांडव्यमृषिसंघसमावृतं ५ ययौमार्गेणवैराजाचैत्रेऽयोध्यापुरींप्रति दृष्ट्वायोध्यापुरींरम्यांसप्रहृष्टतनू
रुहः ६ ननामराजायोध्यांतांपुण्यांवांछितदायकां विवेशनगरीमध्येपुण्यकीर्तिनृपोत्तमः ७

च्छ्यअतिशयेनपृष्ट्वाअतिनम्रताया

ऽऽज्ञांगृहीत्वेत्यर्थः २१ अब्जकंगोदातीरस्थचंद्रपुरं २२ २३ २४ इतिटीकायामष्टाविंशोऽध्यायः २८ १ २ ३ ४ ५ ६ ७

८ ९ १० ११ स्वनगरंसौराष्ट्रदेशस्थं १२ १३ १४ १५ १६ १७ १८ १९ २० २१ रु·

शिबिकांक्रोशमात्रेतुमुक्त्वाशीघ्रंमहीपतिः रामतीर्थंततोगत्वास्नात्वाक्षौरादिकंविधिं ८ चकारनृपतिःसर्वंपौरोहित्य निवेदि
तं ततःस्नात्वाचैत्रमासेनिर्मलेसरयूजले ९ मासमात्रंपुण्यकीर्तिर्नित्वारामंदिनेदिने नानादानानिसर्वाणिचकारनृपसत्तमः १०
चैत्रमासस्यसर्वंहिकृत्वाचोद्यापनादिकं विधिंसम्यग्यथाप्रोक्तंमांडव्येनपुराशुभं ११ ततःसैन्येनपत्न्यातुपुण्यकीर्तिर्नृपोत्तमः
ययौस्वनगरंशीघ्रंध्वजसौधविराजितं १२ चंद्राननाराजपत्नीचैत्रस्नानादजीजनत् पुत्रंवंशकरंश्रेष्ठंयज्ञकीर्तिंमहत्तम १३ राजा
राज्ञीपुत्रलाभात्परामुदमवापतुः एवंऋषिवराःसर्वेयत्पृष्टंचैत्रवर्णनं १४ तत्सर्वंचमयाप्रोक्तंकिमन्यच्छ्रवणेस्पृहा भवतांवर्ततेब्रूत
पुनश्चापिवदाम्यहं १५ ऋषयऊचुः साधुसाधुमहाश्रेष्ठसूतपौराणिकोत्तम चैत्रस्नानंत्वयासम्यक्कथितंविस्तरेणहि १६ इदा
नींप्रष्टुमिच्छामोवृद्धानांरोगिणांमधो कथंस्नानफलंस्याद्धिकउपायोस्तितद्ब्रूहि १७ तत्वंवदमहाभागविस्तरात्सकलमन्वयन्
सूतउवाच वारुणंचजलस्नानंमलस्नानंतथास्मृतं १८ मंत्रस्नानंतथाध्यानस्नानंपंचविधंस्मृतं मृत्तिकागोमयंभस्मपंचग·
व्यादिभिश्चयत् १९ समंत्रंचकृतंस्नानंवारुणंकथितंबुधैः विनामंत्रेणयत्स्नानंजलस्नानंचतत्स्मृतं २० मलक्षयोचार्द्रवस्त्रैर्मल
स्नानंहिकथ्यते मंत्रस्नानंहितज्ज्ञेयंयन्मंत्रैर्जलसिंचनं २१ ध्यानस्नानंतत्स्मृतंयच्चचित्तेश्रीविष्णोर्यच्चिंतनंभक्तियुक्तं एवंप्रो
कोरुग्णवृद्धादिकानांस्नानेभेदःपंचधाभोमुनींद्राः २२ इतिश्रीभ० स्कं० चैत्रमा० पुण्यकीर्तिनृपतेःपुत्रलाभोनामैकोनत्रिं·
शोऽध्यायः २९ ऋषिरुवाच भोसूतशंभुविप्रेणकथितंकर्कशाययत् त्रिजटाप्रीतयेस्नानंचैत्रस्नानाद्दिनत्रयं १ वदका
त्रिजटाप्रोक्ताकस्मात्तत्प्रीतयेनरैः स्नानंदिनत्रयेकार्यंतत्सर्वंविस्तरेणहि २

ग्णवृद्धादिकानांरोगिणांवृद्धानांआदिशब्देनका
रागृहादिभयस्थानस्थितानांकार्यांतरव्यग्राणां २२ इतिटीकायामेकोनत्रिंशोऽध्यायः २९ ६९ १ २

३ ४ ५ ६ ७ प्लवगैः वानरैः ८ ९ १० ११ १२ १३

सूतउवाच सम्यक्पृष्टमृषिवराः शृण्वंतुममभाषितं यदानिजापितुर्वाक्याद्रामचंद्रोवनेययौ ३ तदागोदावरीती·
रपंचवट्यांस्तुजानकी रावणेनहृतासाध्वीत्यशोकेस्थापिताहिसा ४ तस्याःसंरक्षणार्थायराक्षसाश्चसहस्रशः
प्रेरितारावणेनैवतासांमध्येस्थिताहिसा ५ त्रिजटाराक्षसीसौम्यरूपाविभीषणप्रियानुगा लंकायांरक्षितासाध्वीतयासा
जानकीवने राक्षसानांसमूहोत्थघोरधर्षणजाद्भयात् सीतानुवर्तिनीचाटुवचनैस्तामतोषयत् ७ ततोचिरेणकालेन
राघवःप्लवगैर्युतः शिलाभिःसागरंबध्वास्थाप्यरामेश्वरंशिवम् ८ ययौलंकापुरींशीघ्रंकृत्वायुद्धंचदारुणम् रावणंबंधु
पुत्रैश्चहत्वाराज्येबिभीषणं ९ स्थापयामासलंकायांततःसीतामपश्यत वन्हौदिव्यंतयादत्तंदृष्ट्वारामस्तदाशुभाम्
१० ज्ञात्वातामंकमारोप्यपुष्पकस्थोरराजसः ततश्चजानकीवाक्यात्त्रिजटांप्रतिराघवः ११ उवाचवचनंशीघ्रंप्रस·
न्नमुखपंकजः त्रिजटेवचनंमेद्यशृणुमंगलदायकम् १२ कार्तिकेमाधवेमाघेचैत्रेमासचतुष्टये स्नात्वाग्रेत्रिदिनंस्ना-
नंत्वत्प्रीत्यर्थंनरोत्तमाः करिष्यंतिहितेनैवकृतकृत्याभविष्यसि येनरैस्त्रिदिनस्नानंनकृतंपूर्णिमोर्ध्वतः १४ तेषामा
सत्कृतंपुण्यंहरत्वंवचनान्मम अन्यच्चापिशृणुष्वत्वंदीयतेयोवरोमया १५ पादशौचमनभ्यंगंतिलहीनंचतर्पणम्
तत्सर्वंत्रिजटेतुभ्यंतथाश्राद्धमदक्षिणं १६ इतिदत्वावरांस्तस्मैययौरामोनिजांपुरीम् तस्मात्तत्प्रीतयेस्नानंकर्तव्यंच
दिनत्रयं १७ एवंयःशृणुयाच्चैत्रमाहात्म्यंभक्तितत्परः धनपुत्रसुहृन्मित्रैःसर्वदासुखमश्नुते १८ मधोर्महित्वपरमा
दरेणश्रुत्वासमस्ताघचयस्यनाशम् प्रयातिसर्वात्मतयामुनीशायथाग्नियोगेनपलालराशिः १९

१४ १५ १६ १७ १८ पलालराशिः शुष्कगलितपत्राणांराशिः १९ ६९ ६९ ६९

२० २१ २२ इतिहरिकृष्णाविनिर्मितायांटीकायांदंशोद्धारायांचैत्रमाहात्म्येत्रिंशोऽध्यायः ३० ६९ ६९

श्रीचैत्रव्रतकथनंपठंतिभक्त्यायेवैनाद्विजयातिवैष्णवानूवदंति तेसम्यकूव्रतकरणात्फलंलभंतेतत्सर्वकलुषविनाशनंलभंते २० अध्यायात्प्रथमाद्यावदध्यायोविंशकःस्मृतः तावत्श्लोकेनवृद्धिर्हिद्वाभ्यांप्रोक्तानतःक्षयः २१ शतानिनवचैत्रस्यमाहात्म्येप रमेशुभे श्लोकाःपापहराःप्रोक्ताः सर्ववांछितदायकाः २२ इतिश्रीभविष्योत्तरपुराणेऽयोध्याखंडेचैत्र माहात्म्येत्रिजटाख्याननामात्रिंशत्तमोऽध्यायः ३० इतिश्रीज्योतिर्वित्कुलावतंस वेंकटरामात्मजहरिकृ ष्णाविनिर्मिते बृहज्ज्योतिषार्णवेऽष्टमेधर्मस्कंधेचतुर्थेमासस्तबकेचैत्रमासमाहात्म्यंप्रथमं १ ६९ ६९
श्रीसीतारामचंद्रोजयति श्रीगुरुदत्तात्रयार्पणमस्तु श्रीगायत्र्यर्पणमस्तु श्रीशुभमस्तु ॥

यह चैत्रमासमाहात्म्य मुंबईमे पं॰ श्रीधरशिवलालके प्रज्ञायुक्त ज्ञानसागर छापखानेमें छाप्यो॰ सं॰ १९४४ शा॰ १८०९ मार्गशीर्षकृष्ण १३

इतिश्रीमासस्तबकेचैत्रमाहात्म्यंसंपूर्णं·

अथवैशाखमासमाहात्म्यंसटीकं प्रारभ्यते.


सूत·
संवाद·
शौनक
शंखव्याधसंवाद
जलप्रपा
जलपानकर्तारः
मैथिल
संवाद·
श्रुतदेव·
यमस्य·
संवाद·
ब्रह्मा·
नारद·
संवाद·
अंबरीष
प्राणदेव
कण्वमुनिः
सिंहगजयुद्ध
व्याघ्र
सिंह
गज·
मधुसूदनपूजनं·
स्नानकर्ता
गंगा·
कर्मनिष्ठतपोनिष्ठ
द्विजः
सर्पमुक्तिः

अथ वैशाख माहात्म्यानुक्रमणिका·

अध्यायांकः	विषयः
१	सूतोक्तिः ततोवैष्णवादिधर्मजिज्ञासोरंबरीषस्यप्रश्नः नारदकृतवैशाखमासप्रशंसा वैशाखस्नान महिमा चश्लोकाः३६
२	वैशाखप्रशंसा·ततोवैशाखमासव्रताकरणेदोषप्रसंगः व्रतप्रशंसा वैशाखेजलप्रपादानं व्यजन छत्र पादत्राणदानप्रशंसान्नदानप्रशंसा· श्लो०३९
३	शय्याकंबलवस्त्रकर्पूर कुसुम कुंकुमचंदन गोरोचन तांबूलफलादिदानं विश्राममंडपकरणं कूपतडागोद्यानप्र० पुत्राभावे पुत्रवत् सप्तपदार्थ वर्णनं· तांबूल तक्रदधि तंदुल· घृतगुडेक्षु दंडेक्ष्वादिरसपानकदानमाहात्म्यं श्लो०५४
४	वैशाखव्रतिनांवर्ज्यपदार्थाः·गृहस्नानेदुष्टफलंव्रताकरणेदोषः नद्यादिसप्तगंगादेवखातवापीषुस्नानंदानंच मधुसूदनप्रार्थनार्घदानपूजनादिकं श्लो०४५
५	हेतुपूर्वकवैशाखमासस्यश्रेष्ठत्वकथनं·श्लो०३९
६	वैशाखमासेजलदान माहात्म्यकथनं·तद्विषयेहेमांगदराजकथा· वैशाख मासजलादानात्तस्यतिर्यग्योनिप्राप्तिः मैथिलराजगृहे· तस्यश्रुतदेव सकाशान्मुक्तिः श्लोकाः५२
७	तदद्भुतंदृष्ट्वाविस्मितेनमैथिलेनपृष्टः श्रुतदेवः तेनकथितंवैशाखमासेजलदानादिमाहात्म्यंतद्विषयेस्वपितुर्वृत्तांतकथनं · श्लोकाः४४
८	मैथिलपृष्टेनश्रुतदेवेनकृतः ईश्वरपार्वतीसंवादप्रस्तावः ईश्वरपार्वतीसंवादद्वारावैशाखमाहात्म्यविषये इतिहासकथनं श्लोकाः९९
९	मैथिलपृष्टेन श्रुतकीर्तिविप्रेण कृतंकुमारजन्मकथनं वैशाखधर्मप्रशंसाच· श्लो०९९
१०	मैथिलस्यब्राह्मणंप्रति अशून्यव्रतविषयेप्रश्नःतत्कथनं·पुनःपृष्टेनविप्रेण कृतावैशाखमासेछत्रदानादिप्रशंसा श्लोकाः६३
११	मैथिलस्यप्रश्नः। श्रुतदेवदत्तमुत्तरम् मैथिलनृपेण कृता वैशाखधर्मस्यप्रसिद्धिः तेननरकाः शून्याजाताः तेनखिन्नस्ययमस्यब्रह्मसमीपेगमनं· श्लो०१२०
१२	यमकृतंस्वदुःखनिवेदनं · श्लो०३८
१३	वैशाखमाहात्म्यकथनपूर्वकं ब्रह्मणाकृतंयमस्य समाधानं·तथापिखेदयुक्तेन यमेनसाकंविष्णुसमीपेगमनं·विष्णुदत्तंयमायवरप्रदानं। तत्रवैशाखधर्माणांप्रशंसा· श्लोकाः५२
१४	वैशाखस्नानप्रशंसा· वैशाखमाहात्म्यकथाप्रशंसा·तत्रकर्मनिष्ठतपोनिष्ठद्विजकथा·श्लो·५०
१५	पंचालदेशाधिपस्यपुरुयशसोनृपस्यवैशाखचरणात्स्वराज्यप्राप्तिः श्लोकाः६५

अथ वैशाखमाहात्म्यानुक्रमणिका·

अध्यायांक·	विषय·
१६	अथपुरुयशा अक्षय्यतृतीयायांप्रसन्नंविष्णुं तुष्टावविष्णुकृपयाचतस्यसायुज्यप्राप्तिः श्लो·५२
१७	श्रुतकीर्तिनापुनरपि वैशाखधर्मश्रवणाय प्रश्नेकृतेसति प्रसन्नः श्रुतदेवः धर्मान्वक्तुमारेभे तत्रोपानद्दानप्रसंगेन शंखनामकद्विजकथा तत्रसिंहकोहलवृत्तांतपूर्वकमोक्षकथनं· श्लो०६७
१८	शंखव्याधसंवादे व्याधस्यपूर्वजन्मवृत्तांतकथनम्· श्लो०८०
१९	शंखव्याधसंवादेब्रह्मशब्दप्रतिपादनपूर्वकंसर्वदेवेभ्यः प्राणस्यमुख्यत्वकथनं· प्राणदेवस्यमहत्वलोपे कण्वशापप्रतिपादनं त्वंगुरुद्रोहीभवेति कण्वंप्रति प्राणवायुशापः श्लो०८०
२०	शंखव्याधसंवादे सत्वादिभिर्गुणैर्जीवानां तदनुरूपजन्मकर्मादिफलप्राप्तिकथनं प्रलयवर्णनं व्यूहावतारकर्मनिरूपणं धर्मभेदनिरूपणपूर्वकं भगवद्भक्तलक्षणनिरूपणं वैशाखमासधर्मनिरूपणंच· श्लोकाः९५
२१	वैशाखमाहात्म्यश्रवणेनसर्पस्यमुक्तिः तस्यैवपूर्ववृत्तांतकथनं शंखव्याधसंवादे व्याधस्यजन्मांतरे· वाल्मीकर्षित्वप्राप्तिकथनं श्लोकाः७०
२२	वैशाखस्यतिथिमाहात्म्यवर्णनपूर्वकं कलिधर्मनिरूपणम् श्लोकाः११७
२३	अक्षय्यतृतीयामाहात्म्यं· श्लो०३५
२४	वैशाखशुक्लद्वादशीमाहात्म्यं काश्मीरदेशस्यदेवद्विजकथा· श्लो०१०६
२५	वैशाखशुक्लत्रयोदशी-चतुर्दशीपौर्णिमातिथीनां माहात्म्यश्रवणमहिमा· श्लोकाः ६७

इति वैशाखमासमाहात्म्यविषयानुक्रमणिका समाप्ता·

श्रीगणेशायनमः नत्वाश्रीगोकुलाधीशपादपंकजमाधुरीम् कुर्वेमाधवमासस्यमाहात्म्यविशदिंक्रियाम् १ अथतत्रभगवान् सकलनिगमागमपारंगतः परमेष्ठिसुतोनारदोंऽबरीषराज पृष्टःसन् पुराब्रह्मणास्वस्मैप्रोक्तंवैशाखमासमाहात्म्यंअंबरीषराज्ञेकथयांबभूव तथाचपाद्मे· एकदानारदोलोकान् पर्यटन्भगवत्प्रियः मथुरायामंबरीषंकृष्णाराधनमानसं महाभागंव्रतपरंददर्शमुनिसत्तमः समागतंमुनिवरंसत्कृत्य नृपसत्तमः भवंतइवपप्रच्छश्रद्धयाहृष्टमानसइति तत्रांबरीषोमाधवमासविषये परमेष्ठिनो ब्रह्मणः अंगभुवंतनयंनारदंप्रतिपप्रच्छ १ अंजसाअनायासेन २ ३ वैशाखमासेकर्तव्यधर्मान्पृच्छति ४ तत्रापीतिकंदेवंउद्दिश्यअधिकृत्य ५ व्रतान्वरणद्र

श्रीगणेशायनमः नारायणंनमस्कृत्य० सूतउवाच भूयोप्यंगभुवंराजाब्रह्मणःपरमेष्ठिनः पुण्यंमाधवमाहात्म्यंनारदंपर्यपृच्छत १ अंबरीषउवाच सर्वेषामपिमासानात्वत्तोमाहात्म्यमंजसा श्रुतंमयापुराब्रह्मन्यद्वाचोक्तंतदात्वया २ वैशाखःप्रवरोमासोमासेष्वेतेषुनिश्चितं इतितस्माद्विस्तरेणमाहात्म्यंमाधवस्यच ३ श्रोतुंकौतूहलंब्रह्मन् कथंविष्णुप्रियोह्यसौ केचविष्णुप्रियाधर्मामासेमाधववल्लभे ४ तत्राप्यस्यतुकर्तव्याः केधर्माविष्णुवल्लभाः किंदानंकिंफलंतस्यकमुद्दिश्याचरेदिमान् ५ कैर्द्रव्यैःपूजनीयोऽसौमाधवोमाधवागमे एतन्नारदविस्तार्यमह्यंश्रद्धावतेवद ६ श्रीनारदउवाच मयापृष्टःपुराब्रह्मामासधर्मान्पुरातनान् व्याजहारपुराप्रोक्तंयल्लक्ष्म्यैपरमात्मना ७

व्याणिपृच्छति कैर्द्रव्यैरिति द्रव्यैः सामग्रीभिः माधवागमे वैशाखमाससंप्राप्तौ विस्तार्य शब्दप्रपंचेन कृष्णभक्तिर्जिज्ञासाविषये विशेषप्रश्नः पाद्मे कथमाराध्यतेसोयंकेशवःक्लेशनाशनः भक्तप्रियोसौभगवान् कथाभक्त्याप्रसीदति कथंभक्तिर्भवेदस्मिन्सर्वैराराध्यतेकथम् वैष्णवोसिहरेस्तस्यप्रियोसिपरमार्थवित् तेनत्वामेवपृच्छामिब्रह्मन्ब्रह्मविदुत्तमोति ६ यत्पुरापरमात्मनाश्रियैप्रोक्तं तन्मह्यंव्याजहारप्रोक्तवान् ७

ततोमासाविशिष्टोक्ताःकार्त्तिकोमाघएवच माधवस्तेषुवैशाखंमासानामुत्तमंव्यधात् ८ मातेवसर्वजीवानांसदेवेष्टप्रदायकः दानयज्ञव्रतस्नानैःसर्वपापविनाशनः ९ धर्मयज्ञक्रियासारस्तपःसारःसुरार्चितः विद्यानांवेदविद्येवमंत्राणांप्रणवोयथा १० भूरुहाणांसुरतरुर्धेनूनांकामधेनुवत् शेषवत्सर्वनागानांपक्षीणांगरुडोयथा ११ देवानांतुयथा विष्णुर्वर्णानांब्राह्मणोयथा प्राणवत्प्रियवस्तूनांभार्येवसुहृदांयथा १२ आपगानांयथागंगातेजसांतुरविर्यथा आयुधानांयथाचक्रंधातूनांकांचनंयथा १३ वैष्णवानांयथारुद्रोरत्नानांकौस्तुभोयथा मासानांधर्महेतूनांवैशाखश्चोत्तमस्तथा १४ नानेनसदृशोलोकेविष्णुप्रीतिविधायकः वैशाखस्नाननिरतेमेषप्रागर्यमोदयात् १५

विशिष्टाउक्ता इत्यत्रसंधिः पौराणिकः माधवः श्रीविष्णुः व्यधादकरोत् ८ माधवपदनिरुक्तिमाह मातेवेति ९ सर्वश्रेष्ठवस्तूनांमध्येश्रेष्ठतरत्वमस्यवैशाखस्यनियमयन्ति धर्मेति १० ११ १२ आपगानांनदीनां १३ धर्महेतूनां धर्मकार्यनिमित्तभूतानाम् १४ वैशाखस्नाननिरते मनुष्ये विष्णुः प्रीतिंकरोतीत्युत्तरेणान्वयः तत्रस्नाननिरतोकीदृग्विधियुक्तोभाव्य इत्याकांक्षायामाहअब्दे अंबरीषउवाच कोविधिःकिंतपोदानंस्नानंकेशवपूजनं कृपयावदविप्रर्षेतद्वासनारदोब्रवीत् मेषसंक्रमणेभानोर्माधवेमासिसत्तम महानद्यांनदीतीर्थेनदेसरसिनिर्झरे देवखातेवापिकूपेयथाप्राप्तजलाशये मधुमासस्यशुक्लायामेकादश्यामुपोषयेत् पंचदश्यांततोधीरोमेषसंक्रमणेपिवा वैशाखस्नाननियमंब्राह्मणानामनुज्ञया मधुसूदनमभ्यर्च्यकुर्यात्स्नानपूर्वक मित्यादिस्नानसमये दर्भपाणिराचांतः नारायणंस्मरन् प्रत्यक्षगंगाऽभावेचतुर्हस्तात्मकंस्थलंप्रकल्प्य तत्रगंगामावाह्य नमस्कृत्यसविधिमृत्तिकास्नानंकृत्वा तीर्थस्नानंकुर्यात्ततआचम्यशुक्लेवाससिपरिधाय देवऋषिमनुष्यपितृतर्पणंकृत्वासूर्यायार्घ्यंदत्वा नमस्कृत्य द्विजंगांकांचनंस्पृष्ट्वापश्चाच्चस्वगृहंव्रजेत् आश्रमस्थांचसंपूज्यप्रतिमांचापिपूजयेत् पूर्वंभक्त्याचगोविंदंगृहेचनियमात्मवान् वैशाखंसकलंमासंनित्यस्नायीजितेंद्रियः जपन्हविष्यंभुंजानः भूशय्यानियमस्थितः एकभुक्तमथोनक्तमयाचितमतंद्रितः वैशाखेविधिवत्स्ना

नंद्यंनद्यादिकेबहिः व्रतंदानंजपोहोमोमधुसूदनपूजनं अपिजन्मसहस्रोत्थपापंहरतिदारुणं त्रिसंध्यंपूजयेदीशंलक्ष्म्याचमधुसूदनं सुव-
र्णतिलपात्राणिदुग्धपात्राणिशक्तितः पादत्राणातपत्राब्जंकुंभांदद्याद्द्विजातिषु सर्वपापविनिर्मुक्तोयातिसोपिपरंपदम् वैदिकस्तांत्रिकोमिश्रः श्री-
विष्णोस्त्रिविधोमखः वैदिकोमिश्रकोवापिविप्रादीनामुदाहृतः तांत्रिकोविष्णुभक्तस्यशूद्रस्यापिप्रकीर्तितः कृतन्यासःकृतन्यासांहर्यर्चांविधिनार्चयेत्
सुदर्शनपांचजन्यंगदासीषुधनुर्हलान् मुशलंकौस्तुभंमालांश्रीवत्संचापिपूजयेत् नंदोपनंदंगरुडंप्रचंडंचंडमेवच बलंमहाबलंचैवकुमुदंकुमुदेक्षणं

लक्ष्मीसहायोभगवान्प्रीतिंतस्मिन्करोत्यलम् जंतूनांप्रीणनंयद्वज्जलैर्बहिर्जायते १६ तद्वद्वैशाखस्नानेनविष्णुःप्री
णात्यसंशयम् वैशाखस्नाननिरतान्जनान्दृष्ट्वानुमोदते १७ तावतापिविमुक्तोघैर्विष्णुलोकेमहीयते सकृत्स्नात्वा
मेषसंस्थेसूर्येप्रातःकृताह्निकः १८ महापापैर्विमुक्तोसौविष्णोःसायुज्यमाप्नुयात् स्नानार्थंमासिवैशाखेपादमेकंचरे
द्यदि १९ सोऽश्वमेधायुतानांचफलंप्राप्नोत्यसंशयम् अथवाकृतचित्तस्तुकुर्यात्संकल्पमात्रकम् २० सोपिक्रतुशतपु
ण्यंलभेदेवनसंशयः योगच्छेदनुगायामस्नातुंमेषगतेरवौ २१ सर्वबंधविनिर्मुक्तोविष्णोःसायुज्यमाप्नुयात् त्रैलोक्ये
यानितीर्थानिब्रह्मांडांतर्गतानिच २२ तानिसर्वाणिराजेंद्रसंतिबाल्येल्पकेजले तावल्लिखितपापानिगर्जंतियमशास
ने २३ यावन्नकुरुतेजंतुर्वैशाखस्नानमंभसि तीर्थादिदेवताःसर्वावैशाखेमासिभूमिप २४ बहिर्जलसमाश्रित्यस-
दासन्निहितान्नृप सूर्योदयसमारभ्ययावत्षट्घटिकावधि २५

दुर्गांविनायकंव्यासंविष्वक्सेनंगुरून्सुरान् स्वेस्वे
स्थानेष्वभिमुखान्पूजयेत्प्रोक्षणादिभिः सूक्तादिनाऽभिषेकंचकुर्याद्वैविभवेसति होमादिकंप्रकुर्वीतकथाश्रवणमाचरेदिति १५ १६
१७ १८ १९ २० क्रतुशतंक्रतुशतजन्यं २१ २२ बाल्येनिर्झररूपेअल्पकेअल्पकुंडरूपे लिखितपापानिब्रह्मणाभालपटलेलि
खितानिपापानीत्यर्थः २३ अंभसिशीतोदके २४ बहिर्जलंनदीतडागादिषुस्थितंजलमित्यर्थः २५

तावत् षट्घटिकामध्येतस्मात्स्नानंसमाचरेदित्यनेनस्नानस्यैवमहाफलदायकत्वंसूचितंमहापातकहानिश्चभवति अत्रप्रसिद्धापंचपातकीकथा पाद्मे पुरामुनिशर्मानामकः कश्चिद्ब्राह्मणः माधवेमासि तीर्थप्रसंगेनरेवायांस्नानार्थं प्रति संचरन्सन् अग्रतः अतिविकृतिरूपान् पंचपुरुषान्दृष्ट्वा इमेकेइति यावद्विचारयति तावत्ते तद्दर्शनेनशुद्धातःकरणाः बद्धांजलिपुटाःसंतः स्ववृत्तांतंप्रोचुः हेद्विजवर्य भवंतं पुरुषोत्तममन्यामहेत्वंप्रसीद आत्मदुःखमावेदयामः यतः युष्मत्सदृशाः साधवः दुःखहंतारःसंति तत्रैक आह अहं पंचालदेशीयोनरवाहनोनामक्षत्रियः मार्गेब्राह्मणहननेनेदृशीं दशांप्राप्तः अयंद्वितीयः चंद्रशर्मानामाद्विजः मगधदेशीयः गुरुघातपातकेनेदृशींदशांप्राप्तः तृतीयोयंदेवशर्माब्राह्मणः सुरापानवेश्यागमनदोषेणेदृशींदशांप्राप्तः अयंचतुर्थः विधुरोनामवैश्यः मोहान्मासत्रयंमातृगमनदोषेणेदृशींदशांप्राप्तः अयंपंचमः

तिष्ठंतिचाज्ञयाविष्णोर्नराणांहितकाम्यया तावन्नागच्छतांपुंसांशापंदत्वासुदारुणं स्वस्थानंयांतिराजेंद्रतस्मात्स्नानंसमाचरेत् २६ इतिश्रीस्कंदपुराणेवैशाखमाहात्म्येनारदांबरीषसंवादोनामप्रथमोऽध्यायः १ छ

नंदनामावैश्यः धनलोभेनमहापातकिनांसंसर्गकरणेनचौर्यादिकर्मणाचेदृशींदशांप्राप्तः एवंवयंपंचपापिष्ठाः अनेकतीर्थेषुभ्रमंत स्तथापि शुद्धानजाताः दुःखंचनगतं अतः पापनाशनोपायंवद मुनिशर्मोवाच हेपुरुषाः यूयंअज्ञानतः पापकारिणोसत्यभाषिणः अनुतापयुक्ताश्चजाताः अतः मयाअनुग्राह्याः मासेतुवैमाधवसंज्ञकेस्मिन् यःस्नातिपापैःसविमुच्यतेहि मेषस्थितेभास्वतिनर्मदायाः शर्मप्रदेवारिणिवारिताघे तस्माद्होसहमयास्तकृतैकसार वैशाखमासिचभवंतउपेत्यरेवाम् मज्जंतुपातककृतोमुनिवृंदजुष्टेरेवाजलेनिखिलपापभयापहत्यै एवमुक्ताः मुनिनासहसर्वेरेवांगत्वा पापप्रशमनंस्तोत्रंजपंतः विधिनास्नानंचक्रुः तेनपापनिर्मुक्ताः दिव्यदेहाश्चजाताइति २६ इतिवैशाखमासमाहात्म्यटीकायांप्रथमोऽध्यायः १ छ छ छ छ छ

माधवसमोमासोनास्ति वैशाखएवमुख्यः अथेसर्वत्रएवमेवयोज्यम् १ नजलेनसमंदानं जलेनतुल्यमन्यदानंनास्तिजलस्यैवमुख्यदानत्वात् भार्य
यासममन्यत्सुखंनास्ति भार्यैवपरमंसुखमित्यर्थः कृषेरन्यत्तुल्यंवित्तंनास्ति कृषिरेवमुख्यंधनं २ अशनादुपोषणादन्यत्तपोनास्ति उपोषणमेवतपः
चक्षुषासमंअन्यज्ज्योतिर्नास्ति चक्षुरेवज्योतिः ३ अशनात्तुल्या भोजनेनतुल्या ४ उत्थानंप्राप्तिः विदुःजानंति ५ अव्रतेन व्रतमकृत्वा ६

नारदउवाच नमाधवसमोमासोनकृतेनयुगंसमम् नचवेदसमंशास्त्रंनतीर्थंगंगयासमम् १ नजलेनसमंदा
नंनसुखंभार्ययासमं नकृषेस्तुसमंवित्तंनलाभोजीवितात्परः २ नतपोऽनशनात्तुल्यंनदानात्परमंसुखम् न
धर्मस्तुदयातुल्योनज्योतिश्चक्षुषासम ३ नतृप्तिरशनात्तुल्यानवाणिज्यंकृषेःसमं नधर्मेणसमंमित्रंनसत्येनसमं
यशः ४ नारोग्यसममुत्थानंनत्राताकेशवात्परः नमाधवसमंलोकेपवित्रंकवयोविदुः ५ माधवःपरमोमासोशेषशा
यिप्रियःसदा अव्रतेनक्षिपेद्यस्तुमासंमाधववल्लभम् ६ तिर्यग्योनिंसयात्याशुसर्वधर्मबहिष्कृतः अव्रतेनगतोये
षांमाधवोमर्त्यधर्मिणाम् ७ इष्टापूर्तेवृथातेषांधर्मोधर्मभृतांवरः प्रवृत्तानांतुभक्ष्याणांमाधवेनियमेकृते ८ अव
श्यंविष्णुसायुज्यंप्राप्नोत्येवनसंशयः सन्तीहबहुवित्तानिवृतानिविविधानिच ९ देहायासकराण्येवपुनर्जन्मप्रदा
निच वैशाखस्नानमात्रेणनपुनर्जायतेभुवि १० सर्वदानेषुयत्पुण्यंसर्वतीर्थेषुयत्फलम् तत्फलंसमवाप्नोतिमाध
वेजलदानतः ११ जलदानासमर्थेनपरस्यापिप्रबोधनम् कर्तव्यंभूतिकामेनसर्वदानाधिकंहितम् १२ एकतःस
र्वदानानिजलदानंहिचैकतः तुलामारोपितंपूर्वंजलदानंविशिष्यते १३

तिर्यग्योनिं पशुपक्ष्यादियोनिं ७ इष्टापूर्तेजलघट्टा
दिबंधनेतेषांधर्मभृतामपिपुरुषाणांमाधवेमासिभक्ष्याणांभक्षणीयपदार्थानांअनियमेकृतेसति वृथाधर्मोभवति ८ ९ १० ११
स्वयंजलदानासमर्थेन परस्य जलदानेप्रबोधनंत्वंजलंदेहि इत्याकारकंभूतिकामेनैश्वर्येच्छावताकर्तव्यम् १२ १३ ७९ ७९

प्रपापाणयोइति प्रसिद्धस्थानंतस्थदानमुत्सर्जनं मार्गेपानीयशालिकाबंधनमित्यर्थः १४ १५ १६ १७ १८ माधवे·
जलदानादियोक्तदानाकरणेऽनिष्टफलमाह अदत्वेत्यनेन उदककुंभंउदकविशिष्टं अक्षय्यतृतीयायांदीयमानंकुंभं १९ २०

मार्गेध्वगानांयोमर्त्यःप्रपादानंकरोतिहि सकोटिकुलमुद्धृत्यविष्णुलोकेमहीयते १४ देवानांचपितृणांचऋषी·
णांराजसत्तम अत्यंतप्रीतिदंसत्यंप्रपादानंनसंशयः १५ प्रपादानेनसंतुष्टायेनाध्वश्रमकर्षिताः तोषितास्तेनदेवा
श्चब्रह्मविष्णुशिवादयः १६ सलिलंसलिलेच्छूनांच्छायाछायामपीच्छताम् व्यजनंव्यजनेच्छूनांवैशाखेमासि
भूमिप १७ जलछत्रंच्व्यजनंदानंयेषांविशिष्यते माधवेमासिसंप्राप्तेब्राह्मणायकुटुंबिने १८ अदत्वोदककुंभंच
चातकोजायतेभुवि योदद्याच्छीतलंतोयंतृषार्तायमहात्मने १९ तावन्मात्रेणराजेंद्रराजसूयायुतंलभेत् धर्मस्य
मार्तंविप्रायवीजयेद्व्यजनेनयः २० तावन्मात्रेपानिःपापोविहगादिपतिर्भवेत् अदत्वाव्यजनंभूपवैशाखेतुद्विजात
ये २१ वातरोगशताकीर्णोनरकानेवविंदति योवीजयेत्पटेनापिपथिश्रांतंद्विजोत्तमम् तावतार्थविमुक्तोसौवि·
ष्णुसायुज्यमाप्नुयात् २२ यस्तालव्यजनंवापिदत्वाशुद्धेनचेतसा विधूयसर्वपापानिब्रह्मलोकंसगच्छति २३ स·
द्यः श्रमहरंपुण्यंनदद्याद्व्यजनंनरः नारकीयातनांभुक्त्वाकश्मलोजायतेभुवि २४ आध्यात्मिकादिदुःखानांशां
तयेमनुजेश्वर छत्रंदद्यात्प्रयत्नेनवैशाखेमासिवासकृत् २५ अच्छत्रदोनरोयस्तुवैशाखेमाधवप्रिये छायाही·
नोमहाक्रूरःपिशाचोभुविजायते २६ योदद्यात्पादुकेदिव्येमाधवेमाधवप्रिये यमदूतांतिरस्कृत्यविष्णुलोकंसगच्छ
ति २७

विहगाधिपतिःदेवराजः २१ २२ २३ काश्मलःकृष्टवान् २४ आध्यात्मिकादिदुःखानां आध्या
त्मिकाधिदैविकाधिभौतिकदुःखानांशांत्यर्थंछत्रंदद्यात् २५ छायाहीनोमरुस्थल्यादिनिर्वृक्षदेशेषुजायमान इत्यर्थः २६ २७

पादत्राणमुपानहं   ऐहिका आध्यात्मिकाय २८   २९ अनाथमंडपं मार्गेवर्त्तमानमनाथस्यभग्नं पतितं वागृहं ३० फलविश्रांतिः
फलानांइयत्तयागणनम् ३१ सद्यःस्वाप्यायनं सद्यस्तृप्तिकरं ३२   ३३   ३४ अन्नदानाकरणेप्रत्यवायमाह वैशाखेइति भूसु

पादत्राणंतुयोदद्याद्वैशाखेमाधवागमे नतस्यनारकोलोकोनक्लेशाऐहिकाश्चये २८ पादुकेयाचमानाययोद
द्याद्ब्राह्मणायच सभूपालोभवेद्भूमौकोटिजन्मस्वसंशयम् २९ अनाथमंडपंमार्गेश्रमहारिंकरोतियः तस्यपुण्य
फलंवक्तुंब्रह्मणापिनशक्यते ३० मध्यान्हेब्राह्मणंप्राप्तमतिथिंभोजयेद्यदि नतस्यफलविश्रांतिर्ब्रह्मणापिनिरूपि
ता ३१ सद्यःस्वाप्यायनंनृणामन्नदानंनराधिप तस्मान्नान्नेनसदृशंदानंलोकेषुविद्यते ३२ मार्गश्रांतायविप्रा
यप्रश्रयंप्रददातियः तस्यपुण्यफलंवक्तुंब्रह्मणापिनशक्यते ३३ दारापत्यगृहादीनिवासोलंकारभूषणम् अ-
सत्यंनाश्नतःपुंसःसत्यंभुक्तवताध्रुवम् ३४ तस्मादन्नसमंदानंनभूतंनभविष्यति वैशाखेयेनचादत्तंमार्गश्रांते
चभूसुरे ३५ सपिशाचोभवेद्भूमौस्वमांसान्येवखादति यथाविभूतिदातव्यंतस्मादन्नंद्विजातये ३६ अन्नदोमा
तृपित्रादीन्विस्मारयतिभूमिप तस्मादन्नप्रशंसंतिलोकास्त्रैलोक्यवर्तिनः ३७ मातरःपितरश्चापिकेवलंजन्महे
तवः अन्नदंपितरंलोकेवदंतिचमनीषिणः ३८ अन्नदेसर्वतीर्थानिअन्नदेसर्वदेवताः अन्नदेसर्वधर्माश्चतिष्ठंत्यरि
धराजय ३९   इतिश्रीस्कंदपुराणेवैशाखमाहात्म्येनारदांबरीषसंवादेदाननिरूपणंनामद्वितीयोऽध्यायः २ छ
नारदउवाच   योमर्त्योद्विजवर्यायपर्यंकंतुददातिहि यत्रस्वस्थःसुखंशे तेशीतानिलनिषेवितः १

रेद्विजायेत्यर्थः ३५ यथा
विभूत्यास्वसामर्थ्यानुरोधेन ३६ विस्मारयति अयंनिष्कर्षः यस्मैअन्नंददाति सयाचकः स्वमातापित्रादीन्विस्मृत्यान्नदातारमेवस्मरतीति ३७
अन्नदातुः सर्वाधिक्यमनुवदंति मातरइति ३८ अरिधराजयशत्रुनगरविध्वंसक ३९ इतिटीकायांद्वितीयोऽध्यायः २ छ अथवैशाखमासेदा
नधर्माननुवदन्पर्यंकदानंप्रस्तौति यइति १

निरुजमारोग्यंयथास्यात्तथा २ अखंडपदवीं अव्युच्छिन्नंमुक्तिमार्गं ३ ४ ५ निर्वाणंअपुनरावृत्तिकरम् ६ स्नानंवल्लभंप्रियंय
स्मिन् हरेरितिशेषः तस्मिन् ७ ८ शतपौरुषं आत्मानमारभ्यभविष्यमाणशतपुरुषपर्यंतं ९ उपबर्हणंउच्छीर्षकम् १० उपब

धर्मसाधनभूतेहिदेहोनिरुजमासते तंदत्वासकलंतापंनिरस्यगतकल्मषः २ अखंडपदवींयातियोगिनामपिदु-
र्लभाम् वैशाखेधर्मतप्तानाश्चांतानांतुद्विजन्मनाम् ३ दत्वाश्रमापहंदिव्यंपर्यंकंमनुजेश्वर नजातुसीदतेलोके
जन्ममृत्युजरादिभिः ४ गृहीत्वाब्राह्मणोयत्रशेतेचार्जवमास्थितः आसीनेसकलंपापंज्ञानतोज्ञानतःकृतम् ५
विलयंयातिराजेंद्रकर्पूरइवचाग्निना शयनेब्रह्मनिर्वाणंसनरोयातिनिश्चितम् ६ योदद्यात्कशिपुंमासेवैशाखेस्ना
नवल्लभे सर्वभोगसमायुक्तस्तस्मिन्नेवहिजन्मनि ७ सान्वयोवर्ततेनूनंरोगादिभिरनाहतः आयुष्यपरमारोग्ययशो
धैर्यंचविंदति ८ नाधार्मिकःकुलेतस्यजायतेशतपौरुषम् भुक्त्वातुसकलान्भोगांस्ततःपंचत्वमेष्यति ९ निर्धूताखि
लपापस्तुब्रह्मनिर्वाणमृच्छति श्रोत्रियायद्विजेंद्रायययोदद्यादुपबर्हणम् १० सुखंनिद्राविनायेननतृणांजायतेक्वचि
त् सर्वेषामाश्रयोभूत्वाभुविसाम्राज्यमश्नुते ११ पुनःसुखीपुनर्भोगीपुनर्धर्मपरायणः आसन्नजन्मराजेंद्रजायतेस-
र्वतोजयी १२ पश्चात्सप्तकुलैर्युक्तोब्रह्मभूयायकल्पते तार्णंकटंतुयोदद्यात्कटादन्यमथापिवा १३ तत्रशेतेस्वयंविष्णुः
पत्रस्थःपरमेश्वरः यथाजलगताचोर्णानजलैर्भिद्यतेक्वचित् १४ तथासंसारगोजंतुःसंसारेनचबध्यते आसनेशय-
नेसक्तःकटदःसर्वतःसुखी १५ अध्वगेशयनार्थाययोदद्यात्कटकंबलं तावन्मात्रेणमुक्तःस्यान्नात्रकार्याविचारणा १६

र्हणंविशिनष्टि सुखमिति ११ १२ ब्रह्मभूयायब्रह्मलोकंप्रतिगंतुंकल्पते समर्थोभवति तार्णंतृणैर्निर्मितंकटं अथवा अन्यत्कटं खर्जूरादिपत्र
विनिर्मितं १३ तृणविनिर्मितकटदानप्रभावंवर्णयति यथेति १४ १५ अध्वगेप्रवासिनि पांथायेत्यर्थः १६ ६७ ६७

१७ कंबलदानप्रशंसामाह योदद्यादिति माधवागमेमाधवस्य आगमःयस्मिन् १८ १९ २० कुंकुमंकेशरमित्यर्थः २१ २२

निद्रयाहीयतेदुःखंनिद्रयाहीयतेश्रमः सानिद्राकटसंस्थस्यसुखंसंजायतेध्रुवम् १७ योदद्यात्कंबलंराजन्वैशाखे
माधवागमे अपमृत्योःकालमृत्योर्मुक्तोजीवतिवैशतम् १८ दद्याद्वस्त्रंसूक्ष्मतरंद्विजेंद्रेधर्मकांक्षिते पूर्णमायुःसमा-
प्नोतिपरत्रचपरांगतिम् १९ अंतस्तापहरंदिव्यंकर्पूरंतुद्विजातये दत्वामोक्षमवाप्नोतिदुःखशांतिंचविंदति २० कुसु-
मानिचयोदद्यात्कुंकुमंचद्विजातये सार्वभौमोभवेद्राजासर्वलोकवशंकरः २१ पुत्रपौत्रादिभोगांश्चभुक्त्वामोक्षम-
वाप्नुयात् त्वगस्थिगतसंतापंसद्योहरतिचंदनम् २२ तापत्रयविनिर्मुक्तस्तद्दत्वामोक्षमाप्नुयात् औशीरंचापककौ-
शंयोदद्याज्जलवासितम् २३ सर्वभोगेषुराजेंद्रसतुदेवसहायवान् पापहानिंदुःखहानिंप्राप्यनिर्वृत्तिमाप्नुयात् २४
गोरोचंमृगनाभिंचदद्याद्वैशाखधर्मवित् तापत्रयविनिर्मुक्तःपरंनिर्वाणमृच्छति २५ तांबूलंचसकर्पूरंयोदद्यान्मेष-
गेरवौ सार्वभौमस्सुखंभुक्त्वापरंनिर्वाणमृच्छति २६ शतपत्रींचयूथींचमेषमासेददन्नरः ससार्वभौमोभवतिपश्चा-
न्मोक्षंचविंदति २७ केतकींमल्लिकांवापियोदद्यान्माधवागमे सतुमोक्षमवाप्नोतिमधुशासनशासनात् २८ पूगीफ-
लंतुयोदद्यात्सुगंधंतुद्विजातये नारिकेलफलंराजन्तस्यपुण्यफलंशृणु २९ सप्तजन्मभवेद्विप्रोधनाढ्योवेदपारगः
पश्चात्सप्तकुलैर्युक्तोविष्णुलोकंसगच्छति ३० विश्राममंडपंयस्तुकृत्वादद्याद्द्विजन्मने तस्यपुण्यफलंवक्तुंनाहंशक्तो-
स्मिभूपते ३१ सुच्छायामंडपंयस्तुसिकताकीर्णमंजसा सप्रपंकारयेद्यस्तुसतुलोकाधिपोभवेत् ३२

कौशंसुगंधविशिष्ट
कुशसंस्कृतंकेवलकुशैर्वासंस्कृतं २३ निर्वृत्तिंमोक्षमानंदंवा २४ २५ २६ शतपत्रींनीलकमलिनींयूथींमालतीं २७ मधुशासनोविष्णुस्तस्यशा-
सनादाज्ञया २८ २९ ३० विश्राममंडपंविश्रामस्यविहारस्यमंडपम् ३१ सुच्छायाविशिष्टंमंडपंप्रपयापानीयशालीकयासहितम् ३२

पुत्रैः किंफलमित्युक्त्यापुत्रेणयथा पुन्नामनरकादिनिरासः स्वर्लोकप्राप्तिर्भवति तद्वदनेनसत्कर्मणापिफलंलभ्यतेइतिसूचितं ३३ तदेवविशद-
यति कूपइति ३४ ३५ अतिविदोऽतिनिपुणाइमेपूर्वोक्ताः सप्तसंतानमेवेतिविदुर्जानंति सप्तमेतिसंधिरार्षः ३६ संतानप्राप्त्यर्थमुपाया

मार्गोद्यानंतडागंवाकूपंमंडपमेवच यःकरोतिसधर्मात्मातस्यपुत्रैस्तुकिंफलम् ३३ कूपस्तडागमुद्यानंमंडपंचप्र-
पातथा सद्धर्मकरणंपुत्रःसंतानंसप्तधोच्यते ३४ एतेष्वन्यतमाभावेनोर्ध्वंगच्छंतिमानवाः सच्छास्त्रश्रवणंतीर्थ-
यात्रासज्जनसंगतिः ३५ जलदानंचान्नदानमश्वत्थारोपणंतथा पुत्रश्चेतिचसंतानंसप्तमेतिविदोविदुः ३६ ना-
संततिर्लभेल्लोकान्कृत्वाधर्मशतान्यपि तस्मात्संतानमन्विच्छेत्संतानेष्वेकतोव्रजेत् ३७ पशूनांपक्षिणांचैवमृगाणां
चैवभूरुहाम् नोर्ध्वलोकस्त्वयातिमनुष्याणांतुकाकुत्स्थ ३८ पूगीफलसमायुक्तनागवल्लिदलैर्युतम् कर्पूरागरुसंयु-
क्तंदद्यात्तांबूलमुत्तमम् ३९ शारीरैःसकलैःपापैर्मुच्यतेनात्रसंशयः तांबूलदोयशोधैर्यंश्रियमाप्नोतिनिश्चितम् ४०
रोगीदत्त्वाविरोगःस्याद्रोगीमोक्षमाप्नुयात् वैशाखेमासियोदद्यात्तक्रंतापविनाशनम् ४१ विद्यावान्धनवान्भू-
मौजायतेनात्रसंशयः नतक्रसदृशंदानंघर्मकालेषुविद्यते ४२ तस्मात्तक्रंप्रदातव्यमध्वश्रांतद्विजातये जंबीररससो-
पेतंलसल्लवणमिश्रितं ४३ यस्तक्रमरुचिघ्नंतुदत्त्वामोक्षमवाप्नुयात् योदद्याद्दधिखंडंतुवैशाखेघर्मशांतये ४४ तस्य
पुण्यफलंवक्तुंनाहंशक्नोमिभूमिप योदद्यात्तंडुलान्दिव्यान्मधुसूदनवल्लभे ४५ सलभेत्पूर्णमायुष्यंसर्वयज्ञ-
फललभेत् योघृतंतेजसोरूपंगव्यंदद्याद्द्विजातये ४६

त्वदिष्यन्संतानं प्रस्तौति नासंततिरिति ३७ ३८ ३९ ४० ४१ घर्मकालेषुउष्णकालेइत्यर्थः ४२ अध्वश्रांत-
द्विजन्मनेपांथिकायब्राह्मणायेत्यर्थः ४३ ४४ अहंब्रह्मा ४५ गव्यंगोसंबंधितेजोरूपंतेजस्वी ४६ ४७ ४८

उर्वारुक कर्कटीफलविशेषं फूटइतिगुर्जरभाषायांप्रसिद्धं ४७ ४८ पानकं बिंबदाडिमीरसपानकं सर्करामिश्रितजलंवा ४९ फलेनखर्बुजाख्येनसहितं शर्कराजलं ५० सुधापानंअमृतपानं भवेदितिशेषः चूतस्यपक्कफलसंयुतंपानकं गुर्जरभाषायां गोलकेरी महाराष्ट्रभाषायांगुलांबा इति प्रसिद्धं वाम्रपक्कं चूतफलंभर्जयित्वा तद्रसंशर्कराजीरकमिश्रितं ५१ चैत्रदर्शेचैत्रामावस्यायाम् ५२ ५३ षण्णवतिदः षण्णवतिश्राद्धप्रद-

सोश्वमेधफलंप्राप्यमोदतेविष्णुमंदिरे उर्वारुगुडसंमिश्रंवैशाखेमेषगेरवौ ४७ सर्वपापविनिर्मुक्तःश्वेतद्वीपेवसेद्ध्रुवं
यश्चेक्षुदंडंसायान्हेदिवातापोपशांतये ४८ ब्राह्मणायचयोदद्यात्तस्यपुण्यमनंतकं वैशाखेपानकंदत्वासायान्हेश्रम-
शांतये ४९ सर्वपापविनिर्मुक्तोविष्णोःसायुज्यमाप्नुयात् सफलपानकंमेषमासेसायंद्विजातये ५० दद्यात्तेनपितृणां
तुसुधापानंनसंशयः वैशाखेपानकंचूतस्यपक्कफलसंयुतं ५१ तस्यसर्वाणिपापानिविनाशंयान्तिनिश्चितम् योदद्याच्चै
त्रदर्शेतुकुंभपूर्णंतुपानकैः ५२ गयाश्राद्धशतंतेनकृतमेवनसंशयः कस्तूरीकर्पुरोपेतंमल्लिकोशीरसंयुतम् ५३ क
लशंपानकैःपूर्णंचैत्रदर्शेतुमानवः दद्यात्पितॄन्समुद्दिश्यसषण्णवतिदोभवेत् ५४ इतिश्रीस्कंदपुराणेवैशाखमाहा
त्म्येनारदांबरीषसंवादेदाननिरूपणंनामतृतीयोऽध्यायः ३ छ नारदउवाच तैलाभ्यंगंदिवास्वापंतथावैकां
स्यभोजनम् खट्वानिद्रांगृहेस्नानंनिषिद्धस्यचभक्षणम् १ वैशाखेवर्जयेदष्टौद्विभुक्तंनक्तभोजनम् पद्मपत्रेतुयोभुंक्ते
वैशाखेव्रतसंस्थितः २ सतुपापविनिर्मुक्तोविष्णुलोकंचगच्छति वैशाखेमासिमध्यान्हेश्रांतानांतुद्विजन्मनां ३ पादाव
नेजनंकुर्यात्तद्व्रतंसुव्रतोत्तम अध्वश्रांतंद्विजंयस्तुमध्यान्हेस्वगृहागतं ४

इत्यर्थः ५४ इतिटीकायांतृतीयोऽध्यायः ३ अथवैशाखमासेव्रताचरणं प्रस्तौति तैलाभ्यंगमिति कांस्यभोजनं कांस्यपात्रभोजनम् निषिद्धस्यमसूरादेः १ द्विभुक्तं द्विवारंभोजनं २ श्रांतानां अध्वपरिश्रमखिन्नानांद्विजन्मनांब्राह्मणानां ३ पादावनेजनंपादप्रक्षालनं यदितिशेषः तत्तदेवव्रतं अस्मादधिकंव्रतमन्यत्किंचिन्नास्तीतिध्वनिः ४ छ

५ अस्नायी शीतोदकस्नानरहितः अपत्राशी पलाशादिपत्रेषु भोजनविरहितः ६ ७ गृहेस्नानंयः करोति स इतिशेषः ८ ९ अवैशाखाद्वैशाखनियमानामकरणात् १० ११ भगोदये सूर्योदये १२ सप्तगंगासु जान्हवी वृद्धगंगेत्यादि श्लोकोक्तसप्तगंगा

उपवेश्यासनेरम्येकृत्वापादावनेजनम् धृत्वाशिरसिताश्चापोविध्वस्ताखिलबंधनः ५ गंगादिसर्वतीर्थेषुस्नातोभवतिनिश्चितम् अस्नायीवाप्यपत्राशीवैशाखंतुनयेद्यदि ६ रासभीयोनिमासाद्यपश्चादश्वतराभवेत् हृदागोरोगहीनश्चतयास्वस्थोपिमानवः ७ वैशाखेतुगृहेस्नात्वाचांडालींयोनिमाप्नुयात् वैशाखेमासिराजेंद्रमेषसंस्थेदिवाकरे ८ नकरोतिबहिःस्नानंश्वानयोनिशतंव्रजेत् अस्नात्वाचाप्यदत्वाचवैशाखोयेननीयते ९ सपिशाचोभवेन्नूनमवैशाखाद्धोव्रजेत् योनदद्याज्जलंचान्नंवैशाखेलोभमानसः १० पापहानिंदुःखहानिंनवाप्नोतिनसंशयः नदीस्नानंतुयःकुर्याद्वैशाखेविष्णुतत्परः ११ जन्मत्रयार्जितात्पापान्मुच्यतेनात्रसंशयः समुद्रगनदीस्नानंकुर्यात्प्रातर्भगोदये १२ सप्तजन्मार्जितैःपापैस्तत्क्षणादेवमुच्यते कुर्यादुषसियःस्नानंसप्तगंगासुमानवः १३ कोटिजन्मार्जितात्पापान्मुच्यतेनात्रसंशयः जान्हवीवृद्धगंगाचकालिंदीचसरस्वती १४ कावेरीनर्मदावेणीसप्तगंगाःप्रकीर्तिताः देवखातेषुयःकुर्यात्प्रातर्वैशाखमज्जनम् १५ जन्मारभ्यकृतात्पापान्मुच्यतेनात्रसंशयः वैशाखेमासिसंप्राप्तेयोवापीष्ववगाहनं १६ प्रातःकुर्यान्महाराजमहापातकनाशनम् अपिगोष्पदमात्रेषुबहिस्थेषुजलेषुच १७ तिष्ठंतिसरितःसर्वागंगाद्याइतिनिश्चयः इतिजानन्समाप्नोतिसर्वतीर्थाधिकंफलम् १८ क्षीरंरसाधिकक्षीराद्दधिकंदधिभूमिप दध्नोधिकंघृतयद्वदूर्जोमासोऽधिकस्तथा १९

नर्गतायांकस्यांचिन्नद्याम् १३ १४ देवखातेषुदेवालयसमीपवर्त्ति देवनाम प्रसिद्धकुंडेषु १५ १६ गोष्पदमात्रेषु अत्यल्पेषु १७ १८ वैशाखमासस्याधिक्येनश्रैष्ठ्यंक्रमेणप्रतिपादयन्ति क्षीरमित्यादि १९

धर्मः वटबीजवद्वर्द्धते परंत्वत्रधर्मगतिः अतिसूक्ष्मास्तिकुत्रचिन्महत्प्रयासेनस्वल्पंधर्मोभवति कुत्रचिदल्पायासेनमहद्धर्मसाधनंभवति अत्रदृष्टांतमाह पाद्मे धर्मस्यगतयःसूक्ष्मादुर्ज्ञेयाहीश्वरैरपि मुह्यंतेचात्रविद्वांसोऽचिंत्यशक्तिर्हरेःकृतौ स्वल्पायासमहायासौयद्यल्पत्वमहत्वयोः महापुण्यास्ततस्तेस्युःसततंकर्षकादयः मूत्रोत्सर्गेचसिंहादेरायासबहुलंत्वतः पंचगव्यात्प्रशस्तंवैघ्रनांगत्वेननोभवेत् इतिकर्तव्यबाहुल्यंमहत्वंचतदल्पता यथाल्पनाशोमहत्ता महन्नाशस्तथाल्पतः किंतुल्यविस्फुलिंगेनतृणराशिःप्रदह्यते विष्णुभक्तिमताचीरपल्किंचित्क्रियतेल्पकं सुकृतंमाधवेमासि

कार्तिकादधिकोमाघोमाघाद्वैशाखउत्तमः तस्मिन्मासेकृतोधर्मोवर्धतेवटबीजवत् २० आढ्योवातिदरिद्रोवा
परतंत्रोऽथवानरः यद्दस्कलभतेतेनतद्दातव्यंद्विजातये २१ कंदमूलफलशाकंलवणंगुडमेवच कोलपत्रंजलंत
क्रमानंत्यायोपकल्पते २२ नादत्तंलभतेकापिब्रह्माद्योस्त्रिदशैरपि २३ दानेनहीनेनभवेदकिंचनोनिष्किंचनत्वाच्च
करोतिपापम् पापादवश्यंनरकंप्रयातिदातव्यमस्मात्सुखमिच्छतातदा २४ यथागृहंसर्वगुणोपपन्नंपरिच्छदै
हीनमशोभनंतथा मासेषुधर्मःसकलेष्वनुष्ठितोवैशाखहीनस्तुवृथैवयाति २५ यथैवकन्यासकलैश्चलक्षणै
र्युक्तापिजीवत्पतिलक्षणानहि क्रियापिसांगासकलापिराजन्वैशाखहीनातुवृथैवतांविदुः २६ दयाविहीना
स्तुयथागुणावृथावैशाखधर्मंमाविनातथाक्रियाः शाकंतुयद्वल्लवणेनहीनंनरोचतेसर्वगुणोपपन्नम् २७

तदक्षय्यफलंभवेत् एवंशास्त्रोक्तविधिनास्वल्पेनापिनसंशयः पापस्यमहतोवापिक्षयोवृद्धिःसुकर्मणः फलाधिक्यंभवेद्भूयआधिक्याद्भाविकर्मणोः सूक्ष्माधर्मस्यविज्ञेयागतिस्तुविबुधैरपीति २० २१ कोलंबदरीफलम् २२ २३ दानप्रो॰
ति दानेनेति अकिंचनोदरिद्रः २४ परिच्छदैर्गृहोपस्करणैः हीनंगृहंयथा अशोभनं तथेतिसमन्वयः २५ अपरान्दृष्टांतमाह
वेति जीवत्पतिलक्षणा जीवत्पतिलक्षणविशिष्टा २६ २७ छ छ छ छ

मधुमासहीनं वैशाखमासहीनमित्यर्थः २८ २९ ३० पुनरपिस्नानमाहात्म्यंकथयति काश्चिदितिस्पष्टार्थः अत्रप्रसिद्धाकथापाद्मे कस्मिन्महीरथनामानृपः पुर्वपुण्यवशात्प्राप्तराज्यैश्वर्यो मन्त्रिणिराज्यंविन्यस्य स्वयंकेवलमहर्निशंकामिनीविलासासक्तोबभूव तेनकर्मणागतायुःखंडान्नबुबुधे तदातत्कुलगुरुःकश्यपः निवारयतिनोमोहादधर्मान्नृपतिंगुरुः सोपितत्पापभाग्यस्मादितिशास्त्रंविचिंत्यानेकमार्गोपदेशैर्महीबोधयामास तद्यथा अनर्थेकिंप्रसक्तस्त्वंस्वधर्मेनानुतिष्ठसि अविश्राममभक्ष्यांबुत्थपाथेयमदेशिकं मृतःकांतारमध्वानंकथमेकोगमिष्यसि कामोहिबलवान्राजन्शरीरस्थोरिपुर्महान् नतस्यवशगोभूयाज्जनश्श्रेयोऽभिलाषुकः पुरोहितोयतस्तेहंसदसत्कर्मभागपि तस्मात्त्वांबोधयिष्यामिसर्वपापविनाशने वैशाखस्यव्रतंसर्वंसमाचरविधानतः आजन्मतोपिविहितानिमहांतिराजन्घोराणितानिदुरितानिविहायमर्त्यः वैशाखमासविहिताचरणप्रभावपुण्येनतेनहरिमंदिरमेतिचांते' इत्युक्तोनृपः स्वमनसिअतीवपश्चात्तापंकृत्वा गुरूपदिष्टमार्गेण आमरणंवैशाखधर्मानाचरन् अंतेविमानमारुह्य विष्णुलोकंजगाम· 'सगच्छन्पथिसंस्थावजीवानांक्रंदतांपुनः निरयेपच्यमानानामारावंविविधंतदा' श्रुत्वातिदुःखितो राजाकिमेतदितिदूतानपृच्छत् दूताश्चास्मिन्यमलोकेनानापातकिनःस्वस्वपातकानुरूपंनानायातनाःभुंजानः आक्रंदंतेहेराजन् वैशाखेप्रातःस्नातस्यतववपुषोवायुस्पर्शात्क्षणंलब्धसौख्याः आक्रंदरहिताःजाताः तदातिविस्मितोकरुणानिधिःमहीरथोराजा विष्णुदूतानुवाच नार्तजंतूनहं·

वैशाखहीनंतुतथैवपुण्यंनसाधुसेव्यंनफलाप्तिहेतुः यद्वन्नभूषासहितापिशोभतेवस्त्रेणहीनाललनासुरूपा २८ कि·
याकलापःसुकृतोपिपुंभिर्नभासतेतन्मधुमासहीनम् २८ तस्मात्सर्वप्रयत्नेनयेनकेनापिजंतुना धर्मोवैशाखमासेतु
कर्तव्यइतिनिश्चयः २९ मधुसूदनमुद्दिश्यमेषसंस्थेदिवाकरे प्रातःस्नात्वार्चयेद्विष्णुमन्यथानरकंव्रजेत् ३० (क्षेप
कः कश्चिन्महीरथोराजाकामासक्तोजितेंद्रियः वैशाखस्नानयोगेनवैकुंठंगतवान्स्वयम् १) वैशाखःसफलो·
मासोमधुसूदनदैवतः तीर्थयात्रातपोयज्ञदानहोमफलाधिकः ३१

हित्वापीडितोगंतुमुत्सहे सपापिष्ठोयआर्तानांशोकंनापहरेत्क्षमः मदंगसंगमोत्सृष्टवायुस्पर्शेनतेयदि जंतवःसुखिनोजाता तस्मान् संतस्त एवयेलोकेपरदुःखनिवारणाः तदाविष्णुदूतैस्तत्रनीतोराजावदति यद्यस्तिसुकृतंकिंचित्ममतेनैवजंतवः स्वर्गंगच्छंतुमुक्तांगाः नचैषांवसाम्यहम् एवंभूपवचःश्रुत्वादूताःप्रोचुर्नृपोत्तमम् अनेनतवकारुण्यधर्मेणवचसानृप बभूववृद्धिर्धर्मस्यसंचितस्यविशेषतः माधवेमासिपूर्णायांस्नानदानादिकंत्वया यत्तीर्थेविहितंवीरसर्वाघविनिषूदनं तदेभ्योदेहिविधिवत्कृत्वासाक्ष्येहरिंप्रभुं इत्युक्तःसतदादेवकृत्वासाक्ष्येगदाधरं तेभ्यस्त्रिवार्षिकंपुण्यंदयावान्विधिनाददौ दत्तेमाधवमासस्यतस्मिन्नेकदिनोद्भवे सुकृतेजंतवोयाम्ययातनादुःखवर्जिताः विमानवरमारूढास्तेसर्वेत्रिदिवंययुः प्रणमंतःस्तुवंतस्तंपश्यंतःसंप्रहर्षिताः संस्तूयमानोमुनिदेवसंघैर्यत्तद्विशेषेणचलब्धपुण्यः परंपदंयोगिवरैरलभ्यंययौजगन्नाथगणाभिवंद्यइति १ ३१ वैशाखस्नानविधिंप्रत्याह मधुसूदनेति ३२ ३३ ३४ यथोक्तफलंशास्त्रोक्तंफलंददातीतितथा ३५ ३६ माधवोद्भवैर्वैशाखसमुद्भवैः प्रसूनैःपुष्पैः अत्रपुष्पप्रसंगेनबाह्याभ्यंतरपुष्पाण्याह पाद्मे अहिंसाप्रथमंपुष्पंद्वितीयंकरणग्रहः तृतीयकंभूतदयाचतुर्थंक्षांतिरेवच शमस्तुपंचमंपुष्पंध्यानंचैवतुषष्ठकं सत्यंचसप्तमंपुष्पमेतैस्तुष्यतिकेशवः पुष्पांतराणिसंत्येवबाह्यानिनृपसत्तम आंतरैरेवतुष्येतयतोभक्तिप्रियोच्युतः वारुणसलिलंपुष्पंसौम्यंघृतपयोदधि प्राजापत्यंतथान्नादिआग्नेयंधूपदीपकम्

प्रार्थनामंत्रः मधुसूदनदेवेशवैशाखेमेषगेरवौ प्रातःस्नानंकरिष्यामिनिर्विघ्नंकुरुमाधव ३२ अर्घ्यमंत्राः वैशाखेमेषगेभानौप्रातःस्नानपरायणः अर्घ्यंतेहंप्रदास्यामिगृहाणमधुसूदन ३३ गंगाद्याःसरितःसर्वास्तीर्थानिचह्रदाश्चये प्रगृह्णीतमयादत्तमर्घ्यंसम्यक्प्रसीदथ ३४ ऋषभःपापिनांशास्तात्वंयमःसमदर्शनः गृहाणार्घ्यंमयादत्तं यथोक्तफलदोभव ३५ इतिचार्घ्यंसमर्घ्याथपश्चात्स्नानंसमाचरेत् वाससीपरिधायाथकृत्वाकर्माणिसर्वशः ३६ मधुसूदनमभ्यर्च्यप्रसूनैर्माधवोद्भवैः श्रुत्वाविष्णुकथादिव्यामेतन्मासप्रशंसिनीम् ३७

फलंपुष्पादिकंचैववानस्पत्यंतुपंचमं पार्थिवंकुशमूलाद्यंवायव्यंगंधचंदनं शब्दाख्यंविष्णुपुष्पंचवाद्यंविष्णुपदंस्मृतम् एभिस्तुपूजितःपुष्पैस द्योविष्णुप्रसीदतिइति ३७ जातुकदाचिदपि ३८ श्रुतसत्कथःश्रुताःसत्कथायेनसः ३९ वैशाखनियमाचरणहीनानांगत्यंतराभावइति तावदनुवदन्ति ४० ४१ ४२ जीवन्नेवपंचत्वमागतःजीवन्मृतइत्यर्थः ४३ ४४ ४५ अथभक्तिभेदान्व्रतभेदानाह विविधैरिति वैशाखमासेमानसिकादिभक्तिमार्गैः चपरंमानसिकादिव्रतैःयःविष्णुःनित्यं अनन्यबुद्धिःसन् आराधयन् सगुणंनिर्गुणंवाध्यायेत्समुक्तिंयातीतितत्रभक्तिभेदानाह पाद्मे ध्यानधारणयाबुध्यावेदानांस्मरणेनच विष्णुप्रीतिकरीचैषामानसीभक्तिरुच्यते वेदमंत्रसमुच्चारैरविश्रांतंदिवानिशं जप्यैश्चारण्यकैश्चैववाचिकीभक्तिरिष्यते व्रतोपवासनियमैःपंचेंद्रियजयेनच कायिकीभक्तिरुद्दिष्टासर्वसिद्धिविधायिनी पाद्यार्घ्याद्युपचारैश्चनृत्यवादित्रगीतकैः बलिभिर्जागरार्चाभिर्लौकिकीभक्तिरीरिता ऋग्यजुःसामजप्यैश्चसंहिताध्ययनादिभिः हविर्होमक्रियाभिश्चयाभक्तिःसातुवैदिकी अथव्रतभेदानाह- तत्रैव अहिंसासत्यमस्तेयंब्रह्मचर्यमकल्मता एतानिमानसान्याहुर्व्रतानिहरितुष्टये एकभक्तंतथानक्तमुपवासमयाचितं इत्येवंकायिकंपुंसांव्रतमु

कोटिजन्मार्जितात्पापान्मुक्तोमोक्षमवाप्नुयात् नजातुविद्यतेभूमौनस्वर्गेनरसातले ३८ नगर्भेजायतेक्वापि नभूयस्तनपोभवेत् वैशाखकास्यभोजीयस्तथाचाश्रुतसत्कथः ३९ नस्नातोनापिदाताचनरकानेवगच्छति ब्रह्महत्यासहस्रस्यपापशाम्येत्कथंचन ४० वैशाखेयेननस्नातंतत्पापंनैवगच्छति स्वाधीनेनस्वकायेनजलेस्वातंत्र्यवर्तिनी ४१ स्वाधीनजिह्वयोच्चार्यंहरिरित्यक्षरद्वयम् नकुर्याद्यदिवैशाखेप्रातःस्नानंनराधमः ४२ जीवन्नेवसपंचत्वमागतोनात्रसंशयः यनकेनाप्युपायेनमाधवेमधुसूदनम् ४३ नार्चयेद्यदिमूढात्मासौकरींयोनिमाप्नुयात् योर्चयेत्तुलसीपत्रैर्वैशाखेमधुसूदनम् ४४ नृपोभूत्वासार्वभौमःकोटिजन्मसुभोगवान् पश्चात्कोटिकुलैर्युक्तोविष्णोःसायुज्यमाप्नुयात् ४५ (क्षपकः विविधैर्भक्तिमार्गैश्चविष्णुंसेवतपोव्रतैः सगुणंनिर्गुणंवापिनित्यंध्यायेदनन्यधीः१)

क्तंनरेश्वर वेदस्याध्ययनंविष्णोः कीर्तनंसत्यभाषणं अपैशून्यमिदंराजन् वाचिकंव्रतमुच्यते पतिरूपोहिताचारैर्मनोवाक्कायसंयमैः व्रतैराराध्यतेस्त्रीभिर्वास्कदेवोदयानिधिरिति विष्णोराराधनंध्यानंचकुर्यादित्युक्तं तत्रहरेःपूजास्थानान्याह तत्रैव सूर्योग्निर्ब्राह्मणोगावोवैष्णवःखंमरुज्जलं भूरात्मासर्वभूतानिपूजास्थानानिवैहरेः धिष्ण्येष्वेतेषुश्रीविष्णुंध्यायेन्नर्चेत्समाहितः ध्यानभेदमाह तत्रैव यथाध्यानप्रसंगेन कर्मणोपिक्षयोभवे तद्ध्यानंद्विविधंतस्यप्रोक्तंशंकरपूर्वकैः निर्गुणंसगुणंवापितत्राद्यंशृणुमानद केवलोज्ञानदृश्यासौदृश्यतेयोगयुक्तिभिः परमात्मपरैराजन्सततंध्यानतत्परैः हस्तपादविहीनश्चसर्वंगृण्हातिगच्छति मुखनासाविहीनश्चभुंक्तेजिघ्रतिभूपते अकर्णःशृणुतेसर्वंसर्वसाक्षीजगत्पतिः अरूपोरूपसंबद्धः पंचवर्गवशंगतः सर्वलोकस्ययःप्राणःपूज्यतेसचराचरैः अजिह्वोवदतेसर्वंवेदशास्त्रानुगंतथा त्वग्विहीनःस्पृशेत्सर्वंशीतोष्णादिनराधिप सदानंदोवि

इतिश्रीस्कंदपुराणेवैशाखमाहात्म्येनारदांबरीषसंवादेवैशाखधर्मप्रशंसानामचतुर्थोऽध्यायः ४ छ अंबरीषउवाच वैशाखःसर्वधर्मेभ्यस्तपोधर्मेभ्यएवच कथंसनर्वमासेभ्योदानेभ्योऽप्यधिकोऽभवत् १

विक्ताक्ष एकरूपोनिराश्रयः निर्गुणोनिर्ममोव्यापीसगुणोनिर्मलोजनः अवश्यःसर्ववश्यात्मासर्वदःसर्ववित्तमः तस्यमातानचैवान्यःसवेसर्वमयोविभुः एवंसर्वमयंध्यानंयश्चपश्यत्यनन्यधीः सयातिपरमंस्थानंअमूर्तोममृतोपमं द्वितीयंतुप्रवक्ष्यामितच्छृणुष्वमहामते मूर्ताकारंतुसाकारंनिरालंबंनिरामयं यस्यवासनयासर्वंब्रह्माद्यंवासितंनृप सतस्माद्वासुदेवोपिप्रोच्यतेविधिपूर्वकैः स्निग्धप्रावृड्घनश्यामंसूर्यतेजसमप्रभं शंखचक्रगदापद्मधारिणंकमलापतिं कंबुग्रीवंचतुर्बाहुंस्फुरेशानंचशार्ङ्गिणं केयूरहारकटककटिसूत्रांगुलीयकैः निराजितंकुंडलाभ्यांवपुषालंकृतेनच वाससाहेमवर्णेनप्रावृतोगरुडासनः ध्यातव्यःसगुणोराजन्भक्ताघौघहरोहरिः एवंतेध्यानमुद्दिष्टंद्विविधंनृपसत्तम यत्कृत्वामुच्यतेपापैर्मनोवाक्कायसंभवैरित्यादि अनन्यधीः नविद्यतेअन्याश्रयाधीर्बुद्धिर्यस्य १ इतिटीकायांचतुर्थोऽध्यायः ४ छ अथसर्वेभ्योपिदानधर्ममासेभ्योवैशाखस्यैवमुख्यतानिदानंविशदयितुंपृच्छतिराजांबरीषः वैशाखइति २ छ छ छ

देवराड् देवराजः कल्पांतेमहाप्रलये २ कुक्षिस्थः सामीप्याज्जठरस्थोलोकानांसंघः समूहोयस्यसः परमात्माअनेकोऽपिसन् भूतिभिर्योगमा-
ययाचैकतांप्राप्य प्रलयार्णवेशेतेइत्याभिसंधिः ३ निमेषस्य नेत्रनिमीलनस्य निद्रायाइत्यर्थः श्रुतिभिर्वेदैः ४ तत्तदित्यादि तादृशतादृशपुण्य
पापादिरूपफलप्राप्त्यर्थं सपरमेश्वरः यदेतिशेषः मनोदधे मनसिकृतवान् तदेत्यध्याहारेणोत्तरार्धाभिसंधिः ५ तस्मिन्विराड्रूपेब्रह्मणि ६

नारदउवाच तद्वक्ष्यामिमहाप्राज्ञश्शृणुचैकमनाभव कल्पांतेदेवराड्विष्णुःशेषशायीमहाप्रभुः २ कुक्षिस्थलोक
संघोयंसशेतेप्रलयार्णवे अनेकोप्येकतांप्राप्यभूतिभिर्योगमायया ३ निमेषस्थावसानेतुश्रुतिभिर्बोधितस्ततः कु
क्षिस्थजीवसंघानांरक्षांचक्रेदयानिधिः ४ तत्तत्कर्मफलप्राप्त्यैस्रष्टुमनोदधे तस्यनाभेरभूत्पद्मंसौवर्णंभुव
नाश्रयम् ५ ब्रह्माणंजनयामासवैराजंपुरुषाह्वयम् तस्मिन्ससर्जभगवान्भुवनानिचतुर्दश ६ भिन्नकर्माशया
न्प्राणिसंघांश्वविविधान्बहून् त्रिगुणान्प्रकृतिंलोकेमर्यादाश्चाधिपांस्तथा ७ वर्णाश्रमविभागांश्चधर्मक्लृप्तिंच-
सोकरोत् वेदैश्चतुर्भिस्तंत्रैश्चसंहितान्स्मृतिभिस्तथा ८ पुराणैरितिहासैश्चस्वाज्ञारूपैर्महेश्वरः ऋषिन्प्रवर्तकां-
श्चक्रेधर्मगुप्त्यैमहाप्रभुः ९ तैःप्रवर्तितधर्मास्तुवर्णाश्रमविभागजाः प्रजाःश्रद्दधिरसर्वाःस्वोचितान्विष्णुतोषदान्
१० तांस्तुप्रवर्तमानास्तुस्वाश्रमान्द्रष्टुमीश्वरः हृदिस्थोप्यव्ययःसाक्षाद्विभीषार्थंपरीक्षया ११ अनूनान्कुशला-
न्यत्रधर्मान्कुर्वंतिवैप्रजाः सकालःकोभवेद्विद्वानितितंचिंतयन्प्रभुः १२ वर्षाकालोमयासृष्टःसीदंत्यस्ताइमाःप्रजाः
तत्रानूनान्नकुर्वंतिधर्मान्येकाद्युपद्रुताः १३ तान्दृष्ट्वाकोपएवस्यात्तेषुतुष्टिर्नमेभवेत् मयोक्षितानसीदंतुतस्मात्तानव-
लोकये १४

स्रष्टपदार्थान्परिगणयति भिन्नेत्यादि भिन्नाः कर्माणिआशयाश्चयेषां तेषांप्राणिनांसमूहान् ७ ८ ९ १० विभी
षार्थं अयमधर्मः अस्मिन्नाचरितेविष्णुः कुप्यतिइतिभयदानाय ११ अनूनान्प्रशस्तान् १२ १३ १४ ६९ ६९

११

कर्षणादितस्येतश्चव्यग्रतात् १५ १६ प्रातःप्रातःकालेशीतबाहुल्यादितिभावः १७ अनिशंनिरंतरंअंजसासाहजिकमेव १८ १९
प्रेक्षायाभगवद्दर्शनस्य २० भोगेयथासांगभगवदाराधने २१ असुभृतांप्राणिनां २२ विष्णोराधारभूतानांविष्णुभक्तियुतत्वात् वि-

शरद्यपितथापूर्तिःकर्षणान्नैवजायते केचित्पक्वफलासक्ताःकेचिद्वृष्टिभिरर्दिताः १५ केचिच्छीतार्दिताराजंस्ता
न्दृष्ट्वारोषएवमे वैगुण्यंपश्यमानस्यनमेतोषोभिजायते १६ उत्थापनंतुनेष्यन्तिप्रातर्हेमंतआगते कोपोमेनुत्थिता
न्दृष्ट्वाप्रातःसूर्योदयेसति १७ शिशिरेपितथैवार्ताःप्रातःकालेइमाःप्रजाः तथापक्वफलादानुशक्तात्यनिशमंजसा
१८ पुनःशीतार्दिताःप्रातःस्नानार्थमितिचिंतिताः तेषांतुकर्मलोपस्यान्नैवपूर्तिःकथंचन १९ प्रेक्षायाःसमयोनाय
मितिचिंताकुलोविभुः वसंतसमयेमेनेसर्वापत्तिनिवारकं २० स्नानेदानेतथायागेक्रियायांभोगएवच नानाध-
र्मविधानेचत्वनुकूलोत्ययंऋतुः २१ अप्रयासेनलभ्यानिद्रव्याण्यसुभृतांध्रुवम् येनकेनापिद्रव्येणतुष्टिस्तनुभृतां
भवेत् २२ विष्णोराधारभूतानांतद्द्रव्यंधर्मसाधनम् वसंतेसकलंद्रव्यंप्राणिनांतुसुखावहम् २३ दानयोग्यंधर्म
योग्यंभोगयोग्यंतुसर्वशः निर्धनानांतुपंग्वादिविकलानांमहात्मनां २४ द्रव्याणिचसुलभ्यानिजलादीनिनसंशयः
द्रव्यैरेतैःस्वात्महितंधर्मंकुर्वंतिमत्प्रियाः २५ पत्रैःपुष्पैःफलैरन्यैःशाकैश्चापिप्रियोक्तिभिः स्रक्तांबूलैश्चंदनाद्यैः
पादप्रक्षालनादिभिः २६ प्रश्रयाद्यैरहंतेषांवरदोहमितीरयन् संचिंत्यभगवान्विष्णुःप्रतस्थेरमयासह २७ वना
निसर्वतःपश्यन्विकसत्कुसुमानिच हृष्टपुष्टजनाकीर्णंमत्तालिद्विजसेवितम् २८

ष्णुरेवआधारभूतोएषामित्यर्थः प्राणिनांध
र्मसाधनंतद्द्रव्यंपूजनानुष्ठानसामग्रीभूतंसकलंकृत्स्नंसुखावहंभवति २३ २४ मत्प्रियाःअहंप्रियोयेषां २५ २६ प्रश्रयाद्यैःप्रणामप्र-
भृतिभिः ईरयन्वदन्भगवान्रमयासहप्रतस्थे २७ वसंतशोभांवर्णयति वनानीति विकसंतिकुसुमानियेषुतानि २८

२९ ३० मीनादिकर्कदांतं मीनसंक्रांतिमारभ्ययावत्कर्कसंक्रांतिपर्यंतं ३१ कृताकृतसपर्ययाक्वचित्कृताक्वचिदकृताचसपर्यापूजायस्याः सात्वयारमं
तिपूर्वेणान्वयः तत्रमुन्याश्रमादिषु इष्टान्मनोरथान्ददातिविष्णुरिति अनुवृत्तिः ३२ ३३ ३४ देशागतं देशस्थितिपर्यालोचनायागतम्
महार्हणैरुपायनपुरःसरपूजनैः ३५ कारादिकराजदेयकरादिकम् ३६ अकृतपूजानांराजपूजनविमुखानां सराजादंडंकरोति यथात

आश्रमाणांमहार्हाणांवनग्रामनिवासिनाम् प्रांगणादीनिरम्याण्युद्यानानिस्थलानिच २९ रमायैदर्शयन्विष्णुः
सहदेवैर्मुनीश्वरैः सिद्धचारणगंधर्वकिन्नरोरगराक्षसैः ३० स्तूयमानोभ्यगाद्देहान्वर्णाश्रमनिवासिनां मीनादिक-
र्कदांतंवैसतिष्ठन्रम्यास्करैः ३१ साईंमतीत्यपुरुषान्कृताकृतसपर्यया तत्रधर्मवतांपुंसांददातीष्टान्मनोरथान्
३२ मत्तान्नसहतांपुंसांहरत्यायुर्धनादिकम् यदिकुर्वंतिवैशाखसपर्यांपरमात्मनः ३३ तत्रापिचलमूर्तीनांसाधूनांय
त्वैवविभुः मासेष्वन्येषुयज्जातंकर्मलोपंसहिष्यति ३४ यथादेशागतंभूपंदृष्ट्वाजानपदाःप्रजाः यदितंचोपतिष्ठंति
प्रश्रयाद्यैर्महार्हणैः ३५ तदाकारादिकंन्यूनंपूर्णंजानातिपार्थिवः पुनरप्यधिकंचेष्टंतुष्टोदास्यतिनिश्चितम् ३६
तदात्वकृतपूजानांदंडंतेषांकरोतिच तथाविष्णुःस्वकीयानांवैशाखेमाधवागमे ३७ सपर्यांकुर्वतांपुंसांददातीष्टा
न्मनोरथान् अकुर्वतांतथापुंसांधनादीनिहरत्यलम् ३८ धर्मगोप्तुर्महाविष्णोर्देवदेवस्यशार्ङ्गिणः परीक्षाकालए-
वायंतस्मान्मासोत्तमोह्ययम् ३९ इतिश्रीस्कंदपुराणेवैशाखमाहात्म्येनारदांबरीषसंवादेवैशाखश्रेष्ठत्वनिरूपणं
नामपंचमोऽध्यायः ५ ६ नारदउवाच वैशाखेध्वगतप्तानांतृषार्तानांमहीपते जलदानमकुर्वाणस्तिर्यग्योनि
मवाप्नुयात् १

थाविष्णुरित्यादि ३७ ३८ अयंवसंतकालः धर्मंकरोतिनवेतिपरीक्षाकालोस्ति अतः अयंवैशाखमासःसर्वेषूत्तमः
अनेनअस्मिन्मासेधर्मकार्यमवश्यकर्तव्यमेवेतिध्वनिःसूचितः ३९ इतिटीकायांपंचमोऽध्यायः ५ अध्वगाश्चतप्ताश्चेतिद्वंद्वःकर्मधारयोवा
तिर्यग्योनिं पशुपक्ष्यादिजन्म १ ६

गृहगोधायाः पल्ल्याः २ ब्रह्मण्यः ब्राह्मणहितकारी वदान्यः अतिदाता जितामित्रः जितशत्रुः ३ यावंत्यो यावत्संख्याकाः तावतीस्तावत्संख्याकाः ४ येनहेमांगेन यत्तद्भैरिष्टं यजनंकृतम् भूमिश्च बर्हिष्मती यत्रतत्रदर्भपुंजमयीकृतेतिशेषः ५ सुखलभ्यधियाजलंतुसुखेनलभ्यते तस्य दानेनकिमितिबुद्ध्या ६ बोधितः जलदानंकुर्वित्युपदिष्टः ७ हेतुवादैस्तर्कवादैः ८ व्यंगान्काणांधबधिरकुब्जान् वृत्तिकर्शितान् वृत्तिहीनान्

अत्रैवोदाहरंतीममितिहासंपुरातनम् विप्रस्यगृहगोधायाःसंवादंपरमाद्भुतम् २ पुराचेक्ष्वाकुवंशेभूद्धेमांगइति भूमिपः ब्रह्मण्यश्चवदान्यश्चजितामित्रोजितेंद्रियः ३ यावंत्योभूमिकणिकायावंतोजलबिंदवः यावंत्युडूनिगगने तावतीरददात्सगाः ४ येनेष्टंयज्ञदर्भैश्चभूमिर्बर्हिष्मतीकृता गोभूतिलहिरण्याद्यैस्तोषिताबहवोद्विजाः ५ तेनादत्तानिदानानिनविद्यंतइतिश्रुतम् तेनादत्तंजलंचैकंसुखलभ्यंधियानृप ६ बोधितोब्रह्मपुत्रेणवसिष्ठेनमहात्मना अमौल्यंसर्वतोलभ्यंतद्दाताकिंफलंलभेत् ७ दुर्बुद्ध्याहेतुवादैश्चनजलंदत्तवान्द्विजे अलभ्यदानेपुण्यंस्यादिति वाक्यंसुयुक्तिमत् ८ सन्मानर्चाद्विजान्व्यंगान्दरिद्रान्वृत्तिकर्शितान् नार्चयच्छ्रोत्रियान्विप्रांस्तत्वज्ञान्ब्रह्मवादिनः ९ प्रख्यातान्पूजयिष्यंतिसर्वेलोकामहार्हणाः अनाथानामविद्यानांव्यंगानांचद्विजन्मनाम् १० दरिद्राणांगतिः कावानस्मात्तेमेदयास्पदम् इतिदुर्धीरपात्रेषुदत्तवान्किमपिस्वयम् ११ तेनदोषेणमहताजातकत्वंत्रिजन्मसु एकजन्मनिगृध्रत्वंश्वाभवत्सप्तजन्मसु १२ पश्चान्नृपगृहेजातोभूपोयंगृहगोधिका श्रुतकीर्त्याख्यभूपस्यमिथिलाधिपतेर्नृप १३ गृहाद्वारप्रतोल्यांचवर्ततेकीटकाशना सप्ताशीतिषुवर्षेषुस्थिततेनदुरात्मना १४

आनर्च पूजितवान् श्रोत्रियादीन्द्विजानर्चयन् ९ १० दुर्धीर्दुर्बुद्धिः अपात्रेषु अयोग्येषु किमपिद्रव्यंस्वयंवसिष्ठाज्ञामगृहीत्वैव ११ १२ १३ गृहद्वारप्रतोल्यां गृहद्वाराभ्यंतरोपरितनप्रदेशे कीटकाशना कीटकानश्नातीति तथा दुरात्मना दुराचारप्रवर्तक मनसा १४ छ छ छ

१५ पादावनेजनीः पादप्रक्षालनसंबंधिन्यः १६ उत्सिक्तैरूर्ध्वं उत्सारितैः दैवेनोपादिष्टेन गृहगोधिकात्वभोक्तव्यकालेन १७ जा
तस्मृतिः उत्पन्नपूर्वजन्मकर्मस्मरणः ब्राह्मणं श्रुतदेवं १८ १९ २० २१ २२ पूर्तानि देवालयतीर्थघट्टादिबंधनादीनि धर्म॰

विदेहाधिपतेर्गेहे कदाचिदृषिसत्तमः श्रुतदेवइतिख्यातःश्रोतोमध्यान्हआगतः १५ तंदृष्ट्वासहसोत्थायजातहृ
र्षोनराधिपः मधुपर्कादिभिःपूज्यतस्यपादावनेजनीः १६ अपोमूर्ध्नावहन्क्षिप्ततदोत्सिक्तैश्चबिंदुभिः दैवोपादिष्टकाले
नप्रोक्षितागृहगोधिका १७ सद्योजातस्मृतिरभूत्स्मृतकर्मादिदुःखिता आहित्राहीतिचुक्रोशब्राह्मणंगृहमागतम् १८
तिर्यग्जंतुरवंश्रुत्वाब्राह्मणोविस्मितोवदत् कुतःक्रोशसिगोधेत्वंदशेयंकेनकर्मणा १९ त्वंदेवःपुरुषःकश्चिन्नृपोवाथ
द्विजोथवा कस्त्वंब्रूहिमहाभागत्वामद्याहसमुद्धरे २० इत्युक्तःसन्नृपःप्राहश्रुतदेवंमहामतिं अहमिक्ष्वाकुकुलजोवेद॰
शास्त्रविशारदः २१ यावत्योभूमिकणिकायावंतस्तोयबिंदवः यावंत्युडूनिगगनेतावतीरददस्मगाः २२ सर्वयज्ञामया
चेष्टाःपूर्तान्याचरितानिमे दानान्यपिचदत्तानिधर्मराजस्त्वनुष्ठितः २३ तथापिदुर्गतिर्जाताममचोर्ध्वगतिंविना त्रिवा॰
स्नातकत्वंमेगृध्रत्वंचैकजन्मनि २४ सप्तजन्मस्वश्वानत्वंप्राप्तंपूर्वंमयाद्विज सिंचतानेनभूपेनत्वपःपादावनेजनीः २५
बिंदवोदूरमुत्क्षिप्तास्तैःक्षिप्तोहंकथंचन तेनजन्मस्मृतिरभूत्सर्वपाप्माहतश्चमे २६ गोधाजन्मानिभाव्यानित्यष्टाविंश॰
तिमेद्विज दृश्यंतेदैवसृष्टानिबिभ्येतैर्जन्मभिर्भृशम् २७ नकारणंप्रपश्यामितन्मेविस्तरतोवद इत्युक्तःसऋषिःप्रा
हज्ञात्वाविज्ञानचक्षुषा २८ शृणुभूपप्रवक्ष्यामितवदुर्योनिकारणम् नजलंतुत्वयादत्तंवैशाखेमाधवप्रिये २९

राज्ञः वैशाखमासः २३ २४ २५ सर्वपाप्मासर्वपापम् २६ अष्टाविंशतिमेगोधाजन्मानि गोधायोनौदैवसृष्टानि अनेकानिजन्मानि
भविष्यंतीनिदृश्यंते तैर्जन्मभिरहंबिभ्येइतिश्लोकार्थः २७ २८ २९ ५ ५ ५

अमूल्यं अतीवं जघन्यंइतित्वया निश्चितं धर्मकालेउष्णकाले अजानता अविदुषा ३० पात्रंयोग्यं अपात्रेप्रतिग्रहानर्हे अर्थांतरमुपन्यस्यति ज्वलंतमिति ३१ ३२ ३३ पूज्यतायां पूजनीयत्वे अनाथत्वं प्रयोजकतां कारणतां इयादृच्छेत् अनाथइतिमत्वा पूजनीयोभवतीति नयुक्तमिति तात्पर्यमुत्तद्दक्षणमात्रमिवोचितमितिवदति पंग्वाद्यायेइति ३४ ३५ अत्यर्थमत्यंतम् ३६ साधुसुष्ठुवृत्तंयेषांतेषांज्ञानिनामित्यर्थः ३७ पुमर्थानांधर्मार्थकाममोक्षाणां ३८ ३९ तैःसाधुभिः सुशिक्षिताः सम्यगुपदिष्टाः ४० जन्ममृत्युजराद्यैरिति सुधयाअमृतेनाप्यायितास्तर्पिताःसीदंतेइत्यत्रान्वेति ४१ शांतयेपूर्वजन्मकृतपापनिरासाय ४२

तज्जलंसकलंभंमत्वात्यमूल्यमितिनिश्चितम् नाध्वगानांद्विजातीनांधर्मकालेप्यजानता ३० तथापात्रंसमुत्सृज्य त्वपात्रेप्रतिदत्तवान् ज्वलंतमग्निमुत्सृज्यनहिभस्मनिहूयते ३१ बहुधावर्णितस्यापिसौगंध्यादिगुणस्यच कंटकान्वितवृक्षस्यनकुर्वंतिसमर्चनम् ३२ विशिष्टानांपादपानामश्वत्थःसेव्यतांगतः तुलसींतुसमुत्सृज्यबृहतीपूज्यतेनुकिं ३३ अनाथत्वंपूज्यतायांनप्रयोजकतामियात् पंग्वाद्यायेप्यनाथाहिदयापात्रंहिकेवलम् ३४ तपोनिष्ठाज्ञाननिष्ठाःश्रुतिशास्त्रविशारदाः विष्णुरूपाःसदापूज्यानेतरेतुकदाचन ३५ तत्रापिज्ञानिनोत्यर्थंविप्राविष्णोः सदैवहि ज्ञानिनामपिभूपालविष्णुरेवसदाप्रियः ३६ तस्माज्ज्ञानीसदापूज्यःपूज्यात्पूज्यतरःस्मृतः अवज्ञासाधुवृत्तानामिहामुत्रचदुःखदा ३७ सेवावैमहतांपुंसांपुमर्थानांहिकारणम् कोटयोप्यधजातीनानपश्यंतियथा यथं ३८ एवंमंदायुतानांतुसंगतिर्नार्थदाभवेत् नह्यम्मयानितीर्थानिनदेवामृच्छिलामयाः ३९ तेपुनंत्युरुकालेन दर्शनादेवसाधवः नसाधुसेवनात्कापिसीदंतेतैःसुशिक्षिताः ४० जन्ममृत्युजराद्यैर्वासुधयाप्यायितायथा नजलंतुत्वयादत्तंसाधवोयानसेविताः ४१ तेनत्वंदुर्गतिश्चेयंप्राप्ताचेक्ष्वाकुनंदन वैशाखेमत्कृतंपुण्यंतुभ्यंदास्यामिशांतये ४२

हेअनुत्तमहेसकलश्रेष्ठअंबरीष ४३ गृहगोधिकां गृहगोधिकादेहम् ४४ मैथिलस्यजनकस्य ४५ अनुज्ञानगृहीतमुन्यनुज्ञः ४६
अतंद्रितोनिरलसः ४७ ४८ वसिष्ठेनबोधितउपदिष्टः ४९ मासाद्यप्राप्य इत्थमितिहासंप्रोच्यवर्णनीयकथांशमुपसंहरति·

भूतंभव्यंभवद्येनकर्मजातंविजेष्यसि इत्युक्त्वापउपस्पृश्यददौपुण्यमनुत्तमं ४३ यदादत्तंब्राह्मणेनस्नानंचैकदिने
कृतं तेनध्वस्ताखिलाघस्तुत्यक्त्वातांगृहगोधिकां ४४ दिव्यंविमानमारुह्यदिव्यस्रग्वस्त्रभूषणः पश्यतामेवभूता
नांमैथिलस्यगृहांतरे ४५ बद्धांजलिपुटोभूत्वापरिक्रम्यप्रणम्यच अनुज्ञातोययौराजास्तूयमानोमरैर्दिवम् ४६
तत्रभुक्त्वामहान्भोगान्वर्षायुतमतंद्रितः सएवचेक्ष्वाकुकुलेकाकुत्स्थोभून्महाप्रभुः ४७ सप्तद्वीपवतीपालोब्रह्म
ण्यःसाधुसम्मतः देवेंद्रस्यसखाविष्णोरंशएवमहाप्रभुः ४८ बोधितस्तुवसिष्ठेनवैशाखोक्तान्मनोरमान् अनु
ष्ठायाखिलान्धर्मान्तेनध्वस्ताखिलाशुभः ४९ दिव्यज्ञानंसमासाद्यविष्णोःसायुज्यमाप्तवान् वैशाखःशुभदः
स्तस्मात्पुंभिःसर्वैरनुष्ठितः ५० आयुर्यशःपुष्टिदोयंमहापापौघनाशनः पुमर्थानांनिदानंचविष्णुःप्रीणात्यनेनतु
५१ चातुर्वर्ण्यनरैःसर्वैश्चतुराश्रमवर्तिभिः अनुष्ठेयोमहाधर्मोवैशाखेमाधवागमे ५२ इतिश्रीस्कंदपुराणेवै·
शाखमाहात्म्येनारदांबरीषसंवादेगृहगोधिकाख्याननामषष्ठोऽध्यायः ६ छ नारदउवाच राजातदद्भुतं
दृष्ट्वामैथिलोधर्मवित्तमः कृतांजलिःसुखासीनंविस्मितोवाक्यमब्रवीत् १

वैशाखइति ५० प्रीणातिप्री
तोभवति ५१ चातुर्वर्ण्यनरैर्ब्राह्मणक्षत्रियविट्शूद्रैः चतुराश्रमवर्तिभिर्ब्रह्मचारीगृहस्थवानप्रस्थसंन्यासिभिः माधवस्यागमः प्राप्तिर्य-
स्मिन् वैशाखे महाधर्मोऽनुष्ठेयः करणीयः ५२ इतिटीकायांषष्ठोऽध्यायः ६ छ अथवैशाखधर्मान्प्रतिजनकस्पृष्टः श्रुतदेवः
सविस्तरमाहेतिकथाप्रसंगमनुसंधत्ते राजेति अद्भुतं कीटदेहस्य सायुज्यप्राप्तिरूपम् १ छ छ छ

२ ३ व्याजहारोक्तवान् ४ व्यवसितानिश्चिता ५ वासुदेवकथानामालापेसंकीर्तने ६ यूने तरुणायापितुभ्यमितिशेषः एतेनतारुण्येधर्ममतिः प्रायः सुकृतिनामेवजायतइतिध्वनिः भागवतं भगवद्भक्तं ७ ८ यथाशौचमित्यादिवैशाखधर्माणांनित्य

मैथिलउवाच दृष्टमेतन्महाश्चर्यंसाधूनांचरितंतथा येनधर्मेणमुक्तोभूद्राजाचेक्ष्वाकुनंदनः २ तंधर्मंविस्तरे
णैवश्रोतुंकौतूहलंहिमे मह्यंश्रद्धावतेविद्वन्कृपयाविस्तराद्वद ३ इतिराज्ञासुसंपृष्टःश्रुतदेवोमहामनाः साधुसा
ध्वितिसंभाष्यव्याजहारनृपोत्तमम् ४ श्रुतदेवउवाच सम्यग्व्यवसिताबुद्धिस्तवराजर्षिसत्तम वासुदेवप्रियान्
धर्मान्श्रोतुंयस्मान्मतिस्तव ५ बहुजन्मार्जितंपुण्यंविनाकस्यापिदेहिनः वासुदेवकथालापेमतिर्नैवोपजायते
६ यूनेराजाधिराजायजातेयंमतिरीदृशी शुद्धंभागवतंमन्येतेनत्वांसाधुसत्तमम् ७ तस्मात्तुभ्यंब्रुवेसौम्यधर्मान्
भागवतान्शुभान् यान्ज्ञात्वामुच्यतेजंतुर्जन्मसंसारबंधनात् ८ यथाशौचंयथास्नानंयथासंध्याचतर्पणम् अ
ग्निहोत्रंयथाश्राद्धंतथावैशाखसत्क्रियाः ९ वैशाखेमाधवेधर्मानकृत्वानोर्ध्वगोभवेत् नवैशाखसमोधर्मोधर्मजा
तेषुविद्यते १० संत्येवबहवोधर्माःप्रजाश्चाराजकाइव उपद्रवैश्चलुप्यंतिनात्रकार्याविचारणा ११ सुलभाःसक
लाधर्माःकर्तुंवैशाखचोदिताः उदकुंभप्रपादानंपथिच्छायादिनिर्मितिः १२ उपानत्पादुकादानंछत्रव्यजनयोस्त
था तिलयुक्तमधोर्दानंगोरसानांश्रमापहम् १३ वापीकूपतडागादिकरणंपथिकाश्रयं नारिकेलेक्षुकर्पूरकस्तू
रीदानमेवच १४

त्वंवदति ९ ऊर्ध्वगः स्वर्गादिलोकगः धर्मजातेषुधर्मसमूहेषु १० अराजकाः राजशासनविहीनाः प्रजाइवयेबहवोधर्माःसंतितेउपद्रवैर्लुप्यंति ११ पथिमार्गेछायादीनांआदिशब्देनअन्नछत्रादिसंग्रहः निर्मितिनिर्माणं १२ गोरसानांदधिक्षीरतक्रघृतानाम् १३ १४

चूतफलमाम्रफलं उर्वारुकरसायनं निंबफलरसयनम् १५ चित्राणिनित्यंनित्यं नवनवानि १६ करीकंउदकुंभदानंलोकेकरवाइतिप्रसिद्धः १७ १८
१९ वृषपत्नीनांधेनूनां २० गुडनागरदानं गुडमिश्रनागरमोथप्रदानं धात्रीपिष्टआमलकीचूर्णम् २१ कालोचितपल्लवाद्यैः वसंतका
लोत्पन्नपत्रपुष्पफलादिभिः २२ यात्वनारीमाधवंश्रीकृष्णं पुष्पैर्नार्चयेदित्यद्याभिसंधिः २३ मुनिभिर्देवतैश्चसहधर्मसंतोः परिक्षार्थंरमास

गंधानुलेपनंशय्याखट्वादानंतथैवच तथाचूतफलंरम्यमुर्वारुकरसायनम् १५ दानंदमनपुष्पाणांतथासायंगुडोदकं
चित्राण्यन्नानिपूर्णायांदध्यन्नंप्रत्यहंतथा १६ तांबूलस्यसदादानंचैत्रदर्शेकरीरकं रवावनुदिनेसूर्येप्रातःस्नानंदिनेदिने १७
मधुसूदनपूजाचकथायाःश्रवणंतथा अभ्यंगवर्जनंचैवतथावैपत्रभोजनम् १८ मध्यंमध्येश्रमार्तानांवीजनंव्यजनेनच
स्रगंधैःकोमलैःपुष्पैःप्रत्यहंपूजनंहरेः १९ फलंदध्यन्ननैवेद्यंधूपदीपौदिनेदिने गोग्रासंवृषपत्नीनांद्विजपादावनेजनं २०
गुडनागरदानंचधात्रीपिष्टप्रदापनं पथिकानांप्रश्रयंचदानंतंदुलशाकयोः एतेधर्माःप्रशस्ताहिवैशाखेमाधवप्रिये २१
तथाचविष्णोःकुसुमार्पणंहरेःपूजाचकालोचितपल्लवाद्यैः दध्यन्ननैवेद्यनिवेदनंचसमस्तपापौघविनाशहेतुः २२ नारीपुष्पैः
र्माधवंनार्चयेद्याहिजारख्यातंमंदिरेवागृहेवा पुत्रसौख्यंक्वापिनाप्नोतिहंतिचायुर्भर्तुःस्वात्मनोवामहात्मन् २३ रमासहाये-
माधवेमासिविष्णोःपरीक्षार्थेधर्मसेतोःप्रजानां गृहंयातेमूनिभिर्दैवतैश्चकालेपुष्पैर्नार्चयेद्यस्तुमूढः २४ समूढात्मारौरवं
प्राप्यपश्चाद्यायाद्योनिंराक्षसींपंचवारं जलंचान्नंसर्वदादेयमास्मिन्क्षुधार्तानांप्राणिनांप्राणहेतुः २५ तिर्यग्जंतुर्जायते
वार्यदानादन्नादानाज्जायतेवैपिशाचः अन्नादानेचानुभूतांकथांतेत्यहंवक्ष्येचाद्भुतांभूमिपाल २६

हायेविष्णोगृहंसमायाते इत्यभिसंधिः २४ प्राणहेतुर्जीवनस्यसाधनमितिजलान्नयोर्विशेषणम् २५ वार्यदानाज्जलादानात् अन्ना
दानेजायमानांमयाप्यनुभूतांइतिनिर्बंधनम् २६

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

रेवातीरे नर्मदातीरे स्वंमांसमश्नातीति तथानष्टंचैतन्यंचलनवलनादिसामर्थ्यंयस्यसः २७ कर्मणादैवयोगेनयस्यक्षुधातृषाच्चवह्निरित्यभिसंधिः प्राणपर्यंतं प्राणस्यापि २८ जलंदृष्ट्वादृष्टिमात्रेणैवकालकूटविषसदृशंभवति २९ तृद्वान्तृद्वान्त्रोटयित्वात्रोटयित्वा क्षुधातृषाभ्यांव्यथितंपीडितम् ३० सराक्षसोमांहंतुं प्राद्रवत् ममतेजसानिहितकृतप्रतीकारोदुद्रुवे पलायांचकार कृपयाक्लिन्नमार्द्रीभूतंचेतोयस्यसः मेमया ३१ कृच्छ्रा

रेवातीरेमसिताभूत्पिशाचःस्वमांसाशीक्षुत्तृषाभ्यांतगात्रः छायाहीनेशाल्मलीवृक्षमूलेत्वन्नाभावान्नष्टचैतन्यएषः
२७ क्षुधातृषाकर्मणायस्यवह्नीसूक्ष्मंछिद्रंकंठनालस्यचासीत् मांसचान्नःकंठमध्येनिषण्णंकुर्यात्पीडांप्राणपर्यं-
तमेव २८ जलंदृष्ट्वाकालकूटप्रकल्पंकूपशीतंवापिकासारसंस्थं तस्यास्तीरेचागतोदैवयोगाद्गंगायात्राकारणान्मार्ग-
मध्ये २९ दृष्ट्वाद्भूतंशाल्मलीवृक्षमूलेतृद्वान्तृद्वाभक्षयंतंस्वमांसम् क्रोशंतंतंबहुधाशोचमानंक्षुधातृषाव्याधितंकर्म-
भिःस्वैः ३० समांहंतुंप्राद्रवत्पापकर्मामत्तेजसानीहतोदुद्रुवेच तंचाब्रूवंकृपयाक्लिन्नचित्तोमाभैष्टत्वंत्वयभयंमे
हिदत्तम् ३१ कस्त्वंतातब्रूहिसद्योत्रहेतुंकृच्छ्रादस्मान्मोचयेमाविषीद इत्युक्तोमांप्राहपुत्रत्वजानन्सुरानर्तेभूवराख्ये
पुरेच ३२ नाम्नामैत्रःसत्कृतेगौत्रजोहंतपोविद्यादानयज्ञादिनिष्ठः मयाधीताध्यापिताःसर्वविद्याःकृतामयासर्व-
तीर्थावगाहः ३३ दत्तंनान्नंमासिवैशाखसंज्ञेलोभाद्भिक्षामात्रमप्यंगकाले शोचेचाहंप्राप्यपैशाचयोनिंनान्योहेतुः
सत्यमेवोक्तमंग ३४ पुत्रोधुनावर्ततेमद्गृहेचभूरिख्यातिःश्रुतदेवाभिधानः वाच्यातस्मैमद्दशाचात्मजायवैशाखा-
न्नादानतोऽभूत्पिशाचः ३५ दृष्टस्तीरेतेपितानर्मदायानोर्ध्वंगतोवर्ततेवृक्षमूले खादन्मांसंस्वीयमेवाचरिद्यास्तितुर्हे
कृत्येमासिवैशाखसंज्ञे ३६

त्कष्टात् माविषीदमाखेदंप्राप्नुहि सुरानर्ताख्येदेशेभूवराख्येनगरे ३२ ३३ अंगहेश्रुतदेव ३४ वैशाखे अन्नस्याप्रदानात् ३५ अनुखिद्यन् मांसंखादित्वा पश्चात्खेदंप्राप्नुवान् ३६ ७ ७ ७ ७

निर्व्याजादकपटेन अनेनसुकर्मणात्वेवमोक्ष्ये इति न अपि तुल्यमपिमोक्ष्यसइत्याह मुक्तोवैइति ३७ मत्कृते मदर्थम् दयाकर्तव्योनिशेषः अहं श्रुतदेवः ३८ कायदेहदंडवत्पातयित्वासाष्टांगप्रणिपत्येत्यर्थः निंदन्निंदन् संस्वयमेव अहंतेनवपुत्रःदैवेनइहागतः ३९ भूसुराण विनिंद्यः कर्मभ्रष्टश्चाहमस्मियतः पितॄणांक्लेशमोक्षोनाभूत् आख्याहिकथय ४० प्रीतः सर्वांतरात्मा अंतःकरणंयस्यसः ४१ सान्वयस्यस

प्रातःस्नात्वापूजयित्वाचविष्णुंनिर्व्याजान्मांतर्पयित्वाजलैश्च देयंचान्नंद्विजवर्येगुणाढ्यमुक्तोयोवैयासिविष्णोःपदंच ३७ इत्थंचोक्तंत्वत्पुरस्ताद्वदेतिदयाचैषामत्कृतेनान्यशंका भद्रंभूयात्सर्वतोमंगलंतेश्रुत्वाचाहंभाषितंमेपितुश्च ३८ दुःखात्कायंदंडवत्पातयित्वाभृशार्तोहंपादयोर्भूरिकालम् निंदन्निंदन्भूयहंबाष्पनेत्रःपुत्रोहंतेतातदैवागतोहम् ३९ कर्मभ्रष्टोभूसुराणांविनिंद्योनाभूद्यस्मात्क्लेशमोक्षःपितॄणाम् आख्याहित्वंकर्मणाकेनमुक्तोभवतावैतत्करोमिद्विजेंद्र ४० ततःप्राहप्रीतसर्वांतरात्मायात्रांकृत्वाशीघ्रमागत्यगेहम् प्राप्तेमासेमेषसंस्थेचभानौनिवेद्यान्नंविष्णवेत्वंगुणाढ्यम् ४१ दानंदेहिद्विजवर्येमहात्मंस्तस्मान्मोक्षोभवितासान्वयस्य पित्रादिष्टःकृतयात्रःस्वगेहंप्राप्याकरंमाधवेचान्नदानम् ४२ तस्मान्मुक्तोमत्पितामांसमेत्ययानारूढोत्यभिनंद्याशिषाच गतोलोकंश्रीपतेर्दुर्विभाव्यंयस्मिन्गतानतिवर्तंतिभूयः ४३ तस्माद्दानंसर्वशास्त्रेषुचोक्तंतुभ्यंप्रोक्तंधर्मसारंसुधर्म्यम् किमन्यत्तेश्रोतुमिच्छावदस्वश्रुत्वासर्वंतेवदामीतिसत्यम् ४४ इतिश्रीस्कंदपुराणेवैशाखमाहात्म्येनारदांबरीषसंवादेपिशाचमोक्षप्राप्तिर्नामसप्तमोऽध्यायः ७ ७ मैथिलउवाच ब्रह्मन्निक्ष्वाकुतनयोजलादानाच्चचातकः त्रिवारमभवत्पश्चान्मद्गृहेगोधिकातथा १

वंशस्य पित्रापिशाचरूपेणआदिष्टः कृतानुज्ञः कृतयात्रः कृतगयावर्जनादिः माधवेवैशाखेअन्नदानं अकरं अकरवं ४२ मांप्रतिसमेत्ययानारूढो विमानारूढः श्रीपतेर्लोकंवैकुंठं ४३ सुधर्म्यं सुष्टुधर्मादनपेतं ४४ इतिटीकायांसप्तमोऽध्यायः ७ ७ इक्ष्वाकुतनयः काकुत्स्थः १

अकृतात्मनः सम्यगसंपादितपुण्यकर्मणः सारमेयताश्वानयोनिः २ सप्तवारमिति यत्त्वयासप्तवारमेवमभूदितिप्रोक्तंतत्मेउचितं विश्वसनीयं नभातियतः तेनकाकुत्स्थेनसंतः साधवोनदूषिताः तथाकृपणाअपिनदूषिताः ३ अनर्थानांकरणस्याभावात्परपीडनंनभवतिअनेनतत्रकृतामितिध्वनिः ४ आत्मप्रियस्यतवप्रियस्यममेत्यर्थः ५ व्याहर्तुंवक्तुं ६ शिवायैपार्वत्यै ७ स्थितिंरक्षां आमुष्मिकां पारलौकिकीम् ऐहि-

कर्मानुगुणमेतद्धियुक्तंतस्याकृतात्मनः सतामसेवनात्तस्यगृध्रत्वंसारमेयता २ सप्तवारमितिप्रोक्तंतन्मेभातिच नोचितम् संतोनदूषितास्तेननतथाकृपणाअपि ३ तस्मादसेविनस्तस्यफलाभावोभवेद्ध्रुवम् नानर्थकरणाभावादिदंहिपरपीडनम् ४ अनिमित्तमिदंकस्मात्कुयोनित्वमवाप्तवान् तदेतंसंशयंछिंधिशिष्यस्यात्मप्रियस्यच ५ इतिराज्ञासुसंपृष्टःश्रुतदेवोमहायशाः साधुसाध्वितिसंभाष्यवचोव्याहर्तुमादधे ६ श्रुतदेवउवाच शृणुराजन्प्रवक्ष्यामियत्पृष्टंत्वयानघ शिवायैचशिवेनोक्तंकैलासशिखरेमले ७ सृष्ट्वमान्सकलान्लोकान्पश्चात्तेषामवस्थितिं आमुष्मिकींमैहिकींचद्विविधापर्यकल्पयत् ८ हेतुत्रयंचप्रत्येकंहेतुस्थित्यैमहाप्रभुः जलसेवाचान्नसेवासेवाचैवौषधस्यच ९ यन्नचैतेमहाभागास्त्वैहिकस्थितिहेतवः एवमामुष्मिकेराजन्त्रयएवेरिताःश्रुतौ १० साधुसेवाविष्णुसेवासेवाधर्मपथस्यच पुरासंपादितास्त्वेतेपरलोकस्यहेतवः ११ गृहेसंपादितंयद्वत्पाथेयंपद्गतोयथा एहिकाहेतवोराजन्सद्यःसंपादितार्थदाः १२ किंचेष्टमपिसाधूनांमनसोयदिदुस्सहं कुतश्चित्कारणाद्राजंस्तच्चानर्थायकल्पते १३

कींएतल्लोकसंबंधिनीम् पर्यकल्पयत् कृतवान् ८ ९ श्रुतौचेदेत्रयएवपूर्वंश्लोकोक्तास्त्रयोहेतवः जलसेवाअन्नसेवाऔषधसेवारूपास्त्रयोहेतवः ऐहिकस्थितावपिभवन्ति १० तथापारलौकिकस्थितावपि साधुसेवा विष्णुसेवाधर्मपथस्य धर्ममार्गस्यसेवाएते हेतवोभवंति ११ पाथेयं मार्गनिर्वाहार्थंअन्नं पद्गतो मार्गे संपादितार्थदाः आचरितार्थदाः १२ १३ ५१ ५१

१४ रोमहर्षणं यस्यश्रवणेनांगे पुलकाउद्भवंतिय ज्ञदीक्षांउपगतः यज्ञेदीक्षितः १५ भूतपतेः शंकरस्य रजताचलं कैलासं १६ छंदोग-
. वेदेपियस्यकथास्तिएवंरूपः बलिहराः करप्रदातारः १७ मासांगिकं धर्मंवदतिस्वामीति १८ १९ नीचा अधमाः प्रेष्यतां दास्यंईयुः प्रा
पुः आग्रहादतिशयप्रीत्या २० २१ मृडं शिवं प्रजापतिर्दक्षः २२ अकृतात्मनः अशिक्षितस्य २३ बहुवयोवृद्धः चर्मावशेषितः॰

अप्रियंकिमुवक्तव्यंदुःखहेतुरितिस्फुटम् अत्रैवोदाहरंतीममितिहासंपुरातनम् १४ पापघ्नंमहदाश्चर्यंशृण्वतां
रोमहर्षणाम् यज्ञदीक्षामुपगतःपुरादक्षःप्रजापतिः १५ आह्वानार्थंभूतपतेरगमद्रजताचलम् तंदृष्ट्वानोत्थितः
शंभुस्तस्यैवहितकाम्यया १६ सर्वामरगुरुश्चाहछंदोगभ्यःसनातनः भृत्याह्येतेबलिहराश्चंद्रेंद्राद्याःसुरेश्वराः १७
स्वामीभृत्यायनोत्तिष्ठेत्स्वभार्यायैपतिस्तथा गुरुःशिष्यायनोत्तिष्ठेदितिशास्त्रविदांमतम् १८ नसंबंधोगुरुत्वेचका
रणंत्वितिवैश्रुतिः बलंज्ञानंतपःशांतिर्यत्राचैवाधिकंभवेत् १९ सगुरुश्चेतरेषांत्वनीचाईयुश्चप्रेष्यतां उत्तिष्ठंतिचस्वा
म्याद्याभृत्यादीन्यदिवाग्रहात् २० आयुर्वित्तंयशस्तेषांसद्योनस्यातिसंततिः तस्मादहंतुनोत्तिष्ठेप्रियोयंश्वशुरोम
म २१ इतितस्यहितान्वेषिनोच्चचालासनाद्विभुः नोत्थितंतुमृडंदृष्ट्वाकुपितोभूत्प्रजापतिः २२ अनिंदद्बहुधातस्मै
पुरतोगिरिजापतेः अहोदर्पमहोदर्पंदरिद्रस्याकृतात्मनः २३ यस्यवित्तंबहुवयावृषश्चर्मावशेषितः अतएवकपा·
लास्थिधरःपाखंडगोचरः २४ वृथाहंकारिणोदैवंकुतोदास्यतिमंगलम्. लोकेकृत्येनकर्माणिशक्तिनीतिविदोवि
दुः २५ धत्तेदरिद्रःशीतार्तःपवित्रंचगजाजिन वेश्मश्मशानयस्यस्याद्भुजगःकिलभूषणम् २६

स्थिपंजरोवृषः इत्थंयस्यवित्तं ऐश्वर्यमिति पाखंडानांगोचरोदृश्यः नतुसरलबुद्धिनाम् २४ वृथाअहंकारिणः अस्याशिवस्यदैवं भागधेयं
मंगलंकुतोदास्यति २५ गजाजिनंगजचर्मः २६ ६२ ६२ ६२ ६२

वृकाद्वृकसदृशात् तस्माज्ज्ञानंधीरताच्चपलायिते २७ साधुसंमतः सज्जनमान्यः दुरात्मनादुष्टेननारदेन यथात्यर्थविश्रंभितः विश्वासपा
त्रीकृतः २८ पृथग्धर्मगता अन्यधर्मानुचारिणी स्वैरंस्वैरेन तद्गृहेवसतु २९ ३० नाहूयाह्वानमकृत्वा विनिर्भर्त्स्यविनिंद्य ३१ मह
प्रभुंशंकरम् ३२ ३३ स्त्रीचांचल्यात्स्त्रीनिष्ठचंचलतास्वभावात् प्रलोभितालुब्धा ३४ प्रत्युक्ताबोधिता ३५ वरवर्णिनी हेप्रिये

नधीरत्तापिचज्ञानंवृकात्तस्मात्पलायिते भूतप्रेतपिशाचादिदुर्जनैःसंगतोनिशं २७ नकुलंश्रूयतेकापिनासौ
वैसाधुसंमतः वृथाविश्रंभितःपूर्वंनारदेनदुरात्मना २८ येनाहंबोधितःप्रादांकन्यांचैतांसतीमिमां पृथग्धर्मगता·
चैषास्वैरंवसतुतद्गृहे २९ नास्माभिःश्लाघनीयोसौमत्कृतापिकथंचन यथाकुलालकलशश्चांडालस्यवशंगतः ३०
इतिदक्षोविमूढात्मात्युमानाहूयतंमृडम् बहुधातंविनिर्भर्त्स्यतूष्णीमेवगृहंययौ ३१ यज्ञवाटंततोगत्वाऋत्विग्भि
र्मुनिभिःसह इजेयज्ञविधानेननिमन्त्र्यैवमहाप्रभुम् ३२ ब्रह्माविष्णुविहायैवसर्वेदेवाःसमागताः सिद्धचारणगंध
र्वयक्षराक्षसाकिन्नराः ३३ तदादेवीसतीपुण्यास्त्रीचांचल्यात्प्रलोभिता उत्सुकाचोत्सवंद्रष्टुंबंधूंस्तत्रसमागतान्
३४ निवार्यमाणारुद्रेणतरलास्त्रीस्वभावतः प्रत्युक्तापिपुनश्चैवगंतव्यमितिनिश्चिता ३५ सानंदीतिसभामध्येसदा
मावरवर्णिनि तत्रासत्यंचत्वंतुलाकायंसत्यंजहास्यसि ३६ असत्यमपिसोढव्यंमयापिगृहमिच्छता मयायथा
कृतंदेवितथात्वंनैववर्तसे ३७ तस्मान्मागच्छशालांवैनशक्यंतुभवद्भवम् इत्येवंबोधितादेवीचापल्यात्पुनरागमत्
३८ निश्चक्रामसतीगेहादेकाकीपादचारिणी तांदृष्ट्वावृषभस्तूष्णींपृष्ठेदेवीमुवाहसः ३९ कोटिशोभूतसंघाश्चत्वनुज
ग्मुःसतीतदा यज्ञवाटंतुसागत्वापत्नीशालांययौपुरा ४०

असत्यंतन्नदुःसहंतंप्रकारंकायंजहास्यतिमरिष्यसि ३६ ३७ शालां-
यज्ञशालांमागच्छगमनंमाकुरु ३८ सतीएकाकीपादचारिणीचभूत्वा गृहान्निश्चक्रामनिर्गतवती तांनिर्गच्छंतींदृष्ट्वावृषभः तूष्णींएवपृष्ठेउवाह
३९ ४०

सतींदृष्ट्वा खेदात्तूष्णींमासान् सर्वायज्ञवाटस्थास्तत्संबंधिन्यः स्वस्त्रादयइतिशेषः ४१ हताशिषः अदत्ताशीर्वचनाः ४२ रुदंत्यस्त्रारुद्राह्रतिंवि मासस्त·४
हायजुह्वंतंपितरंदृष्ट्वाश्रुभिराकुलेईक्षणेयस्याःसासतीउवाच ४३ हविर्हविर्भागः ४४ नेतव्जाताद्दुर्बुद्धिंअन्येसमागताइमेऋत्विजः नहरंतिकिं ५२ ·मा०
विधिर्दैवं ४५ हतश्मश्रुः अमंगलः ४६ स्फालनंताडनंपरेसभासदः नत्सितादक्षः ४७ श्रुतेःभर्तृनिंदाश्रवणस्यप्रायश्चित्तंकर्तुं देहंहोमा- अ०८

तूष्णीमासंसतींदृष्ट्वाखेदात्तस्माद्विनिर्गता पतिवाक्यंतुसंस्मृत्यजगामोत्तरवेदिकां ४१ पितासभ्याश्चतांदृष्ट्वास्थि
तास्तूष्णींहताशिषः सारुद्राह्रतिंपर्यंतंपश्यतीपितृचेष्टितम् ४२ त्यक्त्वारुद्रंचजुह्वतमुवाचाश्रुकुलेक्षणा दक्षमु
वाच महद्दुर्लभधनंपुंसांनप्रायःश्रेयसेभवेत् ४३ लोककर्तालोकभर्तासर्वेषांप्रभुरव्ययः एवंभूतस्यरुद्रस्यकथंनो
दीयतेहविः ४४ जातानकिंतेदुर्बुद्धिंहरंत्यन्येसमागताः नत्वेदृशामहात्मानःकिमेषांविमुखोविधिः ४५ इत्येवंभा·
षमाणांतांपूषादेवोजहासह श्मश्रूणाचालनंचक्रेभृगुर्हतश्मश्रुस्तथा ४६ भुजपादोरुकक्षाणांफालनंचक्रिरेपरे ब
हुधानिंदनंचक्रेतत्सिताहतभाग्यवान् ४७ तच्छ्रुत्वारुद्रभार्यासाकोपाकुलितमानसा प्रायश्चित्तंश्रुतेःकर्तुंदेहंत
त्याजसासती ४८ होमाग्नौवेदिकामध्येसर्वेषामेवपश्यताम् हाहाकारोमहानासीद्दुद्रुवुःप्रमथाद्भुतम् ४९ आच-
ख्युर्देवदेवायवृत्तान्तमखिलंतदा तच्छ्रुत्वासहसोत्थायरुद्रःकालांतकोपमः ५० जटांमुत्पाट्यहस्तेनभूतलेताडयत्
ततोभवन्महाकायोवीरभद्रोमहाबलः ५१ सहस्रबाहुरभवत्कालांतकसमप्रभः बद्धांजलिपुटोभूत्वाव्या
जहारहरंतदा ५२ मत्सृष्टिस्तुयदर्थंतेतदर्थंमानियोजय इत्युक्तःप्राहतंक्रुद्धोधूर्जटिस्त्वंपुरःस्थित ५३

ग्नौतत्याज ४८ दुद्रुवुःपलायांचक्रिरे ४९ देवदेवायमहेश्वरायआचख्युः कथयांबभूवुः ५० तांजटां ततोजटाताडनात् ५१ कालांत १८
कसमाप्रभायस्यसः ५२ मत्सृष्टिःममोत्पादनं मामांनियोजयाज्ञापय ५३ ध ध ध

हन्मारय मत्प्रियासति एतेनवीरभद्रेणसहगच्छंतु ५४ ५५ जटाभृद्वीरभद्रः ५६ यद्यदंगंपूर्वंयेनयेनताडितंतत्तच्चिच्छेद ५७
मुनीनांमंत्रैः प्रगुप्तमभिरक्षितंतत् दक्षशिरः बलादपिनकृंतति ५८ ५९ ६० तेनैवब्रह्मणैवसह ६१ ६२ दत्तान्विनै

हनत्वंनिंदकंदक्षंयदर्थेमत्प्रियाहता भूतसंघास्तुगच्छंतुसहैतेनमहाबलाः ५४ इत्यादिष्टाभगवताययुर्यज्ञसभांत
दा जघ्नुःसर्वान्महावीरान्देवासुरनरादिकान् ५५ पूष्णश्चहसतोदंतान्जटाभूस्त्वबभंजह श्मश्रूण्युत्पाटयाचक्रे
भृगोस्तस्यदुरात्मनः ५६ यद्यदास्फालितंपूर्वंतत्तच्चिच्छेदवीर्यवान् ततोदक्षशिरोहर्तुंबहूद्योगंचकारह ५७ मुनि
मंत्रप्रगुप्तंतुनैवकृंततितद्बलात् हरोज्ञात्वातुचिच्छेदस्वयमेत्यदुरात्मनः ५८ एवमस्वगतान्हत्वासानुगःस्वाल·
यंययौ हतावशिष्टाःकेचित्तुब्रह्माणंशरणंययुः ५९ तैरन्वितोययौब्रह्माकैलासंतुशिवालयम् ततोरुद्रंसांत्वयि
त्वावचोभिर्विविधैरपि ६० तेनैवसहितःप्रागाद्यज्ञवाटंमहाप्रभुः तेनैवोज्जीवयामाससर्वान्यज्ञसभागतान् ६१
रव्यात्यैप्रादादजमुखंदक्षस्यतुतदाशिवः अजश्मश्रूण्यदाच्छंभुर्भृगवेतुमहात्मने ६२ पूष्णश्चदंतान्प्रादात्पिष्टाद·
चचकारह तदंगानांव्यतिकरंकृपाचिदपिवै शिवः ६३ शिवमापुश्चतेसर्वेब्रह्मणाचशिवेनच पुनःप्रवर्तितोयज्ञोयथा
पूर्वंमहात्मनः ६४ यज्ञान्तेसर्वदेवाश्चजग्मुस्तेस्वंस्वमालयं नैष्ठिकंब्रह्मचर्यंतुकृत्वारुद्रोमहातपाः ६५ तेपेगंगात
टेरुद्रःपुन्नागतरुमूलगः दक्षात्मजासतीदेवीत्यक्तदेहापतिव्रता ६६ जज्ञेहिमाद्रेर्मेनक्यांववृधेतस्यवेश्मनि एत
स्मिन्नेवकालेतुतारकाख्योमहासुरः ६७ सतीव्रतपसाराध्यब्रह्माणंपरमेष्ठिनं अवध्यत्ववरंवव्रेदेवासुरनरोरगैः ६८

वपिष्टभक्षणशक्तिंचकार व्यतिकरं अंगवैकल्यंसमीचकारेतिशेषः ६३ शिवंकल्याणं ६४ नैष्ठिकंतीव्रं ६५ गंगातटेमायापुरीसमीपवर्तिगं
गातीरे ६६ हिमाद्रेर्हिमालयान्मेनक्यांनामतस्तस्यांजातासतीववृधे ६७ ६८ ६९ ७० ७१

रुद्रपुत्रंभविष्यमाणंस्कंदं ६९ ७० लोकबाधनप्रकारमाह दासाइति देव्योदेवपत्न्यः ७१ वेधाब्रह्मा ७२ तस्मैतारकासुराय ७३
सत्रेदक्षयज्ञे त्यक्तकलेवराकृतदेहत्यागा ७४ योजयध्वंपार्वत्यासह संयोजनंकुरुत ७५ धिषणेनबृहस्पतिनासंमंत्र्यविचारंकृत्वापाकशास

आयुधैरस्त्रसंघैश्चसर्वैरेवमहाबलैः रुद्रपुत्रंविनादैत्योह्यवध्यः सकलैरपि ६९ इतितस्मैवरंप्रादाद्ब्रह्मालोकपिता
महः अस्त्रीकत्वादपुत्रत्वाद्रुद्रस्येतितथास्त्विति ७० वरंगृहीत्वास्वगृहंप्राप्यलोकान्बबाधह दासादेवामार्जनादौदा
स्योदेव्यश्चतद्गृहे ७१ ततस्तत्पीडितादेवाब्रह्माणंशरणंययुः तैःपीडांवर्णितांश्रुत्वावेधाःप्राहसुरानिदम् ७२ वरप्र
दानकालेहरुद्रपुत्रंविनासुराः नान्यैर्वध्यइतिप्रादांवरंतस्मैदुरात्मने ७३ पुरासतीरुद्रपत्नीसत्रेत्यक्तकलेवरा जाता
हिमवतःपुत्रीपार्वतीतिचयांविदुः ७४ रुद्रोहिमवतःपृष्ठेतपश्चरतिदुश्चरं योजयध्वंचपार्वत्यारुद्रंलोकेश्वरंप्रभुं ७५
पुनर्देवेंद्रसदनेसंगतैरमरेश्वरैः धिषणेनापिसंमंत्र्यदेवेंद्रःपाकशासनः ७६ सस्मारचसकार्यार्थेनारदंस्मरमेवच त
त्रागतौततस्तौतुबलभिद्वाक्यमब्रवीत् ७७ हिमवंतंभवान्गत्वावचसातंनिबोधय पुत्रीतवप्राग्दक्षस्यहरपत्नीसु
तासती ७८ तपश्चरतितेशृंगेवियुक्तादशकन्यया मृडस्तस्यसपर्यायेविनियोजयतत्प्रियां ७९ तस्यैवपत्नीभविता-
सएवभवितापतिः इत्यादिष्टोमघोनाचनारदोपेत्यतंगिरिम् ८० तथैवकारयामासदेवेंद्रेणोदितंयथा पश्चात्कामंसमा
हूयमघवानिदमाहच ८१ देवानांचहितार्थायतथामृडहितायच वसंतेनसमायुक्तोगत्वारुद्रतपोवनं ८२ गुणान्वि
जृंभयित्वातुवासंतान्हृच्छयावहान् यदासन्निहितादेविपार्वतीतुमृडस्यच ८३

नः देवेंद्रइंद्रः ७६ स्मरन्मदनं बलिभिदिंद्रः ७७
तत्दक्षयज्ञवृत्तांतं ७८ दशकन्ययादशभिःकन्याभिःसहवियुक्तहरेणसहजातविरहातवकन्यामृडः शिवश्चतवशृंगेदुश्चरतीत्युभयत्रापिसंबध्यते वि-
नियोजयदेहि ७९ मघोनाइंद्रेणनारदःउपहासंधिराष्टः ८० ८१ ८२ वासंतान्वसंतर्तुसंबंधिनोहृच्छयावहान्मदनोद्दीपकान्गुणान्विजृंभयि
त्वाप्रकाशयित्वा ८३

नोस्माकंकार्यं अद्धा प्रत्यक्षंनदैवेत्यर्थः ८४ आदिष्ट आज्ञापितः स्मरः कामः बाढमितिस्वीकारार्थेऽव्ययम् तूर्णंझटितिप्रतस्थेसानुगःरंभादिगण
समन्वितः सहनंरुद्रतपोवनं ८५ ८६ स्वांकंसमारोप्यपार्वतीमितिशेषः व्याहर्तुंवक्तुं ८७ समदनःप्राणप्रियासंगमस्य पार्वतीसमागमस्य अयंका
लइतिनिश्चितोजातनिश्चितः सन्पेशलं अतिचपलं ८८ दृक्सज वनिकांआच्छादकंकृत्वा ८९ कश्मलीकृतंकष्टीकृतं ९० क्रुद्धः ललाटाक्षं भाल

तदाप्रयुज्यत्वंबाणान्मोहयस्वमहाप्रभुं तयोस्तसंगमेजातेकार्यंनोऽद्धाभविष्यति ८४ इत्यादिष्टःस्मरस्तूर्णंप्रतस्थेबा
ढमित्यथ सवसंतःसरतिकःसानुगस्तद्वनंययौ ८५ अकालेतुवसंतर्तुंजृंभयित्वास्वशक्तितः तद्वनेसर्वतोरम्येमंदानि
लेनिषेविते ८६ कदाचिद्देवदेवोपिपार्वत्याश्चसपर्यया प्रीतःस्वांकंसमारोप्यकिंचिद्व्याहर्तुमारभत् ८७ प्राणप्रियासंग
मस्यकालोयमितिनिश्चितः पेशलंधनुरादायसतस्थौहरपृष्ठतः ८८ कृत्वाजवनिकांवृक्षंबाणमेकंमुमोचह द्वितीयमपि
संधायचक्रेमोक्तुंमहोद्यमम् ८९ अथक्षुब्धमनाभूत्वामृडश्चिंतामवापह नमेमनश्चलेत्क्वापिकेनवाकश्मलीकृतं ९०
इतिचिंताकुलोवामेपार्श्वेकामददर्शह क्रुद्धान्मील्यललाटाक्षंस्वांकाद्देवीमपास्यच ९१ तस्याक्ष्णःसमभूद्वह्निस्तीक्ष्णो
लोकविभीषणः तेनदग्धोभवत्सद्योमन्मथःसशरासनः ९२ कार्यसिद्धिंचपश्यंतोदुद्रुवुश्चामरादिवं शंकमानोस्वदंडंच
वसंतोरतिरेवच ९३ निमील्यलोचनेभीतादेवीदूरंप्रदुद्रुवे सान्निधानास्त्रियोहर्तुंमृडोप्यंतरधीयत ९४ रुद्रस्येष्टप्रकु
र्वाणोदेवश्चमनसोहितं लेभेनर्थमनिर्वृत्तंविप्रियंकुर्वतस्तुकिं ९५ तस्मादिक्ष्वाकुतनयःसाधूनामप्रियःसदा तस्मा
दात्महितांसेवांनाकरोन्मदधीःसतां ९६ अनुभूतमहद्दुःखंतस्माद्दुर्योनिरेवच तस्मात्कुर्यात्तुसाधूनांसेवांसर्वार्थसाधिनीं
९७

स्यवह्निनेत्रंउन्मील्य संधिरार्षः मपास्यत्यक्त्वा ९१ सशरासनःसधनुष्कः ९२ दुद्रुवुःपलायांचक्रुः दिवंस्वर्गं रतिःकामपत्नी ९३ देवीपार्वती
९४ देवइंद्रःमनसोहितं हितायरुद्रस्यइष्टंप्रियंकुर्वाणः सन्नर्थंलेभे तत् विप्रियंअनिष्टंकुर्वाणः अनर्थंनलभेतकिम् ९५ ९६ ९७

अप्रियकारित्वादनिष्टकरणात् भाविनि भविष्यमाणे १८ १९ इतिटीकायामष्टमोऽध्यायः ८ छ कस्मात्पुरुषात् तस्मिन्जन्मनि क
ः सहलंघनात् रुद्रदेवापकारकरणात् १ कुमारजन्मस्कंदजन्म २ तत्पत्नीकामपत्नी ३ भस्मावशेषितंपतिंपुरतोदृष्ट्वा मुमोह मुमूर्छा·
मुहूर्तेनघटिद्वयावच्छिन्नसमयेन संजातसंज्ञालब्धचेतनाचित्रधा अनेकप्रकारेणाविललाप विलापंकृतवती ४ तच्चित्तग्नो कामचिंताग्नो त्य·

रुद्रस्याप्रियकारित्वात्स्मरोभाविनिजन्मनि दुःखंतुबहुलंलेभेजन्मकालेमहाप्रभुः १८ इतिहासमिमंपुण्यंयेशृ
ण्वंतिदिवानिशं जन्ममृत्युजरादिभ्योमुच्यतेनात्रसंशयः १९ इतिश्रीस्कंदपुराणेवैशाखमाहात्म्येनारदां
बरीषसंवादेकामदहनोनामअष्टमोऽध्यायः ८ छ मैथिलउवाच तस्यदग्धस्यकामस्यकस्माज्ज·
न्माभवद्विभो किंदुःखमभवत्तस्मिन्कर्मणःसहलंघनात् १ एतदाचक्ष्वमेब्रह्मन्श्रोतुंकौतूहलंहिमे श्रु
तदेवउवाच कुमारजन्मवक्ष्यामिश्रवणात्पापनाशनम् २ यशस्यंपुत्रदंधर्म्यंसर्वरोगविनाशनम् शंभुनातु
हतेकामेतत्पत्नीरतिसंज्ञका ३ मुमोहपुरतोदृष्ट्वापतिंभस्मावशेषितम् जातसंज्ञामुहूर्तेनविललापचचित्रधा ४
याहिलापाहत्वंचापिसमदुःखमभूत्तदा तच्चिंताग्नोस्त्वकार्यंतुत्यक्तुकामात्रमाधवं ५ पत्युःसखायंसस्मारकर्तुंतात्का·
लिकींक्रियाम् सआगतास्थितिंकर्तुंवीरपत्न्यामहाप्रभुः ६ सतुत्रस्तःसखींदृष्ट्वाक्षणंमूर्छापरोभवत् रतिंतुसांत्व
यामाससांत्वैर्बहुविधैरपि ७ पुत्रतुल्योसिमेभद्रास्थितेमयिचनार्हसि कायंत्यक्तुंधर्महेतुर्मित्याद्यैर्बहुधापिसा ८
नैवस्थातुंमनश्चक्रेतेनसंस्तंभितारतिः दृष्ट्वादार्ढ्यंवसंतोपिचिंतांचक्रेसरित्तटे ९

क्तुकामामोक्तुकामा माधवं वसंतं ५ तात्कालिकींचिंताविरचनादिरूपांक्रियांकर्तुंसस्मारस्मृतवती वीरपत्न्याः वीरस्यमदनस्यपत्न्याःरत्याः ६
त्रस्तः खिन्नः सांत्वैः शांतिवचनैः ७ धर्महेतुधर्मकारणीभूतं ८ संस्तंभिताकृतप्रतिरोधा ९ छ छ छ

द्यूनद्यांभागीरथ्यामवगाह्यस्नानंकृत्वाकार्याणिशवपिंडप्रदानादीनि १० अशरीरिणावागाकाशवाणी ११ हराच्छंकरात् यादवाद्यादवरूपधारिणोविष्णोश्चसकाशात्तेपत्युर्जन्मद्वयंभविष्यति १२ भैष्म्यांरुक्मिण्यांत्वंचब्रह्मणःशापाच्छंबरालयेवसिष्यसि १३ १४ मरणेकृतनिश्चयारतिः तांआकाशवाणींश्रुत्वा निवृत्ताभूत् स्वार्थेस्वकार्यायकामेहतेमृतेसतिहरात्सकाशात् समाजग्मुः स्वंस्वमालयमितिशेषः १५ १६

सावगाह्यद्युनद्यांचकृत्वाकार्याणिसर्वशः सन्नियम्येंद्रियग्रामंनिवेश्यात्मनिवैमनः १० चितिमारोढुमारेभेततोजाताशरीरवाक् माप्रवेशयकल्याणीवन्हिंपतिपरायणा ११ भविष्यतिचतेपत्युर्हराद्विष्णोश्चयादवात् जन्मद्वयंक्रमेणैवतत्रचोत्तरजन्मनि १२ भैष्म्यांकृष्णान्महाविष्णोःप्रद्युम्नाख्योभविष्यति वसिष्यसित्वंचशापाद्ब्रह्मणःशंबरालये १३ प्रद्युम्नाख्येनतेपत्यासंगतिश्चभविष्यति इत्युक्त्वाविररामाथवाणीचाकाशगोचरा १४ श्रुत्वातातुनिवृत्ताभून्मरणेकृतनिश्चया ततोदेवासमाजग्मुःस्वार्थेकामेहतेहरात् १५ रत्याहृष्टंप्रकुर्वाणागुर्विंद्राग्निपुरोगमाः तांतेनिवर्तयामासुर्वेरणमहतासतीं १६ अनंगोपिभवेत्सांगोमृतएवाक्षिगोभवेत् इतितांतुविनिर्वत्स्यधर्मंचोपदिदेशिरे १७ पूर्वकल्पेत्वयराजास्कंदराख्योमहाप्रभुः त्वमेवपत्नीतस्यापिरजःसेकरकारिणी १८ तेनपंचदशाभूतेकुर्वीदानींचनिष्कृतीं मंदाकिन्यांतुवैशाखेप्रातःस्नानंनदाकुरु १९ मधुसूदनमभ्यर्च्यकथांदिव्यांतथाशृणु अशून्यशयनंनामव्रतमारभभामिनी २० धर्मेणानेनतेभद्रेव्रतेनापिचमाधवे नूनंतेभावितापत्युरुपलब्धिर्नसंशयः २१ इतितस्यैवरंदत्वादेवाजग्मुर्यथागताः तयाकृच्छ्रान्निवृत्तासादेवीकामसतीतया २२ गंगावगाहनंचक्रेमेषसंस्थेदिवाकरे अशून्यशयननामव्रतंचापिमहामनाः २३

अनंगोपि भस्मीभूतांगोपि १७ रतिदोषमाविष्कुर्वंति पूर्वकल्पइति १८ निष्कृतिंप्रायश्चित्तं १९ २० उपलब्धिः प्राप्तिर्भविताभविष्यसि २१ २२ दिवाकरेसूर्ये मेषसंस्थेवैशाखमासे इत्यर्थः २३

अवार्य वीर्यवान् अनुल्लंघ्यपराक्रमः २४ कामदोषमाविष्करोति पूर्वकल्पइतितेनकारणेन २५ प्रपेदेप्राप· परमात्मनः पुत्रोऽपिइत्यनेन वैशाखधर्माणामत्याधिक्यंप्रदर्शितं २६ गिरिकन्यकापार्वती निराशाहतेच्छा २७ दोर्भ्यांबाहुभ्यां परिरभ्यालिंग्य २८ तन्निष्ठमानसा शिवनिमग्नांतःकरणा २९ गंगायाउपकूलंतीरसमीपे धृतव्रता कृतव्रतनिश्चया पित्राहिमालयेन निवारितापि पार्वतीतपस्तप्तुंआपेदेप्राप ३०

तेनपुण्यप्रभावेनसद्यःकामोऽक्षिगोचरः अभूत्तस्यैमहाराज लोकेचावार्यवीर्यवान् २४ पूर्वकल्पेप्ययमपिराज्ञा
धर्मपरायणः वैशाखोक्तान्महाधर्मान्नाकरोत्तेनवैस्मरः २५ देहहानिंप्रपेदेसोपुत्रोपिपरमात्मनः वृथानीतेतुवै-
शाखेमेषसंस्थेदिवाकरे २६ अवस्थेयंचदेवानांमनुष्याणांतुकाकथा त्र्यंबकेंतर्हितेपश्चान्निराशागिरिकन्यका २७
तूष्णींस्थितांतदाभ्रांतांतान्दृष्ट्वाहिमवान्गिरिः चकितःस्वगृहंनिन्येदोर्भ्यांतांपरिरभ्यच २८ रूपौदार्यगुणान्
दृष्ट्वाहरस्यैवमहात्मनः सएवमेपतिर्भूयादितितन्निष्ठमानसा २९ गंगोपकूलमापदेतपस्तप्तुंधृतव्रता निवा-
रितापिसादेवीपित्रामात्रास्वकेजनैः ३० अर्चयंतीमहालिंगंनिराहाराजटाधरा दिव्यवर्षसहस्रांतेप्रत्यक्षोभू-
न्महेश्वरः ३१ भूत्वावर्ण्यपिसायान्हेपर्णशालामुखेविभुः स्वनिष्ठमनसोदार्ढ्यंवाक्यैर्नानाविधैरपि ३२ ज्ञात्वा
वरादरंभद्रंवरयेतिमहाप्रभुः सावव्रेथपतिंरुद्रंत्वंभवेतिवरानना ३३ सतथेववरंदत्वाऋषीन्सस्मारसप्तच आ-
जग्मुस्तेपिमुनयःस्थिताःप्रांजलयःपुरः ३४

जटाधरा अनेनतापसीवृत्तिरुद्दीरिता नतुअचतावल्कंशसंस्कारोपभोगवती महालिंगंअर्चयंतीपूजयंती आसीदितिशेषः उत्तरार्द्धंचतत्-इतिशेषः ३१ वर्णीब्रह्मचारी पर्णशालामुखेगत्वेतिशेषः विभुः शंभुः पार्वत्याइतिशेषः तस्मिन्नात्मनिशिवएवेत्यर्थः निष्ठाएकांतास्थितिर्यस्य तच्चतन्मनश्चदार्ढ्यं दृढतांनानाविधैरपिव्यस्तापव्यस्तैरपिवाक्यैर्ज्ञात्वा ३२ वराननापार्वतीरुद्रंप्रतित्वंपतिर्भवइतिवरंवव्रे ३३ ३४

कन्यांप्रष्टुं कन्याकस्मैदीयतेइतिविचारयितुं ३५ विहायसाआकाशमार्गेण प्रत्युज्जगामाभिमुखंगतवान् ३६ ३७ कृत्यंकर्तव्यंकार्यम्
३८ ३९ नेतवसदृशंयोग्यंमहत्वयोग्यमित्यर्थः तेतवमहोदये महोत्कर्षाय ४० ४१ अस्यास्तवकन्यायाः दक्षः समर्थः अनंत्य

ऋषीणांज्ञापयामासकन्यांप्रष्टुंहिमालयम् तथादिष्टाभगवताकन्यार्थेहिमवद्गृहं ३५ प्रापुर्विहायसासर्वेद्योतयं
तोदिशोदश प्रत्युज्जगामसगिरिःसमेतान्ब्रह्मवित्तमान् ३६ संपूज्यविधिवत्सर्वान्सुखासीनानपृच्छत धन्योऽस्मि
कृतकृत्योस्मियद्भवतोगृहागताः ३७ भवदागमनंमन्येममजन्मफलत्विति नकृत्यंविद्यतेस्माभिःपूर्णार्थानांमहात्म
नाम् ३८ तथापिब्रूतकार्यंवोयत्कर्तव्यंमयाधुना इत्युक्तास्तेतथाप्रोचुर्हिमवंतंमहागिरिम् ३९ त्वयास्त्वसदृशंवा
क्यमुक्तंगिरिपतेदृढम् अस्मदागमनेहेतुंवक्ष्यामस्तेमहोदये ४० कन्यातेपार्वतीनामपूर्वंदक्षात्मजासती जा
तानवकुमारीयायज्ञेत्यक्तकलेवरा ४१ अस्याःपाणिग्रहेदक्षःशंभुर्नान्योजगत्त्रये देयासाशंभवेदेवीभवतानं
त्यमिच्छता ४२ पूर्वजन्मसहस्रेषुभवतासुकृतंकृत इदानींतवदिष्ट्यातुपरिपाकमुपागतम् ४३ तेषांतद्वचनंश्रु
त्वासंहृष्टात्मामहागिरिः व्याजहारपुनर्वाक्यंपुत्रीवल्कलधारिणी ४४ गंगातीरेनिराहारातपस्तपतिदुश्चरम्
कांक्षमाणापतिंशंभुंतस्याइष्टमिदंत्विति ४५ दत्ताकन्यामयातस्मैत्र्यंबकायमहात्मने शीघ्रंगत्वाभवंतस्तुपत्रंशं
भुर्महाप्रभुः ४६ प्रीत्याहिमवतादत्तांगृहाणेतिनिवेद्यच भवंतएवकुर्वंतुचेतद्वैवाहिकींक्रियाम् ४७ इत्युक्तास्तेहि
मवतानमामन्त्र्याशिवंययुः लक्ष्म्याद्यायोषितःसर्वाविघ्नवाद्यादेवताश्चापि ४८ षण्मातरोथमुनयोद्रष्टुंजग्मुर्महोत्स
वम् शिवःसर्वामरगणैर्मुनिभिर्मातृभिस्तथा ४९

अनंतपुण्यफलं दिष्ट्याभाग्यवशात् परिपाकं पूर्णावस्थाम् ४३ हिमवतोपितदेवे
ष्टंकन्यायाअपितदेवेष्टमितिहिमवांस्तदेववर्णयतितेषामिति ४४ ४५ ४६ ४७ ४८ षण्मातरः ब्राह्मीकौमारीवैष्णवीवाराहीइंद्राणी
चामुंडाकृत्तिकादयोपिवा ४९

५० ब्रह्मघोषैः स्वस्तिनइंद्रइत्यादिमंगलाशासकवेदमंत्रघोषैः ५१ त्रिलोक्यांप्राणिनांमहोत्सवश्चासीत् हेनृपमैथिल ५२ लोकशंकरोलो
कहितकरः लोकधर्मानुद्यानक्रीडादिरूपान् अनुव्रतोअनुसृतः ५३ नंदिनीतीरे नंदिनीनदीतटे वनराजिषूद्यानपंक्तिषु ५४ मत्तभ्रमरकोकिला
शिखंडिशब्दसंशोभिते ५५ तस्मिन्कालेशिवपार्वतीविवाहसमये स्त्रीणांयावत्स्त्रीत्वजात्यवच्छिन्नानांइंद्रस्यगर्भधारणेवराभावात्-

अन्वितोवृषभारूढःप्रमथानांगणैर्वृतः भेरीशंखमृदंगाद्यैःकाहलीपटहादिकैः ५० ब्रह्मघोषैर्बंदिभिश्चप्राविश-
द्धिमवत्पुरीम् शुभमुहूर्तेशुभेलग्नेशुभग्रहनिरीक्षिते ५१ विवाहमकरोच्छैलःप्रहृष्टेनांतरात्मना महोत्सवस्तदा
चासीत्त्रिलोक्यांप्राणिनान्नृप ५२ महोत्सवेनिवृत्तेतुशंकरोलोकशंकरः रेमेस्वच्छंदयादेव्यालोकधर्मानुव्रतः ५३
ऋद्धिमद्धिमवद्गेहेदेवेंद्रभवनोपमे शर्वर्यानंदिनीतीरेवनराजिषुशंकरः ५४ मत्तालिद्विजसन्नादमयूररवमंडिते
दिव्यवर्षसहस्राणिरेमेस्वच्छंदयाविभुः ५५ स्त्रीणामिंद्रवराभावात्तस्मिन्कालेनृपोत्तम पुंसःसंगात्पुनर्गर्भोनारी
णास्रवतिध्रुवम् ५६ प्रत्यहंरमणाद्देव्यानाभूद्गर्भोहराद्भुतः देवानामभवच्चिंतापुत्रलाभाद्धराद्विभो ५७ सर्वसंग
त्यसंमंत्र्यमिथएवंबभाषिरे कामीवाभूद्यतोनित्यंसक्तोदेव्याहरःस्वराट् ५८ नास्माकंसिद्ध्यतेकार्यंनित्यंगर्भस्य-
संस्रवात् पुनारतिर्यथानाभूत्तथास्माभिर्विधीयतां ५९ मिथएवंतुसंभाष्यव्यचिन्वन्क्षणमत्रते अग्निंकृत्वाविनि
श्चित्यत्युत्तुमानपुरःसरम् ६० त्वंमुखोग्नेहिदेवानांत्वंबंधुर्गतिरेवच इदानीमपिगच्छत्वंरमतेयत्रवैहरः ६१

पुनःद्वितीयमैथुनसमयेस्त्रीणांपूर्वगर्भःस्रवति अस्रवित् ५६ अतोहेतोः शंकरस्यपार्वत्यासहप्रत्यहंरमणात्पूर्वगर्भनाशोऽभव-
तेनहरात्पार्वत्यांगर्भोनाभून्नववृधे ५७ रतोस्करतेकामीइव अत्यंतकामुकइव देव्यासहसक्तोऽभूत् ५८ ५९ व्यचि-
कार्यदक्षंशोधयामासुः ६० ६१ ६२ ६२ ६२ ६२

२२

सुरतांते पुनःयथारतिर्नभवेत् अन्यपुरुषदर्शनेनलज्जयासुरतप्रवृत्त्यवष्टंभसंभवात् ६२ स्मरांतकंशिवम् तत्वसंप्रश्नव्याजेन तत्वविचारमिषेण ६३ ओमितिस्वीकारार्थेनिपातः ६४ वीर्योत्सर्गाच्छुक्रनिर्मोकादादावेवरतांतरे सुरतमध्ये विवस्त्रा नग्नाविमनाःखिन्नाययौ अंतः
ुरंययौ ६५ अविसृष्टंपार्वतीयोनौननिक्षिप्तम् ६६ त्वयाकारणभूतेन ६७ तदुल्बणं अतिजाज्वल्यमानंशिवस्यवीर्यंउदरेधृत्वादस्य

स्त्यंतेदर्शयात्मानंपुनारतिर्यथानवै त्वांदृष्ट्वाव्रीडितादेवीतत्क्ष्णापसरेद्ध्रुवम् ६२ शिष्योभूत्वातुरत्यंतेपृच्छतत्वंस्मरांतकम् तत्वसंप्रश्नव्याजेनकालंबहुनयप्रभो ६३ बहुकालेगतेदेवीकुमारंप्रसविष्यति देवैरेवंप्रार्थितोग्निरोमित्युक्त्वाहरंययौ ६४ वीर्योत्सर्गात्पूर्वमेवगतोवन्हीरतांतरे तद्दृष्ट्वाव्रीडितादेवीविवस्त्राविमनाययौ ६५ रतिंविहायत्वरयाततोरुद्रोतिकोपितः वन्हिमाहगृहाणेदमविसृष्टंतुदुर्मते ६६ मद्वीर्यंदुःसहंपापरतौविघ्नस्त्वयाभवत् उत्सृजामिचमद्वीर्यंत्वन्मुखेहव्यवाहन ६७ इत्युक्त्वोत्सृष्टवान्वीर्यंहव्यवाहमुखेहरः तद्धृत्वादह्यमानःसन्स्वोदरेवीर्यमुल्बणम् ६८ चिंतयानोययौधामदेवानांयज्ञपूरुषः कथंचित्प्राणतोमुक्तोदेवेभ्यस्तन्न्यवेदयत् ६९ देवावन्हीरितंश्रुत्वाहर्षशोकौसमाययुः स्थितंवीर्यमितिह्लादंकथंतुप्रसवोभवेत् ७० इतिदुःखंतदाचासीद्वन्हेःकुक्षौतुशांभवम् ववृधेतेजआक्षिप्तदशमासागतास्तदा ७१ नापश्यत्प्रसवोपायंबहुदुःखपरायणः देवान्वैशरणंप्रापगर्भमोचनहेतवे ७२ तेदेवावन्हिनासाकंप्रापुर्गंगांयशस्विनीम् गंगांस्तोत्रेणतेस्तुत्याप्रार्थयामासुरंजसा ७३ त्वमातासर्वदेवानांत्वमेवजगतांपतिः देवतार्थंतुत्वंभद्रेधत्स्वतेजस्तुशांभवम् ७४

मानोग्निः ६८ देवानांधामस्वर्गंययौ ६९ वन्हीरितमग्निवाक्यम् हर्षशोकौ शिवसुतोभविष्यतीतिहर्षं अग्नेस्तापोभवतीतिदुःखम् तदेवाहस्थितमिति ७० शिवेनआक्षिप्तंतेजःशुक्रम् ७१ ७२ गंगांभागीरथींस्तोत्रेणभववर्णनेनस्तुत्यास्वकार्यप्रार्थनया ७३ पतिःपालनकर्त्री
धत्स्वधारय ७४

एनंवन्हिं समुद्धरपरिपालय ७५ प्राहुरुपदिदिशुः ७६ भास्वल्लोकस्कंदुःसहं तेजस्विनामप्यसह्यतेजस्कं ७७ सागंगाकतिचिन्मासांस्तद्वीर्य
मूर्द्धांधारयित्वा तत्प्रभावेणशिववीर्यप्रभावेणनिर्जलावीर्यस्यात्युल्बणत्वात् ७८ ७९ शरकांडे नदीमध्येजायमानतृणविशेषखंडे ८०

तद्वन्हेर्वदतेगर्भेनस्त्रीत्वात्प्रसवोस्यच तस्मादेनंचनःसर्वान् समुद्धर दयांकुरु ७५ इत्येवंप्रार्थितादेवीतथास्त्विति
वचोब्रवीत् देवास्तुवन्हयेप्राहुर्मंत्रंगर्भविमोचनम् ७६ तन्मंत्राद्गर्भमाकृष्यव्यसृजद्धव्यवाहनः गंगायांशांभवंते
जोभास्वल्लोकस्कंदुःसहम् ७७ साचोद्वाकतिचिन्मासान्भृशाशाकृततःपरम् निर्जलातत्प्रभावेणस्फुटद्रूक्षकलेवरा
७८ बहुदुःखाकुलादेवीपातिव्रत्यप्रभावतः उज्जहारस्वोदरस्थगर्भंलोकैकपावनी ७९ शरकांडेनुविक्षेपदह्य-
मानसमंततः शरकांडस्तुसंभिन्नःषोढाभिन्नोबभूवह ८० षट्कृत्तिकाःसमाजग्मुर्ब्रह्मणाचोदितास्तथा शर-
कांडेविनिर्भिन्नेषोढासंधायशांभवम् ८१ षण्मुखपुरुषकृत्वात्वैकदेहमितिस्फुटम् कृत्तिकाविधिनाज्ञप्तास्तंत
थाचक्रिरेदृढम् ८२ तद्देहंपुरुषाकारंषण्मुखंशरकांडगं अरक्ष्यमाणमेवासीच्छरकांडेषुवैचिरम् ८३ एकदावृ-
षभारूढौपार्वतीपरमेश्वरौ श्रीशैलंगंतुमनसौतत्स्थलंपरिजग्मतुः ८४ तदासीत्पार्वतीदेवीसद्यःस्नुतपयोधरा
विस्मितावचनंरुद्रस्तुतौकस्मात्पयोधरौ ८५ कारणंब्रूहिविश्वात्मन्नित्युक्तस्तुहरोब्रवीत् शृणुदेविप्रवक्ष्यामिपु
ग्रोधोवर्ततेतव ८६ त्वयिवीर्यमनुत्सृष्टंप्रागेवागाद्धविर्वहः तद्दष्ट्वाव्रीडितात्वंवैप्राविष्टाचस्थलांतरं ८७ मया
कोपाद्वन्हिमुखेविसृष्टंवीर्यमुल्बणम् देवानांचप्रसादेनगंगायांव्यसृजद्विभुः ८८ गंगाच्चदह्यमानायाविद्ने-
पंचशरांतरं तत्रषोढाप्रभिन्नंतुमातृभिश्चदृढीकृतं ८९

चोदिताःप्रेरिताःषोढाषट्प्रकारेणनिर्भिन्नेशांभवंतेजःसंधायसंधितं
८१ तंषण्मुखंपुरुषं ८२ ८३ शैलंकैलासंतत्स्थलंयत्रशरकांडेपुरुषआसीत्तदर्थः ८५ ८६ हविर्वहोवन्हिः ८७ ८८ मातृभि

मातृभिः षट्कृत्तिकाभिः दृढीकृतंसंहितं ८९ पुरुषाकृतिं पुरुषाकारं आपेदेप्रापतद्वीर्यमिति तंगर्भम् विष्णुनासमविक्रमम् विष्णुतुल्यप
राक्रमम् ९० ९१ ९२ ९३ ९४ ९५ अनुवारंवारं ९६ ९७ यत्प्रभावात् वैशाख

पुरुषाकृतिमापेदेतंदृष्ट्वातेस्तनौस्नुतौ पालनीयंमहावीर्यंविष्णुनासमविक्रमं ९० अयमेवौरसःपुत्रस्तव-
भातिविनिश्चितम् तस्माद्गृहाणशीघ्रंत्वंतेनाख्यातिरतीवते ९१ इत्याज्ञप्ताशंभुनासातमादायार्भकंद्रुतं अंक
मारोप्यतंदेवीपाययामाससास्तनौ ९२ देवेनमोहितादेवीपुत्रस्नेहपराभवत् पुनःकैलासमगमत्प्रभुणासह-
शांकरी ९३ लालयंतीस्कंदंदेवीसंतोषंपरमंययौ एवंकुमारजननंवर्णितंतेमयाद्भुतं ९४ यइदंशृणुयान्नित्यं
कुमारजननंशुभम् पुत्रपौत्राभिवृद्धिंतुलभतेनात्रसंशयः ९५ महद्दुःखंतुजननेहरस्यापियतोभवत् प्रीत्या
नुष्ठितवैशाखधर्मोप्यप्रतिमोभवत् ९६ तस्माद्वैशाखधर्मोहिसर्वाघौघविनाशनः अवैधव्यप्रदःपुण्यःसर्वसं
पद्विधायकः ९७ अनंगोपिहिसांगत्वंयत्प्रभावात्समाप्तवान् अस्नात्वाचाप्यदत्वाचवैशाखोयस्यवैगतः ९८
अपिधर्मकृतोवापिभवेद्दुःखपरंपरा सर्वधर्मोहितःस्याच्चयद्येकोयमनुष्ठितः ९९ इतिश्रीस्कंदपुराणेवैशा
खमाहात्म्येनारदांबरीषसंवादेपुत्रोत्पत्तिकथनंनामनवमोऽध्यायः ९ छ मैथिलउवाच यत्कामपत्नी-
चरितमशून्यशयनव्रतम् देवोपदिष्टतस्यास्याविधानंब्रूहिभूसुर १ किंदानंकोविधिस्तस्यपूजनंकिंफलंतथा
एतदाचक्ष्वभूदेवश्रोतुंकौतूहलंहिमे २ श्रुतदेवउवाच शृणुभूयःप्रवक्ष्यामिव्रतंपापप्रणाशनम् अशून्य
शयनंनामरमायेहरिणोदितं ३

प्रभावात् ९८ ९९ इतिवैशाखमाहात्म्यटीकायांनवमोऽध्यायः ९
अथाशून्यशयनव्रतविधानंप्रस्तौति यदिति १ २ ३ छ ५ छ

जीमूताभःजीमूतोमेघस्तस्याभेवाभा यस्येति मेघश्यामइत्यर्थः ४ ५ ६ ७ चतुर्विधं लेह्यचोष्यपेयखाद्यभेदेनेति ८

येनचीर्णेनदेवेशोजीमूताभःप्रसीदति लक्ष्मीभर्ताजगन्नाथःसमस्ताघौघनाशनः ४ अकृत्वायस्त्विदंराजन्व्रतं पातकनाशनम् गार्हस्थ्यमनुवर्तेततस्येदंनिष्फलंभवेत् ५ श्रावणेशुक्लपक्षेतुद्वितीयायांमहीपते अशून्यशयनाख्यंतत्ख्यातंव्रतमनुत्तमम् ६ चातुर्मास्येतुसंप्राप्तेहविष्याशीभवेन्नरः चतुर्भिःपारणंमासैःसम्यङ्निष्पाद्यतेःप्रभो ७ लक्ष्मीयुक्तोजगन्नाथःपूजनीयोजनार्दनः पारणेदिवसेप्राप्तेभक्ष्यंचैवचतुर्विधम् ८ उपायनंचदातव्यं ब्राह्मणायकुटुंबिने सौवर्णींराजतींवापिमूर्तिंकुर्यान्मनोरमां ९ पीतांबरधरांदिव्यांवनमालाविभूषितां शुक्लपुष्पैस्स्रग्गंधैश्चपूजयेत्पुरुषोत्तमम् १० शय्यादानैर्वस्त्रदानैर्विप्राणांभोजनैस्तथा दंपत्योर्भोजनैश्चैवदक्षिणाभिः प्रपूजयेत् ११ एवंतुचतुरोमासान्पूजयित्वाजनार्दनम् मार्गशीर्षादिमासेषुपूजयेत्पूर्ववद्धरिम् १२ रक्तवर्णंहरिंध्यायेद्रुक्मिणीसहितंतथा चैत्रादिचतुरोमासानेवंसंपूजयेत्ततः १३ भूम्यासहस्थितंदेवमर्चयेद्भक्तिपूर्वकम् सनंदनाद्यैर्मुनिभिःस्तूयमानमकल्मषम् १४ आषाढस्यचमासस्याद्वितीयायांसमापयेत् अष्टाक्षरेणमंत्रेण जुहुयादनलेशुभे १५ मार्गशीर्षादिमासानांपारणेभूमिपालक जुहुयाद्विष्णुगायत्र्याचैत्रादीनांनिबोधय १६ पौरुषेणचमंत्रेणजुहुयादनलेशुभे पंचामृतपायसंच अपूपघृतपाचितम् १७ एवंक्रमेणद्रव्याणिप्रतिमासं निबोधय सौवार्णींप्रतिमंदद्याल्लक्ष्मीनारायणस्यच १८

९ १० भाजनैः पात्रैः ११ १२ १३ १४ अष्टाक्षरमंत्रोयथा ॐनमोनारायणायेति १५ विष्णुगायत्रीयथासंकर्षणायविद्महेवासुदेवायधीमहितन्नःकृष्णःप्रचोदयादिति १६ १७ श्रावणादिमासचतुष्टयेलक्ष्मीनारायणस्यसौवर्णींप्रतिमांदद्यात् १८

१९ २० २१ २२ तस्यांशय्यायां अपूर्वैः उत्तमशय्योपस्करपदार्थैः २३ विशिष्टायदानयोग्याय २४ २५ २६ २७

सौवर्णीमध्यमेदद्यात्कृष्णस्यपरमात्मनः राजतींत्वंतिमेदद्याद्वराहस्यमहात्मनः १९ ब्राह्मणान्भोजयेत्सम्बा-
न्नामभिः केशवादिभिः वस्त्रयुग्मैरलंकारैर्यथावित्तानुसारतः २० अर्चयित्वाततोदद्यादपूपान्घृतपाचितान् उपाय
नार्थेविप्रेभ्योद्वादशभ्योनिवेदयेत् २१ आचार्यायततोदद्यात्प्रतिमांपूर्वकल्पिताम् शय्यांसंकल्पितांपूर्णांसर्वालं
कारभूषिताम् २२ तस्यामभ्यर्च्यविधिवल्लक्ष्मीनारायणंपरम् कांस्यपात्रेणसहितामपूपैर्बहुभिस्तथा २३ वस्त्रालं
कारसहितांदक्षिणाभिस्तथैवच ब्राह्मणायविशिष्टायवैष्णवायकुटुंबिने २४ दातव्याविधिवत्पूज्यब्राह्मणांश्चा-
पिभोजयेत् दानमंत्रः लक्ष्म्याअशून्यंशयनंयथातवजनार्दन २५ शय्याममाप्यशून्यास्याद्दानेनानेनकेशव
एवंसंप्रार्थ्यदेवेशंस्वयंभोजनमाचरेत् २६ पुरुषोवासतीवापिविधवावासमाचरेत् अशून्यशयनार्थंचकर्तव्यंव्रत
मुत्तमम् २७ एतत्तवमयाख्यातंविस्तरान्नृपसत्तम सुप्रसन्नेजगन्नाथेभवेयुर्विविधाःप्रजाः २८ तस्मिंस्तुष्टेतु
देवेशेदेवानामपिदुर्लभाः तस्मात्सर्वप्रयत्नेनव्रतमेतत्समाचरेत् २९ अवश्यंगंतुकामेनतद्विष्णोःपरमंपदम् एव
मुक्तंमयासर्वंकिमन्यच्छ्रोतुमिच्छसि ३० इत्युक्तस्तेनराजर्षिःपुनरप्याहतंमुनिम् वैशाखेछत्रदानस्यमाहात्म्यंवि
स्तराद्वद ३१ शृण्वतोपिनतृप्तिर्मेवैशाखोक्तान्शुभावहान् इतितद्वचनंश्रुत्वायशस्यंपुण्यवर्द्धनम् ३२ प्रत्युवा-
चमहाभागश्रुतदेवोमहायशाः श्रुतदेवउवाच वैशाखेघर्मतप्तानांमानवानांमहात्मनाम् ३३ येकुर्वंत्यातपत्रा
णतेषांपुण्यमनंतकम् अत्रैवोदाहरंतीममितिहासंपुरातनम् ३४

२८ २९ ३० ३१ धर्मानितिशेषः ३२ ३३ आतपत्राणं उष्णाद्रक्षणम् ३४ ६१ ६३

कृतंजातं ३५ ३६ ३७ ३८ ३९ कर्तुमितिशेषः ४० ४१ ४२ ४३ ४४

वैशाखधर्ममुद्दिश्यपुराकृतयुगेकृतम् वंगदेशेपुराकश्चिद्धेमकांतइतिश्रुतः ३५ कुशकेतोःसुतोधीमान्राजाशस्त्र
भृतांवरः एकदामृगयासक्तोगहनंवनमाविशत् ३६ तत्रनानाविधान्हत्वामृगान्क्रोडादिकान्बहून् श्रांतोमध्या
न्हवेलायांमुनीनामाश्रयंययौ ३७ तदाशतर्चिनोनामऋषयःशंसितव्रताः समाधिस्थानजानंतिबाह्यकृत्यंच
किंचन ३८ तान्दृष्ट्वानिश्चलान्विप्रान्क्रुद्धोहंतुमनोदधे भूपंनिवारयामासशिष्याणामयुतंतदा ३९ दुर्बुद्धे शृ
णुनोवाक्यंगुरवस्तुसमाधिगाः नोजानंतिबाह्यंकृत्यंतस्मात्क्रोधंनचार्हसि ४० ततःशिष्याननुवाचेदंवचनंक्रो
धविह्वलः यूयंकुरुध्वमातिथ्यमध्वश्रांतस्यमेद्विजाः ४१ एवमुक्ताश्चभूपेनशिष्याऊचुस्तदानृपम् नाज्ञप्ता
गुरुभिर्भूपवयंभिक्षाशिनःपुनः ४२ गुरुतन्त्राःकथंकर्तुमातिथ्यंतेवयंक्षमाः मत्पाख्यातान्नृपःशिष्यैस्तान्हंतुंध
नुराददे ४३ मृगदस्युभयाद्दिभ्योबहुधारक्षितामया तेमामेवापरिक्षंतिमयादत्तमतिग्रहाः ४४ एतेमानंवि
जानंतिकृतघ्नाभूरिमानिनः घ्नतोपिमेनदोषःस्यादेतान्वैह्याततायिनः ४५ एवंविक्रुद्धमानःसन्शरान्मुंचन्शरा
सनात् तान्विद्रुताननुद्रुत्यजघ्नेशिष्यशतत्रयं ४६ दुद्रुवुर्भयतःसर्वेविहायाश्रममंजसा विद्रावितेषुशिष्येषु
बलादाश्रमसंस्थितान् ४७ संभारान्जगृहुःशीघ्रंसैनिकाःपापबुद्धयः यथेष्टंभोजनंचक्रुर्नृपेणैवानुमोदिताः
४८ ततःसेनावृतोराजापुरीमागाद्दिनात्यये कुशकेतुस्ततःश्रुत्वातनयस्यविचेष्टितम् ४९ पुरान्निर्यातयामा·
सगर्हयन्गर्हयन्सुतम् राज्यानर्होसिमाहीनस्वदेशादपिभूमिप ५०

४५ शरासनात् धनुष्यात् ४६ ४७ ४८ दिनात्यये सायंकाले ४९ ५० ५१ ५१

५१ ५२ ५३ ५४ ५५ ५६ ब्रह्मपत्रैःपलाशवृक्षपत्रैः जग्राह दधारेत्यर्थः अलांबुस्थं तुंबीफलपा

पित्रात्यक्तस्ततोराजाहेमकांतोतिविह्वलः वनंविवेशगहनंहत्याभिश्चसुपीडितः ५१ बहुकालमवात्सीच्चगह्वरेनि
र्जनेवने आहारंकल्पयामासव्याधधर्ममुपाश्रितः ५२ नक्कापिस्थितिमापेदेहत्ययाभिद्रुताभृशं अष्टाविंशतिव
र्षाणिगतान्यस्यदुरात्मनः ५३ तीर्थयात्राप्रसंगेनत्रितोनाममहामुनिः तस्मिन्नरण्येवैशाखरवौमध्यंदिनेगते ५४
गच्छन्नातपविक्लांतस्तृषयाचापिपीडितः क्वचिद्वृक्षविहीनेतुप्रदेशेमूर्छितोभवत् ५५ दैवाद्दृष्ट्वा हेमकांतस्त्रितं
नाममहामुनिम् तृषार्तंमूर्छितंश्रांतंकृपांचक्रेनृपाधमः ५६ ब्रह्मपत्रैस्तदाछत्रंकृत्वाचातपवारणं मुनेर्जग्राहशिरसि
ह्यलाबुस्थजलंददौ ५७ लब्धसंज्ञोभवत्तेनह्युपचारेणवैमुनिः पत्रछत्रंक्षत्रदत्तंगृहीत्वागतविक्लमः ५८ ग्रामंक्व
चिच्छनैःप्राप्यकिंचिदाप्यायितेंद्रियः तेनपुण्यप्रभावेनब्रह्महत्याशतत्रयम् ५९ विनष्टमभवत्तस्यक्षणादेवमहा
त्मनः ततोविस्मयमापन्नोहेमकांतोमहारथः ६० बहुधापीड्यमानस्यब्रह्महत्याःकथंगताः केनापिनिष्कृतान्ये
नाःक्वगताःकेनहेतुना ६१ इत्येवंचिंतयामासब्रह्महत्याविमोचनं एवंचाज्ञास्थितेराज्ञियमदूताअथागमन् ६२
नेतुमेनंमहात्मानंहेमकांतंवनेस्थितम् ग्रहणींजनयामासुःप्राणान्हर्तुंमहात्मनः ६३ तदाप्राणवियोगार्तःपु
रुषान्स्त्रीन्ददर्शह यमदूतान्महाघोरानूर्ध्वकेशान्भयंकरान् ६४ चिंतयानःस्वकर्माणितूष्णीमासीत्त-
दानृपः छत्रदानप्रभावेनजाताविष्णुस्मृतिर्नृप ६५ तेनस्मृतोमहाविष्णुर्विष्वक्सेनंस्वमंत्रिणम् उवाचतूर्णंत्वं
गच्छयमदूतान्निवारय ६६ वैशाखधर्मनिरतंहेमकांतंतुपालय निष्पापमेनमद्भक्तंपित्रेदेहिपुरंगतः ६७ त्रस्थं ५७

५८ ५९ ६० ६१ ६२ ग्रहणीसंग्रहणीरोगं ६३ ६४ ६५ ६६ ६७ ५

६८ कृतागाः कृतापराधः ६९ ७० ७१ ७२ ७३ ७४ ७५ ७६ ७७

मदीरितेनवाक्येनकुशकेतुंचबोधय सर्वधर्मोज्झितोवापिब्रह्मचर्यादिवर्जितः ६८ वैशाखधर्मनिरतोमत्प्रि
यस्यान्नसंशयः कृतागाश्चापितत्पुत्रोमुनित्राणपरायणः ६९ वैशाखेछत्रदानेननिष्पापोनात्रसंशयः तेनपुण्य
प्रभावेनशांतोदांतश्चिरायुषः ७० शौर्यौदार्यगुणोपेतस्त्वत्समोयंगुणैरपि तस्मादेनंराज्यभारेसंस्थापयमहा
बलम् ७१ विष्णुनैवंसमाज्ञप्तमित्यादिश्यनृपोत्तमं पितुर्वंशेहेमकांतंस्थाप्यायाहिचमांपुनः ७२ इत्यादि-
ष्टोभगवताविष्वक्सेनोमहाबलः हेमकांतंसमासाद्ययमदूतान्निवार्यच ७३ पाणिनाशांतमेनंचपस्पर्शांगेषु
भूमिपम् भगवद्भक्तसंस्पर्शाद्धतव्याधिःक्षणादभूत् ७४ विष्वक्सेनस्ततस्तेनसहतस्यपुरीययौ तद्दृष्ट्वावि-
स्मितोभूत्वाकुशकेतुर्महाप्रभुः ७५ ननामशिरसाभक्त्यादंडवत्पतितोभुवि गृहंप्रवेशयामासपार्षदंपरमा-
त्मनः ७६ स्तुत्वाचार्चिविविधैःस्तोत्रैःपूजयामासवैभवैः तस्मैप्रीतमनाःप्राहविष्वक्सेनोमहाबलः ७७ हेम
कांतसमुद्दिश्ययदुक्तंविष्णुनापुरा तच्छ्रुत्वाकुशकेतुश्चपुत्रराज्येनिवेश्यच ७८ विष्वक्सेनाभ्यनुज्ञातःसभा-
र्योवनमाविशत् विष्वक्सेनोहेमकांतमनुमंत्र्याभिपूज्यच ७९ श्वेतद्वीपंययौधीमान्विष्णुपार्श्वेमहामनाः हे
मकांतस्ततोराजावैशाखोक्तान्शुभावहान् ८० विष्णुप्रीतिकरान्धर्मान्प्रतिवर्षंचकारह ब्रह्मण्योधर्ममा
र्गस्थःशांतोदांतोजितेंद्रियः ८१ दयालुःसर्वभूतेषुसर्वयज्ञेषुदीक्षितः प्रवृद्धःसर्वसंपद्भिःपुत्रपौत्रादिभिर्वृ
तः ८२ भुक्त्वाभोगान्समस्तांश्चविष्णुलोकमवाप्तवान् ८३

७८ ७९ ८० ८१ ८२ [illegible] [illegible] [illegible]

पुमर्थहेतून् धर्मार्थकाममोक्षप्रापका ८३ इतिटीकायांदशमोऽध्यायः १० ६२ अथवैशाखधर्माणांश्रेष्ठत्वंप्रतिपादयितुंमैथिलनृपस्यप्रश्नंप्रस्तौति वैशाखेत्यादिना १ २ ३ ४ ५ ६ ७ ८ ९

नेक्षेतुवैशाखसमांश्चधर्मान्सुखप्रयत्नान्बहुपुण्यहेतून् पापेंधनाग्निनिभान्सुलभ्यान्धर्मादिमोक्षांत
पुमर्थहेतून् ८३ इतिश्रीस्कंदपुराणेवैशाखमाहात्म्येनारदांबरीषसंवादेछत्रदानप्रशंसनेहेमकांतस्यब्रह्म
हत्यादिपापशमनंनामदशमोऽध्यायः १० ६२ मैथिलउवाच वैशाखधर्माःसफलाःपुण्यराशिविधायकाः
विष्णुप्रीतिकराःसद्यःपुमर्थानांतुहेतवः १ नप्रख्याताःकथंलोकेशाश्वताःश्रुतिचोदिताः प्रख्याताराजसाधर्मा
स्तामसाश्चापिभूरिशः २ दुर्धराबहुयत्नाश्चबहुद्रव्यव्ययावहाः केचिन्माघंप्रशंसंतिचातुर्मास्यान्परेजगुः ३
व्यतीपातादिधर्मांश्चवर्णयंतीहभूरिशः एतद्धिवेकंविस्तार्यश्रोतुकामायमेवद ४ श्रुतदेवउवाच शृणुभूपप्र
वक्ष्यामिनप्रख्याताइमेकथम् इतरेषांचधर्माणांकथंख्यातिश्चभूतले ५ राजसास्तामसाभूमौबहवःकामुकाज
नाः इच्छंत्यैहिकभोगांस्तेपुत्रपौत्रादिसंपदः ६ क्वचित्कथंचनक्वापिजनेष्वेकोतिकृच्छ्रतः स्वर्गाययततेलोकेत
स्माद्यज्ञादिसत्क्रियाः ७ कुरुतेतिप्रयत्नेनमोक्षंनोपासतेनरः क्षुद्राशाभूरिकर्माणोजनाःकाम्यानुपासते ८ प्र
ख्याताराजसाधर्मास्तामसाश्चापितेनवै नख्याताःसात्त्विकाधर्माहरिप्रीतिकराइमे ९ निष्कामिकाइमेधर्माऐ
हिकामुष्मिकप्रदाः नजानंतिजनामूढामोहितादेवमायया १० यथाधिपत्येसंप्राप्तेसर्वोसिद्धोमनोरथः मोह
नार्थंस्यलंप्राप्तमाधिपत्येनहीयते ११ कारणंचप्रवक्ष्यामिगोपनेभूपतेंजसा यद्वैशाखोक्तधर्माणांसात्त्विकानांनृ
पामिह १२

१० तथावैशाखधर्माचरणेनसर्वःमनोरथःसिद्धोभवति अन्यदितिशेषः ११ १२ ६२ ६२

१२ १३ १४ १५ १६ वृक्षेवृक्षस्च्छायास्क १७ १८ १९ २० २१

सार्वभौमःपुराकाश्यामिक्ष्वाकुकुलभूषणः कीर्तिमानितिविख्यातोनृगपुत्रोमहायशाः १३ जितेंद्रियोजितक्रोधो
ब्रह्मण्योराजसत्तमः एकदामृगयासक्तोवसिष्ठाश्रममाययौ १४ गच्छन्मार्गेददर्शासौवैशाखेघर्मनिष्ठुरे भूयोभूयः
कार्यमाणान्शिष्यैस्तस्यमहात्मनः १५ क्वचित्प्रपांप्रकुर्वंतिछायामंडपमेवच तटप्रपातंनिस्तीर्यवापींकुर्वंति
निर्मलाम् १६ सूपविष्टान्क्वचिद्वृक्षेव्यजनैर्वीजयंतिच क्वचिद्ददुरिक्षुदंडान्क्वचिद्धानान्क्वचित्फलम् १७ मध्या
न्हेछत्रदानंचसायान्हेपानकस्यच क्वचिद्यच्छंतितांबूलंनेत्रकर्पूरलेपनम् १८ स्वच्छायेचवनेकेचित्सुसंमृष्टांगणे
षुच केचिदास्तरयंत्यच्छावालुकानिहितानिच १९ कुर्वत्यांदोलिकाराजन्वृक्षशाखावलंबिना केयूयमितिपप्रच्छ
वासिष्ठाइतितेब्रुवन् २० किमेतदितिपप्रच्छधर्मोवैशाखचोदिताः पुमर्थहेतवइमेक्रियंतेस्माभिरंजसा २१ वसि
ष्ठस्याज्ञयाचेतितेब्रुवन्नृपसत्तमं एतदाचरणेपुंसांकिंफलंकस्तुतुष्यति २२ एतद्विस्तार्यमेब्रूतयूयंसम्यग्यथाश्रु
तम् इतिराज्ञानुसंपृष्टाःप्रत्यूचुस्तंमहीपतिं २३ गुरोराज्ञाक्रमेणैवकुर्वतांपृथिवीसत्क्रियाः नास्माकमवकाशोत्रगुरुं
पृच्छयथोचितम् २४ सर्ववित्तत्वतोनूनंधर्मानेतान्महायशाः इतिशिष्यैर्वसिष्ठस्यप्रत्युक्तस्तुद्रुतंययौ २५ वसि
ष्ठस्याश्रमंपुण्यंविद्यायोगोपबृंहितं समायांतंनृपंवीक्ष्यवसिष्ठःप्रीतमानसः २६ आतिथ्यंविधिवच्चक्रेसानुगस्य
महात्मनः सूपविष्टःकृतातिथ्यःप्रीतःपप्रच्छतंगुरुं २७ राजोवाच मार्गेदृष्टंमहाश्चर्यंत्वच्छिष्यैश्चकृतंशुभम्
मयापृष्टंचतैर्नोक्तंक्रियमाणंशुभावहम् २८ नास्माकमवकाशोत्रत्वेतद्धर्मप्रशासने कर्तव्याचक्रियास्माभिर्गुरुणाया
चचोदिता २९

२२ २३ २४ २५ उपबृंहितं वर्धितम् २६ २७ २८ २९

३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९ ४० ४१ ४२

गुरुंगच्छेतितैरुक्तआगतोहंतवांतिकं मृगयासक्तचित्तेनश्रांतेनातिथ्यमिच्छता ३० दृष्टंमार्गेत्विदंपुण्यंत्वाशिष्ये
श्चकारित जिज्ञासासीत्ततःश्रोतुंधर्मानेतान्मुनीश्वर ३१ त्वमादिशादिमान्धर्मान्समाचरसिवैयतः तान्धर्मान्श्रोतु
कामायशिष्यायप्रणतायच ३२ श्रद्दधानायमेब्रूहिविस्तरान्मुनिपुंगव इतीक्ष्वाकुकुलीनेनराज्ञापृष्टोमहायशाः ३३
मनसातोषमापेदेसम्यक्पृष्टोधुनामुना अहोव्यवसिताबुद्धीराजंस्तेद्यसुशिक्षिता ३४ यस्माद्विष्णुकथायांचतद्भूमौ
चरणेपिच मतिरात्यंतिकीजातासुकृतंफलितंतव ३५ इतिसंभाष्यराजानंजातहर्षस्तमब्रवीत् शृणुभूपप्रवक्ष्यामिय
त्पृष्टोहंत्वयाधुना ३६ यस्यश्रवणमात्रेणमुच्यतेसर्वकिल्बिषैः सर्वधर्मान्परित्यज्यवर्ततेविषयात्मकः ३७ वैशाख-
स्नाननिरतः सप्रियोमधुविद्विषः सांगान्धर्माननुष्ठायवैशाखोयेननादृतः ३८ स्नानदानार्चनैःपुण्यैस्तस्यदूरतरोह
रिः अस्नाप्य चाप्यदत्वाचवैशाखोयेननीयते ३९ कर्मणासतुचांडालोनात्रकार्याविचारणा वैशाखोक्तैर्महाध-
र्मैर्येनचाराधितोहरिः ४० तैस्तुतोषसमायातिप्रददातिसमीहितम् लक्ष्मीभर्त्ताजगन्नाथोऽशेषाघौघनाशनः ४१
धर्मैःसूक्ष्मैश्चप्रीणातिनप्रयासैर्धनैरपि भक्त्यासंपूजितोविष्णुःप्रददातिसमीहितम् ४२ तस्माद्राजन्सदाभक्तैः
कर्त्तव्यामधुविद्विषः जलेनापिजगन्नाथःपूजितःक्लेशहाहरिः ४३ परितोषंव्रजत्याशुतृषार्तःसलिलैर्यथा महद
प्यल्पदंकर्मतथाप्यल्पंचभूरिदम् ४४ ४३ अथकर्मणोमहदल्पफलव्यवस्थामुपदर्शयति महदितिसार्द्धेन महत् महा
प्रयासर्द्धिभिःसाध्यंयत् कर्मतत् अल्पदं अल्पफलदंभवति अल्पं अल्पप्रयासादिसाध्यं कर्मभूरिदं भूरिफलप्रदायकंभवति कर्मणः अल्पत्व-
भूरित्वे अल्पभूरिप्रदायकत्वे हेतू कारणे महदल्पके तत्तत्कर्मणः महत्त्वाल्पत्वेन किंतुकर्मस्वरूपमेवमहदल्पफलप्रदत्वेहेतुः गहना दुर्ज्ञेया ४४

४५ ४६ वैशाखोक्तान् (धर्मान्) इतिशेषः ४७ ४८ ४९ ५० ५१ मातंगेगजे ५२

कर्मणाल्पत्वभूरित्वेनहेतूमहदल्पके किंतुकर्मस्वरूपंचगहनाकर्मणोगतिः ४५ वैशाखोक्ताइमेधर्माःस्वल्पाया
सकृताश्चापि बहुव्ययविनाशाश्चविष्णोःप्रीतिकराःशुभाः ४६ तस्मात्त्वमपिभूपालवैशाखोक्तान्समाचर त्वद्रा
ष्ट्रीयैर्जनैःसर्वैःकारयेमान्शुभावहान् ४७ नकरोतिचयोधर्मान्वैशाखोक्तान्नराधमः बहुधाशिक्ष्यमाणोपि
सदंड्यस्तवभूपते ४८ इत्यावश्यकतासम्यक्शास्त्रैर्व्युत्पाद्यतस्यच पश्चाद्वैशाखनिर्दिष्टान्धर्मान्प्रोवाचसर्वशः
४९ श्रुत्वातान्सकलान्धर्मान्गुरुंसंपूज्यभक्तितः सराजास्वगृहमागत्यसर्वान्धर्मांश्चकारह ५० भक्तिमान्केशवेराजन्
देवदेवेनिरंजने नान्यंपश्यतिदेवेशात्पद्मनाभान्महीपतिः ५१ भेरीमुद्घाट्यमातंगस्थराष्ट्रेघोषयद्भटैः अष्टवर्षाधि-
कोमर्त्योह्यशीतिर्नहिपूर्यते ५२ प्रातर्नस्नातिमेषस्थेसूर्येसर्वोपियोजनः समेदंड्यश्चवध्यश्चनिर्यास्योविषयाद्ध्रु
वम् ५३ पितावाचार्यदेवापुत्रोभार्यावाथसुहृज्जनः वैशाखधर्महीनश्चनिग्राह्योदस्युवन्मया ५४ दातव्यंविप्रमुख्ये
भ्यःस्नात्वाप्रातर्जलेशुभे प्रपादानादिधर्मांश्चकुरुध्वंशक्तितोनघाः ५५ विप्रंचधर्मवक्तारंग्रामेग्रामेन्यवेशयत्
पंचानामपिग्रामाणामकरोदधिकारिणं ५६ दंडार्थंत्यक्तधर्माणांदशवाजीनिषेवितम् एवंप्रवृत्तःसर्वत्रसार्वभौमस्य
शासनात् ५७ प्रवृद्धोधर्मवृक्षोयंसर्वदेशेषुविस्तरात् येकेचिन्निधनंयांतिभूपालविषयेनराः ५८ प्रमादाच्चनृपश्रे
ष्ठतेयांतिहरिमंदिरम् अवश्यंवैष्णवोलोकःप्राप्यतेमानवैर्ध्रुवम् ५९ व्याजेनापिसकृत्स्नातःप्रातर्मेषगतेरवौ सर्वपा
पविनिर्मुक्तायांतिविष्णोःपरंपदम् ६० नप्राप्नोतियमंधर्मसकृद्वैशाखस्नानतः वैलेख्यमगमद्राजारविसूनुस्तदानृप ६१

विषयात् देशात् ५३ ५४ ५५ ५६ ५७ ५८ ५९ ६० रविसूनुर्यमः वैलेख्यं लेखनकर्माभावं अगमत् ६१

६२ ६३ ६४ ६५ ६६ ६७ ६८ ६९ ७० ७१ ७२

लेख्यकर्माणिविश्रांतश्चित्रगुप्तोभवत्तदा मार्जितानिचलेख्यानिपुरापापोद्भवानिच ६२ गच्छद्भिर्वैष्णवंलोकेस्वक
र्मस्थैर्जनैःक्षणात् शून्यास्तुनरकाःसर्वेपापप्राणिविवर्जिताः ६३ भग्नयानोभवन्मार्गोवैशाखस्यप्रभावतः सर्वेपिवि
मलाकाराजनायांतिहरेःपदम् ६४ दिवौकसांतुयेलोकाः शून्याःसर्वेतथाभवन् शून्येत्रिविष्टपेजातेशून्येषुनरकेषु
च ६५ नारदोधर्मराजानंगत्वाचेदमुवाचह नारदः श्रूयतेराजन्प्राक्श्रुतोनरकेयथा ६६ नथानक्रियतेलेख्यंकिंचि
द्दुष्कृतकर्मणाम् चित्रगुप्तोमुनिर्निरिवस्थितोयंमुनिसंस्थितः ६७ कारणंब्रूहिराजेंद्रनयांतितवमंदिरम् मनुष्याःपाप
कर्माणोमायादंभविवर्धिताः ६८ एवमुक्तेतुवचनेनारदेनमहात्मना प्राहवैवस्वतोराजाकिंचिद्दैन्यसमन्वितः ६९ यो
यंनारदभूपालःपृथिव्यांसांप्रतंस्थितः सोतिभक्तोहृषीकेशेपुराणपुरुषोत्तमे ७० प्रबोधयतिवैशाखधर्मैर्भेरीस्वने
नच अष्टवर्षाधिकोमर्त्योह्यशीतिर्नहिपूर्यते ७१ योवैत्यक्तवैशाखःसमेदंड्योनसंशयः तद्भयाद्विजनाःसर्वेनोल्लं
घंतिकदाचन ७२ गच्छंतिवैष्णवंधामकर्मणातेननारद वैशाखसेवनाल्लोकायास्यंतिहरिमंदिरम् ७३ तेनराज्ञामु
निश्रेष्ठमार्गोलुप्तोममाधुना कृताहिनरकाःशून्यालोकाश्चापिदिवौकसाम् ७४ विश्रांतोलेखकोलेखेलिखितंमार्जि
तंजनैः वैशाखमासधर्मस्यमाहात्म्यंत्वीदृशंमुने ७५ ब्रह्महत्यादिपापानिविमुक्तानिजनैर्द्विज कृत्वावैशाखकृ
त्यानियांतिविष्णोःपरंपदं ७६ सोहंकाष्ठसमोजातोनकश्चिन्ममगोचरः युद्धंकृत्वातुतंहन्मिसर्वथाद्यमहाबलम्
७७ अकृत्वास्वामिकार्यंतुनिर्व्यापारोयदिस्थितः तस्यविघ्नंसमश्नातिसयातिनरकंध्रुवम् ७८

७३ ७४ ७५ ७६ सःपापदंडाधिकार्यपि अहं काष्ठसमः काष्ठवन्निग्रहानुग्रहासमर्थः ७७ ७८

भवमित्यत्र अडभावश्चार्षः ७९ ८० ८१ ८२ सज्जीकृतसर्वस्वः सज्जीकृताः सन्नद्धीकृताः सर्वस्वाः स्वकीयाः

यद्दिदेवादवध्योयंतदाब्रह्माणमेत्यच निवेद्यतस्मैतत्सर्वंपश्चात्स्वस्थस्थितिर्भवम् ७९ इत्युक्त्वाद्विजमामंत्र्यसानुगःप्रययौभुवम् सकालोमहिषारूढोदंडमुद्यम्यभीषणम् ८० मृत्युरोगजराद्यैश्चपार्षदैश्चमहोत्कटैः पंचाशत्कोटिसंख्याकैर्यमदूतैर्वृतस्ततः ८१ सतूर्णंतस्यराजर्षेरुरोधसकलांपुरीम् शरवर्द्धोमहाघोरंसर्वलोकभयकरम् ८२ तच्छ्रुत्वासेतुराजर्षिर्ज्ञात्वावैवस्वतंयमम् ससज्जीकृतसर्वस्वःपत्तनान्निर्ययौरुषा ८३ तयोर्युद्धमभूत्तत्रभीषणंरोमहर्षणम् मृत्युंकालंतथारोगंयमदूतपानितथा ८४ जित्वाक्षणेनराजर्षिर्द्रावयामासरोषतः ततःक्रुद्धोयमोराजास्वयमभ्येत्यतंरुषा ८५ युयोधबहुभिर्बाणैःसिंहनादंचकारह चकर्तराजातस्यापिकार्मुकंविशिखैस्त्रिभिः ८६ पुनश्चर्मासिमादाययमोहंतुमथागमत् तद्दृष्ट्वातुनृपःक्रुद्धःपुनःस्थित्वासिचर्मणि ८७ निचखानललाटेचशरंकालोरगप्रभम् यमस्तेनाहतःक्रुद्धस्ततोदंडमुपाददे ८८ ब्रह्मास्त्रेणचसंमंत्र्यदंडंतस्मैमुमोचह हाहाकारोमहानासीज्जनानांपश्यतांतदा ८९ तदाविष्णुःस्वभक्तस्यरक्षार्थंप्राहिणोदरिम् विष्णुमुक्तंतदाचक्रंशीघ्रमागत्यतद्रणे ९० यमदंडेनसंयुध्य तद्ब्रह्मास्त्रंनिवार्यच यमंहंतुमथारेभेसहस्रारंमहाद्भुतम् ९१ देवभक्तस्ततोभीतस्तदासोचक्रमंजसा सहस्रारनमस्तेस्तुविष्णुपाणिविभूषण ९२ त्वंसर्वलोकरक्षार्थंहरिणात्वधृतंपुरा त्वांयाचेद्ययमंत्रातुविष्णुभक्तंमहाबल ९३ नृणांदेवद्रुहांकालस्त्वमेवहिनचापरः तस्मादेनंयमंरक्षकृपांकुरुजगत्पते ९४

सेनाइतियावत् येनसः ८३ ८४ ८५ चकर्त चिच्छेद ८६ ८७ निचखान चिक्षेप· ८८ ८९ अरं सुदर्शनचक्रं ९० ९१ ९२ ९३ ९४

९५ मूर्तामूर्तजनैः मूर्ता ब्रह्मोपासका अमूर्ता जीवन्मुक्तास्तैर्वृतं ९६ ९७ विग्रहसंस्थितैर्देहधरैः ९८ ९९ १००

नृपेएवंस्तुतंचकंयमंहित्वानृपांतिकम् पुनर्ययौमहाराजदेवानांपश्यतांदिवि ९५ ततोयमोतिनिर्विण्णोब्र
ह्मणःसदनंययौ सददर्शसमासीनंमूर्तामूर्तजनैर्वृतम् ९६ द्रुवाश्रयंजगद्वीजंसर्वलोकपितामहम् उपास्य-
मानंविबुधैर्लोकपालैर्दिगीश्वरैः ९७ इतिहासपुराणाद्यैर्वेदैर्विग्रहसंस्थितैः मूर्तिमद्भिःसमुद्रैश्चनदीभिश्च
सरोवरैः ९८ देहवद्भिस्तथावृक्षैरश्वत्थाद्यैरशेषितैः वापीकूपतडागैश्चमूर्तिमद्भिश्चपर्वतैः ९९ अहोरात्रैस्त
थापक्षैर्मासैःसंवत्सरैस्तथा कलाकाष्ठानिमेषैश्चऋतुभिश्चायनैर्युगैः १०० संकल्पैश्चविकल्पैश्चनिमिषो-
न्मेषणैस्तथा ऋक्षैर्योगैश्चकरणैःपूर्णिमाभिःकुसंक्षयैः १ सुखैर्दुखैर्भयैश्चैवलाभालाभैर्जयाजयैः सत्वे-
नरजसाचैवतमसाचसमन्वितं २ शांतमूढातिघोरैश्चविकारैःप्राकृतैरपि वायुनादेवदेवेनश्लेष्मापित्तादिभिर्वृतं
३ तेषांमध्येविशत्सौरिःसव्रीडाच्चवधूर्यथा विलोकयन्धरापृष्ठम्लानवक्त्रव्यदर्शयत् ४ संप्रविश्ययमहक्षास
काशस्थंसहानुगम् विस्मितास्तेमिथःप्रोचुःकिमर्थंभास्करिस्त्विह ५ संप्राप्तोलोककर्तारंद्रष्टुंदेवपितामहम्
निर्व्यापारःक्षणमपियोयंनास्तिरवेःसुतः ६ सोयमभ्यागतःकस्मात्कच्चित्क्षेमंदिवौकसाम् आश्चर्यातिश
योयंत्वसमार्जितपटस्त्वयं ७ लेखकस्तमनुप्राप्तोदैन्येनमहतान्वितः नकदाचित्पटोह्यस्यमार्जितोधर्मभीरु
णा ८ यन्नदृष्टंश्रुतंवापितदिहाद्यप्रपद्यते एवमुच्चरतांतेषांभूतानांभूतशासनः १०९

१०१ १०२ १०३ सौरिःसूर्यपुत्रोयमः वधूर्नवोढास्त्री १०४ भास्करिर्यमः १०५ १०६ संमार्जितोमृष्टः वर्णरहितइतियावत् प
टोयस्य एवंभूतोयम् इतिआश्चर्यातिशयः महदाश्चर्यमित्यर्थः १०७ १०८ १०९

कृंतमूलश्छिन्नमूलः ११० ११ १२ १३ अशोभनंविपत्तिं १४ ११५ मार्तंडिं यमं शालोवृक्षविशेषस्त-

निष्पपाताग्रतोभूमौब्रह्मणोरविनंदनः कृंतमूलोयथाशाखीत्राहित्राहीतिवैरुदन् ११० परिभूतोस्मिदेवेशासं-
मार्जितपटःकृतः त्वयिनाथेनविफलंपश्यामिकमलासन ११ एवमुक्त्वाहिनिश्चेष्टोबभूवनृपसत्तम ततःकोला-
हलःशब्दःसभायांसमजायत १२ योहिस्वादयतेमर्त्यान्सर्वान्स्थावरजंगमान् स वैरुदातेदुःखार्तःकस्माद्दैव-
स्ततोयमः १३ जनसंतापकर्त्तायःसोचिराद्याप्त्यशोभनम् नहिदुष्कृतकर्त्ताहिनरःप्राप्नोतिशोभनम् १४ ततोनिवा-
रयामासवायुस्तेषांवचस्तदा लोकानांसमवेतानांमतंज्ञात्वासवेधसः १५ निवार्यलोकान्मार्तंडिंशनैरुत्थापयन्नम-
रुत् भुजाभ्यांशालपीनाभ्यांलोकसूनउदारधीः १६ विह्वलंतंपरायत्तमासनेसान्यवेशयत् आसनस्थमुवाचेदं
व्योमसूनूरवेःसुतम् १७ केनत्वमभिभूतोसिकेनस्थानान्निवारितः केनायमार्जितोदेवपटोलेखपटस्तव १८
ब्रूहिसर्वमशेषेणाकुशकेतोस्त्वमागतः यःप्रभुस्तातसर्वेषांसनकर्ताममापिच १९ अपनेष्यतिमार्तंडदुःखत्ते
दयसंस्थितम् सएवमुक्तःश्वसनेनसत्यमादित्यसूनुर्वचनंबभाषे विलोक्यवक्रंकुशकेतुसूनोःसगद्गदंचेदम-
होतिदीनम् १२० इतिश्रीस्कंदपुराणेवैशाखमाहात्म्येनारदांबरीषसंवादेकीर्तिमाहिजयवर्णनंनामएका-
दशोऽध्यायः ११ छ यमउवाच शृणुमेवचनंशंभोलोपितोहंपितामह मरणादधिकंमन्येमत्पदस्य
चखंडनं १ नियोगीननियोगंहिकरोतिकमलासन प्रभोर्विघ्नंसमभ्यातिसभवेत्काष्ठकीटकः २

द्वत्पीनानां १६ व्योमसूनुर्ब्रह्मा ११७ हेपटोस्त्वकर्मदक्ष १८ १९ १२० इतिवैशाखमा०टीकायामेकादशोऽध्यायः ११ छ
अथयमः स्वदुःखंवर्णयति शृण्वित्यादिना यावदध्यायसमाप्ति १ नियोगीदंडाधिकारी नियोगंदंडं २ छ छ

३ ४ ५ ६ साधये प्रवर्तये ७ ८ ९ १० ११ योगः कर्मकांडं सांख्यं जीवब्रह्मत-

योस्मातिलोभाद्वित्तानिप्रज्ञावांश्चमहीपते सतिर्यग्योनिनरकौयातिकल्पशतत्रयम् ३ निस्पृहोनाचरेद्यस्तंनियो
गंपद्मसंभव भुक्त्वातुनरकान्घोरान्सपुमान्वायसोभवेत् ४ आत्मकार्यपरोयस्तुस्वामिकार्यंविलुंपति भवे
द्वेश्मनिपापात्माआखुःकल्पशतत्रयम् ५ नियोगीयश्चभूत्वावैतिष्ठन्नित्यंस्ववेश्मनि शक्तस्तुकार्यकरणेमा-
र्जारोजायतेनरः ६ सोहंदैवतवादेशात्प्रजाधर्मेणसाधये पुण्येनपुण्यकर्तारंपापंपापेनकर्मणा ७ सम्य-
ग्विचार्यमुनिभिर्धर्मशास्त्राचितैःप्रभो कल्पादौवर्तमानस्ययत्नेनाज्ञापयन्मम ८ कर्तुंनियोगमेवंहित्वदीयो
नैवशक्नुयाम् राज्ञाकीर्तिमताभग्नोनियोगस्तवचाक्षितौ ९ भयादस्यजगन्नाथपृथिवींसागरांबराम् वैशा
खधर्मसहितांपालयन्वर्ततेक्वचित् १० विहायसर्वधर्मांश्चविहायपितृपूजनम् विहायाग्निसपर्यांतुतीर्थया
त्रादिसत्क्रियाः ११ योगसांख्यावुभौत्यक्त्वात्यक्त्वाप्राणनिरोधनम् त्यक्त्वाहोमंस्वाध्यायंतुकृत्वापापानिभू-
रिशः १२ प्रयांतिवैष्णवंलोकंकृत्वावैशाखसत्क्रियाः मनुजाःपितृभिःसार्द्धंतथैवचपितामहैः १३ तेषामपी
तपितरःपितृणांपितरस्तथा तथामातामहायांतितेषांवैजनकादयः १४ तेषामपिचनेतारोजनित्रीणांचपूर्व-
जाः एतद्दुःखंपुनर्देवमममस्तकभेदनम् १५ प्रियायाःपितरोयांतिमार्जापित्वालिपिंमम पितृणांबीजजायस्तु
धात्र्याकुक्षौधृतोविभो १६ यदेकेनकृतंकर्मतदेकेनैवभुज्यते तस्मिरस्यकृतंसर्वंजानंस्त्वेकःकुलेतुयः १७
तारयेत्तावुभौपक्षौषड्विंशोपर्यलंविभो प्रियायाश्चापिवैतातसर्वेवैकुक्षिसंभवाः १८

त्वनिर्णायकंवेदांतशास्त्रम् १२ १३ १४ १५ १६ १७ १८ ६२ ६२

१९ त्रिसप्तकुलं एकविंशतिकुलानि २० २१ २२ प्रयागपातात् प्रयागेदेहत्यागात् भृगोः पर्वतशिखरात् २३

तेपिसर्वेजगन्नाथयांतिविष्णोःपरंपदम् नमेप्रयोजनंदेवानियोगेनेदृशेनवै १९ वैशाखधर्मनिरतःसमांत्यस्काव्रजेद्धरिम् त्रिःसप्तकुलमुद्धृत्यत्यक्तपापोतिशोभनः २० सत्यस्काममममार्गोहिप्रयातिहरिमंदिरम् नयत्तैस्तादृशैर्देवगतिंप्राप्नोतिमानवः २१ सर्वतीर्थैर्नदानाद्यैर्नतपोभिश्चनध्वनैः अपिवासकलैर्धर्मैर्युक्तोनाप्नोतितांगतिम् २२ प्रयागपातनाद्रणमध्यपाताद्भृगोश्चपातान्मरणाच्चकाश्याम् नतांगतिंयांतिजनाश्चसर्वेवैशाखनिष्ठेनचयांप्रपद्यते २३ प्रातःस्नात्वादेवपूजांचकृत्वाश्रुत्वाकथांमासमाहात्म्यसंज्ञाम् धर्मान्कृत्वान्योचितांवैष्णवांश्चसवैभवहिष्णुलोकैकनाथः २४ अप्रमाणमहंमन्येलोकंविष्णोर्जगत्पतेः योनपूर्येतकोट्योघैःसर्वतःकमलासन २५ माधवावसथेनेहसमस्तेनपितामहं विकर्मस्थाविकर्मस्थाःशून्ययोशुच्चयस्तथा २६ कृत्वावैशाखकृत्यानिलोकायांतिनृपाज्ञया योस्माकंहिमहच्छत्रुर्भवनांचविशेषतः २७ निर्माल्योजगतांनाथभवतासोमहीपतिः हित्वाहिसकलान्धर्मान्सकृद्वैशाखस्नानतः २८ असंस्कृतजनायांतिवैकुंठंहरिमंदिरम् अस्माभिस्त्वकृतापेक्षोविष्णुपादैकसंश्रयः २९ समस्तंनेष्यतेलोकंपार्थिवोनात्रसंशयः एषदंडपरोह्येषस्तवपक्ष्याभिवेदिनः ३० लोकपालत्वमतुलंमार्जितंतेनभूभुजा किमपत्येनजातेनमातुःक्लेशकरेणवै ३१ योनपातयतेशत्रुंज्येष्ठमासीवभास्करः वृथासताहियुवतिर्जातावेदकुपुत्रिणी ३२ नतस्याःस्फुरतेकीर्तिर्धनस्येवशतन्हदा यसितुर्नोद्धरेत्पापाद्धिययावाबलेनवा ३३

२४ २५ विकर्मस्थानिषिद्धकर्मकर्तारः अविकर्मस्थास्तद्भिन्ना विध्युक्तकर्मकर्तारः २६ २७ २८ २९ ३० ३१ ३२ ३३

प्रतीपः पराङ्मुखः ३४ ३५ ३६ व्यवसितं कर्त्तुंनिश्चितं ३७ ३८ इतिवैशाखटीकायां द्वादशोऽध्यायः १२ छ
अथयमस्यवचनंश्रुत्वा ब्रह्मोत्तरंददाती अस्मिन्त्रयोदशेकिमाश्चर्यमित्यादिना सतांगणेषु साधूनांसमुदायेषु २ शासनात् वैशाखध-

मातुर्जठरजोरोगःसंप्रसूतोधरातले धर्मेचार्थेचकामेचयस्प्रतीपोभवेत्कृतः ३४ मातृहाप्युच्यतेसद्भिःसपुत्रःपुरुषाधमः तन्मातानृपपत्नीचलोकविख्यातसत्क्रिया ३५ एकैकवीरसूर्लोकेवीरंचेनात्रसंशयः यथावैकीर्तिमानृजातोमहिषेमार्जनायवै ३६ नेदंव्यवसितंदेवकेनचित्क्षत्रियेनहि पुराणेषुजगन्नाथनश्रुतंपटमार्जनम् ३७ सोहंनजानामिजगत्पतीशक्रतेक्षितीशंहरितत्परंतम् प्रचोदयंतंपटहस्कघोषैर्विलोपमानंममवेश्ममार्गम् ३८ इतिश्रीस्कंदपुराणेवैशाखमाहात्म्येनारदांबरीषसंवादेयमदुःखनिरूपणंनाम द्वादशोऽध्यायः १२ छ

ब्रह्मोवाच किमाश्चर्यंत्वयादृष्टंकिमर्थंखिद्यतेभवान् सद्गणेषुकृतस्तापःसतापोमरणांतिकः १ तस्योच्चारणमात्रेणप्राप्यतेपरमंपदम् नगच्छतिहरेर्लोकंकथंभूपस्यशासनात् २ एकोपिगोविंदकृतःप्रणामःशताश्वमेधावभृथेनतुल्यः यज्ञस्यकर्तापुनरेतिजन्महरेःप्रणामोनपुनर्भवाय ३ कुरुक्षेत्रेणकिंतस्यसरस्वत्याचकिंतथा जिह्वाग्रेवर्ततेयस्यहरिरित्यक्षरद्वयम् ४ ब्राह्मणःश्वपचींभुंजन्विशेषेणरजस्वलाम् यदिविष्णुसमरणेस्मरेत्प्राप्नोतितत्पदम् ५ अभक्ष्यभक्षणाज्जातंविहायाघस्यसंचयम् प्रयातिविष्णुसायुज्यंयतोविष्णुप्रिया स्मृतिः ६ एवंविष्णुप्रियोमासोवैशाखोनामवैयम यद्धर्मश्रवणादेवमुच्यतेसर्वकिल्बिषैः ७ यातीतिकिमुवक्तव्यंतस्यानुष्ठानतत्परः यस्मिन्संगीयतेयोहिप्रीयतेपुरुषोत्तमः ८

र्माः सर्वैरनुष्ठेयाइतिवियोगात् २ ३ ४ ५ ६ ७ ८ छ

९ १० ११ समीहते यत्नंकरोति १२ शक्तिविनिष्क्रांतो शक्तिमुल्लंघ्यवर्तमाने अशक्ये इतियावत् १३ नियोगीकार्येनि

कथंनयातित्वगतिंतस्यानुष्ठानतत्परः अस्माकंजगतांनाथोजनितापुरुषोत्तमः ९ तस्येष्टान्साधयेमासिधर्मानेतान्करोत्ययम् तस्यविष्णुःप्रसन्नात्मासहायेसर्वदास्थितः १० नतस्यभूपतेःसौरेसमर्थस्त्वंचशिक्षणे नवासुदेवभक्तानामशक्यंविद्यतेक्वचित् ११ जन्ममृत्युजराव्याधिभयंवाप्युपजायते नियोगीस्वामिकार्येषुयावच्छक्तिःसमीहिते १२ तावतासत्कृतार्थःस्यान्नरकान्नैवगच्छति कार्येशक्तिविनिष्क्रांतेस्वामिनेचनिवेदयेत् १३ अनृणस्तावताभृत्योनियोगीसुखमश्नुते तस्मान्निवेदितार्थस्यनऋणंनचपातकम् १४ यत्नेकृतेस्वकर्तव्येनापराधोस्तिदेहिनः तस्मादशक्यकार्येस्मिन्नविशान्चितुमर्हसि १५ इत्युक्तोब्रह्मणासौरिः पुनरत्यन्तखिन्नधीःउवाचदीनयावाचागलद्बाष्पाकुलेक्षणः १६ प्राप्तवान्मयासर्वंत्वदंघ्रिभजनेनवै नाहंयास्येपुनःकर्तुंनियोगंपद्मसंभव १७ प्रशास्तिमहावीर्येभूपेस्मिन्भूमिमंडले चालयित्वास्वधर्मांश्चनमेकंभूपतिंविभो १८ कृतकृत्योस्मितनयोगयायांपिंडदोयथा कृपालोतादिदंकार्यंसाधयस्वममाव्ययम् १९ विज्वरस्तुततोभूयःशासनंतेकरोम्यहम् श्रुत्वाब्रह्मायमेनोक्तंपुनश्चिंतापरायणः २० तमुवाचपुनर्ब्रह्मासांत्वयन्बहुधाप्यमुं ब्रह्मोवाच नत्वनिग्राह्योत्वयाराजाविष्णुधर्मपरायणः २१ यदिच्छसियमसेकोपाद्वच्छामोत्थांतिकंहरेः निवेद्यसकलंतस्मैकर्मपश्चात्तदीरितम् २२ सएवकर्तालोकस्यधर्मस्यपरिपालकः सचदंडधरोस्माकंशास्ताकर्तानियामकः २३ नतदुक्तेस्तिप्रत्युक्तिरस्माकंविहितात्वृष नराजोक्तेस्तुप्रत्युक्तिदृश्यतेक्वापिभूतले २४ युक्तः १४ १५ १६

१७ १८ १९ विज्वरःगततापः २० २१ पश्चान्तदीरितंविष्णुप्रोक्तंकर्म(समाचर)इतिशेषः २२ २३ प्रत्युक्तिर्विरुद्धभाषणं २४

२५ २६ २७ २८ कंजजः विष्णुनाभिकमलोत्पन्नोब्रह्मा २९ ३० ३१ ३२ ३३ ३४

इत्याश्वास्ययमंतेनसाकंक्षीरांबुधिंययौ ब्रह्मातुष्टावचिन्मात्रंनिर्गुणंपरमेश्वरम् २५ सांख्ययोगैरद्वितीयमेकं
तंपुरुषोत्तमम् आविरासीत्तदाविष्णुर्ब्रह्मणासंस्तुतोहरिः २६ प्रणामंचक्रतुस्तस्मैयमोब्रह्माचसत्वरम् ता·
वुवाचमहाविष्णुर्मेघगंभीरयागिरा २७ कस्माद्युवामिहायातौकिंदुःखंदनुजैरभूत् म्लानयममुखंकस्मा·
त्केनवानतकंधरः २८ एतद्वदस्वमेब्रह्मन्नित्युक्तश्चाहकंजजः त्वदंशेसवर्येभूपालेभूमिंशासतिवैनराः २९
वैशाखधर्मनिरतायांतितेपरमव्ययम् ततोयमपुरीशून्यातेनचातीवदुःखितः ३० तेनयुद्धंचकारासौहंतुंदंड
मयाददे त्वच्चक्रेणपराभूतोययावद्यममांतिकम् ३१ नचशक्तोवयंदंडंत्वद्भक्तानामहात्मना तस्मात्त्वामे
वशरणंवयंप्राप्तामहाविभो ३२ तस्माद्धतंदंडयित्वापालयैनंधर्मस्वकम् इत्युक्तःप्रहसन्प्राहब्रह्माणंय
ममेवच ३३ लक्ष्मींवापिपरित्यक्षेप्राणान्देहमथापिवा श्रीवत्संकौस्तुभंमालांवैजयंतीमथापिवा ३४
श्वेतद्वीपंचवैकुंठंक्षीरसागरमेवच शेषंचगरुडंचैवनभक्तंत्यक्तुमुत्सहे ३५ विसृज्यसकलान्भोगान्मदर्थंत्य
क्तजीवितान् मदात्मकान्महाभागान्कथंतांस्त्यक्तुमुत्सहे ३६ तस्मात्त्वदुःखशमनेह्युपायंकल्पयाम्यहम्
तस्यचायुर्मयादत्तमयुतंभूपतेर्भुवि ३७ गतान्यष्टौसहस्राणितत्रेदानींनरांतक आयुःशेषेतेननीतेमत्सायु
ज्यंगतेपिच ३८ भविष्यतिततोराजावेनोनामदुरात्मवान् सलुंपतिमहाधर्मान्सर्वानेतान्श्रुतीरितान् ३९
तदावैशाखधर्माश्चविच्छिन्नास्युर्नसंशयः स्वकृतेनैवपापेनवेनोदग्धोभविष्यति ४०

३५ ३६ अयुतं दशसहस्रसंख्यापरिमितं ३७ दुरात्मवान् दुष्टबुद्धिः ३८ ३९ ४० ४१ ४२

४१ सहस्रे पुरुषाणांसहस्रे ४२ ४३ ४४ ४५ ४६ ४७ कुर्वंति आचरंति 'वैशाखधर्मान्' इतिशेषः ४८

पश्चादहंपृथुर्भूत्वापुनर्धर्मान्प्रवर्तये तदाजनेषुप्रख्यातान्वैशाखोक्तान्करोम्यहम् ४१ मद्भक्तोमद्गतप्राणोयस्तु
विन्यस्तसंग्रहः एकःसहस्रेभवितातस्यप्रख्यातयोहिमान् ४२ कश्चिदेवहिजानातुधर्मानेतान्क्षितौमम ततस्त्वंभ
विताकार्यंमाविषीदनरांतक ४३ दापयिष्यामितेभागंमासेस्मिन्माधवेपिच नरैःसर्वैश्चवैशाखधर्मनिष्ठैर्महात्म-
भिः ४४ भूपेनापिचकालेनखेदंशमयतेनच वीर्यशुल्कंतुतेभागंशत्रोर्भुंक्तेबलाधिकात् ४५ गृण्हन्गृण्हन्स्वकंभा
गंनभागीदुःखमर्हति त्वमुद्दिश्यनकुर्वंतिप्रत्यहंयेनराभुवि ४६ स्नानंचार्घ्यंसोदकुंभंदध्यन्नंचांतिमेदिने वैशाखेस
कलकर्मतेषांचविफलभवेत् ४७ तस्मात्क्रोधंत्यजनृपभागदेमत्परायणे येकेचापिचकुर्वंतिलोकेतेभागदानराः ४८
वैशाखोक्तेमहाधर्मेतेषांविघ्नंचमाकुरु मामेवयेयजंत्यद्धात्वांहित्वाधर्मपालकम् ४९ मदाज्ञयामहाभागतदादंडंचत्वं
कुरु नृपाद्भागंदापयितुंस्कंदंप्रेषयामिच ५० मच्छासनात्सवैगत्वाभागंतेदापयिष्यति तिष्ठत्वेवंयमस्त्वस्यसन्निधौ·
गरुडासनः ५१ स्कंदंप्रेषयामासनृपबोधयितुंविभुः सोपिगत्वाबोधयित्वापार्श्वंचपुनरागमत् ५२ इत्याश्वास्ययमं
विष्णुस्तत्रैवांतरधीयत यमस्वयंशातयित्वात्वमनुज्ञाप्यवेगतः ५३ अतिविस्मयमापन्नोययौधामसहानुगैः यमो
पिस्वपुरींप्रायात्किंचित्संहृष्टमानसः ५४ पश्चाद्विष्णोर्निदेशेनस्कंदपरिबोधितः भागदाःसकलालोकायेवैशाखप-
रायणाः ५५ धर्मराजंपुरस्कृत्ययेनकुर्वंतिमानवाः तेषांहिस्वयमादत्तेपुण्यंवैशाखसंभवम् ५६ कुर्याच्चप्रत्यहंस्नानं
दद्यादर्घ्यंयमायवै वैशाखेसकलंपुण्यमन्यथाविफलंभवेत् ५७

४९ ५० ५१ अतिविस्मयेत्यादिश्लोका
र्द्धेब्रह्मेति कर्तृपदमध्याहार्यं ५२ ५३ ५४ ५५ ५६ अन्यथायमायार्घ्यमदत्त्वा ५७ ५८ ५९

५८ ५९ ६० सीदते वृत्तिहीनायेतियावत् ६१ ६२ ६३ ६४ ६५ ६६ ६७

सोदकुंभंचदध्यन्नंपौर्णमास्यांचमाधवे धर्मराजंसमुद्दिश्यदातव्यंप्रथमंजनैः ५८ पश्चात्पितॄन्समुद्दिश्यगुरुमुद्दि
श्यवैनरः मधुसूदनमुद्दिश्यपश्चाद्देवंजनार्दनम् ५९ शीतलोदकदध्यन्नतांबूलंचसदक्षिणम् सफलंकांस्यपात्रस्थं
ब्राह्मणायनिवेदयेत् ६० दद्याच्चप्रतिमांदिव्यांमधुसूदनदेवताम् मासधर्मप्रवक्त्रेचदद्याद्विप्रायसीदते ६१ नमे
वधमवक्तारंपूजयेद्विभवैःस्वकैः इत्यादिष्टःस्कंदेनतथाराजाचकारह ६२ सनीत्वाचायुषःशेषंभुक्त्वाभोगान्यथेप्सि
तान् पुत्रपौत्रादिभिर्युक्तोजगाममहारिमंदिरम् ६३ वैकुंठस्थेनृपेतस्मिन्वेनोराजाधमोभवत् सर्वेधर्माश्चवैशाखध
र्माश्चापिविशेषतः ६४ दुरात्मनाचतेनैवलुप्ताएवबभूविरे नप्रख्याताःपुनर्भूमौभूरिशोमोक्षहेतवः ६५ यःकश्चि
न्नैवजानातिवैशाखोक्तानिमान्शुभान् बहुजन्मार्जितपुण्येपरिपक्वेउपागते ६६ वैशाखोक्तेषुधर्मेषुमतिरत्यंतिकी
भवेत् मैथिलउवाच पूर्वमन्वंतरस्थोहिवेनोराजादुरात्मवान् ६७ अयंवैवस्वतस्थोहिराजावैक्ष्वाकुनंदनः इ
तिश्रुतंमयापूर्वमिदानींचोच्यतेत्वया ६८ अयंवैकुंठगःपश्चाद्वेनोराजाभविष्यति इत्येतत्संशयंछिंधिश्रुतदेवमहाम
ते ६९ श्रुतदेवउवाच पुराणेषुचवैषम्यंयुगकल्पव्यवस्थया नचाप्रामाण्यशंकातेकथायाश्चत्यजेक्वचित्
७० गतेदैनंदिनेकल्पेयथैषाशाश्वतीशुभा मार्कंडेयेनमेप्रोक्तासाचोक्तातवभूपते ७१ तस्मान्नख्यातिमायांतिधर्मा
वैशाखसंभवाः कश्चिदेवहिजानातिविरक्तोविष्णुतत्परः ७२ इतिश्रीस्कंदपुराणेवैशाखमाहात्म्येनारदांबरीष
संवादेयमदुःखसांत्वननामत्रयोदशोऽध्यायः १३

वैवस्वतस्थः वैवस्वतमन्वंतरोत्पन्नः ६८ ६९ ७०

७१ ७२ इतिवैशाखमाहात्म्यटीकायांत्रयोदशोऽध्यायः १३ ६९ ६९ ६९ ६९

अथचतुर्दशे स्नानस्यकथायाश्चमाहात्म्यंकथयति १ अन्यां अन्यधर्मविषयां २ ३ ४ ५ ६ ७

श्रुतदेवउवाच यःप्रातःस्नातिवैशाखेमेषसंस्थेदिवाकरे मधुसूदनमभ्यर्च्यकथांश्रुत्वाहरेरिमां १ सतुपापवि
निर्मुक्तोयातिविष्णोःपरंपदम् वाच्यमानांकथांहित्वायोन्यांसेवतमूढधीः २ रौरवंनरकंप्राप्यपैशाचींयोनिमाप्नु
यात् अत्रैवोदाहरंतीममितिहासंपुरातनम् ३ पापघ्नंपावनंधर्म्यंसद्योवंद्यंपुरातनम् पुरागोदावरीतीरेक्षेत्रे
ब्रह्मेश्वरेशुभे ४ दुर्वासशिष्यौपरमहंसौब्रह्मैकनिष्ठितौ सदैवोपनिषद्विद्यानिष्ठितौनिरपेक्षितौ ५ भिक्षा
मात्राशिनौपुण्यौतौगुहावासिनावुभौ सत्यनिष्ठतपोनिष्ठावितिख्यातौजगत्त्रये ६ तयोर्मध्येसत्यनिष्ठःसदावि
ष्णुकथापरः श्रोतृणामप्यभावेचव्याख्यातृणांतथानृप ७ तदाकर्मकलानित्याःकरोत्यद्धामुनीश्वरः श्रोताचेद
स्तियःकश्चित्तस्मैव्याख्यात्यहर्निशम् ८ योद्व्याख्यातिकश्चिद्वापुण्यांविष्णुकथांशुभाम् तदासंकुच्यकर्माणिशृ
णोतिश्रवणेरतः ९ अतिदूरस्थतीर्थानिदेवतायतनानिच हित्वाकथांविरोधीनितथाकर्माणिभूरिशः १० शृणो
तिचकथांदिव्यांश्रोतृभ्योवक्तिवैस्वयम् विनाकथांनजानातिसेव्यमन्नंनरेश्वर ११ व्याख्यातिचगृहेस्वस्यवक्ता
रोगाद्युपद्रुतः कूपस्नानपरोभूत्वाशृणोत्येवकथांमुनिः १२ कथायाश्चविरामेतुस्वकृत्यंसाधयत्यलम् कथांवैशृ
ण्वतःपुंसोजन्मबंधोनविद्यते १३ सत्वशुद्धिस्ततोविष्णावरतिश्चैवगच्छति रतिश्चजायतेविष्णौसौहृदंचैवसाधु
षु १४ नीरजंनिर्गुणंब्रह्मसद्योहृद्यवरुध्यते ज्ञानहीनस्यवैपुंसःकर्मवैनिष्फलंभवेत् १५ बहुधाचरितंचापि
यथैवांधकदर्पणम् कर्माणिक्रियमाणानिबहुधाशोचितात्मभिः १६

८ ९ १० ११ १२ १३ १४ नीरजं रजोगुणरहितम् १५ १६ ६९ ६७

१७ १८ १९ २० २१ २२ २३ २४ कर्मलोपभयात् आन्हिकलोपभयात् २५

सत्वशब्दैर्भवंत्येवसत्वशब्दइत्याश्रुतिंव्रजेत् श्रुतेरेकज्ञानमासाद्यज्ञात्वाध्यानायकल्पते १७ बहुधाश्रवणंध्यानंमन
नंश्रुतिचोदितं यत्रविष्णुकथानास्तियत्रसाधुजनानहि १८ साक्षाद्गंगातटंवापित्याज्यमेवनसंशयः यद्देशेतुलसीना
स्तिवैष्णवधामवाशुभम् १९ यत्रविष्णुकथानास्तिमृतस्तत्रतमोव्रजेत् यद्ग्रामेवैष्णवधामनास्तिकृष्णमृगोपिवा २०
यत्रविष्णुकथानास्तिसाधवोवातदाश्रयाः मृतस्तत्रपुमान्क्षिप्रंश्वानयोनिंशतंव्रजेत् २१ विचार्योपनिषद्विद्यामितिनि·
श्चित्यवैमुनिः सदाविष्णुकथासक्तोविष्णुस्मृतिपरायणः २२ नकिंचिदधिकंजातुमन्यतेश्रवणात्परं इतरस्तुतपोनिष्ठः
कर्मनिष्ठोदुराग्रही २३ नव्याख्यातिस्वयंवापिनशृणोतिचसत्कथां वाच्यमानांकथांहित्वातीर्थस्नानायगच्छति २४
तीर्थेपिचप्रवृत्तायांकथायांभूमिपालक कर्मलोपभयाद्दूरंयातिचाल्पशक्तिनः २५ व्रजंतिगृहकृत्यार्थंसंगमात्परतो
जनाः नश्रोतारोनवक्तारस्तस्यपार्श्वेनुकर्मिणः २६ दुरात्मनस्तुदुर्बुद्धेः कालएवंक्षयंगते जिह्वांश्रुतिंचनक्वापिसं
प्राप्ताह्निकथाविभो २७ अश्रोतृत्वादवक्तृत्वाद्दुर्बुद्धित्वाद्दुरात्महान् पश्चात्पंचत्वमासाद्यस्वधर्मेणवैमुनिः २८
पिशाचोभूच्छमीवृक्षेच्छिन्नकर्णोक्षयोबलः निराश्रयोनिराहारःशुष्ककंठोष्ठतालुकः २९ एवंवैखिद्यमानस्यसमादि
व्यायुतागताः नापश्यत्स्वस्यत्रातारंनिराहारोतिदुःखितः ३० स्वकृतंचिंतयानस्यमत्तोन्मत्तइवाभ्रमत् क्षुधयापर्यटन्वापि
निर्वृतिंनापमूढधीः ३१ कृशानुसदृशोवायुरंगंस्पृष्ट्वाकृतात्मनः कालाग्नितुल्याश्चापश्चफलपुष्पादिकंविषम् ३२ नक्का
पिसुखमापेदेकर्मठोदीनधीरयं एवंव्यवसितेतस्मिन्नरण्येजनवर्जिते ३३

२६ २७ २८ शुष्ककंठोष्ठतालुकः शुष्कंकंठो-
ष्ठतालुकंयस्य २९ दिव्याः अयुतं इतिच्छेदः संधिरार्षः दिव्यादेवसंबंधिन्यः अयुतंदशसहस्रसंख्यापरिमिताः समाः वर्षाणि ३० ३१
३२ ३३

पैठिणसीं महाराष्ट्रभाषायां पैठणनाम्नाप्रसिद्धां ३४ ३५ ३६ ३७ ३८ वाच्यमानः त्वमिदंकुर्वितिउक्तः ३९

कथयारहितेक्षेत्रेस्वाश्रयेसाधुवर्जिते दैवादायात्सत्यनिष्ठस्तुदापैठिनसींपुरीम् ३४ गच्छन्मार्गेददर्शासौछिन्नकर्णं
बहुव्यथं हृष्टात्मानंद्रावयंतरुदंतंक्षुधयातुरम् ३५ माभैषीतिसमाभाष्य कोसीत्याहमुनीश्वरः दृशोदृशीचक
स्मात्तेनतेदुःखमतःपरं ३६ इत्याश्वस्तोमुनाच्छिन्नकर्णःप्राहातिविह्वलः तपोनिष्ठोयतिरहंशिष्योदुर्वाससःपरं ३७
ब्रह्मेश्वरक्षेत्रवासीकर्मनिष्ठोदुराग्रही कर्मलोपभयान्मौढ्यान्मयादुर्बुद्धिनामुने ३८ साधुभिर्वाच्यमानोपिनादृताविष्णु
सत्कथा नव्याख्यातात्वश्रोतृभ्यः कथाकर्मनिकृंतनी ३९ तेनकर्मविपाकेनमहताहंमृतिंगतः छिन्नकर्णोभवन्नाम्ना
पिशाचोदुःखविह्वलः ४० नपश्याम्यत्रत्रातारंदुःखादस्मात्कथंचन तवदृष्टिपथंयातोदिष्ट्याहंगतकल्मषः ४१ त्रा
यमेदेवतास्तुष्टागुरवःसाधवश्चये हरिश्चमेप्रसन्नोभूद्यतस्तेदर्शनंमम ४२ पपातपादयोर्भूमौत्राहित्राहीतिवैरुद
न् ततस्तुकृपयाविष्टःसत्यनिष्ठोमहायशाः ४३ दोर्भ्यामुत्थापयामासशंतमाभ्यांमुनीश्वरः ततस्त्वपउपस्पृश्यददौ
पुण्यमनुत्तमम् ४४ वैशाखमासमाहात्म्यश्रवणस्यमुहूर्तजं तेनपुण्यप्रभावेनसद्योध्वस्ताखिलाशुभः ४५ पि
शाचदेहनिर्मुक्तोदिव्यदेहधरोभवत् दिव्यंविमानमारुह्यतंप्रणम्यमहामुनिं ४६ आमंत्र्यचपरिक्रम्ययर्योविष्णोःप
रंपदं सत्यनिष्ठस्ततोधीमान्ययौपैठिनसींपुरीं ४७ माहात्म्यश्रवणस्यैवंचिंतयानःपुनःपुनः श्रुतदेवउवाच
यत्रविष्णुकथापुण्याशुभालोकमलापहा ४८ तत्रसर्वाणितीर्थानिक्षेत्राणिविविधानिच यत्रप्रवहतेपुण्याशु
भाविष्णुकथापगा ४९

४० ४१ ४२ ४३ ४४ सद्योध्वस्ताखिलाशुभः
सद्यः तत्क्षणमेवध्वस्तं अखिलंअशुभंपानकंतस्य ४५४६४७ माहात्म्यश्रवणस्य एवंचिंतयानः इत्यत्रप्रभावमितिशेषः ४८ ४९

५० इतिवैशाखमाहात्म्यटीकायांचतुर्दशोऽध्यायः १४ छ वैशाखेजलदानमाहात्म्यंप्रतिपादयितुं इतिहासं प्रस्तौति भूप इत्या

तद्देशवासिनांमुक्तिः करसंस्थानसंशयः ५० इतिश्रीस्कंदपुराणेवैशाखमाहात्म्येनारदांबरीषसंवादेकथाप्रशं
सायांपिशाचमुक्तिप्राप्तिर्नामचतुर्दशोऽध्यायः १४ छ श्रुतदेवउवाच भूयःशृणुष्वभूपालमाहात्म्यंपापना
शनम् वैशाखस्यचमासस्यवल्लभस्यमधुद्विषः १ पुरापांचालदेशेतुराजापुरुयशाभवत् तनयोभूरियशसः
पुण्यशीलस्यधीमतः २ पितर्युपरतेभूपराज्यस्थोधर्मलालसः शौर्यौदार्यगुणोपेतोधनुर्विद्याविशारदः ३
शशासपृथिवींसर्वांस्वधर्मेणमहामतिः पूर्वजन्मजलादानात्दोषेणमहतावृतः ४ संपद्धानिमवापासौकाले·
नैक्ष्यतानघ हयागजाम्मृतिंयातामहद्रोगेणपीडितः ५ दुर्भिक्षमतुलंचासीन्निर्मानुष्यविधायकं राज्यंकोशं
तदाचासीद्गजभुक्तकपित्थवत् ६ बलहीनंनृपंज्ञात्वाकोशराष्ट्रविवर्जितम् तंजेतुमेषसमयइतिनिश्चितमान·
साः ७ आजग्मुःशतशोभूपरिपवस्तस्यभूपतेः जिग्युर्युद्धेनतंभूपंपांचालविषयाधिपम् ८ पराजितस्ततोरा
जाविवेशगिरिगह्वरे शिखिन्याभार्ययासाकंधान्यादिगणसंयुतः ९ अज्ञातपद्धतिश्चान्यैर्बहुदुःखसमाकु
लम् त्रिपंचाशत्समाश्चैवनीतास्तेनविलीयता १० चिंतयामासभूपालःकिमेतदितिभूरिशः कर्मणाजन्म
शुद्धोहंमातृपितृहितेरतः ११ गुरुभक्तःसदाक्षिण्योब्रह्मण्योधर्मतत्परः दयावान्सर्वभूतेषुदेवभक्तोजिते·
न्द्रियः १२ नभ्रातामेनपुत्रोमेनचमेसुहृदोहिताः दयापौरुषविख्याताःकुलीनस्यापिमेकुतः १३

दिना १ २ ३ पूर्वजन्मनि वैशाखमासे जलादानात् इत्यर्थः ४ ५ गजभुक्तकपित्थंयथाभस्मी·
भवति तथासर्वंभस्मीभूतमित्यर्थः ६ ७ ८ ९ १० ११ १२ १३

१४ १५ १६ १७ १८ १९ ब्राह्मणौवदतां कथ्यतामित्यर्थः २० २१ २२ २३

केनवाकर्मणाचास्यंदारिद्र्यंभूरिदुःखदं केनवापजयोमेद्यकेनवावनवासिता १४ इतिचिंताकुलोराजागुरुंसस्माररवि
न्वधीः याजोपयाजकौनामसर्वज्ञौमुनिसत्तमौ १५ आजग्मतुर्मुनींद्रौतौराज्ञाहूतौमहामती तौदृष्ट्वासहसोत्थाय
राजापांचालवल्लभः १६ ननामशिरसाभक्त्याप्रवासेनातिपीडितः राजचिन्हविहीनश्चकेनाप्यज्ञानपद्धतिः १७ तूष्णीं
तस्थौमुहूर्तंहिपतित्वाभुविपादयोः दोर्भ्यामुत्थापितस्ताभ्यांपरिमृष्टाश्रुलोचनः १८ विधिवत्पूजयामासवन्यैरेवार्हणैः
शुभैः सूपविष्टौतुतौविप्रौपप्रच्छाननतकंधरः १९ ब्राह्मणौवदतांदुःखकारणंचाक्षितीशतुः कर्मणाजन्मशुद्धस्यपितृ-
देवप्रियस्यच २० पापभीरोःकृपालोश्चगुरुभक्तस्यमेकुतः दारिद्र्यंकोशहानिश्चरिपुभिश्चपराभवः २१ कस्मादरण्यवा
सश्चकुतएकाकितामम् नपुत्रोनचमेभ्रातानहिताःसुहृदश्चमे २२ दुर्भिक्षवाकुतश्चासीद्देशेमत्पालितेनघे एतद्विज्ञा
यमेब्रूतांकारणंमुनिपुंगवौ २३ इत्युक्तौतौमुनिश्रेष्ठौभूतेनात्यंतदुःखिना प्रत्यूचतुर्महात्मानौकिंचिद्ध्यानपरायणौ
२४ याजोपयाजावूचतुः शृणुभूपभवस्यावस्तवदुःखस्यकारणम् पुराभूपमहापापीव्याधस्त्वंदशजन्मसु
२५ निष्ठुरःसर्वलोकानांसदाहिंसापरायणः धर्मलेशाकरःक्वापिनदमोनचवैशमः २६ नजिव्हाग्रेकिनामानिर्वि-
ष्णोर्वापिकथंचन चेतःस्मरतिगोविंदचरणांबुरुहद्वयम् २७ नप्रणामःकृतःक्वापिशिरसापरमात्मने नवजन्मानि
तेभूपगतान्येवंदुरात्मनः २८ दशमेजन्मनिप्राप्तेव्याधस्त्वंसह्यभूधरे निष्ठुरःसर्वलोकानांनराणांत्वंनरांतकः
२९ दयाहीनःशस्त्रजीवीसदाहिंसापरायणः निर्गुणःसकलत्रस्त्वमार्गपीडाकरःशठः ३०

२४ २५ २६ २७ २८ २९ ३० [illegible] [illegible]

३६

गौडदेशस्थानां गौडदेशोद्भवानां नैजं स्वकीयं ३१ ३२ ३३ ३४ ३५ ३६ ३७ सर्वभूतानां अंतके· नाशकरे क्रूरप्राणिनिवासात् एतादृशेपथिमार्गे ३८ घर्मपीडितौ घर्मेण सूर्यकिरणतापेन पीडितौ दुःखितौ ३९ जटाप्रसिद्धा चीरं

प्रजानांगौडदेश्यानांराक्षसोमानुषाशनः एवंचाब्दान्यतीतानिनैजंहितमजानतः ३१ बालापत्यमृगाणांचपक्षि
णांचवधात्तव दयाहीनस्यदुर्बुद्धेर्जन्मन्यस्मिन्नपुत्रता ३२ विश्वासघातकत्वेनभ्रातरोनैवसोदराः मार्गपीडाकर
त्वेनसुहृज्जनविवर्जितः ३३ साधूनांचतिरस्काराच्छत्रुभिस्तेपराजयः कदाप्यदत्तदोषेणदारिद्र्यंपतितंगृहे ३४
सदैवोद्वेगकारित्वात्प्रवासस्तेदुरासदः सर्वेषामप्रियत्वाच्चदुःखमत्यंतदुःसहं ३५ निराहारोऽप्यतःपूर्वंसदाक्रूरेणकर्म
णा तस्माद्राज्यापहारस्तेजन्मन्यस्मिन्महामते ३६ अथतेसत्कुलीनत्वेहेतुंचापिब्रवीम्यहं यदाभूर्गौडदेशीयो
त्यंतिमेव्याधजन्मनि ३७ स्वकर्मनिरतेक्रूरविपिनेकंटकाविले तिष्ठत्यथदयाहीनेसर्वभूतांतकेपथि ३८ वैश्यावा·
जग्मतुर्दिव्यौधनाढ्यौघर्मपीडितौ मुनिश्चकर्षणोनामवेदवेदांगपारगः ३९ जटाचीरधरःपुण्यःकमंडलुपरिग्रहः
तान्दृष्ट्वाधनुरादायमार्गंरुध्वाव्यवस्थितः ४० अनुद्रुत्यशरीवैश्यौकृत्वाच्छिन्नशरीरकौ तयोरेकंचत्वंहत्वागृहीत्वा
खिलंतत्पणम् ४१ अपरंहंतुमुद्युक्तेसदुद्रावभयाद्द्रुतम् पणंगुल्मेविनिक्षिप्यभीतःप्राणपरीप्सकः ४२ कर्षणोपि
मुनिःशीघ्रंव्याधान्मृतिविशंकया भ्रांतपथधावमानःसन्तृषाघर्मप्रपीडितः ४३ मूर्छामापगलत्स्वेदःसंज्ञामात्रा·
वशेषितः विहायैनंदुद्रुवेचवैश्योजीवनतत्परः ४४ त्वंतावनुद्रुतोदृष्ट्वामूर्छितंपथिभूसुरम् पणंकुत्रविनिक्षिप्तं
कियद्दूरंगतोवणिक् ४५

ल्कलं तयोर्धरः धारकः ४० शरी शरोबाणः सोस्यास्ति· बाणसहितः पणं भांडम् वित्तमित्यर्थः ४१ गुल्मेलतादीनांग्रंथिरूपे ४२ ४३ ४४ ४५

नागरंशुंठीचूर्णं ४६ कृमिकर्दमाभ्यां संयुजासहितेन ४७ ४८ उल्बणं अनिष्टदुःखदं ४९ पलायता धावमानेन परस्मैपदमार्षं

इतिपृष्टंद्विजंश्रांतंमुज्जीवयितुमुद्यतः फूत्कृत्वाकर्णयोस्तस्यनागरंस्मृतिकारणं ४६ पल्वलस्थोदकेनैवकृमिकर्दम संयुजा नेत्रेसंमृज्यश्रांतस्यपर्णैःसंवीज्यतन्मुखे ४७ ससंज्ञंचमुनिंकृत्वात्वमात्थस्वस्थमानसः माशंकांतेमुनेकार्यामत्तःशस्त्रभृतोवने ४८ निष्किंचनःसुखीलोकेकुतस्तेभयमुल्बणम् भिन्नपात्रेणजीर्णेननमेकिंचिद्भविष्यति ४९ एतावद्दूरमेविद्वन्वणिक्कुत्रपलायितः कुत्रगुल्मेधनंक्षिप्तंत्वनशीघ्रपलायता ५० अन्यथात्वांहनिष्यामियदि·मिथ्यावदिष्यसि कर्षणउवाच धनंगुल्मेविनिक्षिप्तंमागादस्मात्पलायितः ५१ इतिप्राहभयात्सोपिपृष्टः प्राणपरीप्सया गच्छविप्रसुखंमार्गंमत्तोभीतिंविहायच ५२ इतोविदूरेसलिलंतडागेवर्ततेशुभम् तत्पीत्वा·सलिलंपुण्यंगच्छग्रामंगतश्रमः ५३ अधुनैवागमिष्यंतिराजकीयाःपथाजनाः मत्पदान्वेषणेसक्ताःश्रुत्वारावंवणिक्पतेः ५४ तृषार्तमनुगंतुंमेनशक्यंत्वांततोद्विज वीजयानेनपर्णेनघर्मःकिंचिद्गमिष्यति ५५ तस्मैदत्वापलाशंच·त्वमागाविपिनंपुनः तेनपुण्यप्रभावेनवैशाखेघर्मघर्घरे ५६ स्वकार्यार्थंकृतेनापिमुनेस्त्राणायपद्धतौ जन्मासीत्तेमहापुण्येराजवंशेतिविस्तृते ५७ यदीच्छसिसुखंराज्यंधनधान्यादिसंपदः स्वर्गापवर्गौयदिवासायुज्यंवाहरेःपदं ५८ कुरुवैशाखधर्मांस्त्वंसर्वसौख्यमवाप्स्यसि मासोयंमाधवोनामतृतीयाचाक्षयाह्वया ५९ गांचसकलसस्तूता·ख्यांदेहिविप्रायसीदते तेनतेकोशपूर्तिःस्याच्छय्यांदेहिसुखंभवेत् ६० कुरुच्छत्रप्रदानंचसाम्राज्यंतेभविष्यति स्नानंकुरुयथान्यायंतथैवार्चयमाधवम् ६१

५० ५१ ५२ ५३ , आरावं आक्रोशम् ५४
५५ पलाशंपत्रम् ५६ ५७ ५८ ५९ ६० ६१ ६२

६२ ६३ ६४ ६५ ६६ राजानं, 'कथयित्वाइतिशेष आमंत्र्य आपृच्छ्य ६७ ६८ ६९

देहित्वंप्रतिमांदिव्यांकृत्वातेनजयोभवेत् आत्मतुल्यगुणान्पुत्रान्यदिकामयसेनृप ६२ सर्वभूतहितार्थायप्रपादानंच
त्वंकुरु वैशाखोक्तानिमान्धर्मान्सम्यगाचरभूमिप ६३ तेनतेसकलालोकावशंयांतिनसंशयः निष्कामकेनचित्तेनय
दिधर्मान्करिष्यसि ६४ वैशाखपुण्यमासेस्मिन्प्रीतयेमधुघातिनः प्रत्यक्षोभवितविष्णुस्तवनिर्मलचेतसः ६५
येनचाचरिताःपुंसाधर्मास्त्वेतेशुभावहाः तेषांचत्वक्षयालोकाःपुराणकवयोविदुः ६६ एतत्सर्वंतवप्रोक्तंयथादृष्टंय
थाश्रुतम् इतिराजानमामंत्र्यब्राह्मणौचपुरोधसौ ६७याजोपयाजकौनामजग्मतुस्तौयथागतौ ततोराजामहा
वीर्यःपुरोधाभ्यांचबोधितः ६८ वैशाखधर्मान्सकलांश्चकार श्रद्धयान्वितः यथोपदिष्टंचतथामधुसूदनमर्चयत्
६९ ततोलब्धप्रभावःसन्बंधुभिःसकलैर्वृतः पांचालनगरींप्रापहतशेषबलान्वितः ७० ततस्तुशत्रवोभूपउपश्रुत्य-
चभूपतेः प्रवेशंचपुरस्याथपुनराजग्मुरुद्धताः ७१ तदापांचालभूपेननृपाणामभवद्रणम् जिग्येसर्वान्महाबाहु
नेकएवमहारथः ७२ पलायितेषुभूपेषुनानादेशापथिष्वपि राज्ञांकोशगजानश्वान्स्वयंजग्राहवीर्यवान् ७३ अ-
श्वानांनिर्बुदंचैवगजानांचत्रिकोटिकं रथानामर्बुदंचैवदीर्घग्रीवायुतंतथा ७४ रासभाणांत्रिलक्षाणिप्रापयामास
तांपुरीम् वैशाखधर्ममाहात्म्यात्क्षणात्सर्वेचभूभृतः ७५ करदाभग्नसंकल्पाःपादाक्रांताबभूविरे सुभिक्षमतु
लंचासीत्पांचालविषयेषुच ७६ एकछत्रमभूद्राज्यंप्रसादान्मधुघातिनः पुत्राःपंचापितस्यासन्शौर्यौदार्यगु-
णान्विताः ७७

७० ७१ ७२ ७३ अर्बुदं दशकोटिसंख्या

दीर्घग्रीवा उष्ट्राः तेषामयुतं दशसहस्राणि ७४ ७५ ७६ ७७ ६२ ६२

७८ ७९ ८० ८१ ८२ ८३ मत्तोनवहिंतः उन्मत्तश्चित्तविक्षेपवान् ८४ इतिवैशाखमाहात्म्यटीकायांपंचद

धृष्टकीर्तिर्धृष्टकेतुर्धृष्टद्युम्नस्तथापरे विजयश्चित्रकेतुश्चमयूरध्वजसन्निभाः ७८ अनुरक्ताःप्रजाश्चासन्धर्मेणाप्र
तिपालिताः वैशाखस्यप्रतापेनप्रत्ययस्तत्क्षणादभूत् ७९ पुनश्चकारतान्धर्मान्पांचालनगरीश्वरः अकामुकेनचि
त्तेनप्रीतयेमधुघातिनः ८० धर्मेणानेनसंतुष्टोभगवान्मधुसूदनः अक्षयायांतृतीयायांप्रत्यक्षःसमजायत ८१ तंदृ
ष्ट्वाविस्मितोभूत्वापरमात्मानमच्युतम् नारायणंचतुर्बाहुंशंखचक्रगदाधरम् ८२ पीतांबरधरंदेवंवनमालाविभूषि
तम् सलक्ष्मीकंसानुगंचगरुडोपरिसंस्थितं ८३ निरीक्ष्यदुःसहंतेजः सद्योमीलितलोचनः उत्पतन्संपतन्हर्षान्
मत्तोन्मत्तइवभ्रमन् ८४ पुलकांकितसर्वांगोगलद्बाष्पाकुलेक्षणः तुष्टावपरयाभक्त्याप्रांजलिःप्रणतोभुवि ८५
इतिश्रीस्कंदपुराणेवैशाखमाहात्म्येनारदांबरीषसंवादेपांचालदेशाधिपतेर्जयप्राप्तिर्दरिद्रनाशनंनामपंचदशो
ऽध्यायः १५ छ श्रुतदेवउवाच तद्दर्शनाह्लादपरिप्लुताशयःसद्यःसमुत्थायननाममूर्ध्ना चिरंनिरीक्ष्या
कुललोचनोत्यमुंविश्वात्मदेवंजगतामधीशम् १ दधारपादाववनिज्यतज्जलंयत्पादजाब्रह्मजगत्पुनाति समर्चया
मासमहाविभूतिभिर्महार्हवस्त्राभरणानुलेपनैः २ स्रक्धूपदीपामृतभक्षणादिभिस्त्वग्गात्रवित्तात्मसमर्पणेन तु-
ष्टावविष्णुंपुरुषंपुराणंनारायणंनिर्गुणमद्वितीयम् ३ निरंजनंविश्वसृजामधीशंपरात्परंपद्मभवादिवंदितं यन्माय
यातत्त्वविदुत्तमाजनाविमोहिताविश्वसृजामधीश्वरम् ४ मुह्यंतिमायाचरितेषुमूढागुणेषुचित्रंभगवद्विचेष्टितं अनी
हएतद्बहुधैकआत्मनासृजत्यवत्यत्तिनसज्जतेप्यथ ५

शोऽध्यायः १५ छ पुरुयशसाकृता विष्णुस्तुतिस्तस्मै विष्णुनाद-
त्तंवरप्रदानं पुरुयशसोविष्णुसायुज्यंचवर्ण्यते १ २ ३ ४ आत्मना स्वमायया ५ छ

सत्वं नदाख्यंगुणं ६ ७ ८ प्रवृद्धा वृद्धिं गतास्तर्षो वासनायस्य ९ १० पुमर्थाधर्मार्थकाममोक्षाख्याः पुरुषार्थास्ते-

समस्तदेवासुरसौख्यदुःखप्राप्त्युद्भवान्पूर्णमनोरथोपि तत्रापिकालेस्वजनाभिगुप्त्यैबिभर्षिसत्वंखलनिग्रहाय
६ तमोगुणराक्षसबंधनायरजोगुणनिर्गुणविश्वमूर्ते दिष्ट्यात्वदंघ्रिप्रणताघनाशनंतीर्थास्पदंहृदिधृतंसुविपक्व-
योगैः ७ उत्सिक्तभक्त्युपहताशयजीवभावाःप्रापुर्गतिंतवपदस्मृतिमात्रतोये भवाख्यकालोरगपाशबंधःपुनः
पुनर्जन्मजरादिदुःखैः ८ भ्रमामियोनिष्वहमाखुभूक्षवत्प्रवृद्धतर्षस्तवपादविस्मृतेः नूनंनदत्तंनचतेकथासु
तानसाधवोजातुमयापिसेविताः ९ तेनारिभिर्ध्वस्तपरार्ध्यलक्ष्मीर्वनंप्रविष्टःस्वगुरुत्यधस्मरन् स्मृतोच्च-
तोमासमुपेत्यदुःखात्संबोधयांचक्रतुरार्तबंधू १० वैशारदधर्मैःश्रुतिचोदितैःशुभैःस्वर्गापवर्गादिपुमर्थहेतुभिः
नह्यर्चितोहंकृतवान्समस्तान्शुभावहान्माधवमासधर्मान् ११ तस्माद्भूम्नेपरमःप्रसादस्तेनाखिलाःसंपद
ऊर्जिताइमाः नाग्निर्नसूर्योनचचंद्रतारकानभूर्जलंखंश्वसनोथवाङ्मनः १२ उपासितास्तेपिहरंत्यघंचिराद्विपश्चि
तोघ्नंतिमुहूर्तसेवया यान्मन्यसेत्वंभवितापिभूरिशस्त्यक्तैषणास्त्वत्सदृन्यस्तचित्तान् १३ नमःस्वतंत्रायविचित्रक-
र्मणेनमःपरस्मैसदनुग्रहाय त्वन्माययामोहितोहंगुणेषुदारार्थरूपेषुभ्रमाम्यनर्थदृक् १४ त्वत्पादपद्मासति
मूलनाशनंसमस्तपापापहरंसुनिर्मलम् सुखेच्छयानर्थनिदानभूतैःसुतात्मदारैर्ममताभियुक्तः १५ नक्ता-
पिनिद्रालभतेनशर्मप्रवृद्धतर्षःपुनरेवतस्मिन् लब्ध्वादुरापंनरदेवजन्मात्वयत्नतःसर्वपुमर्थहेतुः १६ पदारविंदंनभ-
जामिदेवसंमूढचेताविषयेषुलालसः करोमिकर्माणिसुनिष्ठितःसन्प्रवृद्धतर्षस्तदपेक्षयाददन् १७

षांहेतवः साधनानि ११ १२ १३ १४ मूलंसंसारकारणमविद्या तेषांनाशकम् १५ १६ १७

१८ १९ २० २१ २२ गच्छतु निर्गच्छतु नाशंप्राप्नोतु इतियावत् २३ त्वदर्पितेअन्ने रुचिशीलेत्यर्थः २४ २५

पुनश्चभूयामहमद्यभूयामित्येवचिंताशतलोलमानसः तदैवजीवस्यभवेत्कृपाविभोदुरंतशक्तेस्तवविश्वमूर्तेः १८
समागमस्स्यान्महतांहिपुंसांभवांबुधिर्येनहिगोष्पदायते सत्संगमोदेवयदैवभूयात्तहीशदेवेत्वयिजायतेमतिः १९
समस्तराज्यापगमंहिमन्येत्वनुग्रहंतेमयिजातमंजसा यथार्थतेब्रह्मस्करास्कराद्यैर्निवृत्ततर्षैरपिहंसवर्यैः
२० इतःस्मराम्यच्युतमेवसादरंभवापहंपादसरोरुहंविभो अकिंचनप्रार्थ्यममंदभाग्यदंनकामयेन्यत्तवपादप
द्मात् २१ अतोनराज्यंनसुतादिकोशंदेहेनशश्वत्पततारजोभुवा भजामिनित्यंतदुपासितव्यपादारविंदंमुनि-
भिर्विचिंत्यम् २२ प्रसीददेवेशजगन्निवासस्मृतिर्यथास्यात्तवपादपद्मे सक्तिःसदागच्छतुदारकोशपुत्रात्म-
चिन्हेषुगुणेषुमेप्रभो २३ भूयान्मनःकृष्णपदारविंदयोर्वचांसितेदिव्यकथानुवर्णने नेत्रेममैतेतवविग्रहेक्षणे
श्रोत्रेकथायांरसनात्वदर्पिते २४ घ्राणंचत्वत्पादसरोजसौरभेत्वद्भक्तगंधादिविलेपनेसकृत् स्यातांचहस्तौतव
मंदिरेविभोसंमार्जनादौममनित्यदेव २५ पादौविभोःक्षेत्रकथानुसर्पणेमूर्धाचमेस्यात्तववंदनेनिशम् का
मश्चमेस्यात्तवसत्कथायांबुद्धिश्चमेस्यात्तवचिंतनेनिशम् २६ दिनानिमेस्युस्तवसत्कथोदयैरुद्गीयमानैर्मुनिभि
र्गृहागतैः हीनःप्रसंगस्तवमेनभूयात्क्षणंनिमेषार्धमथापिविष्णो २७ नपारमेष्ठ्यंनचसार्वभौमंनचापवर्गंस्पृह
यामिविष्णो त्वत्पादसेवांचसदैवकामयेप्रार्थ्यांश्रियाब्रह्मभवादिभिःसुरैः २८ इतिराज्ञास्तुतोविष्णुःप्रसन्नःकम
लेक्षणः मेघगंभीरयावाचानृपंप्राहक्षितीश्वरम् २९ श्रीभगवानुवाच जानेत्वांदासवर्यंमेनिष्कामुकमकल्मष २९
अथापितेप्रदास्यामिवरदैवतदुर्लभ ३० २६ तवकथादिभिर्हीनःरहितःप्रसंगःकालः २७ पारमेष्ठ्यंब्रह्मपदं २८ २९ ३०

३१ ३२ ३३ ३४ ३५ ३६ सर्वसंपत्तेः प्रवर्षम् प्रकृष्टावृष्टिर्यस्यां साभुक्तिः ३७ ३८ ३९

आयुष्यंचायुतंदिव्यंसंपदश्चनरेश्वर भक्तिर्मयिदृढाभूयादंतेसायुज्यमेवच ३१ त्वयाकृतेनस्तोत्रेणमांस्तुवंति·
चयेभुवि तेषांतुष्टःप्रदास्यामिभुक्तिंमुक्तिंनसंशयः ३२ तृतीयैषाक्षयानामभुविख्याताभविष्यति यस्यांतव
प्रसन्नोहंभुक्तिमुक्तिफलप्रदः ३३ येकुर्वंतिनरामूढाःस्नानदानादिकाःक्रियाः व्याजेनापिस्वभावाद्वायांतिमत्पद
मव्ययम् ३४ येचाक्षयतृतीयायांपितॄनुद्दिश्यमानवाः श्राद्धंकुर्वंतितेषांवैतदानंत्यायकल्पते ३५ नचानयाति
थिर्लोकेसमावानाधिकाभुवि · अस्यांकृतंस्वल्पमपितदक्षय्यफलंभवेत् ३६ योगांदद्यान्नृपश्रेष्ठब्राह्मणायकुटुं
बिने सर्वसंपत्प्रवर्षाख्याभुक्तिमुक्तिःकरेस्थिता ३७ योह्निदद्यादनड्वाहंसर्वपापविनाशनम् कालमृत्युविमु
क्तःसन्दीर्घायुष्यमवाप्नुयात् ३८ वैशाखमासेयोधर्मान्कुरुतेमत्प्रियावहान् तेषांमृत्युजराजन्मभयपापहरो·
म्यहम् ३९ यथावैशाखधर्मैस्तुतुष्टःस्यांसकलैरपि मासधर्मैर्नतुष्टःस्यांमासोमेमाधवःप्रियः ४० सर्वधर्मो·
ज्झितावापिब्रह्मचर्यविवर्जिताः वैशाखमासनिरतायांतिमत्पदमव्ययम् ४१ यद्दुरापंतपोभिश्चसांख्ययोगैर्मखै
रपि तद्धामपरमंयांतिवैशाखनिरतानराः ४२ अपिपापसहस्रंवामासोयंहरतेनघ प्रायश्चित्तविहीनंवामत्प्रसाद
स्मरणंयथा ४३ गुरूपदिष्टःकांतारेवैशाखेनिरतोभवान् समाराध्यजगन्नाथंतेनाप्तमखिलंनृप ४४ धर्मेणा·
नेनसंप्रीतःप्रत्यक्षोहंभवामिते भुक्त्वाभोगान्यथाकामान्देवैरपिसुदुर्लभान् ४५ इतितस्मैवरंदत्वादेवदेवोजना
र्दनः पश्यतामेवसर्वेषांतत्रैवांतरधीयत ४६ ततोभूपालवर्योसौबभूवात्यंतविस्मितः हृष्टपुष्टतनुर्भूपलब्धन
ष्टधनोयथा ४७

४० ४१ ४२ प्रायश्चित्तविहीनंमन्वाद्युक्तप्रायश्चित्तंतद्रहितं यत्पापसहस्रं ४३ कांतारंवनं ४४ ४५ ४६ ४७

४८ ४९ ५० ५१ ५२ इतिवैशाखमाहात्म्यटीकायांषोडशोऽध्यायः १६ ७ पुनश्चवैशाखधर्मान्वक्तुंप्रस्तौति

ततःसशास्तपृथिवींतच्चित्तस्तत्परायणः महद्भिर्बोधितोनित्यंगुरुभिश्चनिरंतरम् ४८ नान्यंप्रियतमंमेनेवासुदेव
मृतेनृपः यत्संपर्कात्स्त्रियाश्चासन्दारामात्यसुतादयः ४९ सर्वान्धर्मांश्चकारासौवैशाखोक्तान्पुनःपुनः तेनपुण्य
प्रभावेनपुत्रपौत्रादिभिर्वृतः ५० भुक्त्वामनोरथान्सर्वान्देवानामपिदुर्लभान् अंतेजगामसायुज्यंविष्णोर्देवस्यच
क्रिणः ५१ यइदंपरमाख्यानंशृण्वंतिश्रावयंतिच तेसर्वेपापनिर्मुक्तायांतिविष्णोःपरंपदम् ५२ इतिश्रीस्कं
दपुराणेवैशाखमाहात्म्येनारदांबरीषसंवादेपांचालाधिपतेःसायुज्यप्राप्तिर्नामषोडशोऽध्यायः १६ ७
श्रुतकीर्तिरुवाच वैशाखधर्मानखिलानिहामुत्रफलप्रदान् भूयोपिशृण्वतश्चासीत्तृप्तिर्नाद्यापिमानद १
यत्रचाकैतवोधर्मोयत्रविष्णुकथाःशुभाः तच्छास्त्रंशृण्वतोनैवतृप्तिःकर्णरसायनम् २ पूर्वजन्मकृतंपुण्यंदिष्ट्यापार
मुपागतं आतिथ्यव्यपदेशेनयद्भवान्गृहमागतः ३ वचोमृतंमुखांभोजनिःसृतंपरमाद्भुतं पीत्वातृप्तःपारमेष्ठ्यंमो
क्षवाचनकामये ४ तस्मात्तानेवधर्मान्मेभुक्तिमुक्तिप्रदायकान् विष्णुप्रीतिकरान्दिव्यान्भूयोविस्तरतोवद ५ इ
त्युक्तस्तुपुराराज्ञाश्रुतदेवोमहायशाः संहृष्टात्माशुभान्धर्मान्पुनर्व्याहर्तुमारभे ६ श्रुतदेवउवाच शृणुराजन्
प्रवक्ष्यामिकथांपापप्रणाशिनीं वैशाखधर्मविषयांभाषितांमुनिभिर्मुहुः ७ पंपातीरेद्विजःकश्चिच्छंखोनाम्नामहा
यशाः गुरौसिंहगतेचागान्नदींगोदावरींशुभाम् ८ तीर्त्वाभीमरथींपुण्यांकांतारेकंटकाचले निर्जलेनिर्जनेघोरे
वैशाखेतपकर्षितः ९ वृक्षेचोपविवेशासोमध्यान्हसमयेद्विजः तदाकश्चिद्दुराचारोव्याधश्चापधरःशठः १०

दिना १ २ पारमंतंफलमितियावत् ३ ४ ५ ६ भाषितांविचारितां ७ ८ तपउष्णंतेनकर्षितः ९ १०

११ १२ १३ शर्कराभिर्वालुकाभिराविलेव्याप्तेइत्यर्थः १४ १५ १६ १७ १८ सीदतेदुःखिता

निर्घृणःसर्वभूतेषुकालांतकइवापरः तंकुंडलधरंविप्रंदीप्तितंभास्करोपमं ११ दृष्ट्वाबध्वासजग्राहकुंडलादिक
मुग्रधीः उपानहौचछत्रंचअक्षमालांकमंडलुम् १२ पश्चाद्विसृज्यतंविप्रंगच्छेत्याहविमूढधीः १३ ततःसगच्छन्
पथिशर्कराविलेसूर्यांशुतप्तेजलवर्जितेखरे संतप्तपादस्तृणछादितेस्थलेक्वचिच्चारोपवसन्नूर्ध्वरेताः १४ सर्वे
द्रुतंसंपतन्क्वापितुष्टन्हाहेतिवादीसजगामतूर्णम् दृष्ट्वामुनिंखिद्यमानंपृथिव्यांमध्यंगतेपूष्णिदयाबभूव १५ व्या
धस्यधर्मविमुखस्यचपापबुद्धेस्तस्मैददामिसुखदांखलुपादरक्षाम् चौर्येणैवस्वधर्मेणयागृहीतावनांतरे
१६ तदीयमेवतत्सर्वंव्याधानांधर्मनिर्णयः तस्मादुपानहौदास्येसुहृद्दुःखापनुत्तये तेनश्रेयोभवेद्यच्चतद्भवेत्
ममपापिनः १७ जीर्णेचोपानहौदिव्येवर्ततेपादयोर्मम नाभ्याभ्यामस्तिमेकृत्यंतस्मात्तेवैददाम्यहम् १८ इति
निश्चित्यमनसितूर्णंगत्वाददौचते शर्करातप्तपादायद्विजवर्यायसीदते १९ उपानहौगृहीत्वातौनिर्वृत्तिंचपरांययौ
सुखीभवेतितंव्याधमाशीर्भिरभिनंद्यच २० नूनरूपकपुण्योयंवैशाखेदत्तवानमू व्याधस्यापिचदुर्बुद्धेः प्रा
योविष्णुःप्रसीदति २१ सर्वस्याश्चात्रभूयोपियत्सुखंतदभून्मम ततोभिश्रुत्यतद्वाक्यंकिमेतदितिविस्मितः २२
व्याजहारपुनर्विप्रंब्रह्मिष्ठंब्रह्मवादिनम् त्वदीयंतुमयादत्तंकथंपुण्यंभवेन्मम २३ प्रशंससिचवैशाखंहरिस्तु
ष्टोभवेदिति एतदाचक्ष्वमेब्रह्मन्कोवैशाखश्चकोहरिः २४ कोधर्मःकिंफलंतस्यशुश्रूषोर्मेदयानिधे इतिव्या
धवचःश्रुत्वाशंखस्तुष्टमनाह्यभूत् २५ प्रशंसन्सचवैशाखंपुनर्विस्मितमानसः इदानीदत्तवान्पादत्राणमेलुब्ध
कःशठः २६

य १९ २० २१ २२ २३ २४ २५ २६

२७ २८ सत्वशुद्धि रंतःकरणशुद्धिः २९ ३० ३१ ३२ ३३ ३४ ३५

यद्बुद्धेश्चवैषम्यंजातंचित्रमहोवत सर्वेषामेवधर्माणांफलंजन्मांतरेषुवै २७ वैशाखमासधर्माणांफलंसद्यःक्ष
यंनृणां पापाचारस्यदुर्बुद्धेर्व्याधस्यापिदुरात्मनः २८ दैवादुपानहोदाना त्सत्वशुद्धिरभूदहो यच्चविष्णोःप्रियंक
र्मयत्तत्संतोषनिर्मलं २९ तदेवधर्ममित्याहुर्मन्वाद्याधर्मवित्तमाः धर्मामाधवमासीयाःप्रियाविष्णोरतीवते ३०
धर्मैर्माधवमासीयैर्यथातुष्यति केशवः नतथासर्वदानैश्चतपोभिश्चमहामखैः ३१ नानेनसदृशोधर्मःसर्वधर्मेषु
विद्यते मागयायातुमागंगामाप्रयागंतुपुष्करम् ३२ माकेदारंकुरुक्षेत्रंमाप्रभासंस्यमंतकं मागोदांमाचकृष्णां
चमासेतुमासरुद्रधाम् ३३ वैशाखधर्ममाहात्म्यशंसंतीचकृत्यापगा तत्रस्नानस्यवैविष्णुःसद्योहृद्यवरुध्यते ३४
मासेमाधवसंज्ञेस्मिन्यस्त्वल्पेनैवसाध्यते नतद्बहुव्ययैर्दानैर्धर्मैर्वापिवैमखैः ३५ मासोयंमाधवोनामव्याध
पुण्यविवर्द्धनः तस्मिन्मत्यत्वयादत्तेपादुकेतापनाशने ३६ तेनतेपूर्वकालीनंपुण्यंपाकमुपागतं तुष्टस्तुभगवा-
न्माधवः श्रेयोव्याधविधास्यति ३७ अन्यथातेकथंभूयाद्बुद्धिरेतादृशीशुभा मुनावेवंब्रुवाणेचमृत्युनाप्रेरितोब
ली ३८ सिंहोव्याघ्रवधार्थाय प्राद्रवत्क्रोधविह्वलः मध्येदृक्षाचमातंगंदैवाद्दैवेनकल्पितम् ३९ तंहंतुमुद्यतोग-
च्छत्पदाक्रांतंव्यवस्थितम् तयोर्युद्धमभूद्राजन्सिंहमातंगयोर्वने ४० श्रांतौयुद्धाच्चविरतौनिरीक्षंतौचतस्थतुः
व्याधमुद्दिश्ययच्चोक्तंमुनिनाचमहात्मना ४१ समस्तपातकध्वंसिदैवाच्छुश्रुवतुश्चतौ तेनैवमासमाहात्म्यश्र-
वणेनामलाशयौ ४२ शापान्मुक्तौचतौदेहात्सद्योमुक्तौदिवंगतौ दिव्यरूपधरौदिव्यौदिव्यगंधानुलेपनौ ४३

४१

३६ विधास्यति करिष्यति ३७ ३८ ३९ ४० निरीक्षंतावत्रपरस्मैपदमार्षम् ४१ ४२ ४३

४४ ४५ ४६ ४७ ४८ ४९ ५० ५१ ५२ ५३ ५४

दिव्यंविमानमारूढौदिव्यनारीनिषेवितौ सद्योवनतमूर्द्धानौप्रांजलीचोपतस्थतुः ४४ मुनींद्रोधर्मवक्ताचव्याध
मुद्दिश्यवैपथि तौदृष्ट्वाविस्मितःप्राहकौयुवामितिनिश्चलः ४५ दुर्योनौतुकुतोजन्मयुवयोर्वाकथंमृतिः अहेतुर्वि
पिनचास्मिन्परस्परवधोद्यतौ ४६ एतत्सर्वंक्तविस्तार्यसम्यक्वदतमेनघौ इत्युक्तौमुनिनातेनवचःप्रत्यूचतुःपु
नः ४७ मतंगस्यमुनेःपुत्रौदंतिलःकोहलोपरः शापदोषेणतौजातौनाम्नादंतिलकोहलौ ४८ रूपयौवनसंपन्नौ
सर्वविद्याविशारदौ आवामुद्दिश्यप्रोवाचपिताधर्मार्थकोविदः ४९ मतंगोनामब्रह्मर्षिःसर्वधर्मविदुत्तमः वैशा
खेमासिनन्यौमधुसूदनवल्लभे ५० प्रपाकुरुतमार्गेचजनान्वीजयतक्षणम् मार्गेच्छायांविधत्तांचभूयश्शीतलांबुच
५१ कुरुतंस्नानमुषसितयैवार्चयतंविभुम् कथांचशृणुतंनित्यंययाबंधोनिवर्तते ५२ एवंवहुभिर्वाक्यैर्बोधि
तावपिदुर्मती क्रुद्धोभवदंतिलोहंमत्तोहंकोहलाह्वयः ५३ क्रुद्धःसशापतौसद्यःपिताधर्मेषुलालसः पुत्रंचधर्मविमुखं
भार्यांचाप्रियवादिनीं ५४ अब्रह्मण्यंचराजानंत्यजेत्सद्योनचेत्पतेत् दाक्षिण्यादर्थलोभाद्वासंसर्गंयेप्रकुर्वते
५५ तेसर्वेनरकंयांतियावदिंद्राश्चतुर्दश इतिज्ञात्वाशशापावांमदक्रोधपरिप्लुतौ ५६ क्रुद्धोहंदंतिलोभूयाःसिंहः
क्रोधपरिप्लुतः मत्तस्त्वंकोहलोभूयामत्तोमातंगयूथपः ५७ कृतानुतापोपश्चात्तुप्रार्थयाचोविमोचनम् आवाभ्यां
प्रार्थितोभूयोविशापंचददौपिता ५८ युवांप्राप्यचदुर्योनिंकियत्कालांतरेपिच संगमोभवितातत्रपरस्परवधैषि
णोः ५९ तस्मिन्नेवहिसमयेसंवादंव्याधशाखयोः वैशाखधर्मविषयोदैवाद्वाश्रवणेपिच ६०

अब्रह्मण्यं ब्रह्मणे ब्रा
ह्मणाय वेदाय वा साधुब्रह्मण्यस्तद्विपरीतोऽब्रह्मण्यः ५५ ५६ ५७ ५८ ५९ श्रवणे कर्णे ६०

६१ ६२ ६३ ६४ ६५ ६६ ६७ इतिवैशाखमाहात्म्यटीकायांसप्तदशोऽध्यायः १७

गमिष्यतिक्षणादेवतस्मान्मुक्तिर्भविष्यति शापान्मुक्तौपूर्वमेवरूपमास्थायपुत्रकौ ६१ मामेवप्राप्यवसतंनान्यथामेवचोभवेत् इतिशापमोचगुरुणादुर्योनिंप्राप्यदुर्मती ६२ प्राप्यदेवात्सद्गतिंचपरस्परवधैषिणौ संवादंयुवयोर्दिव्यंशुभंतंशुश्रुवावहे ६३ तेनसद्योविमुक्तिश्चक्षणादेवावयोरभूत् इतिसर्वंसमाख्यायप्रणम्यचमुनीश्वरम् ६४ समामन्त्र्याभ्यनुज्ञातौजग्मतुःपितुरन्तिकम् तदेवसंप्रहृष्टश्चाहमुनिर्व्याधंदयानिधिः ६५ पश्यवैशाखमाहात्म्यश्रवणस्यफलमहत् मुहूर्तश्रवणादेवतयोर्मुक्तिःकरेस्थिता ६६ इतिब्रुवाणंमुनिपुंगवंतंदयानिधिंनिःस्पृहमग्र्यबुद्धिम् विशुद्धसत्वंसुकृतकपात्रंसन्यस्तशस्त्रःपुनराहव्याधः ६७ इतिश्रीस्कंदपुराणेवैशाखमाहात्म्येनारदांबरीषसंवादेदन्तिलकोहलमुक्तिप्राप्तिर्नामसप्तदशोऽध्यायः १७ ७ व्याधउवाच भवतानुगृहीतोस्मिमुनेपापोतिदुष्टधीः दयालवोमहान्तोहिस्वभावादेवसाधवः १ क्वव्याधस्त्वकुलीनोहंक्वचत्वामतिरीदृशी केवलंभवतामेवमन्येनुग्रहमुत्तमम् २ अथसाधोत्वशिष्योस्मिकृपापात्रोस्मिमानद अनुग्राह्योस्मिपुत्रोस्मिकृपांकुरुदयानिधे ३ यथाप्नपुनर्भूयादसन्मतिरनर्थदा सद्भिस्तुसंगतिःक्वापिनभूयाद्दुःखमश्नुते ४ तस्माद्बोधयमांविप्रसूक्तैस्त्वंवृजिनापहैः येनचाञ्जसातरिष्यतिसंसाराब्धिंमुमुक्षवः ५ साधूनांसमचित्तानांतथाभूतदयावताम् नचहीनोत्तमःक्वापिनात्मीयोहिपरस्तथा ६ एकाग्रेणविचिन्वतिचित्तशुद्धिंचपृच्छति सर्वदोषयुतोवापिसर्वधर्मोज्झितोपिवा ७ कृतानुतापश्चयदायदापृच्छतिवैगुरुम् तेदेवोपदिशंत्यद्धाज्ञानंसंसारमोचकम् ८

अथात्रपुनरपिवैशाखधर्मान्वक्तुंप्रस्तौति भवतेत्यादिना १ २ ३ ४ सूक्तैः सुवचनैः ५ ६ ७ ८

पापनाशस्य भावि नीकर्त्री ९ ममसुश्रूषुत्वात् नतत्वाच्च तवसंगतेः शठत्वात्च इतियोज्यम् १० ११ शं कल्याणमिच्छसि १२

यथागंगामनुष्याणांपापनाशस्यभाविनी तथामंदसमुद्धारस्वभावाः साधवः स्मृताः ९ माविचारयमांवो हृंदयालोभक्तवत्सल सुश्रूषुत्वान्नतत्वाच्चशठत्वात्त्वसंगतेः १० इतिव्याधवचः श्रुत्वापुनर्विस्मितमानसः साधुसाध्वितिसंभाष्यधर्मानितानुवाचह ११ शंखउवाच विष्णुप्रीतिकरान्दिव्यान् संसाराब्धिविमोचकान् कुरुधर्मांस्त्ववैशाखेयदि व्याधसमिच्छसि १२ आतपोबाधतेघोरोनच्छायानांबुचात्रच तस्मात्स्थलांतरंयावोयत्रच्छायानुवर्तते १३ तत्रगत्वा जलंपीत्वाक्वच्छायांचसमाश्रितः तत्रतेवर्णयिष्यामिमाहात्म्यंपापनाशनम् १४ विष्णोर्माधवमासस्ययथादृष्टंयथा श्रुतम् इत्युक्तोमुनिनातेनव्याधः प्राहकृतांजलिः १५ इतोविदूरेसलिलंवर्ततेचसरोवरे कपित्थास्तत्रवैसंतिफलभारेणपीडिताः १६ गच्छावस्तत्रसंतुष्टिर्भविता नात्रसंशयः व्याधेनैवंसमादिष्टस्तेनसाकंययौमुनिः १७ कियद्दूरंततो गत्वाददर्शाग्रेसरोवरम् बककारंडवाकीर्णंचक्रवाकोपशोभितम् १८ हंससारसक्रौंचाद्यैः समंतात्परिशोभितं कीचवंगकषाद्यैश्चकूजितंभ्रमरैरपि १९ नक्रकच्छपमीनाद्यैरगाधंसुमनोहरम् कुमुदोत्पलकल्हारपुंडरीकादिभिर्महत् २० शतपत्रैःकोकनदैःसमंतात्परिशोभितं पक्षिणांचकलारावैर्मुखरन्नयनोत्सवम् २१ तटेकीचकगुल्मैश्चतथा वृक्षैश्चशोभितम् वटैःकरंजैर्नीपैश्चचिंचिणीभिस्तथैवच २२ निंबप्लक्षप्रियालैश्चचंपकैर्बकुलैःशुभैः पुन्नागैस्तुबरैश्चैवकपित्थामलकैरपि २३ निष्पषणैश्चजंबूभिः समंतात्परिशोभितं वन्यमातंगसारंगवराहमहिषादिभिः २४

१३ १४ १५ १६ १७ १८ १९ २० कलारावैर्मधुरशब्दैः नयनोत्सवं नयनयोरुत्सवोयस्मात् तत् २१ २२ २३ २४ ७ ७ ७

२५ शाखा शाखान्तरैः एकशाखायाअन्यशाखांप्रतिप्लवमानैः प्लवकर्तृभिः प्लवंगमैः कपिभिः २६ २७ २८ २९

शशैश्चशल्लकैश्चैवगवयैरुपशोभितम् खड्गनाभिमृगाद्यैश्चव्याघ्रैःसिंहैर्वृकैरपि २५ खरांतकैश्चशरभैश्चमरीभिःसु
मंडितम् शाखाशाखांतरंशीघ्रंप्लवमानैःप्लवंगमैः २६ मार्जारैश्चैवभल्लूकैर्भीषणरुरुभिस्तथा झिल्लीशब्दैश्चकेंकारैः
कीचकानांरवैस्तथा २७ घोरवायुविनिर्घातदारुभारैःसमन्वितम् एतादृशंसरोदिव्यंव्याधेनैवप्रदर्शितं २८ ददर्श
मुनिशार्दूलस्तृषयाबाधितोभृशं स्नात्वामध्यान्हवेलायांसरस्यस्मिन्मनोरमे २९ वाससीपरिधायाथकृत्वामाध्यान्हि
कीःक्रियाः देवपूजांततःकृत्वाभुक्त्वाफलमतंद्रितः ३० व्याधोपनीतंसुस्वादुकपित्थंश्चमहारिच सुखोपविष्टःपप्र
च्छव्याधंधर्मरतंपुनः ३१ किंवक्तव्यंमयाद्यत्वंवादौधर्मंतत्स्वर धर्माश्चबहवःसंतिनानामार्गाःपृथग्विधाः ३२ तत्र
वैशाखमासोक्ताःसूक्ष्माअपिमहार्थदाः सर्वेषामेवजंतूनामिहामुत्रफलप्रदाः ३३ यत्प्रष्टव्यंमनसितेयच्चादौतच्चपृ
च्छतां इत्युक्तोमुनिनातेनव्याधःप्रांजलिरब्रवीत् ३४ व्याधउवाच केनवाकर्मणाचासीद्व्याधजन्मतमोमयं के
नवात्वेदृशीबुद्धिःसंगतिर्वामहात्मनः ३५ एतच्चान्यत्समाचक्ष्वयदिमामन्यसेप्रभो इत्युक्तःपुनरप्याहशंखोनाममहा
मुनिः ३६ मेघगंभीरयावाचास्मयमानमुखांबुजः शंखउवाच शाकलेनगरेपूर्वंद्विजस्त्वंवेदपारगः ३७ स्तंबोनाम
महातेजास्तथाश्रीवत्सगोत्रजः तवेष्टागणिकाकाचिदासीत्तत्संगदोषतः ३८ त्यक्तानित्यक्रियानित्यंशूद्रवद्गृहमागतः
शून्याचारस्यदुष्टस्यपरित्यक्तक्रियस्यच ३९ ब्राह्मणीचतदाचासीद्भार्याकांतिमतीतव सात्वांपर्यचरत्सुभ्रूःसंवरयंब्राह्म
णाधमं ४० उभयोःक्षालयंतीचपादांस्त्वप्रियकारिणी उभयोरप्यधःशेतेउभयोर्वचनेरता ४१

३० ३१ ३२ इह
मर्त्यलोके अमुत्रपरलोके ३३ ३४ तमोमयं अज्ञानबहुलम् ३५ ३६ ३७ ३८ ३९ ४० ४

४२

४२ माषं उडिदइतिमहाराष्ट्रजनपदप्रसिद्धं ४३ निष्पावा पावटेइति नाम्नाप्रसिद्धाः ४४ ४५ ४६ ४७ ४८

वेश्य यावार्यमाणापिपातिव्रत्यव्रतस्थिता एवंसुश्रूषयंत्याहिभर्तारंवेश्ययासह ५२ जगामसुमहान्कालोदुःखितायामहीतले अपरस्मिन्दिनेभर्तामाषंचमूलकान्वितम् ४३ अभक्षयच्छुद्रधर्मोनिष्पावांस्तिलमिश्रितान् तदपथ्यमशित्वानुवमंश्चैवविरेचनं ४४ अपथ्याहारुणोरोगोव्यजायतभगंदरः सदह्यमानोरोगेणदिवारात्रन्तुभूरिशः ४५ यावदास्तेगृहेवित्तंतावद्वेश्याचसंस्थिता गृहीत्वातस्यसावित्तंपश्चान्नोवासमंदिरे ४६ अन्यस्यपार्श्वमासाद्यगताघोरासुनिर्घृणा ततःसदीनवचनोव्याधिबाधासुपीडितः ४७ उक्तवान्सरुदन्भार्यांरुजाव्याकुलमानसः परिपालयमांदेविवेश्यासक्तंसुनिष्ठुरम् ४८ नमयोपकृतंकिंचित्त्वयिसुंदरिपावनि काभार्यांप्रणतांपापोनानुमन्येतगर्हितः ४९ सषंढोभविताभद्रेदशजन्मसुपंचसु दिवारात्रमहाभागेनिंदितःसाधुभिर्जनैः ५० पापयोनिमवाप्स्यामित्वांसाध्वीमवमन्यवै अहंक्रोधेनदग्धोस्मित्वाशुनयजेनवै ५१ एवंब्रुवाणंभर्तारंकृतांजलिपुटाब्रवीत् नदैन्यंभवताकार्यंनव्रीडाकांतमांप्रति ५२ नचापित्वयिमेक्रोधोयेनदग्धेतिवक्ष्यति पुराकृतानिपापानिदुःखानीहभवंतिहि ५३ तानियाक्षमतेसाध्वीपुरुषोवासउत्तमः यन्मयापापयापापंकृतंवैपूर्वजन्मनि ५४ तद्भुंजत्यानमेदुःखंनविषादःकथंचन इत्येवमुक्त्वाभर्तारंसासुभ्रूस्तमपालयत् ५५ आनीयजनकाद्वित्तंबंधुभ्योवरवर्णिनी। क्षीरोदवासिनंदेवंभर्तारंचैवचिंतयत् ५६ शोधयंतीदिवारात्रौपुरीषमूत्रमेवच नखेनकर्षतीभर्तुःकृमीन्कष्टाच्छनैःशनैः ५७ नसास्वपितिरात्रौतु नदिवावरवर्णिनी भर्तुर्दुःखेनसंतप्तादुःखितेदमवोचत ५८

पाविनी पत्यासहधर्माचरणेन पातिव्रत्येनवा भर्तारं पावयति तत्संबुद्धिः ४९ ५० ५१ ५२ दग्धः इतिएवंछेदः अत्रसंधिरार्षः ५३ ५४ ५५ ५६ ५७ ५८

५९ महिष्या इदं माहिषं दध्यादितेनोपेतम् ६० ६१ ६२ ६३ ६४ ६५ ६६ ६७

देवाश्चपांतुभर्तारंपितरोयेचविश्रुताः कुर्वंतुरोगहीनंमेभर्त्तारंगतकल्मषम् ५९ चंडिकायैप्रदास्यामिरक्तमांससमु-
द्भवं कूष्मांडंमाहिषोपेतंभर्तुरारोग्यहेतवे ६० मोदकान्कारयिष्यामिविघ्नेशायमहात्मने मंदवारेकरिष्यामिचोप
वासान्दशैवतु ६१ नोपभुंजामिमधुरंनोपभुंजामिवैघृतम् तैलाभ्यंगविहीनाहंस्थास्येनैवात्रसंशयः ६२ जीवतान्
रोगहीनोयंभर्त्तामेशरदांशतं एवंसाव्याहरद्देवीवासरेवासरेगते ६३ तदाचागान्मुनिःकश्चिन्महात्मादेवलाह्वयः
वैशाखेमासिघर्मार्त्तःसायान्हेतस्यवैगृहं ६४ तदावैभार्ययाचोक्तंभिषग्वैगृहमागतः तेनवैरोगहानिःस्यात्तस्यातिथ्यं
करोम्यहम् ६५ ज्ञात्वात्वाधर्मविमुखंभिषग्व्याजेनवंचितः पादावनेजनंकृत्वातज्जलंमूर्ध्निसाक्षिपत् ६६ पानकंच
ददौतस्मैधर्मार्त्तायमहात्मने त्वयानुमोदितासायंघर्मतापनिवारकम् ६७ सप्रातरुदितेसूर्येमुनिःप्रायाद्यथागतः
अथचाल्पेनकालेनसन्निपातोभवत्तव ६८ त्रिकुठंनीयमानायांभर्त्तांगुलिमखंडयत् उभयोर्दंतयोःश्लेषःसहसास-
मपद्यत ६९ तत्खंडमंगुलेर्वल्केस्थितंभर्त्तुःसुकोमलं खंडयित्वांगुलिंभर्त्तापंचत्वमगमत्तदा ७० शय्यायांस्वमनोज्ञा
यांस्मरंत्तापुंश्चलीशुभाम् मृतंविज्ञायभर्त्तारंभार्याकांतिमतीतव ७१ विक्रीत्वाचापिवलयंगृहीत्वाचेंधनंबहु
चक्रेचितिंतेनसाध्वीमध्येकृत्वापतिंतदा ७२ अवगुह्यभुजाभ्यांचपादौचाश्लिष्यपादयोः मुखेमुखंविनिक्षिप्यहृ
दयेहृदयेनतथा ७३ जघनेजघनंदेवीत्यात्मानंसन्निवेश्यच दाहयामासकल्याणीभर्तृदेहंरुजान्वितम् आत्मनास
हकल्याणीज्वलितेजातवेदसि ७४ विमुच्यदेहंसहसाजगामपतिंसमालिंग्यमुरारिलोकं पानीयदानेनचमाधवेस्मि
न्पादावनेजादपियोगिगम्यम् ७५

६८ ६९ ७० ७१ ७२ अवगुह्य आलिंग्य ७३ ७४ ७५

७६ ७७ ७८ ७९ ८० इतिवैशाखमाहात्म्यटीकायांअष्टादशोऽध्यायः १८ छ वैशाखमासेविष्णुमुद्दिश्यधर्मानाचरेदित्युक्तं तच्छ्रुत्वाविष्णुस्वरूपं व्याधः पृच्छति १ २ ३ ४ भावितः ध्यानविषयीकृतः आत्माविष्णुस्व-

त्वमंतकालेगणिकाविचिंतयादेहंत्यक्त्वामुक्तसमस्तकिल्बिषः जन्मव्याधंप्राप्स्यसेघोररूपंहिंसासक्तःसर्वदोद्वेगकारी ७६ दत्तात्वयापानकस्यापिदानेमासेनुज्ञामाधवेसाधुजाने व्याधोजातस्तेनजातास्तुबुद्धिर्धर्मान्प्रष्टुंसर्वसौख्यैकहेतून् ७७ धृतंमूर्ध्नापादशौचावशिष्टंजलंमुनेःसर्वपापापहारि तेनेयंतेसंगतिर्मेवनेस्मिन्ययाभूयात्संपदः
संततिश्च ७८ इत्येतत्सर्वमाख्यातंपूर्वजन्मनियत्कृतम् कर्मपुण्यंपापकंचदृष्टंदिव्येनचक्षुषा ७९ गोप्यंवातेप्र
वक्ष्यामियद्भवान्श्रोतुमिच्छति जातातेचित्तशुद्धिर्वैस्वस्तिभूयान्महामते ८० इतिश्रीस्कंदपुराणेवैशाखमाहात्म्येनारदांबरीषसंवादेव्याधोपाख्यानेव्याधस्यपूर्वजन्मकथनंनामअष्टादशोऽध्यायः १८ छ व्याधउवा
च विष्णुमुद्दिश्यकर्तव्याधर्माभागवताःशुभाः तत्रापिमाधवीयाश्चइत्युक्तंत्वयापुरा १ सविष्णुःकीदृशोब्रह्म
न्किंवातस्याहिलक्षणं किंमानंतस्यसद्भावैःकैर्ज्ञेयोभगवान्विभुः २ कीदृशावैष्णवाधर्माःकेनासौप्रीयतेहरिः एतदा
चक्ष्वमेब्रह्मन्किंकरायमहामते ३ इतिपृष्टस्तुव्याधेनपुनःप्राहसवैद्विजः प्रणम्यजगतामीशंनारायणमनामयम्
४ शंखउवाच शृणुव्याधप्रवक्ष्यामिविष्णुरूपमकल्मषम् यद्चिंत्यंविरिंचाद्यैर्मुनिभिर्भावितात्मभिः ५
पूर्णशक्तिःपूर्णगुणोनिर्दिष्टःसकलेश्वरः निर्गुणोनिष्कलोनंतःसच्चिदानंदविग्रहः ६ यदेतदखिलंविश्वंचराचरमनीदृ
शं साधिशंसाश्रयंयच्चयद्वशेनियतंस्थितं ७ अथतेलक्षणंवच्मिब्रह्मणःपरमात्मनः उत्पत्तिस्थितिसंहारात्यावृत्तिर्नि
यमस्तथा ८

रूपैः अथवाभावितात्मभिः शुद्धांतःकरणैरितिव्याख्येयं ५ ६ ७ आवृत्तिर्लोकान्तरंजन्मनोजन्मांतरंप्रति पुनः

पुनःगमनं नियमः दंडधारणं ८ प्रकाशोज्ञानं वृत्तिराजीवनं ९ १० ११ १२ १३ १४ १५ १६

प्रकाशोबंधमोक्षौचवृत्तिर्यस्माद्भवंत्यमी सविष्णुर्ब्रह्मसंज्ञोसौकवीनांसंमतोविभुः ९ साक्षाद्ब्रह्मेतितंप्राहुःपश्चाद्ब्र
ह्मादिकानपि ब्रह्मशब्दंसोपपदंब्रह्मादिषुविदोविदुः १० नान्येषांब्रह्मताख्यापितत्स्थत्वेकांशभागिना तदेतच्छास्त्रग
म्यंहिजन्माद्यस्यमहाविभोः ११ शास्त्रंचवेदाःस्मृतयःपुराणंचैतदात्मकं इतिहासःपंचरात्रंभारतंचमहामते १२ एते
रेवमहाविष्णुर्ज्ञेयोनान्यैःकथंचन नावेदविदमुंविष्णुंमनुतेचनरःक्वचित् १३ नेंद्रियैर्नानुमानैश्चनतर्कैःशक्यतेविभुं
ज्ञातुंनारायणंदेवंवेदवेद्यंसनातनम् १४ अस्यैवजन्मकर्माणिगुणान्ज्ञात्वायथामति मुच्यतेजीवसंघाश्चसदातद्वश
वर्त्तिनः १५ क्रमाद्विष्णोश्चमाहात्म्यंयथासातिशयंभवेत् एकैकस्मिन्स्थिताशक्तिर्देवर्षिपितृमातृके १६ प्रत्यक्षेणा
गमेनापितथैवानुमयापिच आदौनरोत्तमंविद्याद्दलेज्ञानेस्फुरेत्तथा १७ तस्माद्भूतंशतगुणंविद्यात्ज्ञानादिभिर्वृतं
भूतान्मनुष्यगंधर्वान्विद्याच्छतगुणाधिकान् १८ तत्त्वाभिमानिनोदेवांस्तेभ्योविद्याच्छताधिकान् तत्त्वाभिमानिदे
वेभ्यःसमेचऋषयोवराः १९ सप्तर्षिभ्योवरोह्यग्निरग्नेःसूर्यादयस्तथा सूर्याद्गुरुर्गुरोःप्राणःप्राणादिंद्रोमहाबलः
२० इंद्राच्चगिरिजादेवीदेव्याःशंभुर्जगद्गुरुः शंभोर्बुद्धिर्महादेवीबुद्धेःप्राणोबलाधिकः २१ नप्राणात्परमंकिंचित्प्रा
णेसर्वंप्रतिष्ठितम् प्राणाज्जातमिदंविश्वंप्राणात्मकमिदंजगत् २२ प्राणेप्रोतमिदंसर्वंप्राणाद्देवाहिचेष्टते सर्वाधार
मिमंप्राहुःसूत्रंनीलांबुदप्रभम् २३ लक्ष्मीकटाक्षमात्रेणप्राणस्यास्यास्थितिर्भवेत् सालक्ष्मीर्देवदेवस्यकृपालेशै
कभाजिनी २४ नविष्णोःपरमंकिंचिन्नसमोवाकथंचन व्याधउवाच कथंजीवेष्वयंप्राणःसूत्रनामाधिकोभवत् २५

अनुमया अनुमानेन १७ १८ १९ प्राणःवाय्वात्मकः २० प्राणःमुख्यप्राणः २१ २२ सूत्रंचेष्टाप्रवर्तकं २३ २४ २५

२६ २७ पद्मसृष्टौ पाद्मेकल्पे २८ २९ ३० ३१ ३२ ३३ ३४ निष्क्रामति निष्क्रांतेस·

निर्णयोवाकथंत्वस्यप्राणाधिक्येकथंविभो एतदाचक्ष्वमेब्रह्मन्कथंप्राणाद्विभुःपरः २६ शंखउवाच शृणु
व्याधमवक्ष्यामियत्पृष्टंनिर्णयस्त्वया प्राणाधिक्यंसमुद्दिश्यजीवैश्चसकलैरपि २७ पुरानारायणोदेवःपद्मसृष्टौसना
तनः सृष्ट्वाब्रह्मादिकान्देवानिदंप्राहजनार्दनः २८ साम्राज्येहंस्थापयेयंब्रह्माणंवःपतिंप्रभुं योयुष्मास्वधिकोदे·
वायौवराज्येसुरेश्वराः २९ तंस्थापयतशीलाढ्यंशौर्यौदार्यगुणान्वितम् इत्युक्ताविभुनादेवाःसर्वेशक्रपुरोगमाः ३०
एवंविवदिरेन्योन्यमहंभूयामहंत्विति सर्वेविवदमानाश्चसूर्यंकेचित्परंविदुः ३१ शक्रंकेचित्परंकामंकेचित्तूष्णींतु
तस्थिरे तेनिर्णयमपश्यन्तःप्रष्टुंनारायणंययुः ३२ नमस्कृत्यपुनःप्राहुःसर्वेप्राञ्जलयोमराः विचारितंमहाविष्णो
सर्वैरस्माभिरंजसा ३३ अस्माकंदेवमधिकंनैवविद्मःकथंचन त्वमेवनिर्णयंब्रूहिदेवाःसंशयिनःखलु ३४ इति
पृष्टोमरैःसर्वैःप्रहसन्निदमब्रवीत् देहाद्यस्माच्चवैराजात्यस्मिन्निष्क्रामतिस्वयम् ३५ पतिष्यतिप्रविष्टेतुयस्मिन्वै
ह्युत्थितोभवेत् सदेवोह्यधिकोनूनंनापरस्तुकथंचन ३६ इत्युक्तास्तेततःसर्वेतथास्त्वितिवचोब्रुवन् निश्चक्रा
मजयन्ताङ्घ्रिःपादात्पूर्वंसुरेश्वरः ३७ तदापङ्गुममुंप्राहुर्नदेहःपतितस्तदा शृण्वन्पिबन्वदन्जिघ्रन्पश्यन्नास्तेचल
न्नपि ३८ पश्चाद्गुह्याद्विनिष्क्रान्तोदक्षोनामप्रजापतिः तदाषण्ढममुंप्राहुर्नदेहःपतितस्तदा ३९ शृण्वन्पिबन्वदन्-
जिघ्रन्पश्यन्नास्तेचलन्नपि पश्चाद्धस्ताद्विनिष्क्रान्तइन्द्रःसर्वामरेश्वरः ४० हस्तहीनममुंप्राहुर्नदेहःपतितस्तदा
शृण्वन्पिबन्वदन्जि० ४१ लोचनाभ्यांविनिष्क्रान्तःसूर्यस्तेजस्विनांवरः तदाकाणममुंप्राहुर्नदेहःपतितस्तदा ४२

ति ३५ ३६ ३७ ३८ ३९ ४० ४१ काणमंधमिति व्याख्येयं लोचनद्वयात्तद्देवतानिष्क्रान्ते रतंतरमेवोक्तत्वात् अन्यथाएकेना
क्ष्णाहीन इति व्याख्यानेविरोधःस्यात् ४२

अजिघ्राणं गंधग्रहणमकुर्वंतं ४३ मृतः इतिसंधिरार्षः ४४ तदाअरसज्ञं मधुरादिरसज्ञानरहितं ४५ वाचः वागाख्यज्ञानेंद्रिया

शृण्वन्पिबन्वदन्जिघ्रन्पश्यन्नास्तेचलन्नपि घ्राणात्पश्चाद्विनिष्क्रांतौनासत्यौविश्वभेषजौ अजिघ्राणममुंप्रा
हुर्नदेहःपतितस्तदा ४३ शृण्वन्पिबन्वदन्जि० श्रोत्राद्दिशोविनिष्क्रांतानदेहःपतितस्तदा तदामुंबधिरंप्राहुर्नमृ
तेतिकथंचन ४४ शृण्वन्० वरुणोरसनायास्तुविनिष्क्रांतस्ततःपरं तदारसज्ञमेवाहुर्नदेहःपतितस्तदा ४५
जीवन्स्खलन्नदन्नास्तेतथाजानन्श्वसन्नपि ततोवाचोविनिष्क्रांतोवन्हिर्वागीश्वरोविभुः ४६ तदामूकममुंप्राहुर्नदे
हःपतितस्तदा जीवन्स्खलन्नदन्नास्तेतथाजानन्श्वसन्नपि ४७ पश्चाद्रुद्रोविनिष्क्रांतोमनसोबोधनात्मकः तदोज-
डममुंप्राहुर्नदेहःपतितस्तदा ४८ जीवन्स्खल० पश्चात्प्राणोविनिष्क्रांतोमृतमेनंतदाविदुः पुनरेवंतदाप्राहुर्देवावि-
स्मितमानसाः ४९ देहमुत्थापयेद्यस्तुपुनरेवंव्यवस्थितः सएवह्यधिकोस्माकंयुवराजाभविष्यति ५० इत्येवंतु
प्रतिश्रुत्यविविशुश्चयथाक्रमम् जयतःप्राविशत्पादौनोत्तस्थौतत्कलेवरम् ५१ गुह्यंचप्राविशद्दक्षोनोत्तस्थौतत्
कलेवरम् इंद्रोहस्तौविवेशाथनोत्तस्थौत० ५२ चक्षुःसूर्यःप्रविष्टोभून्नोत्तस्थौतत्क० दिशःश्रोत्रंप्राविविशुर्नोत्त०
५३ वरुणःप्राविशज्जिह्वांनोत्तस्थौ० नासांविविशतुर्दस्रौनोत्तस्थौतत्क० ५४ वन्हिश्चप्राविशद्वाचंनोत्तस्थौतत्कले
वरं मनश्चप्राविशद्रुद्रोनोत्तस्थौ० ५५ पश्चात्प्राणोविवेशासौतदोत्तस्थौकलेवरम् तदादेवाविनिश्चित्यप्राणंदेवा-
धिकंविभुम् ५६ बलंज्ञानेचधैर्येचवैराग्येप्राणनेपिच ततोभिषेचयांचक्रुर्यौवराज्येमहाप्रभुः ५७ उत्कृष्टस्थितिहे-
तुत्वादुक्थमेकंतदाजगुः तस्मात्प्राणात्मकंविश्वंसर्वंस्थावरजंगमं ५८

तु ४६ ४७ ४८ ४९ ५०

प्रति श्रुत्यप्रतिज्ञाय ५१ ५२ ५३ ५४ ५५ ५६ प्राणनेजीवने ५७ उक्थम् एतन्नाम्नाप्रसिद्धंसाम ५८

५९ ६० ६१ ६२ ६३ ६४ ६५ ६६ पूर्वबंधानुगं पूर्वः अनादिर्यो बंधोऽविद्या ल-

अंशैःपूर्णैर्बलाढ्यैश्चपूर्णोयंजगतांपतिः नप्राणहीनंजगदस्तिकिंचित्प्राणेनहीनंनचवैसमेधते ५९ प्राणेनहीनं-
स्थितिमन्नकिंचित्प्राणेनहीनंनचकिंचिदस्ति तस्मात्प्राणःसर्वजीवाधिकोभूद्बलाधिकैःसर्वजीवांतरात्मा ६० प्राणा
त्कोपित्वधिकोवासमोवाशास्त्रेदृष्टःश्रुतपूर्वोनचास्ते तत्तत्कार्यानुगःप्राणोह्येकोदेवोह्यनेकधा ६१ तस्मात्प्राणं
वरमाहुःप्राणोपासनतत्पराः लीलयैवजगत्स्रष्टुंहर्तुंपालयितुंप्रभुः ६२ शेषाहिशिवशक्राद्याश्चेतनाश्चजडाश्चापि
वासुदेवादृतेकोपिनैनंपरिभविष्यति ६३ सर्वदेवात्मकःप्राणःसर्वदेवमयोविभुः वासुदेवानुगोनित्यंतथाविष्णुव-
शस्थितः ६४ वासुदेवप्रतीपंतुनशृणोतिनपश्यति देवाःप्रतीपंकुर्वंतिरुद्रेंद्राद्याःसुरेश्वराः ६५ प्रतीपंकापिकुरुते
नप्राणःसर्वगोचरः तस्मात्प्राणंमहाविष्णोर्बलमाहुर्मनीषिणः ६६ एवंज्ञात्वामहाविष्णोर्माहात्म्यंलक्षणंतथा
पूर्वबंधानुगंलिंगंजीर्णंत्वचमिवोरगः ६७ विसृज्यपरमंयातिनारायणमनामयं श्रुत्वाशरवोदितंवाक्यंपुनर्व्या
धःप्रसन्नधीः ६८ प्रश्रयावनतोभूत्वापुनःपप्रच्छतंमुनिम् ब्रह्मन्महानुभावस्यप्राणस्यास्यजगद्गुरोः ६९ नख्यातो
महिमालोकेकथंसर्वेश्वरस्यवै देवानांचमुनीनांचभूपानांचमहात्मनाम् ७० महिमाश्रूयतेलोकेपुराणेषुसहस्रशः
एतदाचक्ष्वमेब्रह्मन्श्रोतुंकौतूहलंहिमे ७१ शरवउवाच पुराप्राणोहरिंदेवंनारायणमनामयं अश्वमेधैर्यियक्षु
कामोगंगातीरंययौमुदा ७२ हलैश्चकारभूशुद्धिंनानामुनिगणैर्युतः अंतर्वल्मीकलीनस्तुकण्वोनामसमाधिगः ७३
हलोत्कृष्टोविनिष्क्रांतःक्रोधादिदमुवाचह दृष्ट्वापुरःस्थितंप्राणंशशापहमहाविभुं ७४

क्षणस्तमनुगच्छति तादृशंलिंगं लिंगशरीरं ६७ ६८ ६९ ७० ७१ ७२ ७३ ७४

७५ ७६ ७७ सदागतिःप्राणः ७८ ७९ इतःअस्मात्परं ८० इतिवैशाखमाहात्म्यटीकायांएकोनविंशोऽध्यायः

अद्यप्रभृतिनख्यातिंमहिमाभुवनत्रये नचप्राप्तोसिदेवेशभूलोकेतुविशेषतः ७५ प्रख्यातास्तेभविष्यंतित्वद्यवनाराज
गन्धये इत्युक्तोमुनिनातेनवायुःक्रोधात्तथाब्रवीत् ७६ विनापराधशप्तोस्मिनितिक्षुंमांनिरागसं तस्मात्कण्वमहाबा
होगुरुद्रोहीभवाशुच ७७ लोकेनिंदितवृत्तिश्चभवेत्याहसदागतिः ततःप्रभृतिलोकेस्मिन्प्राणस्यास्यमहाप्रभो
७८ नख्यातोमहिमालोकेभूलोकेतुविशेषतः शापात्कण्वोगुरुजंघ्वासूर्यशिष्योभवत्तदा ७९ इत्येतत्कथितंसर्वं
यत्पृष्टंतुत्वयाधुना यच्छ्रोतव्यमितोव्याधपृच्छमामाविचारय ८० इतिश्रीस्कंदपुराणेवैशाखमाहात्म्येनारदां-
बरीषसंवादेवायुशापकथनंनामएकोनविंशोऽध्यायः १९ ७ व्याधउवाच किंजीवाविभुनासृष्टाःको-
टिशोथसहस्रशः दृश्यंतेभिन्नकर्माणोनानामार्गाःसनातनाः १ नैकस्वभावाएतेहिकुतएवमहामते सर्वंतत्स्पृ-
च्छतेमह्यंविस्तरात्त्वतोवद २ शंखउवाच त्रिविधाजीवसंघाहिरजःसत्वतमोगुणाः राजसाराजसंकर्मता
मसास्तामसंतथा ३ सात्विकाःसात्विककर्मकुर्वंत्येतेयथाक्रमम् कश्चिच्चगुणवैषम्यात्तेषांसंसृतोभवेत् ४ ते
नैवोच्चावचंकर्मकुर्वंतःफलभागिनः क्वचित्सुखंक्वचिद्दुःखंक्वचिच्चोभयमेवच ५ गुणानामेववैषम्यात्प्राप्नुवंति
नराइमे प्रकृतिस्थाइमेजीवाबद्धाएतैर्गुणैस्त्रिभिः ६ गुणकर्मानुरूपेणकर्मणांव्यत्ययःफलम् गुणानुगुण्यंभू
यस्तेप्रकृतिंयांतिसमीजनाः ७ प्रकृतिस्थाःप्राकृतिकागुणकर्माभिमूर्छिताः गतिंप्राकृतिकींयातिव्यत्ययःप्रकृते
र्नहि ८ तामसादुःखबहुलाःसदातामसवृत्तयः निर्दयानिष्ठुरालोकेसदाद्वेषैकजीविनः ९

१९ ७ अथविंशेव्याधः जीवविषयंप्रश्नंकरोति किंजीवाइत्यादिना १ २ ३ ४ ५ ६ ७ ८ ९

१० पुण्यादिति पुण्यकर्मणास्वर्गप्राप्तिः पापकर्मणानरकलोकप्राप्तिर्भवति तत्रविशेषकथानकमस्ति पाद्मे तदेवात्रकिंचित्प्रदश्यते सर्वमासेषुवैशाखे एवकथमधिका प्रीतिरिति धरयापृष्टः श्रीवराहः प्रोवाच हेपृथ्वि वैशाखे हिरण्याक्षं मधुदैत्यंचहत्वा तवोद्धारकृतः वैशाखशुक्लतृतीयायां त्रेतायुगस्यत्रयीधर्मस्यज्ञानवर्णव्यवस्थितेश्चप्रवृत्तिर्जाता तस्मादयंपवित्रोमासः ममप्रियश्च इत्युक्त्वावैशाखधर्मान् वक्तुकामः इतिहासंप्रस्तौति कदाचिद्यमः गंगायमुनयोर्मध्यदेशेमहद्ग्राममस्थितं वसिष्ठगोत्रसंभूतं यज्ञदत्तनामकंब्राह्मणमानय नान्यंतत्पार्श्ववर्तिनंतद्गोत्रोत्पन्नं तन्नामानं तदनुरूपंमानयेतिदूतंप्रत्याह दूतश्चतथेत्युक्त्वा यमनिर्दिष्टं ब्राह्मणंविहाय तत्पार्श्ववर्तिनं तदनुरूपंब्राह्मणमानीय यमाग्रेनिवेदयामास यमश्चप्रतिकूलंकर्मज्ञात्वा तस्मैपूजांकृत्वा प्रोवाचनीयतामेषत्तोन्यस्त्वानीयतामिति एवमुक्तेतुवचनेधर्मराजेनसद्विजः निर्विण्णःसन्नुवाच हेधर्म कस्मादहमिहानीतःकस्मात्प्रेषयसेपुनः गंतुंनैवोत्सहेतत्रमर्त्यलोकेपुनःप्रभो यमउवाच हेद्विज क्षीणायुषां अत्रवासःयुक्तः तवतुदशवर्षात्मकं

राक्षसाद्याःपिशाचांतास्तामसींयांतिवैगतिम् राजसामिश्रमतयः कर्तारःपुण्यपापयोः १० पुण्या
त्स्वर्गंप्राप्नुवंतिक्वचित्पापाच्चयातनाम् अतएतेमंदभाग्याआवर्तंतेपुनःपुनः ११

शेषमायुरस्ति तदंतेलोकप्राप्तिर्भावि अतःतवप्रष्टव्यंचेत्पृच्छतद्वदामि ब्राह्मणउवाच केनकर्मणानरकलोकप्राप्तिः केनकर्मणास्वर्गलोकप्राप्तिः ममचकेनकर्मणात्वल्लोके गंतव्यं भविष्यतितद्वद यमउवाच कर्मणामनसावाचायेधर्मविमुखानराः विष्णुभक्तिविहीनायेतेवैनिरयगामिनः पश्यंतिभेदबुद्ध्याये ब्राह्मणंशंकरंहरिं क्षेत्रवृत्तिगृहच्छेदंप्रीतिच्छेदंचयेनराः आशाच्छेदंचकुर्वंतितेवैनिरयगामिनः अनाथंवैष्णवंदीनंरोगार्तंवृद्धमेवच नानुकंपयतेमूढःसज्ञेयोनरकातिथिः नियमांस्तुसमादायपश्चादजितेंद्रियः विलोपयतिमूढात्मासवैनिरयभाजनं अभक्ष्यभक्षकायेचअगम्यागमनतत्पराः हिंसकानिंदकाःक्रूरास्तेवैनिरयगामिनः शृणुविप्रयथायांतिनराःस्वर्गंदयालवः येर्चयंतिहरिंविष्णुंध्यायंतिचस्मरंतिच लभंतेतेहरिस्थानंश्रुतिरेषासनातनी स्वधर्मकर्मनिरता वासुदेवपरायणाः त्यक्तदानफलायेचतेनराःस्वर्गगामिनः वर्जयंतिदिवास्वापंनराःसर्वसहाश्चये पर्वण्याश्रयभूतायेतेमर्त्याःस्वर्गगामिनः द्विषतामपियेद्वेषान्नवदंत्यहितंकदा कीर्तयंतिगुणांश्चैव

वृ·ज्यो·पं·
धर्मस्कंध·
८२

मासस्तं·४
वैशाख·मा·
अ·२०

तेनराःस्वर्गगामिनः प्रवृत्तौचनिवृत्तौचश्रुतिशास्त्रोक्तमेवच आचरंतिप्रतीतायेतेनराःस्वर्गगामिनः येशांताःपरदारेषुकर्मणामनसागिरा रमयंतिनसत्वस्थास्तेनराःस्वर्गगामिनः यस्मिन्कस्मिन्कुलेजातादयावंतोयशस्विनः सानुक्रोशाःसदाचारास्तेनराःस्वर्गगामिनः व्रतंरक्षंतियेकोपात्श्रियंरक्षंतिमत्सरात् विद्यांमानापमानाभ्यांत्वात्मानंतुप्रमादतः मतिंरक्षंतियेलोभात्मनोरक्षंतिकामतः धर्मंरक्षंतिदुःसंगात्तेनराःस्वर्गगामिनः एकादशीव्रतपराः मधुसूदनपूजकाः वेतसींयमुनांसीतांपुण्यांगोदावरींनदीम् सेवंतेयेशुभाचारास्तेनराःस्वर्गगामिनः स्नाताश्चर्मण्वतीतीरेत्रिरात्रंनियतानराः व्यासाश्रमेनर्मदायांतेनराःस्वर्गगामिनः गंगाजलेप्रयागेवाकेदारेपुष्करेपिवा व्यासाश्रमेप्रभासेवमृतास्तेविष्णुगामिनः द्वारावत्यांकुरुक्षेत्रेयोगाभ्यासेनवामृताः हरिरित्यर्णयुगलंवक्त्रेयेषांहरिप्रियाः श्रोतारोधर्मशास्त्राणांधर्मप्रत्ययसंगताः प्रियंकराश्चबालानांस्वर्गलोकेवसंतिते भोजनेषूपपन्नेषुभोज्यंपृच्छंतिसादरं अभिन्नमुखरागेणशिष्टास्तेस्वर्गगामिनः नरनारायणावासेत्रिरात्रंयेसमाश्रिताः मज्जंत्यलकनंदायांधन्यास्तेकेशवप्रियाः काशीवासरतायेचविश्वेश्वरप्रपूजकाः

धर्मशीलादयावंतःश्रद्धावंतोनसूयकाः सात्विकाः सात्विकींवृत्तिमनुतिष्ठंतआसते १२

दर्शश्राद्धरतायेचतेनराःस्वर्गगामिनः येनकल्पोक्तविधिनामृतायेचनरोत्तमाः निर्ममानिरहंकारास्तेनराःस्वर्गगामिनः हेमंतेदारुदोयश्चतथाग्रीष्मेजलप्रदः वर्षास्वाश्रमदाताचस्वर्गलोकेमहीयते ब्राह्मणउवाच त्वयोक्तंसर्वमेवैतत् बहुधादुष्करंकलौ तदेकंकथ्यतांधर्मसर्वधर्मोत्तमोत्तमं यमउवाच वैशाखेविधिनास्नानंनद्यांयःप्रातराचरेत् अर्घोदितेसहस्रांशौव्रतधर्मपरायणः तस्यपुण्यंमहीदेवकिंचिद्वक्तुंनशक्यते वैशाखधर्माचरणंमधुसूदनपूजनम् त्रिरात्रिमंतिमंवापिव्रतंस्वर्गतिदायकं एतन्माधवमासस्यसमासात्किंचिदीरितं अथगच्छमहाभागदेवलोकादितोभवान् निपात्यभुवितेदेहंरुदंत्यद्यापिबांधवाः विलप्यमानैरपिबंधुभिस्तेनयावदग्नौतवयच्छरीरं प्रक्षिप्यतेहंतजवेनतावद्याहिस्वयसुप्तइवप्रबुद्धः मयप्रसादादिहपुण्ययोगःश्रुतोयथावत्तमिमंविधेहि विधानतोवैसमयेसमंतेसमागमोंतेभवितासुरैश्च सूतउवाच इतिदेववचःश्रुत्वानत्वाधर्माधिपंततः पुनःपपातसइहपरितुष्टमनाद्विजः धर्मराजप्रसादेनतत्तत्रमहीतले संसुप्तइवसोत्तस्थौबंधुवर्गसमन्वितः विधिश्चेनंद्विजोभूमौवर्षेवर्षेचसस्वयं चकारकारयामासमाधवस्नपनपरान् तस्यपुण्यप्रभावेनपरंपदमवाप्तवान् ११ १२

४८

विभिन्नकर्माणां विभिन्नकर्मणां अदन्तत्वमार्षम् १३ १४ १५ १६ १७ १८ १९ २०

तेचोर्ध्वंयांतिविमलागुणापायेमहौजसः अतोविभिन्नकर्माणांपृथग्भावाःपृथग्विधाः १३ गुणकर्मानुरूपेणते-
षांविष्णुर्महाप्रभुः कर्माणिकारयत्यद्धास्वस्वरूपाणयेविभुः १४ विष्णोर्वैषम्यनैर्घृण्येपूर्णकामस्यवैनहि सृष्टि
स्थितिंहृतिंचैवसमामेवकरोत्ययम् १५ स्वगुणादेवतेसर्वेकर्मणःफलभागिनः आरामोमान्यथासर्वान्समंवर्ष-
यतिद्रुमान् १६ एककुल्याजलाद्यांगद्रुमाःस्वप्रकृतिंगताः नारामोमरिवैषम्यंनैर्घृण्यंवाकथंचन १७ व्याधउवा
च जनानांपूर्णभोगानांकदामुक्तिर्भवेन्मुने सृष्टिकालेथवात्यंतकालेवास्थापनस्यच १८ क्वचिच्चसृष्टिकालस्य
संहारस्यापिवास्थितेः एतद्विस्तार्यमेब्रह्मन्भगवच्चेष्टितंवद १९ शरवउवाच चतुर्युगसहस्राणिब्रह्मणो
दिनमुच्यते रात्रिश्चतावतीतस्यत्वहोरात्रंदिनंभवेत् २० दशपंचदिनान्याहुःपक्षंमासोद्वयात्मकः मासद्वयंऋतुमा
हुरयनंचऋतुत्रयम् २१ अयनेद्वेवत्सरःस्यात्ताद्दृक्शतसमायदि गच्छंतिब्रह्मणोत्यस्यब्रह्मकल्पंतदाविदुः २२
तावान्हिप्रलयःकालइतिवेदविदांमतम् प्रलयस्त्रिविधःप्रोक्तोमानवोमानवात्यये २३ दैनंदिनोद्वितीयोहिब्रह्मणो
दिवसात्यये ब्रह्मणोथलयेपश्चात्ब्राह्मंचप्रलयंविदुः २४ ब्रह्मणस्तुमुहूर्तेतुमनोस्तुप्रलयंविदुः प्रलयेषुव्यती
तेषुचतुर्दशस्वैकमात् २५ दैनंदिनलयंप्राहुःप्रलयानांस्थितिंपुनः त्रयाणामेवलोकानांलयोमन्वंतरेभवेत् २६
चेतनानांतदानाशोनलोकानांक्षयोभवेत् उदकैरेवपूर्णास्ते यथापूर्वंतथापुनः २७ मन्वंतरांतेभूयात्तुचेतनानांपुन
र्भवः दैनंदिनलयेव्याधसर्वस्यापिक्षयोभवेत् २८

द्वयात्मकः पक्षद्वयप्रमाणः २१ २२ २३ २४ २५ २६ चेतनानांप्राणिनां २७ २८

२९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९

सत्यलोकंविनासर्वेलोकानश्यंतिसाधिपाः सचेतनाःसाधिभूताःप्रसुप्तेचतुरानने २९ तत्राभिमानिनोदेवाःके
चित्रमुनयस्तथा शिष्यंतिस्मृताःसर्वेपिसत्यलोकव्यवस्थिताः ३० तिष्ठंतिस्कांतिमापन्नायावत्कल्पमतींद्रियाः
पुनर्निशात्ययेब्रह्मायथापूर्वमकल्पयत् ३१ ऋषीन्देवान्पितृन्लोकान्धर्मान्वर्णान्पृथक्पृथक् पुनर्दशाव-
तारांहिविष्णोर्देवस्यचक्रिणः ३२ नियमेनभवंत्येतेतथान्येपिचभूरिशः देवताऋषयश्चैवआकल्पंचगिरांपतेः ३३
पुनरेवाभिवर्तंतेब्रह्मणासहमुक्तिगाः भूपाश्चसाधवोयेचसिद्धिंप्राप्ताःपरंगताः ३४ तेनैवचाभिवर्तंतेसत्यलोकव्य
वस्थिताः तद्राशिगाःपुनर्यांतितन्नाम्नाश्रुतिसंस्थिताः ३५ तत्तद्गोत्रेषुजायंतेतत्तत्कर्मरताःसदा दैत्यानामपिस-
र्वेषांयदाकलियुगात्ययः ३६ कलिनासहगच्छंतिस्वांगतिंनिरयालयाः तेषांचराशिसंस्थायेतन्नामानोपरेपिच ३७
जायंतेकर्मणास्वेनतत्तत्कर्मविधायकाः सृष्टिकालंप्रवक्ष्यामिमुक्तिकालंतथैवच ३८ ब्रह्मादीनांचदेवानांसमाहि
तमनाभव निमेषोदेवदेवस्यब्रह्मकल्पसमोमतः ३९ तस्यावसानेचोन्मेषोदेवदेवशिरोमणेः निमेषांतेभवेदिच्छा
स्रष्टुंलोकांश्चकुक्षिगान् ४० सोपश्यत्स्वोदरेसर्वान्जीवसंघाननेकशः सृज्यान्मुक्तानमून्सर्वान्लिंगभंगमुपा-
गतान् ४१ स्मृताःस्मृतिस्थाःसर्वेपितमोगाश्चापिसर्वशः पूर्वकल्पेलिंगभंगमापन्नाविधिपूर्वकाः ४२ मानवांताजीवको
शाज्जीवन्मुक्ताश्चमुक्तिगाः पूर्वकल्पेविमुक्ताश्चब्रह्माद्यामानवांतकाः ४३ ध्यानसंस्थाहितिष्ठंतिविष्णुकुक्षिगताश्चापि
उन्मेषप्रथमेभागेचतुर्व्यूहात्मकोविभुः ४४

४० ४१ ४२ ४३ चतुर्व्यूहात्मकः अनिरुद्ध प्रद्युम्न संकर्षण वासुदेवाख्यस्वरूपचतुष्टययुतः ४४

सद्गुणानांसमूहः साद्गुण्यंतस्मात् ४५ ४६ ४७ ४८ ४९ ५० ५१ ५२ ५३

भूत्वानुपूर्वसाद्गुण्याद्वासुदेवाच्चव्यूहगात् दत्वानुब्रह्मणोमुक्तिंसायुज्याख्यांमहाविभुः ४५ दत्वानदनुसायुज्यंत
त्वज्ञानमहात्मनां सारूप्यंचैवकेषांचित्सामीप्यंचतथाविभुः ४६ सालोक्यंचतथान्येषांदत्वादेवोजनार्दनः अनिरुद्ध
वशेसर्वान्स्थितान्लोकानलोकयत् ४७ प्रद्युम्नस्यवशेदत्वासृष्टिंकर्तुमनोदधे मायाजयाकृतिशांतिमुपयेमेस्वयंह
रिः ४८ चतुर्व्यूहैःपूर्णगुणैर्वासुदेवादिकैःक्रमात् नाभियुक्तोमहाविष्णुश्चतुर्व्यूहात्मकोविभुः ४९ भिन्नकर्मांश
यंलोकंपूर्णकामोप्यजीजनत् उन्मेषांतेपुनर्विष्णुर्योगमायांसमाश्रितः ५० संकर्षणाद्व्यूहगाच्चहरत्येतच्चराचरम्
तदेतत्सर्वमाख्यातंकार्यंचित्यंमहात्मनः ५१ यदचिंत्यंदुर्विभाव्यंब्रह्माद्यैरपियोगिभिः व्याधउवाच केवाभागव-
ताधर्माःकैर्विष्णुश्चप्रसीदति ५२ तानहंश्रोतुमिच्छामिसांप्रतंवदनोमुने शंखउवाच येनचित्तविशुद्धिःस्याद्यःस
तामुपकारकः ५३ तंविद्धिसात्विकंधर्मंयश्चकेनाप्यनिंदितः श्रुतिस्मृत्युदितोयस्तुयदिनिष्कामिकोभवेत् ५४ यस्तु
लोकाविरुद्धोपितंधर्मंसात्विकंविदुः चतुर्विधाहितेधर्मावर्णाश्रमविभागतः ५५ नित्यनैमित्तिकाःकाम्याइतितेचत्रि-
धामताः तेसर्वेस्वस्वधर्माश्चयदाविष्णोःसमर्पिताः ५६ तदावैसात्विकाज्ञेयाधर्माभागवताःशुभाः देवतांतरदैवत्याः
सकामाराजसामताः ५७ यक्षरक्षःपिशाचादिदैवत्यालोकनिष्ठुराः हिंसात्मकानिंदिताश्चधर्मास्तेतामसाःस्मृताः
५८ सत्वस्थाःसात्विकान्धर्मान्विष्णुप्रीतिकरान्शुभान् कुर्वंत्यनीहयानित्यंतेवैभागवताःस्मृताः ५९ येषांचित्तंस-
दाविष्णौजिह्वायांनामवैविभोः पादौचहृदयेयेषांतेवैभागवताःस्मृताः ६०

५४ ५५ नित्याःप्रतिदिनंचित्तशुद्ध्यर्थमाचरणीयाः नैमित्तिकानिमित्तं कालादिविशेषमुपलभ्य चित्तशुद्ध्यर्थंविहिताः काम्याः प्रसिद्धाः ५६ भागवताविष्णुसंबंधिनः ५७ ५८ ५९
६०

६१ ६२ ६३ ६४ ६५ ६६ ६७ ६८ ६९ ७० प्रश्रयाग्रहादौन्याश्रयास्तेषाम्

सदाचाररतायेचसर्वेषामुपकारकाः सदैवममताहीनास्तेवै॰ ६१ येषांचशास्त्रेविश्वासोगुरौसाधुषुकर्मस्क योविष्णुभ
क्ताःसततंतेवैभा॰ ६२ येषांहिसमताधर्माःशाश्वताविष्णुवल्लभाः श्रुतिस्मृत्युदितायेचतेधर्माःशाश्वतामताः ६३
अदनंसर्वदेशेषुवीक्षणंसर्वकर्मणां श्रवणंसर्वधर्माणांविषयासक्तचेतसाम् ६४ अकिंचित्करमेतेषांषंढस्येववरास्त्रि
यः साधूनांदर्शनेनैवमलोद्ववर्त्तिचैसतां ६५ चंद्रस्यकौमुदीसंगाच्चंद्रकांतशिलायथा क्वचित्सच्छास्त्रश्रवणाद्विषयैरहि
तंमनः ६६ तिष्ठत्येवसतांपुंसांतेजोरूपंह्यकल्मषम् पद्मबंधोःप्रभासंगात्सूर्यकांतशिलायथा ६७ निष्कामैर्हिजनैः
यैस्तुश्रद्धयासमुपाश्रितः योविष्णुवल्लभोनित्यंधर्मोभागवतोमतः ६८ नैहत्वाबहवोधर्माइहामुत्रफलप्रदाः विष्णुप्रीति
करीःसूक्ष्माःसर्वदुःखविमोचकाः ६९ दध्नःसारमिवोद्धृत्यधर्मंवैशाखसंभवम् रमायैभगवानाहक्षीराब्धौहितकाम्यया
७० मार्गच्छायाविनिर्माणंप्रपादानंचवैतथा व्यजनैर्वीजनंचैवप्रश्रयाणांसमर्पणम् ७१ छत्रस्योपानहोर्दानंदानंकर्पूर
गंधयोः वापीकूपतडागानांनिर्माणंविभवेसति ७२ सायान्हेपानकस्यापिदानंतुकुसुमस्यच तांबूलदानंपायसंगो
रसानांविशेषतः ७३ लवणान्विततक्रस्यदानंश्रांतायचैपाथि अभ्यंगकरणंचैवद्विजपादावनेजनं ७४ कंदकंबलपर्यं
कदानंगोदानमेवच मधुयुक्ततिलानांचदानंपापविनाशनं ७५ सायान्हेचेक्षुदंडानांदानमुर्वारुकस्यच रसायनप्रदानं
चपितृनिर्वापनंतथा ७६ एतेधर्माःविशिष्योक्तामासेस्मिन्माधवप्रिये प्रातःसूर्योदयेस्नात्वाशृण्वन्द्विजकुलेरितं ७७
नित्यकर्माणिकृत्वैवंमधुसूदनमर्चयेत् कथामाधवमासीयांशृणुयाच्चसमाहितः ७८

७१ ७२ ७३ ७४ ७५ उर्वारुकस्य कर्कटीफलस्य रसायनस्य पूर्वोक्तपानकप्रमुखस्यप्रदानं ७६ ७७ ७८

७९ अलाबुं दुग्ध तुंबी महाराष्ट्रभाषायांदुधाभोपळाइतिप्रसिद्धम् गृंजरंगाजरइतिप्रसिद्धं तिलपिष्टकं तिलैःकृतं किमपिखाद्यं आरनालं कां
जिकं भिःसटं कमलकंदः अथवादग्धान्नं घृतकोशातकी घोसाळेगलकाइतिप्रसिद्धम् ८० उपोदकी थोरमयाळइतिप्रसिद्धा कलिंगंसर्षपंइति
प्रसिद्धम् अन्यत्सुगमम् ८१ कलिंगानि कालिंगडनाम्नाप्रसिद्धानिफलानि कौसुंभं करडईइतिप्रसिद्धंशाकं ८२ श्लेष्मातकीफलं भोंकरइ
तिप्रसिद्धम् ८३ ८४ अथव्रतांते कर्तव्यतामाह तत्रएवंमासव्रतं कुर्यात् एवंव्रतेसमाप्तेतु इत्यनेन वचनेन व्रतारंभसमाप्तिरुक्ता परंतत्र

तैलाभ्यंगंवर्जयेच्चकांस्यपात्रेतुभोजनम् निषिद्धभक्षणंचैववृथालापंतुवर्जयेत् ७९ अलाबुंगृंजरंचैवलशु
नंतिलपिष्टकं आरनालंभिस्सटंचघृतकोशातकींतथा ८० उपोदकींकलिंगंचशिग्रुशाकंचवर्जयेत् निष्पावा
निकुलित्थानिमसूराणिचवर्जयेत् ८१ वृंताकानिकलिंगानिकोद्रवाणिचवर्जयेत् तंदुलीयकशाकंचकौसुंभं
मूलकंतथा ८२ औदुंबरंबिल्वफलं तथाश्लेष्मातकीफलम् सर्वथावर्जयेद्विद्वान्मासेस्मिन्माधवप्रिये ८३ एते
ष्वन्यतमंभुक्त्वासचांडालोभवेद्ध्रुवम् तिर्यग्योनिशतंयातिनात्रकार्याविचारणा ८४ एवंमासव्रतंकुर्यान्मत्प्रीतये
मधुघातिनः एवंव्रतेसमाप्तेतु प्रतिमांकारयेद्विभोः ८५ मधुसूदनदैवत्यांसवस्त्रांचसदक्षिणाम् स्वर्चितां
विभवैःसर्वैर्ब्राह्मणायनिवेदयेत् ८६ वैशाखसितद्वादश्यांदद्याद्दध्यन्नमंजसा सोदकुंभसतांबूलंसफलंचस
दक्षिणम् ८७

कस्मिन्दिने आरंभः कस्मिन्दिने समाप्तिः कार्येति जिज्ञासायामाहपाद्मे प्रारंभेतव्रतमिदं पौर्णमास्यांमधोर्नृप यमैश्चनियम-
मैर्युक्तः शक्त्याकिंचित्प्रदायच हविष्यभुग्भूमिशायी ब्रह्मचर्यव्रतेस्थितः कृच्छ्रादितपसाक्षामोध्यायन्नारायणंहृदि एवंप्राप्यचवैशाखीं दद्यान्मधुति
लादिकं भोजनंद्विजमुख्येभ्यो भक्त्याधेनुंसदक्षिणां आच्छिद्रंप्रार्थयेच्चापितस्यस्नानस्यभूसुरान् यथालक्ष्मीप्रियाभूपमाधवस्यजगत्पतेः तथैवमाध
वोमासोमधुसूदनवल्लभः एवंविधियुतोमर्त्यःस्नात्वाद्वादशवत्सरं उद्यापनंचरेच्छक्त्यामधुसूदनतुष्टये इदंमाधवमासस्यमाहात्म्यंकथितंतवेति ८५
८६ ८७

८८ ८९ ९० ९१ ९२ ९४ ९४ ९५ इतिवैशाखमाहात्म्यटीकायांविंशोऽध्यायः २० छ

ददामिधर्मराजायतेनप्रीणातुवैयमः अपसव्यात्समुच्चार्यनामगोत्रेपितुस्ततः ८८ दद्याद्दध्यन्नमक्षय्यंपितॄणां तृप्तिहेतवे गुरुभ्यश्चतथादद्यात्पश्चाद्दद्याच्चविष्णवे ८९ शीतलोदकदध्यन्नंकांस्यपात्रस्थमुत्तमम् सदक्षिणंसतांबूलंसभक्ष्यंचफलान्वितं ९० ददामिविष्णवेतुभ्यंविष्णुलोकजिगीषया इतिदत्त्वायथाशक्त्यागांचदद्यात्कुटुंबिने ९१ एवंमासव्रतंकुर्याद्योदंभेनविवर्जितः ससर्वैःपातकैर्हीनःकुलमुद्धृत्यवैशतं ९२ पश्यतामेवभूतानांभित्त्वावैसूर्यमंडलम् यातिविष्णोःपरंधामयोगिनामपिदुर्लभम् ९३ व्याख्यात्येवंद्विजकुलवरेमाधवीयांस्वधर्मान्विष्ण्वादिष्टानतिमहिमतरान्व्याधपृष्टान्समस्तान् वटःसद्यःपश्यतामेवभूमौपपाताह्यपंचशाखोद्रुमोयम् ९४ वृक्षात्तस्मात्कोटरेसंस्थितोहिव्यालःकश्चिद्दीर्घदेहीकरालः हित्वादेहंपापयोनिंचसद्यःसर्वेतस्थौप्रांजलिर्नम्रमूर्धा ९५ इतिश्रीस्कंदपुराणेवैशाखमाहात्म्येनारदांबरीषसंवादेभागवतधर्मकथनंनामविंशोऽध्यायः २० छ

श्रुतदेवउवाच ततस्तुविस्मितोभूत्वाशंखोव्याधसमन्वितः कोभवानितितंप्राहदशेयंचकुतस्तव १ केनवाकर्मणासौम्यमतिस्तवशुभावहा अकस्मात्तेकथंमुक्तिरेतदाचक्ष्वविस्तरात् २ शंखेनैवंतदापृष्टोदंडवत्पतितोभुवि प्रश्रयावनतोभूत्वाप्रांजलिर्वाक्यमब्रवीत् ३ अहंपुराद्विजःकश्चित्प्रयागेबहुभाषणः रूपयौवनसंपन्नोविद्यामदसुगर्वितः ४ धनाढ्योबहुपुत्राढ्यःसदाहंकारदूषितः कुसीदस्यमुनेःपुत्रोनाम्नारोचनइत्यहम् ५ आसनंशयनंनिद्राव्यवायोक्षपरिक्रियाः लोकवार्ताकुसीदंवाव्यापारास्तेममाभवन् ६

अथसर्पदेहान्मुक्तस्य पुरुषस्यकथांविवक्षुः प्रश्नमुत्थापयति ततइत्यादिना १ २ ३ ४ ५ अक्षपरिक्रिया द्यूतक्रीडा ६ छ

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

तंतुमात्राणि अतिसूक्ष्माण्यपि कर्माणि लोकपरंपरागतानि कुर्वे अकरवम् ७ ८ ९ १० ११ १२ १३ अचरं
अकरवं लोकवार्ता लौकिककथातया अभिरंजनात् मनोरंजनात् १४ १५ पंचत्वं मरणं १६ तप्तसीसजलानि सीसरसा

तंतुमात्राणिकर्माणिलोकनिंदाविशंकितः सदंभश्चसदाकुर्वेनश्रद्धामेकदाचन ७ दुर्बुद्धेर्ममदुष्टस्यकियत्कालो
गतोभवत् तदावैशाखमासेस्मिन्जयंतोनामवैद्विजः ८ श्रावयामासतन्मासधर्मान्भागवतप्रियान् तत्क्षेत्रेवासिनां
पुण्यकर्मणांचद्विजन्मनाम् ९ नारीनराःक्षत्रियाश्चवैश्याःशूद्राःसहस्रशः प्रातःस्नात्वासमभ्यर्च्यमधुसूदनमव्ययम्
१० कथांशृण्वंतिसततंजयंतेनसमीरिताम् ऋषिर्भूत्वामौनधरावासुदेवकथारताः ११ वैशाखधर्मनिरताः
दंभालस्यविवर्जिताः तांसभांचप्रविष्टोहंकौतुकाच्चदिदृक्षया १२ सोष्णीषेणमयामूर्ध्नानमस्कारोपिनोकृतः
तांबूलंचमुखेकृत्वाकंचुकंचमयाधृतम् १३ कथाविक्षेपमचरंलोकवार्ताभिरंजनात् सर्वेषांचित्तचांचल्यमभूद्वै
लोकवार्तया १४ क्वचिद्धासःप्रसार्याहंक्वचिन्निंदन्क्वचिद्धसन् एवंकालोमयानीतःकथायावत्समाप्यते १५
पश्चात्तेनैवदोषेणसद्योल्पायुर्विनष्टधीः सन्निपातेनपंचत्वंप्राप्तोहंचपरेदिने १६ तप्तसीसजलैःपूर्णेनिरयेचहलाहलम्
प्राप्यभुक्त्वायातनांचमन्वंतानिचतुर्दश १७ युक्तेष्वथचलक्षेषु तथाचतुरसीतिभिः क्रमाद्योनिषुजातोहम्
इदानींचावसद्द्रुमे १८ दशयोजनविस्तीर्णेशतयोजनमुन्नते व्यालोहंतामसःक्रूरःसप्तयोजनकोटरे १९ भूत्वा
वसामिविप्रर्षेकर्मणाबाधितःपुरा अद्यतत्रसमायातानिराहारस्यकोटरे २० दैवात्तवमुखांभोजसमीरितकथामृतं
श्रुत्वा चक्षुर्द्वयेनाहंसद्योध्वस्ताशुभोमुने २१ व्यालयोनिंविसृज्याहंदिव्यरूपधरःपुमान् प्रांजलिःप्रणतोभूत्वा
पादौतेशरणंगतः २२

स्तैः पूर्णं मन्वंतानि मन्वंतराणि १७ १८ १९ २० चक्षुर्द्वयेनश्रुत्वा सर्पस्यचक्षुःश्रवत्वात् चक्षुर्भ्यांश्रवणम्
२१ २२

सतां सानुकंपः कुतः कदापिसाधूनामुपरिदयानकृतेत्यर्थः २३ २४ २५ २६ २७ गताध्वसः गतसाध्वसः २८ २९ ३०

कस्मिन्जन्मनित्वंबंधुर्नजानेमुनिसत्तम नमयोपकृतंक्वापिसानुकंपःकुतःसतां २३ साधूनांसमचित्तानांसदाभूत
दयावताम् परोपकारमकृतिर्नचैषामन्यथामतिः २४ ममाद्यानुग्रहाणत्वंयथाधर्मेमतिर्भवेत् नभूयाद्धिस्मृतिः
क्वापिविष्णोर्देवस्यचक्रिणः २५ महतांसाधुवृत्तानांसंगतिश्चसदाभवेत् दारिद्र्यमेकमेवस्यान्मदोषपरमाजनम्
२६ इतितंबहुधास्तुत्वाप्रणम्यचपुनःपुनः प्राजलिःप्रणतस्तस्थौतूष्णीमेवतदग्रतः २७ शंखोदोर्भ्यांसमुत्थाप्य
पूर्णप्रेमपरिप्लुतः पस्पर्शपाणिनाचांगंशतमेनगताध्वसः २८ चक्रेसोनुग्रहंतस्मिन्दिव्यरूपधरोद्विजे ग्राहतद्रूप·
याविष्टोभाविवृत्तांतमंजसा २९ द्विजतेमासमाहात्म्यश्रवणाच्चहरेरपि माहात्म्यश्रवणात्सद्योविध्वस्ताखिलबं
धनः ३० अतिहायकरुकंचक्रमाद्भूत्वापुनर्भुवि दशार्णेविषमेपुण्येभवितात्वंद्विजोत्तमः ३१ वेदशर्मेतिविख्या
तःसर्ववेदविशारदः तत्रतेभविताजातिस्मृतिरात्यंतकीशक्रभा ३२ तथास्मृतानुबंधस्त्वंत्यक्तसर्वेषणःशुभः करो·
षिसकलान्धर्मान्वैशाखोक्तान्हरिप्रियान् ३३ नैर्द्वंद्वोनिःस्पृहोसंगोगुरुभक्तोजितेंद्रियः सदाविष्णुकथालापोभ·
वितातत्रजन्मनि ३४ ततःसिद्धिंसमाप्यायविध्वस्ताखिलबंधनः प्राप्नोषिपरमंधामयोगैरपिदुरासदम् ३५ माभैः
षीःपुत्रभद्रंतेभवितामत्प्रसादतः हास्याद्भयात्तथाक्रोधाद्द्वेषात्कामादथापिवा ३६ स्नेहाद्वासकृदुच्चार्यविष्णोर्नामाघ
हारिच पापिष्ठाअपिगच्छंतिविष्णोर्धामनिरामयम् ३७ किमुतत्श्रद्धयायुक्ताजितक्रोधाजितेंद्रियाः दयावंतः
कथांश्रुत्वागच्छंतीतिद्विजोत्तम ३८ केचित्केवलयाभक्त्याकथालापैकतत्पराः सर्वधर्म्मोज्झितावापियांतिविष्णोःपरप·
दम् ३९

३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९

४० ४१ अबद्धवत्यपि अशक्तेऽपि ४२ ४३ ४४ ४५ ४६ ४७ ४८

द्वेषादिनाचभक्त्यावाकेचिद्विष्णुमुपासते तेपियांतिपरंधामपूतनेवासृक्हारिणी ४० महद्भिःसंगतोनित्यंवाग्विस
र्गस्तदाश्रयः मुमुक्षूणांचकर्तव्यःसविधिःश्रुतिचोदितः ४१ सवाग्विसर्गोजनताघविप्लवोयस्मिन्प्रतिश्लोकमबद्धवत्य
पि नामान्यनंतस्ययशोंकितानियच्छृण्वंतिगायंतिगृणंतिसाधवः ४२ यःकष्टसेवांनचकांक्षतेविभुर्नचासनंभूरिनिरू
पयोवने स्मृतःसकृद्गच्छतिधामभास्वरंकंचादयालुशरणंव्रजेत ४३ तमेवशरणंयाहिनारायणमनामयं भक्तवत्सल
मव्यक्तंचेतोगम्यंदयानिधिम् ४४ कुरुसर्वानिमान्धर्मान्वैशाखोक्तान्महामते तेनतुष्टोजगन्नाथःशर्मतेचविधास्यति
४५ इत्युक्त्वाविररामाथव्याधृहृक्षास्कविस्मितः सदिव्यःपुरुषःप्राहपुनस्तंमुनिपुंगवम् ४६ दिव्यपुरुषउवाच
धन्योस्म्यनुगृहीतोस्मित्वयाशखदयालुना दिष्ट्यागतामेदुर्योनिर्याभिश्चैवपरांगतिम् ४७ इतितंचपरिक्रम्यस्तुत्वानुज्ञा-
तोदिवंययौ ततःसायमभूद्राजन्शंखोव्याधेनतोषितः ४८ संध्यांसायंतनींकृत्वारात्रिशेषंनिनायच नानाख्यानैश्चभू-
पानांदेवानांचमहात्मनाम् ४९ लीलाभिरवताराणांदृष्टगोष्ठिभिरेवच ब्राह्मेमुहूर्तेचोत्थायपादौप्रक्षाल्यवाग्यतः ५०
ध्यायंश्चतारकंब्रह्मकृत्वाशौचादिसत्क्रियां वैशाखेमेषगेसूर्येस्नात्वाप्राक्चभगोदयात् ५१ कृत्वासंध्यादिकंकर्मत-
थासंतर्प्यचाखिलान् व्याधमाहूयहृष्टात्मामूर्ध्निप्रोक्ष्यनिरीक्ष्यच ५२ रामेतिद्व्यक्षरंनामददौवेदाधिकंशुभम् विष्णो
रेकैकनामापिसर्ववेदाधिकंमतं ५३ तेभ्यश्चानंतनामभ्योधिकंनाम्नांसहस्रकम् तादृङ्नामसहस्रेणरामनामसमंमतं
५४ तस्माद्रामेतितन्नामजपव्याधनिरंतरम् धर्मानेतान्कुरुव्याधयावदामरणांतिकं ५५ ततस्तेभविताजन्मवल्मीकस्य
ऋषेःकुले वाल्मीकिरितिनाम्नाचभूमौख्यातिमवाप्स्यसि ५६ ४९ ५० ५१ ५२ ५३ ५४ ५५ ५६

५७ ५८ निववृत्ते परावृत्तः ५९ चूतमाम्रफलम् ६० ६१ ६२ ६३ ६४ ६५ ६६

इतिव्याधंसमादिश्यप्रतस्थेदक्षिणांदिशम् व्याधोपितंपरिक्रम्यप्रणम्यचपुनःपुनः ५७ किंचिद्दूरानुगोभूत्वासरुदन्विरहातुरः यावद्दृष्टिपथंतावत्पश्यंस्तस्यगतिंपुनः ५८ पुनर्निववृते कृच्छ्रात्तमेवहृदिचिंतयन् वनेनिर्मायतन्मार्गे· प्रपांकृत्वासुनिर्मलाम् ५९ आतिथ्यानिमान्धर्मान्वैशाखोक्तांश्चकारह वन्यैःकपित्थपनसैर्जंबूचूतादिभिःफलैः ६० मार्गगानांश्रमार्तानामाहारंपरिकल्पयन् उपानद्भिश्चंदनैश्चछत्रैश्चव्यजनैरपि ६१ वालुकास्तरणोपेतछायाभिश्च क्वचित्क्वचित् आजहारचपांथानांश्रमस्वेदोद्भवंतथा ६२ प्रातःस्नात्वादिवारात्रंजपन्नामेतिवैमनुं व्याधजन्मानिना· मासोवल्मीकस्यसुतोभवत् ६३ कृणुर्नाममुनिःकश्चित्तस्मिन्नेवसरोवरे तपोवैदुस्तरंतेपेबाह्यव्यापारवर्जितः ६४ वल्मीकमभवद्देहेतस्यकालेनभूयसा वल्मीकइतितंप्राहुस्ततोवैमुनिपुंगवम् ६५ पश्चात्तपोविरामांतेकृणोस्मृतिपथंगते स्त्रियोनुस्मरतोराजन्स्खलितंचेंद्रियंमुनेः ६६ जग्राहशैलूषीकाचित्तस्याजज्ञेवनेचरः वाल्मीकिरितिविख्यातो भुवनेषुमहायशाः ६७ योवैरामकथांदिव्यांस्वैःप्रबंधैर्मनोहरैः लोकेप्रख्यापयामासकर्मबंधनिकृंतनीम् ६८ श्रुतदेवउवाच पश्यवैशाखमाहात्म्यंभूपालाद्याधिभूतिदम् व्याधोप्युपानहौदत्वाऋषित्वंप्रापदुर्लभम् ६९ यइदं परमाख्यानंपापघ्नंरोमहर्षणं शृणुयाच्छ्रावयेद्वापिनभूयःस्तनपोभवेत् ७० इतिश्रीस्कंदपुराणेवैशाखमाहात्म्ये नारदांबरीषसंवादेव्याधोपाख्यानेवाल्मीकेःजन्मकथनंनामएकविंशोऽध्यायः २१ ७ मैथिलेयउवाच कान्यस्मिंस्तिथयःपुण्यामासेवैशाखसंज्ञके कानिदानानिशस्तानितासुतासुविशेषतः १

६७ ६८ ६९ ७०

इतिवैशाखमाहात्म्यटीकायांएकविंशोऽध्यायः २१ ७ पुनर्मैथिलेयः श्रुतदेवंप्रतिवैशाखधर्मान्पृच्छति केत्यादिना १

२ ३ ४ ५ इमास्तिथयः ६ ७ सुगुणोत्तमः सुगुणः उत्तमश्च ८ ९ वैशाखेगोचरोवै

काःप्रख्याताश्चवैलोके एतदाचक्ष्वविस्तरात् श्रुतदेवउवाच त्रिंशच्चतिथयःपुण्यावैशाखेमेषगेरवौ २ एकादश्यांकृतंपुण्यंकोटिकोटिगुणंभवेत् सर्वदानेषुयत्पुण्यंसर्वतीर्थेषुयत्फलं ३ समवाप्नोतिवैशाखेएकादश्यांजलाप्लुतः स्नानंदानंतपोहोमोदेवतार्चनसत्क्रियाः ४ कथायाःश्रवणंचैवसद्योमुक्तिविधायकं रोगाद्युपहतोयस्तुदारिद्र्येणापिपीडितः ५ श्रुत्वाकथामिमांपुण्यांकृतकृत्योभवेन्नरः अस्नात्वाचाप्यदत्वाचयेननीताइमाःशुभाः ६ सगोघ्नश्चकृतघ्नश्चपितृघ्नश्चमहान्स्मृतः जलाशयाश्चस्वाधीनाःस्वाधीनंचकलेवरं ७ माधवोमनसासेव्यःकालश्चसुगुणोत्तमः साधवश्चदयावंतःकोनसेवेतमाधवम् ८ दरिद्रैश्चधनाढ्यैश्चपंगुभिश्चांधकैस्तथा षंढैश्चविधवाभिश्चनारीभिश्चनरैस्तथा ९ कुमारयुववृद्धैश्चरोगार्तैरपिभूमिप अतीवसुखसाध्योहिधर्मोवैशाखगोचरः १० मासमेनमनुप्राप्यधर्मान्कुरुइमान्शुभान् कोनपलंचकुरुतेतस्मात्कोन्वपरःशुभः ११ योतीवसुलभान्धर्मान्नकरोतिनराधमः तस्यैवसुलभालोकानारकानात्रसंशयः १२ अथातःसंप्रवक्ष्यामितस्मिन्मासेचकोत्तमा तांतिथिंसर्वपापघ्नींदध्नःसारमिवोद्धृताम् १३ चैत्रेमासिमहापुण्येमेषसंस्थेदिवाकरे पापघ्नीपितृदेवत्यागयाकोटिफलप्रदा १४ अत्रैवंश्रूयतेपुण्यापितृगाथापुरातनी शृणुतांसत्कथांराजन्सावर्णौशासतिक्षितिम् १५ त्रिंशत्कलियुगस्यांतेसर्वधर्मविवर्जिते आनर्तेतुद्विजःकश्चिद्धर्मवर्णइतिश्रुतः १६ दृष्ट्वाकलियुगेराजन्जनान्पापरतान्मुनिः तस्यैवप्रथमेपादेवर्णधर्मविवर्जिते १७ सकदाचित्सत्रयागंमुनीनांतुमहात्मनाम् आगमत्पुष्करक्षेत्रेकुर्वतांमौनधारिणां १८

शाखसंबंधी १० ११ नारका नरकस्थानभूताः १२ १३ १४ १५ १६ १७ १८

१९ २० २१ २२ २३ २४ २५ २६ २७ शिश्नस्यनिग्रहः

तत्रचासन्पुण्यकथाऋषीणांशास्त्रगोचराः तत्रकेचित्कलियुगंप्रशसंसुर्धृतव्रताः १९ कृतेयद्वत्सरात्साध्यंपुण्यंमा
धवतोषणम् त्रेतायांमासतःसाध्यंद्वापरेपक्षतोनृप २० तस्माद्दशगुणंपुण्यंकलौविष्णुस्मृतेर्भवेत् अत्यल्पमपि
वैपुण्यंकलौकोटिगुणंभवेत् २१ दयापुण्यविहीनेतुदानधर्मविवर्जिते दयादानंचकुरुतेसकृदुच्चार्यवैहरिं २२
सएवचोर्ध्वगोनूनंदुर्भिक्षेचान्नदस्तथा एतत्प्रसंगावसरेनारदोभ्येत्यवैमुनिः २३ करेणैकेनशिश्नंचजिह्वांचैकेनवैदृ
सन् प्रगृह्योन्मत्तवत्तत्रननर्तमुनिसत्तमः २४ सभ्यास्तदातमित्यूचुःकिमेतदितिनारद प्रत्युवाचसतान्सर्वान्नृत्यंकु
र्वन्हसन्सुधीः २५ संतोषाद्यदिहप्रोक्तंनृत्यद्भिर्भावितात्मभिः सिद्धावयंनसंदेहःपुण्योयंकलिरागतः २६ तत्सत्यं
नचसंदेहोबहुस्वल्पेनसाध्यते स्मरणात्तोषमायातिकेशवःक्लेशनाशनः २७ तथापिचःप्रवक्ष्यामिदुर्घटंचद्वयंध्रुवं
शिश्नस्यनिग्रहःपुत्राजिह्वायाश्चापिनित्यशः २८ द्वयंयद्धिभवेद्यस्यसएवस्याज्जनार्दनः भवद्भिर्नात्रस्थातव्यंतस्मात्क
लियुगागमे २९ पाखंडभारतंहित्वासंचरध्वंयथासुखम् यत्रकुत्रापिदेशेषुमनोयत्रप्रसीदति ३० इतितद्वचनंश्रुत्वा
मुनयःशंसितव्रताः सत्रंसमाप्यसहसाययुस्तेचयथासुखम् ३१ धर्मवर्णोपितच्छ्रुत्वात्यक्तुंभूमिंमनोदधे सव्रतंचो
र्ध्वतेजस्कंधृत्वादंडकमंडलू ३२ जटावल्कलधारीचभूत्वाचैवययौपुनः कलौयुगेत्वनाचारान्द्रष्टुंविस्मितमानसः
३३ तत्रापश्यज्जनान्घोरान्पापाचाररतान्खलान् पाखंडिनोद्विजाःसर्वेशूद्राःप्रव्रजिनस्तथा ३४ भर्तारंद्वेष्टिभार्याच
शिष्योद्वेष्टिगुरुंतथा भृत्यश्चस्वामिहंताचपुत्रःपितृवधेरतः ३५

कामजयइत्यर्थः जिह्वायानिग्रहः मधुरादि

रसेषु रागद्वेषराहित्यं २८ २९ ३० ३१ ३२ ३३ प्रव्रजिनः संन्यासिनः ३४ ३५ ६९

शुभाः श्रुतिस्मृतिपुराणविहिताः क्रियाः कर्माणि क्रियासाम्याः लौकिकगमनागमनादिसदृशाः ३६ शिताः क्रूराः ३७
कूटसाक्ष्यं मत्साक्षिकमिदमितिमिथ्याकथनं ३८ एकं चान्यत् एके मुख्यान्यकेवला इत्यभिधानात् हैतुकी सहेतुका जीविका

शूद्रप्राया द्विजाः सर्वे वस्त्रप्रायाश्च धेनवः गाथाप्रायास्तथा वेदाः क्रियासाम्याः शुभाः क्रियाः ३६ भूतप्रेतपि
शाचाद्याः फलदास्तत्र देवताः ता एव श्रद्धयार्च्चंति जनाः पापरताः शिताः ३७ सर्वे व्यवायनिरतास्तदर्थे त्यक्तजी
विताः कूटसाक्ष्यप्रवक्तारः सदा कैतवमानसाः ३८ मनस्येकं वचस्येकं कर्मण्येकं सदा कलौ सर्वेषां हैतुकी
विद्या सा पूज्या नृपमंदिरे ३९ गीताद्याश्च कलाविद्या नृपाणां चाप्रियावहाः हीनाश्च पूज्यतां यांति नोत्तमाश्च क
लौ युगे ४० श्रोत्रियाश्च द्विजाः सर्वे दरिद्राः स्युः कलौ युगे विष्णुभक्तिर्नराणां तु प्रायशो नैव वर्तते ४१ प्रायः
पाखंडभूयिष्ठं पुण्यक्षेत्रं भविष्यति शूद्रा धर्मप्रवक्तारो जटिलास्तापसाः कलौ ४२ सर्वे चाल्पायुषो मर्त्या द
याहीनाः शठा जनाः सर्वे धर्मप्रवक्तारः सर्वे च ग्रहणोत्सवाः ४३ स्वार्चनं चापि हीच्छंति वृथा निंदापरायणाः
असूयानिरताः सर्वे प्रभोः स्वगृहमागते ४४ भ्राता च भगिनीं गंता पिता पुत्रीं च वै कलौ सर्वे पि शूद्रीनिरताः सर्वे
वारांगनारताः ४५ साधून्नैव विजानंति बहुपापांश्च मन्यते व्यक्तीकुर्वंति साधूनां दोषमेकं दुराग्रहाः ४६
पापानां दोषजातानि गुणत्वेन वदंति हि दोषमेव प्रगृण्हंति कलौ त्तु विगुणा जनाः ४७ जलौकाधर्मसंयुक्ता
रक्तं पिबंति नो पयः औषध्यः सत्वहीना हि ऋतूनां व्यत्ययास्तथा ४८ दुर्भिक्षं सर्वराष्ट्रेषु कन्या कालेन सूयते
नटनर्तकविद्यासु प्रीतिमंतो नराः कलौ ४९ र्थः सकलंकमैतिभावः ३९ ४० ४१ ४२ ग्रहणं परद्रव्यादीनां तत्र
उत्सवो हर्षो येषां तथाविधाः ४३ ४४ ४५ ४६ ४७ ४८ काले प्रसवदशायां न सूयते बालैव प्रसूते इत्यर्थः ४९

५० ५१ श्रृंगाररसएवनिर्वाणो मुक्तिसदृशोयेषांते ५२ ५३ ५४ ५५ पतितान् आसन्नपतनान् ५६

वेदवेदांतविद्यास्तुनिरतायेगुणाधिकाः भृत्यान्पश्यंतितान्मूढास्ते भ्रष्टाश्चाखिलान्नृप ५० त्यक्तश्राद्धक्रियाःसर्वेत्यक्तवेदोदितक्रियाः जिह्वायांविष्णुनामानिनवर्तंतेकदाचन ५१ श्रृंगाररसनिर्वाणास्तद्गीतान्येवतेजगुः नविष्णुसेवानचशास्त्रवार्तानयागदीक्षानविचारलेशः ५२ नतीर्थयात्रानचदानधर्माः कलौजनेक्वापिबभूवचित्रम् तान्दृष्ट्वाधर्मवर्णोपिसुभीतोत्यंतविस्मितः ५३ वंशपापात्क्षयंयातान्दृष्ट्वाद्वीपांतरंययौ सञ्चरन्सर्वद्वीपेषुलोकेष्वेवतुसर्वशः ५४ पितृलोकंययौधीमान्कदाचित्कौतुकान्वितः तत्रापश्यन्महाघोरान्भ्राम्यमाणांस्वकर्मभिः ५५ धावतोरुदमानांश्चपततःपतितानपि तत्रापश्यच्चांधकूपेपतितान्स्वान्पितॄनधः ५६ दूर्वाग्रलंबिनोदीनान्दूर्वाच्छेदाहिशंकितान् तदाप्राप्तःक्वापिचाखुर्दूर्वामूलंतदाश्रयम् ५७ तेनभागत्रयंचात्तमेकोभागोवशेषितः तंदृष्ट्वातेक्षीयमाणंमूलंदुःखेनकर्षितः ५८ अधोदृष्ट्वाचांधकूपंतटपातादिभीषणं दुरुत्तारंमहाघोरंकर्मणासस्तुदुःखिताः ५९ अधेचापिदुरुत्तारमवलंबविवर्जितम् तान्दृष्ट्वाविस्मितोभूत्वादयालुर्वाक्यमब्रवीत् ६० केयूयंपतितात्रास्मिन्केनदुस्तरकर्मणा कस्यगोत्रेसमुत्पन्नाःकथंवोमुक्तिरूर्जिता ६१ एतद्यूयंवदध्वंमेशर्मवोथभविष्यति इत्येवमुदितास्तेनपितरोथस्तुदुःखिताः ६२ तमूचुःकरुणांवाचंधर्मश्रुतिपुरःसराः पितरऊचुः वयंश्रीवत्सगोत्रीयाभुविसंतानवर्जिताः ६३ पिंडश्राद्धविहीनाश्चतेनपच्यामहेवयं निःसंतानोपिनोवंशोजातःपापैःकलौयुगे ६४ नास्माकंपिंडदश्चास्तिवंशेपापक्षयंगते तेनांधकूपेपतनंनिस्तंतूनांदुरात्मनाम् ६५

५७ ५८ ५९ ६० ६१ तेनवचसा ६२ ६३ ६४ निस्तंतूनां संततिरहितानाम् ६५

६६ ६७ ६८ ६९ ७० ७१ ७२ ७३ ७४ ७५

एकोहिवर्ततेवंशेधर्मवर्णोमहायशाः सविरक्तश्चरन्नेकोनगार्हस्थ्यमुपेयिवान् ६६ तंतुनातेनबध्वामोदूर्वानालाव
लंबिताः निस्तंतुत्वाच्चतन्मूलमाखुःखादनिप्रत्यहम् ६७ एकस्यैवावशिष्टत्वात्किंचिन्मूलावशोषितः आखुना-
खाद्यमानश्चवर्ततेसौम्यपश्यता ६८ तस्यचायुःक्षयेनातशेषमाखुर्हरिष्यति पश्चात्कूपेपतिष्यामोदुरुत्तारेंधताम
से ६९ तस्मात्त्वंचभुवंगत्वाधर्मवर्णप्रबोधय अस्मद्वाक्यैर्दयापात्रैर्गार्हस्थ्येविमुखंमुनिम् ७० पितरस्तेभृशार्ताहि
नरकेपतितामया अंधकूपेदुरुत्तारेदृष्टाद्दूर्वावलंबिताः ७१ सादूर्वावंशरूपाहितन्मूलसन्ततंमुने कालाख्योमू
षकस्तस्यमूलंखादनिप्रत्यहं ७२ वंशनाशोनुक्रमतोएकस्त्वंत्ववशोषितः तेनमूलेस्यदूर्वायानष्टभागत्रयंमुने
७३ एकोभागोवशिष्टोत्रयतस्त्वंवर्त्ततेभुवि किंचित्खादनिवैत्वाखुस्तवचायुःक्षयःक्रमात् ७४ परेतेत्वयिचास्मा
कंतवापिपतनंभवेत् कूपएवांधतामिस्रेसंतानेपिक्षयंगते ७५ तस्माद्गार्हस्थ्यमासाद्यकुरुसंततिवर्धनम् तेना
स्माकंतवापिस्याद्गतिरूर्ध्वानसंशयः ७६ एष्टव्याबहवःपुत्रायद्येकोपिगयांव्रजेत् यजेतवाश्वमेधंचनीलंवावृष
मुत्सृजेत् ७७ यद्येकोपिचवैशाखेमाघेवाकार्तिकेपिवा अस्मानुद्दिश्यवैस्नानंश्राद्धदानंकरिष्यति ७८ तेनचो
र्ध्वंगतिर्भूयान्नरकादुद्धृतिश्चनः एकोवाविष्णुभक्तःस्यादेकोवाहरिवासरी ७९ एकोवाशृणुयाद्विष्णोःकथांपाप
विनाशनीम् तस्यातीतंकुलशतंभाविचापिकुलंशतम् ८० अपिपापव्रतंक्वापिनरकंनैवपश्यति किमन्यैर्बहुभिः
पुत्रैःदयाधर्मविवर्जितैः ८१ येजातानार्चयंत्यद्धाविष्णुनारायणंकुले नापुत्रस्यहिलोकोस्तिसर्वमेतज्जनाविदुः ८२

७६ ७७ ७८ हरिवासरी एकादशीव्रतकर्ता ७९ ८० ८१ ८२

सूनृतैर्मधुरैः ८३ ८४ ८५ ८६ ८७ जनकाः पितरः ८८ ८९ ९० ९१

तथापिचदयायुक्तंतत्संतानंचदुर्लभम् इतितंबोधयित्वानुवाक्यैरेतैश्चसूनृतैः ८३ विरक्तस्योर्ध्वरेतस्यगार्हस्थ्ये
त्वंमतिंकुरु पितॄणांवचनंश्रुत्वाधर्मवर्णोतिविस्मृतः ८४ प्रणम्यप्रांजलिःप्राहरुदन्वैजातवेपथुः नाम्नाहंधर्म-
वर्णश्चयुष्मद्वंशोदुराग्रहील्पसत्वेश्रुत्वानुवचनंनारदस्यमहात्मनः जिह्वादार्ढ्यंगुह्यदार्ढ्यंनकस्यापिकलौयुगे ८६
दृष्ट्वाभुविचपापिष्ठांस्ताञ्जनानपिशंकितः भीमोदुर्जनसंगत्याचरन्द्वीपांतरेवसन् ८७ पादास्त्रयोगतास्त्वस्यकलेः
पादेत्यकेपिच गताःसार्द्धत्रयोभागाइदानींजनकाइमे ८८ नाहंवेद्मिभवद्दुःखंवृथाजन्मगतंमम यस्मिन्कुलेत्व-
हंजातोऋणंपित्रोर्नवैहृतम् ८९ किंतेनजातमात्रेणभूभारेणात्रशत्रुणा योजातोनार्चयेद्विष्णुंपितृन्देवानृषीं-
स्तथा ९० युष्मदाज्ञांकरिष्यामिममाज्ञापयतक्षितौ यथानकलिबाधास्यादत्रसंसारतोपिवा ९१ कर्तव्यान्य-
पिकृत्यानिमयापुत्रेणभूतले इत्युक्तास्तेनवंश्येनधर्मवर्णेनधीमता ९२ किंचिदाश्वस्तमनसइममूचुर्महीपतेः पु
त्रपश्यदशामेतांपितॄणांतेमहात्मनाम् ९३ संतत्यभावात्पततांदूर्वामात्रावलंबिनां त्वंगार्हस्थ्यमुपालभ्यसंतत्या
स्मान्समुद्धर ९४ येचविष्णुकथारक्तायेस्मरंत्यनिशंहरिम् येसदाचारनिरतानतान्वैबाधतेकलिः ९५ शालिग्राम
शिलायस्यगृहेतिष्ठतिमानद अथवाभारतंगेहेनतंवैबाधतेकलिः ९६ यश्चवैशाखनिरतोमाघस्नानपरश्चयः का
र्तिकेदीपदातायोनतंवाबाधतेकलिः ९७ प्रत्यहंशृणुयाद्यस्तुकथांविष्णोर्महात्मनः पापघ्नींमोक्षदांदिव्यांनतंवै
बाधतेकलिः ९८ यद्गृहेवैश्वदेवश्चयद्गृहेतुलसीशुभा यदंगणेशुभागौश्चनतंवैबाधतेकलिः ९९

९२ ९३ ९४ ९५ ९६ ९७ ९८ ९९ छ छ

१०० १०१ १०२ १०३ तत् तस्मात् श्राद्धकरणात् ४ ५ ६ ७ ८

तस्मान्नोभीतिरस्तीहयुगेपापात्मकेपिच शीघ्रंगच्छभुवंपुत्रमासोयंमाधवाह्वय: १०० सर्वेषामुपकारायमेषसंस्थे
दिवाकरे त्रिंशच्चतिथय:पुण्यामेषसंस्थेदिवाकरे १०१ एकैकस्यांकृतंपुण्यंकोटिकोटिगुणंभवेत् तत्रापिचैत्रबहुलो
दर्शोनृणांचमुक्तिद: २ प्रियश्चपितृदेवानांसद्योमुक्तिविधायक: येवैपितृन्समुद्दिश्यश्राद्धंकुर्वंतितद्दिने ३ सोदकुंभं
पिंडदानंतदक्षय्यफलंलभेत् येचकुर्वंतिवैश्राद्धममायांचमधोस्तत ४ तै:कृतंतुगयाक्षेत्रेश्राद्धंकोटिगुणंभवेत् यदि
श्राद्धंमधोदर्शेशाकेनापिकरोतिच ५ कोटिश्राद्धंगयायांतुकृतंतेननसंशय: कुंभंचपानकै:पूर्णंकर्पूरागरुवासितम्
६ योनदद्यान्मधोदर्शेसपितृघ्नोनसंशय: योदद्याच्चमधोदर्शेसपानीयंकरीरकम् ७ श्राद्धंचभक्तिसंयुक्त:कुरुते
चकुलोद्धृतिं पितृणांचतथालोकेनदीचामृतवर्षिणी ८ कुंभदानात्प्रसरतिश्राद्धदानादिदायिनी अन्नसूपघृ
तापूपलेह्यपायसकर्दमान् ९ तस्माज्झटितित्वंगच्छयदावामाभविष्यति कुरुश्राद्धंपिंडदानंसोदकुंभंमहामते
१० सर्वेषामुपकारायगार्हस्थ्यंचसमाश्रय धर्मार्थकामै:संतुष्ट:प्राप्यसंतानमुत्तमम् ११ पुनश्चमुनिशार्दूलस्त्वंसु
खंद्वीपेस्मसंचर इत्यादिष्ट:पितृभिश्चतूर्णंभूमिंययौमुनि: १२ चैत्रमासिमेषसंस्थेपुण्येमासिदिवाकरे प्रात:
स्नात्वाचसंतर्प्यपितृन्देवानृषींस्तथा १३ सोदकुंभंतथाश्राद्धंकृत्वापापविनाशनम् तेनदत्वापितृणांचमुक्तिमावृ-
त्तिवर्जिताम् १४ स्वयंविवाहमकरोत्संततिंप्राप्यवैसतीम् लोकेप्रख्यापयामासतांतिथिंपापनाशिनीम् १५ स्व
यंपुनर्मुदाभक्त्यागंधमादनमाययौ तस्मात्पुण्यतमाचैषामधोर्दर्शाशुभावहा १६ ९ ११० १११

१२ १३ १४ १५ दर्शा दर्शोऽमावस्या अस्त्यस्याः सादर्शातिथिः अर्श आद्यच् अदंतत्वाट्टाप् १६

१७ इतिवैशाखमाहात्म्यटीकायां द्वाविंशोऽध्यायः २२ छ अथअक्षय्यतृतीयामाहात्म्यं वर्णयति अथेत्यादिना या

नानयासदृशीलोकेतिथिर्दृष्टाश्रुतापिवा ११७ इतिश्रीस्कंदपुराणेवैशाखमाहात्म्येनारदांबरीषसंवादेकलि
धर्मनिरूपणेपितृमुक्तिर्नामद्वाविंशोऽध्यायः २२ छ श्रुतदेवउवाच अथातःसंप्रवक्ष्यामिमाहात्म्यंपापनाश
नम् अक्षय्यायास्तृतीयायाःसितेपक्षेचमाधवे १ येकुर्वंतिचतस्यांवैप्रातःस्नानंभगोदये तेसर्वेपापनिर्मुक्तायांति
विष्णोःपरंपदम् २ देवान्पितॄन्मुनीन्यस्तुकुर्यादुद्दिश्यतर्पणम् तेनाधीतंचतेनेष्टंतेनश्राद्धशतंकृतं ३ मधुसूदनम-
भ्यर्च्यकथांशृण्वंतियेनराः अक्षय्यायांतृतीयायांतेनरामुक्तिभागिनः ४ येदानंतत्रकुर्वंतिमधुद्विट्प्रीतयेशुभं तद
क्षय्यंफलत्येवमधुशासनशासनात् ५ देवर्षिपितृदेवत्यातिथिरेषामहाशुभा त्रयाणांतृप्तिदात्रीचकृतेधर्मेसनातने
६ प्रख्यातिश्चतिथेरस्याःकेनचास्तितदप्यहम् वक्ष्यामिनृपशार्दूलसावधानमनाःशृणु ७ पुरापुरंदरस्यासीद्युद्धं
चबलिनासह देवानांचैवदैत्यानांद्वंद्वयुद्धमभूत्ततः ८ सनिर्जित्यबलिंदैत्यंपातालतलवासिनम् पुनर्भुवंसमासाद्य
चोतथ्यस्याश्रमंययौ ९ तत्रापश्यच्चतत्पत्नींगुर्विणींमंदगामिनीम् चलच्छ्रोणितटाबद्धकांचीदाम्नाशुमंडितां १०
क्वणत्कंकणनिर्घोषजितमत्तालिकोकिलाम् वल्गुचित्रांबरारामांमंजुवाचाशुचिस्मिताम् ११ लसत्कुंभस्थलाभ्यांचकु
चाभ्यामुपशोभिताम् हसत्पद्ममुखांदिव्यांनीलोत्पलदललोचनाम् १२ केतक्युदरपांडुभ्यांगंडाभ्यांचमनोरमां श्व
सोच्छ्वसंतींदीनाक्षींपर्णशालामुखेस्थिताम् १३ स्वपतींशयनेक्वापितादृष्ट्वामोहमागतः बलात्कारेणबुभुजेगुर्विणीं
पाकशासनः १४

तदध्यायसमाप्ति माधवेवैशाखेसितेशुक्लेपक्षे १ भगस्य रवेरुदये २ ३
४ अक्षय्यं अनश्वरम् ५ त्रयाणांदेवर्षिपितृणां ६ ७ ८ ९ १० रामां रमणीयां ११ १२ १३ १४

१५ चस्कंद गलितं १६ १७ १८ १९ २० २१ बलीयसः बलीयांसः २२ २३

गर्भस्थस्तु तदापिंडः स्वस्यपातविशंकया छादयामासवैयोनिं द्वारेपादेनदुःखितः १५ ततश्चस्कंदवीर्यंतद्भूमावे
चबलिद्विषः गर्भस्यायचुकोपासौभगवान्पाकशासनः १६ तंशशापचगर्भस्थंरुषाताम्रांतलोचनः जात्यंधोभव-
दुर्बुद्धेमावमंस्थायतःपदा १७ प्रच्छाद्ययोनिद्वारंचततोदीर्घतपाद्भयः पदाप्रस्कंदिताद्वीर्याज्जातस्ततःसमजा
यत १८ पश्चादिंद्रोययौशीघ्रमृषेःशापविशंकितः पलायंतंहरिंदृष्ट्वाजहसुर्बटवोऽखिलाः १९ ततस्सव्रीडितो
भूत्वाययौमेरोर्गुहांशुभाम् तत्रलीनश्चचारासौदुस्तरंवैतपोमहत् २० मेरौविलीयवसतिदेवेंद्रेलज्जयान्विते
गूढैर्विज्ञायतांवार्तांदैतेयाबलिपूर्वकाः २१ स्वरानाक्रम्यबुभुजुर्बलींद्रश्चामरावतीम् दिक्पालानांविभूतीश्चशंब
राद्याबलीयसः २२ बलाद्बुभुजिरेहीननाथेराष्ट्रेदिवौकसाम् रक्षितारमजानंतोदेवाश्चाग्निपुरोगमाः २३ पप्रच्छु
र्धिषणंदेवंदेवाचार्यमकल्मषम् पप्रच्छुरिंद्रवृत्तांतंक्वचित्तिष्ठतिनःप्रभुः २४ दैत्याक्रांतमिदंराष्ट्रंहीननाथंदिवौ
कसाम् कुतोनायातिदेवोसौभूयान्कालोगतोविभो २५ तंयामोयत्रधिषणःप्रार्थयामश्चतंविभुं इतिपृष्टस्तदा
देवैर्धिषणस्तानुवाचह २६ रसातलेबलिंजित्वाचोतथ्यस्याश्रमंययौ भुक्त्वापत्नींचदार्ढ्येनतच्छिष्यैरेवनिंदि
तः २७ व्रीडितस्तुदिवंयातुंगुहांमेरोर्विवेशह तत्रैवास्तेशचीयुक्तःस्वकृतंचिंतयन्विभुः २८ इतितस्यवचःश्रुत्वा
देवास्त्वग्निपुरोगमाः गुहांमेरोर्ययुःशीघ्रंदृष्ट्वाप्रार्थयितुंविभुं २९ तत्रदृष्ट्वागुहालीनंदेवेंद्रंपाकशासनम् तुष्टुवु
र्विविधैःस्तोत्रैस्तद्वीर्यैर्लोकविश्रुतैः ३० इंद्रतुभ्यंनमस्तेस्तुसर्वदेवाधिपायते वयंदैत्यैरर्दिताश्चत्वयाहीनाभृशार्दिताः ३१

२४ २५ इतिविचार्यतत्समीपंगत्वाचपृष्टइत्यर्थः २६ रसातलेइत्यादि २७ विभुरिंद्रः २८ २९ ३० ३१

जहिनाशय ३२ ३३ ३४ ३५ दिष्टशुभं सुखमितियावत् प्राप्नोति इतिशेषः ३६ ३७ ३८

स्थानभ्रष्टाश्चरामोगनानादेशेषुदुःखिताः तस्मादागत्यदेवेंद्र जहिशत्रूनरिंदम ३२ इतिस्तुतस्तदादेवैर्निश्चक्राम
गुहामुखात् लज्जयावनतोभूत्वापश्यन्भूमिंचचक्षुषा ३३ नकिंचिदपिचोवाचदुःखाद्गद्गदभाषणः तज्ज्ञात्वाधि
षणःप्राहतंसुरेंद्रंभयानकम् ३४ माशंकांतेसुरपतेकर्माधीनमिदंजगत् मानामानौसुखदुःखंलाभालाभौजया
जयौ ३५ पूर्वकर्मानुरोधेनभवंत्येतेनसंशयः जीवःकर्मानुगोदुःखंदिष्टंदैवेनकालतः ३६ प्राज्ञाःप्रायोनशोचंति·
नप्रहृष्यंतिवैसुखात् तस्मात्प्रारब्धतःप्राप्तंदुःखंचेदंतवप्रभो ३७ तस्मात्त्वमघवन्दुःखंनैवशोचितुमर्हसि इत्यु
क्तोगुरुणाचाहमघवानमराधिपान् ३८ इंद्रउवाच परस्त्रीसंगदोषेणबलंवीर्ययशोऽमलं मंत्रशक्तिःशा·
स्त्रशक्तिर्विद्याशक्तिश्चमानद ३९ अभवंनष्टवीर्योहंतूष्णींतेनवसाम्यहम् पाकशासनवाक्यंतुश्रुत्वास्वाचार्यसंयु
ताः ४० मंत्रयामासुरेकांतपुनस्तस्यबलाप्तये तदागुरुश्चतान्प्राहकरुणांचविदुत्तमः ४१ बृहस्पतिरुवाच
मासोवैशाखनामायंप्रियोवैमधुघातिनः सर्वास्वपितिथयःपुण्यामासेस्मिन्माधवप्रिये ४२ तत्रापिचसितेपक्षेमासे·
स्मिन्नक्षयाह्वया यस्तस्यांस्नानदानादिश्रद्धयाचकरोतिवै ४३ तस्यपापसहस्राणिनश्यंत्येवनसंशयः अनव·
घंतथैश्वर्यंबलंधैर्यंभवंतिच ४४ तस्मात्तस्यांतृतीयायांहरिणाबलिविद्विषा स्नानदानादिसद्धर्मान्कारयामो
हिताप्तये ४५ भविष्यतिचसाशक्तिर्विद्यायांमंत्रशास्त्रयोः बलंधैर्ययशश्चैवयथापूर्वंभविष्यति ४६ इत्येवंतुवि
चार्याथगुरुर्देवैःसमाहितः इंद्रेणकारयामासधर्मानेतान्हरिप्रियान् ४७

बलमित्यादिषट्पदेषु प्रतिपदंनाशं जगामेतिपूर
णीयं ३९ स्वाचार्योगुरुस्तेनसंयुताः ४० तस्यशक्रस्य ४१ ४२ ४३ ४४ ४५ ४६ समाहितःसहितइत्यर्थः ४७

४८ उडुपश्चंद्रः ४९ ५० ५१ ५२ स्वाध्यायं लेभिरे इत्यन्वयः ५३ इतिवैशाखमाहात्म्यटीकायांत्रयोविं
शोऽध्यायः २३ ॥ छ ॥ अथास्मिन्नध्याये वैशाख शुक्ल द्वादशी माहात्म्यं वर्णयति यावदध्यायसंपूर्ति तिथिष्वित्यादिनाः सितपक्षि
णी शुक्लपक्षसंबंधिनी एतासु तिथिषु पुण्यासु इत्यनेन बहुवचनेनअमाचैकादशी तृतीयासप्तमीनिर्दिष्टा तत्र त्रयाणांमाहात्म्यमत्रप्रति
पादितंसप्तम्या माहात्म्यमाह पाद्मे प्राप्तोयंमाधवोमासोमाधवस्यातिवल्लभः तस्यापि सप्तमीशुक्लागंगायामतिदुर्लभा वैशाखशु

अक्षय्यायांतृतीयायांभुक्तिमुक्तिफलप्रदात् तेनपूर्ववदेवासीद्वलंधैर्यादिकंविभोः ४८ परस्त्रीसंगदोषोपिसद्यएवव्य
लीयत पश्चाद्गताशुभःशक्रोराहोर्मुक्तइवोडुपः ४९ देवतानांतथामध्येशुशुभेचहरिर्यथा पश्चाद्देवैःसमायुक्तोविनि-
र्जित्यतथासुरान् ५० तृतीयायाश्चमाहात्म्याद्भाग्ययुक्तोमरावतीं विवेशविभवैःसार्द्धंशंखतूर्यादिनिःस्वनैः ५१ अनु-
ज्ञाताश्चशक्रेणस्वधामानिययुःसुराः ततस्तेयज्ञभागांश्चलेभिरेचयथापुरा ५२ पिंडभागांश्चपितरोयथापूर्वंप्रपेदि
रे स्वाध्यायंमुनयस्तुष्टादैत्यानांचपराजयः ५३ तदाप्रभृतिलोकेस्मिन्तृतीयाचाक्षयाह्वया प्रख्यातासर्वलोकेषुदेवर्षि
पितृतुष्टिदा ५४ तस्मात्पुण्यतमावैषासर्वकर्मनिकृंतनी भुक्तिमुक्तिप्रदानृणांतृतीयाचाक्षयाह्वया ५५ इतिश्रीस्कं
दपुराणेवैशाखमाहात्म्येनारदांबरीषसंवादेअक्षय्यतृतीयायाःश्रेष्ठत्वकथनंनामत्रयोविंशोऽध्यायः २३ ॥ छ ॥
श्रुतदेवउवाच तिथिष्वेतासुपुण्यासुद्वादशीसितपक्षिणी वैशाखमासेराजेंद्रसर्वाघौघविनाशिनी १

क्लसप्तम्यांजान्हवीजन्हुनापुरा क्रोधात्पीतापुनस्त्यक्ताकर्णरंध्रात्तुदक्षिणात् तस्यांसमर्चयेद्देवीं गंगांगगनमेखलाम् स्नात्वासम्यग्विधा
नेन सधन्यःसुकृतीनरः तस्यांयस्तर्पयेद्देवान्पितृन्मर्त्यान्यथाविधि साक्षात्पश्यतितंगंगास्नानकंगतपातकं नमाधवसमोमासो नगंगास
दृशीनदी दुर्लभःखलुयोगोयंहरिभक्त्यैवलभ्यते दर्शनस्पर्शनस्नानकीर्तनध्यानसेवनैः पुण्यान्पुण्यपुरुषान्पावयंतीसहस्रशइति १

२ ३ अर्हते योग्याय ४ ५ ६ तीर्थान्युत्प्लाव्य तीर्थेषुस्नात्वेत्यर्थः ७ ८ वैशाखेतुलसीपत्रपुष्पैः मधुसूदनंपूजयेत् पुष्पपत्राभावेगोधूमशालीधान्यादिभिर्वापूजयेत् तथाअश्वत्थवृक्षस्यापि वैशाखेपूजनंकार्यमितिशेषः अत्रविशेषः पाद्मे माधवंसकलंमासंतुलस्यायोर्चयेद्धरिं त्रिसंध्यंमधुहंतारंनास्तितस्यपुनर्भवः अलाभेपत्रपुष्पाणामन्नाद्येनापिपूजयेत् शालिगो·

किंदानैःकिंतपोभिश्चकिमुपोष्यैर्व्रतैश्चकिं किमिष्टैश्चैवपूर्तैश्च द्वादशीयैर्नसेविता २ गंगायामुपरागेतुयोदद्याद्गोसहस्रकं तत्फलंसमवाप्नोतिप्रातःस्नात्वाहरेर्दिने ३ यद्दत्तंचार्हतेचान्नं द्वादश्यांचसितेशुभे सिक्थेसिक्थेभवेत्तस्यकोटिब्राह्मणभोजनम् ४ योदद्यात्तिलपात्रंतुद्वादश्यांमधुसंयुतम् निर्धूताखिलबंधस्तुविष्णुलोकेमहीयते ५ एकादश्यांसितेपक्षेकुर्य्याज्जागरणंहरेः सजीवन्नेवमुक्तःस्यात्तुष्टाःस्युःसर्वदेवताः ६ कोटींदुसूर्यग्रहणे·तीर्थान्युत्प्लाव्ययत्फलम् तत्फलंसमवाप्नोतिप्रातःस्नात्वाहरेर्दिने ७ तुलस्याःकोमलैःपत्रैर्द्वादश्यांविष्णुमर्चयेत् समस्तकुलमुद्धृत्यविष्णुलोकाधिपोभवेत् ८ (क्षेपकः तुलसीपत्रपुत्रैश्चवैशाखेश्वत्थपूजनम् पुष्पाद्यभावेधान्यैर्वापूजयेन्मधुसूदनम् १) यमंपितॄन्गुरून्देवान्विष्णुमुद्दिश्यमानवः माधवेशुक्लद्वादश्यां सोदकुंभंसदक्षिणम् ९ दध्यन्नंचैवयोदद्यात्तस्यपुण्यफलंशृणु प्रयागेप्रत्यहंचैवकुर्याद्यःकोटिभोजनम् १० यावत्संवत्सरंपुण्यंषड्रसान्नैर्मनोरमैः तत्फलंसमवाप्नोतिमधुशासनशासनात् ११ शालिग्रामशिलादानंयः कुर्याद्द्वादशीदिने वैशाखेशुक्लपक्षेतुसर्वपापैःप्रमुच्यते १२

धूमतंदूलयवैर्वापिहरिंसदा· योश्वत्थमर्चयेद्देवमुदकेनसमंततः कुलानामयुतंतेनतारितंस्यान्नसंशयः अश्वत्थतर्पणात्तातसर्वदुःखंविनश्यति तर्पिताःपितरस्तेनतेनविष्णुःसमर्चितः कृत्वा अष्टांगयोगंतुस्नात्वापिप्पलतर्पणं कृत्वागोविंदमभ्यर्च्यनसदुर्गतिमाप्नुयादिति १ ९ १० ११ १२ ६९

राजसूयाश्वमेधाभ्यां यत्फलं जायते तदस्मादपिजायत इतिभावः १३ यजेत् पूजयेत् १४ १५ १६ ऊर्वारुकं फूटइतिप्र

द्वादश्यांपयसायस्तुस्नापयेन्मधुसूदनं राजसूयाश्वमेधाभ्यांयत्फलंपरिजायते १३ त्रयोदश्यांयजेद्विष्णुं
पयोदधिविमिश्रितैः शर्करामधुभिर्द्रव्यैर्मधुसूदनप्रीतये १४ तत्फलंसमवाप्नोतिगंगायांनात्रसंशयः पंचा-
मृतैश्चयोविष्णुंभक्त्यासंस्नापयेद्विभुम् १५ ससर्वकुलमुद्धृत्यविष्णुलोकेमहीयते योदद्यात्स्नानकंयस्तांसा
यान्हेप्रीतयेहरेः १६ जीर्णपापंजहात्याशुजीर्णांत्वचमिवोरगः सायान्हेचैवयोदद्यादुर्वारुकरसायनम् १७
भवेन्मुक्तःकर्मबंधादुर्वारुकरसायनात् इक्षुदंडचूतफलंदद्याद्द्राक्षाफलानिच १८ नविच्छित्तिःसंततेःस्यात्त
स्यवैशतपूरुषम् योदद्याद्धूधलेपंतुसायान्हेद्वादशीदिने १९ बाह्योपघातैःसकलैर्मुच्यतेनात्रसंशयः यत्किं
चित्कुरुतेपुण्यंद्वादश्यांराजसत्तम २० माधवेतुसितेपक्षेतदक्षय्यफलंभवेत् प्रख्यातिमस्यावक्ष्यामियेनजा
तेनिभूमिप २१ सर्वेषांसर्वपापघ्नींसर्वमंगलदायिनीम् पुराकाश्मीरदेशेतुद्विजोदेवव्रताह्वयः २२ तस्यासी
न्मालिनीनामतनयाचारुरूपिणी ददौतांसत्यशीलायविप्रवर्यायधीमते २३ तामुद्वाह्यययौधीमान्स्वदेशायव
नाह्वयम् रूपयौवनसंपन्नातस्यनैवप्रियाभवत् २४ सदाविद्वेषसंयुक्तस्तस्यांतिष्ठतिनिष्ठुरः नान्यस्यकस्य
चिद्वेष्टितांविनानृपत्तेपतिः २५ तस्मिन्साक्रोधसंयुक्तावशीकरणलंपटा अपृच्छत्समदाराजन्यास्त्यक्ताःपति
भिःपुरा २६ ताभिरुक्तानुसाभूपवश्योभर्त्ताभविष्यति अस्माकंप्रत्ययोजातोभर्तृत्यागावमानिना २७ प्रयुज्यभे
षजंवश्यंनीताहिपतयःपुरा योगिनींत्वंतुगच्छाद्यदास्यतेभेषजंशुभं २८

सिद्धं तत्स्नानकं १७ १८ १९ २०

२१ अत्रेतिहासंकथयति पुरेत्यादिना २२ २३ २४ २५ २६ प्रत्ययः प्रत्यक्षज्ञानं अनुभवइत्यर्थः अनमानिनां अवमानिनीनां
२७ २८

२९ तस्यायोगिन्याः अयात यामिकां नवीनां ३१ ३२ ३३ द्व्यांगुलीयकं मूल्यवदंगुलीयकं ३४ ३५ आहितयुक्तया

नविकल्पस्त्वयाकार्योभवितादासवत्सतिः योगिनीमंदिरेगत्वातासांवाक्येनभूपते २९ प्रसादमतुलंतस्यालेभेदुश्चारि
णीसती शतस्तंभसमायुक्तांकुटींभेजेत्वरान्विता ३० स्वर्विस्तृतांस्वचस्कांतथैवायानयामिकाम् प्रावृतादीर्घव
स्त्रेणसन्निधिंतेनयोगिनी ३१ दीर्घाभिश्चसटाभिस्तुप्रावृतदीप्तिसंयुता परिवारसमोपेतावीक्षमाणाशनैःशनैः
३२ अक्षसूत्रकरासातुजपंतीप्रार्थितातया ददौवश्यकरंमंत्रंक्षोभकंप्रत्ययात्मकं ३३ ततःसाप्रणताभूत्वादद्या
द्व्यांगुलीयकं वज्रमाणिक्यसंयुक्तमतिरक्तप्रभान्वितं ३४ मृदुकांचनसंयुक्तंभानुरश्मिसमद्युति ततोहृष्टातु
संतुष्टापादस्यंचांगुलीयकं ३५ हृदयंचतयाज्ञातंतत्पतेरवमानजं तदोक्ताहितयाभूपतापस्याहितयुक्तया ३६
चूर्णोरक्षान्वितोह्येषसर्वभूतवशंकरः चूर्णंभर्तरिसंयुज्यरक्षांग्रीवाश्रयांकुरु ३७ भविष्यतिपतिर्वश्योनान्यांयास्य
तिस्कंदरीम् नाप्रियंवदतिक्वापिदुश्चारिण्यास्तवापिच ३८ चूर्णरक्षांगृहीत्वासाप्राप्यभर्तृगृहंपुनः प्रदोषेपयसायुक्त
श्चूर्णोभर्तरियोजितः ३९ ग्रीवायांहिकृतारक्षानविचारःकृतस्तया तदासपीतश्चूर्णस्तुभर्त्तान्नृपवरोत्तम ४० तच्चू
र्णोक्षयरोगोभूत्पतिःक्षीणोदिनेदिने गुह्येतुकृमयोजाताघोरादुष्टव्रणोद्भवाः ४१ दिनैःकतिपयैराजन्पत्युर्नैवव्य
वस्थितिः उवासस्वेच्छयासापिपुंश्चलीदुष्टचारिणी ४२ हततेजास्ततोभर्त्तातामुवाचाकुलेंद्रियः क्रंदमानोदिवारा
त्रंदासोस्मितवशोभने ४३ त्राहिमांशरणंप्राप्तंनेच्छेहमपरांस्त्रियम् ततस्तद्विदितंज्ञात्वाभीतासामेदिनीपते ४४
अलंकारकृतेपत्युर्जीवनेच्छुर्नवैहिता योगिनींचययौशीघ्रंतस्यैसर्वन्यवेदयत् ४५

वैरयुक्तया ३६ ३७ ३८ ३९ ४०

४१ ४२ ४३ ४४ अलंकारकृते अलंकारधारणार्थं पत्युर्जीवनेच्छुः पतिजीवनमिच्छति वस्तुतः नवैहितानैवपत्युर्हितकारिणी ४५

४६ उपपतिर्जारः ४७ ४८ ४९ स्तनयोः अंगुलीनांच छेदइति पूर्वेणान्वयः ५० ५१ ५२ ५३ ५४

तयाच्चभेषजंदत्तंद्वितीयंदाहशांतये दत्तेचभेषजेतस्मिन्स्वस्थोभूत्तत्क्षणात्पतिः ४६ निष्ठस्तूपपतिर्गेहेगृहकृत्यापदे
शतः सर्ववर्णसमुद्भूताजारास्तिष्ठंतिवैगृहे ४७ नकिंचिद्भुवनेशक्तिर्भर्तुर्जाताकथंचन ततस्तेनैवदोषेणसर्वांगेषुचज
ज्ञिरे ४८ कृमयश्चास्थिभेत्तारःकालांतकयमोपमाः तैर्नासाजिह्वयोश्चासीच्छेदःकर्णद्वयस्यच ४९ स्तनयोश्चांगु
लीनांचपंगुत्वंचापिचागतम् तेनपंचत्वमापन्नागतानरकयातना ५० ताम्रभांडेचसादग्धायुतानिदशपंचच श्वानयो
निषुसंजाताशतवारंपुनःपुनः ५१ छिन्ननासाछिन्नकर्णाकृमिमूर्द्धानिरंतरम् छिन्नपुच्छाभग्नपादाताडितात्रगृहे
गृहे ५२ पश्चात्सौवीरदेशेषुपद्मबंधोर्द्विजस्यच दास्यागृहेशुनीजाताबहुदुःखसमाकुला ५३ छिन्नकर्णाछिन्नना
साछिन्नपुच्छांघ्रिरातुरा कृमिपूर्णशिरानित्यंकृमियोनिश्चतिष्ठति ५४ एवंत्रिंशद्गतावर्षाश्चास्मिन्जन्मनिभूमिप
दैवात्कर्मविपाकेनवैशाखेमेषगेरवौ ५५ शुक्लपक्षेतुद्वादश्यांपद्मबंधोस्तनूद्भवः नद्यांस्नात्वाशुचिर्भूत्वासार्द्रवस्त्रो
गृहंययौ ५६ तुलसीवेदिकांप्राप्यपादावनिजनेनह वेदिकायामधोदेशेसाशुनीस्वापमागता ५७ प्राक्सूर्योदय
वेलायांपादोदकपरिप्लुता सद्योध्वस्ताशुभाजाताजातिस्मृतिरभूत्क्षणात् ५८ स्मृत्वाकर्मकृतंपूर्वंसाशुनीतापसं
सदा चुक्रोशकरुणादीनामुनेत्राहीतिवैपुनः ५९ स्वकर्मचमुनींद्रायस्मृत्वाचख्यौभयाकुला भर्तुर्विषप्रयोगंतुस्व
स्यदुश्चारितंतया ६० यान्यापियुवतीब्रह्मन्भर्तुर्वश्यंसमाचरेत् वृथाधर्मादुराचारापच्यतेताम्रभाजने ६१ भर्ता
नार्यागुरुर्भर्त्ताभर्तादैवतमुत्तमम् विक्रियांकृत्वसाध्वीसाकथंसुखमवाप्नुयात् ६२

५५ ५६ ५७ ५८ ५९ ६० ताम्रभाजने एतत्संज्ञके नरके ६१ ६२ ६३

६३ ६४ ६५ ६६ ६७ ६८ ६९ ७० ७१ वैवस्वतोयमः तस्यय

तिर्यग्योनिशतंयातिकृमिकोटिशतानिच तस्माद्भूसुर कर्तव्यंस्त्रीभिर्भर्तुर्वचः सदा ६३ साहंपश्येपुनर्योनिंकुत्सि
तांयातनान्वितां यदिनोद्धरसेब्रह्मन्नद्यलहृष्टिसंमुखास् ६४ तस्मादुद्धरमांब्रह्मन्दुष्कृतांपापचारिणीं सुकृतस्य
प्रदानेनवैशाखेशुक्लपक्षके ६५ याकृतातुत्वयाब्रह्मन् द्वादशीपुण्यवर्द्धिनी तस्यांत्वयाकृतंपुण्यंस्नानदानान्नभोज
नैः ६६ दुश्चारिण्याअपिब्रह्मन्तेनमुक्तिर्भविष्यति यस्यांतुभूसुरस्नानःस्वगृहेमनुजःकिल ६७ सर्वतीर्थफलावाप्तिं
लभतेनात्रसंशयः तत्संदत्तंहुतंयत्रकृतंदेवार्चनादियत् तदक्षय्यफलंज्ञेयंयत्कृतंद्वादशीदिने एवंविधफलंयस्यास्तद्दे
हिसकलंमम ६९ द्वादश्यामुपवासेनत्रयोदश्यांतुपारणात् यत्फलंस्यात्तदप्यज्ञातेनमुक्तिर्भविष्यति ७० दयांकुरुम-
हाभागदीनायांदीनवत्सल दीननाथोजगन्नाथोयुष्मन्नाथोजनार्दनः ७१ त्वदीयास्तादृशाएवयथाराजातथाप्रजाः
वैवस्वतपदध्वंसिन्पाहित्राहिसुदुःखितां ७२ त्वद्द्वारवासिनींदीनांशुनींमांदीनवत्सल ब्रह्महत्यासहस्रंवागोहत्यानां
सहस्रकम् ७३ अगम्यानांचकोटीस्याद्हत्यैवशुभातिथिः तस्यांकृतंमहापुण्यंमह्यंदत्वामहामुने ७४ मामुद्धरस-
मुद्विग्नांदीनांनाथसमुद्धर अंतेतुभ्यंद्विजेंद्रायनमउक्तिंवदाम्यहम् ७५ इतितस्यावचःश्रुत्वाशुनींप्राहमुनेःसुतः
स्वकृतंजंतवोश्नंतिसुखदुःखात्मकंशुचि ७६ तस्मात्किमुत्वयाकार्यंक्षुद्रयापापशीलया यथाभर्तावशंनीतोरक्षाचू-
र्णादिभिर्द्विजः ७७ साधुभ्योयत्कृतंपापंस्वस्यदुःखकरंभवेत् साधुभ्योयत्कृतंपुण्यंस्वस्यदुःखहरंभवेत् ७८ उभ
यभ्रंशतामेतिपापेभ्योयत्कृतंभवेत् शर्करामिश्रितंक्षीरंकांजिकेयनिवेदितम् ७९ पदस्थानं यमलोकस्यनरकाइ

तियावत् तेषांध्वंसिन्नाशक ७२ ७३ ७४ ७५ शूचीत्युपलक्षणं अशुचिकर्मणोपि ७६ ७७ ७८ ७९

८० ८१ ८२ ८३ ८४ कर्तारंकुटुंबपोषकं ८५ पोष्यः रक्ष्या पोष्यरक्षाजंतुः कुटुंबपोषकः ८६ सर्व

विषवृद्धिकरंदृष्टमेवंपापकरंभवेत् वदत्येवंमुनिस्तत्रेशुनीदुःखैकरूपिणी ८० पुनश्चुक्रोशोर्ध्वमुखीत्वात्मिनेबहुभ
षिणी पद्मबंधोपरित्राहिशुनींत्वद्वारवासिनीम् ८१ त्वदुच्छिष्टाशनींनित्यंत्वपाहीतिपुनःपुनः स्वपोष्यायेहिवर्तंतेगृहस्थ
स्यमहात्मनः ८२ तेषामुद्धरणंकार्यमितिवेदविदांमतं चांडालावायसाश्चैवसारमेयाश्चनित्यशः ८३ गृहस्थानांदया
पात्रंप्रत्यहंबलिभोजिनः अशक्तेनोद्धरेत्पोष्यंरोगाद्युपहतंयदि ८४ सोधःपतेन्नसंदेह इतिवेदविदांमतं कर्तारमेकंज
गतांहिकर्ताकृत्वात्मनापातिसमस्तजंतून् ८५ दारादिरूपव्यपदेशतोहरिस्तस्मात्तदत्ताखलुपोष्यगृह्य स्वपोष्यर
क्षापरित्यज्यजंतूंदेवेनक्लृप्त्यायदिवर्ततेन्यधीः ८६ सदेवदोग्धासकलस्यहंताकीनाशलोकानतुसंप्रयाति कर्तव्य
ताद्दयालुत्वादेतामुद्धरदुर्मतिम् ८७ इतितस्यावचःश्रुत्वादुःखार्तायागृहेसुतः निश्चक्रामगृहात्तूर्णपद्मबंधुर्दयानि
धिः ८८ किमेतदितितांप्राहपुत्रःसर्वंन्यवेदयत् सतुपुत्रोक्तवचःश्रुत्वातामेवंप्राहविस्मितः ८९ पद्मबंधुरुवाच
ममात्मजकथंवाक्यमीदृशंव्याहृतंत्वया नसाधूनामिदंवाक्यंभवतीहवरानन ९० आत्मसौख्यकराःपापाभवं
तिपरिभाविताः पश्यपुत्रजनाःसर्वेपरोपकरणायवै ९१ शशिःसूर्योथपवनोऽवनिर्हुतभुग्जलम् चंदनंपा
दपाःसंतःपरोपकरणेस्थिताः ९२ अस्थिदानकृतपुत्रकृपयाहिदधीचिना देवानामुपकारायत्रातादैत्यान्महा
बलात् ९३ कपोतार्थेस्वमांसानिशिबिनाभूभुजापुरा प्रदत्तानिमहाभागश्येनायक्षुधितायवै ९४ जीमू
तवाहनोराजापुरासीत्क्षितिमंडले तेनापिजीवितंदत्तंगरुडायमहात्मने ९५

स्याद्रोहकर्ताकीनाशलोकं यमलोकं ८७ ८८ ८९ ९० ९१ ९२ ९३ ९४ ९५

९६ ९७ ९८ ९९ १०० १०१ २ ३ ४ ५ १०६

तस्माद्दयालुनाभाव्यंभूसुरेणविपश्चिता शुद्धेवर्षतिदेवस्तुकिमशुद्धेनवर्षति ९६ किन्नदीपयतेचंद्रश्चांडालानांगृहेसदा तस्मादहंशुनीमेतांयाचंतींचपुनःपुनः ९७ उद्धरिष्येनिजैःपुण्यैःपंकमग्नांचगांयथा इतिपुत्रंनिराकृत्यप्रतिजज्ञेमहामतिः ९८ दत्तंदत्तंमहापुण्यंद्वादशीदिनसंभवं शुनिगच्छहरेर्धामनिर्धूताखिलकल्मषा ९९ तद्वाक्यात्सहसाभूपदिव्याभरणभूषिता विमुच्यदेहंजीर्णंतुदिव्यरूपधराशुभा १०० शतादित्यप्रभाजालासावित्रीप्रतिमायथा जगामामंत्यतंविप्रंद्योतयंतीदिशोदश १ भुक्त्वादिविमहाभोगान्पश्चाज्जातामहीतले नरनारायणाद्देवादुर्वशीनामनामतः २ वैशाखशुद्धद्वादश्याःप्रभावेणवरांगना देवानांचप्रियाजाताअप्सरस्त्वंचसाययौ ३ यद्योगिगम्यंहुतभुक्प्रकाशवरंवरेण्यंपरमार्थरूपं यत्पाप्यसंतोपिहियांतिमोहंतत्पापरूपंचशुनीहिदेवी ४ पश्चात्सपद्मबंधुर्हितांतिथिंपुण्यवर्द्धिनीम् लोकेटीख्यापयामासमधुद्विट्प्राणवल्लभाम् ५ कोटींदुसूर्यग्रहणाधिकासासमस्तरूपाधिकपुण्यरूपा यज्ञैःसमस्तैरतिरिच्यमानाद्विजेनख्याताभुवनत्रयेच ६ इतिश्रीस्कंदपुराणेवैशाखमाहात्म्येनारदांबरीषसंवादेशुनीमोक्षप्राप्तिर्नामचतुर्विंशोऽध्यायः २४ ६९ श्रुतदेवउवाच यास्तिस्रस्तिथयःपुण्याअंतिमाःशुक्लपक्षके वैशाखमासिराजेंद्रपौर्णिमांताःशुभावहाः १ अंत्याःपुष्करिणीसंज्ञाःसर्वपापक्षयावहाः माधवेमासियःपूर्णंस्नानंकर्तुंनचक्षमः २ तिथिष्वेतासुसस्नायात्पूर्णमेवफलंलभेत् सर्वेदेवास्त्रयोदश्यांस्थित्वाजंतून्पुनंतिहि ३ पूर्णायाःपर्वतीर्थैश्चविष्णुनासहसस्थिताः चतुर्दश्यांसयज्ञाश्चदेवाएतान्पुनंतिहि ४

इतिवैशाखमाहात्म्यटीकायांचतुर्विंशोऽध्यायः २४ ६९ अथवैशाखशुक्लत्रयोदश्यादितिथित्रयस्यमहिमानंवर्णयति या इत्यादिना १ २ ३ यज्ञेनविष्णुनासहिताः सयज्ञाः ४

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५

ब्रह्मघ्नंवासुरापंवासर्वनितान्पुनंतिहि एकादश्यांपुराजज्ञेवैशाख्याममृतंशुभम् ५ द्वादश्यांपालितंतच्चविष्णु
नाप्रभविष्णुना त्रयोदश्यांसुधांदेवान्पाययामासवैहरिः ६ जघानचचतुर्दश्यांदैत्यान्देवविरोधिनः पूर्णायांसर्व
देवानांसाम्राज्यातिर्बभूवह ७ ततोदेवाःसुसंतुष्टाएतासांचवरंददुः तिसृणांचतिथीनांवैप्रीत्योत्फुल्लविलोचनाः ८
एतावैशाखमासस्यतिस्रश्चतिथयः शुभाः पुत्रपौत्रादिफलदानराणांपापहानिदाः ९ योस्मिन्मासेत्वसंपूर्णेन-
स्नातोमनुजाधमः तिथित्रयेतुसंस्नात्वापूर्णमेवफलंलभेत् १० तिथित्रयेप्यकुर्वाणःस्नानदानादिकंनरः चां
डालींयोनिमासाद्यपश्चाद्रौरवमश्नुते ११ उष्णोदकेनयःस्नातिमाधवेत्वतिथित्रये रौरवंनरकंयातियावदिंद्रा
श्चतुर्दश १२ पितॄन्देवान्समुद्दिश्यदध्यन्नंनददातियः पैशाचींयोनिमासाद्यतिष्ठत्याभूतसंप्लवम् १३ मद्वृ-
त्तानांचकामानांमाधवेनियमेकृते अवश्यंविष्णुसायुज्यंयुज्यतेनात्रसंशयः १४ आमासंनियमासक्तः कुर्या
द्यदिदिनत्रये तेनपूर्णफलंप्राप्यमोदतेविष्णुमंदिरे १५ योवैदेवान्पितॄन्विष्णुगुरुमुद्दिश्यमानवः नस्ना
नादिकरोत्यद्धामुष्यशापप्रदावयम् १६ निःसंतानोनिरायुश्चनिःश्रेयस्कोभवेदिति इतिदेवावरंदत्वास्व-
धामानिययुःपुरा १७ तस्मात्तिथित्रयंपुण्यंसर्वाघौघविनाशनम् अंत्यंपुष्करिणीसंज्ञंपुत्रपौत्रविवर्द्धनम्
१८ यानारीसुभगापूपपायसंपौर्णिमादिने ब्राह्मणायसकृद्दत्वाकीर्तिमंतंसुतंलभेत् १९ गीतापाठं
तुयःकुर्याद्दंतिमेचदिनत्रये दिनेदिनेश्वमेधानांफलमेतिनसंशयः २०

१६ स्वधामानि स्वस्थानानि १७ १८ १९ २० ६९ ६९

२१ पूर्णायां पूर्णिमायां २२ २३ २४ ब्रह्मत्वं ब्राह्मण्यमुपपद्यते प्राप्नोतिजन्मांतरेपि ब्राह्मणोभवतीत्यर्थः

सहस्रनामपठनंयः कुर्याच्चदिनत्रये तस्यपुण्यफलंवक्तुंकः शक्तोदिविवाभुवि २१ सहस्रनामभिर्देवंपूर्णा
यांमधुसूदनम् पयसास्नाप्यवैयातिविष्णुलोकमकल्मषम् २२ समस्तविभवैर्यस्तुपूजयेन्मधुसूदनम्
नतस्यलोकाः क्षीयंतेयुगकल्पादिव्यत्यये २३ अस्नात्वाचाप्यदत्वाचवैशाखंयोगतोयदि सब्रह्महागुरुघ्नश्च
पितॄणांघातकस्तथा २४ श्लोकार्धंश्लोकपादंवानित्यंभागवतोद्भवम् वैशाखेचपठन्मर्त्योब्रह्मत्वंचोपप
द्यते २५ योवैभागवतंशास्त्रंशृणोत्येतद्दिनत्रये नपापैर्लिप्यतेक्कापिपद्मपत्रमिवांभसा २६ देवत्वमनु·
जैःप्राप्तंकैश्चित्सिद्धत्वमेवच कैश्चित्प्राप्तोब्रह्मभावोदिनत्रयनिषेवणात् २७ ब्रह्मज्ञानेनवैमुक्तिःप्रयागमर
णेनवा अथवामासिवैशाखेनियमेनजलाप्लुतेः २८ नीलवृषसमुत्सृज्यवैशाख्यांचजलाप्लुतः समस्तबं·
धनिर्मुक्तःपुमर्थान्यातिसर्वथा २९ गांसवत्सांद्विजेंद्रायसीदतेचकुटुंबिने इहापमृत्युनिर्मुक्तःपरत्रचपरं
व्रजेत् ३० स्नानदानविहीनस्तुवैशाखींचैवयोनयेत् श्वानयोनिशतंप्राप्यविष्ठायांजायतेकृमिः ३१ तिस्रः
कोट्योर्धकोटिश्चतीर्थानिभुवनत्रये संभूयमंत्रयांचक्रुःपापसंघातशंकिताः ३२ जनाअस्मासुपापिष्ठाविसृ
जंतिस्वकंमलम् तदस्माकंकथंगच्छेदितिचिंतासमन्विताः ३३

२५ २६ ब्रह्मभावोमुक्तिः २७ २८ २९ ३० ३१ ३२ ३३

३४ ३५ ३६ ३७ वैशाखान्ते इत्यत्र पूर्णिमांतमासोग्राह्यः तस्यैवस्नानादौविहितत्वात् ३८ ३९

तीर्थपादंहरिंजग्मुः शरण्यंशरणंविभुं स्तुत्वाचबहुभिः स्तोत्रैः प्रार्थयामासुरंजसा ३४ देवदेवजगन्नाथसर्वाघौ
घविनाशन जनाश्चास्मासुपापिष्ठाः स्नात्वापापानिसर्वशः ३५ विसृज्यत्वत्पदंयांतित्वदाज्ञाधारिणोभुवि अस्मा
कंचैवतत्पापंकथंगच्छेज्जनार्दन ३६ तदुपायंवदार्थीनांत्वत्पादशरणैषिणां इतितीर्थैः प्रार्थितस्तुभगवान्भू
तभावनः ३७ प्रहसन्प्राहतीर्थानिमेघगंभीरयागिरा श्रीभगवानुवाच सितेपक्षेमेषसूर्येवैशाखान्ते
दिनत्रये ३८ सर्वतीर्थमयेपुण्येममापिप्राणवल्लभे सूर्यंभगोदयात्पूर्वंबहिःसंस्थाजलाप्लुताः ३९ विमुक्ताघाः
पुण्यरूपाभवंत्वाशुसुनिर्मलाः भवद्भिश्चविमुक्ताघैर्येनस्नानादिनत्रये ४० तेषुतिष्ठतुतत्पापंजनैर्युष्मद्विरेचि
तम् इतितीर्थपदोविष्णुस्तीर्थानांचवरंददौ ४१ अनुज्ञाप्यचतान्योगान्तत्रैवांतरधीयत स्वधामानिपुनःप्राप्य
तानितीर्थानिनित्यशः ४२ प्रतिवर्षंतुवैशाखेतथैवांत्यदिनत्रये तेनाघौघविमुच्यैवयांतिनिर्मलतामहो ४३
येतुस्नानंनकुर्वंतिवैशाखांतदिनत्रये तेभवंतुसमस्तानांजनानांपातकाश्रयाः ४४ इतिशापंचतीर्थानित्वास्ना
तानांददातिच नतेनसदृशःपापोयोनस्नातोदिनत्रये ४५ विचारितेषुशास्त्रेषुनदृष्टोनचवैश्रुतः तस्माद्दिनत्र
येकार्यंस्नानदानार्चनादिकम् ४६

४० ४१ योगाद्योगशक्त्या ४२ ४३ ४४ ४५ ४६

४७ लेखः पुस्तकं ४८ ४९ अशक्तो माहात्म्यं वर्णयितुमित्यर्थः ५० ५१ ५२ ५३

अन्यथानरकंयातियावदिंद्राश्चतुर्दश इत्येतत्सर्वमाख्यातंश्रुतकीर्तेमहामते ४७ पृष्टंवैशाखमाहात्म्यंय-
थादृष्टंयथाश्रुतम् माहात्म्यस्यचलेखोयंमाधवस्यचवर्णितः ४८ कार्त्स्न्याद्वक्तुंचब्रह्मापिनालंवर्षशतैरपि पु
राकैलासशिखरेपार्वत्यैशंकरःस्वयम् ४९ आहमाधवमाहात्म्यंपृच्छंत्यैशतवत्सरम् तच्चापिनांतमगमद्शा-
क्तौविररामह ५० कोनुवर्णयितुंशक्तःकार्त्स्न्यान्माहात्म्यमुत्तमम् विनाविष्णुंजगन्नाथंनारायणमनामयम्
५१ पुरासर्वेपिऋषयोमाहात्म्यंपापनाशनम् लेशंचलेशंव्याचख्युर्जनानांहितकाम्यया ५२ नांतःकेनापि-
व्याख्यातोऽप्यशक्तत्वान्महीपते त्वंचमासेतुवैशाखेकुरुदानादिसत्क्रियाः ५३ तेनभुक्तिंचमुक्तिंचसंप्राप्नोषिन
संशयः इतितंबोधयित्वाचमैथिलंजनकाह्वयम् ५४ श्रुतदेवस्तमामंत्र्यगंतुंचक्रेमनोगतिम् जाताल्हादः
सराजर्षिर्गलद्बाष्पाकुलेक्षणः ५५ उत्सवंकारयामासस्वामिचूडैर्मनोरमम् ग्रामंप्रदक्षिणीकृत्यशिबिका
मधिरोप्यतम् ५६ चतुरंगबलैर्युक्तःस्वयंपृष्ठमथान्वगात् पुनश्चांतःपुरंप्राप्यसकलैर्विभवैरपि ५७ वस्त्रैरा
भरणैश्चैवगोभूतिलहिरण्यकैः प्रणम्यचपरिक्रम्यतस्थौप्रांजलिरग्रतः ५८ ततस्तंतुमहातेजाःश्रुतदेवोम
हायशाः संतुष्टःपरमप्रीतोययौधामस्वकंमुनिः ५९ ६३ ६१ ६२

६४

५४ ५५ ५६ ५७ ५८ ५९ ६०

अथवैशाखांतिमदिनत्रयस्यविशेषमाहात्म्यंकथयति द्वाभ्यांक्षेपकाभ्यां यः माधवे वैशाखमासे त्रयोदशीचतुर्दशीपौर्णिमास्कतिथिषु स्नानादिकं करोति सनिश्चयेन मोक्षं प्राप्नुयात् यथा पुरा धनशर्माब्राह्मणः त्रयः प्रेताश्चमुक्तिंप्रापुरिति अत्रप्रसिद्धाकथा सप्तदशाध्यायात्मक पाद्मोक्त शाखमाहात्म्ये मध्यदेशे धनशर्मानामब्राह्मणः कुशाद्यानयनार्थंमहावनेगतस्तत्राकस्मात् त्रीन्दारुणान्प्रेतान्दृष्ट्वाऽतिभयभीतो विष्णुंस्मरन् यूयंके इति अपृच्छत् प्रेताऊचुः दर्शनेनैवनोधिपनामश्रवणतोहरेः भावमन्यमनुप्राप्ता वयंजाता दयालवः अयंकृतघ्ननामास्ति द्वितीयोयंविदैवतः अवैशाखस्तृतीयोयंत्रयाणामपिपापकृत् अयंपूर्वजन्मनिस्कदासनामापापेन सदैवकृतघ्नतासंपादितातेन नानानरकयातना मनुभूय अंतिमामिमामवस्थांप्राप तत्कर्मणास्यकर्मजंकृतघ्नमितिनामस्थापितम् अयंद्वितीयः दशसहस्रग्रामाधिपः हरवीरनामानृपः पूर्वजन्म

(क्षेपकः त्रयोदश्यांचतुर्दश्यांपौर्णमास्यांचमाधवे स्नानंदानंपूजनंचकथाश्रवणमेवच १ वैशाखधर्मनिरतोसर्वैमोक्षमवाप्नुयात् धनशर्माब्राह्मणश्चप्रेताश्चैवयथापुरा २) नारदउवाच इत्येतत्परमाख्यानमंबरीषतवोदितम् श्रवणात्सर्वपापघ्नंसर्वसंपद्विधायकम् ६० ६१ ६२

नि देवब्राह्मणपूजारहितः दानशून्यः रोषाहंकारेणगुर्वाज्ञालंघनपरः विप्रनिंदकः महायज्ञानकृत्वैवभुक्तवान् तेनपापकर्मणा नरकयातनामनुभूयाधुना विदैवतनाम्नाप्रेतोजातः अहंतृतीयः पूर्वजन्मनिमध्यदेशे गौतमनामाब्राह्मणः केवलशुष्कवैदिकःश्रौतमार्गनिष्ठः जन्मप्रभृति वैशाखधर्मो नानुष्ठितः एकावैशाखपौर्णिमाऽपि स्नानदानहोमपूजादिना नसेविता तेनमेवैदिकं कर्मजातं सर्वंचनिष्फलं ततोऽवैशाखनामाहं प्रेतोजातोस्मि सर्वतः एतत्तेसर्वमाख्यातं त्रयाणामपिकारणम् त्वन्नोभवसमुद्धर्ता पापाद्विप्रोसिवैयतः अथचाममपुत्रोस्ति धनशर्मेति विश्रुतः तंगत्वा अस्मदर्थे बोधय एतत्प्रेतवाक्यमाकर्ण्यातिदुःखितो धनशर्माजनकावस्थां दृष्ट्वा आह भोजनक अहं तवसुतः निरर्थ

कः यतः यः पुत्रः पितुः निस्तारं नकरोति सकुपुत्रः अतोग्रेमयाकिंकर्तव्यतान गतिश्च कथंभवेदिति चिंतातुरं प्रेतउवाच हेपुत्र किंचित्प्राचीनपुण्यकर्मवशा दस्मात्संचमेहनि वैशाखीपौर्णिमा समागतास्ति अतः यमुनायांगत्वा वक्ष्यमाण व्रताद्याचरणंकुरु तदेवाह त्रयोदश्यांचतुर्दश्यां पौर्णिमास्यां स्त्रीपुरुषोवा वैशाखनियमैर्युक्तः उषसि प्रातर्वास्नानं करोति सस्वर्गगामीभवति यःत्रिरात्र मुषसिस्नात्वा गौरान् कृष्णान्वातिलान् सक्षौद्रान् द्वादशविप्रेभ्योददाति यमप्रीतये सस्वर्गंगच्छति यः दिनत्रयं पौर्णिमायांवा पायसेनदशब्राह्मणान् पक्वान्नेनवायथाशक्ति भक्त्याभोजयेत् सुवर्णतिलपात्राणिच दद्याद्वापानीयमप्यत्र तिलैर्वामिश्रं सहोदकुंभान् पलानिभक्त्या दद्यासितृभ्योभवतीह दत्तंश्राद्धं मुदेतेन समासहस्रंयःस्तिलैर्यवसंमिश्रैःस्नातिसर्वांगतस्तदा तस्यब्रह्माचधर्मश्चददातिवरमीप्सितम् किंवाश्चर्यंशृणुपुरा विष्णुना त्रयोदश्यांहिरण्याक्षःच

तेनभुक्तिंचमुक्तिंचज्ञानंमोक्षंचविंदति इतितस्यवचःश्रुत्वाम्बरीषोमहायशाः ६१ प्रहृष्टांतर
वृत्तिश्चवार्त्यव्यापारवर्जितः प्रणनामतथामूर्ध्नादंडवत्पतितोभुवि ६२

तुर्दश्यांमधुश्चघातितः पौर्णमास्यां भूम्युद्धारश्चकृतः ततःप्रभृतिपुण्य ःजाताः यः पौर्णमायांदशजलधेनूः शर्कराफलतांबूल उपानत्करपत्रिकाः मणिकोदककुंभांश्चपक्वान्नंहेमदक्षिणां प्रयच्छंतिद्विजाग्रेभ्यःधन्यास्तेचात्रकीर्तिताः प्रीतयेधर्मराजस्य योदद्यादुदकुंभकान् सदासप्तकुलंतेनतारितंस्यान्नसंशयः त्रयोदश्यांचतुर्दश्यांपूर्णायांभक्तितत्परः स्नात्वाजह्वातथादत्वाहुत्वासंपूज्यमाधवं यत्फलंजायतेपुत्र तदस्माकं समर्पय नैतौपरिचितौप्रेतौ हित्वास्वर्गंनिमाश्रये एतयोरपि पापस्यप्रांतोयंसमुपस्थितः एवंप्रेतवचःश्रुत्वा गृहंगत्वा परमभक्त्या दिनत्रयंस्नानदानपूजनादिकंकृत्वा तेभ्यःपुण्यंददौ तेचतत्क्षणादेवविमानस्थादिवंययुः धनशर्माप्यचिरंभोगान्भुक्त्वाब्रह्मलोकमगादिति १ २ ६० ६१ ६२

६३ ६४ ६५ ६६ श्रवणात्मनांश्रवणकर्तॄणां ६७ इतिश्रीस्कंदपुराणे-

विभवैरखिलैश्चापिपूजयामाससतंपुनः संपूजितस्तमामंत्र्यनारदोभगवान्मुनिः ६३ लोकांतरंययोधीमान् शापान्नैकत्रसंस्थितिः अंबरीषोपिराजर्षिर्नारदोक्तानिमान्शुभान् ६४ धर्मान्कृत्वाविलीनोभूत्परेब्रह्मणिनिर्गुणे सूतउवाच यइदंपरमाख्यानंपापघ्नंपुण्यवर्धनम् ६५ शृणुयाद्वा पठेद्वापिसयातिपरमांगतिम् लिखितंपुस्तकंयेषांगृहेतिष्ठतिमानद ६६ तेषामुक्तिःकरस्थाहिकिमुतच्छ्रवणात्मनाम् ६७ इतिश्रीस्कंदपुराणेवैशाखमाहात्म्येनारदांबरीषसंवादेफलश्रुतिकथनंनामपंचविंशोऽध्यायः २५ छ इतिश्रीव्यंकटरामात्मजहरिकृष्णविनिर्मितेबृहज्ज्योतिषार्णवेअष्टमेधर्मस्कंधेचतुर्थेमासमाहात्म्यस्तबकेवैशाखमासमाहात्म्यकथनंनामद्वितीयंमाहात्म्यंसंपूर्णम् श्रीकृष्णोजयति श्रीसीतारामचंद्रोजयति छ

वैशाखमाहात्म्यटीकायांपंचविंशोऽध्यायः २५ श्रीकृष्णार्पितमस्तु श्रीरस्तुशुभम् छ

यह वैशाखमाहात्म्य मुंबईमें पं॰ श्रीधरशिवलालके प्रज्ञायुक्त ज्ञानसागर छापखानामें छाप्यो॰ मितिफाल्गुनकृष्ण ३ संवत् १९४४ शके १८१० तारीख २८ माहे एप्रिल सन १८८८ ६६

इतिश्रीमासस्तबके वैशाखमाहात्म्यं सटीकं स०

अथज्येष्ठमासमाहात्म्यंसटीकं प्रारभ्यते॥


स्कंदः
ऋषयः
विष्णु
यमः
पंचाग्नि साधकः
कदलीव्रत·
व्यास·
भीम·
सगरयज्ञ
दत्त·
पुलिंद·
सावित्रीपति मरण·
यमः

अथज्येष्ठमासमाहात्म्यविषयानुक्रमणिका·

अध्यायांक·	विषय·
१	ज्येष्ठमासमाहात्म्यजिज्ञासुभिः शौनकादिभिः पृष्टः स्कंदः काशीस्थदशाश्वमेधप्रशंसापूर्वकंस्नानदानादिमाहात्म्यंप्रतिपादयति ३४ श्लोकैः
२	दध्योदनदानेनगौतमब्राह्मणस्यविष्णुलोकगमनसमयेविष्णुयमयोर्महायुद्धं २७ श्लोकैः
३	दशहराव्रतमाहात्म्यं २८ श्लो॰
४	ज्येष्ठेपंचाग्निसाधनमाहात्म्य २० श्लो॰
५	ज्येष्ठतृतीयायांरंभाव्रतम् २८ श्लो॰
६	रंभाव्रतप्रसंगेनशिवशर्मकथानकं
७	मासोपवासव्रतं २८ श्लो॰
८	मासोपवासव्रतप्रभावात् प्रसन्नोविष्णुः मेनकायां कन्यारूपेणप्रकटोबभूवेत्यादिसांगव्रतकथनंच श्लोक ३३
९	गौरीव्रतेनमेधावीब्राह्मणोरोगमुक्तोबभूवेतिकथा· २९ श्लोक·
१०	दशहराव्रतमाहात्म्ये दशयोगप्रतिपादनं तेषांनिर्णयश्च २५ श्लो॰
११	भागीरथीजान्हवीस्वर्धुन्यादिनामप्राप्तिकारणनिरूपणं २४ श्लोक·
१२	गंगानयनप्रयोजनं वक्तुंसगरराज्ञः अश्वमेधवर्णनं तत्र इंद्रेणसह सागराणांमहायुद्धे इंद्रस्यपलायनम् २८ श्लो॰
१३	पराजितस्येंद्रस्यविष्णुसकाशाददृश्यविद्याप्राप्तिः ततोविद्याबलेनयज्ञीयमश्वंगृहीत्वाकपिलांतिकेस्थापनंअश्वान्वेषणतत्पराणांसागराणांकपिलांतिकेभस्मीभवनं· श्लो· २८
१४	ततः कपिलस्यसगरांतिकेआगमनं २५ श्लो॰
१५	ततः प्रसन्नकपिलस्यसागराणामुद्धरणार्थंतवकुले भगीरथोगंगामानयिष्यतीत्युक्तिः ३० श्लो॰
१६	भगीरथचरित्रं २८ श्लो॰
१७	निर्जलैकादशीमाहात्म्यं २४ श्लो॰
१८	निर्जलाव्रतप्रसंगेनपुलिंदनृपेतिहासः सचातिगर्वेणप्राचीनबर्हिषंप्रतियोद्धुंजगाम तत्रचनिर्जलाव्रततत्परान्सर्वान्पीडयामासेति· १५ श्लो॰
१९	तेनातिक्रुद्धोविष्णुः रात्रावेवपुलिंदसेनांनाशयामासेति २९ श्लो॰
२०	ततः पराजितः पुलिंदः दत्तात्रेयंप्रतिगत्वावृत्तांतंकथयामासेति २५ श्लो॰
२१	दत्तात्रेय कथितंनिर्जलाव्रतविधानं ३४ श्लो॰
२२	वटसावित्रीव्रतमाहात्म्यं २६ श्लो॰ (३५
२३	सावित्र्याख्यानंपंचभिरध्यायैः ३८।३।।१७।२८
२८	ज्येष्ठस्नानमाहात्म्यकथनप्रस्तावेन वृंदारकब्राह्मणस्येतिहासः २२ श्लो॰
२९	ज्येष्ठेस्नानदानमाहात्म्यश्रवणफलादिनिरूपणं· यमेनमासमाहात्म्यगोपनकरणे किंप्रयोजनमिति वक्तुं कनकब्राह्मणस्येतिहासः ३५ श्लो॰
३०	मासमाहात्म्यश्रवणमहिमाकथनप्रसंगेनदेवशर्मब्राह्मणस्येतिहासः ४८ श्लो॰

इतिज्येष्ठमासमाहात्म्यविषयानुक्रमणिका
समाप्ता·

श्रीगणेशायनमः आदिनारायणोब्रह्मा विष्णुरुद्रादिदेवताः यस्यानुवर्तिनस्तस्मैनमोगोलोकवासिने १ अथपरमकारुणिकोभगवान् बादरायणिःद्वापरान्ते कलौजनिष्यमाण लोकानांव्रतदानतपोभिः पापक्षयद्वारा परब्रह्मप्राप्त्यर्थं सूतशौनकसंवादनिरूपणेन मासानांमाहात्म्यंकथयन् प्रस्तुतंज्येष्ठमास माहात्म्यविषयेऋषिभिः कार्त्तिकेयंप्रतिकृतंप्रश्नंप्रस्तावयति ऋषयऊचुः माधवमासस्यवैशाखस्य वैशाखोमाधवोराधाइत्य

श्रीगणेशायनमः ऋषयऊचुः श्रुतंमाधवमासस्यमाहात्म्यमपिविस्तृतम् तथापिमनसातृप्तिंनगच्छामःषडानन १ अतस्त्वंकृपयाब्रूहिसर्वसंतोषकारकम् माहात्म्यज्येष्ठमासस्यशृण्वतापापनाशनं २ कोदेवःकिंफलंदानंकोविधिःकथयस्वनः स्कंदउवाच साधुसाधुमहाभागाःपृष्टंलोकोपकारकम् ३ माहात्म्यंशुक्रमासस्यकथयामियथातथम् विष्णुर्वैसर्वदेवानांज्येष्ठःश्रेष्ठःप्रजापतिः ४ तथायंसर्वमासानांज्येष्ठःश्रेष्ठतमस्मृतः सर्वेपिवासरायस्यश्रेष्ठावैपर्वसन्निभाः ५ अतःसर्वेषुलोकेषुश्रेष्ठोमासोविधीयते प्रातःस्नानंतदाकार्यंशौचाचारसमन्वितं ६ दशाश्वमेधिकेतीर्थेगंगायांलोकविश्रुते स्नानंज्येष्ठेहिकर्तव्यंसर्वपापप्रशांतये ७ दृष्ट्वादशाश्वमेधेशंपुनर्जन्मनविद्यते तत्रपुण्यतमाज्ञेयादिवसाऽदृश्यसन्निभा ८ यत्रावतीर्णास्रोतासाजान्हवीदुरितापहा तत्रापिपुण्यदातीर्थंपापहामणिकर्णिका ९ तत्रस्नानानिदानानिकर्त्तव्यानिचभूरिशः उदकुंभांबुदानंचतालवृंतंसचंदनम् १० त्रिविक्रमस्यप्रीत्यर्थंछत्रंचोपानहंतथा उपानहौप्रदास्यामिकंटकस्यनिवारणे ११

मरः १ २ ३ शुक्रमासस्यज्येष्ठस्य यथातथं यथार्थतः वास्तवमितियावत् तत्रादौज्येष्ठस्यसर्वमासेभ्यः श्रेष्ठत्वंप्रतिपादयति विष्णुरिति ४ श्रेष्ठत्वेकारणमाह सर्वेपीति ५ ६ स्नानेस्थलविशेषमाह दशाश्वमेधिक इति लोकविश्रुतेकाशिक्षेत्रस्थे ७ ८ अवतीर्णाःस्रोताः यस्याःसकाशादिति ९ भूरिशःअनेकधा उदकुंभदानंकेवलमंबुदानंच द्वंद्वांतेश्रूयमाणपदंप्रत्येकंसंबध्यतइतिन्यायेदानमित्यस्योभयत्रसंबंधः तालवृंतं तालपत्रीयव्यजनं १० उपानहंचर्मपादुका ११

उपानद्दानेसंकल्पमाह उपानद्वाविति १२ छत्रदानेसंकल्पमाह इहेति १३ उदककुंभदानेसंकल्पः एषइति १४ व्यजनदानेसंकल्पः घर्मेति भूसुरायब्राह्मणाय उशीरंसुगंधतृणविशेषः वालाइतिभाषायां १५ १६ १७ १८ शुचौज्येष्ठे १९ २०

सर्वस्थानेषुसुखदे अतःशांतिंप्रयच्छमे इहामुत्रातपत्राणंकुरुमेकेशवप्रभो १२ छत्रंत्वत्प्रीतयेदत्तंब्राह्मणायकुटुंबिने एषकुंभोमयादत्तोशर्कराजलपूरितः १३ प्रदानादस्यतृप्यंतुत्रयस्त्रिंशत्तुदेवताः घर्मशांतिकरंनित्यव्यजनंविष्णुवल्लभम् १४ त्रिविक्रमस्यप्रीत्यर्थंभूसुरायददाम्यहम् चंदनरुचिरंचारुकर्पूरोशीरसंयुतं १५ अस्यप्रदानात्तृप्यंतुदेवर्षिपितृमानवाः एवंदानानिबहुशोदातव्यानिस्वशक्तितः १६ अन्नंचारुजलंदेयंभूतेभ्योजलवर्जिते नदशक्तोद्विजाश्चस्यजलदानंदिनेदिने १७ अश्वत्थंवटवृक्षादीन्संसिंचन्बहुविधैर्जलैः जलदानात्परंदानं नभूतंनभविष्यति १८ तस्मात्सर्वप्रयत्नेनजलदानंविधीयते जलदानंतुयेमोहान्नकुर्वंतिशुचौनराः १९ तेभुक्त्वानिरयान्घोरान्भवंतिभुविचातकाः अत्रतेकथयिष्यामिइतिहासंपुरातनम् २० पुरात्रेतायुगस्यांतेमाहिष्मत्यांद्विजोत्तमः सुमंतुर्नामधर्मात्मावेदवेदांगपारगः २१ तस्यभार्यागुणवतीदेवशर्मासुतस्तथा देवार्चनरतोनित्यंसर्वदाभ्यागतप्रियः २२ कदाचिद्दैवयोगेनसमिधार्थंवनंगतः प्रतप्तश्चंडकिरणैस्तृषाव्याकुलितोबहु २३ वृक्षच्छायांसमाश्रित्यजलराशिसमीपगः पीत्वाजलंसमाविष्टोसुप्त्वातज्जलसन्निधौ २४ तद्भयात्तद्वनस्थायेमृगपक्षिगणादयः तृषार्ताव्याकुलीभूताः केपिपंचत्वमागताः २५

२१ २२ दैवयोगेनदेवानामिदंदैवं कर्महोमादितद्योगेनतत्संसिद्धिहेतुना हेतौतृतीया सूर्यस्येतिशेषः २३ जलराशिःजलाशयः २४ तद्भयात्सुप्तदेवशर्मणोभयात् नचस्वधर्मनिष्ठस्य उतचनिद्रितस्य च तस्य भयात्कथंपक्षिणोमृताइतिशंकनीयं तस्मिन्वनेएकएव सजलाशयो हिंसकमनुजसंचारसहितआसीत् अतःमृगपक्षिगणाः व्याधो

यंमृषास्मदइतिमत्वा पलायिताः केचनतृषातुराष्टताश्चइति तन्मरणास्यसंभवात् २५ तिग्मप्रखरं तेजोयस्य एतादृशेसूर्ये कतिपयैरहोभि
रित्यध्याहारः २६ सतीदेवशर्मभार्या २७ कांतयेतिसहार्थेतृतीया २८ शिग्रुवृक्षः शेवगाइतिप्रसिद्धः पूर्वजन्मगतपुत्रत्वंहृदिनिधाय
पुत्रेणेत्युक्तिः २९ ३० ३१ निष्कृतिंपापनिर्दलनोपायं ज्ञात्वातेभ्यः सकाशादित्यर्थः प्रपांपानीयशालिकां निर्जलेजलरहितदेशे

विनिद्रःस्वगृहंयातोगतेस्तंतिग्मतेजसि अज्ञातदोषलिप्तांगःपंचत्वमगमद्द्विजः २६ सतीविवेशदहनंत्यक्त्वापुत्रध
नादिकं तेनकर्मविपाकेनभुक्त्वाचनरकान्बहून् २७ चातकींयोनिमासाद्य कांतयादुःखितोभृशम् स्मरन्पूर्वभ
वपापमागतःस्वगृहेतदा २८ शिग्रुवृक्षंसमाश्रित्यकरुणंरोदतेऽनिशम् श्रुत्वापुत्रेणबहुशोवारितोपिननिर्गतः २९
कोपाविष्टेणपुत्रेणदग्धतस्यचकोटरं दग्धपक्षौतदातौतुवृक्षाधःपतितौनिशि ३० जजल्पतुर्यथाकष्टंश्रुत्वापुत्रोपिवि
स्मितः प्रातर्गत्वाश्रमंपुण्यंततःपृच्छन्द्विजाग्रणीन् ३१ निष्कृतिंस्वपितुर्ज्ञात्वाययौसौनिजमंदिरम् प्रपांकृत्वावि-
धानेननिर्जलेऋषिसं मृतः ३२ तेनपुण्यप्रभावेनदिव्यदेहधरौतदा विमानवरमारूढौवैष्णवंधामचागतौ ३३ इ-
तितेकथितोविप्राःवृत्तांतःपूर्वसंभवः जलरोधस्यदानस्यमहिमाकथितोद्भुतः ३४ इतिभविष्योत्तरपुराणेज्येष्ठमा-
हात्म्येप्रथमोऽध्यायः १ छ स्कंदउवाच ज्येष्ठमासेविशेषेणब्राह्मणेभ्योदिनेदिने दध्योदनंप्रदातव्यंदे-
वानांतुष्टिहेतवे १ दधिभक्तस्यमाहात्म्यंवक्तुंनेशोहिभूधरः तथापिकथ्यतेकिंचिल्लोकप्रत्ययहेतवे २ अलकायां
पुराविप्राविप्रोभूद्गौतमाभिधः श्रुतिस्मृतिपुराणज्ञोद्रव्यहीनःसदुःखितः ३ कुटुंबपोषणाद्विप्रोकृत्वाकर्माणिसर्व
शः गृहीत्वासर्वदानानिनिर्विचार्यशुभाशुभं ४

३२ ३३ जलरोधस्यपानीयनिर्बंधस्य ३४ इतिप्रथमोध्यायः १ छ
भूधरः शेषः नईश नसमर्थः एवंचेद्भवद्भिस्तत्कथनेकुतःश्रमःक्रियतेतत्राह लोकप्रत्ययेति २ ३ ४ छ छ

५ निरवर्तयत् संपादितवान् ६ बलिभुक्पिंडभक्षकः पितृकाननेस्मशानेबलिभुजैःवायसैः ७ ८ ९ १० तेनपु-

ततश्चौरैश्चसंगम्यचौर्यवृत्तिमथाकरोत् नचलेभेधनंकिंचित्ततोदेशांतरंगतः ५त्यक्त्वाकुटुंबंसकलंपापबुद्धिः
क्षुधातुरः बलिदानैःप्रेतपिंडैर्वृत्तिंसनिरवर्तयेत् ६ एवंद्वादशवर्षाणिबलिभुक्पितृकानने वसन्बलिभुजैः
साकंसर्वकर्मबहिष्कृतः ७ क्षीणशक्तिरभूत्सोथजराव्याप्तोगतायुषः ज्येष्ठमासिद्विजानांचदधिभक्तभुजांतथा ८
गृहीत्वोच्छिष्टपात्राणिबलिदानानिसर्वतः तदन्नंवायसेभ्यश्चकाकेभ्यश्चस्वलीलया ९ सोदकंदत्तवान्विप्रोस्वयंभुंज
न्निजेच्छया एवंतेनकृतंविप्राःशक्रेमासिनबुद्धितः १० तेनपुण्यप्रभावेनपंचत्वमगमद्द्विजः यमदूतैःसमागम्यबद्धःपा
शेनतत्क्षणात् ११ नीयमानःक्रंदमानोताडितोमुद्गरैर्भृशं एतस्मिन्समयेराजन्विष्णुदूताःसमागताः १२ विमानवरमा
रूढायमदूतान्यवारयन् दिव्यदेहधरंविप्रंकृत्वानिन्युर्दिवंगणाः १३ यमदूतागतानाथंलज्जिताइदमब्रुवन् दूताऊचुः
त्वदाज्ञयैवभोयाताश्चानेतुंद्विजबंधुकं १४ तत्रविष्णुगणैरेत्यताडितावयमुत्कटम् सनाथास्तेत्वनाथाहिवयंकिंकर-
वामहे १५ अलंत्वत्सेवनेनात्रयामोन्यंस्वामिनंविभुं इतिदूतवचःश्रुत्वाचुक्षुभेत्यतिधर्मराट् १६ आरुह्यमाहिषंतू
र्णंययौदंडधरःक्षणात् दंडेनताडिताःसर्वेदूताविष्णुसमाश्चापि १७ त्यक्त्वाविमानंतेसर्वेपेतुर्यातारमापतिम् निवे
द्यसकलंवृत्तंविष्णुःकोपारुणोऽभवत् १८ पक्षिराजंसमारुह्ययमलोकंजगामसः युयुधेप्रेतराजेनसेंद्रैर्देवगणैःसह
१९ यमेनदंडेनिहतेदेवायाताद्दिशोदश ततःकोपेनविभुनाचक्रेणनिहतोयमः २० पतितेधर्मराजेतुहाहाकारस्तदाभव
त्ब्रह्माणंपुरतःकृत्वाविष्णुंस्तोतुंययुःसुराः २१

ण्यप्रभावेनेत्यस्य विष्णुदूताःसमागताइतिद्वितीयश्लोकस्थेनान्वयः ११ १२
१३ नाथंयमं द्विजबंधुकं नीचद्विजं १४ १५ १६ १७ १८ पक्षिराजंगरुडं १९ २० २१

२२ २३ २४ २५ २६ २७ इतिटीकायांद्वितीयोऽध्यायः २ एतन्मासेकर्तव्यदिनव्रतानांक्रममाहाने

स्तुत्याप्रसन्नोभगवान्धर्मराजमजीवयत् धर्मोपिनत्वादेवेशंक्षम्यतामितिचाब्रवीत् २२ स्वंस्वंस्थानंगताःसर्वेब्रह्मेंद्रा
दिपुरोगमाः अजानताकृतंयच्चदानंदध्योदनस्यच २३ तस्यप्रभावःकथितोकिंपुनर्ज्ञानतोनघाः तस्मात्सर्वप्रयत्नेनदानं
दद्याद्दिनेदिने २४ पथिश्रांतद्विजातिभ्योदद्याद्वेदधिभोजनम् पादप्रक्षालनंकार्यंतस्मिन्मासेदिनेदिने २५ स्रगंधचंद
नैश्चापित्यर्चयेद्द्विजपुंगवान् स्रगंधपुष्पमालाभिःपानकैर्विविधैस्तथा २६ सौगंधिकैश्चव्यजनैर्वीजयेत्स्वयमेवच स्र
गंधपुष्पमालाभिःपानकैर्विविधैस्तथा २७ इतिश्रीभविष्योत्तरपुराणेज्येष्ठमाहात्म्येद्वितीयोऽध्यायः २ ६
स्कंदउवाच शृणुध्वंमुनयःसर्वेसर्वपापहरंशुभम् ज्येष्ठस्यदिनमाहात्म्यंपर्यायंचयथातथम् १ प्रतिपद्दिनमारभ्ययाशु
क्लादशमीभवेत् तावद्व्रतंप्रकर्तव्यंपुण्यंदशहराभिधम् २ स्नानंप्रतिदिनेकार्यंगंगायाःसलिलेशुभे अभावेसर्वतीर्थेषु
सर्वंगंगासमंजलम् ३ मुच्यतेदशभिःपापैःशतजन्मार्जितैरपि महापापानिपंचैवतथापंचलघून्यपि ४ एवंदशविधैःपा
पैर्मुक्तोभवतिनान्यथा तत्रदानान्यनेकानिदत्तान्यक्षय्यमश्नुते ५ तथाशुक्लद्वितीयायामपराण्हेद्विजोत्तमाः समानोना
मविख्यातःकल्पप्राविरभूत्किल ६ तत्रस्नानंचदानंचश्राद्धंचद्विजतर्पणं विष्णुमुद्दिश्ययैर्भक्त्याकृतंकोटिगुणंभवेत् ७
तथाशुक्लतृतीयायांपंचाग्निसाधनव्रतम् कृतंचेन्मासमात्रंतुसर्वपापैःप्रमुच्यते ८ तेजसासूर्यसंकाशोजायतेनात्रसंशयः
अस्यामेवविशेषेणकार्यंरंभाव्रतंशुभम् ९ सधवाविधवाभिर्वास्त्रीभिःसर्वार्थसिद्धये अस्यामेवद्विजश्रेष्ठाःकल्पोभूद्वाम
नस्यच १०

नाध्यायेन शृणु ध्वमिति पर्यायमनुक्रमं १ २ ३ ४ ५
आविरभूत् तस्यप्रारंभोभूत् ६ ७ ८ पंचाग्निसाधनव्रतफलमाह तेजसेति ९ रंभाव्रताधिकारिण्याह सधवेति १०

११ १२ १३ १४ १५ मांस्कंदं १६ १७ १८ १९ सावित्रीव्रतमाह त्रयो

दधिभक्तप्रदानेनतुष्टोभवतिवामनः श्राद्धंकुर्याद्विधानेनतर्पणंद्विजभोजनम् ११ तथैवमासपर्यंतंद्विजेभ्योदधिभोजनम्
तथाशुक्लचतुर्थ्यांतुकपिलस्याश्रमेशुभे १२ कुंडादाविरभूद्देवश्चतुर्बाहुर्विनायकः अतस्तस्यानभुजीतसर्वै कार्यो
महोत्सवः १३ पंचम्यांभोजयेद्विप्रान्आपूपैर्घृतपाचितैः अस्यांशुक्लचतुर्थ्यांतुजातापूर्वंउमासती १४ तस्मात्सातत्रसंपू-
ज्यास्त्रीभिःसौभाग्यवृद्धये उपहारैश्चविविधैःगीतनृत्योत्सवादिभिः १५ होमैःपयोभिर्वस्त्रैश्चपत्रैःपुष्पैःसुगंधिभिः मां
पूजयंतुतेषष्ठ्यांस्त्रीभिःसंतानकांक्षिणः १६ सप्तम्यांज्येष्ठमासस्यज्येष्ठांनैवार्चयंतिये तत्रैववासोज्येष्ठाया भविष्यतिन-
संशयः १७ अतस्तांतत्रसंपूज्यनरैर्दारिद्र्यभीरुभिः दशम्यांपूजयेद्गंगांयथाविभवसंभवैः १८ अवतीर्णायतःस्वर्गात्
दशम्यांलोकपावनी ततस्त्रिभिरहोभिश्चसाध्यमेकादशीव्रतम् १९ निर्जलंसमुपोष्यैवसर्वपापप्रणाशनम् त्रयोदशीं
समारभ्यपौर्णिमांतंमहाव्रतम् २० सावित्रीतिचविख्यातंस्त्रीणांसौभाग्यदायकम् सिंचंतिवटमूलानिब्रह्माणरघुनंदन
२१ सत्यवंतंचसावित्रींपूजयेद्वटसन्निधौ एवंदिनत्रयंकार्यंनिद्राहारविवर्जितम् २२ एवंकृष्णेपिकर्तव्यंपारणंप्रतिप-
द्दिने नित्यंस्त्रीभिःसदाकार्यंवर्षसाध्यंतथापरम् २३ ज्येष्ठज्येष्ठायुताचेत्स्यात्कोटिपर्वशताधिका तस्यांदानानिदेयानि
कथयामिसमासतः २४ तथातस्याममभवत्कूर्मकल्पस्तपोधनाः तत्रस्नानंचदानंचतर्पणंद्विजभोजनम् २५ पितॄ-
नुद्दिश्यकुर्वंतितेयांतिपरमंपदम् यस्यांमन्वंतरारंभःकृतोरौच्यन्भूत्कराः २६ तस्माच्छ्राद्धंचदानंचपितृणांतृप्तिदायकं
एवंव्रतानिबहुशोमासेस्मिन्देवपूजिते २७ संक्षेपेणमयाख्यातंयथाशक्तियथामतिः एवंयेवैप्रकुर्वंतिसर्वपापैःप्रमुच्यते २८

दशीमिति २१ २२ २३ ज्येष्ठायुता ज्येष्ठानक्षत्रयुता पौर्णिमेतिशेषः २४ २५ २६ २७ २८

इतिटीकायांतृतीयोध्यायः ३ पंचाग्निसाधनव्रतमाह ज्येष्ठेमासेति १ व्रतस्यमहत्वे इतिहासंप्रमाणयति यस्येति शैवंपदं शिवस्यार्धांगमित्यर्थः २ व्रतस्यबहुफलत्वमवधार्यविधानश्रवणेजातोत्कंठाऋषयःपृच्छंति कथमिति कथंविख्यातंपंचाग्नीतिनामकथंप्राप्तमित्यर्थः ३

इतिभविष्योत्तरपुराणेज्येष्ठमाहात्म्येतृतीयोऽध्यायः ३ छ स्कंदउवाच ज्येष्ठेमासिविशेषेणव्रतंपंचाग्निसाधनम् कर्तव्यंकामिभिःकामंसर्वकामार्थसिद्धये १ यस्यप्रभावाद्गिरिजाशैवमाप्नोत्पदंशुभम् ऋषयऊचुः कथंपंचाग्निविख्यातंकथितंतद्व्रतंत्वया २ कार्यंकेनविधानेनतत्सर्वंकथयस्वनः स्कंदउवाच पुरारुद्रेणभोविप्राःदग्धःकामःसुखप्रदः ३ पार्वतीदीनवदनाशुशोचबहुवासरम् पितृसंप्राप्तिवासापिलेभेसानसुखंक्वचित् ४ ऋषीणामाश्रमाणांचहिमाचलनिवासिनाम् पृच्छतिस्मतदाकालीत्युपायंचित्तनिर्वृतेः ५ ऋषीणांप्रवरस्तत्रभृगुर्वाक्यमथाब्रवीत् भृगुरुवाच पंचाग्निसाधननामव्रतंकुरुयथाविधि ६ पार्वत्युवाच स्वामिन्केनप्रकारेणकर्तव्यंव्रतमुत्तमम् भृगुरुवाच साधुपृष्टंमहाभागेविस्तरात्कथयामिते ७ ज्येष्ठमासतृतीयायांप्रभातेविमलेजले स्नात्वानित्यक्रियांकुर्याच्छुक्लवासागृहंव्रजेत् ८ पुण्याहवाचनंकुर्याद्ब्राह्मणान्भोजयेत्तथा समित्समिद्धांश्चतुरःकृत्वा न पूज्यशक्तितः ९ तेषांमध्येस्थितस्त्वापिसवितारंसमीक्ष्यता यावदस्तमितोभानुस्तावत्तिष्ठेज्जितेंद्रियः १० एवंमासव्रतंकार्यंनिराहारोजितेंद्रियः भृग्वर्षेर्गिरमाकर्ण्यसंतुतोषउमाव्रतम् ११ तेनोक्तेनविधानेनचकारशिवतुष्टये एवंद्वादशवर्षाणिप्रतिज्येष्ठेशुभानना १२ व्रतस्यास्यप्रभावेनशिवोमोहमुपागतः कृगनापार्वतीचेतिविचार्यैवंसमाधिना १३

दहनेहेतुमाह असुखप्रदइति ४ ५ ६ ७ ८ समित्सभिद्धान् समिद्भिः सम्यक् इद्धान् प्रज्वलितान् पूज्यइत्यत्रल्यपआर्षः ९ १० ११ १२ १३ छ छ छ

वनचरोभिल्लादिस्तस्याकृतिरिव आकृतिर्यस्य तथाभूता १४ १५ १६ १७ १८ १९ अंतेव्रतस्यसर्वोत्तमत्वदर्शनायत-

ज्ञात्वातपोवनंतस्यायययौवनचराकृतिः याचयामासविविधैर्वाक्यैरमृतसंमितैः १४ तयानिर्भर्त्सितःसोथनिजरू
पमदर्शयत् ततःसागिरिजाविप्राव्रीडयाधोमुखीत्यभूत् १५ अंकेकृत्वातुगिरिजामालिलिंगमुदाशिवः ततोहि-
माद्रिस्तज्ज्ञात्वाआययौशिवसन्निधौ १६ पूजयामासविविधैरुपचारैरनेकधा गृहीत्वातांहिमवत्तासतपोवनवासि-
नीम् १७ अर्द्धांगेगिरिजांकृत्वाययौकैलासमात्मनः इतिवःकथितंविप्राव्रतंपंचाग्निसाधनम् १८ माहात्म्यंज्ये-
ष्ठमासस्यभूयःकिंश्रोतुमिच्छथ बहुभिश्चकृतंपूर्वंव्रतंसर्वार्थसाधनम् १९ धर्मार्थकाममोक्षाणांसाधनंपरमंमतं
कुर्वंतियेव्रतमिदंजगदीशतुष्ट्यैतुष्टाश्चसर्वमनईप्सितकामभोगान् तेप्राप्नुवंतिविविधान्भुविकामभोगानंतेव्रजंति
निलयंपरमस्यपुंसः २० इतिश्रीभविष्योत्तरपुराणेज्येष्ठमाहात्म्येचतुर्थोऽध्यायः ४ छ ऋषयऊचुः ज्येष्ठ
मासिविशेषेणस्त्रीभिःसौभाग्यदायकम् किंकर्तव्यंव्रतंदानंकथयस्वप्रसादतः १ स्कंदउवाच पुराकैलासशिखरे
सुखासीनंमहेश्वरम् प्रणम्यपार्वतीदेवंबद्धांजलिरभाषत २ पार्वत्युवाच शिवशंभोजगन्नाथसर्वज्ञसुखदा
यक ऐश्वर्यंसुखसौभाग्यंनास्तिमत्सदृशीक्वचित् ३ एतदक्षय्यतांयांतियेनोपायेनशंकर अजरामरतांचैवत्वयास-
हकृपानिधे ४ सावित्रीरूपगर्विष्ठाभर्तुरंकमथात्यजत् गायत्र्याशापितासर्वंत्वयासाननिवारिता ५ प्राणास्त्यज
त्वंनिर्लज्जअजागलसमस्ततः सावित्र्यावचनंश्रुत्वाब्रह्माजज्वालकोपतः ६

दूणान्कथयति कुर्वंतीति २० इतिटीकायांचतुर्थोऽध्यायः ४ छ रंभाव्रतंप्रस्तावयति ज्येष्ठइति १ २ ३ ४ अभर्त्स
नशेषः ५ अजागलसमः अजायाः छाग्याः गलेलंबमानौनिष्फलौस्तनौतत्समः तौयथानिरुपयुक्तौनतद्वत्त्वमपिभवेत्यर्थः ६ छ

७ ८ कथनेकारणमाह तवेति पूर्वोक्तप्रश्नस्य अक्षय्यसौभाग्यदायकव्रतकथनरूपस्य उत्तरमाह भद्रेइति ९ १० ११ १२

मृढेरुक्षत्वमाप्नोषिबीजेनरहितंभुवि देवैस्तुप्रार्थितोब्रह्माउच्छापंप्रददौतदा ७ तद्वदस्वकृपासिंधोयदिमेस्यादनुग्र
हः शिवउवाच अस्तिनाशोमहेंद्रस्यस्वर्लोकेचप्रजापतेः ८ सर्वेषाहृश्यजातानानाशमस्तिवनेनरा तथापिकथयि
ष्यामितवभक्तिवशीकृतः ९ भद्रेकुरुष्वयत्नेनरंभाख्यंव्रतमुत्तमम् ज्येष्ठेमासितृतीयायांस्नात्वानियमतत्परा १० पार्व
त्युवाच केयंरंभाकथंतस्याव्रतंकार्यंसमाहिता सावित्रीब्रह्मणाशप्ताजडत्वरूपमास्थिता ११ सेयंरंभाचकदली-
कापूर्वजननीतिच रुषाशप्तातुसावित्रीपितृवेश्मनिसंस्थिता १२ पित्रोपदिष्टमार्गेणज्येष्ठेस्नानार्चनादिकम् चकारपंचव
र्षाणिततःप्रीतःपितामहः १३ आविर्बभूवतस्याग्रेज्येष्ठमात्तृतिथौशुभे वरान्ददौबहुतरान्शृणुष्वभुविदुर्लभान् १४
रंभाभवत्वमंशेनलोकानुग्रहहेतवे येर्चयंतिशुचौमासिभक्त्यात्वांत्वशुचिस्मिते १५ तासामक्षय्यतामेतिसौभाग्यसुख-
संपदः सावित्र्यासहब्रह्माथसत्यलोकंजगामह १६ एतत्तेकथितंभद्रेसावित्रीशापकारणम् रंभाव्रतविधानंचकथया
मिसमासतः १७ उद्यानेवागृहेवापिशक्त्याचकदलीवनं स्थापयेच्चशुभेमासितृतीयायांद्विजोत्तमाः १८ पंचामृतैश्च
विविधैर्गंधतोयैःसकर्पुरैः पुष्पोदकैःशीतकैश्चतथाचोसीरवासितैः १९ अलंकाराणिपूज्यानिकारयेच्चदिनेदिने एवं
रम्यवनंकृत्वाब्रह्माणंनाभिसंस्थितम् २० सुवर्णनिर्मितंकृत्वापूजयेत्कलशेस्थितं उपचारैःषोडशभिर्नैवेद्यैर्विविधैस्त
या २१ भोजयेद्ब्राह्मणान्शक्त्याहविष्यंस्वयमेवहि गीतवादित्रनिर्घोषैःपुराणश्रवणादिभिः २२

१३ १४ १५ १६ १७ कदलीवनंस्थापयेत् कदलीःरोपयेत् पानीयसिंचनादिनातावर्धयेच्चेतिभावः १८ तासांकदलीनांदे ६
इतिबुध्या षोडशोपचारैःपूजनमपिकर्तव्यमित्याह पंचामृतैरिति १९ २० २१ २२ ६२ ६३

२३ २४ २५ २६ रहस्यंस्थापितंपुरा अद्यपर्यंतंनकथितमित्यर्थः २७ २८ इतिटीकायांपंचमोऽध्यायः ५
रंभाव्रतविषयकमितिहासंपृच्छति कथेति १ द्विजः ब्राह्मणः द्विजः कृतोपनयनादिसंस्कारः द्विजकुलश्रेष्ठः सत्कुलोत्पन्नः २ ३ ४

जागरंतत्रकुर्वीतकथाश्रवणकीर्तनम् एवंप्रतिदिनंकार्यंकदलीवनसंस्थितः २३ इतिमासव्रतंकार्यंसर्वकामार्थिभिर्न
रैः पूर्णेमासेतुतत्सर्वमाचार्यायनिवेदयेत् २४ दत्वादानान्यनेकानिगांचदद्यात्पयस्विनीं होमंकुर्याद्यथाशक्तिविप्रे
भ्योभूरिदक्षिणाम् २५ स्वशक्त्याभोजयेद्विप्रान्पायसैःशर्करान्वितैः विसर्ज्यपारणंकुर्यात्प्राणिभ्योन्नंददौबहु २६
एतत्तेकथितंसर्वंरहस्यंस्थापितंपुरा भद्रेकुरुष्वयत्नेनफलंप्राप्नोतिशाश्वतम् २७ एतद्व्रतंकिलपुराजगदीश्वरेणसंगो
पितंदिनकरात्मजनिग्रहेण तत्त्वंभुनामकथितंगिरिराजपुत्र्याभावेनइशकृपयागुरुणाखिलस्य २८ इतिभविष्यो
त्तरेज्येष्ठमाहात्म्येपंचमोऽध्यायः ५ ६ पार्वत्युवाच कथाकृतव्रतमिदंफलप्राप्तंयथातथम् तत्सर्वंसेति
हासेनकथयस्वममप्रभो १ शिवउवाच त्रेतायुगेद्विजःकश्चिद्दूर्जदिनोमनामतः द्विजोद्विजकुलश्रेष्ठोधनीचबहुबां
धवः २ अनपत्यस्तुदुःखार्तोमहानियममास्थितः व्रतदानान्यनेकानिचकारविधिपूर्वकम् ३ अथकालेनबहुनाजाता
कन्यातिशोभना दिनेदिनेप्रववृधेकन्याकमललोचना ४ स्वांविवाहोचितांकन्यांदृष्ट्वाभार्याममंत्रयत् देयाकस्यसुरू
पेयंनसमोदृश्यतेवरः ५ निर्गतःस्वगृहात्तूर्णंवरान्वेषणतत्परः ग्रामाद्ग्रामांतरंगच्छन्पत्तनानिबहून्यपि ६ मंडलानि
नृपाणांचक्षेत्राणिविविधानिच नावापकन्यकायोग्यंवरंसद्विजपुंगवः ७ तपोवनानिरम्याणिऋषीणांभावितात्मनाम्
अथापश्यत्कौशिकस्याश्रमेद्विजपुंगवः ८

अमंत्रयत्पर्यचारयत् विचारमेवाह देयेति विचारे
कारणमाह सुरूपेति ५ तूर्णंशीघ्रं निर्गमनेकारणमाह वरान्वेषणतत्परइति ६ ७ ८ ९ ९

दुष्टपुरुषंवर्णयति शिवशर्मेतीति ९ १० ११ नातिदूरात् स्वगृहसमीपे १३ १४ १५ १६ १७ १८

शिवशर्मेतिविख्यातःपितृभ्यांरहितस्तदा अपरंनामतस्यास्तिरूपराशीतिविश्रुतम् ९ नास्तितत्सदृशंरूपंसमस्तेभूमि
मंडले अयंऋषिभिरुद्गीर्णरूपराशिरितिस्फुटम् १० धूर्जटिस्वाश्रयंसर्वंन्यवेदयततानृषीन् तैरानंमोदितःसोपि
शिवशर्मेणसंयुतः ११ जगामनगरंस्वीयंहर्षेणोत्फुल्लमानसः सर्वैर्बंधुजनैःसार्द्धंविवाहमकरोद्द्विजः १२ नातिदू
राद्गृहंदत्त्वागोधनानिधनानिच पारिबर्हंबहुविधंविप्रेभ्योभूरिदक्षिणाम् १३ शिवशर्मातयसाकंगुणवत्यासलील
या अपूर्वइवतत्प्राप्तप्रपंचजनितस्मरवम् १४ अथकालेनबहुनासाद्विजःकालचोदितः समिधार्थंवनयातःसंश्रां
तोवृक्षमाश्रयत् १५ पीत्वातच्छिशिरंतोयंस्कंध्वप्यचतरोरधः एतस्मिन्नंतरेविप्रोगिलितोजगरेणसः १६ तत्रापिना
ययुःकपित्थस्तंयातोदिवाकरः श्वश्रूश्वशरौतत्पत्नीसेवकैःसहितवनम् १७ अन्वेषयामासनिशिदीपिकाभिःसमंत
तः एवमन्वेषमाणेषुभास्करस्योदयोभवत् १८ ततस्तेदुःखितानूनंनिराशागृहमागताः ततोगुणवतीसाध्वीपितृ
गेहनिवासिनी १९ देवार्चनरतानित्यंशोकाकुलितमानसा कदाचिद्दैवयोगेननारदःसमुपागतः २० विधिवत्पू
जयामासप्रणम्यचमुहुर्मुहुः नारदस्तुप्रसन्नात्माउपदेशंचकारह २१ नारदउवाच भद्रेकुरुशुचौमासिव्रतंरंभा
भिधंशुभम् पूजयस्वविधानेनदेवंभर्तृस्वरूपिणम् २२ यावज्जीवंकुरुव्रतमनन्यमनसानघे विष्णुभर्तारमासा
द्यस्थानमाप्स्यसिशाश्वतम् २३ इत्युक्त्वावचनंब्रह्मनंदनोद्विजवल्लभाम् वापयामासकदलीवनंवनविहारिणी २४
चकारसकलंकर्मनारदेनयथोदितं गतेबहुतिथेकालेजरयाव्यापिताभृशम् २५

१९ २० २१ शुचौज्येष्ठेमासि २२
२३ वापयामास रोपणंकारितवान् २४ जरयावार्धक्येन २५ ७ ७ ७ ७

२६ २७ कुसुमावतंसैः पुष्पाणांगुच्छः तत्कृतैर्भूषणैर्वा २८ इतिटीकायांषष्ठोऽध्यायः ६ ७ भूयइति माससं-
भवंप्रकरणवशात् ज्येष्ठमाससंभवम् १ २ ३ ४ व्रतविधिंतत्फलंचाह त्रयोदश्यामिति ५ ७

तदासानिधनंप्राप्ताविप्रकन्यादिवंगता तत्पुण्यनिचयाज्जातातुलसीविष्णुवल्लभा २६ नान्यत्किंचित्प्रियंविप्रास्तुलस्यास्तत्प्रियंकृते गिरिजापिचकारैवमाज्ञयागिरिजापतेः अस्यव्रतप्रभावेनगिरिजाशिववल्लभा २७ श्रुत्वाषडाननमुखात्महिमानमुच्चैर्ब्रह्मर्षयःप्रमुदिताःकुसुमावतंसैः पूजांप्रचक्रुरतुलांगिरिजालिलिंगस्वानंदकंदमकरंदनिभषडास्यम् २८ इतिभविष्योत्तरपु० ज्येष्ठमाहात्म्येषष्ठोऽध्यायः ६ ७ ऋषयऊचुः भूयःकथयतोभद्रंमाहात्म्यमाससंभवम् यस्यश्रवणमात्रेणसर्वपापैःप्रमुच्यते १ उपवासप्रियोविष्णुरुपवासव्रतसत्कृत् लक्षमाससमोह्येकोमासोपवासनव्रतम् २ स्कंदउवाच उपोष्यसकलमासंप्रातःस्नायीजितेंद्रियः कंदमूलफलाहारोभूमिशायीविमत्सरः ३ शौचाचारयुतोनित्यंसत्यवाक्प्रियदर्शनः प्रतिपद्दिनमारभ्ययावत्कृष्णात्रयोदशी ४ अतंद्रितोव्रतंकुर्यात्मदमोहविवर्जितः त्रयोदश्यांसमुत्थायमंगलस्नानमाचरेत् ५ पुण्याहवाचनंकार्यमधिवास्यचदेवताः सौवर्णंराजतंताम्रंमृन्मयंवानवंहृदं ६ स्थापयेत्कलशंदिव्यंपंचरत्नसमन्वितम् तस्योपरिन्यसेद्देवंशंखचक्रगदाधरम् ७ निर्मितंशातकुंभेनलक्ष्मीगरुडसंयुतं ब्रह्मादिदेवताःस्थाप्याःस्वगृह्येनद्विजर्षभाः ८ पुष्पाणांमंडिकाकार्याचतुर्द्वारोपशोभिता कदलीस्तंभसंयुक्तास्तोरणैर्विविधैस्तथा ९ तन्मध्येपूजयेद्देवमुपचारैरनेकशः पक्वान्नैःपायसैःखंडैरोदनैर्दीर्घसंयुतैः १० ऋतुकालोद्भवैःपुष्पैर्नारिकेलादिभिःफलैः धूपैर्दीपैश्चतांबूलैर्द्रव्यैःसौगंधिकैस्तथा ११

७ स्वगृह्येनस्वशाखोक्तगृह्यसूत्रविधानेन ८ ९ १० ११ ७ ७

क वशारदैः हरेर्भगवतःभक्त्यां विशारदैः निपुणैः कीर्तनकरणे कुशलैर्वा कर्तृभिः १२ निशांगमयेदितिशेषः १३ १४ १५

रात्रौजागरणंकुर्यात्पुराणश्रवणादिभिः कीर्तनंकारयेत्तत्रहरिभक्तिविशारदैः १२ गीतवादित्रनिर्घोषैर्नियमेत्तांमहानिशाम् ततःप्रभातेविमलेनद्यादौस्नानमाचरेत् १३ कृत्वानित्यविधिंसर्वंब्राह्मणैरनुमोदितः वरयेत्ऋत्विजःपंचपूजयेद्वस्त्रभूषणैः होमंकुर्यात्प्रयत्नेनकुंडेवास्थंडिलेपिवा पौरुषेणाथसूक्तेनइदंविष्णुर्हुवेद्धविः १५ शर्करारवंडसहितंसुसर्पिस्तिलपायसं विष्णोर्नुकेतिमंत्रेणतथैवाष्टोत्तरंशतं १६ पूर्णाहुतिंततोहुत्वाहोमशेषंसमापयेत् ऋत्विग्भ्योदक्षिणांदद्याद्गावश्चबहुदुग्धदाः १७ छत्रोपानहदानानिदशदानानिदापयेत् स्वशक्त्याभोजयेद्विप्रान्दक्षिणाभिःसुतोषितान् १८ तामर्चांगुरवेदद्याद्वस्त्रयुग्मेनवेष्टिताम् केशवःप्रतिगृह्णातिकेशवोवैददातिच १९ केशवस्तारकोभाभ्यांकेशवायनमोनमः इमंमंत्रंसमुच्चार्यदक्षिणासहितांहरेः २० प्रतिमांविप्रवर्यायश्रोत्रियायकुटुंबिने ततस्तुपारणंकार्यंवंधुभिःसहितंद्विजाः २१ व्रतंकरोतियोलोकेदुर्लभंजगतीतले शोकमोहनिर्मुक्तोवांछितलभतेध्रुवम् २२ त्रयोदशाब्दपर्यंतंकारयेत्तत्सुदुर्लभम् उद्यापनंततःकार्यंसंपूर्णफलसिद्धये २३ निमंत्र्यब्राह्मणान्पूर्वंसपत्नीकांस्त्रयोदश वस्त्रालंकरणैःपूज्यदत्त्वागावस्त्रयोदश सुभूषिताःसवत्साश्चमांसलाबहुदुग्धदाः २४ दक्षिणांचयथाशक्त्याअन्येभ्योभूरिदक्षिणां होमादिकंतुपूर्वोक्तंकार्यंवित्तानुसारतः २५ वित्तशाठ्यंनकर्तव्यंपरेविष्णुव्रतेनवा शक्त्यायत्क्रियतेकिंचित्तत्सर्वंसफलंभवेत् २६ विफलंतंद्विजानीयाद्दांभिकस्यशठस्यच तस्मात्सर्वप्रयत्नेनसुभक्त्यापूजयेद्धरिम् २७

होमद्रव्याण्याह शर्करेति १६ १७ छत्रंप्रसिद्धं उपानत् पादू तयोर्दानम् ८

१८ अर्चा प्रतिमां १९ २० दद्यादितिशेषः २१ २२ २३ २४ २५ २६ २७

इतिटीकायांसप्तमोऽध्यायः ७ छ पुरेति भूधराधिपः पर्वतेषुश्रेष्ठः स्थावरंपर्वतरूपं जंगमंमनुष्यादिरूपं १ २ ३ ४ आस्यमुखं ५ वातेन वायुनाहता रंभाकदलीव पपातेति अग्रिमश्लोकेनान्वयः ६ ७ रमया लक्ष्म्या प्रार्थितः प्रश्नकरणे प्रेरितः

इतिभविष्योत्तरेज्येष्ठमासमाहात्म्येसप्तमोऽध्यायः ७ छ स्कंदउवाच पुराहिमवतुंनामभूधरोभूद्धराधि
पः स्थावरंजंगमंरूपंबिभर्तिस्वेच्छयासदा १ तस्यभार्यासुचार्वंगीमेनकानामनामतः सर्वसिद्धिसमायुक्तोप्यनपत्यः
सुदुःखितः २ चकारव्रतदानानिसंततिंनालभच्चिरम् ततोमेनांसमाहूयधिग्धिगितिप्रलपन्मुहुः ३ रूपलावण्यसंपन्ना
यानारीसुतवर्जिता सानारीसर्वलोकेषुनिंदितादुर्भगेतिच ४ त्वांदृष्ट्वाममसंतापोजायतेसुचिरंसदा अद्यप्रभृति
नैवास्यंदर्शनीयंशुचिस्मिते ५ कथंबभर्षिवैप्राणान्पशूनिवविनिश्चितान् इतिभर्तृवचःश्रुत्वारंभावातहतायथा
६ निपपातमहीपृष्ठेवज्राहतइवाचलः रुदतीकंदमानासाश्रीविष्णुंशरणंययौ ७ रमयाप्रार्थितोविष्णुर्नारदंपृ
ष्टवान्विभुः अजस्तंप्रेषयामासमेनायाश्चसमीपतः ८ नारदेनोपदिष्टंतुपर्णाशनव्रतंतदा ज्येष्ठशुक्लतृतीयायां
व्रतंकार्यंविधानतः ९ अदृष्टमनुजेपूर्वंयातासागिरिगह्वरम् सिंहव्याघ्रगणाकीर्णंझिल्लिनीगणसंवृतम् १० तत्र
गत्वास्थितवतीस्थाणुवत्संयतासती नचाहारंचनिद्रांचनचान्यत्कर्मकुर्वती ११ स्मरंतीमानसेमायांविष्णोर्गुण-
मयींसदा दैवयोगेनतत्सर्वंजातंज्येष्ठसुदुष्करम् १३ तस्यपुण्यप्रभावेनआविर्भूताजगन्मयी तुष्टावपरयाभ
क्त्यावरंब्रूहीतिसाब्रवीत् १३ तवप्रसन्नाजातास्मिपर्णाशनव्रतेनसा तत्रमासोपवासेनव्रतेनपरितोषिता १४
अदेयमपिदास्यामितवभक्तिवशीकृता इतितद्वचनंश्रुत्वाउवाचचजहर्षच १५

८ तंनारदं अजः विष्णुः ९ १० स्थाणुवत् स्तंभवत् ११ तत्सुदुष्करमपि दैवयोगेनजातंसिद्धं इतिसंबंधः १२ १३ साभगवतीमाया १४ १५

ममअंगजाकन्याभवेत्यन्वयः १६ १७ ननुविधानस्यज्ञानाभावान्मयाकथमेतद्व्रतंपूरणीयंतत्राह विधानमिति १८ १९ २०

मेनकोवाच यदितुष्टासिदेवेशिकन्याभवममांगना भवामीतिवरंदत्वापुत्रैकस्तेभविष्यति १६ अन्यंत्वेकंहि
तंवाञ्छितंकुरुष्वममाज्ञया अनायासेनतेलब्धंमाहात्म्यंज्येष्ठसंभवम् १७ सांगंकुरुप्रयत्नेनगच्छत्वंनिजमंदिरं
विधानंसकलंतेद्य भृगुरागत्यशंसति १८ इत्युक्त्वांतर्दधेमायामेनापिस्वगृहंययौ हिमाचलायतत्सर्वंभृगुणाक
थितंपुरा १९ भृगूपदिष्टमार्गेणमेनकापिचकारतत् हिमवानपितज्ज्ञात्वासंतुतोषजहर्षच मेनामालिंग्यपाणि
भ्यामंकेकृत्वात्वसांत्वयत् २० अथस्वल्पेनकालेनससत्वामेनकाभवत् वसिष्ठोपिसमागत्यतस्याःपुंसवनंक्रियां
२१ चकारहिमवद्भाग्यसदृशाभुविदुर्लभा आविर्बभूवतस्याग्रेजगद्धात्रीनिजेच्छया २२ उमागौरीपार्वतीचना
म्नाविख्यातिमागता एवंज्येष्ठस्यशुक्लायांचतुर्थ्यांजनिताशिवा २३ तस्मात्सातत्रसंपूज्यास्त्रीभिःसौभाग्यवृद्ध
ये मृन्मयींगिरिशंकृत्वाचतुर्द्वारोपशोभितम् २४ धान्यंसंरोहणंकार्यंसमंताद्गिरिजासनात् मध्येचांदोलनंकार्यं
स्वशक्त्यारजतादिना २५ उमांस्वर्णमयींकुर्यात्संस्थाप्यांदोलनेशुभे प्रपूज्यविधिवच्छक्त्यायथाविभवसंभवैः २६
पूज्यास्तदासुवासिन्योभोजयेच्चकुमारिकाः नानासौभाग्यद्रव्यैश्चमाल्यैश्चंदनकल्पकैः २७ गीतवादित्रनिर्घोषैर्मा
समेकंसमापयेत् नित्यंहविष्यमश्नीयात्कथांश्रुत्वाप्रयत्नतः २८ उद्यापनंततःकुर्यात्फलसंपत्तिहेतवे गौरीर्भिमाये
तिमंत्रेणपयसाहोममाचरेत् २९ निर्वर्त्यसकलंकर्मगांचदद्यात्पयस्विनीं गौरीव्रतमितिख्यातंस्त्रीणांसौभाग्यदायकं
३० यामोहात्कुरुतेनारीचतुर्थ्यांभोजनंयदि दुर्भगत्वमवाप्नोतिसानारीजन्मजन्मनि ३१

ससत्वागर्भिणी २१ २२ २३
धान्यंसरोहणंकार्यमिति धान्यंरोपणीयमित्यर्थः २४ २५ २६ २७ २८ २९ ३० उपोषणाभावेदोषमाह मायेति ३१

तदादि तस्माद्दिनादारभ्यइयंतिथिः उमाजयंतीतिनाम्नाविख्याता ३२ इतिटीकायांअष्टमोध्यायः ८ एतद्व्रतेइतिहासंप्रमाणयति अत्रेति १ कीर्तिपुर्यां कीर्तिसंज्ञकेपुरे २ कुलोद्भवा स्वकुलोत्पन्ना ३ वार्धुषिः वृद्ध्याजीवः वृद्ध्या (व्याजइतिभाषायां) आजीवः उपजीवि

उमाजयन्तीविख्यातातदादिजगतीतले पुनश्चकारसामेनापुत्रसंतानहेतवे ३२ तेनव्रतप्रभावेनजातःपुत्रोमहौजसः मैनाकइतिविख्यातोहिमाचलइवापरः ३३ इतिश्रीभविष्योत्तरपु॰ज्येष्ठमाहात्म्येअष्टमोऽध्यायः ८ ६७

स्कंदउवाच अत्रेववर्णयिष्यामिकथांपापहरांशुभाम् यस्याश्चश्रवणादेवसंशयोयोगमिष्यति १ विंध्यस्योत्तरदिग्भागेकीर्तिपूर्यांद्विजोत्तमः मेधावीनामविख्यातोदेवतातिथिपूजकः २ भार्यास्यचंद्रवतीनामगौतमस्यकुलोद्भवा पातिव्रत्यपरानारीपतिशुश्रूषणेरता ३ गृहकर्मसुसंसक्तासर्वदाप्रियभाषिणी कृषिकर्मकरोनित्यंवार्धुषींवृत्तिमाश्रयत् ४ गतेबहुविधेकालेअनपत्यःसुदुःखितः चिंतयापरयाभक्त्यानाकिंचिद्बुबुधेखिले ५ चिंतामग्नस्यतस्याथराजयक्ष्माबभूवह उपायान्विविधान्कृत्वामणिमंत्रौषधादिकान् ६ अथतस्यगलत्कुष्ठरोगःपरमदारुणः प्राणोनिराशतांयातोषष्ठेमासेद्विजोत्तमाः ७ तथाविधंपतिंदृष्ट्वासाध्वीसासचतावुभौ निर्गतौस्वगृहात्तूर्णंगंगातीरमथापतुः ८ तुलसीनांवनंतत्रनिर्मितंस्वबलेनच पतिनासहितातत्रनिनायबहुवासरान् ९ आगतस्त्वथज्येष्ठस्तुसर्वपापप्रणाशनः तस्यानुष्ठानमात्रेणनारदःसमुपागतः १० प्रणम्यविधिवत्तंतु पूजयित्वायथाविधि निवेद्यसकलंतस्मैशोकमोहस्यकारणम् ११ नारदोपिप्रसन्नात्माहितंवचनमब्रवीत् पुराजन्मनिबालोयंब्राह्मणोज्ञानदुर्लभः १२ माहात्म्यंज्येष्ठमासस्यअवमत्यमदोद्धतः जातोवैतेनपापेनरोगग्रस्तोनसंशयः १३

कायस्यसः वृद्ध्याजीवस्तुवार्धुषिरित्यमरः ४ ५ ६ ७ ८ ९ १० तस्मैनारदाय ११ १२ अवमत्य अवमानंकृत्वा तेनकारणेन उद्भूतेनपापेन १३ ६७

१४ १५ १६ १७ १८ १९ २० विसिस्मिरे विस्मयंचक्रुः अलंपर्याप्तंदिवसेकाले २१ २२ २३

तद्दोषपरिहारार्थंशक्रत्विमासव्रतंकुरु गौरीनाम्नातुविख्यातंसुखसौभाग्यदायकम् १४ तथेत्युक्त्वाविशालाक्षीपूजयामासतंविभुं मुनौगतेतुरूभ्योद्यापनंचकारपतिनासह १५ नारदादिष्टमार्गेणभक्तियुक्तेनचेतसा तस्यानुष्ठानमात्रेणमेधावीब्राह्मणोत्तमः १६ शनैःशनैःसमुक्तोभूत्तस्माद्रोगाद्द्विजोत्तमाः उद्यापनंचकाराथपूजनंद्विजतर्पणम् १७ ददौधनानिविप्रेभ्योगोधनानिबहून्यपि भोजयेद्बहुशोविप्रान्पक्वान्नैःपायसैरपि १८ स्वयंचपारणंचक्रेपत्न्याचसहबांधवैः ततःस्वगृहमायातोबंधुभिःपरिचारितः १९ महोत्सवःकृतःसर्वैस्तत्तदापुरवासिभिः वृत्तांतःकथितस्तेषांपृच्छतांपुरवासिनां २० विसिस्मिरेतदासर्वेमाहात्म्यश्रवणादलम् अन्यस्मिन्दिवसेतोतुपुत्रार्थंचमचक्रतुः २१ तस्यप्रभावात्संजातोपुत्रःकामइवापरः जातकर्मचकाराशक्रदद्दौचाश्वसहस्रशः २२ धनवस्त्राण्यलंकारान्विप्रेभ्योऽप्यधिकंददौ विस्मृतास्तद्व्रतंचक्रुस्ततस्तेपुरवासिनः २३ सर्वेपिसुखिनोजाताआधिव्याधिविवर्जिताः तदादिपरमाख्यानिप्राप्तंलोकेमहद्व्रतम् २४ शिवायैकथितंपूर्वंशिवेनप्रभविष्णुना संक्षेपेणमयाख्यातंरहस्यंवरमुत्कटम् २५ स्कंदस्यवचनंश्रुत्वाऋषयःप्रीतमानसाः पुष्पवृष्टिंचक्रुरुच्चैर्जीवजीवेतिचाब्रुवन् २६ स्तुत्वैवंगिरिजापुत्रंसंपूज्यचपृथक्पृथक् पुनरूचुस्तपोनिष्ठामियस्तेहर्षपूरिताः २७ अहोश्रुतानिमासानांमाहात्म्यानिबहून्यपि ज्येष्ठस्यवासरस्यैकतिथिस्तत्तुलनांव्रजेत् २८ विचिंत्येवंततःसर्वेज्येष्ठस्नानार्चनक्रियाम् चक्रुःसर्वप्रयत्नेनयथाविभवसंभवैः २९ इतिभविष्योत्तरपु॰ज्येष्ठमाहात्म्येनवमोऽध्यायः ९

१०

२४ प्रभविष्णुना प्रभवशीलेन २५ २६ २७ २८ २९ इतिटीकायांनवमोऽध्यायः ९ ६२

मासेइति विष्णुनिलये विष्णुस्थाने विष्णुप्रियेइतियावत् १ २ ३ ४ पापानिलक्षयति अदत्तानामिति त्रिभिः तत्रानेन
श्लोकेनकायिकपापस्यलक्षणमुक्तं अदत्तानांअन्येन तवेदमित्यप्रतिश्रुतानां उपादानंग्रहणं चौर्यमित्यर्थः अविधानतः यज्ञादियज्ञकर्माभावे

स्कंदउवाच मासेस्मिन्विष्णुनिलयेकार्यंदशहराव्रतं स्नानंभागीरथीतोयेकार्यंप्रतिपदादिषु १ ऋषयऊचुः कथं
दशहरानामस्नानंप्रतिदिनेकुतः कस्माज्ज्येष्ठेचकर्तव्यंतत्सर्वंविस्तराद्वद २ स्कंदउवाच ज्येष्ठमासिसितपक्षेदशम्यां
बुधहस्तयोः गरानंदेव्यतीपातेकन्याचंद्रेवृषेरवौ ३ दशयोगेनरःस्नात्वासर्वपापैःप्रमुच्यते भुक्त्वाचविविधान्भोगान्त्रं
तेहरिपुरंव्रजेत् ४ अदत्तानामुपादानंहिंसाचैवाविधानतः परदारोपसेवाचकायिकंत्रिविधंस्मृतम् ५ पारुष्यमनृतंचै
वपैशून्यंचापिसर्वशः असंबद्धप्रलापश्चवाङ्मयंस्याच्चतुर्विधं ६ परद्रव्येष्वभिध्यानंमनसानिष्टचिंतनम् वितथाभिनिवे
शश्चमानसंत्रिविधंस्मृत ७ एतानिदशपापानिहरतेदर्शनादिभिः तस्माद्दशहराप्रोक्तामुनिभिःपूर्वदर्शिभिः ८ दश-
जन्मार्जितैःपापैर्ब्रह्महत्यासमैरपि हरतिस्नानमात्रेणतस्माद्दशहरास्मृता ९ गंगांसंपूज्ययत्नेन मंत्रैरेतैःपुरातनैः
नमःशिवायैशांतायैनारायण्यैनमोनमः १० दशपापहरायैचगंगायैतेनमोनमः तत्रैवपूजयेद्देवान्दशसंख्यान्म-
होजसः ११ नारायणंमहेशंचब्रह्माणंभास्करंतथा भागीरथींहिमवंतंस्कंदंचगणनायकम् १२ तथाचंडींचसोमं
चपूजयित्वास्वशक्तितः फलैश्चदशसंख्याकैरर्घ्यान्दत्वापृथक्पृथक् १३ दशदीपांस्ततोदत्वातिलांश्चदशप्रसृतीः गं
गायैसर्वस्वरूपिण्यैमंत्रेणानेनचार्पयेत् १४ तथैवदशसंख्याकान्सक्तुपिंडान्जलेक्षिपेत् गुडपिंडान्ततःक्षिप्त्वादशसंख्या-
न्स्वशक्तितः १५

क्वानृत्यर्थं हिंसा परदारोपसेवा परस्त्रीगमनं ५ वाचिकंपापमाह पारुष्यमिति पारुष्यंकठोरभाषणं अनृतं अ
त्यभाषणं पैशून्यं सूचकता ६ मानसंपापमाह परद्रव्येष्विति स्पष्टं ७ ८ ९ १० ११ १२ १३ १४ १५

१६ १७ १८ १९ दशाश्वमेधिके तत्संज्ञकेतीर्थे २० २१ २२ २३ २४ शुक्ल शुक्लपक्षः २५ इतिटीकायांद॰

मच्छकच्छपमंडूकशिंशुमारादिकांस्ततः कृत्वास्वर्णमयान्शक्त्याराजतानन्यधातुजान् १६ यद्वापिष्टमयान्कृत्वासम
भ्यर्च्यजलेक्षिपेत् ततोदशप्रस्थमितान्तिलान्व्रीहियवान्स्थितान् १७ गावश्चदशसंख्याकाब्राह्मणेभ्योयथाविधि एव
कृत्वाविधानेनवित्तशाठ्यंविवर्जितः १८ तथैवभोजयेद्विप्रान्पक्वान्नैःपायसैरपि दशजन्मार्जितैःपापैर्मुच्यतेनात्रसंशयः
१९ ज्येष्ठमासिसितेपक्षेप्राप्यप्रतिपदांतिथिं दशाश्वमेधिकेस्नात्वामुच्यतेसर्वपातकैः २० एवंसर्वासुतिथिषुक्रमस्ना
यीनरोत्तमः श्रशुक्लपक्षदशमीप्रतिजन्माघनाशिनी २१ लिंगंदशाश्वमेधस्यदृष्ट्वादशहरातिथौ दशजन्मार्जितंपापं
मुच्यतेनात्रसंशयः २२ दशयोगाइतिख्याताःकदाचिद्दैवयोगतः लभ्यतेवानवातत्रज्येष्ठएकोमहत्तरः २३ केवलेपितथा
ज्येष्ठेसर्वयोगविवर्जिते सर्वंतद्धिजानीहिफलंपूर्णमनोरथं २४ यथोडुगणैःसार्द्धंशोभतेसोनिशाकरः तथैवयोग-
संपन्नोज्येष्ठोभामिनितत्वतः एतेशुक्लविनायोगाविफलास्युर्नसंशयः २५ इतिभविष्योत्तरपुं॰ज्येष्ठमाहात्म्ये
दशमोऽध्यायः १० ५ ऋषयऊचुः सर्वयोगाःसमाप्रोक्ताःपुण्यदाःपापहारिणः श्रेष्ठस्तेषांकथंज्येष्ठःक
थयस्वविधानतः १ स्कंदउवाच ज्येष्ठमासिसितेपक्षेदशमीहस्तसंयुता। तस्यांस्वर्गावतीर्णेयंजान्हवीलोकविश्रु
ता २ भगीरथस्यतपसानीतापापविनाशिनी अतःसर्वोत्तमोज्येष्ठोयोगाःसहचरामताः ३ ऋषिरुवाच कस्मा
द्भगीरथोराजाचकारतपउत्तमम् आनीताजान्हवीकस्मात्कुत्रपूर्वंस्थितासती ४

शमोध्यायः १० ५ सर्वेषुमाहात्म्येषुतत्तत्प्रतिपाद्यंवस्तुश्रेष्ठंप्रतिपाद्यते तथैवेदमस्ति उत एतस्यश्रैष्ठ्ये किंचित्कारणांतरम-
स्तीतिपृच्छंति सर्वेइति १ ज्येष्ठस्यश्रेष्ठत्वेकारणांतरमाह ज्येष्ठमासीति २ ३ ४ ५ ६

विकलुषान् निष्पापान् ५ ६ ७ अभ्ररूपिणी उदकरूपिणी ८ ९ १० ११ १२ १३

स्कंदउवाच विष्णोर्नाभिसरोरुहात्कमलभूर्जातोयदानिर्मितुंब्रह्मांडंसकलंकमंडलुधरोवेदांस्तथाचापरैः ह-
स्ताब्जेभुवनत्रयंविकलुषंकर्त्तुंतथापावनंतत्पादांबुतदद्वविश्वजननीगंगातदापावनी ५ कमंडलुसमुद्भूताब्रह्म-
णासहशार्ङ्गिणी नचैवोद्वादितातेनवत्सरैर्बहुभिस्तदा ६ कदाचित्समयेदैत्यैःप्लावितंभुवनत्रयम् तदासेंद्रादि-
देवैस्सपूजितोमधुसूदनः ७ कमंडलुस्थितैस्तोयैःस्नापयामासतद्धरिम् ततस्तच्चरणांभोजाभ्भिःसृताचांबुरू-
पिणी ८ साधृताशंभुनातूर्णंतद्यावद्दृष्टिगोचरा कृत्वाजटानांसुदृढंमालवालंतपोधनाः ९ द्विरूपतासमभवद्गं-
गायाःशिवयोगतः ततःसदेवतावृंदैःप्रार्थितोवृषभध्वजः १० मुक्तवान्स्वजटाभारात्त्वरानद्याःस्वरूपिणी
सास्वर्धुनीसमाख्यातास्वर्गगास्वर्गवासिनी ११ ततोभगीरथोराजातपस्तप्त्वासुदारुणम् आनयामासभूलो-
केपितॄणांमुक्तिहेतवे १२ तत्रशेषादिभिःस्तुत्वानीतापातालगह्वरम् भगीरथेनसानीताततोभागीरथीस्मृता
१३ ततःपीताजह्नुराज्ञामुक्ताश्रोत्रात्तुदक्षिणात् तत्रसाजान्हवीजाताविख्याताजगतीतले १४ यतस्त्रिलोके
वहतिपातिलोकत्रयान्स्वयं अतस्त्रिपथगेत्येवनामाभूज्जगतीतले १५ कमंडलुसमुद्भूताविष्णुपादसमुद्भवा
गंगाहरजटोद्भूतास्वर्धुनीलोकपावनी १६ भागीरथीजान्हवीतित्रिस्रोताभीष्मसूरपि मंदाकिनीभोगवतीतथा
त्रैलोक्यवासिनी १७ एवंनामानिबहुशःशतान्यथसहस्रशः तत्राप्येतानिमुख्यानिगदितानित्रयोदश १८
त्रयोदशैवनामानियेपठंतिदिवानिशम् तेषांभागीरथीतीरेवासएवनसंशयः १९

जान्हवीतिनाम्नःकारणमाह ततइति
१४ १५ १६ १७ १८ एतन्नामपाठस्यफलमाह त्रयोदशेति १९ छ छ

२० २१ प्रयाणकाले अंतकाले अचलेनगंगैकशरणेन २२ अर्कसूनोः यमस्य २३ २४ इतिटीकायांएकादशोऽध्यायः ११

स्नानकालेपठेन्नित्यंगंगास्नानफलंलभेत् एभिर्नामपदैर्नित्यंनमस्कारंप्रकुर्वते २० तेसर्वेपापनिर्मुक्तायांत्यंतेशिव
सन्निधौ २१ प्रयाणकालेमनसाचलेननामैरमूभिः प्रजपंतिमानवाः तेस्वर्गलोकंसमतीत्ययांतिपरंप्रधानपरमस्य
पुंसः २२ एभिस्तथानामपदैर्जलानिसमंत्र्यसिंचंतितथावसाने तानर्कसूनोर्नभयंकथंचित्नकिल्बिषंदुःखलेशो
पिनूनम् २३ अहोमाहात्म्यंगंगायाःकईशःकथनेप्यलम् वक्तव्यंवदनंचेत्स्यामशक्ताइवचापरे २४ इतिभविष्यो
त्तरपु० ज्येष्ठमाहात्म्येएकादशोऽध्यायः ११ छ स्कंदउवाच अधुनाकथयिष्यामिगंगायाश्चकथानकं
राज्ञाभगीरथेनापिआनीतायस्यहेतवे १ शृणुष्वतत्समग्रंचैकत्वाग्रेतत्कृनिखिलम् पुरारविकुलश्रेष्ठोराजापरम्
धार्मिकः २ नीतिज्ञःशास्त्रकुशलःशास्ताशक्रःपुरीमिव औरसानिवपुत्रांश्चमातवसकलंजगत् ४ शतपुत्रैश्चसंयुक्तो
भूत्फणाभिरिवभूधरः सगराइतिविख्याताःसर्वेसमपराक्रमाः ५ बलेनमरुतातुल्याबुद्ध्यावाचस्पतिसमाः शा-
रासनेभीष्मनिभा स्तेजसाभास्करोपमाः ६ सर्वविद्यासुकुशलास्तथाधर्मपरायणाः तैरन्वितोनृपवरं आरेभेस
क्रतुमुत्तमम् ७ अश्वमेधेतिविख्यातंवसिष्ठेनसहायवान् सकल्पविधिवत्कृत्वाउत्ससर्जसवाजिनं ८ अनर्गलंच-
भूषाभिर्बहुभिःपरिशोभितम् अन्यैःसेनाचरैर्वीरैःस्वपुत्रैःपरिवारितम् ९ देशाद्देशांतरंगत्वाभ्रममाणोनिजेच्छ
या यैर्यैराजभिर्विख्यातैर्धृतोसौवाजिनांवरः १० तान्विजित्यस्ववीर्येणमोचिताःशरणागताः एवंसर्वेपिराजानोवसु
धातलवासिनः ११

अधुनेति १ २ ३ ४ भूधरःशेषः फणाभिः यथासंयुक्तः तथाअयंपुत्रैर्युक्तः ५ ६
७ ८ अश्वंवर्णयति अनर्गलमिति नास्तिअर्गलाप्रतिबंधोयस्यतं ९ १० ११ छ

१२ १३ १४ शतमन्युः इंद्रः १५ १६ १७ १८ क्रोधप्रस्फुरिताधरः क्रोधेनप्रस्फुरितः कंपितः अधरः

करभारभरैः क्रांतारासभोष्ट्राश्ववाजिनः गजाश्वशकराश्चापिअयोध्यायांसमाययुः १२ समाप्यविधिवद्यज्ञंऋत्विग्भ्योदक्षि
णांददौ आनीयदशदिग्भिश्चद्रव्यजातंसराष्ट्रजम् १३ सर्वेभ्योविप्रमुख्येभ्योददौकामविवर्जितः एवंक्रतुशतंजज्ञेएकेनर
हितंयदा १४ तदेवचकितोजातः शतमन्युर्दिवस्पतिः किंकरोमिक्कगच्छामित्राताmांभवतीहकः १५ एवंसंचिंत्यमन
सायुद्धायप्रययौतदा देवसैन्यैःपरिवृतोभुवंयातःक्षणाद्धतः १६ सागरैःसहसादृष्टोदेवानामधिपःस्वयम् उद्युक्ताश्चस्वह
रणेआगतास्तेतदंतिकम् १७ नमस्कृत्यसमंवाक्यंऊचुस्तेसगरात्मजाः किमर्थमागतःस्वामिन्निजलोकाच्छचीपते १८
एवंतेषांवचःश्रुत्वाक्रोधप्रस्फुरिताधरः इंद्रउवाच पदंहर्तुंसमुद्युक्ताशाश्वतंममसांप्रतम् १९ चंचकाइवभाषंतोम
धुरंपरमंवचः उक्तास्तेसहसादेवाजघ्नुःपरमसायकान् २० ततःप्रवृत्तंतुमूलंयुद्धंसर्वभयप्रदम् बाणैर्बाणास्तयावीरा
न्शस्त्रैरस्त्रान्यवारयन् २१ ध्वांततत्राभवद्घोरंबाणैर्व्याप्तादिशोदश नबोधःस्वात्मपरयोर्निजघ्नुःसर्वएवते २२ देवा
देवान्हनिष्यंतिसागरान्सगरात्मजाः : एवंनबुबुधेतत्रस्वकीयमथवापरम् २३ देवबाणभयत्रस्तायदासागरवा
हिनी यातादशदिशंप्राणान्रक्षितुंद्विजपुंगवाः २४ सागराःकोपसंतप्तादितिजास्त्रमयोजयन् तद्भयाद्देवनाथंदंप
लायनपरंभवन् २५ इंद्रेकोगजमारूढोसागरास्तेसहस्रशः नेभ्योयोद्धुमशक्तोभूत्पलायनपरोभवत् २६ चिंतयाप
रयाव्याप्तोवास्कृदेवमथाययौ देवराजेगतेयुद्धात्सगरात्मजसैनिकाः २७ समाजग्मुर्निवेशायस्वामिनोगौरवादलम्
दत्वातेषांस्कबहूनिवस्त्राण्याभरणानिच २८

अधरोष्ठोयस्यस १९ परमसायकान् तीक्ष्णबाणान् २० २१ ध्वांतं
अंधकारः २२ हनिष्यंतीत्यत्रजघ्नुरित्यर्थः २३ सागरवाहिनीसगरसेना २४ दितिजास्त्रं दैत्यास्त्रं अहभावश्चार्षः २५ २६ २७ निवेशायशि
बिराय २८

इतिटीकायांद्वादशोऽध्यायः १२ छ निवेद्येतिइंद्रःकथयामासेत्यर्थः भावितंकरणीयंध्यात्वाविचार्य वासुदेवइतिशेषः १ ईशःसमर्थः २
अधुनाकरणीयमुपायमाह इमामितित्रिभिः ३ ४ ५ ६ आद्यंविष्णुं अपृच्छदितिशेषः प्रश्नमेवाह कुत्रास्तिइति ७

इतिश्रीभविष्योत्तरपु॰ ज्येष्ठमाहात्म्येद्वादशोऽध्यायः १२ छ स्कंदउवाच निवेद्यवासुदेवायसर्वसागरचेष्टितं
तं भावितंमनसाध्यात्वाइदंवचनमब्रवीत् १ श्रीभगवानुवाच अहमेवशिवोवापियोऽहंनेशास्तैःसह अतस्ते
कथयिष्यामितत्कुरुष्वयथामति २ इमामदृश्यकरणींविद्यांदास्यामिसुव्रत तांगृहीत्वापुनर्याहिएकोहिनिर्भयः
शुचिः ३ तांजपस्वविधानेनअश्वंधृत्वाप्रयत्नतः कपिलस्यांतिकंगच्छतथैवमनसास्थितम् ४ तत्रैवस्थापयित्वातंहयराजंशुभावहम् ततोगच्छनिजंसद्मस्वकार्यंकुरुपूर्ववत् ५ नोचेत्त्वांतेहनिष्यंतिमयासहनसंशयः इतिवाक्यंभगवतः श्रुत्वास्नात्वाविधानतः ६ अदृश्यकरणींविद्यांजग्राहमधुसूदनात् प्रणम्याद्यंपुनर्यातः कुत्रास्तेकपिलोमुनिः
७ श्रीभगवानुवाच कलिंगपूर्वदिग्भागेवसुधायांगुहांतरे निर्मितंभूगृहंतेनपातालसदृशंमहत् । ८ तत्रास्तेध्यानसंपन्नोकपिलोयमिनांवरः श्रुत्वैवंभगवद्वाक्यंइंद्रोऽप्यागाद्धयांतिकम् ९ जपन्भगवतोदिष्टांविद्यांसुरऋषिदेदत्ताम् गृहीत्वाप्रययौतूर्णंनकोपिबुबुधेतदा १० इंद्रोपिकपिलंदृष्ट्वाएकांतेध्यानसंस्थितः प्रणम्यविधिवत्तत्र बध्वातंहयसत्तमम् ११ इंद्रोपिनगरंप्राप्यचेतसाशंकितोभृशम् गतेहयपतौतत्रमीलिताहयरक्षकाः १२ नृपंनिवेदयामासुःसर्वेज्ञानविमोहिताः क्वगतोकेननीतोवानविद्मोवसुधापते १३ तेषांतद्वचनंश्रुत्वाततःसगरनंदनाः
गतास्तेदशदिग्भागेद्रष्टुंहयपतिंद्विजाः १४

कलिंगेति कलिंगो कलिंगदेशः तत्पूर्वभागे ८ ९ १० ११ शंकितः अग्रेकिं
भविष्यति यत्कृत्यं कृतं तत्सुखं परिणाम्युतदुःखपरिणामिस्यादेतद्विषयेजातशंकः १२ १३ १४ छ

प्रतिग्रहमवलोकने कारणमाह संशयाकुलचित्तैरिति अयंपूर्वयज्ञविघ्नार्थमस्माभिरयुध्यनतः अनेनैवप्राप्योऽश्वस्थापितः इतिसंशयेनाकु
लानिचित्तानियेषांतैः १५ १६ १७ १८ अंतःपुरादीनिंददृशुरितिशेषः १९ भूविदारणेकःप्रेरितवान्तत्राह का

सर्वंमहीतलंदृष्ट्वाद्रष्टुंस्वर्लोकमाययुः नक्षत्रंलोकमासाद्यऐंद्रंपुरमथाविशन् १५ संशयाकुलचित्तैस्तैर्दृष्टंप्रतिगृहंततः एवमिंद्रस्यचा
न्येषांतथैवांतःपुराणिच १६ प्रासादान्सर्वशालांश्चवनान्युपवनानिच दिक्पालानांतथालोकान्ब्रह्मलोकमतःपरं १७ कैलासं
हिमवंतंचतथान्यान्पर्वतान्बहून् मेरोश्चापिगुहाःसर्वाः शिखराणिचसर्वशः १८ गंधर्वयक्षलोकंचविष्णुलोकमतःपरम् एवंस
र्वंसमाक्रांतालोकाःसगरनंदनैः १९ नापश्यंतोहयंतत्रततःपातालमाययुः पातालानिततःसप्त दृष्ट्वैवाशिबिरंययुः
२० ततस्तेदुःखिताःसर्वेत्यक्तुंप्राणान्समुद्यताः भुवंविदारयामासुस्तेसर्वेकालचोदिताः २१ अकस्माद्विवरंलग्नंश
तयोजनविस्तृतम् महेंद्रालयसंकाशंमानवैःपरिवर्जितम् २२ दृष्ट्वातेगह्वरंदिव्यंविविशुश्चसहस्रशः ददृशुस्तेह
यवरंबद्धंकनकदामभिः २३ ततःकपिलनामानमृषिंध्यानपरायणम् मनसासृष्टिसंहारशापानुग्रहकारिणं २४
अविज्ञातप्रभावैस्तैर्दस्युंमत्वाविचक्षणैः अनेनैवहृतोऽस्वोयंध्यानस्थोभूद्भयात्किल २५ मद्भयाद्गृहंकृत्वाऋषिवद्दृ
श्यतेखलः एवंचध्यानयत्नेननेष्यामोनृपसन्निधिम् २६ एवमुक्त्वातुतैःसर्वैःकृतःकोलाहलोमहान् बध्वातंकपिल
जूटेताडयामासुरेवते २७ ध्यानंविसृज्यसमुनिर्यावत्सददृशेऽखिलान् तावन्नेत्राग्निनादग्धाजाताःसगरनंदनाः २८
इतिश्रीभविष्योत्तरपु० ज्येष्ठमासमाहात्म्ये त्रयोदशोऽध्यायः १३ छ ऋषयऊचुः सर्वाभस्मत्वमापन्नासगरस्य·
चसंततिः आरब्धयज्ञोनृपतिः किंचकारषडानन १

लचोदिताः २० २१ २२ २३ कपिलसामर्थ्यंवर्णयति·
मनसेति २४ २५ २६ २७ २८ इतिज्येष्ठमाहात्म्यटीकायांत्रयोदशोऽध्यायः १३ छ १

२ ३ ४ लग्नंखननेनहेतुनाप्राप्तमित्यर्थः ५ बिलधरः बिलस्वामीतैर्नोत्थापितः नप्रबोधितः ६ ७ ८

सैनिकाश्चापिकिंचक्रुस्तत्सर्वंकृपयावद स्कंदउवाच बिलद्वारेस्थितायेचसैनिकाभयविह्वलाः २ बिलाग्निज्वाल
यातप्तानृपंयातानिवेदितुम् सर्वंतेकथयामासुस्त्रैलोक्यविजयादिकम् ३ यदानदृष्टंकुत्रापिहयरत्नंतवात्मजैः त-
दैवखनिताचोर्वीतस्यसर्वस्यबाहुभिः ४ तत्रैवविवरंलग्नंशतयोजनविस्तृतम् तत्रप्रविष्टास्तेसर्वेबहुभिःसैनिकैः
सह ५ नोत्थापितोबिलधरोगतास्तेबहुवासरं तत्रतैःकिंकृतंराजन्नविद्मोद्वारसंस्थिताः ६ अकस्माद्वह्निना-
व्याप्तंबिलंपातालसन्निभम् वयंतज्ज्वालयाव्याप्ताभीतायातानिवेदितुम् ७ कथंतेषांगतिर्जातानजानीमोविमोहि
ताः इतितद्वचनंश्रुत्वावज्राहतइवाचलः ८ शोकेनपतितोभूमौनिश्चेष्टइवतत्क्षणात् अमात्याऋत्विजाःसर्वेहाहाकारं
प्रचक्रमुः ९ उत्थापयित्वानृपतिंवारिभिश्चमुखांबुजम् सिसिचुःसुस्थिरंकृत्वाऊचुस्तेऋत्विगादयः १० माशोचनृ
पशार्दूलसर्वभूतहितेरत शोकंनैवप्रकुर्वंतिपुरुषावीर्यशालिनः ११ भवान्वयंचवीराश्चगच्छामस्तद्बिलांतरे एवंवि
निश्चयंकृत्वायागशेषंसमाप्यच १२ सर्वेविनिर्गताद्रष्टुंतद्बलंतत्पराक्रमम् मार्गंतेदर्शयामासुर्दैवैरपिसुदुष्करम् १३
वसुधायास्तलंसर्वंखातंतत्कुहरावधि ब्रूमोऋषिगणाःसर्वेविद्धिभावंनराधिप १४ इतोगताःसुविस्तीर्णाभविष्यंतिहि
सागराः एवंविवदमानास्तेआगताःकुहरांतिकम् १५ बलंतत्रैवसंस्थाप्यऋषिभिःसहधर्मवित् प्रयतःप्रययौराजाभूप्र
हेपरमाद्भुते १६ तदिंद्रभुवनाकारंरत्नदीपैःसुदीपितम् भूतसंचाररहितंभस्मराशिचयावृतम् १७ पश्यन्पश्यन्श-
नैर्यातस्तस्यर्षेरंतिकंद्विजाः तंदृष्ट्वातेजसाव्याप्तंज्वलंतमिवपावकम् १८

९ १० ११ १२ दर्शयामासुः ददृशु
रित्यर्थः १३ तत्कुहरावधितद्बिलावधि कुहरं शुषिरंविवरंबिलमित्यमरः १४ १५ १६ १७ १८ ६५

१९ २० २१ २२ २३ २४ इतिज्येष्ठमाहात्म्यटीकायांचतुर्दशोऽध्यायः १४ ६९ १ २

जटिलंपरमात्मानंध्यायंतंयोगगोचरम् कपिलेतिचिराद्बुध्वानत्वास्तोतुंप्रचक्रमे १९ राजोवाच जयनित्यपरानं
दजगद्योनिस्वरूपिणे मनसासृष्टिसंहारकारिणेतेनमोनमः २० नमःसत्वगुणाविष्टहरिरूपायतेनमः रजोगुणव
तेतुभ्यंब्रह्मरूपायतेनमः २१ तथातमःस्वरूपायशिवरूपायवैनमः नमोनमस्तेखिललोकवंद्यसुरासुरैरर्चितपा
दपद्म दयानिधेपाहिभवाब्धिमग्नंक्षिपंत्वमामुद्धरभूसुरेंद्र २२ शोकांबुराशौपतितंविशालागाधेतथातीरविव-
र्जितेच महीवमामुद्धरदीनबंधोयतस्त्वमेवादिवराहरूपी २३ स्तुत्वैवंसगरोराजापुनःशोकसमावृतः पपाताचल
वद्भूमौवर्षाकालेतडिद्यथा २४ कपिलोपिचतज्ज्ञात्वाचक्षुरुन्मील्यनिश्चितम् नृपंचर्षिगणान्दृष्ट्वाइदंवचनमब्रवी-
त् २५ इतिश्रीभविष्योत्तरपु॰ज्येष्ठमाहात्म्येचतुर्दशोऽध्यायः १४ ६९ कपिलउवाच केयूयंकुतआ
याताकिमर्थंममसन्निधौ तेऊचुः भगवन्सगरोनामनृपःपरमधार्मिकः १ तवाग्रेपतितश्चायंशोकदुःखसमा
वृतः शृणुष्वकारणंतस्यजातमस्याखिलंतव २ राज्ञाकृताहयमखामहेंद्रोपिजितोरणे पुत्रैःषष्टिसहस्रैश्चबलिभिः
परिवारितः ३ आरब्धेऽथोशतमखेहयंपुत्रशतैर्वृतम् बहुभिःसैनिकैःसार्द्धंमुमोचजगतीतले ४ भ्रममाणेह
येऽकस्मादंतर्द्धानंजगामसः गतेहयपतौवीरादृष्ट्वात्रैलोक्यमाखिलम् ५ उर्वीतलंतदाख्यातंसकलंकुहरावधि
ततस्तेविवरेलग्नेतत्रयातास्तुसर्वशः ६ अग्रिमनैवजानीमोवृत्तांतमृषिसत्तम तेषामन्वेषणार्थायवयंयातास्तवांति
कं ७ तज्ज्ञात्वाकपिलःप्राहज्ञात्वासर्वंसमाधिना शक्रेणेदंकृतंकर्मगूढचर्येंगितेनच ८

बलिभिः बलवत्तरैः शूरैरित्यर्थः ३ ४
आखिलंएतद्बिलपर्यंतंसर्वत्रैलोक्यंदृष्टं ५ ६ ७ गूढचर्येंगितेन गूढाचर्या शरीरव्यापारः इंगितं मनोव्यापारश्च यस्यतेन ८ ६९

९ १० ११ १२ १३ आप्नोति प्राप्स्यति वर्तमानसामीप्ये वर्तमानवद्वा १४ ससत्या साध्वीपतिव्रता १५

मदग्रेस्थापितश्चाश्वः शक्रःस्वभुवमागतः राजानोराजमुख्याश्चसमस्ताहयरक्षकाः ९ दस्युंमामन्यमानास्तेपीडयामासुरन्वहम् ततःक्रोधाग्निनादग्धानमयाबुद्धिपूर्वकम् १० एवमुक्त्वाऋषिवरोक्रोशंतंतंनराधिपं उत्थापयित्वास्वकरैःपरिमाज्यमुखांबुजम् ११ उवाचमधुरंवाक्यंमाभैषीतिद्विजोत्तमाः गच्छवत्सनिजंराज्यंपूर्णस्तवशतक्रतुः १२ भविष्यसिमहेंद्रस्त्वंनिश्चितंमदनुग्रहात् इंद्रस्यदुष्टबुद्धित्वादहल्यायांमतिर्भवेत् १३ गौतमाच्छापमाप्नोति भविष्यतिभगांकितः इतिदत्वावरंतस्यशापंचापिशतक्रतौ १४ पुनरप्याहनृपतिंनतेन्वैवानयःप्रिय नवज्येष्ठस्यपुत्रस्यससत्यास्याद्वरांगना १५ तस्याःपुत्रोभवेन्नूनंशूरःसत्यपराक्रमः भगीरथेतिविख्यातोसवितृकुलभूषणः १६ शस्त्रास्त्रविद्याकुशलोनीतिज्ञःसत्यवान्शुचिः जित्वावसुमतींपूर्णांदुष्करंतपआचरेत् १७ प्रभावात्तस्यतपसःआगमिष्यतिजान्हवी स्वर्गलोकाद्देवसरित्पितॄणांतारणायच १८ तस्यांबुकणिकास्पर्शाद्दिव्यदेहाभवंतिहि त्वयासहगमिष्यंतिवैकुंठंविष्णुमंदिरम् १९ यतोभगीरथेनासाचानीतावसुधातले भागीरथीतिविख्यातामिलितापरमांबुधौ २० इतिश्रुत्वागिरंतस्यकपिलस्यमहात्मनः ऋत्विग्भिःसहितंपूज्यनमस्कृत्याययौपुरम् २१ ततःकष्टेनबहुनानीयमानोदिनेसृति अथैकस्मिन्सुदिवसेप्रसूतासुभगासती २२ पुत्रंबहुगुणोपेतंजयंतमिवचापरम् वसिष्ठेनसमागम्यजातकर्मादिचाकरोत् २३ दत्वादानानिबहुशोगोदानानिबहूनिच तथान्येभ्योद्विजेभ्यश्चवस्त्राणिचधनानिच २४ भगीरथेतितन्नामचकारद्वादशेहनि दिनेदिनेऽथववृधेशुक्लपक्षेयथाशशी २५ १६ १७ १८ १९ २० १५

पूज्य पूजयित्वा ल्यब् आर्षः २१ २२ २३ २४ २५ ६२ ६२

२६ अखिलेष्वसंपूर्णेषु शास्त्रेष्वित्याध्याहारः २७ २८ २९ ३० इतिज्येष्ठमाहात्म्यटीकायांपंचदशोऽध्यायः १५ ६९
अथभगीरथतपश्चर्यांसकारणांप्रस्तौति ततइति १ २ ३ दशवर्षाणिएकपादेनतिष्ठता तोयाहारवता वाय्वाहार चतेत्यत्रापि

ततश्चकारविधिवच्चौलोपनयनक्रियाः वाजीगजरथादीनांविद्याभ्यसनतत्परः २६ कलानामपिसर्वासांकुशलोभून्नृपात्मजः एवंषोडशवर्षार्वाक्जातःपूर्णोखिलेष्वपि २७ दृष्ट्वासर्वगुणैःपूर्णंराज्यधुर्यंमहौजसम् मंत्रिभिःसहसंगम्य ददौराज्यंस्वजन्मने २८ ततःपैतामहंराज्यंलब्ध्वासचभगीरथः पुत्रवत्पालयामाससकलंधरणीतलम् २९ ततः ससगरोराजानिर्वृत्तिंपरमांययौ ३० इतिश्रीभविष्योत्तरपु०ज्येष्ठमासमाहात्म्येपंचदशोऽध्यायः १५ ६९

स्कंदउवाच ततोभगीरथोराजाकृत्वाराज्यमकंटकम् वृत्तंश्रुत्वैवतुस्वपितॄणामुदासीनोबभूवह १ राज्यंदंडंच कोशंचस्थापयित्वापितामहे गृहीत्वाज्ञांययौशीघ्रंतपस्तप्तुंसुदारुणम् २ शिवमुद्दिश्यतपसानिराहारेणतिष्ठता विद्यांपंचाक्षरींनाम जपतास्थिरचेतसा ३ तिष्ठताचैकपादेनदशवर्षाण्यहर्निशम् तोयाहारवतातद्वत् वायोराहारकृत्तथा ४ एवंकृत्वातदातेननीतःकालोयदामहान् तदैवस्वयमायातःसशिवोभक्तवत्सलः ५ वरं दातुंसमायातस्तस्यभक्त्यावशीकृतः शिवंदृष्ट्वाप्रणम्योच्चैर्मधुरंवाक्यमब्रवीत् ६ भगीरथउवाच शिवशंभोनमस्तुभ्यंसर्वेषांसुखदायक नमस्तेजगतांनाथविश्वकर्त्रेनमोस्तुते ७ रजोयुक्तस्वरूपायपालकायनमोनमः सत्वात्मनेचसंहर्त्रेतामसायनमोनमः ८ कर्मणांफलदात्रेचभुक्तिमुक्तिप्रदायच मनोवागगतिरूपायब्रह्मीभूतायतेनमः ९ अंतर्वायुनिरुद्धानांयोगिनांध्यानशालिने निरीहदत्तमोक्षायतन्नमामिसदाशिवम् १०

दशवर्षाणीत्यनुसंबध्नीयं ४ ५ ६ ७ ८ ९ निरीहाय निरिच्छाय दत्तोमोक्षोयेन तस्मै १०

११ १२ १३ प्रसन्नः शिवः गंगानयनकार्यं संसिद्ध्यै व्रतमुपदिशति तदिति १४ १५ १६ १७ १८

शिवउवाच श्रुत्वैवंवरयामासप्रसन्नोहंपुनर्नृप नृपउवाच तुष्टश्चशिवमह्यंत्वंभक्तिंदेहिदृढांतव ११ पितॄ-
णांचविशुद्ध्यर्थंत्वंगंगानयनंकुरु शिवउवाच स्वर्गेतिष्ठतिसागंगानाहमानयितुंक्षमः १२ प्रसन्नंकुरुदेवेशंवि
ष्णुंत्रैलोक्यवंदितम् येनोपायेनतेक्षिप्रंविष्णुःसान्निध्यमेष्यति १३ तदहंतेप्रवक्ष्यामिव्रतंपरमगोपनम् पुरारवि
स्कृतोविष्णुस्तुत्वानत्वाप्रसाद्यतं १४ कृत्वाप्रसन्नंतद्गोप्यंक्रियतामित्ययाचयत् तथेत्युक्त्वाभगवतागोपितंबहुवा
सरम् १५ तदद्यतेप्रवक्ष्यामितत्कुरुष्वविधानतः ज्येष्ठेमासिसमुत्थायस्नात्वाप्रातर्यथाविधि १६ त्रिविक्रमंस
मभ्यर्च्यपंचाग्नींश्चापिसाधयेत् दधिभक्तंब्राह्मणेभ्योजलदानंतथापरम् १७ कुरुष्वैवंमासमात्रंततःप्रीतोभवेद्ध
रिः आनयिष्यतितांगंगांसर्वपापहरांशुभाम् १८ शिवस्यवचनंश्रुत्वातच्चकारभगीरथः तस्यानुष्ठानमात्रेणविष्णुः
सान्निध्यमागतः १९ स्तुत्वानत्वाहरिंप्राहगंगांपरमपावनीं हरिरुवाच याहिभद्रेमयासार्द्धंमंदाकिन्यास्तटेशुभे
२० कुरुतत्रजपंहोमंस्नानंवाद्विजतर्पणम् व्रतंचानशनंतत्रभक्तियुक्तेनचेतसा २१ संवत्सरंकुरुष्वैवंपश्चाद्यास्य
तित्वत्सह विष्णोश्चवचनंतथ्यंमत्वासार्कंजगामसः २२ मंदाकिन्यास्तटेरम्येस्थित्वाह्नंतदनुष्ठितम् चकारपरया
भक्त्यातदातुष्टासरिद्वरा २३ आविर्भूताथतस्याग्रेस्त्रीरूपाचारुलोचना ज्ञात्वातांत्रिपदांगंगांतुष्टावभक्तिपूर्वकं
२४ मंदाकिनीततस्तुष्टावरंब्रूहीतिचाब्रवीत् याहिभद्रेमयासार्कंभूतलेपितृमुक्तये २५ तथेत्युक्त्वाययौतेनसा-
कंसावसुधातले पतिपाभिर्गतासापिदृश्यांजलरूपिणी २६

१९ आनीयतामितिशेषः २० २१ २२ २३ त्रिप-
दां त्रिषुलोकेषुपदंस्थानंयस्यास्तां स्वर्धुनी भागीरथी भोगवतीतिनाम्ना प्रसिद्धामित्यर्थः २४ २५ २६

२७ २८ इतिज्येष्ठमाहात्म्यटीकायांषोडशोऽध्यायः १६ ६९ अथातः एकादश्यादिदिनमाहात्म्यंवर्णयन् व्यासपांडव
संवादमाह ज्येष्ठेत्यादिना १ २ वैष्णवान् वैष्णवधर्मान् ३ सुखोपायेन साध्यमितिशेषः ४ ५ ६ ७ बहु

अवतीर्णावसुमतीलोकानांपावनायच अतःसादशमीपुण्याख्यातादशहरेतिच २७ ततस्तस्याजलैर्दिव्यैःपितरः
प्लाविताद्विजाः दिव्यदेहधराःसर्वेगतास्तेविष्णुमंदिरम् २८ इतिश्रीभविष्योत्तरपु॰ज्येष्ठमासमाहात्म्येषोडशोऽध्या
यः १६ ६९ व्यासउवाच ज्येष्ठमासेनृपश्रेष्ठयाशुक्लैकादशीभवेत् निर्जलंसमुपोष्यात्रजलकुंभान्सशर्क
रान् १ प्रदायविप्रमुख्येभ्योमोदतेविष्णुसन्निधौ युधिष्ठिरउवाच श्रुतामेमानवाधर्मावैदिकाश्चमयाश्रुताः २
द्वैपायनममाद्यत्वंवैष्णवान्वक्तुमर्हसि वेदव्यासउवाच श्रुतायेमानवाधर्मावैदिकाश्चश्रुतास्त्वये ३ कलौयुगेन
शक्यंतेतेवैकर्तुंनराधिप सुखोपायेनयत्किंचिदल्पक्लेशंमहाफलम् ४ पुराणानांचसर्वेषांसारभूतंवदामिते एकाद
श्यांनभुंजीतपक्षयोरुभयोरपि ५ एकादश्यांनभुंक्तेयोनयातिनरकंतुसः व्यासस्यवचनंश्रुत्वाकंपितश्चायमब्रवीत् ६
भीमसेनोमहाबाहुर्भीतोवाक्यमभाषत भीमसेनउवाच पितामहत्वधृशक्तोहमुपवासेकरोमिकिम् ७ ततोबहुफ
लंब्रूहिव्रतमेकमपिप्रभो व्यासउवाच वृषस्थेमिथुनस्थेवाशुक्लाह्येकादशीभवेत् ८ ज्येष्ठमासिप्रयत्नेनसो
पोष्याजलवर्जिता स्नानवाचमनंचैववर्जयित्वोदकंबुधः ९ उपभुंजीतनैवान्नंव्रतभंगोन्यथाभवेत् उदयादुदयंयावद्व
र्जयित्वाजलंबुधः १० अप्रयत्नादवाप्नोतिद्वादशद्वादशीफलम् ततःप्रभातेविमलेद्वादश्यांस्नानमाचरेत् ११ जलं
सुवर्णंदद्याच्चद्विजातिभ्योयथाविधि भुंजीतकृतकृत्यस्तु ब्राह्मणैःसहितोवशी १२

बलंप्रभावः फलमितियावत् यस्यतत्
८ उदकं वर्जयेदितिशेषः ९ द्वादशद्वादशीफलं अत्रद्वादशीशब्दश्चैकादशीपरः १० ११ १२ ६९

१३ १४ १५ १६ १७ १८ १९ २० २१ २२

एवंकृतेतुयत्पुण्यंभीमसेनशृणुष्वतत् संवत्सरस्यमध्येतुएकादश्योभवंत्युत १३ नासांफलमवाप्नोतिक्रमेणात्रनसं
शयः मांकेशवहृषीकेशशंखचक्रगदाधर १४ तस्यव्रतस्ययत्पुण्यंतन्मेप्राप्तंजनार्दन एकादश्यांसितेपक्षेज्येष्ठस्यो
दकवर्जितम् १५ उपोष्यफलमाप्नोतितच्छृणुष्ववृकोदर सर्वतीर्थेषुयत्पुण्यंसर्वदानेषुयत्फलम् १६ सर्वहोमेषुय
त्पुण्यंतदस्याःसमुपोषणात् संवत्सरेणयाश्चास्युःशुक्लाःकृष्णावृकोदर १७ उपोषिताश्चताः सर्वा एकादश्यो
नसंशयः धनधान्यप्रदाःपुण्याः पुत्रारोग्यप्रदास्तथा १८ उपोषितानरव्याघ्रइतिसत्यंब्रवीमिते यमदूतामहाकायाः क
रालाःकृष्णरूपिणः १९ दंडपाशधरारौद्रामरणेदृष्टिगोचरम् नप्रयांतिनरव्याघ्रएकादश्यामुपोषणात् २० पीतां
बरधराःसौम्याश्चक्रहस्तामनोजवाः अंतकालेनयंत्येनंवैष्णवंवैष्णवींपुरीम् २१ तस्मात्सर्वप्रयत्नेनउपोष्याजलव-
र्जिता जलधेनुंतथादत्वासर्वपापैःप्रमुच्यते २२ ज्येष्ठमासिनृपश्रेष्ठयाशुक्लैकादशीशुभा निर्जलंसमुपोष्यात्रंज-
लकुंभान्सशर्करान् २३ प्रदायविप्रवर्येभ्य स्तापत्रयविवर्जितः विष्णुलोकमवाप्नोतिमोदतेविष्णुसन्निधौ २४
इतिश्रीभविष्योत्तरपु॰ज्येष्ठमासमाहात्म्येसप्तदशोऽध्यायः १७ ६९ भीमसेनउवाच यत्त्वयाकथितंतात-
माहात्म्यमपिचाद्भुत प्रतिभातिनमेसत्यंसततंमूढचेतसः १ तस्मात्कथयमेसत्यंत्यक्त्वावात्सल्यभावनाम् नोचे-
न्नाशंगमिष्यामिविदुरस्यवचोयथा २ मंत्रीपुरोहितोवैद्यस्त्रयोयस्यप्रियंवदाः तस्यत्रीणिविनश्यंतिकोशोधर्मःकले
वरम् ३ व्यासउवाच कथितंयन्मयापूर्वंतवसर्वंसमासतः नानृतंतद्विजानीहिसर्वथापवनात्मज ४ २३ २४ इति

ज्येष्ठमासमाहात्म्यटीकायांसप्तदशोऽध्यायः १७ ६९ १ २ विदुरवचनमेवाह मंत्रीति एतेत्रयः यस्यहितोपदेष्टारोनसंतीतिशेषः ३
४

अत्रसंशयनिरासार्थं कथांप्रस्तौति अत्रेति ५ ६ ७ ८ पुरोऽग्रभागे पश्चाद्पृष्टभागे ९ १० प्रेषयामासे-

अत्रतेकथयिष्यामि इतिहासंपुरातनम् विशेषश्रवणादेवसंशयस्तेगमिष्यति ५ पुराकालंजरगिरौपुलिंदोनाम-
विश्रुतः राजासकलधर्मज्ञः कृत्वाराज्यमकंटकम् ६ द्वारावतीसमंतत्र कल्पयित्वापुरंमहत् अनेकरथपत्तीकोगजैरै
रावतोपमैः ७ उच्चैःश्रवःसमैरश्वैर्बहुभिःपरिवारितः निर्गतोजययात्रायैसचिवैरनुमोदितः ८ शतयोजनविस्तीर्णावा
हिनीप्रययौपुरः तस्यपश्चात्तथाभूताच्छादयंतीरसातलम् ९ सप्तव्यूहाययौसेनायथासप्तमहाब्धयः जित्वामांडलि
कावीराराजानोराजसेवकाः १० तेभ्योगृहीत्वाविपुलंकरभारंपुरेनिजे तथैवाजित्वा भूलोकेराज्ञोवैचक्रवर्तिनः ११
यान्यान्सेनापतीन्वीरश्शृणोतिस्मबलीयसः तांस्तान्जित्वारयाद्धत्वापुलिंदोमदगर्वितः १२ एवंपर्यटतस्तस्यचा-
रास्तंन्यवेदयन् आस्तेकःसकलाधीशोराजापरमधार्मिकः १३ श्रुतिस्मृतिपुराणज्ञोदेवतातिथिपूजकः शूरःस
त्यप्रतिज्ञश्चनैवकेनापिनिर्जितः १४ तमनिर्जित्यभूलोकेनतेकीर्तिःकृतोषिणी इतितद्वचनंश्रुत्वापुलिंदोमंत्रिभिः
सह १५ वाहिनीसहितंतूर्णंययौप्राचीनबर्हिषम् नगरंवेष्ट्यपरितःस्थितोसौसैनिकाभृशम् १६ यथावृकगणैरत्य
मेषसंघोवनांतरे ततःकोलाहलोजातःपुरमध्येतपोधनाः १७ राजानंकेचिदाचख्युर्मंत्रिणश्चापरेतथा ज्येष्ठस्यैका
दशीशुक्लाअस्तिचास्मिन्दिनेनृप १८ सर्वेस्नाताःसमुदिताविष्णुपूजारताश्चते परस्परंनचोचुस्तेसर्वेतद्व्रतमान
साः १९ पुलिंदसैनिकाःसर्वेग्रामंप्रविविशुस्तदा विलुंठनपराःसर्वेनकोपितान्यवारयत् २० पुलिंदंतुनमस्कृत्य-
केनापिग्रामवासिना सामवाक्यमुवाचेदंसंयोज्यकरसंपुटम् २१

तिशेषः ११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१

२२ २३ २४ २५ इतिज्येष्ठमासमाहात्म्यटीकायांअष्टादशोऽध्यायः १८ ६२ अथसाहंकारस्यपुलिंद

अद्यैवास्तिनृपश्रेष्ठपुण्यंचैकादशीव्रतम् उपास्यतेनागरिकैराज्ञयानृपतेःखिलैः २२ नाद्याहारोननालापोनहिंसाना
नृतंतथा नैवद्दोषकृतंकर्मक्रियतेप्रभुणासह २३ तस्मात्क्षमध्वंनृपतेअद्यस्वोचदयांकुरु नाहंनृपाज्ञयायातो
वदामितवनिश्चितम् २४ दिनद्वयेत्वयायद्यत्क्रियतेतत्क्षमिष्यंति परश्वःकिंभविष्यंतिकिंनजानामिभोनृप २५
इतिश्रीभविष्योत्तरपु॰ज्येष्ठमासमाहात्म्येअष्टादशोऽध्यायः १८ ६२ व्यासउवाच इतितस्यवचःश्रुत्वापु
लिंदोग्रामवासिनः उवाचतृट्परीतात्मागर्वयुक्तेनचेतसा १ केयमेकादशीनामक्रियतेतत्रकिंव्रतम् मोघंजल्पसि
किंमूढशिवंगच्छनिजालयम् २ नोचेत्त्वांपीडयिष्यंतिदूताःपरमदारुणाः ततस्तेसैनिकाःसर्वेप्रविष्टानगरांतरे ३
भित्वागृहकपाटानिवणिजानांमहात्मनाम् निन्युःसमस्तंसदनात्वस्तुजातंशनैःशनैः ४ तथैवधनिकानांचगृहान्नी
तंमहाधनम् एवंप्रतिगृहंव्याप्तंघोरैश्चापधरैस्तथा ५ कंदमूलफलंतोयंनलब्धंपुरवासिनः एवंचोपोषणंजातं
प्राणिनांजलवर्जितम् ६ गतेस्तंचंडकिरणेबालेपिपयवर्जिते हाहाकारःसमभवत्एकोचैनगरांतरे ७ सयोगीभग
वान्विष्णुर्गोलोकेचकितोभवत् सभ्रांतइवचोत्तस्थौफणींद्रइवसंस्थितः ८ आहूयगरुडंकर्णेशशंससकलंतदा
आरुह्यप्रययौतूर्णंनिर्ममेविविधांचभूम् ९ त्रिनेत्रांसमहस्तांचचतुष्पादांमहाभुजाम् दंतुरांत्रिशिरस्कांचद्विवक्त्रां
दशवक्त्रकां १० षड्वक्त्रांपंचवक्त्रांचगजवक्त्रांगजाकृतिं सिंहाकृतिंमहाघोरांनृसिंहइवभास्करां ११ सिंदूरचर्चितमुखीं
महिषासुरसदृशीं करालांविकरालांचनीलांजनसमप्रभाम् १२

नृपतेर्गर्वपरिहारमाह इतीत्यादिना १ २ ३ ४ ५
६ ७ तंश्रुत्वेतिशेषः सःयोगीभगवान् ८ ९ १० भास्करांप्रदीप्तां भीषणामितियावत् ११ १२

१३ १४ १५ १६ १७ सादिनः अश्वारोहास्तुसादिनइत्यमरः १८ १९ पलायनपराभवन्नि-

ऊर्ध्वकेशींदिग्वसनांनरमुंडधरांतथा अंत्रमालाधरांतद्वद्द्वीपिचर्मपरीवृताम् १३ अदृष्टपूर्वांमनुजैर्ददावाज्ञांतदाविभुः
नृपाधमपुलिंदस्यसबलस्यममाज्ञया १४ नाशंकुरुमयत्नेनयावन्नोदेतिभास्करः इत्याज्ञांशिरसागृह्यप्रविष्टाःपरसैनि-
कान् १५ जघ्नुस्तेशस्त्रसंपातैस्तदाकोलाहलोभवत् केचित्खड्गैश्चनिहताःखट्वांगाभिहतारुषा १६ दशनैर्दशिता-
श्चान्येभक्षिताश्चतयापरे पलायनपरान्वीरान्पादेधृत्वान्यवारयत् १७ एवंपदातयोवीरानिहताभक्षिताःपरे रथा
श्वसादिनोवाहादशनैश्चूर्णिताभृशम् १८ शिबिकानिप्रदग्धानिप्रकाशस्तत्रचाभवत् तदाविसिस्मिरेसर्वेकेयूयंकुत
आगताः १९ नैवतेमानवावीरास्तेःक्षिप्तायत्रकुत्रचित् इतिबुध्वाततःसर्वेपलायनपराभवन् २० दृष्ट्वापलायनपरान्
निजघ्नुःपृष्ठलग्नकाः एवंतेनिहताःसर्वेपुलिंदस्यचसैनिकाः २१ पुलिंदोपिययोयोद्धुंक्रोधाद्विष्णुगणैःसह यामा
र्द्धमकरोद्युद्धंशस्त्रैरस्त्रैश्चदारुणैः २२ नसमर्थोयदायोद्धुंतदास न्यचिंतयत् पलायनमितःकुर्यांवधिष्यंतिनसं-
शयः २३ इतिनिश्चित्यमनसिमेघास्त्रंत्यक्तवान्स्वयम् ध्वांतंतत्राभवद्घोरं ववर्षुश्चघनाघनम् २४ ववुःप्रचंडप
वनास्तदासर्वेविमोहिताः विमूढाःसर्वकार्येषुतस्थिवांसःस्थलेषुते २५ पुलिंदोहयमारुह्यएकाकीस्वपुरंययौ
हतशेषास्तदाकेचित्सैनिकाययुरन्वहम् २६ कृत्वाकार्यंययोस्थानंभगवान्भक्तवत्सलः ततःप्रभातेविमलउत्थि
ताविस्मृताभृशम् २७ नापश्यद्वाहिनीशंत्रोःस्वप्नमेवास्तिनिश्चितम्. ततःस्नानादिकंचक्रुःशरणंहरिवल्लभं २८
पारणांतेबहिर्यातादृष्टंतत्कौतुकंमहत् अनेकानिचप्रेतानिपतितानिरणाजिरे २९ त्यत्रसंधिरार्षः २० पृष्ठलग्नकाइत्यत्रस्वार्थेकः

प्रत्ययः २१ २२ २३ २४ तस्थुरित्तेतस्थिवांसइति २५ २६ २७ स्वप्नएवनिश्चितमास्तिइतिमत्वेतिशेषः २८ २९

इतिज्येष्ठमाहात्म्यटीकायांएकोनविंशोऽध्यायः १९ छ १ २ ३ चमुचरैरत्रन्हस्वआर्षः ४ ५

इतिश्रीभविष्योत्तरपु॰ ज्येष्ठमाहात्म्ये एकोनविंशोऽध्यायः १९ छ ऋषयऊचुः अत्याश्चर्यंत्वयाख्यातंसर्वेषां
मोहनाशनम् माहात्म्यंज्येष्ठमासस्यएकादश्याःप्रभावतः १ तत्साक्षात्परमंब्रह्मयोगिगम्यंसनातनम् आगतःश-
त्रुसंहारंकर्तुंवाचामगोचरम् २ उक्त्वैवंपुनरूचुस्तेव्यासंतंवदतांवरं किंचकारततोराजापुलिंदोदुःखपीडितः ३
व्यासउवाच ततःशोकातुरोराजाकैश्चिच्चमुचरैर्वृतः नृएंस्वपुरमासाद्यनिजदेशाधिपोभवत् ४ तद्वाक्यंमनसाध्या
यन्स्वशत्रुपुरवासिनः एकादश्याःप्रभावंचस्वदृष्टेरपिगोचरम् ५ गतेबहुतिथेकालेचिंतामग्नेनृपोत्तमे आस्थिचर्मा·
वशेषेतुददौराज्यंनिजात्मजे ६ सपत्नीकोवनंयातोचानप्रस्थंचकारसः द्वादशाब्देत्वतिक्रांतेपृच्छमानेतपोधनान्
७ कथमेकादशीनामव्रतंपापप्रणाशनम् दुर्लभंत्रिषुलोकेषुपावनंहरिवल्लभम् ८ अहोतस्यमहाश्चर्यंमयादृष्टेन
संशयः ततःपूर्वभवत्पुण्यंनिश्चयान्मुनिपुंगवः ९ दत्तात्रेयःसमभ्यागात्वरेण्यस्याश्रमेशुभे सर्वेऋषिगणास्तत्र
आगतादर्शनोत्सुकाः १० केचित्पूजास्तचंचक्रुःसेवांचविविधांतथा जगामसोपितच्छ्रुत्वाभीतभीतइवास्थितः ११
गतेषु ऋषिमुख्येषुराजानिकटमाययौ दंडवत्सनितोभूमौविंध्याचलइवापरः १२ उत्तिष्ठोत्तिष्ठकोसित्वंकिमर्थमिह
चागतः वदस्वसकलंमेयत्त्वयिदुःखस्यकारणम् १३ श्रुत्वापिवचनंतस्यनोत्तस्थौभृशदुःखितः ततउत्थापयामास·
स्वकरेणनृपोत्तमम् १४ उवाचनृपशार्दूलोज्ञात्वातस्यातिसौहृदम् पुलिंदोहंनृपश्रेष्ठोविख्यातोजगतीतले १५ जि
त्वाचसकलंतातवसुधामंडलंक्षणात् ततोहंगर्वमासाद्यगतःप्राचीनबर्हिषम् १६ निजात्मजे निजात्मजायेत्यर्थः ६ १९
७ ८ पूर्वभवत् प्राक्तनं ९ १० ११ १२ १३ १४ १५ १६

१७ १८ नजहामि पुरंनत्यजामि इतितदातमवोचमितिशेषः १९ २० २१ २२ २३ शल्यसमान् शरी·
रप्रविष्टबाणाग्रसदृशान् इमान् प्राणान् २४ २५ इतिज्येष्ठमासमाहात्म्यटीकायांविंशोऽध्यायः २० ६ प्रस्तुतंनियम·

पीडितंतस्यनगरंविष्णुभक्तस्यभूभुजः ग्रामवासीनरःकश्चिदागतोममसन्निधौ १७ उवाचेदंवचोमत्यमद्यैवास्तिहरे
र्दिनम् अद्यम्बरखंक्ष्मस्वेतिसर्वेव्रतपरायणाः १८ इतितस्यवचः श्रुत्वामदगर्वेणमोहितः अवमत्यचतद्वाक्यंनजहा
मितद्देनितम् १९ एवमस्तमितेभानौविष्णुमायाविनिर्मिताः दूताःसहस्रशोयोद्धुमागतावयमुत्कटम् २० तैर्भक्षितं
हतंसर्वसैन्यंसागरसन्निभं प्राणशेषावयंयाताःपलाय्यनिजपत्तनम् २१ तदादिभ्रममाणोहंज्ञातुमेकादशीव्रतम्
त्यक्काराज्यंकृतधनंतापसींवृत्तिमास्थितः २२ धन्योहंकृतकृत्योहंपूर्वजाःपुण्यशालिनः यत्दृष्टंभवतःपादपद्मंसुरव
रार्चितम् २३ कथंचैकादशीनामकार्यंव्रतमनुत्तमम् समासेनविधिंब्रूहियतस्त्वांशरणागतः नोचेत्यक्ष्यामिचैप्राणा
नृअहंशल्यसमानिमान् २४ इत्थंवचोवदतितत्रपुलिंदनाथेदत्तात्रयोपिसकलार्थविदंतदानीम् आलिंग्यतंनरपतिं
करुणार्द्रचित्तोऊचेतथाव्रतविधिंमधुसूदनस्य २५ इतिश्रीभविष्योत्तरपु० ज्येष्ठमाहात्म्येविंशोऽध्यायः २० ६
दत्तात्रेयउवाच शृणुराजन्प्रवक्ष्यामितद्व्रतंविधिपूर्वकम् दशम्यांप्रातरुत्थायकृत्वाशौचविधिंनृप १ वर्जयेद्दंत·
काष्ठानिपक्कपर्णैश्चशोधयेत् स्नानंकृत्वामहानद्यांपंचगव्यैःसमंत्रकम् २ कृत्वासंध्यादिकंकर्मशक्लवासागृहंव्रजेत्
गृहीत्वौदुंबुरंपात्रंवारिपूर्णमुदङ्मुखः ३ देशकालंसमुच्चार्यप्रणम्यद्विजपुंगवान् अद्यदेवेशतेभक्त्याकरिष्येव्रतमुत्तमं
४ सिद्धिर्भवतुमेसर्वात्वत्प्रसादाद्रमापते इतिसंकल्पविधिवत्कृत्वानित्यविधिंनृप ५

पूर्वकमेकादशीव्रतंनिरूपयति शृण्वि
त्यादिना १ दंतानितिशेषः २ औदुंबरंपात्रंताम्रमयंपात्रम् ३ ४ ५ ६ ६

पूज्यइत्यत्रल्यप्आर्षः ६ आमिषं जंबीर मसूरगोमहिष्यान्यतमदुग्धादिकं अग्रेपिवक्ष्यतिच ७ अभ्यंजनं अभ्यंगं ८ हरितुल्यभु-
क् हरिः एकादशीतिथिः तत्तुल्यं भुनक्तीतिहरितुल्यभुक् एकादश्यां भोजनाभावाद्दशम्यामपि उपोषणवदल्पभोजनं कर्तव्यमिति भावः ९

विष्णोश्चप्रतिमांपूज्यशालग्रामशिलांतथा उपचारैःषोडशाभिःपूजयेद्भक्तिपूर्वकम् ६ व्यवायंतांबुलं निंदांद्यूतंदु-
ष्टसमागमम् परान्नंचपुनर्भुक्तमामिषंवपनंतथा ७ दशम्यांवर्जयेद्राजन् तैलेनाभ्यंजनंतथा हविष्याद्व्यतिरिक्तंय-
त्तत्सर्वमामिषंस्मृतम् ८ अतःसर्वप्रयत्नेनदशम्यांहरितुल्यभुक् रात्रौजागरणंकृत्वातत्कथाश्रवणादिभिः ९ ततो
ऽरुणोदयेजातेस्नात्वानिर्मलवारिणा पूजागारेसमागम्यनित्यसंध्यादिकंचरेत् १० नकिंचित्चिंतयेच्चित्ते प्राकृतं
नावलोकयेत् सहस्रनामभिर्विष्णोःपूजनंतुलसीदलैः ११ तथासूक्तैःपावमानैरभिषिच्यजनार्दनम् भेषजंचानृतं
स्वापंप्रेक्षणंभाषणंस्त्रियः १२ क्रोधपारुष्यमालापंकाष्ठैर्वादंतधावनम् एकादश्यांविशेषेणवर्ज्यंतुव्रतिभिःसदा
१३ यामेयामेप्रकर्तव्यापूजादेवस्यचक्रिणः अहोरात्रमिदंकार्यंगीतवादित्रनिःस्वनैः १४ ततःप्रभातसमयेयावतीद्वाद
शीभवेत् तावत्यांपारणंकुर्याद्भक्तियुक्तेनचेतसा १५ नोचेत्सर्वस्यपुण्यस्यहानिर्भवतिनिश्चितम् अतःसर्वप्रयत्नेन-
द्वादश्यांपारणंशुभम् १६ कर्तव्यंव्रतिभिर्वत्ससंपूर्णफलसिद्धये पारणाहेबहून्विप्रा न शक्तौद्वादशापिहि १७
पूजयेदुपचारैश्चभोजयेत्पायसैस्तथा आतृप्ते स्तृप्तिपर्यंतंसघृतैःखंडपायसैः १८ भोजयित्वाद्विजान्श्रेष्ठान्स्वयंभुं-
जीतवाग्यतः परान्नस्याशनंमाषंमांसंतैलंस्त्रियंमधु १९ भेषजंमत्सरंहिंसांकांस्यंतांबूलभक्षणम् परान्नंचपुनर्भु-
क्तिंद्वादश्यांवर्जयेत्सदा २० १० ११ १२ १३ १४ १५ १६ १७ १८ परान्नस्यअशनंपरान्नलक्षणमाहजि- २०
ह्वाचपलतोलोभादबंधुष्वन्नवानपि यस्त्वन्नमदश्नाति परान्नमभिधीयत इति १९ परान्नं परेणास्वगृहे आनीय दत्तमन्नं तद्वर्जयेदित्युपलक्ष-

णमेतत्द्रव्यादेरपि २० २१ २२ केवलधान्यसंभवमन्नंनभवतितत्रशातातपः घृतपक्वंपयःपक्वंपक्वंकेवलवन्हिना तदन्नंफल
वद्भाद्यमितिशातातपोब्रवीदिति २३ २४ मेदमत्रसंधिरार्षः २५ २६ २७ २८ २९

द्विनैस्त्रिभिरिदंसाध्यंव्रतानामुत्तमंव्रतम् एकादश्यांनकर्तव्यंभोजनंनृपसत्तम २१ अन्नंतुसर्वथावर्ज्यंभक्षणान्नर
कंत्यजेत् द्रव्यंजलंचलवणंवान्हिनायत्रपच्यते २२ तदेवान्नंभवेत्तत्र नचान्यद्धान्यसंभवम् धान्यंचादंतियेमोहात्सं
प्राप्तेहरिवासरे २३ चांद्रायणशतंकृत्वामुच्यंतेपातकाद्भृशम् इतितेकथितंराजन्यत्पृष्टंचत्वयामम २४ पुलिं
दउवाच त्वयायत्कथितंतात रहस्यंपरमाद्भुतम् अनुष्ठातुमशक्तोऽहंपश्यमेदंकलेवरम् २५ अतस्त्वंकृपया
ब्रूहिसारंसारंयथोदितम् सर्वेषामेवकार्याणांसारमस्तिनसंशयः २६ दत्तात्रेयउवाच कथयामिमहाबाहो
रहस्यंपरमाद्भुतम् यस्यानुष्ठानमात्रेणसफलंसकलंभवेत् २७ शुक्रस्यैकादशीशुक्ला कुरुष्वजलवर्जिता तस्या
नुष्ठानमात्रेणपूर्णंभवतिनिश्चितम् २८ पुलिंदउवाच शुक्रस्यैकादशीशुक्लासाकथंजलवर्जिता दत्तात्रेय
उवाच प्राचीनबर्हिषःपूर्वंसकलंहरिवासरे कृतंजलविहीनंयत्ततःसाजलवर्जिता २९ निर्जलेतिसमाख्याता
स्मरणादघनाशिनी ऋषौयातेपुलिंदोपिचकारविधिपूर्वकम् ३० तस्यानुष्ठानमात्रेणपुण्यस्यातिशयेनच प्रह्ला
दोनामविख्यातोहिरण्यकशिपोःशिशुः ३१ व्यासउवाच एतत्तेकथितंभीमइतिहासंपुरातनम् संशयस्यनिरा
सार्थंकिंपुनःश्रोतुमिच्छसि ३२ भीमसेनउवाच नष्टोमोहःस्मृतिर्लब्धात्वत्प्रसादात्पितामह स्थितोस्मिगतसंदेहः
करिष्येवचनंतव ३३ स्कंदउवाच भीमेनापिकृतंतच्चव्यासेनकथितंयथा सर्वपापविनिर्मुक्तःप्रसादाच्चक्रपाणि
नः ३४ ३० ३१ ३२ ३३ ३४ ६२ ६३ ६१

इतिज्येष्ठमाहात्म्यटीकायामेकविंशोऽध्यायः २१ छ अथवटसावित्रीव्रतंप्रस्तौति अस्येत्यादिना· १ २ ३ ४
वर्षात्मकसावित्रीव्रतविषये भोजननियममाह रात्राविति नित्यं रात्रौ नक्तंवाकुर्वीत भोजनमितिशेषः नक्तलक्षणमाह दिवसस्याष्टमेभागेमं

इतिश्रीभविष्योत्तरपु॰ ज्येष्ठमासमाहात्म्येएकविंशोऽध्यायः २१ छ स्कंदउवाच अस्यैवशुक्लपक्षस्य
त्रयोदश्यादितःशुभम् पौर्णमासीव्रतंकार्यंस्त्रीभिः सौभाग्यवृद्धये १ तत्रैवोपोषणंकार्यंपारणांप्रतिपत्तिथौ ऋषिरुवाच
विधिंब्रूहिमहासेनव्रतस्यास्यषडानन २ स्कंदउवाच ज्येष्ठेमासेतुसंप्राप्तेपौर्णमास्यांपतिव्रता शुचिर्भूत्वावटंसिंचेज्जलैरमृतसन्निभैः
३ सूत्रेणवेष्टयेद्भक्त्यागंधपुष्पाक्षतैःशुभैः नमोवैवस्वतायेतिभ्रमयंतीप्रदक्षिणाम्
४ रात्रौकुर्वीतनक्तंचत्र्यब्दमेकंसमाहिता तथैववटवृक्षंचपक्षेपक्षेप्रपूजयेत् ५ संप्राप्तेचपुनर्ज्येष्ठेएकभुक्तद्वादशींनयेत्
दंतानांधावनंकृत्वानियमंकारयेत्ततः ६ त्रिरात्रंलंघयिष्यामिचतुर्थेदिवसेत्वहं चंद्रायार्घंप्रदत्वा·
चपूजयित्वाचतांसतीम् ७ मिष्टान्नानियथाशक्त्याभोजयित्वाद्विजोत्तमान् भोक्ष्येहंचजगद्धात्रिनिर्विघ्नंकुरुमेशुभे
८ ततोवंशमयंपात्रंसप्तधान्यभृतंचयत् कलशोपरिसंस्थाप्यप्रतिमांवस्त्रसंयुताम् ९ ब्रह्मणासहसावित्रीसौवर्णीप्रतिमांशुभाम्
तथैवयमधर्मस्यकारयेत्पूजयेत्तथा १० न्यग्रोधस्यशुभेमूलेत्रिदिनंतत्रवासयेत् पूर्णायांप्रातरुत्थायस्नात्वामृत्स्नानपूर्वकम्
११ सत्यवंतंचसावित्रींकृत्वास्वर्णमयींतथा पर्यंकेराजतेस्थाप्यकाष्ठभारंतथाकृतं
१२ तथैवयममुद्दिश्यदीपदानंप्रचक्षते ददातियममुद्दिश्यभक्त्यादीपंपतिव्रता १३ साभर्तृसहितासाध्वीसमस्तसुखभागिनी
नारीवाविधवावापिअपुत्रावाकुमारिका १४

दिभूतेदिवाकरे नक्तंतत्त्वविजानीयान्ननक्तंनिशिभोजनमिति ५ ६ ७ २१
८ ९ १० ११ १२ १३ नारीवाइत्यत्रवाशब्दोनिश्चयार्थेवास्याद्विकल्पोपमयोरेवार्थेति समुच्चयइत्यभिधानात् १४

एताभिरितिशेषः १५ १६ १७ त्वयाधृतंव्याप्तमित्यर्थः सत्यव्रतधरः त्वंअर्घ्यंगृहाणेत्यन्वयः १८ १९ २० २१

सभर्तृकासपुत्रावाकार्यंव्रतमिदंशुभम् ॐकारपूर्वकेदेविवीणापुस्तकधारिणि वेदगर्भेनमस्तेस्तुअवैधव्यंप्रयच्छ
मे १५ पतिव्रतेमहाभागेवह्निजायेशुचिस्मिते दृढव्रतेदृढमतेभर्तुश्चप्रियवादिनि १६ अवैधव्यंचसौभाग्यंदेहित्वम
मस्कव्रते पुत्रान्पौत्रांश्चसौख्यञ्चगृहाणार्घ्यंनमोस्तुते १७ त्वयाधृतंजगत्सर्वंसदेवासुरमानुषम् सत्यव्रतधरोदेवब्र-
ह्मरूपनमोस्तुते १८ त्वंकर्मसाक्षीलोकानांशुभाशुभविवेककृत् वैवस्वतगृहाणार्घ्यंधर्मराजनमोस्तुते १९ धर्म-
राजःपितृपतिःसाक्षिभूतस्तुजंतुषु धर्मरूपगृहाणार्घ्यमवैधव्यंप्रयच्छमे २० एवंसांवत्सरंकार्यमशक्तौमासमात्र
कम् तदशक्तौत्रिरात्रंवापूर्णमास्याविशेषतः २१ उपोष्यैवव्रतंकुर्याच्छुचिःस्यान्मासमात्रतः प्रातःस्नानमकृत्वाचज्ये
ष्ठेमासिकुलस्त्रियः २२ नासामवश्यंदौर्भाग्यंकृतेपिचमहाव्रते अशक्तेश्चयथाकर्मसकलंनिष्फलंतथा २३ प्रा
तःस्नानविहीनस्यज्येष्ठकर्मवतांनृणाम् एवंसर्वंसमाख्यातंसावित्र्यास्त्रिदिनव्रतम् २४ ज्येष्ठेज्येष्ठायुताञ्चेत्स्या-
च्छत्रोपानत्प्रदानतः नराधिपत्वमाप्नोतिनियमेननराधिप २५ माहात्म्यंज्येष्ठमासस्यसंक्षेपेणयथोदितम् अग्रेसर्वं
वदिष्यामियुष्मद्भक्तिस्तुतोषितः कथापापहरापुण्यामहाश्चर्यकराहियत् २६ इतिश्रीभविष्योत्तरपु०ज्येष्ठमा
हात्म्येद्वाविंशोऽध्यायः २२ व्यासउवाच शृणुराजन्वरस्त्रीणांमहाभाग्यंयुधिष्ठिर सर्वमेतद्यथाप्राप्तं-
सावित्र्याराजकन्यया १ अस्मिन्दिनेतुधर्मात्माराजापरमधार्मिकः ब्रह्मण्यश्चशरण्यश्चसत्यसंधोजितेंद्रियः २

व्रतंकुर्वंतीतिशेषः २२ २३ २४ प्रस्तुतापौर्णमासीअत्रसंबध्यते २५ ज्येष्ठमासस्येतिशेषः २६ इति-
ज्येष्ठमाहात्म्यटीकायांद्वाविंशोऽध्यायः २२ छ एतद्व्रतविषये इतिहासंप्रस्तौति शृण्वित्यादिना एतत् इदम् १ २

३ ४ ५ सावित्र्याः सावित्रीतुष्टये हुताशनसहस्रंस्थापयामासेतिशेषः ६ ७ ८ ९ १०

यज्वादानपतिर्धीमान्पौरजानपद प्रियः पार्थिवोश्वपतिर्नामसर्वभूतहितेरतः ३ क्षमावाननपत्यश्चसत्यवान्संय
तेंद्रियः अतिक्रांतेनवयसासंतापमुपजग्मिवान् ४ अपत्योत्पादनार्थंचस्तुतेर्नियममाश्रितः कालेपरिमिताहारोब्र
ह्मचारीजितेंद्रियः ५ हुताशनसहस्रंससावित्र्याराजसत्तमः षष्ठेषष्ठेतथाकालेबभूवमितभोजनः ६ एतेननियमे
नाष्टवर्षाण्यथदशैवतु पूर्णेचाष्टादशेवर्षेसावित्रीतुष्टिमभ्यगात् ७ ऋत्विगेकस्तदाराजन्दर्शयामासतंनृपम् अग्नि
होत्रात्समुत्थायहर्षेणमहतान्विता ८ उवाचचैववरदावचनंपार्थिवंतदा सावित्र्युवाच ब्रह्मचर्येणशुद्धेननियमेन
दमेनवा ९ सर्वात्मनाचभक्त्याचतुष्टास्मितवपार्थिव वरंब्रूहिचाश्वपतेमद्रराजयथेप्सितम् १० नप्रमादश्चधर्मे
षुकर्तव्यस्तेकथंचन अश्वपतिरुवाच अपत्यार्थःसमारंभःकृतोधर्मेप्सयामया ११ पुत्रामेबहवोदेविभवे
युःकुलभावनाः तुष्टासियदिमेदेविकाममेनंवृणोम्यहम् १२ संतानंहिपरोधर्मइत्याहुर्मांद्विजातयः सावित्र्युवा
च पूर्वमेवमयाराजन्नभिप्रायमिमंतव १३ ज्ञात्वोक्तःसपुत्रार्थंभगवांस्तेपितामहः प्रसादाच्चैवतस्मात्तेस्वयं
भुविहिताद्भुवि १४ कन्यातेजस्विनीसौम्यक्षिप्रमेवभविष्यति उत्तरंचनतेकिंचिद्व्याहर्तव्यंकथंचन १५ पितामह
हनिसर्गेणतुष्टाह्येतद्ब्रवीमिते तत्तथेतिप्रतिज्ञायसावित्र्यावचनंनृप १६ प्रसादयामासपुनःक्षिप्रमेवंभविष्यति अं
तर्हितायांसावित्र्यांजगामस्वगृहंपुनः १७ स्वराज्यंप्राप्यसप्रीतःप्रजाधर्मेणपालयन् कस्मिंश्चित्तुगतेकालेसरा
जानियतव्रतः १८ ज्येष्ठायांधर्मचारिण्यांमहिष्यांगर्भमादधे राजपुत्र्यांततोगर्भमालंब्यभरतर्षभ १९

११ १२ १३ १४ १५ पितामहनिसर्गेण पितामहमनोभिप्रायेण १६ १७ १८ आलंब्यउदरमा
लंब्य १९

२० २१ २२ २३ २४ २५ २६ २७ २८ २९ निवेद्य:

व्यवर्धताथशुक्लेतुतारापतिरिवांबरे प्राप्तेकालेतुसुषुवेकन्यांराजीवलोचनाम् २० क्रियाश्चतस्यामुदितश्चक्रेतुनृ
पतिस्तदा सावित्र्याप्रीतयादत्तासावित्र्याहुतयापिच २१ सावित्रीत्येवनामास्याश्चक्रुर्विप्रास्तथापिता माविग्रहवती
चश्रीर्व्यवर्धतनृपात्मजा २२ कालेनापिचसाकन्यायौवनस्थाबभूवह तांसुमध्यांचसुश्रोणींप्रतिमांकांचनीमिव २३
प्राप्तेयंदेवकन्येतिदृष्ट्वासंमेनिरेजनाः तांतुपद्मपलाशाक्षींज्वलंतीमिवतेजसा २४ नकश्चिद्वरयामासतेजसाप्रति-
वारितः अथोपोष्यशिरस्नातादेवतान्यभिनम्यसा २५ हुत्वाग्निंविधिवद्विप्रान्वाचयामासपर्वणि ततःसुमनस
स्तेषांप्रतिपूज्यमहात्मनः २६ पितुःसकाशमगमद्देवीश्रीरिवरूपिणी साभिवाद्यपितुःपादौसर्वपूर्वंनिवेद्यच
२७ कृतांजलिर्वरारोहानृपतेःपार्श्वतःस्थिता यौवनस्थांतुतांदृष्ट्वास्वसुतांदेवरूपिणीम् २८ अयाच्यमानांचवरै
र्नृपतिर्दुःखितोऽभवत् राजोवाच पुत्रिप्रदानकालस्तेनकश्चित्त्वांवृणोतितु २९ स्वयमन्विष्यभर्तारंगुणैः
सदृशमात्मनः प्रार्थितःपुरुषोयश्चसंनिवेद्यस्त्वयामम ३० तस्याहंत्वांप्रदास्यामिवरयत्वंयथेप्स्यसि श्रुतंहिधर्म
शास्त्रेषुपठ्यमानंद्विजातिभिः ३१ तथात्वमपिकल्याणिगदतोमेवचःशृणु अप्रदातापितावाच्योवाच्याचानुपयं
श्चापि ३२ गतेभर्तरिपुत्रश्चवाच्योमातुररक्षिता इदमेववचःश्रुत्वाभर्तुरन्वेषणेचरन् ३३ देवानामवमान्यश्चनभवेयंत
थाकुरु स्कंदउवाच एवमुक्त्वाहितंवाक्यंपृष्ट्वावृद्धांश्चमंत्रिणः ३४ व्यादिदेशानुयानाश्चगम्यतांचेत्यचोद-
यत् साभिवाद्यपितुःपादौव्रीडितेवतपस्विनी ३५

कथनीयः ३० ३१ अप्रदाताकन्यादानमकुर्वा-
णः पितावाच्यः निंद्यः अनुपयंती विवाहमकुर्वती कन्यापि वाच्यानिंद्या शेषंस्पष्टं ३२ ३३ ३४ ३५

३६ ३७ दर्शनादिकमितिशेषः ३८ इतिज्येष्ठमाहात्म्यटीकायांत्रयोविंशोऽध्यायः २३ छ कथायोगान्कथासंगतीः
कथासंबंधानित्यर्थः १ २ ३ ४ सासावित्रीउवाचेतिशेषः ५ ६ ७ ८ सःबा

पितुर्वचनमाज्ञायनिर्जगामाविचारितम् साहिसंरथमास्थायस्थविरैःसचिवैर्वृता ३६ तपोवनानिरम्याणिराजर्षी
णांजगामह मान्यानांतत्रवृद्धानांकुर्यात्पादाभिवंदनम् ३७ वनानिक्रमशस्तानिसर्वाण्येवाभिगच्छत एवंसर्वे
षुतीर्थेषुवनोत्सर्गंनृपात्मजा कुर्वतीद्विजमुख्यानांतंतंदेशंजगामह ३८ इतिश्रीभविष्योत्तरपु॰ज्येष्ठमास·
माहात्म्येत्रयोविंशोऽध्यायः २३ छ स्कंदउवाच अथमद्राधिपोराजानारदेनसमागतः उपविष्टःस·
भामध्येकथायोगानभाषत १ ततोभिगम्यतीर्थानिसर्वाण्येवाश्रमाणिच आजगामपुनर्वेश्मसावित्रीमंत्रिभिः
सह २ नारदेनसमासीनंदृष्ट्वासापितरंशुभा उभयोःसापिशिरसाकृत्वापादाभिवंदनम् ३ नारदउवाच
कगताभूत्सुतेयंतेकुतश्चैवागतानृप किमर्थंयुवतीभर्त्रेनवृत्तांसंप्रयच्छसि ४ राजोवाच कार्येणखल्वनेने
वप्रेषितांचैवचागता स्कंदउवाच ततःसाशृणुदेवर्षेभर्तांचाश्रमयावृतः ५ तद्ब्रूहिविस्तरेणेतिपित्रासंचोदि
ताशुभा एवंतस्यैववचनंप्रतिगृह्येदमब्रवीत् ६ सावित्र्युवाच आसीच्छाल्वेषुधर्मात्माक्षत्रियःपृथिवीपतिः
द्युमत्सेनइतिख्यातोदैवादंधोबभूवह ७ विनष्टचक्षुषस्तस्यबालपुत्रस्यधीमतः सामंतेनहृतंराज्यंछिद्रेस्मिन्पूर्ववै
रिणा ८ सबालवत्सयासार्द्धंभार्ययाप्रस्थितोवनं महारण्यंगतश्चापितपस्तेपेमहाव्रतः ९ तस्यपुत्रःपुराजातःसंवृ
द्धस्यतपोवने सत्यवाननुरूपश्चभर्तामेमनसिव्रतः १०

बालवत्सयाबालः वत्सोपुत्रोयस्यातयाभार्ययेत्यर्थः ९ १० छ छ छ

११ १२ १३ अपिप्रश्ने गर्हासमुच्चयप्रश्नशंकासंभावनास्वपीत्यमरः अस्ती शेषः १४ १५ १६ १७

नारदउवाच अहोबतमहत्पापंसावित्र्यानृपतेकृतम् अजानंत्यावृतोभर्तासत्यवान्गुणसंमतः ११ सत्यंवदत्य-
स्यपितासत्यंमाताप्रभाषते ततोस्यब्राह्मणाश्चक्रुर्नामैतत्सत्यवानिति १२ बालस्याश्वाःप्रियायस्यकरोत्यश्वांश्च
मृन्मयान् चित्रेपिचलिखत्यश्वान्चित्राश्वश्चेतिचोच्यते १३ राजोवाच अपिदानीसतेजस्वी बु-
द्ध्यावाचानृपात्मजः क्षमावानपिवाशूरःसत्यवान्पितृवत्सलः १४ नारदउवाच विवस्वानिवतेजस्वीबृहस्पति
समोमतौ महेंद्रइवशूरश्चवसुधेवक्षमान्वितः १५ राजन्नप्यात्मनोदाताब्रह्मण्यश्चापिवीर्यवान् रूपवानप्युदा
रोवाअथवाप्रियदर्शनः १६ सांप्रतरंतिदेवस्यस्वशक्त्यादानतःसमः ब्राह्मणःसत्यवादीचशिबिरौशीनरोयथा १७
ययातिरिवयोदारःसोमवत्प्रियदर्शनः रूपेणसदृशोश्विभ्यांद्युमत्सेनसुतोबली १८ सदांतःसमृदुःशूरःसत्यसंधो
जितेंद्रियः संक्षेपतस्तपोवृद्धैःशीलवृद्धैश्चकथ्यते १९ अश्वपतिरुवाच गुणैरुपेतंसर्वैस्तंभगवान्प्रब्रवीषि
मे दोषानपिचमेब्रूहियदिसंतिहिकेचन नारदउवाच एकएवास्यदोषोस्तिगुणानाक्रम्यतिष्ठति सचदोषः
प्रयत्नेननशक्यमतिवर्तितुम् २१ एकदोषोप्यनन्योस्तिसोद्यप्रभृतिसत्यवान् संवत्सरेणक्षीणायुर्देहत्यागंकरि-
ष्यति २२ अश्वपतिरुवाच एहिसावित्रिगच्छत्वंअन्यंवरयशोभने तस्यदोषोमहानेकोगुणानाक्रम्यवर्तते
२३ यथामांभगवानाहनारदोदेवसंमतः संवत्सरेणसोल्पायुर्देहत्यागंकरिष्यति २४ सावित्र्युवाच सकृ-
ज्जल्पंतिराजानःसकृज्जल्पंतिपंडिताः सकृत्कन्याप्रदीयेतत्रीण्येतानिसकृत्सकृत् २५

योदारः यउदारइतिसंधिरार्षः १८ १९ २० अतिवर्तितु मुल्लंघयितुं २१ अनन्यः मुख्यः २२ २३ २४ २५

बालायुरल्पायुः २६ २७ २८ २९ ३० समुत्सत्य उड्डीनंकृत्वा ३१ इतिज्येष्ठमाहात्म्यटीकायां-

दीर्घायुरथबालायुःसगुणोनिर्गुणोपिवा सकृद्वृत्तोमयाभर्ताद्वितीयंनवृणोम्यहम् २६ मनसानिश्चितंकार्यंततोवाचाविधीयते कर्मणाक्रियतेपश्चात्प्रमाणंमनसस्ततः २७ नारदउवाच स्थिराबुद्धिर्नरश्रेष्ठसावित्र्यादुहितुस्तव नैषाचारयितुंशक्याधर्मादस्मात्कथंचन २८ नान्यस्मिन्पुरुषेयस्यामतिर्भवतिनिश्चितम् प्रदानमेवतस्मान्मेरोचतेदुहितुस्तव २९ राजोवाच अविचार्यमयाप्युक्तंतथ्यंभगवतोवचः करिष्यामितदेवंवैगुरुर्हिभगवान्मम ३० नारदउवाच अविघ्नमस्तुसावित्र्याःप्रदानंदुहितुस्तव एवमुक्त्वासमुत्सत्यनारदस्त्रिदिवंगतः राजापिदुहितुःसर्वंवैवाहिकमथाकरोत् ३१ इतिश्रीभविष्योत्तरपु॰ ज्येष्ठमासमाहात्म्येचतुर्विंशोऽध्यायः२४

स्कंदउवाच ततोवृद्धान्द्विजान्सर्वानृत्विजःसपुरोहितान् समाहूयतिथौपुण्येप्रययौकन्ययासह १ मेधारण्यंसमागत्यद्युमत्सेनाश्रमंनृपः तत्रपश्यन्महात्मानंशाल्यवृक्षसमाश्रितम् २ कौश्यांवृस्यांसमासीनंचक्षुर्हीनंनृपंतदा सराजातस्यराजर्षेःकृत्वापूजांयथाविधि ३ वाचासुनियतोभूत्वाचकारात्मनिवेदनम् तस्यार्घमासनंचैवदत्वावचनमब्रवीत् ४ किमागमनमित्येवमथोराजानमब्रवीत् तस्याःसर्वमभिप्रायमितिकर्तव्यतांपतिम् ५ सत्यवंतंसमुद्दिश्यसर्वमेवन्यवेदयत् सावित्रीनामराजर्षेकन्येयंममशोभना ६ तांस्वधर्मेणधर्मज्ञस्नुषत्वार्थंगृहाणमे द्युमत्सेनउवाच च्युतःस्वराज्याद्वनवासमाश्रितश्चरामिधर्मंनियतातपस्विनम् कथंत्वमर्हावनवासमाश्रमेसहिष्यतेसाशमिमंसुतातव ७

चतुर्विंशोऽध्यायः २४ छ १ २

बृसीव्रतिनामासनम् व्रतिनामासनंबृसीइत्यमरः ३ ४ ५ ६ ७ छ

२४

आगतं अभ्यागतमित्यर्थः ८ भवतःसुतः भार्यार्थीभवतु ९ १० ११ १२ १३ १४ १५ १६

अश्वपतिरुवाच आशांनार्हसिमेहंतुंसौहृदात्सएतस्यच अभितश्चागतंप्रेम्णा प्रत्याख्यातुंनचार्हसि ८ अरू-
पोगुणयुक्तश्चत्वंममाहंतवापिच स्नुषांप्राप्यचमेकन्यांभार्यार्थीभवतःसुतः ९ द्युमत्सेनउवाच पूर्वमेवा-
भिलषितोसंबंधोमेत्वयासह भ्रष्टराज्यस्त्वहमितित्वतएवविचारितम् १० ततःसर्वान्समानीयद्विजानाश्रमवा-
सिनः यथाविधिसमुद्वाहंकारयामासतुर्नृपौ ११ दत्वाचाश्वपतिःकन्यांयथार्हांसपरिच्छदाम् ययौस्वकीयभव-
नंयुक्तःपरमयामुदा १२ सत्यवानपिभार्यांतांलब्ध्वासर्वगुणान्विताम् मुमुदेसापितंलब्ध्वाभर्तारंमनसेप्सितम्
१३ गतेपितरिसर्वाणिन्यस्तान्याभरणानिच जगृहेवल्कलान्येववस्त्रंकाषायमेवच १४ परिचारैर्गुणैश्चैवप्र-
श्रयेणदमेनच सर्वकामक्रियाभिश्चसर्वेषांतुष्टिमावहत् १५ एवंतत्राश्रमेतेषांसदानिवसतांसतां कालस्तुप-
श्यतांकश्चिदत्यक्रामतभोनृप १६ सावित्रीतुशयानापितिष्ठत्यपिदिवानिशम् नारदेनयदुक्तंतद्वाक्यंमनसिधार-
यत् १७ इतिश्रीभविष्योत्तरपु॰ज्येष्ठमाहात्म्यपंचविंशोऽध्यायः २५ छ स्कंदउवाच ततःकाले
बहुतिथेव्यतिक्रांतेकदाचन प्राप्तःसकालस्तद्वाक्याद्यत्रपत्युर्मृतिर्नृप १ प्राप्तःसकालोमर्तव्यंयत्रसत्यव्रता
नृप गणयंत्याचसावित्र्यादिवसांदिवसंप्रति २ यद्वाक्यंनारदेनोक्तंवर्ततेत्हृदिनित्यशः व्रतंत्रिरात्रमुद्दिश्यदिवारा-
त्रंस्थिताभवत् ३ चतुर्थेहनिकर्तव्यमितिसंचिंत्यभामिनी तच्छ्रुत्वानियमंदुःखंबुध्वादुःखान्वितोनृपः ४

१७ इतिज्येष्ठमाहात्म्यटीकायांपंचविंशोऽध्यायः २५ छ तद्वाक्यान्नारदवाक्यात्तेनकथितइत्यर्थः १ २ नारदेनयद्वाक्यमुक्तं-
यच्चहृदिनित्यशः वर्ततेनतदवसरःप्राप्तइत्यर्थः ३ चतुर्थेहनिकर्तव्यंपारणमितिशेषः बुध्वाज्ञात्वादुःखंकष्टसाध्यंनियमम् ४ छ

यस्मिन्दिने भर्तुर्निधनकारणं मृत्युकारणं तद्दिवसंज्ञात्वा ६ अत्रांतरेमरणकालात्पूर्वदिवसत्रयमध्ये त्रिदिनस्यनियमंव्रतंचका
उत्थायवाक्यंसावित्रीमब्रवीत्परिसांत्वयन् द्युमत्सेनउवाच अतितीव्रोयमारंभ स्त्वयारब्धोनृपात्मजे ५ त्र्यहाणां
दिवसानांहिस्थितिं परमदुश्चराम् स्कंदउवाच ज्ञात्वातद्दिवसंविप्रा भर्तुर्निधनकारणम् ६ अत्रांतरेचनियमंत्रि
दिनस्यमनस्विनी अस्मिन्दिनेचमर्तव्यंतदासत्यवतामुने ७ कुठारंसंप्रतिगृह्यपीठकंचैवसुव्रत प्रतस्थेवनवासा
यसावित्रीवाक्यमब्रवीत् ८ नगंतव्यंत्वयाचाद्यममवाक्येनमानद अथवागम्यतेसाधु मयासहवनंव्रज ९ सं
वत्सरंचसंपूर्णमाश्रमेस्मिन्ममप्रभो तद्वनंद्रष्टुमिच्छामिप्रसादंकुरुमेप्रभो १० नाहंस्वतंत्रःसुश्रोणिपृच्छस्वपि
तरौमम ताभ्यांप्रस्थापितागच्छमयासहशुचिस्मिते ११ एवमुक्तातदातेनभर्त्रासाकमलेक्षणा श्वश्रूश्वशुरयोः
पादावभिवाद्येदमब्रवीत् १२ वनंद्रष्टुमिच्छेयंआज्ञामह्यंप्रदीयताम् उवाचवचनंसाध्वीवरमेकंप्रयच्छथ १३
भर्त्रासहवनंगंतुमतित्वरयतेमनः तस्यास्तद्वचनंश्रुत्वाद्युमत्सेनोब्रवीदिदम् १४ व्रतंकृतंत्वयाभद्रेपारणंकुरुसुव्र
ते पारणांतेततोभीरुगंतुंवाथत्वमर्हसि १५ सावित्र्युवाच नियमश्चकृतोस्माकंरात्रौचंद्रोदयेसति जाते
मयाप्रकर्तव्यंभोजनंतातमेशृणु १६ वनदर्शनकामास्मिभर्त्रासहममाधवे नमेतत्रभवेत्ग्लानिर्भर्त्रासहनराधिप
१७ इत्युक्तस्तुतदाराजाद्युमत्सेनोमहीपतिः यत्तेभिलषितंपुत्रितत्कुरुष्वसुमध्यमे १८ नमस्कृत्यतुसावित्री
श्वश्रूश्वशुरयोरपि सहितानृपशार्दूलतेनसत्यवताप्रभो १९ आलोकयंतीभर्तारंतंचकालेमनस्विनी वनंचफलि
तंदृष्ट्वापुष्पितंद्रुमसंकुलं २० रेतिशेषः ७ मरणदिवसवृत्तांतमाह कुठारमिति पीठकंकाष्ठच्छेदनाधारभूतंकाष्ठं ८ ९ १०
११ १२ १३ १४ १५ १६ १७ १८ श्वश्रूश्वशुरयोश्चरणावितिशेषः १९ २० २१

२१ २२ कठिनं काष्टं पाठयामासदारयामास मूलइतिशेषः २३ २४ २५ २६ नस्येउत्संगंददाविति शे-

द्रुमाणांचैवनामानिमृगाणांचैवभामिनी पश्यंतीमृगयूथानिहृदयेनप्रवेपति २१ तत्रगत्वासत्यवान्वैफलान्यादायसत्वरः काष्ठानिचसमादायबबंधभारकंतदा २२ कठिनंपाठयामासकृत्वावृक्षावलोकनम् वटवृक्षस्यसासाध्वीउपविष्टामहासती २३ काष्ठपाटयतस्तस्यजाताशिरसिवेदना ग्लानिश्चमहतीजातागात्राणांवेपथुस्तदा २४ आगत्यवृक्षसामीप्यंसावित्रीमिदमब्रवीत् ग्लानिश्चमहतीजाताशिरस्यपिचवेदना २५ कंटकैर्भिद्यतेभद्रेशिरोमेशूलसंभिनैः उत्संगेतवसुश्रोणिस्वप्तुमिच्छामिसुव्रते २६ तथेत्युक्त्वाविशालाक्षीतस्यमृत्योर्मनस्विनी प्राप्तकालंमन्यमानातस्मैतत्रैवभामिनी २७ सत्यवानपिसश्रमस्तुकृत्वोत्संगेशिरस्तथा तावत्तत्रसमागच्छत्पुरुषःकृष्णपिंगलः २८ इतिश्रीभविष्योत्तरपु॰ ज्येष्ठमासमाहात्म्येषड्विंशोऽध्यायः २६ छ ऋषयऊचुः किंचकारतुसाध्वीसाएकाकीवनसंस्थिता दुःखशोकभयाक्रांताअसहायामनस्विनी १ स्कंदउवाच ज्ञात्वागतासुंधर्मज्ञआगतःस्वयमेवहि जाज्वल्यमानोवपुषाददर्शाथचभामिनी २ उवाचवाक्यंवाक्यज्ञाकस्त्वंलोकेभयंकरः क्षीणायुस्तुवरारोहेभर्तातवमनस्विनी ३ देविदुर्विषहंतेजःसोढुंशक्यंनतेशुभम् इत्यवेहिमहाभागेस्वयमागमनंमम ४ इत्युक्त्वातांवरारोहांतस्यदेहान्महात्मनः अंगुष्ठमात्रंपुरुषंबध्वापाशेनसुस्थिरं ५ विचकर्षततोवेगाद्गृहीत्वाप्रस्थितःपुरीम् सावित्रीतुततःपश्चादनुयातिस्मतंपतिम् ६ यमउवाच निवर्तस्वमहाभागेत्वंदूरंसमुपागता गत्वास्वभवनंशीघ्रंकुरुचैवोर्ध्वदैहिकम् ७

पः २७ २८ इतिज्येष्ठमाहात्म्यटीकायांषड्विंशोऽध्यायः २६ छ १ धर्मज्ञोयमः २ ३ ४ ५ ६ ७

८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८

एवमुक्तातुसातेनप्रत्युवाचयमंतदा सावित्र्युवाच नश्रमोनचमेग्लानिःसकाशात्तवमानद ८ विशेषतश्चभ
र्तुर्मेकुतोग्लानिःसुरेश्वर धर्मेणत्वंपालयसेधर्मेणत्वंविवर्धसे ९ नाफलंदर्शनंयस्मात्सतामुक्तंकदाचन आ
हुःसप्तपदींमैत्रीमितिवेदविदोविदुः १० संतुष्टस्तेनवाक्येनधर्मराजोयमस्तदा वराणामीश्वरोदातावरंतस्यै
दिदेशह ११ चक्षुःप्राप्तिंचसावव्रेश्वश्रूश्वशुरयोस्तदा राज्यप्राप्तिंपितुःपुत्रशतंचैवात्मनस्तथा १२ जीवितंच
तदाभर्तुर्वव्रेतत्रतदाज्ञया प्रदक्षिणंततःकृत्वाधर्मराजायसुव्रता १३ तथेत्युक्त्वाधर्मराजोजगामस्वकमालयम्
सागतावदसान्निध्यंकृत्वोत्संगेशिरस्ततः १४ प्रबुद्धस्तुततोब्रह्मन्सत्यवानिदमब्रवीत् मयास्वप्नंवरारोहे
दृष्टमद्यैवभामिनि १५ नत्सर्वंकथितंतस्यैयद्वृत्तंसर्वमेवतत् तथाचकथितःसर्वःसंवादश्चयमेनहि १६ अ
स्तंगतेततःसूर्येद्युमत्सेनोमहीपतिः पुत्रस्यागमनंकांक्षंस्त्रितश्चेतश्चधावति १७ आश्रमादाश्रमंगच्छन्पुत्रद
र्शनकांक्षया आवयोरंधयोर्यष्टिःक्वगतेतिविनावयोः १८ एवंसविविधंक्रोशन्सपत्नीकोमहीपतिः चकारदुः
खततःसन्पुत्रपुत्रेतिचासकृत् १९ अकस्माद्देवराजेंद्रोलब्धचक्षुर्महेश्वरः तंदृष्ट्वापरमाश्चर्यंचक्षुःप्राप्तिंद्वि
जोत्तमाः २० सांत्वपूर्वंतदावाक्यमूचुस्तेचयथाभृशम् चक्षुःप्राप्त्यामहाराजंसुचिंततेमहामते २१ पुत्रेणच
समंयोगंप्राप्स्यसेनृपसत्तम स्कंदउवाच यावदेवंवदंत्येतेतापसाद्विजसत्तमाः २२ सावित्रीसहितःप्रा
प्तःसत्यवान्द्विजसत्तमाः नमस्कृत्यद्विजान्सर्वान्मातरंपितरंततः २३ सावित्रीचततोब्रह्मन्ववंदेचरणा
विति श्वश्रूश्वशुरयोर्ब्रह्मन्सावित्रीकमलेक्षणा २४

२६

१९ २० २१ २२ २३ २४

२५ २६ २७ २८ २९ ३० अभिषिंचस्व आत्मानमिति शेषः ३१ ३२ ३३

मुनयऊचुः किंतुजानासिसावित्रि कारणंवरवर्णिनि वृद्धस्यचक्षुषःप्राप्तिस्त्वश्वशुरस्यवरानने २५ सावित्र्यु
वाच नजानामिमुनिश्रेष्ठाश्चक्षुषःप्राप्तिकारणम् चिरंकृतस्तुमेभर्तातेनकालव्यतिक्रमः २६ सत्यवानु
वाच अस्याःप्रभावात्संजातंनदृश्यंयत्रकारणम् तत्सर्वंविद्यतेविप्राःसावित्र्यास्तपसःफलम् २७ व्रतस्यैवतु
माहात्म्यंदृष्टमेतन्मयाधुना स्कंदउवाच एवंतुवदतस्तस्यतदासत्यवतःप्रभो पौराःसमागतास्तस्मैआच-
ख्युर्नृपतिर्हतः येनराजन्बलाद्राज्यंहृतंक्रूरेणमंत्रिणा २९ अमात्येनहतःसोपिइतिपौराःसमागताः पौराऊचुः
उत्तिष्ठराजशार्दूलस्त्वंराज्यंपालयप्रभो ३० अभिषिंचैवराजेंद्रपूर्वमंत्रिपुरोहितैः स्कंदउवाच सगत्वाराजशा
र्दूलस्स्वपुरजनसंवृतम् ३१ पितृपैतामहंराज्यंसंप्राप्तंचसमात्मना सावित्रीसत्यवांश्चैवपरांमुदमवापह ३२
जनयामासपुत्राणांशतंचैवबाहुशालिनाम् व्रतस्यैवतुमाहात्म्यात्तस्याःपितुरजायत ३३ पुत्राणांचशतंब्रह्मन्प्र-
सन्नाश्चयमात्तथा एतत्तेकथितंसर्वंव्रतमाहात्म्यमुत्तमम् ३४ क्षीणायुर्जीवितोभर्ताव्रतस्यास्यप्रभावतः कर्त
व्यंसर्वनारीणांअवैधव्यफलप्रदम् ३५ इतिश्रीभविष्योत्तरपु०ज्येष्ठमाहात्म्येसप्तविंशोऽध्यायः २७ छ
स्कंदउवाच पुरवृंदारकोनामब्राह्मणोलोकविश्रुतः वेदशास्त्रपुराणज्ञोधनीचबहुबांधवः १ देवसेनेतिविख्या
ताभार्यारूपगुणान्विता धर्मपत्न्यातयासार्द्धंससुखंचिरमन्वभूत् २ कदाचिज्जरयाव्याप्तःपुत्रहीनःसुदुःखितः
कृत्वाव्रतानिबहुशोदानानिचयथाविधि ३

३४ ३५ इतिज्येष्ठमाससमाहात्म्यटीकायां सप्तविंशो
ऽध्यायः २७ छ ज्येष्ठस्नानमाहात्म्यं प्रतिवक्तुमितिहासं प्रस्तौति पुरेत्यादिना १ २ ३

गहनंदुर्गमंवनंयातइत्यन्वयः ४ ५ ६ ७ ८ ९ १० ११ अंतरि·

नलेभेसंततिंपितृऋणमुक्तिकरीयदा तदैवयातोगहनंप्राणान्दातुंमहद्वनम् ४ सनिद्राहाररहितोविकलोभू
त्तदाद्विजः चतुर्थेदिवसेप्राप्तेमूर्छितःपतितोवने ५ करुणार्द्रोहिभगवान्ज्ञात्वातस्यापिनिश्चितम् द्विजरूपंस
मासाद्यतमुत्थाप्यवचोब्रवीत् ६ ब्राह्मणउवाच कोसित्वंकुतआयातःकिमर्थंत्यजसित्यसून् वाक्यंतदा
र्थवच्छ्रुत्वास्ववृत्तांतंन्यवेदयत् ७ श्रुत्वैवंपुनरूचेतंद्विजरूपीजनार्दनः सखेस्वभवनंगच्छव्रतंकुरुमयोदितम् ८
ज्येष्ठेमासेतुसंप्राप्तेप्रातःस्नानंदिनेदिने कुरुत्वंब्राह्मणश्रेष्ठभानावनुदितेसति ९ कुरुष्वब्रह्मचर्येणहविर्भुग्विजि
तेंद्रियः त्रिविक्रमंसमभ्यर्च्यदधिभक्तंसमर्प्यच १० जलसेकंचवृक्षेषुब्राह्मणानांगृहेगृहे एवंकृतेद्विजश्रेष्ठपुत्रस्त
वभविष्यति ११ उक्त्वैवांतरितोजातःसद्विजोद्भुतदर्शनः तंविष्णुरूपंनिश्चित्यप्रययौस्वगृहंप्रति १२ तेनोक्तंस
कलंकर्तुमुद्यतोभूत्तयासह प्रातःस्नानंकृतवतोनिशामंतेदिनेदिने १३ कदाचिद्दैवयोगेनपुलिनेवृक्षसंकुले श-
रहत्यांमहाघोरं व्याघ्रमेकंददर्शसः १४ बुभुक्षितइवात्यर्थंतस्यांतिकमुपाययौ भयव्याकुलितःसोपिजलपा
त्रमविक्षिपत् १५ तस्यांबुकणिकास्पर्शाद्दिव्यदेहोबभूवह सउवाचप्रसन्नात्माधन्योहंतवदर्शनात् १६ व्या-
घ्रउवाच ब्रह्मन्पुरात्यहंव्याधःकृताहिंसाप्यनेकधा तद्दोषाद्व्याघ्रतांप्राप्तोमुक्तोहंतवदर्शनात् १७ पुण्यंकरोषि
किंभद्रतद्देहिमदनुग्रहात् स्कंदउवाच एवमुक्तस्तदातेनव्याघ्रेणद्विजपुंगवः १८ ददौमासकृतंपुण्यंतेनस्वर्लोकमा-
गतः पुनश्चकारविप्रोपितद्व्रतंमहदद्भुतम् १९ तस्यपुण्यप्रभावेनजातःपुत्रोमहौजसः तदातद्वचनंतथ्यंमुनेब्रह्मकु
लोद्भवः २०

तः अंतर्हितः १२ १३ १४ १५ १६ १७ १८ १९ २०

२१ २२ इतिज्येष्ठमाहात्म्यटीकायामष्टाविंशोऽध्यायः २८ छ अज्ञातकृतज्येष्ठस्नानमाहात्म्यंवर्णयति शृण्वन्त्वित्यादि·

स्कंदउवाच एतत्स्नानस्यमाहात्म्यंकथितंद्विजसत्तमाः यदंबुकणिकास्पर्शान्मुक्तःपरमहिंसकः २१ द्विजोपितनयं
लेभेवैष्णवंविष्णुसन्निभम् पुनःकिंश्रोतुमिच्छावस्तत्सर्वंकथयस्वनः २२ इतिश्रीभविष्यपुराणेज्येष्ठमाहात्म्येऽ
ष्टाविंशोऽध्यायः २८ छ ऋषयऊचुः ज्येष्ठस्नानस्यदानस्यमाहात्म्यश्रवणस्यच फलंविस्तरतोब्रूहिपु
राणंवदतांवर १ स्कंदउवाच शृण्वंतुऋषयःसर्वेज्येष्ठस्नानफलश्रुतिम् यांश्रुत्वामुच्यतेजंतुस्त्रिविधादपिपा
तकात् २ वृषभस्थेसवितरिज्येष्ठस्नानंकरोम्यहम् विप्रेष्टुमात्रस्तुजलेऽघानिविलयंतिनः ३ ज्येष्ठस्नानंप्रक
र्तव्यंयावन्नैवोदितोरविः ज्येष्ठयामार्द्धपर्यंतंउदकेयत्रकुत्रचित् ४ तत्रसर्वाणितीर्थानिगंगादीनिवसंतिहि तावत्
स्नानंप्रकर्तव्यंयावद्यामार्द्धकंभवेत् ५ ततःशपंतिचास्नातान्दैवेनोपहतान्जनान् अतःस्नानंप्रकर्तव्यंज्येष्ठमा
सेनरोत्तमैः ६ ईर्ष्ययाथचलोभाभ्यांसेवयावासमागमात् हठाल्लोकापवादाच्चनिर्मितेनयदृच्छया ७ भीत्या
परवशेनैवकर्तव्यंस्वर्गलिप्सया कलौतुपापबाहुल्यात्ज्येष्ठस्नानंसुदुर्लभम् ८ यमेनगोपितंभीत्याप्रार्थयि
त्वात्रिविक्रमम् विघ्नानिसंभवंतीहस्वल्पपुण्यवतांनृणाम् ९ ऋषयऊचुः यमेनमासमाहात्म्यंगोपितंके
नहेतुना विघ्नानिकुरुतेकस्मात्ज्येष्ठेपुण्यवतांनृणाम् १० एतत्कौतूहलंश्रोतुमिच्छास्त्तद्वदस्वनः स्कंदउ
वाच अत्रार्थेकथयिष्यामिइतिहासंपुरातनम् ११ यच्छ्रुत्वाभवतांगच्छेत्संशयोहृदिसंस्थितः पुरामाहिष्म
तीपुर्यांब्राह्मणःकनकाह्वय १२ सर्वविद्यापरिभ्रष्टोमूर्खोनिंदापरायणः कृषिकर्मकरोनित्यंक्रयविक्रयकारकः १३

यावदध्यायसमाप्ति १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३

अनेकव्यवसायेनकुटुंबोदरपूरकः तथापिनाभवत्तृप्तिःकुटुंबस्यदुरात्मनः १४ जघानपथिकान्मार्गेकुटुंबोद
रपूर्तये तथापिनाभवत्तृप्तिःचौर्यंकुर्वन्द्विजाधमः १५ एवंप्रतिदिनंकुर्वन्माहिष्मत्यांद्विजाधमः कस्मिंश्चित्स
मयेदृष्टोधृतस्तैर्ग्रामवासिभिः १६ बबंधुस्ताडयामासुर्बहिर्निष्कासितःपुरात् उवासकतिचित्कालमरण्येग्राम
सन्निधौ १७ निशायांगृहमागत्यपुनरेववनंययौ अरण्येश्वापदान्हत्वाभक्षयामासनिर्घृणः १८ एवंप्रकुर्वतस्त
स्यकालोबहुतरोगतः कालेनबहुनाराजन्ज्येष्ठमासःसमागतः १९ निशीथेकनकोरण्यादागतःस्वगृहंप्रति
जहारवस्त्रालंकारान्पुनर्गंतुंवनंययौ २० मार्गेददर्शसरितमुत्तीर्यवनमाययौ अज्ञातज्येष्ठमासस्यस्नानजा-
तंद्विजन्मनः २१ प्रत्यहंगहनादेत्यस्तेयेनापादितावस्त्र गृहीत्वावनमायातितदास्नातिदिनेदिने २२ एवंमा-
सोगतस्तस्यस्नानतोज्ञानतःसदा ज्येष्ठेशुक्लचतुर्दश्यांनिशीथेद्विजसत्तमः २३ जहारधनवस्त्राणिबध्वाग्रंथिं
वहिर्ययौ तावत्प्रभातसमयेदृष्टालोकानितस्ततः २४ पलायनपरोभूत्वासरित्तीरमुपाययौ तत्रैवचजनान्
दृष्ट्वापूर्णिमास्नानतत्परान् २५ तस्करेतिवदन्लोकस्तत्पृष्ठेसमुपागतः सोप्यमार्गेणसरितमुत्तर्तुंत्वरयाय-
यौ २६ पृष्ठेकाष्ठैश्चपाषाणैस्ताडयामासतंजनम् दृष्ट्वाशिरसितभारंअगाधेपयसिस्थितः २७ पपातसलि
लेतस्मिन्पंचत्वंसमुपागतः वैकुंठादागतंदिव्यंविमानंसूर्यवर्चसम् २८ किमिदंकिमिदंचेतिविस्मिताःस-
कलाजनाः तत्रस्थैःपुरुषैःकैश्चिद्धृतोनीतोजलाद्बहिः २९ कनकोयंद्विजोत्रस्थोऽस्माभिर्ग्रामाद्बहिःकृतः तल्लक्ष
णान्परमरूपसंप्राप्तःकनकोद्विजः ३०

३१ ३२ ३३ संयमिनीपतिः यमः ३४ ३५ इतिज्येष्ठमाहात्म्यटीकायामेकोनत्रिंशोऽध्यायः २९

तान्विमानात्ततोदूतान्प्रत्यूचुर्दिव्यपूरुषाः ३१ दिव्यपुरुषाऊचुः केनपुण्येनसंप्राप्तंवैकुंठाद्यानमागतम्
दूताऊचुः अज्ञानज्येष्ठमासस्यस्नानेनास्तंसुदुर्लभम् ३२ तच्छ्रुत्वायानमारुह्यवैकुंठभुवनंगतः सरूपतांभग
वतःसंप्राप्तःकनकोद्विजः ३३ तच्छ्रुत्वापरमंदुःखंप्राप्तःसंयमिनीपतिः गोपयामासमाहात्म्यंसंप्रार्थ्यजगतांप
तिम् ३४ इतिवःकथितंविप्राःमासस्नानफलंशुभम् ३५ इतिश्रीभविष्योत्तरपु० ज्येष्ठमासमाहात्म्येएको
नत्रिंशोऽध्यायः २९ छ स्कंदउवाच शृण्वंतुऋषयःसर्वेमाहात्म्यस्यचयत्फलम् प्राप्यतेपुंभिः
शुकस्यनतत्क्रतुशतैरपि १ सर्वदानेषुयत्पुण्यंसर्वतीर्थेषुयत्फलम् यत्फलंजपयज्ञेनमाहात्म्यश्रवणेनतत्
२ माहात्म्यंसकलंशृण्वन्नपुनर्जन्मभाग्भवेत् समग्रंवातदर्द्धंवातदर्द्धंवातदर्धकम् ३ अध्यायंवातदर्धं
वाश्लोकंश्लोकार्द्धमेववा यःशृणोतिनरोभक्त्यातस्यपुण्यमनंतकम् ४ श्रेयांसिबहुविघ्नानिस्वल्पपुण्यवतां
द्विजाः तस्मात्पुण्यंप्रकर्तव्यंनरैर्विघ्नोपशांतये ५ यदिविघ्नंसमापन्नंस्नानेश्रवणकर्मणि नत्याज्यंतद्विघ्नभ
यात्पुण्यंकर्मचकारयेत् ६ विघ्नानिनाशमायांतिअसकृत्पुण्यकर्मणा बहूनिसंतिपुण्यानिकलौचोक्तानि
यानिच ७ तेषुश्रेष्ठतमंप्रोक्तंपुराणश्रवणंकलौ गोघ्नःस्त्रीघ्नःकृतघ्नश्चब्रह्मघ्नःपितृघातकः ८ मातृहामद्यपी
कुष्ठीस्तेयीविश्वासघातकः तेसर्वेप्रतिमुच्यंतेपुराणश्रवणात्कलौ ९

अथास्मिन्नध्याये माहात्म्यश्रवणफलंप्र·
स्तौति शृण्वंतत्यादिना १ २ ३ ४ ५ ६ ७ ८ ९

१० ११ १२ १३ अत्रार्थेइतिहासमाहष्ट १४ १५ लेभेइतिपूर्वान्वयि नकिंचनलेभेइति कुटुंबवाहा

पुराणश्रवणंकार्यंबालवृद्धातुरैरपि निष्कामैश्चसकामैश्चउत्तमाधममध्यमैः १० पुराणश्रवणंकार्यंस्त्रीशूद्रैःप
तितैरपि तत्तत्फलमवाप्नोतियथामनसिनिश्चितम् ११ अकामेनसकामेनआस्थयावाप्यनास्थया स्पर्धयाकप
टेनापिनिस्पृहेणस्पृहावता १२ पुराणश्रवणेनैवप्राप्नुवंतिमनोरथान् अभक्त्याश्रवणेनापिपापनिष्ठोदिवंगतः
१३ अत्रार्थेकथयिष्यामिकथांपापप्रणाशिनीम् द्वारावत्यांपुराकश्चिद्देवशर्माद्विजाधमः १४ ब्रह्मकर्मपरिभ्र
ष्टः सर्वदाप्रेतकर्मकृत् सर्वदादुष्टकर्माणिचकारापिनकिंचन १५ लेभेकुटुंबवाहार्थंदस्युवृत्तिंचकारसः तस्मि
न्पुरवरेरम्येबहवोवत्सरागताः १६ अथतद्दैवयोगेनमासःशुक्रःसमागतः तत्रनागरिकाःसर्वेशुक्रस्नानार्थमुद्यताः
१७ बलिपूजांसमागृह्यगोमत्यांययुरन्वहम् तत्रस्नात्वाजपंकृत्वाययुस्तेविष्णुमंदिरम् १८ ततःसर्वेसमागम्य
व्यासंकृत्वाद्विजोत्तमम् पूजयित्वायथाशक्त्यावस्त्रालंकरणादिभिः १९ माहात्म्यश्रवणंतस्मात्कुर्युर्ज्येष्ठस्य
सादरम् एवंयामद्वयंतत्रस्थित्वापश्चान्निजालयम् २० जग्मुर्दिनेषुगच्छत्सुकेषुचित्सद्विजाधमः स्तेयंकर्तुं
समुद्युक्तःसोपियातोनिरंतरम् २१ गूढस्थानसमायुक्तःकिंन्वेयमितिचिंतयन् नलेभेवत्सरंतत्रगतास्तेबहवोवास
राः २२ अद्यश्वोवाहरिष्यामिवस्त्राण्याभरणानिच एवंचिंतयमानस्यआगतापूर्णिमाशुभा २३ तस्यांसमु
त्सुकाःसर्वेकृत्वास्नानादिकाःक्रियाः तथापुराणश्रवणंकृत्वाव्यासस्यपूजनम् २४ वस्त्रालंकरणैर्द्रव्यैः
फलैस्तांबूलसंयुतैः तद्द्वारमभवत्तत्रदृष्ट्वादस्युर्व्यचिंतयत् २५

र्थेकुटुंबपूरणार्थे १६ १७ १८ १९ २० २१ २२ २३ २४ २५

२६ २७ २८ २९ ३० ३१ ३२ ३३

अद्याहंघातयिष्यामिव्यासंतद्द्रविणेच्छया अस्यसर्वंहरिष्यामिममेदंदैवचोदितम् २६ इतिनिश्चित्यम
नसिस्वयंतत्रसमागतः पौराणिकंसमभ्यर्च्यदंडवत्पतितोभुवि २७ अकिंचनोस्म्यहंविप्रदत्तंतवकले
वरम् दासोहमितिमांमत्वासेवांगृह्ययथासुखम् २८ सर्वेभ्योप्यधिकांभक्तिंदर्शयामासकृत्रिमाम्
ततोविनिर्गताःसर्वेयातेस्तंतिग्मतेजसि २९ तत्रावशिष्टोप्येकाकीधूर्तःपौराणिकस्तथा ततःपौराणिको
राजन्समाकृष्यइतस्ततः ३० ग्रंथिंबध्वाददौतस्यमस्तकेसुदृढतराम् तयानग्नशिराजातोहृष्यमा-
णोमुहुर्मुहुः ३१ एवंविनिर्गतौतौतुमार्गेदुष्टोव्यचिंतयत् ततोसौह्रदमार्गेणतेनसाकंययौशनैः ३२
ह्रदेबहुजनाकीर्णेपलायनपरोभवत् तदैवप्रसरन्मार्गेकूपेनिरुदकेपतत् ३३ नापश्यत्तंयदाविप्रोतदे
वाकुलितोभृशम् कोलाहलकृतस्तेनसर्वेतत्रसमागताः ३४ अहोतेनैवदुष्टेनहृतंसर्वाखिलंमम
दुष्टोहंमंदबुद्धिश्चविश्वस्तोहंकथंजनाः ३५ अविज्ञातप्रबंधेचविश्वसंतिनराधमाः मद्वत्तेनाशमायांति
विडालेमूषकोयथा ३६ ६९ ६९ ६९ ६९ ६९

३४ ३५ ३६ ६९ ६९ ६९ ६९

३७ ३८ ३९ ४० ४१ ४२ ४३

एवंतद्वचनंश्रुत्वापौराराजानमब्रुवन् राजाभृत्यान्समाहूयइदंवचनमब्रवीत् ३७ पुरद्वारेषुकी
लानिसर्वैस्थित्वाइतस्ततः बाह्यमभ्यंतरेचैव अंतस्थबाह्यमेवच ३८ नयात्येवंविधंकार्यंदस्योश्चा
न्वेषणंतथा ततःसमुदितेभानौचौरान्वेषणतत्पराः ३९ कूपांतेददृशुःकेचित्केचिद्राजानमू
चिरे कूपान्निष्काशितस्तूर्णंप्राणशेषोनृपाज्ञया ४० ददौसर्वंद्विजेंद्रायसोपिप्राणान्मुमोचह
दिव्यदेहधरोभूत्वाविमानवरमास्थितः ४१ तान्पौरान्प्रणनामाशुअयंभवदनुग्रहः तत·
स्तेविस्मिताःसर्वेमहिमानंप्रतुष्टुवुः ४२ सोपिवैकुंठनिलयंमाहात्म्यश्रवणाद्ययौ स्कंदउ
वाच एतन्मयानिगदितंमाहात्म्यंतवविस्तरात् ४३ पुराणश्रवणस्यापिअभक्तस्यापिमा
यिनः किंपुनर्भक्तिभावेनशृण्वतांभाग्यमुत्तमम् येनकुर्वंतिवैमोहात्स्वशक्त्याव्यासपूजनम्
४४ दारिद्र्यरोगसंयुक्तास्तेभवंतिभवेभवे पुराणंयेनशृण्वंतिनपश्यंतित्रिविक्रमम् ४५ नेमूका
बधिराश्चांधाःपंगवश्चनसंशयः एवंश्रुत्वास्कंदमुखात्प्रीणंतस्तेद्विजोत्तमाः ४६ ६९

३०

४४ ४५ एवंश्रुत्वेतिसूत्तोक्तिः ४६ ६९ ६९ ६९ ६९

४७ ४८ इतिश्रीभविष्योत्तरपुराणेज्येष्ठमासमाहात्म्यटीकायांत्रिंशोध्यायः ३० ६२

वर्षत्तः पुष्पवर्षाभिः षडास्यंनंदनोद्भवैः ननृतुश्चापरेकेचित् पुपूजुश्चोपचारकैः ४७ श्रुत्वाप्रमुदिताः सर्वेमाहात्म्यंज्येष्ठसंभवम् सूतंप्रपृच्छुस्तेसर्वेमाहात्म्यंचपुनः शुचेः ४८ इतिश्रीभविष्योत्तरपुराणेज्येष्ठमासमाहात्म्येस्कंदऋषिसंवादेफलश्रुतिवर्णनंनाम त्रिंशोऽध्यायः ३० ६२

इतिश्रीव्यंकटरामात्मजहरिकृष्णविनिर्मितेबृहज्ज्योतिषार्णवे अष्टमेधर्मस्कंधेचतुर्थेमासमाहात्म्यस्तबकेज्येष्ठमासमाहात्म्यकथनंनामतृतीयंमाहात्म्यंसंपूर्णम् ३ ६२ श्रीगोपालकृष्णोजयति श्रीसीतारामचंद्रार्पणमस्तु श्रीरस्तु शुभम्

श्रीगोपालकृष्णोजयति· श्रीसीतारामचंद्रोजयति श्रीरस्तुशुभम् श्रीर्जयति

यह ज्येष्ठमाहात्म्य मुंबईमें पंडित श्रीधर शिवलालके प्रज्ञायुक्त नाम ज्ञानसागर छापखानामें छाप्यो फाल्गुनशुक्ल ११ सौम्यवार· संवत् १९४४ शाके १८०९ तारीख २२ माहेफेब्रूवारी सन१८८८ ई०

इतिश्रीमासस्तबकेज्येष्ठमासमाहात्म्यंसंपूर्णम्

अथाषाढमासमाहात्म्यं प्रारभ्यते.

बृ·ज्यो·र्ण·
धर्मस्कंध·
१३२


शंकर·
षण्मुख
ब्रह्मदेव·
स्त्री·
नारद
पितृगण·
तापीनदी
ब्रा०
ब्राह्मण
तापी
नदी·
नहुषराजा·
वसिष्ठ
धनंजय
कामरूपेश्वर
मृग
ब्राह्म·
भिल्ल·
पंक्रीत·
स्वरक्रीत·
लांगल·
स्त्रीश्वा हक

मासस्त· अं०
आषाढ मा०
चित्र

अथ आषाढमाहात्म्यस्य विषयानुक्रमणिका·

अध्याय·	विषयः
१	कार्तिकेयस्य शंकरंप्रति आषाढमाहात्म्यविषये प्रश्नः कार्तिकेयेनपृष्टस्य· शंकरस्य आषाढमाहात्म्यप्रस्तावपूर्विका उक्तिः तत्प्रसंगात् तापीमाहात्म्यकथनं ताप्यवमानितायाभागीरथ्या ब्रह्मसमीपेगमनम् श्लोकाः २६
२	ब्रह्मण आदेशान्नारदकृतस्तापीमाहात्म्यापहारः तज्जन्यपातकेन नारदस्याज्ञानप्राप्तिः नारदस्य ब्रह्मसमीपेगमनं स्ववृत्तकथनंच, ब्रह्मकृता तापीस्तुतिः तथाप्रसन्नया ताप्याकृता नारदाज्ञाननिवृत्तिः, आषाढमासे तवमाहात्म्यमतीवस्यादिति ब्रह्मदत्तस्तापीप्रतिवरः श्लोकाः २६
३	आषाढमासेतापीस्नान माहात्म्यकथनं तत्प्रसंगेन एकस्य वणिजःकथा· तापीजले मग्नोत्थितस्य वणिजः अंगलग्नजलबिंदुस्पर्शात्तत्पितृमुक्तिः श्लोकाः १६
४	ममैतेपितर इत्यजानतो वणिजः स्वपितॄन्प्रति केयूयमित्यादिप्रश्नः पृष्टानां तेषां स्ववृत्तकथनम्· श्लोकाः २१
५	कथाप्रसंगेन वणिक्पितृभिःकृतो ब्राह्मणकथाप्रस्तावः श्लोकाः ३३
६	प्रस्तुत ब्राह्मणस्या आषाढमासे तापीप्रति गमनं, कालयोगात् तत्पुत्रस्यापि तत्रागमनं पुत्रदत्तात् आषाढस्नानपुण्यात् ब्राह्मणस्योद्धारः
७	अस्माकमयं पुत्रइत्यजानतां पितॄणांपुत्रंप्रतिकस्त्वमित्यादिप्रश्नः वणिक्कृतं स्ववृत्तकथनं· तेन आषाढस्नानपुण्यं दत्वा पूतानां तेषामुत्तमलोकप्राप्तिः श्लोकाः ११
८	आषाढमासे तापीस्नानं केनविधिनाकार्य इत्यादिः कार्तिकेयंकृतः शंकरप्रतिप्रश्नः पृष्टेनशंकरेणकृतं आषाढमाहात्म्यादिकथनं श्लोकाः ४३
९	आषाढमासे गोदानादि माहात्म्य कथनं· श्लोकाः २२
१०	गृहादिदान माहात्म्यकथनम्· श्लोकाः २३
११	आषाढ मासे तापीस्नानमाहात्म्यवर्णनं त[illegible]येनहुषराज कथारंभः श्लोकाः १७
१२	पूर्वारब्ध नहुषराजकथाप्रसंगेन शतबलिराजेतिहासकथनं द्वादशाध्यायमारभ्य एकोनविंशोध्यायसमाप्ति पर्यंतं· तत्र पुनःपुनः तापी·

अथ आषाढमाहात्म्यस्य विषयानुक्रमणिका·

अध्याय·	विषय·
	स्नान माहात्म्यकथनम् क्रमेण श्लोकाः १९। ४४। २१। २०। ४०। २१। २८। २५
२०	तापीस्नानमाहात्म्यकथन प्रसंगेन पक्षक्रीत खरक्रीताख्यान कथनम्· श्लोकाः २९
२१	पूर्वाख्याख्यानकथनम्· तस्मिन् ताप्यां श्राद्धपिंडदानादि माहात्म्यकथनम् चतुर्विंशाध्यायसमाप्तिपर्यंत क्रमेण श्लोकाः ३४। २७। ३२। ४५
२५	आषाढे तापीमाहात्म्यकथन प्रसंगेन लांगलवर्धनेतिहासकथनम्· पंचविंशाध्यायमारभ्य एकोनत्रिंशाध्याय पर्यंतं· एकोनत्रिंशाध्याये आषाढमाहात्म्यकथा संपूर्तिश्च क्रमेण श्लोकाः १५। ४१। २२। २१। ३०

इति आषाढमाहात्म्यानुक्रमणिकास॰

इति आषाढमाहात्म्यस्य विषयानुक्रमणिका समाप्ता·

श्रीगणेशायनमः श्रीसरस्वत्यैनमः श्रीगोपालकृष्णायनमः नारायणंनमस्कृत्यनरंचैवनरोत्तमम् देवींसरस्वतींव्यासंत
तोजयमुदीरयेत् १ स्कंदउवाच संतितापीतटेयानितीर्थान्यत्रमहांत्यपि श्रुतानितानिसर्वाणिसर्वपापहराणिच
१ अधुनाश्रोतुमिच्छामियदाषाढफलंलभेत् तापसस्नानकर्तॄणांतत्तातनिखिलंवद २ आषाढस्नानमहिमाकस्मा-
दत्रविशिष्यते सरःसिंधुषुसर्वास्तुस्नानंगर्ह्यंततःकिल ३ रजस्वलाभवेयुस्तावर्षास्तुऋषयोवदन् तत्स्नायीतनवैता-
स्तुयावत्सावृद्व्रजेदिति ४ एवंमेसंशयंतातछेत्तुमर्हस्यशेषतः निषिद्धेषुप्रवृत्तायासाकथंसंशयोमहान् ५ ईश्वर
उवाच महाप्रभावागंगाद्यामहानद्योयतःस्मृताः स्वप्रभावस्त्वसामर्थ्याद्दोषोरजःकृतःस्मृतः ६ शृणुवत्सत्वया-
पृष्टंसर्वंतत्कथयामिते रजस्वलात्वदोषोऽस्तिनदीस्वत्रनसंशयः ७ महानदीषुनपुनरेषदोषःकथंचन क्षुद्रायास्तास्तुदो-
षोयंनिश्चितंसमुदाहृतः ८ तावन्महानदीतापीसूर्यपुत्रीगुणाधिका पुण्योदकापापहंत्रीरजोदोषःकथंत्विह ९ कृता-
दोशश्चिमासेतुजन्मैतस्यायतोऽभवत् जन्ममासेततःस्नानंतस्याःपापनिषूदनम् १० किलाभूद्देवसरितःस्पर्धासुयंज
यासह पावित्र्यगुणतःसापिगंगायाश्चाधिकाभवत् ११ ब्रह्महाब्राह्मणःकश्चिज्ज्ञात्वागंगांसमागतः विवर्णकालव
दनश्चांडालसमरूपधृक् १२ श्रुत्वातुतापीमाहात्म्यंसतुतापींसमागतः त्रिदिनस्नानमात्रेणतस्यचांडालतागता १३
ततःसर्वैस्तुमुनिभिस्तापिन्येवसमाश्रिता जन्हुकन्यापरित्यज्यस्तुवद्भिःसूर्यजांमुहुः १४ ततोगंगाजगामाशुपिता-
महनिवेशनम् रुदतीगद्गदंदीनाविवर्णाक्षीकृताकृतिः १५ ततःस्वयंभुवापृष्टाकस्माद्दीनासिजान्हवि कथंरोदिषि
चैदुःखमेतत्कस्मात्त्वयिस्थितम् १६ श्रीगंगोवाच तातताप्नीनामनदीसूर्यपुत्रीहिविश्रुता तयासर्वाःस्रवंत्योहि
जिताःपावित्र्यगर्वतः १७ तस्यास्तुस्नानमात्रेणपापिष्ठाअपिमानवाः कर्मबंधान्परित्यज्यमुक्तास्तेनात्रसंशयः १८ ए
वंविधप्रभावोत्र कस्याःसिंधोर्नदृश्यते यादृशःसवितुःपुत्र्यास्तयाहंचस्वभावतः १९ निर्जितायोमयिस्नातोमानवः

---

१ नदीषु

स्वर्गमाप्नुयात् मोक्ष्यतेरविजास्नानाद्दृष्टामत्तोऽधिकामया २० पूर्वाम्नातंयन्मदर्थेकापिस्रोतस्विनीनहि सर्वासामपिना
माहंत्वत्प्रसादात्पितामह २१ अद्यमेयन्महत्त्वंतत्तयासर्वंपराहृतम् सर्वासांसैवज्येष्ठाभूद्भूयसींमान्यतामगात् २२
स्थापिताहंत्वयाताततनदीनांज्येष्ठतापदे सात्वन्यथाकृतिश्चक्रेतपत्यासुतयारवेः २३ स्वपराभवतोऊनंमामाहंभगव-
न्निह त्वंसृष्टेस्तुयथाब्रह्मन्नन्यथाकुरुमाकिल २४ गंगायास्तद्वचःश्रुत्वाब्रह्माकोपवशंययौ आहूयनारदंप्राह मा-
हात्म्यंह्रियतांत्वया २५ निर्माहात्म्यायथातापीलोकेभवतिनारद तथात्वयाविधातव्यंनात्रकार्याविचारणा २६
इतिश्रीस्कंदपुराणेआषाढमासमाहात्म्येप्रथमोऽध्यायः १ ६७ ईश्वरउवाच ततोजहारसमुनिस्तापीमा
हात्म्यमादितः यद्गीतंमुनिभिःसर्वमनुभूतमनेकधा १ तस्यापहारपापाच्चसोऽज्ञानोनारदोऽभवत् आचख्यौ-
ब्रह्मणेगत्वामाहात्म्यंतन्हृतंयथा २ खस्यचाज्ञानयुक्तत्वंमाहात्म्यहरणात्ततः किंकरोमीतिकथयममज्ञानंकथंभ
वेत् ३ अज्ञानान्मरणंश्लाघ्यंपुरुषस्यजगद्गुरो उपार्जयतिपापानीत्यज्ञानान्नःश्रुतंकिल ४ किंकरोतिकुलेजन्म
किंकरोतिकुतोधनम् यद्यज्ञानंभवेत्पुंसस्तेनसर्वंविनश्यति ५ अज्ञानयुक्तःपुरुषोदिवसेदिवसेकिल दुर्योजय-
तियेनात्रदेशेकालेनमुच्यते ६ निर्धनोपिवरंज्ञानीकुलहीनोऽपिनावरम् ज्ञानीसर्वमवाप्नोतिलब्धमज्ञानतोव्रजेत्
७ तदाचराम्यद्ययेनज्ञानमत्तभवेन्मम उपायःकोस्तिदेवेशयेनाज्ञानंव्रजेन्मम ८ ततःप्रजापतिस्तापींप्रशशंसा
शुसादरम् येनसूर्यसुतादेवीपरितोषंजगामह ९ महाप्रभावात्वंतापिप्रभावःकेनहन्यते त्वदीयोयंचसर्वासांनदी
नामाधिकोभवत् १० यस्यसूर्यस्यकिरणैःपुनातिभुवनत्रयम् यत्पादस्पर्शमात्रेणयांतितीर्थानियोग्यताम् ११
तस्यत्वंदुहितानामतत्पावित्र्यंकिमुच्यते स्पृष्टानित्वत्पितुःपादैरन्यासांसरितांकिल १२ जलानियांतिपावित्र्यंत्व-

---

१ परितप्ता॰ २ अविधिनाकर्मकारयति॰

यार्किं विवदेदिह जगत्तमोपहारित्वंव्रतंयस्यानिरंतरम् १३ तत्तुत्रीस्नानकर्तॄणांतमोहंतिकिमद्भुतम् इतिप्रशंसिता
तापीब्रह्मणामुदिताभवत् १४ तत्रागत्यततोवाक्यंब्रह्माणमिदमब्रवीत् ताप्युवाच पितामहकिमर्थंत्वंप्रशंससि
निगद्यताम् १५ प्रशंसामत्प्रतिष्ठावाजानेयंपरमेश्वर धन्याहत्रिजगत्पूज्यात्वयाहंचप्रशंसिता १६ ब्रह्मोवा
च नदीज्येष्ठाचतपतिमयागंगापुराकृता त्वन्माहिम्नापराभूतानदीयंदीनतामगात् १७ आगतामत्समीपेतुनार
देनाप्यहारयंम् महिमानंतवगुरुंततोस्याज्ञानमाव्रजत् १८ अनुगृण्हीष्वमद्वाक्यान्नारदंमुनिसत्तमम् गंगायामहिमानंच
एतद्याचेमहानदि १९ तपत्युवाच त्वत्प्रार्थनाकथंवंध्याप्राणायावत्करोम्यहम् पुनःप्राणागताःश्रेष्ठंनपुनर्मानखंडनम्
२० प्राणाविनश्वरालोकेमहिमात्वविनश्वरः ईश्वरउवाच विचार्यचततस्तापीब्रह्माणंसमभाषत
२१ नारदस्यपुनर्ज्ञानंमत्प्रसादाद्भविष्यति तस्याःप्रसादंसंप्राप्यव्यवस्थांसमयाचत ब्रह्मोवाच तापियोमहिमा
लोकेसर्वदातेभवत्पुरा २२ असंशयंसमहिमातवाषाढेभविष्यति यंयंकामंविचिंत्येहआषाढेयेनिमज्जनम् २३
करिष्यंतिहितेषांचससकामोभविष्यति स्वर्गार्थीप्राप्नुयात्स्वर्गंमोक्षार्थीमोक्षमाप्नुयात् २४ अन्यद्यद्दुर्लभंलोकेत
दाषाढेभविष्यति गंगापिसरितांमध्येज्येष्ठत्वंलभतांपुनः २५ अन्याश्चसरितःसर्वायथास्वमहिमोत्कटाः भवंतु
त्रिजगच्छ्रेष्ठाःपूर्वमेवप्रसादिताः २६ इतिश्रीस्कंदपुराणेआषाढमासमाहात्म्येद्वितीयोऽध्यायः २ छ
ईश्वरउवाच ताप्यदुष्टमनाःसर्वंमनुतेस्माविधेर्वचः तदारभ्यशुचौस्नानंतपत्यांपापनाशनम् १ ब्रह्मणोवरदानाच्च
समीहितफलप्रदम् सूर्यजायांशुचौस्नानंदेवानामपिदुर्लभम् २ किंपुनर्मानवानांचविनाभाग्यंनलभ्यते
यत्पुनःस्नानकर्तॄणांपापिनामपिनाकदम् ३ यैस्तुचीर्णंतेमनुजाःसर्वपापविवर्जिताः विमानवरमारूढाअप्सरोगण
सेविताः ४ अतेतुस्वर्गसंप्राप्ताःपूज्यंतेत्रिदिवैरपि स्वर्गदंभोगदंचैवमुक्तिदंमुक्तिमिच्छताम् ५ आषाढस्नानतो-

नास्तिपरंपापस्यभेषजम् नरकस्थादिवंयांतिस्वर्गस्थामोक्षगामिनः ६ पितरस्तस्यसंतुष्टाआषाढेस्नातियोनरः मा-
घस्नानाद्दशगुणमाषाढस्नानजंफलम् ७ दंभेनापिकृतंयैस्तु तेपिस्वर्गमितोगताः घर्माकुलितदेहोऽपियःस्नातितप-
तीजले ८ आषाढेपुरुषस्तस्यमाघस्नानफलंभवेत् आस्तिकश्चिद्वणिक्पूर्वंसर्वधर्मबहिष्कृतः ९ जैनधर्मपरोनित्यं
वेदवादपराङ्मुखः पितृपितामहाद्यास्तुतस्यमूकत्वमागताः १० पाखंडविहिताचारान्महत्कष्टमुपागताः कदाचि-
द्दशवाणिज्योनिर्गतोलाभकारणात् ११ विक्रेयवस्तुक्रीत्वाचसार्थेनमहतायुतः स्वसार्थसंयुतस्ताप्याःशच्चोप्राप्तो
महाजलम् १२ तस्माद्दूयेनोत्तरतोविपर्येतिस्मतत्तदा वस्तुतापीजलेमग्नंवणिक्मग्नोऽभवत्तदा उन्मज्यचततः
शीघ्रमुडुपेचावलंबितः तटंताप्याःपरेचैवनिर्गतश्चवणिग्जलात् १४ तस्यदेहाच्युतंवारिपीत्वामूकास्तुपूर्वजाः ता-
पीजलप्रभावेनमूकत्वंविजहुःक्षणात् १५ वणिजस्तुदर्शनस्याश्चस्तुवंश्चपुनःपुनः वत्सधन्यावयंयेषांत्वसत्पुत्रो
भवत्किल १६ येनकष्टान्मूकभावान्मोचिताहेलयावयम् १७ इतिश्रीस्कंदपुराणेआषाढमासमाहात्म्येतृ-
तीयोऽध्यायः ३ छ ईश्वरउवाच इतितेषांवचःश्रुत्वाहृष्टात्क्षणावणिजःकृती पप्रच्छविषयाविष्टो
भीतस्तद्दर्शनाद्वणिक् १ केयूयंकथमत्रस्थामूकत्वान्मोचिताःकथम् आख्यात सर्वमेतन्मेविस्मयोयमहान्हृदि
२ तच्छ्रुत्वातेप्यवोचंश्चवयंतुतवपूर्वजाः वेदमार्गपरित्यागान्मूकाःप्रेतत्वमागताः ३ अस्यामकामात्स्नातस्यपी-
त्वातेदेहान्निःसृतम् वितृष्णागतपापाश्चत्वत्प्रसादाच्चवाग्मिनः ४ तापीजलप्रभावोऽयंश्रुतोजातश्चसांप्रतम् य-
न्नीरजलपातेनप्राप्यतेपरमागतिः ५ दुर्गतेभेषजंनास्तिशच्चिस्नानमृतेभुवि वेदमार्गात्परोमार्गोनाभूच्चनभविष्य-
ति ६ यमाश्रित्यनरानैवदुर्गतियांतिकर्हिचित् येषामंतेश्रुतिप्रोक्तावृषोत्सर्गादिसत्क्रियाः ७ क्रियंतेदारुणातेषां
दुर्गतित्वंकथंभवेत् तएवशोच्याजगतिनैवेषांवैदिकीःक्रियाः ८ यस्यैतानिनदत्तानिप्रेतश्राद्धानिषोडश प्रेतत्वंनि-

लंतस्यश्राद्धैरन्यैःकृतैस्तुकिम् ९ एकादशाहेसंप्राप्तेयस्यचोत्सृज्यतेवृषः प्रेतत्वंनैवतस्यास्तिपुण्याँल्लोकानवाप्नुयात्
१० येचश्रुतिक्रियाव्रात्याःपाखंडधर्ममाश्रिताः पराङ्मुखाविष्णुभक्तौतेनरादेवदांडिनः ११ वेदक्रियाविनानास्तिलो-
केत्वस्मिन्परत्रच सौख्यंतस्मात्तदासेव्यंवेदकर्मनरोत्तमैः १२ तस्मात्तातत्वयात्याज्योवेदधर्मोनकर्हिचित् यमा-
श्रित्यनरश्रेष्ठलभतेपरमांगतिं १३ जीवद्भिर्बहुधावादाःक्रियंतेऽत्रयदृच्छया मृतैस्तुयमदूतानांहस्तस्थत्वेनदुष्कराः
१४ निमग्नंतत्रयद्वस्तुतस्यशोकंचमाकृथाः संपदोविपदश्चापिदैवायत्तायतःस्मृताः १५ यदकस्माद्भवेयुस्ताविं
शत्यस्तमचिंतिताः तस्माद्धर्षश्चशोकश्चनकार्यस्तत्समुद्भवः १६ अत्रास्थित्वाकुरुस्नानंपंचरात्रमथाह्नः आरभ्यै
कादशींयावत्पौर्णमासींसमाहितः १७ तत्पुण्यंदेहिनोवत्सयेनमुक्तिंलभेमहि एवंतवापिकल्माषंभवितानात्र
संशयः १८ अस्माकंपश्यतामेवकंचिद्विप्रस्त्वमोचयत् आषाढेपंचदिवसस्नानपुण्येनतत्कृतः १९ प्रेतभावान्म
हाघोरान्मुक्तःसतुमहोदरात् वापीतटंनदारभ्यभजामोदूरतःस्थिताः २० लभामहेनचस्पर्शमन्यानपिजलाशयान्
तस्मात्तृषार्त्ताःसर्वत्रभ्रमामःकृतपापकाः २१ इतिश्रीस्कंदपुराणेआषाढमासमाहात्म्येचतुर्थोऽध्यायः ४

ईश्वरउवाच इतितद्वचनंश्रुत्वावणिक्पुत्रोभ्यभाषत कोऽयंभवद्भिःकथितोब्राह्मणःप्रेततामितः १ केनकर्म
विपाकेनसघोरांप्रेततामियात् कथंतस्यसुतेनात्रमोचितस्तन्निगद्यताम् २ एतांविचित्रापरकथांश्रोतुंकौतूहलंमम तस्यै
वंवचनंश्रुत्वाप्रोचुस्तेपूर्वजास्ततः ३ अस्माकंशृण्वतांवत्सक्षुत्तृषापीडितात्मनाम् मूकानांसोपिविप्रश्चमिलितश्च
स्तुदुःखितः ४ शूचीमुखोमहानध्वक्षुत्तृषाविह्वलोभृशम् अस्माभिःसंज्ञयापृष्टःकस्येदंकर्मणःफलम् ५
विप्रउवाच विप्रोगुर्जरदेशीयोनाम्नावेदश्रवाअहम् मिथ्यावादीत्वनाचारीआसंलोभपरायणः ६ मूर्खःकांश्चि-
न्मंत्रवाङ्मीलोकानामग्रतःपुनः चतुर्वेदोऽहमित्येवमाहिताग्निरितिब्रुवन् ७ लोभान्मोहान्मयाकारिनिषिद्धान्न

१ निष्पापंमनइतिशेषः

प्रतिग्रहः अभोज्यानांगृहेभुक्तंद्रव्यलोभादनेकधा ८ गृहेषुरजकादीनांपितृदेवक्रियाःकृताः तदन्नैश्चकृतावृत्ति
स्तदन्नेष्टिषुयाजनम् ९ तथाप्रतिग्रहाघोरामहिषाद्याःकृतामया तथाऽशून्यानिवर्षाणिनत्तानिप्रतिगृण्हता १०
नदत्तंनहुतंकिंचित्पर्वकालउपस्थिते नभोजितामयाविप्राःकालेश्राद्धंकृतंनच ११ प्रायश्चित्तंनव्यधायिउषसिचरविंन-
तिः न्यायार्जितंधनंकिंचिन्नार्जितंकुप्रतिग्रहैः १२ नात्मानंशोधयामासपतितःपापकर्दमे कालांतरेणार्पितंतद
युक्तेनमयापुनः १३ द्विगुणेत्रिगुणेजातेतस्मिन्वित्तेऽतिहर्षितः नाज्ञासिषंकस्यवित्तंप्रातमृत्युर्भविष्यति १४ या-
दृशःपुरुषाल्लोकेमतिस्तस्यचतादृशी पौनःपुन्येनपापानांमतिःपापेप्रवर्तते १५ कस्यार्थेक्रियतेपापंनैवंबुद्ध्याभिव
र्तते लुब्धानामतिलोभेषुकामिनांकाम्यवस्तुषु १६ महतीवर्ततेबुद्धिर्नैवयावत्सजीवति परलोकंततःप्राप्ताभुंजा-
नःपापकर्मणाम् १७ फलान्यनुतपन्नेवनेहज्ञानमजायत इहज्ञानंयदिभवेत्प्रायश्चित्तेकृतेपुनः १८ बाधतेनैवत-
त्तापमेवमाहुर्मनीषिणः ब्रह्महत्यादिपापानामनोनिष्कृतयःकृताः १९ आत्मनीतैस्कृतत्पुंभिर्ज्ञाताज्ञातस्यवैपुनः
प्रायश्चित्तंप्रकर्तव्यंपरत्रात्मविशुद्धये २० नकृतंयन्मयाकिंचिन्मोहाविष्टेनचेतसा पापेनोपार्जितंवित्तंगतंचिंताभव-
त्पुनः २१ तदर्जनेयद्भवतितत्पापंशिरसिस्थितम् ततोविषादोयोजातःसर्वाशिवनिषूदनः २२ ततोमृत्युवशंप्राप्तो
गृहीतोयमकिंकरैः पर्यालोच्ययमेनाहंपातितोनरकांबुधौ २३ तत्रमेपीड्यमानस्यनिष्कृपैर्यमकिंकरैः घटिकाब्द-
सहस्रस्यतुल्यावैसमजायत २४ पात्यमानस्यमेजातावर्षाणांपंचविंशतिः ततोजिगमिषुर्दृष्ट्वाप्रयागेसार्थमुत्तमम्
२५ माघस्नानंविकुर्वंतंमहानद्याश्चसंगमे मत्पुत्रोपिययौतेनवेणींसार्थेनसंगतः २६ माघस्नानंततःकृत्वापुण्यं
मह्यमदात्त तस्यपुण्यप्रभावेननरकान्निर्गतःपुनः २७ घोरंप्रेतत्वमापन्नःसूच्यास्यश्चमहोदरः जलाशयाःसु
बहुशःसंतिचान्येपदेपदे २८ शुचिःसीतोदकानद्यःसरांसिविविधानिच तृषार्तःक्वापिनलभेचैकामप्युदकांजलिम्

५

॥२९॥ विप्रोच्छिष्टानिभूतेभ्यःसतिलान्नानिसर्वतः सिक्थमेकंनचाप्नोमिक्षुधार्तःसर्वतोभयात् ३० कदाचिदपिकिंचिच्च ल
भेन्नंवाजलंयदि सूचीमुखस्याहरतःपिबतोनमहोदरम् ३१ ममपूर्येतवर्षाणांशतेनापिकथंचन क्षुत्तृषाव्याप्तदेहोहंन-
सुखंप्राप्नुयांक्षणम् ३२ प्रेतत्वेवर्तमानस्यवर्षद्वादशकंगतम् इतिवःसर्वंकथितम्मयाप्रेतत्वकारणम् ३३ इतिश्रीस्कं
दपुराणेआषाढमाहात्म्येपंचमोऽध्यायः ५ ६ द्विजउवाच दिगंबरामलाश्लिष्टाअस्थिमात्रशरीरकाः मूकामुं
डाश्चलंबोष्ठादंतुराश्चभयानकाः १ इमामवस्थांसंप्राप्ताविपाकात्कस्यकर्मणः तन्मेनिगद्यतांसर्वंममात्रास्तिकुतूहलम्
२ ईश्वरउवाच इतितेनद्विजेनोक्तामूकवद्वक्तुमुद्यताः संज्ञयाज्ञापितंसर्वंयत्कृतंपूर्वजन्मनि ३ लंघनंवेदमार्गस्य-
पाखंडस्यानुवर्तनम् नपिंडदानंनस्नानंनपितॄणांचतर्पणम् ४ नपूजानचसत्कारोद्विजानांचकृतःक्वचित् तेनैतांकुदशां
प्राप्ताःकर्मभोग्यांसुदारुणाम् ५ समानदुःखाःस्वकर्मभिथएवप्रमादिनः अन्वगच्छामतेसर्वेऽप्यन्यजन्मजलार्थिनः
६ सार्थोजगामतपतींवयंतुदूरतःस्थिताः तस्यसार्थस्यमध्यस्थोद्विजपुत्रःसमाययौ ७ तेनतत्रकृतंस्नानमाषाढेतप
तीजले यथावन्मासमेकंतुतस्यांतेभोजिताद्विजाः ८ तदनुज्ञामितिप्राप्यस्नानंसंपूर्णमस्तुते कृत्वाषाढफलंपित्रेददौ
ब्राह्मणसन्निधौ ९ आषाढस्यफलेदत्तेप्रेतदेहंचतत्क्षणात् त्यक्त्वाथदेहोदिव्योभूद्विमानवरमास्थितः १० उवाचपुत्र
मुदितोवत्ससाधुत्वयाकृतम् नरकादुद्धृतःपूर्वंदारुणाद्दुष्टकर्मणः ११ इदानींतुप्रेतभावान्मोचितोदुःखसागरात् तेध
न्याःपुण्यवंतश्चतैश्चलोकद्वयंजितम् १२ भवंतियेषांसत्पुत्राःपुण्यकर्मपरायणाः अदातारोऽपिदातारःपापिनोऽप्यपापि
नः १३ वरमेकःसुपुत्रोस्तुकुपुत्राणांशतेनकिम् प्रीणातिस्वापितॄन्यस्तुसततंपितृकर्मणा १४ सफलंजीवितंतस्यधन्या
स्तेनैवपूर्वजाः तस्मात्प्रतिदिनंदेवाःपितरोमनुजास्तथा १५ ऋषयश्चैवभूतानिसमीहंतेचसत्कृतिम् एतान्सत्कृत्ययो
भुंक्तेतस्माच्छ्रेष्ठतरोहिकः १६ कृतार्थाःपितरस्तस्यतथामातामहाअपि भवंत्यकालेनप्रेतास्तस्यपुत्रप्रपौत्रकाः १७ ध

१ भुंजानाइतिशेषः

नानिदीर्घमायुश्चनशोकाश्चापदस्तया नसंततेश्चविच्छेदोयःसदाचारवान्नरः १८ आषाढेपंचदिवसस्नानेनप्रेतभावतः
विमुक्तःशेषपुण्येनविष्णुलोकोममाक्षयः १९ इत्युक्त्वासनिजंपुत्रमस्माकंपश्यतांतदा विमानवरमारूढोवैष्णवलोकमव्रजत्
२० सार्द्धसार्थेनतत्पुत्रउद्धृत्यपितरंनिजम् मुदापरमयायुक्तोजगामचयथागतम् २१ वयंतत्रस्थितास्तातनिराशास्मः
स्वमेत्वने कोऽत्रमोचयितान्योस्तिप्रेतभावात्सुदारुणात् २२ त्वन्नःपुत्रोसितुपुरापाखंडिवचनेस्थितः नोनदास्यानितत्सु
एयंयेनमुच्यामहेवयम् २३ नरैःपाखंडिभिःकव्यंदीयतेयत्तुकिंचन कस्मादपिप्रसंगात्तत्पितृणांनोपसर्पति २४ सांप्रतं
तपतीतीर्थेकुलंस्नानेनपावितम् आषाढेयोग्यतांप्राप्तोप्यनिच्छन्नपिदैवतः २५ सर्वथायदसंभाव्यंयत्परंचमनोरथात्
अकस्माच्चतदानीयविधिर्घटयतेध्रुवम् २६ इतिश्रीस्कंदपुराणेआषाढमासमाहात्म्येषष्ठोऽध्यायः ६ ६९
ईश्वरउवाच कस्त्वंजैनसमाचारःकृतापीचमहानदी आषाढेकृतस्नानमनिच्छोरपिदैवतः १ सर्वथापदसंभाव्यंयत्परंदुर्लभंनृणाम्
तस्माद्धाविशक्रभंचान्नूनंमन्यामहेत्यतः २ एतेषांसमवायोयोदुष्करःसमजायत इतितेषांवचःश्रुत्वा
सर्वाणिविस्मयान्वितः ३ जैनधर्मंपरित्यज्यचक्रेस्नानंविधानतः एकादशींसमारभ्ययावत्पंचदशीस्थितः ४ कृत्वा
श्राद्धंतुविधिवत्पौर्णिमास्यांसमाहितः तापीतटेददौपुण्यंपूर्वजेभ्योयथाविधि ५ आषाढपंचदिनज स्नानेनयदुपार्जितम्
६ आषाढपंचदिनजंस्नपनंचपुण्यंतेप्राप्यतत्रविजहुर्विकृतंशरीरम् आरुह्यचाशुमरुतांरुचिरंविमानंतेविष्णुलोकमगमन्नहियत्रपापम्
७ उद्धृत्यतेस्ववणिक्कनिजपूर्वजांश्चअत्यंतकष्टजनकाच्चपरेतभावात् आषाढमाससवनप्रभवं
चदृष्ट्वाभूपश्चवणसवनायसमुत्सुकोभूत् ८ तेनाषाढदशस्नानंत्रिगुणंत्वेकचेतसा तत्पुण्यात्तत्पदोपारोयज्जगत्वानशोचति
९ ईश्वरउवाच माहात्म्यमेतदुदितंरविनंदनायआषाढमाससवनस्ययथाप्रवृत्तम् स्नानस्ययस्त्वविकलं
फलमिच्छतीहश्रोतव्यमेवखलुतेनमहाघहारि १० इतितेकथितंसर्वंयत्पृष्टंतुत्वयाकृत ताप्याषाढफलंसम्यक्किम

न्यच्छ्रोतुमिच्छसि ११ इतिश्रीस्कंदपुराणेरुद्रकार्तिकसंवादे ताप्याषाढस्नानमाहात्म्येसप्तमोऽध्यायः ७ ७
स्कंदउवाच आषाढस्नानजंतात त्वयाप्रोक्तंमहाफलम् आषाढेतपतीस्नानंसर्वपापहरंनृणाम् १ कोऽवधिस्तस्यकिं·
पुण्यंकेतत्रनियमास्थिताः तेषांकिंकिंफलंतन्मेब्रूहिसर्वमशेषतः २ ईश्वरउवाच प्रातःकरोतियःस्नानंमध्यान्हेपि
यथाविधि द्विगुणंफलमाप्नोतित्रिस्नानात्त्रिगुणंफलम् ३ पयोष्णीसंगमेस्नानंदेवानामपिदुर्लभम् यस्माच्चतुर्गुणंपु
ण्यमाषाढस्यप्रकीर्तितम् ४ तथैवबिंदुमत्याश्चसंगमेऽपिनिगद्यते मूलताप्याःकृतेस्नानेपुनर्जन्मनविद्यते ५ गोम
त्याःसंगमेचैतत्सर्वपापहरंस्मृतम् संगमेयत्रकुत्रापिद्विगुणंपुण्यमुच्यते ६ तथैवद्विगुणंप्रोक्तंस्नानंशंकरसन्निधौ स·
न्निधानस्यलिंगस्यचतुर्गुणमुदाहृतम् ७ शालग्रामशिलोपेतेतथैवस्याच्चतुर्गुणम् स्नानंकुर्वीतमौनेनस्थित्वाचैकाग्रमा
नसः ८ आदित्यमनसाध्यात्वामार्जयेत्पंचवारुणैः ऋग्भिस्त्वब्दैवताभिश्चमार्जयित्वाततःपरम् ९ सूर्यपुत्रिनमस्तुभ्यं
नमआषाढसंभवे त्वत्प्रसादेनसंपूर्णमाषाढस्नानमस्तुमे १० इतिप्रार्थ्यनमस्कृत्यततःस्नायाच्चवाग्यतः स्नानांतेतर्पणं
कुर्यात्पितॄनुद्दिश्ययत्नतः ११ ततोरवेरुपस्थानंकुर्यात्तद्गतमानसः विभ्राड्बृहच्छिवसंकल्पंसूक्तंपुरुषसंज्ञकम् १२
मंडलब्राह्मणंतत्रनिर्गत्यचततोबहिः एवंस्नानविधिंकृत्वादेवतानांचपूजनम् १३ होमंदानंयथाशक्तिततःकुर्याद्विच·
क्षणः एवंप्रतिदिनंकर्ममासयावत्समाहितः १४ यद्यत्करोतिभक्त्यात्रआक्षय्यंसकलंभवेत् सर्वपापहरंस्नानंयत्रतत्रप्र
कीर्तितम् १५ आषाढेकुरुतेयस्तुसूर्यपुत्र्याःप्रदक्षिणाम् योजनेयोजनेस्नानंकुर्वन्नेकाग्रमानसः १६ प्रवाहमूलमार
भ्ययावच्चसरितांपतिः विमुक्तःकर्मबंधेभ्यःकैवल्यंसोधिगच्छति १७ ब्रह्मचर्येणकुरुतेयोजनार्द्धंप्रदक्षिणाम् सब्रह्म
लोकमाप्नोतिदुर्लभंमनुजैरपि १८ योजनेयोजनेस्नानंशक्रचौगोदानजंफलम् समग्रफलदंप्रोक्तमशक्तस्योष्णवारिणा
१९ स्नानार्धफलदंकंठस्नानंसद्भिर्निगद्यते स्नानार्थपादफलदंपादार्धस्याभिषेचनम् २० ऋग्भिरब्दैवताभिश्चमुनिभि

परिकीर्तितम् स्नानान्येतान्यशक्तस्यकीर्त्यंतेत्वनुकल्पतः २१ अन्येदेशस्थितोयस्तुपुमान्मृल्लिप्तविग्रहः कुर्वन्नन्यजलैःस्नानंसपादफलमश्नुते २२ एकभक्तेनयःस्नायात्सस्वर्गाच्चाल्यतेनतु अयाचितेनयत्पुण्यंसपादंजायतेपुनः २३ नक्तभोजीनरःस्नात्वाब्रह्मलोकेमहीयते उपवासस्नानकर्तापुनर्नैवप्रजायते २४ फलभोजीनरःस्नात्वास्कन्नामणोलोकमाप्नुयात् घ्रतेनयःस्नातिस्वर्गलोकेवसेच्चिरम् २५ स्नानंकुर्वन्पत्रभोजीशक्रस्यैतिसलोकताम् धात्रीफलैस्तिलैर्वापिस्नात्वास्वर्गेमहीयते २६ ऊष्णोदकंपरित्यज्यस्नानंकुर्यात्समाहितः वारुणंलोकमासाद्यतत्रभोगान्समश्नुते २७ तैलाभ्यंगंवर्जयित्वारूपवान्जायतेदिवि चंदनंतुपरित्यज्यचंद्रस्यैतिसलोकताम् २८ पुष्पवर्जीनरोयस्तुनंदनेभोगभाग्भवेत् ततोमहींतुपुनरागच्छेद्वस्यमध्यतः २९ कुर्वन्नाषाढसवनंनस्वलोभधरोभवेत् स्वर्गेक्रीडत्यप्सरोभिर्यावदाभूतसंप्लवम् ३० एकांतरोपजीवीतुमुनिलोकंसमश्नुते गोधूमान्वर्जयित्वातुभूमौराजाततोभवेत् ३१ श्रीफलंवर्जयित्वातुदेववैमानिकोभवेत् मद्यवर्जीरवेर्लोकंमधुवर्जीचगच्छति ३२ परान्नंवर्जयेद्यस्तुसयातिपरमांगतिम् भूमिशायीनरोयस्तुशक्रलोकंसगच्छति ३३ ब्रह्मचर्येणयोमर्त्यआषाढस्नानमाचरेत् अप्सरोलोकमासाद्यभुंक्तेभोगान्मनोरमान् ३४ वांछिताल्लभतेकामान्नरस्तांबूलवर्जनात् गंधर्वलोकमाप्नोतिनरोगंधान्विवर्जयेत् ३५ शाकाहारेणयोमासआषाढेसवनंचरेत् आतिथ्यंदेवतानांसलभतेमानपूर्वकम् ३६ त्रिकालंविष्णुमभ्यर्च्यमहेशंवापिभक्तितः सूर्यंत्रिकंकारयतितत्तल्लोकंसमश्नुते ३७ स्नात्वापूतंजपेद्देव्यामासेप्रतिदिनंद्विजः ब्रह्महत्यादिकैःपापैर्मुच्यतेनात्रसंशयः ३८ तिलहोमसहस्रंवाप्राणायामास्तुषोडश कुर्वन्पूर्वविधानेनसर्वमायातिगोभवेत् ३९ विष्णुलोकमवाप्नोतिकल्पंयावच्चतिष्ठति ततोवसुमतींप्राप्यसार्वभौमोभवेन्नरः ४० विष्णोर्नामसहस्रंतुयोजपत्तत्रतिष्ठति ततोवसुमतींप्राप्यजपंस्तल्लोकमश्नुते ४१ अष्टोत्तरशतंनाम्नांतपत्यांवाजपेन्नरः भक्त्यापरमयायुक्तएकचित्तोदृढव्रतः ४२ सूर्यलोकंसलभतेवासंयत्ररवेःस्मृता प्राणान्विदधतातप्यांयथाशक्त्या-

दिनेदिने ४३ भक्त्यास्नानंविधायादौलभतेपूर्ववत्फलम् स्नात्वायःकुरुतेदीपंमासमेकंनिरंतरम् ४४ आयतनेतुदेवानांतत्तल्लोकमुपैतिच ज्येष्ठस्यपौर्णमास्यादिकृत्वाषाढस्यपूर्णिमाम् ४५ तावत्स्नानंप्रकुर्वीततस्मात्पंचदिनोत्तरम् यद्याषाढद्वयंवर्षेकदाचिदुपपद्यते ४६ तदाद्वितीयेयःस्नातिद्विगुणंफलमाप्नुयात् ४७ इतिश्रीस्कंदपुराणेआषाढमासमाहात्म्येअष्टमोऽध्यायः ८ छ

ईश्वरउवाच आषाढस्नायिनांवत्सशृणुदानफलंमहत् येनदत्तेनपुरुषोलभतेवांछितंफलम् १ धेनुंददातिविप्रायप्रत्यहंयःपयस्विनीम् विमुक्तःपातकैःसर्वैरविलोकेसपूज्यते २ यावत्तपतिसूर्योऽत्र तावत्कालंसतिष्ठति पश्चात्सविष्णुसायुज्यंदुर्लभंप्रतिपद्यते ३ स्वशक्त्याह्यथवापक्षंपक्षार्द्धंवातदर्धकम् एकंवापिदिनंशक्त्यासोपितत्फलभाग्भवेत् ४ वित्तशाठ्यंप्रकुर्वाणोदद्याद्यदिनकिंचन पुण्यंकिंचिन्नलभतेनरःप्रत्युतपापभाक् ५ प्रत्यहंगजदानाच्चशक्रोभवतिनिश्चितम् रथदानान्महत्वंतु हयदानात्तदुन्नतिम् ६ गोदानतोदशगुणंफलंत्वनुडुहोस्मृतम् धुर्याणांबलयुक्तानांतरुणानांतरस्विनाम् ७ एवंतुमाहिषीदानात्पतिरप्सरसांभवेत् कल्पमेकंवसेत्तत्रभुंक्तेभोगान्यथेप्सितान् ८ वर्षाशनक्षमांभूमिंद्विजायप्रत्यहंददत् ब्रह्मलोकंसमासाद्यकल्पस्थायीभवेन्नरः ९ अन्वहंयःसहस्राच्चविप्राणांभोजयेन्नरः नापीतटकारयतिसत्यलोकंसगच्छति १० कल्पमेकंसवैतत्रपूज्यतेविबुधैरपि ततोमोक्षपदंयातितत्सुरैरपिदुर्लभम् ११ वित्तशाठ्यंपरित्यज्यस्वशक्त्यायस्तुभोजयेत् तदर्धंवातदर्द्धंवाशतसाष्टिमथापिवा १२ विंशतिंचाचतुर्युक्तामथद्वादशभोजयेत् तदेवफलमाप्नोतितथाप्येकंचभोजयेत् १३ वस्त्रदानान्नरोयातिलोकंश्रेष्ठंप्रजापतेः दुकूलदानशक्तोपिवस्त्रंकार्पासिकंददत् १४ नतस्यफलमाप्नोतितस्यदानंनिरर्थकम् तांबूलदानात्पुरुषोभोगैर्नपरिहीयते १५ फलदानाद्यथेच्छंचसंततिंप्राप्नुयान्नरः उपानहौनरोदत्वापादचारीनजायते १६ ताम्रकंस्यंचारकूटंजलपात्रंददातियः तत्तत्पात्रप्रदानेनतत्तदुक्तंफलंलभेत् १७ पायसंयावत्कल्पांतेदेवपीयूषपोभवेत् रूप्य-

दानात्कलत्राणिरूपाणिलभतेतिच १८ गोधूमशालिमुद्गानांतथैवयवमाषयोः व्रीहीणांचतिलानांचक्षेत्राणिफलवंति
च १९ ददातिकालेसंकल्पतस्यपुण्यंनिबोधमे यावंतोहिकणास्तेषांतत्तद्द्विगुणसंख्यया २० वर्षाणिवसतेस्वर्गेदे-
चतातुल्यभोभवेत् अन्येषामपिधान्यानांदत्वाक्षेत्राणिमानवः २१ तद्बीजसंख्ययास्वर्गेवर्षाणिसहनिर्जरैः रममाणोय-
थाकामंचासाद्यखलुकल्पते २२ इतिश्रीस्कंदपुराणे आषाढमासमाहात्म्येनवमोऽध्यायः ९ ६७ ईश्वरउ-
वाच गृहंददातियश्चापितस्यपुण्यफलंशृणु नित्यमेकंभूमिकंवामृत्पाषाणविनिर्मितम् १ चित्रितंवर्णकैश्चित्रैःस-
र्वोपस्करसंयुतम् सविष्णुलोकमासाद्यस्वर्णरत्नविनिर्मिते २ प्रासादेरमतेनित्यंसर्वोपस्करसंयुते सहदिव्यपुरंध्रीभिः
कल्पंयावन्मुदान्वितः ३ तावत्कालंवसेद्ब्रह्मलोकेयस्त्विष्टिकाप्रदः गृहकाष्ठपदंदत्वाशक्रलोकंप्रयातिसः ४ यावत्का-
लंचंद्रसूर्यौतावत्कालंशिवस्थितिः दातान्नसमधान्यानांनिजवित्तानुसारतः ५ खारिद्रोणाढकप्रस्थकुडवानांचसंख्य-
या सस्वर्गेनिवसेद्धृष्टोवर्षाणीबीजसंख्यया ६ पूज्यमानःसुरैर्नित्यंरममाणोयदृच्छया स्वर्गलोकेवसेत्कल्पंनिजशस्य
तिलान्ददत् ७ गोधूमदानात्कल्पंतुस्वर्गेतिष्ठतिहर्षितः स्वर्गेपापभयंनैवमाषदाताहिविंदति ८ दाताहितंदुलानां-
योमहर्लोकेसतिष्ठति घृतंददातिविप्रेभ्यःस्नानंकुर्वन्दिनेदिने ९ स्वशक्त्यास्वस्वधाहारेदेवतानांप्रियोभवेत् दुग्धं
वादधिचायस्तुब्राह्मणेभ्यःप्रयच्छति १० स्वर्गलोकंसमासाद्यघृतकुल्यापतिर्भवेत् अन्नदानेनलभतेयद्यद्वांछ-
तिमानवः ११ अन्नात्परतरंदानंनभूतंनभविष्यति नरःपुस्तकदानेनज्ञानवान्निश्चितंभवेत् १२ विद्यादानेनमोक्षंच
लभतेकर्मसंक्षयः यस्मिन्यस्मिन्भवेदिच्छातत्तद्द्यात्प्रयत्नतः १३ इहलोकेपरस्मिन्वातान्यथालभतेक्वचित् स्त्रि-
योदानफलंत्वेतद्भर्तृभिःसहभुंजते १४ तत्तल्लोकंगतासत्यः संगंयांतिचभर्तृषु यस्मिन्वयसिकालेवायथादत्तंमहा-
त्मभिः१६ तस्मिन्वयसिकालेवतत्तथैवचलभ्यते पुण्यदेशेशुभेकालेश्रद्धयापरयातथा १६ शुभंद्रव्यंसुपात्राययद्दत्तंहित

दक्षयम् यदंगविकलंदानंफलतीहनतत्तथा १७ तस्माद्विकलंश्रेष्ठंतद्देयंश्रद्धयान्वितः अदत्तस्यचवृक्षस्यफलं
प्रत्यक्षमीक्ष्यते १८ एकेदरिद्रादृश्यंतेधनवंतस्तथापरे समानकुलजाताश्चसमानमतयस्तथा १९ तथासमानकर्मा-
णःसमानेंद्रियवृत्तयः समदत्तविभागाश्चलभंतेस्वधनंप्रति २० तथापिकेचिद्दृश्यंतेधनवंतस्तथापरे सधनःपितृतःक
श्चित्तथाकश्चिच्चनिर्धनः २१ तयोर्विपर्ययोदृष्टःकारणदत्तमेवतत् सर्वेपिधनवंतःस्युरदत्तंयादिलभ्यते २२ परलोके
चकिंचिच्चश्रूयतेदुर्गतिःकिल तस्मादिहाप्यमुष्मिन्वानादत्तंभुज्यतेक्वचित् २३ एवंनिश्चित्यदेयंस्वंनिजशक्त्यनुसार
तः २४ इतिश्रीस्कंदपुराणेआषाढमासमाहात्म्येदशमोऽध्यायः १० छ ईश्वरउवाच आषाढेतपनि
स्नानात्पापकर्मक्षयोभवेत् अभुक्तंक्षीयतेकर्मभक्त्याचैववचयत्कृतम् १ दृश्यतेचैवमग्रेस्यफलंपुण्यस्यकर्मणः दुःखात्म
कपापफलम्पुण्यस्यतुसुखात्मकम् २ यथेहचतथामुत्रपुरुषःकर्मणोवशात् सुखदुःखमवाप्नोतितस्मात्पापात्म-
कंत्यजेत् ३ दृश्यतेसुखिनःकेचिद्धनपुत्रयुताजनाः दीर्घायुषोनीरुजश्चनिर्भयागुणिनोनराः ४ अपरेपिचदृश्यंते
रोगार्त्ताधनवर्जिताः अल्पायुषोपिपुत्राश्चनिर्गृहागुणवर्जिताः ५ तस्मात्पुण्यंचपापंचनिश्चित्यास्तीतिमानवः स्या
त्पुण्येष्वादरपरोनपापेषुकथंचन ६ आषाढसेवनात्पुण्यंपरमस्तीहभूतले धर्मइष्टश्चपूर्तंश्चनास्त्यतस्तत्समोभु
वि ७ वांछितार्थस्यसंसिद्धिर्येनायासंविनालभेत् अन्यत्पुण्याधिकंकिंचिदस्तिसर्वंनिगद्यते ८ यावंतोमुनयः
सिद्धाआषाढःसेवनादिह तत्संख्याशक्यतेवक्तुंनापिवर्षशतैरपि ९ ब्राह्मणाःक्षत्रियावैश्याःस्त्रियःशूद्रास्तथापरे
सर्वेषामधिकारोस्तितथाचाश्रमिणामपि १० लोकार्थिनोधिगच्छंतिलोकान्मनसईप्सितान् अपिमोक्षार्थिनामो
क्षश्चआषाढस्नानतोभवेत् ११ जयार्थीविजयंचैवबलार्थीचबलोन्नतिम् रूपार्थिनोपिसौंदर्यंलभंतेनात्रसंशयः १२
ईश्वरउवाच अगस्त्येनपुराराजानहुषोनामविश्रुतः विप्रियत्वकरंशीघ्रंपातितोवज्रभृत्पदात् १३ ततोदीनोवि

वर्णोसौमहत्यात्रपयायुतः कस्याप्याननमात्मीयंनदर्शयितुमीश्वरः १४ ततोगत्वावसिष्ठंसप्रणिपत्यमुहुर्मुहुः कृतांजलिपुटोभूत्वाप्राहगद्गदयागिरा १५ स्वकीयाज्ञानतःपापंकृतंत्वधमकुबुद्धिना यच्चाद्विजाः कृतावाध्यास्तेनमेदत्वधनेपुनः १६ तेनैनसापातितोहंगतोपिमघवत्पदात् निष्कृतिंकिंकरोम्येवनचशक्नोमिजीवितुम् १७ येनाहंदुरितान्मोक्ष्येत्वेनसोत्थातिदारुणात् तद्ब्रूहिमेमहाभागलभेयंतत्समीहितम् १८ त्वांशरणमापन्नमामुद्धरमहामुने १९ इतिश्रीस्कंदपुराणेआषाढमासमाहात्म्येएकादशोऽध्यायः ११ ॐ ईश्वरउवाच इतिसंश्रुत्यतद्वाक्यंवसिष्ठोमुनिसत्तमः कृपयापरयायुक्तोराजानमित्यभाषत १ वसिष्ठउवाच अविमृश्यनकार्यंहिकार्यंकिमपिपंडितैः भूमौनिस्पृष्टकार्यस्यविपाकोदारुणोमतः २ त्वयेंद्रपदसंप्राप्तावौत्सुक्यात्साहसंकृतम् तत्कार्यंतस्यसंप्राप्तंफलमेवंविधंत्वया ३ कामादयःशरीरस्थामहांतःशत्रवोऽधमाः कार्यंतैरसत्कर्मपुरुषैःस्ववशीकृतैः ४ इहामुत्रचयेनासौनीयतेदारुणांदशां तस्माद्देतेविजेतव्यालोकद्वयहितैषिणा ५ लोभेनत्वंबलवताप्रापितोसीदृशींदशाम् चित्तसंशोकजननींसर्वलोकविगर्हिताम् ६ राजंस्त्वंतपतींगत्वासर्वभोगविवर्जितः एकाग्रमानसोभूत्वाशुचौस्नानंसमाचर ७ तेनत्वंगतपापस्कलप्स्यतेवांछितंफलम् नान्यःकोपित्वोपायोविद्यतेतच्चनिश्चितः ८ वसिष्ठउवाच पुराशतबलीराजाशत्रुणाच्यावितःपदात् पुनःस्वपदमापन्नआषाढस्नापनात्परः ९ नहुषउवाच एकःशतबलीराजाशत्रुणाच्यावितःपदात् यज्ञात्तुतत्पुनःप्राप्तंकथमेतन्निगद्यताम् १० वसिष्ठउवाच वंगानामधिपोराजाभवच्छतबलीपुरा ततस्त्वंगकलिंगाद्याजितादेशास्ववीर्यतः ११ सकदाचिद्ययौराजाकामरूपेश्वरंप्रति युद्धंतत्रभवद्घोरमनेकसुभटक्षयम् १२ तस्मिन्राज्ञःसुबहुशोमृताश्वगजानराः मानुषाणांचपत्तयोबभूवुःसरितोवराः १३ यत्रत्वग्रुधिरस्रावात्पानमत्ताः पुनःपुनः नृत्यंतिस्मचगायंतिभूतवेतालराक्षसाः १४ यत्रायुध्यतसुभटात्यक्तामरणजंभयम् बाणैःकुंतैश्चरव-

ड्गैश्चपट्टिभिःशक्तिभिस्तथा १५ यत्नंशत्रोर्निग्रहायप्रस्पष्टाश्चक्रुरुत्तमम् उरीचकारमरणंसुभटानपलायनम् १६ शि
रोभिर्बहुभिश्चापिचान्यैरवयवैस्तथा पतितैःसुभयंकारैःरणभूर्दुर्गमाभवत् १७ वाजिवारणवीराणांदेहेभ्यःपातितक्षता
त् नदृश्यतेस्मकीर्णाभूरसृङ्मांसवसास्थिभिः १८ क्रव्यादगणसंकीर्णंतदासीत्संगरमहत् शूराणांहर्षजननंभीरू
णांभयवर्धनम् १९ इतिश्रीस्कंदपुराणेआषाढमासमाहात्म्येद्वादशोऽध्यायः १२ छ सहोवाच
तस्मिन्महतिसंग्रामेवर्तमानेसुदारुणे कामरूपेश्वरबलंसंग्रामाच्चपलायितम् १ पलायमानंस्वबलंदृष्ट्वाराजाब्रवी
द्वचः क्षत्रियामापलायध्वंभोभोतिष्ठततिष्ठत २ क्षत्रधर्मंपरित्यज्यपलाय्यक्वप्रयास्यथ स्वीयधर्मात्परिभ्रष्टादर्श
यिष्यथकिंमुखम् ३ एषलोकःपरोवापिद्वितयंवोविनश्यति पश्चादपिहिमर्तव्यमितिमत्वानिवर्त्यताम् ४ केलोका
वोभविष्यंतिपश्चाद्यदिमरिष्यथ इतिशूरावचःश्रुत्वानिवृत्ताःकेऽपितत्रवै ५ तेनिवृत्त्यमृधंचक्रुर्दारुणंरोमहर्षणं
कामरूपेश्वरोराजायोधयन्परवाहिनीम् ६ ततःशतबलिंप्राप्तस्तयोर्युद्धमभूत्तदा परस्पराकर्षितयोःपरस्परवधैषिणोः
७ कामरूपस्यसविभुःकोपामर्षवशंगतः अर्धचंद्रनिभाभ्यांसनिशिताभ्यांमहाबलः ८ छित्वाधनुःशतबलिः
छत्रंचिच्छेदवीर्यवान् ततोन्यद्धनुरादायकोपाच्छतबलिःपुनः ९ दृढंविव्याधतद्धृदयेनाराचेनविरोचसा सोऽतिवि
द्धोबलवतारिपुणारिपुसूदनः १० मूर्छयागतचैतन्योरथोपस्थउपाविशत् तत्क्षणाच्चेतनांप्राप्यगृहीत्वात्वरितंधनुः
११ तस्मिन्क्षणेकामरूपीशिरश्चिच्छेदसारथेः ततःशतबलिःक्रुद्धोनिर्गतःसारथौहते १२ स्वयंरश्मिंसमादाययुयु
धेरिपुणासह नाराचांस्ततआदायसुतीक्ष्णांकंचुकच्छिदः १३ चतुर्भिश्चचतुरोवाहानवधीत्तस्यवेगतः पंचमेनतत
श्चासुचिच्छेदःसारथेःशिरः १४ हतेष्वश्वेषुराजाससारथौचततोरथात् खड्गमादायवेशीघ्रंस्वखेटकमथाभ्यगात् १५
ततःशतबलिस्तस्यसर्वस्वमग्रहीद्बलात् तंचादायततोराजागंगांप्रापमहायशाः १६ मौलौजघानखड्गेनतद्घाताद्युधि

रंवमन् मूर्च्छामवापतेनैवंविह्वलंपतितंभुवि १७ जीवग्राहंसजग्राहचाचानिर्भर्त्सयन्मुहुः सशत्रुवशमायातः किं
चित्प्राप्तंचभावितम् १८ ततः शतबलिस्तस्याच्छित्वासिमपिनत्पुनः ततोनिवेशयामाससैन्यंगंगातटेबली १९ तत्राप·
श्यदृषिवरांश्चरतः परमंतपः शष्कपर्णाशनांकांश्चिद्वातोबुद्बुदकाशनात् २० महोपराकिणः कांश्चित्कांश्चिच्चांद्रायणे
रतान् तत्सर्वान्सनमस्कृत्यप्रत्येकंमहतोदरात् २१ तैः सर्वैः कुशलंपृष्टोराज्ञोदत्तास्तदाशिषः सतैरुक्तेपुनरिदंकृतं·
शतबलेत्वया २२ क्षत्रसदृक्कर्मनैवकामरूपंयदप्यहो क्षत्रियाणांजयोमृत्युः संग्रामेनपलायनम् २३ यत्नेनयुध्यतां
लोकेनदोषोस्तीहकश्चन क्षत्रधर्मपलायेच्चभग्नसैन्यस्ययोग्रहः २४ नासोपुण्यायराजेंद्रतस्मादेतंद्रुतंत्यज निश्चि
तोत्रजयः कस्यभंगोवाकस्यनिश्चितः २५ विजयः प्राप्यतेकैश्चिद्भज्यतेतत्रकर्हिचित् एतावन्निश्चितोयस्मात्तज्ज्ञात्वेह
विजयेच्छुभिः २६ शत्रुर्विमदमापन्नोनकार्यश्चकथंचन संग्रामेपतितोवीरोजीवन्नापिमृतोपिवा २७ क्षमितव्यःसरि
पुभिः कोपामर्षौविहायच संग्रामेपतितंवीरंयेघ्नंतिघातयंतिवा २८ ब्रह्महत्यासमंपापंतेषांस्यान्मुनयोब्रुवन् युद्धेब·
द्धंचाहतंचतवाहमितिवादिनम् २९ क्षत्रियायेननिघ्नंतिब्रह्मघ्नास्तेप्रकीर्तिताः वैरिभिः स्वामिनंबद्धंत्यक्त्वाप्राणपराय
णाः ३० क्षत्रियायेनिवर्त्ततेतेषांहत्यापदेपदे यावज्जीवंस्वामिनोन्नंवित्तशस्त्राणिभूषणम् ३१ उपयुज्यायुध्यतांचगर्द
भास्तेभवांतरे शत्रुरप्यापदंप्राप्तोनहंतव्यः कथंचन ३२ विपत्तौसप्रतीक्षःस्याद्यावत्तान्प्रतरेदिह याचनीतिरितिप्राह
व्यसनेसतिसर्वदा ३३ प्रहर्तव्योविपक्षः स्यात्तथास्थापनयेसति प्रावाहिकंतुवचनंनचैतत्पारमार्थिकम् ३४ कर्म
वश्यंजगदिदंयदवस्योहिमानवः कर्मायत्तोदृष्टकर्माकर्मायत्तः पराजयः ३५ बुद्धिः श्रीश्चसुखंदुःखंसर्वंकर्मानुगामि
च अन्यन्नकिंचिद्रक्षार्थंराज्यस्यात्कस्यचित्पुनः ३६ स्कबुद्धंयातिकस्यापिसहसातदचिंतितम् यस्यैवसर्वसौख्या

---

१ महतः आदरादितिच्छेदः संधिरार्षः २ क्षत्रियः

निसंतितस्यनरस्यच ३७ दृश्यतेसहसानाशः कथंकर्मनकारणम् सहसाचमहाव्याधेरागमः कस्यचिद्भवेत् ३८ धनागमश्चकस्यापिकथंकर्मनकारणम् कस्यचिच्चापदोदृष्टासहसाप्यधनंतथा ३९ एतानीतिविनिश्चित्यकर्मकारणमुच्यते अन्यदिष्टस्यतुगतिरन्यतेतत्तुनिश्चितम् ५० अतश्चव्यभिचारोहिदृश्यतेकर्मणोवशात् कर्मणस्त्ववशात्पुंसांजायतेतादृशीमतिः ४१ कर्मणाविषयेष्विच्छातत्करोतिप्रयत्नतः दैवमेवहितस्माच्चमन्यामःपरमंवयम् ४२ दैवेनतत्तदाप्नोति दैवेनचपराक्षतिम् नधर्मवधमाप्नोतिनैरुज्यंचसरोगताम् ४३ लयक्षयादिकंचैवसर्वंदैवैःप्रतिष्ठितम् आसीदैवाच्चाविपदंप्राप्तस्त्वंपितृजंपदम् ४४ तस्मादेनंविमुच्याशुवत्सराज्येनयागते[1] ४५ इतिश्रीस्कंदपुराणेआषाढमासमाहात्म्येत्रयोदशोऽध्यायः १३ ७२

वसिष्ठउवाच ऋषीणांवचनात्सोऽथविमुच्यैनंमहामनाः मुनिनापृच्छ्यविषयान्सजगाममुदान्वितः १ कामरूपाधिपश्चात्रऋषिभिर्मोचितस्तदा विवर्णवदनोमर्षलज्जाशोकपरिप्लुतः २ गंगायाःसलिलेस्नात्वात्प्रपृच्छ्यचमुनीस्तथा निरंतरंश्वसन्क्षामोविव्हलीकृतचेतना ३ मानीमानंत्याजितोहिवरान्प्राणान्·परित्यजेत् ब्राह्मंसरोजगामाशुहित्वादारान्सपुत्रकान् ४ राज्यंससागकंत्यक्त्वाशोकामर्षवशंगतः कथंचिन्नापिलोकानांदर्शयत्यात्मनोमुखम् ५ तत्रस्थित्वाचिरंदध्यौकिमत्रममसांप्रतम् जुहोमिखंडशःकृत्वावन्हौदेहमिमंकथम् ६ किंवा·कंठेशिलांबध्वामज्जयामिनिजांतनुं अथवाभृगुतःपातंकृत्वाभिनद्मिविग्रहम् ७ अथवोग्रेणतपसाराधयामिमहेश्वरम् ततश्चतपसाशीर्णंत्यक्ष्यामिचकलेवरम् ८ ततःसतपआरंभेविचार्येतिमुहुर्मुहुः नित्यंत्रिषवणंकुर्वन्त्रिःकुर्वन्पूजयाशिवम् ९ शिवमंत्रंजपन्नित्यंशिवध्यानपरायणः तत्रोटजेसमाधायवन्हिंचविधिपूर्वकम् १० त्रिवारंसमिधाहोमंयज्ञियानांसमाहितः एवंकृत्वावदत्येवंशंकरःप्रियतामिति ११ संध्यायांचततःसांध्यंकृत्यंकृत्वासमाहितः स्वपितृतर्पणांतेच आहारंकुरुतेवशी १२ एवंवर्षत्रयंसाग्रंजातस्यचमहात्मनः अथैकस्मिन्दिनेराजामध्यान्हस्नाननिर्गतः १३ एवंसतिमृ

टीप १ नयागते· नित्याआगतेप्राप्ते·

गःकश्चित्तत्समीपंसमागतः हिंसकव्याधसंत्रस्तोमुंचत्फेनंमुहुर्मुखात् १४ पश्चाद्विलोकयन्भूपंकंपमानोभयातुरः राजानंदीनवद्दृष्ट्वार्तीक्षतेचाग्रतःस्थितः १५ नृपोपिकृपयाविष्टोदृष्ट्वामृगमभाषत माभैर्मृगपरित्राणंप्राणैरपिकरोमिते १६ एवंवदतिभूमीशेतत्रव्याधाःसमागताः साधिज्यशरधन्वानोमार्ग्यतामितिवादिनः १७ संप्रापुस्तेथराजानंसमृगंबलवर्धितम् अथोचुरथराजानंमृगःसोयंप्रदीयताम् १८ तपस्विनोनयुक्तस्तेहरणंपरवस्तुनः अथवानतपस्वित्वंकपटीपश्यतोहरः १९ एतत्कृतेवयंभ्रांताअटव्यांचादिनावधि यावताघातयामस्तंतावद्रक्षसिकिंछलात् २० नूनंहंतुमशक्तस्त्वंकपटेनजिघांससि ज्ञातंतवमुनित्वंहिमृगार्थेक्रियतेत्वयत् २१ अस्माकंमिषतांचायंकुरंगःकेनलक्ष्यते अविलंबेनदेह्येनंविलंबस्तवदारुणम् २२ इतिश्रीस्कंदपुराणेआषाढमासमाहात्म्येचतुर्दशोऽध्यायः १४ छ वसिष्ठउवाच

इतितेषांवचःश्रुत्वाराजागर्वसमन्वितः प्रत्युवाचततोदात्तस्वरेणतर्जयन्निव १ यादृशाःपापिनाःपूर्वेतादृशंवचनंहिवः अथवात्हृदयेयावत्तादृग्वाचिप्रवर्तते २ यद्यहंनतपस्वीस्यांमाभूवंविमतेनकिम् नक्षमत्यपिखल्वत्रचांडालंशरणागतम् ३ गृहीतुंनगतोस्म्येनंमयानाकारितोह्यसौ अतर्कितःसमायातःशरणार्थीभयातुरः ४ जीवत्कथंत्यजाम्येनंमृत्योर्भीतंत्वलुब्धकाः परार्थेचवरान्प्राणान्दुस्त्यजानपिसंत्यजेत् ५ मन्यमानोबहुप्राणान्यस्त्यजेच्छरणागतम् स्वल्पगतेषुप्राणेषुस्थितंतत्त्यागपातकम् ६ शरणागतार्थेतत्प्राणांस्त्यजेद्यत्स्वविचारयन् स्थापयित्वातुविपुलांकीर्तिंस्वर्यातियन्नरः ७ यत्रैंद्रादिपदप्राप्तिर्मरणेमोक्षएवच इहकीर्तिश्चविपुलातत्रकास्तिविचारणा ८ नलाभोयत्रकोऽपिस्यात्परतस्यचदुर्गतिः नतन्मरणमन्विच्छेत्तत्रात्मारक्ष्यएवहि ९ इतिमेनिश्चयंदृष्ट्वाकुर्वताममघातनम् मृगोमाहन्यतांव्याधअत्रनास्तिविचारणा १० इतितस्यवचःश्रुत्वाव्याधाऊचुरनंतरम् व्याधाऊचुः अहोवेत्सितपस्वीत्वंननुत्यजसिकिंवृथा ११ सकर्मकुर्वंस्त्वत्कालंजीवतर्हिशतंसमाः विचारमूढोनखलुमृगार्थेजीवितंत्यजेत् १२ रक्षणेनमृगस्यास्यपुण्यंयत्तद्दिनेदिने त-

११

---

१ ततः उदात्त॰ संधिरार्षः २ नोपेक्षंते:

तप्यमानस्यचतपस्तस्माद्रक्षनिजांतनुम् १३ मृगस्यरक्षणेकिंस्यात्पुण्यंवाचात्मघातिनः तत्पापंभवितायत्रभोग्यंवर्ष
शतैरपि १४ भक्ष्याहिपशवःपुंसांतदर्थंम्रियतेऽत्रकः साधकःदेवपित्रर्थिकथंतद्वचनंविना १५ रक्षानास्त्यहितावत्तेन-
जीवन्स्कखभागयम् निहतःपितृदेवार्थंप्राप्तोपित्र्यदिवंपशुः १६ हत्वेमंहव्यकव्यार्थेदास्यामस्तद्विजन्मनाम् तदर्थंह
व्यकव्यत्वंतावत्स्वर्गंप्रयातिहि १७ अथत्वयामोचितोऽयमात्मदानेनचापरे निहनिष्यत्यतत्कालेनकिंवातेमृगांतकाः
१८ मृगार्थेम्रियमाणस्यकिंपुण्यंतेभविष्यति तस्माद्दुराग्रहंमुंचत्यजत्वंमोहसंभवम् १९पौनःपुन्येनात्रवयंभ्रमस्तत्स्थितका-
म्यया करिष्यामोयथाकामंमृगार्थिनोवयंखलु २० इतिश्रीस्कंदपुराणेआषाढमासमाहात्म्येपंचदशोऽध्यायः १५
५९ वसिष्ठउवाच इतिव्याधवचःश्रुत्वाप्राहराजाहसन्निव मत्स्थितेचेन्निकर्षोत्रतत्कथंरक्ष्यतांमृगः १ तस्मात्त
रतरंनास्तिमद्धितंलुब्धकाःखलु मयापिरक्षणीयोहिचेतसेदंविनिश्चितम् २ किंप्रयोजनमत्रास्तिपश्चान्मरणशंकया
विनंक्ष्यतीतिकृत्वायद्रक्षणीयंनरक्ष्यति ३ अथवाकिंनरक्ष्यःस्याद्यज्ञार्थमाहृतःपशुः रक्षणेयदिशक्तिःस्यात्तदाकंप्रति
रोधिनः ४ यज्ञार्थेपितृदेहस्कशुनःशेफकृतेःकिल विश्वामित्रेणचकथंस्वप्रभावेनरक्षितः ५ तद्रक्षणेश्चतत्प्राणैःपरप्रा-
णयशोर्थिभिः नातःपरतरंलोकेपुण्यमस्तीहकिंचन ६ शिबिरौशीनरोरक्षन्स्वदेहेनकपोतकम् विस्तार्यहयशोराशिंस्वर्ग-
लोकमितोगतः ७ तस्माद्व्याधामृगस्यास्यनिष्क्रयोपाद्यतांद्रुतम् वक्रभावंपरित्यज्यमयिकृत्वास्वचित्तताम् ८ ततस्तम
चदन्व्याधायत्वयैवविनिश्चितम् अस्मांस्त्वंस्वशिरोदेहिमृगस्यास्यहिनिःक्रियः ९ ततोराजात्दृष्टमनागृह्यतांमच्छिरोद्रुतम्
इत्यब्रवीत्सतान्व्याधान्सर्वांश्चपरितस्थितान् यावद्यातिमृगोह्यस्मात्तावत्कालंप्रतीक्ष्यच एवमुक्तास्ततोव्याधामृगंहित्वा
तुदूरतः ११ मुमोचराजायेनासौक्षिप्रंयातोवनांतरम् व्यावृत्याथततोराजाप्याययौव्याधसन्निधौ १२ गृहीतंमच्छिरोव्या
धाविलंबोमाभवेदिह ततस्तस्यवचःश्रुत्वाप्रत्यभाषतलुब्धकाः १३ नवयंतापसंहन्मोनोदासीनमनस्विनम् आयुष्य

हानिभीतंचनवाहमिनिवादिनम् १४ तस्मात्त्वंस्वयमुत्कृत्यस्वशिरोदेहिनःकृते सत्येनानिष्क्रयंचास्यमृगस्ययदिमन्यसे
१५ ततस्तेभ्योथयाचित्वाराजास्त्रंतीक्ष्णमात्मनः प्रचक्रमेनिजशिरःकर्तितुंनिजकारणात् १६ एतस्मिन्नंतरेदेवोभगवा
शशिशेखरः आजगामगणैःसार्द्धंपंचास्योदशबाहुकः १७ अथात्माचनृपप्राहमाकार्षिःसाहसंनृप तुष्टोस्मीतिवरं
ब्रूहियत्तेमनसिवर्तते १८. इत्युक्त्वातंचराजानंछिंदानंस्वशिरःकरैः जग्राहाथमहादेवस्तद्भक्त्याहृतमानसः १९ यावत्स
मीक्षतेराजातावदयेनलुब्धकाः ददर्शश्रीमहादेवंदेवदेवमुमापतिम् २० दृष्ट्वाथशंकरंराजास्वसमीपमुपस्थितम् जा
नुभ्यामवनिंस्पृष्ट्वाप्रणनामपुनःपुनः २१ नत्वापुनःपुनर्भक्त्यास्तोत्रमेतदुवाचह राजोवाच नमस्तुभ्यंभगवतेबा
लचंद्रार्धधारिणे देहार्धेबिभ्रतींदेवींपार्वतींतेनमोनमः नमस्तेकालकूटायनीलकंठायतेनमः २३ अष्टमूर्तेनमस्तुभ्यं
नमस्तेकामहारिणे नमःकालाग्निनेत्रायशंकरायनमोनमः २४ नमोब्रह्मस्वरूपायनमस्तेविष्णुरूपिणे नमोमहेश
रूपायसर्वदेवात्मनेनः २५ पुरोभिदेनमस्तुभ्यंदक्षाध्वरविनाशिने परापरस्वरूपायसृष्टिसंहारहेतवे २६ सर्वज्ञायन
मस्तुभ्यंस्थूलरूपधरायच नमस्तेसूक्ष्मरूपायअरूपायनमोनमः २७ नृत्यप्रियायदेवायभूतानांपतयेनमः नंदिवाह
नमस्तुभ्यनमस्तुभ्यंदवीयसे २८ वर्षीयसेनमस्तुभ्यंमहिष्ठायनमोनमः गृहीतरजसेविश्वंसंभवेमृडरूपिणे २९
रूपायसंहारहेतवेतेनमोनमः सत्वोपेतायरक्षायानिस्त्रैगुण्यायशिवायच ३० नमोनमोमहादेवप्रसीदपरमेश्वर इतिस्तुत
स्तदाराज्ञादेवदेवोमहेश्वरः ३१ प्रसन्नवदनःप्राहब्रूहिमत्तोभिवांछितम् ततोऽसौप्रणिपत्याहशंकरंलोकशंकरम् ३२
वचसःकारणंसर्वंचिरसत्हृदिसंस्थितम् राज्ञाहंशत्रुबलिनापराभूतःपुनःपुनः ३३ स्वपदात्याजितस्तस्माद्याचेत्वामेत
देवहि एतस्यस्वपदभ्रंशोयावज्जीवंभवत्विह ३४ तपोभिर्यजनैश्चैवतीर्थैर्बहुविधैःकृतैः स्वपदस्यपुनःप्राप्तिर्माभूदे
तद्विधीयताम् ३५ यथाशृणोमिसततंपदभ्रष्टंसदैवहि तस्यैवंवचनंश्रुत्वाप्राहदेवोजगद्गुरुः ३६ आषाढसवनंकु-

त्वात्तपत्यांसर्वकामदम् अन्यःसर्वैरुपायैस्तकस्कृतैरपियत्नतः ३७ नतस्यपदसंप्राप्तिःकथंचनभविष्यति तवस्वप
दसंप्राप्तिर्भविष्यतिपुनस्तथा ३८ अतोममपदावाप्तिर्भवित्रीनवभूमिप इत्युक्त्वादेवदेवोऽपितत्रैवांतरधीयत ३९
राजापिस्वपुरंप्राप्यलब्ध्वाराज्यमकंटकम् पूर्ववन्मुमुदेतत्रशंकरस्यप्रसादतः ४० इतिश्रीस्कंदपुराणेआषाढमा-
समाहात्म्येषोडशोऽध्यायः १६ छ वसिष्ठउवाच कामरूपेश्वरोयावच्छक्तिमान्सैन्यसंयुतः प्रातिष्ठतबलिं
शीघ्रंपूर्ववैरमनुस्मरन् १ तावद्राज्यंपरित्यज्यसप्तांगंनिर्गतःपुरात् सतस्माद्धूर्जटिवराद्राज्यभ्रष्टोऽप्यजायत २ भ्रम
न्महींचसकलांशोकामर्षसमन्वितः भ्रष्टराज्योगतश्रीकोनाविंदत्स्वस्तस्वंक्वचित् ३ गिरिशस्यप्रभावेणपातितःस्वपदाद
पि किंकरोतिनकोप्यस्तियोरुद्रेणविरुध्यते ४ पृष्ठोपिदशनाथेनपातितांहितथाबलात् वज्रिणास्तंभितंवज्रंक
स्तेनस्पर्धयेदिह ५ इंद्रादिपददाताचतस्मादन्योनविद्यते वराभिधारिणोदेवदैत्यदानवपन्नगाः ६ गिरित्वरितमा-
साद्ययस्यद्वारमुपासते आराधनाच्चयस्मात्तेस्वानिस्वानिपदानिच ७ लभंतेतेचशक्रद्यंतेमहिम्नायत्प्रसादतः यो
ददात्यत्रसर्वेशःपदानिसमहांत्यपि ८ सचेत्सदाह्यवयानिविषादःक्रियतेऽर्ककः सदुस्थजनवज्जातपादचारीगतानु
गः ९ व्यपेतकांतिर्निर्भूतिरेकाकीनिःश्वसन्मुहुः तदाभाविनिकल्याणीमार्कंडेयाश्रमेययौ १० दृष्टःसतुमुनिस्तेन
कृतातिथ्यउपाविशत् नमस्कृत्यमुनिंसोथकृतांजलिपुटःस्थितः ११ मार्कंडेयेनसंपृष्टःकिंमूलंव्यसनंतुते कस्मात्व-
मिहसंप्राप्तोराजन्नेवंविधांदशाम् १२ क्वतेगतंमहद्राज्यंक्वचतेमत्तदंतिनः क्वतेलक्ष्मीःक्वतेऽमात्याःसहायाःक्वचते
गताः १३ सर्वमेकपदेभ्रष्टंस्वप्नेदृष्टंप्रबोधवत् धिक्संपदोमहाकष्टैरर्जिताःक्षणभंगुराः १४ सत्कर्मवशगास्ताहि-
कर्मवापिक्षयात्मकम् सतीषुतासुगर्वोननविषादोगतासुच १५ कार्योनचिंतापरमाचंचलास्तानिरंतरम् वसिष्ठउवाच
इत्युक्तस्ततोराजामार्कंडेयेनधीमता १६ सर्वंनिवेदयांचक्रेस्वराज्यभ्रंशकारणम् कृतमाराधनंशंभोकामरूपाधि-

पेनतु १७ जितेनशत्रुणायद्वत्तोषितोभगवान्हरः तस्माच्चतद्वरप्राप्तिंसर्वमेवन्यवेदयत् १८ विनयावनतोभूत्वापुनःपप्र
च्छतंमुनिम् महर्षेऽथमहेशेनस्वपदाद्भ्रंशितःकथम् १९ अध्यापनंमहेशस्यनमयाविहितंक्वचित् जगत्यांबहवस्त
स्यशत्रवःसुहृदोऽपिच २० अपवर्ज्यजगत्सर्वंनिःकृपोभूत्कथंमयि वसिष्ठउवाच इतितस्यवचःश्रुत्वाप्रत्यभाषत
तंमुनिः २१ क्षणंध्यानपरोभूत्वाज्ञात्वातेनपुराकृतम् २२ इतिश्रीस्कंदपुराणेआषाढमासमाहात्म्येसप्तदशोऽध्या
यः १७ छ मार्कंडेयउवाच राजज्ञानामितत्सर्वंयत्त्वंवदसिबुद्धिमान् ईश्वरःफलदातास्तिकृतकर्मानुसा
रतः १ जन्मनीतस्तृतीयेत्वंराजाभूद्गौडमंडले ततस्त्वयाप्रमत्तेनब्राह्मणःपातितःपदात् २ तस्यसर्वंत्वयानीतंदेशा
न्निष्कासितःसच ततस्त्वंतेनपापेनमृतोनरकमाप्तवान् ३ बहुकालंतत्रदुःखंभुक्त्वानिष्पापतांगतः पूर्वपुण्यानुसारेण
जातस्त्वंब्राह्मणस्ततः ४ तत्रतप्तंतपःकष्टंबहुंश्चपरिवत्सरान् गंगातटंसमाश्रित्यकालिंद्यायत्रसंगमः ५ ततस्तत्रैव
निधनंप्रपन्नःकालपर्ययात् तपसादुष्करेणैवजर्जरंचकलेवरम् ६ तपसःप्रभवैःपुण्यैःगतस्त्वंविष्णुसन्निधौ तत्रास्थि
तश्चसुचिरंरममाणोयदृच्छया ७ ब्राह्मणाभिभवाज्जातंपापंयत्तस्यशेषतः विष्णुनाप्रेषितोभोक्तुंपुण्यशेषंनृपोऽभ
वं ८ यत्त्वयापातितोविप्रःस्वपदात्पूर्वजन्मनि तत्कर्मणःफलंत्वेतत्स्वयंयच्चसमागतम् ९ तन्नदेवानमनुजाददतेसु-
खदुःखयोः कारणंकेवलंकर्मयत्कृतंपूर्वजन्मनि १० ईशस्तदनुसारेणफलंयच्छतिदेहिनाम् अल्पंवायदिवानल्पं
शुभंवायदिवाऽशुभम् ११ एतदाकर्ण्यवाक्यंसमहर्षेःसारवत्तरम् राजाविज्ञापयामासतंमुनिंसर्वतोगतिम् १२
भगवन्कोऽप्युपायोऽस्तियेनस्यात्सुखभागहम् एवंगतेमहाभागयद्यस्तीतन्निगद्यताम् १३ इतिविज्ञापितस्तेनपुनर्ध्या
नपरोभवत् प्रणिधानेनतज्ज्ञात्वोपायंचाकथयत्तदा १४ राजस्त्वंतपतींगत्वाआषाढस्नानमाचर तस्मादुपायोनास्त्य-
न्यःस्वपदप्राप्तयेतव १५ कृतेचाषाढसवनेपरिपूर्णेकृतेद्विजैः निश्चितंस्वपदप्राप्तिस्तवराजन्भविष्यति १६ निरू-

पापपदभ्रंशेकामरूपाधिपेनते भगवानपिभूतेशो भाव्यमानःपुनःपुनः १७ तपत्याषाढसवनंवर्जयित्वावरंददौ समाधि
नामयादृष्टएषोर्थः कथितस्तव १८ संपादयैनंराजेंद्र यदिस्वपदमिच्छसि इत्युक्तस्तेनमुनिनामार्कंडेयेनभूमिपः १९ त-
माप्यज्ञानमस्कृत्यगृहीताशिस्ततोवशी ययौससत्वरंतापीमाषाढस्नानहेतवे २० दृष्ट्वातापींनमस्कृत्यतुष्टावसवितुःसु
ताम् जगतःपापकोट्योघप्रक्षालकपटूदकाम् २१ द्विजैर्जुष्टानिसततंसंहतैर्वनवासिभिः तानिपीत्वाचचाभांसितृष्णाक
स्यभवेत्पुनः २२ पीड्यमानान्नरान्दृष्ट्वानितांतंपापकर्मभिः तेषांपापविनाशायजानामित्वामिहागतः २३ कामधुक्
श्रूयतेयत्रसापरास्वर्कामधुक् सर्वेषांत्वंतुलोकानांकामदासिमहानदि २४ यदापरास्तरंगिण्योजायंतेस्पर्शनाक्षमाः
त्वदबुस्नानमाहात्म्यंत्वदत्यर्थंविशिष्यते २५ यदाषाढेतवजलैःपूताःकेतन्नमानवाः यथाभिलषितंप्राप्तानकामंरविनंद
ने २६ नामृतत्वंकिलभतेतवाषाढनिषेवणात् अमरत्वंनराःप्राप्यक्रीडंतित्रिदिशेःसह २७ इतिस्तुत्वाततोदेवींतापीं
दिनकरात्मजाम् आषाढमाससवनंराजाकर्तुंप्रचक्रमे २८ इतिश्रीस्कंदपुराणेआषाढमासमाहात्म्ये अष्टाद
शोऽध्यायः १८ छ वसिष्ठउवाच ज्येष्ठस्यैवदशम्यादौकृत्वाथविधिपूर्वकम् संपूज्यतपतींदेवींभक्त्या
परमयान्वितः १ प्रातर्मध्येतथासायंविदधेस्नानमादितः सञ्चिंतयन्नविरतंसूर्यमंडलगंहरिम् २ कमलासनसंस्थं
चचारुहासहिरण्मयम् केयूरकुंडलोपेतंशंखचक्रधरंविभुम् ३ पूजयित्वाततोभक्त्याविष्णुंतद्गतमानसः विष्णुपा
दोदकराज्ञोतुलसीदलसंयुतम् ४ चकारभोजनस्थानेसंध्योपासनपूर्वकम् एवंतेनकृतेराज्ञात्वाषाढसवनंपरम् ५
आषाढीपौर्णिमायांचविधिवत्संयतात्मनः ततःपुराणपुरुषःप्रत्यक्षःप्राहतंनृपम् ६ कृतंशतबलेस्नानंमत्पूजनस-
मन्वितम् तुष्टोस्मिकिंफलंतेस्तुस्नानादस्मात्तदुच्यता ७ शतबलिरुवाच तुष्टोसि यदिदेवेशपुराणपुरुषो
त्तम ममस्वपदसंप्राप्तिर्भविष्यतियथापुरा ८ श्रीभगवानुवाच अंतेचमत्पदावाप्तिर्भविताचनसंशयः कृ-

तंत्वयायत्सवनमाषाढेतपतीजले ९ तेनपूर्वकृतात्पापाद्विमुक्तोसित्रिभिर्दिनैः शेषैरहोभिर्नृपतेयदिच्छसिकरेऽस्तितत्
१० ताभ्यामाषाढकर्तॄणांदुर्लभंनास्तिकिंचन इत्युक्त्वाभगवान्देवः कर्मणांफलदायकः ११ अंतर्दधेसर्वभूतात्मात्रैलो
क्यव्यापकोहरिः राजापिपरमानंदस्वरूपंतमवेक्ष्यच १२ रोमांचितश्चहर्षाश्रुपूर्णदृष्टिरजायत अंतर्हितेभगवतितत
स्मिन्देवेजनार्दने १३ सोपिस्वनियमंपूर्णंविदधेस्नपनस्यच ततश्चस्वपुरंगत्वास्वराज्यंप्राप्यपूर्ववत् १४ तथैवदुस्तर
तरोरिपूणासमपद्यत तपस्याश्चप्रसादेनविष्णोःसालोक्यतांययौ १५ विष्णोराराधनेनाशुप्राप्यतेकिंनदुर्लभम् स्ना
त्वाषाढप्रभावोऽस्तिसस्नौसप्रतिवत्सरम् १६ आगत्यागत्यनियतोनियमाच्छ्रद्धयान्वितः १७ स्नानेसचादौपरमेत-
पत्यामाषाढमासस्यमहाप्रभावे राजाभृशंकांतिसमन्वितोभूत्संपूर्णबिंबः शरदीवसोमः १८ आषाढमासस्नपनेन-
सर्वैः पापैर्विमुक्तः सभृशंबभाषे ऐंद्रोगजःपल्वलकर्दमाक्तः संप्राप्यसेंद्रोसलिलान्वितस्याः १९ ततोमहेंद्रोनृ-
पतिंबभाषेत्वमेहिराजंस्त्रिदिवंव्रजामः ताप्याजलैरघौघपुंजदाहतीव्रैः पवित्रीकृतविग्रहोऽसि २० दिवंसमा
गत्यचभुंक्ष्वभोगांस्त्वयोत्तमैःकर्मभिरर्जितांश्च धन्योऽसिराजन्नितिपश्यहेतोः सुरासमस्तावसुधासमेताः २१
राजामहेंद्रंतदनुप्रणम्यकृतांजलिःप्रश्रयवानवादीत् अयंप्रसादोभगवंस्तपत्यास्तवानुकंप्योयदहंबभूव २२ ह
स्तेऽस्तिपीतप्रसभांबुराशिर्वाग्मात्रसंस्तंभितविंध्यपर्वतः अनुग्रहस्तेममकुंभयोनिर्माभूशयामासपदात्स्वकी
यात् २३ सर्वेसुरायेनममप्रसन्नामांनेतुमुर्वीतलमागताश्च धन्यीकृतोऽहंसहपूर्वजैस्तैःकुतोऽन्यथास्यादि-
तिसप्रतिष्ठा २४ इतिवचनमुदारंशक्रमुक्त्वानृपोसौतरणिकिरणवर्णंक्षिप्रमारुह्यदत्तम् सकलसुरविनेत्राऽभी
तिभाजाविमानंसहविबुधसमाजैःस्वर्गलोकंजगाम २५ कथितमितिकथाचेद्वत्समाहात्म्यमेतद्दिनकरतनयायाः
स्नानतोजायतेतत् व्रजहितशुचिमासेनीरदायानहेतौविकचजलजनीपेकेकिकेकातिरम्ये २६ इतिश्रीस्कं

१४

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

दपुराणेरुद्रस्कंदसंवादे आषाढमाहात्म्ये एकोनविंशोऽध्यायः १९ ६९ ईश्वरउवाच द्वावभूतांपुराविप्रौ
शूद्रवंशसमुद्भवौ पद्मकीतरवरकीतनामभ्यांविदितौभुवि १ बालभावात्तयोःप्रीतिरवर्धतदिनेदिने समानशीलव्य
सनौस्वभावेपिस्वच्छकयोः २ तयोःपरस्परंप्रीत्याददतोःप्रतिगृण्हतोः भुंजानयोर्भोजयतोःसध्रीचोःसततंतयोः ३
गुह्यकथयतोश्चापिपृच्छतोश्चपरस्परम् वर्धमानाधिकंप्रीतिर्दिवसेदिवसेभवत् ४ पतितैःसहसंसर्गैः स्त्रीषुलंपट
योस्तयोः नास्तिकानांचसंयोगाद्बभूवपुण्यनाशनम् ५ तत्संसर्गवशात्तौतुनास्तिकंधर्ममाश्रितौ लोकद्वयभ्रंशकरंम
हामोहसमुद्भवम् ६ एवंविधानिवाक्यानिश्रूयंतेतत्रपापिनाम् परस्त्रीपरवित्तेषुप्रसक्तानास्कराश्च ७ नास्तिपु
ण्यंचपापंचनिग्रहोयंनिरात्मकः भूतानासमवायोथयेयत्रचैनकारणम् ८ नास्तिचातःपरोलोकःतदर्थीकाःक्रिया-
जनाः यत्प्रत्यक्षंतदेवास्तिनास्तितद्भवतोन्यथा ९ यत्खाद्यतेपीयतेचस्करवंयदिहभुज्यते तदेवसत्यमपरंसर्वंमि
थ्यावधार्यताम् १० मृतःस्मरन्तिभुक्तंचयच्चदत्तंस्वबंधुभिः यातिस्वर्गंचनरकमित्येताधूर्तकल्पनाः ११ आश्रमा
जीवितार्थायकेशस्कपरिकल्पितः आत्मस्त्रीद्रव्यरक्षार्थैर्नरकेभीषयंतिच १२ देहाद्यदिपरोह्यात्माछिन्नेदेहेकथं
नसः दृश्यतेक्वापिगच्छत्वात्तस्मादात्मीयचापरः १३ नास्तिप्रमाणंप्रत्यक्षान्नापरंतच्चमृत्स्कतः अन्योमोक्षःसत्यव
द्भिर्दृष्टोलोकायतैरपि १४ साधारणेमनुष्यत्वेकेयंवर्णवयस्थितिः किमभक्ष्यंचभक्ष्यंचतद्भक्ष्यंयच्चरोचते १५
सर्वभोग्यंचयद्स्करमणीयमविश्रुतम् रममाणस्यतस्मिन्केपापपुण्येऽविजानताम् १६ परोपकारःकर्तव्यइ-
तिचेच्छास्त्रनिर्णयः स्त्रीणामनुपकारःकिंरक्षयाक्रियतेबुधैः १७ इत्यादिवाक्यैर्लोकानांमोहयंतौभृशंततः
संसत्कविदुषाभावावैष्णवावितिवादिनौ १८ रात्रौयदृच्छयापीत्वागाणिकावद्नासवम् प्रातःस्नात्वाधौतवस्त्रे
परिधायाऽहितेसिते १९ मृत्सिंडलांछितेभालेबाह्वोरुरसिकंठके पवित्रपाणीजपतस्तौमिथ्यामौनधारिणौ २०

प्रतारयामासतुस्तौदंभोनेतिसदाजनान् चक्रतुःसततंपापाचभक्ष्याणांचभक्षणम् २१ अगम्यायागुरोर्भ्रातुःपत्न्या
संगमनेरतौ परस्त्रियोंत्यजाद्यायास्तयोस्ताश्चस्वयोषितः २२ महाप्रतिग्रहरतौमहातीर्थेषुतेषुच रजकादिगृहेभुक्तं
गुप्तंताभ्यांयदृच्छया २३ तदाकलियुगस्यासीन्नतादृग्प्रसरोन्यथा एवंकलियुगेचेत्ताकथंस्यादितिशेषतः
२४ नयकोशांतकोराजायत्रपापरताजनाः एकपाद्यत्रधर्मोपिनसत्यंयत्रदृश्यते २५ पाखंडप्रसरोयत्र नकोशा
श्वश्रुतिक्रियाः तस्मिन्युगेसदाचारौकेनापिनचदंडितौ राज्ञःपुण्यवतोभावात्शास्तृतोदंड्यदंडिनः २६ नाकिंचि
त्पातकंनास्तिताभ्यांयत्रकृतंपुनः संततिर्नतयोरासीद्द्वारसंसर्गिणोः सदा २७ ततःकालेनकियतापशुक्रीतोगतौ
वनम् हंतुंमृगान्वागुरिकैःसार्द्धंमांसस्यभक्षणात् २८ तत्रव्याघ्रात्सविपदंप्राप पर्वतमस्तके नाग्निक्रियासम
भवन्नक्रियाचौर्ध्वदेहिकी २९ इतिश्रीस्कंदपुराणेरुद्रकार्तिकसंवादेआषाढमासमाहात्म्येविंशोऽध्यायः २०
ईश्वरउवाच ततोसौकिंकरैर्नीतोहत्वाबध्वायमांतिकम् ज्ञात्वायमेनतत्कर्मरौरवेपातितस्तदा १ यदाताम्रम
यीभूमिंवन्हितापेनतापिताम् वन्हिज्वालासमाकीर्णांदृक्षाप्राणापहारिणीम् २ योजनानांसहस्रेद्वेदीर्घांसाह
स्रमायताम् गर्ततुसार्द्धपुरुषायामिनींदुःखदायिनीम् ३ तत्रलोहमयैरुग्रैःशृंखलैर्हस्तपादयोः बध्वाक्षिप्तोपि
बहुशोवितपन्यमकिंकरैः ४ ततोदस्नंसमस्तत्वकुलोटनासमजायत शुष्यमाणोस्तमांसास्थिःसंजातबहुवेद
नः ५ उपरिस्थैःकिंकरैश्चहन्यमानःपुनःपुनः घटिकार्धक्षणमपितस्यजातुनचाभवत् ६ स्मरन्घोरंनिजंकर्म
नास्तिकाद्यव्यधीयत नापश्यच्छरणंतस्यकिंचिद्दुःखस्यमोक्षणे ७ अहर्निशंचिंतयंश्चनचोपायंसपश्यति
भृशंरुरोददुःखार्तोपात्यमानोनिरंतरम् ८ जीवन्निरक्तकंकर्मकर्मस्वंविद्यतेकथम् आत्मानंमस्फपालंभोनैवव
दतिसर्वदा ९ एवंसनिरयेमग्नोभुंक्तेकष्टंस्वकर्मतः अथासौखरमित्रोपिस्वमित्रंपंचतांगतम् १० श्रुत्वाव्यलप

१ अकारि

दत्सर्येशिथिलोजीवितोभवत् कियद्दिनानिशोचित्वापश्चात्स्वस्थोऽभिजायत ११ तथैवचनिजंकर्मपापरूपंचकार·
: तत्रतत्रतदायातियत्रलोकाःकुमार्गगाः १२ भोजनाच्छादनस्त्रीभिस्तसत्कुर्वंतिभक्तितः तदादेशाच्चतेसर्वेभुंज
तेस्त्रीपरस्परम् १३ निःशंकाश्चमिथोच्छिष्टंखादंतिचपिबंतिच वर्तमानःसइत्येवंकदाचिद्व्रजत्पुरात् १४
सदूरंवर्त्मनिस्तेनैर्निघ्नोवित्तस्यकारणात् तस्यापिनाभवत्कापिदाहाद्यावैदिकक्रियाः १५ तथैवकिंकरैर्बद्ध्वासोऽपि
नीतोयमातिकम् पश्चान्नीतस्तत्रयत्रासीत्तत्रैवयमशासनात् १६ सोपिक्षिप्तोभृशंक्रूरकिंकरैर्विलपन्मुहुः हन्यमाने
महाघोरैर्नरकेमिलितौपुरः १७ निंदंतौस्वकृतंकर्मक्रंदंतौचपुनःपुनः क्षुत्तृड्भ्यांयुध्यमानौतौपतितौदुःखसागरे
१८ अत्यार्तावल्पचैतन्यौदह्यंतौरौरवाग्निना साहंकारपदैर्दीनौताड्यमानौप्रतिक्षणे १९ सत्यक्षमानौदुर्वाक्यैः
कंपमानौभयातुरौ नरकांतमपश्यंतौवर्षाणामपिकोटिभिः २० मर्त्यलोकेसुखमभूत्पापकर्मप्रकुर्वताम् तद्विपाको
महादुःखकारकोनरकोऽभवत् २१ स्यादत्रपापिनांसौख्यंपापंकर्मप्रकुर्वताम् तेषान्तुनिरयेकष्टःपरिपाकोदुरत्य
यः २२ पुण्यकर्मकृतांलोकेकष्टंस्याच्चपदेपदे अत्यंतसुखसंप्राप्तिःस्वर्गलोकेतुजायते २३ पापकर्मकृतां·
तेषांतत्क्षणंह्युपपद्यते फलपाकेमहादुःखंयत्रकल्पायतेक्षणः २४ अर्थहीनपरेलोकेसुखंक्षणिकमेवच जी·
वितंचंचलंतरंसर्वंजानंतिमानवाः २५ कामादिकैस्तथाप्येतेजानंतोपिबलादिह कार्यंतेकर्मकिमपिदुस्तरंयद्यु
रपि २६ याखूराक्रितभार्यातुत्यक्त्वास्वांस्वपितुर्गृहे सत्संगतिवशात्साचनपापातिक्रमभ्यगात् २७ तस्याःस्वजन·
कोविप्रःपुण्यकर्मपरायणः श्रुतिस्मृतिपुराणार्थपापाद्दूरेपथिस्थितः २८ तद्गृहेसास्थितासाध्वीसर्वथाविजितेंद्रि·
भवांतरकृतंकर्मनिंदंतीस्वपतिंनच २९ ततस्तुस्वपतिंश्रुत्वामृत्योर्वशमुपागतम् विकेशाव्रतिनीभूत्वातपस्त
पेसुदुष्करम् ३० परिधत्तेनवसनंरक्तंचव्रतधारिणी स्निग्धस्नानंनकुरुतेभूशय्यापत्रभोजनी ३१ मासोपवासान्कु

रुतेकृच्छ्राणिविविधानिच एवंकालंनियंतीचतपैश्चविविधैरपि ३२ सायद्भर्त्तारमुद्दिश्यददात्यन्नंचवारिच नोपतिष्ठति तत्तस्यअंतरिक्षेविनश्यति ३३ पिंडप्रदानादिभिर्यद्यपिश्रद्धासमन्वितम् यत्किंचिद्दीयतेतच्च पापिनांनोपतिष्ठति ३४ इतिश्रीस्कंदपुराणेरुद्रस्कंदसंवादेआषाढमाहात्म्येएकविंशोऽध्यायः २१ छ ईश्वरउवाच कदाचिदथ साहृक्षासार्थैरविसुतांप्रति गच्छंतमतिवेगेन शुचिस्नानायभक्तितः १ तेनसार्थेनसासार्द्धंसंश्रुत्यस्नानजंफलम् जगामसत्वरात्हृष्टातापींप्रतिमहानदीम् २ तत्रसाव्रतिनीस्नात्वाचाषाढेतपतीजले मासंयावद्भिराहाराचैकाग्रस्थितमानसा ३ स्नानंसमाप्यसाविप्रान्भोजयित्वातपस्विनी अन्येद्युरपिविप्रान्सानिमंत्र्यचतथार्पयत् ४ श्राद्धंकृत्वाकृताषाढफलंपत्युर्ददावथ पश्चात्तान्भोजयामासमिष्टान्नैःश्रद्धयान्विता ५ वसुरुद्रादित्यसुताःपितरःश्राद्धदेवताः तागत्वाकथयामासुस्तत्पुण्यमंतकायच ६ तथाषाढेचयत्स्नात्वास्वभर्त्रेश्रद्धयाददौ यमस्तच्चित्रगुप्तायविचार्यचमहाफल ७ स्वकंपुरुषमाकार्यप्रोवाचविनयान्वितः आदिदेशाथवेगेनयात्वाकृष्यचरौरवात् ८ नीयतांसविमानेनपशुक्रीतस्त्रिविष्टपम् निष्कल्मषोयःसंपन्नःशुचिःस्नातश्चपुण्यभाक् ९ स्नात्वातपत्यामेतस्यपत्न्यादत्तंफलंमहत् तस्माज्जातश्चसस्वर्गेभुक्त्वाभोगान्मनोरथान् १० कल्पेनापिनचैकेनतस्यपुण्यस्यसंक्षयः अन्यानिसर्वपुण्यानिक्षीयंतेकिलभोगतः ११ अत्रयत्क्रियतेपुण्यमाषाढेतपतीजले तस्यपुण्यस्यनांतोस्तिभोगात्कल्पशतैरपि १२ ततोसौ धर्मराजस्यवाक्येनत्वरयान्वितः यात्वाचतत्समुद्धृत्यरौरवाद्दृशदारुणात् १३ विमानवरमारोप्यजातंदिव्यशरीरकम् दिव्यांगरागवस्त्रंचदिव्यचंदनचर्चितम् १४ दिव्यवस्त्रपरीधानंदिव्यमाल्योपशोभितम् शासनाद्धर्मराजस्यनिनायत्रिदिवंप्रति १५ हर्षितश्चपशुक्रीतोविस्मयोत्फुल्ललोचनः एतत्सत्यमसत्यंवास्वप्नःकिंवाऽऽगतोदृशः १६ किमेतन्ममपापस्यस्वर्गप्राप्तिःकथंभवेत् नास्तिमेसुकृतंकिंचित्सदैवपापकारिणः १७ सर्वथानैवपश्या-

मिस्वस्वर्गप्राप्तिकारणम् कोवासौपुरुषोयेनरौरवादहमुद्धृतः १८ क्षणंसुखंमेसंजातमेतत्किंमेप्रभावजम् एवं
चिन्तर्य्यबहुधापुरुषंतमभाषत १९ कस्त्वंकस्मादागतोऽसिकेनवाप्रेषितःशुभः केनाहंमोचितस्तस्माद्रौरवाद्दारुणाद्भृशम् २०
मयापुण्यस्यलेशोऽपिनकृतःपापबुद्धिना यत्नेनपातकमहोमयाप्रतिदिनंकृतम् २१ कस्मान्मेस्वर्गसंप्राप्तिरेषामेसंशयोमहान् किंवदाम्यथचत्वंकोमहापापीत्वबांधवः २२ येनाहंदारुणादस्माद्रौरवात्त्वसमुद्धृतः
यन्नकुर्यात्पिताभ्रातानपुत्रोनचबांधवः २३ कृपालुरपिनत्वन्यस्त्वयाहेलनयाकृतम् दत्वास्याम नृणोय
त्तेतन्नास्तिभुवनत्रये २४ इत्युक्तेतत्र सतदादेवदत्तउवाचतम् किंकरिष्यसिप्रश्नेनस्वर्गमेहिमयासह २५
भुंक्ष्वात्रविपुलान्भोगान्मानवैरतिदुर्लभान् श्रुत्यनपुण्यजनितान्कालावधिविवर्जितान् २६ अथवाश्रवणेच्छातेतच्छृणुष्ववदामिते
यमस्यपुरुषमात्वंतद्गृहाच्चसमागतम् २७ तेनचप्रेषितंविद्धितद्वाक्येनविमोचितः
स्वर्गंचनीयसेतद्वदितितेकथितंमया २८ इतिश्रीस्कंदपुराणेआषाढमासमाहात्म्येद्वाविंशोऽध्यायः २२

ईश्वरउवाच इतिदूतवचःश्रुत्वापशक्रीतःपुनस्तदा उवाचपुनरप्यात्मन्ममैतद्धितकारकम् १ म
ममित्रंखरक्रीत :पत्यमानोस्तिरौरवे मयातेनचसंभूयःपातकंबहुशःकृतम् २ कुमृत्युरपितुल्योऽभून्नतुदा
हादिकाःक्रियाः तस्याप्यासीद्रौरवश्चद्वयोरप्यभवत्समः ३ त्यक्तःकथंसतत्रैवकस्माच्चाहंविमोचितः एतन्मेका
रणंदेवदूतंवदयथातथा ४ दूतउवाच स्वर्गस्यकारणंश्रोतुमिच्छातेतच्छृणुष्वमे याचतेस्तिशुभाभार्या
श्रोत्रियाणांकुलोद्भवा ५ आषाढेस्नपनतस्यास्तपत्याःपापनाशनम् तस्यपुण्यंतयादत्तंतुभ्यंब्राह्मणसन्निधौ
६ तत्पुण्यंमहदज्ञोयीधर्मराजेनतत्क्षणात् मोचितोनरकाद्घोरात्कल्पभोगात्सुदुःखभाक् ७ आषाढपुण्यदानेनमोचितस्त्वंस्वभार्यया
खरक्रीतामोचिकस्त्वइहकोपिनविद्यते ८ तस्माद्वर्षसहस्राणिपतितो

सौहिरौरवे पीड्यमानोनिजंकर्मभुक्त्वायाद्धिहितंपुरा ९ आषाढस्नपनस्यैतत्फलंस्याद्विपुलंदिवि नित्यंरमस्वभुंजानो
यावत्कल्पव्यवस्थितिः १० इतितद्वचसाप्रीतः पशक्रीतोभ्यधात्पुनः यमस्यानुचरोभूत्वादयालुस्त्वंविलोक्यसे ११ तत्ते-
किंचिदहंयाचेनान्यथाकुरुषेयदि यदाषाढस्यमेपुण्यमस्तिदत्तंतुभार्यया १२ अहंयस्याःप्रभावेननिर्गतोरौरवात्क्ष
णात् तदर्धपुण्यंदत्वायखरक्रीतोऽपिमोच्यते १३ नरकेदारुणेत्यक्त्वाकथमेतद्व्रजाम्यहम् भ्रातुरप्यधिकंयस्मा
द्धितस्सहचारिणम् १४ यद्यनेनसमंस्वर्गंयाम्यहंत्वत्प्रसादतः यत्तद्याचेऽत्रलिंबध्वानान्यथाकर्तुमर्हसि १५
उत्तमेघ्यफलायांचाकृस्यापीहनजायते इतिश्रुत्वादेवदूतःपुनस्तमित्यभाषत १६ ननेष्यसियदिस्वर्गंस्वामिन्त्वंप्रति
दीयताम् सवनार्धफलंतस्मैनिरयाद्येननिःसरेत् १७ ततोऽसौहृष्टमनसाददौपुण्यार्द्धमादृतः दत्तंपुण्यंदेव-
दूतःस्थापयित्वातुतंपथि १८ व्यावृत्यतुगृहीत्वातुतत्समीपमुपाययौ खरक्रीतेनसंयुज्यपशक्रीतस्तुहर्षितः
१९ तस्यपत्न्यायथादत्तंपुण्यमाषाढसंभवम् तद्विभज्ययथादत्तंतेनतस्मैस्वपुण्यतः २० खरक्रीतस्तथाहृष्टःप
शक्रीतस्यतांस्त्रियम् तुष्टावपरमप्रीत्याहर्षयुक्तेनचेतसा २१ अहोधन्याःस्त्रियस्ताश्चतारयंतिनिजपतिम्
:कष्टेभ्यःसमस्तेभ्योविहीनेभ्योविमोहितः २२ यदापितासंत्यजंतियदामाताचबांधवः तदापिनैवत्यजंति
ध्वीस्त्रीस्वपतिंपुनः २३ विवर्ततेस्मशानाच्चमाताभ्रातापितास्वसा मित्राणिबांधवाश्चैवसाध्वीस्त्रीननिवर्त-
ते २४ प्रियंकुर्वंतिसततंस्वभर्तुःकुलजाःस्त्रियः कायेनमनसावाचाप्राणैरपिविशेषतः २५ मृताभर्तास्वयं-
नमृतावाकथंचन सैवोद्धरतिभर्तारंतत्किमस्तिततोऽधिकम् २६ यादृक्षाःप्यथवाभर्तुइहसास्त्वायचजा
यते मंत्रीचमंत्रंदिशतिदासीवाराधयत्यपि २७ तस्यावदामिकियतोगुणान्सर्वगुणाधिकान् स्मरवहतुस्त्रिवर्ग
स्ययत्प्रकृष्टंहिकारणम् २८ तेधन्यामानवालोकेयेषांभार्यापतिव्रता अपिपातककर्माणःकिंपुनःश्रेयसीस्थि

ताः २९ साध्वीभार्यासमंनास्तिहितंलोकेषुकिंचन यस्याःप्रभावात्प्राप्यंतेसौख्यानीहपरत्रच ३० सत्यंतपस्सु
धृतोसिभार्ययासहितोमया अपिलक्षैश्चवर्षाणांनान्यथोद्धरणंभवेत् ३१ इहसर्वेषुकार्येषुस्त्रीभ्योन्यत्सा न
हि कार्येऽकार्येप्यनीशःसन्नंशार्धेनस्त्रियाहरेत् ३२ इतिश्रीस्कंदपुराणेरुद्रस्कंदसंवादेआषाढ॰ माहात्म्ये
त्रयोविंशोऽध्यायः २३ छ ईश्वरउवाच इतिस्तुत्वाततोमित्रंपरक्रीतमुवाचह पानक्यपित्वहंधन्यो
यस्यास्तित्वद्विधःसखा १ येनोद्धृतोहंनरकान्नितांतंदारुणादपि नकरोतिचयत्त्रातानपुत्रोनचबांधवः
२ यदृच्छाविष्टमनसायत्त्वयाहेलयाकृतम् अन्येपुमांसःसुलभाःसदाराश्चातिदुर्लभाः ३ यदुद्धारमांत्वंहि
नरकादतिदुःखदात् कल्पांतंपतितोयावदवस्थास्यनपत्यकः ४ ससूनुःपापकर्मापिपाल्यमानोनशोचति कल्पेवाप्यद्य
वापुत्रोमोचयिष्यतिमांध्रुवम् ५ नकश्चित्पिंडदोयस्यमहापातककर्मणः निर्गमेतिनिराशस्यतद्दुःखंवेत्ति
नापरः ६ भ्रात्रावासूनुनावाकिंकार्यंत्वनुपकारिणा परोपिहितकर्तायःसबंधुरितिनिश्चयः ७ अहंतुरौरवेमग्नो
निराशश्चनिजोद्धृतौ उद्धर्तात्वंतथोदारःनिजपुण्यार्धदायकः ८ दातुंनैवास्यपुण्यार्धमुत्सहेतनरोऽपरः त्वदृते
पुरुषव्याघ्रपरदुःखेनदुःखितः ९ इत्युक्त्वातंनिजंमित्रंदेवदूतस्यसन्निधौ देवप्रातिततोयातस्ताभ्यांसहमुदान्वि
तः १० देवदूतपुरस्कृत्यस्वर्गमार्गस्यदेशकम् गच्छंतौतौपरंहृष्टावित्यूचतुःपरस्परम् ११ दृष्ट्वारौरवमासाद्य
तस्मात्कष्टाद्विनिर्गतौ दृष्ट्वाप्राप्तंशश्चिरस्नानात्पुण्यंदत्तंतयामहत् १२ जन्ममानुष्यकंलब्ध्वायेनवांछितमाप्यते
व्यर्थीकृतंतदावाभ्यांनास्तिकत्वेनवर्धनात् १३ आःकोपिवेदमार्गेतंकल्पवृक्षंपरित्यजेत् त्वन्यधर्माचरणादकर्मपरिसेवया
१४ अहोमोहोमनुष्याणांश्रुतिधर्मपरायणम् परित्यज्यचनास्तिक्यंमृगतृष्णाजलार्थिना १५
आवाभ्यांयानिपापानिकृतानिसुमहांत्यपि कल्पांतेनापितैःप्राप्तोनरकोनैवतीर्यते १६ आःकोऽयंचमनुष्याणां

मविचारोमहानसौ यत्क्षणार्धसुखस्यार्थेसत्यतेनरकश्चिरम् १७ धिङ्नास्तिकान्दुराचारान्दुर्वृत्तान्मो-
हितान्जनान् संत्यज्यस्वस्वमार्गंयैः पापंक्रियतेनरैः १८ भूयस्तैर्मानवैःपापैर्यद्वातद्वाप्रकल्प्यते क्रियतेवातदर्थे
च्छंपापकष्टतरंहियत् १९ अतिगुप्तंनृभिःपापंपापिभिर्यद्विधीयते तदेवतद्यमोवेत्तिद्रष्टायं पुण्यपापयोः २० येच
पुण्यमकुर्वंतोवेदबाह्यक्रियापराः यमेनपरिपीड्यंतेदारुणंनिरयंगताः २१ वैदिकोयःसदाचारःसनूनंसर्वकाम
दः पूर्वैःपूर्वतरैर्जुष्टःसकथंत्यज्यतेबुधैः २२ येपुण्यकर्मकुर्वंतिवेदोक्तनियमादृताः लोकद्वयेतेपूज्यंतेलभंतेवांछि
तंसुखम् २३ वेदोक्तकर्मकर्तव्यंपूज्योविष्णुःसनातनः त्यक्तव्याविषयासक्तिर्जयेत्कामादिकान्रिपून् २४ एष
एवपरोधर्मएतदाश्रयिणांनृणाम् इहलोकेपरस्मिन्वाबद्धोपिनहिबद्ध्यते २५ देहसंबंधिनःसर्वेभ्रातृपुत्रादयस्त्वि
ह तस्मिन्गतेथकस्यैतेसंतुसंबंधभाजिनः २६ पुत्राद्याःप्रियाःसर्वेस्वात्मकामायकेवलम् आत्मकामोनयत्रास्ति-
प्रेमस्तत्रनविद्यते २७ कस्यार्थेक्रियतेपापंयेनात्माबाध्यतेदृढम् नरकेपच्यतेयावद्यावदाभूतसंप्लवम् २८ भारतं
वर्षमासाद्यहित्वासुकृतकर्मयः कुरुतेपातकंकर्मनिजक्लेशायकेवलम् २९ नरेणागत्यभूमिंचयत्रैवोपार्ज्यतेदृ-
यम् पापंपुण्यंचनान्यत्रतत्रकिंपापमर्ज्यते ३० रोहणंसमुपागम्यरत्नराशिंसमूल्यकम् त्यक्त्वापाषाणशकलानाद
त्तेसविमूढधीः ३१ अहोमोहोमनुष्याणांकोपिसंसारवर्तिनाम् येनामृतंपरित्यज्यभुज्यतेविषमादरात् ३२
अन्येकिमर्थंगत्वैतेकुर्वाणाःकर्मपातकम् आवाभ्यांतत्कृतंकर्मयेनावांनिरयंगतौ ३३ नृणांमृतौमहादुःखंमहा
दुःखंचजन्मनि बाल्यतारुण्यवृद्धत्वेष्वपिदुःखंतथैवतत् ३४ तत्ररागाच्चकुरुतेपातकंयदिमानवः कल्पंयावत्त
तोदुःखंतत्कुतोजन्मिनासुखम् ३५ तस्मादेतत्परित्यज्यमुक्तिंवांछंतिसूरयः ३६ मुदितावितरेतरंवचोनिगदंतौस-
हतेनजग्मतुः सुरसद्मपतंगजाजलस्नपनापादितभोगभुक्तये ३७ पत्योःस्वर्गंयातमात्रेचतस्यभार्यास्त्वमेकेचि

दित्येवमाहुः भद्रेभर्तारौरवेपच्यमानोलब्धापुण्यंस्नानजंनिर्गतश्च ३८ नाप्याषाढस्नानपुण्येनतुल्यंनास्तीहान्यद्येन
कल्पांतभोग्यांम् हित्वासद्योदारुणौरौरवांतंप्राप्तः स्वर्गेत्वत्पतिर्मित्रयुक्तम् ३९ पापवान्निजपतिर्यथात्वयासाधि-
साधुनरकात्समुद्धृतः ईदृशीभवतिकापिगेहिनीचेद्भवत्यबहुला क्वचित्कचित् ५० सप्तमेवभवबुद्ध्यतंततोदृष्टस्व
यंतनयाप्रभावर्या स्नायतेस्मसततंतयाशुचौवत्सरान्दशचसप्तमादरात् ५१ इत्यथप्रभुलवतीविनिद्रितापश्यति
स्मपुरतोनकिंचन स्वप्नकारणमपृच्छदाप्लुताब्राह्मणानतिविशारदान्मगे ५२ मासलंघनविधेश्चदानतःस्नानतो
ऽपिकृतपुण्यसंचया जीवितंसमगमत्तपस्विनीभर्तृलोकमथसत्वरययौ ५३ आसाद्यस्वपतिमुदनयद्भूरिपुण्य
प्रभावात्स्वर्गाल्लोकादपगतभयंवैष्णवंधामयत्र तत्राकल्पस्वपतिसहितास्वार्जितानांक्षयात्सा भोगासक्ताभुवन
पतिनाप्रीतिदत्तानभुक्तम् ५४ इतिदुरितविनाशिस्नानमाहात्म्यमुक्तंदिनमणितनयायांमासिचाषाढसंज्ञे श्र
वहितकृतबुद्धिर्मानवोयःशृणोतिप्रतिदिनमयसोपिस्नानषष्ठांशभाक्स्यात् ५५ इतिश्रीस्कंदपुराणेआषा
ढमासमाहात्म्येईश्वरस्कंदसंवादेचतुर्विंशोऽध्यायः २४ छ ईश्वरउवाच अथासीद्ब्राह्मणःको
पिनाम्नालांगलवर्द्धनः धनवांश्चाहृदेशीयःकृष्याजीवीनिरंतरम् १ सवृद्धत्वात्त्यक्तधनःपुत्रैर्निष्कासितागृहात्
भैक्ष्यवृत्तिस्ततोजातोब्राह्मणोदुःखपीडितः २ सगत्वातपतीतीरं तत्रकृत्वामठंशुभम् उवासतत्रभैक्ष्यंसम्भो-
मान्नेनकरोतिसः ३ कणानादायभैक्ष्यस्यस्नानंकृत्वापचत्यसौ देवतापितृभूतेभ्योदत्वाभुंक्तेचनित्यशः ४ एवंस्थि
तेनत्वाषाढेतेनस्नातास्तुविंशतिः एकदातस्यविप्रस्यस्नानार्थीकोपिचाडवः ५ तस्यमध्यामुत्तरितः तीर्थेषुस्नान
माचरत् ततिलाननुज्ञाप्यग्रहील्लांगलवर्धनः ६ तर्पणार्थंनलोभेनतांश्चप्रसृतिमात्रकान् तीर्थेतिलापहर
णात्पातकंयदजायत ७ तत्पातकवज्रलेपोनकेनापिविनश्यति ततःसनिर्धनोविप्रः कुर्वंस्ताप्याःप्रदक्षिणां

८ ततःकालेनमहतामृतोलांगलवर्धनः तापीतटेगृहीत्वातुयमदूतैर्यमांतिकम् ९ नियतेस्मततोधर्मराजःपप्र
च्छलेखकान् कियच्चपुण्यमस्यास्तिकियदस्यास्तिपातकम् १० विलोक्यकथ्यतांसर्वमेतन्मेतुत्वरान्वितैः धर्मराजवचः
श्रुत्वाप्रत्यभाषंतलेखकाः ११ अनेनप्रथमंपापंयत्कृतंकृषिकर्मणा तत्सर्वंविलययातितापीस्नानप्रभावतः
१२ यच्चतापीतटेतेनपातकंतिलचौर्यतः क्रियतेस्मतदेवास्तिनान्यत्किंचिन्नविद्यते १३ तच्चास्याप्यल्पमेवास्तियन्न
लोभाद्व्यधीयत ततोविमृश्यतैःसार्द्धंधर्मराजोऽथबुद्धिमान् १४ तत्पापस्यविशुद्ध्यर्थंनरकंवीक्षणात्ततः तस्य
चाज्ञापयामासदेवदूतंदिदेशच १५ इतिश्रीस्कंदपुराणेईश्वरस्कंदसंवादेआषाढमासमाहात्म्येपंचविंशो
ऽध्यायः २५ छ ईश्वरउवाच ततोसौदेवदूतेनमाहात्म्यान्नरकेक्षणे. ततश्चभ्रामितःसर्वान्नरकानतिदारुणान्
१ हन्यंतेयत्रतेजीवाःपातकैर्बहुभिःसदा निंदतःस्वकृतंकर्मक्रंदतश्चपुनःपुनः २ सतान्
तथाविधान्दृष्ट्वामार्यमाणान्मुहुर्मुहुः यमदूतमथोवाचकृपयापरयान्वितः ३ कानिकानिचपापानिकृ
तान्यैतैर्महीतले यएवंविविधैर्घातैर्हन्यतेचपुनःपुनः ४ एतेषांतानिपापानिब्रूहिमेयमसेवक एतस्यचवचः
श्रुत्वाबभाषेयमकिंकरः ५ यैश्चपित्रोःकृतोभेदःकृतोवापितृपुत्रयोः दंपत्योर्मित्रयोर्वापितथान्येषांभुविस्थि
तः ६ दूतैर्यमस्यपीड्यंतेकाष्ठाभ्यांपार्श्वयोर्द्वयोः क्रकचैःपीड्यमानास्तेदृश्यंतेऽत्रसुदारुणम् ७ आकृष्टा
यैःपितामातागुरवोब्राह्मणास्तथा असंख्याताःकृतादोषाःसाधूनांसंयतात्मनाम् ८ विदार्यजठरंतेहिहन्यंते
लोहशंकुभिः कराभ्यांयैःपरद्रव्यंहृतंस्पृष्टाःपरस्त्रियः ९ छिन्नाजाताःपुनश्छिन्नाःक्रियंतेतत्कराक्षरैः का
मातुरैर्मर्त्यलोकेयैराःस्पृष्टाःपरस्त्रियः १० आलिंगयंतितान्दूतालोहभूमिशिखिद्रुता निष्ठीवनंकृतंयैस्तुदेवतायतने
जले ११ उल्मुकानिमुखेतेषांक्षिपंत्येतेपुनःपुनः यैश्चापिपितरोवृद्धाब्राह्मणाधेनवस्तथा १२ पादप्रहाराभिहता-

छिद्यंतेलंतदंघ्रयः ब्राह्मणानांगुरूणांचगवांक्रोधवशानुगैः १३ प्रहृतास्तेमुद्गरैश्च हन्यंतेमस्तकेसकृत् अभोज्या
नांग्रहेभुक्तंब्राह्मणैर्यैस्तुलोभतः १४ तेषांमुखेतुक्षिप्यंतेज्वालांतेलोहगोलकाः कृतंपापमयतस्यवैरभक्ष्यस्यभक्षणम्
१५ वमतोंत्राणि हन्यंतेतएते भृशपीडिताः पुनःपुनश्चहन्यंतेशप्यंतेचपुनःपुनः १६ ब्राह्मणानांनिहंतारोवदताक्षप
णागिरः स्वर्णस्तेयिनामेषांकिंकरैरपिघातकैः १७ उत्तमांगानिचूर्ण्यंतेजायंतेभूयएवच ब्राह्मणैर्यैःसुरापीताकाम
तोप्यविशंकितैः १८ ज्वलत्ताम्ररसंतेत्रपाय्यंतेयमकिंकरैः प्रसभंपातयित्वाथलोहैःसंदंशकैर्मुखम् उत्पाट्यनिगडैर्ब-
ध्वाहस्तयोःपादयोर्भृशम् गुरुस्त्रीणांतुभोक्तातल्लिंगंछित्वासमुष्ककं २० लिंगस्रोतसिहन्यंतेप्रज्वलल्लोहशंकवः
महापातकिभिःसार्द्धंनराःसंसर्गकारिणः २१ क्षिपंतिक्षारकुंडेषुकृत्वासर्गांविवक्षितान् गवांचवधकर्तारःसंप्रेक्ष्यंते
शिलातले २२ स्फुटितास्थिवसामांसाक्रंदंतश्चदिवानिशं स्त्रीघातकानामध्यानिपाटयित्वार्यकिंकरैः २३ पाषाणै
श्चप्रपूर्यंतेज्वलद्भिरतिदुःसहैः तप्तेकटाहेपच्यंतेबालघातंकृतस्तुयैः २४ तद्व्यथयाम्रियंतेचजीव्यंतेचपुनस्तथा शू
लप्रोताश्चतिष्ठंतिभ्रूणप्रायनराधमाः २५ लोहतुंडैस्तुद्यमानावायसैरतिदारुणैः मार्यंतेथचजीव्यंतेजीवानांघातकामु
काः २६ लोहदंतैःश्वभिश्चान्यैर्भुक्तमांसास्थिमेदसः जघ्नुःकेवलमात्मार्थंयेपशून्निर्दयानराः २७ जीवतामेवमांसानिते-
षांखादंतिराक्षसाः येविप्रनारीर्गृण्हंतिपरद्रव्यंनराधमाः २८ आकार्यताभोजनार्थंमुखेवह्निंक्षिपंतिच जिह्वातालुगले
दग्धावेदनाभृशमूर्छिताः २९ पतिताश्चाथदृश्यंतेवेष्ट्यमानाअनेकशः छलेनपरवित्तानियैर्हृतानिचलोभतः ३० तएते
कृत्तहन्मांसाश्चेष्टंतेपतिताभुवि फलितानांपुष्पितानांछेत्तारोयेचशाखिनाम् ३१ क्रियंतेखंडशस्तत्रनिष्कृपैर्यमकिंकरैः
यैःपरेषांगृहेवह्निःप्रक्षिप्तःक्रोधलोभतः ३२ नखप्रभृतिदह्यंतेमंदमंदंविरागिणः गरदानांमुखेलोहशंकवोवह्निवत्कृताः
३३ मार्यंतेपशुवत्तेषांनिर्घृणैर्यमकिंकरैः एतेचान्नापहर्तारोबद्धास्तिष्ठंतिनित्यशः ३४ तीव्रयाक्षुधयाविष्टाविलपंतिपुनस्तरां

तैलेक्षुरसहर्तॄणांयंत्रेनिष्पीड्यकिंकरैः ३५ पातयंतिगलेमांसंक्रंदंतीर्नितरांमुहुः धातूनामपिहर्तॄणांयंत्रमारोप्यपीडिता
न् ३६ आकर्षंतितरांधातून्दारुणायमकिंकराः स्त्रियोपिहृश्यपापेननरकेषुदुरत्ययम् ३७ सहंतेयातनांयासींतादृशा
मपिदारुणाम् अपिस्वल्पेकृतंपापंभुज्यमानंसुदारुणम् ३८ इहपश्यनरान्दारान्पाल्यमानान्मुहुर्मुहुः सुकरंपालकंक
र्मक्लीबानामपिकुर्वताम् ३९ शक्तैरपिसुदुर्भाग्यंभुंजानैर्निरयास्थितैः तस्मान्नपातकंकर्मकर्तव्यंसुहितेप्सुभिः ४०
मृत्युर्दूरेननरकंतुस्मादातिसमीपतः इतितेकथितंसर्वमनीषामार्तिकारणम् ४१ इतिश्रीस्कंदपुराणेआषाढ-
माहात्म्येईश्वरस्कंदसंवादेषड्विंशोऽध्यायः २६ छ ईश्वरउवाच नरकादर्शिताःसर्वेधर्मराजस्यशासनात्
व्रजामोधर्मराजस्यसकाशंतस्यचाज्ञया १ इत्युक्तःसततोयातोधर्मराजनिवेशनम् देवदूतेनसार्द्धंसम्प्रागच्छन्नथवीढि
तः २ धर्मराजेनतेजस्वीदीप्यमानोयथारविः अभ्युत्थायद्विजंतंतुबहुमानपुरःसरम् ३ तत्रोपवेशयामासधर्मराजो
निजासने तपस्याषाढजनितंतस्यपुण्यमनंतकम् ४ ज्ञात्वाविमानमानीयप्राहलांगलवर्धनम् त्वयार्जितोविष्णुलोकः
कालसंख्यानविद्यते ५ तत्रलोकेस्थितेवासःपार्श्वेभगवतोक्षयः कृतंचपातकंस्वल्पमिहानीतोऽसितत्कृते ६ दर्शि
तानरकास्तस्मात्तेनतद्विलयंगतम् प्रथमंभुज्यतेह्यत्रयदल्पंपुण्यपापयोः ७ तत्त्वयास्वल्पकंपापंभुक्तंदुर्गतिदर्शनात्
अतःशुद्धशरीरस्त्वंविमानंवरमारुह ८ याहिवैकुंठभुवनंभोगान्भुंक्ष्वयथेप्सितान् अर्जितंयत्त्वयामर्त्येविंशत्याषाढसं
भवम् ९ तदनंतफलंपुण्यंक्षीयतेनकदाचन धर्मराजवचःश्रुत्वाबभाषेब्राह्मणस्तदा १० यद्यनंतंममास्त्यत्रपुण्यंभास्क
रनंदन तेनपुण्येनसर्वेतेनिर्गच्छंतुसुदुर्गतेः ११ एतद्याचेधर्मराजकृपांकुरुममोपरि ममसर्वेणपुण्येनविंशत्याषाढजेनतु
१२ येदृष्टादुर्गतिंप्राप्तामयातानाशुमोचय तंप्रत्युवाचरविजःकिंतेषांवैकरिष्यसि १३ निजंत्वभुंक्ष्वसुकृतंतेचिरंसंतुना २०
रकाः स्वकृतंभुज्यतेकर्मपापंचाप्यथवाशुभम् १४ इहलोकेपरस्मिन्वानान्योभोक्तास्तिकश्चन इतिमत्वाव्रजक्षिप्रंविल

बोनात्रमन्यते १५ ततोसावंजलिंबध्वाधर्मराजमथाब्रवीत् कथंगच्छामिदेवेशमुक्त्वातानतिपीडितान् १६ यदिपुण्यंममा-
स्तेनदीयतांत्वयाविचारतः एतानापद्गतांस्त्यक्त्वाकिंपुण्येनप्रयोजनम् १७ क्षणंवाथक्षणार्द्धंवाममपुण्यानुसारतः पुनंतुसु-
खिनःसर्वेजंतवोनारकाअमी १८ एवंप्रसादंकुरुमेकृपांकुरुममोपरि एतावतामयाप्राप्तंसर्वंहिवांछितंफलम् १९ विष्णुलो-
केपिमेहर्षईदृशोनभविष्यति याद्दृगेतान्समालोक्यनरकेभ्योविनिर्गतान् २० तस्मादिमंप्रसादंमेकर्तुमर्हसिसूर्यज नरके-
भ्योविमुच्यैतान्दारुणेभ्यःप्रपीडितान् २१ नेष्यामिगतपुण्योहंनरकेभ्योयथाक्रमम् तेनपुण्यप्रभावेनसात्विकत्वमुपेयुषं
२२ इतिश्रीस्कंदपुराणेआषाढमाहात्म्येसप्तविंशोऽध्यायः २७ ॥ ईश्वरउवाच इतिश्रुत्वाथतेनोक्तंधर्मराजोब्र-
वीदिदम् अहोमहासाहसंकिंकरोषित्वंविचारय १ नरकार्तिक्षणमपिपरार्थेत्रसहेतुकः अमृतंहस्तसंप्राप्तंदत्वातेभ्यः
प्रमादतः २ प्रयत्नतःसमानीयांविषंकोत्राजिघ्रक्षता अविचार्यनकर्तव्यंकार्यंकिमपिपंडितैः ३ नरोविमृश्यकारीहि यावज्जी-
वंनशोचति तद्गच्छस्वसुखंचाप्तैःकिंकार्यंपापिभिस्तव ४ श्रुत्वोवाचपुनर्विप्रोधर्मराजमुखादिति सत्यमुक्तंत्वयादेवध-
र्मराजहितमम ५ परोपकारिणोभूयुरहितंनभवादृशाः किंतुलोकाभिरुचिर्भिन्नमेवाभिदृश्यते ६ सुखंवायदिवादुःखंत-
त्रहेतुर्नदेवताः यदत्ररोचतेयस्यतस्यतत्सततंहितम् ७ विष्णुलोकंपरित्यज्यनरकेगमनंपरम् एषामर्थेममाभीष्टंतत्किंस्वामि-
न्नपूर्यतेऽभीष्टदानंप्रवरंदेवानामपिदृश्यते तस्मादेतन्ममाभीष्टंप्रसीदक्रियतांप्रभो ९ इतितद्वचनंश्रुत्वाप्राहवैवस्वतोयमः
यद्येवमेवतेभीष्टंविलंबःक्रियतेकथं १० एभ्योदेहिनिजंपुण्यंविंशत्याषाढसंभवम् इतिप्रेतपतेर्वाक्यंश्रुत्वाहृष्टतनूरुहः ११
ददौपुण्यंतदातेभ्योविंशत्याषाढसंभवम् ततस्तेनरकेभ्यस्तेसर्वेचापिविनिर्गताः १२ तस्यपुण्यप्रभावेनतत्समीपमुपागताः
नरकोद्धारकंज्ञात्वातुष्टुवुस्तंमुदान्विताः १३ कृपानिधेवर्ण्यतेकिंतावकोगुणसागरः कतिदृष्टाश्रुतावानदयावंतोनराइह १४
त्वादृशोनश्रुतोदृष्टोदयावान्भुवनत्रये अंगीकृत्यपरार्थेयस्तद्दुष्कृतभवांव्यथाम् १५ पापान्नरानुद्धरतिसत्यमेवनचापरःका

रुण्यादुपकुर्वंतिसर्वेऽपिपुरुषाइह १६ विनैवकारणंकृत्वाह्युपकारपरागताः इहदुःखविनिर्मुक्तिस्त्वदन्योविदधातिकः
१७ कल्पांतनरकावासातारिताभवतावयम् अस्माकंतंपितानूनमिहसद्गतिदायकः १८ पितॄणांवचनेस्नेहंनधत्तेय
स्त्वयाधृतः सुखीभवनरश्रेष्ठकुरुपुण्यमहर्निशम् १९ दुर्गतानुद्धरसदाधर्मेतेस्तुसदामतिः अत्यंतपुण्यवान्भूयआपन्ना
र्तिहरःसदा २० सतांहिविभवोलोकेसर्वसाधारणोमतः इतितस्याशिषंदत्वागतास्तेपरमांगतिम् २१ ताप्यास्नानस्यपुण्ये
नविमुक्ताःसर्वपातकैः २२ इतिश्रीस्कंदपुराणेआषाढमाहात्म्येऽष्टाविंशोऽध्यायः २८ छ ईश्वरउवाच त·
तोस्यब्राह्मणस्याहयमलांगलवर्धनः प्रणम्यपरयावाचाहर्षबाष्पसमन्वितः १ भगवस्त्वत्प्रसादेनप्राप्तंसमभिवांछितं दे
वतासंगमात्किंकिंनाप्यतेचापिदुर्लभम् जगद्दंडधरःकस्त्वंक्वाहंकृषिकरोद्विजः २ मयिकोयंप्रसादस्ते येनत्वाहंदृष्टवानहं
मनोरथादपिपराकार्पीयंतावकीकृपा ३ यद्येतेममवाक्येननरकेभ्योविमोचिताः प्रासादेनानुज्ञातेननरकंहित्यजाम्यह
म् ४ मयाहिदत्तंस्वंपुण्यंगतपुण्योस्मिसांप्रतम् अथवाउदरंकस्यामातुर्यामिप्रसाद्यताम् ५ इतितस्यवचःश्रुत्वाधर्म·
राजोब्रवीत्पुनः गतपुण्योस्यहोकस्मात्त्वयापुण्यंकृतंबहु ६ प्रेतानिमान्मोचयित्वास्वपुण्यस्यव्ययेनतु स्वयंस्वकृत्यान·
रकाद्यएतेमोचितास्त्वया ७ त्वदन्यःकोऽपिशक्नोतिकर्मैतत्कर्तुमीदृशम् आत्मनःसुखमिच्छंतिसर्वेऽपिपरपीडया ८
अंगीकृत्यात्मनोदुःखंत्वयात्वन्यसुखंकृतम् तेनतेपरमांभक्तिंगतपुण्यंतदक्षयम् ९ व्रजविष्णोःपदंनित्यंदेवैरपिसुदुर्ल·
भम् यत्पदंयोगिभिर्गम्यंविष्णुध्यानपरायणैः १० यत्रगत्वानशोचंतिननिवृत्तिःकदाचन तत्पदंप्राप्यपरमंमोदस्वविष्णुस·
न्निधौ ११ अक्षयोविष्णुलोकस्तेजातोब्राह्मणसत्तम तपस्याषाढमासस्यस्नानपुण्यप्रभावतः १२ येनपुण्येनतेसर्वेमोचि
ताःपापकर्मणः स्वयंविष्णुपदंप्राप्तोयंलब्ध्वाननिवर्तते १३ अहोतीवप्रभावोयमाषाढस्नानसंभवः इत्युक्तोधर्मराजेनवि
प्रःपरमहर्षभाक् १४ तमापृच्छ्यनमस्कृत्यततोगंतुंप्रचक्रमे यावद्धियात्यसौविप्रोविमानंतावदाव्रजत् १५ विष्णुनाप्रेषि

तत्रसमानीतंहरेर्गणैः तेतंविमानमारोप्यशंखचक्रगदाधरम् १६ पीतांबरधरंकृत्वावनमालाविभूषितम् प्रतस्थिरेविष्णुलो
कंमानवैरतिदुर्लभम् १७ तत्पुरोदेवगंधर्वादेवागानपरंजगुः अप्सरसोप्यनृत्यंतगणास्तुर्याण्यवादयन् १८ शंखभेरीस्व-
नास्तत्रतथापटहानिस्वनाः ततस्तेविष्णुभवनंनिन्युस्तेवैष्णवागणाः १९ यत्रदेवोऽस्तिभगवान्पुराणपुरुषोव्ययः तंदृष्ट्वा
देवदेवस्यानंदंपरमंययौ २० प्रणम्यपरयाभक्त्यास्तोत्रमेतज्जगादच मंगलवर्धनउवाच त्वमात्मासर्वभूतानामे-
कएवपृथङ्नच २१ आकाशस्यैवतद्दृष्टमनेकत्वमुपाधिना इंद्रियाणामधीशस्त्वंचैतन्यंत्वंहिदेहिनाम् २२ सर्वचेष्टानि-
मित्तस्त्वंरविवत्त्वंनकर्मभाक् त्वमीशोविश्वकर्तात्वंमहेशस्त्वंचनिस्पृहः २३ अतर्क्यंहितवैश्वर्यंश्रुतयोभवतोगिरः स्वर्गदं-
मोक्षदंकर्मतच्चवेदप्रतिष्ठितं २४ सचवेदस्त्वदन्योनतस्मात्सर्वंत्वयिस्थितं चतुर्विंशतितत्वानिपुरुषःपंचविंशकः २५ उ-
दासीनश्चेतयितासत्वमेवनचान्यथा त्वयिदेवनिगद्यंतेभुवनानिचतुर्दश २६ निवसंतिचयेतत्रतत्सर्वंत्वद्विभूतयः भग-
वन्नेकएवत्वंनद्वितीयोस्तिकश्चन २७ इतितेनस्तुतोदेवस्तद्भक्त्याचतुतोषसः ददौगणत्वमतुलंतस्मैनित्यात्मसंनिधौ
२८ द्विजइतिसपरंपदंप्रयातोथदगमनीयमहोतपोभिरुग्रैः शुचिसवनमघापहंविधायद्युमणिसुतासलिलैर्मुनींद्रजुष्टैः
२९ इतिसकलमलापहंपरंयोनरइतिहासमिमंशृणोतिचैव सवनमघहरंशुचौतपस्यांविदधदसौलभतेकिलात्रचेष्टम्
३० इतिश्रीस्कंदपुराणेआषाढमाहात्म्येस्कंदईश्वरसंवादेएकोनत्रिंशोऽध्यायः २९ ७ इतिश्रीव्यंकटरामात्म-
जहरिकृष्णनिबंधितेबृहज्ज्योतिषार्णवेअष्टमेधर्मस्कंधेचतुर्थेमासमाहात्म्यस्तबकेआषाढमासमाहात्म्यकथननामचतुर्थमा-
हात्म्यंसंपूर्णम् ४ श्रीगोपालकृष्णोजयति श्रीसीतारामचंद्रार्पणमस्तु श्रीरस्तु·

२२

मुंबईमें· पं० श्रीधरशिवलालसलेमाबादकेइनोंके ज्ञानसागरछापखानामें छापकर प्रसिद्ध किया· सं०१९५४ श·१८०९ मि० फाल्गुनकृ० ७

इतिश्रीमासस्तवकेआषाढमाहात्म्यंसमाप्तं

अथश्रीमासस्तबकेश्रावणमासमांहात्म्यंप्रारंभः


सूत
संवाद
शौनक
शिव
सनत्कुमार
शिव
मंगलागौरी
पूजक
नृसिं
मा.
शनि
स्वर्णगौरीदेवी
पूजक
नागपूजन
रोहिनरा
ब्रह्मा
बुध-गुरुदेवता
पू०
इंद्राणी
इंद्र
पोल
गणपती
पू०
यज्ञोपवीतधारण
शीतला व्रत
ऋषिपू.
कृष्णजन्म

अथश्रावणमासमाहात्म्यानुक्रमणिका·

अध्याय	विषयाः
१	अथसूतंप्रति शौनकादीनांश्रेष्ठमासविषयप्रश्नः श्रावणमासमाहात्म्यंवर्णयितु सूतेन कृतः सनत्कुमार शंकरसंवादप्रस्तावः शंकरसनत्कुमारसंवादप्रारंभः सनत्कुमारकृतानारदस्तुतिः श्रावणस्यमाहात्म्यविषये प्रश्नश्च श्लोका· ४५
२	सामान्यतः श्रावणमासमाहात्म्यवर्णनम् श्रावणमाससंबंधिवारतिथिषुव्रतविशेषकथनम् तिथिदेवताकथनंच· श्लोकाः ४८
३	अस्मिन्मासेनक्तविधिः रुद्राभिषेक वर्णनम् पुष्पाणांलक्षपूजाविधिः दीपदानप्रशंसा· इष्टपदार्थत्यागविधिः मौनादिमाहात्म्यवर्णनम् श्लोकाः ५०
४	धारणापारणाव्रतकथनं· मासोपवासव्रतम् रुद्रवतिविधानं तत्रेतिहासकथनंच· श्लोका· ५२
५	कोटिलिंगादिपूजामाहात्म्यं· तत्प्रसंगेन ग्रहयज्ञकथनं अनोदनादिव्रतविधिः वारव्रतकथनांतर्गतंरविवारव्रतकथनम्· तत्रेतिहासः श्लोकाः ५६
६	सोमवारव्रतकथनंम्· श्लोकाः ३६
७	भौमवार मंगलागौरीव्रतकथनं तत्रेतिहासः श्लोकाः ८३
८	बुधवार गुरुवारयोर्व्रतकथनम्· श्लोकाः ४४
९	शुक्रवारव्रतकथनं तत्रेतिहासः श्लोकाः ६१
१०	शनिवारे नृसिंह हनुमच्छनीनांपूजाविधानंशनिपूजाविषये विशेषकथनम् श्लो० ४३
११	सोमवारयुतप्रतिपदिरोटकव्रतविधिः शुक्रवारयुतद्वितीयायां औदुंबरव्रतम्· श्लो ३६
१२	श्रावणशुक्लतृतीयायांस्वर्णगौरीव्रतविधिः श्लोका० ४४
१३	श्रावणशुक्लचतुर्थ्यां दूर्वागणपतिव्रतविधिः श्लोकाः ३९
१४	श्रावणशुक्लपंचम्यांनागव्रतविधिः श्लो ३४
१५	श्रावणशुक्लषष्ठ्यांसूपौदनव्रतविधिः श्लो ५९
१६	श्रावणशुक्लसप्तम्यां शीतलाव्रतविधिः श्लोकाः ५२
१७	श्रावणशुक्लअष्टम्यां देवीपवित्रारोपणव्रतविधिः श्लोकाः ४६
१८	श्रावणशुक्लदशम्यांआशाव्रतकथनं श्लो· २६

अथश्रावणमासमाहात्म्यानुक्रमणिका·

अध्याय· विषयाः
१९ श्रावणशुक्लकृष्णैकादशी व्रतविधिः द्वादश्यांविष्णुपवित्रारोपण विधिश्च· श्लो॰ ४७
२० श्रावणशुक्लत्रयोदश्यांचतुर्दश्यांचक्रमात् अनंगव्रतविधिः देवीपवित्रारोपणविधिश्च श्लोकाः ३९
२१ श्रावणशुक्लपूर्णिमायांउपाकर्मोत्सर्जनश्रवणाकर्म सर्पबलि· सभादीप हयग्रीवजयंती रक्षाबंधनविधिकथनं· श्लोकाः५०
२२ श्रावणकृष्णचतुर्थ्यांसंकष्टव्रतविधिः श्लो॰ ६३
२३ श्रावणकृष्णाष्टम्यां कृष्णजन्मव्रतविधिः श्लो·५०
२४ कृष्णजन्मव्रतविषये इतिहासकथनंश्लो.३२
२५ श्रावणअमायां पिठोराव्रतकथनं श्लो॰ ३४
२६ श्रावणअमायांवृ· पूजन· कुशग्रहणादिविधिः श्लोकाः ३८
२७ नदीनांरजोदोषनिर्णयः सिंहगोप्रसवशांतिविधिः मासपर्यंतप्रातःस्नानविधि माहात्म्यश्रवणफलम्· वाचकपूजनविधिः श्लोक· २७
२८ अगस्त्यार्घ्यविधिः श्लोकाः ४०
२९ व्रतकालनिर्णयः श्लोकाः ४६
३० उक्तव्रतानुक्रमणिका· श्लोक ३९

इतिश्रावणमासमाहात्म्यानुक्रमणिकासमाप्ता·

इतिश्रावणमासमाहात्म्यानुक्रमणिका समाप्ता·

श्रीगणेशायनमः अथश्रावणमासमाहात्म्यंलिख्यते शौनकउवाच सूतसूतमहाभागव्यासशिष्याकल्मष त्वदीयवदनांभोजान्नानाख्यानानिशृण्वताम् १ तृप्तिर्नजायतेभूयः श्रवणेच्छाप्रवर्धते कार्तिकस्यच माहात्म्यंतुलासंस्थेदिवाकरे २ माघमासस्यमाहात्म्यंमकरस्थेविभावसौ वैशाखमासमाहात्म्यंतथामेषगते रवौ ३ तत्रतत्रचयेधर्माःकथिताःसर्वशस्त्वया एतेभ्योप्यधिकःकश्चिन्मासश्चेत्तवसंमतः ४ धर्म्यईशप्रियो नित्यंतंत्वंकथयसांप्रतम् यच्छ्रुत्वापुनरन्यत्रश्रोतुमिच्छाननोभवेत् ५ श्रद्धालोःश्रोतुरग्रेतुवक्तागोप्यंनकार येत् ६ सूतउवाच शृणुध्वंमुनयःसर्वेभवतांवाक्यगौरवात् तुष्टोऽहंनचगोप्यंमेभवदग्रेतुकिंचन ७ अदांभिक्यंतथास्तिक्यमशठत्वंसुभक्तिता शुश्रूषत्वंविनीतत्वंब्रह्मण्यत्वंसुशीलता ८ ध्रुवत्वंचशुचित्वंचतप स्वित्वानुसूयते एतेद्वादशसंख्याकागुणाःश्रोतुःप्रकीर्तिताः ९

श्रीगणेशायनमः नारायणं नराध्यक्षं देवीं वागीश्वरं तथा नत्वाकुर्वे श्रीगुरुं च टीकामज्ञानबोधिनीं १ अथात्रादौ भगवान् शौनकः पुण्यतमस्य श्रावणमासस्य माहात्म्यं शुश्रूषुः तत्कथने सूतं प्रवर्तयितुं तद्गुणवर्णनपूर्वकं स्वस्यधारणाम्प्रदर्शयन् पृच्छति सूतसूतेति सार्द्धपंचभिः सूतसूतेतिवीप्सा स्वौत्सुक्यप्रदर्शनाय तस्य कथनाधिकारित्वं द्योतयति व्यासशिष्येति किंचाकल्मष कल्मषं पापं तद्रहित अस्माकमित्यध्याहारः १ तुलासंस्थे तुलाराशिस्थिते २ विभावसौ सूर्ये ३ ध्रियंते प्राणिनो यैस्ते धर्माः स्नानाद्याचाराः अधिकपुण्यतमः संमतः मान्यः ४ धर्म्यः धर्मप्रशस्तः ५ श्रद्धालोः भक्तिमतः क्तिमति श्रोतरि सति रहस्यमपि कथनीयमित्यर्थः कारयेदित्यत्र स्वार्थे णिच् कुर्यादित्यर्थः ६ गोप्यं रहस्यं ७ श्रोतुर्गुणानाह द्वाभ्यां अदांभिक्यं कपटराहितत्वं आस्तिक्यं अस्तिपरमेश्वर इति बुद्धिः अशठत्वं वंचनाभावः सुभक्तिता अव्यभिचारिणी भक्तिः शुश्रूषुत्वं श्रोतुमिच्छा विनीतत्वं नम्रता ब्रह्मण्यत्वं ब्राह्मणविषये पूज्यबुद्धिः सुशीलत्वं सरलता ८ ध्रुवत्वं निश्चितबुद्धित्वं शुचित्वं निर्मलांतःकरणं तपस्वित्वं विविधतपःकर्तृत्वं

तदुक्तंगीतासु देवद्विजगुरुप्राज्ञपूजनंशौचमार्जवं ब्रह्मचर्यमहिंसाचशारीरंतपउच्यते इत्यादिअनसूयता परगुणेषुदोषारोपाकरणम् ९ १० परमया अव्याभिचारिण्या ११ महाभाग भगानां षड्गुणानां समूहः भागं महद्भागंयस्य तत्संबुद्धिः तदुक्तं ऐश्वर्यस्य समग्रस्यः धर्मस्या यशसः श्रियः ज्ञानवैराग्ययोश्चैव षण्णांभगइतीरणं श्रुतानीत्यध्याहारः सर्वशः बहुविधा १२ १३ अत्यंतमितिपदं मध्यमणिन्यायेनोभयत्रसंबध्यते १४ अनंतफलंबहुफलमित्यर्थः तत्रत्यान्तस्मिन्मासेकर्त्तव्यान् चकारात्वक्तुमर्हसीति सम्बध्यते॰

तेसर्वेपिभवत्स्वेवतुष्टस्तत्वंब्रवीम्यतः सनत्कुमारोमेधावीधर्मजिज्ञासुरानतः १० ईश्वरंपरिपप्रच्छभक्त्या॰
परमयायुतः ११ सनत्कुमारउवाच देवदेवमहाभागयोगिध्येयपदांबुज व्रतानिबहुशस्त्वत्तःश्रुताध
र्माश्चसर्वशः १२ तथापिश्रोतुमिच्छेकावर्त्ततेहृदिसांप्रतम् द्वादशस्वपिमासेषुमासश्रेष्ठतमोऽस्तियः १३
तवप्रीतिकरोत्यंतंसिद्धिदःसर्वकर्मणाम् अन्यमासेकृतंकर्मतदेवास्मिन्कृतंयदि १४ स्यादनंतफलंदेव
तंमासंवक्तुमर्हसि तत्रत्यान्सर्वधर्मांश्चलोकानुग्रहकाम्यया १५ ईश्वरउवाच सनत्कुमारवक्ष्यामिसु
गोप्यमपिसुव्रत सुश्रूषुत्वेनभक्त्याचप्रीतोस्मिविधिनंदन १६ द्वादशस्वपिमासेषुश्रावणोमेतिवल्लभः श्र
वणार्हंयन्माहात्म्यंतेनासौश्रवणोमतः १७ श्रवणर्क्षेपौर्णमास्यांततोपिश्रावणःस्मृतः यस्यश्रवणमात्रेण
सिद्धिदःश्रावणोप्यतः १८

लोकेषु अनुग्रहस्य प्रसादस्य इच्छालोकानुग्रहकाम्या तया काम्यअतिइच्छार्थेकाम्यच् १५ सुतरां अत्यंतंगोप्यं गुप्तमपि कथयामि तत्रहेतुमाह सुव्रतेति शुश्रूषुत्वेन श्रोतुमिच्छया विधेर्ब्रह्मणः नंदनःपुत्रः तत्संबोधनम् १६ अतिवल्लभः प्रियतमः श्रावणइतिनाम्नः कारणत्रयमाह श्रवणार्हमितिसार्द्धेन १७ श्रवणर्क्षे श्रवणनक्षत्रम् १८

नभाइतितदपरनाम्नः कारणमाह स्वच्छत्वादिति नभस्तुल्यः आकाशसदृशः तत्रत्यधर्मगणनां तस्मिन्श्रावणेकर्तव्यानांधर्माणां प्रतानांगणनांसंख्यां शक्नुयात्समर्थोभवेत् अनेकानिवर्त्ततइत्यर्थः १९ यत्फलंद्रष्टुं ब्रह्माचतुर्मुखः अभवत् सहस्राक्षः इंद्रोवृषाः २० अनंतः शेषः सहस्रद्वयजिह्वकः सहस्राणांद्वयंतावत्यः जिह्वायस्यसः स्वार्थेकप् क्षमः समर्थः २१ कलाअंशतुल्यत्वं व्रतमयः व्रतस्वरूपः धर्ममयः धर्मस्वरूपः स्वरूपार्थेमयट् २२ तत्रकारणमाह नैकोपीति व्रतशून्यः व्रतरहितः २३ अर्थवादः प्राशस्त्यबोधकंवा

स्वच्छत्वाच्चनभस्तुल्योनभाइतिततःस्मृतः तत्रत्यधर्मगणनांकःकर्त्तुंशक्नुयाद्भुवि १९ सर्वतोयत्फलंद्रष्टुंचतुरास्योभवद्विधिः द्रष्टुंयत्फलमाहात्म्यंसहस्राक्षोभवद्वृषा २० अनंतोयत्फलंवक्तुंसहस्रद्वयजिह्वकः किंबहूक्तेनकोप्येतद्दृष्टुंवक्तुंचनक्षमः २१ एतत्कलामपिमुनेलभंतेनान्यमासकाः सर्वव्रतमयश्चैषःसर्वधर्ममयस्तथा २२ नैकोपिवासरोयत्रव्रतशून्यःप्रदृश्यते प्रायेणातिथयश्चापिव्रतवत्योत्तमासके: २३ अत्रोच्यतेमयायद्यदर्थवादोनसोत्रहि आर्तैर्जिज्ञासुभिर्भक्तैस्तथार्थार्थिमुमुक्षुभिः चतुर्विधैरपिजनैःसेव्यःस्वस्वेष्टकांक्षिभिः २४ सनत्कुमारउ० भगवन्यत्त्वयाप्रोक्तंव्रतशून्योनवासरः प्रायेणतिथिरप्यत्रतन्ममाचक्ष्वसत्तम २५ कस्यांतिथौकिंव्रतंस्यात्कस्मिन्वारेचकिंव्रतम् तत्रतत्राऽधिकारीकःकिंफलंकीदृशोविधिः २६ केनकेनापिचाचीर्णमुद्यापनविधिश्चकः प्रधानंपूजनंकुत्रजागरश्चापितद्विधिः २७ कोदेवःकुत्रपूज्यःस्यात्सामग्रीपूजनस्यका कस्यव्रतस्यकःकालस्तत्सर्वंकथयप्रभो २८ त्वत्प्रियश्चकथंमासःपवित्रःकेनहेतुना मासेऽस्मिन्नवतारःकःश्रेष्ठश्चाऽयंकुतोऽभवत् २९ अयं चतुर्विधजनैरपि

अयंसेव्यइत्याह आर्तैरिति आर्तैः रोगादिपीडितैः जिज्ञासुरिति भक्तैरित्यस्यविशेषणं अर्थार्थिभिः द्रव्यलिप्सुभिः मुमुक्षुभिश्च २४ आचक्ष्वकथय २५ विधिः अनुष्ठानपद्धतिः २६ आचीर्णंकृतं तमितिहासंवदेतिभावः २७ २८ २९ ३०

३० समाचक्ष्व सम्यक्ब्रूहि विस्तरतइत्यर्थः जनानांलोकानां तारणार्थायत्वत्पदप्राप्तये ३१ ३२ ३३ अन्येषांत्वद्भिन्नानां देवानांब्रह्मविष्णुमहेश्वराणांभयं तस्यआश्रयः स्थानभूतः तस्मिन्स्थितिर्वसति ३४ अघानांपापानांओघान्समूहान्हरति नाशयतीति तथाकरोति आदिदेवत्वेकारणांतरमाह प्रकृताविति प्रकृतौमूलकारणे वर्णाः रक्तपीतादयः यतस्त्वंकर्पूरइवगौरः शुभ्रः ततः शुक्ल-

अस्मिन्मासेचकेधर्माअनुष्ठेयावदप्रभो प्रश्नेऽपिचकियज्ज्ञानंममाज्ञस्यतवाऽग्रतः ३० अशेषेणसमाच
क्ष्वपृष्टादन्यच्चयद्भवेत् जनानांतारणार्थायकृपालोकृपयावद ३१ रवौसोमेभौमवारेबुधेस्फुरगुरौकवौ श
नैश्चरदिनेवापितत्सर्ववदमेविभो ३२ सर्वेषामादिभूतस्त्वमादिदेवस्ततःस्मृतः एकस्यविधिबाधाभ्याम
न्यबाधाविधीर्यथा ३३ अन्येषामल्पदेवत्वंमहादेवस्ततस्तथा देवत्रयाश्रयेश्वत्थेऽपर्यास्तेस्थितिस्तव ३४
शिवस्त्वंशुभरूपत्वादघौघहरणाद्धरः तवचैवादिदेवत्वेप्रमाणंशुक्लवर्णकः ३५ प्रकृतौशुक्लवर्णेन्येवर्णाः
स्युर्विकृतिंगताः यतःकर्पूरगौरस्त्वमादिदेवस्ततोह्यसि ३६ गणपत्याधारभूतान्मूलाधाराच्चतुर्दलात्
स्वाधिष्ठानाभिधात्पद्मात्षट्दलाद्ब्रह्मदैवतात् ३७ मणिपूराद्दशदलान्मंडलाद्विष्ण्वधिष्ठितात् ब्रह्माविष्णू
परिस्थत्वंवदतीदंचमुख्यताम् ३८ एकस्यतेऽर्चनाद्देवपंचायतनपूजनम् जायतेन्यस्फरेच्चैवंसंभवेन्नहिसर्वथा
३९ स्वयंशिवस्त्वंवामोरौशक्तिर्गणपतिस्तथा दक्षिणोरावक्ष्णिसूर्योहृदयेभंकराद्धरिः ४०

वर्णस्यादिकारणत्वात्तस्यचत्वयिविद्यमानत्वात्त्वमादिदेवइत्यर्थः ३६ मूलाधारंतन्नामकंचक्रं स्वाधिष्ठानाभिधात् स्वाधिष्ठानमभिधानामयस्यतस्मात् ३६ मणिपूरात्तन्नामकात् ३७ इदंसर्वोपरिस्थत्वं मुख्यतांश्रेष्ठत्वंवदति कथयतीत्यर्थः ३८ ३९ वामोरौ सव्यांके शक्तिःपार्वती अक्ष्णि नेत्रे ४० ध् ध् ध् .

अन्नंब्रह्मरूपं रसोहरिरूपः द्वयोरपिभोग्ययो भोक्तात्वंतस्माद्भोक्तृभोग्ययोर्मध्ये भोक्तुरेवप्राधान्यमेतद्विषये कस्यापि संशयोनास्तीत्यर्थः ४१ ननुअहंतुस्मशानेकदाचित्पर्वतेवावसामि स्मशानस्थस्य पर्वतस्थस्यवा श्रेष्ठत्वमप्रसिद्धं तत्कथंत्वयाप्रतिपाद्यंतइतिचेत्तत्राह विरक्तत्वमिति अहंषड्गुणैश्वर्यसंपन्नोपि संसारसुखस्य दुःखपरिणामित्वात्तद्विहाय स्मशानेपर्वतेवा वसामि तस्माद्भवद्भिः आपातमधुरमिदंसुखंविहाय विरक्तैर्भवितव्यमितिशिक्षयिष्यन्नेव तत्रवससीतिनतवश्रेष्ठत्वेकिमपिन्यूनमितिभावः प्रत्युतश्रुतिरपि तवश्रेष्ठत्वमेव प्रतिपादयतीति दृढमेवास्म द्वच इत्या

अन्नस्यब्रह्मरूपत्वाद्रसात्मत्वाद्धरेरपि भोक्तृत्वाच्चतवेशानश्रेष्ठत्वेकस्यसंशयः ४१ विरक्तत्वंशिक्षयिष्यन्स्मशाने
पर्वतेस्थितः उतामृतत्वस्येशानोमंत्रलिंगेनसूक्तके ४२ पौरुषेप्रतिपाद्योसिइतिप्राहुर्महर्षयः जगत्संहारकंहालाह
लंकेनधृतंगले महाप्रलयकालाग्निंभालेधर्तुंचकःक्षमः ४३ भवांधकूपपतनेहेतुःकेनहतःस्मरः किंवर्ण्येभागधे
यंतेयद्वक्तुं ईदृशोभवान् ४४ त्वांस्तोतुंजन्मकोट्यापि वराकोहंनचक्षमः कृत्वामयिकृपामेव मत्प्रश्नान्वक्तुमर्हसि
४५ इतिश्रीस्कंदपुराणेईश्वरसनत्कुमारसंवादेश्रावणमासमाहात्म्येसनत्कुमारप्रश्नोनामप्रथमोऽध्या
यः १ छ ईश्वरउवाच साधुसाधुमहाभागविनीतोसिविरिंचिज श्रोतागुणयुतोयस्माच्छ्रद्धालुर्भक्ति
भूषितः १ श्रावणेमासिविषयेयत्पृष्टंभवतानघ अपृष्टमपितेवक्ष्ये प्रेम्णापरमयामुदा २

त्याह· उतेति पुरुषसूक्तमंत्रप्रतीकमिदं अमृतत्वस्य मोक्षस्य ४२ अपिचतवश्रेष्ठत्वेदुष्करकर्मकर्तृत्वमपि हेतुरित्याह· जगत्संहारकमिति अन्यदपिकारणमाह- महेति ४३ भवएवअंध अज्ञानपूर्णकूपः तस्मिन् स्मरः मदनः एतावतातवऐश्वर्यंवक्तुमशक्यमित्यर्थः ४४ जन्मकोट्याकोटिजन्मभिः नक्षमः नसमर्थः यत्तवराकः नीचः ४५ इतिश्रावणमासमाहात्म्यटीकायांप्रथमोध्यायः १ छ विनीतोसि- शिक्षितोसि विरिंचिज ब्रह्मपुत्र यस्माच्छ्रद्धालुः भक्तयुक्तश्चतस्माद्गुणयुतः श्रोतासीत्यर्थः १ वक्ष्येकथयिष्यामि ननुनापृष्टः कस्यचिद्ब्रूयादि

तिन्यायात् कथमपृष्टमपिवक्ष्ये इत्युच्यते इतिचेत्तत्राह प्रेम्णेति २ प्रोद्भूतस्यमत्तस्यतवपितुः ब्रह्मणः ३ तंपितुःपंचमशिरश्छेदोद्भवं मत्सरं
द्वेषबुद्धिः एकमनः दत्तावधानाः ४ किंव्रतमित्यस्यप्रश्नस्योत्तरमाह कुर्यादिति नियतःतत्परः ५ ६ आदिशब्देनयथाशक्तिलक्षलिं
गादीनांइतरव्रतानांवासमाहारः ७ तानिव्रतान्येवाह धारणेति तत्स्वरूपंतुचतुर्थाध्याये वक्ष्यति ८ आनंत्यायकल्प्यते बहुफलकं भ-

प्रियोभवतिचाहूष्टानन्त्वेचतथाविधः पंचमोमस्तकश्छिन्नः प्रोद्भूतस्यापितुस्तव ३ त्वंचतंमत्सरंत्यक्त्वामांयतःश
रणंगतः अतोवक्ष्यामितेतातभूत्वाचैकमनाःशृणु ४ कुर्यान्नक्तव्रतंयोगिन्श्रावणेनियतोनरः रुद्राभिषेकंकुर्वीत
मासमात्रंदिनेदिने ५ स्वप्रीतिविषयस्यापिकस्यचित्त्यागमाचरेत् पुष्पैःफलैश्चधान्यैश्चतुलसीमंजरीदलैः ६ बि
ल्वपत्रैर्लक्षपूजांशंकरस्यसमाचरेत् कोटिलिंगादिकर्तव्यंब्राह्मणांश्चैवभोजयेत् ७ धारणापारणेकुर्यादुपोषणमथा
पिवा पंचामृताभिषेकंचममप्रीतिकरंपरम् ८ अस्मिन्मासेकृतंयद्यत्तदानंत्यायकल्पते भूमिशायीब्रह्मचारीयत-
वाक्चभवेन्मुने ९ ननयेन्मासमेनंतुव्रतवंध्यंकदाचन अनोदनंसमश्नीयाद्धविष्यान्नमथापिवा १० पत्रेचैवसमश्नी
याच्छाकमात्रंत्यजेत्तवा किंचिद्व्रतीसर्वथास्याद्भक्तिमान्मुनिसत्तम ११ सदाचारोभूमिशायीप्रातःस्नायीजितेंद्रियः
मत्पूजांप्रत्यहंकुर्यादेकाग्रकृतमानसः १२ पुरश्चरणमप्यत्रमंत्राणांसिद्धिदंपरम् शिवषडूर्णमंत्रस्यगायत्र्याश्चजपंच-
रेत् १३ प्रदक्षिणानमस्कारान्वेदपारायणंतथा जपःपुरुषसूक्तस्यह्यधिकंफलदोभवेत् १४ ग्रहयज्ञःकोटिहोमोल
क्षहोमोऽयुतस्तथा कृतःफलतिसद्योत्रवांछितार्थफलप्रदः १५ अस्मिन्मासेचैकदिनंयोवंध्यंव्रततोनयेत् सयाति
नरकंघोरंयावदाभूतसंप्लवम् १६ व्रतीत्यर्थः यतवाक् मितभाषी ९ व्रतवंध्यंव्रतरहितं किंचिदपिकुर्यादितिभावः हविष्यान्नं
होमयोग्यमन्नं १० ११ १२ १३ १४ १५ व्रताकरणेदोषमाह अस्मिन्निति आभूतसंप्लवं प्रलयकालपर्यंतम् १६

एतन्मासस्य ममप्रियतमत्वं अन्यवस्तूनांअप्रियत्वप्रतिपादनेनसमर्थयति यथेति १७ १८ १९ तन्होः बुधगुरुवासरयोः आंजनेय
मारुतिः २० समदिष्टंकथितं नभःशुक्लद्वितीयायां श्रावणस्यशुक्लद्वितीयायां २१ २२ २३ शस्ता उत्तमत्वेन कथि·

यथायंमेप्रियोमासस्तथान्यंचनमेप्रियम् कामिनःफलदश्चायंनिष्कामस्यतुमोक्षदः १७ तत्रव्रतानियेधर्मा
स्तान्मत्तःशृणुसत्तम रवौरविव्रतंसोमेमत्सूजानक्तभोजनम् १८ प्रथमंसोममारभ्यव्रतस्याद्रोटकाभिधम् सार्द्ध·
मासत्रयंतत्स्यात्सर्वकामार्थसिद्धिदम् १९ भौमेमंगलगौर्याश्चतदन्होर्बुधजीवयोः शुक्रेजीवंतिकायाश्चआंज
नेयनृसिंहयोः २० शनौव्रतंसमादिष्टंतिथिष्वथमुनेशृणु नभःशुक्लद्वितीयायांव्रतमौदुंबराभिधम् २१ गौरीव्रतं
तृतीयायांश्रावणेशुक्लपक्षके तथाशुक्लचतुर्थ्यांतुदूर्वागणपतिव्रतम् २२ विनायकीतितस्यान्यसंज्ञास्यादपरा·
मुने नागानांपूजनेशस्तापंचमीशुक्लपक्षके २३ इमांरौरवकल्पादींजानीहिमुनिसत्तम सूपौदनव्रतंषष्ठ्यांसप्तम्यां
शीतलाव्रतम् २४ पवित्रारोपणंदेव्यावसौभूतेऽथवाभवेत् शुक्लकृष्णानवम्योस्तुनक्तव्रतविधिस्मृतः २५ दश·
म्यांशुक्लपक्षेतुआशासंज्ञंव्रतंभवेत् पक्षद्वयेविशेषोस्मिन्नेकादश्योस्तुकश्चन २६ पवित्रारोपणंशुक्लद्वादश्यांतु
हरेःस्मृतम् द्वादश्यांश्रीधरंपूज्यपरांगतिमवाप्नुयात् २७ उत्सर्जनमुपाकर्मसभादीपस्तथैवच उपाकर्मसभायां·
तुरक्षाबंधस्ततःपरम् २८ श्रवणाकर्मतत्रैवतथासर्पबलिःस्मृतः हयग्रीवस्यावतारःपूर्णिमायांतुसप्तकम् २९ न·
भःकृष्णेतुसंकष्टचतुर्थीव्रतमुच्यते ज्ञेयामानवकल्पादिःश्रावणेकृष्णपंचमी ३० पूर्णावतारःकृष्णस्यकृष्णाष्टम्यां
द्विजोत्तम अवतारःसमभवत्तत्रमहोत्सवम् ३१ ता· २४ चसौअष्टम्यांभूतेचतुर्दश्यां २५ २६ पूज्यपूजांकृत्वा आर्ष·
त्वात् समासाभावेपिल्यप् साधुः २७ २८ २९ ३० कृष्णाष्टम्यां कृष्णपक्षभवाष्टम्याम् ३१

मुनिपुंगवः मुनिषु पुंगवःश्रेष्ठः तत्संबुद्धौ ३२ वृषभाणांपूजनं महाराष्ट्रभाषायां पोळा इतिप्रसिद्धम् तत्तत्तिथिषुपूज्यादेवताः कथयामीति शेषः ३३ ३४ शिवदेवा अष्टमीइतिपदच्छेदः शिवःदेवोयस्यासा ३५ अंतकोयमः ३६ शशीपतिश्चंद्रः ३७ ३८ अत्रैव-

इयंमन्वादिरपिचज्ञातव्यामुनिपुंगव अमायांश्रावणेमासिपिठोराव्रतमुच्यते ३२ कुशानांग्रहणंचैववृषभाणांचपू
जनम् शुक्लाद्यतिथिमारभ्यतत्तत्तिथिषुदेवताः ३३ वह्निर्देवःप्रतिपदिद्वितीयाब्रह्मदेवता तृतीयायास्तथागौरी
चतुर्थ्यांगणनायकः ३४ सर्पाधिपापंचमीस्यात्षष्ठीस्यात्स्कंददेवता सप्तम्यांभास्करोदेवःशिवदेवाष्टमीतिथिः ३५
दुर्गाधिपातुनवमीदशम्यंतकदेवता एकादश्यधिपाश्चैवविश्वेदेवाःप्रकीर्तिताः ३६ द्वादश्याश्चहरिःकामस्त्रयोदश्य
धिपोमतः चतुर्दश्याःशिवश्चैवपौर्णमास्याःशशीपतिः ३७ अमायापितरोदेवाएतेतिथ्याधिपाःस्मृताः सद्देवस्तत्रपूज्यः
स्याद्यस्यदेवस्ययातिथिः ३८ अगस्त्यस्योदयोमासेप्रायेणान्नैवजायते कथयामिचतंकालंशृणुष्वैकमनामुने ३९ सिं
हसंक्रांतिदिवसाद्यदाद्वादशयांतिच चत्वारिंशच्चघटिकास्तदागस्त्योदयोभवेत् ४० सप्ताहाभितःपूर्वमगस्त्यार्घंस-
माचरेत् द्वादशस्वपिमासेषुआदित्योभिन्नसंज्ञकः ४१ तपतेश्रावणेतत्रगभस्तिरितिसंज्ञितः तत्पूजनंचकर्तव्यंमासे
स्मिन्भक्तिमन्नरैः ४२ चतुर्षुयानिमासेषुवर्ज्यानिशृणुसत्तम श्रावणेवर्जयेच्छाकंदधिभाद्रपदेतथा ४३ दुग्धमाश्व
युजेमासिकार्तिकेद्विदलंत्यजेत् इत्यादीनिसमस्तानितत्रकर्तुमशक्नुवन् ४४

मासेश्रावणे इत्यर्थः ३९ ४० अगस्त्यार्घंसमाचरेत् अगस्त्याय अर्घ्यंदद्यादित्यर्थः भिन्नसंज्ञकः भिन्नाः संज्ञानामानियस्यसः तपते इत्युत्तरश्लोकेनान्वयः ४१ ४२ श्रावणमासमाहात्म्यस्यप्रकृतत्वेपि प्रकरणवशात्सहपठितत्वाच्च अग्रे अशक्तस्यफलविशेषकथनायप्रासंगिकत्वात् मासचतुष्टयवर्ज्यपदार्थोक्तावपिनकिंचिद्दूषणं अश्वयुजे आश्विने द्विदलं द्विदलविशिष्टंधान्यं अशक्नुवन् असमर्थः ४३ ४४

तत्फलभाग् मासचतुष्टये प्रत्येकं पूर्वोक्तविधिवत् पदार्थत्यागेकृतेयत्फलं भवतितत्फलभागित्यर्थः उद्देशः व्रतप्रस्तावः ४५ तत्रत्यानां त
सेव्याचरणीयानांअलंपर्याप्तः ४६ सर्वप्रकारेण आवयोःहरिहरयोः ४७ भेदकल्पनेदोषमाह कल्पयंतीति मन्यंत इत्यर्थः निरयगामिनः
नरकगामिनः ४८ इतिश्रावणमासमाहात्म्यटीकायां द्वितीयोऽध्यायः २ छ व्रताभिधानश्रवणमात्रेणासंतुष्टहृदयः सनकु-

एकस्मिन्श्रावणेमासिकुर्वंस्तत्फलभाग्भवेत् उद्देशोयंमयाप्रोक्तःसंक्षेपात्तवमानद ४५ तत्रत्यानांव्रतानांतु
धर्माणांमुनिसत्तम केनापिविस्तरोवक्तुंनालंवर्षशतैरपि ४६ ममप्रीत्यैहरेर्वापिकुर्याद्धर्ममशेषतः आवयोर्नहि
भेदोस्तिपरमार्थस्तुसर्वदा ४७ कल्पयंत्यत्रयेभेदंतेवैनिरयगामिनः सनत्कुमारतस्मात्त्वंश्रावणेधर्ममाचर ४८
इतिश्रीस्कंदपुराणेईश्वरसनत्कुमारसंवादेश्रावणमासमाहात्म्येश्रावणव्रतोद्देशकथननामद्वितीयोऽध्यायः २
सनत्कुमारउवाच भगवन्व्रतसंघस्यउद्देशःकथितस्त्वया तृप्तिर्नजायतेस्वामिन्विस्तराद्वक्तुमर्हसि १ यच्छ्रु
त्वाकृतकृत्योहंभविष्यामिसुरेश्वर २ ईश्वरउवाच नक्तव्रतेनयोगीशश्रावणंयोनयेत्सुधीः द्वादशस्वपिमा-
सेषुसनक्तफलभाग्भवेत् ३ दिनावसानपूर्वंतुनक्तंस्याद्रात्रिभोजनम् तत्राद्यत्रिघटीस्त्यक्त्वाकालःस्यान्नक्तभोजने
४ ततःसंध्यात्रिघटिकाअस्तादुपरिभास्वतः चत्वारीमानिकर्माणिसंध्यायांपरिवर्जयेत् ५ आहारंमैथुनंनिद्रां
स्वाध्यायंचचतुर्थकं गृहस्थयतिभेदेनतद्व्यवस्थांचमेशृणु ६

मारः विस्तरजिज्ञासयापृच्छति भगवन्निति व्रतसंघस्यव्रत
समुदायस्य भगवतः कथनसामर्थ्यंद्योतयन्संबोधयति स्वामिन्नितिसमर्थेत्यर्थः १ कृतकृत्यःज्ञातजिज्ञासः २ श्रावणमासिप्रतिदिनंनक्तंकु-
र्यादितिभावः ३ नक्तव्रतस्वरूपमाह दिनेति दिवोपोष्यरात्रौप्रथमघटिकात्रयंत्यक्त्वा भोजनंनक्तं ४ प्रथमघटिकात्रयत्यागेकारणमाह
तत इति भास्वतःसूर्यस्यअस्तादुपरिसंध्याकालः इमानिअग्रिमश्लोकेवक्ष्यमाणानि ५ तद्व्यवस्थांनक्तव्रतकालव्यवस्थां भास्करेसूर्ये मंदीभव-

तिअस्तंगच्छति स्वशरीरच्छाया द्विगुणी स्वहस्तेनसप्त हस्तमिता भवति सकालः यतेर्नक्तभोजने प्रशस्तः ७ दिनाष्टमोभागः चरमघटिका
चतुष्टयं ८ ९ तत्रापिविशेषमाह विधुरइति· तत्रकारणमाह अपत्नीकः मृतभार्यः अतएवअनाश्रमः आश्रमविहितकर्मस्व अपात्रोपि
यदिपुत्रवान् भवेत्तदासआश्रमीनाम आश्रमीवत् कर्मविशेषेयोग्यो भवतीत्यर्थः १० ११ १२ तस्यसंपूर्णकरणे सामर्थ्यंद्योतयन्

आत्मनोद्विगुणी छायामंदीभवति भास्करे यतेर्नक्तंतुतत्प्रोक्तंननक्तंनिशिभोजनम् ७ नक्षत्रदर्शनान्नक्तंगृहस्थ
स्यबुधैःस्मृतं यतेर्दिनाष्टमेभागेरात्रौतस्यनिषिध्यते ८ नक्तंनिशायांकुर्वीतगृहस्थोविधिसंयुतः यतिश्चविधवा·
चैवविधुरश्चससूर्यकम् ९ विधुरश्चेत्पुत्रवान्स्यात्सतुरात्रौसमाचरेत् अनाश्रमोप्याश्रमीस्यादपत्नीकोपिपुत्रवा
न् १० एवंयथाधिकारंतुकुर्यान्नक्तव्रतंसुधीः अत्रनक्तव्रतीमासेपरांगतिमवाप्नुयात् ११ प्रातःस्नानंकरिष्यामिब्र
ह्मचर्यव्रतेस्थितः भोक्ष्यामिनक्तंभूशय्यांकरिष्येप्राणिनांदयाम् १२ प्रारब्धेस्मिन्व्रतेदेवयद्यपूर्णोम्रियेत्यहम्
तदासंपूर्णतांयातुप्रसादात्तेजगत्पते १३ इतिसंकल्प्यमेधावीमासंनक्तव्रतंचरेत् एवंनक्तव्रतंकुर्वन्ममप्रियतमो·
भवेत् १४ विप्रद्वारातिरुद्रेणमहारुद्रेणवास्वयम् अभिषेकंमासमात्रंरुद्रेणप्रत्यहंचरेत् १५ तस्यप्रीणाम्यहं·
वत्सजलधाराप्रियोयतः कुर्याद्रुद्रेणवाहोमंममप्रीतिकरंपरम् १६ स्वस्ययद्रोचतेऽत्यंतंभोज्यंवाभोगमेववा संक·
ल्प्यद्विजवर्यायदत्वामासेस्वयंत्यजेत् १७ अतःपरंशृणुमुनेलक्षपूजाविधिंपरम् श्रीकामोबिल्वपत्रैश्चदूर्वाभिःशां
तिकामकः १८ आयुःकामेनकर्तव्यंचंपकैःपूजनंहरेः विद्याकामेनकर्तव्यंमल्लिकाजातिभिस्तथा १९

संबोधयति जगत्पतेइति १३ १४ प्रत्यहंदिनेदिने १५ तस्यरुद्रेणाभिषेककर्तुः तत्रकारणमाह जलधारेति १६ भोज्यंभक्षणीयं
अन्नादिभोग्यउपभोगार्हवस्त्रादिभोज्यभक्ष्ये इतिनिपातनात् भक्ष्यार्थे कृत्याभावः १७ लक्षपूजांकुर्यादित्यध्याहारः १८ मल्लिकाभिः जाति
भिर्वा· १९

३४ नदेवस्पष्टयति· यदीति ३५ ३६ ३७ ३८ मदर्पणधिया परमेश्वराय अर्पितमितिबुध्या त्य·

ब्राह्मणान्पूजयेत्पश्चात्तेभ्योदद्याच्चदक्षिणाम् येनयेनप्रकुर्याच्चलक्षपूजामुमापतेः ३४ तत्तद्दद्यात्सुवर्णेनकृत्वा· शंभुंप्रपूजयेत् यदिदीपःकृतस्तेनतद्दानंचैवकारयेत् ३५ सुवर्णवर्तिकांकृत्वादीपपात्रंचरौप्यकम् गोघृतेनसमायुक्तंसर्वकामार्थसिद्धये ३६ क्षमापयेत्ततोदेवंब्राह्मणान्भोजयेच्छतम् एवंयःकुरुतेपूजांतस्यप्रीणाम्यहंमुने ३७ तत्रापिश्रावणेकुर्यात्तद्दानंस्यायकल्पते स्वप्रीतिविषयःकश्चित्पदार्थस्त्यज्यतेयदि ३८ मदर्पणधियाचात्रमासित्तस्यफलंशृणु इहामुत्रचतत्प्राप्तिर्भवेल्लक्षगुणाधिका ३९ सकामत्वेतुचैवंस्यान्निष्कामत्वेपरागतिः रुद्राभिषेकं कुर्वाणस्तत्रत्याक्षरसंख्यया ४० प्रत्यक्षरंकोटिवर्षंरुद्रलोकेमहीयते पंचामृतस्याभिषेकादमृतत्वंसमश्नुते ४१ तस्मिन्मासेभूमिशायीफलंतस्यापिचशृणु प्रवालनिर्मितांश्रेष्ठांगजदंतभवामपि ४२ पाटीरनिर्मितांचापिरत्नचितां नवरत्नकैः निःसममृदुपक्षौघरचितांद्विजसत्तम ४३ वरवस्त्रेणसंछन्नांतूलिकांचात्रशोभनाम् दशोपबर्हणैर्युक्तांशय्यांसलभतेशुभाम् ४४ रम्यांगनासमायुक्तांरत्नदीपविभूषिताम् ब्रह्मचर्येणचाप्यत्रवीर्यपुष्टिर्भवेद्दृढा ४५ ओजोबलंदेहदार्ढ्यंयद्धर्मस्योपकारकम् प्रत्यक्षेवभवेत्तस्यब्रह्मप्राप्तिर्नसंशयः ४६ निष्कामस्यसकामस्यस्वर्गेदेवांगनाशुभा अत्रमौनव्रतधरोमहान्वक्ताप्रजायते ४७ अहोरात्रंदिनेवापिभुक्तिकालेऽथवापुनः घंटायाःपुस्तकस्यापिव्रतांतेदानमाचरेत् ४८ सर्वशास्त्रप्रवीणःस्याद्वेदवेदांगपारगः वाचस्पतिसमोबुद्धौमौनमाहात्म्यतोभवेत् ४९

ज्यतेइतिपूर्वश्लोकेनान्वयः ३९ कर्तृभेदेनफलस्यापिभेदमाह· सकामत्वइति एवंपूर्वोक्तलक्षगुणाधिकप्राप्तिरूपंफलं
४० महीयते पूज्यते समश्नुतेप्राप्नोतीत्यर्थः ४१ ४२ पाटीरंचंदन ४३ उपबर्हणानि साहित्यान्युच्छीर्षकादीनि ४४ ४५ ओजःमनसः
बलं बलवाचिकंमित्रादिकृतसाहाय्यरूपंवा ४६ निष्कामस्येतिपूर्वश्लोकेनसंबध्यते ४७ मौनव्रतस्यसर्वदा सर्वैः कर्तुमशक्यत्वात् -

·८

पूर्वमुक्तं हरिहरयोरभेदं दृढयति शिवविष्ण्वोरिति बार्हतैः बृहतीपुष्पैः २० धान्यप्रपूजनंधान्यैः पूजनं लक्षपूजाविधेः प्रकांतत्वात् लक्षसंख्याकैरिति प्रत्येकंसंबध्यते रंगवल्यादिभिरित्यस्य अग्रिमश्लोकस्थितेन पूजयेत् इतिपदेनान्वयः २१ २२ साधयेत् कुंडमंडपरचना प्रतिपादकशास्त्रोक्तरीत्यारचयेत् २३ २४ ब्रह्मघोषेणवेदघोषेणब्राह्मणकृत घोषेणवा अधिकारिभेदात् यथेष्टंग्राह्यं २५ २६

शिवविष्ण्वोः प्रसन्नत्वंतुलसीभिः प्रसिद्ध्यति पुत्रकामेनकर्तव्यंबार्हतैःपूजनंशुभम् २० दुःस्वप्नप्रशमार्थायशस्तंधान्यप्रपूजनम् रंगवल्यादिभिर्देवंदेवस्याग्रेविनिर्मितैः २१ पद्मादिभिःस्वस्तिकाद्यैश्चक्राद्यैःपूजयेद्विभुम् एवंहिसर्वपुष्पैश्चसर्वकामार्थसिद्धये २२ लक्षपूजांप्रकुर्याच्चेत्सुप्रसन्नोहरोभवेत् उद्यापनंततःकार्यंमंडपंचैवसाधयेत् २३ वेदिकाचप्रकर्तव्यामंडपस्यत्रिभागतः पुण्याहवाचनंकृत्वाआचार्यंवरयेत्ततः २४ गीतवादित्रनिर्घोषैर्ब्रह्मघोषेणभूयसा प्रविश्यमंडपेतस्मिन्रात्रौजागरणंचरेत् २५ वेदिकायांप्रकर्तव्यंलिंगतोभद्रमुत्तमम् तन्मध्येतंडुलैःकुर्यात्कैलासंचसुशोभनम् २६ कलशंस्थापयेत्तत्रताम्रंचैवमहाप्रभम् पंचपल्लवसंयुक्तंन्यसेद्वस्त्रंसुसूक्ष्मकं २७ सौवर्णीप्रतिमांतत्रस्थापयेत्पार्वतीपतेः पूजांतत्रप्रकुर्वीतपंचामृतपुरःसरैः २८ धूपदीपैःसनैवेद्यैर्गीतवादित्रनृत्यकैः वेदशास्त्रपुराणैश्चरात्रौजागरणंचरेत् २९ ततःप्रभातसमयेसुस्नातःसुशुचिर्भवेत् स्थंडिलंकारयेत्तत्रस्वशाखोक्तविधानतः ३० होमंचसतिलाज्येनपायसेनचकारयेत् मूलमंत्रेणगायत्र्याशिवनाम्नासहस्रकैः ३१ येनमंत्रेणपूजातुकृतातेनैवहोमयेत् शर्कराघृतमिश्रेणचरुणाजुहुयात्ततः ३२ ततःस्विष्टकृतंहुत्वापूर्णाहुतिमनंतरं आचार्यंपूजयेत्सम्यक्वस्त्रालंकारभूषणैः ३३

पंचपल्लवाः २७ २८ तत्रकलशोपरि २९ ३० ३१ ३२ होमयेत् होमंकुर्यात् होमशब्दात्तत्करोतिनदाचष्टइतिणिच् ३३

तत्रसर्वैः कर्तुंशक्यांव्यवस्थामाहः अहोरात्रमिति यथासामर्थ्यंयथासंभवं कर्तव्यमित्यर्थः व्रतांतेमौनव्रतांते ४९ इहलोकंप्रसिद्धं सद्यःफलंदर्शयन् मौनव्रतस्यसर्वव्रतापेक्षयाश्रैष्ठ्यमाह· मौनिनइति ५० इतिश्रावणमासमाहात्म्यटीकायांतृतीयोऽध्यायः ३ ६९

१ उमामहेश्वरप्रीत्यै इदंव्रतमाचरामीतिसंकल्पयेत् तद्धारणाव्रतमाह· एकस्मिन्दिनेधारणामुपोषणंकृत्वाऽन्येहनिभोजनंकुर्यादिति

मौनिनःकलहोनास्तितस्मान्मौनव्रतंपरम् ५० इतिश्रीस्कंदपुराणेश्रावणमासमाहात्म्येईश्वरसनत्कुमारसंवादेनक्तव्रतलक्षपूजाभूमिशयनमौनादिव्रतकथनंनाम तृतीयोऽध्यायः ३ ६९ ईश्वरउवाच सनत्कुमारवक्ष्यामिधारणापारणाव्रतम् पुण्याहंवाचयेत्पूर्वमारभ्यप्रतिपद्दिनम् १ संकल्पयेन्ममप्रीत्यैधारणापारणाव्रतम् एकस्मिन्धारणांकुर्यात्पारणंचतथापरे २ उपवासोधारणेस्यात्पारणेभोजनंभवेत् समाप्तेमासिचैवात्रकुर्यादुद्यापनंव्रती ३ समाप्तेश्रावणेमासिपुण्याहंकारयेत्पुरा आचार्यंवरयेत्पश्चाद्ब्राह्मणांश्चैवमानद ४ पार्वतीशंकरस्यापिप्रतिमांस्वर्णनिर्मितां पूर्णकुंभेतुसंस्थाप्यपूजयेन्निशिभक्तितः ५ रात्रौजागरणंकुर्यात्पुराणश्रवणादिभिः प्रातरग्निंसमाधायहोमंकुर्याद्यथाविधि ६ त्र्यंबकेणचमंत्रेणजुहुयाच्चतिलौदनम् तथैवशिवगायत्र्याजुहुयाच्चघृतौदनम् ७ षडक्षरेणमंत्रेणपायसंजुहुयात्ततः पूर्णाहुतिंततोहुत्वाहोमशेषंसमापयेत् ८ ब्राह्मणान्भोजयेत्पश्चादाचार्यंचैवपूजयेत् एवंकृत्वामहाभागब्रह्महत्यादिपातकैः ९

२ अत्रश्रावणेमासि ३ पुण्याहंकारयेत् पुण्याहंवाचयेत् ४ पार्वतीसहितस्य शंकरस्य प्रतिमांमूर्तिं ५ ६ तिलैःसहितौदनं तिलोदनं त्र्यंबकंयजामहेइतिमंत्रेण जुहुयादित्यर्थः शिवगायत्र्यामंत्रेण घृतयुत मोदनम् ७ पायसं पयसोविकारःक्षिप्ता· ८ ब्रह्महत्यादिपातकैः आदिशब्देनसुरापानस्वर्णस्तेय गुरुदारागमन तत्संसर्गेति पापैः इतिभावः ९ ६९ ६९

१० संयतात्मावशीकृतं मनोयेनसः ११ लोकशंकरं लोकानांशंकल्याणं करोतीतितम् वृषध्वजंशंकरम् १२ १३ १४ अवहि
तः एकाग्रमनाः १५ अद्यदिवसे प्रतिपदि १६ देवान्दिव्यति प्रकाशयति ज्ञानंददातीतियावत् १७ अंत्यदिनेऽमावास्यां १८ चर

मुच्यतेनात्रसंदेहस्तस्मात्कुर्यान्महाव्रतम् शृणुमासोपवासस्यश्रावणेविधिमादरात् १० संकल्पयेत्तुप्रतिपदि
नेप्रातर्व्रतंमुने नारीवापुरुषोवापिसंयतात्माजितेंद्रियः ११ ततोर्चयेदमायांतुशंकरंलोकशंकरम् संपूजयेत्षोड
शभिरुपचारैर्वृषध्वजम् १२ ब्राह्मणान्पूजयेच्चैववस्त्रालंकारणादिभिः भोजयेच्चयथाशक्त्याप्रणिपत्यविसर्जये
त् १३ एवंमासोपवासस्तुममप्रीतिकरोभवेत् रुद्रवर्तिविधानंचसंमितंलक्षसंख्यया १४ शृणुष्वावहितोभूत्वा
सर्वसिद्धिकरंनृणाम् कार्पासतंतुभिःकार्याएकादशभिरादरात् १५ वर्तयस्तारुद्रवर्तीसंज्ञाप्रीतिकराममश्रावण
स्याद्यदिवसेसंकल्प्यविधिपूर्वकम् १६ देवदेवंमहादेवंलक्षवर्तिभिरादरात् नीराजयामिगौरीशंश्रावणेमासिभ
क्तितः १७ पूजयित्वाप्रतिदिनंवर्तीनांतुसहस्रतः नीराजयेदंत्यदिनेसहस्राण्येकसप्ततिः १८ अथवाप्रत्यहंदद्या
त्सहस्रत्रयमाहृतः चरमेतुदिनेदद्यात्सहस्राणित्रयोदश १९ एकस्मिन्वादिनेरुद्रवर्तिलक्षंप्रदीपयेत् स्रुघृतेनापि
बहुनास्निग्धास्ताममवल्लभाः२० पूजयित्वातुविश्वेशंशृणुयाच्चकथांततः २१ सनत्कुमारउवाच देवदेवजगन्नाथ
जगदानंदकारक व्रतस्यास्यप्रभावंमेकृपांकृत्वावदप्रभो केनचीर्णंव्रतमिदंविधिरुद्यापनेकथम् २२ ईश्वरउवाच
शृणुवैधात्रयत्नेनव्रतानामुत्तमंव्रतम् रुद्रवर्त्याँमहापुण्यंसर्वोपद्रवनाशनम् २३

मेऽन्त्ये १९ सर्वस्मिन्मासे वर्तीनांलक्षंनीराजयेदितिभावः स्निग्धा आर्द्रीकृताः वल्लभाःप्रियाः २० २१ चीर्णंकृतम् २२ वैधब्र
ह्मपुत्र रुद्रवर्त्यांउत्तमंव्रतं शृणुइत्यन्वयः अधुना महापुण्यमित्यादिभिस्त द्व्रतमेवविशिनष्टि २३ ७ ७

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

२४ २५ वारस्त्री गणिका २६ शुल्कं मूल्यं सुदुःसहं अतिमहार्हम् २७ भ्रंशिता भ्रष्टाः नग्नीकृत्य निःशेषतस्तेषां धनं अपहृत्य २८ भूषाः अलंकारान् लुंठिताः वंचिताः २९ क्रोशमात्रंएकक्रोशपर्यंतं प्रतिष्ठा आश्रयः ३० ३१ तर्जयंतीतिरस्कुर्वंती

प्रीतिसौभाग्यजननंपुत्रपौत्रसमृद्धिदं शंकरप्रीतिजननंशिवलोकेपरंपदम् २४ रुद्रवर्तिसमंनास्तित्रिषुलोकेषुसुव्रतम् अत्रैवोदाहरंतीममितिहासंपुरातनम् २५ क्षिप्रानद्यास्तटेरम्यपुरीउज्जयिनीशुभा तस्यामासीत्सुगंधाख्यावारस्त्रीत्वतिसुंदरा २६ तयाशुल्कंकृतंस्वीयेसुरतेतुसुदुःसहम् सुवर्णानांशतंलोकेप्रतिज्ञांकृतवत्यथ २७ युवानश्च तयाविप्रा भ्रंशिताश्चसुगंधया राजानोराजपुत्राश्चनग्नीकृत्यपुनःपुनः २८ तेषांभूषागृहीत्वातुधिःकृतास्तुसुगंधया एवंहिबहवोलोकालुंठितास्तेसुगंधया २९ तस्यास्तुदेहगंधेनक्रोशमात्रंसुगंधितम् रूपलावण्यकांतीनांसाप्रतिष्ठा धरातले ३० षट्त्रिंशद्रागभार्याणांषड्रागाणांचगायने तत्संतत्याअनंतायाःकुशलागानकर्मणि ३१ नृत्येरंभादिकाः सर्वास्तर्जयंतीसुरांगनाः गत्वागजांश्चहंसांश्चविहसंतीपदेपदे ३३ कामबाणान्प्रेरयंतीकटाक्षैर्भ्रूकृतैश्चतैः कदाचित्सागताक्षिप्रांकौतुकाविष्टमानसा ३३ ददर्शसामनोरम्यामृषिभिःपरिसेविताम् केचिद्ध्यानपराविप्राःकेचिज्जपपरायणाः ३४ रताःशिवार्चनेकेचिद्विष्णोःकेचित्स्वपूजने तेषांमध्येवसिष्ठोहितयादृष्टोमहामुने ३५ तस्याधर्मेभवेद्बुद्धिस्तद्दर्शनमहत्वतः विगताशाजीवनेपिविषयेषुविशेषतः ३६ विनम्रकंधराभूत्वाप्रणिपत्यपुनःपुनः स्वकर्मपरिहारायपप्रच्छमुनिपुंगवम् ३७

सुरांगनाअप्सरसः विहसंतीधिक्कुर्वंति ३२ कौतुकेनकुतूहलेनाविष्टंव्याप्तं मनःयस्याःसाकौतुकाविष्टमानसा ३३ ३४ ३५ तद्दर्शनमहत्वतः तस्याः धर्मेकुबुद्धिरभवत् वसिष्ठदर्शनप्रभावात् सुगंधाया मनसिधर्मबुद्धिर्जातेत्यर्थः विषयेषु विगताशाविरक्ता ३६ स्वकर्मपरिहाराय स्वकर्मणिउत्पन्नंपापं तस्यशमनार्थं नाशनायेति यावत् पप्रच्छ पृष्टवती मुनिपुंगवं मुनिश्रेष्ठं वसिष्ठ ३७

सर्वविद्यासु विशारदः निपुणः ३८ तस्याःकर्मस वसिष्ठोज्ञात्वा ३९ ४० ४१ करोतीति करंशिवस्य प्रीतिकरं शिवप्रीतिकरं ४२
कोशं द्रव्यं वसिष्ठोक्तविधानतः वसिष्ठेनउक्तंकथितं यद्विधानं तदनुसारतः ४३ ४४ ४५ ४६ आभूतसंप्लवं

स्कंधोवाच अनाथनाथविप्रेंद्रसर्वविद्याविशारद मयाकृतानियोगीशपापानिसुबहून्यपि तत्सर्वपापनाशाय उपायंब्रूहिमेप्रभो ३८ ईश्वरउवाच एवमुक्तस्तयाविप्रोवसिष्ठोमुनिरादरात् तस्याःकर्मसविज्ञायसोब्रवीद्दीनवत्सलः ३९ वसिष्ठउवाच शृणुष्वावहिताभूत्वातवपापस्यसंक्षयः येनजायेतपुण्येनतत्सर्वंकथयामिते ४० गच्छवाराणसींभद्रेत्रिषुलोकेषुविश्रुताम् गत्वाकुरुष्वतत्क्षेत्रेव्रतंत्रैलोक्यदुर्लभम् ४१ रुद्रवर्त्यामहापुण्यंशिवप्रीतिकरंपरम् कृत्वाव्रतमिदंभद्रेप्राप्स्यसित्वंपरांगतिम् ४२ ईश्वरउवाच ततःसाकोशमादायभृत्यंचैवसमित्रकम् गत्वाकाशींव्रतंचक्रेवसिष्ठोक्तविधानतः ४३ ततःसासरणीतीरेतस्मिन्लिंगेलयंययौ ४४ एवंयाकुरुतेनारीव्रतमेतत्सुदुर्लभम् यंयंचिंतयतेकामंतंतंप्राप्नोत्यसंशयः ४५ माहात्म्यंशृणुमाणिक्यवर्तीनामपिसुव्रतव्रतेनतासांविप्रेंद्रमदर्धासनभागिनी ४६ जायतेमत्प्रियासाहियावदाभूतसंप्लवम् उद्यापनमथोवक्ष्येव्रतसंपूर्णहेतवे ४७ कलशेस्थापयेद्देवमुमयासहितंशिवम् सुवर्णनिर्मितंदेवंवृषभेरौप्यनिर्मिते ४८ विधिनापूजनंकृत्वारात्रौजागरणंचरेत् ततःप्रभातेविमलेस्नात्वानद्यांविधानतः ४९ आचार्यंवरयेद्भक्त्याद्विजैरेकादशैःसह होमश्चैवप्रकर्तव्योघृतपायसबिल्वकैः ५० रुद्रसूक्तेनगायत्र्यामूलमंत्रेणवापुनः ततःपूर्णाहुतिंहुत्वाआचार्यादीन्प्रपूजयेत् ५१ तथैकादशसद्विप्रान्सपत्नीकांस्तुभोजयेत् एवंयाकुरुतेनारीसर्वपापैःप्रमुच्यते ५२

प्रलयकाल पर्यंतं ४७ ४८ ४९ ५० ५१ ५२ ६२ ६२

स्थाप्यंस्थापितानि प्रतिमादीनि सर्वाणिन्यवेदयेत् अर्पयेत् ५३ इतिश्रावणमासमाहात्म्येचतुर्थोऽध्यायः ४ छ १ २ स्मारद्विषः स्मरःकामः तंद्वेष्टीतिस्मरद्विट्शंकरःतस्य ३ ४ व्रतकर्तुःफलमाह नाकालेति ५ प्रत्यदेहत्यागोत्तरं ६ त्रिपुरद्विषःशंक

कथांश्रुत्वाविधानेनस्थाप्यंसर्वंन्यवेदयेत् अश्वमेधसहस्रस्यफलंभवतिनिश्चितम् ५३ इतिश्रीस्कंदपुराणेश्रावणमासमाहात्म्येईश्वरसनत्कुमारसंवादेधारणापारणामासोपवासरुद्रवर्तिकथनंनामचतुर्थोऽध्यायः ४ छ ईश्वरउवाच माहात्म्यंकोटिलिंगानांपुण्यंवक्तुंनशक्यते एकैकस्यापिलिंगस्यकिंपुनःकोटिसंख्यया १ अशक्तौलक्षकंकुर्यात्सहस्रमथवाशतम् एकस्यापिहिलिंगस्यकरणान्ममसन्निधिः २ षडक्षरेणमंत्रेणपूजाकार्यास्मरद्विषः उपचारैःषोडशभिर्भक्तियुक्तेनचेतसा ३ उद्यापनंचकर्तव्यंग्रहयज्ञपुरःसरम् संपादनीयोहोमश्चब्राह्मणांश्चैवभोजयेत् ४ नाकालमरणंतस्यवंध्यत्वहरणंपरम् सर्वापत्तिक्षयकरंसर्वसंपत्प्रवर्धनम् ५ प्रेत्यकैलासवासश्चआकल्पंममसन्निधौ पंचामृताभिषेकंचयःकुर्याच्छ्रावणेनरः ६ सपंचामृतभोजीस्यात्संपन्नोगोधनेनच अत्यंतमधुरालापोप्रियश्चत्रिपुरद्विषः ७ अन्नोदनव्रतीचैवहविष्याशीचयोनरः व्रीह्यादिसर्वधान्यानामक्षय्योसौनिधिर्भवेत् ८ पत्रावल्यांतुभुंजानःस्वर्णभाजनभोजनः शाकवर्जनतःस्याद्वेशककर्ता नरोत्तमः ९ केवलंभूमिशायीतुकैलासेवासमाप्नुयात् प्रातःस्नानान्नभोमासिअब्दंतत्फलभाङ्नरः १० जितेंद्रियत्वान्मासेस्मिन्बलमैंद्रियकंभवेत् स्फटिकेश्ममयेवापिमार्त्स्नेमारकतेपिवा ११ स्वयंभौवास्वयंभौवापौष्येधातुमयेपिवा। चांदनेनवनीतेवाअन्यस्मिन्वापिलिंगके १२

रस्य ७ निधिः स्थानं ८ ९ अब्दंवर्षपर्यंतं कालाध्वनोरिति द्वितीया तत्फलभाक् स्नान फलभाक् १० जितेंद्रियत्वात् ब्रह्मचर्यव्रतेकृते इतिभावः मार्त्स्ने मृन्मये ११ १२ छ

सकृत् एकवारं उपरागो ग्रहणम् १३ १४ १५ १६ अतंद्रितः निरालसः १७ अर्चा पूजा १८ गुरुतल्पे गुरुभार्यागमन

सकृत्पूजांप्रकुर्वाणोब्रह्महत्याशतंदहेत् सूर्यचंद्रोपरागेषुसिद्धिःक्षेत्रेऽपिवाक्वचित् १३ सिद्धिर्यालक्षजाप्येनसकृ
त्स्याज्जपतोऽत्रसा अन्यकालेकृतायेस्युर्नमस्काराःप्रदक्षिणाः १४ सहस्रेणफलंयत्स्यान्मासेस्मिन्नेकवारतः
मत्प्रियेश्रावणेमासिवेदपारायणेकृते १५ सर्वेषांवेदमंत्राणांसिद्धिःसम्यक्प्रजायते मासेस्मिन्पौरुषंसूक्तंजप-
तेश्रद्धयान्वितः १६ कृत्वासंख्यासहस्रंतुकलौस्यात्तुचतुर्गुणम् वर्णानांसंख्ययावापिसततंकुर्यादतंद्रितः १७ अश
क्तोसंख्ययार्चांतुशतमानेनवाजपेत् ब्रह्महत्यादिपापेभ्योमुच्यतेनात्रसंशयः १८ गुरुतल्पेकृतेपापेप्रायश्चित्तमिदंप
रम् नास्त्यनेनसदृशंपुण्यंपवित्रंपापनाशनम् १९ विनापौरुषजाप्येननयेदेकमप्यहः अर्थवादमिदंब्रूयात्सनरोनि
रयीभवेत् २० ग्रहयज्ञःप्रकर्तव्यःसमिच्चरुतिलाज्यकैः धूपगंधप्रसूनादिनैवेद्यादिप्रभेदतः २१ तद्रूपाणांचध्या
नादिसंपाद्यंचयथायथम् कोटिहोमोलक्षहोमोऽयुतहोमस्तुशक्तितः २२ तिलैर्व्याहृतिभिःकार्योग्रहयज्ञाभिधोप्य
सौ अथवक्ष्यामिवाराणांव्रतानिशृणुसांप्रतम् २३ तत्रादौरविवारस्यव्रतंवक्ष्यामितेनघ अत्राप्युदाहरंतीममिति
हासंपुरातनम् २४ प्रतिष्ठानपुरेरम्येसुकर्मानामवैद्विजः आसीद्दरिद्रःकृपणोभैक्ष्यचर्यापरायणः २५ एकदासगतो
धान्ययाचितुंपर्यटन्पुरम् स्त्रियोददर्शसदनेकस्यचिद्गृहमेधिनः २६ चरंत्योरविवारस्यमिलिताव्रतमुत्तमम् तदोत्सुक्ता
श्चतंदृष्ट्वाह्याच्छादयतसत्वरम् २७ पूजाविधिंततोविप्रःप्रार्थयामासताःस्त्रियः छाद्यतेकिंनुभोसाध्व्योभवतीभि-
रिदंव्रतम् २८ कथयध्वंकृपांकृत्वाममोपरिदयालवः परोपकारसदृशोधर्मोनास्तिजगत्त्रये २९

रूपे १९ निरयी निरयगंता
२० २१ २२ २३ २४ भैक्ष्यचर्यापरायणः भिक्षुकः २५ गृहमेधिनः गृहस्थस्य २६ २७ प्रार्थनामेवाह छाद्यत इति त्रिभिः
२८ २९

३० ३१ पूर्वंव्रतस्य आच्छादनं कृतंतत्र कारणमाहुः उन्मादमिति उन्मादं उन्मत्ततां प्रमादं अवधानशून्यत्वम् ३२ अपिमंतस्य शु
भाचरणंमनसिनिधायाह विप्रेंद्रइति ३३ यथाभूतं शास्त्रोक्तमनतिक्रम्य ३४ अवगाहंस्नानं ३५ स्वेतिस्वस्यनित्यं अनुष्ठानाभा

साधूनांसमचित्तानांपरार्थःस्वार्थएवहि दरिद्रपीडितश्चाहंश्रुत्वेदंव्रतमुत्तमम् ३० चरिष्यामिविधिंब्रूहिफलंचास्य
व्रतस्यहि ३१ स्त्रियऊचुः उन्मादंवाप्रमादंवाविस्मृतिंवाकरिष्यसि अभक्तिंवाप्यनास्थांवाकथंदेयंतवाद्विज ३२
इतितासांवचःश्रुत्वाविप्रेंद्रोवाक्यमब्रवीत् ज्ञानवानस्मिभोसाध्व्योभक्तिमांश्चास्मिसद्व्रताः ३३ एवंतद्वचनंश्रुत्वाप्रो
द्दातासद्वयाभवत् साप्रोवाचव्रतंतस्मैयथाभूतंचतद्विधिम् ३४ श्रावणेशुक्लपक्षेतुप्रथमेरविवासरे मौनेनोत्था
यावगाहंकुर्याच्छीतोदकेनतत् ३५ स्वनित्यकर्मसंपाद्यनागवल्लीदलेशुभे परिधिद्वादशयुतंमंडलंतत्रसंलिखेत्
३६ अर्कवक्त्रतुलंसम्यग्रक्तचंदनतःशुभम् तत्रसंज्ञायुतंसूर्यंपूजयेद्रक्तचंदनात् ३७ जानुभ्यामवनींगत्वाअर्घ्यंद्वा
दशमंडलैः रक्तचंदनमिश्रंचजपाकुसुमसंयुतम् ३८ दद्याद्गभस्तयेसम्यक्श्रद्धाभक्तिपुरःसरम् रक्ताक्षतैर्जपापु
ष्पैस्तथान्यैरुपचारकैः ३९ नारीकेलस्यबीजंतुखंडशर्करयायुतम् नैवेद्यमर्पयित्वातुमंत्रैरादित्यलिंगकैः ४० स्तु
वीतद्वादशवारैर्नमस्कारान्प्रदक्षिणाः षट्तंतुनिर्मितंसूत्रंषड्ग्रंथिभिरन्वितम् ४१ अर्पयित्वातुदेवेशंबध्नी
यात्तुगलेचतत् द्विजायवायनंदद्यात्फलैर्द्वादशभिर्युतम् ४२ एतद्व्रतप्रकारंतुश्रावयेत्कस्यचित्पुरः एवंव्रतेकृतेविप्रनि
र्धनोधनमाप्नुयात् ४३ अपुत्रोलभतेपुत्रंकुष्ठीकुष्ठात्प्रमुच्यते बद्धःस्याद्बंधरहितोरोगीरोगेणहीयते ४४

वे प्रत्यवायकरं कर्मसंध्यादिसंपाद्यकृत्वा परिधिः परिवेषरेखा ३६ संज्ञायुतं दत्तसंज्ञं आवाहितमित्यर्थः पूजायांविशेषतः कर्तव्यमाह
जानुभ्यामिति जानुद्वयंभूमौस्थापयित्वेत्यर्थः ३७ ३८ गभस्तयेसूर्याय ३९ बीज गर्भजंद्रव्यं आदित्यलिंगकैः सूर्यप्रतिपादकैः वैदिकैः पु
राणोक्तैर्वायथाधिकारंज्ञेयं ४० ४१ ततसूत्रं ४२ श्रावयेत्कथयेत् ४३ हीयतेत्यज्यते ओहा कृत्यागेइत्यस्यकर्मणिरूपं ४४

साधकः पूजाकर्ता ४५ ४६ ४७ ४८ स्वरंगनोपमे स्वः स्वर्गे अंगनाः स्त्रियः अप्सरसः तासामुपमाय यास्ते तस्य व्रतश्रवणस्य ४९ ५० विप्रसद्मपुरोध्वना ब्राह्मणगृहाग्रवर्तिना मार्गेण गच्छता वातायने गवाक्षे ५१ देहयोः अवयवानां नेत्रनासिकादीनां यानि सम्यक् स्थानानि रचनाविशेषाः तैः पद्मचंद्रादिकं त्रैलोक्यसुंदरतया प्रख्यातं यत् पद्मकमलं चंद्रः आदिपदेन हंसः कोकिलः अप्सरसः इत्यादिवस्तुजातं तत् भर्त्सयंत्यौ हीनप्रभं कुर्वंत्यौ न स्मात्सर्वस्मात्सुंदरवस्तुजातादप्युत्तमावित्यर्थः ५२ तत् अतिसुंदरं कन्याद्वयं दृष्ट्वा जातां राज्ञो जातां मदनावस्थामाह राजेत्यर्धेन मोहं मूर्च्छां प्रार्थयामास याचितवान् ५३ ५४ ५५ ५६ इति पंचमोऽध्यायः ५

किंबहूक्तेन विप्रेंद्र यद्यदिच्छति वांछितम् तत्तल्लभेत्साधकोसौ व्रतस्यास्य प्रभावतः ४५ एवं चतुर्षु वारेषु कदाचिदपि पंचसु उद्यापनं ततः कार्यं व्रतसंपूर्णहेतवे ४६ एवं कुरुष्व विप्रेंद्र सर्वसिद्धिर्भविष्यति नमस्कृत्वा तु ताः साध्वीर्विप्रः स्वगृहमाययौ ४७ तथा चकार तत्सर्वं व्रतं चैव यथाश्रुतम् स्वकन्यकाद्वयस्यापि श्रावयामास तद्विधिम् ४८ तस्य श्रवणमात्रेण दर्शनात्पूजनस्य च स्वरंगनोपमे कन्ये जाते तस्य प्रभावतः ४९ तदाप्रभृति विप्रस्य गृहे लक्ष्मीर्विवेश ह नानामार्गैर्निमित्तैश्च लक्ष्मीवानितिसोभवत् ५० कदाचिद्गच्छता राज्ञा विप्रसद्मपुरोध्वना वातायनेस्थिते कन्ये दृष्टे निरुपमे शुभे ५१ देहावयवसंस्थानैर्वस्तु यद्यच्च सुंदरम् त्रैलोक्ये भर्त्सयंत्यौ ते पद्मचंद्रादिकं च यत् ५२ राजा मोहं समापेदे तत्रैवावस्थितः क्षणम् आमंत्र्य ब्राह्मणं सद्यः प्रार्थयामास कन्यके ५३ विप्रोपि हर्षितो भूत्वा प्रादाद्राज्ञे सुताद्वयम् राजानं प्राप्य भर्तारं तेपि कन्ये मुदान्विते ५४ पुत्रपौत्रादिसंपन्ने चक्रतुश्च स्वयं व्रतम् व्रतमेतत्समाख्यातं मुने तव महोदयम् ५५ यस्य श्रवणमात्रेण सर्वान्कामानवाप्नुयात् अनुष्ठानफलं तस्य किं वर्ण्यं विधिनंदन ५६ इति श्रीस्कं॰ ईश्वरसनत्कुमारसं॰ श्रा॰ प्रकीर्णकनानाव्रतरविवारादिकथनं नाम पंचमोऽध्यायः ५

पूर्वकथितस्यश्रवणेन जातंहर्षं द्योतयन् अग्रे कथनायवक्तारंप्रोत्साहयति रविवारस्येति मेमयावदकथय १ यतः ममनयनभूतस्यसूर्यस्य इदंपूर्वोक्तंमाहात्म्यंतदा सोमस्य उमासहितमन्नाम्नः उत्तम मस्तीतिकिंवक्तव्यं अत्र सोमपदे उमयासहितः सोमः इतिसमासः तथाचार्थः यदिमन्नयनभूतस्यरवेरेतादृशं माहात्म्यं तदापार्वतीसहितस्य ममएतदपेक्षयामहदस्तिनाश्चर्यमिति २ सोमेतिनाम्नः

सनत्कुमारउवाच रविवारस्यमाहात्म्यंश्रुतंमेहर्षकारकम् सोमवारस्यमाहात्म्यंश्रावणेमासिमेवद १ ईश्व
रउवाच रविर्मेनयनंतस्यमाहात्म्यमिदमुत्तमम् उमासहितमन्नाम्नस्तस्यसोमस्यकिंपुनः २ माहात्म्यवर्णनी
यंमेयत्किंचिदपितद्ब्रुवे सोमश्चंद्रोविप्रराजः सोमःस्याद्यज्ञसाधनम् ३ निमित्तानिचतन्नाम्नःशृणुमत्तःसमाहि
तः मत्स्वरूपोयतोवारस्ततःसोमइतिस्मृतः ४ प्रदातासर्वराज्यस्यश्रेष्ठश्चैवततोहिसः समस्तयज्ञफलदो
व्रतकर्त्रैयतोहिसः ५ तस्यशृणुविधिंविप्रविस्तरात्कथयामिते द्वादशेष्वपिमासेषुसोमवारःप्रशस्यते ६
तावत्कर्तुमशक्तश्चेच्छ्रावणेमासिकारयेत् अस्मिन्मासेव्रतंकृत्वाअब्दव्रतफलंलभेत् ७ श्रावणेशुक्लपक्षेतु
प्रथमेसोमवासरे संकल्पयेद्व्रतंसम्यक्शिवोमेप्रीयतामिति ८ एवंचतुर्षुवारेषुभवेयुःपंचवायदि प्रातःसंक
ल्पयेत्तत्रनक्तंचशिवपूजनम् ९ उपचारैःषोडशाभिःसायंचपूजयेच्छिवम् शृणुयाच्चकथांदिव्यामेकाग्रकृतमा
नसः १० सोमवारव्रतस्यास्यकथ्यमानंनिबोधमे श्रावणेप्रथमेसोमेगृण्हीयाद्व्रतमुत्तमम् ११ सुस्नातश्चशु
चिर्भूत्वाशुक्लांबरधरोनरः कामक्रोधाद्यहंकारद्वेषपैशून्यवर्जितः १२

अर्थान्तराणि तद्व्रतकर्तुर्बहुफलप्राप्तिंच कथयन् तद्वारस्यसर्वोत्तमत्वंघटयति सोमइति यज्ञसाधनंसोमः सोमवल्ली ३ ४ ५ प्रशस्यते प्रशस्तोस्तिव्रतंकर्तुमितिशेषः ६ ७ ८ ९ १० निबोधजानीहि विधानमितिशेषः ११ सुस्नातः स्नानविध्यनुसारेणकृतस्नानः अतएवशुचिः पूर्वोक्तविशे

षणैः बाह्यशौचमुक्त्वा अधुना आंतरं शौचमाह कामेति आदिशब्देन लोभ मोहयोर्ग्रहणं अहंकारः मदः अहमेवश्रेष्ठइतिबुद्धिः पैशून्यंख
लत्वं १२ आहरेत् आनयेत् अभीष्टैः प्रियैः ममेतिभावः १३ भवः संसारस्तंनाशयतीति तथातंधीमहिध्यायमेत्यर्थः १५ १६
यथाविभवसारेण संपत्तौसत्यां वंचनांनकुर्यादित्यर्थः १७ समासतः संक्षेपतः अभेद्यं अपरिहार्यं १८ नक्तभुक्तेन नक्तभोजनकृतेन

आहरेच्छ्वेतपुष्पाणि मालतीमल्लिकादिकाः अन्यैश्चविविधैः पुष्पैरभीष्टैरुपचारकैः १३ पूजयेन्मूलमंत्रेणत्र्यं
बकेणततः परम् शर्वायभवनाशाय महादेवायधीमहि १४ उग्रायचोग्रनाथाय भवायशशिमौलिने १५ रुद्राय
नीलकंठायशिवायभवहारिणे एवंसंपूज्यदेवेशमुपचारैर्मनोहरैः १६ यथाविभवसारेणतस्यपुण्यफलंशृणु सो
मवारेयजंतेयेपार्वत्यासहितंशिवम् १७ तेलभंत्यक्षयाल्लोकान्पुनरावृत्तिदुर्लभान् १७ अत्रनक्तेनयत्पुण्यंकथया
मिसमासतः सप्तजन्मार्जितंपापमभेद्यंदेवदानवैः १८ प्रणश्यन्नक्तभुक्तेननात्रकार्याविचारणा उपवासेनवाकुर्या
द्व्रतमेतदनुत्तमम् १९ पुत्रार्थीलभतेपुत्रान्धनार्थीलभतेधनम् यंयंचिंतयतेकामंतंतंप्राप्नोतिमानवः २० इह
लोकेचिरंस्थित्वाभुक्त्वाभोगान्यथेप्सितान् विमानवरमारुह्यरुद्रलोकेमहीयते २१ चलंचित्तंचलंवित्तंचलंजीवि
तमेवच एवंज्ञात्वाप्रयत्नेनव्रतस्योद्यापनंचरेत् २२ उमामहेश्वरौहैमौराजतेवृषभेस्थितौ यथाशक्त्याप्रकर्तव्यौ
वित्तशाठ्यंनकारयेत् २३ मंडलंलिंगतोभद्रंदिव्यंवैकारयेच्छुभम् तत्रसंस्थापयेत्कुंभंश्वेतवस्त्रयुगान्वितम् २४

विचारणासंशयः १९ २० देहादीनांनश्वरत्वं दर्शयन् व्रतोद्यापनस्यावस्यकर्तव्यत्वंद्योतयति चलमिति अनिश्चितमित्य
र्थः प्रथमं मनसिश्रद्धायामुत्पन्नायां अव्याहितकालेव व्रतोद्यापने यतितव्यम् मनसःस्थिरत्वाभावात् तथाचोक्तमस्त्यर्जुनेनगीतायां चं
चलंहिमनःकृष्णेति २२ २३ दिव्यंसुंदरम् २४ ६. ६. ६.

वैणवंवेणूद्भवं न्यसेत् स्थापयेत् २५ २६ २७ शर्वाद्यैः पंचदशषोडशश्लोकोक्तैः २८ २९ प्रदापयेत् दद्यात् ३०

ताम्रपात्रंवैणवंवाकुंभस्योपरिविन्यसेत् तस्योपरिन्यसेद्देवमुमयासहितंशिवम् २५ श्रुतिस्मृतिपुराणोक्तैर्मंत्रैः
संपूजयेच्छिवम् पुष्पमंडपिकाकार्यावितानंचैवशोभनम् २६ रात्रौजागरणंकार्यंगीतवादित्रनिःस्वनैः स्वगृह्यो
क्तविधानेनततोग्निंस्थापयेद्बुधः २७ ततोहोमंचशर्वाद्यैरेकादशाक्तनामभिः पालाशाभिःसमिद्भिश्चजुहुयाद
ष्टाधिकंशतम् २८ यवव्रीहितिलाद्यैश्चआप्यायस्वेतिमंत्रतः बिल्वपत्रैस्त्र्यंबकेणषड्वर्णेनापिवापुनः २९
पूर्णाहुतिंततोहुत्वाकृत्वास्विष्टकृदादिकम् आचार्यंपूजयेत्पश्चाद्गांचतस्मैप्रदापयेत् ३० ब्राह्मणान्भोजये
त्पश्चादेकादशस्कशोभनान् एकादशघटास्तेभ्योवंशपात्रसमन्विताः ३१ संपूजितंततोदेवंचोपकरणानिच
आचार्यायततोदद्यात्प्रार्थयेत्तदनंतरम् ३२ परिपूर्णंव्रतंमेस्याच्छिवोमेप्रीयतामिति बंधुभिःसहभुंजीतत
तोहर्षपुरःसरम् ३३ अनेनैवविधानेनयइदंव्रतमाचरेत् यंयंचिंतयतेकामंतंतंप्राप्नोतिमानवः ३४ शिवलोकं
ततोगत्वातस्मिँल्लोकेमहीयते कृष्णेनाचरितंपूर्वंसोमवारव्रतंशुभम् ३५ नृपैःश्रेष्ठैस्तथाचीर्णमास्तिकैर्ध
र्मतत्परैः इदंयःशृणुयान्नित्यंसोपितत्फलमाप्नुयात् ३६ इतिश्रीस्कंदपुराणेईश्वरसनत्कुमारसंवादे
श्रावणमासमाहात्म्येसोमवारव्रतकथनंनामषष्ठोऽध्यायः ६ ७ ईश्वरउवाच सनत्कुमारव
क्ष्यामिभौमव्रतमनुत्तमम् यस्यानुष्ठानमात्रेणअवैधव्यंप्रजायते १ दद्यादिति द्वितीयश्लोकस्थेनान्वयः

३१ ३२ ३३ ३४ ३५ ३६ इतिश्रावणमाहात्म्यटीकायांषष्ठोऽध्यायः ६ पूर्वाध्यायो
पयकरंसोमवारव्रतमुक्तं अधुनास्मिन्नध्यायेस्त्रीभिः विवाहानंतरंपंचवर्षमात्रंकर्तव्यंमंगलागौरीव्रतमाह सनत्कुमारेति अनु

त्तमम् नास्त्युत्तमं यस्मात्तत् १ २ व्रतविधिमाह श्रवणेत्यादिषड्भिः ३ तां इत्यध्याहारः ४ ५ पूजायां विशेषद्रव्या-
पयाह· दूर्वादलैरिति ६ तावत्संख्यैः तावतीषोडशरूपासंख्यायेषांतैः ७ ८ मात्रेजनन्यै प्रत्यासत्या व्रतकर्त्र्या इत्यर्थः ९

विवाहानंतरं पंचवर्षाणि व्रतमाचरेत् नामास्य मंगलागौरी व्रतं पापप्रणाशनम् २ विवाहानंतरं चाद्ये श्रावणे शुक्लपक्ष
के प्रथमं भौमवारस्य व्रतमेतत्तु कारयेत् ३ पुष्पमंडपिका कार्या कदलीस्तंभमंडिता नानाविधैः फलैश्चैव पट्टकूलै
श्च भूषयेत् ४ तत्र संस्थापयेद्देव्याः प्रतिमां स्वर्णनिर्मिताम् अन्यधातुमयीं वापि स्वशक्त्या तत्र पूजयेत् ५ उपचारैः
षोडशभिर्मंगलागौरिसंज्ञिताम् दूर्वादलैः षोडशभिरपामार्गदलैस्तथा ६ तावत्संख्यैः स्तंदुलैश्च चणानां शकलैस्त
था षोडशोन्मितवर्तीभिस्तावद्दीपांश्च दीपयेत् ७ दध्योदनं च नैवेद्यं तत्र भक्त्या प्रकल्पयेत् समीपं स्थापयेद्देव्या दृ
षदं चोपलं तथा ८ एवं कृत्वा तु पंचाब्दं ततउद्यापनं चरेत् मात्रे दद्याद्वायनं तु प्रकारं शृणु तस्य च ९ प्रतिमां मंगला-
गौर्याः सुवर्णपलनिर्मिताम् तदर्धेन तदर्धेन शक्त्या वा प्यथ कारयेत् १० तंडुलैः पूरिते भांडे शक्त्या स्वर्णादिनि-
र्मिते संस्थाप्य परिधानीयं रम्यणीयां च कंचुकीम् ११ तयोरुपरि देव्यास्तु प्रतिमां स्थापयेत्ततः समीपभागे सं-
स्थाप्य दृषदं चोपलं तथा १२ रौप्येण निर्मितं मात्रे एवं दद्यात्तु वायनम् षोडशापि सुवासिन्यो भोजनीयाः प्रयत्नतः
१३ एवं कृते व्रते विप्र सौभाग्यं सप्तजन्मसु पुत्रपौत्रादिभिश्चैव रमते संपदायुता १४ सनत्कुमारउवाच केने
दं व्रतमाचीर्णं कस्य जातं फलं पुरा यथास्यात्प्रत्ययः शंभो कृपां कृत्वा तथा वद १५

तदर्धेन पलार्धेन तदर्धेन पलार्धार्धेन
पलस्य चतुर्थांशेनेत्यर्थः १० परिधानीयं वस्त्रं ११ तयोः वस्त्रकंच्युक्योः १२ रौप्येण निर्मितं दृषदं ह्युपलमिति पूर्वेणान्वयः १३ १४
१४ एतद्व्रतकथां जिज्ञासुः सनत्कुमारः पृच्छति केनेदमिति प्रत्ययः दृढविश्वासः १५ ६२ . ६२

श्रुतसंपन्नः श्रुतंशास्त्रंतेनसंपन्नःयुक्तः श्रुतंशास्त्रावधृतयोरित्यमरः विद्वानितिभावः हतशात्रवं शत्रूणांसमूहः शात्रवंहतंशात्रवंयेनसतथा
१६ १७ १८ १९ २० २१ २२ २३ संमंत्र्यविचार्य ययाचे याचितवान् २४ ममद्वारे

ईश्वरउवाच कुरुदेशेपरस्यराजाश्रुतकीर्तिरितिश्रुतः बभूवश्रुतसंपन्नोकीर्तिमान्हतशात्रवः १६ चतुःषष्ठिकलाभिज्ञो
धनुर्विद्याविशारदः पुत्रादन्यच्छुभंसर्वंतस्यराज्ञोबभूवह १७ संतानविषयेथासौबहुचिंताकुलोभवत् देव्याश्चाराधनंचक्रेजपध्यानपुरःसरम् १८ क्रूरेणतपसातस्यदेवीतुष्टाबभूवह उवाचवचनतस्मैवरंवरयसुव्रत
१९ श्रुतकीर्तिरुवाच यदिदेविप्रसन्नासिपुत्रंमेदेहिशोभनम् अन्यद्देवित्वत्प्रसादान्नन्यूनंकिंचिदस्तिमे २०
इतितस्यवचःश्रुत्वादेवीप्राहशुचिस्मिता दुर्लभंयाचितंराजन्दास्येतुभ्यंकृपावशात् २१ परंशृणुष्वराजेंद्रपुत्रस्तेद्गुणवत्तरः ईप्सितश्चेत्सोडशाब्दंजीविष्यतिनचाधिकम् २२ रूपविद्याविहीनश्चेच्चिरंजीवीभविष्यति इतिदेव्यावचः
श्रुत्वानृपश्चिंतातुरोऽभवत् २३ भार्ययासहसंमंत्र्ययाचेगुणभूषितम् सर्वलक्षणसंपन्नंषोडशाब्दायुषंसुतम्
२४ आज्ञापयामासतदादेवीभक्तंनराधिपम् आम्रवृक्षोममद्वारेवर्ततेनृपनंदन २५ तस्यैकंफलमादायपत्न्यै
देहिममाज्ञया भक्षणार्थंचसाधत्रीगर्भंसद्योनसंशयः २६ हृष्टोराजातथाचक्रेपत्नीगर्भंचसादधौ दशमेमासि
सुषुवेपुत्रंदेवसुतोपमम् २७ जातकर्मादिकंचक्रेहर्षशोकसमन्वितः चिरायुरितिनामास्यपिताचक्रेशिवंभजन् २८
प्राप्तेतुषोडशेवर्षेचिंतामापसभार्यकः ततश्चक्रेविचारंसकष्टलब्धोप्ययंसुतः २९

देवालयस्याग्रभागे २५ धत्रीस्याद्धरिष्यतीत्यर्थः २६ तथादेव्युक्तानुसारेण तथाकरणेहेतुमाह हृष्टइति देवसुतोपमंदेवः ब्रह्मविष्णुमहेशेंद्रेष्वन्यतमः इतरेषांशापवशात्
पुत्रोत्पत्तेरभावात् २७ हर्षशोकसमन्वितइति हर्षःपुत्रजननोद्भवः शोकःतस्यअल्पायुष्ट्वोद्भवः ताभ्यांसमन्वितोयुक्तः २८ चिंताप्राप्तो-

कारणमाह॰ कष्टलब्धइति कष्टेन तपोरूपेण लब्धमाप्तमित्यर्थः २९ ३० कार्पटिकं प्रवासयोग्यं ३१ काशीप्रान्तनयनेकारणमाह॰
मृत्युंजयइति ३२ स्वसुर्भगिन्याः स्वस्रीयेन भगिनीपुत्रेणचिरायुषेत्यर्थः ३३ वयोमध्यगतातरुणी ३४ ३५ ३६ ३७

स्वसमीपेकथंमृत्युद्रष्टव्योदुःखदोऽस्यतु काशींप्रस्थापयामासमातुलेनसमंविभुः ३० आनतंप्रार्थयामासराज॰
पत्नीयशस्विनी धृत्वाकार्पटिकंवेषंकाशींप्रतिस्वतनय ३१ मृत्युंजयःप्रार्थितोस्मिपुत्रार्थंतुमयापुरा प्रेषयिष्यामि॰
विश्वेशयात्रार्थंचजगत्पतेः ३२ तस्मान्नेयःस्वतोमेऽद्यपालनीयश्चयत्नतः इतिश्रुत्वास्वसृवाक्यंस्वस्रीयेनसमंययौ
३३ दिनानिकतिचिद्गच्छन्नानंदनगरंययौ तत्रराजावीरसेनोनाम्नासर्वसमृद्धिमान् ३४ तत्कन्यामंगलागौरीसर्व
लक्षणसंयुता वयोमध्यगतारम्यारूपलावण्यशालिनी ३५ उपमानानिसर्वाणितुच्छीकृत्योदयंगता नगरोपव
नेरम्येसर्वाभिःपरिचारिता ३६ ततस्तावपिसंप्राप्तौचिरायुर्मातुलश्चसः विश्रांतिप्रापतुस्तत्रतासांदर्शनलालसौ
३७ क्रीडंतीनांविनोदेनकुपितातत्रकाचन उवाचराजतनयांसारंडेत्यतिदुर्वचः ३८ श्रुत्वातदशुभवाक्यमुवाच
नृपनंदिनी अयोग्यंभाषसेत्वंकिंमत्कुलेनैवतद्द्विधा ३९ प्रसादान्मंगलागौर्यास्तद्व्रतस्यप्रभावतः मत्करादक्षता
यस्यप्रपतिष्यंतिमूर्द्धनि ४० विवाहेसचिरायुःस्यादल्पायुरपिचेत्सखि ततःसमस्तास्ताःकन्याःस्वंस्ववेश्मययुः
स्तदा ४१ सएवदिवसोराजकन्यायाःपाणिपीडने राज्ञोबाल्हिकदेशस्यदृढधर्माभिधस्यवै ४२ स्वकेतुनाम्नेपुत्राय
दातुंसानिश्चिताभवत् सस्वकेतुरविद्यश्चकुरूपोबधिरस्तथा ४३

३८ ३९ ४०
हेइति पूर्वश्लोकस्थेन प्रपतिष्यतीत्यनेनसंबध्यते वेश्मागृहं ४१ पाणिपीडनेविवाहे ४२ निश्चिताकृतनिश्चया
र्णयति सइति सः निश्चितः अविद्यः मूर्खः कुरूपः कुत्सितं रूपंयस्य ४३ ध्र ध्र ध्र

नेकन्यापक्षीयाः ततः वरस्य कुत्सितत्वज्ञानादूर्ध्वं ५४ याचिरे ययाचिरे याचितवंतइत्यर्थः आर्षित्वाद्ययाचिरइत्यत्र याचिरइत्य पिसा
धुः ५५ मनसः अंतर्गतत्वेपि अंतःपदं बात्यानंदवृत्तिराहित्यदर्शनार्थं आनंदचिन्हं बहिर्नादर्शयदित्यर्थः ५६ ५७ ५८
गौरीहरान्तिके गौरीहरसमीपभागे ५९ ५० निशीथे अर्धरात्रे कालः मृत्युः समीयिवान् प्राप्तः भूपसुता मंगलागौरी ५१

ततस्तेमंत्रयामासुर्नृपोन्योऽद्यवरःपरः अथासिद्धेविवाहेचसुकेतुस्तत्रगच्छतु ५४ ततश्चिरायुषंगत्वायाचिरेमा
तुलंप्रति द्वयोस्मभ्यमयंबालः कार्यसिद्धिर्हिनोभवेत् ५५ परोपकारतुल्योहिधर्मोनास्त्यपरोभुवि मातुलस्त
द्वचःश्रुत्वाअंतर्हृष्टमनाअभूत् ५६ पूर्वंश्रुतंचोपवनेकन्यावाक्यमनेनयत् एकवारंतथाप्याहयुष्माभिर्याच्यतेक
थम् ५७ वस्त्रालंकरणादीनियाच्यंकार्यस्यसाधने नवरोयाच्यतेक्कापीदीयतेगौरवाद्धिवः ५८ विवाहसाधया
मासुर्नीत्वातत्रचिरायुषम् सप्तपद्यादिकेजातेरात्रौगौरीहरांतिके ५९ सहासौमंगलागौर्यासुतोहर्षसमन्वितः
तदह्निषोडशाब्दानिसमाप्तानिचिरायुषः ५० निशीथेसर्परूपेणकालस्तत्रसमीयिवान् तदंतरेभूपसुताजागृता
दैवयोगतः ५१ साददर्शमहासर्पंचकंपेभयविह्वला धैर्यंकृत्वातदाबालापूजयामाससोरगम् ५२ उपचारैःषो
डशभिर्दुग्धंपातुंददौबहु प्रार्थयामासतंसर्पंदीनवाण्याचतुष्टये ५३ ययाचेमंगलागौरीकरिष्येव्रतमुत्तमं जीया
न्मेपतिरेतस्माच्चिरंजीवेत्तथाकुरु ५४ एतस्मिन्नंतरेसर्पःकरकेप्रविवेशह कंचुक्यास्वीययासातुचक्रेतन्मुखबंध
नम् ५५ एतस्मिन्नंतरेभर्ताअंगमोटनपूर्वकम् जागृतश्चाऽब्रवीद्भार्यांक्षुधामांबाधतेप्रिये ५६ मातुःसकाशं
गत्वासाअानयामासपायसं लड्डूकादिचतद्दत्तंबुभुजेप्रीतमानसः ५७

कंपेहेतुमाह भयविह्वलेति उरगंसर्पं ५२ ५३
५४ करकेभांडविशेषे तन्मुखबंधनम् तद्भांडमुखपिधानम् ५५ ५६ ५७ ५८ ५९

मुद्रिका अंगुलीयकम् ५८ बहिः करकमुखाद्बहिरागतां ५९ ६० ६१ अशुभेइतिच्छेदः परिचायकंअभिज्ञानं ६२ नायं
मेपतिरिति यत्पूर्वमुक्तं तत्कारणमाह मइति मे मत्यं ६३ तद्रत्नसंचयः हारस्थितरत्नसमूहः कीदृशोस्ति तदनेन कथनीयमिति भा-

हस्तक्षालनकालेत्तुतद्धस्तान्मुद्रिकाऽपतत् तांबूलंभक्षयित्वातुप्रस्कन्नःपुनरेवसः ५८ ततःसाकरकंत्यक्तुंनिर्गच्छं
तीविधेर्गतः हारकांतिंबहिर्दृष्ट्वास्फुरंतीविस्मयंययौ ५९ दृष्ट्वाघटस्थंतद्धारंस्वकंठेचदधारसा किंचिन्निशावशे
षेतुमातुलस्तंनिनायसः ६० ततस्तेवरपक्षीयाःस्फकेतुंतत्रचानयन् दृष्ट्वातंमंगलागौरीउवाचायंनमेपतिः ६१
ताश्चुचुस्तेततःसर्वेकिमिदंभाषसेशुभे परिचायकमस्तीहकिंचित्तेतद्वदस्वनः ६२ मंगलागौर्युवाच मेदत्तंये·
नरात्रौचनवरत्नांगुलीयकम् अस्यांऽगुलौतन्निक्षिप्यपश्यध्वंपरिचायकम् ६३ पत्यादत्तोस्तिमेहारोरात्रौतद्रत्न·
संचयः कीदृशोनेनवाच्योसौप्रतिचीरपरान्वितम् ६४ किंचाभ्रसेचनेरात्रौतत्सदंकुंकुमान्वितम् ऊरौमेवर्ततेतच्चस·
र्वैपश्यतमाचिरम् ६५ किंचरात्रौभाषणादिभक्षणादिचयत्कृतम् तदनेनचवक्तव्यंतदास्यान्मेपतिःस्वयम् ६६
एवंश्रुत्वातुतद्वाक्यंसाधुसाध्विनिचाब्रवीत् एकस्यापिनयोगोभूत्तदासर्वैर्निषेधितः ६७ तदातेवरपक्षीयाजग्·
मुःसर्वेयथागतम् जनकोमंगलागौर्याःश्रुतकीर्तिःकुरुद्वहः ६८ अन्नपानादिकंसत्रंचकारसमहामनाः वर
पक्षस्यवृत्तांतःश्रुतःकर्णोपकर्णतः ६९ स्वरूपस्यकुरूपत्वादानीतःकश्चनाहृतः स्थापयामाससौधेतुकन्यांजवनिका
वृताम् ७०

वः ६४ ६५ ६६ स्फकेतुरितिशेषः अब्रवीत् उत्तराणियानि कानिचित् कथयामासेति भावः योगः यथार्थोत्तर
लाभः निषेधितः नायंमंगलागौर्याः पतिरित्युक्त्वा निर्वासितः ६७ यथागतंजग्मुः आगमनमार्गेणगताः कार्यासिद्ध्यभावादीदृश्युक्तिः ६८
अन्नपानादिकं अन्नपानं आदियस्मिन् एतादृशम् ६९ सौधे राजसदने सौधोस्त्री राजसदनमित्यमरः जवनिका तिरस्कारिणी (पडदाइ

तिभाषायां) तयाआवृत्तां वेष्टितां प्रतिसीराजवनिकास्यात्तिरस्करणीचसेत्यमरः ७० हायनेवर्षे ७१ लोकोत्तरमुदान्विता लोके-
भ्यः उत्तरानिरतिशयेत्यर्थः एतादृशीयामुत् आनंदः तद्युक्ता अत्यानंदवतीतिभावः ७२ ७३ ७४ ७५ आगतंआगमनं

एवंगतेहायनेतुयात्रांकृत्वासमातुलः चिरायुःप्रययौतत्रकिंजातमवलोकितुं ७१ तंसाजालांतराद्दृष्ट्वालोकोत्तरमु-
दान्विता पितरौकथयामासममभर्तासमागतः ७२ सुहृद्गणंसमाहूयपूर्वोक्तंपरिचायकं दृष्ट्वासर्वमपित्यस्मैद-
दौकन्याशच्चिविस्मिता ७३ शिष्टैःपरिणयोत्साहंकारयामासभूपतिः वस्त्राण्याभरणादीनिसेनामश्वान्गजान्र-
थान् ७४ प्रस्थापयामासनृपोदत्तान्यदपिभूरिशः पत्न्यासहचिरायुःसमातुलेनसमन्वितः ७५ स्वपुरंसेनयासा-
र्द्धंजगामकुलनंदनः श्रुत्वाजनमुखात्तस्यआगतंपितरावुभौ ७६ विश्वासंलेभतुर्नैवस्यात्कथंदैवमन्यथा एतस्मिन्नंतरेप्राप्तःपित्रोरंतिकमेवसः ७७ पपातपादयोर्भक्त्यापित्रोःस्नेहपरिप्लुतः मूर्ध्न्यवघ्रायतंपुत्रंपरमांमुदमा-
पतुः ७८ स्नुषापिमंगलागौरीश्वशुरौप्रणनामसा अंकेनिवेश्यतांश्वश्रूःपप्रच्छोदंतमंजसा ७९ स्नुषापिमंगलागौर्याव्रतमाहात्म्यमुत्तमम् कथयामासतत्सर्वंयथावृत्तंमहामुने ८० इत्येतत्कथितंतुभ्यंमंगलागौरिकंव्रतम्
यएतच्छृणुयात्कश्चिद्यश्चापिपरिकीर्तयेत् ८१ मनोरथास्तस्यसर्वेसिद्ध्यंत्यत्रनसंशयः ८२ सूतउवाच सन-
त्कुमारमित्येवकथयामासधूर्जटिः सचानंदंपरंलेभेश्रुत्वाकार्यकरंव्रतम् ८३ इतिश्रीस्कंदपुराणेईश्वरसनत्कु-
मारसंवादेश्रावणमासमाहात्म्येमंगलागौरीव्रतकथनंनामसप्तमोऽध्यायः ७ ॥ ईश्वरउवाच बुधगु-
र्वोरथोवक्ष्येव्रतंपापप्रणाशनं यत्कृत्वाश्रद्धयामर्त्यःपरांसिद्धिमवाप्नुयात् १

७६ ७७ ७८ उदंतंवृत्तांतं ७९
८० ८१ ८२ ८३ इतिश्रावणमाहात्म्यटीकायांसप्तमोऽध्यायः ७ व्रतफलमाह पापप्रणाशनमिति पापंअत्तानं प्रणाशयति-

दूरींकरोतीतितथा १ प्रजापतिर्ब्रह्मा शीतरश्मिंचंद्रंगुरोर्बृहस्पतेः २ ३ ४ बुधः बुधनामा बुधः बुद्धिमान् अन्वेषयन्मार्ग·
यन् ५ गुरुतल्पगः गुरुभार्यागामी तल्पंशय्याद्दारेष्वित्यमरः निष्कृतिर्मुक्तता ६ महापातकसंयोगेइति महापातकंसंयुज्यतेनेन ए
तादृशेकर्मणीत्यर्थः ७ निष्कल्मषोनिष्पापः आगः अपराधं ८ ९ हेशक्र इंद्र त्वया दापनीया नचकदाचिद्दत्तव्यं ममकोधि·

प्रजापतिःशीतरश्मिंद्विजराज्येभ्यषेचयत् सकदाचिद्गुरोर्भार्यांतारानाम्नींददर्शह २ रूपयौवनसंपन्नांलावण्यम
दगर्विताम् मोहितोरूपसंपत्त्याकामबाणवशंगतः ३ स्वगृहेस्थापयित्वानुबलात्सबुभुजेचतां एवंबहुतिथेका
लेगतेपुत्रोबभूवह ४ बुधोबुधोरूपशालीसर्वलक्षणसंयुतः अन्वेषयन्गुरुःपत्नींज्ञातवान्शशिसद्मनि ५ यया
चेदेहिमेभार्यांत्वंकथंगुरुतल्पगः गुरुतल्पकृतात्पापान्निष्कृतिस्तेकथंभवेत् ६ महापातकसंयोगेकथ्यतेबुद्धिराह
ता गुप्तमेवप्रयच्छेमांगुरुभार्याममप्रियाम् ७ रहसिप्रायश्चित्तंचकृत्वानिष्कल्मषोभव नोचेदिंद्रसमीपेतेआगः
संकथयाम्यहम् ८ इत्येवंबहुधोक्तोपिनदधौतांकलानिधिः तदादेवसभांगत्वाकथयामासगीष्पतिः ९ चंद्रेण
मेत्त्यपहृताभार्यातांनददातिसः देवराजोसिशक्रत्वंदापनीयात्वयाज्ञया १० नचेत्त्वांतत्कृतंपापंसंक्रमिष्यत्यसंशयं
राजाराष्ट्रकृतंपापंभुंक्तेशास्त्रविनिर्णयात् ११ दुर्बलस्यबलंराजापुराणोक्तितिभण्यते इतिश्रुत्वागुरोर्वाक्यंचंद्रमाहू
यवासवः १२ आज्ञापयामासरुषादेहिभार्यांगुरोर्विधो अन्यदाराभिगमनंकेवलंपापसंज्ञितम् १३ गुरुदाराभिग·
मनंमहापातकसंज्ञितम् तस्माच्चंद्रगुरोर्भार्यांदेहित्वमविचारयन् १४ देवेंद्रवचनंश्रुत्वानिशापतिरथाब्रवीत् दास्ये
त्वदाज्ञयाभार्यांपुत्रंनैवददाम्यहम् १५ कारोस्तीति यतः त्वंदेवराजोसि १० ननुतत्कृतंपापं मांकिमिति संक्रमिष्यति इतिचेत्तत्रशा
स्त्रनियममाह राजेति ११ तवात्रागमनेकिंकारणमितिचेत्तत्राह दुर्बलस्येति १२ १३ १४ १५

मत्सकाशाज्जात इत्यत्र प्रमाणमाह ममेति यतः ममवैभवयुक् मत्सदृशः तस्मान्ममेतिभावः १६ १७ १८ १९ २०
२१ चंद्रस्य च परं गीष्पतेः गुरोः उभयोरित्यर्थः अन्यवरदानेपात्रतां सूचयंतं संबोधयंति सुराचार्येति युवयोः पितृपुत्रयोः बुधगुर्वो

मत्सकाशात्सुतोजातोममवैभवयुग्यतः गीष्पतिस्त्वाहमत्तोभूत्ततःसंशयिताःसुराः १६ ततस्तेनिर्णयंचक्रुर्माता
जानातिचांगजम् पप्रच्छुस्तेतदातारांकेनायंगर्भआहितः १७ सत्यंवदस्वकल्याणिनमिथ्यावक्तुमर्हसि तदाल
ज्जान्वितातारा औरसोयंविधोःसुतः १८ गीष्पतेःक्षेत्रजश्चातोयोग्यःस्यात्तस्यदीयतां शास्त्रतस्तेविचार्याथददुश्चं
द्रायतंबुधम् १९ तदाखिन्नंगुरुंदृष्ट्वाददुर्देवावरंतयोः गच्छस्वत्वंचंद्रगृहंतवाप्यस्तिसुतोह्ययम् २० चंद्रस्यगीष्प
तेश्चायंग्रहत्वंयात्वसौसुतः अन्यच्चापिसुराचार्यगृहाणेमंवरंशुभम् २१ यःकरिष्यतिमेधावीमिलित्वायुवयोर्व्रतं
तस्यस्यात्सकलासिद्धिःसत्यंसत्यंनसंशयः २२ श्रावणेमासिसंप्राप्तेशंकरस्यमहाप्रिये बुधगुर्वोर्वासरयोर्येकरिष्य
तिपूजनम् २३ नैवेद्यंदधिभक्तेनसाधनेमूलकंभवेत् युवयोर्मूर्तिमालिख्यस्थानभेदात्फलंलभे २४ बालांदो
लोपरिस्थानेलिखित्वापूजयेद्यदि सुपुत्रंलभतेदीर्घायुषंसर्वगुणान्वितम् २५ कोशागारेलिखित्वातुपूजयेद्यदि
मानवः तस्यकोशाविवर्धतेक्षीयतेनकदाचन २६ पाकागारेपाकवृद्धिर्देवागारेतुतत्कृपा शय्यागारेपूजनेतुस्त्री
वियोगोनकर्हिचित् २७ धान्यागारेधान्यवृद्धिरेवंतत्तत्फलंलभेत् सप्तवर्षाणिकृत्वैवंततउद्यापनंचरेत् २८ अ
धिवास्याह्निपूर्वस्मिन्रात्रौजागरणंचरेत् सुवर्णप्रतिमांकृत्वापूजयित्वायथाविधि २९

रितिभावः २२ २३ विशेषद्रव्यमाह नैवेद्यमिति दधिभक्तेन दधियुक्तौदनेन साधनेमूलके मूलाइतिप्रसिद्धम् २४ स्थानभेदात्फलभेदमाह बालेति सार्धैस्त्रिभिः
२५ कोशागारे द्रव्यस्थापनगृहे २६ पाकागारेइति लिखित्वापूजयेदित्यत्रसंबध्यते तत्कृपादेवकृपा २७ २८ २९

समिद्व्रजैः समित्समूहैः ३० ३१ ३२ विद्येतिचेत् इत्यध्याहारः ३३ पूजाविशेषविधिषु स्वस्रीयमातुलौ भोज्याविति यदुक्तं·
तेनविस्मितमनाः पृच्छति भगवन्निति ३४ पर्यटनोद्देशमाह उदरार्थमिति ३५ कर्तव्यमित्यग्रिमश्लोकस्थपदेनान्वयः ३८ तत्करणे हेतु

उपचारैःषोडशभिस्ततोहोमंसमाचरेत् तिलैराज्येनचरुणातथैवचसमिद्व्रजैः ३० अपामार्गाश्वत्थमयैस्ततःपूर्णा
हुतिंचरेत् स्वस्रीयमातुलौचैवभोजनीयौप्रयत्नतः ३१ ब्राह्मणान्भोजयेदन्यान्भुंजीतस्वयमेवच एवंकृतेसप्तव
र्षसर्वान्कामानवाप्नुयात् ३२ विद्याकामनयाकुर्याद्वेदशास्त्रार्थविद्भवेत् बुधस्तुबुधतांदद्याद्गुरुस्तुगुरुतांतथा ३३
सनत्कुमारउवाच भगवन्यत्त्वयाप्रोक्तंभोज्यौस्वस्रीयमातुलौ एतन्निमित्तंकथययदिवक्तुंक्षमंभवेत् ३४ ई
श्वरउवाच पुराकोपिद्विजन्मानौदीनौस्वस्रीयमातुलौ दरिद्रौपर्यटन्तौतावुदरार्थंकृतश्रमौ ३५ कस्मिंश्चिन्न
गरेरम्येगतौधान्यंप्रयाचितुम् गृहेगृहेपश्यतांतौश्रावणेमासितद्व्रतम् ३६ तत्तद्द्वारेव्रतंतत्तुबुधगुर्वोर्नकुत्रचित् अ
न्योन्यंतौतदातत्रविचारंचक्रतुश्चिरात् ३७ वासराणांतुसर्वेषांव्रतंसर्वत्रदृश्यते बुधगुर्वोर्विनातस्मादावाभ्यांतद्व्र
तंशुभम् ३८ अनुच्छिष्टंयतश्चास्तितस्मात्कर्तव्यमादरात् विध्यज्ञानात्परंतस्यसंशयंप्रापतुःपुनः ३९ तावत्त-
स्यांनिशायांतुस्वप्नोभूद्विधिदर्शनः तथातौचक्रतुःपश्चात्परांसंपदमापतुः ४० प्रत्यहंवृद्धिगात्वाभूत्संपत्तिःसर्वगो-
चरा एवंकृत्वासप्तवर्षंपुत्रपौत्रादिसंयुतौ ४१ साक्षाद्भूतौबुधगुरूवरंचददतुस्तयोः आवाभ्यामावयोर्यस्माद्व्र
तमेतत्प्रवर्तितम् ४२ इतिचारभ्यतस्माद्यःकरिष्यतिशुभंव्रतम् स्वस्रीयमातुलौतेनभोजनीयौप्रयत्नतः ४३

माह अनुच्छिष्टमिति केनापिनकृतमित्यर्थः विधेः आचरणपद्धतेः अज्ञानात् ३९ विधिदर्शनः विधिर्दृश्यतेस्मिन्सः ४०
४१ साक्षाद्भूतौ प्रसन्नौ ४२ ४३ ६ ६ ६ ६

अस्मल्लोकवासः बुधगुरुलोकप्राप्तिः ४४ इतिश्रावणमासमाहात्म्यटीकायांअष्टमोऽध्यायः ८ छ शुक्रवारकथामाह·
इतःपरमिति १ २ ३ ४ उदरंचक्रे अत्रोदरशब्दस्य गर्भविशिष्टोदरवाचित्वम् चक्रेअनुकृतवती ५ ६ तत्कार्ये तदप

एतद्व्रतप्रभावेणसर्वसिद्धिःपराभवेत् अंतेचास्मल्लोकवासोयावच्चंद्रदिवाकरौ ४४ इतिश्रीस्कंदपुराणेईश्वर
सनत्कुमारसंवादेश्रावणमासमाहात्म्येबुधगुरुव्रतकथनंनामाष्टमोऽध्यायः ८ छ ईश्वरउवाच
इतःपरंप्रवक्ष्यामिशुक्रवारकथानकम् यच्छ्रुत्वाश्रद्धयामर्त्योमुच्यतेसर्वसंकटात् १ अत्रैवोदाहरंतीममिति
हासंपुरातनम् सुशीलोनामराजासीत्पांड्यवंशसमुद्भवः २ बहुप्रयत्नशीलोपिअपत्यंनैवचाप्नुवन् तस्य·
भार्यासुकेशीतिनाम्नासर्वगुणान्विता ३ अपत्यंनयदालेभेमहाचिंतामवापसा स्त्रीस्वभावात्तदावस्त्रखंडा
निप्रतिमासिके ४ बध्वोदरंतदाचक्रेमहासाहसमानसा अन्वेषयद्गर्भिणीसास्वप्रसूत्यनुसारिणी ५ भावि
नादैवयोगेनगृहिणीतत्पुरोधसः गर्भिण्यासीत्तदाराज्ञःपत्नीकपटकारिणी ६ प्रसूतिकारिणींकांचित्तत्कार्येसा
न्ययोजयत् दत्वाबहुधनंतस्यैसूतिकायैरहोगता ७ राजाचक्रेपुंसवनंतथैवानवलोभनम् सीमंतोन्नयनेका
लेमहाहर्षसमन्वितः ८ तस्याःप्रसूतिसमयंश्रुत्वासापितथाकरोत् आद्यगर्भवतीयस्मात्सापुरोधःकुटुंबिनी
९ अज्ञाप्रसूतिकाकृत्येसूचिकावचनेस्थिता तांसूचिकावंचयंतीचक्रेतन्नेत्रबंधनम् १० प्रेषयामासतंपुत्रंसा
राजमहिषींप्रति कस्यचिद्धस्ततःशीघ्रमज्ञातमपिकेनचित् ११ स्यानयनकार्येइतिभावः ७ ८ तस्याइति तस्याः पु

रोहितभार्यायाः तथाप्रसूतिकालमिषमित्यर्थः ननुपुरोहितपत्न्याअपत्येप्रसूतिकारिण्यानीयमानेसाकथंनज्ञातवतीतिचेत्तत्राह आद्य
वतीति प्रथमगर्भवतीत्यर्थः पूर्वंतादृशप्रसंगस्याभावात्स्वयंभीतासतीतत्कर्मनबुबोधेतिभावः ९ तदेवस्पष्टयति अज्ञेतिसूचिकाप्रसू
तिकारिणी १० ११

१२ १३ खेदमाह किमिति संतोषमाह· संततिरिति १४ तत्रहेतुमाह प्रसवस्पर्शाच्चिंतनात् प्रसवसमये हस्तपादाद्यवयवविशिष्टपिंडस्पर्शस्यानुभूतत्वादितिभावः १५ १६ १७ १८ आपूज्येतिपदच्छेदः अन्यथासमासाभावेल्यबादेशानुपपत्तेः १९ २० २१ २२ कालधर्मं मृत्युं सांपरायिकं और्ध्वदेहिकंकर्म २३ २४ २५ कार्पटिकं प्रवासयोग्यम् २६

राज्ञीगृहीत्वातंपुत्रंप्रसूतास्मीत्यघोषयत् पुरोधास्त्रीनेत्रबंधंमोक्षयामाससूचिका १२ सहानीतंमांसपिंडंतंस्यैप्रादर्शयच्चसा विस्मयंचैवखेदंचस्वयंचक्रेतदग्रतः १३ किमरिष्टमिदंजातंपत्याकार्यंचशांतिकम् संततिर्नास्तिचेन्मास्तुस्वद्दिष्ट्या जीवितास्मिभो १४ परंसंशयितासासीत्प्रसवस्पर्शाच्चिंतनात् १५ ईश्वरउवाच राजाश्रुत्वापुत्रजन्मजातकर्मादिकारयत् गजानश्वान्रथांश्चैवब्राह्मणेभ्योददौनृपः १६ बद्धान्कारागृहेसर्वान्मोचयामासहर्षितः सूतकांतेनामकर्मसंस्कारानुसर्वतोकरोत् चक्रेप्रियव्रतइतिनामपुत्रस्यभूमिपः १७ श्रावणेमासिसंप्राप्तेपुरोधोदयितासती जीवंतिकांशुक्रवारेपूजयामासभक्तितः १८ कुड्येविलिख्यतन्मूर्तिंबहुबालसमन्वितां पुष्पमालिकयापूज्यपंचदीपैरदीपयत् १९ गोधूमपिष्टसंभूतैस्तानभक्षयतस्वयम् अक्षतांश्चैवविक्षेपयत्रमेबालकोभवेत् २० तत्रत्वयारक्षणीयोजीवंतिकरुणार्णवे इतिप्रार्थ्यकथांश्रुत्वानमश्चक्रेयथाविधि २१ जीवंतिकाप्रसादेनदीर्घायुर्बालकोभवत् ररक्षतमहोरात्रंदेवीतन्मातृगौरवात् २२ एवंकालेगतेराजाकालधर्ममुपेयिवान् पितृभक्तोऽथतत्पुत्रश्चक्रेतत्सांपरायिकम् २३ प्रियव्रतोभिषिक्तोभूद्राज्येमंत्रिपुरोहितैः पालयित्वाप्रजाराज्यंभुक्त्वासकतिचित्समाः २४ पित्रर्णस्यविमोक्षायगयांगंतुंप्रचक्रमे राज्यभारममात्येष्वास्थाप्यवृद्धेषुभक्तितः २५ राजभावंपरित्यज्यवेषंकार्पटिकंदधे मार्गमध्येक्वचित्सुप्तोकस्यचिद्गृहमेधिनः २६

तस्यग्रहस्यस्य२७२८ २९ तदुपरिग्रहस्वामिनः कल्पनामाह एतदिति . . ३० राजन्निति तस्यकर्पर्दिवेषवत्वेपि तत्कोल्पति
शयवशात्तद्राजभावस्यावगतत्वाद्राजन्निति संबोधनम् तस्यावस्थानस्यावश्यकत्वेकारणंकथयति तयेति ३१ ३२ ३३ ३४ ३५

चक्रेवासंग्रहेतस्यप्रसूताग्रहणीत्वभूत् पुराषष्ठ्यापंचमेन्हितसुताः पंचमारिताः २७ तदापिपंचमदिनेप्यासीत्त
त्रनृपोगतः रात्रौस्कृतेनृपेषष्ठीबालंनेतुंसमागता २८ जीवंत्यावारितासातुनृपमुल्लंघ्यमाव्रज षष्ठीनिषेधाज्जी
वंत्यासाजगामयथागतम् २९ जीवितंपंचमदिनेबालंलेभेगृहाधिपः एतत्प्रभावःप्रायोयंप्रार्थयामासतंनृपम्
३० राजन्नद्यतनेचान्हित्तववासोस्तुमेगृहे तवप्रसादान्मेबालःषष्ठोयंजीवितःप्रभो ३१ एवंसंप्रार्थितस्तेनउवास
करुणानिधिः ततोगतोगयांराजाप्रवृत्तःपिंडदापने ३२ विष्णुपदेतत्रकिंचिद्दृत्वाश्चर्यमभूत्तदा पिंडस्यग्रहणार्थं
हिनिःसृतंतुकरद्वयम् ३३ परंविस्मयमापन्नःसंशयंप्रापभूपतिः ब्राह्मणानुमतःपश्चात्पिंडंविष्णुपदेददौ ३४ प
प्रच्छब्राह्मणंकंचिद्ज्ञानिनंसत्यवादिनम् सचाहब्राह्मणस्तस्मैपितृद्वयकराविमौ ३५ किमिदंतद्गृहेगत्वामात्रे
पृच्छयदिष्यति तत श्चिंतापरोदुःखीत्वद्दिनानाविचारयन् ३६ यात्रांकृत्वातत्रयातोयत्रासौजीवितःशिशुः तदापि
पंचमदिनमासीत्सैवप्रसूतिका ३७ द्वितीयोप्यभवत्पुत्रोरात्रौषष्ठीसमाययौ पुनश्चजीवंतिकयानिषिद्धासाब्रवीच्च
ताम् ३८ एतस्यावश्यकंकिंतेएतन्मात्राचकिंव्रतम् क्रियतेह्यतस्त्वंचएनंरक्षस्यहर्निशम् ३९ षष्ठिवाक्यमिति
श्रुत्वाजीवंतीप्राहसुस्मिता तंनिमित्तंनिशिद्वष्टुजाग्रदासीन्नृपास्वपन् ४० संवादमुभयोराजाशुश्रावसकलंतदा
श्रावणेभृगुवारेतुएतन्माताममार्चने ४१ व्रतस्यनियमंसर्वंकुरुतेतंवदामिते परिधत्तेनवसनंहारितंकंचुकींत
था ४२

३६ ३७ ३८ ३९ ४० ४१ ४२

४३ कृकलस्य (   ) इतिप्रसिद्धं नक्ष्यति तदभक्षणेकारणमाह हरिवर्णतइति ४४   ४५   ४६ साद्गुण्यार्थं संपूर्ण·

नधारयतितद्धूर्णकाचकंकणकंकरे कदापिनोल्लंघयतितंदुलक्षालनोदकम् ४३ नैवगच्छत्यधस्ताच्चहरित्पल्लवमं
डपम् कृकलस्यचशाकंसानाश्नातिहरिवर्णतः ४४ सर्वमेवंममप्रीत्यैमारयिष्यामिमास्कतम् श्रुत्वासर्वंनृपःप्रात
र्जगामस्वपुरंप्रति ४५ प्रत्युद्गतानागरिकादैशिकाःसर्वएवहि पप्रच्छमातरराजात्वयाजीवंतिकाव्रतम् ४६ किं
यतेतुकथमातर्नवेद्मीतिचसाब्रवीत् साद्गुण्यार्थंतुयात्रायांब्राह्मणांश्चसुवासिनीः ४७ इच्छन्नृपोभोजयितुं
व्रतंचापिपरीक्षितुम् सुवासिनीभ्योवस्त्राणिकंचुक्यःकंकणानिच ४८ आगंतव्यंभोजनार्थंसर्वाभीराजसद्म
नि ततःपुरोधसःपत्नीतत्रदूतमुवाचह ४९ हरिद्धूर्णंमयाकिंचिद्भक्ष्यतेनकदाचन दूतोनिवेदयामासराज्ञेतस्याः
प्रभाषितम् ५० राजासर्वसुवर्णंतस्यैसंप्रेषयच्छुभम् अंगीकृत्यचतत्सर्वंसापिराजगृहंययौ ५१ पूर्वद्वारेतं
डुलानांदृष्ट्वाक्षालनजंजलम् मंडपंचहरिद्धूर्णंदृष्ट्वान्यद्वारतोययौ ५२ राजापुरोधसःपत्नींनत्वापप्रच्छचाखिलं
निमित्तंनियमस्यास्यसाप्रोवाचव्रतंभृगो ५३ तंदृष्ट्वातुतदात्यंतप्रस्नुतौतत्पयोधरौ सिषिंचतुस्तराजानंधारा
भिःसर्वतस्तनौ ५४ गयायांकरयुग्मेनदेव्याःसंवादतस्तथा स्तनयोःप्रस्रवाच्चैवराजाप्रत्ययमापसः ५५ पालि
कांमातरंगत्वापप्रच्छविनयान्वितः माभैर्मातर्ब्रूहिसत्यंवृत्तांतंममजन्मनः ५६ श्रुत्वासुकेशिनीप्राहयाथातथ्ये
नसर्वशः हृष्टोभूत्वानमश्चक्रेपितरौस्वस्यजन्मदौ ५७ संपत्त्यावर्धयामासतौपरांमुदमापतुः एकस्मिन्दिवसे
राजाजीवंतींप्रार्थयन्निशि ५८ फलावाप्तये ४७ ४८ ४९ ५० ५१ ५२ ५३ ५४ गयायामिति

त्रिभिःकारणैः प्रत्ययंविश्वासंप्राप्तवान् ५५ ५६ ५७ ५८

संशयनाशकमिति वचनंइतिशेषः ५९ ६० ६१ इतिश्रावणमाहात्म्यटीकायांनवमोऽध्यायः ९ छ अतःपरंइतऊर्ध्वं मंदवारविधिं शनिवासरे कर्तव्यव्रतसमूहं मंदत्वं मंदबुद्धित्वं १ अंजनीनंदनस्यमारुतेः २ कुड्येभित्तौ हरिद्रायुक्तचंदनेन हरिद्रामिश्रेणचंदनेन साधनेन ३ कुंजर ४ ५ ६ एवंपूर्वोक्तेषुकृतेषुसत्सु नृसिंहः प्रीणातिसंतुष्टोभवतीत्यर्थः ७ सदने

जीवत्ययंजन्मदोमेगयायांचकरौकथम् तदास्वभगतादेवीप्राहसंशयनाशकम् ५९ मयात्वत्प्रत्ययार्थेयंकृतामायानसंशयः एतत्तेसर्वमाख्यातंश्रावणेभृगुवासरे ६० एतद्व्रतमनुष्ठायसर्वान्कामानवाप्नुयात् ६१ इतिश्रीस्कंदपुराणेईश्वरसनत्कुमारसंवादेश्रावणमासमाहात्म्येशुक्रवारजीवंतिकाव्रतकथनंनामनवमोऽध्यायः ९ छ ईश्वरउवाच अतःपरंप्रवक्ष्यामिमंदवारविधिंतव सनत्कुमारयत्कृत्वामंदत्वंनैवजायते १ श्रावणेमासिदेवानांत्रयाणांपूजनंशनौ नृसिंहस्यशनेश्चैवअंजनीनंदनस्यच २ कुड्येस्तंभेथवालिख्यनृसिंहप्रतिमांशुभाम् हरिद्रायुक्तचंदनेनलक्ष्म्यासहजगत्पतिम् ३ संपूज्यनीलपुष्पैश्चरक्तैःपीतैश्चशोभनैः नैवेद्यंखीचडीसंज्ञशाककुंजरसंज्ञितम् ४ स्वयंचैवतदश्नीयाद्ब्राह्मणांश्चैवभोजयेत् तिलतैलघृतस्नानंनृसिंहस्यप्रियंभवेत् ५ शनैश्चरदिनेतैलंप्रशस्तंसर्वकर्मसु अभ्यज्याब्राह्मणास्तद्वत्सुवासिन्यस्तुतैलतः ६ स्वयमभ्यज्यचस्नायात्कुटुंबसहितःशनौ माषान्नंचप्रकर्तव्यंप्रीणातिनरकेसरी ७ एवंचतुर्षुवारेषुश्रावणेमासितद्व्रतम् कुर्वीततस्यसदने लक्ष्मीःस्थिरतराभवेत् ८ धनधान्यसमृद्धिश्चअपुत्रःपुत्रवान्भवेत् इहलोकेसुखंभुक्त्वाअंतेवैकुंठमाप्नुयात् ९

गृहेदरिद्रस्य लक्ष्मीरागत्यस्थिराभवेत् तथाधनिनास्मिन्व्रतेकृतेतस्यगृहेलक्ष्मीःस्थिरतरा अतिशयेनस्थिराभवेत् नामस्त्रीयंचंचलस्वभावंत्यक्त्वाबहुकालपर्यंतंअत्रव्रतकर्तुर्गृहेवसेदित्यर्थः तेनतरप्प्रत्ययसंगतिः ८ ९ छ छ

दिशः व्याप्नोतीति दिग्व्यापिनी सर्वत्रप्रसृता भवेदित्यर्थः १० सामान्यतोव्रतमुक्त्वातद्विधानेविशेषमाह खंजं पादहीनं तदभावे पादस
हितमपि ११ नृसिंहोक्तेन नृसिंहप्रीतये पूर्वं कथितेन माषान्नादिना १२ शनैश्चरप्रीतये देयवस्तून्याह तैलमिति १३ १४ अवहि
: एकाग्रचित्तः १५ सौराष्ट्रनामकेदेशेसंभूतः उत्पन्नः १६ बाणः बाणासनं धनुश्च तयोर्धरः धारकः १७ कृसरान्नं तिलमिश्रौदनः

दिग्व्यापिनीचसत्कीर्तिर्नृसिंहस्यप्रसादतः एतत्तेकथितंसौम्यनृसिंहव्रतमुत्तमम् १० एवंशनिप्रीणनायकर्तव्यंतच्छृ
णुष्वभो खंजंब्राह्मणमेकंतुतदभावेतुकंचन ११ अभ्यज्यतिलतैलेनस्नापयेदुष्णवारिणा नृसिंहोक्तेनचान्नेन
भोजयेच्छ्रद्धयान्वितः १२ तैलंलोहंतिलान्माषान्दद्यात्कंबलमेवच शनैश्चरप्रीणनायशनिर्मेप्रियतामिति १३ शने
श्चरस्याभिषेकंतिलतैलेनकारयेत् प्रशस्ताश्चाक्षतास्तस्यपूजनेतिलमाषयोः १४ ध्यानंतस्यचवक्ष्यामिशृणुष्वाव
हितोमुने शनैश्चरःकृष्णवर्णोमंदःकाश्यपगोत्रजः १५ सौराष्ट्रदेशसंभूतःसूर्यपुत्रोवरप्रदः दंडाकृतिर्मंडलेस्यादिं
द्रनीलसमद्युतिः १६ बाणबाणासनधरःशूलधृग्गृध्रवाहनः यमाधिदैवतश्चैवब्रह्मप्रत्यधिदैवतः १७ कस्तूर्यगु
रुगंधस्यात्तथागुग्गुलधूपकः कृसरान्नप्रियश्चैवंविधास्यःपरिकीर्तितः १८ प्रतिमापूजनेचास्यकार्यालोहमयीशुभा
अस्योद्देशेनपूजायांदानेकृष्णोद्विजोत्तमः १९ कृष्णवस्त्रयुगंदद्याद्दद्याद्गांकृष्णवत्सकां एवंसंपूज्यविधिवत्प्रार्थये
च्चस्तुवीतच २० यःपुनर्नष्टराज्यायनीलायपरितोषितः ददौनिजंमहाराज्यंसमेसौरिःप्रसीदतु २१

कृसरस्तुतिलौदनइत्यमरः १८ अस्यपूजने लोहमयी प्रतिमाकार्या साशुभेत्यन्वयः अस्योद्देशेनएतत्प्रीत्यर्थं प्रशस्तइत्यध्याहा
रः १९ २० तांस्तुतिमेवाह यइति नष्टं शत्रुभिर्हृतम् राज्यं यस्यतस्मैनीलाय तन्नाम्नेराज्ञे सौरिः शनै
श्चरः २१ ध्र ध्र ध्र ध्र ध्र

मंदयाचेष्टया गत्याप्रसारणंगच्छतं मंदगतिमित्यर्थः छायासूर्यपत्नी मार्तंडःसूर्यः ताभ्यांसंभूतं उत्पन्नं २२ २३ त्रैवर्णानां ब्रह्म
क्षत्रियवैश्यानां शन्नोदेवीतिमंत्रइत्यन्वयः २४ २५ नदीयंशनैश्चरभयं तेषांदेशेपि शनैश्चरकृतापीडा नभवेदित्यन्वयः २६ २७

शनिंनीलांजनप्रख्यं मंदचेष्टाप्रसारिणम् छायामार्तंडसंभूतंनमस्यामिशनैश्चरम् २२ नमस्तेकोणसंस्थायपिंग
लायनमोस्तुते प्रसादंकुरुदेवेशदीनस्यप्रणतस्यच २३ एवंस्तुत्वाप्रार्थयित्वाप्रणमेच्चपुनःपुनः पूजनेवैदिको
मंत्रःशन्नोदेवीरितिस्मृतः २४ त्रैवर्णानांचशूद्राणानाममंत्रःप्रकीर्तितः यएवंविधिनामंदंपूजयेत्सुसमाहितः
२५ नदीयंतुभयंतस्यस्वप्नेपिनभविष्यति एवमेतद्व्रतंविप्रयेकरिष्यंतिमानवाः २६ वासरेवासरेप्राप्तेश्रावणेमा
सिभक्तितः तेषांशनैश्चरकृतापीडादेशेपिनोभवेत् २७ प्रथमोवाद्वितीयोवाचतुर्थःपंचमोपिवा सप्तमश्चाष्टमो
वापिनवमोद्वादशोपिवा २८ जन्मराशेस्थितोमंदःपीडांचकुरुतेतदा शमग्निरितिमंत्रस्यतत्प्रसादंजपोमतः २९
इंद्रनीलमणेर्दानंप्रदद्यात्तत्रतुष्टये अतःपरंप्रवक्ष्यामिहनुमत्तुष्टयेविधिम् ३० शनिवारेश्रावणेचअभिषेकंस-
माचरेत् रुद्रमंत्रेणतैलेनहनुमत्प्रीणनायच ३१ तैलमिश्रितसिंदूरलेपंतस्यसमर्पयेत् जपाकुसुममालाभिरर्क-
मालाभिरेवच ३२ मालाभिर्मोदराभिश्चवटकानांतथैवच पूजयेदंजनीपुत्रंतथान्यैरुपचारकैः ३३ यथाविधिय
थावित्तंश्रद्धाभक्तिसमन्वितम् जपेद्वादशनामानिहनुमत्प्रीतयेबुधः ३४ हनुमानंजनीसूनुर्वायुपुत्रोमहाबलः
रामेष्टःफाल्गुनसखःपिंगाक्षोमितविक्रमः ३५

२८ २९ ३० ३१ ३२ ३३ श्रद्धया मूर्तौदे
वस्यास्तित्वबुध्या भक्त्या सेव्यसेवकभावेन समन्वितंयुक्तंयथाभवतितथाजपेत्जपकालेपूर्वोक्तद्वयं मनसिनिधेयमित्यर्थः ३४ ता-
नामान्येवाह हनुमानितिफाल्गुनसखः फाल्गुनोर्जुनः तस्यसखामित्रं तद्ध्वजस्थितत्वात् ३५ ६१ ६२

३६ ३७वज्रेणतुल्यंशरीरंयस्य तत्रहेतुमाह अरोगइति ३८ ३९ ४० ४१ ४२ मंदभिन्नेमंदवासरादन्य

उदधिक्रमणश्चैवसीताशोकविनाशकः लक्ष्मणप्राणदाताच्चदशग्रीवस्यदर्पहा ३६ द्वादशैतानिनामानिप्रातरु
त्थाययःपठेत् नाशःभंजायतेतस्यसर्वसंपत्प्रजायते ३७ श्रावणेमंदवारेषुएवमाराध्यवायुजम् वज्रतुल्यशरीरः
स्यादरोगोबलवान्नरः ३८ वेगवान्कार्यकरणेबुद्धिवैभवभूषितः शत्रुःसंक्षयमाप्नोतिमित्रवृद्धिःप्रजायते ३९
चौर्यवान्कीर्तिमांश्चैवप्रसादादंजनीजनेः आंजनेयालयेलक्षंहनुमत्कवचंपठेत् ४० अणिमाद्यष्टसिद्धीनांसा
धकःस्वामितामियात् यक्षराक्षसवेतालादर्शनात्तस्यवेगतः ४१ पलायंतेदशादिशःकंपिताभयविह्वलाः अश्व
त्थालिंगनंचैवअश्वत्थस्यचपूजनम् ४२ मंदभिन्नेनकर्तव्यं स्पर्शोऽश्वत्थस्यसत्तम शनावालिंगनंतस्यसर्वसंप
त्समृद्धिदम् पूजनंसप्तवारेषुतत्रापिश्रावणेधिकम् ४३ इतिश्रीस्कंदपुराणेईश्वरसनत्कुमारसंवादेश्रावण
मासमाहात्म्येशनैश्चरनृसिंहहनुमत्पूजनादिशनैश्चरकृत्यकथनंनामदशमोऽध्यायः १० छ सनत्कु
मारउवाच वारव्रतानिसर्वाणित्वत्तोदेवश्रुतानिमे नववागमृतंपीत्वातृप्तिर्मेनैवजायते १ श्रावणेनसमोमा
सोनास्त्यन्यःप्रतिभातिमे अथातस्तिथिमाहात्म्यंकथयस्वजगत्प्रभो २ ईश्वरउवाच मासानांकार्तिकः
श्रेष्ठस्तस्मान्माघःपरोमतः ततोऽपिमाधवःश्रेष्ठः सहश्चापिहरिप्रियः ३ विश्वरूपेणचत्वारोमासाश्चैतेममप्रि
याः द्वादशस्वपिमासेषुश्रावणःशिवरूपकः ४

त्रवासरे सप्तवारेषु प्रत्यहं पूजनं कर्तव्यं परंदूरत एवेतिशेषः ४३
इतिश्रावणमाहात्म्यटीकायांदशमोऽध्यायः १० छ मे मया कर्तृत्वस्यशेषत्वविवक्षायांषष्ठी १ ममप्रश्नस्योत्तरदानं तवाकिंचित्करमि
तिभावेनाह जगत्प्रभोइतितिथीनांमाहात्म्यविवक्षुः एतन्मासस्यश्रेष्ठतमत्वमादायाह मासानामितिद्वाभ्यां परःश्रेष्ठतरः २ सहःमार्गशीर्षः
३ ४

५ तत्रयदासोमवासरे श्रावणशुक्लप्रतिपत् आगच्छतितदा पतंति आगच्छंति ६ ७ ८ ९ अखंडैरिति पदं म-
ध्यमणिन्यायेनोभयत्र संबध्यते १० कमलानि सहस्रपत्राणि कुविंदः पुष्पविशेषैः ११ १२ १३ धूपदीपनैवेद्योत्तरमवशि

तिथयःश्रावणेमासिसर्वाश्चव्रतसंयुताः प्राधान्यतस्तथापित्वांवच्मिकाश्चित्सुशोभनाः ५ तिथिवारविमिश्रंतुव्रत
माद्यंवदामिते प्रतिपच्छ्रावणेमासियदासोमयुताभवेत् ६ सोमवारास्तदापंचपतंत्यत्रहिमासिके रोटकाख्यंव्रतं-
तत्रकर्तव्यंश्रावणेनरैः ७ सार्द्धमासत्रयंवापिरोटकाख्यंव्रतभवेत् लक्ष्मीवृद्धिकरंप्रोक्तंसर्वकामार्थसिद्धिदम् ८
विधानंतस्यवक्ष्यामिशृणुष्वावहितोमुने श्रावणस्यसितपक्षेप्रतिपत्सोमवासरे ९ प्रातःसंकल्पयेद्विद्वान्करिष्ये-
रोटकव्रतम् अद्यारभ्यसुरश्रेष्ठकृपांकुरुजगद्गुरो १० दिनेदिनेप्रकर्तव्यापूजादेवस्यशूलिनः बिल्वपत्रैरखंडैश्च
तुलसीपत्रकैस्तथा ११ नीलोत्पलैश्चकमलैःकल्हारैःकुमुदैस्तथा चंपकैर्मालतीपुष्पैर्कुविंदैरर्कपुष्पकैः १२ अ
न्यैर्नानाविधैःपुष्पैर्ऋतुकालोद्भवैःशुभैः धूपैर्दीपैश्चनैवेद्यैःफलैर्नानाविधैरपि १२ नैवेद्यमर्पयेन्मुख्यंरोटकानांवि
शेषतः कर्तव्यारोटकाःपंचपुरुषाहारमानतः १३ द्वौतुविप्रायदातव्यौद्वाभ्यांचभोजनंमतम् एकोदेवायदातव्यो
नैवेद्यार्थंसदाबुधैः १४ शेषपूजांविधायाथअर्घ्यंदद्याद्विचक्षणः रंभाफलंनारिकेलंजंबीरंबीजपूरकम् खर्जुरी
कर्कटीद्राक्षानारिंगंमातुलिंगकम् अक्षोटकंचदाडिंबंयच्चान्यदृतुसंभवम् १६ प्रशस्तमर्घ्यदानेस्यात्तस्यपुण्य
फलंशृणु सप्तसागरसंयुक्तांभूमिंदत्वातुयत्फलम् १७ तत्फलंसमवाप्नोतिव्रतंकृत्वाविधानतः पंचवर्षंप्रकर्त-
व्यमतुलंधनमीप्सुभिः १८ पश्चादुद्यापनंकुर्याद्रोटकाख्यव्रतस्यतु उद्यापनेतुकर्तव्यौहेमरूप्यौचरोटकौ १९

[illegible] धू० दक्षिणाप्र दक्षिणा नमस्कारपुष्पांजलिरूपं १४ १५ १६ तस्य एतद्व्रतस्य १७ १८ १९

सर्पिषाघृतेन २० २१ २२ विचक्षणः अवगतव्रतविधिः २३ पात्रंनिवासस्थानं कुड्यकेभित्तौ लिखित्वे त्युत्तरेणान्व-

पूर्वेद्युरधिवास्याथप्रातर्होमंसमाचरेत् सर्पिषाशिवमंत्रेणाबिल्वपत्रैश्चशोभनैः २० एवंकृतेव्रतेतातसर्वान्कामानवा
प्नुयात् सनत्कुमारवक्ष्यामिद्वितीयायांव्रतंशुभम् २१ यत्कृत्वाश्रद्धयामर्त्योलक्ष्मीवान्पुत्रवान्भवेत् औदुंबराभि
धंचैतद्व्रतंपापप्रणाशनम् २२ श्रावणेमासिसंप्राप्तेद्वितीयायांशुभेतिथौ प्रातःसंकल्प्यविधिवद्व्रतंकुर्याद्विचक्ष
णः २३ नारीवाथनरोवापिपात्रंस्यात्सर्वसंपदाम् साक्षादुदुंबरःपूज्यस्तदभावेतुकुड्यके २४ लिखित्वापूजयेत्त-
त्रचतुर्भिर्नाममंत्रकैः उदुंबरनमस्तुभ्यंनमस्तेहेमपुष्पक २५ सजंतुफलयुक्तायनमोरक्ताडशालिने तत्राधिदे-
वतेपूज्येशिवःशुक्रस्तथैवच २६ त्रयस्त्रिंशत्फलान्यस्यगृहीत्वाभागमाचरेत् एकादशब्राह्मणायदद्यात्तावतिदि
वते २७ तावतिस्वयमश्नीयान्नान्नाहारस्तुतद्दिने शिवंशुक्रंचसंपूज्यरात्रौजागरणंचरेत् २८ एवंकृत्वाव्रतंतातवर्षा
ण्येकादशैवतु पश्चादुद्यापनंकुर्याद्व्रतसंपूर्णहेतवे २९ उदुंबरःसुवर्णेनफलपुष्पदलान्वितः तत्रसंपूजयेद्विद्वान्प्रतिमे
शिवशुक्रयोः ३० प्रातर्होमंचरेच्चैवउदुंबरफलैःशुभैः कोमलैरल्पमात्रैश्चसंख्ययाष्टोत्तरंशतम् ३१ उदुंबरसमिद्भि
श्चतिलैराज्यैश्चहोमयेत् एवंसमाप्यहोमंतुआचार्यंपूजयेत्ततः ३२ ब्राह्मणान्भोजयेत्पश्चाच्छतंशक्तोदशाथवा
एवंव्रतेकृतेवत्सफलंयत्स्याच्छृणुष्वतत् ३३ बहुजंतुफलोवृक्षोयथापंसाधकस्तथा भवेदनेकसुतवान्वंशवृद्धि
स्तथाभवेत् ३४ हेमपुष्पैर्यथावृक्षस्तथालक्ष्मीप्रदोभवेत् अद्यावधिनकस्यापिव्रतमेतत्प्रकाशितम् ३५

यः २४ तानेवचतुरोनाममंत्रानाह उदुंबरेति २५ अधिदेवतेएवाह शिवइति २६ २७ २८ २९ ३० मह
तांफलानांजंतुपूर्णत्वात्तद्धिंसामाभवत्वित्यर्थं कोमलग्रहणम् ३१ ३२ साधकोव्रतकर्ता ३४ ३५ ध

३६ इतिश्रावणमाहात्म्यटीकायामेकादशोऽध्यायः ११ ६७ स्वर्णगौरीव्रतमुच्यते अतःपरमित्यनेनाध्यायेन १
नित्येऽकरणे प्रत्यवायकरंकर्म २ ३ महादेव्याः भवान्याः इत्यस्य प्रीतये इति अग्रिमश्लोकस्थेनपदेनान्वयः ४ ५ ६

गोप्याद्गोप्यतरंचैवतवाग्रेकथितंमया नैवात्रसंशयःकार्योभक्त्याचैतद्व्रतंचरेत् ३६ इतिश्रीस्कंदपुराणेश्रावण
माससमाहात्म्येईश्वरसनत्कुमारसंवादेप्रतिपद्रोटकव्रतद्वितीयोदुंबरव्रतकथननामैकादशोऽध्यायः ११ ६७
ईश्वरउवाच अतःपरंप्रवक्ष्यामिस्वर्णगौरीव्रतंशुभम् श्रावणेशुक्लपक्षेतुतृतीयायांविधानृज १ प्रातःस्ना
त्वानित्यकर्मकृत्वासंकल्पमाचरेत् पार्वतीशंकरौपूज्यौषोडशैरुपचारकैः २ देवदेवसमागच्छप्रार्थयेहंजगत्पते
इमांमयाकृतांपूजांगृहाणसुरसत्तम ३ वायनानिप्रदेयानिदंपतीभ्यस्तुषोडश भवान्याश्चमहादेव्याव्रतसंपूर्ण
हेतवे ४ प्रीतयेद्विजवर्यायवायनंप्रददाम्यहम् धानाषोडशपक्कान्नैर्वेणुपात्राणिषोडश ५ कुर्याद्वस्त्रादिभिर्यु
क्तान्याहूयद्विजदंपतीन् व्रतसंपूर्णतार्थंतुब्राह्मणेभ्योददाम्यहम् ६ स्वलंकृताःसुवासिन्यःपातिव्रत्येनभूषि
ताः ममकार्यसमृध्यर्थंप्रतिगृण्हन्तुशोभनाः ७ एवंषोडशवर्षाणिअष्टौचत्वारिवापुनः एकवर्षंतुसद्योवाकृ
त्वाचोद्यापनंचरेत् ८ पूजांतेचकथांश्रुत्वावाचकंसंप्रपूजयेत् ९ सनत्कुमारउवाच केनचीर्णंव्रतमिदंमा
हात्म्यंचास्यकीदृशम् उद्यापनंकथंकार्यंतत्सर्वंवदमेप्रभो १० ईश्वरउवाच साधुपृष्टंमहाभागकथयामितवाग्र
तः स्वर्णगौरीव्रतंनामसर्वसंपत्करंनृणाम् ११ पुरासरस्वतीतीरेसुविलाख्यामहापुरी तत्रचंद्रप्रभोनामराजासी
दिंद्रोपमः १२

७ सद्यः श्रावणशुक्लतृतीयादिनेएव ८ ९ कथांश्रुत्वाइति पू
र्वश्लोकेयदुक्तं तेनजातोत्कंठः पृच्छति केनेति १० प्रश्नमभिनंदन् कथांप्रस्तौति साध्विति ११ १२ ६२ ६७

तस्यआस्तांइतिछेदः १३ वनगमनेकारणंद्योतयन् तंविशिनष्टि मृगयेति १४ चक्रेत्यादिविशेषणानां अग्रिमश्लोकस्थेन सरश्शब्देनान्वयः १५
१६ १७ १८ १९ नभोयुजिश्रावणे २० २१ षोडशगुणंषोडशतंतुभिर्निर्मितम् २२ २३

तस्यास्तांरूपलावण्यसौंदर्यस्मेरविभ्रमे महादेवीविशालाख्येद्वेभार्येकमलेक्षणे १३ तयोःप्रियतराज्येष्ठातस्यासी
न्नृपतेर्मता सकदाचिद्वनेभेजेमृगयासक्तमानसः १४ सिंहशार्दूलवाराहवनमाहिषकुंजरान् हत्वाबभ्रामतृष्णार्त्तः
सराजाविपिनंमहत् १५ चक्रकारंडवाकीर्णंचंचरीकपिकाकुलम् उत्फुल्लमल्लिकाजातिकुमुदोत्पलमंडितम् १६
अपूर्वामटवींप्राप्तोददर्शाप्सरसांसरः समासाद्यसरस्तीरंपीत्वाजलमनुत्तमम् १७ भक्त्यागौरीमर्चयंतंददर्शाप्सर
सांगणम् किमेतदितिपप्रच्छराजाराजीवलोचनः १८ स्वर्णगौरीव्रतमिदंक्रियतेस्माभिरुत्तमम् सर्वसंपत्करंनृ
णांतत्कुरुष्वनृपोत्तम १९ राजोवाच विधानंकीदृशंब्रूतकिंफलंविस्तरान्मम ताऊचुर्योषितः सर्वास्तृतीयायां
नभोयुजि २० कर्तव्यंव्रतमेतद्धिस्वर्णगौरीतिसंज्ञितम् पार्वतीशंकरौपूज्यौभक्त्यापरमयामुदा २१ दोरकंषोडशगु
णंबध्नीयाद्दक्षिणेकरे नरोवामेतुनारीणांगलेवाबंधनंमतम् २२ तंश्रुत्वासोपिजग्राहव्रतंनियतमानसः गुणैःषोडश
भिर्युक्तंदोरकंदक्षिणेकरे २३ बध्नामिदेवदेवेशिप्रसादंकुरुमेवरम् एवंदेव्याव्रतंकृत्वाआजगामनिजंगृहम् २४ पप्र
च्छदोरकंहस्तेदृष्ट्वाज्येष्ठातिकोपना त्रोटयित्वाचचिक्षेपबात्यशुष्कतरूपरि २५ नकर्तव्यंनकर्तव्यमितिराज्ञिवदत्यपि ते
नसंस्पृष्टमात्रेणतरुःपल्लवितोभवत् २६ तद्द्वितीयाततोदृष्ट्वाविस्मयाकुलिताभवत् तत्रस्थंदोरकंच्छिन्नंगृहीत्वासाबबंध
ह २७

२४ २५ नकर्तव्यमितिश्लोकार्द्धंचिक्षेपेति पूर्वश्लोकेनान्वेति २६ तद्द्वितीयेति तत्कर्मद्वितीया क-
निष्ठाराजपत्नीदृष्ट्वाइत्यन्वयः यद्वातद्द्वितीया तस्याः ज्येष्ठायाः द्वितीया अन्याकनिष्ठेत्यर्थः बबंधगलेवामकरेवेतिशेषः २७ ६९

२४

दोरकावमानाज्जातं ज्येष्ठायादुःखंवर्णयति ज्येष्ठेतिसार्द्धाभ्यां २८ २९ ३० नृपप्रियेति प्रियापत्नी यद्वाभूतपूर्वगस्या वाप्रियता

ततस्तद्व्रतमाहात्म्यात्पत्युःप्रियतराभवत् ज्येष्ठाव्रतापचारेणसात्यक्तादुःखितावनम् २८ प्रययौसामहादेवींध्या
यंतीमनसाचहृ मुनीनामाश्रमेपुण्येनिवसंतीक्वचित्क्वचित् २९ निवारितामुनिवरैर्गच्छपापेयथासुखम् धावंतीवि
पिनेघोरेनिर्विण्णानिषसादह ३० ततस्तत्कृपयादेवीप्राविरासीत्तदायतः तांदृष्ट्वादंडवद्भूमौनत्वास्तुत्वानृपप्रिया
३१ जयदेविनमस्तुभ्यंजयभक्तवरप्रदे जयशंकरवामांगेजयमंगलमंगले ३२ ततोभक्त्यावरंलब्ध्वागौरीमभ्यर्च्यतद्
व्रतम् चक्रेतस्यप्रभावेणभर्तातांचानयद्गृहम् ३३ ततोदेव्याःप्रसादेनसर्वान्कामानवापसा ततस्ताभ्यांनृपोराज्यंच
क्रेसर्वसमृद्धिमान् ३४ अंतेशिवपदंप्राप्तःकांताभ्यांसहितोनृपः ३५ यःशोभनंव्रतमिदंशुभदंशिवायाःकुर्यान्म
मप्रियकरोभविताचगौर्याः प्राप्यश्रियंसमधिकंभुविशत्रुसंघान्निर्जित्यनिर्मलपदंसशिवस्ययाति ३६ एतस्योद्याप
नविधिंसावधानमनाःशृणु शुभेतिथौशुभेवारेचंद्रेताराबलान्विते ३७ मंडपेष्टदलेपद्मेकुंभंधान्योपरिन्यसेत् पूर्ण
पात्रंताम्रमयंपलषोडशनिर्मितम् ३८ तिलपूर्णंतत्रदेवींशंकरप्रतिमेन्यसेत् श्वेतवस्त्रयुगच्छन्नंश्वेतयज्ञोपवीतकम्
३९ वेदोक्तेनप्रतिष्ठाचकर्तव्यातुयथाविधि सम्यक्पूजांतुसंपाद्यरात्रौजागरणंचरेत् ४० प्रातःपूजांततःकृत्वाततो
होमंसमाचरेत् ग्रहहोमंपुराकृत्वाप्रधानंजुहुयात्ततः ४१ तिलाश्चयवसंमिश्राआज्येनचपरिप्लुताः द्रव्यप्रधानेसंख्या
तुसहस्रमथवाशतम् ४२ आचार्यंपूजयेत्पश्चाद्वस्त्रालंकारधेनुभिः वायनानिचदेयानिब्राह्मणांश्चैवभोजयेत् ४३

रोषः ३१ ३२ ३३ ३४ ३५ कथापेक्षयाविधानश्रवणेमनसऐकाग्र्यमधिकं मावश्यकमित्यतो विशिनष्टि सा
१ ानेति ३६ ३७ ३८ ३९ ४० ४१ हवनीयद्रव्याण्याह तिलाइति ४२ ४३ ६९ ६९

५४ इतिश्रीश्रावणमाहात्म्यटीकायांद्वादशोऽध्यायः १२ छ १ महद्भिरिदमाचरितमस्तीत्यतः इदमतीवोत्तममिति दर्शयन्नुकैः कैराचरितंतद्दर्शयति भगवत्येतिसार्द्धेन श्रद्धयासह श्रद्धायुक्तंयथास्यात्तथा २ ३ ४ ५ हेममयी सुवर्णकृता ६

दंपतीभोजयेच्चैवसंख्ययाषोडशैवतु भूयसींदक्षिणांदद्यात्स्वस्यावित्तानुसारतः बंधुभिःसहभुंजीतहर्षोत्सवसमन्वितः ४४ इतिश्रीस्कंदपुराणेईश्वरसनत्कुमारसंवादेश्रावणमासमाहात्म्येतृतीयायांस्वर्णगौरीव्रतकथनंनामद्वादशोऽध्यायः १२ छ सनत्कुमारउवाच केनव्रतेनभगवन्सौभाग्यमतुलंभवेत् पुत्रपौत्रधनैश्वर्यैर्मनुजःसुखमेधते तन्मेवदमहादेवव्रतानामुत्तमंव्रतम् १ ईश्वरउवाच अस्तिदूर्वागणपतेर्व्रतंत्रैलोक्यविश्रुतं भगवत्यापुराचीर्णंपार्वत्याश्रद्धयासह २ सरस्वत्यामहेंद्रेणविष्णुनाधनदेनच अन्यैश्चदेवैर्मुनिभिर्गंधर्वैःकिन्नरैस्तथा चीर्णमेतद्व्रतंसर्वैःपुराभून्मुनिसत्तम ३ चतुर्थ्यायाभवेच्छुक्लानभोमासिसुपुण्यदा तस्यांव्रतमिदंकुर्यात्सर्वपापौघनाशनं ४ गजाननंचतुर्थ्यांतुएकदंतंविपाटितम् विधायहेम्नाविघ्नेशंहेमपीठासनेस्थितम् ५ तदाहेममयींदूर्वांतदाधारेव्यवस्थितम् संस्थाप्यविघ्नहर्तारंकलशेताम्रभाजने ६ वेष्टितेरक्तवस्त्रेणसर्वतोभद्रमंडले पूजयेद्रक्तकुसुमैः पत्रिकाभिश्चपंचभिः ७ अपामार्गशमीदूर्वातुलसीबिल्वपत्रकैः अन्यैःसुगंधैःकुसुमैर्यथालब्धैःसुगंधिभिः ८ फलैश्चमोदकैःपश्चादुपहारंप्रकल्पयेत् यथावदुपचारैश्चपूजयेद्गिरिजासुतम् ९ प्रतिमायांस्वर्णमय्यांनिर्मितायांयथाविधि आवाहयामिविघ्नेशमागच्छतुकृपानिधिः १० रत्नबद्धमिदंहैमंसिंहासनमनुत्तमं आसनार्थमिदंदत्तंप्रतिगृह्णानुविघ्नराट् ११

रक्तवस्त्रेणवेष्टितेकलशे पंचभिःपंचप्रकाराभिः ७ पंचप्रकारानेवाह अपामार्गेति ८ उपहारंनैवेद्यं ९ प्रत्युपचारंभिन्नं मंत्रमाह प्रतिमायामितिषोडशभिः प्रतिमायामीत्यावाहनं १० रत्नबद्धमित्यासनम् ११ छ छ

उमासुतेतिपाद्यं १२ गणेश्वरायेत्यर्घ्यं १३ विनायकायेत्याचमनीयम् १४ गंगादीतिस्नानं सुरपुंगवदेवश्रेष्ठ १५ सिंदूरेणेतिवस्त्रयुग्मं १६ लंबोदरायेतिचंदनम् १७ अक्षताइत्यक्षतान् १८ चंपकैरितिपुष्पाणि १९ अनुग्रहायेतिधूपम् २०

उमासुतनमस्तुभ्यंविश्वव्यापिन्सनातन विघ्नौघंछिंधिसकलंममपाद्यंददामिते १२ गणेश्वरायदेवायउमापुत्रायवेधसे अर्घ्यमेतत्प्रयच्छामिगृहाणभगवन्मम १३ विनायकायशूरायवरदायनमोनमः इदमाचमनीयतेददामिप्रतिगृह्यताम् १४ गंगादिसर्वतीर्थेभ्योमयाप्रार्थनयाहृतम् स्नानार्थंतेमयादत्तंगृहाणसुरपुंगव १५ सिंदूरेणयथालक्ष्मकुंकुमैरंजितंमया वस्त्रयुग्ममिदंदत्तंगृहाणत्वंनमोस्तुते १६ लंबोदरायदेवायसर्वविघ्नापहारिणे उमांगमलसंभूतचंदनंप्रतिगृह्यताम् १७ अक्षतांश्चसुरश्रेष्ठरक्तचंदनचर्चिताः मयानिवेदिताभक्त्यागृहाणसुरसत्तम १८ चंपकैःकेतकीपत्रैर्जपाकुसुमसंचयैः गौरीपुत्रपूजयामिप्रसीदतुममोपरि १९ अनुग्रहायलोकानांदानवानांवधायच अवतीर्णस्कंदगुरुर्धूपंगृह्णातुवैमुदा २० परंज्योतिःप्रकाशायसर्वसिद्धिप्रदायच दीपंतुभ्यंप्रदास्यामिमहादेवात्मनेनमः २१ गणानांत्वेतिनैवेद्यमर्पयेन्मोदकादिकम् अन्नंचतुर्विधंचैव पायसंलड्डुकादिकम् २२ कर्पूरैलादिसंयुक्तंनागवल्लीदलान्वितम् तांबूलंतेप्रदास्यामिमुखवासार्थमादरात् २३ हिरण्यगर्भगर्भस्थंहेमबीजंविभावसोः दक्षिणांतेप्रदास्यामित्वतःशांतिंप्रयच्छमे २४ गणेश्वरगणाध्यक्षगौरीपुत्रगजाननं व्रतंसंपूर्णतांयातुत्वत्प्रसादादिभानन २५ एवंसंपूज्यविघ्नेशंयथाविभवविस्तरैः सोपस्करंगणाध्यक्षमाचार्यायनिवेदयेत् २६

परमितिदीपं २१ गणानांत्वेतिनैवेद्यं चतुर्विधंखाद्यं पेयं लेह्यं चोष्यंइतिभेदात् खाद्यंअन्नलड्डुकादि पेयंकथिकादि लेह्यंरसालादि(श्रीखंड)इतिभाषायां चोष्यं दंतैर्निष्पीड्य रसंगृहीत्वायत्त्यज्यतेतत् २२ कर्पूरेतितांबूलं २३ हिरण्येति दक्षिणां २४ गणेश्वरेतिप्रार्थना २५ सोपस्करंपीठादिसाहित्यसहितं २६

आचार्यप्रार्थनामाह गृहाणेति २७ २८ २९ तस्मादुद्यापनमवश्यंकर्तव्यमितिशेषः उद्यापनविधिमाह उद्यापनेति ३०
पंचगव्यैरिति पयोदधिघृतमधुशर्कराभिरित्यर्थः मधुशर्करयोर्गव्यत्वाभावेपि अन्नगव्यपदार्थानांबाहुल्यात्तत्साहचर्यात्तेषामपिगव्यत्वे

गृहाणभगवन्ब्रह्मन्गणराजंसदक्षिणाम् एतत्त्वद्वचनादद्य पूर्णतांयातुसद्व्रतम् २७ एवंयःपंचवर्षाणिकृत्वोद्या
पनमाचरेत् ईप्सितांल्लभतेकामान्देहांतेशांकरंपदम् २८ यद्वावर्षत्रयंकुर्यात्सर्वसिद्धिमवाप्नुयात् उद्यापनंविना-
यस्तुकरोतिव्रतमुत्तमम् २९ सर्वंनिष्फलतांयातियथाविध्यपियत्कृतम् उद्यापनदिनेप्रातस्तिलैःस्नानंसमाचरेत् ३०
हेम्नःपलात्तदर्धार्धात्कृत्वागणपतिंबुधः पंचगव्यैस्तंसंस्नाप्यदूर्वाभिस्तंप्रपूजयेत् ३१ मंत्रैस्तद्दशभिर्भक्त्याश्रद्ध-
यासहितोनरः गणाधीशनमस्तुभ्यमुमापुत्राघनाशन ३२ विनायकेशपुत्रेतिसर्वसिद्धिप्रदायक एकदंतेभवक्त्रेति
तथामूषकवाहन ३३ कुमारगुरवेतुभ्यमितिनामपदैःपृथक् पूर्वेद्युरधिवास्यैवप्रातर्होमंसमाचरेत् ३४ दूर्वाभिर्मो
दकैश्चैवग्रहहोमपुरःसरम् पूर्णाहुतिंततोहुत्वाआचार्यादीन्प्रपूजयेत् ३५ गांसवत्सांघटोध्नींचदद्याद्वित्तानुसा
रतः एवंकृतेव्रतेवत्ससर्वान्कामानवाप्नुयात् ३६ मदीयप्रियपुत्रस्यव्रतेनाहंचतोषितः भुविदत्वासर्वभोगंददाम्य
तेचसद्गतिम् ३७ यथाशाखाप्रशाखाभिर्दूर्वावृद्धिंगताभवेत् तथैवपुत्रपौत्रादिसंततिर्वृद्धिगामिनी ३८ इत्ये
तत्कथितंपुत्रदूर्वागणपतिव्रतम् श्रेष्ठाच्छ्रेष्ठतरंचैवकर्तव्यंसुखमीप्सुभिः ३९ इतिश्रीस्कं॰ ईश्वरसनत्कुमार
सं॰ श्रावणमासमा॰ दूर्वागणपतिव्रतकथनंनामत्रयोदशोऽध्यायः १३ छ

नग्रहणं ३१ ३२ ३३ ३४
३५ व्रतांतेगोदानमाह गामिति घटोध्नी घटवत् पयः पूर्णमूधः यस्यास्तांबहुदुग्धवतीमितिभावः ३६ ३७ शाखाप्रशा-
खाभिः शाखाश्चप्रशाखाश्चताभिः प्रशाखाः शाखानांशाखाः ३८ ३९ इतिश्रावणमाहात्म्यटीकायांत्रयोदशोऽध्यायः १३ छ

पंचमीव्रतमाह अतःपरमिति १ २ ३ पूजास्थानमाह द्वारस्येति विषोल्बणाः विषेणभयंकराः नागाइतिशेषः ४ ५ ६

ईश्वरउवाच अतःपरंप्रवक्ष्यामिश्रावणेशुक्लपक्षके पंचम्यांयच्चकर्तव्यंतच्छृणुष्वमहामुने १ चतुर्थ्यामेकभुक्तं
तुनक्तंस्यात्पंचमीदिने कृत्वास्वर्णमयंनागमथवारौप्यसंभवम् २ कृत्वादारुमयंवापिअथवामृन्मयंशुभम् पंच
म्यामर्चयेद्भक्त्यानागपंचफणान्वितम् ३ द्वारस्योभयतोलेख्यागोमयेनविषोल्बणाः पूजयेद्विधिवच्चैवदधिदूर्वांकु
रैःशुभैः ४ करवीरैर्मालतीभिर्जातिपुष्पैश्चचंपकैः तथागंधैरक्षतैश्चधूपैर्दीपैर्मनोहरैः ५ ब्राह्मणान्भोजयेत्तत्र
घृतमोदकपायसैः अनंतंवासुकिंशेषंपद्मनाभंचकंबलम् ६ तथाकर्कोटकंनागंनागमश्वतरंतथाष्टमम् धृतराष्ट्रंशंख
पालंकालीयंतक्षकंतथा ७ हरिद्रयाचंदनेनकुड्येनागकुलाधिपान् नवकद्रूश्चसंलिख्यपूजयेत्कुसुमादिभिः ८
वल्मीकेपूजयेन्नागान्दुग्धंचैवतुपाययेत् घृतयुक्तंशर्कराढ्यंयथेष्टंचार्पयेद्बुधः ९ लोहपात्रेपोलीकादिनकुर्यात्तद्दि
नेनरः गोधूमपायसंकुर्यान्नैवेद्यार्थंतुभक्तितः १० भर्जिताश्चणकाश्चैवयवव्रीहयोयावनालकाः अर्पणीयाश्चसर्पे
भ्यःस्वयंचैवतुभक्षयेत् ११ बालकेभ्योर्पणीयाश्चदृढादंताभवंतिहि वल्मीकस्यसमीपेतुगायनंवाद्यमेवच १२
स्त्रीभिःकार्यंभूषिताभिःकार्यश्चैवोत्सवोमहान् एवंकृतेकदाचिच्चसर्पतोनभयंभवेत् १३ अन्यच्चशृणुयाद्विप्रलो
कानांहितकाम्यया कथयिष्यामिकिंचित्तेतच्छृणुष्वमहामुने १४ नागदष्टोनरोवत्सप्राप्यमृत्युंव्रजत्यधः अधोगत्वा
भवेत्सर्पस्तामसोनात्रसंशयः १५ पूर्वोक्तविधिनासर्वमेकभुक्तादिकारयेत् नागनिर्माणपूजादिविप्रैःसहतथादरात् १६

७ कद्रूःतन्मातृः ८ जीवतोऽपिनागान्पूजयेदित्याह वल्मीकइति ९ १० यावनालकोधान्यविशेषः ११
तद्भक्षणेफलमाह दृढाइति १२ १३ १४ १५ १६ ६९ ६१

१७ १८ व्रतांगंगोदानमाह गामिति सर्वोपस्करसंयुतां सर्वेउपस्कराः हिरण्यशृंगराजतखुर पृष्ठास्तरणादयः तैः युक्ताः १९
२० २१ अनेनविधिनेति व्रतेकृतेइतिशेषः एवंपरेतान् स्ववंशजानुद्धृत्य स्वयमप्युत्तमगतिंयातीत्याह एवमिति २३ २४
अध्यायसारमेकेनश्लोकेनाह नक्तेनेति कुसुमोपहारैः कुसुमैः पुष्पैः उपहारैः नैवेद्यैश्च २५ अन्येषामपिपातकिनां अधोगतेस्तेन·

एवंद्वादशमासेषुमासिमासिव्रतंचरेत् पंचम्यांशुक्लपक्षस्यपूर्णेसंवत्सरेपुनः १७ ब्राह्मणांश्चयतींश्चैवनागानुद्दि
श्यभोजयेत् इतिहासविदेनागंकांचनंरत्नचित्रितम् १८ गांचदद्यात्सवत्सांवैसर्वोपस्करसंयुताम् दानकालेपठेदे
तत्स्मरन्नारायणंविभुं १९ सर्वगंसर्वदातारमनंतमपराजितं येकेचिन्मेकुलेसर्पदष्टाःप्राप्ता ह्यधोगतिम् २० प्र
तद्दानेनगोविंदमुक्तिभाजोभवंतुते इत्युच्चार्याक्षतैर्युक्तंसितचंदनमिश्रितम् २१ वासुदेवाग्रतोभक्त्यातोयेतोयं
विनिक्षिपेत् अनेनविधिनासर्वेयेमरिष्यंतिवामृताः २२ सर्पतस्तेभियास्यंतिस्वर्गतिंमुनिसत्तम एवंसर्वान्समुद्धृ
त्यकुलजान्कुलनंदन २३ प्रयातिशिवसान्निध्यंसेव्यमानोप्सरोगणैः वित्तशाठ्यविहीनोयःसर्वमेतत्फलंलभेत्
२४ नक्तेनभक्तिसहिताःसितपंचमीषुयेपूजयंतिभुजगान्कुसुमोपहारैः तेषांगृहेत्वभयदाहिभवंतिसर्पाहर्षान्वि
तामणिमयूखविभूषितांगाः २५ प्रतिग्रहंवैचकुर्युर्गृहदानस्यवाडवाः प्रयांतिसर्पतांतेपिघोराभुक्त्वातुयातनां २६
अंतकालेचयेकेचिन्नागहत्यावशादिह मृतापत्याअपुत्रावाभवंतिमुनिसत्तम २७ कार्पण्यवशतःस्त्रीणांसर्पतां
यांतिकेचन निक्षेपानृतवादाच्चकेचित्सर्पाभवंतिहि २८ अन्येश्चापिनिमित्तैर्येसर्पतांयांतिमानवाः उपायोयं
विनिर्दिष्टःसर्वेषांनिष्कृतोपरः २९

मोक्षोभवतीत्याह प्रतिग्रहमित्यादिचतुर्भिः २६ २७ निक्षेपानृतवादात् निक्षेपे परनिहितद्रव्यविशेषे परेणस्वसमीपे तस्यनिधोस्थापिते सतितद्विषये असत्यवादात् २८ २९ छ

३० प्रसादितौ प्रसन्नौ ३१ कुरुतः पूरयतः ३२ ३३ ३४ इतिश्रावणमाहात्म्यटीकायांचतुर्दशोऽध्यायः १४ ६२
१ २ सूपौदनस्य सूपसहितस्यौदनस्य ३ नैवेद्यार्थविशेषद्रव्यमाह· आम्रस्येति ४ एवंव्रतविधानं तस्यफलंचसा

वित्तशाठ्यविहीनेन कृताचेन्नागपंचमी तद्धितार्थंहरिःशेषःसर्वनागाधिपोविभुः ३० बद्धांजलिःप्रार्थयतेवासुकि
श्चसदाशिवम् शेषवासुकिविज्ञप्त्याशिवविष्णूप्रसादितौ ३१ मनोरथांस्तस्यसर्वान्कुरुतःपरमेश्वरौ नागलो
केतुतान्भोगान्भुक्त्वातुविविधान्बहून् ३२ ततोवैकुंठमासाद्यकैलासंवापिशोभनम् शिवविष्णुगणोभूत्वाल
भतेपरमंसुखम् ३३ एतत्तेकथितंवत्सनागानांपंचमीव्रतम् अतःपरंकिमन्यत्त्वंश्रोतुमिच्छसितद्वद ३४
इतिश्रीस्कंदपुराणेईश्वरसनत्कुमारसंवादेश्रावणमासमाहात्म्येनागपंचमीव्रतकथनंनामचतुर्दशोऽध्यायः १४
६२ सनत्कुमारउवाच श्रुतमाश्चर्यजनकंनागानांपंचमीव्रतम् षष्ठ्यांकथयदेवेशकिंव्रतंकीदृशोविधिः
१ ईश्वरउवाच शुक्लपक्षेश्रावणेतुषष्ठ्यांकार्यंव्रतंशुभम् सूपौदनाख्यंविप्रेंद्रमहामृत्युविनाशनम् २ शि
वालयेगृहेवापिशिवंसंपूज्ययत्नतः सूपौदनस्यनैवेद्यमर्पयेद्विधिसंयुतः ३ आम्रस्यलवणाशाकंसाधनेपरिकल्पयेत्
नैवेद्यस्यपदार्थैस्तुवायनंब्राह्मणस्यच ४ यएतद्विधिनाकुर्यात्तस्यपुण्यमनंतकम् अत्रैवोदाहरंतीममितिहासं
पुरातनम् ५ राजासीद्द्रोहितोनामबहुकालमपुत्रवान् पुत्रार्थीसतपश्चक्रेमहत्परमदारुणम् ६ प्रारब्धेनास्तिते
पुत्रोबोधितोपिसवेधसा निर्बंधान्ननिवृत्तोभूत्तपसःसोतिलालसः ७ ततःसंकटमापन्नोवेधाःप्रादुरभूत्पुनः
पुत्रोदत्तस्तवमयाअल्पायुःसभविष्यति ८

मान्यतः पुण्यप्राप्तिरूपमुक्त्वा विशिष्टफलप्राप्ति दर्शनाय कथां प्रस्तावयति
अत्रेति ५ तपसः इतिपंचमी निर्बंधात् आग्रहात् ६ ७ ८ ६२ ६२

९ ततइति जातइतिशेषः १० ११ विवाहाकरणेहेतुमाह मृतेरिति १२ चिंताप्राप्तौहेतुंकथयन् राजानंविशिनष्टि ब्र-

पत्नीराजामंत्रयेतांवंध्यात्वंतुगमिष्यति अपुत्रत्वापवादश्चअलमित्येवजायताम् ९ ततोब्रह्मवरात्सुनोहर्षशोक
परोभवत् जातकर्मादिसंस्कारांश्चक्रेराजायथाविधि १० राज्ञीसादक्षिणानामराजाचैवसरोहितः शिवदत्तइतिप्रे
म्णाचक्रतुर्नामृतस्यतौ ११ उपनीतश्चतनयोराज्ञातुभयचेतसा विवाहनचकारास्यभूमिपालोमृतेर्भयात् १२
तदाषोडशवर्षेसोमरणंप्रापपुत्रकः चिंतामापपरांराजाब्रह्मचारिमृतिंस्मरन् १३ येषांकुलेब्रह्मचारीनिधनंप्राप्नुया
द्यदि तत्कुलंक्षयमायातिसोपिदुर्गतिमापतेत् १४ सनत्कुमारउवाच देवदेवजगन्नाथपरिहारोस्तिवानवा
अस्तिचेत्त्ववदस्वाद्यदोषशांतिर्यथाभवेत् १५ ईश्वरउवाच स्नातकोब्रह्मचारीचनिधनंप्राप्नुयाद्यदि संयो
ज्यचार्कविधिनासंयोज्यौतौततःपरम् १६ देशकालौतुसंकीर्त्यऽमुकगोत्रादिनामतः व्रतंवैसर्गिकंकुर्वेमृत-
स्यब्रह्मचारिणः १७ हेम्नाभ्युदयिकंकृत्वाप्रतिष्ठाप्यचपावकम् आघारांतंचसंपाद्यचतुर्व्याहृतिभिर्हुनेत् १८
व्रतपत्यमथेचैवव्रतानुष्ठानसत्फलम् संपादनायविश्वेभ्योदेवेभ्यश्चहुनेद्घृतम् १९ ततःस्विष्टकृतंहुत्वाहोमशे
षसमापयेत् देशकालौपुनःस्मृत्वाकरिष्येर्कविवाहकम् २० हेम्नाभ्युदयिकंकृत्वाअर्कशाखांशवंतथा लिप्त्वा
तैलहरिद्राभ्यांपीतसूत्रेणवेष्टयेत् २१ पीतवस्त्रयुगेनापिअग्निंसंस्थापयेत्ततः आघारांतमथेचैवविवाहविधि-
योजकम् २२ बृहस्पतयेकामायचतुर्व्याहृतिभिस्तथा आज्यंस्विष्टकृतंहुत्वाकर्मचैवसमापयेत् २३ अर्कशाखां
शवंचैवदाहयेच्चयथाविधि मृतस्य यमाणस्यषडब्दव्रतमाचरेत् २४

ह्मचारिस्मृतिमिति १३ ब्रह्मचारिमृतौदोषमाह
येषामिति १४ १५ अर्कविधिना अर्कविवाहपद्धत्या १६ १७ १८ १९ २० २१ २२ २३ २४

२५ २६ २७ व्रतस्यमुख्यत्वानवभासनेकारणमाह नेति २८ २९ ३० ३१ कन्यकामित्यस्यान्वि

त्रिंशद्भ्योब्रह्मचारिभ्योदद्यात्कौपीनकान्नवान् हस्तमात्राःकर्णमात्राद्दद्यात्कृष्णाजिनानिच २५ पादुकाछत्रमाल्या
निगोपीचंदनमेवच मणिप्रवालमाल्यंचभूषणानिसमर्पयत् २६ एवंकृतेविधानेचविघ्नःकोपिनजायते ईश्वर
उवाच एवंश्रुत्वाब्राह्मणेभ्योराजाहृद्यविचारयत् २७ भातिमेकंविवाहोयमनुकल्पोनमुख्यकः नददातिप्रमी
तस्यकन्यांकश्चिद्वधूयतः २८ अहंराजास्मिप्रददेरत्नानिचधनंबहु ददामितस्मैयःकश्चिद्दास्यतेऽस्यवधूंयदि
२९ विप्रःकश्चित्पुरेतस्मिन्नासीद्देशांतरंगतः तस्यपूर्वमृतायास्तुभार्यायाःकन्यकाशुभाः ३० आसीद्द्वितीया
भार्यातुदुष्टचित्ताविचारयत् सपत्नीद्वेषतश्चापिबहुद्रव्यस्यलोभतः ३१ दशवर्षातुसाबालादीनामातृवशंगता
सापत्नमातासालक्षंगृहीत्वाप्रददौसुताम् ३२ कन्यांगृहीत्वाजग्मुस्तेस्मशानंसरितस्तटे विवाहंचक्रुश्चैवशवेन
सहकन्यकाम् ३३ भोजयित्वाविधानेनदग्धुंसमुपचक्रमुः ततःसाकन्यकापृच्छत्किमिदंक्रियतेजनाः ३४ ततः
स्तेदुःखिताःसर्वप्रोचुर्मंदतयावधूम् ततःप्रोवाचसाभीतारुदतीबालभावतः ३५ पतिःकिंदह्यतेमेसौदग्धुंनैव
ददाम्यहम् गच्छध्वसहिताःसर्वेतिष्ठाम्यत्राहमेकिका ३६ पत्यासहगमिष्यामिउत्तिष्ठतियदाह्यसौ दृष्ट्वातस्या
स्तुनिर्बंधकरुणादीनचेतसः ३७ प्रारब्धवादिनोवृद्धाःकेचित्तत्रैवमूचिरे अहोकिंवाभाविकर्मज्ञायतेनैवकस्यचि
त् ३८ दीनपालःकृपालुश्चभगवान्किंकरिष्यति निराश्रिताचकन्येयंमात्रासापत्नभावतः ३९

मश्लोकस्थेन भोजयित्वेतिपदेनान्वयः ३२ ३३ समुपचक्रमुः प्रारेभुः ३४ ३५ ३६ ३७ ३८ भगव
त्कृपाया अत्रसंभवे कारणमाहुः निराश्रितेति अयंभावः भगवतः अनाथनाथत्वात् एतस्या अनाथत्वात् एतस्यांतत्कृपासंभवइति ३९

५० ५१ ५२ ५३ ५४ आश्वासनमिति देवत्वज्ञानाभावेपि अस्मिन्निर्जनेस्थाने आश्रयः प्राप्तोतएवाश्वस्ताव·

विक्रीतास्यादतोदेवः कदाचित्पालकोभवेत् अतोस्माभिरशक्येयंदग्धुंचार्यंतथायवः ५० अतोस्माभिश्चगंतव्यंस·
र्वैषांरोचतेयदि संमंत्र्यैवंतुसर्वेपिगतास्तेनगरंप्रति ५१ सैकाशिवंपार्वतींचस्मरंतीभयविह्वला अजानंतीबालभा
वाकिमेतदितिविह्वला ५२ तस्याःसंस्मरणाद्देव्याःसर्वज्ञौपार्वतीशिवौ करुणापूर्णहृदयौतत्राजग्मतुरंजसा
५३ वृषारूढौतुतौदृष्ट्वादंपतीतेजसांनिधी ननामदंडवद्भूमौनजानंत्यपिदैवते ५४ आश्वासनंपरंलेभेआगतासं
गतिस्त्विति उवाचचपतिःकिंमेजागृतोवैनजायते ५५ प्रसन्नौबालभावेनदययाचपरिप्लुतौ ऊचतुस्तेजनन्यास्तु
व्रतंसूपोदनाभिधम् ५६ व्रतंसंकल्प्यसतिलंगृहीत्वास्यप्रयच्छुभे ब्रूहियन्मज्जनन्यास्तिव्रतंसूपोदनाभिधं
५७ कृतंतस्यप्रभावेणउत्तिष्ठतुपतिर्मम तयाकृतंतथासर्वंशिवदत्तस्तथोत्थितः ५८ उपदिश्यव्रतंतस्यास्तदां
तर्दधतुःशिवौ शिवदत्तस्तुपप्रच्छकात्वंकेहागतोस्म्यहम् ५९ साचाहकिंचिद्वृत्तांतंरात्रिश्चापिगताभवत् प्रात
र्नदीतीरगताजनाराज्ञेन्यवेदयन् ६० राजन्पुत्रःस्नुषाचैवनदीतीरेचतिष्ठतः प्रामाणिकेभ्यःश्रुत्वासौहर्षंलोकोत्तरं
ययौ ६१ हर्षभेरीवादयन्सनदीतीरेसमाययौ जनाश्चमुदिताःसर्वेप्रशशंसुर्जनाधिपम् ६२ राजन्मृतःकालगृहा
त्पुत्रस्तेपुनरागतः प्रशशंसस्नुषांराजाकिमहंशस्यतेजनैः ६३ दूरदृष्टोधमश्चाहंधन्येयंसुभगास्नुषा एतत्पुण्यप्र·
भावेनपुत्रोयंजीवितोमम ६४ एवंस्नुषांसुसंभाव्यराजाब्राह्मणसत्तमान् पूजयामाससुभगान्दानमानपुरःस
रम् ६५

भूवेत्तिभावः ५५ ५६ ५७ ५८ ५९ प्रातरिति शिवदत्त मुत्थितं दृष्ट्वानिवृत्ये·
तिशेषः ६० ६१ ६२ ६३ ६४ सुसंभाव्य सत्कृत्य ६५ [illegible] [illegible]

प्रमीतस्यमृतस्य ५६ ५७ ५८ ५९ इतिश्रावणमाहात्म्यटीकायांपंचदशोऽध्यायः १५ १६ शीतलासप्तमीव्रतमाह इ
तःपरमिति १ कुड्येभित्तौ लेखनीयान्याह वापीमित्यारभ्यात्तृतीयश्लोकांतेन २ ३ वार्देवतानां जलदेवतानाम् ४

बहिर्नीतप्रमीतस्यपुनर्ग्रामप्रवेशने विधिंब्राह्मणसंदिष्टंशांतिकंविधिनाचरत् ५६ एतत्तेकथितंवत्सव्रतंसूपो
दनाभिधम् पंचवर्षाणिकृत्वैतत्पश्चादुद्यापनंचरेत् ५७ प्रतिमांपार्वतीशस्यप्रार्चयेत्प्रतिवासरे प्रातर्होमंप्रकुर्वी
तचरुणाम्रदलैस्तथा ५८ नैवेद्यंवायनंचैवव्रतोक्तविधिनाचरेत् पुत्रांश्चिरायुषंलब्ध्वान्तेशिवपुरंव्रजेत् ५९
इतिश्रीस्कंदपुराणेईश्वरसनत्कुमारसंवादेश्रावणमासमाहात्म्येसूपोदनषष्ठीव्रतकथनंनामपंचदशोऽध्यायः१५
१६ ईश्वरउवाच इतःपरंप्रवक्ष्यामिशीतलासप्तमीव्रतं श्रावणेशुक्लपक्षेतुसप्तम्यामाचरेद्व्रतम् १ कुड्ये
लिखित्वावापींतुतथासलिलदेवताः सप्तसंख्यादिव्यरूपाश्चशरीरिणिसंज्ञकाः २ बालद्वययुतानारीपुरुषत्रय
संज्ञिता अश्वश्चवृषभश्चैवशिबिकानरवाहना ३ पूजावार्देवतानांस्यात्षोडशैरुपचारकैः दध्योदनस्यनैवेद्यं
साधनेकर्कटीफलम् ४ द्विजायवायनंदद्यान्नैवेद्यस्यपदार्थकैः सप्तवर्षाणिकृत्वेवंसुवासिन्यश्चसप्तवै ५ प्रत्य
ब्दंभोजनीयाःस्युःपश्चादुद्यापनंचरेत् वार्देवतानांप्रतिमाएकस्मिन्स्वर्णपात्रके ६ बालेनसहिताःपूज्याःसायपू
र्वेह्निभक्तितः प्रातर्होमंचचरुणाग्रहहोमपुरःसरम् ७ व्रतमेतत्पुराचीर्णंफलितंचतथाशृणु सौराष्ट्रदेशेनगरमा
सीच्छोभनसंज्ञितम् ८ तत्रासीद्वणिकःकश्चित्सर्वधर्मपरायणः सवापींखानयामासनिर्जलेविजनेवने ९ पाद
मार्गांशुभारम्यांबहुद्रव्यव्ययेनसः पशूनांजलपानायश्चापियोऽयांददाम्यहम् १० ५ ६ ७ ८ विजनेविशेषतो

जनायस्मिन् ननुविगताजनायस्मादिति एकादशश्लोकस्थितेन पांथजनसुखायेतिपदेनविरोधात् ९ १० १६

११ १२ १३ १४ शृणुध्वेति वाक्यमितिशेषः १५ ननुयद्यहंतव पितातथापि नवपुत्रस्य बलिदानविषयेनाहं स्वतं
त्रइतिचेद्धर्मकार्येतुतद्विषयेपित्ते स्वातंत्र्य मस्तीत्याह तत्रापीति १६ १७ १८ १९ ननुबालस्यनित्यंमातृ

बद्धांचिरस्थायिनींचबहिःप्रांतेद्रुमैर्युताम् आरामंकारयामासश्रांतपांथसुखायच ११ परंशुष्कांजलंतत्रनलब्धं
बिंदुमात्रकम् प्रयासोमेवृथाजातोद्रव्यंचव्यथितंवृथा १२ इतिचिंतापरस्यासीद्धनिकोधनदाभिधः रात्रौतत्रैव
सुष्वापस्वप्नेतुजलदेवताः १३ आगत्यकथयामासुः शृणूपायंजलागमे दास्यसेयदितेपौत्रंबलिमस्माकमाहृतः
१४ नदैववापिकेयंतेजलपूर्णाभविष्यति दृष्ट्वेवंगृहमागत्यपुत्रायाकथयद्धनी १५ द्रविणोनामतत्पुत्रः सोपिधर्म-
परायणः शृणुष्वममवत्सस्यभवान्मज्जनकोयतः १६ तत्राप्येतद्धर्मकार्येकिंविचार्यमिहत्वया स्थावरस्यास्तिधर्मो
यंनश्वरंचसुतादिकम् १७ अल्पमौल्यंमहावस्तुलाभोयंदुर्लभःक्रयः शीतांशुश्चैवचंडांशुर्वर्ततेतनयौमम १८
शीतांशुर्नामज्येष्ठोयंबलिर्देयोविचारतः मंत्रोयंसर्वथास्त्रीभिर्ज्ञातव्योनैवभोपितः १९ उपायस्तत्रमत्पत्नीगर्भिणीव
र्ततेधुना आसन्नप्रसवाचैवगंत्र्यसौस्वपितुर्गृहे २० प्रसूत्यर्थंकनिष्ठोसौतयासहगमिष्यति तदाकार्यमिदंतात
निर्विघ्नेनभविष्यति २१ इतिश्रुत्वापुत्रवाक्यंपितातंसंतुतोषह धन्योसिपुत्रधन्योहंत्वयापुत्रेणपुत्रवान् २२ एत-
स्मिन्नंतरेतस्याःसुशीलायाःपितुर्गृहात् आकारणंसमगमत्तदासाचजगामह २३ ज्येष्ठोस्माकंसमीपेस्तुकनि
ष्ठोनीयतांत्वया सातथैवसतीचक्रेभर्तृश्वशुरवाक्यतः २४ तदातौपुत्रपितरौतैलेनाभ्यज्यबालकम् स्नापयि
त्वासुवस्त्रैश्चभूषणैःसमलंकृतम् २५

सन्निधौस्थितत्वात् कथंतन्मातुर्ज्ञानंविनैतत्कृत्यंघटत इतिचेत्तत्राह उपा-
यइति आसन्नप्रसवा आसन्नः प्रसवकालोयस्याः सा २० २१ २२ २३ २४ २५ ६२

पूर्वाषाढासंज्ञके वारुणे वरुणदेवताके ऋक्षेनक्षत्रे २६ २७ २८ आश्चर्ययुक्तमानंदमितिभावः २९ ३० ३१

पूर्वाषाढावारुणर्क्षेस्थापयामासतुर्मुदा वाप्यांवादेवतास्तुष्टाभवंत्वितिसमूचतुः २६ तदैववापीपूर्णाभूत्सुधातुल्येनवारिणा
उभौगृहंजग्मतुस्तौहर्षशोकसमन्वितौ २७ सासुशीलापितुर्गेहेसूतपुत्रंतृतीयके
मासत्रयोत्तरंगेहंनिजंगंतुंचनिर्गता २८ वापीसमीपंप्राप्तासौवापीपूर्णांददर्शह विस्मयंपरमंप्रापतत्रस्नानंचकारह
२९ श्वशुरस्यप्रयासोमेसार्थकश्चधनव्ययः तद्दिनेसप्तमीचासीच्छ्रावणेशुक्लपक्षके ३० सुशीलायाव्रतंचासीच्छीतलासप्तितशुभम् सातत्रपाकमकरोदोदनंचान्नयद्दधि ३१ वादेवताश्चसंपूज्य-
दध्यन्नंकर्कटीफलम् नैवेद्यंकल्पयामासदत्वाविप्रायवायनम् ३२ स्वयंतदेवबुभुजेसहितासहवासिभिः
ततोयोजनमात्रंतुतस्याग्रामोबभूवह ३३ ततःसानिर्गतात्वासीदारुह्यशिबिकांशुभाम् बालकद्वयसंयुक्ता
ततस्ताजलदेवताः ३४ ऊचुःपरस्परंत्वस्याःपुत्रौदेयौव्रतेनया अस्माकंव्रतमाचीर्णंप्रज्ञाचविहितापरा ३५
एतद्व्रतप्रभावेणनूतनोदीयतंसुतः पूर्वजातौयदिस्यातांत्वस्मत्तोषस्यकिंफलम् ३६ विसृजयामासुरिति
उक्त्वान्योन्यंदयालवः मातरंदर्शयामासुर्वाप्यांनिष्काश्यबाह्यतः ३७ अधावत्पृष्ठतोमातुर्मातरित्याह्वयन्शिशुः
संश्रुत्यपुत्रशब्दंसापरावृत्यावलोकयत् ३८ हृष्टासानंदनंस्वीयंचकितासाभवद्धृदि स्थाप्यांकेमूर्ध्न्यवघ्राय
किंचित्पप्रच्छनोक्तम् ३९ बिभेष्यतीतिबुध्वासात्वहृदयेत्वन्वचिंतयत् तस्करैर्यदिवानीतस्तर्ह्यलंकारवान्कथम् ४०

३२ ३३ ३४ ३५ पुत्रदानेकारणमाहुः एतदिति ३५ ३६ ३७
३८ ३९ प्रश्नाकरणेकारणमाह बिभेष्यतीति चिंतामेवाह ४० ६९ ध ध

४१ ४२ ४३ ४४ आश्चर्यंप्रापमुदमवापइतिप्रत्येकंसंबध्यते द्वावपि आश्चर्यंहर्षंचावापतुरित्यर्थः ४५ तांपुत्रत्रयसहितामागतांदृष्ट्वा प्रेम्णोत्पन्नास्तयोरुद्गारान्दर्शयति त्वयेतित्रिभिः ४६ ४७ पत्याकेवलंप्रेमपूर्वकंदृष्टवेष्टेनतूक्तापितुर्मर्यादावशा

पिशाचैर्यद्विनीतोमे चेतश्चपुनः कथम् चिंतासमुद्रमग्नास्यगृहसंबंधिनोजनाः ४१ इत्येवंचिंतयंतीसानगरद्वारमापसा जनाःसंकथयामासुःसुशीलासुसमागता ४२ श्रुत्वातुपितृपुत्रौतौपरांचितामवापतुः किंवदिष्यतिचास्माकमस्माभिर्वाकिमुच्यताम् ४३ एतस्मिन्नंतरेप्राप्तापुत्रत्रयसमन्विता ज्येष्ठदृष्ट्वातुतंबालश्वशुरश्चपतिश्वसः ४४ आश्चर्यपरमंप्रापपरांमुदमवापच त्वयाकिंपुण्यमाचीर्णंव्रतंवापिशुचिस्मिते ४५ पतिव्रतासिधन्यासिपुण्यवत्यसिभामिनि मासद्वयंतुसंजातमकस्मान्नास्त्यभूच्छिशुः ४६ सचत्वयापुनर्लब्धोवापीपूर्णापिचाभवत् एकपुत्रागतेतस्त्वमागतासित्रयान्विता ४७ त्वयोधृतंकुलंसुभ्रु किंत्वास्तौमिशुभानने श्वशुरेणस्तुतैश्चसापत्याप्रेम्णाचवीक्षिता ४८ श्वश्र्वाचानंदितोवाचपुण्यमार्यस्यसर्वशः प्रापुःसर्वेपिचानंदंभुक्त्वाभोगान्यथेप्सितान् ४९ इत्येतत्कथितंवत्सशीतलासप्तमीव्रतम् दध्योदनंशीतलंचशीतलंकर्कटीफलम् ५० वापीजलंशीतलंतुशीतलाश्चापिदेवताः तापत्रयस्यसंतापाच्छीतलाव्रतिनस्ततः ५१ अतोहेतोःसप्तमीयंशीतलेतियथार्थिका ५२ इतिश्रीस्कंदपुराणेईश्वरसनत्कुमारसंवादेश्रावणमासमाहात्म्येशीतलासप्तमीव्रतकथनंनामषोडशोऽध्यायः १६ ६९ ईश्वरउवाच अथवक्ष्यामिदेवेशपवित्रारोपणंशुभम् सप्तम्यामधिवास्याथअष्टम्यामर्पयेत्तुतत् १

दितिभावः ४८ ४९ एतद्व्रतस्यशीतलेतिनामप्राप्तौकारणमाह दध्योदनमितिसार्द्धेन ५० तापत्रयस्य आध्यात्मिकाधिदैविकाधिभौतिकाख्यस्य ५१ अतइति अतःसर्वशीतलवस्तूनामेकीभावात् ५२ इतिश्रा॰टी॰षोडशोऽध्यायः १६ ६९ अथेतिपवित्रस्यविधिःद्वाविंशतितमेश्लोकेवक्ष्यते १

२ आधयः मनोदुःखानि दुःखानिआप्तादीनां पीडापिशाचादिकृता व्याधिः शरीरजा ३ ४ ५ ६ देव्यामिति विषयसप्तमी देवीविषये इत्यर्थः सद्भक्तिमान् अव्यभिचारिणी भक्तियुक्तः ७ ८ ९ देव्याइति तत्पवित्रम् १० ११ १२

पवित्रंकारयेद्यस्तुतस्यपुण्यफलंशृणु सर्वयज्ञव्रतंदानंसर्वतीर्थाभिषेचनम् २ प्राप्नुयान्नात्रसंदेहोयस्मात्स्वर्गताशिवा नाधयोनचदुःखानिनपीडाव्याधयोपिच ३ नभयंशत्रुजंतस्यनग्रहैःपीड्यतेक्वचित् सिद्ध्यंति सर्वकार्याणिअल्पानिचमहांतिच ४ नातःपरतरंवत्सअन्यत्पुण्यविवृद्धये नराणांचनृपाणांचस्त्रीणांचैवविशेषतः ५ सौभाग्यजननंतातवत्स्नेहात्प्रकाशितम् श्रावणेशुक्लसप्तम्यामधिवास्यविधातृज ६ सर्वोपस्करसंयुक्तोदेव्याःसद्भक्तिमान्स्वसः सर्वाणिपूजाद्रव्याणिगंधपुष्पफलानिच ७ नैवेद्यानिविचित्राणिवस्त्राद्याभरणानिच संपाद्यशोधयेदेतान्प्राशयेत्पंचगव्यकम् ८ चरुणादिग्बलिंदद्यात्कार्यंचैवाधिवासनम् छादयेत्सदृशैर्वस्त्रैःपत्रैश्चैतत्पवित्रकम् ९ देव्यास्तन्मूलमंत्रेणशतवाराभिमंत्रितम् स्थापयेत्पुरतोदेव्याःसर्वशोभासमन्वितं १० देव्यास्तुमंडपंकृत्वारात्रौजागरणंचरेत् नटनर्तकवेश्यानांकुशलान्विविधान्गुणान् ११ स्थापयेद्वाद्यगीतादिनृत्यविद्याविशारदान् प्रत्यूषेविधिवत्स्नात्वादिग्भ्योदद्यात्पुनर्बलीन् १२ देवींसंपूज्यविधिवत्स्त्रियोभोज्यास्तथाद्विजाः पवित्रमर्पयेद्देव्याआदावंतेचदक्षिणाम् १३ यथाशक्त्याभवेद्वत्सनियमःकार्यसाधकः स्त्रियोक्षास्मृगयामांसंरात्रौवर्ज्यंप्रयत्नतः १४ स्वाध्यायश्चद्विजाचार्यैर्नकार्यंकर्षणंकृषेः वणिग्भिर्नचवाणिज्यंसप्तपंचदिनानिवा १५ अथवात्रीणिचैकंवादिनंतस्यार्धमेववा देव्याव्यापारआसक्तैःकर्तव्यासततंत्वहादि १६

विधिवत् विधिमनतिक्रम्य स्त्रियः सुवासिन्यः १३ अक्षाः द्यूतं १४ १५ व्यापारे पूजादौ १६

पवित्रारोपणाकरणेदोषमाह नेति १७ १८ १९ २० पवित्रकरणेविधेरनुक्तत्वात्तत्कथं कर्तव्यमितिजाताशंकः पृच्छति देवदेवेति २१ हेमेति कौशेयपट्टजैः कृमिकोशोद्भवैरित्यर्थः कौशेयंकृमिकोशोत्थमित्यमरः ब्राह्मण्यावर्तितैः ब्राह्मणास्त्रियानिर्मितैः २२

नकरोतिविधानेनपवित्रारोपणंबुधः तस्यसांवत्सरीपूजानिष्फलामुनिसत्तम १७ तस्माद्भक्तिसमायुक्तैर्नरैर्देवीपरायणैः वर्षेवर्षेप्रकर्तव्यंपवित्रारोपणंशुभम् १८ कर्काटकगतेसूर्येतथासिंहगतेपिवा अष्टम्यांशुक्लपक्षस्यदद्याद्देव्याःपवित्रकम् १९ एतस्याकरणेदोषोनित्यमेतत्प्रकीर्तितम् २० सनत्कुमारउवाच देवदेवमहादेवपवित्रंयत्वयोदितम् निर्मितव्यंकथंस्वामिंस्तद्विधिंवदसर्वशः २१ ईश्वरउवाच हेमताम्रक्षौम्यरूप्यैःसूत्रैःकौशेयपट्टजैः कुशैःकाशैश्चकार्पासैर्ब्राह्मण्यावर्तितैःशुभैः २२ कृत्वात्रिगुणितंसूत्रंत्रिगुणीकृत्यसाधयेत् ततोत्तमपवित्रंतुषष्ट्यासहशतैस्त्रिभिः २३ सप्तत्यासहितंद्वाभ्यांशताभ्यांमध्यमंस्मृतम् साशीतिनाशतेनैवकनिष्ठंतत्समाचरेत् २४ उत्तमंतुशतग्रंथिपंचाशद्ग्रंथिमध्यमम् पवित्रककनिष्ठंस्यात्षड्ग्रंथिभिश्चभोजनम् अथवागगुणैर्वेदद्वाभ्यांद्वादशतोपिवा चतुर्विंशद्वादशाष्टग्रंथिभिर्वापवित्रकम् २५ अथचाष्टोत्तरशतंचतुःपंचाशद्देवताः सप्तविंशतिरेवैवंज्येष्ठमध्यकनीयसम् २६ अधमंनाभिमात्रंस्यादूरुमात्रंतुमध्यमम् उत्तमंजानुमात्रंतत्प्रतिमायांनिगद्यते २७ रंज्याःसर्वाःकुंकुमेनपवित्रग्रंथयःशुभाः देवींपूज्यपुरोभागेसर्वतोमंडलेशुभे २८ कलशेवेणुपटलेपवित्राणिनिधापयेत् त्रिसूत्र्यांब्रह्मविष्ण्वीशानावाह्यचततःशृणु २९

२३ २४ २५ २६ २७ रंज्याइतिलेपनीया इत्यर्थः २८ वेणुपटले वेणुनिर्मितपात्रे पवित्रे सूत्राणां न्यूनाधिक्यतः देवतानामपिन्यूनाधिक्यमाह त्रिसूत्र्यामितित्रिभिः २९ ३० ध ध ध

३० ३१ ३२ ३३ ३४ प्रतिपदि कुबेरस्य द्वितीयायां लक्ष्म्याः तृतीयायांगौर्याः चतुर्थ्यांगणपतेः पंचम्यांचंद्र
स्य षष्ठ्यांगुरोः३५सप्तम्यांसूर्यस्य अष्टम्यांचंडिकाया नवम्यामंबायाः दशम्यांवासुकेः एकादश्यामृषीणां द्वादश्यांविष्णोः त्रयोदश्यांशेष-
स्य चतुर्दश्यांशिवस्य पूर्णिमायांब्रह्मणः अमायांपितॄणां पवित्रारोपणंकार्यमित्यर्थः ३६ ३७ ३८ ३९

नवसूत्र्यांतथोंकारंसोमंवह्निंविधिंतथा नागांश्चंद्ररवीशांश्चविश्वेदेवांश्चस्थापयेत् ३० अतःपरंप्रवक्ष्यामिस्थाप्या
ग्रंथिषुदेवताः क्रियाचपौरुषीवीराविजयाचापराजिता ३१ मनोन्मनीजयाभद्रामुक्तिरीशानथैवच प्रणवादिनमो
तैश्चनामभिर्ग्रंथिसंख्यया ३२ आवर्त्यमानैरावाह्यपूजयेच्चंदनादिभिः धूपितंप्रणवेनाभिमंत्र्यदेव्यैसमर्पयेत्
३३ एतत्तेकथितंदेव्याःपवित्रारोपणंशुभम् अन्येषांचैवदेवानांप्रतिपत्प्रभृतिष्वपि ३४ पवित्रारोपणंकार्यंदेव
तास्तावदामिते धनदःश्रीस्तथागौरीगणेशःसोमराड्गुरुः ३५ भास्करश्चंडिकांबाचवासुकिश्चतथर्षयः चक्र
पाणिर्ह्यनंतश्चशिवःकःपितरस्तथा ३६ प्रतिपत्प्रभृतिष्वेताःपूज्यास्तिथिषुदेवताः मुख्यायादेवतायास्तुपवि
त्रारोपणंत्विदम् ३७ तदंगदेवतायास्तुत्रिसूत्रंस्यात्पवित्रकम् ३८ ईश्वरउवाच अतःपरंप्रवक्ष्यामिकर्त-
व्यंनवमीदिने श्रावणेमासिविप्रेंद्रपक्षयोरुभयोरपि ३९ कुमारीनामिकादुर्गापूजनीयायथाविधि कुर्यान्नक्त
व्रतंतत्रक्षीरमाक्षिकभोजनम् ४० उपवासपरोवास्यान्नवम्यांपक्षयोर्द्वयोः कुमारीचेतिनाम्नावैचंडिकामर्चयेत्स-
दा ४१ कृत्वारौप्यमयींभक्त्यादुर्गांवैपापनाशिनीम् करवीरस्यपुष्पैस्तुगंधैरगरुचंदनैः ४२ धूपेनचदशांगेनमो
दकैश्चापिपूजयेत् कुमारींभोजयेत्पश्चात्स्त्रियोविप्रांश्चभक्तितः ४३

व्रतेकर्तव्यविशेषमाह क्षीरेति क्षीरंदुग्धंमाक्षिकंमधुत-
द्युक्तंभोजनम् ४० पक्षांतरमाह उपवासपरइति द्वयोःपक्षयोः शुक्लकृष्णयोरित्यर्थः ४१ ४२ ४३

४४ ४५ ४६ इतिश्रावणमाहात्म्यटीकायांसप्तदशोऽध्यायः १७ छ १ आशादशमीव्रतमाह श्राव·
णाइति २ ३ कृष्यर्थंबहुधान्योत्पत्तये कृषीवलः कर्षकः गुर्विणी गर्भिणी ४ ५ चिरप्रवसिते चिरकालंप्रवासायग·

भुंजीतवाग्यतःपश्चाद्बिल्वपत्रकृताशनः एवंयःपूजयेद्दुर्गांश्रद्धयापरयायुतः ४४ सयातिपरमंस्थानंयत्रदेवोगु
रुःस्थितः एतत्तेनवमीकृत्यंकथितंविधिनंदन ४५ सर्वपापप्रशमनंसर्वसंपत्करंनृणाम् पुत्रपौत्रादिजननमं
तेसद्गतिदायकम् ४६ इतिश्रीस्कंदपुराणेसनत्कुमारेश्वरसंवादेश्रावणमासमाहात्म्येष्टम्यांदेवीपवि·
त्रारोपणनामसप्तदशोऽध्यायः १७ सनत्कुमारउवाच भगवन्पार्वतीनाथभक्तानुग्रहकारक कथ·
यस्वदयासिंधोमाहात्म्यंदशमीतिथेः १ ईश्वरउवाच श्रावणेशुक्लपक्षेतुदशम्यांप्रारभेद्व्रतम् प्रतिमा
सेदशम्यांतुशुक्लायांव्रतमाचरेत् २ एवंद्वादशमासेषुकृत्वाव्रतमनुत्तमम् नभःशुक्लदशम्यांतुततउद्यापनं
चरेत् ३ राज्याशयाराजपुत्रःकृष्यर्थेचकृषीवलः वाणिज्यार्थंवणिक्पुत्रःपुत्रार्थंगुर्विणीतथा ४ धर्मार्थकाम·
सिद्ध्यर्थंलोकःकन्यावरार्थिनी यष्टुकामोद्विजवरोरोग्यारोग्यार्थमेवच ५ चिरप्रवसितेकांतेपत्नीतस्यागमायच
एतेष्वन्येषुकर्तव्यमाशाव्रतमिदंतदा ६ यस्माद्यस्यभवेदार्तिःकार्यंतेनतदाव्रतम् नभःशुक्लदशम्यांतुस्नात्वा
संपूज्यदेवता ७ नक्तमाशाःसंपूज्यावैपुष्पपल्लवचंदनैः गृहांगणेलेखयित्वायवपिष्टांतकेनवा ८ स्त्रीरूपाश्चा
धिदेवस्यशस्त्रवाहनचिह्निताः दत्वाघृताक्तनैवेद्यंपृथग्दीपांश्चदापयेत् ९ फलानिकालजातानिततःकार्यंनिवे
दयेत् आशाःस्वाशाःसदासंतुसिद्ध्यंतुमेमनोरथाः १०

तेसति ६ आर्तिःपीडा ७ आशाः दिशः यवानांपिष्टांतके
नचूर्णेन ८ अधिदेवस्य तत्तद्दिक्स्वामिनः इंद्रादेः ९ १० छ छ छ

११ १२ १३ क्रमयोगेन पूर्वादिदिक्क्रममनतिक्रम्य एभिर्वक्ष्यमाणैः १४ मंत्रानेवाह त्वयीत्यादिभिः १५ अग्नेरिति
परिग्रहास्वीकारा दूसनेरितियावत् १६ १७ १८ यादसांजलजंतूनां यादांसिजलजंतव इत्यमरः प्रवणादक्षा १९

भवतीनांप्रसादेनसदाकल्याणमस्त्विति एवंसंपूज्यविधिवद्दत्वाविप्राय दक्षिणाम् ११ अनेनक्रमयोगेनमा-
सिमासिसदाचरेत् वर्षमेकंमुनिश्रेष्ठततउद्यापनंचरेत् १२ सौवर्णीः कारयेदाशारोप्याःपिष्टातकेनवा ज्ञाति
बंधुजनैःसार्द्धंस्नातःसम्यगलंकृतः १३ पूजयेद्भक्तियुक्तेनचेतसादशदेवताः स्थापयेत्क्रमयोगेनमंत्रैरेभि-
र्गृहांगणे १४ त्वयिसंनिहितःशक्रःसुरासुरनमस्कृत ः स्वामीचभुवनस्यास्य ऐंद्रीदिग्देवतेनमः १५
अग्नेःपरिग्रहादाशेत्वमाग्नेयीतिपठ्यसे तेजोरूपापराशक्तिरतस्त्वंवरदाभव १६ धर्मराजःसमाश्रित्यलो-
कान्संयमयत्यसौ तेनसंयमिनीचासियाम्येसत्कामदाभव १७ खड्गहस्तातिविक्रांतानिर्ऋतिस्थानमाश्रिता
तेननिर्ऋतिरूपासित्वमाशांपूरयस्वमे १८ त्वय्यास्तेभुवनाधारोवरुणोयादसांपतिः कार्यार्थममधर्मार्थिवारु-
णिप्रवणाभव १९ अधिष्ठतासियस्मात्वंवायुनाजगदादिना वायव्येत्वमतःशांतिंनित्यंयच्छममालये २० ध-
नाधिपाधिष्ठितासिप्रख्यातात्वमिहोत्तरा निरुत्तराभवास्माकंदत्वासद्योमनोरथम् २१ ऐशानिजगदीशेनशंभु-
नात्वमलंकृता पूरयस्वशुभेदेविवांछितानिनमोनमः २२ सर्वलोकोपरिगतासर्वदात्वंशिवप्रदा सनकाद्यैःप-
रिवृतामात्राहित्राहिसर्वदा २३ नक्षत्राणिचसर्वाणिग्रहास्तारागणास्तथा नक्षत्रमातरोयाश्चभूतप्रेतविनाय-
काः २४

जगदादिना जगत्कारणेन सर्वेषां जीवनाधारत्वा प्राणरूपत्वाच्च २० २१ २२ शिवंक-
ल्याणं प्रकर्षेणददातिसा २३ दिशंस्तुत्वा तत्रस्थिताः देवयोन्यः प्रार्थनीया इत्याह नक्षत्राणीति २४ ध ध

२५ २६ २७ २८ अतिवाह्य निर्गमय्य २९ ३० ३१ ३२ एवंसामान्यतोव्रतमुक्त्वा श्रद्धोत्साद

पूजितास्त्वमयाभक्त्याभक्तिप्रवणचेतसा सर्वेममेष्टसिद्ध्यर्थंभवंतुप्रवणाःसदा २५ भुजंगमकुलेनत्वंसेवितासि
यतोऽघधः नागांगनाभिःसहितातुष्टाभवममाद्यवै २६ एभिर्मंत्रैःसमभ्यर्च्यपुष्पधूपादिनाततः अलंकारांश्ववासा
सिफलानिचनिवेदयेत् २७ ततोवाद्यादिनादेनगीतनृत्यादिमंगलैः नृत्यतीभिर्वरस्त्रीभिर्जागरेणनिशांनयेत् २८
कुंकुमाक्षततांबूलदानमानादिभिःस्फरवम् अतिवाह्यचतारात्रिंहर्षयुक्तेनचेतसा २९ प्रभातेप्रतिमा र्च्यब्राह्म
णायनिवेदयेत् अनेनविधिना कृत्वाक्षमाप्यप्रणिपत्यच ३० भुंजीतमित्रैःसहितःसुहृद्बंधुजनेनच एवंयःकु
रुतेतातदशमीव्रतमादरात् ३१ सर्वान्कामानवाप्नोतिमनसोभिमतान्नरःस्त्रीभिर्विशेषतःकार्यंव्रतमेतत्सनातन
३२ प्राणिवर्गेयतोनार्यःश्रद्धाकामपरायणाः धन्यंयशस्यमायुष्यंसर्वकामफलप्रदम् ३३ कथितंचमुनिश्रेष्ठम
याव्रतमिदंतव नानेनसदृशंचान्यद्व्रतमस्तिजगत्त्रये ३४ येमानवाविधिजपुंगवकामकामाःसंपूजयंतिदशमी
षुसदादशाशाः तेषामशेषनिहितान्हृदयेतिकामानाशाफलंतिकिमिहास्तिवहूदितेन ३५ मोक्षप्रदानेनाया
सोनात्रकार्याविचारणा व्रतंचानेनसदृशंनभूतंनभविष्यति ३६ इतिश्रीस्कंदपुराणेईश्वरसनत्कुमारसंवा
देश्रावणमासमाहात्म्येआशादशमीव्रतकथनंनामाऽष्टादशोऽध्यायः १८ ॥ ईश्वरउवाच अथव
क्ष्येनभोमासिपक्षयोरुभयोरपि एकादश्यांतुयत्कृत्यंतच्छृणुष्वमहामुने १

नायतत्स्तौति धन्यमिति ३३।३४ अशेषनिहितान् अशेषान् संपूर्णान् निहितान् स्थापितान् विशेषणोभयपदसमासः हृदयेइतिपदंनि॰ ३४
हितान्इत्यनेनसंबध्यते ३५ ३६ इतिश्रा॰मा॰टीकायामष्टादशोऽध्यायः१८ ॥ अथएकादशीव्रतमाह अथेति १

२ ३ समाहितमनाः एकाग्रांतःकरणः ४ वेदविदुषः पुराणज्ञान्संपूज्य तेभ्यः आज्ञांप्राप्य नियमंकुर्यादिति षष्ठश्लोकेनान्वयः नियममेवाह एकादश्यामिति ५ ६ ७ तद्दिनेवर्जनीयान्याह पाखंडादिभिरिति पाखंडाः धर्मेअश्रद्धालवनास्तिकाइत्यर्थः

नकस्यचिन्मयाख्यातंगुह्यमेतदनुत्तमम् महापुण्यप्रदंवत्समहापातकनाशनम् २ वांछितार्थप्रदंनृणांश्रुतं-
पापापहारकम् श्रेष्ठव्रतानांसर्वेषांशुभमेकादशीव्रतम् ३ तत्तेऽहंसंप्रवक्ष्यामिसमाहितमनाःशृणु दशम्या-
मुषसिस्नात्वाकृतसंध्यादिकःशुचिः ४ प्राप्याज्ञांवेदविदुषःपुराणज्ञान्जितेंद्रियान् संपूज्यदेवदेवेशंषोडशैरुप-
चारकैः ५ एकादश्यांनिराहारःस्थित्वाहमपरेहनि भोक्ष्यामिपुंडरीकाक्षशरणंमेभवाच्युत ६ कुर्याच्चनियमंव-
त्सगुरुदेवाग्निसन्निधौ तद्दिनेभूमिशायीस्यात्कामक्रोधविवर्जितः ७ ततःप्रभातेविमलेकेशवार्पितमानसः श्री
धरेतितदावाक्यंक्षुतप्रस्खलनादिषु ८ पाखंडादिभिरालापंदर्शनंश्रवणंतथा त्यजेद्दिनत्रयंवत्सव्रतवैकल्यका-
रकम् ९ ततोमध्यान्हसमयेनद्यादौविमलेजले स्नानंकुर्याज्जितक्रोधःपंचगव्यपुरःसरम् १० आदित्यायनम-
स्कृत्यश्रीधरंशरणंव्रजेत् स्ववर्णाचारविधिनाकृतकृत्योगृहंव्रजेत् ११ पूजयेच्छ्रीधरंतत्रश्रद्धाभक्तिपुरःसरम्
पुष्पधूपैस्तथादीपैर्नैवेद्यैर्विविधैरपि १२ गीतवाद्यैःकथाभिश्चजागरंकारयेन्निशि कुंभंसंस्थापयित्वातुरत्नगर्भं
सकांचनम् १३ छादितंवस्त्रयुग्मेनासितचंदनचर्चितम् प्रतिमांदेवदेवस्यशंखचक्रगदाभृतः १४

तद्वर्जनेकारणमाह व्रतवैकल्यकारकमिति व्रतेवैकल्यंन्यूनत्वं करोतीतितथाभूतमित्यर्थः ८ ९ प्रथमतः अंतस्नानंकृत्वा नंतरंबाह्यस्नानंकार्यम् तदभावे त्वस्नानचेष्टार्थमिति त्वहृदिनिधायाह जितक्रोधइति १० कृतकृत्यइति कृतानि आचरितानि कृत्यानि संध्यावंदनादीनियेनसंतथोक्तः ११ १२ १३ १४ ध९ ध९ ध९

१५ १६ पुष्णातु वर्धयतु. १७ १८ यवसंतृणं १९ २० २१ २२ दुष्टचेतसे अश्रद्दधानाय.

कृत्वायथावत्संपूज्यप्रभातेविमलेसति द्वादश्यांकृतकृत्यस्तुश्रीधरेतिजपेद्बुधः १५ पूजयेद्देवदेवेशंशंखचक्रगदा
धरम् विप्रायदद्यात्कलशंहेमदक्षिणयान्वितम् १६ विशेषान्नवनीतंतुतत्रदेयंद्विजातये श्रीधरःप्रियतांमेद्यश्रि
यंपुष्णात्वनुत्तमाम् १७ इत्युच्चार्यमुनिश्रेष्ठसमभ्यर्च्यजगद्गुरुम् संभोज्यविप्रमुख्यांश्चदद्याच्छक्त्याचदक्षिणाम्
१८ भृत्यादीन्भोजयित्वातुयवसंगोषुदापयेत् स्वयंभुंजीतचततःसुहृद्बंधुसमन्वितः १९ सनत्कुमारकथितस्तेशुक्लै
कादशीविधिः एवमेवनभोमासिकृष्णायामपिसाधयेत् २० अनुष्ठानतुल्यमेवदेवनाम्निपरंभिदा जनार्दनःप्रीय
नामेवाक्यमेतदुदीरयेत् २१ शुक्लायांश्रीधरोदेवःकृष्णायांतुजनार्दनः एतत्तेसम्यगाख्यातमुभयैकादशीव्रतम्
२२ नानेनसदृशंपुण्यंनभूतनभविष्यति इदंत्वयागोपनीयंनदेयंदुष्टचेतसे २३ ईश्वरउवाच अथवक्ष्यामिद्वा
दश्यांपवित्रारोपणंहरेः उक्तप्रायोविधिर्देव्याःपवित्रारोपणेतव २४ विशेषोयश्चतंवक्ष्येसावधानमनाःशृणु अत्राधि-
कारीसंदिष्टस्तंशृणुष्वमहामुने २५ ब्राह्मणाःक्षत्रियोवैश्यस्तथास्त्रीशूद्रएवच स्वधर्मावस्थिताःसर्वेभक्त्याकुर्युःप
वित्रकम् २६ अतोदेवेतिमंत्रेणद्विजोविष्णोर्निवेदयेत् स्त्रीशूद्राणानाममंत्रोयेनसंपूजयेद्धरिम् २७ कद्रुद्रायेति
मंत्रेणद्विजःशंभोर्निवेदयेत् स्त्रीशूद्राणानाममंत्रोयेनसंपूजयेद्धरम् २८ कृतेमणिमयंकार्यंत्रेतायांहेमसंभवम् पट्ट
जंद्वापरेसूत्रंकार्पासंतुकलौस्मृतम् २९ यतिभिर्मानसंकार्यंपवित्रारोपणंशुभं कृतान्त्वपवित्राणिवेणवेपट्टलेशुभे
३० संस्थाप्यशुचिवस्त्रेणपिधाय्यपुरतोन्यसेत् क्रियालोपविधानार्थंयत्वयापिहितंप्रभो ३१ २३ २४ २५ २६

२७ २८ युगभेदेन पवित्रस्यापि भेदमाह कृतइति २९ ३० पट्टले पात्रे ३१ छ छ

पिधाय्याच्छाद्य ३२ ३३ प्रार्थनीयमाह कामेति ३४ ३५ ३६ ३७ अतः अनेनपवित्रेणसार्वविभक्तिः

मयैतत्क्रियतेदेवतवतुष्ट्यैपवित्रकम् नमेविघ्नंभवेद्देवकुरुनाथदयांमयि ३२ सर्वथासर्वदादेवममत्वंपरमागतिः
एतत्पवित्रतोहृत्वातोषयामिजगत्पते ३३ कामक्रोधादयोप्येतेनमेस्युर्व्रतघातकाः अद्यप्रभृतिदेवेशयावत्स्याद्वा
र्षिकदिनम् ३४ तावद्रक्षात्वयाकार्यात्वद्भक्तस्यनमोस्तुते देवंसंप्रार्थ्यकलशेपात्रेवेणुमयेशुभे ३५ संस्थितस्यप
वित्रस्यकुर्यात्प्रार्थनमादृतः संवत्सरकृतार्चायापवित्रीकरणायभो ३६ विष्णुलोकात्पवित्राद्यआगच्छेहनमो
स्तुते विष्णुतेजोद्भवंरम्यंसर्वपापप्रणाशनम् ३७ सर्वकामप्रदंदेवतवांगेधारयाम्यहम् आमंत्रितोसिदेवेशपु
राणपुरुषोत्तम ३८ अतस्त्वांपूजयिष्यामिसान्निध्यंकुरुतेनमः निवेदयाम्यहंतुभ्यंप्रातरेतत्पवित्रकम् ३९ ततः
पुष्पांजलिंदत्वारात्रौजागरणंचरेत् एकादश्यामधिवसेद्द्वादश्यामर्चयेद्बुधः ४० गंधदूर्वाक्षतैर्युक्तंसमादायपवि
त्रकम् देवदेवनमस्तुभ्यंगृहाणेदंपवित्रकम् ४१ पवित्रीकरणार्थायवर्षपूजाफलप्रदम् पवित्रंमांकुरुष्वाद्यय
न्मयादुष्कृतंकृतम् ४२ शुद्धोभवाम्यहंदेवत्वत्प्रसादात्सुरेश्वर मूलसंपुटितैरेतैर्मंत्रैर्दद्यात्पवित्रकम् ४३ महा
नैवेद्यकंदत्वानीराज्यप्रार्थयेत्ततः मूलमंत्रेणजुहुयाद्वन्हौसघृतपायसम् ४४ विसर्जयित्वामंत्रेणअनेनैवप
वित्रकम् सांवत्सरींशुभांपूजांसंपाद्यविधिवन्मम ४५ व्रजेदानींपवित्रत्वंविष्णुलोकंविसर्जितम् उत्तार्यब्राह्म
णेदद्यात्तोयेवाथविसर्जयेत् ४६ एतत्तेकथितंवत्सपवित्रारोपणंहरेः इहलोकेसुखंभुक्त्वाअंतेवैकुंठमाप्नुयात्
४७ इतिश्रीस्कं०ई०स०संवादेश्रा०माहात्म्येउभयैकादशीव्रतकथनद्वादश्यांविष्णुपवित्रारोपणंनामैकोनविंशोऽध्यायः १९

कस्तासिः ३८ ३९ उषःप्रभाते ४० ४१ ४२ ४३ ४४ अनेनवक्ष्यमाणेन तमेवाह सांवत्सरीमिति ४६ ४७ इतिश्री

वणमाहात्म्यटीकायांएकोनविंशोऽध्यायः १९ छ त्रयोदशीव्रतमाह त्रयोदशीति अत्रत्रयोदश्यांअनंगमदनः १ पूजा
द्रव्याण्याह रक्ताक्षतैरिति २ ३ ४ ५ ६ ७ सर्वोपमानसौंदर्यः सर्वेषांउपमानं सौंदर्यं तस्यसर्वापेक्षयास्कं
दरइत्यर्थः ८ मीनकेतनइति मीनःकेतनेध्वजायांयस्य ९ रतीति यस्यमदनस्य वक्षसि परिरंभिता आलिंगनकालेलग्ना

ईश्वरउवाच त्रयोदशीदिनेकृत्यंकथयामितवाग्रतः अत्रानंगःपूजनीयःषोडशोरुपचारकैः १ रक्ताक्षतैःपीत
गंधैर्द्रव्यैःसौगंधिकैःशुभैः पुष्टिकांजनकैर्द्रव्यैरेतोवृद्धिकरैःपरैः २ नैवेद्यमर्पयेच्चैवतांबूलंमुखरोचकम्
तांबूलेयोजयेद्द्रव्यंचिक्कणंक्रमुकंशुभम् खदिरंचूर्णकंजातित्वचंजातिफलंतथा लवंगैलानारिकेलबीजस्य
शकलंलघु ४ स्वर्णरूप्याणिपत्राणिकर्पूरंकेसरंतथा जातानिमगधेदेशेनागवल्लीदलानिच ५ श्वेतवर्णा
निपक्वानिजीर्णानिचदृढानिच रसयुक्तानिदेयानिप्रीतयेशंबरद्विषः ६ माक्षीकमलसारेणनिर्मिताभिश्चवर्ति
भिः नीराजयेच्चित्तभवंपुष्पांजलिमथार्पयेत् ७ प्रार्थयेन्नामभिस्तस्यतानितेकथयाम्यहम् सर्वोपमानसौंद
र्यःप्रद्युम्नाख्योहरेःसुतः ८ मीनकेतनकंदर्पकानंगोमन्मथस्तथा मारःकामात्मसंभूतोझषकेतुर्मनोभवः ९
रतिपीनघनोत्तुंगस्तनयोःपत्रवल्लिका यस्यवक्षसिकस्तूर्याःशोभतेपरिरंभिता १० पुष्पधन्वन्शंबरारेकुसुमे
षोरतेःपते मकरध्वजपंचेषोमदनस्मरकंदर १२ देवानांकार्यसिद्ध्यर्थंशिवक्षिप्तहुताशन परोपकारसीमा
नंध्वनयंस्तेनकर्मणा १२ निमित्तमात्रंविजयेवसंतस्यसहायता त्वंमनोरंजनेशक्तस्तिष्ठस्येचदिवानिशि १३

रत्याः पीनयोर्घनयोः उत्तुंगयोः स्तनयोः संबंधिनी कस्तूर्याः पत्रवल्लिका शोभते १० ११ शिवक्षिप्तहुताश
नेति शिवेनाक्षितः हुताशनः अग्निःयस्मिन् सतथा १२ १३ छ छ छ

सः वसंतः १४ १५ १६ मातरिश्वावायुः शरत्सुधांशुस्तन्मित्रं शरत्कालीनः चंद्रउत्तमंमित्रंयस्य १७ १८ १९ ततः
ताभिश्चेष्टाभिः २० चेष्टाएवदर्शयति ब्रह्मेति २१ गौतमस्यवधूं प्रतिदुष्कर्मनिरत इत्यन्वयः २२ द्विजराजश्चंद्रः २३ भवतः त्र

स्वपदभ्रंशनेयस्मात्तपस्विभ्योबिभेतिसः त्वदन्यःशंभुनाकोन्योविरुध्येद्दृढमानसः १४ परब्रह्मानंदसमानंददस्त्व
द्वतेऽन्यकः महामोहस्यसैन्येषुत्वादृशःकोऽस्तिवीर्यवान् १५ अनिरुद्धपिताकृष्णाऽत्मजोयश्चस्करप्रभुः मल
याचलसंभूतचंदनागरुवासितः १६ दक्षिणादिङ्मातरिश्वासहायस्तेजगज्जये शरत्सुधांशुसन्मित्रजगत्स-
र्जनकारण १७ नाथत्वदस्त्रपरममोघमतिदूरगम् मर्मच्छिच्चाप्यकरुणंरहितप्रतिकारतः १८ सुकुमारंस्मृ
तमपिनिःसीमक्षोभकारणम् स्वतुल्यस्यपदार्थस्यदर्शनादपिसाधकम् १९ प्रवृत्तिमुख्यालंकाराःसहायेनज
गज्जये सर्वाश्चेष्टास्ततोदेवाऽपहास्याःकृताविभो २० ब्रह्माकन्यालंपटोभूद्दासक्तोहरिःस्मृतः परदारकलं
केनास्पृष्टव्यःशिवोयतः २१ स्वशक्त्यामेवनिरतोबहुकालंव्यवायवान् दुष्कर्मनिरतश्चंद्रोगौतमस्यवधूंप्रति
२२ द्विजराजोगुरोर्भार्याबलादेवापहारवान् विश्वामित्रस्तपोभ्रष्टःकेनाकारिचभूयसा २३ उक्ताःप्राधान्यतस्त्वे
तेकिंबहूक्तेनमानद विरलाःसंतिलोकेस्मिन्भवतोवशवर्तिनः २४ तस्मात्प्रसीदभगवन्कृतयापूजयानया पू
जितःश्रावणेशुक्लत्रयोदश्यांमनोभवः २५ प्रवृत्तिलंपटस्यातिवीर्यंपुष्टंददात्यलम् निवृत्तिमार्गनिरतोस्वविकारं
हरत्यपि २६ सकामस्यास्त्रियोरम्याःपीनोत्तुंगपयोधराः शरत्पूर्णसुधारश्मिवदनाःकमलेक्षणाः २७

वशवर्तिनइतिच्छेदः २४ २५ तस्योभयविधफलदातृत्वमाह प्रवृत्तिलंपटस्येति अधिकारभेदात्तथाविधंफलंददा-
तीत्यर्थः २६ तदेवस्पष्टयति सकामस्येतिचतुर्भिःस्त्रियोददातीतिचतुर्थेनान्वयः २७ ६२ ६२

२८ २९ ३० ३१ ३२ ३३ त्रिनेत्रस्य शंकरस्य ३४ ऊहः तर्कः भेदइतियावत् ३५ ३६ ३७

लंबातिनीलकुरलस्निग्धकेश्यः सुनासिकाः रंभोरूर्वागुप्तगुल्फागतिनिर्जितकुंजराः २८ कामागारजिताश्वत्थ·
पलाशाग्रातिशोभनाः बृहच्छ्रोण्यः कंबुकंठ्यो बृहज्जघनशोभिताः २९ बिंबोष्ठ्यः सिंहकट्यश्च नानालंकारभूषि
ताः मनोरमाददात्येष संतुष्टः श्रावणोऽर्चया ३० शुक्लपक्षेत्रयोदश्यांददातिचसुतान्बहून् चिरायुषोगुणाढ्यां·
श्चसुस्वरूपान्सुसततीन् ३१ कर्तव्यंयत्त्रयोदश्यामेतत्तेकथितंशुभम् अतःपरंचतुर्दश्यांकर्तव्यंशृणु मानद ३२
अष्टम्यांकथितंदेव्याःपवित्रारोपणंतव तत्रचेन्नकृतंतर्हिचतुर्दश्यांतुकारयेत् ३३ पवित्रंतुत्रिनेत्रस्यचतुर्दश्यांस
मर्पयेत् पवित्रसाधनंसर्वंदेवीविष्णुपवित्रवत् ३४ ऊहःपरंप्रकर्तव्यःप्रार्थनादिषुनामसु शैवागमेमयाप्रोक्तंजा
बालादिषुयत्परम् ३५ विकल्पात्कश्चिदस्तीहविशेषस्तंवदामिते एकादशाथवासूत्रैस्त्रिंशताश्वाष्टयुक्तया ३६
पंचाशतावाकर्तव्यंतुल्यग्रंथ्यंकरालकम् द्वादशांगुलमानानितथाचाष्टांगुलानिवा ३७ लिंगविस्तारमानानिच
तुरंगुलिकानिवा अर्पयेच्छिवतुष्टयैविधिःपूर्वोक्तएवहि ३८ फलादिपूर्वमेवोक्तमंतेकैलासमाप्नुयात् एतत्ते
कथितंवत्सकिमन्यच्छ्रोतुमिच्छसि ३९ इतिश्रीस्कंदपुराणेईश्वरसनत्कुमारसंवादेश्रावणमासमाहात्म्येत्र
योदशीचतुर्दशीकर्तव्यकथनंनामविंशोऽध्यायः २० छ सनत्कुमारउवाच पौर्णमास्याविधिंब्रूहिकृ
पांकृत्वादयानिधे माहात्म्यंशृण्वतांस्वामिन्श्रवणेच्छाप्रवर्तते १ ईश्वरउवाच उत्सर्जनमुपाकर्मअध्याया
नांभवेदिह पौषपूर्णामाघपूर्णाअथवोत्सर्जनेतिथिः २

३७

३८ ३९ इतिश्रावणमाहात्म्यटीकायांविंशोऽध्यायः २० छ १ २ छ छ

ऋक्षं नक्षत्रं प्रशस्तमितिशेषः २ सहप्रयोगः उत्सर्जनोपाकर्मणोः एकदैवप्रयोगः ४ बह्वृचां ऋग्वेदिनां ५ ऋग्वेदिनांश्रव
णर्क्षमेव प्रशस्तमित्येतत्स्पष्टयति चतुर्दश्यामिति ६ ७ ८ नभस्यके भाद्रपदे ९ एतस्यप्रत्यब्दमवश्यकरणीयत्व

पौषस्यप्रतिपद्वापिमाघमासस्यवाभवेत् ऋक्षंवारोहिणीसंज्ञमुत्सर्जनकृतोभवेत् ३ अथवान्येषुकालेषुस्व
स्वशाखानुसारतः सहप्रयोगोयुक्तःस्यादुत्सर्गप्रकृतिद्वये ४ अतोनभःपौर्णमास्यामुत्सर्जनमिहेष्यते उपा
कर्मणिचैवस्याच्छ्रवणार्क्षेतुबह्वृचाम् ५ चतुर्दश्यांपौर्णमास्यांप्रतिपद्दिवसेऽपिवा यत्रवाश्रवणर्क्षंस्याद्ब
ह्वृचानांतुतद्दिने ६ यजुषांपौर्णमास्यांस्यात्सामगानांतुहस्तभे शुक्रगुर्वोरस्तमयेऽउपाकर्मचरेत्सुखम् ७
आरंभःप्रथमोनस्यादितिशास्त्रविदांमतम् ग्रहसंक्रांतिदुष्टेतुकालेकालांतरेभवेत् ८ पंचम्यांहस्तयुक्तायां
पूर्णायांवानभस्यके स्वस्वगृह्यानुसारेणउत्सर्जनमुपाकृतिः ९ मलमासेतुसंप्राप्तेशुद्धमासितुसाभवेत्
नित्यकर्मद्वयंचेदंप्रत्यब्दंनियमाच्चरेत् १० उपाकर्मसमाप्तौतुसंस्थितेषुद्विजातिषु अर्पणीयःसभादीपोयो
षिद्भिस्तत्रसंसदि ११ आचार्यःप्रतिगृह्णातिददेद्वान्यद्विजातये सौवर्णेराजतेवापिपात्रेताम्रमयेपिवा १२
प्रस्थमात्रात्तुगोधूमाद्दीपंतत्पिष्टसंभवम् दीपपात्रंसविधायज्वालयेत्तत्रदीपकम् १३ आज्येनवाथतैलेनवर्ति
त्रयसमन्वितम् सदक्षिणंसतांबूलंब्राह्मणायनिवेदयेत् १४ दीपंसंपूज्यविप्रश्चमंत्रमेतमुदीरयेत् सदक्षिणः
सतांबूलःसभादीपोयमुत्तमः १५ अर्पितोदेवदेवस्यममसंतुमनोरथाः सभादीपप्रदानेनपुत्रपौत्रादिकंकुलं १६
सर्वत्युज्ज्वलतांयातिवर्धतेयशसासह स्वरंगनाभिःसदृशंरूपंजन्मांतरेलभेत् १७

माह नित्यमिति १० संसदि सभायां ११ १२ तद्विधानमाह प्रस्थमात्रादिति १३ १४ १५ १६ स्वरंगनाभिः अप्सरोभिः १७

१८ १९ २० स्वगृह्यं स्वशाखोक्तगृह्यसूत्रं २१ २२ २३ २४ २५ २६ २७

सौभाग्यंचैवलभतेभर्तुःप्रियतराभवेत् एवंकृत्वापंचवर्षंततउद्यापनंचरेत् १८ विप्रायदक्षिणांदद्याद्यथाशक्ति
चभक्तितः सभादीपस्यमाहात्म्यमेतत्तेकथितंशुभम् १९ श्रवणाकर्मसंस्याचतस्यामेवनिशिस्मृता तदुत्तरं·
सर्पबलिस्तत्रैवचविधीयते २० इदंसस्याद्वयंकुर्यात्स्वस्वगृह्यमवेक्ष्यच हयग्रीवस्यावतारस्तस्यामेवतिथौम·
तः २१ हयग्रीवजयंत्यास्तुअतोत्रैवमहोत्सवः उपासनावतांतस्यानित्यस्तुपरिकीर्तितः २२ श्रावण्यांश्रव·
णेपूर्वंजातोहयशिराहरिः जगामसामवेदंतुसर्वकिल्बिषनाशनम् २३ सिंधूनदीवितस्तायांप्रवृत्तस्तत्रसंगमे
श्रवणर्क्षेततस्तत्रस्नानंसर्वार्थसिद्धिदम् २४ तत्रसंपूजयेद्विष्णुंशार्ङ्गचक्रगदाधरम् श्रोतव्यान्यथसामानि
पूज्याविप्राश्चसर्वथा २५ क्रीडितव्यंचभोक्तव्यंतत्रैवस्वजनैःसह जलक्रीडाचकर्तव्यानारीभिर्भर्तृलब्धये २६
स्वस्वदेशेस्वस्वगृहेअपिकुर्यान्महोत्सवम् पूजयेच्चहयग्रीवंजपेन्मंत्रंचतंशृणु २७ प्रणवादिर्नमःशब्दस्ततोभ
गवतेइति धर्मायाथचतुर्थ्यंतंयोज्यचात्मविशोधनम् २८ पुनरंतेनमःशब्दोमंत्रश्चाष्टादशाक्षरः सर्वसिद्धिकर
श्चायंषट्प्रयोगैकसाधकः २९ पुरश्चरणमेतस्यअक्षराणांतुसंख्यया लक्षंवाथसहस्रंवाकलौतुस्याच्चतुर्गुणं
३० एवंकृतेहयग्रीवस्तुष्टःसत्कामदोभवेत् एतस्यामेवपूर्णायांरक्षाबंधनमिष्यते ३१ सर्वरोगोपशमनंसर्वाशु
भविनाशनम् शृणुत्वंमुनिशार्दूलइतिहासंपुरातनम् ३२

मंत्ररचनामाह प्रणवादीति द्वाभ्यां आत्मविशोधनमंतःकरणशोधकम् २८ एतावता ॐनमोभगवतेधर्मायेति सिद्धम् २९
३० ३१ रक्षाबंधनस्यफलमाह सर्वेति ३२ ६९ ५ ६९

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

एतस्यपूर्वोक्तफलदातृत्वे इतिहासंप्रमाणयति इंद्राण्याइति ३३ भूतदिनंचतुर्दशीदिवसः ३४ पौलोमीइंद्राणी ३५ ३६
३७ ३८ ३९ ४० रक्षाबंधनविधिमाह संप्राप्तइति ४१ ४२ ४३ सिद्धार्थैः श्वे-

इंद्राण्यायत्कृतंपूर्वमिंद्रस्यजयसिद्धये देवासुरमभूद्युद्धंपुराद्वादशवार्षिकम् ३३ शक्रंदृष्ट्वातदाश्रांतंदेवी प्राहसुरेश्वरम् अद्यभूतदिनंदेवप्रातःसर्वंभविष्यति ३४ अहंरक्षांविधास्यामितेनाजेयोभविष्यसि इत्युक्त्वापौर्णमास्यांसापौलोमीकृतमंगला ३५ बबंधदक्षिणेपाणौरक्षांमोदप्रदांततः बद्धरक्षस्ततःशक्रःकृतस्वस्त्ययनोद्विजैः ३६ दुद्रावदानवानीकक्षणाज्जिष्णुप्रतापवान् वासवोविजयीभूत्वापुनरेवजगत्त्रये ३७ एषप्रभावोरक्षायाःकथितस्तेमुनीश्वर जयदःसुखदश्चैवपुत्रारोग्यधनप्रदः ३८ सनत्कुमारउवाच क्रियतेकेनविधिनारक्षाबंधःसुरोत्तम कस्यांतिथौकदादेवएतन्मेवक्तुमर्हसि ३९ यथायथाहिभगवान्विचित्राणिप्रभाषते तथातथानमेतृप्तिर्बह्वर्थाःशृण्वतःकथाः ४० ईश्वरउवाच संप्राप्तेश्रावणेमासिपौर्णमास्यांदिनोदये स्नानंकुर्वीतमतिमान्श्रुतिस्मृतिविधानतः ४१ संध्याजपादिसंपाद्यपितॄन्देवानृषींस्तथा तर्पयित्वाततःकुर्यात्स्वर्णपात्रविनिर्मिताम् ४२ हेमसूत्रैश्चसंबद्धांमौक्तिकादिविभूषिताम् कौशेयतंतुभिःकार्यांविचित्रैर्मलवर्जितैः ४३ विचित्रग्रंथिसंयुक्तांपदगुच्छैश्चराजिताम् सिद्धार्थैश्चाक्षतैश्चैवगर्भितांसुमनोहराम् ४४ संस्थाप्यकलशंतत्रपूर्णपात्रेतुतान्न्यसेत् उपविश्यासनेरम्येसुहृद्भिःपरिवारितः ४५ वेश्यानर्तनगानादिकृतकौतुकमंगलः ततःपुरोधसाकार्योरक्षाबंधःसमंत्रकः ४६ येनबद्धोबलीराजादानवेंद्रोमहाबलः तेनत्वामनुबध्नामिरक्षेमाचलमाचल ४७

तसर्षपैः (पांढराशिरसइतिभाषायां) ४४ ४५ ४६ मंत्रमेवाह येनेति ४७ ४८ ४९

४८ ४९ ५० रक्षाबंधनेदुष्टकालमाह भद्रायामिति भद्रायांकल्याण्याम् ५१ इतिश्रावणमाहात्म्यटीकायांए
कविंशोऽध्यायः २१ ६९ संकष्टहरणचतुर्थीव्रतंप्रस्तौति श्रावणइति बहुलेकृष्णे १ २ व्रतविधानमाह चतुर्थ्यामिति

ब्राह्मणैःक्षत्रियैर्वैश्यैःशूद्रैश्चैवान्यमानवैः रक्षाबंधप्रकर्तव्योद्विजान्संपूज्ययत्नतः ४८ अनेनविधिनायस्तुर
क्षाबंधनमाचरेत् ससर्वदोषरहितःसुखीसंवत्सरंभवेत् ४९ यःश्रावणेविमलमासिविधानवित्तोरक्षाविधा
नमिदमाचरतेमनुष्यः आस्तेसुखेनपरमेणसवर्षमेकंपुत्रप्रपौत्रसहितःससुहृज्जनश्च ५० भद्रायांचनकर्त
व्योरक्षाबंधःशुचिव्रतैः बृहद्रक्षातुभद्रायांविपरीतफलप्रदा ५१ इतिश्रीस्कंदपुराणेईश्वरसनत्कुमार
संवादेश्रावणमासमाहात्म्येउपाकर्मोत्सर्जनश्रवणाकर्मसर्पबलिसभादीपहयग्रीवजयंतीरक्षाबंधनविधिक
थनंनामैकविंशोऽध्यायः २१ ६९ ईश्वरउवाच श्रावणेबहुलेपक्षेचतुर्थ्यांमुनिसत्तम व्रतंसंकष्ट
हरणंसर्वकामफलप्रदम् १ सनत्कुमारउवाच क्रियतेकेनविधिनाकिंकार्यंकिंचपूजनम् उद्यापनंकदा
कार्यंतन्मेवदसुविस्तरम् २ ईश्वरउवाच चतुर्थ्यांप्रातरुत्थायदंतधावनपूर्वकम् ग्राह्यंव्रतमिदंपुण्यंसंक
ष्टहरणंशुभम् ३ निराहारोस्मिदेवेशयावच्चंद्रोदयोभवेत् भोक्ष्यामिपूजयित्वात्वांसंकष्टात्तारयस्वमां ४ एवंसं
कल्प्यवैधात्रस्नात्वाकृष्णतिलैःशुभैः विधायचाह्निकंसर्वंपश्चात्पूज्योगणाधिपः ५ त्रिभिर्माषैस्तदर्धेनतृतीयां
शेनवापुनः यथाशक्त्याथवाहैमींप्रतिमांकारयेद्बुधः ६ हेमाभावेतुरूप्यस्यताम्रस्यापियथासुखम् सर्वथातु
दरिद्रेणकर्तव्यामृन्मयीशुभा ७ वित्तशाठ्यंनकर्तव्यंकृतेकार्यंविनश्यति रम्येष्टदलपद्मेतुकुंभंवस्त्रयुतंन्यसे
त् ८

३ ४ ५ ६ ७ ८ ६९ ६९ ६९

९ दापयेद्द्यात् स्वार्थेणिच् १० ११ १२ आपदुद्धरणार्थायेत्यस्यददामीतिपूर्वश्लोकस्थेनान्वयः अबद्धं विधिमुल्लं-

जलपूर्णंतत्रपूर्णपात्रेदेवंप्रपूजयेत् षोडशैरुपचारैस्तुमंत्रैर्वैदिकतांत्रिकैः ९ मोदकान्कारयेद्विप्रातिलयुक्ता
न्दशोत्तमान् देवाग्रेस्थापयेसंचपंचविप्रायदापयेत् १० पूजयित्वातुतंविप्रंभक्तिभावेनदेववत् दक्षिणातुय-
थाशक्त्यादत्त्वाचप्रार्थयेत्ततः ११ विप्रवर्यनमस्तुभ्यंमोदकांस्तेददाम्यहम् सफलान्पंचसंख्याकान्द्व्यदक्षिण
यायुतान् १२ आपदुद्धरणार्थायगृहाणद्विजसत्तम अबद्धमतिरिक्तंवाद्रव्यहीनंमयाकृतम् १३ तत्सर्वंपू-
र्णतांयातुविप्ररूपगणेश्वर ब्राह्मणान्भोजयेच्चैवस्वाद्वन्नेनयथासुखम् १४ चंद्रायार्घ्यंप्रदातव्यंशृणुतन्मंत्र
मादृतः क्षीरसागरसंभूतसुधारूपनिशाकर गृहाणार्घ्यंमयादत्तंगणेशप्रीतिवर्धनम् १५ एवंकृतेविधानेन
प्रसन्नःस्याद्गणाधिपः ददातिवांछितान्कामान्तस्मात्तद्व्रतमाचरेत् १६ विद्यार्थीलभतेविद्यांधनार्थीलभतेध
नम् पुत्रार्थीपुत्रमाप्नोतिरोगीरोगाद्विमुच्यते १७ आपत्सुवर्तमानानांनृणांव्याकुलचेतसाम् चिंतयाग्रस्त-
मनसांवियोगेसुहृदांतथा १८ सर्वसंकष्टहरणंसर्वाभीष्टफलप्रदम् पुत्रपौत्रादिजननंसर्वसंपत्करंनृणाम् १९
पूजनेचजपेचैवमंत्रंतेकथयाम्यहम् तारोत्तरंनमःशब्दंहेरंबंमदमोदितम् २० चतुर्थ्यंतंप्रशस्तंचसंकष्टस्यनिवार
णम् स्वाहांतंचवदेन्मंत्रमेकविंशतिवर्णकम् २१ इंद्रादिलोकपालांश्चसमंतादर्चयेत्सुधीः मोदकानांप्रकारांश्च
अन्यांतेकथयाम्यहम् २२ पक्वमुद्गतिलैर्युक्तामोदकाघृतपाचिताः अर्पणीयागणेशायनारिकेलेनगर्भिताः २३

घ्यकृतम् १३ १४ १५ १६ वांछितान्कामानाप्नोतीतियदुक्तंतद्विस्तरयति विद्यार्थीति १७
षष्ठ्यंतपदानां सर्वसंकष्टहरणमित्युत्तरश्लोकेनान्वयः १८ १९ २० २१ २२ २३

एभिः वक्ष्यमाणैः २४ २५ २६ २७ २८ २९ प्रार्थनामेवाह विघ्नराजेति त्रिभिः ३० मेमया ३१ ३२

ततोदूर्वांकुरांगृण्हन्नेभिर्नामपदैः पृथक् पूजयेद्गणनाथंचतानिनामानिमेशृणु २४ गणाधिपनमस्तेस्तुउमापुत्रा
घनाशन एकदंतेभवक्रेतितथामूषकवाहन २५ विनायकेशपुत्रेतिसर्वसिद्धिप्रदायक विघ्नराजस्कंदगुरोसर्व
संकष्टनाशन २६ लंबोदरगणाध्यक्षगौर्यंगमलसंभव धूम्रकेतोभालचंद्रसिंधुरासुरमर्दन २७ विद्यानिधानविक
टशूर्पकर्णेतिचैवहि पूजयेद्गणपंचैतैरेकविंशतिनामभिः २८ प्रार्थयेच्चततोदेवंभक्तिनम्रःप्रसन्नधीः विघ्नराज
नमस्तेस्तुउमापुत्राघनाशन २९ यदुद्देश्यकृतंमेद्ययथाशक्त्याप्रपूजनम् ३० तेनतुष्टोममत्वाशुहृत्स्थान्का
मान्प्रपूरय ३१ विघ्नान्नाशयमेसर्वान्नाशायोपस्थितान्प्रभो त्वत्प्रसादेनकार्याणिसर्वाणीहकरोम्यहम् ३२
शत्रूणांबुद्धिनाशंचमित्राणामुदयंकुरु ततोहोमंप्रकुर्वीतशतमष्टोत्तरंतथा ३३ मोदकैर्वायनंदद्याद्व्रतसंपूर्णहे
तवे लड्डुकैर्मोदकैर्वापिसप्तभिःफलसंयुतम् ३४ गणेशप्रीणनार्थायब्राह्मणायददाम्यहम् कथांश्रुत्वाततःपु
ष्पाद्यैर्दद्यादर्घ्यंप्रयत्नतः ३५ चंद्रायपंचवारंतुमंत्रेणानेनसत्तम ३६ क्षीरोदार्णवसंभूतअत्रिगोत्रसमुद्भव गृहा
णार्घ्यंमयादत्तंरोहिण्यासहितःशशिन् ३७ ततःक्षमापयेद्देवंशक्त्याविप्रांश्चभोजयेत् स्वयंभुंजीततच्छेषंयद्दे
वब्राह्मणार्पितम् ३८ सप्तमासान्मौनयुक्तोत्वशक्तस्तुयथासुखम् इत्थंकुर्यात्त्रिमासेषुचतुर्ष्वपिविधानतः ३९
उद्यापनंपंचमेचकुर्याद्धीमान्प्रयत्नतः सौवर्णंवक्रतुंडंचशक्त्याकुर्याद्विचक्षणः ४० पूर्वोक्तेनविधानेनपूजयेद्भ
क्तिमान्नरः चंदनेनसुगंधेनपुष्पैर्नानाविधैःशुभैः ४१

३३ ३४ ३५ ३६ ४०
३७ यद्देवेभ्यो ब्राह्मणेभ्यश्चार्पितं तच्छेषं स्वयं भुंजीत इत्यन्वयः ३८ ३९ ४० ४१

दानेपात्रमाह भक्तायेति ४२ ४३ आढकं भाषायांपायलीइतिप्रसिद्धं ४४ ४५ महद्भिरप्येतत्कृतमिति दर्श
यन्नेतस्यश्रैष्ठ्यप्रतिपादयति पुरेति गतेदूरमितिशेषः ४६ ४७ ४८ ४९ ५० उपायकथनात्पूर्वं तादृशं स्वानुभवंक

नारिकेलफलेनैवदद्यादर्घ्यंसमाहितः दद्याद्भक्तायविप्रायवायनंफलसंयुतम् ४२ शूर्पपायससंयुक्तंरक्तवस्त्रेण
वेष्टितम् सौवर्णंगणपंतस्मैदद्याच्चैवसदक्षिणम् ४३ तिलानामाढकंदद्याद्व्रतसंपूर्णहेतवे ततःक्षमापयेद्देवंवि
घ्नेशःप्रीयतामिति ४४ इत्थमुद्यापनंकृत्वाहयमेधफलंलभेत् सर्वकार्याणिसिद्ध्यंति मनोभिलषितान्यपि ४५
पुराकल्पेगतेस्कंदेपार्वत्याव्रतंकृतंकिल चतुर्ष्वपिचमासेषुममवाक्येनसत्तम ४६ पंचमेमासिदृष्टस्तुकार्तिकेयो
ह्यपर्णया समुद्रपानवेलायांत्वगस्त्येनपुराकृतम् ४७ त्रिषुमासेषुविघ्नेशप्रसादात्सिद्धिमापसः षण्मासाव
धिविप्रेंद्र दमयंत्याकृतंत्विदम् ४८ नलमन्वेषयंत्याचततोदृष्टोनलोभवत् नीतेनिरुद्धेबाणस्यनगरंचित्रलेख
या ४९ क्वगतःकेननीतोसावित्यभूद्व्याकुलःस्मरः प्रद्युम्नंपुत्रशोकार्तंप्रीत्यारुक्मिण्यभाषत ५० शृणुपुत्रप्र
वक्ष्यामियद्वृत्तंमामकेगृहे राक्षसेनपुरानीतेबालकेत्वयिखडिते ५१ त्वद्वियोगजदुःखेनहृदयंममदारितम्
कदाद्रक्ष्याम्यहंपुत्रमुखमत्यंतसुंदरम् ५२ अन्यस्त्रीणांसुतान्दृष्ट्वाममचेतोव्यदीर्यत ममपुत्रोभवेन्नामव
यसादेहमानतः ५३ इतिचिंताकुलायामेगतान्यब्दानिभूरिशः ततोमेदैवयोगेनलोमशोमुनिरागतः ५४
तेनोपदिष्टंविधिवत्सर्वचिंताहरंव्रतम् संकटाख्यचतुर्थ्यास्तुचतुर्वारंमयाकृतम् ५५ तत्प्रसादात्त्वमायातोह
त्वाशंबरमाहवे ज्ञात्वाप्रकुरुपुत्रत्वंततोज्ञास्यसिनंदनम् ५६ प्रद्युम्नेनकृतंविघ्नगणनाथस्यतोषणम् श्रुतोबाणासु
रपुरेनिरुद्धोनारदात्ततः ५७

थयति शृण्विति ५१ ५२ ५३ ५४ ५५ आहवेयुद्धे ५६ ५७

कृशानुरेतसाशिवेनसार्द्धंसह ५८ ५९ ६० एतद्व्रतस्यानधिकारिणमाह नोपदेश्यमिति अभक्तायभक्तिरहिताय ६१ अधिकारिणमाह देयमिति ६२ ६३ इतिश्रावणमाहात्म्यटीकायांद्वाविंशोऽध्यायः २२ छ कृष्णजन्माष्टमीव्रतमा

गत्वाबाणासुरपुरंयुद्धंकृत्वासुदारुणम् कृशानुरेतसासार्द्धंजित्वाबाणासुरंरणे ५८ आनीतःस्नुषयासार्द्ध मनिरुद्धस्तदामुने अन्यैर्देवासुरैःपूर्वंकृतंविघ्नेशतुष्टये ५९ अनेनसदृशंलोकेसर्वसिद्धिकरंव्रतम् तपोदानचतीर्थंचविद्यतेनात्रकुत्रचित् ६० बहुनात्रकिमुक्तेननास्त्यन्यत्कार्यसिद्धये नोपदेश्यंत्वभक्तायनास्तिकायशठायच ६१ देयंपुत्रायशिष्यायश्रद्धायुक्तायसाधवे ६२ ममप्रियोसिविप्रर्षेधर्मिष्ठोविधिनंदन कार्यकर्तासिलोकानामुपदिष्टमतस्तव ६३ इतिश्रीस्कंदपुराणेईश्वरसनत्कुमारसंवादेश्रावणमासमाहात्म्येचतुर्थीव्रतकथनंनामद्वाविंशोऽध्यायः २२ छ ईश्वरउवाच कृष्णाष्टम्यांनभोमासिवृषेचंद्रेनिशीथके देवक्यजीजनत्कृष्णंयोगेस्मिन्वसुदेवतः १ सिंहराशिगतेसूर्येकर्तव्यःसुमहोत्सवः सप्तम्यांलघुभुक्कुर्याद्दंतधावनपूर्वकम् २ उपवासस्यनियमंस्वपेद्दांतोजितेंद्रियः केवलेनोपवासेनकृष्णजन्मदिनंनयेत् ३ सप्तजन्मकृतात्पापान्मुच्यतेनात्रसंशयः उपावृत्तस्तुपापेभ्योयस्तुवासोगुणैःसह ४ उपवासःसविज्ञेयःसर्वभोगविवर्जितः ततोष्टम्यांतिलैःस्नात्वानद्यादौविमलेजले ५ सुदेशेशोभनंकुर्याद्देवक्याःसूतिकागृहम् नानावर्णैःसुवासोभिःशोभितंकलशैःफलैः ६ पुष्पैर्दीपावलीभिश्चचंदनागरुधूपितम् हरिवंशस्यचरितंगोकुलंतत्रलेखयेत् ७ युक्तंवादित्रनिनदैर्नृत्यगीतादिमंगलैः षष्ठ्यादेव्याधिष्ठितांचतन्मध्येप्रतिमांहरेः ८

ह कृष्णाष्टम्यामिति अजी

वार्क्षीं वृक्षोद्भवां ९ १० ११ प्रसूतकन्यकां यशोदांइति पूर्वेणसंबध्यते कृष्णापार्श्वेदेवान् संलिखेदित्यन्वयः १२
१३ १४ १५ १६ १७ १८ गायद्भिरिति सततपरिणुता सततं परिणुतास्तुता वेणूनांवीणानांच निनादैः स्वरैः साधनैः

कांचनींराजतींताम्रींपैत्तलींमृन्मयींतुवा वार्क्षींमणिमयींवापिवर्णकैर्लिखितांयथा ९ सर्वलक्षणसंपन्नांपर्यंकेचाष्टशल्यके प्रसूतांदेवकींतत्रस्थापयेन्मंचकोपरि १० स्नुतबालंतत्रहरिंपर्यंकेस्तनपायिनम् यशोदांतत्रचैकस्मिन्प्रदेशेसूतिकागृहे ११ प्रसूतकन्यकांचैवकृष्णापार्श्वेतुसंलिखेत् कृतांजलिपुटान्देवान्यक्षविद्याधरामरान् १२ वसुदेवंतत्रैवखड्गचर्मधरंस्थितम् कश्यपोवसुदेवोयमदितिश्चैवदेवकी १३ शेषोबलोयशोदापिच्चादित्यंशाद्भूद्वह नंदःप्रजापतिर्दक्षोगर्गश्चापिचतुर्मुखः १४ गोप्यश्चाप्सरसःसर्वागोपाश्चापिदिवौकसः कालनेमिश्चकंसोयंनियुक्तास्तेनचासुराः १५ गोधेनुकुंजराश्वाश्चदानवाःशस्त्रपाणयः लेखनीयाश्चतत्रैवकालियोयमुनाह्रदे १६ इत्येवमादियत्किंचिच्चरितंहरिणाकृतम् लेखयित्वाप्रयत्नेनपूजयेद्भक्तितत्परः १७ उपचारैःषोडशभिर्देवकींचेतिमंत्रतः १८ गायद्भिःकिन्नराद्यैःसततपरिणुतावेणुवीणानुनादैर्भृंगार्यादर्शदूर्वादधिकलशकरैःकिन्नरैः सेव्यमाना पर्यंकेस्वासनस्थामुदिततरमुखीपुत्रिणीसम्यगास्ते सादेवीदिव्यमाताविजयतुसुसुतादेवकीकोत्सुका १९ प्रणवादिनमोंतैश्चपृथङ्नामानुकीर्तनैः कुर्यात्पूजांविधिज्ञस्तुसर्वपापापनुत्तये २० देवक्यावसुदेवस्यवासुदेवस्यचैवहि बलदेवस्यनंदस्ययशोदायाःपृथक्पृथक् २१ चंद्रोदयेशशांकायअर्घ्यंदद्याद्धरिंस्मरन् क्षीरोदार्णवसंभूतअत्रिगोत्रसमुद्भव २२

भृंगारीति भृंगार्यः पात्रविशेषाः आदर्शाः दर्पणा दूर्वा दध्नः कलशाश्च करेषुयेषांतथाभूतैः किन्नरैः दिव्यमा
ता दिव्यं आनंदस्वरूपं यद्ब्रह्म कृष्णाख्यं तस्यजननीत्वं प्राप्ता १९ २० २१ २२

२३ सुधाअमृतं रश्मिषु किरणेषु यस्यतं २४ देहीपुरुषः २५ २६ २७ न मइति गोब्राह्मणहिताय गोभ्यः ब्राह्मणेभ्यश्चहितः हितकारीतस्मै २८ २९ ३० इह एतस्मिन्लोके धर्ममतिः धर्मेमतिः कर्तुमादरोयस्य ३१ ३२ ३३

नमस्तेरोहिणीकांतअर्घ्यंनःप्रतिगृह्यताम् २३ देवक्यावसुदेवंचनंदंचैवयशोदया रोहिण्याचसुधारश्मिंबलिंचहरिणासह संपूज्यविधिवद्देहीकिंनाप्नोतिसुदुर्लभम् एकादशीकोटिसंख्यातुल्याकृष्णाष्टमीतथा २५ एवंसपूज्यतद्रात्रौप्रभातेनवमीदिने यथाहरेस्तथाकार्योभगवत्यामहोत्सवः २६ ब्राह्मणान्भोजयेद्भक्त्यादद्याद्धैंगोधनादिकम् यद्यदिष्टतमंतत्रकृष्णोमेप्रीयतामिति २७ नमस्तेवासुदेवायगोब्राह्मणहितायच शांतिरस्तुशिवंचास्तु इत्युक्त्वातंविसर्जयेत् २८ ततोबंधुजनैःसार्द्धंस्वयंभुंजीतवाग्यतः एवंयःकुरुतेदेव्याःकृष्णस्यचमहोत्सवम् २९ प्रतिवर्षंविधानेनयथोक्तंलभतेफलम् पुत्रसंतानमारोग्यंसौभाग्यमतुलंलभेत् ३० इहधर्ममतिर्भूत्वाअंतेचवैकुंठमाप्नुयात् उद्यापनमथोवक्ष्येपुण्येऽह्निविधिपूर्वकम् ३१ पूर्वेद्युरेकभुक्ताशीस्वपेद्विष्णुंस्मरन्हृदि प्रातःसंध्यादिसंपाद्यब्राह्मणैःस्वस्तिवाचयेत् ३२ आचार्यंवरयित्वातुऋत्विजश्चैवपूजयेत् पलेनवातदर्धेनतदर्धार्धेनवापुनः ३३ प्रतिमांकारयेत्सश्च्याद्वित्तशाठ्यविवर्जितः मंडपेमंडलेदेवान्ब्रह्माद्यान्स्थापयेद्बुधः ३४ तत्रसंस्थापयेत्कुंभंताम्रंमृन्मयमेववा तस्योपरिन्यसेत्पात्रंराजतंवैणवंतुवा ३५ वाससाच्छाद्यगोविंदंतत्रसंपूजयेद्बुधः उपचारैःषोडशभिर्मंत्रैर्वैदिकतांत्रिकैः ३६ ततोऽर्घंहरयेदद्याद्देवकीसहितायच शंखेकृत्वाजलंशुद्धंसपुष्पफलचंदनं ३७ जानुभ्यामवनिंगत्वानारिकेलफलान्वितम् जातःकंसवधार्थायभूभारोत्तारणायच कौरवाणांविनाशायदैत्यानांनिधनायच ३८

३४ ३५ ३६ पूजांतेकर्तव्यविशेषमाह ततइति ३७ अर्घ्यदानेमंत्रमाह जातइति ३८

३९ प्रार्थनामाह नमइति ४० ४१ ४२ ४३ ४४ गांविशिनष्टि पयस्विनीमिति सगुणांगुणोनियमनरज्जुः दा-
मेतियावत् तेनसहितां कांस्यदोहनिकां कांस्यकृतादोहनिका दोहनपात्रंयस्यास्ताम् ४५ मुक्ताःपुच्छेयस्यास्तां ४६ यथार्ह

गृहाणार्घ्यंमयादत्तंदेवक्यासहितोहरे चंद्रायार्घ्यंततोदद्यात्पूर्वोक्तविधिनासुधीः ३९ नमस्तुभ्यंजगन्नाथदे
वकीतनयप्रभो वसुदेवात्मजानंतत्राहिमांभवसागरात् ४० इत्थंसंप्रार्थ्यदेवेशंरात्रौजागरणंचरेत् प्रत्यूषेविम-
लेस्नात्वापूजयित्वाजनार्दनम् ४१ पायसेनतिलाज्यैश्चमूलमंत्रेणभक्तितः अष्टोत्तरशतंहुत्वाततःपुरुषसूक्ततः
४२ मंत्रेणेदंविष्णुरितिजुहुयाद्घृताहुतीः होमशेषसमाप्याथपूर्णाहुतिपुरःसरम् ४३ आचार्यंपूजयेत्पश्चा-
द्भूषणाच्छादनादिभिः गामेकांकपिलांदद्याद्व्रतसंपूर्णहेतवे ४४ पयस्विनींसुशीलांचसवत्सांसगुणांतथा
स्वर्णशृंगींरौप्यखुरांकांस्यदोहनिकायुतां ४५ मुक्तापुच्छांताम्रपृष्ठींस्वर्णघंटासमन्विताम् वस्त्रच्छन्नदक्षिणा
ढ्यामेवंसंपूर्णतामियात् ४६ कपिलायाश्चभावेपिगौरन्यापिप्रदीयते ततःप्रदद्यादृत्विग्भ्योदक्षिणांचयथार्हतः
४७ ब्राह्मणान्भोजयेत्पश्चादष्टौतेभ्यश्चदक्षिणाम् कलशान्जलसंपूर्णान्दद्याच्चैवसमाहितः ४८ प्राप्यानुज्ञां
तथातेभ्योभुंजीतसहबंधुभिः एवंकृतेब्रह्मपुत्रव्रतोद्यापनकर्मणि ४९ निःपापस्तत्क्षणादेवजायतेविबुधोत्त
मः पुत्रपौत्रसमायुक्तोधनधान्यसमन्वितः ५० भुक्त्वाभोगांश्चिरंकालमंतेवैकुंठमाप्नुयात् ५० इतिश्रीस्कं
दपुराणेईश्वरसनत्कुमारसंवादेश्रावणमासमाहात्म्येकृष्णजन्माष्टमीव्रतकथनंनामत्रयोविंशोऽध्यायः २३ छ
ईश्वरउवाच पुराकल्पेब्रह्मपुत्रदैत्यभारप्रपीडिता ब्रह्माणंशरणंप्रापपृथ्वीदीनातिविह्वला १

तः योग्यतानुसारेण ४७
४८ ४९ ५० इतिश्रावणमाहात्म्यटीकायांत्रयोविंशोऽध्यायः २३ कृष्णजन्मकथामाह पुरेति शरणागमनेकारणमाह दैत्येति १

२ माभैष्टेति विष्णोरुक्तिः ३ ४ गोकुलेस्थापनेकारणमाह कंसभीतेनेति ५ ६ प्राणघ्नान् प्राणंहंतिमुधाकरोतीतिप्रा

वृत्तांतंतन्मुखाच्छ्रुत्वाब्रह्मादेवगणैःसह क्षीरार्णवेहरिंगत्वातुष्टावस्तुतिभिर्बहु २ प्रादुरासीत्ततोदिक्षुश्श्रुत्वासर्वं
विधेर्मुखात् मा भैष्टदेवादेवक्याजठरेवसुदेवतः ३ अवतीर्णोभविष्यामिहारिष्येभूमिवेदनाम् भवंतुयादवादेवा
इत्युक्त्वांऽतर्दधेविभुः ४ देवक्याजठरेजातोवसुदेवेनगोकुले स्थापितःकंसभीतेनववृधेतत्रकंसहा ५ आग·
त्यमथुरांपश्चात्कंसंसगणमाहनत् ततःसर्वेपौरजनाःप्रार्थयामासुरादरात् ६ कृष्णकृष्णमहायोगिन्भक्ता·
नामभयप्रद प्राणघ्नात्पाहिनोदेवशरणागतवत्सल ७ किंचिद्विज्ञापयेद्देवएतन्नोवक्तुमर्हसि तवजन्मदिनेकृत्यं
नज्ञातंकेनचित्क्वचित् ८ ज्ञात्वाचतद्दिनेसर्वेकुर्मोवर्धापनोत्सवम् तेषांदृष्ट्वाचतांभक्तिंस्वस्मिन्श्रद्धांचसौहृदम्
९ कृत्यंजन्मदिनेतेभ्यःकथयामासकेशवः श्रुत्वातेपितथाचक्रुर्विधिनातेनतद्व्रतम् १० वरांश्चबहुधाप्रादाद्भग
वान्व्रतकारिणे अत्रैवोदाहरंतीममितिहासंपुरातनम् ११ अंगदेशोद्भवोराजामितजिन्नामनामतः तस्यपुत्रो
महासेनःसत्यजित्सत्पथेस्थितः १२ पालयामाससर्वज्ञोविधिवद्रंजयन्प्रजाः तस्यैवंवर्तमानस्यकदाचिद्दैवयोग
तः १३ पाखंडैःसहसंवासोबभूवबहुवासरम् तत्संसर्गात्सनृपतिरधर्मेनिरतोभवत् १४ वेदशास्त्रपुराणानिनि
निंदबहुशोनृपः वर्णाश्रमगतंधर्मंविद्वेषपरमंगतः १५ एवंबहुतिथेकालेप्रयातेमुनिसत्तम कालेननिधनंप्राप्तो
यमदूतवशंगतः १६ बध्वापाशैर्नीयमानोयमदूतैर्यमांतिकम् पीडितस्ताड्यमानोसौदुष्टसंगतियोगतः १७

णघ्नः संसारस्तस्मात् ७ ८ वर्धापनोत्सवं जन्मोत्साहं (वाढदिवसइतिभाषायां) ९ १० ११ १२ १३
पाखंडसंगतेःपरिणाममाह तत्संसर्गादिति १४ १५ १६ १७ छ छ

१८ मरुधन्वस्तुतन्नामकेषुदेशेषु १९ २० तद्दर्शनश्रवणयोःफलमाह निष्पापइति २१ २२ शुद्धःस्तुस्वरूपःतेजस्वी

नरकेपातितःप्रापयातनांबहुवत्सरम् भुक्त्वापापस्यशेषेणपैशाचींयोनिमास्थितः १८ क्षुधातृष्णासमाक्रांतोभ्र
मन्समरुधन्वस्तु कस्यचित्त्वथवैश्यस्यदेहमाविश्यसंस्थितः १९ सहतेनैवसंयातोमथुरांपुण्यदांपुरीम् समीपे
रक्षकैस्तस्यतस्माद्देहाद्बहिष्कृतः २० बभ्रामविपिनेसोथऋषीणामाश्रमेषुच कदाचिद्दैवयोगेनहरेर्जन्माष्टमी
दिने २१ क्रियमाणांमहापूजांव्रतिभिर्मुनिभिर्द्विजैः रात्रौजागरणंचैवनामसंकीर्तनादिभिः २२ ददर्शसर्वंविधि
वच्छुश्रावचहरेःकथाम् निष्पापस्तत्क्षणादेवशुद्धोनिर्मलमानसः २३ प्रेतदेहंसमुत्सृज्यविष्णुलोकेविमानगः
यमदूतैःपरित्यक्तोदिव्यभोगसमन्वितः २४ विष्णुसान्निध्यमापन्नोव्रतस्यास्यप्रभावतः नित्यमेतद्व्रतंचैवपुराणे
सार्वलौकिकम् २५ कथ्यतेविधिवत्सम्यङ्मुनिभिस्तत्त्वदर्शिभिः सर्वकामिकमेवैतत्कृत्वाकामानवाप्नुयात् २६
एवंयःकुरुतेकृष्णजन्माष्टम्यांव्रतंशुभम् भुक्त्वेहविविधान्भोगान्शुभान्कामानवाप्नुयात् २७ तत्रदेवविमानेन
वर्षलक्षंविधेःकृत भोगान्नानाविधान्भुक्त्वापुण्यशेषादिहागतः २८ सर्वकामसमृद्धस्तुसर्वाशुभविवर्जितः
कुलेनृपतिवर्याणांजायतेमदनोपमः २९ यस्मिन्सदैवविषयेलिखितंस्यात्समर्पितम् कृष्णजन्मोपकरणंसर्वशोभा
समन्वितम् ३० पूज्यतेविम्बसद्व्यग्रयतैरुत्सवसंयुतैः परचक्रभयंतत्रनकदाचिद्भविष्यति ३१ पर्जन्यःकामवर्षी
स्यादीतिभ्योनभयंक्वचित् गृहेवापूजयेद्यस्तुप्रतिमांदेवकीभुवः ३२ तत्रसर्वंसमृद्धंस्यान्नोपसर्गादिकंभवेत् संसर्गे
णापियोभक्त्याव्रतंपश्येदनाकुलः सोपिपापविनिर्मुक्तःप्रयातिहरिमंदिरम् ३३ त्यर्थः २३ २४ २५ सार्वकामिकमि
ति सर्वकामेषुसाधुसर्वकामपूरकमितिभावः २६ २७ २८ २९ ३० ३१ ईतिभ्यः अतिवृष्टिरनावृष्टिः शलभा मूषकाः खगाः
३२ उपसर्गान् महार्णवादे ३३

इतिश्रावणमाहात्म्यटीकायांचतुर्विंशोऽध्यायः २४ ७ अथश्रावणवद्यामावास्यायांपिठोराव्रतमाह अथेति १ पिठोराशब्दार्थमाह सर्वेति पीठमासनं २ ३ ताम्रेणरक्तवर्णेन ४ ५ लेखनीयमाह मध्यइति ६ चतुःशालं (चौसोपाइतिभाषायां)

इतिश्रीस्कंदपुराणेईश्वरसनत्कुमारसंवादेजन्माष्टमीव्रतकथनंनामचतुर्विंशोऽध्यायः २४ छ ईश्वरउवाच अथवक्ष्येमुनिश्रेष्ठपिठोरव्रतमुत्तमम् अमायांश्रावणेमासिसर्वसंपत्प्रदायकम् १ सर्वाधिष्ठानमेतद्गृहंपीठंततोमतम् आरस्तत्रसमूहस्याहस्तमात्रस्यपूजने २ पिठोरमितिसंज्ञास्यव्रतस्यातोमुनीश्वर तत्प्रकारंचवक्ष्येहंसावधानमनाःशृणु ३ कुड्येविलिप्यताम्रेणकृष्णेनाऽथसितेनवा धातुनातत्रताम्रे तुपीतेनविलिखेत्सुधीः ४ शुक्लेनवाथकृष्णेनपूर्ववच्चैवसंलिखेत् सितपीतेनरक्तेनकृष्णेनहरितेनवा ५ मध्येशिवंशिवायुक्तं लिंगंवामूर्तिमेववा विस्तीर्णंकुड्यमालिख्यसर्वसंसारमालिखेत् ६ चतुःशालासमायुक्तंपाकागारंसुरालयं शय्यागृहंकोशसमतथांतस्त्रीनिकेतनम् ७ प्रासादाट्टालिकाशोभंशालवृक्षसमुद्भवम् इष्टकाभिश्चपाषाणैश्चूर्णनद्धैःसुशोभनम् ८ द्वाराणिचविचित्राणिवलभीचेष्टिकास्तथा अजागावोमाहिष्यश्चअश्वाउष्ट्रामतंगजाः ९ गंत्रीरथप्रभृतयःशकटानांप्रभेदकाः स्त्रियोबालाश्चवृद्धाश्चतरुण्यःपुरुषास्तथा १० पालक्यांदोलिकाचैवमंचका बहुरूपकाः ११ हैमानिरौप्याणिचताम्रकाणिसैसानिलोहानिचमृन्मयानि रंगप्रसूतानिचपैत्तलानिपात्राणिनानाविधकारकाणि १२ यावंतःकशिपूभेदाउपबर्हणजातयः मार्जाराःसारिकाश्चैवशरभाश्चान्येपिपक्षिणः १३ पुरुषाणामलंकाराःस्त्रीणांचैवाप्यनेकशः यानिचास्तरणानीह तथाप्रावरणानिच १४

सुरालयंदेवगृहं ७ ८ वलभीगोपानसी गोपानसीतुवलभीइत्यमरः सज्जाइतिभाषायां ९ गंत्री (गाडीइतिभाषायां) १० ११ १२ कशिपूभेदाः शय्याभेदाः उपबर्हणंउच्छीर्षकं १३ १४

मस्क (दध्नोपरिपदार्थः) १५ गोधूमेति धान्यानि लेखनीयानि १६ दृषदं (पाटा) इतिप्रसिद्धं उपलं (वरवंटा) इतिप्रसिद्धं १७
१८ उपानत् चर्मपादूः पादुका काष्ठाद्युद्भवा १९ शतघ्न्यः शतंयोधान् घ्नंति सङ्कुन्तताः शतघ्न्यः (तोफा) इतिभाषायां १९

यज्ञपात्राणियावंतिस्तंभदंडौचमंथने रज्जुत्रयंचतद्धेतुर्दुग्धंचनवनीतकम् दधितक्रंतथाम स्तुमाज्यंतैलंतिलास्त
था १५ गोधूमशालितुवरीयवयावनालवार्तानलंचचणकामसूराःकुलित्थाः मुद्गप्रियंगुतिलकोद्रवकातसीति-
श्यामाकमाषचवलाइतिधान्यवर्गः १६ दृषदंचोपदंचुल्हिंतथासंमार्ज्जनीमपि पुरुषाणांचवस्त्राणिनारीणांचैवस
र्वशः १७ वेणुजन्यंचशूर्पादितथातृणभवानिच उलूखलंचमुसलंयंत्रंदलयुगान्वितम् १८ व्यंजनंचामरंछत्रमुपा
नत्पादुकाद्वयम् दास्योदासाभृत्यपोष्याःपशुभक्ष्यंतृणादिकम् १९ धनुर्बाणशतघ्न्यश्चखड्गाःकुंताश्चशक्तयः
चर्मपाशांकुशगदात्रिशूलंभिंदिपालकाः २० तोमरोमुद्गरश्चैवपरशुःपट्टिशस्तथा भृशुंडीपरिघश्चैवचक्रयंत्रादि
कंचयत् २१ जलयंत्रंमषीपात्रंलेखनीपुस्तकादिकम् फलजातंसर्वमपिछुरिकाकर्तरीतथा २२ नानाविधानि
पुष्पाणिबिल्वश्चतुलसीतथा दीपिकाश्चैवदीपाश्चतथातत्साधनानिच २३ शाकंनानाविधंभक्ष्यंपक्वान्नानांचया
भिदाः लेख्यंतच्चैवसकलमनुक्तमपिचैवहि २४ कियल्लेख्यंजनेनात्रवक्तव्यंवामयाकियत् एकैकस्यपदार्थस्य
भेदाःशतसहस्रशः २५ उपचारैःषोडशभिःसर्वेषांपूजनंभवेत् नानाविधश्चगंधःस्यात्पुष्पंधूपोपिचंदनम् २६ ब्रा
ह्मणान्भोजयेद्बालान्सुवासिन्यश्चपुष्कलाः प्रार्थयेच्चशिवंसांबंव्रतंसंपूर्णमस्त्विति २७ शिवसांबदयासिंधो
गिरीशशशिशेखर व्रतेनानेनसंतुष्टःप्रयच्छास्मान्मनोरथान् २८

२० २१ २२ २३ सर्वेषांवस्तूनांव
स्तुमशक्यत्वात्तत्समुच्चयार्थमाह लेख्यमिति २४ वक्तुमशक्यत्वेकारणमाह एकैकस्येति २५ २६ २७ २८

२९ ३० ३१ ३२ ३३ ३४ इतिश्रावणमासमाहात्म्यटीकायां पंचविंशोऽध्यायः २५ छ प्रसंगा
त्प्राप्तंपोलाव्रतमाह यत्कर्तव्यमिति १ सहार्थे तृतीया युद्धेकारणं कथयन् तान्विशिनष्टि जगद्विध्वंसकैरिति जगद्विध्वंसंति

एवंकृत्वापंचवर्षंततउद्यापनंचरेत् आज्येनबिल्वपत्रैश्चहोमःस्याच्छिवमंत्रतः २९ ग्रहहोमःपुराकार्यःपूर्वेद्युरधि
वासनम् अष्टोत्तरसहस्रंवाशतमष्टोत्तरंतुवा ३० होमसंख्याभवेद्वत्सआचार्यंपूजयेत्ततः भूयसींदक्षिणांद-
द्यात्स्वयंभोजनमाचरेत् ३१ इष्टबंधुजनैःसार्धंकुटुंबसहितोबुधः एवंकृतेविधानेनसर्वान्कामानवाप्नुयात् य
द्यदिष्टतमंलोकेतत्सर्वंलभतेनरः ३२ एतत्तेकथितंवत्सपिठोरव्रतमुत्तमम् व्रतेनानेनसदृशंसर्वकामसमृद्धिदम्
३३ शिवप्रीतिकरंचैवनभूतंनभविष्यति भित्तोयद्यद्धिरवद्वत्सतत्तदाप्नोतिनिश्चितम् ३४ इतिश्रीस्कंदपुरा
णेईश्वरसनत्कुमारसंवादेश्रावणमासमाहात्म्येअमावास्यायांपिठोराव्रतकथनंनामपंचविंशोऽध्यायः २५ छ
ईश्वरउवाच यत्कर्तव्यंनभोमासिअमावास्यादिनेभवेत् प्रसंगतश्चयच्चान्यत्स्मृतंतदपितेब्रुवे १ पुरानानावि
धैर्दैत्यैर्महाबलपराक्रमैः जगद्विध्वंसकैर्दुष्टैर्देवनोच्छेदकारिभिः २ संग्रामाबहवोजाताआरुह्यवृषभंशुभम् म
हासत्वोमहावीर्योनकदाचिज्जहौचमां ३ अंधकासुरयुद्धेतुतेनछिन्नतनुःकृतः भिन्नत्वग्रुधिरस्रावीप्राणमात्रावशे
षितः ४ तथापिधैर्यमालंब्ययावद्धन्मिचतंखलम् उवाहतावन्मांनंदीतस्यतज्ज्ञातवानहम् ५ हत्वातमंधकंदैत्यं
तुष्टोहंनंदिनंतदा कर्मणातेप्रसन्नोस्मिवरंवरयसुव्रत ६ व्रणास्तेप्रशमंयांतुनिरोगोबलवान्भव पूर्वस्मादपितेवी
र्यंरूपंचापिविवर्धताम् ७

तेजगद्विध्वंसकास्तथाभूतैः विशेषतः देवनोच्छेदकारिभिःउच्छेदःपीडा २ संग्रामाइति ममेतिशेषः
सत्वोधैर्यं वीर्यंशरीरबलम् ३ ४ तत्कर्म अहंज्ञातवानित्यन्वयः ५ तमब्रवमितिशेषः उक्तिमेवाह कर्मणेति ६ ७

८ याचनीयवस्त्वभावे कारणमाह देवदेवइत्यादि त्वंदेवानामपिज्ञानदानायदिमयितुष्टस्तदामयासर्वप्राप्तमेवेतिभावः ९ १०

यंयंवरंयाचसेत्वंतंतंदास्याम्यसंशयम् ८ नंदिकेश्वरउवाच ममास्तियाचनीयंनोदेवदेवोमहेश्वरः ममोपरिप्रसन्नोस्तिकिंवैभवमतःपरम् ९ तथापिभगवन्याचेलोकोपकृतयेशिव अद्यामाश्वावणस्यास्तियस्यांतुष्टोभवान्मम १० एतस्यांवृषभाःपूज्यागोभिर्युक्ताःसुमृन्मयाः अद्येवामादिनेजन्मकामधेनूपमंभवेत् ११ अतोप्यस्यावरंदेहिभवत्वेषेप्सितप्रदा प्रत्यक्षावृषभागावःपूजनीयाश्चभक्तितः १२ धातुभिर्गैरिकाद्यैश्चभूषणीयाःप्रयत्नतः शृंगेषुस्वर्णरौप्यादिपट्टीकाबंधशोभनम् १३ कौशेयगुच्छान्महतःशृंगयोरपिबंधयेत् पृष्ठंनानाविधैर्वर्णैश्चित्रितेनसुवाससा १४ आच्छादयेद्गलेघंटांबध्नीयाद्रम्यशब्दिताम् दिनाष्टांशेबहिर्नीत्वासायंग्रामंप्रवेशयेत् १५ पिण्यातकंचनैवेद्येअन्नंनानाविधंचयत् अर्पयेत्तस्यभवतुगोधनंवृद्धिगंसदा १६ गावोयत्रगृहेनस्युःश्मशानसदृशंचतत् पंचामृतंपंचगव्यंनभवेद्गोरसंविना १७ संमार्जनंपूततमंगोमयेनविनानहि पिपीलिकादिजंतूनामुपसर्गाश्चतत्रहि १८ प्रोक्षणंयत्रगोमूत्रान्नाभवंतिस्फुरोत्तम भोजनस्यमहादेवकोरसोगोरसंविना १९ एतेन्येपिवरादेयाःप्रसन्नोसियदिप्रभो इतिनंदिवचःश्रुत्वातुष्टोहमधिकंतदा २० सर्वमस्तुवृषश्रेष्ठयथातेयाचितंतथा अन्यच्चशृणुभोनंदिन्नामास्यतुदिनस्ययत् २१ नवाह्यतेयोवृषभःकेनचित्कर्मणिक्वचित् तृणमश्नन्पिबन्नीरंतूष्णींयोवर्धतेवृषः २२ महान्वीरश्चबलवान्पोलइत्युच्यतेहिसः तन्नाम्नेदंदिनंनंदिन्पोलाइतिभविष्यति २३

कामधेनूपमंसकलेप्सितपूरकम् एतद्व्रतकर्तुरित्यर्थः ११ १२ १३ १४ १५ पिण्यानकंखाद्यविशेषः १६ प्रसंगाद्गाःस्तौति गावइतित्रिभिः १७ १८ १९ २० २१ नवाह्यते धूर्वहन्कर्मणि नोपयुज्यते तृणमश्नन् इत्यादीनांविशेषणानांस्वच्छाचारित्वेतात्पर्यं २२ २३

२४ अस्याममायामन्यत्करणीयमाह अथेति कुशग्रहं दर्भसंग्रहम २५ अयातयामाः येषांनिष्कासनस्यछेदनस्यवा एकः प्रहरोपिनजातः तत्सदृशानूतनाः सर्वकर्मणिप्रशस्ताइत्यर्थः २६ दर्भाणांजातीराह कुशाइति २७ २८ २९ तद्विनियोगमाह·

तत्रोत्सवोमहान्कार्यइष्टबंधुजनैःसह इतिदत्तामयावत्सवराश्रेष्ठाहितद्दिने तेनश्रेष्ठंदिनंचैतत्पोलासंज्ञंमतंजनैः
२४ अत्रोत्सवोमहान्कार्योवृषाणांसर्वकामदः अतःपरंप्रवक्ष्यामिअस्यामेवकुशग्रहम् २५ नभोमासस्यदर्शे
तुशुचिर्दर्भान्समाहरेत् अयातयामास्तेदर्भाविनियोज्याःपुनःपुनः २६ कुशाःकाशायवादूर्वाउशीराश्चसकुंदकाः
गोधूमाव्रीहयोमौंज्यादशदर्भाःसबल्वजाः २७ विरिंचिनासहोत्पन्नपरमेष्ठीनिसर्गज नुदपापानिसर्वाणिदर्भ
स्वस्तिकरोभव २८ एवंसन्मंत्रमुच्चार्यततःपूर्वोत्तरामुखः हुंफट्कारेणमंत्रेणसकृच्छित्वासमुद्धरेत् २९ अच्छिन्ना
ग्राश्चशष्पाग्राःपैत्र्येतुहरिताःस्मृताः अमूलादेवकार्येषुप्रयोज्याश्चजपादिषु ३० सप्तपत्राःकुशाःशस्तादैवे
पित्र्येचकर्मणि अनंतगर्भिणोसाग्रौप्रादेशौचपवित्रके ३१ चतुर्भिर्दर्भपिंजूलैःपवित्रंब्राह्मणस्यतु एकैकंन्यून
मुद्दिष्टंवर्णेवर्णेयथाक्रमम् ३२ सर्वेषांवाभवेद्द्वाभ्यांपवित्रंग्रंथिशोभितम् इदंतुधारणार्थंस्यात्पवित्रंकथितंतव ३३
दर्भद्वयंतुसर्वेषांभवेदुत्सवनायच पंचाशताभवेद्ब्रह्मातदर्धेनतुविष्टरः ३४ निष्काशनीयेनोहस्तादाचमेत्तपवित्रकम् विकिरेग्नौकृतंचैवकृतेपाद्येतुसंत्यजेत् ३५ नास्तिदर्भसमंपुण्यंपवित्रंपापनाशनम् दर्भाधीनानिकर्माणि
दैवपित्र्याणिसर्वशः ३६ तादृग्विधानाद्दर्भाणाममायांग्रहणंभवेत् अयातयामतात्वेषांकिंवर्ण्योऽमानभस्यतः ३७
इत्येतत्कथितंकृत्यममायांश्रावणेतुयत् अन्यच्चश्रावणेकृत्यंतच्चापिकथयामिते ३८

अच्छिन्नाग्राइति पैत्र्येपितृकर्मणि
३० ३१ ३२ ३३ ३४ ३५ दर्भानभिष्टोस्ति नास्तीति ३६ ३७ ३८

इतिश्रावणमाहात्म्यटीकायांषड्विंशोऽध्यायः २६ ७९ एतावत्षड्विंशतिरध्यायैःवाराणांतिथीनांचव्रतान्युक्त्वाधुनावांतराणि
कर्तव्याकर्तव्यान्याह चतुर्भिरध्यायैः १ समुद्रगामिनीषुतुस्नानंकर्तव्यमेवेतिभावः २ तत्रापिमतांतरमाह अगस्त्येति दक्षिणा
शाविभूषणइति दक्षिणदिशालंकारभूतः अगस्तिरित्यर्थः ३ ४ गर्तानांलक्षणंकथयति धनुरिति धनुर्हस्तचतुष्टयं ५

इतिश्रीस्कंदपुराणेईश्वरसनत्कुमारसंवादेअमायांवृषभपूजनंकुशग्रहणंनामषड्विंशतितमोऽध्यायः २६ ७९
ईश्वरउवाच अथातःश्रावणेकर्कसिंहसंक्रांतिसंभवः प्राप्यतेतत्रयत्कृत्यंतच्चापिकथयामिते १ सिंहकर्क
टयोर्मध्येसर्वानद्योरजस्वलाः तासुस्नानंनकुर्वीतवर्जयित्वासमुद्रगाः २ अगस्त्योदयपर्यंतंकेचिदूचुर्महर्षयः
यावन्नोदेतिभगवान्दक्षिणाशाविभूषणः ३ तावद्रजोवहानद्यअल्पतोयाःप्रकीर्तिताः याःशोषमुपगच्छंतिग्रीष्मे
तुसरितोभुवि ४ तासुप्रावृषिनस्नायादपूर्णेदशवासरे धनुःसहस्राण्यष्टौचगतिर्यासांस्वतोनहि ५ नतानदीश
ब्दवाच्यागर्तास्तेपरिकीर्तिताः प्रारंभेकर्कसंक्रांतेर्महानद्योरजस्वलाः ६ त्रिदिनंतुचतुर्थेह्निशुद्धाःस्युर्योषितोयथा
महानदीःप्रवक्ष्यामिशृणुष्वावहितोमुने ७ गोदावरीभीमरथीतुंगभद्राचवेणिका तापीपयोष्णीविंध्यस्यदक्षि
णेषट्प्रकीर्तिताः ८ भागीरथीनर्मदाचयमुनाचसरस्वती विशोकाचवितस्ताचविंध्यस्योत्तरतोपिषट् ९ द्वादशै
तामहानद्योदेवर्षिक्षेत्रसंभवाः महानद्योदेविकाचकावेरीवंजरातथा १० कृष्णारजस्वलाएताःकर्कटादावहन्नृ
प कर्कटादौरजोदुष्टागौतमीवासरत्रयम् ११ चंद्रभागासतीसिंधुःशरयूर्नर्मदातथा गंगाचयमुनाचैवप्लक्षजाता·
सरस्वती १२ रजसानाभिभूयंतेयेचान्येनदसंज्ञिताः शोणःसिंधुर्हिरण्याख्यःकोकिलाहितघर्घराः १३

६ ७ ८
९ १० तत्रापिरजोविशेषमाह कर्कटादाविति गौतमीगोदावरी ११ १२ रजसानाभिभूयंते एतासांरजोदोषोनास्तीत्यर्थः १३

१४ १५ १६ १७ रजइति रजोदुष्टे रजसोदोषेण वयसि कालेऽपिचेत्सानदी ग्रामभोग्या ग्रामेणभोक्तुयोग्या (उ
दकांतराभावात्) नर्हिंसा नदुष्यति १८ १९ २० २१ २२ २३ सोपवासइति यजमानः

शतद्रुश्चनदाः सप्तपावनाःपरिकीर्तिताः गंगाधर्मद्रवःपुण्यायमुनाचसरस्वती १४ अंतर्गतारजोदोषाः सर्वाव-
स्थासुचामलाः अपामयंरजोदोषोनभवेत्तीरवासिनाम् १५ जलंरजोदुष्टमपिगंगातोयेनपावनम् अजागावोम-
हिष्यश्चयोषितश्चप्रसूतिकाः १६ भूमेर्नवोदकंचैवदशरात्रेणशुद्ध्यति अभावेकूपवापीनामन्यासांचपयोमृतं
१७ रजोदुष्टेपिवयसिग्रामभोगानदुष्यति अन्येनचोद्धृतेनीरेरजोदोषोनविद्यते १८ उपाकर्मणिचोत्सर्गेप्रातः
स्नानेविपत्सुच चंद्रसूर्यग्रहेचैवरजोदोषोनविद्यते १९ अतःपरंप्रवक्ष्यामिसिंहेगोप्रसवोयदि भानौसिंहगते
चैवयस्यगौःसंप्रसूयते २० मरणंतस्यनिर्दिष्टंषड्भिर्मासैर्नसंशयः तत्रशांतिंप्रवक्ष्यामियेनसंपाद्यतेसुखम् २१
प्रसूतांतत्क्षणादेवतांगांविप्रायदापयेत् ततोहोमंप्रकुर्वीतघृताक्तैराजसर्षपैः २२ आहुतीनांघृताक्तानांतिला
नांजुहुयात्ततः सहस्रेणव्याहृतिभिरष्टसंख्याधिकेनच २३ सोपवासःप्रयत्नेनदद्याद्विप्रायदक्षिणां सिंहराशौ
गतेसूर्येगोप्रसूतिर्यदाभवेत् २४ तदानिष्टंभवेत्किंचित्तच्छांत्यैशांतिकंचरेत् अस्यवामेतिसूक्तेनतद्विष्णोरिति
मंत्रतः २५ जुहुयाच्चतिलाज्येनशतमष्टोत्तराधिकम् मृत्युंजयविधानेनजुहुयाच्चतथायुतम् २६ श्रीसूक्तेन-
ततःस्नायाच्छांतिसूक्तेनवापुनः एवंकृतेविधानेननभयंजायतेक्वचित् २७ एवमेवनभोमासिसूर्येनवडवादिने
अत्रापिशांतिकंकार्यंतदादोषोविनश्यति २८

त्यध्याहारः मतांतरमाह सिंहराशाविति सार्धैश्चतुर्भिः २४ २५ २६ २७ वडवा अश्विनी २८ घ९

नभोदानं नभोमासिश्रावणेकर्तव्यंदानं २९ ३० घृतस्यधेनुः घृतप्रातयेधेनुरित्यर्थः ३१ ३२ ३३ विधुश्चंद्रः ३४ ३५

कर्केसिंहेनभोदानमथवक्ष्येशुभप्रदम् घृतधेनुप्रदानंचकर्कटस्थेदिवाकरे २९ ससुवर्णछत्रदानंशस्तंसिंहेनिगद्यते श्रावणेवस्त्रदानस्यकीर्तितंसुमहत्फलम् ३० घृतंचघृतकुंभाश्चघृतधेनुःफलानिच श्रावणेश्रीधरप्रीत्यै दातव्यानिविपश्चिते ३१ अन्यान्यपिचदानानिमत्तोषायकृतानिच अक्षय्यफलदानिस्युरन्यमासेभ्यएवहि ३२ द्वादशस्वपिमासेषुनास्तिचैतादृशःप्रियः आगच्छतिनभोमासःप्रतीक्षांचकरोम्यहम् ३३ करिष्यतिव्रतंयोत्रसमेप्रियतरोभवेत् ब्राह्मणानांविधूराजासूर्यःप्रत्यक्षदैवतम् ३४ ममाक्षिणीतयोरत्रसंक्रांतीभवतोयतः कर्कसंज्ञासिंहसंज्ञामाहात्म्यंकिमतःपरम् ३५ प्रातःस्नानंमासमात्रमत्रयःकुरुतेनरः द्वादशस्वपिमासेषुप्रातःस्नानफलंलभेत् ३६ नकरोतिनभोमासिप्रातःस्नानंयदानरः द्वादशस्वपिमासेषुकृतंनिष्फलतामिति ३७ महादेवदयासिंधोश्रावणेमासिसंयुतः प्रातःस्नानंकरिष्यामिनिर्विघ्नंकुरुमेप्रभो ३८ स्नात्वाशिवंसमभ्यर्च्यनभोमाहात्म्यसत्कथाम् शृणुयात्प्रत्यहंभक्त्याएवंमासनयेत्सुधीः ३९ अन्यत्रमासःकृष्णादिरत्रशुक्लादिरिष्यते नभोमासकथायास्तुमाहात्म्यंकेनवर्ण्यताम् ४० सप्तधापिचयावंध्यासापुत्रंलभतेशुभम् विद्यार्थीलभतेविद्यांबलार्थीलभतेबलम् ४१ रोगीचारोग्यमाप्नोतिबद्धोमुच्येतबंधनात् धनंधनार्थीलभतेधर्मेचैवरतिर्भवेत् ४२ भार्यार्थीलभतेभार्यांकिंबहूक्तेनमानद यद्यत्कामयतेतत्तत्प्राप्नोत्यत्रनसंशयः ४३ अंतेममपुरंप्राप्यमोदतेममसन्निधौ पूजयेद्वाचकंसम्यग्वासोलंकरणादिभिः ४४

श्रावणेप्रातःस्नानफलमाह प्रातरिति ३६ प्रातःस्नानाकरणेदोषमाह नेति ३७ ३८ ३९ कृष्णादिः कृष्णः कृष्णपक्षआदिर्यस्यसः ४० ४१ ४२ ४३ ४४

वाचका पूजने दुःखं प्राप्नोतीत्याह श्रुत्वेति ४५ रविजोयमः ४६ ४७ इतिश्रावणमाहात्म्यटीकायांसप्तविंशोऽध्यायः
२७ ॥ अथागस्त्युदयेतस्यार्घ्यप्रदानविधिमाह अतःपरमिति वैधात्र विधाताब्रह्मा तस्यपुत्रं १ समरात्रात् समादिवसतु

वाचकस्तोषितोयेन तेनाहंतोषितःशिवः श्रुत्वाश्रावणमाहात्म्यंवाचकंयोनपूजयेत् ४५ छिन्नस्तिरविजस्तस्यक
र्णौसबधिरोभवेत् तस्माच्छक्त्याप्रकुर्वीतवाचकस्यसुपूजनम् ४६ इदंश्रावणमाहात्म्यंयःपठेच्छृणुयादपि
श्रावयेद्वापिसद्भक्त्यातस्यपुण्यमनंतकम् ४७ इतिश्रीस्कंदपुराणेईश्वरसनत्कुमारसंवादेनदीरजोदोषसिं
हगोप्रसवसिंहकर्कटश्रावणदानस्नानश्रावणसुक्तिवाचकपूजाकथनंनामसप्तविंशोऽध्यायः २७ ॥

ईश्वरउवाच अतःपरंप्रवक्ष्याम्यगस्त्यार्घ्यविधिंपरम् येनचीर्णेनवैधात्रसर्वान्कामानवाप्नुयात् १ कालस्तस्य
चविज्ञेयअगस्त्यस्योदयात्पुरा समरात्राभवेद्यावदुदयःसमरात्रकम् २ दद्यादर्घ्यंप्रत्यहंचतद्विधिंतेवदाम्यहम्
प्रातःशुक्लतिलैःस्नात्वाशुक्लमाल्यांबरोगृही ३ स्थापयेदव्रणंकुंभंसुवर्णादिविनिर्मितम् पंचरत्नसमायुक्तंघृतपा
त्रेणसंयुतम् ४ नानाभक्ष्यफलैर्युक्तंमाल्यवस्त्रविभूषितम् ताम्रेणपूर्णपात्रेणउपरिस्थेनभूषितम् ५ कुंभो
द्भवस्यप्रतिमांतत्रपात्रेनिधापयेत् अंगुष्ठमात्रंपुरुषंसौवर्णंचचतुर्भुजम् ६ पीनात्यायतदोर्दंडंदक्षिणाभिमु
खंमुनिम् सुशोभनंप्रशांतंचजटामंडलधारिणम् ७ कमंडलुकरांशिष्यैर्बहुभिःपरिचारितम् तथादर्भाक्षत
धरंलोपामुद्रासमन्वितम् ८

त्यां रात्रयोयस्मिन् एतादृशः कालात् २ ३ ४ ५ कुंभोद्भवस्य अगस्त्यस्य
प्रतिमा पुरुषमेव वर्णयति अंगुष्ठमात्रमिति सार्धाभ्यां ६ पीनेति पीनौ पुष्टौअत्यायतौ अतिदीर्घौ दोर्दंडौ यस्य ७ ८

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

९ १० ११ १२ १३ १४ १५ अवाचीमुखः दक्षिणामुखः १६ अर्घ्यदानमंत्रानाह काश

आवाहयेत्पूजयेच्चगंधपुष्पादिभिस्तथा उपचारैःषोडशभिर्नैवेद्यैर्बहुविस्तरैः ९ दध्योदनबलिंदद्याद्भक्तियुक्तेनचेतसा ततश्चार्घ्यंप्रदातव्यस्तच्चैवविधिवच्छृणु १० सौवर्णेचाथरौप्येवाताम्रेवेणुमयेथवा पात्रेनारिंगखर्जूरीनारिकेलफलानिच ११ कूष्माडकारवल्लीनिकदलीदाडिमानिच वृंताकबीजपूराणिअक्षोटाःपिस्तकास्तथा १२ नीलोत्पलानिपद्मानिकुशदूर्वांकुरास्तथा अन्यान्यपिचसाध्यानिफलानिकुसुमानिच १३ नानाप्रकारभक्ष्याणिसप्तधान्यानिचैवहि सप्तांकुराःपल्लवाश्चपंचवस्त्राणिचैवहि १४ एतान्पदार्थान्संस्थाप्यपात्रेसम्यक्प्रपूजयेत् जानुभ्यामवनिंगत्वातत्पात्रंनम्रमूर्धनि १५ धृत्वावाचीमुखोभूत्वाध्यायेत्कुंभोद्भवंमुनिम् दद्यादर्घ्यंप्रयत्नेनश्रद्धाभक्तिपुरःसरम् १६ काशपुष्पप्रतीकाशवह्निमारुतसंभव मित्रावरुणयोःपुत्रकुंभयोनेनमोस्तुते १७ विंध्यवृद्धिक्षयकरमेघतोयविषापह रत्नवल्लभदेवेशलंकावासनमोस्तुते १८ आतापीभक्षितोयेनवातापीचमहाबलः लोपामुद्रापतिःश्रीमान्योसौतस्मैनमोनमः १९ येनोदितेनपापानिविलयंयांतिचाधयः व्याधयस्त्रिविधास्तापास्तस्मैनित्यंनमोनमः २० पाथःपूर्णसरिन्नाथोयेनवैशोषितःपुरा सपुत्रायसशिष्यायसपत्नीकायवैनमः २१ अगस्त्यखनद्यइतिद्विजातिर्वेदमंत्रतः शूद्रःपौराणमंत्रेणदत्वार्घ्यंप्रणमेत्सुधीः २२

पुष्पेति १७ विंध्येति विध्यपर्वतस्यवृद्धेः क्षयस्यकरः १८ आतापीति तन्नामादैत्यः वातापीतन्नामादैत्यएव १९ २० पाथइति उदकेनभृतः समुद्रइत्यर्थः २२ ५ ५

९ कल्पेउषसि १० ११ १२ १३ मातृविद्धातृतीयायुक्ता १४ १५ १६ १७

सोमवारेप्रधानःस्यात्सायंकालःप्रकीर्तितः भौमेबुधेगुरौमुख्यःप्रातःकालश्चपूजने ९ शुक्रवारेपूजनंस्यात्क-
त्येरात्रौचजागरः नृसिंहपूजनेमंदेसायंकालश्चपूजनम् १० शनिघ्नेशनेर्दानेमध्याह्नोमुख्यइष्यते हनुमतो-
पिमध्यान्हःप्रातरश्वत्थपूजनम् ११ रोटकाख्येव्रतेवत्सप्रतिपत्सोमसंयुता त्रिमुहूर्तोत्तरासास्यादन्यथापूर्वयोगि-
नी १२ औदुंबरीद्वितीयातुसायान्हव्यापिनीमता तृतीयासंयुताग्राह्याद्वयोश्चेत्पूर्ववेधिता १३ तृतीयास्वर्ण-
गौर्याख्यासाचतुर्थीयुताभवेत् चतुर्थीगणनाथस्यमातृविद्धाप्रशस्यते १४ नागानांपूजनेशस्ताषष्ठीयुक्ताचपंचमी
सूपोदनव्रतेषष्ठीसायान्हेसप्तमीयुता १५ मध्यान्हव्यापिनीग्राह्यासप्तमीशीतलाव्रते पवित्रारोपणेष्टम्यांदेव्या
रात्रियुतातिथिः १६ कुमारीनवमीनक्तव्यापिनीतुप्रशस्यते आशासंज्ञातुदशमीसानक्तव्यापिनीभवेत् १७
त्याज्याविद्धैकादशीतुतत्रवेधंमुनेःशृणु अरुणोदयवेधस्तुदशम्यावेध्यावान्यति १८ आदित्योदयवेधस्तु-
स्मार्तानांनिंद्यएवसः अरुणोदयकालस्तुयामार्द्धंचरमंनिशः १९ एवंरीत्यायस्यभवेद्द्वादशीसापवित्रके त्र-
योदशीत्वनंगस्यव्रतेस्याद्रात्रियोगिनी २० द्वितीययामेतत्रापिसाप्रशस्ततराभवेत् पवित्रारोपणेशंभोरात्रि-
गास्याच्चतुर्दशी २१ अतिप्रशस्तातत्रापिनिशीथव्यापिनीतुया उपाकर्मणिचोत्सर्गेपूर्णिमाश्रवणंचभम्
२२ त्रिमुहूर्तद्वितीयेन्हितदाग्राह्यंपरंदिनम् नोचेदनुष्ठितःपूर्वंतैत्तिराणांचबह्वृचाम् २३

१८ १९ २० रात्रिगा रात्रिव्यापिनी २१ २२ २३ ध९ ध९

२४ २५ २६ संसदः दीपस्य सभादीपस्य २७ २८ २९ ३० ३१

तैत्तिरीयांचयजुषांमुहूर्तत्रयगामपि उत्तरस्मिन्पूर्वमेव दिनंस्यात्कर्मणिद्वयोः २४ मुहूर्तानंतरंपूर्वदिने
चेत्संगतिर्भवेत् पूर्णिमाश्रवणर्क्षंचमुहूर्तेद्वितयात्पुरा २५ उत्तरस्मिन्समाप्तंचेत्तदापूर्वदिनेभवेत् हस्त
भंत्वपराण्हेस्याद्ग्राह्यंतत्सामवेदिभिः २६ दिनद्वयेनदास्याच्चेत्पूर्वमेवदिनंभवेत् उपाकर्मप्रयोगांतेकालो
दीपस्यसंसदः २७ श्रवणाकर्मणिप्रोक्तः कालःसर्पबलौतथा पूर्वणोन्हिभवेद्वाभ्यांस्वस्वगृह्यानुसारतः
२८ पौर्णिमात्रप्रशस्तावास्यादस्तमययोगिनी हयग्रीवोत्सवेपूर्णामध्यान्हव्यापिनीभवेत् २९ अपराण्ह
व्यापिनीस्याद्रक्षाबंधनकर्मणि चंद्रोदयव्यापिनीचस्यात्संकष्टचतुर्थिका ३० उभयत्रयदासास्यान्नस्याद्वा
पूर्वगाभवेत् चतुर्थीचतृतीयायांमहापुण्यफलप्रदा ३१ कर्तव्याव्रतिभिर्वत्सगणनाथसुतोषिणी गणेश-
गौरीबहुलाव्यतिरिक्ताःप्रकीर्तिताः ३२ चतुर्थ्यौपंचमीविद्धादेवतांतरपूजने निशीथव्यापिनीग्राह्याकृष्ण
जन्माष्टमीतिथिः ३३ षट्प्रकारातुसर्वत्रनिर्णयेतिथिरिष्यते पूर्णव्याप्तिर्द्वयोरन्होरव्याप्तिरंतिकेवला
३४ अंशतश्चसमाव्याप्तिरंशतोविषमातथा संपूर्णव्याप्तिरेकत्रअंशतश्चपरेहनि ३५ अंशतोव्याप्ति
रेकत्रअव्याप्तिःपरत्रच पक्षत्रयेतुसंदेहोयथानास्तितथाशृणु ३६ अंशतोविषमव्याप्तावधिकाव्याप्तिरुत्त
मा एकत्रपूर्णाचान्यत्रसापूर्णाचोच्यतेतिथिः ३७

३२ ३३ ३४ ३५ ३६ ३७

३८ ३९ ४० ४१ ४२ ४३ ४४ ४५ ४६ ई

अव्याप्तिरंशतोव्याप्तिस्तत्रांशव्याप्तिरुत्तमा अंशव्याप्तिर्यदापूर्णा अंशतश्चसमायदा ३८ संशयस्तत्रभवतितस्यस्यान्निर्णयोभिदा क्वचिद्वेधुंमचाक्याहारनक्षत्रयोगतः ३९ प्रधानद्वययोगेनपारणायोगतःक्वचित् जन्माष्टम्यांतुसंदेहेत्रिपक्षेतुपराभवेत् ४० अष्टम्यंतेपारणंस्याद्यदियामत्रयात्पुरा समाप्येततदूर्ध्वंचेदष्टम्युषसिपारणा ४१ व्रतेपिठोरसंज्ञेमामध्यान्हव्यापिनीशुभा वृषभाणांपूजनेतुअमासायंतनीभवेत् ४२ दर्भाणांसंचयेचैवसंगवःकालईरितः त्रिंशत्पुण्याःपूर्वनाड्यःकर्कसंक्रमणेरवौ ४३ पुण्याःषोडशनाड्यस्तुसिंहेपूर्वाःपराअपि केचिदिच्छंतिमुनयःपूर्वाएवतुषोडश ४४ अगस्त्यार्घ्यस्यकालस्तुप्रतएवप्रकीर्तितः अयंतेकथितोवत्सकर्मणांकालनिर्णयः ४५ यइमंशृणुतेध्यायंयश्चापिपरिकीर्तयेत् नभोमासिकृतानांसव्रतानांलभतेफलम् ४६ इतिश्रीस्कंदपुराणेईश्वरसनत्कुमारसंवादेव्रतकर्मणांकालनिर्णयकथननामैकोनत्रिंशोऽध्यायः २९ छ ईश्वरउवाच कियत्कियत्तेकथितंमाहात्म्यंश्रावणस्यहि सर्ववर्णयितुंशक्यंनालंवर्षशतैरपि १ प्रियेयंममकल्याणीहुत्वादक्षाध्वरे·तनुम् हिमाचलसुताजाता तेनेयंयोजितामया २

छ छ छ

श्रावणमाहात्म्यटीकायांएकोनत्रिंशोऽध्यायः २९ छ १ इयंप्रिया पार्वती तेन हिमालयेन मयासह २

५१

मासभूपतिः मासेषुश्रेष्ठइत्यर्थः ३ उद्धूलयित्वा विलेप्य चर्चयित्वेत्यर्थः ४ ५ ६ कंठे ३२ द्वात्रिंशत् मस्तके·
२२ द्वाविंशतिः एकैककर्णे ६ षट् ६ षट् प्रतिकरं द्वादश १२ बाह्वो अष्टाष्ट ८ शिखायां १ एकः ७ ८ ९

सेवनेश्रावणेमासितेनमेप्रियकृन्नभाः नातिसीतोनातिचोष्णः श्रावणोमासभूपतिः ३ उद्धूलयित्वास्वतनुंस·
र्वांश्वेतेनभस्मना श्वेतेनाथजलार्द्रेणत्रिपुंड्रान्द्वादशान्स्वरेत् ४ भालेवक्षसिनाभौचबाह्वोः कूर्परयोस्तथा मणिबं
धद्वयेचैवकंठेमूर्द्धनिपृष्टके ५ मानस्तोकेतिमंत्रेणसद्योजातादिमंत्रतः षडक्षरेणमंत्रेणभस्मनाशोभयेत्तनुम् ६
धारयेच्चैवरुद्राक्षानष्टाधिकशतंतनौ द्वात्रिंशद्धारयेत्कंठेमूर्ध्निद्वाविंशतिस्तथा ७ कर्णद्वयेद्वादशैवचतुर्विंशत्क
रद्वये अष्टाष्टभुजयोर्भालेएकमेकंशिखागतम् ८ एवंकृत्वातुमामर्च्यजपेत्पंचाक्षरंमनुम् श्रावणेमासिविप्रें
द्रसोहमेवनसंशयः ९ ज्ञात्वेमंमत्प्रियंमासंममतोषायकेशवः कृष्णाष्टमीचतत्रापिममाप्रियतरातिथिः १० देव
क्याजठरात्तस्मिन्दिनेप्रादुरभून्हरिः एतत्तेकथितंलेशात्किमन्यच्छ्रोतुमर्हसि ११ सनत्कुमारउवाच यद्य·
त्कृत्यंपार्वतीशनभोमासित्वयेरितम् आनंदाब्धौनिमग्नत्वाद्बहुत्वाच्चावधारणा १२ नास्थितात्क्रमशोनाथब्रूहिस
र्वयथातथा श्रुत्वाचाव्यवधानेनधारयिष्यामिभक्तितः १३ ईश्वरउवाच शृणुष्वावहितोभूत्वात्वमनुक्रमणि
कांक्रमात् आदौप्रश्नःशौनकस्यततःसूतस्यचोत्तरम् १४

कृष्णस्य शिवस्य · भेदंशठैः परिगृहीतंनिराकर्तुमाह कृष्णाष्टमीति १० ११ सनत्कुमारअनुक्रमेण सर्वानि व्रतानि पु
नः पृच्छतियदितिद्वाभ्यां अवधारणाभावेहेतुद्वयं बहुत्वात् ममचआनंदसमुद्रेमग्नत्वाद्ज्ञानाभावः १३ १४ ६

१५ १६ विशेषतः विशेषजिज्ञासया १७ १८ १९ २० २१ २२ २३

श्रोतुर्गुणास्तवप्रश्नोनिरुक्तिःश्रावणस्यच तस्यस्तुतिः पुनःप्रश्नस्तवविस्तरशोमुने १५ ममसक्तिस्त्वत्कृताचनाम
निर्वचनादिना भूयोममोत्तरंतत्रउद्देशःक्रमतोखिलम् १६ विशेषतस्तवप्रश्नस्ततोनक्तव्रतेविधिः रुद्राभिषेककः
थनंलक्षपूजाविधिस्ततः १७ दीपदानंपरित्यागः कस्यचित्प्रियवस्तुनः फलंरुद्राभिषेकेणतथापंचामृतेनच १८
फलंभूशयनस्यापितथामौनव्रतस्यच धारणापारणांचैवततोमासोपवासनम् १९ सोमाख्यानंततोलक्षरुद्रव-
र्तिविधिःस्मृतः कोटिलिंगविधानंचव्रतंचान्नोदनाभिधम् २० हविष्याशनमप्यत्रपत्रावल्यांचभोजनम् शाकत्या
गोभूशयनंप्रातःस्नानंदमःशमः २१ स्फटिकादिषुलिंगेषुअर्चाजपफलंततः प्रदक्षिणानमस्कारावेदपारायणंत
था २२ विधिःपुरुषसूक्तस्यग्रहयज्ञविधिस्ततः रविचंद्रकुजानांचक्रमशोव्रतविस्तरः २३ बुधगुर्वोर्व्रतंपश्चा
च्छुक्रेजीवंतिकाव्रतम् शनौनृसिंहस्यशनेरनिलाश्वत्थयोस्तथा २४ रोटकव्रतमाहात्म्यंततऔदुंबरव्रतम्
स्वर्णगौरीव्रतंपश्चाद्दूर्वागणपतिव्रतम् २५ नागव्रतंचपंचम्यांषष्ठ्यांसूपौदनव्रतम् शीतलाख्यंव्रतंदेव्याःपवि
त्रारोपणंततः २६ दुर्गाकुमारीपूजाचआशाव्रतमतःपरम् उभयैकादशीपश्चात्पवित्रारोपणंहरेः २७ अनंग-
स्यत्रयोदश्यांततःशंभोःपवित्रकम् उपाकर्मोत्सर्जनेचश्रवणाकर्मचैवहि २८ ततःसर्पबलिर्वाजिनीराजनमहोत्स
वः सभादीपस्तथारक्षाबंधःसंकष्टनाशनम् २९ व्रतंततःकृष्णजन्माष्टमीव्रतकथानकम् अतःपीठोरसंतंतुपोला
सत्तद्वृषव्रतम् ३०

५२

२४ २५ २६ २७ २८ २९ ३०

३१ ३२ ३३ ३४ ३५ ३६

दर्भाणांसंग्रहश्चैवनदीनांसरजस्कता सिंहेगोप्रसवेशांतिः कर्कसिंहनभेषुच ३१ दानानिस्नानमाहात्म्यंमाहात्म्यश्रवणंतथा ततोवाचकपूजाचअगस्त्यार्घ्यंततःपरम् ३२ कर्मणांचव्रतानांचकालनिर्णयईरितः एतन्मासिकृतानांसव्रतानांफलभाग्भवेत् ३३ सनत्कुमारत्हृदयेधारयस्वक्रमंशुभम् ३४ यइमंशृणुतेध्यायंमाहात्म्यंश्रावणस्य यत् तत्फलंसमवाप्नोतिव्रतानांचैवयत्फलम् ३५ किंबहूक्तेनविप्रर्षेश्रावणेविहितंतुयत् तत्रचैकस्यकर्तापि ममप्रियतरोभवेत् ३६ सूतउवाच सनत्कुमारपीत्वैवंशिववाक्यामृतंपरम् श्रुतिद्वाराचापमोदंकृतकृत्योबभूवह ३७ नभोमासस्तुचन्शंभुंस्मरन्सत्हृदयेशिवम् शंकरेणाभ्यनुज्ञातोययौदेवर्षिसत्तमः ३८ इदंरहस्यंपरमनाख्येयंयस्यकस्यचित् भवतोयोग्यताद्दक्षा मयैतत्कथितंप्रभो ३९ इतिश्रीस्कंदपुराणे ईश्वरसनत्कुमारसंवादेश्रावणमासमाहात्म्येअनुक्रमणिकाकथनंनामत्रिंशोऽध्यायः ३० श्रीरस्तुशुभम् इतिश्रीज्योतिर्वित्कुलावतंसव्यंकटरामात्मजहरिकृष्णविनिर्मितेबृहज्ज्योतिषार्णवेअष्टमेधर्मस्कंधेचतुर्थेमासस्तबकेश्रावणमासमाहात्म्यंपंचमम् ५ श्रीयदुकुलावतंसोजयति श्रीरस्तुशुभम्

श्रुतिद्वारापीत्वाश्रुत्वेत्यर्थः मोदमानंदंआपप्राप्तः ३७ इतिश्रावणमाहात्म्यटीकायांत्रिंशोऽध्यायः ३० श्रीरस्तु

यहश्रावणमासमाहात्म्य मुंबईमें पं०श्रीधरशिवलालके प्रज्ञायुक्तज्ञानसागरछापखानामेंछाप्यो· सं· १९४५ श·१८१० अधिकचैत्रकृ· ८

इतिमासस्तबकेश्रावणमासमाहात्म्यंस०

अथमासतत्त्वकेभाद्रपदमासमाहात्म्यंप्रारभ्यते·


सूत.
संवाद.
शौनक.
नारद.
अंबरीष
मंगलागौरी.
स्त्री.
हिमाल
शिव.
गणपती.
पूजक
वृषभ.
श्वान.
संवाद.
कृष्ण.
युधि०
नाग.
ब्राह्म.
पार्व.
शिव.
स्त्री.
सप्तऋ.
पूजा.
माधवराजा.
कौंडिन्य
ललितागौरी.
स्त्री.
शिव
स्कंद.
दशावतार
पू.
श्राद्धविधि.

१

अथभाद्रपदमासमाहात्म्यस्यानुक्रमणिकालिख्यते·

अध्यायः	विषयाः
१	शौनकादीनांभाद्रपदमाहात्म्यकथनविषयेप्रश्नः सूतोक्तिप्रारंभः सूतेनकृतः अंबरीषनारदसंवादप्रस्तावः अंबरीषस्यनारदंप्रतिप्रश्नः श्लोकाः२२
२	नारदकृतो भाद्रपदमाहात्म्यकथनप्रारंभः स्नानमाहात्म्यकथनम् तत्रशंबलेतिहासकथनं श्लो·२३
३	भाद्रशुक्लतृतीयायां कर्तव्यंमंगलागौरीव्रतम् तत्रेतिहासकथनम्· श्लोकाः५१
४	तस्यामेव कर्तव्यं हरितालिकाव्रतम्· तत्कथनंसेतिहासम् श्लोकाः४०
५	अस्यशुक्लचतुर्थ्यां गणपतिव्रतंकथनम्· श्लोकाः ४०
६	रजोदोषनिवृत्तिः केनोपायेनभवेदिति अंबरीषस्यनारदंप्रति प्रश्नः पृष्टेननारदेनकृत ऋषिपंचमीव्रतकथनारंभः तस्यरजस्वलादोषहारकत्वंप्रतिपादयितुं रजोदोषस्वरूपवर्णनं सुमित्रब्राह्मणेतिहासकथनारंभश्च· श्लोकाः३१
७	पूर्वाध्यायप्रचलितायाः कथायाः कथनम् एतद्व्रतसेवनात् सुमित्रब्राह्मणस्यमातृपितृ मुक्तिः श्लोकाः३८
८	एतद्व्रतंकदाकार्यमिति अंबरीषेण पृष्टोनारदः व्रताचरणकालादिकं कथयामास· तत्रेतिहास कथनंच श्लोकाः३३
९	एतस्यशुक्लपंचम्यांनागव्रतविधिः तत्रेतिहासश्च श्लोकाः ३३
१०	अस्यशुक्लषष्ठ्यांललिताव्रतविधिः एतद्व्रतस्यफलकथनम् श्लोकाः २६
११	अस्यशुक्लसप्तम्यांसोमव्रतंकथयितुंधर्मराजकृष्णसंवादस्यदेवकीलोमशसंवादस्य च प्रस्तावः एतद्व्रताचरणात्पुत्रप्राप्तिर्भवतीति प्रतिपादयितुंनहुषभार्यायाश्चंद्रमुख्याः कथानकं वक्तुमारंभः श्लोकाः ३१
१२	पूर्वारब्धकथायाः कथनं एतद्व्रताचरणविधिश्चश्लो·२५
१३	अस्यशुक्लसप्तम्यांवंध्यानांपुत्रप्रदंज्येष्ठादेवीव्रतकथनं तस्यविधिः श्लो· ३१
१४	अंबरीषेणदूर्वाष्टमीव्रतविषये नारदंप्रति प्रश्नः पृष्टोनारदः अस्यशुक्लाष्टम्यांकर्तव्यदूर्वाष्टमीव्रतं कथयामास तस्यामेवदूर्वापूजनाख्यस्य व्रतस्य विधिः श्लोकाः ३७
१५	अस्यशुक्लाष्टम्यां कर्तव्यंज्येष्ठाष्टमीव्रतंकथयितुं

अथभाद्रपदमासमाहात्म्यस्यानुक्रमणिकालिख्यते·

अध्यायः	विषयाः
	स्कंदशंकरसंवादप्रस्तावः व्रतस्यास्यविधिः तत्र कोलासुरेतिहासकथनम्· श्लोकाः२८
१६	देव्याहृतः कोलासुरवधः यूयंयोगिन्योभवतेति चतुःषष्टिराजकन्याभ्योदेव्यादत्तोवरः राजकन्यादिकृतादेवीस्तुतिः श्लो॰ २८
१७	षोडशदिनसाध्यस्यैतस्यमहालक्ष्मीव्रतस्यविस्तरेणविधिकथनं श्लो·२५
१८	एतद्व्रतमाहात्म्यप्रतिपादिको मंगलार्पाराजेतिहासः श्लो· ४५
१९	अस्यशुक्लनवम्या अदुखनवम्याख्यंव्रतम् तस्यविधिः श्लोकाः२६
२०	अनंतरोक्तव्रतविषये अप्सरसः आख्यानं तस्याएतद्व्रताचरणात्तिर्यग्योनितउद्धारः श्लो· ३९
२१	अस्यशुक्लदशम्यांदशावताराख्यंव्रतं तस्यानुष्ठानविधिः तन्माहात्म्यंवर्णयितुंलीलाधरद्विजेतिहासः श्लोकाः२४
२२	ऋषीणांश्राद्धकरणविषयेप्रश्नः तदुत्तरंकथयता सूतेनकथितः अगस्त्यादीनामितिहासः लक्ष्म्यादत्तोगस्त्यादीनांशापः श्लो॰ ३०
२३	एतेषांशापमुक्तिविषयेंऽबरीषपृष्टोनारदः तदुत्तरंकथयन् वातापील्वलेतिहासंकथयति· श्राद्धलोपाद्बुभुक्षितानांपितॄणां अगस्तिप्रसादार्थंकृतापरिचर्या· प्रसन्नेगस्तौ तत्कृतेरुपक्रमः श्लोकाः ३४
२४	पितृभिःकृताऽगस्तिस्तुतिः प्रसन्नयालक्ष्म्याकृतोऽगस्त्यादीनांशापतोमुक्तिः· श्लो· ३१
२५	अस्यश्रवणायुतद्वादश्यांश्रवणद्वादशीव्रतम् तस्यविधिः श्लोकाः५२
२६	एतद्व्रतेतिहासविषयेब्रह्मणापृष्टोनारदः तत्रेतिहासंकथयति श्लोकाः ३७
२७	अस्मिन्मासेस्त्रीणांसौभाग्यवर्धकंकिंव्रतमितिपृष्टः सूतः गोत्रिरात्रिव्रतम् वक्तुंइंद्रद्युम्नपुलस्त्यसंवादंप्रस्तौति· गोस्वरूपवर्णनम्· श्लो· २९
२८	अस्यव्रतस्यसविस्तरोविधिः श्लोकाः३५
२९	अस्मिन्मासेस्नानमाहात्म्यकथनम् पुराणश्रवणमहिमा· तस्यविधिः फलंच· श्लोकाः२६
३०	पौराणिकपूजनविधिः पुराणनिंदानिषेधः पौराणिकपूजायामकरणेदोषाख्यानं श्लो· २२

इतिभाद्रपदमासमाहात्म्यस्यानुक्रमणिका समाप्ता·

श्रीगणेशायनमः ॥ श्रीगुरुभ्योनमः ऋषयऊचुः सूत त्वदीयवक्त्राज्ज्ञातन्माहात्म्यंनभसश्श्रुतम् नभस्यस्याधुना
ब्रूहित्वद्वक्त्राच्छ्रवणेच्छवः १ त्वत्समोनास्तिवैलोकेपुराणार्थविदांभुवि वयंपूताःकृतार्थाश्चत्वत्समागमनेनवै २ सूतउवाच
शृण्वंतुऋषयःसर्वेकथयामिसमासतः सर्वमासाधिकोमासोभाद्रमासःसमीरितः ३ अस्यमाहात्म्यश्रवणात्पूतोभवतिमानवः
जन्मांतरीयपुण्येनमाहात्म्यश्रवणंभवेत् ४ तेधन्याःकृतपुण्यास्तेतपस्तप्तंतुतैःसदा श्रुतंभाद्रस्यमाहात्म्यंजन्मनःसार्थकंकृतम् ५ नभस्योषसिस्नातस्ययत्पुण्यंजायतेभुवि तत्पुण्यंनाखिलैर्यज्ञैर्लभ्यतेस्कृतपादिभिः
६ तस्मात्स्नानंचदानंचकार्यंभाद्रपदेसदा स्नानंतावत्प्रकर्तव्यंयावदनुदितेरवौ ७ कार्यंभाद्रपदस्नानंयत्रकुत्र
जलाशये तत्रसन्निहितागंगानात्रकार्याविचारणा ८ जलानिभाद्रमासेस्मिन्गर्जंतिचपुनःपुनः विश्वासघातिनंक्रूरंकृतघ्नमातृगामिनम् ९ द्विजघ्नंपतितंस्त्रीघ्नंमद्यपंनिर्दयंशठम् अनेकदुर्व्यसनिनंपुनामोनात्रसंशयः १० तावद्गर्जंतिपापानिब्रह्महत्यासमानिच दृष्ट्वानभस्यंसप्राप्तंविद्रवंतिइतस्ततः ११ प्रातःस्नानंकरिष्यामिनभस्येतियदावदन्
तदानीमेवपापानिगमिष्यंतिशरीरतः १२ दृष्ट्वानभस्यंसंप्राप्तंव्याघ्रंदृष्ट्वायथामृगाः अस्मिन्मास्यकृतस्नानाद्विपदाःपशवःस्मृताः १३ जन्मजन्मांतरीयेनस्नानंभवतिकर्मणा अस्मिन्भवंतिविघ्नानिस्वल्पपुण्यवतान्नृणाम् १४ स्नानेदानेचचर्यायांपुराणेयज्ञकर्मणि अत्रार्थेकथयिष्यामिइतिहासंपुरातनम् १५ यदृच्छयासत्यलोकात्संचरन्नारदोमुनिः स्मरन्गुणान्भगवतोंबरीषगृहंययौ १६ पूजयामासपरयाभक्त्यातंनारदंमुनिम् दिव्यासनेसमासीनंप्रोवाचविनयान्वितः १७ धन्योहंकृतकृत्योहंत्वदीयागमनेनवै अधुनाब्रूहिमत्पश्चात्कलिदोषेणदूषितान् १८ पाखंडवादनिरतान्सर्वदानृतभाषणान् परदाररतान्दुष्टान्परद्रव्यापहारिणः १९ परस्यनिधनंदृष्ट्वाआत्मानंचिरजीवनम् मन्यमानान्पापरतान्क्लेशदुःखसमन्वितान् २० जनान्दृष्ट्वाद्यहिमुनेसंतापोजायतेमम केनोपायेनमुच्यंतितमुपायंवदस्वमाम् २१

क्षिप्रप्रत्ययकर्तारमल्पायासंमहत्फलम् २२ इतिश्रीभविष्योत्तरपुराणेभाद्रपदमाहात्म्येप्रथमोऽध्यायः १ छ
नारदउवाच शृण्वंबरीषराजेंद्रसर्वलोकोपकारकम् वक्ष्येमासस्यमाहात्म्यमिहामुत्रफलप्रदम् १ सर्वमासोनभोमा·
सः भाद्रमासःप्रकीर्तितः पितृभिःप्रार्थितोविष्णुः वरमस्मैप्रदत्तवान् २ अस्मिन्स्नान्त्वदानंचपुराणंद्विजतर्पणम् अन्य
मासाच्छतगुणंभविष्यतिकलौत्वयि ३ अनेकवरसंयुक्तोगर्वेणमहतावृतः नमयासदृशःकोपित्रिषुलोकेषुविद्यते ४
सर्वान्पुनामिमनुजान् उत्तमाधममध्यमान् तद्गर्वपरिहारार्थंगोपितोयंस्वयंभुवा ५ अतःस्नानंचदानंचकर्तव्यंपापभीरु
भिः पुनात्येवनसंदेहोकलिकल्मषनाशनः ६ पापिनांबहुविघ्नानित्यस्मिन्मासेनसंशयः अत्रार्थेकथयिष्यामिइतिहा·
संपुरातनम् ७ पुरामाहिष्मतीपुर्यांक्षत्रियःशंबलाभिधः तस्यस्त्रीसुमतीचासीत्भर्तृशुश्रूषणेरता ८ शंबलोधनसं
पन्नः कृपणःक्षत्रियाधमः सर्वक्रियापरिभ्रष्टोक्रयविक्रयकारकः ९ अपुत्रोदैवयोगेनदेवब्राह्मणनिंदकः कालेनबहु
नाराजन् भाद्रमासःसमागतः १० तत्रस्थाःकेचनजनाःभाद्रस्नानार्थमुद्यताः बालाःस्त्रियश्चवृद्धाश्चस्नानार्थंकृतनिश्चयाः
११ सुमतिःस्वामिनंप्राहस्नानंकार्यंत्वयाद्यच श्रुत्वाविबुधवक्त्राज्ञान्माहात्म्यंस्नानतःकृतम् १२ मयापिक्रियतेस्वामिन्
त्वयाकार्यंमहत्फलम् उभाभ्यांनिश्चयंकृत्वाप्रातर्गंतुसमुत्सुकौ १३ तस्मिन्नवसरेराजन्ज्वरार्तःशंबलोऽभवत् ततः
प्रतिदिनेतस्यस्नानात्पूर्वंज्वरोभवेत् १४ पुराणावसरेसीतंशंबलस्यदुरात्मनः एवंमासोगतस्तस्यदुर्बलस्यगतायुषः १५
कालेननिधनंप्राप्यजगामयममंदिरम् अनेकयातनाःप्राप्यबुभुजेनरकंचिरम् १६ भुक्तशेषेणपापेनश्वानोभूत्क्षत्रिया·
धमः क्षुत्क्षामोनिर्बलोदुष्टःश्वानोभूदमलेपुरे १७ कालेनजरठोजातोसर्वांगक्षतसंयुतः जन्मांतरीयपुण्येनभाद्रमासः
समागतः १८ भाद्रमासेसितेपक्षेगच्छन्ननुदितेरवौ मांसपिंडमुखोऽकस्मात्पापात्तत्सलिलेपतत् १९ तदैवव्याकुलोजा
तोममारसलिलेयदा तेनैवदिव्यदेहोभूद्विमानयानमंबरात् ॥२०॥ परमाश्चर्यसंयुक्तः जन्मजन्मांतरंस्मरन्॥ दूता·

ऊचुः त्वदर्थमिदमानीतंविमानंसमुपाविश २१ शंबलउवाच केनपुण्येनसंप्राप्तंविमानंतद्वदंतुमे अज्ञातभाद्रः
स्नानोपिस्नानमाहात्म्यतःकिल सर्वपापविनिर्मुक्तोविमानेरोढुमर्हसि २२ विमानस्योर्द्दिवंयातः शक्रसामीप्यमागतः अ
ज्ञातस्नानदानस्यफलंकोवेदजानतः २३ इतिश्रीभविष्योत्तरे पुराणेभाद्रपदमासमाहात्म्येद्वितीयोऽध्यायः २ ६७
ऋषयऊचुः बालवैधव्यनिर्दग्धापुत्रशोकसमान्विताः दुर्भगादोषसंयुक्ताःपापकर्मरता स्तथा ३ केनव्रतप्रभावेनमुच्यंतेसर्वकिल्बिषैः प्राप्नुवंतिपरंसौख्यमिहलोकेपरत्रच २ तद्वाचक्ष्वद्विजश्रेष्ठलोकानुग्रहकाम्यया स्कंदउवाच
साधुसाधुमहाभागाऋषयोदीनवत्सलाः ३ इदमर्थंपुरापृष्टःकौरव्येणजनार्दनः कृष्णउवाच शृणुराजन्प्रवक्ष्या
मिस्त्रीणांमंगलहेतवे ४ व्रतंस्त्रीभिःसदाकार्यंगौरीमंगलसंज्ञकम् तस्यानुष्ठानमात्रेणसर्वदुःखात्प्रमुच्यते ५ युधि
ष्ठिरउवाच देवकेनविधानेनकदाकार्यमिदंव्रतम् एतत्सर्वंसमाचक्ष्वयदितेऽनुग्रहोमयि ६ श्रीकृष्णउवाच
भाद्रमासेसितेपक्षेतृतीयायांनरोत्तम प्रभातेविमलेस्नात्वाकृत्वानित्यविधिंनृप ७ मध्यान्हेपूजयेद्देवीं गौरीमंगलसं
ज्ञकाम् सौवर्णींराजतींवापिमृन्मयींसशिवांशुभाम् ८ पूजयेच्छुक्लमाल्याद्यैरुपचारैःपृथक्पृथक् पूजांतेद्विजवर्ये
भ्योदत्वादानान्यनेकशः ९ अशक्तोकेवलंदद्याद्दानंमंगलवायनम् वंशपात्रेसमादायकंचुकीवस्त्रसंयुताम् १० समुक्तं
मंगलसूत्रंस्थापयेत्तंदुलोपरि सर्वसौभाग्यसंयुक्तंब्राह्मणायनिवेदयेत् ११ सौवर्णींदक्षिणांदद्याद्व्रतसंपूर्तिकाम्यया
नाश्नीयात्तद्दिनेकिंचिदशक्तःकंदमूलकम् १२ रात्रौजागरणंकार्यंगीतवादित्रमंगलैः प्रभातेपूजयेद्देवींसशिवांभक्तव
त्सलाम् १३ ब्राह्मणान्भोजयेच्छक्त्यास्वयंभुंजीतवाग्यतः एवंयाकुरुतेनारीनसादुर्गतिमाप्नुयात् १४ युधिष्ठिर
उवाच पुराकेनेहचरितंव्रतंमंगलसंज्ञकम् श्रीकृष्णउवाच पुराकृतयुगेराजन्वीरसेनोनृपोत्तमः १५ तस्यकन्या
सुचार्वंगीदेवसेनागुणान्विता हरदत्तेनसातन्वीदेवसेनानृपोत्तम १६ बुभुजेसकलान्भोगानमरैरपिदुर्लभान् कदा

चिद्दैवयोगेनपूर्वकर्मविपाकतः १७ वैधव्यमगमत्साध्वीदुःखशोकसमन्विता परलोकगतेतस्मिन्हरदत्तेद्विजन्मनि १८ बालपुत्रान्तुसानारीउवासकतिचिद्दिनान् एकदादिवसेसातुपतिदुःखेनदुःखिता १९ गृहीत्वाबालतनयंस्नानार्थंयमुनांगता प्रविष्टासलिलेबालसहितानृपकन्यका २० अकस्माज्जलवेगेनतनयोविलयंगतः चकारशोकमतुलंहाहेतिव्यलपन्मुहुः २१ पपातधरणीपृष्ठेरंभावातहतायथा मिलिताःसेवकाःसर्वेतथानागरिकानराः २२ उत्थाप्यनीतास्वगृहेसांत्वयामासुरप्यलम् दैवसेनापिकष्टेनसावधानातदाभवत् आहूयसकलान्विप्रान्ददौपशुधनानिच सर्वेत्यक्त्वाययौसाध्वीऋषीणामाश्रमंशुभम् २४ तथाश्रमंसाददृशे कौडिन्यस्यमहात्मनः आश्रमःसुखदःसर्वक्लेशदुःखनिवारणः २५ ययौतमाश्रमंपुण्यंदृष्ट्वातमृषिपुंगवम् दंडवत्पतितोभूमौनोत्तस्थौभृशदुःखिता २६ कृपयाऋषिवर्येणाश्वासितास्वकरैर्धृता कासित्वमितिसापृष्टातयासर्वंनिवेदितम् २७ ऋषिणापिक्षणंध्यात्वातस्यादुःखस्यकारणम् पूर्वजन्मभवंतस्यैकथयामाससादरम् २८ ऋषिरुवाच पूर्वजन्मनिभोभद्रेक्षत्रियोमाधवाभिधः तस्यासिवल्लभानूनंभर्तृचित्तानुयायिनी २९ कृत्वादानान्यनेकानिव्रतानिविविधानिच नकृतंमंगलागौर्याःपूजनंव्रतमुत्तमम् ३० तेनकर्मविपाकेनदुःखितासिनृपात्मजे तद्दुःखपरिहारार्थंव्रतंकुरुममाज्ञया ३१ तथेत्युक्त्वाब्राह्मणीसाधृत्वातच्चरणौमुदा कृपार्द्रोमुनिवर्योसौस्वयंव्रतमुपादिशत् ३२ चकारव्रतराजंतंमुनेराश्रममास्थिता निमग्नोयमुनातोयेबालकोपिकुरूद्वह ३३ तद्देवकन्याभिस्ताभिर्नागराजस्यभूतले पालितःपोषितश्चापिताभिःस्वपतिकाम्यया ३४ दशायौवनसंपन्नोरेमेताभिःसुखेनच विसस्मारनिजंसर्वंदिव्यभोगसमन्वितः ३५ मिलित्वानागकन्याभिःसंपृष्टोब्राह्मणोत्तमः कुतस्तेवदनंम्लानंचिंताशोकौकुतस्तव ३६ कारणंकथयास्माकंकरिष्यामोथनिष्कृतिम् गृहीत्वाशपथंतस्मात्कथयामासकारणम् ३७ दत्वारत्नान्यनेकानिसेवकाबहवस्तथा निष्कासितोजनात्तूर्णंद्विजोमणिप्रभावतः ३८ भ्रमतामययौपुण्यंकौडिन्यस्याश्रमंद्विजः मुनिंचमातरंनत्वा

६

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

स्ववृत्तांतमवेदयत् ३९ हर्षेणोत्फुल्लनयना आलिंग्यबालकंमुदा व्रतंमुनिप्रभावंच प्रशंसंतीमुहुर्मुहुः ४० मुनेराज्ञां
गृहीत्वाथतनयेनसहाययौ उवासकतिचित्कालंनागलोकेमनोहरे ४१ भुक्त्वासौख्यान्यनेकानिस्नुषापुत्रैरलंकृता दि
व्यदेहधराभूत्वादिव्यलोकमगात्सती ४२ भर्त्रासहैवशर्वस्यलोकेवासमवापसा एतत्तेकथितंसर्वंमंगलागौरीव्रत
४३ प्रभावंसेतिहासंचकिंभूयःश्रोतुमिच्छसि एवंयाकुरुतेनारीनसादुर्गतिमाप्नुयात् ४४ इहभुक्त्वाखिलान्भो
गान्अंतेशिवपुरंव्रजेत् कौमार्येपिचकर्तव्यंगौरीव्रतमनुत्तमम् ४५ तथैवपंचवर्षाणिविवाहोर्ध्वंनृपोत्तम प्रति-
भौमेनभोमासिकार्यंसौभाग्यहेतवे ४६ नमोहात्कुरुतेनारीव्रतंसौभाग्यदायकम् वैधव्यंपुत्रशोकंच प्राप्नुयाज्जन्मज-
न्मनि ४७ तस्मात्सर्वप्रयत्नेनकर्तव्यंस्त्रीभिरादरात् व्रतस्योद्यापनंकार्यंगौरीशंकरतुष्टये ४८ आदौमध्येतथाचांते
अब्देषोडशकेतथा सौवर्णींप्रतिमांकृत्वास्थापयेत्कलशोपरि ४९ अग्निंसंपूज्यविधिवत्होमंकृत्वाविधानतः ब्राह्म
णान्भोजयेत्पश्चात्पुराणोक्तफलंलभेत् ५० कथाश्रवणमात्रेणसंपूर्णफलमश्नुते ५१ इतिश्रीभविष्योत्तरपुराणेभा
द्रपदमासमाहात्म्येनारदांबरीषसंवादेमंगलागौरीनिरूपणंनामतृतीयोध्यायः ३ छ ऋषयऊचुः सौभा
ग्यदायकंब्रूहिव्रतमेतदनुत्तमम् स्कंदउवाच अस्यशुक्लतृतीयायांव्रतंसौभाग्यदायकम् १ हरितालिकेतिवि
ख्यातंयद्गौरीपृष्टवान्शिवम् कैलासशिखरेरम्येगौरीपृच्छतिशंकरम् २ केनत्वंचमयाप्राप्तस्तद्व्रतंब्रूहिशंकर शृणुदे
विप्रगुह्यंव्रतानामुत्तमंव्रतम् ३ त्वयाकृतंतत्प्रभावात्प्राप्तमर्धासनंमम शृणुसर्वंत्वयादेवियद्वृत्तंचरितंमहत् ४
पार्वत्युवाच कथंव्रतंमयाचीर्णंतत्सर्वंब्रूहिशंकर शंकरउवाच तवजन्मपुराजातंगौरीहिमवतोगृहे ५ तत्र-
त्वंपार्वतीबाल्येकुर्वतीचमहत्तपः श्रुत्वातातेनतेकष्टंदुःखितश्चिंतयान्वितः ६ कस्मैदेयामयाकन्यासएवंचिंतयावृतः
इत्येवंचिंतयंस्तत्रब्रह्मपुत्रसमागतः ७ पूजयामासविधिवत्सप्रच्छागमकारणम् नारदउवाच नगराजशृणुष्वेतं

विष्णुनाप्रेषितोस्म्यहम् ८ योग्यंयोग्यायदातव्यंकन्यारत्नमिदंत्वया हिमवानुवाच वासुदेवसमोदेवोकन्यांप्रार्थयन्ते
यदि ९ तदामयाप्रदातव्यात्वदागमनकारणात् तच्छ्रुत्वानारदोविष्णुंतत्सर्वंकथयन्निति १० गतेमुनिवरेतत्रकन्या-
माहूयचाब्रवीत् दत्तासित्वंमयापुत्रिदेवायचक्रपाणये ११ तच्छ्रुत्वादुःखिताजातापतिताधरणीतले सख्यऊचुः
किमर्थंदुःखितादेविवदस्वत्वंममाग्रतः १२ कपर्दिनंतुभर्तारंकरिष्येहंनसंशयः इतिमेचिंतितंनित्यंतातेनकृतमन्यथा
१३ तस्माद्देहपरित्यागंकरिष्येनात्रसंशयः सख्युवाच यथापितानजानातिवनंतूचमयाहृतम् १४ एवंसंमतं
कृत्वानीतासित्वमहावने पितातेचिंतयामासमूर्छयापतितोभुवि १५ सत्यंकृतंमयापूर्वंकिंदास्येगरुडध्वजे त्वंगतासि
वनंघोरंव्रजंत्यासखिभिःसह १६ वालुकाभिःकृतंलिंगंसखिभ्यांसहपूजितम् भाद्रशुक्लतृतीयायांहस्तेसौम्ययुजित्व-
या १७ तत्रगीतेनवाद्येनरात्रौजागरणंकृतम् तद्व्रतस्यप्रभावेनआगतोहंतवांतिके १८ प्रसन्नोस्मिमयाप्रोक्तंवरंब्रूहिवरा-
नने पार्वत्युवाच यदिदेवप्रसन्नोसिभर्ताभवमहेश्वर १९ तथेत्युक्त्वातदादेवीकैलासंपुनरागता ततःप्रभातसमये-
कृत्वाव्रतविसर्जनम् २० भ्रमन्गिरिंददर्शाथकन्यांशुभांशुभाननाम् उत्थाप्योत्संगमारोप्यहिमवान्रुरुदेभृशम् २१ पार्व-
त्युवाच मांविष्णवेप्रदातासितेनाहंवनमागता पुनरूचेगिरिंगौरीमतोदास्यामिशूलिने २२ एवमुक्त्वाहिमवतानीतासि
त्वंगृहंप्रति व्रतराजप्रभावेनप्राप्तमर्द्धासनंमम २३ आलिभिर्हरितायस्मात्तस्मात्साहरितालिका पार्वत्युवाच ना-
मेदंकथितंचाथविधिंवदममप्रभो २४ ईश्वरउवाच भाद्रशुक्लतृतीयायांहस्तसोमयुजिप्रिये कर्तव्यंसुप्रसन्नेनस्त्री-
भिःसौभाग्यवर्धनम् २५ मध्यान्हेतुनदींगत्वास्नात्वाचैवविधानतः सतोरणांचतुर्द्वारांकदलीस्तंभमंडिताम् २६ पूज-
येत्तत्रमात्वांचषोडशैरुपचारकैः सप्तधान्योपरिन्यस्यकलशंताम्रमव्रणं २७ तस्योपरिन्यसेत्त्वांचमांचैववालुकामयीं
वशापात्रयुगंकृत्वाद्वाभ्यांचैवायशक्तितः २८ सर्वसौभाग्यद्रव्यंचसिंदूरंकुंकुमंशुभम् करकर्णादिभूषाश्चस्त्रीभ्योद

द्याद्यथाविधि २९ यावज्जीवंतुकर्तव्यंसौभाग्यादिविवृद्धये उपोष्यजागरंकुर्यात्पुराणश्रवणादिभिः ३० आहारंकुरुतेनारीदुःखंस्याज्जन्मजन्मनि सप्तजन्मभवेद्वंध्यावैधव्यंचपुनःपुनः ३१ दारिद्र्यंपुत्रशोकंचकर्कशादुःखभागिनी पिपीलिकत्वंमधुरात्दुग्धात्भवतिसर्पिणी ३२ कर्कशाकर्कफलतस्तृणधान्यान्तृणोपमा नारिकेलाशनाद्बोधाभवत्येवनसंशयः ३३ भक्षणंनैवकर्तव्यंहरितालिव्रतेशुभे रात्रौजागरणंकुर्यात्प्रभातपूजयेत्पुनः ३४ पारणंचप्रकर्तव्यंदिव्यान्नैःब्राह्मणैःसह इहलोकेसुखंप्राप्यअन्तेमोक्षोनसंशयः ३५ कथायाःश्रवणेनैवपुराणोक्तंफलंलभेत् वाजपेयसहस्राणिअश्वमेधशतानिच ३६ कथाश्रवणमात्रेणतत्फलंलभतेनरः स्कंदउवाच श्रुत्वैवंगिरिजाशंभोर्माहात्म्यंपरमाद्भुतम् ३७ चकारस्नानदानानिनभस्येशोकवर्जितम् तथैवचचकारोच्चैर्व्रतंचहरितालिका ३८ तस्यप्रभावात्संप्राप्तमर्द्धांगंपार्वतीपतेः एवमन्यैश्चबहुभिःकृतंपापप्रणाशनम् ३९ ततस्तेमुनयःसर्वेसूतवाक्येनतोषिताः पुनःपप्रच्छतुःवैंचतुर्थीव्रतमुत्तमम् ४० इतिश्रीभविष्योत्तरपुराणेभाद्रपदमासमाहात्म्येचतुर्थोध्यायः ४ छ ऋ

ऊचुः अर्थसिद्धिःकथंनृणांपुत्रसौभाग्यसंपदः दंपत्योःकलहश्चैवबंधुभेदस्तथानृणाम् १ उदासीनेषुसर्वेषुकथंसन्मुखताभवेत् द्रव्यलाभःकथंनृणांवाणिज्येनकृषिस्तथा २ नृपतेःपरचक्रस्यजयासिद्धिःकथंभवेत् इदंप्रश्नंमहाभागवदस्त्वममागतः ३ सूतउवाच सन्नद्धयोःपुराविप्राःकुरुपांडवसेनयोः पृष्टवान्देवकीपुत्रंकुंतीपुत्रोयुधिष्ठिरः ४ युधिष्ठिरउवाच निर्विघ्नेनजयोमत्र्यदेवदेवकथंभवेत् कांदेवतांनमस्कृत्यसम्यग्राज्यंलभेमहि ५ कृष्णउवाच पूजयत्वंहिदेवेशमुमामलसमुद्भवम् तस्मिन्संपूजितेवीरध्रुवंराज्यमवाप्स्यसि ६ युधिष्ठिरउवाच कस्मिन्मासेप्रकर्तव्यंव्रतमेतत्सुदुर्लभम् श्रीकृष्णउवाच कुर्याद्भाद्रपदेशुक्लचतुर्थ्यांपूजयेन्नृप यदावोद्वहतेभक्तिस्तदापूज्योगणाधिपः प्रातःशुक्लतिलैःस्नात्वामध्यान्हेदेवमर्चयेत् ८ स्वशक्त्यागणनाथस्यस्वर्णरौप्यमयाकृतिः अथवाष्टम

यींकुर्याद्वित्तशाठ्यंनकारयेत् ९ कृत्वापूजांविधानेनस्नानंपंचामृतैःपृथक् वस्त्रंकौशेयकंरक्तंगंधंदद्याच्चभक्तितः १०
गणाध्यक्षेयनाम्नावैपूजयेत्तुविनायकम् विनायकायपुष्पाणिधूपंचोमासुतायच ११ दीपंरुद्रप्रियायेतिनैवेद्यंविघ्नना
शिने ततोदूर्वांकुरान्गृहीत्वाविंशतिंचैकमेवच १२ पूजनीयप्रयत्नेनएभिर्नामपदैःपृथक् गणाधिपनमस्तेस्तुउमापुत्राघ
नाशन १३ विनायकेशपुत्रेतिसर्वसिद्धिप्रदायक एकदंतेभवक्त्रेतितथामूषकवाहन १४ कुमारगुरवेतुभ्यंपूजनीयःप्रय
त्नतः दूर्वायुग्मंगृहीत्वातुगंधयुक्तंप्रपूजयेत् १५ एकैकेनतुनाम्नावैदत्त्वैकंसर्वनामभिः आदौप्रणवमुच्चार्यनमोंताश्चप्र
कीर्तिताः १६ एकैकनामभिश्चैवदूर्वायुग्मइभाननम पूजयेत्परयाभक्त्यागणेशंसिद्धिदायकम् १७ अथैकविंशतिंकुर्या
त्मोदकान्घृतपाचितान् स्थापयित्वागणाध्यक्षसमीपेकुरुनंदन १८ दशविप्रायदातव्यादशचात्मनिभोजयेत् एवं
गणाधिपेदद्यात्तंनैवेद्यंनृपोत्तम १९ सघृतंपायसैर्युक्तंमोदकांश्चनिवेदयेत् पंचखाद्यंपृथक्चैवशर्करायुतमर्पयेत्
२० गणेशःप्रतिगृह्णातिगणेशोवैददातिच गणेशस्तारकोभाभ्यांगणेशायनमोनमः २१ दीयतेगणनाथायप्रीयतां
मेगणाधिपः सोढव्यंसौमनसंनित्यंकरोतिगणनायकः २२ इतिमंत्रंसमुच्चार्यदशदद्याद्द्विजातये कृत्वानैमित्तिकंक
र्मपूजयेदिष्टदेवताम् २३ ब्राह्मणान्भोजयेच्छक्त्याभुंजीयात्तैलवर्जितम् एवंकृतेधर्मराजगणनाथस्यपूजने २४
विजयस्तेभवेन्नित्यंसत्यंसत्यंवदाम्यहम् त्रिपुरंहंतिकामेनपूजितःशूलपाणिना २५ शक्रेणपूजितःसम्यक्तथावृत्रव
धेनृप नलस्यान्वेषणेतद्वद्दमयंत्याचपूजितः २६ रामदेवेनतद्वच्चसीतामानयतापुरा दृष्टासीतामहाभागावीरेणा
चहनूमता २७ भगीरथेनतद्वच्चगंगामानयतापुरा अमृतोत्पादनार्थायपूर्वादेवासुरैरपि २८ अमृतंहरतापूर्वंवैन
तेयेनपक्षिणा आराधितोगणाध्यक्षस्त्वमृतंचानयद्बलात् २९ यदापूर्वंहिदैत्येन हृतोरुक्मिणिनंदनः आराधि
तोमयातद्वद्रुक्मिण्यासहितेनतु ३० कुष्ठव्याधियुतेनाथसांबेनाराधितःपुरा जयकामस्तथात्वंहितमाराधयशक्र

रम् ३१ प्राप्स्यसित्वंस्वकंराज्यंनात्रकार्याविचारणा सूतउवाच एवमुक्तस्तकृष्णेनसानुजःपांडुनंदनः ३२ पूजांपप्रच्छ
देवायगणेश पूजनेविधिः कःकार्यःपूजयेद्देवंगणेशं सिद्धिदायकम् ३३ एतन्मेब्रूहिविस्तीर्णंलोकानांहितकाम्यया श्री
कृष्णउवाच पूजयित्वामहाभागनाम्नासिद्धिविनायकम् ३४ सिद्ध्यंतिसर्वकार्याणिसततपूजयेद्यतः यज्ञारंभेतुसंपू
ज्यःस्वासनेचउमासुतः३५ व्रतारंभेषुसर्वेषुपूजनीयोविनायकः कृषिप्रारंभसमयेकृषुकश्चप्रपूजयेत् सस्यवृद्धिर्भवेत्त-
स्यधनंप्राप्नोतिनिश्चितम् पुष्टिकामैस्तथास्तृक्कैःपूजनीयोगणाधिपः ३७ विद्याकामोलभेद्विद्यांधनकामोलभेद्धनम् ज
यंतुजयकामस्तुपुत्रार्थीलभतेसुतम् ३८ पतिकामाचभर्तारंसौभाग्यंचसुवासिनी विधवापूजयित्वातुवैधव्यंनाप्नुयात्
पुनः ३९ एतद्वःकथितंसर्वंचतुर्थीव्रतमुत्तमम् पूजनंगणनाथस्यफलंचैवसुनिश्चितम् ४० इतिश्रीभविष्योत्तरपु
राणे भाद्रपदमाहात्म्येअंबरीषनारदसंवादेचतुर्थीव्रतकथनंनामपंचमोऽध्यायः ५ छ नारदउवाच अस्यै
वशुक्लपक्षस्यपंचमीऋषिसंज्ञिता तस्यानुष्ठानमात्रेणसर्वपापक्षयोभवेत् १ ऋतुदोषात्स्त्रियोमुक्तास्तथान्येचा
न्यदोषतः अंबरीषउवाच कीदृशीपंचमीब्रह्मन्कथंसाऋषिसंज्ञिता २ मुच्यतेपातकात्कस्मान्नुरजोदोषस
मुद्भवात् नारदउवाच अज्ञानाज्ज्ञानतोवापिस्त्रीयाजातारजस्वला ३ उपस्पृशतिभांडादीन्गृहकर्माणिसंस्थिता
४ प्राप्नोतिसामहत्पापंमृताचैवनरकंव्रजेत् शृणुतत्कारणंयस्माद्वर्जनीयारजस्वला ५ ब्रह्महत्यापुराशक्रोवृत्रंहत्वा
महासुरम् पापेनमहताराजन्पीडितोवृत्रहत्यया ६ ब्राह्मणंसमुपादायआत्मनःशुद्धिकारणात् शुद्धिं पूजय
मासतदाशक्रपितामहः ७ देवःसचस्ततोब्रह्मागणंध्यात्वाचकारवै शुद्धिंशक्रस्यराजेंद्रप्रहृष्टेनांतरात्मना ८ वि
भज्यब्रह्महत्यांचचतुर्धाचचतुर्मुखः प्रक्षिप्यराजशार्दूलंचतुःस्थानेषुचैतदा ९ वन्हेःप्रथमज्वालायांवर्षाकालेनदी
तृतीयेपर्वताग्रेचस्त्रीणामृतुषुपार्थिव १० अतोरजस्वलानारीपरित्याज्याविशेषतः ब्राह्मणःशासनाद्राजन्चतुर्वर्णेषु

सर्वदा ११ प्रथमेहनिचांडालीद्वितीयेब्रह्मघातिनी तृतीयेरजकीप्रोक्ताचतुर्थेहनिसिद्ध्यति १२ अज्ञानात्ज्ञानतोवा·
पिसंपर्कात्पातकंचयत् चतुर्णामपिराजेंद्र यद्वृत्रवधसंभवम् १३ ब्राह्मणक्षत्रविट्शूद्रैःस्त्रीभिःकार्याप्रयत्नतः मा·
सिभाद्रपदेचैवशुक्लपक्षेतुपंचमी १४ कर्तव्यासामयत्नेनसर्वपापैःप्रमुच्यते अंबरीषउवाच मुनेब्रूहिममाग्रेत्वं
माहात्म्यमिदमुत्तमम् १५ आदौकेनचिदाख्यातसप्तर्षीणांव्रतंपरम् किंपुण्यंकिंफलंतस्यव्रतमाचरितस्यच १६
नारदउवाच अथान्योपिचराजेंद्रश्चातुर्वर्ण्यस्यपालकः तस्यदेशेभवेद्विप्रोवेदवेदांगपारगः १७ सुमित्रोनामविप्र
र्षिःसर्वभूतहितेरतः कृषिंकरोत्यसौविप्रःकुटुंबंपालयत्यसौ १८ तस्यभार्यासुसाध्वीचपतिव्रतपरायणा कदाचिद्दै
वयोगेनआगताऋषिपंचमी १९ तस्मिन्नेवदिनेराजन्सुमित्रोवैपितुर्दिनम् भोज्यभूरिप्रदोविप्रोभार्यांप्रतिजगादह
२० सुमित्रउवाच शृणुप्रियेतुमेवाक्यंक्षयाहश्चाद्यमासितुः २१ आमंत्रणंकरिष्यामिऋषीणांवनवासिनाम्
यास्यामिपरयाभक्त्यापितृणांतृप्तिहेतवे २२ तथेत्युक्त्वाथविप्रोसौसंग्रामोयमुनातटे निमंत्रितास्तुमुनयःपितृनुद्दिश्य
भोनृप २३ संयोगोरजसःप्राप्तःतत्कालेतस्यभार्यया विस्मित्वासातदाराजन्पप्रच्छस्त्रीकुटुंबकम् २४ आर्याःकिंतु
मयाकार्यंपितृकार्यंगृहेमम आमंत्रितास्तुभूदेवास्तेसर्वेस्वर्गगामिनः २६ वृथापाकंचसंजातंक्षयाहंविफलंगतम्
मध्यान्हेभास्करेजातेकालेचकुतुपस्थिते २७ सुमित्रआगतोगेहमृषिवृंदेनसंयुतः ततस्त्रीभिःसमाख्यातःसद्यः
स्नानंचकारसः २८ तदग्रेऋषयःपुत्राःक्षयाहेसमुपागताः अन्नंचाद्विविधंरम्यंलेह्यभक्ष्यसमन्वितम् २९ ततश्चाह्ना
रसमयेऋषयोदिव्यचक्षुषा रजःसंयोगसंस्पृष्टंज्ञात्वातद्विद्विजोत्तमम् ३० शापंदत्वातदासर्वेनिराशाःपितरोगताः
कर्मणःफलतःकालस्तस्मात्कालेनियोजितम् ३१ इतिश्रीभविष्योत्तरपुराणेनारदांबरीषसंवादेभाद्रपदमास·
माहात्म्येषष्ठोऽध्यायः ६ ७ अंबरीषउवाच किंचकारसुमित्रोसौभार्ययादुःखितःप्रभो ऋषीणां

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

सांत्वनंकर्तुंगतस्तेषांतपोवनम् १ कृत्वाबहुदिनंतेषांसेवनंभक्तिपूर्वकम् ततस्तेमुनयः सर्वेशापोद्धारंददुःपुनः २ ऋ
षेत्वंसप्तवर्षाणिभुंजीयत्नवबहु मा भूत्वापुत्रगृहेवासंकृत्वासर्वंस्मरिष्यसि ३ ततःप्राप्तेऽष्टमेवर्षेतवश्राद्धदिनेकिल
ततःसंपादितेपाकेक्षीरभांडेविषंफणिः ४ त्यक्त्वागच्छतिसासूनीतद्भांडमस्पृशत्तदा ज्वलत्काष्ठेनतत्पृष्ठेतत्सलोताडयि
ष्यति ५ तद्दोषान्नैवदास्यतिभक्ष्यशून्यास्तवापिच तयोर्विवदतोर्वाक्यंवृषश्वान्य स्तवात्मजः ६ करोतुऋषिपंचम्या
व्रतंपापप्रणाशनम् तस्यपुण्यप्रभावेनतवमुक्तिर्भविष्यति ७ एवंतद्वचनंश्रुत्वाब्राह्मणःस्वगृहंययौ ततःकालेनबहु
नानिजपाप नियोजितः ८ पंचत्वमागतासाध्वीनीतायमपुरींप्रति घातितायमदूतैश्चविविधैर्वधबंधनैः ९ ततःकर्म
क्षयोजातःश्वानयोनिमुपागता तस्याभर्तुःश्वानयोन्याःकालधर्मेणयोजितः १० स्वस्त्रीसंपर्कदोषेणबलीवर्दोबभूव
सः सुमित्रस्यापिपुत्रोसौगुरुशुश्रूषणेरतः ११ सुमतिर्नामधर्मज्ञोदेवतातिथिपूजकः तस्यतौपितरौराजन् ऋतुसं
पर्कदोषतः १२ तिर्यग्योनिमनुप्राप्तावुभौजातिस्मरौनृप सुतस्यचगृहेमाताजयश्रीशुनकीतदा १३ उच्छिष्टभोजने-
जातास्मरतीपूर्वपातकम् सुमित्रोपिपितातस्यशुनेश्चैवनरेश्वर १४ नित्यंलांगलकर्षीचबलीवर्दोबभूवह पितुः
क्षयाहेसंप्राप्तेसुमतिस्तुततोद्विजः १५ भार्याचंद्रवतीनामउवाचश्रद्धयान्वितः अद्यसंवत्सरदिनंपितुर्मेचारुहासि-
नि १६ भोक्तव्याब्राह्मणाश्चैवपाकसिद्धिर्विधीयतां चकारपाकसिद्धिंचसाभर्तुःशासनात्तदा १७ मुक्तंपायस-
भांडेचसर्पेणगरलंनृप दृष्ट्वाब्रह्मवधाद्भीताशुनीभांडंतदास्पृशत् १८ द्विजभार्याचतांदृष्ट्वाउल्मूकेनचताडिता भो
जिताब्राह्मणास्तेनश्राद्धंकृत्वाविधानतः १९ ततोभुक्तेषुविप्रेषुनोच्छिष्टंचतदाबहिः निक्षिप्यच्चैवपात्राणि स्ना-
त्वाभूमौहितंचयत् २० विस्मितायास्तदाशुन्याउपवासस्ततोभवत् ततोरात्र्याप्रवृत्तायांसाशुनीक्षुधिताभव-
त् २१ बलीवर्दंसमागत्यभर्तारमिदमब्रवीत् अहंबुभुक्षितानाथनदत्तंभोजनंमम २२ ग्रासादिकंनदत्तंवैक्षुधा

पीड्यतेभृशम् अथमत्याह्निकेप्राप्तेनकिंचिद्दर्शितंमया २३ पायसान्नेपपाताथगरलंसर्पसंभवम् मयापिचिंतितमि
दंमारिष्यंतिद्विजातयः २४ संस्पृष्टपयसोदोषाद्वध्वाहंताडिताभृशं दुःखितातेनमेगात्रंकटिभग्नाकरोमिकिं २५ ततः
प्राहबलीवर्दोभद्रेत्वत्पापजंफलम् किंकरोम्यसमर्थोसौभारवाहीचसर्वथा २६ अथाहमात्मजक्षेत्रेभ्रामितःसक
लंदिनम् वाहितोप्यात्मजेनाहंमुखंबध्वाबुभुक्षितः २७ वृथाश्राद्धकृतंतेनह्याजाताममकष्टता पुत्रदानादहंतृप्ता
नत्वतृप्तिमुपागता २८ तयोःसंवदतोरेवंमातापित्रोर्महीभृतः श्रुत्वावाक्यंतदापुत्रोयदुक्तंचतदातयोः २९ माता
पित्रोश्चमुक्त्यर्थंसतदाप्रस्थितोवने गच्छन्नृषीन्प्रतितदाक्षमतिर्वदतांवर ३० ददर्शचाश्रमंपुण्यंगंगातटसमीपगं
तत्रगत्वाज्ञानवृद्धानृषींश्चपरमेष्ठिनः ३१ प्रणिपत्याब्रवीद्वाक्यंहितंचैवतदातयोः क्षमतिरुवाच कथ्यतां
ब्रह्मनृषयःप्रश्नमेकंसमाहितः ३२ केनकर्मविपाकेनपितामाताकुयोनिषु एतामवस्थांसंप्राप्तौमुच्यतेपातकात्कथम्
३३ ऋषयऊचुः तवमातापुराविप्रस्वगृहेबालभावतः ऋतुकालंयदित्वातुभांडादीन्संस्पृशत्तदा ३४ तेनक
र्मविपाकेनशुनोयोनिमुपागता सतत्संपर्कदोषेणबलीवर्दोबभूवह ३५ एतयोर्मुक्तिकामार्थंकुरुत्वंऋषिपंचमीम्
सकलत्रस्तदाविप्रऋषीन्संपूज्ययत्नतः ३६ एवंकृतेतुविप्रेंद्रऋषिपंचमिसंज्ञिके मोक्षितौपितरौपापात्पूर्वजन्म
निचार्जितात् ३७ शाकाहारस्तुकर्तव्योनाचारश्यामिकापिवा ३८ इतिश्रीभविष्योत्तरपुराणेनारदांबरीषसंवा
देभाद्रपदमाससमाहात्म्येसप्तमोऽध्यायः ७ छ अंबरीषउवाच कदाकार्यमिदंब्रह्मन्व्रतंपरमदुष्करम्
नारदउवाच प्राप्तेभाद्रपदेमासेशुक्लपक्षेचपंचमी १ व्रतंतुऋषिपंचम्यांकर्तव्यंतुद्विजोत्तम ऋतुसंपर्कज-
दोषक्षयंयातिनसंशयः २ भाद्रेमासिसितेपक्षेपंचम्यांनियतास्थितः प्रत्यूषेऋषिपंचम्यांदंतधावनपूर्वकम् ३ नद्यांवा
पितडागेवाशुचौदेशेगृहेपिवा मध्यान्हेचैवसंप्राप्तेमंडलंगोमयोदकैः ४ निधायविविधैःशुभ्रैःस्वस्तिकाद्यैर्मनोहरैः

८

संस्थाप्यब्राह्मणान्सप्तशक्त्येपूजयेद्द्विज. ५ स्वर्णरौप्यमयावापिनद्भावेकुशात्मकान् कश्यपोत्रिर्भरद्वाजोविश्वामि
त्रोथगौतमः ६ जमदग्निर्वसिष्ठश्चसंस्थाप्यास्तुप्रयत्नतः तच्छ्रुत्वासकर्मानिर्वाक्यंभाषितमृषिभिस्तदा ७ इतिश्रुत्वातुपि
त्रर्थेमुक्त्यर्थंतुतदातयोः गृहंगत्वाव्रतंचक्रेसभार्यःश्रद्धयान्वितः ८ व्रतंतुऋषिपंचम्याःसर्वपापप्रणाशनम् ऋषीणांवचना
त्ताभ्यांयथोक्तंव्रतमुत्तमम् ९ विधानार्थंचसंप्राप्यमातापित्रोःफलंददौ व्रतपुण्यप्रभावेनमातातात्स्त्रीयोनितः १०
मुक्तातुराजशार्दूलविमानवरमाश्रिता दिव्यांबरधराभूत्वागतास्वर्गंमहीपते ११ पितासोपिततोवेगान्मुच्यतेपशुयो
नितः स्वर्गंप्राप्तोमहाराजव्रतस्यास्यप्रभावतः १२ एवमेकस्यमासस्यदिनस्यगदितंफलम् किंपुनःपूर्णमासस्यक
थयामिशुभंफलम् १३ अतःसर्वप्रयत्नेनकुरुमासव्रतंशुभम् ब्रह्महत्याचतुर्भक्ता त्यक्तास्थानचतुष्टये अग्नौजले
गिरौस्त्रीषुयात्यक्ताब्रह्मणापुरा तस्याःसंपर्कमात्रेणब्रह्महाजायतेनरः १५ तस्मात्सर्वप्रयत्नेननरैःकार्यातुपंचमी
पुरामहीपुरेराजन्क्षत्रियोमाधवाभिधः १६ पुत्रैश्चतुर्भिःसंयुक्तःकदाचिद्दैवयोगतः मंदाग्निःकफसंपन्नोत्यंधःकु
ष्ठयुतःसदा १७ एवंतेरोगयुक्ताःस्युःपूर्वकर्मस्वभावतः तान्दृष्ट्वाशोकसंपन्नःक्षत्रियःपर्यचिंतयत् १८ पूजाव्रतानि
बहुशस्त्रौषधानिबहून्यपि ददावपिगुणास्तेभ्योनययौद्विजपुंगवः १९ एवंमंत्रविदःसर्वेतथायंत्रविदश्चये भिष
ग्वराभूतविदोद्रव्यैःसंतोषितास्त्वपि २० प्राणशेषाःसमभवन्सर्वेतेनिधनोन्मुखाः तान्दृष्ट्वामाधवोत्यर्थंमुद्विग्नोह्य
भवत्तदा २१ प्रेतभूतान्गृहीत्वातुरेवातीरमुपाविशत् तत्रापिदैवयोगेनकौंडिन्यःसमुपागतः २२ तंप्रणम्यनिजं
दुःखंकारणंपर्यपृच्छत केनकर्मविपाकेनरोगिणस्तनयामम २३ तदस्यकारणंब्रूहिनिष्कृतिंचापिसर्वशः कौंडिन्य
उवाच ज्ञात्वासमाधिनासर्वंकथयामासकारणम् २४ अहोतेतनयाःपूर्वंब्राह्मणाःकामचारिणः कुर्वंतिचैवकर्माणि
कथयामिसविस्तरम् २५ अंधोयंसर्वदानिष्ठपर्वताग्रेनिजेच्छया रजस्वलास्त्रियासक्तःकुष्ठयंतनयःपुरा २६ अग्नेः

प्रथमज्वालायांहोमंकुर्वन्दिनेदिने मंदाग्निस्तेनपापेनजातोयंतनयस्तव २७ वर्षासुयेनकुल्यायांवृष्टिपातेजलाशा-
ये तेनपापेनजातोयंकफयुक्तस्तवात्मजः २८ एवंचतुर्भिस्तैर्दोषैर्ब्रह्महत्यासमुद्भवैः व्याप्तास्तेनिरयान्भुक्त्वाततोज
तास्तवात्मजाः २९ भुक्तावशेषदोषेणरोगयुक्तास्त्वतेभवन् अतस्तत्कर्मभोगस्यमुक्तयेव्रतमुत्तमम् ३० व्रतंकुरुऋषि
पंचम्यांतेनकार्यंभविष्याति यातेमुनिवरेतस्मादागताऋषिपंचमी ३१ पुत्रेभ्यःकारयित्वासौयथाशक्त्यायथाविधि
तस्यपुण्यप्रभावेनरोगमुक्तास्त्वतेभवन् ३२ नारदउवाच एवंबहुभिराचीर्णंपंचम्यांव्रतमुत्तमम् नवदामिकु-
थातेषांग्रंथोबाहुल्यमाव्रजेत् ३३ इतिश्रीभविष्योत्तरपुराणेनारदांबरीषसंवादेभाद्रपदमासमाहात्म्ये अष्टमो-
ऽध्यायः ८ ५ नारदउवाच अत्रैवान्यद्व्रतंकार्यंभाद्रव्रतपरायणैः नागव्रतेतिविख्यातंसर्वनागभयापहम्
१ नतेषांजायतेबाधाविषसर्पसमुद्भवा अंबरीषउवाच यात्वयाकथिताब्रह्मन्पंचमीनागसंज्ञिका २ सोतिहा
संविधानंतत्कथ्यतामृषिसत्तम नारदउवाच चतुर्थ्याएकभुक्तंतुतस्यानक्तंप्रकीर्तितम् भूरिचंद्रमयंनागंत्व
वाकलधौतजम् ३ कृत्वादारुमयंवापिअथवामृन्मयेप्रिय ४ पंचम्यामर्चयेद्भक्त्यानागंपंचफणंस्मृतम् करवीरैर्जा-
तिपुष्पैःशतपत्रैश्चपद्मजैः ५ तथागंधैश्चधूपैश्चपूजयेन्नागमात्रकम् ब्राह्मणान्भोजयेत्पश्चात्घृतपायसमोदकैः
६ अनंतंवासुकिंशेषंपद्मकंबलमेवच तथाकर्कोटकंनागंनागमश्वतरंतथा ७ धृतराष्ट्रंशंखपालंकालियंतक्षकंत
पिंगलंचमहानागंभाद्रेमासिप्रकीर्तिताः ८ व्रतस्यांतेपारणंस्यात्क्षीरैर्ब्राह्मणभोजनं सुवर्णभारनिष्पन्नंनागंदद्या
द्गांतथा ९ तथावस्त्राणिदेयानिव्यासायामिततेजसे एवंसंपूजयेन्नागान्सदाभक्त्यासमन्वितः १० कुर्याद्द्वादश
वर्षंतुपंचम्यांतुवरानने एवंकुर्वंतियेभक्त्यानागानांव्रतमुत्तमम् ११ नतेषांसर्पजाबाधाभविष्यतिकदाचन नारद
उवाच अत्रैवसर्पदष्टानांमुक्त्यर्थंव्रतमाचरेत् १२ तदेवाहंप्रवक्ष्यामिसंक्षेपेणयथातथ अंबरीषउवाच नाग

दष्टोनरोराजन्प्राप्यमृत्युंव्रजत्यधः १३ अधोगत्वाभवेत्सर्पोनिर्विषोनात्रसंशयः नागदष्टःपितायस्य भ्रातावादुहितापि
वा १४ मातापुत्रोथवाभार्याकर्तव्यंतदिदंस्त्वमे मोक्षायतस्यविप्रेंद्रदानंव्रतमुपोषणम् १५ ब्रूहिमेद्विजशार्दूलयेन-
दोषात्प्रमुच्यते नारदउवाच उपोष्यापंचमीसम्यक्नागानाबलवर्द्धनी १६ क्रमेकमेकयावर्त्रद्विधानंशृणुभारत
मासिभाद्रपदेराजन्शुक्लपक्षेतुपंचमी १७ साभिपुण्यतमाप्रोक्ताग्राह्यासर्वैस्तुकाम्यया चतुर्थ्यामेकभुक्तंचतस्यां
नक्तंप्रकीर्तितम् १८ कुर्याच्चांद्रमसंनागमथवाकलधौतजम् अथदारुमयंभाव्यमृन्मयंवाथशक्तितः १९ पंचम्याम
र्चयेद्भक्त्यानागंपंचफणंतथा करवीरैस्तथापद्मैर्जातिपुष्पैःसुगंधिभिः २० गंधपुष्पैःसनैवेद्यैःस्नाप्याःक्षीराब्धिभि-
ब्राह्मणान्भोजयेत्पश्चा दन्नपायसमोदकैः २१ अनंतंवासुकिंशेषंपद्मंकंबलमेवच तथाकर्कोटकंनागंनागम-
श्वतरंनृप २२ धृतराष्ट्रंशंखपालंकालीयंतक्षकंतथा पिंगलंचतथानागंमासिभाद्रपदेक्रमात् २३ पूजयित्वाप्रयत्ने-
नपंचम्यांनक्तभुग्भवेत् एवंद्वादशकृत्वावैमासिभाद्रपदेनृप २४ वत्सरांतेयथाशक्त्यामहाभोज्यंतुकारयेत् ब्राह्मणानां
यतीनांचनागानुद्दिश्यभक्तितः २५ इतिहासविदेनागंकांचनंरत्नचित्रितम् गांचदद्यात्सवत्सांवैसर्वोपस्करसंयुताम्
२६ दानकालेपठेदेतत्स्मरन्नारायणंविभुम् सर्वांगंसर्वधातारमनंतमपराजितम् २७ येकेचिन्मेकुलेःसर्पदष्टाःप्रा-
प्ताह्यधोगतिम् व्रतेनानेनगोविंदमुक्तिभाजोभवंतुनः २८ इत्युच्चार्याक्षतैर्युक्तंसितचंदनमिश्रितम् वासुदेवाग्रतोभू
यत्तोयंतोयेथनिक्षिपेत् २९ अनेनविधिनासर्वेपरमेष्यांतिचामृताः सर्पतस्तेभियाष्यंतिस्वर्गतिंनृपसत्तम ३० कृत्वा
सर्वान्समुद्धृत्यकुलजान्कुलनंदन प्रयातिविष्णुसान्निध्यंसेव्यमानोप्सरोगणैः ३१ वित्तशाठ्यविहीनोयंसर्वमेतत्स्क-
नवेत् नक्तंचभक्तिसहिताःसितपंचमीषुयेपूजयंतिभुजगान्कुसुमोपहारैः ३२ तेषांगृहेष्वभयदाहिभवंतिसर्पादर्पा
वतामणिमयूखविभाषितांगाः ३३ इतिश्रीभविष्योत्तरपुराणेनारदांबरीषसंवादेभाद्रपदमासमाहात्म्येनवमोऽ

ध्यायः ९ ७९ सूतउवाच शुक्लस्यैवतथाषष्ठ्यांललिताचैवपूजयेत् स्त्रीभिःसौभाग्यकामार्थंपुत्रपौत्रवि-
वृद्धये १ कथयामिसमासेनविधानंविधिपूर्वकम् कृष्णेनकथितंपूर्वंकृष्णायैदुःखमुक्तये २ तदेतत्कथयिष्यामिशृणु
ध्वंमुनिसत्तमाः श्रीकृष्णउवाच भाद्रेभाद्रपदेमासिशुक्लषष्ठ्यांसुसंयुता ३ नारीस्नात्वाप्रभातेतुशुक्लमाल्यां-
बरप्रिया सुवेषाभरणोपेताभूत्वासंगृह्यवालुकाम् ४ आनीयवंशपात्रेतुपंचपिंडाकृतिंशुभाम् ध्यात्वातुललितां
देवींततोवननिवासिनीम् ५ पंकजंकरवीरंचनेपालींमालतींतथा एकैकाष्टशतंग्राह्यमष्टाविंशतिरेववा ६ अक्ष
ताकलिकागृह्यताभिर्देवींसमर्चयेत् प्रार्थयेदग्रतोभूत्वादेवींतांगिरिशप्रियाम् ७ ललितेललितेदेविसौख्यसौ।
ग्यदायिनी अनंतंदेहिसौभाग्यंभगवत्यपरावरम् ८ मंत्रेणानेनकुसुमैश्चंपकैश्चसुशोभनैः एवमभ्यर्च्यविधिना-
नैवेद्यंपुरतोन्यसेत् ९ विविधैरपिकूष्मांडनारिकेलैःसदाडिमैः बीजपूरैःसतुंडीरैःकारवेल्लैःसुशोभनैः १० फलैस्त
त्कालसंभूतैःकृत्वाशोभांतदग्रतः विरूढैर्धान्यसंभूतैर्दीपालीभिःसमंततः ११ सार्धंसगुणकैर्धूपैःसोलालककरं
जकैः गुडपुष्पैःकर्णवेष्टैर्मोदकैरुपमोदकैः १२ बहुप्रकारैर्नैवेद्यैर्यथाविभवसारतः एवमभ्यर्च्यविधिवद्रात्रौजाग
रणंचरेत् १३ गीतवाद्यैर्नटंनृत्यैः प्रोक्षणीयैरनेकधा सखीभिःसहितासाध्वीतांरात्रिंप्रशमंनयेत् गंधपुष्पैस्तथाभ्य-
र्च्यगीतवाद्यपुरःसरः १४ तच्चदद्याद्द्विजेंद्रायनैवेद्यंहिनरोत्तमे स्नात्वागृहंसमागत्य हुत्वावैश्वानरंक्रमात् १५ देवा
न्पितॄन्मनुष्यांश्चपूजयित्वासुवासिनीम् कन्यकाश्चैवसंभोज्याब्राह्मणान्दशपंचच १६ भक्ष्यभोज्यैर्बहुविधैर्द-
त्वादानानिभूरिशः ललितामेस्तुसुप्रीताइत्युक्त्वातुविसर्जयेत् १७ यः कश्चिदाचरेदेतद्व्रतंसौभाग्यदंपरम् ल
लिताषष्ठिसंज्ञंचसर्वपापनिबर्हणम् १८ नरोवायदिवानारीतस्यपुण्यफलंशृणु यत्तुलभ्यंव्रतैश्चान्यैर्दानैर्वानृपस १०
त्तम १९ तपोभिर्नियमैर्वापितदेतेनेहलभ्यते इहचैवातुलासंपत्सौभाग्यमनुभूयते २० कृत्वामूर्ध्निपदंपार्थस

पत्नानांयशस्विनी मृताशिवपुरंप्राप्यसाकुटुंबेनसुव्रता २१ प्राप्नोतिदर्शनंदेव्यामयानुसहमोदते पुण्यसौख्यादिहा
गत्यसर्वसौख्यंचविंदति २२ साक्षात्त्रेतायुगेनारीसीतेवप्रियवल्लभा इदंयःशृणुयात्पार्थपठेद्वासाधुसंसदि २३ सो
पिपापविनिर्मुक्तःशिवलोकेमहीयते षष्ठ्यांव्रतांतरगतावरवंशपात्रेसंपूजयित्वासिकताक्रमेण नक्तंचजागरम-
नुव्रतवेषशीलाकुर्यादसौत्रिभुवनेललितेवभाति २४ इतिश्रीभविष्योत्तरपुराणेनारदांबरीषसंवादेभाद्रपद
मासमाहात्म्येदशमोऽध्यायः १० छ सूतउवाच भाद्रेमासिसितपक्षेकृत्वानित्यविधिंव्रती पूज
येत्सरयाभक्त्यासोमंचंदननिर्मितम् १ एतद्व्रतंपुराकेनकृतंकेनप्रकाशितम् एतद्व्रतप्रभावेनसंततिश्चिरजीविनी २
ऋषयऊचुः एतत्सविस्तरंब्रूहिनहृक्काच्छ्रवणोप्सवः सूतउवाच अत्रार्थेधर्मराजेनस्पृष्टाकृष्णोब्रवीदिद
३ श्रीकृष्णउवाच मुनींद्रोलोमशोनाममथुरायांगतःपुरा सोर्चितोवसुदेवेनदेवक्याचयुधिष्ठिर ४ उपविश्य-
कथापुण्याकथयित्वामनोरमा । ततःकथयितुंभूयःकथामेतांप्रचक्रमे ५ कंसेनतेहताःपुत्राःजाताजाताःपुनःपुनः
मृतवत्सादेवकीत्वंपुत्रदुःखेनदुःखिता ६ यथाचंद्रमुखीदीनाबभूवनहुषप्रिया यस्माच्चीर्णव्रतेचैवभूयादक्षय्यव-
त्सका ७ त्वमपिदेवकीतथाभविष्यसिनसंशयः देवक्युवाच कासाचंद्रमुखीब्रह्मन्बभूवनहुषप्रिया ८ किं
चीर्णंहितयादिव्यंव्रतंसंततिवर्द्धनम् सपत्नीदर्पदलनंसौभाग्यारोग्यदंविभो ९ लोमशउवाच अयोध्यायां
पुराराजानहुषोनामविश्रुतः तस्यासीद्रूपसंपन्नादेवीचंद्रमुखीप्रिया १० तथातत्रैवनगरेविष्णुगुप्तोभवद्द्विजः आ
सीद्गुणवतीतस्यपत्नीभद्रमुखीतथा ११ तयोरासीदतिप्रीतिस्पृहणीयापरस्परम् अथतेद्वेपिसख्यौचैस्नानार्थं-
शरयूजले १२ प्राप्तप्राप्ताश्चतत्रैवबह्व्योवैनगरांगनाः ताःस्नात्वामंडलंचक्रुःतन्मध्येव्यक्तरूपिणाम् १३ लेखयि-
त्वाशिवंशांतमुमयासहशंकरम् गंधपुष्पाक्षतैर्भक्त्यापूजयित्वायथाविधि १४ प्रणम्यगंतुकामास्ताःपप्रच्छुश्च

वरस्त्रियः ताऊचुः शिवदःशंकरोस्माभिःपार्वत्यासहपूजितः १५ वध्वासूत्रमयंतंतु शिवस्यात्मानिवेदितः १६
धारणीयमिदंतावद्यावत्प्राणविधारणम् तासांतद्वचनंश्रुत्वा।सख्योचेमेपिदेवाकिं १७ श्रुत्वातुसमयंतत्रबध्वादोर्भ्यां
तुदोरकम् ततस्ताश्चगृहंजग्मुःस्वसखीभिः समावृताः कालेनमहतातस्यास्तद्व्रतंविस्मृतंशुभम् १८ चंद्रमुख्याः
प्रमत्तायाविस्मृतःसतुदोरकः भद्रमुख्यास्तथाभद्रेविस्मृतंसर्वमेवतत् १९ मृताकैश्चिदहोरात्रैःसावभूवप्लवंगमी
भद्राख्याकुक्कुटीजाताव्रतभंगाच्छुभानने २० संभूयभूयसमयंप्राग्व्रतंचक्रतुःसह कालेनपंचतांप्राप्तस व ।वा
सहैवते २१ अदेवमातृकेदेशेजातेपिकुलसंमते ब्राह्मणीब्राह्मणीजातायासाभद्रमुखीपुरा २२ ईश्वरोजातम॰
हिषीयासीच्चंद्रमुखीपुरा नाम्नाभद्रमुखीयासीत्भूषणानामसाभवत् २३ अनग्निकस्यभार्यासीद्राज्ञस्तस्यपुरो॰
धसः अतीववल्लभाचासीत्भूषणाभूषणप्रिया २४ तस्यावभूवुरष्टौचपुत्राःसर्वगुणान्विताः पुनर्निरंतराप्रीतिस्तयो
रासीद्यथापुरा २५ मध्येवयसिराज्ञीचपुत्रमेकमजीजनत् ईश्वरीरोगिणंमूकंनेत्रहीनंरुजागृहम् २६ तादृशोपिम
हाभागमृतोसौनववार्षिकः ततःसाभूषणाद्रष्टुंईश्वरीपुत्रदुःखिता २७ सख्यभावादतिस्नेहात्पुत्रैःस्वैःपरिवारिता
अमुक्ताभरणानित्यंस्वरूपेणैवभूषिता २८ तांदृष्ट्वातादृशींभव्यांप्रजज्वालेश्वरीरुषा ततोगृहंप्रेषयित्वाब्राह्मणींती॰
व्रमत्सरा २९ चिंतयामाससाशीघ्रंतस्याःपुत्रवधंप्रति निश्चित्यचेतसाक्रुद्धाप्यानयामासतत्सुतान् ३० हताहता
श्चतेपुत्राःपुनर्जीवंसमागताः ३१ इतिश्रीभविष्योत्तरपुराणेनारदांबरीषसंवादेभाद्रपदमासमाहात्म्येएकादशो॰
ऽध्यायः ११ छ ऋषयऊचुः ततःकिमकरोद्राज्ञीदृष्ट्वापुत्रान्सजीवितान् केनैतेजीविताःसूततत्स
र्वंकथयस्वनः १ सूतउवाच तदद्भुततरंदृष्ट्वासापिचाहूयभूषणाम् उपविश्यासनेश्रेष्ठेबहुमानपुरःसरम् ३
अपृच्छद्विस्मयाविष्टासाराज्ञीनृपवल्लभा ब्रूहितथ्यंमहाभागेकिंत्वयासुकृतंकृतम् ३ येनतेनिहताःपुत्राःपुनर्जीवं

त्यनामयाः जीवद्वत्साबहुसुताक्षय्यभूषणशालिनी ४ किमाचरसिकयापीनत्सर्वंकथयस्वमे भूषणोवाच शृणुदेविप्रवक्ष्यामिजन्मांतरविचेष्टितम् ५ किंतद्धिविस्मृतंसर्वंत्वयायोध्यायांकृतंहियत् आवाभ्यांव्रतवैकल्यंप्रमत्ताभ्यांवरानने ६ येनत्वंमर्कटीजाताजाताहंकुक्कुटीतथा तथाचव्रतवैकल्यंत्वयाचापल्यतःकृतम् ७ मयातुसर्वभावेनचेतसाऽध्यायशंकरम् तथाभाद्रपदस्नानव्रताचरणमुत्तमम् ८ एतद्धिकारणंभद्रेनान्यत्किंचित्करोम्यहम् लोमशउवाच इत्याकर्ण्यवचस्स्मृत्यपूर्वजन्मविचेष्टितम् ९ ईश्वरीचतयासार्द्धंपुनःसम्यक्चकारह व्रतस्यास्यप्रभावेनपुत्रपौत्रादिसभवम् १० भुक्त्वाचसौख्यमतुलमंतेशिवपुरंगता तस्मात्त्वमपिकल्याणिव्रतमेतत्समाचर ११ आरब्धेऽस्मिन्व्रतेदिव्येजीवत्पुत्राभविष्यति देवक्युवाच ब्रह्मन्नाख्याहिमेसम्यक्व्रतमेतत्सुखप्रदम् १२ संतानवृद्धिकरणंसमानायुष्यवर्द्धनम् लोमशउवाच भद्रेभाद्रपदेमासिसप्तम्यांसलिलाशये १३ स्नात्वाशिवंमंडलकेलेखयित्वासहांबिकाम् संपूज्यैकादशैःसूत्रैर्युतंतंतुंदृढव्रतम् १४ सौवर्णराजतंवापिसौत्रंवाधारयेत्करे मंडकान्वटकान्शाकान्मासेपक्षेयवाद्विजा १५ स्वयंताश्चैवभोक्तव्याःव्रतभंगभयाच्छुभे प्रतिमासंतुसप्तम्यांशुक्लपक्षेविशेषतः १६ पूजांतेवाणकंदद्यात्ब्राह्मणायकुटुंबिने धारिकामुद्रिकाब्राह्मीहैमीरूप्यास्वशक्तितः १७ ताम्रपात्रोपरिस्थाप्यब्राह्मणेभ्योनिवेदयेत् आचार्यायविशेषेणसुवर्णस्यांगुलीयकम् १८ पुष्पकुंकुमसंयुक्तैस्तांबूलान्जनसूचकैः एतत्तेसर्वमाख्यातंव्रतंसंतानवर्धनम् १९ कुरुदेविप्रयत्नेनजीवद्वत्साभविष्यसि श्रीकृष्णउवाच इत्युक्त्वातुमुनिश्रेष्ठस्तत्रैवांतरधीयत २० चकारसर्वंयत्नेनयदुक्तंतेनधीमता व्रतस्यास्यप्रभावेनदेवकीमामजीजनत् २१ तस्मात्सर्वनरैःसम्यक्सुखसंततिवर्द्धनम् एवंयःशृणुयाद्भक्त्यायश्चैतत्प्रतिपादयेत् २२ व्रतमाख्यानसहितंसोपिपापैःप्रमुच्यते २३ व्याख्यानकंव्रतमिदंसुतसौख्यकामायास्त्रीकरिष्यतिशिवंहृदयेनिधाय दुःखंविहा

यबहृशाः कृतकल्मषौघान्सास्त्रीव्रताद्भवतिशोभजीववत्सा २४ स्वर्णमुक्ताप्रवालानिश्चामुक्ताभरणानि च एषां॰
दानानिदेयानिव्रतसंपूर्णहेतवे २५ इतिश्रीभविष्योत्तरपुराणेनारदांबरीषसंवादेभाद्रपदमासमाहात्म्येद्वादशो
ऽध्यायः १२ छ अंबरीषउवाच मृतवंध्यातुयानारीकाकवंध्यातथापरा गर्भस्रावाकृतुमतीनानादो
षैश्चदूषिता १ कर्मपाकेनमुच्येततद्व्रतंब्रूहिमेमुने नारदउवाच मासिभाद्रपदेसम्यक्सम्यक्स्नात्वायथा
विधि २ तस्यैवशुक्लसप्तम्यांज्येष्ठयोगेप्रपूजनम् रात्रौजागरणंकुर्यात्गीतवादित्रनिःस्वनैः ३ त्वंलक्ष्मीस्त्वमुमा
देवीत्वंज्येष्ठेसर्वदामरैः पूजितासिमयादेवि वरदाभवमेसदा ४ पुत्रदारविवृद्ध्यर्थेलक्ष्म्याश्चैवविवृद्धये अलक्ष्म्या
श्चविनाशायसर्वकालंद्विजोत्तम ५ गुरुंसंपूजयेद्भक्त्यावस्त्रैराभरणादिभिः द्वादशैवतुवर्षाणिपूजनीयाप्रयत्नतः ६
यावज्जन्मतथापूर्वविधिनानेनमानवैः ददातिवित्तपुत्रांश्चअर्चनीयासदास्त्रिया ७ अनेनविधिनायुक्तोयोहिपूजय
तेनरः नारीवापूजयत्येतांतस्यलक्ष्मीविवृद्धये ८ वंध्यातुलभतेपुत्रान्दुर्भगासुभगाभवेत् मृतवत्साजीवव॰
त्साकाकवंध्याचजीवति ९ दुःखितोहिनरःकश्चित्सर्वदाससुखीभवेत् एवंविधिविधानेनज्येष्ठायास्त्वर्चनंचरेत्
१० एवंकार्यंकुरुश्रेष्ठज्येष्ठायाःशोभनंव्रतम् नीराजनेकृतेचैवदीपोग्राह्यःसुभक्तितः ११ नैवेद्यसहितंप्राप्यव्र
तीत्वग्रेयुधिष्ठिरः गुरुहस्तात्सदाग्राह्योदीपःप्रज्वालितोमहान् १२ व्रतस्थोभक्तियुक्तश्चशुचिःप्रयतमानसः अ
नेनविधिनाचैवव्रतंमात्यंयुधिष्ठिर १३ ज्येष्ठानाममहादेवीभुक्तिमुक्तिफलप्रदा यस्तुपूजयतेराजन्तस्मैस्वर्गंप्र॰
यच्छति १४ मासिभाद्रपदेपक्षेशुक्लेज्येष्ठार्कसंयुते तस्मिन्यास्मिन्दिनेकुर्यात्ज्येष्ठायाःपरिपूजनम् १५ तत्रा
ष्टम्यांसदावारोभानोर्ज्येष्ठर्क्षसंयुते नीलज्येष्ठेतिसाप्रोक्तादुर्लभाबहुकालिका १६ कृतस्नानोत्तरःकुर्यात्तस्या
मन्यत्रवादिने नद्यांपूर्वंघुरात्हृत्यसिकताशुद्धदेशजा १७ देवीरूपंतुतत्रैवकृत्वातुब्राह्मणैःसह मंडलेतांतुसंस्था

प्यदेवींहेममयींततः १८ स्थापयेद्राजतींताम्रींरौप्यांवापरकुड्ययोः आवाहयेत्ततोदेवीमथवापुस्तकेपिवा १९
त्रिलोचनांशुक्लदंतींबिभ्रतींराजतींतनुम् विततांरत्ननयनांज्येष्ठामावाहयाम्यहम् २० सुतोक्तास्तोत्रसंपत्या
गीताचपुरतस्ततः सौवीरैश्चैवसंयुक्तोदद्यात्सामनसेप्सितम् २१ सुवासिनीभ्यःशक्त्यातद्द्याद्वैसुकृतंव्रती
तन्नूदेवीमनुज्ञाप्यततोभुंजीतवाग्यतः २२ भक्षयित्वातथाचम्यदेवींनत्वापुनःपुनः शचीघृतंचकृत्वातुकुर्यात्प्रा
तर्विसर्जनम् २३ एवमेवचकुर्यात्तुव्रतंतुप्रतिवासरम् विसर्जनांतेचततःसिकतांवारिणिक्षिपेत् २४ अपूपवटका
न्दद्यात्ब्राह्मणेभ्यस्ततोद्विजः कुर्यादेवंप्रयत्नेनसायंचार्थविसर्जनम् २५ विद्यार्थीचाप्नुयात्विद्यांस्त्रीकामःस्त्रि
यमेवच हविष्यंस्वयमश्नीयात्ब्राह्मणांस्तेनभोजयेत् २६ अनेनविधिनायस्तुब्राह्मणानांचतुष्टये व्रतांतेप्रतिमां
कुर्यात्सौवर्णींपलसंमिताम् २७ कृष्णवस्त्रेणसंयुक्तामाचार्यायनिवेदयेत् वस्त्राभरणमाल्यानुलेपनैःपूजितंद्वि
जम् २८ प्रणिपत्यततःपश्चात्तस्मैसर्वंनिवेदयेत् ब्राह्मणाभुक्तवंतस्तेप्रकुर्युःस्वस्तिवाचनम् २९ एवंकृतेव्रतेसम्य
क्सर्वशांतिःप्रजायते धनधान्यसमृद्धिश्चारोग्यंचप्रजायते ३० परमांश्रियमाप्नोतिज्येष्ठादेव्याःप्रसादतः ३१
इतिश्रीभविष्योत्तरपुराणेनारदाबरीषसंवादेभाद्रपदमाससमाहात्म्येत्रयोदशोऽध्यायः १३ छ
अंबरीषउवाच दूर्वाष्टमीतिविख्यातंस्त्रीणांसौभाग्यवर्द्धनम् सर्वकामप्रदंनृणांतद्व्रतंकथयस्वमे १ नार
दउवाच शुक्लाष्टमीतिथिर्यातुमासिभाद्रपदेभवेत् दूर्वाष्टमीतिसाज्ञेयानोत्तरासाविधीयते २ मुहूर्तेरोहिणेष्ट
म्यांपूर्वावायदिवापरा दूर्वाष्टमीतिसाकार्याज्येष्ठामूलंचवर्जयेत् ३ प्राप्तेभाद्रपदेमासिशुक्लाष्टम्यांद्विजोत्तम दूर्वा
मभ्यर्चयेद्भक्त्याज्येष्ठामूलंचवर्जयेत् ४ ऐंद्रर्क्षेपूजितादूर्वाहंत्यपत्यानिनान्यथा भर्तुरायुर्हरामूलंतस्मात्तांपरिवर्जये
त् सिंहार्कगेचकर्तव्यानकन्यार्केकदाचन ५ सिंहस्थेसोत्तमासूर्येनकार्याउदितेमुनौ अगस्त्येउदितेतातपूजयेदमृतो

द्भवम् ६ वैधव्यंपुत्रशोकंचदशजन्मनिपंचच राजन्भाद्रपदेमासिशुक्लाष्टम्यामुपोषितः ७ पूजयेच्छंकरंभ·
क्त्यायोनरःश्रद्धयान्वितः सयातिपरमंस्थानंयत्रदेवस्त्रिलोचनः ८ गणेशंशंकरंयस्तुदूर्वयापूजयेन्मुने फलैश्चस
कलैर्दिव्यैर्गंधपुष्पविलेपनैः ९ यानपूजयतेदूर्वांमोहादिह यथाविधि त्रीणिजन्मानिवैधव्यंलभतेनात्रसंशयः
१० तस्मात्सपूजनीयासाप्रतिवर्षंवधूजनैः दूर्वागणेशमीशानंमुच्यतेपूजनादघात् ११ शुचौदेशेपूजितायां
दूर्वायांराजसत्तम स्थाप्यलिंगंततोगंधैः पुष्पैर्धूपैः समर्चयेत् १२ खर्जूरैर्नारिकेलैश्चमातुलिंगैःफलैस्तथा पूज
येच्छंकरभक्त्यादूर्वायांविधिवद्द्विजाः १३ दध्यक्षतैः पुष्पफलैःरर्घ्यंदद्यात्त्रिलोचनम् दूर्वाशमीभ्यांसंपूज्यमाने·
वःश्रद्धयार्चितः १४ सर्वसत्कृतजन्मास्यात्सर्वदेवैस्तुपूजितः विद्यांप्राप्नोतिविद्यार्थीपुत्रार्थीपुत्रमाप्नुयात्
१५ धर्मार्थीधर्ममाप्नोतिकन्यार्थीलभतेचताम् मनसायद्यदिच्छेच्चतत्तदाप्नोतिमानवः १६ एवंसंपूजयेद्दूर्वां·
भूतेषामानवैःफलैः सप्तजन्मपापौघैर्मुच्यतेनात्रसंशयः १७ कृतोपवासःसप्तम्यामष्टम्यांपूजयेच्छिवम् दूर्वा
समेतंविप्रेंद्रदध्यक्षतफलैःशुभैः १८ त्वंदूर्वेमृतजन्मासिवंदितासिसुरासुरैः सौभाग्यंसंततिंदेहिसर्वकार्यकरीभ
व १९ यथाशाखाप्रशाखाभिःविस्तृतासिमहीतले तथाविस्तृतसंतानंदेहित्वमजरामरे २० स्वलिंगमंत्रैरीशान
मर्चयेत्प्रयतःशुचिः ततःसंपूजयेद्विप्रान्फलैर्नानाविधैरपि २१ अनग्निपक्वमश्नीयादन्नंदधिफलंतथा अक्षार
लवणंराजन्नाश्नीयान्मधुनान्वितम् २२ दद्यात्फलानिविप्रेभ्योफलाहारीस्वयंभवेत् प्रणम्यशिरसादूर्वांसकलशि
वमश्नुते २३ यएवंकुरुतेभक्त्यामहादेवस्यपूजनम् गणत्वंयात्यसौनूनंमुच्यतेब्रह्महत्यया २४ एवंपुण्यापापहरा
अष्टमीदूर्वसंज्ञिता चतुर्णामपिवर्णानांस्त्रीजनानांविशेषतः २५ नारदउवाच अत्रैवान्यद्व्रतंवक्ष्येसर्वका·
मफलप्रदम् शुक्लाष्टम्यांतुसंप्राप्तेमासिभाद्रपदेतथा २६ दूर्वाव्रतानामसुखेउत्तराशाभिगामिनी पूजयेद्दूहमा

नीयगंधमाल्यानुलेपनैः २७ फलमूलैस्तथाचैवदीपधूपैर्विसर्जयेत् अग्निपक्वंतथासर्वंनैवेद्यंचकथंचन २८ भो-
क्तव्यंचतथाब्रह्मन्अग्निपक्वंविवर्जयेत् दूर्वांकुरस्थांसंपूज्यविधिनायोचनाश्रियम् २९ योवनास्थिरमाप्नोतियत्र
यत्राभिजायते अष्टम्याफलपुष्पैश्चखर्जूरैर्नारिकेरकैः ३० द्राक्षामोदकपिष्टैश्चबदरैर्लकुचैस्तथा नारिंगैर्जंबुकैरा
म्रैर्बीजपूरैश्चदाडिमैः ३१ दध्यक्षतैस्स्रजाभिश्चधूपैर्नैवेद्यदीपकैः दूर्वामंत्रेणराजेंद्रपूजयेत्सरयामुदा ३२ तथापि
ष्टाभिर्विप्रैर्द्रूफलंचार्घविधंप्रभो तिलपिष्टकगोधूमधान्यपीडानिपांडव ३३ भोजयित्वासकृत्सन्मांत्रसंबंधिस्वजनांस्त
था ततोभुंजीततच्छेषंस्वयंश्रद्धासमन्वितः ३४ कर्तव्याचैकभक्तेनज्येष्ठामूलंयदाभवेत् दूर्वामभ्यर्च्य यद्भक्त्यान-
वंध्यांद्विवसनयेत् ३५ मासेभाद्रपदेचैवशुक्लाष्टम्यांद्विजोत्तमाः दूर्वाष्टमीव्रतंपुण्यंयःकरोतीहमानवः ३६ नतस्य
क्षयमाप्नोतिसंतानव्याप्तपौरुषम् नंदतेवर्धतेनित्यंयथादूर्वातथाकुलम् ३७ इतिश्रीभविष्योत्तरपुराणेनार
दांबरीषसंवादेभाद्रपदमासमाहात्म्येदूर्वाव्रतंनामचतुर्दशोऽध्यायः १४ छ नारदउवाच अस्मिन्
भाद्रपदेमासिशुक्लेज्येष्ठर्क्षसंयुता ज्येष्ठाष्टमीतिसाप्रोक्तादुःखदौर्भाग्यनाशिनी १ सर्वसंपत्प्रदात्रीदापुत्रपौ
त्रविवर्द्धिनी तस्यांव्रतंप्रकर्तव्यंमहालक्ष्म्याःप्रतुष्टये २ दिनैःषोडशभिःसार्द्धंसर्वपापप्रणाशनम् विष्णुनागो
पितंपूर्वंलक्ष्म्यागमनशंकया ३ स्कंदस्यप्रीतिभावेनकथयामासशंकर सौभाग्यजननंस्त्रीणांदौर्भाग्यपरिकृंत-
नम् ४ परमैश्वर्यजननंतद्व्रतंब्रूहिशंकर ईश्वरउवाच साधुसाधुमहाबाहोतत्पृष्टोहत्वयानघ ५ ततोहंसं
प्रवक्ष्यामिव्रतानामुत्तमंव्रतम् येनचीर्णेननरोदुर्गतिंयातिकर्हिचित् ६ सुभगादुर्भगावापिस्त्रियोनविधवागृ
हे अस्तिदेव्याव्रतंपुण्यंमहादेव्याःषडानन ७ नारीणांचनराणांचसर्वदुःखापहंतथा स्कंदउवाच देवासु
रमभूद्युद्धंपूर्णमब्दशतंपुरा ८ वृतेसुराणामधिपेदेवानांचपुरंदरे तत्रदेवैर्महावीर्यैर्नारायणबलाश्रयात् ९

असुरानिर्जिताः सर्वेपातालतलमाययुः केचिल्लंकांगताः केचित्प्रविष्टावरुणालयम् १० गिरिदुर्गंसमाश्रित्य के
चित्तस्थुर्महाबलाः तत्रकोलासुरोनाममहावीर्योमहाबलः ११ गोमंतंदुर्गमंदुर्गंगिरिमाश्रित्यनिर्भयः याराजक
न्यकालोकेरूपयुक्तामहागुणाः १२ आनीयगिरिदुर्गस्थोरमयामाससर्वशः रमयित्वाक्षयंतत्रकामरूपीविहंगमः
१३ तस्मिन्नेवतुकालेतुआगतौमुनिसत्तमौ श्रुतिप्रभावसंपन्नः पुलस्त्योगोतमः सह १४ तीर्थयात्राप्रसंगेनश्रुत्वा
वाक्यंजनस्यतम् कोलासुरेन्निजनिताकन्याहेतोःशिखिध्वज १५ तावूचतुःस्ततःसर्वेमागस्त्योस्तिमहामुनिः येन
तोयनिधिःपीतोविंध्याद्रिश्चनिवारितः १६ वातापील्वलनामानौदैत्यौयेनाविनाशितौ तंगच्छावोवयंसर्वेकोलासुरव
धये १७ इत्यामंत्र्यजनाःसर्वेगत्वातमभिवाद्यच ऊचुःसर्वेयथावृत्तकोलासुरविचेष्टितम् १८ तच्छ्रुत्वाभगवानाहमै
त्रावरुणिरग्रधीः सृष्टिस्थितिविनाशानांकारणंभक्तवत्सलः १९ रामस्यादौतपस्यंतिब्रह्माविष्णुमहेश्वराः तिस्रःसं
ध्यामूर्तिमनस्तेषांसुश्रूषणेरताः २० प्रविश्यतांमहालक्ष्मीशक्तिरूपेणसंस्थिता सर्वशक्तियुतादेवीलोकानांहितका
म्यया २१ इत्युक्तात्वरितंगत्वाकोलासुरवधात्यये निवेद्यनिखिलंतेभ्यस्तस्थुःप्रांजलयोजनाः २२ तच्छ्रुत्वानिखि
लंतेभ्योब्रह्मविष्णुमहेश्वराः संध्यात्रयंसमाहूयवाचंप्रोचुर्जनेश्वराः २३ वेदासुरवदंद्रमौलिमाणिक्यमंडल ह
निष्यतिमहालक्ष्मीयुद्धेकोलासुरंरिपुम् २४ भगवत्योमूर्तिमत्योदंडशूलादिभिर्वरैः आयुधैर्विविधैःकृत्वाजय
मास्थयसंयुगे २५ युष्माकंचसहायोसौयस्मात्क्रोधसमुद्भवः भूतनाथोभूतमन्युर्वःसहायोभविष्यति २६ इत्यु
क्तात्वरितंगत्वारुरुधुःकोलराक्षसम् निरुध्यचपुरींदेव्योन्यंगजुर्जर्जरस्वनाः २७ भिंदत्यस्त्वादिशांहृद्धेवर्धयंत्यश्चमत्
क्रुधा २८ इतिश्रीभविष्योत्तरपुराणेनारदांबरीषसंवादेभाद्रपदमासमाहात्म्येपंचदशोऽध्यायः १५ छ
स्कंदउवाच देव्याःसेनापरिक्रांतंपुरंतस्यस्मरद्विषः अकरोत्कीर्तितःसोऽपिएतन्मेकृपयावद १ ईश्वरउवाच

कोलासुरोपितच्छ्रुत्वानिर्ययौचनिजासनात् रोषेणक्रोधताम्राक्षोमेरोरिवमृगांतकः हस्त्यश्वरथपादानचतुरंगबलान्वितः २ निर्ययौपृतनायोद्धुकालिकायाइवाशनिः सकुंडलशिरस्त्राणकवचंधृतवानधीः ३ बद्धगोधांगुलित्राणःक्रुद्धोरुद्रइवापरः ततोराक्षससैन्यंनभूतनाथेनसंगतः ४ देवनारिमनोह्लासियुद्धंचक्रेतिभीषणम् महारवैर्भीमघोषैः वीणाकेंकारनिःस्वनैः ५ निस्वाननिनदश्चैवलोकसंभ्रमयाभवत् जयाभिधानंवदतांधावतामितरेतरम् ६ वरूथेसमरेघोरंमुष्टामुष्टिकचाकचि उद्धतेराक्षसेवेलेभूतनाथोमहाबलः ७ ममर्दराक्षसानीकंशरैरतिदारुणैः हतंदृष्ट्वास्वबलंक्रुद्धःकोलासुरोरणे ८ अभिद्रुत्यगदापाणिस्ताडयामासभैरवम् ययौमूर्च्छांमहाश्चर्यंतेनाभिहतमस्तकः ९ ततोदेव्यतिवेगेनताभिर्दुद्रावचाद्भुते त्रिशूलैरपिजघ्नुस्तंपट्टिशैश्चविदारयन् १० मुष्टिभिस्ताडयामासुर्नखैश्चव्यदारयन् यदाघातसमाजघ्नुःसिंहशूरवरयथा ११ सकुंडलशिरस्त्राणोदष्टोष्ठारक्तलोचनः कृतभृकुटिवक्त्रोसौराक्षसस्तांमुहुर्मुहुः १२ गदयाताडयामासशिरःकंठोरुकुक्षिषु बभंजुस्तांगदांमातुर्हसमूसमदाकुलः १३ ततोधनुर्धरोभूत्वाबालजालमवाकिरत् तासांशरीरमर्माणिभिंदन्सरपुरोगयौ १४ ननामवइवासौत्हृदयसाभिनच्छरैः तत्रयुद्ध्यस्तरास्तास्तुतंपादेजगृहुर्गुहाम् १५ आकाशेभ्रामयित्वातुर्विक्षिपुर्गगनेक्रुधा कोलासुरोपिपपाततोयावदुत्थातुमिच्छति १६ तावन्निर्गत्यलक्ष्मीस्तांपादाभ्यांप्रत्यपीडयत् तस्याजपीडितरक्षोथिकृत्यनयनेभृशम् १७ मुक्तकंठस्वनंकृत्वाततोमोहमुपेयिवान् ततोदेवाःसगंधर्वामनुष्याऋषयोस्तुवन् १८ देवनाथश्चदेव्यश्चननृतुःसंमदाकुलाः देवदुंदुभयोनेदुःपुष्पवृष्टिःपपातह १९ दिशःप्रसेदुर्मरुतोववुःसर्वसुखावहाः सुरासुरशिरोरत्नवंद्यपादांबुजास्ततः २० देव्योदिव्येनयानेनयांतिकोलापुरंप्रति आयांतींपद्मजांवीक्ष्यमुक्तपादायशृंखलः २१ तुष्टावपरयाभक्त्याराजकन्यागणोमुदा राजकन्याऊचुः वंदारुवीरसुरवृंदकिरीटकोटीरोचिर्घटानिकरकल्पितरत्नदीपम् देवित्वदीयचरणंशर

णंजनानांसेवामहे सकलमंगलवर्द्धनाय २२ उत्फुल्लकैरवदलायतलोचनायैगंडोल्लसच्चलितकुंडलमंडितायै राकाशशि
प्रतिघप्यन्ननुकोमलायैतस्यैनमः कमललोचनवल्लभायै २३ सद्रक्तकल्पलतिकांहरिकंठभूषांकेयूरहेमकटकोज्ज्वलकं
कणांकं संसारसागरमुखेपततोममाद्यदेहित्वदीयपदपीठमनगमातः २४ दृक्षादेविजनताजयार्थविबुधब्रह्मादिप·
त्यगताविष्णोर्वक्षसियाच्चकारवसतिंनीलाब्जमालादशा इंद्राद्यानतसत्वदीयचरणद्वंद्वाब्जसेवारतंकारुण्यामृतसा
रपूरितदृशामापश्यपश्येश्वरी २५ मल्लिप्रफुल्लकुसुमोज्ज्वलमध्यभागधम्मिल्लभारजिततारकवीचिविभ्रा उत्तुंगहे
मनिकषोज्ज्वलकायकांतिलक्ष्मीस्स्वयंप्रणमतांश्रियमातनोतु २६ इतिस्तुत्वामहालक्ष्मीभक्तानाभीष्टदायिनी योगि
न्योयभविष्यध्वमितितासांवरंददौ २७ इतिश्रीभविष्योत्तरपुराणेनारदाम्बरीषसंवादेभाद्रपदमासमाहात्म्येषो
डशोऽध्यायः १६ छ ईश्वरउवाच ततःप्रभृतिलोकेषुपूज्यास्ताःसर्वकामदाः ताश्चतुःषष्टियोगिन्यो
महालक्ष्मीपरिग्रहात् १ नृत्यंतिनिवहैस्तत्रगीतवादित्रनिःस्वनैः पुरोदिव्यामहालक्ष्मीकरहारपुरेनिशि २ एवं
प्रभावासादेवीविष्णुरामाषडानन व्रतस्यास्यविधानंचशृणुमत्तोविधानतः ३ मासिभाद्रपदेशुक्लेपक्षेज्येष्ठासुता·
ष्टमी प्रारब्धव्यंव्रतंतत्रमहालक्ष्म्यायतात्मभिः ४ करिष्यामिव्रतंदेवित्वद्भक्तस्तत्परायणः तवाविघ्नेनमेयातुसमा
प्तिंत्वत्प्रसादतः ५ इत्युच्चार्यततोबध्वादोरकंदक्षिणेकरे षोडशग्रंथिसहितंगुणैःषोडशभिर्युतम् ६ ततोऽन्वहम्
हालक्ष्मीपूजयेन्नियतात्मवान् गंधपुष्पैःसनैवेद्यैःयावत्कृष्णाष्टमीदिनम् ७ तस्मिन्दिनेतुसंप्राप्तेकुर्यादुद्यापन
व्रती वस्त्रमंडपिकांकृत्वामाल्यरत्नोपशोभिताम् ८ त्रिभूमिकांचसश्लक्ष्णांनानादीपैश्चशोभितां चतस्रःप्रतिमाः
कृत्वासौवर्णीस्तत्स्वरूपिणीः ९ स्नपनंकारयेत्तासांपंचामृतविधानतः षोडशोपचारैश्चधूपदीपादिभिस्तथा १०
जागरणंतत्रकर्तव्यंगीतवादित्रनिःस्वनैः ततोनिशीथेसंप्राप्तेऽभ्युदितेऽमृतदीधितौ ११ कृत्वातुस्थंडिलेपद्मंसषडंगं

प्रपूजयेत् दद्यादर्घ्यंचरागेणव्रतीतस्मैसमाहितः १२ क्षीरोदार्णवसंभूतचंद्रलक्ष्मीसहोदर पीयूषधामरोहिण्यासहि
तोर्घ्यंगृहाणवे १३ क्षीरोदार्णवसंभूतेकमलेकमलालये प्रयच्छसर्वकामान्मेविष्णुवक्षस्थलाश्रये १४ पुत्रान्देहि य
शोदेहिसौख्यसौभाग्यमेवच कालिकालिमहाकालिविकरालिनमोस्तुते १५ त्रैलोक्यजननित्राहिवरदेभक्तवत्सले
एकनाथेजगन्नाथेजमदग्निप्रियेव्यये १६ रेणुकेत्राहिमांदेविराममातःशिवंकुरु कुरुप्रियमहालक्ष्मित्वम्प्रियंत्वाशुनाशय
१७ मंत्रैरेतैर्महालक्ष्मींस्तुत्वाश्रोत्रिययोषिताम् श्रीसूक्तेनतथावन्हौपद्मानिजुहुयाच्छुचिः १८ पायसंचैवबिल्वानि
तद्दलाभेतथाघृतम् गृहेभ्यश्चैवहोतव्यंसमिच्चरुतिलादिकम् १९ चंदनंतालपत्रंचपुष्पमाल्यादिकंतथा नवेशूर्पेय·
सौभाग्यंक्षिप्त्वाबहुविधानितु २० प्रत्येकंषोडशैतानिपूगपर्णानिचैवहि तान्यन्येनसमाच्छाद्यव्रतीदद्यात्समंत्रकम् २१
क्षीरोदार्णवसंभूतालक्ष्मीश्चंद्रसहोदरा व्रतेनानेनसंतुष्टाप्रीयतांविष्णुवल्लभा २२ इंदिराप्रतिगृण्हातिइंदिरावैददाति
च इंदिरातारकोभाभ्यांइंदिरायैनमोनमः २३ दत्वार्घ्योपायनादीनिश्वश्रूश्रोत्रियायाश्चयोषिताम् चतस्रःप्रतिमास्तास्तुब्राह्म
णायनिवेदयेत् २४ एवंकृत्यंतुनिर्वर्त्यव्रतीभोजनमाचरेत् २५ इतिश्रीभविष्योत्तरपुराणेनारदांबरीषसंवादेभाद्र
पदमासमाहात्म्येसप्तदशोऽध्यायः १७ ६७ स्कंदउवाच केनेदंस्त्रीकृतंपूर्वंकथंकस्मिन्प्रकाशितम्
ब्रूहिमेतत्वतोदेवयद्यहंतववल्लभः १ शंकरउवाच आसीद्राजासार्वभौमोमंगलाणइतिश्रुतः कुंडिन्येनगरेर-
म्येतस्यपद्मावतीप्रिया २ तमागतस्ततःकश्चित्सेवकोब्राह्मणोत्तमः अज्ञानमनस्यासौनाम्नावैकेनृपस्तदा ३ तवल्लु
कइतिख्यातोबभूवद्विजसत्तम कदाचिन्मृगयासक्तोभूपालोवनमाविशत् ४ तत्रबध्वावराहादीन्मृगान्हत्वासहस्रश
क्षुत्तृट्परिगतःशांतोवृक्षमूलमुपाश्रितः ५ उदकान्वेषणेराजन्प्रेषयामाससर्वशः वनेजलंतुनापश्यत्क्वचित्श्रांताः
प्रयत्नतः ६ तेगत्वानृपतिंप्रोचुःनास्तिभइतिदुःखिताः तवल्लुकोपिवभ्रामविपिनेतदतंद्रितः ७ भ्रममाणस्तदापश्य

तत्कस्मिंश्चिद्वनगह्वरे रम्यंसरोवरंदिव्यंकुमुदोत्पलमंडितम् ८ तत्रापश्यद्देवकन्यां कन्यांदिव्यांमनोरमाम् चार्वंगींचारुन-
यनांपीनोन्नतपयोधराम् ९ हारकंकणकेयूरनूपुरालंकृतांप्रभाम् पूजयंतींमहालक्ष्मींव्रतरूपेणसादरात् १० तवल्लुको
पिपप्रच्छकिमिदंकथ्यतामिति स्त्र्युवाच महालक्ष्मीव्रतमिदंसर्वकामफलप्रदम् ११ क्रियतेस्माभिरेकाग्रमनो
भिस्तत्त्वभक्तितः तवल्लुकोपितच्छ्रुत्वाव्रतंजग्राहभक्तिमान् १२ तदनुज्ञांगृहीत्वास्यंजलमादायसत्वरः आजगामजलं·
तस्मैदत्वाचांजलिनासह १३ जलंपीत्वानृपस्तस्यपृष्टवान्दोरकंकरे किमिदंदोरकंविद्वन्किंव्रतंकृतवानसि १४ राज्ञा
पृष्टस्तवल्कोपिकथयामासतद्व्रतम् तच्छ्रुत्वाराजशार्दूलोव्रतंजग्राहभक्तिमान् १५ तवल्लुकेनसहितोराजास्वपुरमाय·
यौ पद्मावतीगृहंगत्वातयारंतुमनाःसह १६ रममाणातुसादेवीतेनराज्ञाप्रियेणवै तंदृष्ट्वादोरकंहस्तेकुपितात्यंतको
पना १७ कयात्वंवंचितोब्रूहिकयाबद्धःस्वदोरकः मावादीरन्यथात्वेतल्लक्ष्मीव्रतमनुत्तमम् १८ इत्युक्त्वाचप्रियापा
णौतंचच्छिच्छेददोरकम् ज्वालामालाकुलेवन्हौक्षिप्तवत्यतिकोपना १९ हाहाकष्टमिदंपापंकृतंमूढत्वयातथा इतिनि
र्भर्त्स्यतांराजातत्याजवनगह्वरे २० साचहानिंययौपश्चात्तत्रहानिंययौनृपः महालक्ष्म्यापचारेणसारण्येजलवर्जिते
२१ मृगमाणांवनेतस्मिन्नकश्चिद्वृत्तिमाप्नुयात् विचरंतीवनेतत्रऋषेरेकस्यचाश्रमम् २२ ददर्शवनसंकीर्णंशांतंकृ·
ष्णामृगान्वितम् तत्रापश्यद्वनेरम्येवसिष्ठंमुनिपुंगवम् २३ ववंदेचरणौतस्यविसंज्ञादुःखकर्षिता चिरंध्यात्वामुनि·
स्तस्याज्ञातवान्दुःखकारणम् २४ महालक्ष्म्योपचारेणज्ञातंविज्ञानचक्षुषा तद्व्रतंकारयामासतस्यादुःखोपशांत·
ये २५ तद्दुःखंतत्क्षणादेवनष्टमेवाभवत्तदा पुनश्चमृगयासक्तोभूपालोवनमाविशत् २६ कांचित्तमृगंसमावि·
ध्यबाणैरेकेनबाहुना अथागच्छन्मृगपदंतस्याभूच्चदयागमः २७ वरमुनिंददर्शाग्रेवसिष्ठंवीतकल्मषम् कृताति
थ्यक्रियांदृष्ट्वाचरंतींबहिरंतिकान् २८ हावभावावहासाग्रेहरंतींहरिणेक्षणा मदाभिगत्यनृपतिःप्रोवाचमधुरंवचः

२९ वामोरुकासिकल्याणीकिमर्थंजलसेवने किन्नरीमानुषी वा त्वंयक्षिणीचारुहासिनी ३० किमत्रबहुनोक्तेनभ
जमानंभजस्वमाम् नृपेणतेनभक्तोक्तांसम्यक्तांवाक्यमब्रवीत् ३१ पुनर्भजामितांहत्वाश्रेयोहिमहिषींनव महालक्ष्म्या
प्रचारेणत्वयाहीनावसाम्यहम् ३२ मुनीन्द्रस्याश्रमेरम्येतरुगुल्मोपशोभिते ममोपरिकृपाविष्टामहालक्ष्मीव्रतोत्तमम्
३३ कारयामासविधिवत्सर्वविघ्नोपशांतये तयोक्तंवचनंश्रुत्वासचोत्फुल्लविलोचनः ३४ ऋषेरनुज्ञामादायप्रियामा
दायसत्वरः हृष्टपुष्टजनैर्युक्तंपताकाध्वजसंयुतम् ३५ प्रविवेशतयासार्द्धंस्वपुरेऽभिवंदितः महालक्ष्मीव्रतंभूपस्तया
सहचकारह ३६ भुंक्तेहभोगान्निखिलान्पुत्रपौत्रैःसमावृतः भूपालःसार्वभौमोभूत्तवल्कोपात्यतायुयो ३७ महा
लक्ष्मीप्रसादेनसान्निधिःसर्वसंपदाम् एवंप्रभावासादेवीनराणामिष्टदायिनी ३८ सर्वपापहरादेवीसर्वदुःखापहारि
णी एवंषोडशवर्षेतुकर्तव्यंव्रतमुत्तमम् ३९ याकरिष्यतितांभक्त्यास्वयंसिद्धिरुपासते लोकपालाश्चपुष्यंतिदेशाइ
वमनोरथान् ४० नारीवापुरुषोकरिष्यतिमुदाभक्त्याव्रतंचोत्तमं किंवान्यद्धरिरुद्रपद्मजसुराःपुष्यंतितस्याप्रियम् तस्या
दौपरिरंजयंतिमनुजामौलिप्रभामंडलैस्तस्मिन्नेवकुटुंबिनीवसतिसालक्ष्मीःस्वयंविष्णुना ४१ मद्भक्त्यावाप्रकुर्वीतव्र
तमेतदनुत्तमम् अंतकालेस्वयंविष्णुःसंसारात्सारिरक्षति ४२ यइदंशृणुयान्नित्यंश्रावयेद्वासमाहितः नसत्यजति
तंलक्ष्मीरलक्ष्मीर्नैवकारयेत् ४३ सर्वपापविनिर्मुक्तःस्वर्गलोकेमहीयते कलाभिःषोडशैर्युक्तोयथापूर्णोनिशाकरः
४४ तथाषोडशभिःसाध्यमहोभिःपरमंव्रतम् ४५ इतिश्रीभविष्योत्तरपुराणेनारदांबरीषसंवादेभाद्रपदमास-
माहात्म्येऽष्टादशोऽध्यायः १८ ६७ नारदउवाच शुक्लस्यनवमीराजन्सर्वपापप्रणाशिनी तस्यानु-
ष्ठानमात्रेणसर्वदुःखात्प्रमुच्यते १ अतःसर्वत्रविख्यातमदुःखनवमीव्रतम् माहात्म्यंचरितंतस्यव्यासायामितते-
जसे २ पप्रच्छुःप्रणताःसर्वेनैमिषारण्यवासिनः ऋषयऊचुः येनचीर्णेनधर्मज्ञशोकंदुःखंनजायते ३ कृपाकु

रुमहाबुद्धेब्रूहिदुःखहरंव्रतम् व्यासउवाच शृण्वंतुऋषयःसर्वेशौनकाद्यामहर्षयः ४ येनराःपुण्यकर्माणोदंभा
हंकारवर्जिताः श्रद्धयानिश्चयोनित्यंनहिंसानिरताश्चये ५ यथामिलितभोक्तारोस्कारिवनःस्युः मचैवहि गुह्यंचवक्तु·
मिच्छामिदुःखनाशकरंपरम् ६ येऽदुःखनवमीप्राप्यनराश्चैव नपंडिताः शिवागच्छंतिशरणंऽत्पत्तिस्थितिकारिणीम्
७ जन्मांतरशतैर्वापिनत्तुदुःखस्यभागिनः अदुःखनवमीनामत्वयाकेयंनिरूपिता ८ भविष्यतिकदावेयंकदाकार्यं
भविष्यति पूजनीयाकथंगौरीविधानंकीदृशंतथा ९ नदेयंनास्तिकायैतद्भक्त्यायशदायच अहंवक्ष्येद्विधानेभ्योवि
धिंसर्वमशेषतः १० समाहितमनावच्मिभवंतंपुण्यदायकम् सर्वस्याद्यामहालक्ष्मीस्त्रिगुणापरमेश्वरी ११ निशा·
नंदमयीदेवीतमःपारेप्रतिष्ठिता ब्रह्मांडजननीचेयमुत्पत्तिस्थितिकारिणी १२ प्रकृतिःपुरुषश्चैव यमात्माविभिदेत्तदा
यथाशिवस्तथागौरीयथागौरीतथाशिवः १३ यथागौरीतथालक्ष्मीदुःखपापापहारिणी तासांपूजाविधानेननकश्चिद्दुः
खभाग्भवेत् १४ नभस्यशुक्लनवमीयदापूर्णातिथिर्भवेत् अस्तदोषादिहरितासर्वदुःखहरापरा १५ प्रशस्तायांनरः
स्नात्वाकृत्वानित्यविधिंततः मौनेनगृहमागच्छेत्संयतस्तत्परायणः १६ अदुःखदायिनीभूत्वाशुचिस्थानेगतस्तथा
गोमयेनविलिप्तायांशुचौमंडपिकांशुभाम् १७ सकुंभंस्थापयेत्तत्रगुडेनालिप्यभीतिकाम् आच्छादितांस्तुधूपैस्ता
इयमानंददायिनी १८ आचार्योक्तयातस्यांजगद्धात्रींप्रपूजयेत् बाणकंचददौचास्याःसषट्कन्नंफलान्वितम् १९
शक्तश्चेदुपवासेननिशिजागरणंचरेत् अशक्तेनचकर्तव्यंपयःप्राश्यमथापिवा २० फलंवापिप्रयत्नेननहिंसामाचरेत्त
था प्रभातेविमलेजातेकृत्वानित्यविधिंपुनः २१ ब्राह्मणान्भोजयेच्छक्त्यासपत्नीकांश्चविस्तथा देवींविसर्जयेत्पश्चा
तंमाचार्यंपूजयेत्तथा २२ आचार्यस्तत्स्वशाखोक्तोनववर्षाणिकारयेत् सौवर्णैर्भूषितैर्वस्त्रैःनत्वातंचसमर्चयेत् २३
पंचवाप्यथवाचैकंनारिकेलैश्चवायनम् पक्वान्नंनवसंख्याकंब्राह्मणायनिवेदयेत् २४ पश्चाद्बंधुजनैःसार्द्धंभुंजीय·

नियतःशुचिः श्रुत्वाकथांपुण्यतमांवाग्यतस्तत्परोभवेत् २५ सकदाचिन्नदुःखेनयुज्यतेनात्रसंशयः भुक्त्वाभोगा
यथाकामान्सयातिशिवमंदिरे २६ इतिश्रीभविष्योत्तरपुराणेनारदांबरीषसंवादे भाद्रपदमासमाहात्म्ये एको
नविंशोऽध्यायः १९ ६७ नारदउवाच अत्रैवोदाहरंतीममितिहासंपुरातनम् अरण्येविषमेपूर्वंशा
पदग्धाप्सराःकिल १ आसीज्जातिस्मराकाचित्तिर्यग्योनिमुपाश्रिता कुक्कुटीनामतोप्यासीत्सदादुःखेनदुः
ता २ तत्सखीमर्कटीनामतेचोभेदुःखकर्षिते अथास्मिंश्चवनोद्देशेपरस्परहितेरते ३ ऋषयऊचुः साका-
प्सराःसखीकास्याःकेनशप्तातयासह एतदाचक्ष्वभगवन्सर्वज्ञोऽसिमहामुने ४ व्यासउवाच अप्सराइंद्र
सदसिभावज्ञानामविश्रुता तत्सखीचरसज्ञाख्या उभेसर्वगुणान्विते ५ रूपलावण्यसंपूर्णेनृत्यगीतविशारदे तयोः
सौंदर्यमालोक्यस्वर्वेश्यामेनकादयः ६ आत्मानंनिंदयंत्येवखेदसंतप्तमानसाः अवेक्ष्यचमघोनापिक्षणंस्थातुंन
शक्यते ७ तयोःकटाक्षमात्रेणक्षुभ्यंत्यपिमहर्षयः अथेंद्राणीपुत्रकामावाक्याद्देवपुरोधसः ८ आगत्यमेरोःशि
रसिदशम्यादिदिनत्रयम् व्रतंचक्रेमहाभक्त्याभ्यर्चंतीरमाच्युतौ ९ तीरस्फुरत्तरंगिण्याविश्वकर्मविनिर्मिते मंदि
रेप्रतिमांविष्णोर्लक्ष्म्यायुक्तांसुलक्षणाम् १० उपचारैर्बहुविधैर्मंदारकुसुमैरपि पूजयामासपौलोमीस्वयंयदुचितैःशु
भैः ११ एकादश्यांनिशाकालेकुर्वंतिहरिजागरम् गंधर्वाप्सरसःसर्वानृत्यगीतार्थमाह्वयत् १२ हाहाद्याश्चैवगंध
र्वाःस्वर्वेश्यामेनकादयः तत्रागताःपवित्रंतुनृत्यगीतंचकुर्वतः १३ तेषांमध्येतुभावज्ञासख्यायुक्तारसज्ञया गीतंनृ
त्यंनिरूपमंकरोतिस्मचकौतुकम् १४ एवंव्रतेप्रवृत्तेतुप्रतिक्षंतंकरेदिने शच्याहूतेउभेतत्रनृत्यंगीतंचचक्रतुः १५
कदाचिद्देवराजस्तुकामार्तःकेलिमंदिरे जगामतत्रनापश्यद्विंसुर्निजवल्लभाम् १६ दूतीपप्रच्छकुत्रास्तिशचीतामा
नयच्चिरात् साप्रणम्याब्रवीत्स्वामिन्कांतातेमेरुमूर्द्धनि १७ व्रतंकरोतिनियमाद्दशम्यादिदिनत्रयम् आ यास्य

तिनचाहूतानानेयापिचसाप्रभो १८ तयाप्याज्ञापयविभोकिंकरीकिंकरिष्यति शक्रोदुतीवचःश्रुत्वाबभाषेतांस्मर
कुला१९ भावज्ञांचरसज्ञांचहृयमानयमेनिके शक्राज्ञयाततोदूतीआनयामासतेउभे २० एतस्मिन्नेवसमयेशक्रदू
तीत्वरान्विता तयोःसमययौनेतुंतेउभेहरिजागरम् २१ दूतीवाक्यंसमाकर्ण्यदूतिकाप्सरसोःशुभाः तयास्महेंद्र
भवनजगामद्रुतचारिणी २२ क्रीडावसरमालक्ष्यदूत्यौतत्रबहिःस्थिते कल्पंतेकथितंताभ्यांशच्याआव्हानमेतयोः
२३ तदार्थिताप्यदेवेंद्रंतेउभेरभसान्विते आजग्मतुर्मेरुशिरःसर्वभोगसमन्विते २४ आसवास्वादजनितमदघू
र्णितलोचने चंदनालिप्तवक्षोजेतांबूलपूरितानने २५ विमर्दिताभिःकुसुममालाभिःस्फुरतोत्सवं सूचयंत्यावंग
रुग्नोरतिदत्तनखक्षतैः २६ तेविलोक्यनिशीथोर्ध्वमागतेसमयच्युते किंचिद्रोषाकुलादेवीप्रलस्थावाक्यमब्रवीत्
२७ ब्रूतामप्सरसौनित्यंकिंविलंबस्यकारणम् अप्सराऊचुः देवेंद्रस्याज्ञयादेविक्षणंतत्केलिमंदिरम् २८
निषेवितमयोजातोविलंबःशक्रवल्लभे तदाकर्ण्यचसापत्न्यमत्सराक्रांतमानसा २९ शचीशशापाप्सरसोत्मपराधान्
प्रकाशयवै अहोपश्यतुसर्वेपिदास्योर्देवानिलंघनम् ३० येउभेअशक्तीमात्रेसतांबूलमुखेमम रूपचातुर्यवर्गेणप्रा
ष्टेदेवमंदिर ३१ सापराधेतुकर्तव्यःप्रभुणादंडएवहि नोचेन्नश्यतिधर्मोपिनष्टेधर्मेकुतःफलम् ३२ इयंतुकुक्कु
टीभूयाद्भावज्ञारूपगर्विता रसज्ञामर्कटीभूयान्नानादुःखसमन्विता ३३ शच्याशप्तेतदादूत्येभूयोभूयोप्रणम्यच
प्रार्थितापरयाभक्त्याशापमुक्तेश्चकारणात् ३४ तुष्टाशचीप्राहतयोःपरशापविमोचनम् अदुःखनवमीनामयातिथि
स्तत्रप्रावृतीं ३५ आराध्यत्वन्यकालेनभूयास्तांशोकवर्जिते एवमाकर्ण्याप्सरसौपतितेपशुजन्मनि ३६ स्मृत्युक्ता·
वावलोकात्सपुण्यजातिस्मृतोस्तयोः तस्मिन्वनेनागकन्याचरत्योव्रतमुत्तमम् ३७ ससखीमागतातत्रयूयंकिंसमुपास·
ते तैरुक्तंभवभीतानांव्रतंदुःखप्रणाशनम् ३८ आचरव्यतदापुण्यंताददुःरूपयातयोः तत्पुण्ययोगात्ससखीदिव्य-

रूपादिवंगता ३९ इतिश्रीभविष्योत्तरपुराणेनारदांबरीषसंवादे भाद्रपदमासमाहात्म्ये विंशोऽध्यायः २० ६९
नारदउवाच दशम्यांचैवशुक्लायांमासेऽस्मिन्नघनाशने कार्यंदशावताराख्यंव्रतंत्रैलोक्यवंदितम् १ विधिंत
स्यप्रवक्ष्यामिशृणुराजन्हितायते स्नात्वाजलाशयेस्वच्छेपितृदेवादितर्पणम् २ कृत्वानृपकुलश्रेष्ठगृहमागत्यमानवः
गृह्णीयाद्धान्यकणस्यप्रशस्तंप्रसृतित्रयम् ३ क्रमेणयाचयेज्जंतुःपुंसंत्तघृतसंयुतम् वर्षेवर्षेदिनेतस्मिन्नवव
र्षाणिवैतदा ४ प्रथमेपूपकान्कुर्याद्द्वितीयेघृतपूपकान् तृतीयेपूपवासारान्चतुर्थेमोदकान्शुभान् ५ साहालि
कान्पंचमेवैषष्ठेवैखंडवेष्टकान् सप्तमेह्येकोकरसान्कपुष्पंतथाष्टमे ६ नवमेकर्णवेष्टांश्चदशमेमंडकान्शुभान् द
शात्मनोदशाहरेद्दशविप्रायदापयेत् ७ क्रमेणभक्षणंदत्वायथोक्तविधिनानृप अर्द्धार्धंविष्णवेदेयमर्द्धार्द्धंचद्विजातये
८ ततोऽपरार्द्धमश्नीयाद्गत्वारम्यंजलाशयं दशावतारानभ्यर्च्यपुष्पधूपविलेपनैः ९ मंत्रेणानेनमेदद्याद्धरिमभ्युक्ष्य
वारिणा मत्स्यंकूर्मंवराहंचनारसिंहंत्रिविक्रमम् १० रामंरामंचकृष्णंचबौद्धंचैवसकल्किनम् गतोस्मिशरणंदेवंह
रिंनारायणंविभुं ११ प्रणतोस्मिजगन्नाथंसमेविष्णुःप्रसीदतु छिनत्तुवैष्णवींमायांभक्त्याप्रीतोजनार्दनः १२ श्वेत
द्वीपंनयत्वस्मात्मयात्मासंनिवेदितः एवंयःकुरुतेभक्त्याविधिनानेनसद्व्रतं १३ दशावतारनामाख्यंतस्यपुण्यफलंशृ
णु श्रूयतेयास्त्विमालोक्यपुरुषाणांदशादशाः १४ तावन्नंदतिलोकेस्मिन्यावच्चंक्रमणंभुवि संसारसागराद्घोरात् उ
द्धरत्यजगत्पतिः १५ श्वेतद्वीपंनयत्याशुव्रतेनानेनतोषितः किंतस्यनभवेल्लोकेयस्यतुष्टोजनार्दनः १६ यद्दुर्लभंयद्दुः
प्राप्यंमनसापिनगोचरम् तत्सर्वंप्राप्यतेध्यातोददातिमधुसूदनः१७ सिंहोजनार्दनःसाक्षात्कालरूपधरोच्युतः सूर्य
लोकेषुयत्सोमोभूभारोत्तारकारणात् १८ यास्त्रीव्रतमिदंपार्थचरिष्यतिमयोदितम् सालक्ष्म्याचलयायुक्तापुत्रभर्तृस
मन्विता १९ मृत्युलोकेचिरंस्थित्वाविष्णुलोकोविधीयते २० येपूजयंतिपुरुषाःपुरुषोत्तमस्यमत्स्यादिकांस्तुदशमीसुदशा

वतारान् मन्येद्दशास्त्वपिदशाक्रमुरवैविमृश्यत्तेयांतियानमधिरुह्यमुरारिलोकम् २१ एतद्दशावताराख्यंव्रतंपापप्रणा
शनम् यस्यानुष्ठानमात्रेणसर्वपापात्प्रमुच्यते २२ पुरालीलाधरोनामवत्सपालोनृपोत्तमः पातकैर्बहवोजातायोन
यःपापसंभवाः २३ व्रतस्यास्यप्रभावेनस्वर्गतोदिव्यदेहधृक् २४ इतिश्रीभविष्योत्तरपुराणेभाद्रपदमासमा-
हात्म्येएकविंशोऽध्यायः २१ छ ऋषयऊचुः कस्मात्प्रोष्ठपदेमासिकर्तव्यंपितृतर्पणम् श्राद्धंप्र-
तिदिनंतत्रकथंचपरपक्षके १ सूतउवाच पुराकुंभोद्भवोनामऋषिःपरमकोपनः विंध्यंनमयितुंदेवैःकु-
स्यानिष्कासितोयदा २ अगस्तिःकुशभृंगश्चमधुःखड्गयवास्तिलः कथंतेषामतिप्रीतिःकारणंतत्रमेशृणु ३ तदाशो
कसमाविष्टःक्रोधमोहसमन्वितः तिलायवस्तथाखड्गोमधुभृंगःकुशास्तथा ४ तैःसमागम्यतीर्थानिचकारवसुधा
तले कदाचित्समयेसोऽथसिंधुतीरमुपागमत् ५ क्षीराब्धिशायिनंद्रष्टुमार्गमब्धेरयाचत आयासमानोबहुशो
नोत्तरंजलधिर्ददौ ६ जगर्ज्जुर्निजवीचीभिर्यथामत्तामहागजाः तदावमानकोपेननिजबाहुबलेनच ७ तपःप्रभावा
त्स्वस्यापिपाणिनाब्धिंपपौमुनिः पीतेब्धौमुनिनातेनजीवाःसागरवासिनः ८ त्यक्तप्राणास्तथाकेचित्केचित्मूर्छां
प्रपेदिरे एवंकोलाहलोजातोदेवाःशर्वपुरोगमाः ९ ऋषिंसांत्वयितुंयाताःसर्वभूतहितायवै ततःकुंभोद्भवेनासौ
समुक्तोवैमहाव्रतः १० तत्राप्यशक्यचिंतांप्राप्तस्तदातंदत्तवान्वरम् पर्वसुसलिलेयस्यनकुर्वंतीहमज्जनम् ११ तेष्व
ष्टादशभिःकुष्ठैर्व्याप्नुवंतिनसंशयः तस्मात्सर्वप्रयत्नेनपर्वणिस्नानमाचरेत् १२ तीर्थानिपुष्करादीनिस्वर्धुन्याद्याः
सरिद्वराः पर्वस्नात्वायियास्यंतिनिजपापस्यमुक्तये १३ भवंतियस्मिंल्लावण्यानितथासर्वप्रियोरसः लवणोनामविख्या
तोयतःसर्वेरसाःप्रियाः १४ लवणाब्धिरितिख्यातोरत्नाकरइतिस्फुटम् एवंदत्वावरंतस्मैब्रह्माद्याःस्वालयंगताः १५
तत्रैवनिलयंकृत्वासशिष्योवाससन्मुनिः अथैकस्मिन्दिनजातेनारदःकलहप्रियः १६ वैकुंठमगमद्विष्णुंप्रणम्य

चजगादच अहोकष्टंमहाश्चर्यंकृतमागस्तिनाविभो १७ पिताजितोजलनिधिः कृतःक्षारोमृतोपमः आकर्ण्येत्थंरुषाव्याप्ताकमलाकमलापतिं १८ उवाचपरुषवाक्यवारिपूर्णाश्रुलोचना क्ष्मातलंविचरंत्येतोद्विजामत्ताइवप्रभो १९ कथंत्वंभीतभीतेवअपराधंक्षमिष्यसि नतेजानामिचरितंयदित्वंजगदीश्वरः २० एवंजल्पपरामायांआलिंग्यसांत्वयन्मुहुः अथास्मिन्दिवसेमायाविमानवरमाश्रिता २१ जगामकौतुकंद्रष्टुंसागरेजलवासिनाम् एवंसासखिभिःसार्द्धंतीरमब्धेरगात्तदा २२ तत्रदृष्ट्वाश्रमंतस्यअगस्तेःपितृवैरिणः आगतासखिभिःसार्द्धंपूर्वंद्वेषमनुस्मरन् २३ किंचिदुद्दिश्यकलहंकृत्वाशापंददौमुनेः काशीवियोगदुःखेनतस्याःशापंविजानतः २४ प्राशंक्रस्तस्यतेशिष्यास्तेषामपिशशापसा तस्याःशापभयात्त्वाङ्गःपलायनपरोयदा २५ मृगोभवत्वंखड्गेतिममवाक्यान्नसंशयः एवमुक्त्वागतालक्ष्मीस्ततःसमुनिसत्तमः २६ अगस्तिर्नामवृक्षोभूदगस्तिःकुंभसंभवः तिलोऽपितिलवृक्षःस्यात्सयवोयवधान्यकः २७ मधुर्मधुकवृक्षःस्यात्कुशतृणविशेषकः भृगोऽपिभृंगराजश्चखड्गःखड्गविशेषकः २८ तस्याःशापेनतेसर्वेवनेवृक्षत्वमागताः एकत्रैवास्थिताःसर्वेखड्गस्तत्रैवतिष्ठति २९ इतिश्रीभविष्योत्तरपुराणेनारदांबरीषसंवादेभाद्रपदमासमाहात्म्येद्वाविंशोऽध्यायः २२

६७ अंबरीषउवाच कथंशापाद्विनिर्मुक्तोभगवान्कुंभसंभवः तदहंश्रोतुमिच्छामिपरंकौतूहलंमम १ नारदउवाच गोदायाश्चतटेरम्येरक्षोभिर्निर्मितंपुरम् दशग्रीवस्यदौहित्रावातापील्वलकादयः २ रक्षोभिर्बहुभिःसार्द्धंतत्रराज्यंप्रचक्रिरे अथतेब्राह्मणैःसार्द्धंविद्वेषंचक्रुरन्वहम् ३ कृत्रिमंवेषमास्थायगंगातीरमुपाश्रिताः गृहेस्माकंपितृदिनमागतव्यंद्विजोत्तमाः ४ इतिविज्ञाप्यचानीताब्राह्मणावेदपारगाः अन्नानिइल्वलोभूत्वावातापीश्राद्धकर्मकृत् ५ गत्वातदुदरेतेषांनिर्गमेप्राणहारकाः एवंहताश्चबहवोब्राह्मणाःश्राद्धकर्मणि ६ दिनेदिनेप्रकुर्वाणःश्राद्धानिसबहून्यपि

७ एवंवसुमतीजाताश्राद्धकर्मविवर्जिता बभुक्षिताश्चपितरोजलाहारविवर्जिताः ८ हताःकेचिद्द्विजास्तैस्तु तद्भ
यात्केपलायिताः नैवोर्व्यामभवत्कर्मस्वस्वंपंचसूनादिकम् ९ देवास्तेमृतपानेनचक्रुर्मर्णस्यरक्षणम् अनन्यग
तयःसर्वेअग्निष्वात्तादयस्तदा १० ब्रह्माणंशरणंजग्मुःकथंजीवामहेवयम् ब्रह्मणासहतेसर्वेवैकुंठपुरमाययुः
११ विष्णुंनिवेदयामासुःसोब्रवीत्कमलासनम् गच्छध्वंशंकरंसर्वेसदुःखादुद्धरिष्यति १२ वैष्णवींगिरमाक
र्ण्ययुस्तेशिवसन्निधौ शिवंनिवेदयामासुर्वृत्तांतंपूर्वसंभवम् १३ निदध्यौसचिरंशंभुस्तानुवाचयथातथम् ए
तेविप्रकुलोत्पन्नाराक्षसादनुजाधमाः १४ ब्राह्मणद्वेषिणस्तेषांकेशादिभ्योभयंनहि अतोयूयंभुवंभूत्वाद्विजराज्ञे
निवेदितुम् १५ सचैतान्क्षणमात्रेणघातयिष्यतिनिश्चितम् ब्राह्मणउवाच कोऽसौद्विजवरःप्रोक्तोयएत
घातयिष्यति १६ शिवउवाच किमिदंपृच्छसेब्रह्मन्नज्ञावाह्विदितोमम सर्वेषामृषिवर्यानांश्रेष्ठंयोगी
श्वरंविदुः १७ एतांप्रियमिवोवाचश्रुत्वैवमतिदुःखितः अनाथमिवतेसर्वेनत्वाकंभूतलंययौ १८ भ्रमंतेबहु
कालेनयाज्ञवल्क्याश्रमंगताः तंदृष्ट्वासूर्यसंकाशंज्वलंतमिवपावकम् १९ तेजसादित्यसंकाशंनशशाकविलोकि
तुम् ततःपितृगणास्तस्यैदंडवन्निपपातह २० ध्यानंविसृज्यसमुनिर्ज्ञात्वातस्याभिकांक्षितम् सौम्यरूपंसम
भवत्उवाचमधुरंवचः २१ याज्ञवल्क्यउवाच किमर्थमागतायूयंत्यक्त्वालोकंचपैतृकम् पितरऊचुः
ब्रह्मन्दयानिधेस्वामिन्देवैस्त्वांप्रेषिताधुना २२ वातापेश्चविनाशायअस्माकंदुःखमुक्तये कुरुष्वतूर्णमखिलं
बहुकालबुभुक्षिताः २३ तानुवाचाथयोगीशोज्ञानमस्तिपुराकिल परमत्रकथंकार्यंकर्ताशापविमोहितः २४
अत्रवःकथयिष्यामिउपायंसर्वशंकरम् इतोगव्यूतिमात्रेतुअगस्तेराश्रमोमहान् २५ तत्रलक्ष्म्याःप्रकोपेनशापाद्वृ
क्षत्वमागताः अगस्तिर्नामवृक्षोभूदगस्तेःपरमाद्भुतः २६ तस्यच्छायांसमाश्रित्यसेवांकृत्वाजलादिभिः मदुह्रि

ष्टेनयुक्तेनकुर्वतांजपमुत्तमम् २७ तस्यप्रभावात्सुप्रीतो भवत्सान्निध्यमेष्यति हनिष्यतिमहान्घोरान्दैत्यान्
लोकस्यपीडितान् २८ अद्यैवस्थीयतामस्ययतःश्राद्धंकरोम्यहम् इतितस्यगिरंश्रुत्वास्थित्वाभुक्त्वाचनिर्गताः २९
तेनोक्तंकुर्वतःस्तोत्रंपुनश्चक्षुधयायुताः पुण्यानितस्यवृक्षस्यभक्षयंत्यखिलान्यथान् ३० पत्राणिभृंगिराजस्य
कुशेरास्तरणात्तथा भोजनमधुपर्णंचपात्रंखड्गमृगस्यच ३१ तथैवमधुवृक्षस्यमक्षिकाभिःकृतंमधु भक्षयंतस्य
तेसर्वेक्षुधयापरयायुताः ३२ एवंपक्षेव्यतिक्रांतेसंतुष्टोमुनिसत्तमः गोचराभूदिंद्रियाणांमुनीनांप्रवराभुवि ३३
ततस्तेपितरःसर्वेकृत्वापादाभिवंदनम् बद्धांजलिपुटाःसर्वेस्तुतिस्तोत्रंप्रचक्रमुः ३४ इतिश्रीभविष्योत्तरपुरा
णेनारदांबरीषसंवादेभाद्रपदमासमाहात्म्येत्रयोविंशोऽध्यायः २३ छ पितरऊचुः वेदशास्त्रपुराण-
ज्ञसर्वागमविशारद नमस्तुभ्यंत्रिकालज्ञकुंभयोनेनमोनमः १ सर्वदाखिललोकानांसर्वांतर्यामिणेनमः इल्वला-
दिभयत्रस्तावयंतेशरणागताः २ त्राहिनःसर्वदुःखेभ्योभूमिदेवनमोस्तुते नारदउवाच इतिस्तुत्यात्वसंप्री
तःप्रोवाचास्यघटोद्भवः ३ अगस्तिरुवाच ज्ञातमेवभवत्कार्यंपरंशापसमावृतः मुक्तःसंश्चकरिष्यामिभव
च्छोकनिवारणम् ४ पितरऊचुः कथंत्वशापसंयुक्तःकस्मान्मुक्तिर्भविष्यति अगस्तिरुवाच लक्ष्म्याकृ
तमिदंसर्वमज्ञानाच्छापकारणम् ५ तामानयध्वंत्वरयाशापमुक्तिंकरिष्यति ततःपितृगणाःसर्वेवैकुंठंत्वरयाय-
युः ६ तानिवेद्यरमासार्द्धमानिन्युःपीतवाससं सोपिदृष्ट्वामुनिवरःसाष्टांगप्रणनामच ७ स्तुतिंबहुविधांकृत्वा
प्रार्थयामाससादरम् तद्दृष्ट्वालज्जितासाध्वीप्रणनामाप्यधोमुखी ८ स्त्रीत्वादज्ञानयुक्तत्वाद्यत्कृतंदुष्कृतंमया त-
त्क्षमस्वकृपासिंधोहंतवास्मिचपुत्रिका ९ एवंविवदमानायाविष्णुनाप्रार्थितासती वृक्षादाविरभूत्सद्योयथापूर्वं
नृकेसरी १० ततोदेवाःसगंधर्वाऋषयश्चतपोधनाः आगतादर्शनार्थायस्तुवंतोविविधैस्तवैः ११ नेदुर्दुंदुभयः

स्वर्गेपुष्पवृष्टिःपपातह ततःप्रार्थयतःसर्वेहन्यतांइल्वलादयः १२ तथेत्युक्त्वामुनिवरागताःसर्वेनिजालयम् शिष्यैःपि
तृगणैःसार्द्धंइल्वलंहंतुमाययौ १३ वातापीरिल्वलश्चैवतथाचान्येनिशाचराः निहन्युःक्षणमात्रेणसमिधोग्निर्यथातृणं
१४ गंगातीरंसमासाद्यद्विपक्षमुषितास्ततः ततःपितृगणान्सर्वान्दत्वाज्ञांस्वयमाययौ १५ लिंगंरामेश्वरंदृष्टुंका
शीविरहपीडितः ततःप्रभृतितेसर्वेअगस्त्याद्यामहीसुराः १६ माक्षिकंखड्गपात्राणिपितृवल्लभतांगताः तैर्विना-
येप्रकुर्वन्तिश्राद्धंज्ञानविमोहिताः १७ तत्सर्वंनिष्फलंतेषांकर्तारोनिरयंव्रजन् भाद्रस्यापरपक्षेचमुनिवृक्षसमाश्रि-
ताः १८ कंदमूलफलाहाराःक्षुधयापीडिताभृशम् मृत्युलोकस्थितायस्मात्तस्माद्यत्नेनकारयेत् १९ प्रत्यहंपक्षप-
र्यंतंसार्द्धंसर्वैर्द्विजातिभिः पक्वान्नैःपायसैःपूपैर्मधुखंडघृतादिभिः २० भक्ष्यैर्भोज्यैर्लेह्यचोष्यैर्व्यंजनैर्व्यंजनांतरैः
आतृप्तिस्तृप्तिपर्यंतंब्राह्मणान्भोजयेत्तथा २१ तथैवपिंडदानानिकार्याणिप्रतिवासरम् अगस्तिवृक्षमाश्रित्यापिं
डदानंकरोतियः २२ तस्यपितृगणाःसर्वेतृप्तायांतिपरांगतिम् यावंतःसंतिसिक्थानितावद्वर्षशतानिच २३ तृप्यं
तिपितरःसर्वेगयाक्करशिरेयथा अभावेतस्यपुष्पाणिभृंगिराजदलानिच २४ दर्भैरास्तरणंकार्यंपूजनंचयवैस्तिलैः
ब्राह्मणान्मधुपर्णेषुमाक्षिकाद्र्युतेषुच २५ एतैर्विहियच्छ्राद्धंगयश्राद्धसमंभवेत् आशक्तेनैवदिवसंकार्यंभक्तिपु
रःसरम् २६ संकटेचतदाप्राप्तेतत्कार्यंवृश्चिकावधि यतःसर्वेपितृगणास्तुलासंस्थेदिवाकरे २७ गंगातीरंसमासा
द्यस्वर्लोकंवृश्चिकेततः अतःक्षाम्यंतितेसर्वेश्राद्धार्थंवृश्चिकावधि २८ ततोनिराशागच्छंतिशापंदत्वासुदारुणम्
येनकुर्वंतियेमोहात्तच्छ्राद्धंवृश्चिकावधि २९ तेयांतिनिरयान्घोरान्पुत्रदारविवर्जिताः एवंप्रोष्ठपदेमासिपूज्यः
सर्वगुणैरपि ३० यइमांश्रावयेद्गाथांपितृश्राद्धदिनेदिने नेपितृलोकमक्षय्यंयातिब्रह्मसनातनम् ३१ इतिश्रीभ०
भाद्रपदमासमा० चतुर्विंशोऽध्यायः २४ छ नारदउवाच शुक्लेप्रोष्ठपदेचैवश्रवणर्क्षसमन्विता द्वादशीसर्वपाप

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

घ्नीदुर्लभाभुविमानवैः १ तस्यामाविरभूत्साक्षाददितेर्लोकविश्रुतः बलिदैत्यविनाशाय वामनोदैत्यवामनम् २ वामनेतिसुमाख्यातासर्वपापप्रणाशिनी अस्याव्रतविधिःपूर्वमयापृष्टःपितामहः ३ यस्यश्रवणमात्रेणशृण्वतांरोमहर्षणम् सर्वपापप्रशमनंसर्वशास्त्रेषुगोपितम् ४ ब्रह्मोवाच शृणुष्वावहितोब्रह्मन्कथ्यमानंमयानघ तिथिनक्षत्रसंयोगमुपकारकरन्नृणाम् ५ अल्पायासेननुमहत्फलतुप्राप्यतेनरैः नारदउवाच श्रवणेनसमायुक्ताद्वादशीयदिजायते ६ शुक्लपक्षेद्विजश्रेष्ठविजयासाप्रकीर्तिता एकादश्याप्रोष्ठपदेश्रवणंवर्ततेयदि ७ उत्पन्नोभगवान्विष्णुर्दैत्यानाहितकाम्यया पुरादेवगणैःसर्वैःसमेतस्तुमहर्षिभिः ८ वरदोयाचितोविष्णुरिंद्राग्न्यनिलसंयुतैः बलवानजितोदैत्योबलिनाममहाबलः ९ तेनदेवगणाःसर्वेजितानाथत्वमिंदिरात् जहिदैत्यंमहाबाहोबलिंबलवतांवर १० श्रुत्वाविष्णुस्तदावाक्यंदेवानांकरुणान्वितम् विष्णुरुवाच जानेवैरोचनेःपुत्रंबलिंत्रैलोक्यकंटकं ११ मद्भक्तमद्गतप्राणंसत्यसंधंमहाबलम् समाहृत्यश्रियंतस्यतदादास्येदिवोकसा १२ अदितिर्मांप्रपन्नावैपुत्रार्थंपुत्रकांक्षिणी तस्याश्चाभीप्सितंदेव्याःकरिष्येनात्रसंशयः १३ गच्छध्वंचनिरुद्विग्नाकिंचित्कालःप्रतीक्ष्यताम् एवंश्रुत्वागतादेवाःकार्यंविष्णोर्निवेदयत् १४ अथकालेबहुगतेजातासागर्भिणीप्रभो प्रसूतानवमेमासिपुत्रंसावामनंहरिम् १५ ह्रस्वस्वरपदंदेवंबृहत्कंदत्वरान्वितम् दृष्ट्वातंवामनंजातंसादितिर्मुदिताभ्यभूत् १६ एकादश्यांभाद्रपदेयच्छ्रुत्वाचनरोत्तम भयंबभूवदैत्यानांदेवानांतोषवर्द्धनम् १७ त्रिबद्धमेखलोदंडीतथायज्ञोपवीतवान् रुरुकृष्णाजिनधरःकमंडलुविभूषितः १८ बलेर्बलवतोयज्ञंजगामबहुविस्तरम् दृष्ट्वाबलिस्तंप्रोवाचत्वंकिंप्रार्थयसिमेप्रभो १९ अर्थीयज्ञपतेधीमन्दीयतांमेदिनीमम पदत्रयप्रमाणेनमखस्यार्थेमहीपते २० दत्तादत्तातुतेब्रह्मन्बलिःप्राहद्विजोत्तमम् शुक्रस्तुवचनंश्रुत्वाकार्यमालोक्यतामिदम् २१ आदौक्षिप्रंनकर्तव्यंमहीदानंमहीपते मायारूपधरोभूयात्मायारूपंप्रजायते

२३ तस्मात्कार्यंप्रयत्नेनवाक्यंमममहीपते ततस्त्वाल्हष्टदेहोसौकमंडलुमथाविशत् २४ भार्गवोपिहितद्वाराजलंनैवपपात-
ह कुशेनातुधृतद्वारंभिन्नंचक्षुर्भृगुस्तथा २५ ब्रह्मचारीबलिंप्राहदानंकुरुयथाविधि कमंडलुजलेनैवददौतस्मैमहीमिमां २६
ततोवर्धितुमारेभेवामनोनंतविक्रमः भूमौपादंप्रतिष्ठाप्यलोकत्रयमथाक्रमत् २७ प्रथमेनधराव्याप्ताद्वितीयेनपदावियत् नपा
दस्यतृतीयेतुस्थानंलेभेप्रजापते २८ ततोबलिरुवाचेनंवामनंज्ञातविक्रमम् मस्तकेमेतृतीयंतुपदंधारयवामन २९ बलेर्वचन
माकर्ण्यतथेतिवामनोब्रवीत् हरिराहबलिंशीघ्रंगच्छपातालकंप्रति ३० तत्रत्वमीप्सितान्भोगान्भुंक्ष्वमद्बाहुपालितः अस्य
त्विंद्रस्यावसानेत्वमेवेंद्रोभविष्यसि ३१ एतच्छ्रुत्वाबलिःप्रीतोनमस्कृत्वाजनार्दनं विसृज्यैवंबलिंदेवोलोकपालानुवाचह ३२
स्वस्थानंप्रतिगच्छध्वंसर्वेदेवगणास्तथा एवंश्रुत्वागतादेवाल्हष्टेसंपूज्यवामनं ३३ एवंकृत्वादेवकार्यंतत्रैवांतरधीयत एतत्स
र्वंसमभवद्द्वादश्यांनरोत्तम ३४ विधानंतस्यवक्ष्यामिशृणुष्वगदतोमम· नारीवापुरुषोवापियःकुर्याद्विधिवद्व्रतम् ३५ ब्र
ह्मणोदिवसोयावत्तावत्स्वर्गेमहीयते कृत्वासौवर्णकंदेवंवामनंभूतभावनम् ३५ उपोषितोनरोभूम्यांस्थापयेत्प्रतिमांशुभां पू
जयेत्प्रथमंविप्रदेवदेवंजनार्दनं ३६ ततस्तस्याग्रतःशुभ्रंन्यसेत्कृष्णाजिनंबुधः कुशानास्तीर्यसाग्रांश्चचंदनागरुधूपितान् ३७
तस्योपरितिलानांचकृष्णानामाढकंन्यसेत् मध्यमःप्रस्थमेकंतुदरिद्रःकुडवंन्यसेत् ३८ तिलाभावेयवाःप्रोक्तागोधूमास्तदभ
वतः मुख्यंतत्रतिलैर्ब्रह्मन्संपूर्णंप्राप्यतेफलम् ३९ तेषामुपरिसौवर्णंवामनंविन्यसेद्बुधः ततःसंपूजयेद्देवंभक्त्यायुक्तोज-
नार्दनं ४० मत्स्यायपादौप्रथमजंकूर्मायेतिकटिंतथा वराहायेतिजठरंनृसिंहायेतिवैउरः ४१ वामनायेतिकंठंतुबलिद्वारस्थिता-
यच वामेपरशुरामश्चभुजौरामायतेनमः ४२ कृष्णनाम्नाचनेत्रेचबौद्धनाम्नातथाशिरः मत्स्यकूर्मौवराहश्चनारसिंहोऽथवा-
मनः ४३ रामोरामश्चकृष्णश्चबौद्धःकल्कीचतेदश अनेनविधिनापूज्यवामनंभक्तिसंयुत ४४ ततस्तस्याग्रतस्तत्रविधिभक्ष्यघट
न्यसेत् करकंसोदकंतत्रस्रग्गंधैश्चसमन्वितं ४५ छत्रंकृष्णाजिनंतत्रपादुकेकुंडलंतथा नैवेद्यंविविधंभक्ष्यंसर्वंतच्चनिवेदयेत्

४६ ततःप्रभातेविमलेस्नात्वाहुत्वाहुताशनं द्यात्तद्विजवर्यायवामनंतिलसंयुतं ४७ जयाचेतिसमाख्यातासर्वपापप्रणाशिनी उपो
ष्यासाप्रयत्नेनसर्वान्कामानवाप्नुयात् ४८ गच्छेद्विष्णुपदंदिव्यंक्रीडत्यकालमक्षयम् इहागत्यभवेद्राजाशत्रुपक्षक्षयंकरः ४९ पुत्रपौ
त्रपरिवृतोजीवेच्चशरदांशतं उपोष्यद्वादशींतत्रसंगमेस्नानमाचरेत् ५० दानंदध्योदनंतत्रउपवासपरोव्रती ५१ इतिश्रीभ० भा०
वामनावतारवर्णननामपंचविंशोऽध्यायः २५ छ ब्रह्मोवाच केनचेदंपुराचीर्णंमर्त्यैकेनप्रकाशितं एतत्समस्तंविस्तारंकथय
स्वमुनीश्वर १ नारदउ० हरिदत्तइतिख्यातोवणिक्धर्मविशारदः स्वभांडंविविधाकारंप्रगृह्यबहुवामनः २ जलमध्येतुतद्भिन्नं
भांडंतस्यद्विजोत्तम निर्गतोजलमध्यात्तुवणिक्धर्मविशारदः ३ निर्वृक्षेनिर्जलेदेशेवायुनातत्रपीडितः तत्रसप्रजगामाथमरुदेशं
निराश्रयम् ४ सददर्शमहांतंचवटवृक्षंकिलोत्तमम् क्रोशमात्रपृथुत्वेनाद्विगुणंचतथोन्नतम् ५ सांद्रजीमूतसंकाशंवटवृक्षंस
दृष्टवान् पिशाचानांगणास्तत्रनानारूपधरास्तथा ६ भीषणानांविरूपाणामनेकानांसहस्रशः तेषांमध्येमहाकायःक्रूररूपःशुभदर्शनः ७
तत्रोपविष्टाःसर्वेतेवटच्छायांसमाश्रिताः माध्यान्हेचतदासर्वेतृषार्ताश्चबुभुक्षिताः ८ एतस्मिन्नंतरेविप्रशिष्यमेकमुपस्थितं वटच्छायांस
मासन्नंजलपात्रसमन्वितं ९ तंदृष्ट्वामुदिताःसर्वेपिशाचाःक्षिप्रमूचिरे देहिदेहिजलंसर्वमन्नंसर्वंबुभुक्षिताः १० शिक्यस्थमन्नमानी
यसर्वेभ्यःसंप्रयच्छत वैश्यायचददौचान्नंपानीयंचातिथिप्रियः ११ ततोभुक्त्वास्वयंतेतुउपविष्टाःस्वस्थासने तंपप्रच्छततोवैश्यः
पिशाचाधिपतिंतदा १२ पीतेतथैवपानीयेकिमाश्चर्यमभूदिदं प्रेताःसर्वेऽस्तुवन्मध्येपुण्यंतत्त्वंकिमद्भुतं १३ एतत्सर्वंप्रयत्नेनवद
सर्वंममाग्रतः पिशाचपतिरुवाच अहमासंपुराराजाबहुभृत्योमहाबलः १४ तत्रमेकुर्वतोराज्यमन्यायाबहवःकृताः विधवा
श्चमयार्ताःस्वरूपाभोगिताबलाः १५ एवंपातकयुक्तेनकुर्वतापापमुत्कटं एवमाचरतापापकृतंराज्यंमयापुरा १६ पुरोहितोम
यादृष्टोततोगृहमुपागतः सचविप्रमयापृष्टःकिमर्थंत्वमुपोषितः १७ ततश्चकथितंतत्रश्रवणद्वादशीव्रतं फलंतस्याद्विजश्रेष्ठमम
देहिद्विजोत्तम १८ पुरोहितेनतत्सर्वंममदत्तंपुरानघ पूजितश्चमयाविप्रोदत्वाभूमिंहिरण्मयीं १९ चंदनंचमयादत्तंवस्त्राणि

कांचनानिच पिशाचमध्येराजाहंश्रवणद्वादशीव्रतात् २० एतेनसर्वपापिष्टाःपिशाचत्वमुपागताः मांवहंतिवनान्नित्यंअन्नकामाबुभुक्षिताः २१ उपोषितबलेनैवजातिस्मरणमुत्तमम् दधिभक्तप्रदानेनजलांतंचाक्षयंत्विदम् २२ एतत्सर्वंमयाख्यातंदृष्टंचयद्वणिक्सुत उपकारायसर्वेषांब्रवीमिशृणुष्वतत् २३ राजधान्यांमयान्यस्तंसौवर्णंभूगतंमम मयातेकथितंवैश्यशमीवृक्षमधिष्ठितं २४ तदादायत्वमद्यैवगयांगच्छममाज्ञया तत्रपिंडाःप्रदातव्याःसर्वेषांहितकाम्यया २५ पिशाचानांचसर्वेषांयथापापक्षयोभवेत् तत्रसंपुटिकाहस्तेसर्वेषांनामगोत्रकं २६ संलिख्यनामगोत्रादिकुरुश्राद्धादिकांक्रियां श्रुत्वावाक्यंपिशाचस्यतथेत्युक्त्वाजगामसः २७ राजधान्यांततोगत्वातदादायधनंमहत् गत्वागयांचमेधावीपरोपकरणेरतः २८ ददौपिंडान्पिशाचानांनामगोत्राणिसर्वशः तेनपुण्येनतेसर्वेविमानस्थास्तमूचिरे २९ साधुसंगोनहिवृथाकदाचिदपिजायते कालेनफलतेतीर्थंसद्यःसाधुसमागमः ३० एवमुक्त्वागताःसर्वेविमानैःसूर्यसन्निभैः हरिदत्तोपितान्सर्वान्समुद्धृत्यजगामसः ३१ स्वदेशेचस्वकेदारस्वगृहंचावसत्पुनः ३२ एतत्सर्वंमयाख्यातंश्रवणद्वादशीव्रतं भार्यासहव्रतंतेनचरितंचयथाविधि ३३ असमर्थोपियःकश्चिच्छृणुयादपिभक्तितः सोपिसद्गतिमाप्नोतिमुच्यतेसर्वकिल्बिषात् ३४ विष्णुलोकमवाप्नोतिभुक्त्वाभोगान्यथेप्सितं एतद्व्रतंविधानेनब्रह्मणाकथितंमम ३५ तत्सर्वंकथितंतेद्यविस्तारेणयथातथम् तत्कुरुष्वविधानेनसर्वकामसमृद्धये ३६ व्रतमेतन्नकुर्वंतिमासव्रतपरायणाः तेषांविफलतांयातिसर्वंमासकृतंव्रतम् ३७ इतिश्रीभविष्योत्तरपुराणेभाद्रपदमा॰ वामनाख्यानंनामषड्विंशोऽध्यायः २६ छ

ऋषयऊचुः अस्मिन्मासेविशेषेणस्त्रीभिःसौभाग्यसिद्धये कर्तव्यंचव्रतंदानंतदेवकथयस्वनः १ सूतउवाच साधुसाधुमहाभागास्तद्वक्ष्यामियथातथम् नभस्यस्यत्रयोदश्यामारभ्यत्रिदिनंव्रतम् २ गोत्रिरात्रमितिख्यातंनारीणांसुखदायकं ब्रह्मक्षत्रियविट्शूद्रैस्तथाचेतरजातिभिः ३ स्त्रीभिर्वापुरुषैर्वापिकामुकैर्वामुमुक्षुभिः ऋषयऊचुः त्वयायत्कथितंसूतगोत्रिरात्रव्रतंशुभम् ४ तत्समासेननोब्रूहिकृपयाऋषिसत्तम एवमेवपुरापृष्टःपुलस्त्योभगवानृषिः ५ इंद्रद्युम्नेनजगतिनारी-

णामुपकारकम् इंद्रद्युम्नउवाच भगवन्कर्मणाकेननारीणांप्राप्यतेध्रुवम् ६ सुखंसौभाग्यमतुलंसर्वान्कामांश्चतद्वद पु
लस्त्यउवाच राजंस्तवाहंवक्ष्यामिव्रतानामुत्तमंव्रतं ७ तीर्थानामुत्तमंतीर्थंपुण्यानामुत्तमोत्तमं गावःपूज्याश्चवंद्याश्चगावो
मेदैवतंमहत् ८ पूजनीयाःसदाभक्त्यागावोलोकस्यमातरः अग्निहोत्रायविप्राणांदेवानामर्चनायच ९ पूजयेदसकृत्ताश्च
किंभूतमधिकंततः गोरोचनंतुमांगल्यंपवित्रार्थस्यसाधनम् १० गोमूत्राद्गुग्गुलोजातःसुगंधीप्रियदर्शनः आहारःसर्वदेवा
नांशिवस्यचविशेषतः ११ सर्वस्मादधिकंसर्वंज्ञेयंगोरसमुत्तमम् दद्यात्सर्वाणिजातानिमांगल्यान्यर्थसिद्धये १२ घृतंसंभू
तममृतंदेवानांतृप्तिकारकम् ब्राह्मणाश्चैवगावश्चकुलमेकंद्विधाकृतम् १३ एकत्रमंत्रास्तिष्ठंतिहविरन्यत्रजायते गोभि
र्यज्ञाःप्रवर्तंतेगोषुतीर्थानिसर्वशः १४ गोभिर्वेदाःसमुद्गीर्णाःसषडंगपदक्रमात् शृंगमूलेगवांरुद्रःब्रह्माविष्णुश्चसंस्थि-
ताः १५ शृंगाग्रेसर्वतीर्थानिस्थावराणिचराणिच शिरोमध्येमहादेवःसर्वकारणकारणम् १६ ललाटेसंस्थितागौरीतयोर्म-
ध्येचषण्मुखः कंबलेतरथोनागानासापुटमवस्थिताः १७ कर्णयोरश्विनौदेवौनेत्रयोश्चप्रभाकरौ दंतेषुवायवःसर्वेजिह्वायां
वरुणःस्थितः १८ संध्यात्रयंतदोष्ठेषुग्रीवायांचपुरंदरः रुद्राणीकाकुदेचैवपाणिभ्यांचव्यवस्थिता १९ चतुष्पदेषुसकलोधर्मोनि
त्यंसुतिष्ठति खुरप्रदेशेगंधर्वाःखुराग्रेपिचपन्नगाः २० खुराणांपश्चिमेभागेराक्षसाःसंतिसर्वदा एकादशतथारुद्राःपृष्ठदे-
शेव्यवस्थिताः २१ नासांत्रैलोक्यमातॄणांवसवःसर्वसंधिषु श्रोणीतटस्थाःपितरोगुल्फदेशेषुमातरः २२ क्षीरपानेगवांनित्यं
स्वाहालांगूलमाश्रिता यत्रत्रिंशत्कोटिसुरारोमकूपेव्यवस्थिताः २३ उदरेपृथिवीसर्वासशैलवनकानना चत्वारःसागराःप्रो-
क्तागवांचापिपयोधराः २४ पर्जन्यःक्षीरधारासौसुप्रश्रावेतथाजलं गवांपुच्छेवसेद्धर्मोजघायांवास्तुरेवच २५ आदित्यरश्म
यःकेशेगोमयेयमुनास्थिता जठरेगार्हपत्योग्निर्दक्षिणाग्निर्हृदिस्थितः २६ मुखेश्चाहवनीयोग्निर्वेदाश्चत्वारएवच सर्वदेवमयी
गावःसर्वेगावमयाःस्मृताः २७ एवंप्रभावोराजेंद्रइंद्रद्युम्ननिबोधच पूजितावंदितागावःसर्वकामफलप्रदाः २८ तासांव्रतंत्रि

रात्रंतुसर्वपापापहंनृप २९ इतिश्रीभवि॰ भाद्रप॰ गोत्रिरात्रिव्रतविधानेसप्तविंशोऽध्यायः २७ छ. राजोवाच क
स्मिन्मासेतिथौकस्यांव्रतंकार्यमनुत्तमं नारदउवाच मासेभाद्रपदेमासेपितॄणांतृप्तिकारके १ शुक्लपक्षेत्रयोदश्यांनियमस्थो
भवेद्व्रती ब्रह्मचारीभूमिशायीशुचिःसंजितमानसः २ दिनत्रयेव्यतिक्रांतपरिपूर्णव्रतंतथ करिष्येपारणंमातर्व्रतंमेपूर्णमस्त्विति
३ धृतंत्रिरात्रमुद्दिश्यतिष्ठेद्गोस्थानमध्यतः ततोमध्यान्हसमयेनद्यादौस्नानमाचरेत् ४ तदभावेऽथराजेंद्रगोवाटस्नानमाचरेत् स
र्वतीर्थमयोयस्मात्गोवाटःसद्भिरुच्यते ५ गौरसर्षपकल्केनगात्रमुद्वर्तयेद्व्रती दूर्वामृद्गोमयांभोभिःसाक्षतैःस्नानमाचरेत् ६
यःस्नात्वोपास्यसंध्यांचसंतर्प्यपितृदेवताः मौनीगोवाटमास्थायगवांकुर्यात्प्रदक्षिणं ७ तत्रास्थाप्यशुभंकुंभंसान्नंस्वर्णसमन्वि
तं पात्रमौदुंबरंकुर्यात्दिव्याक्षतप्रपूरितम् ८ लक्ष्मीनारायणःकार्यःशक्त्याहेममयोनृप लक्ष्मीयुतश्चतुर्बाहुर्नानालंकारमं
डितः ९ प्रतिष्ठाप्यशुभैर्मंत्रैर्वेदोक्तैःस्नापयेत्ततः विलेप्यशुभ्रैश्चंदनैःपूजयेत्कुसुमैःशुभैः १० परिधाप्यशुभैर्वस्त्रैःपुष्पमंड
पमाचरेत् घृतपक्वंतुनैवेद्यंधूपःकृष्णागरुःस्मृतः ११ एवंकृत्वाशुभांपूजांसर्पिषादीपमाचरेत् त्रिदिनंनरशार्दूलसगुप्तदेवसन्नि
धौ १२ फलेननारिकेलेनतथापंचयुतेनच अर्घस्तस्मैप्रदातव्योदेवदेवायचक्रिणे १३ सप्तधान्ययुतेनापिवंशपात्रप्रपूरितः भगवन्दे
वेशसंसारार्तिप्रणाशन १४ लक्ष्म्यासहजगन्नाथगृहाणार्घ्यंनमोस्तुते ततोनीराजनंकुर्यात्संकल्पविधिमाचरेत् १५ नमस्कृत्य
हरिंपश्चात्पूजयेद्गांसवत्सकां क्षीरोदधिसमुद्भूते यज्ञार्थंत्रिदिवौकसः १६ गतिस्त्वंसर्वदेवानांगृहाणार्घ्यंप्रसीदमे चंदनैःकुसु
मैर्वस्त्रैर्हेमभूषणभूषितैः १७ घंटादिभिरलंकारैरलंकृत्यकृतांजलिः ददातिचसतांधेनुंदत्तातारयतेध्रुवम् १८ पूजिताचस्तुता
सावैसौख्यंपुत्रान्ददातुमे दद्यादर्घ्यंततोधेनोःफलैःकालोद्भवैःशुभैः १९ भूरिणाबलिदानेनपरितोषसमाचरेत् एवंविधिप्रपू-
ज्याथव्रतंकुर्याद्दिनत्रयं २० रात्रौजागरणंकार्यंनृत्यगीतकथानकैः गवांमाहात्म्यमतुलंश्रोतव्यंभक्तिभावतः २१ वैष्णवंचरितंपुण्य
पुण्यार्थंगीतमाचरेत् चतुर्थेदिवसेप्राप्तेपुनःपूजांसमाचरेत् २२ सपत्नीकान्द्विजान्राजन्भोजनार्थंनिमंत्रयेत् द्वादशाष्टौसदाना

रान्चतुरोवास्वशक्तितः २३ भोजयेद्विविधैरन्नैर्मंडकैःपायसेनवा अभुक्तेभ्य स्ततस्तेभ्य स्तांबूलंदक्षिणान्वितं २४ दद्याद्वासांस्यलंकारान्माल्यचंदनसंयुतान् दद्याद्वंशस्यपात्राणिविरुढैःपूरितानिच २५ पक्वान्नैर्नारिकेलैश्चतथैवचविविधैःफलैः पूजांकुर्याद्योषितांचभर्तृभिश्चसमन्विताः २६ आचार्यंसकलत्रंचवासांसिपरिधापयेत् दंपती सदलंकारैर्हेमनिष्कैःप्रपूजयेत् २७ गांचसोपस्करांदद्यात्सुशीलांचपयस्विनीं सदक्षिणांसवत्सांचवस्त्रालंकारभूषिताम् २८ गुरवेप्रतिमांविष्णोःसोपस्करांप्रदापयेत् मंत्रेणानेनभक्त्याचविष्णुर्मेप्रीयतामिति २९ सुवासिनीर्द्विजान्सर्वान्प्रणिपत्यक्षमापयेत् गोष्ठंयावत्व्रजेत्सृष्टगीतनृत्यपुरःसरं ३० गोपानांचैवपाथेयंदेयंपूपकदंबकम् बंधुभिर्भोजनंकुर्याद्यवैश्चगोपयोघृतैः ३१ एवंयःकुरुतेभक्त्याव्रतंत्रैरात्रकंमहत् कुंतेयत्फलमाप्नोतिएतन्मेमुखतःशृणु ३२ सर्वतीर्थेषुयत्पुण्यंसर्वदानेषुयत्फलम् तपोभिःसकलैर्यच्चतदवाप्नोत्यसंशयः ३३ एतद्व्रतंसकलकल्मषनाशनंचत्रैरात्रिकंविभवशाठ्यमपास्यकुर्यात् भूमौसपुत्रधनसौख्यमवाप्यचांतेलोकानुपैतिविधिविष्णुमहेशजुष्टान् ३४ राजन्यदीच्छसिसुखंपरमंपृथिव्यांस्वर्गेचकल्पतरुभूमिषुदिव्यलोकान् भक्त्यात्रिलोकजननींत्वमभिप्रपूज्य पत्न्यासहव्रतमिदंविधिवत्कुरुष्व ३५ इतिश्रीभ० भाद्र० गोत्रिरात्रव्रतवर्णनंनामाष्टाविंशोऽध्यायः २८ ६२

सूतउवाच भाद्रस्यदुर्लभंस्नानंयत्रकुत्रजलाशये ऐहिकंचसुखंप्राप्यचांतेपुण्यमवाप्नुयात् १ मासंमासार्द्धमर्द्धोदिनपंचकमेवच यःस्नायाद्विधिवद्ब्रह्मन्पूर्णफलमवाप्नुयात् २ भाद्रमासस्यमाहात्म्यंश्रोतव्यंप्रत्यहंबुधैः पुराणोक्तंफलंतस्यश्रवणान्नात्रसंशयः ३ कलौनास्त्येवनास्त्येवसांगंभवतुकिंचन ४ सर्वाधिकमिदंसूतनात्रकार्याविचारणा ५ यज्ञसुयज्ञनामानौभ्रातरौसंबभूवतुः ६ विदुषौधनसंपन्नौसदासंहिततत्परौ तीर्थयात्रापरोयज्ञोयज्ञकर्मरतःसदा ७ दानानिविविधंदत्वामृतःस्वर्गंजगामह सुयज्ञोनापरवेद पुराणश्रवणाद्धरेः ८ ततोविमानमारुह्यस्वर्गेयज्ञंददर्शह उवाचवचनंभ्रातरोहियानंहरेःपदं ९ जग्मतुर्विष्णुभुवनंविष्णुर्वचनमब्रवीत् सुयज्ञेनात्रवस्तव्यंयज्ञेनैवत्रिविष्टपे १० भोक्तव्याविविधाभोगा जन्मप्राप्यपुनःकलौ

स्कथज्ञोत्रैववसतिपुराणश्रवणेनवै ११ इतितेकथितंब्रह्मन्पुराणश्रवणात्फलं पुराणश्रवणेनैवकर्तव्यंचबुधैर्जनैः १२ नतस्यफलमाप्नोतिदुःखभाग्जायतेनरः व्यासासनंसुविस्तीर्यमृद्वासनसमन्वितं १३ रंगयित्वाधूपदीपैःशोभितंकारयेत्सदा आदौसरस्वतींपूज्यव्यासंसंपूजयेत्ततः १४ आदौचांतेनमस्कारंकुर्याद्भक्तिसमन्वितः कदन्नेनान्तियोनित्यंशृणुयात्भगवत्कथा १५ समाप्तवसरेकुर्यान्मंडपंचातिशोभितं कदलीस्तंभसंयुक्तंसमग्रतत्रपूजयेत् १६ षोडशैरुपचारैश्चपूजयेच्चसरस्वतीम् सौभाग्यद्रव्यहीनेनविरहोजायतेभुवि १७ वस्त्रहीनेनदारिद्र्यंफलाभावेनसंततिः वाद्यहीनेबाधिरतानिष्फलदक्षिणाविना १८ दुःखमाप्नोतिविपुलंत्र्यंगहीनसपर्यया विष्णुस्वरूपिणंव्यासंपूजयेत्परयाधिया १९ पादप्रक्षालनंचैवदद्यादासनमुत्तमं कमंडलुसोदपात्रंवस्त्राणिविविधानिच २० अलंकारंयज्ञसूत्रंचंदनेनविलेपनं शिरोष्णीषप्रावरणंधूपदीपादिलासितं २१ नैवेद्यंश्रीफलंचैवतांबूलंविधिपूर्वकं व्यासहस्तेदक्षिणांतुयथाशक्त्यानिवेदयेत् २२ प्रदक्षिणानमस्कारंमंत्रपुष्पाणिचार्पयेत् क्षमापयेन्नमस्कृत्यतूर्यध्वनिसमन्वितं २३ सरस्वत्याचव्यासेनगत्वाव्यासगृहंमुदा पदेपदेऽश्वमेधस्यफलंप्राप्नोत्यसंशयः २४ व्यासेसंतुष्टतांयातेपुराणोक्तंफलंभवेत् रुष्टेविफलतांयातिरौरवंनरकंव्रजेत् २५ अयशोमहदाप्नोतिशोचतेसोनिरंतरं २६ इतिश्रीभ॰ भाद्र॰ फलश्रुतिवर्णनंनामएकोनत्रिंशोऽध्यायः २९ छ सूतउवाच व्यासंसंपूज्यविधिवत्पूर्णंफलमवाप्नुयात् स्वशक्त्यापूजयेद्व्यासंवस्त्रालंकरणादिभिः १ शक्तेरभावाच्छुश्रूषांकुर्यात्व्यासस्यभक्तितः कंदमूलफलादीनिपुष्पपत्राणितन्मुदे २ अर्पयेत्परयाभक्त्यातस्यपुण्यमनंतकं व्यासासनंचसंस्थाप्यअर्चयित्वासरस्वतीम् ३ पुराणांतेव्यासगृहंगत्वाव्यासार्पितंचयत् निवेद्यस्वगृहंगच्छेत्पुराणोक्तंफलंलभेत् ४ यःपुराणंनिंदयतिइतिहासंकथानकं सएवरौरवंयातिकुष्ठीभवतिजन्मनि ५ ज्ञानतोऽज्ञानतोवापिवाचिकंनिंदयन्नरः सभुक्त्वायातनांयाम्यांमुक्तोभवतिनिश्चितम् ६ कथ्यमानेपुराणार्थेविवादंकुरुतेनरः श्रद्धयाईर्ष्ययावापिसदुःखंलभतेचिरम् ७ विद्ययाईर्ष्ययाद्वेषात्सोत्कर्षात्वानराधमः योविवादय

तेमूढोव्यासपीठंस्थितंद्विजं ८ व्यासस्थानस्थितोविप्र स्तावद्विष्णुर्नसंशयः तत्पूजनात्सर्वंश्रेयइहलोकेपरत्रच ९ पुराणश्रवणं
कृत्वास्त्रियोवाब्राह्मणादयः वैकुंठभुवनंयांतिस्वशक्त्याव्यासपूजनात् १० अयशोमहदाप्नोतिव्यासस्थानर्चनाद्ध्रुवम् तिर्यग्योनि-
मनुप्राप्ताशोचतेसौशकुन्तवत् ११ यदिहासीत्पुराकश्चिन्ब्राह्मणोगुणशर्मकः पुराणपठनंकुर्वन्जीर्णाश्वत्थस्यमूलके १२ यदृच्छा
श्रवणंकुर्युस्तत्रस्थायेद्विजोत्तमाः अदत्तदक्षिणास्तांश्चशकुंतावाक्यमब्रवीत् १३ तस्यचाश्वत्थवृक्षस्यस्मरन्स्वानुभवंमुहुः पुरा
णश्रवणंचैवकर्तव्यंभोद्विजोत्तमाः १४ पुण्येनाविधियोगेनपक्षियोनिमुपागताः ब्राह्मणउ॰ कथंवैपक्षितांप्राप्तःकिंकृतंतद्वदा
धुना १५ शकुंतउ॰ पूर्वजन्मनिराजाहंमुयबाहुरितिस्मृतः अदक्षिणाःकृतायागाःश्राद्धंचैवमदक्षिणं १६ अदक्षिणानिदा
नानिमयादत्तानिभूरिशः पुरोधसेमयाद्रव्यंनहस्तेनचचार्पितम् १७ पुराणानिश्रुतानीहतांदास्याम्युक्तवान्पुनः गायकेभ्यो-
नटादिभ्योदत्तंद्रव्यंमयानहि १८ नपूजनंसरस्वत्याव्यासस्यापिकथंचन तेनदोषेणनरकान्भुक्त्वापक्षित्वमागतः १९ पु
राणश्रवणेनैवफलदानेनभोद्विजाः दिव्यंविमानमारुह्यगच्छामिपरमंपदम् २० एतद्वाक्यंसमाकर्ण्यशुश्रुवुःपरमादरात्
विमानवरमारुह्यवैकुंठपदवींययौ २१ इतिसूतमुखोद्गीतंशौनकाद्यामहर्षयः प्रीताःप्रीत्याश्विनस्यापिमाहात्म्यंपदमाद
रात् २२ इतिश्रीभविष्योत्तरपुराणेनारदांबरीषसंवादेभाद्रपदमासमाहात्म्येत्रिंशोऽध्यायः ३० छ
इतिश्रीज्योतिर्वित्कुलावतंसत्र्यंबकरामात्मजहरिकृष्णाख्यविनिर्मितेबृहज्ज्योतिषार्णवेअष्टमेधर्मस्कंधेचतुर्थेमासस्तबकेभा
द्रपदमासमाहात्म्यंषष्ठम्समाप्तम् ६ श्रीकृष्णार्पितमस्तु श्रीरस्तुशुभम् छ

२६

यह भाद्रपदमासमाहात्म्य मुंबईमें पं॰श्रीधरशिवलालकेज्ञानसागरछापखानामें छाप्यो॰ संवत् १९४५ शाके १८१० चैत्रशुक्ल १

इतिश्रीमासस्तवकेभाद्रपदमाहात्म्यंसंपूर्णम्·



अथ मासस्तवके आश्विनमासमाहात्म्यं प्रारंभ्यते·


सूत.
शौनक
विष्णु
नारद
रवी
पाठकर्ता
मल्लारिपू.
शमी
पूजन.
ब्रा.
यजमान.
विष्णु.
सनत्कुमार.
वक्ता
श्रोता
दुर्गालवि.
शमीक.
मुनेक
सुभद्रात्मी
उद्दालक
पुत्र
उपांगल
गोपति.
द्रौपदी
कृष्णा.
गणप.
व्रतकर्ता.
अशोकवृक्षपू.

अथ आश्विनमासमाहात्म्यस्यानुक्रमणिका·

अध्यायः	विषयाः
१	एतन्मासमाहात्म्यं कथयेति शौनकादिभिः कृतः सूतं प्रति प्रश्नः सूतः भगवतोपदिष्टं नारदाय आश्विनमासमाहात्म्यं कथयति श्लोकाः ३३
२	देवीनवरात्रव्रतकथनारंभः देवीप्रतिमालक्षणानि पूजनादिविधिः चंडीपाठविधिः दीपस्थापनविधिश्च श्लो· ३०
३	कुमारीपूजनविधिः तासांलक्षणानि नामानि पूजनप्रकारः संख्याकथनंच श्लोक· २९
४	अस्मिन्नवरात्रे वेदपारायणविधिः तत्र नारायणद्विजेतिहासः श्लो· २२
५	वेदपारायणकरणाशक्तौ भागवतपारायणविधिः तत्रेतिहासः तुंदिलनामकब्राह्मणस्य भागवतपारायणात् राक्षसयोन्यामुक्तिः श्लोकाः ३२
६	एकैकवृद्ध्या चंडीपूजनविधिः अन्यपूजाविधिश्च तत्रेतिहासश्च श्लो· २७
७	पूर्वप्रचलितकथा, शांतिविधिः श्लो· २७
८	लोहाभिसारिकव्रतविधिः लोहदैत्येतिहासः तस्मै ब्रह्मणा दत्तं वरप्रदानं लोहपूजनविधिः श्लोकाः ३६
९	छत्रादिपूजामंत्राः श्लोकाः ३०
१०	दुंदुभ्यादीनांपूजामंत्राः श्लो· २२
११	नवरात्रस्य प्रतिपदादिनवसु दिनेषु कर्तव्यविधिः श्लो· ३२
१२	ब्राह्मणानां माषभक्तबलिप्रदानविधिः सीमांतोल्लंघनविधिः अपराजिताशमीपूजनविधिः श्लोक· ३०
१३	सनत्कुमार विष्णुसंवाद प्रस्तावः नवरात्रोपोषणविधिः श्लोक ४८
१४	सामान्यतो नवरात्रव्रतविधिः, तन्माहात्म्यप्रतिपादिको मांधातृराजेतिहासः श्लो· ३०
१५	द्रौपदीकृष्णसंवादप्रस्तावः कृष्णेनकथितं नवरात्रमाहात्म्यं तत्र उद्दालक द्विजेतिहासः तस्मै ब्रह्मणा दत्तं प्रथमं पुत्रं लप्स्यसे ततो भार्यामिति वरप्रदानं अयोध्याधिपतेः पुत्र्याः सुभद्राया उद्दालिकादविज्ञातो गर्भसंभवः विवाहमकृत्वापि गर्भिणीयं दुश्चारिणीति मत्वा पित्रादिकृतस्तस्यास्त्यागः विश्वावसुब्राह्मणस्य तस्याश्च मेलनं श्लो· ३५

अथआश्विनमासमाहात्म्यस्यानुक्रमणिका॰

अध्याय॰	विषयः	अध्याय॰	विषयः	अध्याय॰	विषयः
१६	विश्वावस्कनाकृतं तस्याः स्वाश्रमंप्रतिनयनंतस्यानासिकाग्रात्पुत्रोत्पत्तिः नद्यां उत्सृष्टस्य तस्यउद्दालकं प्रति प्राप्तिः तस्य पुत्रस्य मातुश्च मिलनं॰ श्लोक १७	१९	अस्यशुक्ल ४ चतुर्थ्यां महागणपतिव्रतविधिः श्लोकाः२३	२६	अस्यशुक्लैकादशीमाहात्म्यं श्लोकाः २९
१७	रोषवशात् शप्तस्यतस्यपुत्रस्य व्रतपरितुष्टया देव्याकृतसमुद्धरणं॰ श्लोक २१	२०	पूर्वोक्तव्रतविषयेतिहासः श्लो॰ ४०	२७।२८	अस्यत्रयोदश्यांअशोकव्रतंतद्विधिः तत्रेतिहासः क्रमेणश्लोकाः ३०।३८
१८	आश्विनशुक्लद्वितीयायां सद्बुद्धिप्रदव्रतविधिः तत्रेतिहासश्चश्लोकाः४५	२१	शुक्लपंचम्यांउपांगललिताव्रतं तत्रश्रीपतिगोपतीतिहासः श्लोक २३	२९	अस्यपूर्णमास्यांकोजागरीव्रतविधिः श्लो॰ ५८
		२२।२३।२४	अनेनाध्यायत्रयेणापूर्वप्रचलितेतिहाससंपूर्तिः क्रमेणश्लोकाः ३५।३१।३४	३०	माहात्म्यश्रवणस्यफलश्रुतिः श्लो॰ ३१
		२५	दशांगललिताव्रतविधिः श्लो॰ ४५		इति॰ आश्विनमासमाहात्म्यस्यानुक्रमणिका समाप्ता॰

इतिआश्विनमासमाहात्म्यस्यानुक्रमणिकासमाप्ता॰

श्रीगणेशायनमः श्रीगुरुभ्योनमः शौनकउवाच पावनेनैमिषेक्षेत्रेऋषयः शौनकादयः पप्रच्छुर्विनयात्
सूतंभक्त्यापरमयामुदा १ आश्विनेयानिदानानिव्रतानिनियमास्तथा स्नानस्यापिविधिंसूतवदास्माकंकृपांकु
रु २ सूतउवाच शृण्वंतुऋषयः सर्वेईषमाहात्म्यमुत्तमम् विष्णुनानारदायोक्तंसर्वकामफलप्रदम् ३ वै
कुंठेसुखमासीनंमुनिदेवगणान्वितम् स्तूयमानमहाभक्त्यासनकाद्यैर्महर्षिभिः ४ तंदृष्ट्वापरमात्मानंनारदो
दिव्यदर्शनः ननामपरयाभक्त्यातिष्ठंस्तत्पुरतोमुदा ५ भगवानपितंदृष्ट्वास्वासनेचोपवेशयेत् पूजयामासवि
धिवत्पूजार्हंनारदंमुनिम् ६ भयभीतंसुसंभ्रातमश्रुधारायुतंमुखम् म्लानंस्वेदयुतंदृष्ट्वाभगवानब्रवीन्मुनि
म् ७ श्रीभगवानुवाच कुतस्तेगमनंविप्रकिंवादुःखस्यकारणम् कस्माद्भयमिदंचात्तकुतस्तेगतिरीदृशी ८
मुनिरुवाच भगवन्भूतभव्येशसर्वसाक्षिन्जगत्पते दुःखितःपरदुःखेनप्राप्तस्त्वांशरणागतः ९ यस्माच्चकलि
नालोकामज्जितादुःखसागरे सर्वेषामुपकारायदर्शनार्थंतवागतः १० श्रीभगवानुवाच यद्दृष्टंलोकचरितं
यद्दुःखेनयथाभवान् तत्सर्वंहियथादृष्टंवदसर्वंममाज्ञया ११ नारदउवाच एकपादोऽपिक्षरतिरुदन्ध-
र्मोदिनेदिने अकारणेऽनृतंवक्तिनित्योहमजरामरः १२ व्यभिचारपरोलोकोनजानातिस्वकंपरम् मातरंभगिनींक
न्यांसगोत्रांचतपस्विनीम् १३ अज्ञातयौवनावृद्धांजनःकामयतेभृशम् तथानार्यश्चगोविंदजारकर्मरताःसदा
१४ पितरंभ्रातरंपुत्रमधोयोनिसमुद्भवम् रमणंतरुणंदृष्ट्वास्त्रियोवांछंतितंपतिम् १५ अन्योन्यप्रीतिजनकं
सुरूपत्वंसदाकलौ नोत्तमोमध्यमोनीचोवर्णभेदःकलौहरे १६ धनवानुत्तमोवर्णःकुलीनःसोऽपिचोच्यते स
र्वेधनपरालोकाःसर्वेधनपरायणाः १७ धनार्थंहंतुमिच्छंतिपरंस्वात्मानमेवच संरक्षंतिप्रयत्नेनभूमावाच्छादयं-
तिच १८ उदयादुदयंयावत्धनमिच्छंतिजंतवः विद्याश्चव्यवसायांश्चतदर्थमुपयुंजते १९ कुर्वंतिदांभिकंकर्मता

मसंदुःखदायकम् दास्यंतिचार्जवाद्दानंनास्तिपात्रविचारणा २० धनाधिकेंगेभिषजेदैवज्ञेग्रामकंटके मूर्खेचपतिते
कुष्ठेप्रायोदानंकलौयुगे २१ मित्राप्तसंगृहीतेषुदेवदानंकलौयुगे परस्परंगृहीष्यंतिदास्यंतिहिपरस्परम् २२ दानंकुर्वं
तिदंभेननतुपुण्येनकेनचित् नशृण्वंतिपुराणानिधर्मशास्त्रानितानिच २३ ब्राह्मणाःक्षात्रमिच्छंतिक्षत्रियावैश्यधर्मि
णः वैश्यास्तुशूद्रजंकर्मशूद्रस्त्वंत्यजधर्मिणः २४ स्वस्वकर्मपरिभ्रष्टाःकलौदृष्टामयाजनाः जलबुद्बुददेहेषुनिम
ग्नाःपापसंयुताः २५ नकुर्वंतिहितंस्वीयंपुत्रादीनांहितंचन परेषांनिधनंदृष्ट्वाहर्षंतीहभृशंनराः २६ सर्वंमृतस्
गृह्णातिनददातिमृतस्यतत् अज्ञस्त्वज्ञानसंपन्नःपश्यन्नपिनपश्यति २७ चतुराशीतिलक्षाणांयोनीनांमानवीशुभ
भाम् तत्प्राप्यापिकलौविष्णोःकथंमोक्षगतिर्भवेत् २८ दुःखस्यकर्मकुर्वंतिदुःखमिच्छंतिजंतवः येनमोक्षंलभे
ल्लोकस्तद्वदस्वजनार्दन २९ श्रीभगवानुवाच इषेमासिमुनिश्रेष्ठप्रातःस्नानंमहाफलम् दानंचपूजनंचा
पिसर्वपापप्रणाशनम् ३० तस्यानुष्ठानमात्रेणसर्वपापैःप्रमुच्यते लभतेपरमंसौख्यंनात्रकार्याविचारणा ३१ सू
तउवाच इतिविष्णुवचःश्रुत्वानारदोभूतलंययौ पृथवेकथयामासलोकानुग्रहकाम्यया ३२ तत्सर्वंकथयाम्य
द्ययदुक्तंमुनिनापुरा तत्रापिनवरात्रस्यव्रतंसौख्यप्रदंपरम् ३३ इतिश्रीभविष्योत्तरपुराणेआश्विनमासमाहा
त्म्येप्रथमोऽध्यायः १ छ ऋषयऊचुः यत्त्वयाकथितंसूतमासिचाश्वयुजेनरैः नवरात्रव्रतंकार्यंशुभं
दारिद्र्यभीरुभिः १ आरंभस्तकदाकार्यःपूजयेत्कांचदेवताम् नियमाश्चकथंकार्याःकार्यंकतिदिनावधि २
सूतउवाच साधुपृष्टंमहाभागाःकथयामिसविस्तरम् प्रतिपद्यासमुत्थायकृत्वाशौचविधिक्रियाम् ३ अ
पामार्गैश्चसंशोध्यतथान्यैर्दंतधावनैः तिलामलककल्केनतथाभ्यंगंसमाचरेत् ४ स्वस्तिवाचनकंकुर्यात्ततोनिय
ममाचरेत् इतोरभ्यदशम्यांतंमहालक्ष्म्याःप्रतुष्टये ५ ब्रह्मचर्यंचोपवासंतथान्यान्नियमानपि करिष्यामीति

संकल्प्यकामक्रोधादिवर्जितः ६ एकभक्तेननक्तेनस्वशक्त्यायाचितेनवा पूजनैर्याजनैर्देवींस्थानेस्थानेपुरेपुरे ७ गृहेगृ-
हेभक्तिपरैर्ग्रामेग्रामेवनेवने स्नातैःसमुदितैर्हृष्टैर्ब्राह्मणैःक्षत्रियैर्नृपैः ८ वैश्यैःशूद्रैर्भक्तियुक्तैर्म्लेच्छैरन्यैश्चमानवैः
स्त्रीभिश्चसर्वजातीभिःपूजाकार्यास्वशक्तितः ९ व्रतचर्यानियमांश्चैवकुमारीश्चापिभोजयेत् वस्त्रालंकारदानैश्चसंतोष्याः
प्रतिवासरम् १० तथैवचसुवासिन्योबटवश्चद्विजातयः बलिंश्चप्रत्यहंदद्यादोदनानियथाक्रमम् ११ त्रिकालंपूज-
येद्देवींसूक्तैर्नानाविधैस्तथा ऋषयऊचुः विस्तरेणमहाबाहोपूजनंकथयस्वनः १२ सूतउवाच शृण्विरस्था-
नस्यमृद्भिश्चपूर्वंकृत्वातुवेदिकाम् यवान्वैवापयेत्तत्रगोधूमसहितान्द्विजाः १३ तत्रसंस्थापयेत्कुंभंविधिनामंत्रपूर्व-
कम् सौवर्णंराजतंवापिताम्रंमृन्मयजंतथा १४ अष्टादशभुजाकार्यामहालक्ष्मीर्मनोहरा आलीढस्थानसंयुक्ता
चतुःसिंहरथेस्थिता १५ अक्षमालांत्रिशूलंचखड्गंचक्रंतथैवच बाणचापेनकर्तव्येशंखपद्मेतथैवच १६ स्रुक्स्रु-
वौचतथाकार्यौतथावैदिकमंडलम् दंडशक्तीचकर्तव्येतथाशाक्तिहुताशनौ १७ हस्ताभ्यांकारयित्वातुस्थापयेत्क-
लशोपरि सौवर्णींराजतींताम्रींमृन्मयींवापिकारयेत् १८ अभावेयंत्ररूपेयंतदभावेफलादिकम् आवाहयेच्चतां
भक्त्यापूजयेद्विधिपूर्वकम् १९ जयंतीमंगलाकालीभद्रकालीकपालिनी दुर्गाक्षमाशिवाधात्रीस्वाहास्वधानमोस्तुते
२० अनेनैवतुमंत्रेणजपहोमादिकारयेत् तथान्यैर्वैदिकैर्मंत्रैस्तल्लिंगैर्विधिपूर्वकम् २१ मार्कंडेयपुराणंचश्रावये-
द्वापठेत्स्वयम् माहात्म्यंभगवत्याश्चपुराणादिषुकीर्तितम् २२ एकोत्तराभिवृद्ध्यातुनवमींयावदेवहि चंडीपाठंपठे-
द्विद्वान्जापयेद्वाविधानतः २३ वाचकंब्राह्मणंविद्यात्कदाचिन्नान्यवर्णजम् कुर्यात्सहस्रचंडींचशतचंडीमथापि-
वा २४ अथवाप्रत्यहंकुर्यात्पाठंवाकारयेत्सुधीः शुद्धेनानन्यचित्तेनपठितव्यंप्रयत्नतः २५ नकार्यासक्तमनसाका-
र्यंस्तोत्रस्यवाचनम् आधारेस्थापयित्वातुपुस्तकंवाचयेत्ततः २६ हस्तसंस्थापनादेवभवेदर्धफलंयतः स्वयंचालिखितं

यच्चयच्चशूद्रेणवापुनः २७ अब्राह्मणेनालिखितंजपोनिष्फलतांव्रजेत् संकल्पस्तोत्रपाठेऽस्मिन्देवीप्रीत्यर्थमेव-
च २८ अध्यायमारभ्यविरमेन्नतुमध्येकदाचन कृतेविरामेचपठेत्पुनरध्यायमादरात् २९ बद्ध्वामालाघटस्यो
र्ध्वंदीपंसंस्थाप्यभक्तितः घृताक्तैलपूर्णंवापूजयित्वानचालयेत् ३० इतिश्रीभविष्योत्तरपुराणेआश्विन
मासमाहात्म्येनवरात्रकृत्यवर्णननामद्वितीयोऽध्यायः २ छ सूतउवाच अधुनाकथयिष्यामिकु
मारीपूजनात्फलम् विधिंचैवस्वरूपंचकथयामिसविस्तरम् १ चारुपीठसमारूढामेकैकांद्विजसंभवाम् पूज
येत्कन्यकांनित्यमेकवृद्ध्यात्वथापिवा २ द्विगुणांत्रिगुणांवापिएकैकांनवकंपरम् नवभिर्लभतेभूमिमैश्वर्यंलभ-
तेनतु ३ एकवृद्ध्यालभेन्मोक्षमेकैकेनश्रियंभवेत् एकवर्षातुयाकन्यापूजार्थेतांतुवर्जयेत् ४ गंधपुष्पफलादी
नांप्रीतिस्तवनपूर्वकम् द्विवर्षकन्यामारभ्यदशवर्षावधिक्रमात् ५ कुमारिकाद्विवर्षातुत्रिवर्षातुत्रिमूर्तिनि चतु
र्वर्षातुकल्याणीपञ्चवर्षातुरोहिणी ६ षड्वर्षातुभवेत्कालीसप्तवर्षातुचंडिका अष्टवर्षाशाभवीतुदुर्गातुनवभिः
स्मृता ७ दशवर्षासुभद्रेतिनामभिःपरिकीर्तिता अतऊर्ध्वंतुयाकन्यावर्जितासर्वकर्मभिः ८ दुःखदारिद्र्यना
शायशत्रूणांनाशहेतवे आयुष्यबलवृद्ध्यर्थंकुमारींपूजयेन्नरः ९ आयुःकामस्त्रिमूर्तिंचत्रिवर्गस्यफलाप्तये अ
पमृत्युव्याधिपीडादुःखानामपनुत्तये १० सौख्यधान्यधनारोग्यपुत्रपौत्राभिवृद्धये कल्याणींपूजयेद्धीमान्नित्यं
कल्याणवृद्धये ११ आरोग्यसुखकामीतुधनकामस्तथैवच यशःकामीनरोनित्यंरोहिणींपरिपूजयेत् १२ वि-
द्यार्थीचजयार्थीचराज्यार्थीचविशेषतः शत्रूणांचविनाशायकालिकांपूजयेन्नरः १३ संग्रामेजयकामीचचंडिकां
परिपूजयेत् दुःखदारिद्र्यनाशायनृपसंमोहनायच १४ महापापविनाशायशांभवींचप्रपूजयेत् सबलोत्कटश-
त्रूणामुग्रसाधनकर्मणि १५ दुर्गांदुर्गतिनाशायपूजयेद्यत्नतोबुधः सौभाग्यधनधान्यादिवांछितार्थफलाप्तये

यच्चयच्चशूद्रेणवापुनः २७ अब्राह्मणेनालिखितंजपोनिष्फलतांव्रजेत् संकल्पस्तोत्रपाठेऽस्मिन्देवीप्रीत्यर्थमेवच २८ अध्यायमारभ्यविरमेन्नतुमध्येकदाचन कृतेविरामेचपठेत्पुनरध्यायमादरात् २९ बद्ध्वामालांघटस्योर्ध्वेदीपंसंस्थाप्यभक्तितः घृताक्तंतैलपूर्णंवापूजयित्वानचालयेत् ३० इतिश्रीभविष्योत्तरपुराणे आश्विनमासमाहात्म्येनवरात्रकृत्यवर्णनंनामद्वितीयोऽध्यायः २ छ सूतउवाच अधुनाकथयिष्यामिकुमारीपूजनात्फलम् विधिंचैवस्वरूपंचकथयामिसविस्तरम् १ चारुपीठसमारूढामेकैकांद्विजसंभवाम् पूजयेत्कन्यकांनित्यमेकवृद्ध्याथवापिवा २ द्विगुणांत्रिगुणांवापिएकैकांनवकंपरम् नवभिर्लभतेभूमिमैश्वर्यंलभतेनतु ३ एकवृद्ध्यालभेन्मोक्षमेकैकेनश्रियंभवेत् एकवर्षातुयाकन्यापूजार्थेतांतुवर्जयेत् ४ गंधपुष्पफलादीनांप्रीतिस्तवनपूर्वकम् द्विवर्षकन्यामारभ्यदशवर्षावधिक्रमात् ५ कुमारिकाद्विवर्षातुत्रिवर्षातुत्रिमूर्तिनी चतुर्वर्षातुकल्याणीपंचवर्षातुरोहिणी ६ षड्वर्षातुभवेत्कालीसप्तवर्षातुचंडिका अष्टवर्षाशांभवीतुदुर्गातुनवभिः स्मृता ७ दशवर्षासुभद्रेतिनामभिःपरिकीर्तिता अतऊर्ध्वंतुयाकन्यावर्जितासर्वकर्मभिः ८ दुःखदारिद्र्यनाशायशत्रूणांनाशहेतवे आयुष्यबलवृद्ध्यर्थंकुमारींपूजयेन्नरः ९ आयुःकामस्त्रिमूर्तिंचत्रिवर्गस्यफलाप्तये अपमृत्युव्याधिपीडादुःखानामपनुत्तये १० सौख्यधान्यधनारोग्यपुत्रपौत्राभिवृद्धये कल्याणींपूजयेद्धीमान्नित्यंकल्याणवृद्धये ११ आरोग्यसुखकामीतुधनकामस्तथैवच यशःकामीनरोनित्यंरोहिणींपरिपूजयेत् १२ विद्यार्थीचजयार्थीचराज्यार्थीचविशेषतः शत्रूणांचविनाशायकालिकांपूजयेन्नरः १३ संग्रामेजयकामीचचंडिकांपरिपूजयेत् दुःखदारिद्र्यनाशायनृपसंमोहनायच १४ महापापविनाशायशांभवींचप्रपूजयेत् सबलोत्कटशत्रूणामुग्रसाधनकर्मणि १५ दुर्गांदुर्गतिनाशायपूजयेद्यत्ततोबुधः सौभाग्यधनधान्यादिवांछितार्थफलाप्तये

१६ सुभद्रांपूजयेन्मर्त्योदासीदासविवृद्धये एतैरावाहयेद्देवीं मंत्रैः पौराणिकैः शुभैः १७ जगत्पूज्येसर्ववंद्येस
र्वशक्तिस्वरूपिणी पूजांगृहाणकौमारीजगन्मातर्नमोस्तुते १८ त्रिपुरांत्रिपुराधारांत्रिवर्गज्ञानरूपिणीम् त्रैलो
क्यवंदितांदेवींत्रिमूर्तिंपूजयाम्यहम् १९ कालात्मिकाकलातीताकारुण्यहृदयाशिवाम् कल्याणजननींनित्यं
कल्याणीपूजयाम्यहम् २० अणिमादिगुणाधारामकाराद्यक्षरात्मिका अनंतशक्तिकांलक्ष्मीरोहिणीपूजया
म्यहम् २१ कामचारींशुभांकांतांकालचक्रस्वरूपिणीम् कामदांकरुणोदारांकालींसंपूजयाम्यहम् २२ चंड
चारांचंडमायांचंडमुंडप्रभंजनीम् पूजयामिसदादेवींचंडिकांचंडविक्रमाम् २३ सदानंदकरींशांतांसर्वदेवनम
स्कृतां सर्वभूतात्मिकांलक्ष्मींशांभवींपूजयाम्यहम् २४ दुर्गमेदुस्तरेकार्येभवदुःखविनाशिनी पूजयामिसदा
भक्त्यादुर्गांदुर्गार्तिहारिणीम् २५ सुंदरींस्वर्णवर्णाभांसुखसौख्यप्रदायिनीम् सुभद्रजननींदेवींसुभद्रांपूज
याम्यहम् २६ हीनाधिकांगीकुष्ठगींविकाराकुलितातथा ग्रंथिस्फुटितसर्वांगीरक्तपूयव्रणांकिता २७ वर्ज
येत्ताःप्रयत्नेनपूजयेच्छुभलक्षणाम् ब्राह्मणीसर्वकार्येषुपूजार्थेशूद्रवंशजा २८ दारुणेचांत्यजातीनांपूजयेद्वि
धिनानरैः २९ इतिश्रीभविष्योत्तरपुराणेआश्विनमासमाहात्म्येकुमारीपूजनमहिमावर्णनंनामतृतीयोऽ
ध्यायः ३ छ सूतउवाच अत्रैवचविशेषेणद्विजैर्भक्त्याभूपालनात् वेदपारायणंकार्यंसांगंनियम-
मास्थितः १ सर्वपापविनिर्मुक्तोदुर्योनेश्चतथैवच अथतेकथयिष्यामिकथांपौराणिकींशुभाम् २ पुराना
रायणोनामब्रह्मवंशसमुद्भवः चकारराज्यंसकलंमंत्रिभिःपरिवारितः ३ पुत्रस्तस्यकनीयांश्चराघवोनामविश्रु
तः अथकालेनबहुनाजातेपुत्रत्रयेतथा ४ ज्येष्ठस्तुनिधनंप्राप्तस्ततस्तुस्वयमेवहि ततस्तौबालकौशांतौमंत्रि
भिःपरिवारितौ ५ तदेनंराघवोदक्षाद्दुर्बुद्धिमकरोद्वशम् तनयौतौवशंनीत्वास्वयमेवाधिपोभवत् ६ माधव

सुतयोर्ज्यायान्मंत्रिभिः सहमंत्रवित् पुरस्कृत्यतुतंधृत्वाकारागारेन्ययोजयत् ७ ततस्तुमाधवोनामरोगार्तोपि
दिवंगतः ततोमुख्यसपत्न्यानुकनीयानपिघातितः ८ ततस्तेमंत्रिणः सर्वेराजानंब्रह्मघातिनं पुरान्निष्कासयामा
सुः स्वराज्यादखिलादपि ९ ततःसभ्रमणंचक्रेराज्यलोभेनदुर्मदः बहवोपिकृतायासाः सहायाबहवः कृताः १०
तत्रापिनृपतिःशून्यंनिजराज्यंनलब्धवान् मद्भाग्यमितिज्ञात्वास्वात्मानभृशदुःखितः ११ गौतम्यास्तीरमासाद्य
चकारतपउत्तमम् गतेकतिपयेकालेसोमशर्माद्विजोत्तमः १२ आगतश्चवणिक्सातुसमागम्यतपस्विनम् तद्दृ
ष्ट्वाशीलसंपन्नंतेजोराशिंद्विजोत्तमम् १३ प्रणम्यराघवःसोथकृतांजलिरभाषत राघवउवाच राज्यलोभे
नमहताकृतंकर्मसुदुष्करम् १४ नलेभेतुतथाकिंचित्सुखंद्विजकुलोत्तम एतस्यकारणंब्रूहिनिमित्तंवदसांप्रतं
१५ सोमशर्मोवाच त्वयामदेनराज्यस्यइषेमासिपुराकिल प्रवर्तमानेमहतिमहालक्ष्म्यामहोत्सवे १६
मिलिताबहवोविप्राःपूजांचक्रुरनेकशः केचित्पारायणंचक्रुर्वेदस्यामिततेजसः १७ तथैवचपुराणानिकीर्तना·
निबहून्यपि तत्रगत्वाकृतंविघ्नंज्ञात्वापिचमहोत्सवम् १८ तेनकर्मविपाकेननसुखंप्राप्यसेक्वचित् अतस्तद्दो
षशान्त्यर्थंवेदपारायणंकुरु १९ स्वयंवापिद्विजेभ्यश्चतस्मात्पुण्यमनंतकम् गयाश्राद्धेचयत्पुण्यंयत्पुण्यंविष्णुद
र्शने २० वेदाक्षरेषुतत्सर्वंपारायणमतोद्भुतम् पारायणेप्रवृत्तेतुनवरात्रेभिकालये २१ तेषांदर्शनमात्रेणब्रह्म
हत्याव्यपोहति २२ येपूजयंतिविधिवज्जगदंबिकायाःपारायणंकृतवतोद्विजपुंगवस्य तेयांतिधामपरमंनिल-
यंश्रुतेश्चैतीर्त्वातिदोषसरितामतिपुण्यवेगात् २३ इतिश्रीभविष्योत्तरपुराणेआश्विनमासमाहात्म्येवेदपा·
रायणमहिमावर्णनंनामचतुर्थोऽध्यायः ४ सोमशर्मोवाच अशक्तेविधिवद्राजन्क्रियाभागवतस्यच
श्रुतंभागवतंतच्चसमंपारायणंमतम् १ कथयामिकथांदिव्यांतथासंतापहारिणीं अतवैद्यापुराविप्रसुंदि

५

लोनामविश्रुतः २ वेदशास्त्रपुराणज्ञःसर्वदाद्रव्यलंपटः द्वेषाल्लोभान्मत्सराद्वातेनत्वध्यापनंकृतम् ३ शिष्ये
कदाराजन्सेवाकृन्योपिकिंचन तेनकर्मविपाकेनभुक्त्वाचनिरयान्बहून् ४ राक्षसींयोनिमापन्नोबभ्रामचइत
स्ततः हन्यात्सहस्त्रशोबालान्स्त्रियश्चान्यतरांस्तथा ५ बभक्षमलमूत्रादीन्विकटंजयमास्थितः भ्रमताबहु
कालेनवटवृक्षःसमाश्रितः ६ अथकेनापिविप्रेणमंत्रयंत्रविदारकम् साधितंयक्षिणीदेवीयातनाबहुवासरम्
७ साहशाचाथविप्रेणकोसित्वमितिसाब्रवीत् अहंविप्रकुलोत्पन्नःसर्वविद्याविशारदः ८ नदत्तंकस्यचित्किंचि
द्विद्याधनमुपार्जितम् तेनकर्मविपाकेनजातोहंब्रह्मराक्षसः ९ अत्रापिचकृतंकर्मसकलंदोषसंयुतम् एवमे
तन्मयाख्यातंकोसित्वमितिसोब्रवीत् १० विप्रउवाच इहग्राम्योद्विजवरोदेव्याराधनतत्परः रात्रौजपंकरि
ष्यामिप्रभातेनिलयंगते ११ तदेतद्वचनंश्रुत्वाराक्षसःपुनरब्रवीत् ज्ञातोसित्वंद्विजवरःसर्वभूतहितेरतः १२ यत
स्त्वद्दर्शनेनाहंनिर्वृत्तिपरमांगतः अतोमेब्रूहिविप्रर्षेयेनमुक्तोभवाम्यहम् १३ ब्राह्मणउवाच ग्रामस्यप
श्चिमेभागेभद्रकाल्यामनोहरः प्रासादोवर्त्ततेतस्मिन्महोत्साहोभविष्यति १४ अद्यप्रभृतिविंशाहेनवरात्रंभवि
ष्यति पूजाजपमहोत्साहैस्तथापारायणैरपि १५ तत्रगच्छनिशावासंशृणुपारायणंशुभम् श्रुतंभागवतस्या
पिसमानपरिकीर्तितम् १६ राक्षसउवाच सर्वफलसमानंचकथंवेदपुराणयोः ब्राह्मणउवाच य
दाशंखासुरोनामदैत्योवेदान्जहारच १७ तदातेब्राह्मणाःसर्वेजातावेदविवर्जिताः वेदहीनोद्विजोयश्चशू
द्रएवनसंशयः १८ एतस्मिन्समयेजातानभोवाणीऋषीन्प्रति . अहोमहर्षयःसर्वेवेदसागरभूमितः १९
उद्धरिष्यतिगोविंदोनिद्रांतेमत्स्यरूपधृक् तावत्सर्वेसमागम्यव्यासगत्वानिवेद्यताम् २० तस्माच्छृणुध्वसर्वेऽपि
महाभागवतंपरम् पठनंपाठनंतस्यचतुर्वेदसमंभवेत् २१ इतिश्रुत्वाजहर्षुस्तेतूर्णंव्यासांतिकंगताः तस्माच्छ्रु

तंभागवतंमासेऽस्मिन्नवरात्रके २२ तत्तस्यपठनंदुर्गानवरात्रेचकामदम् केचित्पठंतिऋषयःपाठयंतितथापरे २३
वेदस्तेनत्वदोषात्तेमुक्ताज्ञानविशारदाः यस्मात्परीक्षितोराजाषष्ठाहेत्वातिपुण्यदम् २४ शकंसंपूज्याविधिवत्श्रु-
त्वाभागवतंपरम् तस्मान्मुमोचवैरक्षगच्छदेवालयेशुभे २५ शृणुपारायणंतत्रश्रीमद्भागवतस्यच ब्राह्मणउवा-
च तस्यतद्वचनंश्रुत्वातत्रगत्वासमाहितः २६ ऐच्छिकंदेहमासाद्यश्रुतपारायणंपरम् तस्यपुण्यप्रभावेनदे-
वतादर्शनेनच २७ आश्विनस्नेतृलोकानादर्शनेनतथैवच सद्योविमानमारूढोदिव्यदेहोदिवंययौ २८ इतित-
द्विसमाकर्ण्यराघवःपरमाहितम् जहर्षपूजयामासनमस्कृत्ययथाविधि २९ सूतउवाच गतेतस्मिन्द्विज-
वरेराघवोपिचकारतम् तस्यप्रभावाद्द्विजोजज्ञातेजरतःस्कृतौ ३० तथैवस्करवसंपत्तिंभुक्त्वातत्रयथेप्सिताम् अं-
तेजगामकैलासंशाश्वतंशूलिनःपदम् ३१ एवंप्रभावःकथितोवेदपारायणस्यच पुनःशृणुमहाभागमाहात्म्यं
नवरात्रकम् ३२ इतिश्रीभविष्योत्तरपुराणेआश्विनमासमाहात्म्येभागवतश्रवणमहिमावर्णनंनामपंचमोऽ-
ध्यायः ५ ६ सूतउवाच यदाद्येदिवसेकुर्याच्चंडिकापूजनादिकम् द्विगुणंतुद्वितीयायांत्रिगुणं
तत्परेहनि १ नवमीतिथिपर्यंतंवृद्ध्यापूजादिकंचरेत् प्रथमंशैलपुत्रीचद्वितीयंब्रह्मचारिणी २ तृतीयंचंद्रघंटे-
तिकूष्मांडेतिचतुर्थकम् पंचमंस्कंदमातेतिषष्ठंकात्यायनीतिच ३ सप्तमंकालरात्रिश्चमहागौरीतिचाष्टमं नवमंसि-
द्धिदाप्रोक्तानवदुर्गाःप्रकीर्तिताः ४ एतासांपूजनंकार्यंमहिषासुरसिंहयोः नवावरणसंयुक्तंदिक्पालानांप्रपूजये-
त् ५ अश्वकप्रतिपत्स्यामिस्वातिऋक्षेसुशोभने पूर्वमंत्रैश्चदेवानांमध्यमंसूर्यमावहेत् ६ तस्मात्साम्येनरैस्तत्र
पूज्योसोश्वद्वयान्वितः पूजनीयाश्चतुरगानवमीयावदेवहि ७ नचैवबाह्यसारंगाद्दारिद्र्यैरपिमानवैः आवाहयं-
तितुरगान्महाद्रिपरिरिंद्रतः ८ अश्वादिवाहनाहीनादरिद्रपरिपीडिताः शृण्वन्नेवकथांदेव्यांपरंविस्मयकारिणीं

९ पुराविंध्याद्रिनिकटेश्चासीद्रैवतकंपुरम् वीरबाहुरितिख्यातः सर्ववाजीश्वरः प्रभुः १० विजयायप्रवृत्तस्यपुराच्च
बहुभिर्नृपैः जातानितस्यविघ्नानिसुबहून्यपिमानद ११ निवारितोपिबहुभिर्निर्गतः कालनोदितः जित्वाराजाच
बहुशोरेवातीरमुपागमत् १२ तत्रोषित्वार्जुनश्चक्रेमिलिताश्चापिसत्तमाः वर्णयामाससत्कीर्तिंदिवोदासमहंभृतः
१३ तच्छ्रुत्वाकोपितःपुत्रः कुत्रत्यइतिचाब्रवीत् ज्ञात्वातस्यपुरींतस्यांकीर्तिनाम्नींययोरयात् १४ वेष्टयित्वा
पुरींतस्यजातःकोलाहलोमहान् दिवोदासस्यचामात्यावीरबाहुंसमागतम् १५ ज्ञात्वायपूरयात्सामवाक्यमूचुर्विच
क्षणाः मंत्रिणऊचुः किमर्थमागतःस्वामिन्कोलाहलःकथंकृतः १६ तस्यतद्वचनंश्रुत्वाउवाचनृपसत्तमः युद्धे
च्छयागतोस्मीतिनान्यदस्तिप्रयोजनम् १७ प्रधानाऊचुः युद्धेच्छायदितेराजन्क्षंतव्यंदिनपंचकम् व्रतं
स्थितोनरपतिरस्माकंचंडिकोत्सवे १८ नवरात्रेतिविख्यातेत्रिषुलोकेषुभोनृप पूजिताश्चहयास्तेनभूषणैर्विविधै
रपि १९ भक्ष्यैर्भोज्यैस्तृणैश्चापिकोमलैरमृतोपमैः नतेवाह्यनृभिःक्वापिसंकटेपिसमुत्थिते २० एतउच्चैःश्रवःस्थे
वसमानाःपरिकीर्तिताः हयमारुह्यकश्चापिअज्ञानेनमदेनवा २१ तंहनिष्यतिभूपालःशत्रुर्वापौरुषोपिवा प्रधा
नोक्तंवचःश्रुत्वाकोपेनप्रज्वलन्निव २२ आहूयसकलांसेनांयुद्धायकृतनिश्चयः दिवोदासोपितच्छ्रुत्वासर्वंदेव्यै
निवेद्यच २३ शूलेनपाहिनोदेवीत्येवंस्तोत्रंपठन्स्थितः प्रसन्नाजगदंबासाभूतसृष्टिंससर्जसा २४ तयातद्वासितं
सैन्यंसर्ववाजिभिरावृतम् भक्षिताःसकलाश्चाश्वाःसहपल्याणवाहकाः २५ जीवशेषाःसमासीनानृपेणसहकेच
न हयमारीतिसासृष्टिर्लोकेविख्यातिमापसा २६ यत्रयत्रपुरेग्रामेउद्यानेचपथिस्थितान् बभक्षतान्सावेगेनअन
श्वमभवज्जगत् २७ इतिश्रीभविष्योत्तरपुराणेआश्विनमासमाहात्म्येषष्ठोऽध्यायः ६ छ छ
सूतउवाच ततःस्वर्गंसमाक्रम्यनंदनंप्रययौरयात् मातलेर्हयमाकृष्ययावत्तावद्ययौहरिः १ युद्धंकृत्वातया

सार्द्धंबहुकालंमहत्पुरा यदिसानाभवत्क्षीणातदाचिंत्येत्यचारयत् २ ज्ञात्वैवदेवताकृत्यंतदादेव्यान्वचिंतयत् भक्त्याशक्रस्यसादेवीगोचरत्वमुपागता ३ नत्वाशक्रस्तुतत्सर्वंमहाकाल्यैन्यवेदयत् सापिकालीतयासार्द्धंयुद्धंकृत्वानिदारुणम् ४ पाशैर्बध्वामहाघोरैःसातदाशरणंययौ क्षम्यतामपराधोमेयतोहंशरणागतः ५ आज्ञांकुरुजगन्मातः पालयिष्यामितांशिवे ततआज्ञापयामासनिजाद्यर्चानिजेच्छया ६ देव्युवाच नवरात्रदिनेप्राप्तेवाहयंतिहियाश्वये तथैवपूजांशांतिंचनकुर्वंतिजनाधमाः ७ तेषांहयांश्चतांश्चापिभक्षयाम्यहमाज्ञया आज्ञांदत्वांतर्दधेसालीलाविग्रहधारिणी ८ सूतउवाच तद्भयाक्रियतेशांतिःकथयामिशृणुष्वताम् स्नानंस्वशयनंकार्यंतदातेषांदिनेदिने ९ धान्यंभल्लातककुष्ठवचासिद्धार्थकास्तथा पंचरंगेणसूत्रेणकंठेतेषांतुबंधयेत् १० वायव्यैर्वारुणैःसौरैःशाक्तैर्मंत्रैःसवैष्णवैः वैश्वदेवैस्तथाग्नेयैर्होमःकार्योदिनेदिने ११ तुरंगारक्षणीयाःस्युःपुरुषैःशस्त्रपाणिभिः ततोनिजपुरंप्राप्तोवीरबाहुःसदुःखितः १२ दारिद्र्यदुःखसंतप्तोजगामगहनंवनम् रेवातीरेसमासाद्यचकारतपउत्तमम् १३ दैवात्तदाश्विनोमासोजातस्नानादिकंचयत् तस्यप्रभावात्संप्राप्तोयोगीऋषभसंज्ञिकः १४ तंदृष्ट्वाप्रणनामाशुनिजमाधिंन्यवेदयत् ध्यात्वातुसचिरंतेनज्ञात्वातच्चांडिकोपजम् १५ चंडीपाठविधिंपूजांविधानशांतिपूर्वकम् शशंससकलंसांगंविधिवन्नियतात्मने १६ अथचांतर्दधेसोपिचकारऋषिदर्शितम् अस्यप्रभावाच्चशनैरागतंनिजवैभवम् १७ इतितेपूर्वमाख्यातंदशम्यामश्वपूजनम् तथैवगजपूजायांकारणंतच्चमेशृणु १८ ज्येष्ठायोगेपुरातत्रगजाश्चाष्टौमहाबलाः पृथिवीमवहन्पूर्वंसशैलवनकानना १९ कुमुदैरावणःपद्मःपुष्पदंतोऽथवामनः सुप्रतीकोंजनोनीलस्तस्मांत्तास्तत्रपूजयेत् २० शक्रऋक्षंसमारभ्यनवम्यंतंचपूर्ववत् जयार्थिभिर्नृपतिभिर्प्रतिपत्प्रभृतिक्रमात् २१ लोहाभिसारिकंकर्मकारयेद्यावदष्टमी प्रागुदक्प्रवणेदेशेपताकाभिरलं

कृते २२ मंडपंकारयेद्दिव्यंचतुर्धातुमितंशुभम् आग्नेय्यांकारयेत्कुंडंहस्तमात्रंसुशोभनम् २३ राजचिन्हानिसर्व
शस्त्राण्यस्त्राणियानिच आनीयमंडपेतानिसर्वाण्येवाधिवासयेत् २४ ततस्तुब्राह्मणैःस्नातः शुक्लांबरधरः
शुचिः ऊँकारपूर्वकैर्मंत्रैस्तल्लिंगैर्जुहुयाद्घृतम् २५ शस्त्रास्त्रमंत्रैर्होतव्यंपायसंघृतसंमितम् हुतशेषंतुरंगाणां
नृपतेरुपहारयेत् २६ बह्वपत्ययुतांस्तत्रगजाश्वान्समलंकृतान् भ्रामयेन्नगरेनित्यंनृत्यघोषपुरःसरम् २७ इ
तिश्रीभविष्योत्तरपुराणेपृथुनारदसंवादेआश्विनमासमाहात्म्येअश्वादिपूजाविधिवर्णनोनामसप्तमोऽध्यायः ७
६२ ऋषिरुवाच लोहाभिसारिकनामयत्त्वयाकथितंपुरा तत्किमेतन्ममाख्याहिलोकोपकृतयेधुन
१ सूतउवाच लोहनामाभवत्पूर्वंदानवःसुमहाबलः सदेवैःसमरेवह्नोबहुधासंकलीकृतः २ तदंगसं
भवंसर्वंलोहंयद्दृश्यतेक्षितौ लोहाभिसारिकंकर्मतेनैवऋषिणास्मृतम् ३ ऋषिरुवाच कथंलोहाभिधो
नामदैत्यःपरमदारुणः देवैर्हतोपिसमरेकस्माज्जातोवदस्वनः ४ सूतउवाच कदाचित्समयेब्रह्मासुखा
सीनोनिजासने अकस्माद्ददृशेतेनपुरुषःकृष्णापिंगलः ५ कोसित्वमितिचापृष्टःसोब्रवीत्तंत्वदात्मजः त्वद्धर्मसलि
लाज्जातोनजानासिकथंविभो ६ तदेवंवचनश्रुत्वासतुतोषजहर्षच आलिंग्यबालकंतंसकृत्वोरोमोहमागतः ७
क्रीडयामासतेनैववराणिसुबहून्यपि ददौचकारतंनामलोहेतिपरमंमुदा ८ तृतीयचरणेजातोभरण्याःकाम-
रूपिणः इत्युक्तोववृधेबालोविंध्याचलइवापरः ९ सपपाततदुत्संगात्सत्यलोकाद्धरातले ततःसरोदनंचक्रेभय
भीतादिवौकसः अमृतंपाययामासवात्सल्यात्कमलोद्भवः ततःसोमृतपानेनवज्रसारवपुर्भवत् ११ आज्ञागृही
त्वादेवस्यब्रह्मणाभूतलंययौ पृथिव्यांतेनलोहेनकृतश्चोपद्रवोमहान् १२ राजानोवीरमुख्याश्चचूर्णत्वंगमितास्
बलात् ब्राह्मणानिहताःकेचित्केचिच्चदूषितास्तथा १३ केषांचिन्निहताःपुत्राः केषांचिज्ज्वालितागृहाः अग्निहो

स्त्राणिसर्वाणिविच्छिन्नानिचभूरिशः १४ एवंकृतानिसर्वाणिदेशेदेशेपुरेपुरे एवंतेनिहताःसर्वेराजानःपृथिवीतले १
ब्राह्मणाश्चतथैवान्येपीडितासाधवोजनाः एवंजित्वासभूलोकंस्वर्गंजेतुमथाययौ १६ समागतंमहावीरंलोहना
माभिधंकिल दृष्ट्वापलायनंचक्रेमातलिर्हर्षसंमितः १७ तमारुरोहसबलाद्गृहीत्वामातलिंक्षणात् मातलिंप्रप
देधृत्वाविक्षेपशचिवल्लभम् १८ सपर्वतइवात्युच्चैःशक्राग्रेचपपातह जातस्तत्रमहाशब्दश्चकंपेतद्भुवस्तलम्
१९ तदाकोलाहलोजातोजातंकिंन्नविदुस्तदा अहोकिमेतत्किंजातमूचुस्तेचपरस्परम् २० मुहूर्तेनतदाज्ञातंमा
तलीतिविनिश्चितम् ततःसचेतनांप्राप्तोमातलिर्जलसेचनात् २१ जातंनिवेदयामासमातलिर्दैत्यचेष्टितम् तच्छ्रु
त्वाक्रोधरक्ताक्षोवृंदारकगुणैर्युतः २२ गजसिंहसमारुह्ययैयौद्रष्टुमहासुरम् हयरत्नसमारुह्ययौसोपिश
तक्रतुः २३ आच्छाद्यगोपुरंतस्थौभानुंकेतुरविग्रहः ततोदेवगणाःसर्वेएककालमयुध्यत २४ ववर्षुःशरसंघा
तैःशस्त्रास्त्रैरतिदारुणैः तेषांबाणाश्चशस्त्राणिअस्त्राणिचसहस्रशः २५ तदंगस्पर्शमात्रेणचूर्णितानिबहून्यपि
एवंप्रवर्तितेयुद्धेजातान्युद्धानिभूरिशः २६ अवध्यत्वंयदाज्ञातंप्रार्थयामासचंडिकाम् इंद्रस्यशक्तिभावेनसंतु
ष्टाकालिकाभवत् २७ तयाविमोहितोदैत्योवरयाचेतसोब्रवीत् इंद्रउवाच प्रसन्नोसियदादैत्यममवध्योभ
वक्षणात् २८ मायाविमोहितोदैत्यस्तथेत्युक्त्वाविचार्यच ततःशक्रेणवज्रेणलोहस्तुशकलीकृतः २९ तथापि
नगताःप्राणालोहोदुःखार्तितोभृशम् सस्मारवेधसंभक्त्याआगतःकमलासनः ३० तंदृष्ट्वाविनतीभूतोवज्रिणश-
तुमुद्यतः शापान्निवारयामासवरान्दत्वातदाबहून् ३१ इमानितवगात्राणांशकलानिबहून्यपि भवंतितीक्ष्ण
शस्त्राणिदेशेदेशेपुरेपुरे ३२ तदंगसंभवंलोहंदेव्यावरप्रभावतः पूजाकार्याचसर्वत्रलोहजातस्यसर्वदा ३३ येन-
कुर्वंतिलोहस्यपूजनंगिरिजोत्सवे तेषांग्रहेचदुर्भिक्षंशस्त्रबाधादिनेदिने ३४ एवंदत्वावरान्सद्योलोहोलोहत्व

८

मागतः गिरिजांतर्द्धेतूर्णमिंद्रोपिनगरंगतः ३५ लोहाभिसारिकंकर्मनदाचरव्यातिमागतम् ३६ इति
श्रीभविष्योत्तरपुराणेआश्विनमाहात्म्येलोहाभिसारिककर्मकथनंनामअष्टमोऽध्यायः ८ छ छ
सूतउवाच अतःपरंप्रवक्ष्यामिपूजामंत्रान्पृथक्पृथक् चंद्रोयथाच्छादयतिशिवायेमांवसुंधराम् १ त
थाच्छादयभोछत्रराजानंचसमृद्धये गंधर्वकुलजातिस्त्वंमाभूयाःकुलदूषकः २ ब्रह्मणःसत्यवाक्येनसोमस्य
वरुणस्यच प्रभावाच्चहुताशस्यवर्द्धयस्वतुरंगम ३ तेजसाचैवसूर्यस्यमुनीनांतपसातथा रुद्रस्यब्रह्मचर्येण
पवनस्यबलेनच ४ स्मरत्वंराजपुत्रत्वंकौस्तुभंचमणिंस्मर यागतिर्मातृहागच्छेत्पितृहाब्रह्महापिच ५ भूमि
हानृतवादीचक्षत्रियश्चपराङ्मुखः सूर्याचंद्रमसौयावत्तावत्तिष्ठतिदुष्कृतिः ६ व्रजत्वंतांगतिंक्षिप्रंतवपापं
भवेत्तदा निष्कृतिर्यदिवांछतियुद्धेध्वानितुरंगमः ७ रिपून्विजित्यसमरेसहभर्त्रासुखीभव शक्रकेतोः
महावीर्यश्यामकर्णार्चयाम्यहम् ८ पतत्रेवैनतेयस्त्वंतथानारायणध्वज काश्यपेयमहाबाहोनागारिविष्णु
वाहन ९ अप्रमेयदुराधर्षरणेदेवारिसूदन गरुत्मन्मारुतगतेत्वयिसन्निहितोहरिः १० अस्त्रचर्मायुधान्य
त्ररक्षत्वंचरिपून्दह कुमुदेरावणोपद्मःपुष्पदंतोथवामनः ११ सुप्रतीकोंजनोनीलएतेचैदेवयोनयः तेषां
पुत्राश्चपौत्राश्चवनान्यष्टौसमाश्रिताः १२ भद्रोमंदोयमाश्चैवराजासंकीर्णएवच वनेचनप्रसूतासोस्मरयोनिं
महागज १३ पातुत्वांवसवोरुद्राआदित्याःसमरुद्गणाः भर्तारंरक्षनागेंद्रस्वामिनंप्रतिपालय १४ अवा
प्नुहिजयंयुद्धेगमनोस्त्वल्पतोव्रज श्रीस्तेसोमाद्बलंविष्णोस्तेजःसूर्याज्जवोनिलात् १५ स्थैर्यंमेरोर्जयंरुद्रा
द्यशोदेवात्पुरंदरात् युद्धेरक्षंतुनागास्त्वांदिशश्चसहदैवतैः १६ अश्विभ्यांसहगंधर्वैःपातुत्वांसर्वतःसदा इ
तिसंपूज्यनागेंद्रान्पताकानामतःपरम् १७ हुतभुग्वसवोरुद्रावायुःसोमोमहर्षयः नागकिन्नरगंधर्वायक्षभूत

गणाधिपाः १८ प्रमत्ताःस्कमहादेव्योभूतेशोमातृभिःसह शक्रसेनापतिस्कंदोवरुणश्चाश्रितास्त्वयि १९ प्रविहंतारिपून्सर्वान्राजाविजयमिच्छतु यातिप्रयुक्तान्ऋषिभिर्दूषणानिसमंततः २० पतंतुतवशत्रूणांहृतानित्वत्तेजसा कालनेमिवधोयद्वद्यद्वत्त्रिपुरघातने २१ हिरण्यकशिपोर्युद्धेयुद्धेदेवासुरेतथा शोभितासितथैवाद्यशोभयास्मांश्चसंस्मर २२ नीलाश्चतामिमांदृक्षानश्यंत्वाशुनृपारयः व्याधिभिर्विविधैर्घोरैःशस्त्रैश्चयुधिनिर्जितः २३ पूतनारेवतीगौरीकालरात्रीतियास्मृता दहत्वाशुरिपून्सर्वान्पताकेत्वंमयास्मृता २४ असिर्विशसनःखड्गोविकर्मान्वदुरासदः श्रीगर्भोविजयश्चैवधर्माधारस्तथैवच २५ इत्यष्टौतवनामानिस्वयमुक्तानिवेधसा कृत्तिकाभंसमाहुस्ते गुरुर्देवोमहेश्वरः २६ हिरण्यंतेशरीरंतेधातादेवोजनार्दनः पितापितामहोदेवस्त्वथापालयसर्वदा २७ नीलजीमूतसंकाशस्तीक्ष्णदंष्ट्रःकृशोदरः भावयुद्धोमर्षणाश्चअतिजातस्तथैवच २८ इयंयेनधृता क्षोणीहतश्चमहिषासुरः तीक्ष्णधारायखड्गाय तस्मैयुन्द्धापेतेनमः २९ खड्गानानिप्रपूज्यादौततःसर्वाणिपूजयेत् ३० इतिश्रीभविष्योत्तरपुराणेआश्विनमासमाहात्म्येनवमोऽध्यायः ९ ७ सूतउवाच शर्मप्रदस्त्वंसमरेवर्मसर्वायसेत्हृदि रक्षमांरक्षणीयोहंनहंतव्योनमोस्तुते १ कुतस्त्वंतवशत्रूणांहृदयंमाविदारय गृहाणजीवितंतेषांममसैन्यंचरक्षय २ दुंदुभिस्त्वंमहानादघोषाद्धृदयकंपन जहिमच्छत्रुसैन्यानितथाविजयवर्द्धन ३ यथाजीमूतघोषेणप्रहृष्यंतिबर्हिणः तथास्कतवशब्देनहर्षोस्माकंमुदावहः ४ यथाजीमूतशब्देनस्त्रीणांत्रासोभिजायते तथाचतवशब्देननश्यत्वस्मद्द्विषोरणे ५ सर्वायुधमहामात्रसर्वदेवारिसूदन वशीभूतासिदैत्यानांतथाविजयवर्धन ६ चापमासर्वदारक्षासाकसायकसत्तमैः धृतंकृष्णेनरक्षार्थंसंहारार्थंहरेणच ७ त्रयीमूर्तिगतंदेवधनुरस्त्रंनमाम्यहम् पण्यस्त्वंशंखपुण्यानांमंगलानांचमंगलम् ८ विष्णुनाविधृतोनित्यमतःशांतिप्रदोभव शशांककरसंकाशाहिमडिंडिरपांडुर ९

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

प्रोत्सारयाशुदुरितंचामरामरवल्लभ चंडिकायाप्रदत्तासिसर्वदुष्टनिबर्हणी १० तथाविस्तारिताचासिदेवानांप्रतिपा
दिता सर्वसत्वांगभूतासिशंभास्करनिबर्हणी ११ छुरिकेरक्षमांनित्यंशांतिंयच्छनमोस्तुते प्रोत्सारणायदुष्टानां
साधुसंग्रहणायच १२ ब्रह्मणानिर्मितश्चासिव्यवहारस्यसिद्धये यशोदेहिसुखंदेहिजयदोभवभूपते १३ ताड्या
शरिपून्सवान्हेमदंडनमोस्तुते विजयोजयदोनामारिपुघ्नोतिप्रियंकरः १४ दुःखहाधर्मदःशांतःसर्वारिष्टविनाशनः
एतेष्टौसविधौमुक्तांस्त्वसिंहमहाबलः १५ तेनसिंहासनेतित्वंविप्रैर्वेदेषुगीयते त्वयिस्थितःशिवःशांतस्त्वयिशक्र
सुरेश्वरः १६ त्वयिस्थितोहरिर्देवस्त्वदर्थंतप्यतेतपः नमस्तेसर्वतोभद्रसर्वतोभवभूपतेः १७ त्रैलोक्यजयसर्वस्व
सिंहासननमोस्तुते वज्रत्वंसर्वशत्रूणांभूधराणांतथैवच १८ पक्षच्छेत्तासिराजानंरक्षत्वंपूजयाम्यहम् एवंसर्वा
णिशस्त्राणित्यस्त्राणिचविशेषतः १९ तन्नाममंत्रैर्विधिवत्पूज्यानिजयमिच्छता तथैवान्यतरायेचसमग्रालोहजी
विनः २० तेषामपिप्रयत्नेनतल्लोहंपूजयेत्सदा येचपूजांनकुर्वंतिलोहस्यलोहजीविनः २१ तेप्राप्नुवंतिदारिद्र्यंज
न्मकोटिशतैरपि २२ येषांगृहेतिष्ठतिलोहजातंतैःपूजनीयंविधिवत्तदायसम् नोचेद्गृहाद्गच्छतिचाब्धिकन्यातदेव
शेषंसदनंविहाय २३ इतिश्रीभविष्योत्तरपुराणेआश्विनमासमाहात्म्येराजोपचारादिपूजनवर्णनंनामदशमो
ऽध्यायः १० छ नारदउवाच भूयःशृणुमहाभागनवरात्रमहोत्सवम् यस्यश्रवणमात्रेणप्रसन्नाज
गदंबिका १ केशसंस्कारद्रव्याणिप्रदद्यात्प्रतिपद्दिने पट्टदोरंद्वितीयायांकेशसंयमहेतवे २ दर्पणंचतृतीयायां
सिंदूरालक्तकंतथा मधुपर्कंचतुर्थ्यांतुतिलकंनेत्रमंजनम् ३ पंचम्यामंगराजंचशक्त्यालंकरणानिच षष्ठ्यांबिल्व
तरौबोधोसायंसंध्यासुपूजयेत् ४ सप्तम्यांमातरानीयगृहमध्येप्रवेशयेत् उपोषणमथाष्टम्यांमात्मशक्त्याचपूज
नम् ५ नवम्यामुग्रचंडायाःपूजांकृत्वाबलिंतथा संपूज्योपोषणंकुर्यात्दशम्यांशेनरोत्तमैः ६ अनेनविधिनायस्तु

CSU-Jaipur Campus Collection

देवींप्रीणयतेनरः स्कंदवसालयेत्तंतु देवीसर्वापदिस्थिता ७ गंधालंकारतांबूलपुष्पमाल्यानुलेपनं उपवासेनदुष्यं
तदंतधावनमंजनम् ८ बोधयेद्बिल्वशाखायांषष्ठ्यांबिल्वफलेषुच सप्तम्यांबिल्वशाखांतांमाहृत्यप्रतिपूजयेत् ९
पुनःपूजांतथाष्टम्यांविशेषेणसमाचरेत् जागरंचस्वयंकुर्याद्बलिदानंमहानिशि १० प्रभूतबलिदानंचनवम्यांविधिव
च्चरेत् ध्यायेद्दशभुजांदेवींदुर्गामंत्रेणपूजयेत् ११ विसर्जनंदशम्यांतुकुर्याद्वैशारदोत्सवे धूलीकर्दमनिक्षेपैःक्री·
डाकौतुकमंडलैः १२ भगलिंगाभिधानैश्चभगलिंगप्रगीतकैः तथैवचसरस्वत्याकार्यंस्थापनपूजनम् १३ मूलेषु
स्थापनंदेव्याःपूर्वाषाढासुपूजनम् उत्तरासुबलिंदद्याच्छ्रवणेनविसर्जयेत् १४ नध्यापयेन्नचलिखेन्नाध्यायीनिक
दाचन पुस्तकेस्थापितेदेवीविद्याकामैर्द्विजोत्तमैः १५ त्रिदिनंचापिकर्तव्यंसप्तम्यादियथाक्रमम् अथवाद्विदिनं
कार्यंपूजोपस्करणादिकम् १६ अष्टम्यांकेवलायांतुपूजनंपरमंमतम् तत्राष्टम्यांभद्रकालीदक्षयज्ञविनाशिनी
१७ प्रादुर्भूतामहाघोरायोगिनीकोटिभिःसह तथैवचनवम्यांतुकृतंसर्वार्थसिद्धिदम् १८ सर्वदेवशरीरेभ्यआ
विर्भूतायदापुरा अभिषिक्ताततोदेवैर्निजकार्यसमृद्धये १९ लब्ध्वाभिषेकावरदाशक्लेचाम्बसुजस्यच तस्मात्
सातत्रसंपूज्यानवम्यांचंडिकाबुधैः २० अधुनाबलिदानस्यविधिंशृणुसमासतः पंचाद्दलक्षणोपेतंछागमानीय·
यत्नतः २१ द्रोणपुष्पैश्चपुन्नागजातीबिल्वाम्रचंपकैः गंधपुष्पाक्षतैश्चापिनैवेद्यैरपिपूजयेत् २२ अभिषिंचबलिं
१८ वालंतुपूजयेत् रसनालंचंडिकायाःस्मरलोकेममाधक २३ ह्रींह्रींखंडेतिमंत्रेणाध्यात्वाकुर्याद्धिकंचुकम्
उत्तराभिमुखोभूत्वाबलिंपूर्वमुखंतदा २४ निरीक्ष्यसादरंपश्चादिमंमंत्रमुदीरयेत् पशोत्वंबलिरूपेणममभाग्यादु
पस्थितः २५ प्रणमामिततःसर्वरूपिणांबलिरूपिणाम् चंडिकाप्रीतिदानेनदातुरापद्विनाशनम् २६ चामुंडाबलि·
रूपायबलेतुभ्यंनमोस्तुते यज्ञार्थेपशवःसृष्टाःस्वयमेवस्वयंभुवा २७ अतस्त्वांघातयिष्यामितस्माद्यज्ञेपरोभ

व विधिवत्कालिकालीतिजक्ष्वाशब्देनतच्छिरः २८ ॐह्रांह्रींऐंकौशिकीतिरुधिरेणाप्यायतामिति स्थानेनियोजयेद्रक्तंशिरस्थापिसदीपकम् २९ तदुत्थंरुधिरमांसंगृहीत्वापूजनादिषु नैर्ऋतेभ्यःप्रदातव्यंमहाकौशिकमंत्रितम् ३० एवंहत्वाबलिंपूर्णफलंप्राप्नोतिसाधकः बलिदानंतुदुर्गायाःसर्वत्रैवंविधिःस्मृतः ३१ तदर्द्धयामिनीशेषेविजयार्थंनृपाद्भयः स्वगात्ररुधिरेणापिबलिंकुर्युर्विधानतः ३२ इतिश्रीभविष्योत्तरपुराणेआश्विनमासमाहात्म्येनवरात्रविधिवर्णनंनाम एकादशोऽध्यायः ११ छ नारदउवाच ब्राह्मणोमाषभक्तेनबलिदानंविधीयते कूष्माडमिक्षुदडचमासमासवएवच १ एतेबलिसमाज्ञेयातृप्तौछागसमाःस्मृताः छागाभावेतुकूष्मांडंश्रीफलंवामनोहरम् २ वस्त्रसंवेष्टितंकृत्वाच्छेदयेच्छुरिकादिना जयंत्यासमरस्यावाहोमंकुर्याद्विधानतः ३ ततःसीमांतमुल्लंघ्यविजयंचाद्विजर्षभाः आश्विनस्यसितेपक्षेदशम्यांतारकोदये ४ सकालोविजयोनामसर्वकार्यार्थसाधकः

यामतिक्रांतःकिंचिदुद्भिन्नतारकः ५ विजयोनामकालोयंसर्वकार्यार्थसाधकः दशम्यांतुनरैःसम्यक्पूजनीयोपराजितः ६ मोक्षार्थीविजयार्थंवापूर्वोक्तविधिनानरैः अलंकृताभूषितभृत्यवर्गपरिस्कृतास्कंगतुरंगनागाः वादित्रनादप्रतिनादितादिशःस्वमंगलाचारपरंपराशीः ७ राजानिर्गत्यनगरात्सपुरोधापुरोगमः प्रास्थानिकविधिंकृत्वाप्रतिष्ठेत्पूर्वतोदिशि ८ गत्वानगरसीमांतंवास्तुपूजांसमाचरेत् संपूज्यचाष्टदिक्पालान्पूजयेत्पथिदेवताः ९ मंत्रैर्वैदिकपौराणैःपूजयेच्चशमीतरुम् अमंगलानांशमनीशमनीदुष्कृतस्यच १० दुःस्वप्ननाशिनींधन्यां प्रपद्येहंशमींशुभाम् शमीशमयतेपापंशमीशत्रुविनाशिनी ११ धारिण्यर्जुनबाणानांरामस्यप्रियवादिनी ततःकृताशीःपूर्वस्यांदिशिविष्णुक्रमात्क्रमेत् रिपोःप्रतिकृतिंकृत्वाध्यात्वाचमनसाचताम् १२ शरेणस्वर्णपुंखेनछिंद्याद्धृदयमर्मणि दिशांविजयमंत्राश्चपठितव्याःपुरोधसा १३ एवमेवविधिंकुर्याद्दक्षिणादिदिशास्वपि पूज्यान्-

द्विजांश्चसंपूज्यसांवत्सरपुरोहितौ १४ गजवाजिपदातीनांप्रेक्ष्यकौतुकमादरात् जयमंगलशब्देन ततः ं रा
त् १५ नीराजमानःपुण्याभिर्गणिकाभिः समंगलम् यएवंकुरुतेराजावर्षेवर्षेस्वमंगलम् १६ आयुरारोग्यमैश्वर्यं
विजयंचसगच्छति आधयोव्याधयस्तत्रभवंतिनपराजयः १७ श्रियंपुण्यमवाप्नोतिविजयंचसदाभुवि ततःस-
मध्येविधिवद्धारणंचविशेषतः १८ चारुणामुखपद्मेनविचित्रकनकोज्वला जयादेवीशिवाभक्त्यासर्वान्कामान्दद
तुमे १९ कांचनेनविचित्रेणकेयूरेणविभूषिता जयप्रदामहामायाशिवाभावितचेतसाम् २० विजयातुमहाभागा
ददातुविजयंमम हारेणस्वविचित्रेणभास्वत्कनकमेखला २१ अपराजितादूरतांचकरोतुविजयंमम हरिद्रारक्तव-
स्त्रंचदूर्वाःसिद्धार्थकानपि २२ प्रदक्षिणंचसंवेष्ट्यगीतवादित्रनिःस्वनैः सदापराजितायस्मात्त्वलतासूत्रमास्मृ
ता २३ सर्वकामार्थसिद्ध्यर्थंतस्मात्त्वांधारयाम्यहम् पूजितायांत्वयिश्रेयोममास्तुदुरितक्षयः २४ जयदेवरदे
देविदशम्यांयापराजिते धारयामिभुजेदक्षेजयलाभाभिवृद्धये २५ इमांपूजांमयादेवियथाशक्त्यानिवेदिताम्
चतुर्थंतुसमादायव्रजस्वस्थानमुत्तमम् २६ बलमायुर्हिबलयमपिशत्रोःपराजयः त्वद्धारणाद्भवेयुर्मेधनधान्यस-
मृद्धयः २७ एवंसर्वैर्नरैःकार्यंसीमोल्लंघनसंज्ञकम् ततोभूषणवस्त्रादिधारयेत्स्वजनैःसह २८ कृत्वानीराजनरा
जाबलवृद्धैर्यथाक्रमम् शोभनंखंजनपश्येज्जलगोगोष्ठसन्निधौ २९ नीलग्रीवशुभग्रीवसर्वकामफलप्रद पृ-
थिव्यामवतीर्णोसिखंजरीटनमोऽस्तुते ३० इतिश्रीभविष्योत्तरपुराणे आश्विनमासमाहात्म्येदशमीकृ
त्यवर्णनंनामद्वादशोऽध्यायः १२ छ पृथुरुवाच नवरात्रविधिर्जातस्त्वत्प्रसादान्मुनीश्वर अ-
धुनाश्रोतुमिच्छामिमाहात्म्यंपापनाशनम् १ सेतिहासमहाबाहोकथयस्वप्रसादतः नारदउवाच सनत्
कुमारोयोगींद्रःप्रधानपुरुषेश्वरः २ पप्रच्छपरयाप्रीत्यातत्सर्वंकथयामिते ३ सनत्कुमारउवाच भगवन्देव

देवेशभक्तानामभयप्रद संसारस्यविचित्रस्यमहिमाकोनुवर्ण्यते दृश्यंतेकेचनप्राज्ञाःसुरूपाःसुखसंपदः ४ पु
त्रपौत्रसमायुक्ताःस्त्रीललामोपसेविताः सुवर्णमाणिमाणिक्यसौधहर्म्यनिवासिनः ५ दोलांदोलितगात्राश्चसु
वेलोष्णीषशोभिताः कौशेयकामिनीकेलिकल्लोलाःस्वादुलोलुपाः ६ यक्षकर्दमकस्तूरीरक्ता लांकितसौमयः
युवतीललनारंगराजितास्यामनोरमाः ७ पवनाच्छीघ्रवाजीशवाहिनोवाहिनाधनः ७ शांतादाताःसमीचीनां
जिह्वाल्हतसुधारसाः कंदर्पकोटिलावण्यविश्वमोहनकाःपराः ८ परापवादविमुखाःपरनिंदानिषेधकाः एकेन
राश्चविविधनानादुःखोपदुःखिताः ९ एतद्विचित्रैर्भगवन्दृश्यतेवसुधातले वासुदेवजगन्नाथसंशयंछिंधिमामके
१० श्रीभगवानुवाच पुण्यतःसर्वसंपत्तिःपुण्यतोयुवतीसुखम् पुण्यतःपुत्रपौत्राश्चसर्वंपुण्यादवाप्यते
११ तथापितेहंकथयेमुनींद्रपुण्यप्रवाहंकथितंपृथिव्याम् नचासुतंचमनसाविचिंत्यकुरुष्वमत्यसुकृताभिषे
कम् १२ स्पर्शेषुषोडशंयच्चयच्चतत्रैकविंशतिः शरत्कालेहितत्कार्यंयद्व्रतयोगिनांविदुः १३ रटंतिवेदारत्लानिपु
राणानिविशेषतः व्रतराजंचसंपूर्णोनवरात्रमुपोषणम् १४ प्रणमोनिगमोयच्चयद्वत्पौवनीसुरः यतूपदेषु
तद्वन्नौस्त्रीषुयद्वद्रूपागुलाम् १५ सर्पिःसर्वरसेयद्वत्कांचनंसर्वधातुषु सानुमत्सुयथाहेमसरसीषुपयोनि
धिः १६ नदीषुगंगानीरेषुयथागंगोदकंशुभम् यथावृक्षेषुभोऽश्वत्थोगंधर्वेषुचनारदः १७ सर्वदेवेयथावि
ष्णुःसर्वधर्मेषुवैष्णवः वैष्णवेष्वपिसर्वेषुप्रल्हादश्चयथाशुभः १८ यथातिथिष्वस्यातिथिर्वारेष्वर्कस्यवासरः
तेजस्विषुयथाभानुर्नक्षत्रेषुयथाशशी १९ गरुडःपक्षिषुयथाशेषोनागेषुवैयथा चिंतामणिश्चरत्नेषुत्र्यपरेषुवि
रागपरः २० क्षेत्रेषुचकुरुक्षेत्रंयथान्नमोषधीषुच पूजायांतुलसीयद्वत्तुलसीषुचमेचका २१ गंधर्वेषुचलोकेषु
स्वर्लोकस्तुविशेषतः शरत्कालेसदातद्वन्नवरात्रमुपोषणम् २२ सर्ववेदेषुशास्त्रेषुव्रतराजःप्रकीर्तितः नपोदा

नंचयज्ञाश्वनवरात्रस्यपालनम् २३ परलोकफलंदद्यादधुनैवमहातपाः अत्रैवोदाहरंतीममितिहासंपुरातनम्
२४ गौतमस्यवधूंगत्वाकामलोभेनवासवः ब्रह्मशापसमुद्भूतःसहस्रभगचिन्हितः २५ विहायराज्यंसकलंग॰
त्वावैमानसंसरः पद्मिनीवनमासाद्यप्रविष्टःपंकजांतरे २६ तपस्यदशरात्रंतुप्रविष्टोन्नविवर्जितः कुलदेवींसदेवा
त्रसस्मारदिवसाष्टकम् २७ नवरात्रमुपोष्यास्यजातःपापस्यसंक्षयः अत्रांतरेसमागत्यदेवाश्चसपुरोहिताः
२८ विष्णुनाचसमायुक्तागताःसमभिपूजिताः वासुदेवपदांभोजंनत्वाधोवनतःस्थितः २९ सहस्रभगसंयुक्त
लज्जापूरितवाङ्मुखः तदाविष्णुःप्रसन्नोभून्नवरात्रमुपोषणात् ३० उवाचवचनंभूयोदेवानांपश्यतांसदा वासव
स्यभगान्येतेलोचनानिभवंतुवै ३१ वासुदेवस्यवचनात्सहस्रनयनोभवत् नदेवानांमाहात्म्यंतद्वासवस्यमहा
त्मनः ३२ सर्वपापक्षयोजातोनवरात्रमुपोषणात् तावद्गर्जंतुतीर्थानितावद्गर्जंतुदेवताः ३३ यावन्नायातिराजेंद्र॰
नवरात्रमुपोषणम् यस्तुद्वादशवर्षाणिनवरात्रव्रतीभवेत् ३४ गयायांश्राद्धकृद्यस्तुनांतरंतुतयोःस्मृतम् ।
तपस्तीर्थस्नानयज्ञादिकाःक्रियाः ३५ नवरात्रमुपोषस्यकलांनार्हंतिषोडशीम् नवरात्रमुपोष्याशुसर्वपापैःप्रमु॰
च्यते ३६ दुःप्राप्यामानसीसिद्धिःसर्वपापक्षयाद्भवेत् सर्वपापक्षयोन्द्धारेकोटिकोटीश्वरोभवेत् ३७ सुवर्णशतसं
युक्तःकदर्याःकदरस्करवम् तस्मात्सर्वप्रयत्नेनसर्वपापक्षयायच ३८ शरत्कालेसदाकार्यंनवरात्रमुपोषणम् न॰
वाहःस्कनिराहारस्तद्व्रतंचैवकारयेत् ३९ नवदिवसेषुयागंतद्व्रतंसम्यक्प्रजायते नवदिवसेसर्वकामःसोपिविद्या॰
त्सकामुकः ४० नवदिवसनिष्ठेनिकोटिभक्तैकसेवितम् विधानंतुव्रतस्यास्यवासुदेवब्रवीतुमे ४१ यज्ज्ञात्वाद्य
व्रतंकुर्याद्विधानंतच्छ्रुतंस्मृतम् श्रीभगवानुवाच ततोवेदशसंध्यायांगत्वाशक्त्यालयेतया ४२ शिवस्यवि॰
ष्णोःसूर्यस्यगणेशस्यापिवैपुनः सर्वदेवमयाशक्तिर्देवाःशक्तिमयास्तथा ४३ तस्मात्सर्वप्रयत्नेनयत्रकुत्राप्युपोषये॰

१२

त् यावत्समाप्यसंध्यायां कलशंस्थापयेत्ततः ४४ सश्रीफलंसवस्त्रंवासद्रव्यंकारयेत्ततः ततःशक्तिविधतःस्ना
नंमध्यान्हेचविशेषतः ५५ अथमंत्रग्रहस्नानंवापीकूपेचमध्यमं उत्तमंपुष्करस्नानंनद्यांचैवोत्तमोत्तमम् ५६ दीप
दानमविच्छिन्नंनैवेद्यंधूपदीपकम् प्रतिपत्प्रातरुत्थायनियमंतत्रकारयेत् ५७ सप्तजन्मकृतंपापंज्ञाताज्ञातंशुभाशु
भम् विनाशायमहादेवीनवरात्रेह्युपोषणात् ५८ इतिश्रीभविष्योत्तरपुराणेपृथुनारदसंवादेआश्विनमाहा
त्म्येनवरात्रमहिमावर्णनंनामत्रयोदशोऽध्यायः १३ छ नारदउवाच नियमंचदिनान्यष्टौगीतवादि
त्रमंगलैः शृणुयाच्चकथांपुण्यांदिनान्यष्टौसमाहितः १ अष्टम्यांहोमयेद्वन्हौत्रिफलैर्दुग्धतंडुलैः बिल्वदलैःफलैः
श्चान्यैःसघृतैश्चसमंत्रकैः २ अशनंतुकुमारीणांब्राह्मणानांप्रदापयेत् भूरिभोज्यंततःकुर्याद्यथाशक्त्याचदक्षि-
णाम् ३ एतेनैवमहायोगिन्सर्वपापात्प्रमुच्यते दिनान्यष्टौमहाभक्त्यादुर्गापाठंपठेच्छुचिः ४ भुविराज्यप्रदंचैव
सुखसौभाग्यदायकम् पुत्रपौत्रप्रदंचैवसर्वदुःखविनाशनम् ५ सर्वपापहरंचैववांछितार्थफलप्रदम् पुनःकिंपृ
च्छयोगिन्यदन्यत्रचकथानकम् ६ मांधातानामभूपालोबभूववसुधातले अन्येचैवमहीपालास्तेनसर्वेवशीकृताः
७ ससागरांचसद्वीपांसहस्रांचसपल्लजाम् सर्वांपृथ्वींचबुभुजेचक्रवर्तीनरेश्वरः ८ एवंतुसमयेयोगिन्नारदो
मुनिपुंगवः अंतरिक्षचरोयोगीतस्यवेश्मसमागतः ९ पूजितःपरयाभक्त्याविधिनाचनमस्कृतः उवाचवचनंचेदंप्र
हस्यचनरेश्वरम् १० सर्वराजतवागारेधनंधान्यंमहत्तरम् गजाश्वरथवस्त्राद्यंमणिमाणिक्यसंयुतम् ११ सुवर्ण
रूप्यकौशेयदासीदाससमाकुलम् राजानोवशगाःसर्वेपृथ्वीचवशवर्तिनी १२ चक्रवर्तीचभूपालोभूपालानांचभू
पतिः नत्वन्यूनमहंमन्येप्रीत्यातवमहीपते १३ ययेयंपृथिवीभूपसाक्षाद्रूपवतीसती भूपस्ययुवतीरूपानभूतान
भविष्यति १४ वामांगेतिष्ठतिस्त्रीत्वेतथाकुरुमहीपते मांधातोवाच कस्यापिनेयंपृथिवीसाक्षाद्रूपवतीस-

ती १५ भूपस्ययुवतीरूपानभूतानभविष्यति नारदउवाच तथाहंकथयिष्यामियथेयंवशवर्तिनी १६ आ-
गमिष्यतितेस्त्रीत्वेभक्त्यायुक्त्यायथाविधिः शरत्कालेमहामायाव्रतराजंसमाचर १७ गंधधूपादिनैवेद्यबलिदानैर्वि-
शेषकैः तिलहोमैर्जपैर्दिव्यैःस्वाध्यायैर्मंत्रपाठकैः १८ आराधयमहामायांवांछितार्थफलप्रदाम् वांछितार्थः
सुदुःप्राप्यःसर्वमनसिचिंतितम् १९ अचिरादेवसिद्ध्यंतिव्रतराजप्रभावतः एवंसंभाष्यभूपालमंतर्धानंगतोमुनिः
२० ततःसराजामांधाताव्रततत्परमानसः भवानीपूजयामाससर्वोपस्करसंयुतैः २१ बलिदानैर्महायोग्यैःकूष्मां-
डनारिकेलकैः मातुलिंगैश्चजंबीरैःखर्जूरैःकदलीफलैः २२ घृतदीपैरविच्छिन्नैर्ब्राह्मणानांचभोजनैः भोजनैश्चकु-
मारीणांदेवतानांसुपूजनैः २३ एतत्पूजाप्रभावेनतुष्टाकात्यायनीतदा उवाचवचनंराज्ञेवरंवरयभूपते २४ राजो-
वाच यदितुष्टासिमेदेवीपृथिवीरूपधारिणी ममागत्याशुवात्सल्यात्पत्नीत्वेवरयस्वमाम् २५ श्रीभगवत्युवा-
च भविष्यतिमहाराजवांछितार्थस्तवादरात् इतिलब्ध्वावरंराजासंहृष्टमनसागृहम् २६ जगामचतदाशीघ्रं
दिव्यरूपधरासती पतित्वेवरयामाससाक्षात्प्राणप्रियंसती २७ सतयासहराजेंद्रोरमेरंजितमानसः बुभुजेसम-
हाभोगान्पृथिव्यांप्रथितस्तया २८ चक्रवर्तीततोजातोव्रतराजप्रभावतः २९ एतद्व्रतंयस्तुसमस्तवामकुर्याद्वि-
धानेनचवत्सरंप्रति अथोसमंतात्समहीतलेस्मिन्शक्तिप्रसादात्सततंभवेच्च ३० येकेचनमहातीर्थान्प्राप्यंते-
यस्त्वकेश्चन गृहस्थानरतंतीर्थं व्रतराजेकृतेसति ३१ इतिश्रीभविष्योत्तरपुराणेपृथुनारदसंवादेआश्विन
मासमाहात्म्येनवरात्रमहिमवर्णनंनामचतुर्दशोऽध्यायः १४ छ सनत्कुमारउवाच नवरात्रप्रभा-
वेनदुःखार्ताःसुखमाप्नुयुः एतत्कथयनोभक्त्यासर्वोपकृतयेतथा १ श्रीभगवानुवाच एतदेवपुरामत्थंपप्रच्छ
द्रुपदात्मजा द्रौपद्युवाच सर्वदुःखविलीयंतेप्राप्यतेवांछितंफलम् २ व्रताच्चनियमात्तीर्थात्तन्मेकथयमाधव

श्रीभगवानुवाच शृणुपांचालिगुह्यंतेव्रतंवक्ष्यामिविस्तरात् ३ अयोध्याधिपतेःपुत्रीयेनदुःखाद्विमोचिता द्रौवाच कोसावयोध्याधिपतिःकापुत्रीकेनदुःखिता ४ कथंदुःखाद्विनिर्मुक्तातन्मेकथयशोभनम् श्रीकृष्ण उवाच ब्राह्मणस्तुश्रुतःपूर्वमुद्दालकइतिस्मृतः ५ तपसाशोषयामासशरीरंस्वर्गहेतवे गंगातीरेजिताहारोजितवाग्जितमानसः ६ एवंध्यायतियोगीशोसुमंतुर्दमवांस्तदा उद्दालकंमुनिवरमब्रवीद्धास्यपूर्वकम् ७ कस्मात्त्वंक्लिश्यसेयोगिन्ज्ञानीमौनीजितेंद्रियः उद्दालकउवाच जयेस्वर्गमहंयोगिन्यत्रगत्वानशोचते ८ सुमंतुरुवाच तपसास्वर्गलोकस्तुप्राप्यतेनकथंचन स्वर्गाभिलाषीयद्विचेत्तपस्त्वंचपरित्यज ९ गृहंगत्वायुवत्याश्चपरिग्रहपरोभव तस्यामुत्पादयसुतंऋणीत्वमनृणीभव १० अपुत्रस्यगतिर्नास्तिस्वर्गोनैवचनैवच वंध्यस्यऋणयुक्तस्यस्वर्गोलोकोनविद्यते ११ सुमंतुरितिसंभाष्यगतस्तस्मात्स्वमाश्रमम् उद्दालकस्तुविमनादिनैःकतिपयैश्चसः १२ तपोविहायदेवर्षिर्गतोसौब्रह्मणोंतिके नमस्कृत्वाविधातारंभक्त्याविनतमस्तकः १३ यथोक्तंकथयामाससुमंतुमुनिनास्फुटम् ब्रह्मातदुपधार्याथसुतवचनमब्रवीत् १४ प्रथमंप्राप्स्यसेपुत्रंपश्चात्पत्नीमवाप्स्यसि कथयित्वाविधातावैश्चांतर्धानंगतोभुवि १५ ब्रह्मणस्तुवचःश्रुत्वासमुनिर्विमुखोभवत् विपरीतंवचःश्रुत्वाब्रह्मणासमुपादितम् १६ विनाभार्यांकथंपुत्रःप्राप्यतेमानवैरिह पुनस्तुविमनाभूत्वागंगांगत्वातथैवसः १७ आश्रमंतंतथाप्राप्यतपसेनिश्चितोमहान् तथापिविमनाभूत्वाचिंतयामासभामिनीम् १८ एवंचिंतयतस्तस्यवीर्यद्रावोऽभवन्मुनेः योगीपुण्यात्मभीतस्तुपृथिव्यांपतनात्तया १९ पद्मेनिधायतद्वीर्यंमुखंदर्भशलाकया बध्वाचिक्षेपगंगायांपश्चात्स्नातोऽभवच्छुचिः २० एवंतुसमयेसाध्वीअयोऽध्याधिपतेःसुता सुभद्राभद्ररूपाचगजाश्वनरवाहनैः २१ दासीसहस्रसंयुक्ताजलक्रीडापरायणा गंगातीरमथप्राप्यचिक्रीडेबहुभिःसह २२ मुनिवीर्यसमायुक्तंकमलंसाददर्शह गृहीत्वाकमलंहस्ते-

स्थित्वातांकुशग्रंथिकाम् २३ नासाग्रेणतुतद्वीर्यंप्रविष्टंनाभिमंडले तस्माद्गर्भःसमुद्भूतोविवृद्धोदिवसानुक्रमात्
२४ कुमारीसानजानातिपज्ज्ञातंघ्राणरंध्रतः स्नात्वायोध्यागतासातुतथैवासीत्कुमारिका २५ कालेनदिवसैःकै
श्चिद्रूपलावण्यसंयुता गर्भांकितातदादृष्टासर्वाभिर्हसिताभवत् २६ ततोदासीगणैर्ज्ञात्वासर्वमात्रेनिवेदितम्
भर्तुःसोकथयामासपुत्र्याःसर्वंनिरीक्ष्यच २७ निशीथेकथयामासराजाशोकसमाकुलः चंडालाहन्यतापुत्रीमत
र्त्तीममाज्ञया २८ इतोनीत्वामहारण्यंक्षिप्त्वागर्तेषुमामिकाम् समयात्तुसशय्यांतांनिद्रावशगतामिमाम् २९ ते
गृहीत्वातदाशय्यांसकुमारींमहावने मोक्तुंहित्वामलज्जास्तेपरस्परविवादिनः ३० जीवंतीमेवतांमुक्त्वाचंडालास्ते
गृहगताः राज्ञेनिवेदितंसर्वंतत्कृत्यंयन्नियोजितम् ३१ ततःप्रभातसमयेविनिद्राविह्वलाभवत् उच्चैःस्वरमरोदीत्सा
कन्यानीरपयोनिधेः ३२ विश्वावसुस्तदायातिसमित्कुशपरायणः ददर्शतांचरुदतींसपप्रच्छदयान्वितः ३३ सा-
पृष्टाकथयामासस्वतायोध्यापतेरहम् अपराधंविनात्यक्तापित्रादैववशादहम् ३४ त्वंपितामेगुरुःश्रीमानंगीकुरु-
महामुने निर्दोषात्कमलघ्राणात्कन्याप्राहदशामिमाम् ३५ इतिश्रीभविष्योत्तरपुराणेआश्विनमासमाहा-
त्म्येनवरात्रमहिमावर्णनंनाम पंचदशोऽध्यायः १५ छ सूतउवाच अज्ञानत्यक्तात्वंबालेसमाया
हिममाश्रमम् एवंनीत्वासयोगींद्रोगर्भिणींतांस्वमाश्रमम् १ ततःकैश्चिदहोभिश्चनासिकाग्रेणसापुनः पुत्रंतुसु
षुवेशुभ्रंसुमुहूर्तेमनोहरम् २ नासिकेतमितिख्यातंतस्यनामाकरोन्मुनिः ततःकैश्चिदहोभिश्चमंजूषायांनिजंसु-
तम् ३ निक्षिप्यगत्वागंगायांपक्षिपंनिर्दयोयथा पुनःसाचरुरोदोच्चैरुदतीवनदेवताः ४ मुनिरुद्दालकस्तस्मिन्
समयेस्नातुमागतः गंगागत्वासमभवदघमर्षणतत्परः ५ तदातीरसिसलग्नामंजूषास्वसुतस्यसा उत्पाट्य-
सतुमंजूषामपश्यदद्भुतंशिशुम् ६ ब्राह्मणोवचनंस्मृत्वानीत्वापुत्रंगृहंगतः ततःकैश्चिदहोभिश्चतत्सुतोयंन्यवर्धत

७ उल्लापनैःप्राशनैश्चवंमातुरभिलाषतः एतस्मिन्नंतरेसातुभ्रमंतीतुतदाश्रमे ८ आगतादैवयोगेनददर्शस्व
स्कृतंसती उद्दालकस्तदारण्येगतोदर्भादिकाम्यया ९ पप्रच्छबालकंतंसाकमाताकपितागतः बालकउवाच
उद्दालकस्यश्रेष्ठस्यतनयंविद्धिमामिह १० माबानास्तिपितासोयंपोषतेदुहतोहिमाम् एवंप्रकथ्यमानंतुज्ञात्वापुत्रं
निजंसती ११ स्तनपानंददौतस्मैरोमांचिततनुस्वसा रेपुत्रजननीतेहंदैवात्वंवंचितोऽसिमे १२ बालकउवा
च मातर्मेजननीत्वंचेत्समायाहिगृहंमम सापुत्रेणयुतामातागतासाचाश्रमंप्रति १३ देवपूजोपहारायमार्ज
यित्वाशुभंकृतम् लिप्तस्वास्तिकसंयुक्तंकृत्वागंतुंप्रचक्रमे १४ पुत्रगच्छामिगंगायांस्नानार्थंसंकृतासती एवंतुक
थयित्वासागंगांप्रतिगतातदा १५ उद्दालकोमुनिश्रेष्ठआगतस्तत्रस्वमाश्रमम् लिप्तंविचित्रितंदृष्ट्वामुनिःपुत्रंचसो
ब्रवीत् १६ एतत्कृतंकेनपुत्रत्वयावाब्रूहिसुस्फुटम् १७ इतिश्रीभविष्योत्तरपुराणेपृथुनारदसंवादेआश्वि-
नमासमाहात्म्येनवरात्रमहिमावर्णनंनामषोडशोऽध्यायः १६ छ उद्दालकउवाच जनन्यामेकृतंता
तकुत्रसावर्ततेऽधुना इदानींसागतागंगास्नानार्थंजननीमम १ रेपुत्रगच्छशीघ्रत्वतांसमानयसत्वरम् पितुर्व
चनमाकर्ण्यगतोसौमातुरंतिके २ मात्रेनिवेदयामाससर्वंतज्जनकेरितम् जनन्युवाच गच्छपुत्रपितुःपा-
र्श्वेपितरंतंनिवेदय ३ आगच्छयदितेकार्यंवृत्तांतंकथयामिते पुत्रेणकथितंपित्रेमात्रायत्कथितंस्फुटम् ४ उ
द्दालकस्तदागत्यपप्रच्छयुवतींचताम् उद्दालकउवाच कात्वंकस्यासिकस्यत्वंपुत्रीवदस्फुटंचमे ५ सा-
पृष्टातेनमुनिनापूर्ववृत्तंन्यवेदयत् यथासीद्गर्भसंभूतिःपित्रात्यक्तायथाभवत् ६ यथापुत्रस्यजननंयथात्यक्तो-
ऽभवत्ततः श्रुत्वातुयुवतीवाक्यसस्मारब्राह्मणोवचः ७ त्वंसमायाहिमेवेश्मतद्भार्यंममभामिनि त्वंमेप्राणप्रि-
याभार्यावाणीवाब्रह्मणोपिच ८ एवंचेत्तर्हियोगींद्रसर्वंपित्रेनिवेदय पित्रादत्तायथात्वंवैवरयामिपतिंप्रि-

पम् ९ इतिश्रुत्वापिसमुनिःसर्वराज्ञेन्यवेदयत् ततःसुतांनिरपराधांसराजामुनयेददौ १० समुनिस्तुतयारेमेरा
जपुत्र्यानियोग्यया एकदाहमुनिःपुत्रंरमंतंमातुरंतिके ११ पुत्रगच्छवनेशीघ्रंकुशपुष्पार्थमुद्यतः गतःपुत्रोवनेशी·
घ्रंदृष्ट्वासोपिशिवालयम् १२ तपसेकृतसंकल्पःषण्मासंतत्रसंस्थितः आश्रमंतुततःप्राप्तोगृहीत्वासौसमित्
कुशान् १३ पितारोषेणसंतप्तःपंचत्वंगच्छपुत्रक पितुस्तुशापमात्रेणविपत्तिमगमत्तदा १४ ततःसायोगिनीभा
र्यामृतपुत्रेतिदुःखिता मृतंपुत्रंसमादायगंगातीरंगताभवत् १५ मृतपुत्रंसमासाद्यकृत्वामूर्तिंजलाश्रये भ
गवत्याःशरत्कालेआश्विनेप्रतिपद्दिने १६ निराहाराचनिःशाकाशक्तिध्यानपरायणा एकभक्तियुतासाचरात्रयो·
नवतागताः १७ पापक्षयस्यसंयोगात्प्रसन्नाशक्तिरब्रवीत् वरंवरयभद्रंतेतवयन्मनसेप्सितम् १८ जनन्युवा
च मृतंपुत्रंप्रदेह्याशुप्रसन्नायाचिताक्षणात् शक्तिरुवाच संजीवयाम्यहंपुत्रंसुधासिक्तंमहीतले १९
समोयंचपितुःशापोब्रह्मशापोदुरत्ययः संमोच्यास्वभर्तारंब्रह्मशापविमोचनात् २० पश्चाच्छक्त्यासुधासिक्तो
मृतोसौजीवितोभवत् नवरात्रमुपोषात्साकृतकार्याभवत्सती २१ इतिश्रीभविष्योत्तरपुराणेपृथुनारदसंवा
दे आश्विनमासमाहात्म्येनवरात्रमहिमवर्णनंनामसप्तदशोऽध्यायः १७ छ पृथुरुवाच अन्यत्
कथयमेब्रह्मन्व्रतंबुद्धिप्रदंशुभम् यत्कृत्वालभ्यतेबुद्धिरिहामुत्रसुखप्रदां १ नारदउवाच ईषमाससि
तेपक्षेद्वितीयायांनृपोत्तम प्रातरुत्थायविधिवत्स्नायाच्छीतेनवारिणा २ अत्युत्तमंनदीस्नानंतडागेमध्यमंस्मृतम्
अधमंतुगृहेस्नानंनिषिद्धंचोष्णवारिणा ३ प्रातर्विधिंविधायादौमध्याह्नेजलसन्निधौ सरस्वत्याःपरांदिव्यांमू
र्तिंचसिकतोद्भवाम् ४ चतुर्भुजांसावयवांमयूरवरवाहनम् पूजयेत्परयाभक्त्याषोडशैरुपचारकैः ५ सितपुं
ष्पोपहारैश्चसितवस्त्राक्षतादिभिः नैवेद्यंपायसंकृत्वादर्शयेज्जगदंबिकाम् ६ समाप्यप्रार्थ्यचिच्छक्तिंचिच्छक्तिंस

र्वकामदाम् सद्बुद्धिंदेहिसत्पात्रंसत्कांतांसत्प्रजांयशः ७ सच्छीलंसद्धनंचायुः सद्विद्यांसत्समागमः निवेद्यपूजनं
तस्यद्विजंसंपूजयेत्ततः ८ ससुवर्णक्षीरपात्रं छादितंश्वेतवाससा द्विजवर्यायदातव्यंस्वशक्त्यादक्षिणान्वितम्
९ ततःकथांसमाकर्ण्यसरस्वत्याश्चसन्निधौ नमस्कृत्यजगद्धात्रींप्रवाहेतांविसर्जयेत् १० आहूतासिमयाभद्रे
पूजितासियथाविधि कुरुमेव्रतसाफल्यंगम्यतांनिजमंदिरम् ११ दंपत्यासहराजेंद्रत्वश्नीयात्पायसंव्रती
सरित्तीरेप्रकर्तव्यंव्रतंसद्बुद्धिदायकम् १२ देवालयेगवांगोष्ठेग्रहेचाश्वत्थसन्निधौ व्रतेनानेनसद्बुद्धिःप्राप्यते
नात्रसंशयः १३ अत्रार्थेकथयिष्यामिइतिहासंपुरातनम् माहिष्मत्यांपुराराजाचंद्रसेनेतिविश्रुतः १४ कुबेर
इवसंपन्नःसर्वशास्त्रविशारदः सुमदानामभार्यासीद्भर्तृवाक्यपरायणा १५ चंद्रसेनोपिधर्मात्मासर्वधर्मपरा
यणः तयापिनाभवत्पुत्रःपुत्रार्थंयत्नमाचरं १६ राजानंजरठंदृष्ट्वा सुमदाचिंतयान्विता दासीदासांश्चकथयत्
कथंपुत्रोभविष्यति १७ पुंश्चलीभिश्चजारैश्चपुत्रार्थं सुमदांतदा बोधयामासुर्जारिण्यःसुमदांरहसिस्थितां
१८ नराज्ञोलप्स्यसेपुत्रंवृद्धस्यातीवभामिनी तरुणीरूपसंपन्नातरुणाल्लप्स्यसेसुतम् १९ अतीवबलसंपन्नो-
भविष्यतिसुतस्तव जठराज्जरठोभावीगदार्तोह्यगदीभवेत् २० एतदर्थंत्वयाकार्यःतरुणासूत्रसंग्रहः अपुत्रस्य
सुखंनास्तिइहलोकेपरत्रच २१ इतिश्रुत्वावचस्तासांसुमदाविस्मयान्विता महत्पापमयाकार्यमनर्थजननिंदि
तम् २२ यास्यामिनरकान्घोरान्कथंकार्यंहितन्मया स्त्रियऊचुः भर्तृदेहेन्यदेहेवाकोभेदस्तत्रदृश्यते २३
वृथाभीतिःकृतालोकेनदोषोजारकर्मणि संततेर्व्यभिचारोक्तोरोगार्तेनयथौषधम् २४ स्वकार्यंसाधयेत्प्रा-
ज्ञोयेनकेनापिकर्मणा तासांवचनमाकर्ण्यसुमदाहृष्टमानसा २५ तरुणंरूपसंपन्नंबलवंतंव्यलोकयत् तेन-
स्वसेविनारेमेनिःशंकंसुमदातदा २६ तरुणीनांजारिणीनांनटपाखंडदासिनाम् दुष्टानांवीर्यहीनानांरहस्ता

सामनर्थदः २७ दधारगर्भंसुमदाकालेनाल्पीयसाततः अनन्यंचरशासुभुचंद्रसेनोनिरीक्ष्यतम् २८ पुत्रंमा
सूतसुमदाजातकर्माकरोन्नृपः ततोवर्धननामास्य द्वादशाहेद्विजोरितम् २९ अष्टमेहायनेतस्यव्रतबंधंचकार·
ह अनेकविद्याभ्यासेननिपुणःसंबभूवह ३० जातेविवाहेकालेनतरुणोवर्द्धनोभवत् मातरंपितरंबध्वानिग
डस्थापयन्मुदा ३१ निगडेयोजयामासमान्यान्वृद्धांश्चगर्भिणः शरण्यान्पालयामासस्वयंराजाबभूवह ३२
वेदशास्त्रपुराणानिद्विजान्निंदयतःसदा परस्त्रियंपरधनंहृत्वाहरतितत्क्षणात् ३३ अदंड्यान्दंडयन्नित्यं
दंड्यांश्चैवाप्यदंडयन् चकारवर्धनोधर्मंदेशेग्रामेपुरेवने ३४ तद्भयात्सकलालोकास्त्यक्त्वासर्वंगृहादिकम् कथ
यामासुर्वृत्तांतंदैवनांगिरसंमुनिम् ३५ आश्रमस्थंसुखासीनंध्यानस्थंशिष्यसंयुतम् नत्वाप्रोचुर्मुनिवरंवि·
नयानतकंधराः ३६ त्राहित्राहिऋषेस्माकंराज्ञासंपीडिताभृशम् सर्वंविहायतत्रस्थंवयंयातानिवेदितुम् ३७
केनव्रतेनदानेनतपसावान्यवार्तया कृपांकृत्वावदमुनेसम्यग्राजाभविष्यति ३८ अंगिराउवाच बुद्धि
मद्यदिव्रतंकृतंराज्ञायदाशुभम् बुद्धिर्भवतिसर्वेषामुपकारीनसंशयः ३९ जनाऊचुः स्त्रैणोन्मत्तोमहा
क्रोधीकथंसमाचरतिव्रतम् वयमेवकरिष्यामोराज्ञेसद्बुद्धिकारणात् ४० ततोनिवेदितंतेभ्योव्रतंसद्बुद्धिदाय·
कम् तेपिचक्रुर्यथोद्दिष्टंश्रीमदांगिरसेनयत् ४१ व्रतस्यास्यप्रभावेनसद्बुद्धिंप्रापभूपतिः मातरंपितरंसर्वान्नि
गडान्मुक्तवांस्ततः ४२ सर्वान्जनान्समाहूयपालयामासपुत्रवत् सद्बुद्धिदंव्रतंचक्रेस्वयमेवजनेरितम् ४३
तेनपुण्येनसकलान्भुक्त्वाभोगान्यथेप्सितान् जगामचंद्रभुवनंतत्रस्थःसुखमाप्तवान् ४४ ब्राह्मणैःक्षत्रियैर्वै
श्यैःस्त्रीभिःशूद्रैश्चभक्तितः सकामैर्वापिनिष्कामैःकार्यंतत्तत्सकलेप्सुभिः ४५ इतिश्रीभविष्योत्तरपुराणे
पृथुनारदसंवादेआश्विनमासमाहात्म्येसद्बुद्धिव्रतकथनंनामाष्टादशोऽध्यायः १८ छ छ

सूतउवाच मासेऽश्विनेसितेपक्षेचतुर्थ्यामाचरद्व्रतम् महागणपतेःपूजाकर्तव्याविघ्नभीरुभिः १ स्वर्णादिधातुभिःकार्यामूर्तिर्गणपतेःशुभा कृत्वाप्रातर्विधिंमर्त्यःप्रार्थयेच्चवनस्पतिम् २ अपामार्गनमस्तेरक्तक्षमस्व
व्रतसिद्ध्यै छिनद्मिशाखात्वंशीघ्रंदेहिमेव्रतकर्मणि ३ एकविंशतिकाष्ठानिगृहीत्वाभक्तिपूर्वकम् धावयित्वा
स्वदंतांश्चस्नानंकृत्वासमंत्रकम् ४ मध्यान्हेपूजयेद्भक्त्यादेवंविघ्नहरंप्रभुम् पंचामृतैःस्नापयित्वासिद्धिबुद्धिसमन्वितम् ५ एकविंशतिपुष्पैश्चपत्रैश्चविविधैःशुभैः अंगपूजानामपूजाकर्तव्यापरमात्मनः ६ धूपदीपादिकंकृत्वानैवेद्यंदर्शयेत्ततः अनेकरससंपन्नंभक्ष्यभोज्यसमन्वितम् ७ शाकोपशाकसंयुक्तंगोघृतेनसमन्वितम् गृहाणदेवदेवेशसर्वकामप्रदोभव ८ हरितान्श्वेतवर्णान्वापंचत्रिपत्रसंयुतान् दूर्वांकुरान्मयादत्तान्गृहाणगणनायक ९ त्रींस्त्रीन्दूर्वांकुरान्गृह्यत्वर्पयेत्परमेश्वरं चिंतामणिर्विघ्नराजोगणनाथोऽघनाशनः १० सर्वविद्याधिपः
शांतोभक्तकामदुघःप्रभुः भक्तिप्रियोभक्तिगम्योभक्ताभीष्टफलप्रदः ११ विघ्नराजोगणपतिर्गणाध्यक्षोगणेश्वरः भालचंद्रोधूम्रकेतुःकश्यपोनंदकोविभुः १२ व्याहृत्यैतानिनामानिगणेशानिप्रियाणिच एकैकनाम्नादेवेशंत्रींस्त्रीन्दूर्वांसमर्पयेत् १३ दक्षिणाफलतांबूलंमंत्रपुष्पंनिवेदयेत् ततःप्रपूजयेद्विप्रंवायनंदद्याद्द्विजन्मने
१४ एकविंशतिपक्वान्नयुतंवंशस्यभाजनम् सतांबूलंरक्तवस्त्राच्छादितंसुकृतशुभम् १५ सुवर्णदक्षिणांदत्वाव्रतंसंपूर्णतांव्रजेत् युग्मंसंपूज्यस्वाद्वन्नैर्भोजयेद्भक्षयेत्स्वयम् १६ ब्राह्मणैःक्षत्रियैर्वैश्यैःशूद्रैःस्त्रीभिःकुमारिभिः व्रतंकार्यंप्रयत्नेनसंपूर्णफलसिद्धये १७ उत्तमाधममध्यानिनृणांकार्याणियानिच तानिसर्वाणिसिद्ध्यंतिव्रतेनानेननिश्चितम् १८ अत्रार्थेकथयिष्यामिइतिहासंपुरातनम् यत्कृत्वासर्वविघ्नाश्चदूरादेवपलायते १९
अरण्यवासेमहतिसंकटेसमुपस्थिते नत्वायुधिष्ठिरःकृष्णंप्रोवाचविनयान्वितः २० युधिष्ठिरउवाच केन

दोषेणदेवेशानफलंतिमनोरथाः प्रतिकार्येषुविघ्नानिकार्यहानिःपुनःपुनः २१ एतन्मेविस्तरंब्रूहिसर्वलोकहिता-
यच श्रीकृष्णउवाच परान्द्रास्यंतियेदुःखमात्मनःसुखलिप्सया २२ परकार्येषुविघ्नानियेकुर्वंतिनराधमाः
तेषांबहुतरंदुःखंनफलंतिमनोरथाः २३ युधिष्ठिरउवाच तद्दोषपरिहारार्थंव्रतंकथयमेधुना २४ इति
श्रीभविष्योत्तरपुराणेपृथुनारदसंवादेआश्विनमासमाहात्म्येगणेशव्रतकथनंनामएकोनविंशोऽध्यायः १९ छ
श्रीकृष्णउवाच माहिष्मत्यांपुराराजावीरबाहुर्नराधिपः पुत्रपौत्रसमायुक्तःसर्वसंपत्समन्वितः १ कौशिक्या
सीत्प्रियातस्यसर्वलक्षणसंयुता तथापिनाभवत्सौख्यंसदाप्राप्तमनोरथः २ सर्वकर्मसुचविघ्नानिनचासीद्य
शउत्तमम् एवंपुनःपुनःपश्यन्नयशःकार्यहानिकृत् ३ किंकर्तव्यंक्वगंतव्यंयेनदोषोलयंव्रजेत् प्रष्टुंचमहदा
रण्यंजगामनृपसत्तम ४ भ्रमन्भ्रमन्ददर्शाथत्वरण्यंजनवर्जितम् तत्रापश्यद्द्विजवरंभृगुंज्ञानविदांवरम् ५
साष्टांगंप्रणिपत्याथतूष्णींतस्थौचतत्पुरः ध्यानंविसृज्याथमुनिरुवाचविनयान्वितम् ६ कोसित्वंचकुतोया-
तोनामकिंतेवदस्वमे किमर्थमिहचायातःकिंतेदुःखंनिवेदय ७ राजोवाच माहिष्मतीनामपुरीतत्र-
स्थोहंनराधिपः वीरबाहुरिदंनामसर्वसंपत्समन्वितः ८ सुहृत्पुत्रकलत्राप्तमंत्रीगणयुतोपिमे नसौख्यंनच
मेहेतुःपूर्णोभवतुकस्वन ९ विघ्नानिसर्वकार्येषुसदाभग्नामनोरथाः यदिच्छामिनतल्लभ्येतेनाहंदुःखितोमुने
१० एकाकीसकलान्हित्वाआगतोहंत्वदंतिके तत्केनैतन्मयाप्राप्तंराज्यंनिहतकंटकम् ११ सांतिराज्येतिवि
फलोहेतुर्मेप्रत्यहंमुने कृपांकृत्वात्वनाथस्यतत्सर्वंकथयस्वमे १२ भृगुरुवाच त्वमासीःपूर्वजनुषिनाम्ना
राजापुरंजनः धनवान्सर्वसंपन्नःपाखंडिजनसंयुतः १३ सदाक्रुद्धजनस्नेहीत्वज्ञानजनसंवृतः वाक्यंशृणो
तिसर्वेषांयथावदतितत्तदा १४ पराधीनपरस्त्रैणः सदास्त्रीजनसंवृतः उद्धतेतिचनाम्नावैपुरोधास्तेभवत्पुरा

१५ सदाक्रूरमतिर्दुष्टःपरदाररतःशठः अत्यंतकृपणोधूर्तोधनार्थीधनतत्परः १६ धर्माधिकरणेराज्ञानियुक्तो
जनवंचकः अर्धंहरतिविप्रेभ्यः स्वयदत्तापहारकः १७ पाखंडिनटखंडेभ्योदत्वादानानितद्धरन् राज्ञेप्रतिग्रहंपूर्वंद
त्वादास्येततोपरान् १८ एवमासीत्पुरोधास्तेयाद्द्विजद्रव्यहारकः नत्वयात्यर्थिनेदत्तंश्रोत्रियायकुटुंबिने १९ द्वि
जवर्यायनोदत्तंविदुषेनिस्पृहायच तत्तथैवचकर्तव्यंकथितंचोद्धृतेनयत् २० तेनदोषेणमहताअसत्प्रतिग्रहेण
च असद्धनव्ययेनैवत्वसदाचरणेनच २१ प्राप्तोसिपरमंदुःखंविफलस्तेमनोरथः राज्येपिसातितदुःखंसंप्रा-
प्तंपूर्वकर्मणा २२ कृतंकर्मचभोक्तव्यंनरैरावश्यकंबुधैः विघ्नानिसुखहानिश्चसद्यःप्राप्तमनोरथः २३ एतस्य
कारणंप्रोक्तंशृणुराज्यस्यकारणम् कस्मिंश्चित्समयेराजन्मृगयार्थंगतोभयात् २४ हत्वामृगान्वनचरान्मध्यान्हे
जलसन्निधौ अन्यान्हत्वामृगगणास्तांस्तान्निन्युर्गृहंप्रति २५ बभूवमृगयासक्तःपरिवारगणैर्युतः अस्तंगतेदि
नमणौतत्रावस्थितवान्वने २६ ब्राह्मेमुहूर्तेचोत्थायमृगान्हंतुंसमुद्यतः तदैकंदृष्टवान्राजाधावंतंपीवरंमृगम् २७
ययौतत्पृष्ठतोराजाविहायाश्वंवनांतरम् मृगस्तुतद्भयाद्गच्छन्देवखातेपपातह २८ तंधर्तुंपृष्ठतोराजासलिलं
प्रविवेशह अगाधेसलिलेतस्मिन्नापश्यत्तंमृगंनृपः २९ मासेश्विनेसितेपक्षेचतुर्थ्यामरुणोदये पश्यन्पश्यन्मृगं
यातोनिर्जगामबहिस्ततः ३० आर्द्रवस्त्रोहिमेनार्तस्तत्रैकंदृष्टवान्द्विजम् परोपकारिणंश्रेष्ठमिषस्नानार्थमा
गतम् ३१ तंगत्वायाचयेद्वस्त्रंविद्धिएकाकिनंनृप सोपितस्मैददौवस्त्रमुपविष्टस्तदंतिके ३२ ततःसूर्योदयो
जातोराजातस्मैद्विजन्मने प्रार्थयामासपरयाभक्त्या तं चांगुलीयकीम् ३३ मुद्रांददौनमस्कृत्यसेनांदृष्ट्वागमद्गृ-
हम् इषस्नानेनसत्पात्रेस्वर्णदानेनतेनच ३४ संप्राप्तपरमंश्रेष्ठंराज्यंनिहतकंटकम् इतितेकथितःसर्ववृत्तांतः
पूर्वसंभवः ३५ अधुनाकथयिष्यामित्युपायःसुखलब्धये इषमासेप्रकर्तव्यंस्नानंचानुदिनेरवौ ३६ व्रतंतत्र

प्रकर्तव्यंसर्वविघ्नविनाशनम् शुक्लपक्षेचतुर्थ्यांतुईषमासिचरेद्व्रतम् ३७ सर्वविघ्नविनिर्मुक्तः सफलाःस्युर्मनोरथाः
सगरेणककुत्स्थेनजयंतेनमनीषिणा ३८ कृतंविघ्नविनाशार्थमन्यैराजर्षिभिःपुरा त्वमेवंकुरुराजेंद्रसर्वान्कामान
वाप्स्यसि ३९ प्राप्तेचाश्वयुजेमासिवीरबाहुर्नृपोत्तमः यथोपदिष्टंभृगुणाचक्रेतत्सन्निधौततः ४० जगामस्वगृहं
राजाप्राप्तवान्सुमनेप्सितम् ४१ ॰ इतिश्रीभविष्योत्तरपुराणेपृथुनारदसंवादेआश्विनमासमाहात्म्येविंशोऽध्या
यः २० छ नारदउवाच नवरात्रेप्रवृत्तेतुमहादेव्यामहोत्सवे शरद्याश्वयुजीब्रह्मन्पंचम्यांचविशे
षतः १ उपांगललिताद्देव्याव्रतंत्रैलोक्यदुर्लभम् तदेतत्कथयिष्यामिसर्वलोकाहितायते २ सर्वेऋषिगणाःपूर्वं
जग्मुःकैलासपर्वतम् स्कंदंनत्वामहात्मानमिदमूचुर्महर्षयः ३ ऋषयऊचुः महासेनमहाबाहोनंदनानद
ऋम आख्यातानिसुपुण्यानिश्रुतानित्वत्प्रसादतः ४ कथांत्वद्वदनांभोजप्रसूतांभूरिभूतयः नतृप्तिमधिगच्छा
मप्रायपायंसुधानिधिम् ५ शुश्रूषवोवयंदेव्याव्रतंतत्कथयस्वनः मनोभिलषितार्थानांसिद्धयस्मिन्कृतेभवेत् ६
स्कंदउवाच साधुपृष्टमहादेव्यामाहात्म्यंमुनिपुंगवा वच्मिसर्वंविधानेनतच्छृणुध्वंजगद्धितम् ७ भृगुक्षेत्रेपु
राविप्राविप्रोभूद्गौतमाभिधः श्रुतिस्मृतिपुराणज्ञोधनीचबहुबांधवः ८ अनपत्यस्यतस्याथजज्ञातेजरतःसुतौ
श्रीपतिर्गोपतिश्चैवनामनीच्चकरोत्तयोः ९ अचिरेणैवकालेनसपंचत्वमगाद्द्विजः तौतुबालौधनंबंधून्हित्वातद्व
१० प्रविवेशद्दहन्सर्वान्स्वयातुंपतिनासह अथतेबांधवाःसर्वेहाकष्टमितिदुःखिताः समेत्यदुः
खिताश्चक्रुस्तत्क्रियांपारलौकिकीम् ११ अथपुरस्थःसपत्नोभूद्भ्रातासजगृहेधनम् आयुष्मंतौसुतौगेहंनिजमा
नयदुर्मनाः १२ नास्तिचक्रधनंसर्वंताभ्यांकिंचिन्नवैददौ ततोमौंजीधरौबालौबंधुभिःकथितंवसु १३ ययाच
तुःपितुर्द्रव्यंदेहिनोदेयमित्सुत सतावूचेनतद्द्रव्यंयुवयोःकेनभाषितम् १४ निर्गच्छतांममगृहादित्यादिपुरुषव

हु तौतद्वचोभिर्निर्विण्णौबालौश्रीपतिगोपती १५ बभाषातेमिथःकष्टंधिगहोपितृहीनताम् यावोदेशांतरंयत्रस्वज
नोनास्तिकिंचन १६ अनाभ्यासेवशुद्धौजग्मतुर्दिशमुत्तराम् भिक्षाचारौबहून्देशान्वनानिसरितोगिरीन्
१७ समतिक्रम्यययतुर्विशालांनामतःपुरीम् कासारमीक्षांचक्रातेततोस्याःसन्निधौशुभम् १८ पुंडरीकव
नाकीर्णंरक्तसंध्यासुशोभितम् संध्याभ्रभूषितंचारुयथातारांकितंनभः १९ श्रांतौपथिगतौबालौक्षणाद्विश्राम्य
तत्तटे आचम्यशिशिरंतोयंसस्नतुश्चयथाविधि २० गताध्वखेदौविप्राग्र्यौपुरंप्राविशतांततः वीथीचतुष्पथ
युतंचाभ्रगोपुरमंडितम् २१ देवतागाररुचिरंसौधराजीविराजितम् नानावीथीरतिक्रम्यविप्रावासमवापतुः २२
कथंचित्त्वथविप्रस्यक्षुत्पिपासार्दितौगृहम् ययतुर्वेदिकायांतावुपविष्टौश्रमातुरौ २३ स्वामीततःस्वगेहस्यविवे·
कइतिविश्रुतः आगतौवैश्वदेवांतेसददर्शातिथीद्विजौ २४ अनापृच्छ्यश्रुतंशीलंतथाचकुलनामनी ऋषिवत्पू
जयामासस्मरन्धर्मंसनातनम् २५ अथतौपूजयामासस्वाद्वन्नंसहचांबुना तौब्रह्मचारिणौविप्रौतांसपर्यांवि
लोक्यच २६ देशबंधुपरित्यागखेदमुक्तावभूवतुः अथापृच्छत्कृपालुस्तौकौयुवांकुतआगतौ २७ किमर्थम
ल्पवयसौनिर्गतौस्वगृहादिति तद्विवेकस्यवचनमाकर्ण्यश्रीपतिस्तदा २८ आनुपूर्व्येणसकलंवृत्तांतंसमभा
षत श्रीपतिरुवाच पितृहीनाविनिज्ञात्वात्यक्तौबंधुजनेनच २९ आश्वास्यस्थापयामासस्वगृहेबहुवा·
सरम् प्रचक्रमेततःशिष्यैःसहाध्यायइतिश्रुतम् ३० बभूवतुश्चतौबालौगुरुशुश्रूषणेरतौ गुरोर्गृहेनिवसतो
रागतानिर्मलाशरत् ३१ फुल्लपद्मविशालाक्षीप्रसन्नेंदुशुभानना तस्यांसशिष्यमाचार्यंचरंतंव्रतमुत्तमम् ३२
पप्रच्छतुर्भोःकिमिदमावाभ्यामितिकथ्यताम् ताभ्यामेवंकृतप्रश्नोविवेकइदमब्रवीत् ३३ इतिश्रीभवि·
ष्योत्तरपुराणेपृथुनारदसंवादेआश्विनमासमाहात्म्येउपांगललितोपाख्यानेएकविंशोऽध्यायः २१ ६२

गुरुरुवाच उपांगललितादेव्याव्रतंदेवर्षिपूजितम् सर्वकार्यकरंनृणामस्माभिःसमुपास्यते १ विद्याकामेनक
र्तव्यंतथैवधनकाम्यया सुतार्थिनाचकर्तव्यंव्रतमेतदुदीरितम् २ नारदउवाच विद्याकामौततोबालौव्रतमा
चरतुर्द्विजौ भक्तितोगुर्वनुज्ञातौयथाशक्तियथाविधि ३ तौतत्प्रसादात्सकलंशास्त्रंवेदानवापतुः अन्यस्मिन्हायनेभ
क्त्याविवाहार्थंचचक्रतुः ४ श्रीपतिर्गोपतिश्चैवव्रतमेतत्तपोधनाः अचिरेणाथसंप्राप्तेमासिमाघेतयोर्गुरुः ५ स्वांवि
वाहोचितांकन्यांनाम्नागुणवतीमिति विनीतायश्रुतवतेयूनेश्रीपतयेतदा ६ विचार्यबांधवैःसार्धंददौपुण्येतुवासरे
पारिबर्हंबहुतदाददौदुहितृवत्सलः ७ विवेकोपिमुदंलेभेसानुरागोविलोकयतौ अन्याब्दंतुपुनश्चैतद्व्रतंदेव्याःप्रचक्रतुः
८ भ्रातरौचनिजंदेशमिच्छतौचधनादिकम् अथान्येह्निकास्मिंश्चित्तावुपाध्यायमूचतुः ९ स्वामिन्युष्मत्प्रसादेन
लब्धाविद्यातथावस्तु अनुज्ञांदेहिगच्छामोनिजंदेशमितःपुनः १० इत्याकर्ण्यसमालोच्यशक्रभूवासरमादतः स्वयंप्रेष
यितुंविप्रस्तौताकन्याचनिर्ययौ ११ अथदेव्याःप्रसादेनपितृव्यस्यतयोःकिल अनशनेमतिर्जातागतौश्रीपतिगोपती १२
निर्गतौक्वगतौदेशंवसंतौक्वेतिचिंतयन् लोकेनिंदांतिमांकुर्यात्तयोरन्वेषणेमतिम् १३ ददृशस्तौततःसोपिविनिर्या
यनिजात्स्वपुरात् तद्देवनगरप्राप्तोविवेकाख्योद्विजोत्तमः १४ सशिष्यःकन्यकासार्द्धंक्रममार्गंशनैःशनैः ततस्तेषां
संप्रजानिसगमोद्विजपुंगवः १५ विदांचकारतौकृच्छ्रान्मध्येवयसिसंस्थितौ भवतामेवसामीप्यमागंतुंप्रस्थितावयम्
यम् १६ इतिश्रुत्वाविवेकस्यवचनंमुदितोभवत् आलिलिंग्यततोबालौमूर्ध्निजिघ्रन्पुनःपुनः १७ पादोनतागु
णवतीविवेकेनविरूपिता आशीर्वादैर्बहुविधैस्तांस्नुषामप्ययोजयत् १८ अथतेमुदिताःसर्वेभृगुक्षेत्रंययुस्तदा
ज्ञातिभिःसहसंगम्यशृण्वद्भिस्तद्विचेष्टितम् १९ तौपितृव्यगृहेकांश्चिद्दुःखितौदिवसांस्तदा लब्धवंतौधनंगेहेनि
जंश्रीपतिगोपती २० मुदितस्तदनुज्ञातोविवेकस्वांपुरींययौ श्रीपतिर्गोपतिश्चक्रेविवाहमचिरात्तदा २१ तावकत्वेत

सौछत्रंचक्रतुर्द्विजतर्पणम् श्रीपतिः श्रद्धयायुक्तः कनीयान्व्ययशंकितः २२ विचार्यभार्ययासार्द्धंविभक्तः श्रीपतेरभूत् संभोगान्विविधान्भुंजन्प्रेमतोधनसंपदा नदेव्याराधनंचक्रे गोपतिर्धनलंपटः केनचित्त्वथकालेननष्टंतस्यशनैर्धनम् २४ अकिंचनोगतश्चिंतांभार्ययाश्वासितस्तथा तवभ्रातृगृहेविप्राभुंजंतेबहवस्तदा २५ गच्छचानुदिनंचांते तत्रभोक्तुंरंकानिश्चितम् एवंभोजनवेलायामागत्यागत्यतद्गृहम् २६ भुंजन्भुंजन्निजगृहंगतोसौबहुवासरम् कदाचिदागतोयावद्गोपतिर्भार्ययासह २७ उपविष्टेषुविप्रेषुभोक्तुंनाविंदतासनम् अथान्नराशेःसामीप्यंभोजनायक्षुधातुरम् २८ उपविष्टेगोपतौतुभार्ययासनिवारितः अस्मादुत्तिष्ठवैतूर्णंत्वमुच्छिष्टंकरिष्यसि २९ तिष्ठतिष्ठक्षणंचैकंपश्चाद्भुंक्ष्वेतिचाब्रवीत् गोपतिर्भार्ययासाकंततोविमनसावुभौ ३० अभुक्त्वैवतुनिष्क्रांतौययतुर्निजमंदिरम् ततःसजायोप्रोवाचनिजमार्गंविचिंतयन् ३१ भ्रात्रासममयावित्तंसंविभक्तमपिप्रिये निर्धनोहंधनीजायान्श्रूयतामत्रकारणम् ३२ पुरावाभ्यांगुरुकुलेध्ययनमाचरितंशुभम् उपांगललितादेव्याविद्यादिसकलवस्तु ३३ प्राप्तंमयातत्सकलंपरित्यक्तंप्रमादतः नत्यक्तंवैश्रीपतिनानेस्माच्छ्रीस्तंस्कसेवने ३४ गतंमयातत्त्यागेनयत्प्राप्तंतत्प्रसादतः तस्मादहंतदाभोक्ष्येयदाद्रक्ष्यामिताशिवाम् ३५

इतिश्रीभविष्योत्तरपुराणेपृथुनारदसंवादेआश्विनमासमाहात्म्येललितोपाख्यानेद्वाविंशोऽध्यायः २२ छ

सूतउवाच इत्युक्त्वानिर्गतस्तस्माद्गृहादकृतभोजनः तद्भार्याचिंतयाविष्टास्वापितस्थावनन्मती १ भुक्तवत्सुब्राह्मणेषुश्रीपतिःपर्यपृच्छत क्वगतोगोपतिरितितच्छ्रुत्वासोपिदुःखितः २ गोपतिस्तुसरिद्दुर्गवनानिबहुशोभ्रमन् अपृच्छत्पथिकान्मार्गेनदेव्याःपदमभ्यगात् ३ पंचमेवासरेप्राप्तेक्षुत्पिपासार्दितो ५ अलब्धदर्शनोदेव्यादुःखितोनिपपातह ४ तंकृच्छ्रगतमालोक्यभवानीभक्तवत्सला कृतापराधमपितंमनुजग्राहवैतदा ५ गतमूर्छःसमुत्थायदिगंतानवलोकयन् ददर्शपुरतोगोपंचारयंतंगवांगणम् ६ तंदृष्ट्वाकिंचिदा-

श्वस्ययथौतस्यांतिकंशनैः अपृच्छत्कोभवानास्तेकुत्रत्यः कुतआगतः ७ कोयंदेशः क्वासोस्तिकिंपुरंनामवल्लव
निशाम्यवचनंतस्यवक्तुंगोपः प्रचक्रमे ८ गोपउवाच उपांगनामनगरमुपांगोनामभूपतिः उपांगललितादेव्याधि
ष्ठितेतत्रमंदिरम् ९ तत्रस्थोहमदूरेणत्वागतोगोधनैःसह इत्याकर्ण्यवचस्तस्यविप्रः संमुदितोभवन् १० सगोप
सहितःसोपिविवरंप्रविवेशाह दूराद्ददर्शभुवनपुरमध्येतपोधनाः ११ उपांगललितादेव्याःस्फटिकंगगनालिहन् सौ
वर्णेनविचित्रेणकलशेनोपशोभितम् १२ यथोदयाचलशीर्णंदधानंभानुमंडलम् त्वरितोगोपमामंत्र्यप्रासादस्य
योमुदा १३ प्रणम्यदंडवत्क्षिप्रंकृतांजलिपुटःस्थितः उपांगललितादेवीमनस्तोतुंप्रचक्रमे १४ गोपतिरुवा
च नमस्तुभ्यंजगद्धात्रिभक्तानांहितकारिणि जगद्भीतिविनाशिन्यैसर्वमंगलमूर्तये १५ हत्वानिशुंभमहिषप्र
भृतीन्सुरारीनिंद्रादयोनिजपदेषुययाभिषिक्ताः लोकेत्वयार्चनगृहीतसमावतारे मातःप्रसीदवरदेकुरुमेनुकंपाम्
१६ त्वांमुक्तयेमुनिजनाःकुटिलीकृतांगींदेवींनिजेवपुषिकुंडलिनींभजंति भक्त्यैवदेविमनुजाःकनकारविंदबद्धास
नामविरतंकमलास्त्ववंति १७ सापराधोस्मिशरणंप्राप्तस्त्वांजगदंबिके इदानीमनुकंप्योहंयद्वक्ष्यासिकरोमितत् १८
इतिस्तुत्वाथशर्वाणींप्रणम्यचपुनःपुनः कृतसंध्याविधिस्तत्रशेतेस्माकृतभोजनः १९ स्वप्नेमूर्तिमयीदेवीविप्रमेवस
मादिशत् गोपतेवत्सतुष्टाहंगच्छोपांगमहीपतिम् २० तत्पूजनकरंडस्यथाचयस्वविधानकम् तत्पूजयानिजगृहेपरा
मृद्धिमवाप्स्यसि २१ स्वप्नइत्यात्मसंदेशाज्जहर्षगोपतिस्तदा राजदर्शनवेलायांप्रभातेविमलेसति २२ सम्प्रविष्टोनृप-
सभांप्रतीहारनिवेदितः राज्ञासंभाषितस्तत्रविषसादासनेशुभे २३ पृष्टश्चागमनेहेतुंययाचेनृपतिंतदा देव्यर्चनकरं
डस्यपिधानंदेहिमेनृप २४ इत्यर्थितःसविप्रेणजातादेशोप्यदारणात् पिधानकंनमस्कृत्यतस्मैवासोधनानिच २५ आ
शीर्भिरभिनंद्याथतमामंत्र्यसभूमिपम् उपांगललितादेव्याःप्रासादंपुनरागमत् २६ ललितांप्रणिपत्याथत्वरितोनिर्ययौ

विलात् समीपेस्वपुरंदृष्ट्वात्हृष्टोगृहमुपागमत् २७ सुहृद्भिःसहसंगम्यसर्वंतत्कथयन्मुदा पूजयित्वापिधानंतद्वि
दधेपारणंमुदा २८ एवमाराधयन्सोपिससमृद्धोभवत्पुनः सोपितत्रसमारेभेद्विजाग्र्योबहुवासरम् २९ एकांतस्था
भवत्कन्याललितानामसुंदरी सातत्पिधानमादायविहर्तुंयातिसर्वदा ३० प्रमादत्वात्प्रियत्वाच्चपितृभ्यामनिवारि-
ता ३१ इतिश्रीभविष्योत्तरपुराणेपृथुनारदसंवादेआश्विनमाहात्म्येललितोपाख्यानेत्रयोविंशोऽध्यायः २३
६७ नारदउवाच कदाचित्सावयस्याभिःसाकंगंगाजलेशुचौ क्रीडंतीददृशेतोयेनीयमानंकलेवरम्
१ सापिधानेनसिंचंतीत्यन्याश्चांजलिनातदा तत्पिधानप्रभावेनसमुत्तस्थौकलेवरम् २ ससर्पदष्टउत्तस्थौततो
देव्याःप्रसादतः ललितातांद्विजंदृष्ट्वामनसाचक्रमेपतिम् ३ जुहावाभ्यवहारायजनकस्यनिकेतने मार्गेचपरिपप्रच्छ
कुलशीलादिनस्यसा ४ सोपिसर्वंसमाचख्यौगुणराशीतिनामच ललितामंत्रयामासगुणराशीतिनामच ललि-
तामंत्रयामासगुणराशिमितिद्विजम् ५ परिविष्टेषुचान्नेषुपितुर्वेश्मनिद्विज गृहीत्वापोशनेभुक्त्वाभार्यार्थमांत्वम-
र्थय ६ मयानुमोदितःस्नातःसमातुभ्यंप्रदास्यति यथोक्तगुणराशिस्तुतथासर्वंचकारच ७ गोपतिर्भार्ययासा
र्द्धंसमालोच्यचबांधवैः परीक्षितायविप्रायविद्ययाकुलशीलया ८ प्रतिजज्ञेततःकन्यांललितांगुणराशये शुभे
मुहूर्तेचतयोर्विवाहंकृतवान्प्रभुः ९ वरायब्राह्मणेभ्यश्चददौबहुधनंमुदा विदधेचतयोर्गेहंनातिदूरेचवेश्मतः १०
तत्रोषतुःसानुरागौमिथस्तौदंपतीचिरम् विधानंचतयानीतंनिजंललितयासह ११ शनैस्तुतद्धनंसर्वंगोपतेरगमद्गृहा
त् गुणराशिर्धनीजातोमहादेव्याःप्रसादतः १२ तत्पिधानकरंडस्यजनन्याबहुवासरम् याचितापिनवैप्रादाल्ललि
तापूजनंगृहे १३ अथसागोपतेर्जायातस्यैवानर्चनाद्गृहम् वित्तंचसमवित्यार्थंजामातरमघातयत् १४ सापिधार्यो
वनयातस्त्वयतद्गृहमायया शोचंतीललिताकन्यासतुदेव्याःप्रसादतः १५ उत्थायविपिनादेत्यभुक्त्वाशेतेस्मस्वंगृहे

पादसंवाहनंतस्यकुरुतेललितानघा १६ तंदृष्ट्वादुःखिताभूमौप्रणिपत्यमुहुर्मुहुः ललिताकृत्स्नतस्पृष्टानिजमाहत्त्वपा-
तकम् १७ गुणराशिस्त्वदातस्यैप्रायश्चित्तंददौबहु आत्मनोबहुकालेनकृच्छ्रादभिपुनाद्वपुः १८ श्रीपतेस्त्वचलांलक्ष्मीं
समालोक्यतपोधनाः गोपातिस्तमथापृच्छत्तातत्वंवर्तसेकथम् १९ किमाचरसिकल्याणंयेनश्रीरचलात्वयि इतित-
स्यवचःश्रुत्वाश्रीपतिर्विस्मितःपुनः २० अस्माभिस्तुहृतंदेव्यास्त्वत्कृतंपुरुमंदिरे तद्विस्मृतंत्वयासर्वंतेनश्रीस्तेक्षयंग-
ता २१ उपांगललितादेव्याव्रतंकुरुपुनःशुभम् सोपिभक्त्याव्रतंचक्रेपुनर्भ्रात्रोपदेशितम् २२ लेभेचपरमामृद्धिंपुत्रां-
श्चबहुधातथा उपांगललितादेव्याःकुर्वन्नारायणंभुवि २३ कृतमन्यैश्चबहुभिस्तैस्तुलब्धा मनोरथाः विधानंतस्यव-
क्ष्यामितच्छृणुध्वंतपोधनाः २४ शुक्लपक्षेतुपंचम्यामिषेमासिचरेद्व्रतम् गर्जितिसंध्ययोस्त्याज्यादिनवृद्धिक्षयं-
गताः २५ निर्वर्त्यावश्यककर्मशुचिरागोविवर्जितो चत्वारिंशत्तथाचाष्टौकल्पितानिविधानतः २६ दंतकाष्ठान्युपादा-
यतुडागवानदींव्रजेत् दंतधावनपूर्वाणिमज्जनानिसमाचरेत् २७ ततोयथाविधिस्नात्वाशुक्लवासागृहंव्रजेत्
ततोमंडपिकांकृत्वाशुचौदेशेमनोरमाम् २८ सौवर्णींप्रतिमांकृत्वाशुचौदेशेमनोरमां उपचारैःषोडशभिरभिमंत्रैः
समाहिताः २९ ततोजागरणंकृत्वागीतवाद्यपुरःसरम् तामर्चांगुरवेदद्यान्निशिवास्याद्विसर्जनम् ३० व्रतमेवंतुयः
कुर्यात्पुत्रवान्धनवान्भवेत् विद्यावान्रोगनिर्मुक्तःसर्वभोगीचजायते ३१ अवैधव्यंचलभतेस्त्रीकन्यावरमुत्तमं
विजयंपुष्टिमारोग्यंवांछितार्थंप्रयच्छति ३२ इत्येतद्व्रतमाख्यातंसेतिहासंमहर्षयः शृण्वन्पश्यन्नपिनराभ-
क्त्येयस्सर्वमाप्नुयात् ३३ नारदउवाच इत्येतत्कथितंसर्वंललिताव्रतमुत्तमम् येकुर्वंतिसदाभक्त्यानतेनि-
रयगामिनः ३४ इतिश्रीभविष्योत्तरपुराणेपृथुनारदसंवादेआश्विनमासमाहात्म्येचतुर्विंशोऽध्यायः २४
६५ नारदउवाच अथापरंवदिष्यामिदशांगललिताव्रतम् यत्पूर्वंयदुरूपायकृष्णायामिततेजसे १

पप्रच्छकुंतीतनयश्चिंताकुलितमानसः युधिष्ठिरउवाच देवदेवजगन्नाथलक्ष्मीप्रियजनार्दन २ कथयस्वकस्मै
ष्टदशांगललिताव्रतम् कुतएवसमुत्पन्नाकस्मात्पूज्यतमाभुवि ३ पूजिताकाफलप्राप्तिःकथयस्वममप्रभो श्रीकृष्णउवा
च पुरात्रेतायुगेपार्थजातोदशरथोमहान् ४ तस्यभार्याचकौसल्याअपुत्रासापतिव्रता सर्वभामवनेकश्चिदेकशृंगोमुनि
दा ५ स्वागतंचकृतंराज्ञासोपविष्टोवरासने तेनराजामुनिश्रेष्ठोवस्त्रालंकारभूषणैः ६ पूजितःपरयाभक्त्यातुष्टोमुनि
रोब्रवीत् मुनिरुवाच तुष्टोहंतवराजेंद्रभार्ययासहितायते ७ सौभाग्यंचवरंब्रूहिकिंतेभीष्टंददामितत् रा
जोवाच यदितुष्टोसिमेतातत्वपुत्रोहमृषीश्वर ८ तीर्थंवाव्रतमेकंवातद्दस्वमहामुने ऋषिरुवाच शृ
णुराजन्नवहितोव्रतानामुत्तमंव्रतम् ९ कर्तव्यंपुत्रकामार्थंसौभाग्यादिकरंवाभये रोहिणीनामचंद्रस्यभार्यापूज्या
प्रयत्नतः १० सानुष्टापुत्रपौत्रांश्चतवदास्यतिपार्थिव दशरथउवाच कस्मिन्मासेतुसंपूज्यातिथौकस्यांवद
प्रभो ११ ऋषिरुवाच आश्विनेचसितेपक्षेदशम्यांप्रयतःशुचिः सौवर्णीकारयेद्देवींपूजयेत्कुसुमैःशुभैः १२
दिनानिदशसंपूज्याचतुर्थ्यांतुसमापयेत् कूष्मांडमातुलिंगादिफलैर्दशविधैर्नृप १३ गंधपुष्पैर्धूपदीपैर्नैवेद्यैर्दशभिर्नृ
प अर्घ्यैश्चदशसंख्याकैर्दीपनैर्दशभिस्तथा १४ प्रदक्षिणानमस्कारैर्दशभिर्दशभिर्नृप ततोमंगलवाद्यादिगीतनृत्या
दिकारयेत् १५ चंद्रोदयेतुसंप्राप्तेअर्घ्यंनैवेद्यमेवच शंखेतोयंसमादायसपुष्पफलसंयुतम् १६ जानुभ्यामवनींस्पृ
ष्ट्वाचंद्रायार्घ्यंनिवेदयेत् पंचरत्नसमायुक्तदशपुष्पफलैर्युतम् १७ मूर्ध्निस्थितेनपात्रेणचंद्रायार्घ्यंनिवेदयेत् नमस्ते
देवदेवेशिरोहिणीसर्वकामदे १८ सोमेनसहितेदेविगृहाणार्घ्यंनमोस्तुते एतद्व्रतंनृपश्रेष्ठदशवर्षाणिकारयेत् १९ उद्या
पनंततःकुर्याद्दशवारंतुभक्तितः स्वशास्त्रोक्तविधानेनत्वधिवासनपूर्वकम् २० ऋत्विजोदशसंख्यातानेकमाचार्यमेवच
दशसपाद्यकलशान्स्रग्गंधतोयपूरितान् २१ सवस्त्रासहिरण्यांश्चब्राह्मणायनिवेदयेत् अशक्तोदशवर्षांतेएकतोद्याप

नंचरेत् २२ सौवर्णीरोहिणीकार्याचंद्रस्तुरजतस्यच अष्टांगुलः शशीप्रोक्तोरोहिणीचतुरंगुला २३ गृहीत्वाकांस्यपात्रे
तुसोमेनसहितांन्यसेत् पुष्पमंडपिकामध्येस्थापयेच्चविधानतः २४ पूर्वोक्तेनविधानेनस्थापयेल्ललितांततः आचार्य·
वरयेत्सूर्ववेदशास्त्रविशारदम् २५ रात्रौजागरणंकुर्यात्पुराणश्रवणादिभिः प्रभातेतुपुनःपूजांततोहोमंसमाचरेत् २६
दूर्वाष्टशतकंहुत्वापंचखाद्यंतथैवच गौरीर्मिमेतिमंत्रेणदूर्वाहोमंसमाचरेत् २७ नमोदेव्येतिमंत्रेणसघृतंपंचखाद्य
कं पीठसोपस्करंचैवत्वाचार्यायनिवेदयेत् २८ युग्मानिदशसंपूज्यवस्त्रालंकारभूषणैः गोदानदक्षिणांदद्याद्घृतसंपू
र्णहेतवे २९ एवंयःकुरुतेभक्त्याधनपुत्रानवाप्नुयात् सौभाग्यपुत्रसंपत्तिमवैधव्यंपतिव्रता ३० ऋष्यशृंगप्रसादेनप्राप
पुत्रचतुष्टयं शृणुष्वैतद्यदाख्यानंपुरावृत्तंनराधिप ३१ सुमतिर्ब्राह्मणःकश्चित्तस्यभार्यादयावती दयावत्यांसप्तपुत्राःसु
नंदाकन्यकाभवत् ३२ सुमतेर्दुहिताराजन्स्त्रीचिन्हादशवार्षिकी पितादद्दौद्विजेंद्रायशमीकायद्विजन्मने ३३ ब्राह्मेण
विधिनाराजन्विवाहस्तुकृतस्तयोः लाजाहोमेसमारब्धेसमिधांतर्गतःफणी ३४ दशंकृत्वाशमीकस्यतत्क्षणात्पतितो-
भुवि सुनंदावामभागेतुमृतंदृष्ट्वारुरोदह ३५ ततःसुनंदादुःखेनमूर्छयापतिताभुवि रुरुदुःस्वजनाःसर्वेसुमतिर्भार्ययास
ह ३६ तत्रराजादशरथःसांत्वपूर्वमिदंवचः मृत्युस्सर्वस्यनियतोरोदनेननगच्छति ३७ तस्मान्नरोदितव्यंहिक्रियाकार्या-
स्वशक्तितः ततःशवंस्मशानेतुअग्निंयोज्यशवस्यतु ३८ एतस्मिन्नंतरेतत्रवाणीचाकाशसंभवा एवंवेत्थमहाभागाःशमि-
कोजीवयिष्यति ३९ उपायस्तुशिवेनोक्तःकैलासेगिरिजांप्रति तंशृणुध्वंमहाभागाः कथयामिसमाहितः ४० मात्राकृतंद-
शरथललिताव्रतमादरात् तस्यव्रतस्ययत्पुण्यंदुहित्रेयदिदास्यति ४१ तेनपुण्येनभर्तास्याजीवयिष्यतिवैध्रुवम्. श्रुत्वाचा
काशवाणींतुमातापुण्यंददौतदा ४२ तेनदत्तेनपुण्येनशमीकोजीवितस्तदा राजासर्वजनैःसार्द्धंस्मशानात्स्वगृहंययौ
४३ जामातातुशमीकोपिस्वग्रामंप्रययौमुदा विविशुःस्वान्गृहान्सर्वेसाधुसाध्वितिचाब्रुवन् ४४ नारदउवाच इत्याख्या

२२

तंपुरावृत्तंभृशमाश्चर्यकारकं दशांगललिताख्यानंभक्त्यायःशृणुतेनरः ४५ इतिश्रीभ० आश्वि० दशरथललिताव्रतनिरूप-
णनामपंचविंशोऽध्यायः २५ छ नारदउवाच शृणुराजन्प्रवक्ष्यामिएकादश्याःकथानकं यत्पूर्वेऋषयःसर्वेनैमिषार
ण्यवासिनः १ प्रणम्यसूतंविधिवत्पप्रच्छुःपरमादरात् ऋषयऊचुः सर्वविद्यानिधेःसूतश्रुतं तद्वचनामृतम् २ शुक्ला-
श्विनस्यमासस्यकथयस्वहरिप्रियाम् सूतउवाच शृण्वंतुऋषयःसर्वेधर्मायकथितंपुरा ३ पृच्छतेचोपकारायसर्वकाम
फलप्रदं श्रीकृष्णउवाच शृणुराजन्प्रवक्ष्यामिएकादश्याविधिंशुभम् ४ दशम्यांप्रातरुत्थायविधिवत्स्नानमाचरेत् कृत्वा
नित्यविधिंपश्चात्पूजयेत्पुरुषोत्तमम् ५ रमायुतंस्वर्णमयंपूजयेद्विजितेंद्रियः संप्रार्थ्यदेवदेवेशंव्रतसिद्धिंकुरुष्वमे ६ एका
दश्यामपितथापूजयेद्रमयायुतं कमलैःकेतकीपत्रैर्धात्रीपत्रैस्तथादलैः ७ कुंदैश्चमुनिपुष्पैश्चतुलस्याःकोमलैर्दलैः पूजये
त्परमात्मानंसंप्रार्थ्यचपुनःपुनः ८ एकादशीव्रतंदेवनिर्विघ्नंकुरुमाधव सहस्रतुलसीपत्रैर्बिल्वपत्रैस्तिलैर्यवैः ९ पूजयेत्पर
याभक्त्याफलैर्नानाविधैस्तथा रात्रौपूजापुनःकार्याजागर र हरिसान्निधौ १० नच्चरित्रैःपुराणैश्चगीतनृत्यस्तवादिभिः द्वा
दश्यांचतथाकुर्यात्पूजनंपरमात्मनः ११ द्वादश्यांचैवभोक्तव्यब्राह्मणैःसहचोत्तमम् द्वादश्यांनियमान्कृत्वाव्रतपूर्णफल
लभेत् १२ एवंव्रतंप्रकर्तव्यंशूद्रविट्क्षत्रब्राह्मणैः स्त्रीभिश्चैवप्रकर्तव्यंव्रतंश्रीहरितुष्टये १३ गुर्विणीभिःप्रसूताभिर्बालवृ
द्धातुरैर्विना क्षुधायुतैरशक्तैश्चकार्यांतरवशैरपि १४ ब्राह्मणेभ्यःप्रकर्तव्यंदक्षिणाभिःसुतोषयेत् व्रतस्यफलमाप्नोतिना
त्रकार्याविचारणा १५ द्वादश्यांदानयोगेनविष्णोःप्रीतिपरोभवेत् उदकुंभंघृतंस्वर्णंतिलांश्चोपानहौपयः १६ कुष्माडमातुलिं
गंचदानात्पूर्णफलंलभेत् शालग्रामशिलादानान्नपुनर्जन्मभाग्भवेत् १७ शालग्रामःस्वयंविष्णुःसर्वदेवस्वरूपवान् यंयंध्यायति
वैतत्रससदैवाक्षिगोचरः १८ द्वादश्यामस्यदानेनस्वयंविष्णुःप्रसीदति तस्माद्व्रतंप्रकर्तव्यंपूज्योभवतिनिश्चितं १९ अज्ञानतः
कृतेनापिचैकुंठेलभतेसुखम् अत्रार्थेकथयिष्यामिइतिहासंपुरातनं २० पुरासीद्भानुनगरेब्राह्मणोगौतमाभिधः पत्नीपुत्र

विहीनश्चजातोदैवेनपर्यटन् २१ ग्रामात्ग्रामांतरंगच्छन् भुंजन्भुंजन्गृहेगृहे सर्वकर्मपरिभ्रष्टोदारिद्रेनापिपीडितः २२
यदृच्छयागतःकाचिच्छुभांवैष्णवपालिताम् भ्रमत्प्रतिगृहेविप्र मध्यान्हेसमुपागतः २३ भिक्षांदेहिक्षुधायुक्तोद्विजंज्ञात्वाद्वि-
जोत्तम तेष्वेनंनैवनैवेतिभिक्षाचैकादशीदिने २४ नदातव्यंनभोक्तव्यमेकादश्यांकदाचन निवारितोपिहिपुनर्देहिदेहिव-
दन्मुहुः२५ नलब्धंहिदिवातेनविनिद्रःक्षुधयाभवत् रात्रौस्मरन्हृषीकेशंप्रभातेव्याकुलोभवत् २६ तस्मिन्नवसरेदत्तंवैष्णा-
वेनफलकरे तद्गृहीत्वाददौतस्मैत्यनेनप्रीयताहरिः २७ फलाशभक्षयन्किंचिज्जहौप्राणान्हरिंस्मरन् दिव्यरूपःसमभव-
द्विष्णुदूतादिभिर्वृतः २८ दिव्यंविमानमारुह्यवैकुंठसजगामह अतोनरेणाकर्तव्यमाश्विनेकादशीव्रतम् २९ इतिश्रीभ॰
आश्विनमा॰ एकादशीव्रतकथनंनामषड्विंशोऽध्यायः २६ ॥ नारदउवाच त्रयोदश्यांमहाभागत्वशोकत्रिदिनव्रतं
कथयामिविशेषेणसीताशोकहरंपरम् १ शोकाकुलेनधर्मेणदृष्ट्वातंदेवकीसुत प्रणम्यपृष्टवान्देवव्रतंशोकहरंपरम् २
श्रुत्वैवकृपयादेवोमाधवोवाक्यमब्रवीत् कृष्णउ॰ शृणुराजन्प्रवक्ष्यामित्वयोद्ध्यायांव्रतमहत् ३ वसिष्ठेनमुनींद्रेणसीता-
।ःसन्निवेदितम् विधायरावणवधंयदारामःपुरेभ्यगात् ४ तदादेवीप्रणम्याथवसिष्ठंवाक्यमब्रवीत् सीतोवाच भगव-
न्दंडकारण्येरावणेनहृतापुरा ५ नजानामितदाकिंचिदात्मीयंविकलेंद्रिया मासदशोषितातत्रराक्षसेनहृतासती ६ अशोक
वृक्षप्रणताविशोकात्वंभविष्यसि तथेत्युक्तंमयाब्रह्मन्यथोक्तंत्रिकुटायच ७ ततःप्रभृत्यहंशश्वदशोकव्रतमारभेत् तेनव्र-
तप्रभावेनहनुमान्पवनात्मजः ८ शतयोजनविस्तीर्णंतीर्त्वासागरमव्ययम् मयादिष्टान्नृपश्रेष्ठसोभिजातोमहाबलः ९ पुनश्चकु-
शलीजातोदग्ध्वालंकामहाबलात् ततोमेप्रत्ययोजातोव्रतस्यास्यमहामते १० अस्यचव्रतराजस्यप्रभावेनाभयोहरिः ततःके-
श्चिद्दहोरात्रैर्भर्तामेराघवोबली ११ निहत्यरावणंसंख्येमांविशङ्कांगृहीतवान् तदहंभगवन्ब्रह्मन्पृच्छामित्वांहृदव्रतं १२
अशोकस्यप्रभावमेवक्तुमर्हस्यशेषतः व्रतस्यतस्यपुण्यंतुपुराणोक्तंमहीतले १३ अथवासुरलोकेषुसुरनारीनिषेवितम्

२३

वसिष्ठउवाच एवमेतज्जनकजेयथावदसिसुव्रते १४ अशोकस्यप्रभावेनतद्वैवासमयाधुना शृणुचात्रमयाख्यातंनंद
नेदिव्यकानने १५ बृहस्पतिमुखाच्छ्रुत्वायज्जातंपरमाद्भुतं वृत्राभिभूतोमत्रेणहतोदेवान्महासुरः १६ विश्रंसत्वाद्विहिहो
निर्धस्यधर्मेणजायते ब्रह्महत्यामवाप्याथदेवेंद्रोनष्टचेतनः १७ त्रैलोक्यराज्यंत्यक्त्वातुममज्जारिभयार्दितः एतस्मिन्नंतरे
देविनहुषोनृपसत्तमः १८ त्रैलोक्यराज्यंसकलंजहारवरदर्पितः ततःशचीप्रव्यथितात्हृतराज्यमवेक्ष्यसा १९ नंदनांतरमासा-
द्यतूपस्तेपेसुदुष्करम् तांदृष्ट्वाधर्मनिरतांबृहस्पतिरुदारधीः २० आगत्यनंदनंदेवीवाक्यमाहमहातपाः बृहस्पतिरु० किं
मर्थंतप्यसेदेवीतपःपरमदुश्चरं २१ त्वयायत्क्रियतेदेवीतपसोब्रूहिकारणं शच्युवा० हताभिभूतंदेवेंद्रंहृतराज्यंहृतंद्विज
२२ कुत्रनष्टंचतंविप्रनजानेहमियादिति कृतिष्ठतिमुनेब्रूहिसुरराट्शत्रुतापनः २३ प्रसादंकुरुमेदेवसंयोगंतेनचाप्नुयाम्
वाक्पतिरु० शृणुपौलोमिदेवेंद्रोयथानष्टोभयातुरः २४ मानसाभसिसंभूतपंकजांतरमाश्रितः वृत्रहत्याप्रभावेनउद्वेगगु
रुमाश्रितः २५ अभिभूतमिवात्मानंततोऽप्सुनिलयंगतः कामतपःप्रत्ययेनसर्वंप्राप्स्यसिसुव्रते २६ बहूकामेप्सितंयस्मा-
त्तपसालभ्यतेफलं स्त्रीणांपुष्टिकरंत्वेकंव्रतंप्रोक्तंस्वयंभुवा २७ सावित्र्यापृच्छमानायास्तत्त्वंकर्तुमिहार्हसि अशोकव्रत-
मित्येवनाम्नाख्यातंत्रिविष्टपे २८ येनचीर्णेनपौलोमिनारीदुःखंनसंस्मरेत् हरस्वयंभुवोस्त्येवृक्षराजश्चनंदने २९ अस्मिंस्तु
ष्टेहरेस्तुष्टिरितिजानामिनिश्चितम् ३० इतिश्रीभ० आश्विनमा० अशोकाख्यानेसप्तविंशतितमोऽध्यायः २७ छ
शच्युवाच पुन्नागनागबकुलचंपकाद्यान्महीरुहान् परित्यज्यकथंचान्यान्हरोस्मिन्कृतसन्निधिः १ बृहस्पतिरु० हरेण
निर्मितंपूर्वमशोकाख्यंव्रतंशुभं लोकोपकारकरणंततोयंशिववल्लभः २ वसिष्ठउ० निर्मायवृक्षप्रवरंप्रणम्यभक्त्यार्चयि-
त्वाविधिवच्चधर्मं पप्रच्छदेवीपुनराहनाम्नादेविशृणुत्वंविधिमस्यसर्वं ३ वाक्पतिरु० आरभ्यतद्व्रतंकार्यंत्रिरात्रंसमुपो-
ष्य त्रिरात्रंदेविविख्यातमशोकतरुमूलके ४ कार्यंनारीभिरमलमनोवाक्कायकर्मभिः ततःप्रदक्षिणादेवित्वष्टोत्तरशतंफलैः

५ नारिकेलैश्चखर्जूरैर्गोस्तनीभिर्दिनेदिने मंत्रेणानेनमनसापूजयंतिसदाशिवम् ६ अशोकशोकापनुदसर्वकामफ
लप्रद व्रतेनानेनचीर्णेनयथोक्तफलदोभव ७ ततस्तृतीयदिवसेसमभ्यर्च्यविधानतः महादेवंवृषयुतंवंशपात्राणिकारयेत्
८ अनेनैवविधानेनयाकुर्याद्व्रतमुत्तमं वैधव्यंनामयानारीपुत्रसौख्ययुताभवेत् ९ वसिष्ठउवाच बृहस्पतिमुखाच्छ्रुत्वा
शचीचक्रेव्रतंशुभं शास्त्रोक्तविधिनासीते भक्त्यादेवःसमागतः १० ब्रह्महत्याविनिर्मुक्त स्तथातदापिवाञ्छितं व्रतमेतत्समाचर्य
यासाध्वीचैवसक्रतुधीः ११ प्राधान्यंजायतेक्षिप्रंलोकेख्यातिर्भविष्यति व्रतमेतदशोकस्यसर्वकामफलप्रदं १२ श्रीकृष्णउ॰
वसिष्ठस्यवचःश्रुत्वासीताचक्रेव्रतोत्तमं रामाज्ञांसमनुप्राप्यत्वयोध्यायांचकारसा १३ सीताव्रतेकृतेतस्मिन्दुःखहीनाभवत्त
दा युधिष्ठिरउ॰ अशोकस्यसमाख्यातापूजादेवविधानतः १४ कादेवतातत्रपूज्यानारीभिर्व्रतसिद्धये श्रीकृष्णउ॰ अ
शोकवृक्षेतिष्ठंतिसर्वदेवायुधिष्ठिर १५ पल्लवेषुचशाखासुशिवाद्याःसर्वदेवताः अशोकसन्निधौरामःपूजनीयःसलक्ष्मणः १६
सीतयासहितोराजन्विष्णुरीशोयतोमतः पृथक्मंत्रैःपृथक्स्नानैरशोकाख्यायथाक्रमं १७ राज्यस्थभरतश्रेष्ठपुराणोक्तवि
नतः अशोकवृक्षविहिताःशिवाद्यायेसुरोत्तमाः १८ अशोकपूजनेनापिसंतुष्टामेभवंत्विह गौर्यालक्ष्म्यातथेंद्राण्यास्मरु॰
चसीतया १९ त्वंसमाराधितःपूर्वमशोकफलदोभव अशोकवाटिकायांतेसीतातिष्ठत्प्रभावतः २० गृहाणार्घ्यंमयादत्तंस
नालक्ष्मणसंयुतः अग्रजंसन्मुखंवीरंवनेयोनुययौतदा २१ सुलक्ष्मीवर्धनंगौरींलक्ष्मणपूजयाम्यहं अवनीतलसंभूते ।तस
र्वांगसुंदरि २२ गृहाणार्घ्यंमयादत्तंपूजांजनकनंदिनि लक्ष्मीस्त्वंसर्वदेवस्यविष्णोरशोमहीतले २३ अवतीर्णामयादत्तंगृहाण
र्घ्यंनमोस्तुते एवंसंपूज्यविधिनासर्वशोकविनाशकृत् २४ सर्वपापप्रशमनंसर्वकीर्तिविवर्द्धनम् अपुत्रयापुरापार्थपार्वत्यामंद
व॰ २५ अशोकःशोकशमनंपुत्रत्वेपरिकल्पितः जातकर्मादिकंतस्यत्वशोकस्यमहातरोः २६ कारितंविधिवत्तत्रतेनवृक्षोशिलो
त्तमं याव्रतंकुरुतेनारीपुराणोक्तविधानतः २७ अशोकस्यप्रसादेनसर्वान्कामानवाप्नुयात् सर्वोपहारान्राजेंद्रब्राह्मणायनिवेदयेत्

२८ कथामपिसमाकर्ण्ययः कुर्याद्विजतर्पणम् ततःसफलमाप्नोतिअव्रतोस्मिन्नसंशयः २९ युधिष्ठिरउ० विशेषंब्रू
हिमेदेवअशोकतरुपूजने येनार्चितेतरौसर्वंप्राप्यतेसफलंफलं ३० श्रीकृष्णउ० कथयामितरोराजन्याभिर्व्रतमिदंकृतम्
मनुष्यदेवगंधर्वनारीभिःपुत्रसिद्धये ३१ अनुसूयात्रिपत्नीचअरुंधत्यातथैवच देवक्यासीतयाचैवद्रौपद्याचंद्रभामया ३२
दमयंत्याचसावित्र्याकृतंतद्व्रतमुत्तमम् अशोकःपूजितःपूर्वंयथावृत्छृणुपार्थिव ३३ अशोकोराजतश्चैवसुवर्णस्यतया
शिवः तथैवकार्योसीतासौसौवर्णौरामलक्ष्मणौ ३४ पूजयेद्विविधैर्मन्त्रैः पूर्वोक्तैर्नृपसत्तम अशोकपूजयेद्वृक्षंप्ररूढशु
भपल्लवैः ३५ विरूढैःसप्तधान्यैश्चगुणकैर्मोदकैःशुभैः कालोद्भवैःशुभैर्दिव्यैर्नारिकेलैःसदाडिमैः ३६ पुष्पादिनातथा-
धूपैःपूजयेत्तरुमुत्तमम् अशोकपांडवश्रेष्ठशोकनाशनपापहन् ३७ पितृमातृपतीनांचश्वशुराणांतथैवच अशोकत्वशोक
हरोभवसर्वत्रनःकुले ३८ इतिश्रीभ० पृथुनारदसं० आश्विन० अशोकत्रिरात्रव्रतनिरूपणंनामाष्टाविंशतितमोऽध्यायः
२८ ६७ नारदउवाच पौर्णमास्यांविशेषेणकुर्यात्कोजागरव्रतम् महालक्ष्मींसमभ्यर्च्यप्रदोषेभक्तिपूर्वकं १
उपचारैरनेकैश्चपायसैर्मधुसंयुतैः दिक्पालान्परितःपूज्यइंद्रमैरावतस्थितं २ ब्राह्मणान्पूजयेत्पश्चाद्गंधमाल्योपहारतः ना
रिकेलोदकंपीत्वाअक्षक्रीडासमाचरेत् ३ चंद्रिकायांतुसंस्थाप्यक्षीरभक्तिपुरःसरम् निशीथेवरदालक्ष्मीःकोजागर्तीतिभा
षिणी ४ जगत्प्रभुत्वंदास्यामिलोकचेष्टाविलोकिनी तस्मैवित्तप्रदास्यामियोजागर्तिमहीतले ५ सर्वथैवप्रकर्तव्यव्रतंदा
रिद्र्यभीरुभिः अत्रतेकथयिष्यामिइतिहासंपुरातनम् ६ मागधेवलितोनामब्राह्मणःकुंभसंभवः नानाविधाप्रवीणो-
सौसंध्यास्नानपरायणः ७ याचनंमरणंतुल्यंमन्यतेऽसौद्विजोत्तमः ग्रहागतंसगृण्हातियोवान्ययाचयेत्क्वचित् ८ तस्य-
भार्यामहाचंडीनित्यंकलहकारिणी मद्भगिन्यःस्वर्णरूप्यालंकारादिविभूषिताः ९ नानामाल्यांबरधरापश्यदेवांगनाइव
अहंदरिद्रस्यगृहेपतितास्मिदुरात्मनः १० लज्जामांबाधतेनित्यंज्ञातीनांमुखदर्शने धिगस्तुतवविद्यायानिर्धनस्यकुलस्यच

११ एवंवदतिलोकेषुनकरोतिपतीरितम् संकल्पंकृतवत्येकंभावियत्तद्भविष्यति १२ विपरीतंकरिष्यामियावल्लक्ष्मीःप्रसीदति भर्तःपाषाणबुद्धेत्वंचौर्यंकुरुनृपालये १३ आनीयताधनंभूरिनोचेत्संताडयाम्यहम् क्षपारोदितिनाम्नातिकदाचिद्दुःखादति १४ साकपालंताडयतिस्येवंक्लेशयतेपतिं दृष्ट्वातस्यास्तच्चरितंयाचनाद्दुःखभीतितः १५ नोवाचवचनंकिंचिद्यथालाभेनतोषितः एकस्मिन्श्राद्धकालेतुतस्याद्विघ्नोभूद्द्विजोत्तमः १६ एकस्मिन्वत्सरेतत्रश्राद्धसामग्रिकंगृहे तथापिगृहिणीचैवनकरिष्यतिकिंचन १७ इत्युद्विग्नमनाविप्रोनभार्यातेनकिंचन चिंतयाविष्टमेवंतमाययौमित्रमुत्तमं १८ नाम्नागणपतिःख्यातस्तस्मिन्नभ्यागतेसति नोवाचपूर्ववद्वार्तांमित्रंवचनमब्रवीत् १९ भोभोललितचित्तंतेकिमर्थंचिंतयान्वितं अवश्यंत्वधियाःकृत्वाचिंतांतेनिर्हराम्यहम् २० ललितउवाच अधुनापितृपक्षेतुपितुःश्राद्धंसमागतं सामग्रिकंगृहेचास्तिविपरीतकरीप्रिया २१ कथंसंपाद्यतेश्राद्धमितिचिंतायुतोस्म्यहम् गणपतिरु० धन्योसिकृतकृत्योसिभार्यायस्येदृशीगृहे २२ ब्रूहित्वंवैपरीत्येनभार्याकार्यंकरिष्यति ललितस्तुतथेत्युक्त्वासायंभार्यामभाषत २३ अनर्थकारिकेचंडिप स्वः श्राद्धंपितुः त्वयापितंधनंयस्मात्तदर्थंतैस्तुपातकैः २४ तस्मान्नार्हसिपाकंत्वंतथादुष्टेकरोषिचेत् ब्राह्मणायेधूर्तकराः शौचाचारविवर्जिताः २५ निमंत्र्यास्तेत्वयाभद्रेनोत्तमानकदाचन इतिभर्तृवचःश्रुत्वासभारस्तुमहान्कृतः २६ निमंत्रिताश्चसद्विप्राःकालेपाकःकृतस्तया विपरीतैश्चवाक्यैश्चश्राद्धंसंपादितंतथा २७ पिंडदानंततःकृत्वाभार्यायैवाक्यमब्रवीत् विसृज्यपिंडपात्राणिक्षिपेद्गंगाजलेशुभे २८ पींडानीतास्तथेत्युक्त्वाशौचकूपेव्यावेक्षिपत् तज्ज्ञात्वाललितोदुःखीबभूवाकुलिताननः २९ क्रोधाद्विनिर्ययौगेहात्संकल्पंकृतवानिति लक्ष्मीर्यदिप्रसन्नास्यात्तदान्नंभक्षयाम्यहं ३० तावत्कंदफलाहारीवनमध्येवसाम्यहं इतिसंकल्प्यविप्रोसौगहनेनिर्जनेवने ३१ एकधर्मोनदीतीरेवृक्षवल्कलधारकः विंशद्दिनानिन्यवसदागताईषपूर्णिमा ३२ कालीवंशसमुद्भूतानागकन्याःसुलोचनाः निवसंतिवनेतस्मिन्व्रतंचक्रुःसमाप्तये ३३ श्वेती-

कृतंतुसुधयागृहंचंद्रप्रभोपमं मंडलानिविचित्राणिनानापिष्टैः कृतानिच ३४ पंचामृतानिरत्नानिदर्पणाच्छादनानिच स्थापयि त्वोंदिरापूजा कृतानाभिःप्रयत्नतः ३५ एवंतुप्रथमोयामोबालाभिर्गमितस्तदा आरब्धंतुततोद्यूतंतुयैतासुनलेभिरे ३६ चतुर्भि सुविनाक्षाणांक्रीडनंनैवजायते तस्मान्मृग्यस्तुरीयसुविचार्यैवंविनिर्गताः ३७ कन्यकास्तेनदीतीरेददृशुर्ललितंद्विजम् ज्ञात्वातंसाधुचरितंसच्चित्तंचमुखाकृतेः ३८ उवाचवचनंचारुद्विजकोसिसमागतः एह्यद्य क्रीडितुद्यूतंलक्ष्मीप्रीतिकरंपरं ३९ इत्थंतद्वचनंश्रुत्वाललितोवाक्यमब्रवीत् द्यूतेनक्षीयतेलक्ष्मीर्द्यूताद्धर्मोविनश्यति ४० मुग्धवद्वदसेकिंत्वंकथंलक्ष्मीः प्रसीदति कन्योवाच भाससेत्वंपंडितवत्कर्मतेस्तिचमूर्खवत् ४१ ईषस्यशुक्लपूर्णायांद्यूतेलक्ष्मीःप्रसीदति द्यूतक्रीडांतु कृत्वैवकौतुकंपश्यमंदिरे ४२ इत्युक्त्वासौतयानीतःक्रीडार्थंस्वस्यमंदिरे दत्वातस्मैनारिकेलजलंभक्ष्यादिकंतथा ४३ आरब्धंचततोद्यूतंश्रीलक्ष्मीःप्रियतामिति लापयित्वातुरत्नानिकन्याभिर्ब्राह्मणेनतु ४४ कौपीनंलापितंस्वीयंताभिर्निर्जितमेवतत् ब्राह्मणःक्रोधसंयुक्तः किंकर्तव्यंमयाधुना ४५ उपवीतंलापयित्वाततःस्वीयंकमंडलुम् लापयित्वैवनिश्चित्यउपवीतंललापसः ४६ ताभिर्जितंचतदपिशरीरंलापितंस्वयम् ततोऽर्धरात्रेसंजातेलक्ष्मीनारायणावुभौ ४७ आगतौलोकचारितंद्रष्टुंविप्रंददर्शतुः उपवीतंविकौपीनंचिंतयातिकृशीकृतम् ४८ उवाचवचनंविष्णुःशृणुत्वंपद्मलोचने तवव्रतंकृतंविप्रःकथंजातःसचिंतकः ४९ तस्मादेनंकुरुक्षिप्रंलक्ष्मीवंतंसुखोचितम् इतिविष्णुवचःश्रुत्वापद्मयासोकटाक्षतः ५० बलान्वितहरोजातस्तत्कालेमदनोपमः ततःकामेनसंविद्धास्ताःस्त्रियोराजकन्यकाः ५१ विप्रायवचनंप्रोचुःशृणुविप्रतपोधन यद्यस्माभिर्जितत्वंचेद्भर्तास्माकंभवस्त्वंभो ५२ वयंत्वयाजिताश्चेद्वयथेच्छसितथाकुरु इतितद्वचनंश्रुत्वातथामन्येसचाद्विजः ५३ क्रीडनात्ताजिताःकन्यागांधर्वेणविवाहिताः तासांरत्नानितांश्चापिगृहीत्वास्वंगृहंययौ ५४ प्रापचंडीतिरस्कारान्ममेदंभाग्यमुत्तमं तस्मात्संमानिताचंडीसापिप्रीताबभूवह ५५ चकारस्वामिनश्चाज्ञामित्थंलक्ष्मीव्रतंत्विदं एवंलक्ष्मीव्रतंकृत्वासदरिद्री-

नदुःखभाक् ५६ कथांश्रुत्वाविधानेनव्रतस्यापिफलंलभेत् ५७ एतद्व्रतंप्रकर्तव्यमाश्विनस्नानतत्परैः विपुलांश्रियमाप्नोति
नात्रकार्याविचारणा ५८ इतिश्रीभविष्योत्तरपुराणेआश्विनमासमाहात्म्येएकोनत्रिंशोऽध्यायः २९ ॥ पृथुरुवाच
पुनःकथयमेब्रह्मन्माहात्म्यमाश्विनस्यतु तथाफलश्रुतिंपुण्यांकृपांकृत्वादयानिधे १ नारदउवाच श्रूयतांराजशार्दूलमाहा
त्म्यस्यफलश्रुतिः यांश्रुत्वामुच्यतेजंतुःपापेभ्योनात्रसंशयः २ इहलोकेषुयत्पापंजन्मजन्मांतरेषुच तत्सर्वंनाशमायातिमास
माहात्म्यकीर्तनात् ३ कृतेतुतपसासिद्धिस्त्रेतायांज्ञानतःफलं द्वापरेयज्ञतपसापुराणश्रवणात्कलौ ४ कलौनास्त्येवनास्त्ये
वपुराणश्रवणात्परम् ब्राह्मणक्षत्रियैर्वैश्यैःस्त्रीभिःशूद्रादिभिर्नरैः ५ प्रातःस्नानंप्रकर्तव्यंपुराणश्रवणंतथा इषेमासेप्र
कर्तव्यंनरैःसर्वार्थसाधकैः ६ नकरिष्यंतियेमोहात्स्नानंदानंकलौनराः तेषांनिरर्थकंजन्मभर्ताऽइवस्वसंततेः ७ जन्मजन्मांतरेदो
षैःकुजन्मस्यापियेनराः अज्ञानतःश्रवणतोमुक्तायांतिपरांगतिं ८ अस्मिन्नर्थेपुरापृष्टऋषिणाकमलासनः ब्रह्मोवाच शृ
णुनारदतेवच्मिकथांपापहरांशुभां ९ महोदयपुरेकश्चिच्चंद्रकांतोभवन्नृपः कुबेरइवसंपत्यासर्वमान्योतिथिप्रियः १० कस्मिं
श्चित्समयेराजामृगयार्थंवनंगतः जघानश्वापदमृगान्मध्याह्नेद्युमणौसति ११ तृषयापीडिताःसर्वेददृशुःसरउत्तमं जगामत्वर
याराजासैनिकैःपरिवारितः १२ तस्मिन्सरोवरेदृष्टाजलक्रीडारताःस्त्रियः स्त्रियऊचुः वस्त्रहीनावयंराजन्लज्जयापयसि
स्थिताः १३ नग्नावलोकनेदोषंकथयंतिविचक्षणाः इत्थंश्रुत्वावचस्तासांसंजातोमदनातुरः १४ आराड्लोकयंतिस्मकेचिद्द्रष्टुंस
मुद्यताः तत्क्षणाच्छापितास्ताभिर्यूयंवृक्षाभविष्यथ १५ तदातेवृक्षतांप्राप्तामुनिपत्नीप्रकोपतः कालेनबहुनातत्रमुनयः
समुपागताः १६ दृष्ट्वासरोवरंदिव्यंवृक्षैश्छायासमन्वितं कर्तुंतदाश्विनेस्नानंप्रत्यहंकर्तुमुद्यताः १७ तत्रस्नानंप्रकर्तव्यंपुराण
श्रवणंतथा तत्रैवकौतुकंजातंतच्छृणुध्वंद्विजोत्तमाः १८ तत्राश्विन्यांपौर्णिमायांप्रातःस्नात्वायथाविधि समग्रंश्रवणंकृत्वा·
पूजयित्वासरस्वतीं १९ यथाचवाचकंपूज्ययावद्गंतुमितस्ततः तदानीमेवसकलायथापूर्वंस्थिताभवन् २० सराजासैनिकाः

सर्वेस्तुवंतोब्राह्मणान्मुहुः ऋषिस्त्रीभिर्वयंशापाद्वृक्षयोनिमुपागताः २१ मासमाहात्म्यश्रवणान्मुक्तयामोनिजंगृहम् एव
मुक्तागताःसर्वेस्नानमाहात्म्यमुत्तमम् २२ कृत्वाद्विजवराःसर्वेययुर्दिव्यांपरांगतिम् सूतउवाच मासस्नानंप्रकर्तव्यं
पुराणश्रवणंतथा २३ समग्रमर्धमर्द्धंवाश्लोकंश्लोकार्द्धमेववा पुराणपुस्तकंपूज्यवाचकंपूजयेत्ततः २४ वस्त्रालंकरणैश्चा
पिपूजयेदुपचारकैः पयस्विनींसवत्सांगांदद्याद्व्यासायभक्तितः २५ सर्वतस्यगृहेनेयंगीतवाद्यपुरःसरम् पदमेकाश्वमे
धस्यफलंतस्मान्नसंशयः २६ स्त्रीभिःपूजाप्रकर्तव्या हरिद्राकुंकुमादिभिः व्यासेनसहगंतव्यंतीर्थयात्रासमंफलम् २७
शक्तिहीनःसमपदंगच्छंश्चपरमादरात् पुराणश्रवणंकृत्वानपूजयतिवाचकं २८ नतेनसहयोगच्छेन्नसन्मानंकरोतियः स-
त्वंधोबधिरोदीनोदरिद्रोजन्मजन्मनि २९ नपुराणफलंतस्यविधिहीनस्यप्राणिनः तद्दिनेमधुरमश्नीयाद्यथाशक्तिद्विजैः
३० सुवासिन्यःकुमारीश्चअभावेयुग्मभोजनम् व्यासेनसहभोक्तव्यंपुराणश्रवणेच्छुभिः ३१ इतिश्रीभविष्योत्तर
पुराणेपृथुनारदसंवादेआश्विनमासमाहात्म्येफलश्रुतिवर्णननामत्रिंशोऽध्यायः ३० छ इतिश्रीज्योतिर्वित्कुलावं
तंसव्यंकटरामात्मजहरिकृष्णविनिर्मितेबृहज्ज्योतिषार्णवेअष्टमेधर्मस्कंधेचतुर्थेमासस्तबकेआश्विनमासमाहात्म्य-
सप्तमंसमाप्तम् ७ श्रीसीतारामचंद्रोजयति श्रीकृष्णार्पणमस्तु श्रीरस्तुशुभम्

यह आश्विनमासमाहात्म्य मुंबईमैं पं॰ श्रीधरशिवलालके ज्ञानसागरछापखानामें छाप्यो· सं॰१९४५ शा·१८१० चैत्रशुक्ल ११

इतिश्रीमासस्तवकेऽऽश्विनमाहात्म्यःसमाप्तम्

अथ मासस्तबके मार्गशीर्षमासमाहात्म्यप्रारंभः

बृ॰ज्यो॰र्ण॰
धर्मस्कंध॰
३३६

मासस्त॰५
मार्गमा॰९
चित्र॰


सूत·
संवाद·
शौनकादि
ब्रह्मा·
विष्णु
भरद्वाज·
ऋषि·
वीरबाहु
राजा
देवशर्मा
ब्राह्मण·
शूद्र·
गरुड·
सरोवर·
मत्स्य रूपी
भगवान्
उपाध्या
पूजकजन·
स्त्री
ब्राह्मण·
यजमा
कृष्ण·
पुरुष
भागवतपाराय·

२

अथ मार्गशीर्षमाहात्म्यविषयानुक्रमणिका·

अ·	विषयः
१	ब्रह्मणापृष्टोश्रीविष्णुः मार्गशीर्षप्रशंसावर्णनपूर्वकगोपकन्याकृतव्रतनिरूपणं श्लो· २३
२	स्नानविधिः वर्णपरत्वेपुंड्रधारणनिर्णयः ब्राह्मणादीनां द्वादशादितिलकधारणे अंगनिर्देशः प्रत्येकांगेषु देवतानिर्देश कथनं पुंड्रलक्षणं श्लोकाः ३८
३	पुंड्रभेदजिज्ञासुं ब्रह्माणंप्रतिविष्णुः गोपीचंदन माहात्म्यवर्णनपूर्वक शंखचक्र पद्मादिधारणनिर्णयं शंखादिधारणे महाफलप्राप्तिंचाह· श्लोकाः ६७
४	पद्माक्षधात्रीतुलसीमालाधारणमाहात्म्यंततो पूजाविधानंचाह श्लो· ४९
५	ततः पंचमेध्यायेक्षीरस्नानमाहात्म्यंपंचामृतस्नान माहात्म्यंशंखोदकस्नानमाहात्म्यंशंखस्थतीर्थोदकेन मार्जनादिकरणेफलंचाह· श्लोकाः २६
६	घंटानादमाहात्म्यंघंटापूजनविधानंतत्फलंचाह ततः चंदनमाहात्म्यं श्लो॰ ४४
७	विष्णुपूजनेयोग्यायोग्यपुष्पाणिप्रत्येकपुष्पाणां उत्तरोत्तरं पुण्याधिक्य वर्णनं श्लो॰ २९
८	तुलसीमाहात्म्यं धूपदीपमाहात्म्यंनीराजन माहात्म्यंचाह श्लो॰ ५१
९	नैवेद्यभेदनिरूपणं श्लोकाः ३३
१०	नैवेद्यानंतर कर्मनिरूपणं ततोजपलक्षणं ततोप्रदक्षिणानिर्णयं ततो दामोदरं मंत्राराधनं ततः प्रणामादि लक्षणंचाह श्लो· ५५
११	एकादशीव्रतमाहात्म्य दशमीवेधत्यागः वीरबाहुभरद्वाजसंवादेन नृपस्यपूर्वजन्मवृत्तांतकथनं श्लोकाः ८८
१२	देवशर्माशूद्रंप्रति एकादशीव्रतविधानंअखंडैकादशीलक्षणंतथैकादशीव्रतोद्यापनंचाह· श्लोकाः ६७
१३	जागरणलक्षणंतन्माहात्म्यंमत्स्योत्सवनिरूपणंचाह श्लोकः १०२
१४	विष्णुरूपीब्राह्मणदंपत्यपूजनप्रतिपादनपूर्वकंकृष्णनामस्मरण माहात्म्यं श्लो॰ ६६
१५	श्रीकृष्णस्यध्यानवर्णनपूर्वकंश्रीमद्भागवतश्रवणमाहात्म्यप्रतिपादनं श्लो॰ ५९
१६	मार्गशीर्षमासेमथुरावासमाहात्म्यंतथा तस्मिन्नेवमासेपुष्करवासमाहात्म्यंचाह श्लो· ६

इति मार्गशीर्षमाहात्म्यविषयानुक्रमणिका समाप्ता·

श्रीगणेशायनमः देवकीनंदनंकृष्णंजगदानंदकारकम् भुक्तिमुक्तिप्रदंदेवंमाधवंभक्तवत्सलम् १ सूतउवाच
श्वेतद्वीपेसुखासीनंदेवदेवंरमापतिम् चतुर्वक्त्रोनमस्कृत्यपप्रच्छपितरंतदा २ ब्रह्मोवाच हृषीकेशजगद्धातःपु-
ण्यश्रवणकीर्तन पृष्टंयद्ब्रूहिदेवेशसर्वज्ञसकलेश्वर ३ मासानांमार्गशीर्षोहमित्युक्तभवतापुरा तस्यमासस्यमा-
हात्म्यंज्ञातुमिच्छामितत्वतः ४ कोदेवस्तस्यकिंदानंकथंस्नानंविधीयते पुरुषैश्चात्रकिं[१]कार्यंकर्त[२]व्यंकिंरमापते ५
वक्तव्यंकिंतथापूजाध्यानमंत्रादिकंचयत् तत्रयत्क्रियतेकर्मतत्सर्वंब्रूहिमेच्युत ६ श्रीभगवानुवाच साधुपृष्टंम
हाभागसर्वलोकोपकारिणा यस्मिन्कृतेकृतंसर्वमिष्टापूर्तादिकंचयत् ७ सर्वयज्ञेषुयत्पुण्यंसर्वतीर्थेषुयत्फलम्
तत्फलंसमवाप्नोतिमार्गशीर्षेकृतेसुत ८ तुलापुरुषदानाद्यैर्यत्फलंलभतेनरः तत्फलंप्राप्यतेपुत्रमाहात्म्यश्रवणा
त्किल ९ यज्ञाध्ययनदानाद्यैःसर्वतीर्थावगाहनैः सन्यासेनचयोगेननाहंवश्योऽभवंनृणाम् १० स्नानेनदाने-
नचपूजनेनध्यानेनमौनेनजपादिभिश्च वश्योऽथवामार्गशिरेचमासितथानचान्येषुचगुह्यमुक्तम् ११ अन्यैर्धर्मादि
भिःकृत्वागोपितंमार्गशीर्षकम् मत्प्राप्तेःकारणंमत्वादेवैःस्वर्गनिवासिभिः १२ येकेचित्पुण्यकर्माणोममभक्तिपराय-
णाः एभिरवश्यंकर्तव्योमार्गशीर्षोमदापनः १३ मार्गशीर्षंनकुर्वंतियेनराभारताजिरे पापरूपाश्चतेज्ञेयाःकलिका
लविमोहिताः १४ अष्टस्वपिचमासेषुयत्फलंलभतेनरः तत्फलंप्राप्यतेवत्समाघेमकरगेरवौ १५ माघाच्छतगुणं
पुण्यंवैशाखेमासिलभ्यते तस्माच्छतगुणंपुण्यंतुलासंस्थेदिवाकरे १६ तस्मात्कोटिगुणंपुण्यंवृश्चिकस्थेदिवाकरे
मार्गशीर्षोधिकस्तस्मात्सर्वदाचममप्रियः १७ उषस्युत्थाययोमर्त्यःस्नानंविधिवदाचरेत् तुष्टोऽहंतस्ययच्छामि
आत्मानमपिपुत्रक १८ अत्राप्युदाहरंतीदंशृणुपुत्रकथांतरम् नंदगोपोमहात्मावैख्यातोयोभूतलेऽभवत् १९

टीप १ बहिर्भूतसाधनरूपंकर्मकिंकार्यं २ आत्मसाधनभूतंकर्मकिंकर्तव्यम्.

यत्रवृंदावनेरम्येगोपकन्याःसहस्रशः तासांचित्तंचमद्रूपेलग्नमासीत्पुरोऽनघ २० तासांबुद्धिर्मयादत्तामार्गसीर्षावगाहने ततस्ताभिःकृतंस्नानंप्रातःकालेयथाविधि २१ पूजाकृताहविष्यान्नंभुक्तंताभिःकृतानतिः एवंकृतेनविधिनाप्रसन्नोऽहंततोनघ २२ वरोदत्तोमयात्मावैतासांतुष्टोऽत्रवैकिल तस्मान्नरैस्तुकर्तव्योमार्गशीर्षोयथाविधि २३ इतिश्रीस्कंदपुराणेब्रह्मविष्णुसंवादेमार्गशीर्षमाहात्म्येप्रथमोऽध्यायः १ छ ब्रह्मोवाच त्वयोक्तोविधिसंयुक्तोमार्गशीर्षोमदापनः कोविधिस्तस्यदेवेशसर्वंमेब्रूहिकेशव १ श्रीभगवानुवाच रात्रावंतेसमुत्थायउपस्पृश्ययथाविधि नमस्कृत्यागुरुंस्वीयंसंस्मरन्मामतंद्रितः २ सहस्रनामभिस्तुत्वाकीर्तयेद्वाग्यतःशुचिः बहिर्ग्रामात्समुत्सृज्यमलमूत्रंयथाविधिः ३ शौचंकृत्वायथान्यायमाचम्यप्रयतःशुचिः दंतधावनपूर्वंचस्नानंकृत्वायथाविधि ४ आदायतुलसीमूलमृदंतत्पत्रसंयुताम् मूलमंत्रेणाभिमंत्र्यगायत्र्यावामहामते ५ मंत्रेणैवानुलिप्तांगःस्नायादथाघमर्षणम् अनुद्धृतैरुद्धृतैर्वाजलैःस्नानंविधीयते ६ तीर्थंप्रकल्पयेद्विद्वान्मंत्रेणानेनमंत्रवित् ॐ नमोनारायणायेतिमूलमंत्रउदाहृतः ७ दर्भपाणिस्तुविधिनाआचांतःपुरतःशुचिः चतुर्हस्तसमायुक्तंचतुरस्रंसमंततः ८ प्रकल्प्यावाहयेद्गंगामेभिर्मंत्रैर्विचक्षणः विष्णुपादप्रसूतासिवैष्णवीविष्णुदेवता ९ त्राहिनस्त्वानमस्तस्मादाजन्ममरणांतिकम् तिस्रःकोट्योर्धकोटीचतीर्थानांवायुरब्रवीत् १० दिविभुव्यंतरिक्षेचतानितेसंतिजान्हवी नंदिनीत्येवतेनाम्देवेषुनलिनीतिच ११ दक्षपुत्रीचविहगाविश्वगायोगिनामता विद्याधरासुप्रसन्नातथालोकप्रसाधिनी १२ क्षोमाचजान्हवीचैवशांताशांतिप्रदायिनी एतानिपुण्यनामानिस्नानकालेसदापठेत् १३ सदासन्निहितातत्रगंगात्रिपथगामिनी सप्तवाराभिजप्तेनकरसंपुटयोजितम् १४ मूर्ध्नाकृतांजलिर्भूयस्त्रिचतुःपंचसप्तवा स्नानंकुर्यान्मृदातद्वामंत्र्यानुविधानतः १५ अश्वक्रांतेरथक्रांतेविष्णुक्रांतेवसुंधरे मृत्तिकेहरमेपापंयन्मयादुष्कृतंकृतं

१६ उद्धृतासिवराहेणकृष्णेनशतबाहुना नमस्तेसर्वभूतानांप्रभवारणिसुव्रते १७ एवंस्नात्वाततःपश्चादाचम्यच
विधानतः उत्थायवाससीशुक्लेकूलेवैपरिधायच १८ आचम्यतर्पयेद्देवान्पितृंश्चैवऋषींस्तथा निष्पीड्यवस्त्रमाचम्य
धौतवस्त्रोऽविचेष्टितः १९ विमलांमृत्तिकांरम्यामादायद्विजसत्तम मंत्रेणैवाभिमंत्र्याथललाटादिषुवैष्णवः २०
धारयेदूर्ध्वपुंड्राणियथासंख्यमतंद्रितः ब्रह्मन्द्वादशपुंड्राणिब्राह्मणःसततंवहेत् २१ चत्वारिभूभृतांपुत्रपुंड्राणि
द्वेविशांस्मरेत् एकपुंड्रंचनारीणांशूद्राणांचविधीयते २२ ललाटउदरेचैववक्षस्येकंठकूबरे कुक्षौबाह्वोःकर्णयोः
श्चपृष्ठेत्रिकेचैवशिरः २३ तिलकाद्वादशप्रोक्ताब्राह्मणस्यसदानघ ललाटेहृदिबाह्वोश्चक्षत्रःपुंड्राणिधारयेत्
२४ ललाटेहृदयेवैश्योभालेवैशूद्रयोषिताम् ललाटेकेशवंध्यायेन्नारायणमथोदरे २५ वक्षस्थलेमाधवंच
गोविंदंकंठकूबरे विष्णुंचदक्षिणेकुक्षौबाह्वोश्चमधुसूदनम् २६ त्रिविक्रमंकर्णरंध्रेवामनंवामपार्श्वके श्रीधरंवामबाहौ
चहृषीकेशंचकर्णके २७ पृष्ठेतुपद्मनाभःस्यात्त्रिकेदामोदरंन्यसेत् तत्प्रक्षालनतोयेनवासुदेवंतुमूर्धनि
२८ एवंकार्यंब्राह्मणस्यक्षत्रियस्योर्ध्वधारयेत् ललाटेकेशवंध्यायेद्धृदयेमाधवंतथा २९ बाह्वोश्चउभयोर्वत्सस्मरेद्वै
मधुसूदनम् क्षत्रियस्यविधिःप्रोक्तोवैश्यकृत्यंनिशामय ३० ललाटेकेशवंध्यायेद्धृदयेमाधवंतथा योषिच्छूद्रौ
स्मरेद्वैकेशवंभालदेशके ३१ अनेनविधिनाकुर्यात्पुंड्राणिममतुष्टये श्यामंशांतिकरंप्रोक्तंरक्तंवश्यकरंतथा ३२
श्रीकरंपीतमित्याहुःश्वेतंमोक्षकरंशुभम् एकांतिनोमहाभागाःसर्वलोकहितेरताः ३३ सांतरालंप्रकुर्वंतिपुंड्रंहरिपदाकृतिम्
मध्येच्छिद्रेणसंयुक्तमेतद्धिहरिमंदिरम् ३४ ऊर्ध्वंसौम्यमृजुसौक्ष्म्यंसुपार्श्वंसुमनोहरम् निरंत

३

टीप- १ कूलेइत्यत्र नद्यांतडागेवास्नानंचेत्तदा तटे गृहेयदिस्नानंतदास्नानभूमिसकाशाद्बहिःस्थले २ पृष्ठवंशाधरे त्रिकमित्यमरः त्रिभिरस्थिभिर्घटितेस्थाने·

रालंयःकुर्यादूर्ध्वपुंड्रंद्विजाधमः ३५ साहितत्रस्थितंलक्ष्म्यासहमांचव्यपोहति अच्छिद्रमूर्ध्वपुंड्रंतुयेकुर्वंतिद्विजाधमाः ३६ तैलंललाटेशुनःपादनिक्षिप्तंवैनसंशयः नास्मिंश्छिद्रान्वितंपुंड्रंमहाच्छिद्रंशुभान्वितम् ३७ धारयेद्ब्राह्मणोनित्यंहरिसालोक्यसिद्धये ३८ इतिश्रीस्कंदपुराणेमार्गशीर्षमाहात्म्येद्वितीयोऽध्यायः २ छ छ

ब्रह्मोवाच पुंड्रंकतिविधंकार्यंप्रब्रूहिममकेशव पुंड्राणांश्रवणेऽतीवकौतुकंममजायते १ श्रीभगवानुवाच शृणुपुत्रप्रवक्ष्यामिपुंड्रंचविविधंस्मृतम् तुलसीमृत्स्नयासार्द्धंगोपीचंदनमेवच २ हरिचंदनतःकार्यंपुंड्रंतत्रापिचक्षणैः गोपीचंदनमाहात्म्यंनिबोधगदतोमम ३ श्रीकृष्णतुलसीमूलमृदमादायभक्तिमान् धारयेदूर्ध्वपुंड्राणिहरिस्तत्रप्रसीदति ४ योमृत्तिकांद्वारवतीसमुद्भवांकरेसमादायललाटपट्टे करोतिनित्यंपुरुषोर्ध्वपुंड्रंक्रियाफलंकोटिगुणंतदाभवेत् ५ क्रियाविहीनंयदिकर्महीनंश्रद्धाविहीनंयदिकालवर्जितम् कृत्वाललाटेयदिगोपिचंदनंप्राप्नोतितत्कर्मफलंसदाक्षयम् ६ गोपीचंदनसंभवंसुरुचिरंकृत्वाललाटेद्विजोनित्यंधारयतेयदिप्रतिदिनंरात्रौदिवासर्वदा यत्पुण्यंकुरुजांगलेरविग्रहेमाघेप्रयागेतथा तत्प्राप्नोतिततोधिकंममगृहेसंतिष्ठतेदेववत् ७ यस्मिन्गृहेतिष्ठतिगोपिचंदनंभक्त्याललाटेमनुजोबिभर्तिचेत् तस्मिन्गृहेऽहंनिवसामिसर्वदाश्रियान्वितःकंसनिहाचतुर्मुख ८ योधारयेद्वारवतीसमुद्भवंपुण्यंपवित्रंकलिकल्मषापहम् नित्यंललाटेममंत्रयुक्तंयमनपश्यत्यपिपापसंयुतम् ९ यस्यांतुकालेसतुगोपिचंदनंबाह्वोर्ललाटेहृदिमस्तकेच प्रयातिलोकेकमलापतेर्ममगोबालघातीयदिब्रह्महास्यात् १० ग्रहानपीडंतिनरक्षसांगणायक्षाःपिशाचोरगभूतनायकाः ललाटपट्टेशुनगोपिचंदनंसंतिष्ठतेयस्यममप्रभावात् ११ ऊर्ध्वंपुंड्रमृजुसौम्यंललाटेयस्यदीप्यते सचांडालोपिशुद्धात्मापूज्यएवनसंशयः १२ अशुचिर्वाप्यनाचारोमहापापसमाचरेत् अस्नातोयःक्रियाःकुर्यादशुचिःपापसंयुतः १३ गोपीचंदनसंपर्कात्पूज्यएवनसंशयः अशुचिर्वाप्यनाचारो

महापापंसमाचरेत् १४ शुचिरेषभवेन्नित्यमूर्ध्वपुंड्रांकितोनरः मत्प्रियार्थंशुभार्थंवारक्षार्थंचतुरानन १५ मत्पूजा
होमकेचैवसायंप्रातःसमाहितः मद्भक्तोधारयेन्नित्यमूर्ध्वपुंड्रंभयापहम् १६ ऊर्ध्वपुंड्रधरोमर्त्योगृहेयस्यान्नमश्नुते
तदाविंशत्कुलंतस्यनरकादुद्धराम्यहम् १७ वीक्ष्यादर्शेतलेवापियोविदध्यात्प्रयत्नतः उर्ध्वपुंड्रंमहाभागसयातिपर
मांगतिम् १८ अनामिकाशांतिदोक्तामध्यमायुःकरीभवेत् अंगुष्ठःपुष्टिदःप्रोक्तस्तर्जनीमोक्षदायिनी १९ गो
पीचंदनखंडंतुयोददातिचवैष्णवे कुलमष्टोत्तरंतेनपावितंवैभवेच्छतम् २० यज्ञोदानंतपोहोमःस्वाध्यायःपितृत
र्पणम् व्यर्थंभवतितत्सर्वमूर्ध्वपुंड्रंविनाकृतम् २१ यच्छरीरंमनुष्याणामूर्ध्वपुंड्रंविनाकृतम् तन्मुखंनैवपश्यामिस्मशा
नसदृशंहितत् २२ उर्ध्वपुंड्रंतुयःकुर्यान्मत्स्यकूर्मादिधारणम् कुर्याद्विष्णुःप्रसादार्थंमहाविष्णोरतिप्रियम् २३ य
स्तुनःकलिकालेतुमत्पुरीसंभवांमृदम् मत्स्यकूर्मांकितंचिन्हंगृहीत्वाकुरुतेनरः २४ देहेतस्यप्रास्थितंमांजानीहित्रिद-
शापमम् तस्यमनात्तरंकिंचित्कर्तव्यंश्रेयमिच्छता २५ ममावतारचिन्हानिदृश्यंतेयस्यविग्रहे मर्त्योमर्त्योनविज्ञेयःस
नूनंमामकीतनुः २६ पापस्कृतरूपंतुजायतेतस्यदेहिनः ममायुधानिदृश्यतेलिखितानिकलौयुगे २७ उभाभ्या-
मपिचिन्हाभ्यांयोंकितोमत्स्यमुद्रया कूर्मयापिस्वयंतेजोधिक्षिप्ततस्यविग्रहे २८ शंखंचपद्मंचयथारथांगंमत्स्यं
चकूर्मंरचितंस्वदेहे करोतिनित्यंसुकृतस्यवृद्धिंपापक्षयंजन्मशतार्जितस्य २९ नारायणायुधैर्नित्यंचिन्हितोयस्य·
विग्रहः पापकोटिप्रयुक्तस्यतस्यकिंकुरुतेयमः ३० शंखोद्धारेचयत्प्रोक्तंवसतांकोटिजन्मभिः तत्फलंलभतेशंखेप्र-
त्यहंदक्षिणेभुजे ३१ यत्फलंपुष्करेप्रोक्तंपुंडरीकाक्षदर्शनात् शंखोपरिकृतेपद्मेतत्फलंकोटिसंमितम् ३२ वामेभुजे
गदायस्यलिखितादृश्यतेकलौ गदाधरोगयापुण्यंप्रत्यहंतस्यगच्छति ३३ यच्चानंदपुरेप्रोक्तंचक्रस्वामीसमीपतः
गदाचक्रेचलिखितेतत्फलंलिंगदर्शने ३४ ममायुधांकितंदेहंगोपीचंदनमृत्स्नया प्रयागादिषुतीर्थेषुसगत्वाकिंक

रिष्यति ३५ यदायदाप्रपश्येतदेहंशंखादिचिन्हितम् तदातदाप्रपन्नोहंपापंतस्यदहामिवै ३६ तिष्ठतेय-
स्यदेहेतुअहोरात्रंदिनेदिने शंखचक्रगदापद्मलिखितंस मदात्मकः ३७ नारायणायुधैर्युक्तंकृत्वात्मानंकलौ
युगे पुण्यंकर्मप्रकुरुतेमेरुतुल्यंनसंशयः ३८ शंखायुधांकितोभक्त्यायःश्राद्धंकुरुतेकृत विधिहीनंतुसंपूर्णं
पितॄणांदत्तमक्षय ३९ यथाग्निर्दहतेकाष्ठंवायुनाप्रेषितोभृशम् तथादहतिपापानिदृष्ट्वामेआयुधानिवै ४०
ममायुधांकितामुद्राअष्टाक्षरसमन्विताम् शंखादिस्वायुधैर्युक्तांस्वर्णरौप्यमयामपि ४१ धत्तेभागवतायस्तक
लिकालेविशेषतः प्रह्लादस्यसमोज्ञेयोनान्यथाममवल्लभः ४२ यस्यनारायणीमुद्रादेहेशंखादिचिन्हितं धात्री
फलैःकृतामालातुलसीकाष्ठसंभवा ४३ द्वादशाक्षरमंत्रैस्तानित्युक्तानिकलेवरे आयुधानिचविप्रस्यमत्समःस
चवैष्णवः ४४ शंखांकिततनुर्विप्रोभुंक्तेचैयस्यवेश्मनि तदन्नंस्वयमश्नामिपितृभिःसहपुत्रक ४५ कृष्णायुधां
कितंदृष्ट्वासन्माननंकरोतियः द्वादशाब्दार्जितंपुण्यंबाष्कलेयायगच्छति ४६ कृष्णायुधांकितोयस्तुस्मशानेम्रि
यतेयदि प्रयागेयागतिःप्रोक्तासागतिस्तस्यमानद ४७ ममायुधैःकलौनित्यंमंडितोयस्यविग्रहः तत्राश्रमंप्रकु
र्वंतिविबुधावासवादयः ४८ यःकरोतिचमेपूजांममशस्त्रांकितोनरः अपराधसहस्राणिपापंतस्यहराम्य-
हम् ४९ कृत्वाकाष्ठमयंबिंबंममशस्त्रैःसुचिन्हितम् योवैअंकयतेदेहंतत्समोनास्तिवैष्णवः ५० अष्टाक्ष
रांकितामुद्रायस्यधातुमयीकरे शंखपद्मादिभिर्युक्तापूज्यतेसोसुरासुरैः ५१ धृतानारायणीमुद्राप्रह्लादेनपु
राकरे विभीषणेनबलिनाध्रुवेणचशुकेनच ५२ मांधात्राअंबरीषेणमार्कंडेयमुखैर्द्विजैः शंखादिचिन्हितैःशा
स्त्रैर्देहंकृत्वाचमानद ५३ एवमाराध्यमांप्राप्तंसमीहितफलंमहत् गोपीचंदनमृत्स्नायालिखितोयस्यविग्रहः
५४ शंखचक्रादिपद्मांकेदेहेतस्यवसाम्यहम् सौवर्णेरजतेतांम्रेकांस्यमायसमेवच ५५ एवंसुदर्शनचक्र

कार्यीनाविचक्षणः उपवीतादिवद्धार्याः शंखचक्रगदाःसदा ५६ ब्राह्मणैश्चाविशेषेणवैष्णवैश्चविशेषतः उप-
वीताशिखायद्वच्चक्रलांछनसंयुतम् ५७ चक्रलांछनहीनस्यविप्रस्यविफलंभवेत् ममचक्रांकितंदेहंपवित्रइति
वैश्रुतिः ५८ चक्रांकितायदातव्यंहव्यंकव्यंविचक्षणैः ममचक्रांककवचमभेद्यंदेवदानवैः ५९ अजेयः
सर्वभूतानांशत्रूणांरक्षसामपि ममचक्रांककवचंशरीरेयस्यतिष्ठति ६० नाशुभंविद्यतेतस्यगृहपुत्रादिकस्यहि
दक्षिणेचभुजेविप्रोविभृयाद्वैसुदर्शनम् ६१ सव्येचशंखंबिभृयादितिवेदविदोविदुः तत्तन्मंत्रेणमंत्रज्ञःप्रति
ष्ठाप्यपृथक्पृथक् ६२ ललाटेचगदाधार्यामूर्ध्निचापंशरस्तथा नंदकंचैवहृन्मध्येशंखचक्रेभुजद्वयम् ६३ त-
स्मात्सर्वप्रयत्नेनचक्रादीन्धारयेत्सदा धारणानंतरंब्रूयात्तत्रचैवंद्विजोत्तम ६४ पुत्रमित्रकलत्रादियःकश्चिन्
मत्परिग्रहः सहदेहेनसर्वोसौविप्रप्रीत्यैतथार्पितः ६५ पश्चात्स्वधर्ममास्थाययातिष्ठेदाजीवनंमम भक्त्याचाव्य
भिचारिण्यासर्वदाक्षममनोरथः ६६ शंखचक्रांकितंदृष्ट्वायेनिंदंतिनराधमाः अवलोक्यमुखंतेषामादित्यमवलोकये
त् ६७ इतिश्रीस्कंदपुराणेमार्गशीर्षमाहात्म्येतृतीयोऽध्यायः ३ ५ ब्रह्मोवाच तवचक्रांकितंदृष्ट्वा
स्यात्मानमथदीक्षितः पद्माक्षतुलसीमालाफलंप्रब्रूहिकेशव १ श्रीभगवानुवाच तुलसीकाष्ठसंभूतांयोमा-
लांवहतेद्विजः अप्यशौचोप्यनाचारोमामेवैतिनसंशयः २ धात्रीफलकृतामालातुलसीकाष्ठसंभवा दृश्यतेयस्य
हेतुसवैभागवतोनरः ३ तुलसीदलजांमालांकंठस्थांवहतेतुयः पत्रेपत्रेश्वमेधानांदशानांलभतेफलम् ४
तुलसीकाष्ठसंभूतांयोमालांवहतेनरः फलंयच्छाम्यहंवत्सप्रत्यहंद्वारकोद्भवम् ५ निवेद्यभक्त्यामांमालांतु
लसीकाष्ठसंभवाम् वहतेयोनरोभक्त्यातस्यनास्तीतिपातकम् ६ सदाप्रीतमनास्तस्यअहंप्राणवरोहिसः तु
लसीकाष्ठसंभूतंशिरसःकाष्ठभूषणम् ७ बाह्वोःकरेचमर्त्यस्यदेहेयस्यसमोप्रियः तुलसीकाष्ठमालाभिर्भू-

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

षितःपुण्यमाचरेत् ८ पितॄणांदेवतानांचपुण्यंकोटिगुणंभवेत् तुलसीकाष्ठमालांतुप्रेतराजस्यदूतकाः ९
दृष्ट्वानश्यंतिदूरेणवातोद्धूतंयथादलम् यद्गृहेतुलसीकाष्ठपत्रंशुष्कमथार्द्रकम् १० तद्गृहेतुभवेन्नैवपापंवै·
संगतेकलौ तुलसीकाष्ठमालाभिर्भूषितोभ्रमतेभुवि ११ दुःस्वप्नंदुर्निमित्तंचनभयंशस्त्रजंक्वचित् धारयंति
नयेमालांकौतुकात्पापबुद्धयः १२ नरकान्ननिवर्तंतेदग्धाःकोपाग्निनामम तस्माद्धार्याप्रयत्नेनमालातुलसि-
संभवा १३ पद्माक्षनिर्मिताभक्त्याफलैर्धात्र्याःसुपुण्यदा तदूर्ध्वपुंड्रशाखाद्यैर्युक्तस्तुलसिभूषणैः १४ सं
ध्योपास्त्यादिककुर्यात्कुशपाणिर्हिमांस्मरन् कृतसंध्यादिकोभक्तस्ततःसंपूजयेच्चमाम् १५ गुरुश्चेत्तत्रवर्ते
तच्चादौगत्वानमेद्गुरुम् किंचिद्दत्वोपायनंचदंडवत्प्रणमेन्मुदा १६ आचम्यैकाग्रमनसापूजामंडपमाविशेत् उ·
पविश्यासनेरम्येकृष्णाजिनकुशोत्तरे १७ सम्यक्पद्मासनासीनोभूतशुद्धिंसमाचरेत् प्राणायामत्रयंकृत्वा
मंत्रेणचजितेंद्रियः १८ उदङ्मुखस्ततःकृत्वाहृत्पंकजमनुत्तमम् विकाशंतस्यकुर्वीतविज्ञानरविणाबुधः
१९ तत्कर्णिकायांवह्न्यर्कशशिबिंबान्यनुक्रमात् त्रयंत्रयात्मकंसर्वंचिंतयेद्वैष्णवोनरः २० नानारत्नमयंपीठंतेषा
मुपरिविन्यसेत् तस्मिन्मृदुश्लक्ष्णतरंबालार्कसदृशद्युतिम् २१ अष्टैश्वर्यदलपद्मेशंखचक्रगदाधरम् पद्म
पत्रविशालाक्षंसर्वलक्षणलक्षितम् २२ श्रीवत्सकौस्तुभोरस्कंपीतवस्त्रान्वितंचमाम् विचित्राभरणैर्युक्तंदिव्य·
मंडनमंडितम् २३ दिव्यचंदनलिप्तांगंदिव्यपुष्पोपशोभितम् कोटिबालार्कसदृशंकांतंदिव्यश्रियासह २४
सर्वलक्षणलक्षिण्यासमाश्लिष्टतनुंशिवम् एवंध्यात्वाजपेन्मंत्रंसमाहितमनाःशुचिः २५ सहस्रंशतवारंवाय·
थाशक्तिजपेन्मनुम् मनसैवार्चनंकृत्वाततोविधिवदाचरेत् २६ संप्रदायानुरोधेनशंखंस्थाप्यममाग्रतः दूर्वांकु
रैश्चपुष्पैश्चगंधोदेनचपूरितम् २७ दक्षिणेगंधपुष्पाणांपात्रंस्थाप्यंचदैशिकैः वामभागेन्यसेत्कुंभंवस्त्रपूतंसु

वासितम् २८ पुरतोममघंटांचदिक्षदीपान्नियोजयेत् अन्यत्सर्वसाधनंचयथास्थानेचविन्यसेत् २९ अर्घ्य
पाद्याचमनीयमधुपर्कस्यकारणात् विन्यसेत्पुरतोमह्यंचत्वारिपात्रकाणिवै ३० सिद्धार्थाक्षतपुष्पाणिकुशाग्रं
तिलचंदनम् फलंयवाश्चतुर्वल्कअर्घ्यपात्रेविनिक्षिपेत् ३१ दूर्वाविष्णुपर्णीश्यामापद्मंचैवचतुर्मुख् पाद्य
पात्रेन्यसेत्सुत्रदेशिकोममतुष्टये ३२ कंकोलंचलवंगंचफलंमालतिसंभवम् कुर्याद्वैश्रद्धयाश्चेयान्पात्रेआचा
मनीयके ३३ गव्यंपयोदधिमधुघृतंखंडसमन्वितम् मधुपर्कस्यपात्रेवैदद्याद्वैश्रद्धयार्चकः ३४ उक्तानांद्रव्य
जातीनामलाभेपत्रपुष्पयोः नतद्भावनयाकुर्यात्सर्वदाविधिकोविदैः ३५ करन्यासंततःकुर्यादंगन्यासंतथैवच
पंचांगंवाषडंगंवाविन्यसेत्संप्रदायतः ३६ ममानुस्मरणकार्यमात्मानमनिशंस्मरेत् पूजारंभेचतुर्वल्कमंगलंतु
पठेन्नरः ३७ अथसंपूजयेच्छंखंपांचजन्यंममाप्रियम् यस्यसंपूजनाद्वत्सआनंदःपरमोमम ३८ शंखस्य
पूजनेवत्समंत्रानेतानुदीरयेत् त्वंपुरासागरोत्पन्नोविष्णुनाविधृतःकरे ३९ निर्मितःसर्वदेवैश्चपांचजन्यनमो
स्तुते तवनादेनजीमूताविनसंतिसुरासुराः ४० शशांकायुतदीप्ताभपांचजन्यनमोस्तुते गर्भादेवारिनारीणां
विलीयंतेसहस्रधा ४१ तवनादेनपातालेपांचजन्यनमोस्तुते दर्शनेनैवशंखस्यकिंपुनःस्पर्शनेकृतम् ४२
विलयंयांतिपापानिहिमवद्भास्करोदये नत्वाशंखंकरेधृत्वामंत्रैरभिस्तुवैष्णवः ४३ यःस्नापयतिमांभ-
क्त्यातस्यपुण्यमनंतकम् सुवासितेनतैलेनकुर्यादभ्यंजनंततः ४४ कस्तूर्याचंदनेनैवकुर्यादुद्वर्तनादिकम्
सुगंधादिसितैस्तोयैःस्नाप्यमंत्रयुतैःशुभैः ४५ अर्घ्यंदत्वाततोमंत्रपाद्यमाचमनीयकम् मधुपर्कंततोद-
द्यात्पायसापूपमिश्रितम् ४६ सकर्पूरंतांबूलंचभक्त्याचैवनिवेदयेत् सुरभीणिचपुष्पाणिभक्त्यासम्यङ्नि
वेदयेत् ४७ धूपंदशांगमष्टांगंदीपंचैकमनोहरम् परिणीयप्रणम्याथस्तुत्वास्तुतिभिरादरात् ४८ शाययि-

६

त्वातुपर्यंकेमंगलार्घ्यंनिवेदयेत् ४९ इतिश्रीस्कंदपुराणेमार्गशीर्षमाहात्म्येचतुर्थोध्यायः ४
ब्रह्मोवाच पंचामृतस्यस्नपनाद्यत्फलंलभतेहरेः शंखोदकेनयत्किंचित्तन्मेब्रूह्यजिताच्युत १ श्रीभगवानु
वाच क्षीरस्नानंमकुर्वंतियेनराममूर्द्धनि शताश्वमेधजंपुण्यंबिंदुनाबिंदुनासमम् २ क्षीराद्दशगुणंपुण्यं
घृतेनैवदशोत्तरम् गंधपुष्पोदकंमंत्रंसर्वोत्कृष्टंप्रशस्यते ३ द्वादश्यांपंचदश्यांवागव्येनपयसासमम्
स्नापनेदेवशार्दूलमहापातकनाशनम् ४ दध्यादीनांविकाराणांक्षीरतःसंभवोयथा तथैवाशेषकामानां
क्षीरेणस्नपतोमम ५ क्षीरस्नानेनसौभाग्यंदध्नामिष्टान्नभोजनम् घृतेनस्नापयेद्योमांनरोममपुरंव्रजेत्
६ स्नानंशर्करयायस्तुकारयेन्मार्गशीर्षके सराजाजायतेलोकेपुरःस्वर्गादिहागतः ७ गजाश्वरथसंपूर्णंस
राज्यंलभतेभुवि कारयेन्मार्गशीर्षेवैयःक्षीरस्नापनंमम ८ स्वर्गलोकंसजयतिसेंद्ररुद्रेंद्रमारुतान् क्षीर-
णपरस्यैष्टमार्गशीर्षेचपुत्रक ९ क्षीरस्नपनमाहात्म्यंवर्चस्वंपुष्टिवर्धनम् दौर्भाग्यंविलयंयातिक्षीरस्नाने
सुकृत १० स्नापयेन्मार्गशीर्षेमांयोवैपंचामृतेनतु सनशोच्योभवेज्जंतुर्वसूनांभुविमानव ११ कपिलाक्षीरमा
दाययःस्नापयतिमांसुकृत कपिलाशतमानस्यफलंप्राप्नोतिमानवः १२ शंखतीर्थोदकंकृत्वायःस्नापयति
देशिकः बिंदुनापिसहोमासेस्वकुलंतारयेद्धिसः १३ कापिलंक्षीरमादायशंखंकृत्वाचमानद यःस्नापय-
तेमांभक्त्यासर्वतीर्थफलंलभेत् १४ शंखाष्टकेनयःस्नानंकारयेन्मार्गशीर्षके भक्त्याभागवतःश्रेष्ठोम
मलोकेमहीयते १५ शंखषोडशकेनाथयःस्नापयतिमेसुकृत सपापमुक्तःसुचिरंस्वर्गलोकेमहीयते १६
चतुर्विंशतिसंख्याकैःशंखैर्यःस्नापयेच्चमाम् इंद्रलोकेचिरंस्थित्वासराजाभुविजायते १७ शंखाष्टोत्तरशते
नैवस्नापयेन्मार्गशीर्षके शंखेशंखेसुवर्णस्यफलंप्राप्नोतिमानवः १८ मार्गशीर्षेभक्तिमान्यःशंखपद्मशते

र्हिमाम् स्नापयेत्पितरस्तस्यस्वर्गेतावत्प्रतिष्ठिताः १९ अष्टोत्तरसहस्रंतुशंखस्नानंतुयश्चरेत् सगणोमुक्तिमा
प्नोतियावदाभूतसंप्लवम् २० नित्यंसंस्नापयेद्योमांशंखेनसुरसत्तम गंगास्नानफलंप्राप्यनित्यंनंदतिदेववत्
२१ शंखेतोयंसमादाययःस्नापयतिमांसुत नमोनारायणेत्युक्त्वामुच्यतेसर्वकिल्बिषैः २२ कृत्वापादो
दकंशंखेवैष्णवानांमहात्मनाम् योददातितिलोन्मिश्रंचांद्रायणफलंलभेत् २३ नाद्यंतडागजंवापिवापी-
कूपादिकंचयत् गांगेयंजायतेसर्वंजलंशंखकृतंचयत् २४ गृहीत्वाममपादांबुशंखेकृत्वातुवैष्णवः योवहे-
च्छिरसानित्यंसमुनिस्तपतांवरः २५ त्रैलोक्येयानितीर्थानिममचैवाज्ञयासुत शंखेतानिवसंतीहतस्माच्छं
खोवरःस्मृतः २६ त्वंपुरासागरोत्पन्नःपादयोर्मेनवःस्मृताः सांबुशंखंकरेधृत्वामंत्रैरेतैस्तुवैष्णवः २७ यःस्ना
पयतिमांशीर्षेतुष्टस्तस्यभवाम्यहम् तेषामुच्चारपूर्वंतुस्नापयेन्मामतंद्रितः २८ तस्यपुण्यस्यसंख्यांवैकर्तुंनैव
सुरासुराः पुरतोममदेवेशसपुष्पःसजलाक्षतः २९ शंखस्त्वभ्यर्चितस्तिष्ठेत्तस्यश्रीःसर्वतोमुखी विलेपनेन
संपूर्णंशंखंकृत्वातुमांभजेत् ३० तदामेपरमाप्रीतिर्भवेद्वैतस्यवार्षिकी शंखंकृत्वातुपानीयंसपुष्पंसजला
क्षतम् ३१ अर्घ्यंददातियोमांवैतस्यपुण्यमनंतकम् अर्घ्यंकृत्वास्वयंशंखेयःकरोतिप्रदक्षिणाम् ३२ प्र-
दक्षिणीकृतातेनसप्तद्वीपावसुंधरा भ्रामयित्वाचमेमूर्ध्निमंदिरेशंखवारिणा ३३ प्रोक्षयेद्वैष्णवोयस्तुना
शुभंतद्गृहेभवेत् निदाघोनक्लमस्तस्यनारकंनभयंक्वचित् ३४ यस्यपादोदकंशंखकृतंमूर्धानमालभेत् ग्रह-
रक्षांसिकूष्मांडाःपिशाचोरगदानवाः ३५ दृष्ट्वाशंखोदकंमूर्ध्निविद्रवंतिदिशोदश वादित्रनिनदैरुच्चैर्गीतवादि-
त्रनिःस्वनैः यःस्नापयतिमांभक्त्याजीवन्मुक्तोभवेद्धिसः ३६ इतिश्रीस्कंदपुराणेमार्गशीर्षमाहात्म्येपंच-
मोऽध्यायः ५ ७ ब्रह्मोवाच घंटानादस्यमाहात्म्यंचंदनस्यतथासुत यत्फलंलभतेस्वामिंस्तत्स-

वंब्रूहितत्वतः १ श्रीभगवानुवाच स्नानार्चनक्रियाकालेघंटानादंकरोतियः पुरतोममदेवेशतस्यपुण्यफ
लंशृणु २ वर्षकोटिसहस्राणिवर्षकोटिशतानिच वसतेमामकेलोकेऽप्सरोगणसेवितः ३ सर्ववाद्यमयीघंटा
सर्वदेवमयीयतः तस्मात्सर्वप्रयत्नेनघंटानादंतुकारयेत् ४ सर्ववाद्यमयीघंटासर्वदाममवल्लभा वादनाल्ल
भतेपुण्यंयज्ञकोटिशतोद्भवम् ५ घंटानादःसदाकार्यःपूजाकालेविशेषतः मन्वंतरसहस्राणिमन्वंतरशतानिच
६ प्रीतोभवामिसततंघंटानादेनपुत्रक भेरीशंखनिनादेनघंटानादान्वितेनच ७ मृदंगशंखवेणुयुतपणवेनस
मन्वितम् अर्चनंममदेवेशसततंमोक्षदंनृणाम् ८ यत्रतिष्ठतिपुरतोघंटानादान्वितामम अर्चितावैष्णवैर्यत्रत
त्समांविद्धिपुत्रक ९ वैनतेयांकिताघंटासुदर्शनयुताथवा ममाग्रेस्थापयेद्यस्तुतस्यपापंहराम्यहम् १० मदी
यार्चनवेलायांघंटानादंकरोतियः नश्यंतितस्यपापानिशतजन्मार्जितान्यपि ११ स्नापकालेप्रकुर्वीतघंटानादंस्व
भक्तितः ममैवार्चनवेलायांफलंकोटिगुणोद्भवम् १२ येमामर्चंतिदेवेशंसुपर्णोपरिसंस्थितम् शंखचक्रगदा
युक्तंसचक्रंचश्रियायुतम् १३ किंकरिष्यंतितेतीर्थैर्देवतानांचदर्शनैः किंयज्ञैःकिंव्रतैर्वापिकिंदानैःकिमुपोषणैः
१४ मूर्तिर्नारायणीयत्रमामकीगरुडोपरि स्थापयित्वाकुलोयांतिकल्पकोटिपदंमम १५ ममाग्रेस्थापयेद्यस्तु
प्रासादेऽथगृहेथवा तीर्थकोटिसहस्राणितत्रतिष्ठंतिदेवताः १६ यस्तुपूजयतेधन्योगरुडोपरिसंस्थितम्
एकादश्यांतथारात्रौवासनासंयुतोमम १७ कृत्वागीतंचनृत्यंचतारयेन्नरकात्पितॄन् पुनश्चकथयिष्यामिशृ
णुघंटामहत्सुत १८ ममनामांकिताघंटापुरतोयाचतिष्ठति अर्चितावैष्णवैर्यत्रतत्समांविद्धिपुत्रक १९ यत्रवाद्
यतेघंटावैनतेयविचिन्हिता धूपेनीराजनेस्नानेपूजाकालेविलेपने २० ममाग्रेप्रत्यहंवत्सप्रत्येकंलभतेफलम्
मखायुतंगोयुतंचचांद्रायणशतोद्भवम् २१ विधिवाह्याकृतापूजासफलाजायतेनृणाम् घंटानादेनतुष्टोहमथ

च्छामिस्वकंपदम् २२ नागारिचिन्हितांघंटारथांगेनसमन्विता वादनात्कुरुतेनाशंजन्मकोटिभयस्यवै २३
गरुडेनांकितांघंटांदृष्ट्वाहंमर्त्यहंमुदा प्रीतिंकरोमिदेवेशोलक्ष्मीप्राप्ययथाऽधनः २४ घंटादंडस्यशिरसिसच
क्रंस्थापयेत्तुयः मत्प्रियंवैनतेयंवास्थापितंभुवनत्रयम् २५ घंटानादंसचक्रंचअंतकालेशृणोतियः पाप ।
तस्यापिनश्यतिसमकिंकराः २६ सर्वदोषाःप्रणश्यंतिघंटानादेनवैसुत देवतानांसरुद्राणांपितॄणामुत्सवोभ
वेत् २७ अभावेवैनतेयस्यचक्रस्यापिनसंशयः घंटानादेनभक्तानांप्रसादंप्रकरोम्यहम् २८ गृहेयस्मिन्प्रभ·
वेन्नित्यंघंटानागारिसंयुता सर्पाणांनभयंतत्रनाग्निविद्युत्समुद्भवम् २९ यस्यघंटागृहेनास्तिशंखोनपुरतोमम
कथंभागवतोज्ञेयः कथंभवतिवल्लभः ३० चंदनस्यप्रवक्ष्यामिमाहात्म्यंतवपुत्रक यस्मिन्कृतेभवेत्प्रीतिर्म·
मात्यंतंनसंशयः ३१ सचंदनंसकुंकुमंकर्पूरागरुमिश्रितम् मृगनाभिसमायुक्तंजातीफलसमन्वितम् ३२
तुलसीचंदनोपेतंममात्यंतंसुखावहम् योददातिहिमांनित्यंतुलसीकाष्ठसंभवम् ३३ युगानिवसतेस्वर्गेह्य
नंतानिनरोत्तम महाविष्णोःकलौभक्त्यादत्वातुलसिचंदनम् ३४ योर्चयेन्मालतीपुष्पैर्नभूयस्तनपोभवेत्
तुलसीकाष्ठसंभूतंचंदनंयच्छतेमम ३५ दहामिपातकंसर्वंपूर्वजन्मशतैःकृतम् सर्वेषामेवदेवानांतुलसी·
काष्ठचंदनम् ३६ पितॄणांचविशेषेणसदाभीष्टंयथामम श्रीखंडंचंदनंतावत्श्रेष्ठंकृष्णागरुतथा ३७ या
वन्नदृश्यतेपुण्यंतुलसीकाष्ठचंदनम् तावत्कस्तूरिकामोदःकर्पूरस्यसुगंधिनः ३८ कलौयच्छंतियेमर्त्यातु·
लसीकाष्ठचंदनम् मार्गशीर्षेशुभेमासेतेकृतार्थानसंशयः ३९ योहिभागवतोभूत्वाकलौतुलसिचंदनम् ना·
र्पयेद्वैसहोमासेनासौभागवतोनरः ४० कुंकुमागरुश्रीखंडकर्दमैर्ममविग्रहम् आलिंपेद्वैसहोमासेकल्प·
कोटिवसेद्दिवि ४१ कर्पूरागरुमिश्रेणचंदनेनानुलिंपयेत् मृगदर्पविशेषेणअभीष्टंचसदामम ४२ विलेपयति

मांवैशंखेकृत्वातुचंदनम् मार्गशीर्षेतदाप्रीतिंकरोतिशतवार्षिकीम् ४३ तुलसीदलेनवामर्त्यंलक्षेणसमुत्पन्ने मार्गशीर्षेसदाभक्त्यासलभेद्वांछितंफलम् ४४ इतिश्रीस्कंदपुराणेमार्गशीर्षमाहात्म्येषष्ठोऽध्यायः ६ ५

ब्रह्मोवाच माहात्म्यंवददेवेशपुष्पजातिसमुद्भवम् येनयेनचपुष्पेणयत्फलंलभतेनरः १ श्रीभगवानुवाच शृणुपुत्रप्रवक्ष्यामिमाहात्म्यंपुष्पसंभवम् येनपुष्पेणमेप्रीतिर्भवेत्सम्यङ्नसंशयः २ मल्लिकालतीचैवयूथिकाचातिमुक्तका पाटलाकरवीरंचजयंतीविजयातथा ३ कुब्जकस्तबकश्चैवकर्णिकारंकुरंटकः चंपकश्चातकःकुंदोबाणकर्चूरमल्लिका ४ अशोकस्तिलकश्चैवतथैवापूरयूथिकः शमीपुष्पमकाशस्तुशस्तोमेपूजनेस्मृत ५ केतकीपत्रपुष्पंचभृंगराजस्तथैवच तुलसीपत्रपुष्पंचसद्यःप्रीतिकरंमम ६ पद्मान्यब्जसमुत्थानिरक्तनीलोत्पलेतथा सितोत्पलंसहस्रोमासेममात्यंतंहिवल्लभम् ७ तान्येवचप्रशस्तानिकुसुमानिचमेस्मृत यानिस्युर्वर्णयुक्तानिरसगंधयुतानिच ८ निर्गंधान्यपिशस्तानिकुसुमानिमतानिमे स्करभीणिनयान्यानिवर्जयित्वालुकेतकीम् ९ बाणंचचंपकाशोकौकरवीरंचयूथिका पारिभद्रंपाटलाचबकुलंगिरिशालिच १० बिल्वपत्रंशमीपत्रपत्रंभृंगरजस्यच तमालामलकीपत्रंशस्तंमेपूजनेस्मृत ११ पुष्पैररण्यसंभूतैःपत्रैर्वागिरिसंभवैः अपर्युषितनिश्छिद्रैःप्रोक्षितैर्जंतुवर्जितैः १२ अथारामोद्भवैर्वापिपुष्पैःसंपूजयेच्चमाम् पुष्पजातिविशेषेणभवेत्पुण्यंविशेषतः १३ तपःशीलगुणोपेतपात्रेवेदस्यपारगे दशदत्वासुवर्णानियत्फलंलभतेनरः १४ तत्फलंलभतेमर्त्यःसहस्रकुसुमदानतः द्रोणपुष्पे तथैकस्मिन्मह्यंचाविनिवेदिते १५ दशदत्वासुवर्णानिफलंतदधिकंस्मृत पुष्पात्पुष्पांतरेभेदोयथासीत्तन्निबोधमे १६ द्रोणपुष्पसहस्रेभ्यःखादिरंतुविशिष्यते खादिरात्पुष्पसाहस्राद्बकपुष्पंविशिष्यते १७ शमीपुष्पसहस्रेभ्योबिल्वपुष्पंविशिष्यते बिल्वपुष्पसहस्रेभ्योबकपुष्पंवि-

शिष्यते १८ बकपुष्पसहस्रेभ्योनंद्यावर्तंविशिष्यते नंद्यावर्तसहस्राद्धिकरवीरंविशिष्यते १९ करवीरसहस्रस्य
कुसुमंश्वेतमुत्तमम् करवीरंश्वेतपुष्पात् पलाशंश्वेतमुत्तमम् २० मालतीपुष्पसाहस्रात्संध्यापुष्पंविशिष्यते
पलाशस्यसहस्राणिमालतीपुष्पमुत्तमम् २१ मालतीपुष्पसाहस्रात्त्रिसंध्याश्वेतमुत्तमम् त्रिसंध्याश्वेतसा
हस्राज्जातिपुष्पंविशिष्यते २२ त्रिसंध्यारक्तसाहस्रात्त्रिसंध्याश्वेतमुत्तमम् सर्वासांपुष्पजातीनांजातीपुष्पमि
होत्तमम् २३ जातीपुष्पसहस्रेणयच्छेन्मालांसुशोभनाम् मह्यंयोविधिवद्द्यात्तस्यपुण्यफलंशृणु २४ क-
ल्पकोटिसहस्राणिकल्पकोटिशतानिच मत्पुरेवसतेनित्यंममतुल्यपराक्रमः २५ येषांसंतिचपुष्पाणिप्रश-
स्तानिममार्चने तेषांपत्राणिशस्तानितदभावेफलानिच २६ एतैःपत्रैश्चपुष्पैश्चफलैश्चापितथाहिमाम् अर्च-
न्दशसुवर्णस्यप्रत्येकंफलमाप्नुयात् २७ एताभिःपुष्पजातीभिःसहोमासेर्चयंतिच भक्तिंददामितेषांवैतुष्टः
सन्नात्रसंशयः २८ धनंपुत्रांस्तथादारान्यत्किंचिद्वांछितंहिसः नतद्ददामिविप्रेंद्रपुष्पैरेभिःप्रतोषितः २९
इतिश्रीस्कंदपुराणेमार्गशीर्षमाहात्म्येसप्तमोऽध्यायः ७ ॥ ब्रह्मोवाच श्रीमत्तुलसिमाहात्म्यंय-
थावद्वर्णयतेप्रभो यस्याःसन्निधिमात्रेणप्रीतिर्भवतिमेधिका १ श्रीभगवानुवाच मणिकांचनपुष्पाणित-
थामुक्तामयानिच तुलसीपत्रदानस्यकलांनार्हंतिषोडशीम् २ तुलसीमंजरीभिर्यःकुर्याद्धिममपूजनम् नसग-
र्भगृहान्यथायान्मुक्तिभागीभवेन्नरः ३ आरोप्यतुलसींवत्सपूजयेत्तद्दलैश्चमाम् दिविसंमोदमानास्तेश्वेतद्वीपे
चमेगृहे ४ श्रीमत्तुलस्यार्चयनेसकृद्विमांपत्रैःसुगंधैर्विमलैरखंडितैः यत्तस्यपापंघटसंस्थितंनदानिरीक्षयेद्वा
परिमार्जयेद्यमः ५ तुलसीनयेषांममपूजनार्थंसंपादितैकादशपुण्यवासरे धिग्यौवनंजीवितमर्थसंततिस्तेषां-
सुखंनेहचदृश्यतेपरम् ६ लिंगमभ्यर्चितंदृष्ट्वासहोमासेचमामकम् तुलसीपत्रनिकरैर्मुच्यतेब्रह्महत्यया ७

नित्यमभ्यर्चयेद्योवैतुलस्यापरमेश्वरम् महापापानिनश्यंतिकिंपुनश्चोपपातकम् ८ वर्ज्यंपर्युषितंपुष्पंवर्ज्यंपर्युषितंजलम् नवर्ज्यंतुलसीपत्रंनवर्ज्यंजाह्नवीजलम् ९ तावद्गर्जंतिपुण्यानिमहांतिनिनरोत्तम यावन्नप्राप्यतेपुण्यातुलसीममवल्लभा १० सकृदभ्यर्चयेद्योमांबिल्वपत्रेणमानवः मुक्तिभागीनिरातंकोममपार्श्वगतोभवेत् ११ बिल्वपत्राच्छमीपत्राज्जातिपुष्पात्सरोरुहात् वल्लभंतुलसीपत्रंकौस्तुभादधिकंमम १२ अभिन्नपत्रातुलसीहृद्यामंजरिसंयुता क्षीरोदार्णवसंभूतापद्मानेयसदामम १३ अकृष्णाप्यथवाकृष्णातुलसीममवल्लभा सितावाप्यसितावापिद्वादशीममवल्लभा १४ गृहीत्वातुलसीपत्रंभक्त्यायोमांसमर्चयेत् अर्चितंतेनसकलंसदेवासुरमानुषम् १५ तावद्गर्जंतिरत्नानिकौस्तुभादीन्यनंतशः यावन्नप्राप्यतेकृष्णतुलसीकृष्णमंजरी १६ कृष्णांकृष्णातुलस्याहियोभक्त्यापूजयेन्नरः सयातिभुवनंशुभ्रंयत्रविष्णुःश्रियासह १७ ममार्चनार्थंभिक्षूणांयच्छंतितुलसीदलम् अन्येषामपिभक्तानांयांतितेपदमव्ययम् १८ तुलसीकृष्णगौरायातयायोमांसमर्चयेत् नरोयातितनुंत्यक्त्वावैष्णवींशाश्वतींगतिम् १९ ब्रह्मोवाच धूपदानस्यमाहात्म्यंदीपस्यापिचकेशव यत्फलंलभतेमर्त्यस्तन्मेब्रूहियथार्थतः २० श्रीभगवानुवाच शृणुपुत्रप्रवक्ष्यामिधूपदानस्यसत्फलम् दीपदानस्यमाहात्म्यंममप्रीतिकरंपरम् २१ अगरुंचसकर्पूरंदिव्यचंदनसौरभम् दत्वामांवैसहोमासेकुलानांतारयेच्छतम् २२ कृष्णागरुसमुत्थेनधूपेनचममालयम् धूपयेद्वैष्णवोयस्तुसमुक्तोनरकार्णवात् २३ माहिषगुग्गुलंयस्तुआज्ययुक्तंसशर्करम् धूपंददातियोवैमांतस्येच्छांप्रददाम्यहम् २४ गुग्गुलोहंत्यशेषाणिअरिष्टाणिचधूपितः कामान्नानाविधांश्चैवअगरुःसंप्रयच्छति २५ देहंगेहंपुनात्येवधूपस्त्वगरुसंभवः नाशयेद्यक्षरक्षांसिधूपःसर्वरसोद्भवः २६ धूपंदशांगंयदिचेत्करोतिमासेसहेमेऽतिवल्लभेच ददातिकामानतिदुर्लभानपिबलं

वपुष्टिंसुतदानभक्तिम् २७ मुस्ताधूपोमानुषाणांप्रियत्वंमांगल्यकंवश्यकरंगुडस्यवै कुर्यात्सहोमासिममाग्रतो
योविहायपापानिममांशमाप्नुयात् २८ नभयंविद्यतेतस्यादिव्यंभौमांतरिक्षजम् ममधूपावशेषेणयस्यांगंपरिमा-
र्जितम् २९ नचापद्विद्यतेतस्यभवंतिसंपदोखिलाः धूपेकृतेसहोमासेममाग्रेश्रद्धयान्वितः ३० धूपःसरूपतांध
त्तेधूपःपावनमुत्तमम् वनस्पतिरसोदिव्यःपरमःपावनःशुचिः ३१ अतःपरंप्रवक्ष्यामिदीपमाहात्म्यमुत्तमम्
यस्मिन्कृतेनरोयातिवैकुंठनात्रसंशयः ३२ बहुवर्तिसमायुक्तघृतपूरसमन्वितम् कुर्यादारार्तिकंयोवैक-
ल्पकोटिदिवंवसेत् ३३ नीराजनंतुयःपश्येत्सहोमासेममाग्रतः आरार्तिकंद्विजश्रेष्ठप्रविशेन्मामनंतकम् ३४
मंत्रहीनंक्रियाहीनंयत्कृतंपूजनंमम सर्वंसंपूर्णतामेतिकृतेनीराजनेसुत ३५ यःकरोतिसहोमासेकर्पूरेण
चदीपकम् अश्वमेधमवाप्नोतिकुलंचैवसमुद्धरेत् ३६ ममाग्रेवैद्विजानांचदीपंदद्याच्चतुष्पथे मेधावीज्ञानसं
पन्नश्चक्षुष्मान्जायतेनरः ३७ घृतेनवाथतैलेनदीपंयोज्वालयेन्नरः सहोमासेममाग्रेचतस्यपुण्यफलंशृणु
३८ विहायसकलंपापसहस्रादित्यसन्निभः ज्योतिष्मताविमानेनममलोकेमहीयते ३९ तस्मात्सर्वप्रयत्नेनदी
पंदद्याद्विचक्षणः तंचदत्वानिहिंसेद्यःसपतेन्नरकेध्रुवम् ४० दीपंयोवैहरेत्सापीलोभाद्द्वेषाद्विजोत्तम तद्दीपह
रणात्सोपिमूकोंधश्चप्रजायते ४१ इतिश्रीस्कंदपुराणेमार्गशीर्षमासमाहात्म्येविष्णुब्रह्मसंवादेअष्टमो
ऽध्यायः ८ ६९ ब्रह्मोवाच नैवेद्यस्यविधिंब्रूहिदेवमेतत्वतःप्रभो अन्नंकतिविधंचेष्टंव्यंजनादीन्यशे-
षतः १ श्रीभगवानुवाच साधुपृष्टंत्वयावत्सममप्रीतिकरंपरम् वक्ष्यामितेऽन्नपानादिव्यंजनादीन्यशेषतः
२ आदौहिरण्मयंपात्रंतदभावेचराजतम् तदभावेचपालाशंविस्तीर्णंबहुसुंदरम् ३ कचोलाःशतशःकार्याः
पात्रेवैपरितोनघ तन्मध्येव्यंजनादेयानानाफलमयाःशुभाः ४ पायसंचंद्रसंकाशंपात्रेवैशर्करायुतम् भक्त-

---

१ दीपखंडनंकुर्यात्.

कुमुदसंकाशांमुद्गान्काचप्रभाम्स्तुमान् ५ नानाव्यंजनसंरुद्धांत्रिभिःपंक्तिभिरेवच निंबूरसेणचार्द्रेणफलमूलयुतेनच
६ वैकृताश्चतदाकार्याःशतशोभोजनेमम द्राक्षास्तुमिश्रिताश्चूतकरमर्दकृताःशुभाः ७ मरीचंपिप्पलीसार्द्रकेलाचार्द्र
कसंयुताः क्वथिकावटिकाःकार्याःशतशोभोजनेमम ८ गलेह्नास्तथाकार्याःकचोलशतसंकुलाः नानाकुसुमसमोद्युक्ताः
सहसिमोप्रियाः ९ मंडकावर्तुलारम्याःसमाःसर्वत्रबिंदुवत् सितयासहितेनाथदुग्धेनक्वथितेनच १० मधुवर्णेन
गव्येनयुक्तेनास्मिन्सुभोजने कचोलसुप्रभेवत्सास्थितंकांचनसप्रभम् ११ घृतसुवासितंप्रीत्यादेयंहिममभोजने तत्र
ाधूमप्रमाणेनचंद्रकेणहिचोज्ज्वलम् १२ सोबाल्हिकाःपूरिकासुशतच्छिद्राःसुवेष्टिताः पूरिकाश्चतथाक्षीरप्रकारास्त्त
प्रकारयेत् १३ मणयःसूत्रसंज्ञाश्चमालतीकुसुमादयः पर्पटाबर्बरास्म्यामाषकूष्मांडसंभवाः १४ वटकानवधारम्याःकुर्यान्मासे
सहेमम द्विधाजातीमरीचैश्चपूरिकार्द्रेणवैसुभाः १५ युक्तेनलवणेनातिसुन्दतैलेनपूरिताः कुंकुमाभाः
स्नेहहीनाःस क्षताइवदुर्जनाः १६ दधिदुग्धयुताःकेचिच्चिंचणीचूतसंभवाः द्राक्षारसयुताःकेचित्तथान्येक्वथिकायुताः
१७ राजिकाजलमध्यस्थातथान्येसितयासह रसैश्चतुर्विधैश्चान्यैर्वटकानवधामताः १८ वज्रप्रभातुकणिका
चारुबीजसुपाचकैः शकलैर्नारिकेलस्यलवंगशतसंयुताः १९ घृतक्षीरसिताद्यास्ताःकटाहेसुप्रलोडिताः लब्धा
सितादिसुसररम्यास्निग्धाश्चफेनिकाः २० पराकिकासुवेपक्वाःकृताश्चद्रूणपोलिकाः मोदकास्तत्रवैकार्याश्चारुबीजभवाःपरे
२१ सितयासहिताःकार्याश्चान्येदुग्धेननिर्मयेत् नारिकेलफलैश्चान्येवृक्षनिर्यासनिर्मिताः २२ बदामेश्चशुभाश्चान्येतिलैश्चकणबीजकैः
ईदृशान्मोदकांश्चान्यांस्तुष्टयर्थंममकारयेत् २३ अशोकप्रमोचनीकंदंतथार्द्रकरमर्दकम्
नारिंगंचिंचणीकंच कंकोलफलमेवच २४ दूशारत्रिपुरीजातसुभंनिंबफलंबिसम् तिंदूफलंलवंगंचश्री
फलंतिलकंलुती २५ वल्कलंवंशकारीरंतथाकायफलंबलम् द्राक्षाफलंचूतफलंरम्यंकदलिनीफलम् २६ धात्री

फलंशाक्तिभवंफलमंबाडवंतथा रंभाफलंपिप्पलीचमरीचाश्चमनोहरा: २७ शक्रुसर्षपतैलेनलवणेनस्कुवेधितम् तथारजिकयाविद्धंनिभिर्वर्षैर्घटेस्थितम् २८ एवंविधानिजातानिव्यंजनानिचमानद कर्तव्यानिसहोमासेममप्रीतिकराणिवै २९ एतादृशेभोजनेचेदसामर्थ्यंभवेद्यदि एवंकार्यंतदातेनसंक्षेपेणशृणुष्वमे ३० लड्डुकमेकंघृतपूरमेकंफेनद्वयंकोकरसत्रयंच घृतप्लुतंमंडकषोडशानांवटाष्टदायीनरकंनपश्येत् ३१ अर्धाढकस्यापि रपर्युषितंचदध्नःखंडस्यषोडशपलानिशशिप्रभस्य सर्पिःपलंमधुपलंमरिचंद्विकर्षंसूच्यापलार्धंद्विपलंचपलंचतुर्णाम् ३२ श्लक्ष्णपटेललनयामृदुपाणिघृष्टंकर्पूरधूलिधवलीकृतभांडसंस्था एषाशुभारसवतीप्रकरोतियोवैकामान्ददामिसकलान्मनुजस्यतस्य ३३ इतिश्रीस्कंदपुराणेमार्गशीर्षमाहात्म्येविष्णुब्रह्मसंवादेनवमोध्यायः ९

६९ ब्रह्मोवाच नैवेद्यानंतरंतातकिंकर्तव्यंनृभिःप्रभो यत्कर्तव्यंसहोमासेतत्सर्वंब्रूहितत्वतः १ श्रीभगवानुवाच अथभुक्तवतेप्रीत्याजलैःकर्पूरवासितैः आचमनंचतांबूलंचंदनैःकरमार्जनम् २ पुष्पांजलिंततःकुर्यात्भक्त्यादर्शंप्रदर्शयेत् नीराजनंततःकार्यंकर्पूरैर्विभवेसति ३ मदर्थेमुकुटादीनिभूषणानिविचक्षणः ततःपश्चान्महाभागप्रकल्प्यछत्रचामरे ४ प्रसादसुमुखंध्यात्वाश्यामसुंदरविग्रहम् जपेदष्टोत्तरशतंस्तुवीतस्तुतिभिःप्रभुम् ५ शंखरौप्यमयीमालाकांचनीचविशेषतः पद्माक्षैश्चैवसुभगैर्विद्रुमैर्मणिमौक्तिकैः ६ रचितेद्राक्षकैर्मालातथैवांगुलिपर्वभिः पुत्रजीवमयीमालाशस्तावैजपकर्मणि ७ नचक्रमन्नचहसन्नपार्श्वमवलोकयन् नपदापदमाक्रम्यकरप्राप्तशिरस्तथा ८ नोत्तिष्ठन्नमनुंविद्वान्नजपेद्व्यग्रमानसः जपकालेनभाषेतव्रतहोमार्चनादिषु ९ गृहेष्वेकगुणंजाप्यंगोष्ठेदशगुणंभवेत् नदीतीरेशतंविद्यादग्न्यागारेदशाधिकम् १० तीर्थादिषुसहस्रंस्यादनंतंममसन्निधौ एवंकृत्वासहोमासेयःकुर्याच्चप्रदक्षिणाम् ११ सप्तद्वीपवतीपुण्यंलभतेसपदेपदे पठन्नामस-

हस्तंतुह्यथवानामकेवलम् १२ एकाप्रदक्षिणाभक्त्यादहेत्पापंसदाह्निकम् प्रदक्षिणीकृतातेनसप्तद्वीपावसुंधरा
१३ दिनसप्तोद्भवंपापघ्नंतितिस्रःप्रदक्षिणाः तत्क्षणान्नाशयत्येवपापंदेहदशाह्निकम् १४ कृताःप्रदक्षिणायेन
एकविंशतिभक्तितः भ्रूणहत्यादिपापानिनाशमायांतितत्क्षणात् १५ अष्टोत्तरशतंयेनकृताभक्त्याप्रदक्षिणाः
तेनेष्टक्रतुभिःसर्वैःसमाप्तवरदक्षिणैः १६ प्रदक्षिणीकृतातेनतावद्द्वारवसुंधरा मातुःप्रदक्षिणास्तद्वद्धात्रीप्र
दक्षिणाः १७ शालिग्रामशिलायाश्चसममेतत्त्रयंस्मृतम् एकश्चदंडपातश्चसहस्रसमप्रदक्षिणाः १८ सममेतद्द्वयं-
नोवादंडपातोविशिष्यते प्रदक्षिणेदंडपातंयःकरोतिसदामम १९ सहोमासेविशेषेणआकल्पंसवसेदिह कृत्वा
दनंतरंतातचक्रवर्तीप्रजायते २० चिरायुर्धनवान्भोगीदानवान्धर्मवत्सलः सहस्रनामपठनात्पापंनश्येत्त्रिधा
कृतम् २१ अथकिंबहुनोक्तेनशृणुगुह्यंचमेसुत दामोदरेतिनाम्नावैभवेत्प्रीतिर्ममाऽतुला २२ गुणसंबंधिनेना
मकृतंमात्रायशोदया यदामेदधिभांडस्यस्फोटनंगोकुलेकृतम् २३ यशोदयातदागाढंबद्धोदाम्नाह्युलूखले
ततःप्रभृतिमेनामकृतंदामोदरेतिच २४ नमोदामोदरायेतिजपेद्यःसुसमाहितः सूर्योदयेशुचिर्भूत्वातिसह
स्रंदिनेदिने २५ सार्द्धलक्षत्रयंयावत्तदुद्यापयेद्बुधः तर्पणंहवनंचैवब्रह्मभोज्यंदशांशतः २६ एवंयःकुरुते
भक्त्यातस्ययच्छामिवांछितम् धनधान्यंतथादारान्पुत्रांश्चान्यच्चवांछितम् २७ त्रिःसत्येनमयाचोक्तंमद्-
त्वंमहामते मंत्रराजमिमंपुत्रकृपयामेप्रकाशितम् २८ दामोदरायेतिपठन्नित्यंकुर्यात्प्रदक्षिणाम् दंडपातंत
थापुत्रअष्टांगेनसमन्वितम् २९ पद्भ्यांकराभ्यांजानुभ्यामुरसाशिरसातथा मनसावचसादृष्ट्याप्रणामोऽष्टांग
उच्यते ३० शिरोमत्पादयोःकृत्वाबाहुभ्यांचपरस्परम् प्रपन्नंपाहिमामीशभीतंमृत्युग्रहार्णवात् ३१ पश्चाच्छे-
षांमयादत्तांशिरस्याधायसादरम् एवंब्रूयात्ततोवत्सममपूजाप्रवर्तयेत् ३२ मंत्रहीनंक्रियाहीनंभक्तिहीनंज-

नार्दन यत्पूजितंमयादेवपरिपूर्णंतदस्तुमे ३३ मृदंगवाद्येनसमंघणवेनसुसंयुतम् एवंकार्यंसहोमासेनृ·
त्यंपुण्यप्रदंनृणाम् ३४ गीतवाद्यंचनृत्यंचतथापुस्तकवाचनम् पूजाकालेचतुर्वक्त्रसर्वदाममचाप्रियम्
३५ गीतवाद्याद्यभावेचममनामसहस्रकम् स्तवराजंतथापुत्रगजेंद्रस्यचमोक्षणम् ३६ अनुस्मृतिश्च·
गीताचस्तवनंपंचधामनम् पंचस्तवमहाभागममप्रीतिकरंपरम् ३७ पादोदकंपिबेद्योवैशालग्रामसमुद्भवं
पंचगव्यसहस्रैस्तुप्राशितैःकिंप्रयोजनम् ३८ शालग्रामशिलातोयंयःपिबेद्बिंदुनासमम् मातुःस्तन्यंपुनर्नैव·
सपिबेन्मुक्तिमान्नरः ३९ अशौचेनैवविद्येतसूतकेमृतकेपिच येषांपादोदकंमूर्ध्निप्राशनंयेप्रकुर्वते ४० अं
तकालेपियस्यैददीयतेपादयोर्जलम् सोपिसद्गतिमाप्नोतिसदाचारबहिष्कृतः ४१ सोपिपूतोभवत्याशुकृत
घःपादांबुधारणात् चांद्रायणात्सादकृच्छ्रादधिकंपादयोर्जलम् ४२ अपेयंपिबतेयस्तुभुंक्तेयश्चाप्यभो·
जनम् अगम्यागमनंयोवैपापाचारश्चयोनरः ४३ अगरुंकुंकुमंवापिकर्पूरस्यानुलेपनम् ममपादांबुसंस्पृष्टं
तद्वैपावनपावनम् ४४ दृष्टिपूतंतुयत्तोयंभवेद्वैविप्रसत्तम तद्वैपापहरंनृणांकिंपुनःपादयोर्जलम् ४५ इ·
तिश्रीस्कंदपुराणेमार्गशीर्षमाहात्म्येब्रह्मविष्णुसंवादेदशमोऽध्यायः १० छ ब्रह्मोवाच ए
कादश्याश्चमाहात्म्यंउपोष्यंचविधानकम् सर्वंब्रूहिममस्वामिन्कृपयाभूतभावन १ श्रीभगवानुवाच
शृणुष्वद्विजशार्दूलकथांपापप्रणाशिनीम् यांश्रुत्वायातिविलयंपापंब्रह्मवधादिकम् २ कांपिल्यनगरेराजा
वीरबाहुरितिस्मृतः सत्यवादीजितक्रोधोब्रह्मण्योममतत्परः ३ भाववान्सदयाशीलोरूपवान्बलवत्तरः भ
क्तोभागवतेनृणांसदाममकथारुचिः ४ सदाममकथासक्तःसदाजागरणप्रियः दाताविद्वान्क्षमाशीलो
विक्रमीविजितेंद्रियः ५ विजयीरणशीलश्चऋद्ध्याचधनदोपमः पुत्रवान्पशुवांश्चैवस्वदारनिरतस्तथा ६

तस्यभार्याकांतिमतीरूपेणाप्रतिमाभुवि पतिव्रतामहासाध्वीममभक्तिरतासदा ७ तयासहविशालाक्षोबुभुजे मेदिनींपुरा मुक्तेकंमांमहाबाहोनान्यंजानातिदैवतम् ८ एकस्मिन्दिवसेपुत्र भारद्वाजोमहामुनिः समागतोगृहेतस्यवीरबाहोर्महात्मनः ९ दृष्ट्वासमागतोदूरात्भारद्वाजमहामुनिम् स्वागतंकारयामासदत्वार्घ्यंविधिवत्तदा १० आसनंकल्पयामासस्वयमेवमहीपतिः प्रणम्यपरयाभक्त्यातस्थौमुनिवराग्रतः ११ राजोवाच अद्यमेसफलंजन्मअद्यमेसफलंदिनम् अद्यमेसफलंराज्यमद्यमेसफलंगृहम् १२ प्रसन्नोममाविप्रर्षेप्रसन्नात्माजनार्दनः यत्त्वंसमागतोद्यमगृहेयोगिवरस्त्वया १३ मुक्तोहंपापकोट्याद्ययत्त्वयाहंनिरीक्षितः राज्यंलक्ष्मीर्गजाश्वाश्चमयातुभ्यंनिवेदिताः १४ वैष्णवोसिमुनिश्रेष्ठनास्त्यदेयंमयातव मेरुतुल्यंभवेत्सर्वंवैष्णवस्यवराटिका १५ नयातिहिगृहेयस्यवैष्णवोयंद्विजोत्तमः तद्दिनंविफलतस्यकथितंब्राह्मणेमम १६ विष्णुभक्ताश्चयेकेचित्सर्ववर्णाद्विजातयः कथितंममगार्ग्येणगौतमेनसमंतुना १७ येत्वभक्ताहृषीकेशेपिशाचास्तेहिमानवाः महापातककलिमास्तेयेभुंजंतिहरेर्दिने १८ शिवव्रतसहस्रैस्तु सौरब्राह्मैश्चकोटिभिः यत्फलंकविभिःप्रोक्तंवासरेकेनतद्धरेः १९ गर्वमुद्वहतेतावत्तिथिब्राह्मीचकेसरी यावन्नायातिविप्रेंद्रद्वादशीचममप्रिया २० तावत्प्रभावस्ताराणांयावन्नोदयतेशशी तिथिस्तथाचविप्रेंद्रयावन्नायातिद्वादशी २१ नारदेनपुराप्रोक्तंवसिष्ठेनममाग्रतः त्वंवेत्तासर्वधर्माणांवैष्णवानांमहामुने २२ भारद्वाजउवाच साधुदृष्टंमहाभागयत्त्वंभक्तोसिवैष्णवः साचप्रजामहीधन्यायत्त्वंरक्षसिभूमिप २३ तस्मिन्राष्ट्रेनवास्तव्यंयत्रराजानवैष्णवः वरंवासोवनेतीर्थेनतुराष्ट्रेत्ववैष्णवे २४ यत्रभागवतोराजासंप्रशास्तिचमेदिनीम् वैकुंठमितिमंतव्यंतद्राष्ट्रंपापवर्जितम् २५ चक्षुर्हीनोयथादेहोपतिहीनायथास्त्रियः द्वादशीदशमीयुक्तातथाराष्ट्रमवैष्ण

वम् २६ दानहीनोयथासज्ञाब्राह्मणोरसविक्रयी द्वादशीदशमीयुक्तातथाराष्ट्रमवैष्णवम् २७ दंतहीनोय
थाहस्तीपक्षहीनोयथाखगः द्वादशीदशमीयुक्तातथाराष्ट्रमवैष्णवम् २८ प्रतिग्रहार्थंवेदादिदंभार्थंसुकृतंत-
था द्वादशीदशमीयुक्तातथाराष्ट्रमवैष्णवम् २९ दर्भहीनायथासंध्यायथाश्राद्धमदक्षिणम् द्वादशीदशमीयु
क्तातथाराष्ट्रमवैष्णवम् ३० साशिरस्वंचयथाशूद्रंकपिलाक्षीरपायिनम् द्वादशीदशमीयुक्तातथाराष्ट्रमवैष्णवं
३१ ब्राह्मणीगामिनंशूद्रंहेमघ्नंधर्मदूषकम् द्वादशीदशमीयुक्तातथाराष्ट्रमवैष्णवम् ३२ हरिसूर्यादिवृक्षा
णांयथाच्छेदनरोत्तम द्वादशीदशमीयुक्तातथारा॰ ३३ यथाहुतिर्मंत्रहीनामृतवत्सापयोयथा द्वादशीदश
मीयुक्तातथाराष्ट्रमवैष्णवम् ३४ सकेशाविधवायद्वत्तंस्नानविवर्जितम् द्वादशीदशमीयुक्तातथाराष्ट्रमवै-
ष्णवम् ३५ सराजाप्रोच्यतेसद्भिर्योभक्तोमधुसूदने तद्राष्ट्रंवर्धतेनित्यंसुखीभवतिसाप्रजा ३६ दृष्टिर्मेस
फलाराजन्यत्वयाहंनिरीक्षितः अद्यमेसफलावाणीजल्पतयात्वयासह ३७ दूरमेवहिगंतव्यंश्रूयतेयत्रवै
ष्णवः दर्शनात्तुभवेत्पुण्यंतीर्थस्नानसमुद्भवम् ३८ सत्वराजन्मयादृष्टोविष्णुभक्तिरतःशुचिः स्वस्तितेस्तुग-
मिष्यामिसुखीभवनराधिप ३९ एतस्मिन्नंतरेराजाकांतिमत्यानमस्कृतः भारद्वाजोमुनिःश्रेष्ठःप्रवरःसर्व-
योगिनाम् ४० अवैधव्यंवरारोहेभक्ताभवस्वभर्तरि निश्चलाकेशवेभक्तिःसदाभवतुतेशुभे ४१ एतस्मिन्न
न्तरेराजाभारद्वाजंमहामुनिम् उवाचप्रीणयन्वाचामेघनादगभीरया ४२ राजोवाच विपुलामेकथंलक्ष्मीः
किंकृतंपूर्वजन्मनि सर्वंब्रूहिमुनिश्रेष्ठकृपायदिममोपरि ४३ एतन्मयाकथंप्राप्तंराज्यंनिहतकंटकम् पुत्रोवै
गुणवान्श्रेष्ठःप्रियाचसुमनोहरा ४४ मच्चित्तामद्गतप्राणाचिंतयंतीजनार्दनम् कोहंमुनेकथंचैषाकिंवाधर्मोमया
कृतः ४५ किंचानयापिचार्वंग्याममपत्न्याकृतंमुने केनपुण्येनसेलक्ष्मीर्मृत्युलोकेसुदुर्लभा ४६ अशेषाभूमि

पालावैवर्ततेपस्यमेवशे विक्रमंचाप्रतिहतंशरीरारोग्यतातथा ४७ ममापिविपुलंतेजोनकाश्चित्सहतेमुने इ
च्छामेह्यप्रतिज्ञानुयथान्वेयमूर्निंदिता ४८ मयापिसुकृतंविप्रकिंकृतंपूर्वजन्मनि इतिपृष्टोनरेंद्रेणपूर्वजन्मविचे
ष्टितम् ४९ सपत्न्याश्चेष्टितंचैवसंपदांचैवकारणम् योगस्थःक्षणचिरकालंतयाविंदेतमानसे ५० विज्ञातमेतन्नृ
पते पूर्वजन्मविचेष्टितम् तवपत्न्याश्चराजर्षेशृणुष्वकथयाम्यहम् ५१ भरद्वाजउवाच शृणुभूपालसत्कु·
लयस्येदंकर्मणःफलम् त्वमासीःशूद्रजातीयोजीवहिंसापरायणः ५२ नास्तिकोदुष्टचारित्रःपरदारप्रधर्षकः
कृतघ्नोदुर्विनीतश्चसत्कृष्टाचारविवर्जितः ५३ याइयंभवतोभार्यापूर्वमप्यायतेक्षणा कर्मणामनसावाचानान्य
दृस्यास्त्वयाविना ५४ पतिव्रतामहाभागाभजमानानिरंतरम् भावंनकुरुतेदुष्टंतवोपरिनृपासति ५५ स
खिभिस्त्वंपरित्यक्तोबंधुभिःपापकर्मकृत् क्षयंजगामचार्थोयःसंचितस्तवपूर्वजैः ५६ नष्टद्रव्येफलाकांक्षी
त्वमासीर्जगतीपते पूर्वकर्मविपाकेनकृषिश्चापिफलागता ५७ ततोवित्तेपरिक्षीणेपरित्यक्तश्चबांधवैः क्षी
यमाणापिसाध्वीयंनात्यजत्त्वांनभामिनी ५८ त्वभग्नःसर्वकामेभ्योगतवान्निर्जनेवने हत्वाजीवाननेकांश्च
कारात्मविपोषणम् ५९ एवंप्रवृत्तस्यतवसहपत्न्यामहान्नृप गतानिबहुवर्षाणिपापवृत्त्यामहीपते ६० अ
न्यस्मिन्वत्सरेराजन्मार्गभ्रष्टोमहामुनिः नदिशंविदिशंवेत्तिदेवशर्माद्विजोत्तमः ६१ क्षुत्तृषापीडितात्यर्थंम
ध्यान्हगदिवाकरे पतितोवनमध्येतुमार्गभ्रष्टोमहीपते ६२ दयाजाताचतेभूपदृष्ट्वादुःखेनपीडितम् ब्राह्मणंवृ
द्धमज्ञातंगृहीत्वातुकरेणवै ६३ उत्थाप्यपतितंभूमौत्वयोक्तंहितदानृप प्रसादंकुरुविप्रर्षेआगच्छत्वंममाश्र·
मम् ६४ जलपूर्णंतडागंचपद्मिनीखंडमंडितम् वृक्षैर्मनोहरैर्युक्तंफलैःपुष्पैर्मनोरमैः ६५ स्नात्वासुशीत
लेतोयेकृत्वाकर्मचनैत्यकम् विश्रांतोवृक्षमूलेभूद्देवशर्माद्विजोत्तमः ६६ साष्टांगंमुनयेकृत्वानमस्कारंसहस्त्रि

या शूद्रस्तुपरयाभक्त्याप्रोवाचमुनिसन्निधौ ६७ आवयोस्तरणार्थायअतिथिस्त्वंसमागतः सुखेनकुरुवि
श्रामंमयासंरक्षितःस्वयम् ६८ उत्तिष्ठत्वंद्विजश्रेष्ठप्रसादंकर्तुमर्हसि लब्धसंज्ञस्तदाविप्रःश्रुत्वाशूद्रस्यभाषि
तम् ६९ करेजग्राहशूद्रंतुगतोयत्रजलाशयः उपविष्टोमहाबाहोछायामाश्रित्यतत्तटे ७० स्नानंचकारविधिव
त्पूजयामासकेशवम् तर्पयित्वापितॄन्देवान्पपौनीरंसुशीतलम् ७१ शूद्रउवाच दर्शनात्तवविप्रर्षेजा
तःपापस्यसंक्षयः प्रायःफलानिस्वादूनिप्रयच्छामिद्विजातये ७२ मृदूनिरसयुक्तानिसुपक्वाणिप्रियाणि
ब्राह्मणउवाच त्वामहंनैवजानामित्वज्जातिंकथयस्वमे नाज्ञातस्याहिभोक्तव्यंब्राह्मणस्यापिपुत्रक
७३ शूद्रउवाच शूद्रोहंद्विजशार्दूलनकार्यःसंशयस्त्वया आत्मजैर्दुर्जनैर्विप्रपरित्यक्तःस्वबंधुभिः ७४
तयोःसंवदतोरेवंशूद्रपत्न्याफलानिच दत्तानितस्मैविप्रायतेनभुक्तानितानिवै ७५ अभूत्प्रीतमनाविप्रः
पीत्वानीरंसुशीतलम् सुखंसंप्राप्यसमुनिर्विश्रांतस्तरुमूलकैः ७६ सचशूद्रःसपत्नीकोभुक्त्वान्नंपुनरागतः
स्वागतंतेमुनिश्रेष्ठकुतस्त्वमिहचागतः ७७ शून्याटवींद्विजश्रेष्ठदुष्टसत्वभयाकुलाम् निर्मनुष्यांदुःखयुक्तांदि
वारात्रभयानकाम् ७८ ब्राह्मणउवाच ब्राह्मणोहंमहाभागप्रयागगमनंप्रति अहमज्ञातमार्गेणप्रवि
।दारुणेवने ७९ ममपुण्यप्रभावेनजातोसिवरबांधवः जीवितंमेत्वयादत्तंब्रूहिकिंकरवाणिते ८० भवा
नपिकुतःप्राप्तोनिर्मनुष्येवनेखलु कोभवान्कारणंकिंचित्कथयस्वममाग्रतः ८१ शूद्रउवाच विद्
र्भनगरीराज्ञाभीमसेनेनरक्षिता वासोमममहाराज्येशूद्रोहंपापलंपटः ८२ स्वकर्मविहितोधर्मोमयात्यक्तो
द्विजोत्तम त्यक्तोहंबंधुवर्गेणततोहंवनमागतः ८३ कृत्वाजीववधंनित्यंजीवेहंभार्ययासह सा ।तक
त्सम्यक्निर्विण्णोस्मिमहामुने ८४ कुरुष्वानुग्रहंकिंचित्पापयुक्तस्यमेप्रभो ममपुण्यविभागेन आगत-

स्त्वंद्विजोत्तम ८५ नपश्यामियथासौरिंपत्न्यासहमहामुने उपदेशप्रभावेनप्रसादंकर्तुमर्हसि ८६ नान्यदिच्छाम्यहंकिंचिन्मुक्त्वादेवजनार्दनम् कुरुष्वानुग्रहंमेद्यप्रसादमृषिसत्तम ८७ भारद्वाजउवाच इतितेनसमापृष्टोदेवशर्माद्विजाग्रणीः शूद्रेणपरयाभक्त्याप्रहसन्वाक्यमब्रवीत् ८८ इतिश्रीस्कंदपुराणेमार्गशीर्षमाहात्म्येविष्णुब्रह्मसंवादेएकादशीव्याख्याननामएकादशोऽध्यायः ११ छ

देवशर्माउवाच नदृशीमतिर्जातासहसाकेशवोपरि एतस्मात्तेगतंपापंपूर्वजन्मशतोद्भवम् १ विनाव्रतैर्विनातीर्थैर्मुक्तस्त्वंपापकोटिभिः ममातिथ्येनभक्त्याचजातंनवहरेःपदम् २ तेनपुण्यप्रभावेनमतिर्जातातवेदृशी ध्यात्वासंचिंत्यमनसाज्ञातंपूर्वंविचेष्टितम् ३ पूर्वजन्मनिविप्रस्त्वमवस्थाधर्मतत्परः सदाध्ययनशीलश्चकृशीलश्चसदाव्रती ४ एकानुद्वादशीविष्णोःकृतादशमिसंयुता तत्पापस्यप्रभावेनसमस्तंसुकृतंगतम् ५ सर्वंतद्विफलंजातंयथाशूद्रापतिर्द्विजः बहुवर्षसहस्राणिप्राप्तानरकयातना ६ तस्माद्देवत्वयासर्वंकृतंदुष्टंचिरंबहु कृतानुदशमीमिश्रातिथिर्विष्णोर्महात्मनः ७ तेनशूद्रोभवान्जातःपापेतवमतिस्तथा धर्मेनरमतेचित्तंदशमीवेधदूषितम् ८ चिदंभनगरेवत्सत्वस्यास्तितेपुत्रिकासुतः कृतंतेनाविधानोक्तंहरेरेकादशीव्रतम् ९ प्रदत्तंतेनतत्पुण्यमखंडैकादशीव्रतम् धर्मोपरिमतिर्जाताततःपापस्यसंक्षयः १० तेनपुण्यप्रभावेनएकादश्याव्रतेनच दशमीवेधजंपापंयमेनपरिमार्जितम् ११ इहजन्मनियत्पापंजन्मायुतकृतानिच मार्जितानियमेनैवपापानितवसांप्रतम् १२ तयोर्विवदतोरेवंविष्वक्सेनःसमागतः वर्णांतरस्यागतंतेतुष्टस्तेहंजनार्दनः १३ विप्रस्यातिथ्यहेतुत्वाज्जातःपापस्यसंक्षयः परदत्तेनपुण्येनएकादश्याव्रतेनच १४ दशमीवेधजंपापंतवशूद्रलयंगतं व्रतंकृत्वाददौपुण्यंदौहित्रस्तेनतारितः १५ पत्न्यासहमहाभागवैनतेयंसमारुह इत्युक्त्वादेवदेवेनविमाने

स्थापितस्तदा १६ स्वर्गगतःसपत्नीकः शूद्रत्वेननृपोत्तम देवशर्मातुविप्रोवैतीर्थराजंययौपुनः १७ एतत्तेस
र्वमाख्यातंयत्वयापरिपृच्छितम् अखंडैकादशीपुण्यात्प्राप्तमातिथ्यकारणात् १८ राजोवाच ब्रह्मन्न-
खंडैकादश्याविधिंसम्यक्समादिश विष्णोःसंप्रीणनार्थायप्रसादंकर्तुमर्हसि १९ ऋषिरुवाच शृणुष्व
नृपशार्दूलएकादश्याविधिंशुभम् पुरासीद्भगवान्विष्णुर्नारदाययदुक्तवान् २० तत्तेहंसंप्रवक्ष्यामिउद्यापन-
विधिंशुभम् मार्गशीर्षादिमासेषुद्वादशीषुनरोत्तम २१ व्रतंशुभमिदंकार्यमखंडैकादशीव्रतम् दशम्यां
चैवनक्तंच एकादश्यामुपोषणम् २२ द्वादश्यामेकभक्तंच अखंडाइतिकथ्यते दिवसस्याष्टमेभागेमंदीभूते
दिवाकरे २३ तद्दिनक्तंविजानीयान्ननक्तंनिशिभोजनम् कांस्यंमांसंमसूरांश्चचणकान्कोद्रवांस्तथा २४
शाकंमधुपरान्नंचपुनर्भोजनमैथुने विष्णुभक्तोनरोवापिदशम्यांदशवर्जयेत् २५ दशम्यांविधिरुक्तोयमेका
दश्यास्तथाशृणु असकृज्जलपानंचहिंसाशौचमसत्यताम् २६ तांबूलंदंतकाष्ठंचदिवाशयनमैथुनम् द्यूतं-
क्रीडांनिशिस्वापःपतितैःसहभाषणम् २७ एकादश्यांदशैतानिविष्णुभक्तस्तुवर्जयेत् अद्यमेरन्नोस्करवं
नास्तिभोजनंनास्तिकेशव २८ प्रीत्यर्थंतवदेवेशनियमस्त्वादिवानिशि २९ स्कतांद्रियैस्तु वैवल्लभ्यंभोजनंय
च्चमैथुनम् दंतांत रविलग्नालांक्षमस्वपुरुषोत्तम ३० उपावृत्तःसपापेभ्योयस्तुवासोगुणैःसह उपवासः
सविज्ञेयोनशरीरस्यशोषणम् ३१ पूर्वोक्तानिदशैतानिपरान्नंचतथामधु द्वादश्यांविष्णुभक्तोवैवर्जयेन्म
र्दनादिकम् ३२ अद्यमेद्वादशीपुण्यापवित्रापापनाशिनी पारणंचकरिष्यामिप्रसीदगरुडध्वज ३३ विष्णोः
संतोषणार्थाययोमयानियमःकृतः अद्याहंभोजयिष्यामित्वत्प्रसादाद्द्विजोत्तम ३४ अनेनविधिनाकुर्या-
द्यावद्वर्षंसमाप्यते संपूर्णेतुततोवर्षेकुर्यादुद्यापनंबुधः ३५ आदौमध्येतथाचांतेव्रतस्योद्यापनंस्मृतम्

उद्यापनंनकुर्याद्यः कुष्ठीचांधश्चजायते ३६ तस्मादुद्यापनंकुर्याद्यथाविभवसारतः क्रियतेशुक्लपक्षेच मासेमा
र्गशिरेशुभे ३७ आमंत्र्यद्वादशमितान्ब्राह्मणान्विधिकोविदान् त्रयोदशंसपत्नीकमाचार्यविधिकोविदम्
३८ यजमानःशुचिःस्नात्वाश्रद्धायुक्तोजितेंद्रियः पादशौचार्घवस्त्राणिआचार्यादींस्ततोर्चयेत् ३९ आचार्यस्तु
ततः कृत्वामंडलंवर्णकैःशुभैः चक्राब्जसर्वतोभद्रंश्वेतवस्त्रेणवेष्टितम् ४० जलपूर्णंचकुंभंतु पंचरत्नसमन्वितं
पंचपल्लवसंयुक्तं कर्पूरागरुवासितम् ४१ वेष्टितंरक्तवस्त्रेणताम्रपात्रेणसंयुतम् वेष्टितंपुष्पमालाभिर्मंड-
लोपरिविन्यसेत् ४२ तस्योपरिन्यसेद्देवंलक्ष्मीनारायणंनृप सौवर्णप्रतिमाकार्याकर्षमेकप्रमाणतः ४३
वाहनायुधसंयुक्तंप्रमाणंचतुरंगुलम् नोवाशक्त्याप्रकुर्वीतवित्तशाठ्यंविवर्जयेत् ४४ ततःसंस्थापयेन्मूर्तिं
मंडलेद्वादशैवहि मासानामधिपाःपूज्याअखंडव्रतहेतवे ४५ मंडलात्पूर्वदिग्भागेशंखंसंस्थापयेच्छुभम्
त्वंपुरासागरोत्पन्नः पांचजन्यनमोस्तुते ४६ ततस्तुस्थंडिलंकार्यंमंडलादुत्तरांदिशम् संकल्प्यहवनंकार्यंमंत्रै
र्वेदोक्तवैष्णवैः ४७ स्वस्थानेस्थापितंविष्णुंस्थापयेत्पंचकैर्हरिम् पूजयेत्पुरुषसूक्तेन मंत्रैःपौराणिकैःशुभैः
४८ नैवेद्यार्थंचवैकार्यामोदकाबहवोपिच धूपदीपोपहाराणिकृत्वानीराजनंततः ४९ यक्षकर्दमेनसंपूज्यततः
कुर्यात्प्रदक्षिणाम् स्वस्तिवाचनकैर्विप्रैर्नमस्कारततोनृप ५० ततस्तुब्राह्मणैःकुर्यान्आचार्यःक्रमशोजपं सूक्तस्य
पावमानीयमंडलैर्ब्राह्मणंभुवि ५१ तेजोसिशुक्रजंवाचंब्रह्मसामादनंतरम् पवित्रंसर्वसूक्तस्यविष्णोर्हंमांसिसं
हिताम् ५२ जपांतेकलशेविष्णुंसोपायमुपरिन्यसेत् दिवसस्योदयेचैव होमंकुर्यादनुक्रमम् ५३ संस्थाप्य
प्रथमपात्रपूजयित्वाविधानतः स्तवनंचततोहोमःकर्तव्यश्चरुपूर्वकः ५४ स्वगृह्योक्तविधानेनाजिनसूत्रक्रिया
परः चरुद्वयंचकुर्वीतपायसंवैष्णवंचरुम् ५५ जुहुयात्पुरुषसूक्तेनचरोराहुतयोदश तथाचरुगृहीतेनघृत

युक्ताश्चव्याहृतिः प्रादेशमात्रपालाशसमिधाश्चघृतप्लुता इदंविष्णिवतिमंत्रेणहोतव्याकर्मशुद्धये ५७ शतमेकंतु-
जुहुयाद्द्विगुणाश्चतिलाहुतीः कृतेचवैष्णवेहोमेग्रहयज्ञंसमारभेत् ५८ समिद्भिश्चरुहोमंचतिलहोमंक्रमेण
तु उभयोःस्वस्तिकंवाच्यंततःपूजांसमाचरेत् ५९ ऋत्विजानांततोदद्याद्धेनूर्व्याग्रहदक्षिणाः देवस्यतुष्ट्येदद्या
च्चब्राह्मणायचयथाविधि ६० गांवैपयस्विनींदद्याद्वृषभंचसुशोभनम् ब्राह्मणानांततोदद्यात्त्रयोदशपदानिच
६१ आचार्यंतुसपत्नीकंवस्त्रैश्चपरिधापयेत् तोषयित्वामहादानैस्तैःसार्धंचसमर्पयेत् ६२ पंचविंशतिकुंभां
श्चसोदकान्वस्त्रवेष्टितान् ब्राह्मणानांततोदद्यात्कृतेपारणकेनिशि ६३ भूमिदानंचदातव्यंबंधूनामिष्टभोजनं
पूर्णपात्रंततोदद्यादाचार्यायसदक्षिणम् ६४ पूर्णपात्रप्रदानेनकार्यंसंपूरितंभवेत् उपवासव्रतंचैवस्नानंतीर्थ
फलंभवेत् ६५ विप्रैःसंभाषितंतस्यसंपूर्णंतद्भवेत्फलम् वित्तशक्तिर्गृहेनास्तिकृतंचैकादशीव्रतम् ६६ स्वश
क्त्याचैवकर्तव्यंतथाचोद्यापनादिकम् एतत्तेसर्वमाख्यातमखंडैकादशीव्रतम् ६७ इतिश्रीस्कंदपुराणेमा·
र्गशीर्षमाहात्म्येविष्णुब्रह्मसंवादेअखंडैकादशीव्रतकथनंनाम द्वादशोऽध्यायः १२ छ श्रीभगवा·
नुवाच शृणुपुत्रप्रवक्ष्यामिजागरस्यचलक्षणम् येनविज्ञानमात्रेणसुलभोहंसदाकलौ १ गीतंवाद्यंचनृत्यंच
पुराणपठनंतथा धूपंदीपंचनैवेद्यंपुष्पगंधानुलेपनम् २ फलार्पणंचश्राद्धंचदानमिंद्रियसंयमम् सत्यान्वितं
विनिद्रंचमुदमभजनान्वितम् ३ साश्चर्यंचैवसोत्साहंपापालस्यादिवर्जनम् प्रदक्षिणासमायुक्तंनमस्कारपु
रःसरम् ४ नीराजनसमायुक्तमतिप्रीतेनचेतसा यामेयामेमहाभागकुर्यादारार्तिकंमम ५ षड्विंशद्गुणसंयुक्त
मेकादश्यांचजागरम् यःकरोतिनरोभक्त्यानपुनर्जायतेभुवि ६ यएवंकुरुतेभक्त्यावित्तशाठ्यविवर्जितः जाग
रंपरयाभक्त्यासलीनोजायतेमयि ७ दष्टाःकलिभुजंगेनस्वपंतेयेदिनेमम कुर्वंतिजागरंनैवमायापाशावि-

मोहिताः ८ प्राप्यैकादशीयेषांकलौजागरणंविना तेविनष्टानसंदेहोयस्माज्जीवितमध्रुवं ९ उद्धृतंनेत्रयुग्मंचदत्वापि
हृद्येपदम् कृतंयेनैवपश्यंतिपापिनोममजागरम् १० अभावेवाचकस्याथगीतंनृत्यंचकारयेत् वाचकेसतिदेवेशपु
राणंप्रथमंपठेत् ११ अश्वमेधसहस्रस्यवाजपेयशतस्यच पुण्यंकोटिगुणंपुत्रममजागरणेकृते १२ पितृपक्षेमातृ
पक्षेभार्यापक्षेचमानद कुलान्युद्धरतेचैतान्ममजागरणेकृते १३ उपोषणदिनेविघ्नेप्रारब्धेजागरेसति विहायस्था
नंतचाहंशापंदत्वाव्रजाम्यहम् १४ अविद्धवासरेयेमेप्रकुर्वंतिहिजागरम् तेषांमध्येप्रहृष्टःसन्नृत्यंवैप्रकरोम्य-
हम् १५ यावद्दिनानिकुरुतेजागरंममसन्निधौ युगायुतानितावंतिवसंतेममवेश्मनि १६ नगयापिंडदानेननती
र्थैःक्रतुभिर्मखैः पूर्वजामुक्तिमायांतियथैकादशिजागरात् १७ यःकुर्य्याज्जागरेपूजांकुसुमैर्ममवासरे पुष्पेपुष्पे-
श्वमेधस्यफलमाप्नोतिमानवः १८ यःकुर्याद्दीपदानंचरात्रौजागरणेमम निमिषेनिमिषेपुण्यंलभतेगोयुतंफलम्
१९ योदद्याज्जागरेपुष्पहविष्यान्नसमुद्भवम् नैवेद्यंलभतेपुण्यंशालिशैलसमुद्भवम् २० पक्वान्नानिचयोदद्या
त्फलानिविविधानिच जागरेमेचतुर्वक्त्रलभतेगोशतंफलम् २१ कर्पूरेणचतांबूलंददातिममजागरे मद्भक्तोमत्प्र
सादेनसप्तद्वीपाधिपोभवेत् २२ जागरेममदेवेशयःकुर्यात्पुष्पमंडपम् सपुष्पकविमानेनक्रीडतेममसद्मनि
२३ मेजागरेतुयोधूपंसकर्पूरंसगुग्गुलम् ददातिदहतेपापंजन्मलक्षसमुद्भवम् २४ स्नापयेज्जागरेयोमांदधि
क्षीरघृतांबुकैः भोगानीहलभेत्सोवैअंतेचपरमांगतिम् २५ दिव्यांबराणियोदद्यात्फलानिविविधानिच सचिरंव-
सतेस्वर्गेतंतुसंख्यासमानिवै २६ दद्यादाभरणंयोमेहेमजंरत्नसंभवम् सप्तकल्पानिवसतेसोलंगेमत्प्रियोमम
२७ घृतेनदीपकंयोमेगव्येनचविशेषतः ज्वालयेज्जागरेरात्रौनिमिषेगोयुतफलम् २८ जागरेमेचतुर्वक्त्रकर्पूरे
णचदीपकम् योज्वालयेत्तनीराजंकपिलादानजंफलम् २९ यःपुनःकुरुतेदीपंगीतंनृत्यंचपूजनम् नतस्यक्रतुशा

तैःपुण्यंव्रतैर्दानशतैरपि ३० स्वयंयःकुरुतेगीतंविलज्जोनृत्यतेयदि सलभेन्निमिषार्द्धेनकोटियज्ञकृतंफलम् ३१ निवारयन्ति
योगीतंनृत्यंजागरणेमम षष्टियुगसहस्राणिपच्यन्तेरौरवादिषु ३२ नृत्यमानस्यमर्त्यस्ययेकेचिन्निकटेगताः
विमुक्ताधर्मराजेनमुक्तायांतिचतत्पदम् ३३ नृत्यमानस्यमर्त्यस्यउपहासंकरोतियः जागरेयातिनिरयंयावदिंद्राश्चतुर्दश
३४ जागरेममयःकुर्याद्भक्त्यापुस्तकवाचनम् श्लोकसंख्यायुगान्येवसवसेन्ममसन्निधौ ३५ प्रदक्षिणा
प्रदानेनयत्फलंकथितंबुधैः नतत्कोटिमखैःपुण्यंयुगसंख्यैरवाप्यते ३६ दीपमालांममाग्रेवैयःकुर्याज्जागरेकृत
विमानकोटिसंयुक्तमाकल्पंवसतेदिवि ३७ ममबालचरित्राणिजागरेपठतेहियः युगकोटिसहस्राणि
श्वेतद्वीपेवसेन्नरः ३८ तस्माज्जागरणंकार्यंपक्षयोःशुक्लकृष्णयोः योगीतंपठतेरात्रौममनामसहस्रकम् ३९
वेदोक्तानांपुराणानांजागरात्पुण्यमाप्नुयात् धेनुदानंतुयःकुर्याज्जागरेममपुत्रक ४० लभतेनात्रसंदेहःसप्तद्वीपवतीफलम्
सर्वेषामेवपुण्यानांमहत्पुण्यंमहीतले ४१ द्वादशीजागरंपुत्रप्रसिद्धंभुवनत्रये जागरंयेचकुर्वंतिकर्मणामनसागिरा
४२ नतेषांपुनरावृत्तिर्ममलोकात्कथंचन प्रोत्साहयित्वालोकान्यःकुरुतेजागरंनिशि ४३ प्राप्नोतिचक्रवर्तित्वंसत्यंमेव्याहृतंकृत
समानिताःककुत्स्थेनरात्रौजागरकारिणः ४४ स्वशक्त्याचैवदानेनग्रामंराज्य
कृदुर्लभम् येकेचिद्गायकाविप्रावाद्यकानर्तकास्तथा ४५ नर्तकीसहितायांतिममलोकेसनातने दुर्योनिषुगतैः
सर्वैःकृत्वाजागरणंमम ४६ संप्राप्तापृथिवीसस्यंकार्मुकैर्मुनिसत्तम निष्कामामुक्तिमापन्नाःश्वपचाद्याश्चजागरात्
४७ विवेकोनास्तिवर्णानांममजागरकारिणाम् नकलौपावनंध्यानंनकलौजाह्नवीजलम् ४८ नकलौ
पावनंजाप्यंमुक्त्यैकंजागरंमम द्वादशीदिवसेप्राप्तेयेकुर्वंतिहिजागरम् ४९ तेधन्यास्तेकृतार्थावैकलिकालेन
संशयः माभूयान्मानुषेलोकेद्वादशीविमुखोनरः ५० अतीतान्यागतान्यपिपातयेन्नरकेहिसः वरमेकोगुणै

युक्तः किंजातैर्बहुभिःसुतैः ५१ द्वादशीजागरात्सर्वांस्तारयेद्योहिपूर्वजान् माहात्म्यंपठतेभक्त्यामयोक्तंजागरोद्भवम् ५२ द्वादशीसंभवपुत्रकुलानांतारयेच्छतम् अगम्यागमनेपापमभक्ष्यस्यापिभक्षणे ५३ पापंविलयमायातिकृतेजागरणेसुत अज्ञानाद्यत्कृतंपापंज्ञात्वायत्पातकंकृतम् ५४ सर्वंतन्मार्जितंपापमिहजन्मनियत्कृतं सिद्ध्यंतिसर्वकार्याणिमनसाचिंतितान्यपि ५५ द्वादश्यांचैवचतुर्वक्त्ररात्रौजागरणेकृते द्वादशीजागरेणैवमुक्तिंगच्छंतिमानवाः ५६ नतत्पुण्यंकुरुक्षेत्रेप्रयागेवसतांकलौ माहात्म्यंवसतांपुंसांयत्पुण्यंद्वादशीषुच ५७ नाश्वमेधसहस्रैस्तुनचतीर्थावगाहनात् यत्फलंप्राप्यतेपुत्रद्वादशीजागरेकृते ५८ पठेद्वाशृणुयाद्वापिमाहात्म्यंद्वादशीभवम् सर्वपापविशुद्धात्मासलभेच्छाश्वतींगतिम् ५९ सर्वेदुष्टाःसमास्तस्यसौम्यास्तस्यसदाग्रहाः संततेर्विनियोगात्स्याद्द्वादशीयस्यकारणम् ६० ममकीर्तिकरैर्नित्यंनाविपद्येतकर्हिचित् रणेराजकुलेचैवसर्वदाविजयीभवेत् ६१ धर्मोपरिमतिर्नित्यंभक्तिर्मयिसुनिर्मला पातकैर्नैवलिप्येतद्वादशीभक्तिमान्नरम् ६२ प्रेतत्वंनैवतस्यास्तिकृतेजागरणेमम एकादशींविनातस्यपरलोकगतिर्नहि ६३ तस्मात्सर्वप्रयत्नेनकलौकार्योहिमद्दिनम् ततःप्रभातेद्वादश्यांकार्योमत्स्योत्सवोबुधैः ६४ मार्गशीर्षेशुक्लपक्षेयथाविध्युपचारतः अथमार्गशिरेमासिदशम्यांनियतात्मवान् ६५ कृत्वादेवार्चनंधीमान्नाग्निकार्यंयथाविधि शुचिर्वासाःप्रसन्नात्माहव्यमन्नंसुसंस्कृतम् ६६ वर्जयेद्दन्तकाष्ठंतुततश्चाचम्ययत्नतः स्पृष्ट्वाकाशानिसर्वाणिध्यात्वावैमांगदाधरम् ६७ शंखचक्रगदापाणिंकिरीटंपीतवाससम् प्रसन्नवदनांभोजंसर्वलक्षणलक्षितम् ६८ ध्यात्वापुनर्जलंहस्तेगृहीत्वाभानुमध्यगम् ध्यात्वार्घ्यंदापयेत्तत्रकरतोयेनमानवः ६९ एवमुच्चारयेद्वाचंतस्मिन्कालेचतुर्मुख एकादश्यांनिराहारःस्थित्वाहनिपरेत्वहम् ७० भोक्ष्यामिपुंडरीकाक्षशरणंमेभवाच्युत एवमुक्त्वाततोरात्रौमममूर्तेश्चसन्नि

धौ ७१ जपेन्नारायणायेतिस्वयंतत्रविधानतः ततःप्रभातेविमलेनदींगत्वासमुद्रगाम् ७२ इतरंवातडागंवागृहे
वानियतात्मवान् आनीयमृत्तिकांशुद्धांमंत्रेणानेनमानवः ७३ वंदयेद्देवदेवेशंसदाशुद्धोभवेन्नरः धारणपोष-
णंत्वत्तोभूतानांदेविसर्वदा ७४ तेनसत्येनमेपापंयावन्मोचयसुव्रते ब्रह्मांडोदरतीर्थानिकरैःस्पृष्टानिदैवतैः
७५ तेनेमांमृत्तिकांस्पृष्ट्वा वरंप्राप्ते त्वयोद्धृताम् त्वयिनित्यंरसाःसर्वेस्थितावरुणसर्वदा ७६ तेनमांमृत्ति
कांप्लाव्यपूतांकुरुष्वमाचिरम् एवंमृद तथातोयंप्रसादात्माचआलभेत् ७७ निष्कृत्याशेषमृदयापिंडमालिप्य
वैजले तस्मिन्नरःसदासम्यग्वकुर्वन्नुपचारतः ७८ स्नात्वावश्यकंकृत्वापुनर्ममगृहंव्रजेत् तत्राराध्यमहा
योगिन्द्रंवनारायणंहरिम् ७९ केशवायनमःपादौकटिंदामोदरायच जानुयुग्मंनृसिंहायउरःश्रीवत्सधारि
णे ८० कंठेकौस्तुभनाभायवक्षःश्रीपतयेतथा त्रैलोक्यविजयायेतिबाहूसर्वात्मनेशिरः ८१ रथांगधारिणेच
क्रंकरायेतिचवारिज गंभीरायेतिचगदामंभोजंशांतमूर्तये ८२ एवमभ्यर्च्यदेवेशंदेवनारायणंप्रभुम् पुनस्त-
स्याग्रतःकुंभांश्चतुरःस्थापयेद्बुधः ८३ जलपूर्णान्समाल्यांश्चवासितचंदनलेपितान् चूतपल्लवसंयुक्तान्सित
वस्त्रावगुंठितान् ८४ छादितांस्ताम्रपात्रैश्चतिलपूर्णैःसकांचनैः चत्वारस्तेसमुद्राश्चकलशाःसंप्रकीर्तिताः ८५
तेषांमध्येशुभंपीठंस्थापयेद्वस्त्रगर्भितम् तस्मिन्सुवर्णंरौप्यंवाताम्रंवानारवतया ८६ अलाभेसर्वपात्राणां
पालाशंपात्रमिष्यते तोयपूर्णंचतत्कृत्वातस्मिन्पात्रेततोन्यसेत् ८७ सौवर्णंमत्स्यरूपंचकृत्वादेवंजनार्दनं
देवदेवांगसंयुक्तंश्रुतिस्मृतिविभूषितम् ८८ तत्रानेकविधैर्भक्ष्यैःफलैःपुष्पैश्चशोभितम् गंधधूपैश्चवस्त्रैश्च
अर्चयित्वायथाविधि ८९ रसातलगतावेदायथादेवत्वयोद्धृताः मत्स्यरूपेणतद्वन्मांभवादुद्धरकेशव ९०
एवमुच्चार्यतस्याग्रेजागरंतत्रकारयेत् यथाविभवसारेणप्रभातेविमलेतथा ९१ चतुर्णांब्राह्मणानांचचतुरोदा

पयेद्वृदान् पूर्वेचबह्वृचेदद्याच्छांदोग्येदक्षिणे तथा ९२ यजुःशाखान्वितेदद्यात्पश्चिमेघटमुत्तमम् उत्तरं
कामतोदद्यादेषएवविधिःस्मृतः ९३ ऋग्वेदःप्रीयतांपूर्वेसामवेदस्तुदक्षिणे यजुर्वेदःपश्चिमतोह्यथर्वः
श्चोत्तरेणतु ९४ अनेनक्रमयोगेणप्रीयतामितिवाचयेत् मत्स्यरूपंतुसौवर्णमाचार्यायनिवेदयेत् ९५
गंधधूपैस्तुवस्त्रैस्तुसंपूज्यविधिवत्क्रमात् यास्त्विमंसरहस्यंचमंत्रेणैवोपपादयेत् ९६ विधानंविधिवत्कृत्वादा-
ताकोटिगुणोत्तरे प्रतिपद्यगुरुंयस्तुमोहाद्धिप्रतिपद्यते ९७ सकोटिजन्मनरकेपच्यतेपुरुषाधमः विधानस्यप्र
दातायोगुरुरित्युच्यतेबुधैः ९८ एवंदत्वाविधानेनद्वादश्यांमासमर्चयेत् विप्राणांभोजनंदद्याद्यथाशक्त्याचद
क्षिणाम् ९९ भुंजीतसहितोविप्रैर्वाग्यतःसंयतेंद्रियः अनेनविधिनायस्तुकुर्यान्मत्स्योत्सवंनरः १०० तस्यपु
ण्यफलंचाग्र्यंशृणुसत्यवतांवर आयुश्चब्रह्मणातुल्यंलभेद्यदिमहाव्रतः १०१ तदावैत्वस्यधर्मस्यफलंकथ
यितुंभवेत् यइमंश्रावयेद्भक्त्याद्वादशीकल्पमुत्तमम् शृणोतिवासपापैस्तुसर्वैरेवविमुच्यते १०२ इतिश्रीस्कंदपु०मार्ग०
मा०विष्णुचतुर्मुखसंवादेमत्स्योत्सवकथनंनामत्रयोदशोऽध्यायः १३ छ श्रीभगवानुवाच येत्वयावैकृताःप्र-
श्नाःपूर्वंप्रश्नविदांवर तान्वर्णयिष्येक्रमशोनिशामयस्वनिश्चितम् १ सहोमासेचदेवोवैकीर्तियुक्तोहिकेशवः
तस्यपूजाचकर्तव्यायथापूर्वंप्रभाषिता २ ब्राह्मणंकेशवंकृत्वातत्पत्नींचैवकीर्तिते दंपतीविधिवत्पूज्यौवस्त्राभ-
रणधेनुभिः ३ दंपतीपूजितौवत्सपूजितोहंनसंशयः तस्मादवश्यंसंपूज्यौदंपतीममतुष्टिदौ ४ दानंचविवि
धंकार्यंममपुष्टिकरंपरम् गोदानंभूमिदानंचस्वर्णदानंविशेषतः ५ वस्त्रदानंततःशय्यातथालंकरणानिच सा
भ्यदानंप्रकर्तव्यंममसंतोषकारकम् ६ सर्वेषामेवदानानांविशेषंचाधिकंस्मृतम् वसुंधरातथाधेनुर्विद्यादानंत-
थैवच ७ दत्तेदानत्रिकेवत्सभवेत्प्रीतिर्ममातुला तस्मान्नरैस्तुकर्तव्यंसहोमासेत्रिकंशुभम् ८ स्नानस्यचविधिं

सम्यक्पुरैवोक्तोमयानघ पूजास्नानंचदानंचविधिरेषनसंशयः ९ मार्गशीर्षसमग्रंतु एकभुक्तेनयःक्षिपेत् भो
जयेद्यो द्विजान्भक्त्यासमुच्येद्व्याधिकिल्बिषैः १० कृषिभागीबहुधनोबहुधान्यश्चजायते किमत्रबहुनोक्तेनशृ
णुगुह्यपरमम ११ हुतभुग्ब्राह्मणश्चैववदनंमममानद ब्राह्मणाख्यंमुखंश्रेष्ठंनतथाहव्यवाहनः १२ ब्राह्मणा
ख्यंमुखेपुत्रहुतंकोटिगुणंभवेत् अग्न्याख्यंब्राह्मणाधीनंस्वतन्त्राब्राह्मणाःकिल १३ सशर्करंसर्पिर्युतंपायसं
शशिसन्निभम् होतव्यंब्राह्मणमुखेममतुष्टिकरंसुत १४ शुभ्रमंडकमोदककोकरसंयुतफेनकयाघृतपूरयुत
म् यजविप्रमुखेममतुष्टिकरंयदिइच्छसिदारसुतादिसुखम् १५ कुमुदेनसमप्रभसौरभदंशुभ्रभक्तयुक्तमथ-
मुद्गयुतम् सुरभीकृतपुष्कलसर्पिसमंकुरुविप्रमुखेहवनंहिसहे १६ पयसासहसर्पिषाकथितंबहुकारिकचा
कुरुफलैःसितया सहहीरकरंफलनागरयासुतशारकसुतलशुभ्रकरम् १७ व्यंजनानिचशुभ्राणिमनोज्ञानिप्रि
याणिच कर्तव्यानिसहोमासेब्राह्मणार्थेचतुर्मुख १८ प्रियस्यकरणंकार्यमन्यत्तेषांप्रियंचयत् कृत्वैवभोज-
येद्विप्रान्श्रद्धयापरयासुत १९ रसस्वाद्वन्नपूर्वाहिभुंजतेवैयथायथा तथातथाममप्रीतिर्जायतेचसुदुर्लभा
२० तस्माज्ज्ञात्वातथाकार्यंयथातुष्यंतिब्राह्मणाः तुष्टैस्तैश्चाप्यहंतुष्टोभवामीहनसंशयः २१ श्रद्धस्वत्वंचतु
र्वक्त्रनतेमिथ्याब्रवीम्यहम् एतद्गुह्यंमयाप्रोक्तंश्रेयोर्थंतवमानद २२ आक्रोशयंतियद्विते अथवाप्रहरंतिचेत्
तथापितेनमस्यावैममप्रीत्याहमानद २३ एवंकार्यंसदापुत्रमार्गशीर्षेविशेषतः यदुक्तंभवताब्रह्मन्भोक्तव्यंकिं
शृणुष्वतत् २४ भोक्तव्यंममचोच्छिष्टंममभक्तिपरायणैः पवित्रकरणंपुत्रपापिनामपिमुक्तिदम् २५ ममाशनस्य
शेषंचयोभुनक्तिदिनेदिने शिक्थेशिक्थेभवेत्पुण्यंचांद्रायणशतोद्भवम् २६ अवशिष्टंयथोच्छिष्टंभक्तानांभोज-
नद्वयम् नान्यद्वैभोजनंतेषांभुक्त्वाचांद्रायणंचरेत् २७ अनर्पयित्वायोभुंक्तेअन्नपानादिकंचयत् श्वानविष्ठास

मंचान्नंपानंचमदिरासमम् २८ तस्मान्ममार्पयेत्पुत्रअन्नपानादिचौषधम् भक्षयेत्परयाभक्त्याअशुचेःशुचिकार
णम् २९ तीर्थयज्ञादिकफलंकलिदोषविनाशनम् ममोच्छिष्टंसुगात्रिद्मपिदुष्कृतकर्मणाम् ३० अन्येषांदेवता-
नांचनगृह्णीयाद्वभक्षितम् अभक्तानांचपक्वान्नंभुक्त्वाचनरकंव्रजेत् ३१ वक्तव्यमेवयत्प्रोक्तंतच्छृणुष्वसमाहितः
कथयिष्येनवप्रीत्याअपिगुह्यतरंमम ३२ ममनाममयवक्तव्यंसहैवैवविशेषतः कृष्णकृष्णेतिवक्तव्यंस्ममप्री
तिकरंपरम् ३३ प्रतिज्ञैषाचमेपुत्रनजानंतिसुरासुराः मनसाकर्मणावाचायोमेशरणमागतः ३४ सर्वोत्कृष्ट
चवैकुंठमत्प्रियांकमलामपि कृष्णकृष्णेतिकृष्णेतियोमांस्मरतिनित्यशः ३५ जलंभित्त्वायथापद्मंनरकादुद्ध
राम्यहम् ३६ विनोदेनापिदंभेनमोहाद्वालोभाच्छलादपि योमांभजतिसोवश्यंमद्भक्तोनावसीदति ३७ येवै
पठंतिकृष्णेतिमरणेपर्युपस्थिते यदिपापयुताःपुत्रनपश्यंतियमंक्वचित् ३८ पूर्वंवयसिपापानिकृतान्यपि
चकृत्स्नशः अंतकालेचकृष्णेतिस्मृत्वामामेत्यसंशयः ३९ नमःकृष्णायमहतेविवशोपिवदेद्यदि ध्रुवंपद
मवाप्नोतिमरणेपर्युपस्थिते ४० श्रीकृष्णेतिकृतोच्चारःप्राणैर्यदिवियुज्यते दूरस्थःपश्यतिचतस्वर्गतमंत
नायकः ४१ स्मशानेयदिरथ्यायांकृष्णकृष्णेतिजल्पति म्रियतेयदिवैपुत्रमामेवैतिनसंशयः ४२ दर्श-
नान्ममभक्तानांमृत्युमाप्नोतियःक्वचित् विनामत्स्मरणात्पुत्रमुक्तिमेतिसमानवः ४३ पापानलस्यदीप्तस्य
भयमाकुरुपुत्रक श्रीकृष्णनाममेघोत्थैःसिच्यतेनीरबिंदुभिः ४४ कलिकालभुजंगस्यतीक्ष्णदंष्ट्रस्यकिं
भयम् श्रीकृष्णनामदारूत्थवह्निदग्धःसनश्यति ४५ पापपावकदग्धानांकर्मचेष्टावियोगिनाम् भेषजं
नास्तिमर्त्यानांश्रीकृष्णस्मरणंविना ४६ मृत्युकालेऽपिमर्त्यानांपापिनांदत्तमिच्छताम् पापिनांनास्तिपाथे
यंश्रीकृष्णस्मरणंविना ४७ तत्रपुत्रगयाकाशीपुष्करकुरुजांगलम् प्रत्यहमंदिरेयस्यकृष्णकृष्णेतिकीर्त

नम् ४८ जीवितंजन्मसाफल्यंमुखंतस्यैवसार्थकम् सततंरसनायस्यकृष्णकृष्णेतिजल्पति ४९ स
कृदुच्चरितंयेनहरिरित्यक्षरद्वयम् बद्धःपरिकरस्तेनमोक्षायगमनंप्रति ५० नाम्नोस्ययावतीशक्तिःपापनिर्दह
नेमम तावत्कर्तुंनशक्नोतिपातकंपातकीजनः ५१ नापविद्धंभवेत्तस्यशरीरंनैवमानसम् नपापंनचवैक्ल·
व्यंकृष्णकृष्णेतिकीर्तनात् ५२ श्रीकृष्णेतिवचःपथ्यंनपठेद्यःकलौनरः पापमध्येचनभवेत्कलौतस्यैवमान·
से ५३ श्रीकृष्णेतिप्रजल्पंतंदक्षिणाशापतिर्नरम् श्रुत्वापमार्जतेपापंतस्यजन्मशतार्जितम् ५४ चांद्राय
णशतैःपापंपराकाणासहस्रकैः यन्नोपयातितद्यातिकृष्णकृष्णेतिकीर्तनात् ५५ नामभिर्नामकोटी
भिस्तोषोममभवेत्क्वचित् श्रीकृष्णेतिकृतोच्चारेप्रीतिरेवाधिकाधिका ५६ चंद्रसूर्योपरागेत्तुकोटियज्ञफ·
लंस्मृतम् तत्फलंसमवाप्नोतिकृष्णकृष्णेतिकीर्तनात् ५७ गुरुदाराभिगमनंहेमस्तेयाधिपातकम् श्रीकृ·
ष्णकीर्तनाद्यातिघर्मेतमोहिमंयथा ५८ युक्तोयदिमहापापैःपेयादिगमनादिभिः मुच्यतेचांतकालेपिसकृ
त्श्रीकृष्णकीर्तने ५९ अविशुद्धमनायस्तुविनाप्याचारवर्तनात् प्रेतत्वसोपिनाप्नोतिअंतेश्रीकृष्णकीर्तना
त् ६० मूकाभवतिसाजिह्वासतीयानुरसातलम् नसाचेत्कालिकालेयाश्रीकृष्णगुणवादिनी ६१ स्वचक्रे·
परचक्रेयाबाधाजिह्वाप्रयत्नतः कुरुतयाकलौपुत्रश्रीकृष्णगुणकीर्तनम् ६२ पापवल्लीमुखेतस्याजिह्वारूपे
णकीर्त्यते यानवक्तिदिवारात्रौश्रीकृष्णगुणकीर्तनम् ६३ पतिताशनखंडतुसाजिह्वारोगरूपिणी श्रीकृष्ण
कृष्णकृष्णेतिश्रीकृष्णेतिनजल्पति ६४ श्रीकृष्णनाममाहात्म्यमानरुत्थाययःपठेत् तस्याहंश्रेयसादाता
भवाम्येतन्नसंशयः ६५ श्रीकृष्णनाममाहात्म्यंत्रिसंध्यंहिपठेत्तुयः सर्वान्कामानवाप्नोतिसमृतःपरमांगतिं
६६ इतिश्रीस्कंदपुराणेमार्गशीर्षमाहात्म्येश्रीविष्णुचतुर्मुखसंवादेश्रीकृष्णनामवर्णनंनामचतुर्दशोऽ

श्रीभगवानुवाच शृणुध्यानंचतुर्वक्रवक्ष्यामिप्रीतिमांस्तव श्रुतेनैवचसौभाग्यं
लभतेमानवोभुवि १ अथश्रीमदुद्यानसंवीतहेमस्थलोद्भासिरत्नस्फुरन्मंडपांतः लसत्कल्पवृक्षाधउद्दीप्यरत्नस्थलाधिष्ठितांभोजपीठाधिरूढम् २ महानीलनीलाभमत्यंतबालंगुडस्निग्धवक्रांतविध्वस्तकेशम् अलिव्रातपर्याकुलोत्फुल्लपद्मप्रमुग्धाननंश्रीमदिंदीवराक्षम् ३ चलत्कुंडलोल्लासितंफुल्लगल्लस्फनासंस्कशोणाधरंसुस्मितास्यम् अनेकोल्लसत्कंठभूषालसंतंवहंतंनवंपौंडरीकस्रजंचम् ४ समुद्यत्सरोरस्थलंधेनुधूल्यास्फुपुष्टांगमष्टापदाकल्पदीप्तम् कटीरस्थलेचारुजंघोरुयुग्मेपिनद्धे क्वणत्किंकिणीजालदाम्ना ५ हसत्तलसद्बंधुजीवप्रसूनप्रभापाणिपादांबुजोदारकांत्या करेदक्षिणेपायसंवामहस्तेदधानंनवंशुद्धहैय्यंगवीनम् ६ महीभारभूतामराराति यूथानतःपूतनादीन्निहंतुंप्रवृत्तम् प्रभुंगोपिकागोपवृंदेनवीतंसुरेंद्रादिभिर्वंदितंदेवदेवम् ७ प्रभुंपूजयित्वात्वनुस्मृत्यकृष्णंभुजंगेंद्रवज्रादिभिर्भक्तिनम्राः सितांभोजहैय्यंगवीनेन्दुद्राविमिश्रेणदौग्धेनस प्रीणयेत्तम् ८ इतिमानसेवार्चयेदच्युतंयोनरःप्रत्यहंशश्वदास्तिक्ययुक्तः लभेत्सोचिरेणैवलक्ष्मीसमग्रामिहप्रेत्यशङ्गपरंधामभूयात् ९ मंत्रेश्वोक्तःपुरापुत्रआदौलोकमनोहरः अयोग्यायनदातव्योमंत्रराजस्त्वयाकृत १० यत्नेनगोपनीयंचरहस्यंशीघ्रसिद्धिदम् ११ अलसंमलिनंक्लिष्टंदंभमोहसमन्वितम् दरिद्रंरोगिणंक्रुद्धंरागिणंभोगलालसम् १२ असूयामत्सरग्रस्तशठपरुषवादिनम् अन्यायेनापिबहुलंपिशुनंदुष्टमानसम् १३ बह्वाशिनंक्रूरचेष्टमग्रण्यंचदुरात्मनाम् कृपणंपापिनंरौद्रमाश्रितानांभयंकरम् १४ एवमादिगुणैर्युक्तं शिष्यंनैवपरिग्रहेत् गृह्णीयाद्यदितद्दोषःप्रायोगुरुमुपस्पृशेत् १५ अमात्यदोषोराजानंजायादोषःपतियथा तथाशिष्यकृतोदोषोगुरुंप्राप्नोत्यसंशयम् १६ तस्माच्छिष्यंगुरुर्नित्यंपरीक्ष्यैवपरिग्रहेत् कायेनमनसावा

चागुरुशुश्रूषणेरतम् १७ अस्यैववृत्तिमाश्रित्ययुक्तंमोक्षकृतोद्यमम् ब्रह्मचर्यरतंनित्यंदृढव्रतमकल्मषम्
१८ प्रसन्नहृदयंशश्वदशठंविमलाशयम् परोपकारनिरतंपरार्थविगतस्पृहम् १९ स्वचित्तवित्तदेहैस्तुप
रितोषकरंगुरोः आश्रितानांतथापुत्रपरितोषकरंशुचिम् २० ईदृग्विधायशिष्यायमंत्रंदद्यात्तुनान्यथा य
द्यन्यथावदेत्तस्मिन्देवताशापमापनेत् २१ शृणुपुत्रप्रवक्ष्यामिगुरोरपिचलक्षणम् एभिस्तुलक्षणैर्युक्तोगु
रुरेवभवेन्नृणाम् २२ ममचेताःप्रसन्नात्माविमन्युश्चसुहृन्नृणाम् साधुर्महान्सदालोकेसगुरुःपरिकीर्तितः
२३ ममव्रतकरोनित्यंवैष्णवानांसुसंमतः मदाश्रयकथासक्तोममोत्सवरतःसदा २४ कृपासिंधुःसुप
र्णार्थःसर्वसत्वोपकारकः निस्पृहःसर्वतःसिद्धःसर्वविद्याविशारदः २५ सर्वसंशयसच्छेत्तानलसोगुरुरीदृ
शः ब्राह्मणःसर्वकालज्ञोकुर्यात्सर्वेष्वनुग्रहम् २६ पूर्वोक्तलक्षणैर्युक्तःशिष्यईदृग्विधोगुरोः गृण्हीयात्तुमंत
न्मंत्रंमार्गशीर्षेमदायने २७ वैष्णवानांव्रतानांचकुर्यात्स्वीकरणंबुधः मत्प्रियंशृणुयाच्छश्वच्छ्रीमद्भागवतंपरं
२८ श्रीमद्भागवतंनामपुराणंलोकविश्रुतम् शृणुयाच्छ्रद्धयायुक्तोमनःसंतोषकारणम् २९ नित्यंभागवतंयस्तु
पुराणंपठतेनरः प्रत्यक्षरंभवेत्तस्यकापिलादानजंफलम् ३० श्लोकार्द्धंश्लोकपादंवानित्यंभागवतोद्भवम्
पठतःशृणुयाद्यस्तुगोसहस्रफलंलभेत् ३१ यःपठेत्प्रयतोनित्यंश्लोकंभागवतंसुत अष्टादशपुराणानां
फलमाप्नोतिमानवः ३२ नित्यंममकथायत्रतत्रतिष्ठंतिवैष्णवाः कलिबाह्यानरास्तेवैयेर्चयंतिसदाहिमाम्
३३ वैष्णवानांतुशास्त्राणियेर्चयंतिगृहेनराः सर्वपापविनिर्मुक्ताभवंतिसुरवंदिताः ३४ येर्चयंतिगृहेनित्यं
शास्त्रंभागवतंकलौ आस्फोटयंतिविघ्नानितेषांप्रीतोभवाम्यहम् ३५ यावद्दिनानिहेपुत्रशास्त्रंभागवतंगृहे
तावत्पिबंतिपितरःक्षीरंसर्पिर्मधूदकम् ३६ यच्छंतिवैष्णवेभक्त्याशास्त्रंभागवतंहिये कल्पकोटिसहस्रा

णिमर्त्यलोकेवसंतिते ३७ येर्चयंतिसदागेहेशास्त्रंभागवतंनराः प्रीणितास्तैश्चविबुधायावदाभूतसंप्लवम्
३८ श्लोकार्धंश्लोकपादंवावरंभागवतंगृहे शतशोथसहस्रैश्चकिमन्यैःशास्त्रसंग्रहैः ३९ नयस्यतिष्ठतेशास्त्रं
गृहेभागवतंकलौ नतस्यपुनरावृत्तिर्याम्यपाशात्कदाचन ४० कथंसवैष्णवोज्ञेयःशास्त्रंभागवतंकलौ गृहेनति
ष्ठतेयेषांश्वपचादधिकाहिते ४१ सर्वस्वेनापिलोकेशकर्तव्यःशास्त्रसंग्रहः वैष्णवैस्तुसदाभक्त्यातुष्ट्यर्थंमम
पुत्रक ४२ यत्रयत्रभवेत्पुण्यंशास्त्रंभागवतंकलौ तत्रतत्रसदैवाहंभवामित्रिदशैःसह ४३ तत्रसर्वाणितीर्था
निनदीनदसरांसिच यज्ञाःसप्तपुरीनित्यंपुण्याःसर्वेशिलोच्चयाः ४४ श्रोतव्यंममशास्त्रंहियशोधर्मजयार्थि
ना पापक्षयार्थंलोकेशमोक्षार्थंधर्मबुद्धिना ४५ श्रीमद्भागवतंपुण्यमायुरारोग्यपुष्टिदम् पठतःशृण्वतो
वापिसर्वपापैःप्रमुच्यते ४६ नशृण्वंतिनरहृष्यातिश्रीमद्भागवतंपरम् सत्यंसत्यंहिलोकेशतेषांस्वामीसदाय-
मः ४७ नगच्छंतियदामर्त्याःश्रोतुंभागवतंसुत एकादश्यांविशेषेणनास्तिपापतरंततः ४८ श्लोकंभागव
तंचापिश्लोकार्धंपादमेववा लिखितंतिष्ठतेयस्यगृहेतस्यवसाम्यहम् ४९ सर्वाश्रमाभिगमनंसर्वतीर्था
वगाहनम् नान्यथापावनंनृणांश्रीमद्भागवतंयथा ५० यत्रयत्रचतुर्वक्त्रश्रीमद्भागवतंभवेत् गच्छामितत्रत-
त्राहंगौर्यथासुतवत्सला ५१ मत्कथावाचकंनित्यंमत्कथाश्रवणेरतम् मत्कथाप्रीतिमनसंनाहंत्यक्ष्यामित
न्नरम् ५२ श्रीमद्भागवतंपुण्यंदृष्ट्वानोत्तिष्ठतेहियः संवत्सरंतस्यपुण्यंविलयंयातिपुत्रक ५३ श्रीमद्भागवतंदृ
ष्ट्वाप्रत्युत्थानाभिवादनैः सन्मानयेत्तंदृष्ट्वाभवेत्प्रीतिर्ममातुला ५४ दृष्ट्वाभागवतंदूरात्प्रक्रमेत्संमुखंहियः
पदेपदेश्वमेधस्यफलमाप्नोत्यसंशयम् ५५ उत्थायप्रणमेद्योवैश्रीमद्भागवतंनरः धनंपुत्रांस्तथादारान्भक्तिंच
प्रददाम्यहम् ५६ महाराजोपचारैस्तुश्रीमद्भागवतंसुत शृण्वंतियेनराभक्त्यातेषांवश्योभवाम्यहम् ५७

ममोत्सवेषुसर्वेषुश्रादौभागवतंपरम् समर्चयंतिभक्त्यायेममाभेदेनसुव्रत ५८ वस्त्रालंकरणैःपुष्पैर्धूपदी
पोपहारकैः वशीकृतोहृढवत्ससास्त्रियःसत्पतिर्यथा ५९ इतिश्रीस्कंदपुराणेमार्गशीर्षमाहात्म्येश्रीविष्णु
चतुर्मुखसंवादेपंचदशोऽध्यायः १५ ॐ ब्रह्मोवाच कस्मिन्तीर्थेहिदेवेशमार्गशीर्षोऽधिकः
स्मृतः किंफलंचभवेत्तस्मिन्नेतत्सर्वंवद त्वभो १ श्रीभगवानुवाच. मथुरेतिसुविख्यातमस्तिक्षेत्रं
परंमम सुरम्याचप्रशस्ताचजन्मभूमिःप्रियामम २ पदेपदेतीर्थफलंमथुरायांचतुर्मुख यत्रतत्रनरः
तोमुच्यतेघोरकिल्बिषात् ३ सर्वधर्मविहीनानापुरुषाणांदुरात्मनाम् नरकार्तिहरापुत्रमथुरापापनाशिनी
४ कृतघ्नश्वसुरापश्चचौरोभग्नव्रतस्तथा मथुरांप्राप्यमनुजोमुच्यतेघोरपातकात् ५ सूर्योदयेतमोनश्ये
यथावज्रभयान्नगाः तार्क्ष्यंदृष्ट्वायथासर्पामेघावातहतायथा ६ तत्वज्ञानाद्यथादुःखंहरिंदृष्ट्वायथागजाः
तथापापानिनश्यंतिमथुरादर्शनात्सुत ७ श्रद्धयाभक्तियुक्तस्तुदृष्ट्वामधुपुरींनरः ब्रह्महापिविशुध्येत किंपु
नस्त्वन्यपातकी ८ मथुरांस्नातुकामस्यगच्छतस्तुपदेपदे निराशानिपतंतेचपापानिचशरीरतः ९ अनुषंग
णगच्छंतिवाणिज्येनापिसेवया मथुरास्नानमात्रेणपापंत्यक्त्वादिवंव्रजेत् १० नामापिगृण्हतामस्यसदैवत्वं
नसंशयः सदाकृतयुगंतत्रसदाचैवोत्तरायणम् ११ यःशृणोतिचतुर्वक्त्रमाथुरंमममंदिरम् अन्येनोच्चरिते
नैवसोपिपापात्प्रमुच्यते १२ त्रिरात्रमपियेतत्रवसंतिमनुजाःसुत तेषापुनातिसंदृष्टास्पृष्टाश्चरणरेणवः १३
यथातृणसमूहंतुज्वालयंतिस्फुलिंगकाः तथामहांतिपापानिदहतेमथुरापुरी १४ स्नानेनसर्वतीर्थानां
यत्स्यात्सुकृतसंचयः ततोधिकतरंप्रोक्तामथुरासर्वमंडले १५ चतुर्णामपिवेदानांपुण्यमध्ययनाच्चयत्
तत्पुण्यंजायतेतत्रमथुरास्मरणान्नृणाम् १६ अन्यत्रहिकृतंपापंतीर्थमासाद्यनश्यति तीर्थेषुयत्कृतंपापं

वज्रलेपोभविष्यति १७ मथुरायांकृतंपापंमथुरायांप्रणश्यति धर्मार्थकाममोक्षाख्यंस्थित्वातत्रलभेन्नरः १८ अन्यत्रदशभिर्वर्षैःप्रारब्धंभुज्यतेहियत् किल्बिषंचचतुर्वक्त्रमथुरेदशभिर्दिनैः १९ दिविनैवनपातालेनांतरिक्षेनमानुषे समंतुमथुरायांहिप्रियंममसदैवहि २० सर्वेषामेवतीर्थानांमाथुरंपरमंमहत् बालक्रीडनरूपाणिकृतानिसहगोपकैः २१ त्रिंशद्वर्षसहस्राणित्रिंशद्वर्षशतानिच यत्फलंभारतेवर्षेतत्फलंमथुरांस्मरन् २२ सन्निहत्यांतुयत्पुण्यंराहुग्रस्तेदिवाकरे ततोधिकंलभेत्पुत्रमथुरायांदिनेदिने २३ पूर्णेवर्षसहस्रेतुतीर्थराजेतुयत्फलम् तत्फलंलभतेपुत्रमथुरायांसहोदिने २४ पूर्णेवर्षसहस्रेतुवाराणस्यांचयत्फलम् तत्फलंलभतेपुत्रमथुरायांसहोदिने २५ गोदावरीद्वारकयोर्नरोयःक्षेत्रेगुरूणांक्षितिदारकेयः षण्मासकान्साधयतेगयायांसमंभवेन्नोदिनमेकमाथुरम् २६ नद्वारकाकाशिगयानमायागदाधरोयस्यसमंनतीर्थम् संतर्पितायद्यमुनाजलेनवांछंतिनोवैपितृपिंडदानम् २७ मथुरायांप्रकुर्वंतिपुरीसाधारणेदृशम् येनरास्तेपिविज्ञेयाःपापराशिभिरन्विताः २८ नदृष्टामथुरायेनदिदृक्षायस्यजायते यत्रतत्रमृतस्यापिमथुराजन्मजायते २९ भूमेरजांसिगणयेत्कालेनापिचतुर्मुख मथुराजानितीर्थानितेषांसंख्यानविद्यते ३० कुरुभोकुरुभोवासंमथुराख्यांपुरींप्रति वसामिसततंतस्यांगोपकन्याभिरावृतः ३१ रेरेसंसारमग्नाद्यशिक्षामेकांततःशृणु यदीच्छसिस्वकंसांद्रंवासंकुर्याकृतांपुरीम् ३२ अहोलोकोमहानंधोनेत्रयुक्तोनपश्यति माथुरेविद्यमानेपिसंसृतिंभजतेसदा ३३ मानुषींयोनिमतुलांलब्ध्वाभाग्यस्ययोग्यता वृथैवायुर्गतंतेषांनदृष्टामथुरापुरी ३४ अहोमतेःस्वदौर्बल्यमहोभाग्यविदोविदम् अहोमोहस्यमहिमामथुरानैवसेव्यते ३५ मथुरांतुपरित्यज्ययोन्यत्रकुरुतेमतिम् मूढोभ्रमतिसंसारेमोहितोममामायया ३६ मथुरामपिसंप्राप्ययोन्यत्रकुरुतेस्पृहाम् दुर्बुद्धस्तस्यकिंज्ञानंसोऽज्ञानेनविजृंभितः ३७ मा

आपित्रापरित्यक्तायेत्यक्तानिजबंधुभिः येषांक्वापिगतिर्नास्तितेषांममपुरीगतिः ३८ पापराशिभराक्रांतायेदारि
द्र्यपराजिताः येषांक्वापिगतिर्नास्तितेषांममपुरीगतिः ३९ सारात्सारतरंस्थानंदुर्लभाद्दुर्लभतरंपरम् गतिमन्वेषमा
णानांमथुरापरमागतिः ४० नतत्पुण्यैर्नतद्दानैर्नतपोभिर्नतुस्तवैः नलभ्यंविविधैर्योगैर्लभ्यंमदनुभावनः ४१
मयियेषांस्थिराभक्तिर्भूयसीयेषुमत्कृपा तेषामेवहिधन्यानांमथुरायांभवेद्गतिः ४२ यैर्योगैर्योगयुक्तस्यब्र-
ह्मज्ञस्यमनीषिणः सागतिस्त्यजतःप्राणान्मथुरायांनरस्यच ४३ काश्यादिपुर्योयदिसंतिलोकेतासांतुमध्ये
मथुरैवधन्या याजन्ममौंजीव्रतमुक्तिदानैर्नृणांचतुर्धाविदधातिमुक्तिम् ४४ नयोगैर्योगनिर्लभ्यामन्वंतरशतै-
रपि अन्यत्रहेलयामात्रंलभंतेयत्प्रसादतः ४५ नपापेभ्योभयंयत्रनभयंयत्रवैयमात् नगर्भवासभीर्यत्रनक्ले
शंकोनसंश्रयेत् ४६ मथुरायांचयत्पुण्यंतस्यपुण्यफलंशृणु मथुरायांसमासाद्यमथुरायांमृताहिये ४७ अ-
पिकीटपतंगाद्याजायंतेतेचतुर्भुजाः कूलात्पतंतियेवृक्षास्तेपियांतिपरांगतिम् मूकाजडांधबधिरास्तेयानिय
मवर्जिताः ४८ कलौनैवमृतायेचममलोकंव्रजंतिते सर्पदष्टाःपशुहताःपावकांबुधिनाशिताः ४९ लब्ध्वाप्य
मृत्यवोयैस्तुमाथुरेममलोकगाः सत्यसत्यमुनिश्रेष्ठध्रुवेशपथपूर्वकम् ५० सर्वाभीष्टप्रदंनान्यमथुरायाःसमंक्व
चित् त्रिवर्गदाकामिनांयामुमुक्षूणांचमुक्तिदा ५१ भक्तिस्याभक्तिदाकस्तांमथुरांनाश्रयेद्बुधः एतादृशीमधुपु
रीकर्तव्यामार्गशीर्षके ५२ तस्याभावेपुष्करंहिकर्तव्यंविधिपूर्वकम् ज्येष्ठंहिब्रह्मणःकुंडंमध्यंकुंडंचवैष्णवं
५३ कनिष्ठंरुद्रदैवत्यमितिजानीहिबुद्धिमन् एषुस्नानंचदानंचश्राद्धंचविधिपूर्वकम् ५४ पूजाचमहतीका
र्याममप्रीतिकराकृत पूर्णायांतुभवेत्पुत्रसहोमासेषुपुत्रक ५५ धरादानंचकर्तव्यपूर्णायांविधिपूर्वकम्
सहोमासेहिपूर्णायांसप्तदानंचकारयेत् ५६ ब्रह्मभोज्यंहिकर्तव्यंयथाविभवसारतः पूर्णायामेवकर्तव्यउत्से

वोन्नतपूर्तये ५७ यादृशीमथुरापुत्रसहोमासेममप्रिया नतथातीर्थराजाद्यातदभावेचपुष्करम् ५८ पुष्करेमथु
रायांवैपूर्णाकार्याविचक्षणैः यत्रकुत्रापिवाकार्याविधियुक्ताचपूर्णिमा ५९ स्नानंदानंतथापूजांपूर्णायांनकरोति
ः षष्टिवर्षसहस्राणिपच्यतेरौरवादिषु ६० तस्मात्सर्वप्रयत्नेनमान्यापूर्णाविचक्षणैः मार्गशीर्षेणसंयुक्ताऽनं-
तफलदायिनी ६१ यथामेकथितंवत्समार्गशीर्षंममप्रियम् करोतियोनरोभक्त्यातस्यपुण्यफलंशृणु ६२ तीर्थेषु
तेषुयत्पुण्यंयत्पुण्यंव्रतकोटिभिः सर्वयज्ञेषुयत्पुण्यंतत्पुण्यंसमवाप्नुयात् ६३ अपुत्रोलभतेपुत्रंनिर्धनोधनमेव
च विद्यार्थीचतथाविद्यांरूपार्थीरूपमाप्नुयात् ६४ ब्राह्मणोब्रह्मवर्चस्वीक्षत्रियोविजयीभवेत् वैश्योनिधिप
तित्वंचशूद्रःशुद्ध्येनपातकात् ६५ यद्दुर्लभंचदुःप्राप्यंत्रिषुलोकेषुमानद तत्सर्वंप्राप्नुयान्मर्त्यःसहोमासेनसंश
यः ६६ यद्यप्येतेषुकामेषुसक्तायेमानवाःस्कन तुष्टाल्पंतेचतुर्वक्त्रनकामाहोंमहीभुज ६७ सुदुर्लभाहिमद्भ-
क्तिर्ममवश्यकराशुभा सावैसंप्राप्यतेपुत्रसहोमासेकृततया ६८ ममप्रीतिकरंमासंसर्वदाममवल्लभम् स-
र्वंसंप्राप्यतेमुष्मान्मत्प्रसादाच्चतुर्मुख ६९ इतिश्रीस्कंदपुराणेमार्गशीर्षमाहात्म्येश्रीविष्णुचतुर्मुखसंवादे
षोडशोऽध्यायः १६ सर्वश्लोकसंख्या ८५६ इतिश्रीज्योतिर्विदकुलावतंसव्यंकटरामात्मजहरिकृष्णवि
निर्मितेबृहज्ज्योतिषार्णवेअष्टमेधर्मस्कंधेचतुर्थेमासस्तबकेमार्गशीर्षमाहात्म्यंनवमम् ९ श्रीरस्तु

यह मार्गशीर्षमाहात्म्य मुंबईमें ५० श्रीधरशिवलालके मन्नायुक्तज्ञानसागर छापखानामें छाप्यो सं. १९४५ शा. १८१० स. १८८९

इतिमासस्तबकेमार्गशीर्षमाहात्म्य समाप्त

अथमासस्तबकेपौष मासमाहात्म्य प्रारंभः

वृ·ज्यो·र्ण·
धर्मस्कंध·
३६०

भा·म·स्क·४
पौष·मा·१०
चित्र·


संवाद·
सूत·
शौनकादि
सुमतिर्नृ·
रा
अगस्त्य
विगांगदरा·
गालवमु
कुम्भ दै
कृष्ण·
ब्राह्मण
सुधी
सत्यव्रतरा
ऋषिसत्
सरस्व·म·
भगवान्‌रा·
कण्वऋ·
नालधाना
दुर्वा
भोजन·
विमान·
यम·
नार
द्रुमिल
ऋ·
कन्या·
गंधर्व
अजगर·
नाषवणीनदी·
शिव
वर्माविश्य·
चंद्रशर्मापु·
शिशुमार·
कास्यप

अथपौषमासमाहात्म्यविषयानुक्रमणिका॰

अ॰	विषयः
१	सूतः शौनकंप्रतिपौषमासप्रशंसावर्णनपूर्वकस्नानमाहात्म्यं स्नानकालनिरूपणं ततोऽशक्तस्यान्यतोस्नानपुण्यग्रहणप्रकारं स्नानप्रशंसांचाह श्लोकाः ३५
२	अपराभोदीपदानफलं दीपस्थानानिचाह ततोस्मिन्मासेदीपदानेनस्कमतिः नृपःपुत्रंप्रापेतिकीर्तनंततः अपुत्रिणोनिंदाकथनं श्लो॰ ४२
३	पौषस्नानस्यदीपदानस्यारंभकालमाह॰ मासपर्यंतंस्नानसमयमुक्त्वाऽशक्तस्यपक्षांतरमाह॰ ततः चित्रान्नभक्षणमाहात्म्यवर्णनपूर्वकं तद्भक्षणेनचित्रांगदस्यलक्ष्मीप्राप्तिर्जातेति कथनम् श्लोकाः ५५
४	धनुर्मासव्रतविधानश्रवणेच्छुशौनकंप्रति सूतः तद्व्रतपूजाविधानमाह श्लो॰ २०
५	पौषमासव्रतकारिणोयमनियमान् व्रतधर्मांश्चाह ततः करणीयदानानि दानफलानि दानप्रसंगेकण्वोपदेशेनभृंगवान् राजाउपानहदानेन पादरोगान् मुक्तोबभूवेति कथाप्रसंगंचाह श्लोकाः ५०
६	तुलसीमाहात्म्यकथनं श्लो॰ ३४
७	विष्णुपूजनविधिः श्लो॰ ३८
८	पौषमासेवनभोजनंधात्रीपूजनंचावश्यकंकर्तव्यमितिवर्णनपूर्वकं माल्यवान्नृपस्येतिहासकथनम् श्लो॰ ४१
९	पौषमासेवस्त्रदानेनातिपापिनोइंद्रद्युम्नस्यनरकान्मुक्तिकथनम् श्लो॰ ५८
१०	माहिष्मत्यांकुत्सदैत्यकृष्णयोर्महायुद्धं ततः पौषेकांस्यदानेनसर्वकामनासिद्धिर्भवतीति दैत्यायवरदानम् श्लो॰ ६२
११	एकादशेऽध्यायेमौनव्रतविधानकथनं श्लो॰ १८
१२	पौषादित्यव्रतविषयेसत्यध्वजनृपस्येतिहासवर्णनम्॰ श्लो॰ ४९
१३	पौषेप्रातःस्नानप्रसंगेनदुमिलऋषेर्जलप्रोक्षणादजगरस्यपुनःगंधर्वदेहप्राप्तिवर्णनं श्लो॰ ४६
१४	पौषपौर्णिमाव्रतविषयेशिववर्मावैश्यस्येतिहासवर्णनम्॰ श्लो॰ २५
१५	पौषपौर्णिमायांशिशुमारव्रतविधिवर्णनम्॰ श्लोकाः २३

इतिपौषमासविषयानुक्रमणिका समाप्ता॰

श्रीगणेशायनमः शौनकउवाच सूतसूतमहाभाग सर्वशास्त्रविशारद त्वत्तः श्रुतानिमासानांमाहात्म्यानिमयानघ १ इदानींश्रोतुमिच्छामिपौषमाहात्म्यंविस्तरम् तन्नःकथयसाधोत्रयदिविष्णुकथाश्रयम् २ प्रायेकलियुगेघोरेनराःपुण्यविवर्जिताः दुराचाररताःसर्वेसत्यवार्तापराङ्मुखाः ३ परापवादनिरतापरहिंसापरायणाः एतेषांनष्टबुद्धीनांपौषमासोऽतिमोक्षदः ४ इतिश्रुतंमयापूर्वंकुरूपान्मुनिसत्तमात् विस्मयोमेमहान्जातस्तस्मात्पृच्छामिसूतज ५ त्वंहिसर्वपुराणानांभोक्ताज्ञाताऽसिनिश्चितम् अतःपौषेनरःकिंवाकर्तव्यंवदनिश्चितम् ६ कोधर्मःसाधनीयोत्रकेनविष्णुःप्रसीदति सूतउवाच साधुसाधुमहाबाहोवचनंतेउदाहृतम् ७ सर्वेषामेवलोकानामत्यंतमुपकारकम् तदहंतेभिधास्यामिशृणुष्वावहितोमुने ८ यथाउडुगणेचंद्रोग्रहाणांभानुसत्तमः अश्वत्थःसर्ववृक्षाणांवृन्दगंगायथापगाम् ९ सर्वेषामेवमासानांपौषमासस्तथामुने नपौषात्परमोमासोनपौषात्परमस्कस्वम् १० नपौषात्परमोधर्मोनपौषान्मोक्षदःपरः तस्मात्सर्वप्रयत्नेनसंसेव्योयंनरःसदा ११ आराधितेपौषमासे सर्वान्कामानवाप्नुयात् शौनकउवाच कथमाराधनीयोसौकिंधर्मोस्मिन्व्रतस्यच १२ तत्सर्वंवदमेक्षिप्रंयेनाविष्णुप्रियोभवेत् सूतउवाच संप्राप्तेकार्मुकेदित्येप्रातःस्नायीभवेन्नरः १३ स्नानमात्रेणसर्वेषांधर्माणांफलभाग्भवेत् अस्नातःखलुकर्माणिकुर्वन्नफलभाग्भवेत् १४ नाडिद्वयावशिष्टायांयावन्नस्नातिकृत्तिका तावत्स्नानंचरेत्पौषेनान्यथापौषमिष्यते १५ तडागेनिर्झरेकूपेपल्वलेऽथापगामथ यत्रकुत्रापिकर्तव्यंपौषस्नानंविशेषतः १६ धनुराशौरवौयातेसर्वत्रमुदकंप्रति लोकानामभ्रनाशायदिविजैराविशन्हरिः १७ मार्गसमीक्ष्यतेतावद्यावत्सू

---

१ कुरूपान् अष्टावक्रात् २ अल्पजलाशये ३ धनुराशौ अपररात्रौवृश्चिकलग्ने रवौ सूर्ये यातेउदिते सति तत्कालमारभ्य यावत्सूर्योदयो भवेत्तावत्पर्यंतं सर्वजलाशयं प्रति दिविजैर्देवैस्सह हरिविष्णुः आविशत् प्रविशतीत्यर्थः ४ अभ्रनाशाय पापनाशाय

र्योदयोभवेत् ततःशापंसंप्रदत्वास्वस्थानंयातिकेशवः १८ तस्मान्नरैःप्रयत्नेनकर्तव्यंस्नानमादरात् स्नानेनसफलोधर्मोस्नानेनसकलाःक्रियाः १९ स्नानेनविष्णुसंतोषंप्राप्नोत्येवनसंशयः प्रातःस्नानात्पौषमासेनधन्योऽन्योस्तितत्वतः २० गोविंदस्यप्रीत्यर्थंप्रातःस्नानंसमाचरेत् पितरोमुक्ततांयांतिपौषस्नानेनभार्गव २१ संप्राप्तेपौषमासेतुपौषस्नानंनचाचरेत् तस्यसंवत्सरंकृत्यंनश्यत्येवनसंशयः २२ गोविंदस्यप्रीत्यर्थंस्नानार्थंगच्छतोमुने पदेपदेश्वमेधस्यफलमेतन्नदुर्लभम् २३ अशक्तश्चेन्नसामर्थ्यंदत्वान्यस्मैधनादिकम् तस्यहस्तात्फलंग्राह्यंतेनस्नानफलंभवेत् २४ अथवायोचरेत्स्नानपौषमासेनरोत्तमः दत्वातस्मैचप्रावरणंतेनपुण्यफलंभवेत् २५ तावद्गर्जंतिपापानिशरीरेस्मिन्नरस्यच तावत्पतंतिपितरोनरकेभृशदारुणे २६ तावत्संसारदुःखानिविविधानिनरस्यच नयावत्पौषसंप्राप्तोदुःखदानिभवंतिच २७ संप्राप्तेपौषमासेतुगर्जंतिपितरोदिवि अहोअस्मत्कुलेकोपिपौषस्नानंकरिष्यति २८ इत्याक्रोश्यप्रतीक्ष्यंतेपितरःसर्वतोभृशम् तस्मात्सर्वप्रयत्नेनसत्यागोविंदप्रीतये २९ अवश्यमेवकर्तव्यंप्रातःस्नानंविशेषतः सएवहिनरोधन्योसएवधनवान्नरः ३० जन्मनासफलःसोपियेनपौषःस्वसेवितः पुरावैब्रह्मणाब्रह्मन्सर्वेधर्माश्चचैकतः ३१ एकतःपौषमासस्यस्नानजंतुलितंफलं सर्वेषामेवधर्माणांविशिष्टंस्नानजंफलम् ३२ तदाप्रभृतिलोकेस्मिन्सर्वार्थपरिसाधनम् स्थापितंब्रह्मणातस्मात्सत्यमेवनसंशयः ३३ पौषस्नानेनबहवोमुक्तिंप्राप्ताःसुदुर्लभाम् नपौषमासात्परमस्तिपावनंनपौषमासात्परमोहिधर्मः नपौषमासात्परमंस्वकृत्यंनपौषकृत्यंवदतोहिलोके ३५ इतिश्रीस्कंदपुराणेपौषमासमाहात्म्येप्रातःस्नानप्रशंसनंनामप्रथमोऽध्यायः १ ७२ सूतउवाच वस्वराशौतुसंप्राप्तेश्रीसूर्येशृणुशौनक दीपदानंप्रकर्तव्यंगोविंदप्रियतामिति १ अस्मिन्मासेदीपदानंविशेषेणप्रशस्यते तस्मात्सर्वप्रयत्नेनकर्त-

व्यंदीपदानकम् २ देवालयेनदीतीरेअश्वत्थस्यचसन्निधौ अथवायज्ञशालायांगोष्ठेकुर्याच्चदीपकम् ३ चतु-
ष्पथेराजमार्गेब्राह्मणस्यचवेश्मनि योदीपंकुरुतेह्यस्मिन्तस्यपुण्यंवदाम्यहम् ४ कुरुक्षेत्रेप्रयागेचतथागोदाव-
रीतटे कोटियज्ञेनयत्पुण्यंतत्पुण्यंसमवाप्यते ५ नदीपात्परतोमित्रंनदीपात्पारदर्शकः नदीपसदृशोधर्मोनदी-
पात्साधनंपरम् ६ तस्मात्सर्वप्रयत्नेनदीपदानंसमाचरेत् दीपेनसर्वान्कामान्वैप्राप्नोत्येवनसंशयः ७ मासेस्मिन्
दीपदानेनसुमतिःपुत्रवानभूत् शौनकउवाच कोसौसुमतिनामाभूत्कथंपुत्रमवाप्तवान् ८ तत्कथ्यतां
महाभागश्रोतुंकौतूहलंहिमे सूतउवाच पुरावैदेहदेशेषुसुमतिर्नामभूमिपः ९ आसीत्सपरमज्ञानीश्रुति-
शास्त्रविशारदः आसमुद्रांक्षितिंसर्वांशास्तानिष्कंटकोभवत् १० श्रुतिस्मृतिपुराणज्ञोधनीचबहुबांधवः तस्य
भार्याविशालाक्षीसुनंदासीत्पतिव्रता ११ तयासहवसद्राजाएकचक्रास्थियांपुरीम् धर्मार्थकाममोक्षांश्चत्रि-
लोक्यांबुभुजेश्रियम् १२ आगतांश्चातिथीन्ब्रह्मन्वस्त्राच्छादनभोजनैः तोषयामासब्रह्मण्योतेषांपादाव-
नुस्पृशन् १३ कदाचिदागतोगस्त्योतस्याश्रमपदंमुनिः संप्राप्तमतिथिंराजाहर्षेणमहतादृतः १४ अर्घ्यपाद्यादि-
भिःपूजामुपविष्टस्यसोचिरत् निवेद्यगांकृतार्थोहंइतिराजानमब्रवीत् १५ किमागमनकार्यंमेकथ्यतांमुनिपुं-
गव नगुप्तंयदिचेत्कार्यंकरोम्येतन्नसंशयः १६ इत्युदाहृतमाकर्ण्यप्रहस्यऋषिपुंगवः राजानंकथयामासस्वमा-
गमनकारणम् १७ अगस्त्यउवाच राजन्नेवाश्रमेयज्ञोभवतीतिमयाश्रुतम् तंयज्ञंद्रष्टुमिच्छामिगमनंविद्धि
तन्नृपे १८ यज्ञार्थंगच्छतातेनमार्गेणचतवाश्रमम् दृष्ट्वाविस्मयमापन्नोकोन्वस्त्याश्रमेह्ययम् १९ इतिज्ञातुंप्र-
वेशोयंकृतोमेराजपुंगव गृहंतवश्रियंशीलंआतिथ्यंचतथामयि २० दृष्ट्वासंतोषमापन्नोचिरंभवसुखीनृप इदा- ३
नींगंतुमिच्छामितृषामांबाधतेभृशम् २१ इतिश्रुत्वाचनृपतिस्तूर्णंगत्वागृहंप्रति कथयामासभार्यायैतोषितंमुनिं

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

पुंगवम् २२ सनंदाकलशंपूर्णंगृहीत्वाऋषिसन्निधौ गत्वानिवेद्यऋषयेगृह्यतामुदकंमुने २३ अगस्तिरुवा
च अपुत्रिणोगृहे नूनंनगृह्णाम्युदकंतव पुत्रेणतरतेलोकान्पुत्रेणस्वर्गमश्नुते २४ अपुत्रिणोगृहेदेवानगृ
ह्णंतिहवींषिच तस्मात्त्वंपुत्रकामार्थान्नानाधर्मान्समाचर २५ साधयस्वतथात्मानंपुत्रवंतंनराधिप शस्तंतवगृहे
पश्चाद्ग्रहणमुदकादिकम् २६ इत्यृषेर्वाक्यमाकर्ण्यराजाचिंतापरायणः पादौगृहीत्वागस्त्यस्यसदारस्तमया
चत २७ स्वामिन्कथयमेमार्गंयेनजायांभवाम्यहम् भवद्विधामहद्विधानांदुःखंमोक्तुंचतादृशां २८ भ्रमंतिनैवस्वा
त्मार्थंइतिवेदावदंतिच तस्मात्कथयमेविप्रयेनाहंपुत्रवान्भवे २९ इदंहिसकलंराज्यंविनादुःखायकल्पते
शरणोहंतवमुनेप्रसीदत्वंममोपरि ३० अगस्तिरुवाच तवातिथ्येनसंतुष्टोह्युपायंकथयामिते पुत्रकामोय
दिभवानिदंकुरुवचोमम ३१ संप्राप्तेपौषमासेतुदीपदानंयथाविधि गोविंदस्यप्रीत्यर्थंकुरुराजन्हितंचते ३२
अनेकसकलान्कामान्पुत्रवत्त्वमवाप्स्यसि इदमेवहितंराजन्नचान्यत्तेहितंभवेत् ३३ दीपदानसमोनास्तिपौषे
धर्मःसनातनः यत्रकुत्रापिकर्तव्यःपौषेदीपप्रवर्द्धनम् ३४ संप्राप्तेकार्मुकेभानौदीपदानंनचाचरेत् अपुत्रस्सदरि
द्रश्चततोदुःखमवाप्यते ३५ स्वस्तितेस्तुगमिष्यामिसफलस्तेमनोरथः भविष्यतिनसंदेहोइत्युक्त्वाप्रययौमुनिः
३६ सूतउवाच श्रुत्वामुनिवचस्तथ्यंहर्षेणमहतावृतः संप्राप्तेपौषमासेतुतथाराज्ञाकृतंमुने ३७ दीपदान
प्रभावेनपुत्रोजातोमहात्मनः धर्मज्ञःसत्यसंधश्चयथादीपइवापरः ३८ दीपदानेननृपतिःपुत्रवान्वैभवान्यथा
तथाभवंतिमासेस्मिन्दीपदानंचरंतिये ३९ सहस्रदीपान्प्रज्वाल्यअष्टोत्तरशतंतथा यथाशक्त्यानुसारेणवित्तशा
ठ्यविवर्जितः ४० दीपदानेनसामर्थ्यंपरदीपंतुरक्षयेत् अन्यान्वाबोधयेद्यस्तुतेनपुण्यमवाप्यते ४१ नदीपदा
नात्परमस्तिपावनंनदीपदानात्परमस्तिपुत्रदम् नदीपदानात्परमस्तिमोक्षदंनदीपदानात्परमंप्रशस्यते ४२

इतिश्रीस्कंदपुराणेपौषमाहात्म्येदीपदानमहिमाकथनंनामद्वितीयोऽध्यायः २ छ शौनकउवाच
कदारभ्यप्रकर्तव्यंदीपदानंचमज्जनम् वक्तुमर्हस्यशेषेणपृच्छतोमेनुपूर्वशः १ सूतउवाच सम्यक्पृष्टंमु
निवरकथयामितवानघः यदारभ्यप्रकर्तव्यंतत्समाधाहितःशृणु २ सहपूर्णांसमारभ्ययावत्पौषस्यपूर्णिमा
तावत्स्नानंप्रकर्तव्यंदीपदानेपिसोवधिः ३ दशम्यांसहमासस्यद्वादश्यामथवानरः आरभ्यस्नानंकर्तव्यंयाव
न्मासःप्रपूर्यते ४ मासमात्रंत्वसामर्थ्येसप्ताहंस्नानमाचरेत् दिनत्रयंवाथवातुभानुवारेविशेषतः ५ स्नान
मात्रेणमुच्यन्तेनराःपापविवर्जिताः अवश्यमेवकर्तव्यंभानौचित्रान्नमज्जनम् ६ पौषेभानौमज्जनेनफलंमास
स्यसंभवेत् तस्मादत्रप्रकर्तव्यंभानौचित्रान्नमज्जनम् ७ धनेदित्येतुसंप्राप्तेचित्रान्नंसेवयेन्नरः घृताक्तमास
मेकंचतस्यपापंप्रणश्यति ८ मासमात्रंनानुकूलेभानुवारेतुकारयेत् पौषेचित्रान्नविधिनालक्ष्मीःसंजायतेस्थि
रा ९ अनेनविधिनाब्रह्मन्चित्रांगोधनवानभूत् शौनकउवाच कोसौचित्रांगदोनामकथंलक्ष्मीमवाप्त
वान् १० तत्कथ्यतांमहाभागश्रोतुंकौतूहलंहिमे सूतउवाच पुरासौराष्ट्रदेशेषुचित्रांगोनामभूपतिः
११ बभूवकिलधर्मात्माभूरिश्रवसुतोबली धर्मिष्ठःपालयामासप्रजाःपुत्रानिवौरसान् १२ कदाचिन्मृगयां
यातोधृतखड्गोधनुर्धरः मृगारण्येमृगांस्तत्रविचिन्वन्सइतस्ततः १३ बभ्रामबहुकालंसप्राप्यमृगयामपि
१४ ततोमध्याह्नसमयेतृषाक्रांतोबभूवह जलाशयंततोब्रह्मन्विचिन्वन्सकलंवनम् १५ संप्राप्तापगा-
विधूताब्रह्मकन्यका हर्षेणमहताविष्टस्तीरेतस्यावगाहत १६ यथेच्छजलपानंचचकारनृपसत्तमः क्ष
वेश्राम्यनदीतीरेददर्शाश्रममंतिके १७ कस्यायमाश्रमवरइतिज्ञातुंविवेशह दृष्टातस्मिन्मुनिवरंज्वलत्पाव-
कसन्निभम् १८ आवृतंशिष्यपंक्तीभिर्बोधयंतंनिजान्गणान् प्रणम्यदंडवद्भक्त्यातुष्टावमुनिपुंगवम् १९ सं-

तुष्टस्तंमुनिः प्राहकोसित्वंवदपूरुष किमुद्दिश्येहसंप्राप्तोरहोनयदिकथ्यताम् २० चित्रांगदउवाच सौराष्ट्र
देशेवसामिचित्रांगोनामभूपतिः आगतोमृगयार्थंचतृषितोभिजितेत्यहम् २१ पानीयंपातुकामश्चविधुतामागत-
स्ततः पीतंतुसलिलंपश्चाच्छ्रममुक्तोवसत्सुखम् २२ ततस्त्वाश्रमंदूरात् दृष्ट्वाहंविस्मयान्वितः कस्यायमाश्रमवर
स्तंविज्ञातुंसमागतः २३ सोहंतेदर्शनंप्राप्यकृतार्थोस्मिनसंशयः त्वांतुवेदितुमिच्छामिकोभवान्नामकिंचते २४
तत्कथ्यतांमहाभागकृपांकृत्वाममोपरि ब्राह्मणउवाच गालवोनामराजेंद्रद्विजोहंवाडवात्मजः २५ आस्थाय-
योगस्कंमहत्वसाम्यस्मिन्वराश्रमे एहिराजन्वसात्रैवकंदमूलफलानिच २६ भक्षयित्वापुनःप्रातर्गमिष्यसियथा
सुखम् इत्युक्तोब्राह्मणेनाथसोवसन्नृपसत्तम २७ फलानिभक्षयित्वासरात्रौनिद्रांतदाश्रमे पौषादित्येतुसं-
प्राप्तेप्रभातेमुनिसत्तमः २८ सशिष्यैराचरत्स्नानंचित्रान्नंचतदाकरोत् नारायणायार्पयित्वाराजानंचसमाह्वय-
त् २९ पौषादित्येचसंप्राप्तेचित्रान्नंभक्षहेनृप इतिश्रुत्वातुनृपतिर्विस्मयेनसमन्वितः ३० उवाचब्राह्मणंतत्रमुने
किंक्रियतेत्वया किमर्थमद्यचित्रान्नंभक्षणीयंविशेषतः ३१ गालवउवाच धनुराशौतुसंप्राप्तेश्रीसूर्येनृप-
सत्तम भक्षणीयंप्रयत्नेनचित्रान्नंमासमात्रतः ३२ मासमात्रंनसामर्थ्यंरविवारेविशेषतः नारायणंतुसंपूज्यचि-
त्रान्नंकल्पयेत्ततः ३३ इतिशास्त्राज्ञयास्माभिःक्रियतेद्यनृपोत्तम कुरुत्वयदिचेच्चित्तंनोचेद्गच्छस्वमाश्रमम् ३४
राजोवाच कदापिनश्रुतंब्रह्मन्चित्रान्नंभक्षणंकुतः लोलुपेनत्वयाचैतत्क्रियतेत्रनसंशयः ३५ इतिनिंदांब्राह्म
णस्यकृत्वाराजाजगामह आगत्यनगरेस्वस्यगृहेपूर्ववदास्थितः ३६ ततःकतिपयैर्मासैर्गतश्री[illegible]बभूवह दारि-
द्र्यंपतितंब्रह्मन्तस्यराज्ञोगृहेसदा ३७ दारिद्र्येणतुखिन्नोभूच्चिंतामापक[illegible]माम् कदाचिच्चिं[illegible]सदारिद्र्यप्रा
प्तिकारणम् ३८ नाध्यगच्छत्कारणंतुब्राह्मणंतुसमाह्वयत् आजगाम[illegible]गवान्शमीका[illegible]तः ३९

तुष्टस्तंमुनिःप्राहकोसित्वंवदपूरुष किमुद्दिश्येहसंप्राप्तोरहोनयदिकथ्यताम् २० चित्रांगदउवाच सौराष्ट्र
देशेवसातिश्चित्रांगोनामभूपतिः आगतोमृगयार्थंचतृषितोभिजितस्त्वहम् २१ पानीयंपातुकामश्चविधूतामागत-
स्ततः पीतंतुसलिलंपश्चाच्छ्रममुक्तोवसत्सुखम् २२ ततस्तवाश्रमंदूरात्दृष्ट्वाहंविस्मयान्वितः कस्यायमाश्रमवर
स्त्वंविज्ञातुंसमागतः २३ सोहंतेदर्शनंप्राप्यकृतार्थोस्मिनसंशयः त्वांतुवेदितुमिच्छामिकोभवान्नामकिंत्वते २४
तत्कथ्यतांमहाभागकृपांकृत्वाममोपरि ब्राह्मणउवाच गालवोनामराजेंद्रद्विजोहंवाडवात्मजः २५ आस्थाय-
योगंसुमहत्वसाम्यस्मिन्वराश्रमे एहिराजन्वसात्रैवकंदमूलफलानिच २६ भक्षयित्वापुनःप्रातर्गमिष्यसियथा
सुखम् इत्युक्तोब्राह्मणेनाथसोवसन्नृपसत्तम २७ फलानिभक्षयित्वासरात्रौनिद्रांतदाश्रमे पौषादित्येतुसं-
प्राप्तेप्रभातेमुनिसत्तमः २८ सशिष्यैराचरत्स्नानंचित्रान्नंचतदाकरोत् नारायणायार्पयित्वाराजानंचसमाह्वय-
त् २९ पौषादित्येचसंप्राप्तेचित्रान्नंभक्षहेनृप इतिश्रुत्वातुनृपतिर्विस्मयेनसमन्वितः ३० उवाचब्राह्मणंतत्रमुने
किंक्रियतेत्वया किमर्थमत्रचित्रान्नंभक्षणीयंविशेषतः ३१ गालवउवाच धनुराशौतुसंप्राप्तेश्रीसूर्येनृप-
सत्तम भक्षणीयंप्रयत्नेनचित्रान्नंमासमात्रतः ३२ मासमात्रंनसामर्थ्यंरविचारेविशेषतः नारायणंतुसंपूज्यचि-
त्रान्नंकल्पयेत्ततः ३३ इतिशास्त्राज्ञयास्माभिःक्रियतेद्यनृपोत्तम कुरुत्वयदिचेच्चित्तंनोचेद्गच्छस्वमाश्रमम् ३४
राजोवाच कदापिनश्रुतंब्रह्मन्चित्रान्नंभक्षणंकुतः लोलुपेनत्वयाचैतत्क्रियतेत्रनसंशयः ३५ इतिनिंदांब्राह्म
णस्यकृत्वाराजाजगामह आगत्यनगरेस्वस्यगृहेपूर्ववदास्थितः ३६ ततःकतिपयैर्मासैर्गतश्रीकोबभूवह दारि-
द्र्यपतितंब्रह्मन्तस्यराज्ञोगृहेसदा ३७ दारिद्र्येणतुखिन्नोभूच्चिंतामापदुरत्ययाम् कदाचिच्चिंतयामासदारिद्र्यप्रा
प्तिकारणम् ३८ नाध्यगच्छत्कारणंतुब्राह्मणंतुसमाह्वयत् आजगामास्यभगवान्शमीकाख्यःपुरोहितः ३९

नत्वातच्चरणौराजाप्रोवाचवचनंत्विदम् भूतंभव्यंभविष्यंचजानासित्वंमहामते ४० अतस्त्वांप्रष्टुमिच्छामिक
थंलक्ष्मीर्गतामम तत्कथ्यतांमहाभागत्वदुपायंचापिकथ्यताम् ४१ शमीकउवाच शृणुष्वावहितोराजन्
गालवस्यचहेलनम् कृतंत्वयामहाविष्णोर्व्रतभंगोनृपोत्तम ४२ चित्रान्नस्यनिषेधेनदशामेतांसमागतः अधा
पित्वंमहाभागगच्छगालवमंतिकम् ४३ प्रसाद्यमुनिवर्यंतंचरनारायणव्रतम् कृतेव्रतेमहाभागयथापूर्वं
भविष्यसि ४४ पुरोहितवचःश्रुत्वाराजागालवमंतिकम् जगाममुनिवर्यंतंप्रणम्यचप्रसाद्यच ४५ स्ववृत्तं
कथयामाससापराधोस्म्यहंमुने उपायंवदमेयेनलक्ष्मीकोत्रभवाम्यहम् ४६ गालवउवाच प्रसन्नोहंनृ
पश्रेष्ठकुरुनारायणव्रतं चित्रान्नव्रतमात्रेणयथापूर्वंभविष्यसि ४७ राजोवाच विधिंकथयमेविप्रयेन
कुर्यामतंद्वितः गालवउवाच सदाध्यापनकर्माहंनावकाशोस्तिमेनृप ४८ पुरोहितस्तवसर्वेसर्वंजाना
तितत्वतः सएववक्तातेनान्योतस्याज्ञांपरिपालय ४९ इत्युक्त्वागालवस्तूर्णंजगामस्वगृहांतिकम् राजापिन
गरंप्रायात्सर्ववृत्तंगुरुंवदत् ५० व्रतस्यविधिनाराजाबोधितोगुरुणाततः चित्रान्नस्यव्रतंसम्यक्चकारनृपस
त्तमः ५१ तेनवैकर्मणाराजापुनर्लक्ष्मीमवाप्तवान् चकारसम्यक्धर्मेणराज्यंनृपतिसत्तमः ५२ अंतेनाराय
णपदंजगामसकुटुंबकः सूतउवाच इत्येतत्कथितंब्रह्मन्चित्रान्नस्यचकारणम् ५३ अनेनविधिनालो
केयेकुर्वंतिनरोत्तमाः गतांलक्ष्मींपुनःप्राप्यअंतेनारायणंपदम् ५४ योगाभ्यासेनतथा फलप्रदाधर्माभ्यास
वेनतथार्थसाधकाः तीर्थानिसर्वाणितथाफलंतियथाविभातेसर्वितुर्व्रतंभवेत् ५५ इतिश्रीस्कंदपुराणेपौष
माहात्म्येधनुर्मासव्रतमाहात्म्यकथनंनामतृतीयोऽध्यायः ३ छ शौनकउवाच नारायणव्रत
विधिंशमीकोऽभ्यवदन्नृपम् तन्मेविस्तरतःसूतयथावत्कथयस्वभो १ सूतउवाच सम्यक्पृष्टंत्वयाब्रह्म

नृलोकानांहितकारकम् तयोःसंवादरूपंचयथावत्कथयामिते २ धनुराशौयदासूर्योभविष्यतिमहामुने तदालोकेमासमात्रंअथवारविवासरे ३ इदंकर्मप्रकर्तव्यंस्वात्मनोहितकारकम् प्रातःकालेसमुत्थायकुर्याच्छौचादिकंतथा ४ स्नानंकार्यंप्रयत्नेननित्यनैमित्तिकोविधिः देवपूजादिकंकृत्वाइदंपश्चात्समाचरेत् ५ शुचौदेशेसमुल्लिप्यगोमयेनतुहस्तकम् तत्रकृत्वारंगवल्लीकदलीस्तंभमंडिताम् ६ तस्यांसंस्थाप्यविधिवत्व्रीहिराशिंततोपरि अव्रणंकलशंस्थाप्यपूर्णपात्रसमन्वितम् ७ वेदमंत्रैस्तुसंपूज्यकलशंविधिपूर्वकम् स्ववर्णप्रतिमाकार्यारम्यानारायणस्यच ८ देवंपुरुषसूक्तेनषोडशैरुपचारकैः पूजयेच्चततोभक्त्यानैवेद्येनचतोषयेत् ९ चित्रान्नंभक्तमन्नंचघृतेनदधिनायुतम् रोटिकानवनीतेनसितयाचयुतातथा १० पायसंसितयायुक्तंमंडकान्पूरिकास्तथा अपूपान्मोदकांश्चैवतथाशष्कुलिकापिच ११ नानाशाकाःप्रकर्तव्यास्तथालेह्यानिकारयेत् वटकांश्चतथानेकान्पक्वान्नैर्विविधैरपि १२ नैवेद्यकल्पयेद्देवंततोहोमंसमाचरेत् अग्निंसंस्थाप्यविधिवत्मंत्रेणानेनपायसम् १३ नारायणायसूर्यायस्वाहेतिद्वादशाहुतीः जुहुयाच्चततोब्रह्मन्वैश्वदेवंसमाचरेत् १४ सपत्नीकान्द्वादशाश्चब्राह्मणान्पूजयेत्ततः अथवाष्टौचचतुरो यथाशक्त्यानुसारतः १५ ब्राह्मणान्भोजयेद्ब्रह्मन्वित्तशाठ्यविवर्जितः भोजनांतेऽऽशिषोग्राह्याःपश्चाद्देवंविसर्जयेत् १६ अनेनविधिनाब्रह्मन्व्रतमेतदुदाहृतम् सूर्योदयंसमारभ्यनाडिभिस्त्रिभिरेवच १७ एतद्व्रतंप्रकुर्वीतयेनपुण्यमवाप्नुयात् अथवातुधनुर्लग्नेयावन्नास्तमितंमुने १८ तावद्व्रतंप्रकुर्वीतनान्यथाव्रतमिष्यते इतितेकथितंब्रह्मन्यथापृष्टत्वयापुरा १९ धन्यंयशस्यंपरमंसुपुण्यदंपुत्रप्रदंस्वस्त्ययनंसुमोक्षदम् आयुष्यमारोग्यसुखप्रदंनृणांपापघ्नमतेव्रतमुद्दिशंति २० इतिश्रीपौषमाहात्म्येधनुर्मासविधिकथनंनामचतुर्थोऽध्यायः ४ ५

शौनकउवाच नियमाःकेमताःसूतमासेस्मिन्विष्णुवल्लभे केकेधर्मानरैःकार्यास्तान्मेविस्तरतोवद १
सूतउवाच सम्यक्पृष्टंमुनिवरलोकानांहितमिच्छता कथयिष्यामिमासेऽस्मिन्येधर्मानियमाश्चये २ पौष
मासेतुसंप्राप्तेनानाधर्मान्समाचरेत् यान्कृत्वादुःखनिचयैर्मुक्तोभवतिमानवः ३ यमानादौप्रवक्ष्यामिपश्चा
न्नियमांस्तथा धर्मांस्तथाप्रवक्ष्यामिशृणुभार्गवयत्नतः ४ यमाश्चसर्वदाकार्याःपौषमासेविशेषतः इंद्रि
याश्चानुसमाकृष्यमनोबुद्ध्यादिभिःसह ५ शुभार्थंधारयेद्ब्रह्मन्यमएतदुदाहृतम् नियमाश्चप्रकर्तव्या
नित्यनैमित्तिकास्तथा ६ स्नानंदानंतथापूजास्वाध्यायःपितृतर्पणम् परान्नरहितोनित्यंपंचयज्ञान्समाच
७ परापवादरहितोब्रह्मचर्यव्रतोनरः गृहस्नानेमंत्रविधिर्वर्जनीयःप्रयत्नतः ८ पौषमासेप्रयत्नेनतथाभ्यंगं
नचाचरेत् नच्छिंद्यान्नखरोमाणिमासमात्रंविशेषतः ९ एतेवैनियमाःप्रोक्ताश्चान्येकार्याःप्रयत्नतः धर्माश्चनि
यमाःकार्यातान्शृणुष्वसमाहितः १० पौषमासेतुसंप्राप्तेगोदानानितुकारयेत् अक्षय्यलोकानाप्नोतिगोदा
ननसंशयः ११ भूदानंकारयेद्ब्रह्मन्तिलदानंतथाचरेत् हिरण्यदानंकर्तव्यंतथाज्यस्यविशेषतः १२ वस्त्रदा
नंतथाकार्यंधान्यदानंतथैवच लवणस्यतथादानंउददानंतथाचरेत् १३ विशेषतोरौप्यदानंमणिदानंतथा॰
चरेत् भूदानेनतुप्रजास्यात्तिलदानेनधर्मभाक् १४ रूपवांश्चहिरण्येनतथाज्येनतुबुद्धिमान् वस्त्रदानेनव॰
स्त्राणांविपत्तिर्नैवजायते १५ धान्यदानेनतुनरःक्षुत्तृड्भिर्नैवपीड्यते लवणस्यचदानेनबलवान्जायतेनरः
१६ गुडदानेनचरुजानजायेतकदाचन रौप्यदानेननेत्राणांननाशोपिकदाचन १७ मणिदानेनतुनरःकांति॰
न्वप्रजायते नारिकेलस्यदानेनचाक्षय्यासंततिर्भवेत् १८ मातुलिंगप्रदानेनवंध्यापिप्राप्यतेऽर्भकम् प्र॰
वालमौक्तिकमाणिसवस्त्रंनवनीतकम् १९ कूष्मांडदानंकर्तव्यंसर्वकामार्थसिद्धये दीपंविच्छेत्तिपुरुषःकू॰

पांडंछिंदंतेस्त्रियः २० अचिरेणैवकालेनवंशच्छेदोभवेद्ध्रुवम् तांबूलस्यप्रदानेनबहुकामान्लभेन्नरः २१
एकभुक्तोप्यधःशायीसत्येनरपरान्मुखः पौषमासेकभुक्तेनमोक्षस्तस्यकरेस्थितः २२ शय्यादानंप्रकर्तव्यंशय्यासौख्यमवाप्यते
सुदृढंनूतनंसूक्ष्मवस्त्रदानंविशेषतः २३ ऊणावस्त्रस्यवादानंपौषमासेसमाचरेत् शीतस्यवारणार्थायचेंधनंदापयेन्नरः
२४ अश्वदानचकर्तव्याशिबिकायास्तथैवच वृषदानंप्रकर्तव्यमुपानहद्वयस्यच
२५ अश्वत्थरोपणंकार्यंतथालक्षप्रदक्षिणा इक्षुदंडस्यदानेनयमदंडैर्नदंडयेत् २६ कांस्यपात्रस्यदानेन
विष्णुलोकेमहीयते मांगल्यसूत्रदानेनतथासौभाग्यदानतः २७ सौभाग्यहानिर्नकदाभवतीतिनसंशयः
पुष्पदानंप्रकर्तव्यंस्रग्गंधद्रव्यमेवच २८ उपानहौप्रदातव्यौपादरुङ्नैवजायते विनोपानहृद्दानेनक्वचसौख्यं
नविंदति २९ अत्रतेवर्णयिष्यामिइतिहासंपुरातनम् कान्यकुब्जेपुराकश्चिद्भूमिपोशृंगवानभूत् ३०
श्रुतिस्मृतिपुराणज्ञोधनीचबहुबांधवः नानाधर्माःकृतास्तेनत्वसंख्यातामहामुने ३१ गवांदानानिदत्तानि
भूमिदानंतथैवच वस्त्रदानान्यनेकानिसंख्यानैवचनैवच ३२ भूरुहारोपितास्तेनत्वसंख्याताश्चभार्गव
वापीकूपतडागानिकृतानिसुबहून्यपि ३३ अन्येतेनकृताधर्मास्त्वसंख्याताश्चवैभुवि एवंधर्ममतेस्तस्यबहु
कालोप्यगात्ततः ३४ अथापिदैवयोगेनपादयोस्तस्यभूपतेः स्फोटकाख्यामहारुग्वैजातातेनप्रपीडितः
३५ राज्ञातेनबहूपायायोजितानैवशांत्यभूत् ततःकालेननिर्विण्णोतेनरोगेणभूपतिः ३६ किंकरोमिक्व
गच्छामिकिंकृत्वामेसुखंभवेत् इतिचिंतयतस्तस्यकण्वोनाममहामुनिः ३७ आजगामाश्रमपदंराज्ञस्तस्य
महात्मनः कण्वमागतमाज्ञायप्रत्युत्थानंनचाकरोत् ३८ तंदृष्ट्वाविस्मितमुनिःक्रोधंकर्तुंविचक्रमे नेत्रेप्रज्वाल्य
कण्वोसौअहोदेवनृपाधम ३९ ममागममवज्ञायप्रत्युत्थानाभिवादनैः आस्थितोसिमहान्स्तब्ध·

स्तस्मात्तमस्यमेवलम् ४० इतिक्रोधेनमहताआविष्टंब्राह्मणंतदा विलोक्यनृपतिर्भीतोब्राह्मणंप्रत्युवाचह
४१ शृंगवानुवाच क्षमस्वममदौरात्म्यंगर्वेणनकृतंमया स्वामिन्मेपादयोःकिंतुपीडातीवाविलोक्यताम्
४२ तेनैवनकृतंब्रह्मन्नभ्युत्थानंमयाप्रभो इत्युक्त्वासौस्वियौपादौदर्शयामासतंमुनिम् ४३ दृष्ट्वातस्यतुतौपा
दौस्फोटकाख्येनवेष्टितौ अत्यंतपीडितस्तेनकृपयाविष्टमानसः ४४ कएवोनाममहाप्राज्ञःकस्येदंकर्मणःफ-
लम् इतिज्ञातुंमहाभागयोगंचक्रेत्वरान्वितः ४५ योगमार्गेणवैतस्यज्ञात्वाकर्मनृपस्यच विसृज्ययोगंसतदा
उवाचनृपतिंप्रति ४६ अस्मिन्जन्मनिनैवास्तिपापंतवमनागपि पूर्वजन्मनितेभूपसर्वेधर्माह्यनुष्ठिताः ४७
उपानहौत्वयानैवदत्तौपौषेविशेषतः तस्मादत्रैवतेपादौइहजन्मनिकुत्सितौ ४८ अथापिकुरुराजेंद्रपौषेमा
सेप्रयत्नतः उपानहस्यदानंत्वंस्कपादौतेभविष्यति ४९ इत्युपदिश्यकएवासौगमनायमतिंकरोत् प्रीतेनमन
साराज्ञापूजितोसौयथातथा ५० इतिश्रीस्कंदपुराणेपौषमाहात्म्येनानादानप्रशंसनंनामपंचमोऽध्यायः
५ छ सूतउवाच ततोमुदाशृंगवान्संगृहीत्वोपानहौक्रमात् पौषमासेतुसंप्राप्तेविधिवद्दानमा
चरेत् १ पादरुक्कर्मणातेनगतातस्यचभूपतेः तस्माद्दानंप्रकर्तव्यंपादरोगापनुत्तये २ उपानहप्रदानेनपाद-
पीडाशमेद्ध्रुवम् उपानहसमंदानंपौषमासेनविद्यते ३ शृणुशौनकवक्ष्यामिधर्मानन्यान्सनातनान् यान्
कृत्वापौषेमासेतुनरोमोक्षंचविंदति ४ पौषमासेविशेषेणतुलसीवनपालनम् कुर्वंतियेनरानूनंधन्यास्तेवै
नसंशयः ५ एकतःसर्वदानानिशय्यादीनिमहामुने तुलसीपालनस्यापिकलांनार्हंतिषोडशीम् ६ पौष-
मासिगृहेयस्यतुलसीदृश्यतेयदि नानाबाधागृहेतस्यनविद्यतेकदाचन ७ तुलसीसेवनाद्धर्मोपौषेनान्यः
प्रशस्यते तुलस्यापूजनंकार्यंनैवेद्यादिभिरादरात् ८ प्रदक्षिणातथाकार्याआयुतायुतमेवच पौषस्यशु

क्ले द्वादश्यांविवाहोत्सवमाचरेत् ९ नारायणस्यदेवस्यतुलस्यासविधानतः तुलसीमंडितंयस्यगृहंपौषे
भवेद्ध्रुवम् १० तस्यगृहेतदादेवाःपितरोतिमुदान्विताः हव्यंकव्यंचगृह्णंतिनान्यथाभार्गवोत्तम ११ तुलसीवायुनायस्यगृहंसर्वत्रवासितम् भूतप्रेतपिशाचानांनैवतत्रास्थितिर्भवेत् १२ तुलसीचाग्रजन्मासिसदात्वंकेशवप्रिये केशवार्थंविचिन्वामिवरदाभवशोभने १३ इतिमंत्रेणतुलसीत्रोटयित्वानरस्ततः अर्पयेद्विष्णु
शिरसिनामभिःकेशवादिभिः १४ पत्रेपत्रेश्वमेधस्यफलंतस्यनदुर्लभम् तिस्रःकोट्योर्धकोटिश्चतेनदेवाः
सुपूजिताः १५ विनातुलसिपत्रेणसर्वेधर्माश्चनिःफलाः तुलस्याःसन्निधानंवैयस्मिन्कर्मणिसंभवेत् १६
तत्कर्मकोटिगुणितंफलदंवैनसंशयः तस्मात्सर्वप्रयत्नेनतुलसीवनपालनम् १७ पौषमासेविशेषेणनरैः
कार्यंहितायवै अष्टांगैःप्रणमेद्यस्तुतुलसींयोनरोत्तमः १८ तस्यपुण्यफलंवक्तुंनशक्नोमिमहामुने या
नारीतुलसींप्राप्यह्यष्टांगैःप्रणमेद्यदि १९ प्रत्यंगंब्रह्महत्यांसाप्राप्नोतीतिनसंशयः २० पद्भ्यांकराभ्यांजानुभ्यांमूर्ध्नोचमनसासह पंचांगैःकथितःस्त्रीणांप्रणामःपापनाशकः २१ इतिश्रुतंमयापूर्वंनारदाद्देवलाच्छुकात् द्वादश्यांचव्यतीपातेअमायांवैधृतौतथा २२ उपरागेतथाभानौसप्तम्यांश्रवणेतथा पितृक्षयाहेसंक्रांतौनस्पृशेत्तुलसींनरः २३ नियमोविद्यतेयस्यतुलस्याद्यर्पणेसदा तदातेनप्रकर्तव्योद्वादशीवर्जितोमुने
२४ आग्रहेणनरोयस्तुद्वादश्यामपिचिन्वति तुलसींतेनपापेनआभानौनरकंवसेत् २५ नीराजयेत्तुद्वादश्यांतुलसींयोनरोत्तमः सस्वर्गंप्राप्यतेक्षय्यंदशपूर्वैर्दशापरैः २६ तुलसीसेवनपरोपौषेधर्मोनविद्यते तस्मात्सर्वप्रयत्नेनतुलसींसेवयेन्नरः २७ भोजनांतेनरोयस्तुउच्छिष्टस्यविनाशने विष्णुनिर्माल्यसंभूतांतुलसींभक्षयेत्तवै २८ तस्योच्छिष्टसमुद्भूतादोषायांतिलयंमुने तुलसीकाष्ठसंभूतामणयोधारयंतिये २९

तेषांदेहेनवसतिपापानांचेतिनिश्चयः यत्रकुत्रापिसंप्राप्तातुलसीमंजरीमुने ३० साग्राह्यानिश्चयेनैवतस्यांदो
षोनविद्यते अंतकालेतुतुलसीयुक्तायस्यभवेत्तनुः ३१ पापयुक्तोपिसनरःशार्ङ्गिंप्राप्यदिवंव्रजेत् किमत्रबहु-
नोक्तेनतुलसीयेनसेविता ३२ धर्मार्थकाममोक्षाश्चप्राप्तास्तेननसंशयः ३३ गोदानशय्यारथभूमिदासीगजाश्व
दानानिकृतानियेन विष्णुप्रियायेननसेविताच कृतानिसर्वाण्यकृतानितेन ३४ इतिश्रीस्कंदपुराणेपौषमा-
हात्म्येतुलसीविधिर्नामषष्ठोऽध्यायः ६ ॥ छ ॥ सूतउवाच पौषमासेविशेषेणविष्णोराराधनंनरैः
कार्यंतेनभवेत्सद्योमोक्षएवनसंशयः १ शौनकउवाच विष्णोःपूजाकथंकार्याकोविधिस्तत्रउच्यते ए-
तन्मेसर्वमखिलंब्रूहिसूतयथातथम् २ सूतउवाच शृणुशौनकवक्ष्यामिपूजामार्गंयथाविधि यंकृत्वा
मुच्यतेजंतुर्जन्मसंसारबंधनात् ३ संध्यादिनियमान्सर्वान्कृत्वापश्चाद्गृहंविशेत् देवस्यपूजनार्थायधौत-
पाणिस्ततोबुधः ४ गंधपुष्पंतथापाद्यमर्घ्यमाचमनीयकम् पंचामृतादिसहितंस्थापनीयंस्वदक्षिणे ५ त-
तःस्वासनमासीनोगीतवादित्रमंगलैः विष्णुप्रबोधयेदादौयोजागारेतिमंत्रतः ६ उत्तिष्ठेतिमंत्रेणचान्यैर्वैदि-
कमंत्रकैः ततोदेवंप्रणम्यादौनिर्माल्यंविसृजेत्ततः ७ देशकालादिसंकीर्त्यदेहन्यासंचकारयेत् यथाव-
त्षोडशैर्मंत्रैस्तद्वद्देवेपिविन्यसेत् ८ वरुणस्यततःपूजाकृत्वासर्वोपचारकैः घंटांसंपूज्यविधिवत्शंखंचैव
यथाविधि ९ ओंकारंप्रपठन्शंखंपूजयेदुदकेनवै पूजाद्रव्याणिचात्मानंप्रोक्षयेच्छंखवारिणा १० ध्या-
येद्देवंतुविधिवदावाहनपुरःसरम् आसनंकल्पयेत्पश्चात्ततःपाद्यंयथाविधि ११ अर्घ्यमाचमनीयंचैवम-
लस्नानंतुकारयेत् पंचामृतानिनैवेद्यंशुद्धस्नानंततोभवेत् १२ नाममंत्रैस्ततःकुर्यादभिषेकंतुशौनक
ापयेद्देववस्त्रंचैवततःपरम् १३ यज्ञोपवीतंदेवायदद्यनेकाभरणानिच वस्त्रोपवीतस्नानांतेदद्यादा

८

चमनीयकम् १४ सुगंधद्रव्यैःसंमिश्रंलेपनंकारयेन्नवै कस्तुरीतिलकेनैवदेवंसंशोभयेत्ततः १५ माल्यादीनि-
सुगंधीनिमालत्यादीनिवैप्रभो मयाहृतानिपूजार्थंपुष्पाणिप्रतिगृह्यताम् १६ इतिमंत्रेणपुष्पाणिनिवेद्यप्रभवि
ष्णवे दशांगंगुग्गुलंधूपंदीपंचैवयथाविधि नानापक्वान्नसंयुक्तंनैवेद्यंविष्णवेर्पयेत् शृणुशौनकवक्ष्यामिनैवे
द्यंरुचिकारकम् १८ भक्तमन्नंतथासूपंरोटिकांकारयेच्चवै मंडकाश्चतथाकार्याःशष्कुल्यापूपसंयुताः १९ मोद-
कामोतिचूराख्याःशर्करादिविमिश्रिताः संयावंपूरिकाःकार्याभक्ष्यंवैघृतपाचितम् २० नानाविधान्यनेकानिपाय
सानिप्रकारयेत् शाकाश्चबहुशःकार्याहिंगुजीरादिसंयुताः २१ सफलाश्चसपत्राश्चविष्णोःप्रीतिकराःसदा
कदलीफलशाकंचतथादेवफलाप्रियम् २२ तुंबीफलंतथादेयंकारल्लीफलमेवच अलाबुशीतलंतद्वदार्द्रकंपल्व
लंतथा २३ अन्याश्चफलशाकावैकरणीयाःप्रयत्नतः पत्रशाकास्तथाकार्याःसर्वाश्चैवप्रयत्नतः २४ तथा-
सर्वाणिलेह्यानिकारयेच्चप्रयत्नतः वटकाविविधाःकार्याविष्णुप्रीतिकरामुने २५ कुंडलाकृतिकाःकार्यावट-
कास्तैलपाचिताः अपूपाकृतिकाःकार्यास्तथावैवर्तुलामताः २६ तद्वत्कोरवटाःकार्याअन्येदध्नातुपाचिताः
कूष्मांडवटकाश्चैवअन्येनानाविधास्तथा २७ दधिदुग्धंतथाज्यंचनवनीतमथोमधु शर्कराचतथादेयाविष्ण-
वेतिशुभ्रभासिता २८ एतेपदार्थाःसौवर्णपात्रेकृत्वाप्रयत्नतः विष्णोरग्रेततःकृत्वापात्रंनैवेद्यसंयुतम् २९
शंखोदकेनगायत्र्यातदन्नंपरिषेचयेत् प्राणादिपंचकैर्मंत्रैर्नैवेद्यंविष्णवेर्पयेत् ३० नैवेद्यांतेचाचमनमुद्वर्तन-
मतःपरम् इदंफलंमयादेवस्थापितंपुरतस्तव तेनमेसफलावाप्तिर्भवेज्जन्मनिजन्मनि ३१ इतिमंत्रेणवेदे-
यंनारिकेलफलादिकम् तांबूलंदक्षिणांदत्वाततःकुर्यात्प्रदक्षिणाम् ३२ द्वादशाक्षरमंत्रेणयथाशक्तिजप-
स्तथा नीराजनंततोदेयंकर्पूरादिसमन्वितम् ३३ मंत्रपुष्पंततोदद्याद्गीतवादित्रमंगलैः निर्माल्यग्रहणप-

श्वाक्षमापन्नमनः परम् ३४ एवंयोविधिनादेवंपौषेपूजांसमाचरेत् महापुण्यंचवैतस्यनकिंचिद्दुर्लभंफलम् ३५ विष्णुपूजासमोनास्तिपौषेधर्मः सनातनः ३६ पौषेयस्तुस्ववर्णपूजनरतोदेवैश्चसंस्तूयते गंगाद्याःसरितस्तथाक्रतुफलंतत्रैवसंस्थीयते धन्यःसोपिनरोत्तमास्त्रिभुवनेनान्यस्ततोवैपुमान् कस्तस्मात्परधर्मसेवनविधिः श्रीविष्णुपूजांविना ३७ इतिश्रीस्कंदपुराणेपौषमाहात्म्येविष्णुपूजाप्रशंसनंनामसप्तमोऽध्यायः ७

७ सूतउवाच शृणुशौनकवक्ष्यामिपौषेयोवनभोजनम् करोतितस्यसफलंयावदब्दकृतंफलम् १ पौषमासेतुसंप्राप्तेअकृतंवनभोजनम् निराशाःसर्वगीर्वाणाः शापंदत्वाव्रजंतिते २ नानाधर्माःसमाचीर्णा अकृतवनभोजनम् सर्वेतेनिष्फलास्तस्मात्कार्यंवैवनभोजनम् ३ पौषमासेतुसंप्राप्तेयेनधात्रीनपूजिता तथाचैवनवनभुक्तंतत्सर्वंविनश्यति ४ अत्रैवोदाहरंतीममितिहासंपुरातनम् द्राविडेषुपुराकश्चिन्माल्यवान्नामभूपतिः ५ श्रुतिस्मृतिपुराणज्ञोधर्मज्ञःस्वार्थसाधकः नानादानेषुविख्यातोयथाकर्णइवापरः ६ नानाधर्माःकृतास्तेनह्यसंख्यातायथामुने यावंत्योवर्षधाराश्चयावंत्यःसिकताभुवि ७ कदाप्येषांप्रमाणंस्यान्नतुदत्तःकृतस्यच एवंसंवसतस्तस्यगृहेमाल्यवतोमुने ८ पुत्रहीनस्यराज्ञस्तुह्यौदासीन्यमभूत्सदा एकदावैगृहेतस्यदुर्वासाऋषिरागमत् ९ तमागतमभिप्रेत्यगृहस्थोत्थायनृपोत्तमः स्वागतंवोमुनिश्रेष्ठकुशलंतवदर्शनात् १० इत्युक्त्वादंडवद्भूमौनत्वापूजांचकारह पूजाविधिंतस्यकृत्वदुर्वासावाक्यमब्रवीत् ११ स्वस्तितेस्तुनृपश्रेष्ठगंतुमिच्छामिपांडवान् मुनेर्वचनमाकर्ण्यमाल्यवानिदमब्रवीत् १२ माल्यवानुवाच उषित्वाद्यगृहेब्रह्मन् श्वःप्रभातेपितुर्मम श्राद्धाहोवर्ततेतस्माद्भुक्त्वात्वंगंतुमर्हसि १३ मुनिरुवाच अपुत्रस्यतवगृहेनप्राश्यमुदकंमया किंपुनर्भोजनंचैवअतोगच्छामिसत्वरम् १४ इत्युक्त्वावचनंगंतुमियेषमुनिसत्तमः गंतुंकृतमतिंविप्रंराजानिःश्वसितोब्रवी

त् १५ राजोवाच कर्मणाकेनमद्देहेनभुंक्तेवैभवादृशाः तत्कर्मकथ्यतांविप्रयेनधन्योभवाम्यहम् १६ भव
द्विधागृहायस्यविमुखायांतिवैमुने कणहानिर्भवेत्तस्यब्राह्मणोविमुखोयतः १७ धिग्गृहंममराज्यंवैधिक्कुलं
ममजन्माधिक् धिगिदंबहुलंद्रव्यंधिगैश्वर्यंयशोमम १८ हाहाहाहामयादेवकिंकृतंपूर्वजन्मनि अस्मिन्नेवभवे
किंचिद्दुष्कर्मतुकृतंमया १९ तेनकर्मविपाकेनब्राह्मणोविमुखोमम विलप्यबहुधाह्येवंब्राह्मणाग्रेततोपतत् २०
कथंभवाद्विधैर्ब्रह्मन्ननुग्राह्योभवाम्यहम् तत्कथ्यतांमहाभागकृत्वानुग्रहमेवहि २१ इत्युक्त्वाराजशार्दूलःप्रगृह्य
चरणौमुनेः पादयोःपतितंदृष्ट्वाशोकसंविग्नमानसम् २२ राजानमुनिशार्दूलःस्पृष्ट्वाहस्तेनचाब्रवीत् मुनिरु
वाच माकंचनशुचोराजन्पूर्वजन्मनिवैत्वया २३ नानाधर्माःसमाचीर्णानकृतंधात्रिपूजनम् द्विजन्मानोम
हाराजधात्रीछायांनभोजिताः २४ तेनकर्मविपाकेनविष्णुक्षोभस्तवोपरि क्षोभितेश्रीमहाविष्णौकथंकर्मफ
लंनव २५ अतएवमहाराजभवेस्मिन्त्वंहिअप्रजः अप्रजस्यगृहेनूनंअंधोभ्रात्यंनमादृशैः २६ इतःपरंमहा
राजकुरुधात्रीव्रतंमहत् तेनत्वंपुत्रतामेत्यत्वनुगृह्येनमादृशैः २७ विधिंतेकथयिष्यामिपौषेधात्र्याःप्रपूज
ने संप्राप्तेपौषमासेतुप्रत्यहंवाथपर्वणि २८ सहस्रंब्राह्मणानांतुत्रिशतंवाथवाशतम् शतार्धंभोजयेद्धीमान्
सपत्नीकान्स्वलंकृतान् २९ दीपदानंतदादेयंवस्त्रदानंतथैवच शयनानिचदेयानिब्राह्मणेभ्योविधानतः ३०
गृहीत्वाचाशिषःपश्चात्ब्राह्मणान्प्रार्थयेत्ततः कुमाराद्यामुनिश्रेष्ठाव्रतेस्मिन्सन्निधौमम ३१ न्यूनंसंपूर्ण
तामेतुब्राह्मणानांप्रसादतः एवंसंप्रार्थयेद्विप्रान्विष्णुंसंप्रार्थयेद्यथा ३२ धात्रीछायांसमाश्रित्यमयाविष्णोः
हियत्कृतं संपूर्णंपूर्णतायैवत्वयातदनुमोदताम् ३३ इतिसमाप्यदेवेशंप्रहृष्टेनांतरात्मना सपत्नीकस्ततोरा
जन्स्वयंभुंजीतवाग्यतः ३४ सूतउवाच इत्यादिश्यसराजानंदुर्वासाःप्रययौततः सोपिराजातथाचक्रेपौषे

तुवनभोजनम् ३५ धात्रीछायांसमाश्रित्याविष्णुपूजनमाचरत् कर्मणातेनस ब्रह्मन्त्वचिरात्पुत्रवानभूत् ३६
देवताऋषयःसर्वेतद्गृहंप्रशशंसिरे सर्वेधर्माश्चसफलास्तत्कर्मसफलंत्वभूत् ३७ देवताऋषयःसर्वेतद्गृहेत्वव-
सन्सदा इत्येतत्कथितंब्रह्मन्नारायणमनोर्विधिः ३८ अनेनविधिनायस्तुपौषमासेसमाचरेत् पुत्रादिसकल
स्तस्यसफलाश्चमनोरथाः ३९ भवंतिचांतेसायुज्यंविष्णुलोकेमहीयते माहात्म्यश्रवणादेवतत्फलंसमवाप्यते
४० आरामधात्र्याशनमेतदुक्तंनानेनतुल्यंव्रतमस्तिलोके सुपुण्यदंस्वस्त्ययनंनचैवमहत्त्वयोगात्कथितंहिशौ
नक ४१ इतिश्रीस्कंदपुराणेपौषमाहात्म्येधात्रीवनभोजनविधिर्नामअष्टमोऽध्यायः ८ छ छ
शौनकउवाच जन्मनाभुविधन्योसिसूतसूतमहामुने यथात्वइदंनोभोजमसूताभूरिभूतयः १ अस्माभिस्त्व
त्समोलोकेवक्तानान्योविलोकितः सर्वंवयंधन्यतमास्त्वत्सान्निध्याद्धिसूतज २ पौषमाससमुद्दिश्यकथायाःक-
थितास्त्वया तासांश्रवणमात्रेणतत्फलंलभतेनरः ३ किंपुनर्व्रतचीर्णेननरःप्राप्नोतिसूतज धन्यास्तेभारतेवर्षे
पौषोयैःसेवितोनरैः ४ तस्मात्कथयसूतान्येपौषधर्माःसनातनाः यान्श्रुत्वामुच्यतेजंतुर्विष्णुलोकंव्रजेद्ध्रुवं
५ सूतउवाच शृणुशौनकवक्ष्यामिवस्त्रदानेविधिंतव यस्याचरणमात्रेणविष्णुलोकंव्रजेद्ध्रुवम् ६
वस्त्रदानसमोधर्मोनभूतोनभविष्यति तस्मात्सर्वप्रयत्नेनवस्त्रदानंसमाचरेत् ७ वस्त्रदानेनतुपुराइंद्रद्यु-
म्नस्यभूपतेः नाभूवन्नरकाब्रह्मन्पीडांकर्तुंयमालये ८ शौनकउवाच इंद्रद्युम्नेतिविख्यातोयोसौराजा
बभूवह कुत्रवैवसतिस्तस्यकस्माज्जातःसभूमिपः ९ कथंतेनकृतंदानंपौषेवस्त्रस्यसूतज एतदाख्याहिस
कलपृच्छतोमेनुपूर्वशः १० सूतउवाच अंतर्वेद्यांपुराराजापिप्पलाख्योबभूवह इंद्रद्युम्नेतिविख्यातःपुत्र १०
स्तस्यमहात्मनः ११ सराजासहपुत्रेणपालयामासवैप्रजाम् महींपालयतस्तस्यव्रतधर्माःसमेधिताः १२

पुत्रंराज्येस्थापयित्वाकालेपंचत्वमेयिवान् तस्यपुत्रोप्यधर्मात्मात्यक्त्वाक्रियांपारलौकिकीम् १३ लोकाग्रहेणतत् सर्वंचकारनृपतेःसुतः अतिक्रूरोमहावादीस्त्रीसंगोनिष्क्रियःसदा १४ शठोधूर्तोसत्यवादीस्वधर्मेषुपराङ्मुखः कदापिनश्रुतातेनधर्मवार्तामहामुने १५ एकदानिर्गतोगेहात्यमुनामान्तरेबहि स्नानंप्रकुर्वतोलोकान्ददर्शतत्रवैनृपः १६ केचित्पुराणपठनंतथाशृण्वंतिचापरे विष्णुपूजारताःकेचिन्नामस्मरणतत्पराः १७ तत्रैकंब्राह्मणंराजाददर्शकृतमज्जनम् चीरेणहीनंवेपंतंदयायुक्तोबभूवह १८ उपवस्त्रंधृतंसूक्ष्मंनिष्कास्यब्राह्मणेर्पयत् तेनवस्त्रेणविप्रोसौसत्यशीतोबभूवह १९ राजाचस्वगृहंगत्वाप्याचरत्पूर्ववत्स्वकम् ततः स्वल्पेनकालेनराजापंचत्वमीयिवान् २० यमदूतैस्तथाबद्धोयमगेहंगतोभवत् यमंविज्ञापयामासुस्त्वानीतोय ॰ यमः २१ यमेनाज्ञापितादूताःकुंभीपाकेनिपात्यताम् तेधर्मवचनंश्रुत्वानिन्युरेनंचतत्रवै २२ कुंभी केमहाघोरेचिक्षिपुर्राजसत्तमं सोपिक्रूरोमहादुष्टोकुंभीपाकोतिदारुणः २३ राजसंसर्गमात्रेणशीतलोतिबभूवह दृष्ट्वाश्चर्यंतुतेदूताःकथयामासतुर्यमम् २४ यमोपिविस्मयाविष्टःसमीपेचानयत्तदा अपृच्छच्चित्रगुप्तंचकिमनेनकृतंपुरा २५ यमस्यचाज्ञयाचित्रगुप्तोवैशोधयत्तदा तथास्यपुण्यमुत्पन्नंवस्त्रदानकृतंभुवि २६ वासोदानस्यपुण्येनकुंभीपाकोनबाध्यते तस्मान्नयतमन्यत्रइतिभृत्यान्यमोब्रवीत् २७ तदातेयमदूतास्तंरौरवेभृशदारुणे पातयामासुरव्यग्रास्तस्मैसोपिनबाध्यते २८ तथान्येनरकेक्षिप्तःकोप्येनंनहिबाधते तदातेनरकाव्यर्थादृष्ट्वाचिंतापरायणाः २९ किमनेनकृतंपूर्वमित्येवंचिंतयद्यमः अकस्मान्नारदस्तत्रत्वागतोदिव्यदर्शनः ३० अतिक्रूरमुखंधर्मंदृष्ट्वातंनारदोब्रवीत् नारदउवाच किंधर्मत्वंविवर्णोसिकस्माच्चिंतापरायणः ३१ नचेद्गुप्तंचतेकार्यंकथयस्वममाग्रतः यमउवाच अधुनायमहाबाहो·

मर्त्यलोकादुपागतः ३२ महाक्रूरोपिचांडालोनरकान्प्रतिपातितः नएनंनरकानैवबाधंतेभृशादारुणाः ३३ वि-
चारयमहाबाहोकिमस्यसुकृतंस्थितम् इत्याकर्ण्यवचस्तस्यनारदोदिव्यदर्शनः ३४ अब्रवीद्धर्मराजानंतस्यध
र्ममनुत्तमम् नारदउवाच नकृतायद्विधर्मावैतथाप्येनमहात्मना ३५ महान्धर्मःसमाचीर्णःपौषेपुण्यप्र-
देयम् कर्मणानरकास्तेननबाध्यंतेस्यकर्मिणः ३६ पौषेचैलसमंदानंनभूतंनभविष्यति चैलस्यपौषमासेतुये
नदानंकृतंयम ३७ तस्यान्यधर्माचरणंकृताकृतमितीर्यते तस्मादस्यनबाध्यंतेइमेतेनरकायम ३८ पश्यैनं
विष्णुदूतांश्चप्राप्तानेतुहिवैष्णवे कथयित्वायमत्वेवंप्रययौनारदस्ततः ३९ विष्णुदूतान्धर्मराजोविमानेन-
समागतान् दृष्टवांस्तेतुतंनिन्युर्विमानेनपरंपदम् ४० तदासविस्मयाविष्टःस्वदूतान्प्रत्यवोचत यमउवा
च अहोअधर्मिणामेवंवस्त्रदानेनयागतिः ४१ तस्माद्वस्त्याकृतंयेनतस्मात्कोन्यःपरःपुमान् अद्यप्रभृति
लोकेषुचैलदानंतुपौषके ४२ येनदत्तंमहाविष्णोःप्रीत्यैतन्नाविलोक्यताम् इत्येवंशास्यभृत्यान्वैयमोगात्स्वगृ
हंततः ४३ सूतउवाच ततःप्रभृतिलोकेषुएतद्धर्मोमहानभूत् तस्माद्यपौषमासेतुवस्त्रदानंचरंतिच ४४
यमालयस्थानरकानतेषांदुःखदायकाः सर्वेषामेवधर्माणांयत्कृत्वाफलमश्नुते ४५ तत्फलंपौषमासेतुवस्त्र
दानेनमारिष इत्येतत्कथितंब्रह्मन्यथात्वंपृष्टवानसि ४६ माहात्म्यश्रवणादस्यतत्फलंप्राप्यतेनरैः नरकान्प
श्यतेनैवमाहात्म्यश्रवणान्मुने ४७ नवस्त्रदानेनसमोमहानभूद्धर्मस्त्रिलोकेषुमयामुनेश्रुतः तस्मात्प्रशंसंति
हिचैलदानंपौषेकुर्वंतेनसमश्नुतेदिवि ४८ इतिश्रीस्कंदपुराणेपौषमाहात्म्येवस्त्रदानप्रशंसनंनामनवमो-
ऽध्यायः ९ ॐ सूतउवाच शृणुशौनकवक्ष्यामिकांस्यदानंकरोतियः पौषमासिप्रयत्नेनतस्य
वंशक्षयोनहि १ पुरातुविष्णुनाकुत्सनामावैदानवोहतः तस्मैवरप्रदोभूत्वालोकानांहितकाम्यया २

कांस्यपात्रस्यदानेनलोकानांचिंतयन्हितम् तस्मादवश्यंकांस्यस्यपौषेदानंसमाचरेत् ३ शौनकउवाच कुत्स
नामाभवत्कोसौकस्माद्वैविष्णुनाहतः कथंसतस्मैवरदोलोकानांचिंतयन्हितम् ४ कांस्यपात्रस्यदानेनतस्मादाख्या
हिसूतज एकदाभगवान्विष्णुर्लक्ष्म्यायुक्तोभवत्सुखम् ५ तदासास्वामिनंदृष्ट्वालक्ष्मीप्रोवाचसत्वरम् ल-
क्ष्मीरुवाच भगवन्सर्वधर्मेषुकोधर्मःश्रेष्ठएवच ६ प्रसन्नोत्यंतंकेनत्वंसंततिःकेनचाक्षया तत्कथ्यतांमहा
भागकृपांकृत्वाममोपरि ७ श्रीभगवानुवाच शृणुदेवित्वयापृष्टंयथावत्कथयामिते त्वांविनाद्वारकायांतुए
कदाहंव्यवस्थितः ८ कार्यार्थंयादवैस्तत्रसुधर्मायांशुचिस्मिते अकस्माद्ब्राह्मणस्तत्रकश्चिदागत्यमांब्रवीत्
९ ब्राह्मणउवाच याचकोहंमहाभागत्वत्सकाशमिहागतः धर्मसंस्थापनार्थायसंभवस्तेधृतोहरे १० धर्म-
कार्यंमदर्थंवैमत्वाकुरुत्वरान्वितः इतितस्यवचःश्रुत्वाप्रोवाचमनघेतदा ११ श्रीभगवानुवाच येनत्वमिहमा
गतोसितत्कथवदभोद्विज ज्ञात्वापश्चात्करिष्यामिदेवैरपिसुदुष्करम् १२ इतितद्वाक्यमाकर्ण्यब्राह्मणःस्वस्यमा
नसम् कथयामासमेदेविसर्वंदुःखंत्वरान्वितः १३ ब्राह्मणउवाच भगवन्कुत्सनामावैदैत्योब्रह्मवरोद्धतः
नाशयन्ब्रह्मवृंदानिमाहिष्मत्यांससंस्थितः १४ तत्रगत्वामहाराजतंदैत्यंजहिकंटकम् येनसर्वंसुखंप्राप्ताव-
सामोत्यकुतोभयाः १५ यस्मात्त्वंहिमहाराजअस्मिन्कार्येमतोसिमे तस्मात्त्वमधुनादेवकुरुकार्यंत्वरान्वितः
१६ इतिविज्ञापितोदेविब्राह्मणेनतदाप्यहम् सुदर्शनंगृहीत्वाचगतोमाहिष्मतींतदा १७ दैत्येनसाकंमेयु
द्धमभूद्रोमहर्षणम् नागायुतायुतबलोयुद्धायसमुपस्थितः १८ तदाविंशत्यहान्येवयुद्धंमेदेवितत्रभूत्
पराजयोजयोवापिनैवतत्रप्रदृश्यते १९ तदाहंचिंतयायुक्तःकथमेनंनिपातये इतिचिंतयतस्तत्रब्राह्मणःप्र
त्युपस्थितः २० कांस्यधातुमयंमल्लंदत्वामुद्गरमब्रवीत् देवशर्मोवाच देवदेवममव्यग्रोगृहीत्वामुद्गरम्

म २१ एतच्छस्त्रेणत्वंशीघ्रंजह्येनमविचारयन् अयंवैमुद्गरोघोरःकालानलसमप्रभः २२ ब्रह्मदत्तमुद्गरोयं व्यर्थोनैवभविष्यति कालेस्मिन्भगवन्मृत्योःसमयोपिह्युपस्थितः २३ इत्युक्तोसौकुमारेणतदादैत्यउवाचमां कुत्सउवाच अनेनमुद्गरेणैवदेवत्वंहंसिमांखलु २४ कस्यासौमुद्गरोदेवकथंप्राप्तोस्तिवैत्वया वच्म्यहंकारणंसर्वंजहित्वमविचारयन् २५ इत्युक्त्वाकुत्सदैत्योमांतदाह्यविस्मयान्वितः पृष्टवान्दैत्यवर्यायकस्यायंमुद्गरोमम २६ तदासमामुद्गरस्यकारणंकथयद्भुतम् माहिष्मत्यांपुराकश्चित्प्रातःस्नायीशिवाभिधः २७ सनित्यंसर्वकार्याणित्यक्त्वाप्रात्याह्निमज्जनम् करोतिपश्चात्सततंग्रहकार्याणियानिच २८ रात्रौसएकदादेवचंद्रज्योत्स्नाभ्रमेणवै अरुणोदयंमन्यमानःस्नानार्थंचगतोनदीम् २९ तदार्धरात्रिसमयेकृतंस्नानंमहात्मना जपंकर्तुंनदीतीरेनिषसादशिवाभिधः ३० समूहोभूतनाथस्यअकस्मादागतस्तदा तंदृष्ट्वाब्राह्मणस्त्रस्तःकिमेतदितिचिंतयन् ३१ यावत्समीपंनप्राप्ताभूतसंघाइमेमया तावत्पलायनपरोजपस्तर्हिच्युतोभवेत् ३२ इत्यालोच्यदृढीभूत्वाजपएवतदाकरोत् समीपप्राप्तिभूतानांपुनर्व्यग्रोबभूवह ३३ तदातंवरुणःप्राप्तोदत्वामुद्गरमब्रवीत् वरुणउवाच गृहाणेमंमुद्गरंब्रह्मन्दैत्यानामंतकंपरम् ३४ भूमौकदापिनह्येनंस्थापयस्वस्वकक्षके नित्यंधारयदैत्यानामंतकस्त्वंभविष्यसि ३५ भूतप्रेतपिशाचाश्चदृष्ट्वागच्छंतिदूरतः इत्युक्त्वावरुणोराजाजगामनिलयंस्वकम् ३६ गृहीत्वाधारयत्कक्षेशिवशर्माभिधस्तदा भूतप्रेतपिशाचाश्चसर्वेतेदूरतोगताः ३७ कक्षेसमुद्गरंधृत्वाशिवशर्माभ्रमत्तदा कदापिस्थापितंनैवभूमौतेनमहात्मना ३८ तंदृष्ट्वाव्यथिताःसर्वेभूतसंघाऽसुराधिप अंतरंप्रेक्षयामासुर्मुद्गरस्यविनाशने ३९ बहुकालोगतस्तत्रनैवमुद्गरपादभूत् एकदासनदीतीरेशिवशर्मासमागतः ४० प्रातरेवहिस्नानार्थंकृत्वाभूमौसमुद्गरम् जलंविवेशतत्राहं गृहीत्वामु

दूरंततः ४१ यावत्पलायनपरोभूत्वातावत्सदृष्टवान् पृष्ठतोमेतदागत्य हुंकारान्वैविसृष्टयत् ४२ ज्वालयाच्चप्र-
तप्तोहंतन्मुखोत्थितयानदा दृष्ट्वाहंतस्यतत्कर्मभीतःसंत्यज्यमुद्गरम् ४३ गृहीत्वामुद्गरंसोपिप्रत्यवोचत्तदाचमा
मनेनमुद्गरेणैवभगवांस्त्वांहनिष्यति ४४ इत्युक्त्वाब्राह्मणःपश्चाद्गतोवैस्वाश्रमंप्रति ततःप्रभृतितेनैवभूमौन-
स्थापितंसदा ४५ पश्चात्स्वल्पेनकालेनशिवशर्मामृतिंगतः संप्राप्तोमुद्गरोदेवपुत्रेणदेवशर्मणा ४६ इतितेमु-
द्गरस्यैवकारणंकथितंमया इतःपरंकारणेनजहित्वमांविचारय ४७ इत्युक्त्वातेनदैत्येनशिरोमेपुरतःकृतम्
पश्चादहंशिरस्तस्यमुद्गरेणसमाहरम् ४८ पश्चाद्दिव्यवपुःप्राप्यमामुवाचसपूरुषः दिव्यपुरुषउवाच शा
पेनासुरतांप्राप्तःसोहंवैमोचितस्त्वया ४९ कृतार्थोहंकृतार्थोहंकृतार्थोहंनसंशयः त्वत्पदंगंतुकामोहंत्वयातद
नुमोचनम् ५० इत्युक्त्वामांपरिक्रम्यगंतुकामंतदाब्रुवम् ५१ श्रीभगवानुवाच गच्छत्वंमत्पदंदिव्यंपुन-
र्जन्मविवर्जिते इतःप्रभृतिलोकेषुकीर्तिस्तेस्तुस्थिराभवेत् ५२ मुद्गरेणतुकांस्येनशिरोहंतेसमाहरम् तस्मा
त्कांस्यमयंपात्रंकृत्वायोदानमाचरेत् ५३ पौषमासिपूर्णिमायांहेम्नावैसर्पिषासह नतेषांभूतबाधास्याद्धृशंवृ
द्धिश्चजायते ५४ सूर्यचंद्रमसौयावत्संततिस्तावदक्षया इतिदत्वावरंतस्मैगतोमुक्तिपदंनघ ५५ माहिष्मती-
ब्राह्मणानांतदाप्रभृतिनिर्भया इत्येतत्कथितंदेविसंततेःस्थिरकारणम् ५६ सूतउवाच इत्येतत्कथयित्वा
तुविष्णुश्चांतरथोभवत् वरदोभगवान्कुत्सदैत्यवर्योयथाभवत् ५७ तत्सर्वंकथितंतुभ्यंगुह्यमेतन्नसंशयः
तस्मात्पौषस्यपूर्णायांविष्णुप्रीत्यैस्करवायच ५८ कुर्वंतितेनरानैवदुःखंपश्यंतिशौनक कांस्यदानसमंदानंन-
भूतंनभविष्यति ५९ संततेःकारणंगुह्यंत्वयैवकथितंमम श्रद्दधानस्यतेनूनंगुह्यमेतत्प्रकाशितम् ६० फल
दंवाजपेयस्यकिमन्यच्छ्रोतुमिच्छसि ६१ पौषेशौनककांस्यदानफलदंनान्यंमयालोकितं वापीकूपतडागकुंडर

चनायोगेनयत्सत्फलम् श्रीविष्ण्वादिसुरार्चनेनविधिनाप्रोक्तंफलंसूरिभिस्तत्सर्वंकिलपौषमासव्रतिनः कांस्य
प्रदानाद्भवेत् ६२ इतिश्रीस्कंदपुराणेपौषमाहात्म्येकांस्य पात्रदानप्रशंसननामदशमोऽध्यायः १० ७
शौनकउवाच कथयस्वान्यनियमान्पौषेमासिफलप्रदान् यान्कृत्वाभगवांस्तुष्येन्मोक्षप्राप्तिश्चजायते १
तउवाच शृणुशौनकपौषेतुमौनधर्मोमहानभूत् यत्कृत्वामुच्यतेजंतुर्जन्मसंसारबंधनात् २ तत्तेहंसंप्रवक्ष्या
मियथाविध्यनुसारतः सहमासस्यपूर्णायाकृत्वास्नानादिकंतथा ३ संकल्पनियतोभूत्वापश्चान्मौनंसमाचरे
त् देवेशपौषमासेहियावन्मासविधिर्भवेत् ४ तावन्मौनंकरिष्यामिअशनेप्रीतयेतव इतिकृत्वातुसंकल्पंप-
श्चान्मौनंतुभोजनम् ५ आचरेत्सेतुपर्यंतंकार्यंमौनंयथाविधि यावद्भोजनपर्यंतंनचवाणींविसर्जयेत् ६ अं
गानिचालयेन्नैवनैवालस्यंविसर्जयेत् विसर्जयेन्नफूत्कारान्मस्तकंनविकंपयेत् ७ नैवकुर्याच्चहुंकारान्मौ
नहानिर्यतोभवेत् धृतमौनंनरोयस्तुहुंहुंवदतिमोहितः ८ मौनभंगमनुप्राप्यरौरवेजायतेकृमिः तस्मान्मौनं
प्रयत्नेनबुधैःकार्यंसदामुने ९ समाप्तौमौननियमउद्यापनविधिंचरेत् शुचौदेशेसमुल्लिप्यरंगवल्ल्यादिभिर्युते
१० तिलराशौतुसंस्थाप्यअव्रणंकलशंशुभम् तस्मिन्देवंतुसंस्थाप्यकेशवंभक्तिसंयुतः ११ पूजयेत्सर्वदेवेशं
षोडशैरुपचारकैः प्रभातेविमलेस्नात्वाअग्निंचस्थापयेत्ततः १२ अश्वत्थकाष्ठैःसाज्यैश्चअष्टोत्तरशताहुतीः इ
दंविष्णुरितिमंत्रेणहोमंकुर्याद्विचक्षणः १३ आचार्यंपूजयेत्पश्चाद्गोदानादिभिरादरात् प्रासादेवैष्णवेगत्वावि-
ष्णुंसंपूज्यभक्तितः १४ घटांतत्रप्रबध्नीयात्प्रणम्याथक्षमापयेत् देवदेवेशदेवेशत्वत्प्रसादाज्जनार्दन १५ कृत
मेतन्मयामौनंपरिपूर्णंतदस्तुमे इतिसंप्रार्थ्यदेवेशंवाङ्मौनंविसृजेत्ततः १६ सूतउवाच एवंतेकथितंब्रह्म
न्वाङ्मौनव्रतमुत्तमम् सर्वार्थकामदंनृणांधन्यंस्वर्गफलप्रदम् १७ इदंमयातेभिहितंभृगूद्वहमौनव्रतंकेशव

१ टीप· सेतुपर्यंतं मासव्रतपर्यंतं·

तुष्टिदंनृणाम् कामप्रदंसर्वसुखप्रदंच पुत्रप्रदंस्वस्त्ययनंच सौख्यदम् १८ इतिश्रीस्कंदपुराणे पौ
षमासमाहात्म्ये मौनव्रतकथनंनाम एकादशोऽध्यायः ११ श्रीकृष्णार्पणमस्तु छ छ
सूतउवाच शृणुशौनकवक्ष्यामिपौषादित्येतुयत्फलम् प्रातःस्नानभवंपुण्यंतदिहैकमनाःशृणु १ पौ
षेभानौतुसंप्राप्तेसरस्वत्याश्चसंगमे प्रातरेवहियःस्नातिसनगच्छेद्यमालयम् २ पौषादित्येसरस्वत्याःसं
गमेस्नातियोनरः निरयान्नैवप्राप्नोतियथासत्यध्वजःपुरा ३ शौनकउवाच कोसौसत्यध्वजोनाम-
किंकृतंतेनवैपुरा कथंनप्राप्तोनिरयान् एतदाख्याहिमेमुने ४ सूतउवाच द्रविडेषुपुराकश्चित्सत्यध्व
जन्नृपोऽभवत् राजधर्मेषुनिष्णातोदेवब्राह्मणपूजकः ५ दानधर्मपरोनित्यंप्रजापोषणतत्परः ब्रह्मण्यः
सत्यसंधश्चयथाह्यौशीनरोनृपः ६ एवंविधःसन्नृपतिःकुंडिनेनगरेवसन् सुशीलानामतस्यासीत्प-
त्नीपतिपरायणा ७ तयासहवसंस्तत्रकरोतिराज्यमुत्तमम् कस्यचित्त्वथकालस्यमृगयार्थंवनंगतः ८
मृगाननुगतोयातानितश्चेतश्चधावति नप्राप्तावैमृगायावत्तावदस्तंगतोरविः ९ आलोकयामासतदाव
सतिंसनृपोत्तमः आश्रमंदृष्टवांस्तत्रद्विजवर्यस्यमेधसः १० नाम्नाकृषीवलस्याथसर्वसत्त्वनिषेवितम्
नानारण्यगणव्रातैर्नानावृक्षैश्चशोभितम् ११ सतदाश्रममागत्यकृषीवलमपश्यत ननामदंडवद्भूमौदा-
सोहमितिसोब्रवीत् १२ स्वदेशपालकंदृष्ट्वाद्विजोहर्षसमन्वितः आतिथ्यमकरोत्तस्मैतांनिशांसोपित-
स्थिवान् १३ ततःप्रभातेसंप्राप्तेस्वशिष्यैःमुनिपुंगवः स्नानार्थमुद्यमंकृत्वाराजानमिदमब्रवीत् १४
कृषीवलउवाच कृत्वाहंमज्जनंयावत्आगमिष्येनृपोत्तम स्थितोभवत्वमत्रैवपश्चाद्गच्छयथासुख
म् १६ नोचेत्त्वमपिराजेंद्रस्नातुंगच्छयदीच्छसि इतिवाक्यंमुनेःश्रुत्वाराजाचाथतमब्रवीत् १६

सत्यध्वजउवाच महाशीतेप्रातरेवकिमर्थंक्रियतेत्वया स्नानमद्यमहाराजकःकालोद्यउपागतः
१७ कृषीवलउवाच पौषादित्येद्यसंप्राप्तेमुनिभिस्तत्वदर्शिभिः पुण्यकालसुकथितःसरस्वत्यां
सुमज्जने १८ अतोमहाराजमयाएभिःसहकृतोद्यमः त्वमप्यागच्छनृपतेस्नानेनाप्स्यस्यनुत्तमान्
१९ ततःसत्यध्वजोराजाहर्षनिर्भरमानसः ऋषिभिःसहितोगत्वाअवगाह्यददौधनम् २० आमंत्र्यऋ
षिमुख्यंसप्रययौनगरंनृपः ततःप्रभृतिप्रत्यब्दंपौषादित्येऽवगाहनम् २१ लोकानामपिसर्वेषामुपदेशंच
कारसः ततःकालांतरेणैवराजापंचत्वमागतः २२ एतस्मिन्नंतरेयाम्यैर्दूतैर्नीतोयमालये तस्यराज्ञोदर्श
नेननरकस्थाश्चप्राणिनः २३ सुखंप्रपेदिरेसर्वेनरकास्तान्नबाधिरे दृष्ट्वातत्कर्मतेसर्वेयमदूताविसिस्मि
रे २४ आगत्यधर्मराजानंतदासर्वेसमूचिरे यमदूताऊचुः एतावतमहाराजसर्वेपातकिनोजनाः
२५ आक्रोशंचक्रिरेसर्वेयातनाभिःप्रबाधिताः अधुनासुखमापुस्तेअस्यराज्ञोनुदर्शनात् २६ इतिवाक्यं
समाकर्ण्यधर्मराजोतिविस्मितः कारणंचिंतयामासप्राणिनासुखहेतुकः २७ एतस्मिन्नंतरेतत्रनारदोमु
निसत्तमः त्रिलोकींपर्यटन्ब्रह्मन्कृतांतंसमुपस्थितः २८ व्यग्रंधर्मंविलोक्याथनारदोवाक्यमब्रवीत्
नारदउवाच किंत्वंचिंतयसेकालकिंतेकार्यमुपस्थितम् २९ ब्रूहिमेनिश्चयेनैवतवचिंतांहराम्यहम्
यमउवाच दूतैर्नृलोकादानीतश्चाधुनायंनृपोत्तमः ३० वीक्षितानारकीयाश्चत्वनेनसुखिनःकृताः किमे
तत्कारणमितिचिंतयामिमहामुने ३१ एतस्मिन्नंतरेप्राप्तोभवान्पारमदर्शनः तदत्रकारणंसर्वंकथ्यतांमुनिपुं
३२ नारदउवाच शृणुधर्ममयादृष्टंध्यानेनास्यप्रयोजनम् तत्सर्वंकथयामित्वांकृतांतशृणुयत्नतः
३३ राज्ञानेनकृतंलोकेपौषादित्येतुमज्जनम् प्रातरेवमहाराजसरस्वत्यासुसंगमे ३४ तेनपुण्यप्रभावेन

स्वयंनिष्पापभूपतिः नारकीयांस्तुनिष्पापान्दर्शनेनैवतेऽगमतः ३५ चकारयममेसर्वंकारणंतोनिवेदितम् इ
त्याभाष्यमुनिर्धर्मंतत्रैवांतरधीयत ३६ सूतउवाच तदासौविस्मयाविष्टोधर्मराजोमहामुने दूतान्वैशि
क्षयामासपौषादित्येतुमज्जनम् ३७ कुर्वंतितान्नास्पृशध्वमितरेषांभयंमहत् इतितेकथितंसर्वंसत्यध्वजाकि
चेष्टितम् ३८ यथावैनारकीयान्योमोचयामासपुण्यलः ४९ इतिश्रीपौषमाहात्म्येपौषादित्यमहिमाक
थनंनामद्वादशोऽध्यायः १२ छ सूतउवाच अन्यच्छृणुमहाबाहोपौषस्नानेनयत्फलम् तत्तुभ्यं
वच्मिविप्रेंद्रयेनाजगरमोचितः १ शौनकउवाच कोसावजगरोनामकेनवैमोचितोभवत् किंकृतंतेन
वैपूर्वंकथंमुक्तिंसमेयिवान् २ एतत्कथयमेसर्वंचेष्टितंतस्यसूतज त्वयासंकथ्यमानंनश्रोतुमेधावतेमनः ३
सूतउवाच सम्यक्पृष्टंत्वयासाधोलोकानामुपकारकम् यदाचरन्नरोलोकेदुर्गतिंनैवविंदति ४ वंगदे
शेपुराकश्चिद्द्रुमिलोनामब्राम्हणः आसीदतीवधर्मात्मावेदवेदांगपारगः ५ सर्वक्रियासुनिष्णातोदेव
तातिथिपूजकः परिवारेणसंयुक्तस्ताम्रपर्ण्यास्तटेगतः ६ दिवसेदिवसेकृत्वाताम्रपर्ण्यास्तटेक्रियाः
आगत्यस्वाश्रमंपश्चात्स्वकर्मक्रियकृद्भूत् ७ एवंकृत्वासधर्मात्मानिवसद्बहुवासरम् कदाचित्पौषमा
सेतुसंप्राप्तेमुनिपुंगवः ८ ताम्रपर्ण्यास्तटंप्राप्यस्नानाद्युद्योगतत्परः जातोदृष्टंतदातेनकन्यकाद्वयमुत्तम
म् ९ धर्मपूर्णानाचरंतंकौतूहलसमन्वितः तदाहकन्यकेतुद्रुमिलोद्विजसत्तमः १० द्रुमिलउवाच
भोकन्येकिंप्रवर्तेनयुवाभ्यांप्रातरेवहि कोविधिःकथ्यतांतन्मज्ञातुमेपरमंमनः ११ कन्येऊचतुः पौषे
मासेतुसंप्राप्तेआवाभ्यांप्रातरेवतु गोविंदस्यप्रीत्यर्थंकुर्वत्योर्मज्जनादिकम् १२ अस्मिन्दानादिकंकृ
त्वानरोदुर्गतिंनाप्नुयात् अस्माभिःक्रियतेचैवपौषकृत्यंद्विजोत्तम १३ द्रुमिलउवाच उच्यतांक

न्यकेमह्यंपौषधर्मान्सविस्तरान् युवांकेदेवकन्येवानागगंधर्वकन्यके १४ कन्येऊचतुः शंखचूडइ
तिख्यातोनागानामुत्तमोभवत् तस्यकन्येवयविद्धितेनेदमुपदेशितम् १५ तद्व्रतमुपकुर्वातेत्वयापिक्रिय
तांमुने भानौधनेतुसंप्राप्तेप्रातरेवहिमज्जनं १६ दीपदानंप्रकर्तव्यंदुर्गत्यादिनिवारणम् दुर्गतिंमोचयि
त्वाचसर्पराजस्यकस्यचित् १७ स्वगृहेगच्छताब्रह्मन्सोपितेकथयिष्यति इत्युक्त्वाकन्यकेविप्रततोन्तं
तर्हिततदा १८ द्रुमिलोपिसधर्मात्मातत्रैवत्रिदिनंवसन् प्रत्यहमज्जनंकृत्वापौषधर्मान्चकारह १९
तृतीयेदिवसेप्राप्तेप्रातःकृत्वातुमज्जनम् द्रुमिलःस्वगृहंगच्छन्मार्गमध्येददर्शह २० साड्योजनदेहेन
पतितोजगरोमहान् मार्गरोधंतदादृष्ट्वाब्राह्मणेनमहात्मना २१ गमनार्थंजलंप्रोक्ष्यकमंडलुगतंतदा ज
लेनस्पृष्टमात्रेणत्यक्त्वातद्रूपदुर्धरम् २२ गंधर्वदेहंसंप्राप्यद्रुमिलंवाक्यमब्रवीत् २३ गंधर्वउवाच
धन्योहंकृतकृत्योहंत्वयाब्राह्मणसत्तम तारितोस्म्यहंब्रह्मन्नमस्तेस्तुमहामुने २४ इतोगच्छामिगं
धर्वलोकंमेत्तुमर्हसि द्रुमिलउवाच कोभवान्केनकर्मणाकथंप्राप्तोदशामिमाम् २५ कथमुक्तोघो
ररूपात्विस्मयोमेमहानभूत् तत्कथ्यतांमहाभागरहोनयदिमन्यसे २६ गंधर्वउवाच शृणुमत्त्व
महाभागयथावृत्तंपुराभवत् पूर्वजन्मन्यहमभूत्गंधर्वोनामदेवलः २७ रूपवान्गुणसंपन्नोनृत्यगानेन
गर्वितः कदाचित्तत्रसंप्राप्तोष्टावक्रोमहामुनिः २८ दृष्ट्वारूपंतदातस्यव्यहसन्मुनिपुंगवम् दृष्ट्वामां
तादृशंसोपिक्रोधप्रचलितलोचनः २९ अभवद्गधर्मात्मावेपसंमांततोब्रवीत् अष्टावक्रउवाच यस्त्व
याद्य कृतंहास्यंतेनगंधर्वकंटक ३० दोषेणतत्वंतोयाहियोनिमाजगरींप्रति इत्युक्त्वामासमुनिराङ्गमना
३१ ततोहंभयसंत्रस्तःपादौजग्राहतन्मुनेः प्रार्थयामासतंविप्रंशापांतायमहामते ३२ ततो

ब्रवीत्सधर्मात्माशापांतंयच्छृणुष्वतत्   अष्टावक्रउवाच   गच्छगंधर्वकावेर्यास्तटेरण्यमनुत्तमम् ३३ नक्रत्वं
योनिमाश्रित्यचरिष्यसिवनेशुभे   कदाचिद्द्रुमिलोनामब्राह्मणोत्रागमिष्यति ३४ तस्यमार्गनिरोधंत्वंकरिष्य
सिनसंशयः   ततस्तवोपरित्यंबुप्रोक्षयिष्यतिसद्विजः ३५ तेनत्वंपौषमासस्यफलंप्राप्नोषिशोभनम् तदाकु
रूपंतुविहायदुष्टंस्वीयंस्वरूपंभजसेमहाभुज ३६ अनुग्रहान्मेत्वथपौषस्नानात्स्मृतिश्चतस्माद्द्रुमिलस्समा
गमात् ३७ द्रुमिलैतन्मयासर्वंकारणंकथितंतव   मुनिप्रसादादथतेप्राप्तंसर्वंसुशोभन ३७ स्वपदंगन्तुमिच्छ
मित्यनुज्ञांदातुमर्हसि   सूतउवाच   इत्याकर्ण्यवचस्तस्यद्रुमिलोमुनिसत्तमः ३८ विस्मयाविष्टमनसापौ
षकृत्येमहर्षितः   ददौचाज्ञांतदातस्यस्वगृहंगन्तुमुद्यतः ३९ सोपिब्रह्मप्रसादेनपौषस्नानफलेनच   वरंविमा
नमारुह्यगांधर्वंलोकमेयिवान् ४० द्रुमिलोपितमालोक्यचागतःस्वगृहंप्रति   वंगदेशस्यराजानंसमाहूय
तदाब्रवीत् ४१ राजापिविस्मयाविष्टःस्वपुर्यांचोपदिष्टवान्   अद्यप्रभृतिभोलोकास्सर्वयज्ञसमन्विताः ४२
पौषमासेतुसंप्राप्तेदीपदानंचमज्जनम्   प्रातरेवप्रकुर्वंतुप्राप्ते भानौतुकार्मुके ४३ इतिलोकान्समादिश्य
व्रतंसोपिचकारह   तत्कालप्रभृतिसर्वेलोकाहर्षसमन्विताः ४४ अंतःपुरेणसहितोविष्णुलोकंगतोनृ
पः   सूतउवाच   एतदाजगरंसर्वंकथितंतेमहामुने ४५ पौषस्नानफलेनैवमुक्तिलोकंयथागतः
४६   इतिश्रीस्कंदपुराणेपौषमासमाहात्म्येप्रातःस्नानमहिमावर्णनंनामत्रयोदशोऽध्यायः १३
सूतउवाच   अन्यच्छृणुत्वंब्रह्मंश्चपौषपूर्णांतुयत्कृतम्   येनकृत्येनसंप्राप्तोविष्णुलोकंतुवैश्यजः
१   शौनकउवाच   कोसौवैश्यस्त्वयाप्रोक्तोपूर्णायांतेनकिंकृतम्   कथंप्राप्तोविष्णुलोकंतद्वदस्वम
साधुना २   सूतउवाच   माहिष्मत्यांपुराचासीच्छिवशर्मेतिनामतः   वैश्योधनसमृद्धोपिवणिक्कृत्ये

पुत्रतरः ३ लोभाविष्टेनचित्तेनवाणिज्यंचचकारसः इतश्चेतश्चस्थानिन्येन्यायतोऽन्यायतोधनम् ४ सन्गृहीत्वापुनस्तस्यवृद्ध्यर्थेयत्नवानभूत् कदाचिद्द्रव्यलुब्धेनब्राह्मणानैवभोजिताः ५ गवांचयवसंनैवदत्तंतेनातिपापिना स्वगृहेपरिवारेभ्यःसमर्थोपिनदत्तवान् ६ एवंधनार्जनेतेननीतःकालोमहामुने गच्छन्तिष्ठन्स्वपन्भुंजन्द्रव्यमेवानुचिंतयन् ७ कदाचिद्दैवयोगेनचोरैर्नीतंतुतद्धनम् अदृष्ट्वाद्विजद्रव्यमन्यनिक्षेपगतः ८ तत्राप्यदृष्ट्वादुःखेनहाहाशब्दंचकारसः किंकरोमिक्वगच्छामिकथंजीवाम्यतःपरम् ९ इतिदुःखेनमहताशिवशर्मासवैश्यजः उन्मत्तजडवत्ब्रह्मन्विचचारावनीमिमाम् १० कदाचिद्दैवयोगेनगंगाप्रतेसमागतः तत्रदृष्ट्वासमूहंचलोकानांधर्मचारिणाम् ११ व्यापारंचचकारासौपुनर्वृत्त्यर्थमानसः पूर्वकृतिंसमाश्रित्यधनक्षेपार्थमुद्यतः १२ वृत्तयोबहुधाचक्रेनधनंप्राप्तवान्यदा तदास्वदेहत्यागायनिश्चित्यसतद्गतः १३ कंठेबध्वासपाषाणंजलेमर्तुंसमुद्यतः एतस्मिन्नंतरेतत्रचंद्रशर्मामहामुनिः १४ आगतस्तत्रतदृष्ट्वादेहपातेसमुद्यतम् तदासविस्मयाविष्टोवृत्तांतसमपृच्छत १५ कोभवान्कथमात्मानंगाया क्षिप्यतेप्रभो किंतेदुःखंतुसंजातंत्वात्मपातंकरोषिकिम् १६ आत्महत्यामहादुःखमात्महत्याकुलक्षयः आत्महंतुर्नलोकोस्तिइहामुत्रकथंचन १७ अतस्त्वंब्रूहिमेसर्वंतवदुःखंहराम्यहम् इत्यृषेर्वाक्यमाकर्ण्यकथयित्वास्वकर्मतत् १८ त्वंगतिस्त्वमतिर्मेद्यपितामातागुरुःसखा सुहृदश्चात्मरूपस्त्वंत्वांविनानास्तिमेगतिः १९ मुनेपाहिमहाबाहोमुनेपाहिनमोस्तुते लक्ष्मीप्राप्तिकरंब्रूहियेनाहंधनवान्भवे २० लक्ष्मीयोगविहीनोहंजीवितुंनैवमुत्सहे सूत उवाच वैश्यपुत्रस्यतत्ज्ञात्वाहृद्गतंसमहामुनिः २१ उपायंकथयामासपूर्णिमायाव्रतस्यच तेनपुण्येनसंजातोधनाढ्योबुद्धिसंयुतः २२ दुर्बुद्धिस्त्वग

१६

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

ता तस्यधर्मबुद्धिरभूत्तदा चकारप्रतिवर्षेसौपूर्णिमाख्यंव्रतंशुभम् २३ कांस्यपात्रप्रदानेनसर्वान्कामानवाप्नुयात् कांस्यपात्रसमंदानंनभूतनभविष्यति २४ एतत्तेकथितंब्रह्मन्पौर्णिमाव्रतमुत्तमम् कथांश्रुत्वानरोभक्त्याव्रतस्यास्यफलंलभेत् २५ इतिश्रीस्कंदपुराणेपौषमासमाहात्म्येपौर्णिमामहिमाकथनंनामचतुर्दशोऽध्यायः १४ श्रीकृष्णार्पणमस्तु छ

शौनकउवाच चंद्रशर्मामुनिःप्राहपौर्णिमायांव्रतंशुभम् तन्मेवदमहाप्राज्ञयथावद्विधिपूर्वकम् १ सूतउवाच वैश्यप्रतिमहाबाहोचंद्रशर्मानुयद्वदत् तदहंसंप्रवक्ष्यामिपौर्णिमायाव्रतंशुभम् २ संप्राप्तेपौषमासेतुपूर्णायांप्रातरैवहि स्नानंकृत्वानरैःसम्यक्नित्यनैमित्तिकोविधिः ३ सुवर्णप्रतिमाकार्याशिशुमारस्यवैमुने त्रिंशत्पलमितंकार्यंकांस्यपात्रंसुशोभनम् ४ कृत्वाघृतेनतत्पूर्णंदेवंसंस्थाप्यतत्रवै उपचारैःषोडशभिर्मंत्रेणानेनपूजयेत् ५ शिशुमारनमस्तेस्तुसर्वशक्तियुतप्रभो उत्पत्तिस्थितिनाशानांहेतुभूतःसनातनः ६ मंत्रेणानेनसंपूज्यप्रार्थयित्वाततःपरम् प्रार्थनामंत्रः ७ नमस्तेदेवदेवेशनमस्तेगरुडध्वज नमस्तेपुंडरीकाक्षत्राहिमांशरणागतम् ८ इतिप्रार्थ्यततोदेवंघृतपात्रसमन्वितम् दक्षिणाफलसंयुक्तंदानंदद्याद्विजन्मने ९ दानमंत्रः अग्निनेत्रनमस्तुभ्यंनमस्तेत्वमरप्रिय तवदानेनसंतुष्टोसंपूर्णान्ममनोरथाः १० इतिमंत्रेणदेवस्यदानंदद्यात्ततोनरः ब्राह्मणान्पायसान्नेनयथाशक्त्यातुभोजयेत् ११ सूतउवाच प्रत्यब्दमेवंकुरुतेयथाशक्त्याव्रतंनरः सदीर्घायुःसुखीपुत्रीविजयीधनवान्भवेत् १२ अंतेपदमवाप्नोतिदशपूर्वैर्दशापरैः एतत्तेकथितंब्रह्मन्शिशुमारव्रतंशुभम् १३ अनेनव्रतराजेनशिववर्मासवैश्यजः लोकांतरेपुनर्भूमौनंदनामाभवन्मुने १४ व्रतस्यास्यप्रभावेनभगवान्पुत्रतामगात् वासुदेवेभगवतीपुत्रीभूतेजनार्दने १५

किंतस्यदुर्लभतरं इहलोकेपरत्रच तस्माच्चैवप्रकर्तव्यंसर्वकामेप्सुभिर्नरैः १६ सूतउवाच इतितेपौष
मासस्यमाहात्म्यंकथितंमया शृण्वतांपुण्यदंभक्त्यानान्यदेवंविमोचनम् १७ शृणुयाच्छ्रावयेद्वापिसयाति
परमागतिम् श्रुत्वाकथामिमांपुण्यांवाचकंनैवपूजयेत् १८ दरिद्रोदुःखभागीचमूकत्वंजन्मजन्मनि प्रा·
प्नोत्येवनसंदेहस्तस्मात्तपूजयेत्सुधीः १९ पौषधर्मान्स्वशक्त्यायोनाचरेद्यदिमानवः तद्वामाहात्म्यश्रवणा·
द्धर्माणांफलमाप्नुयात् २० श्रवणेनास्यबहवोस्वर्गलोकंतुभेजिरे हरिश्चंद्रोरंतिदेवोमांधातासगरोरघुः २१
खट्वांगोनहुषश्चापितथालर्कादयोनृपाः तस्मात्पौषस्यमाहात्म्यंश्रोतव्यंचसदानरैः २२ अस्यश्रवणमात्रे·
णसर्वपापैःप्रमुच्यते सर्वेषामेवतीर्थानामभिषेकफलंलभेत् २३ इतिश्रीस्कंदपुराणेपौषमासमाहा·
त्म्यंकथननामपंचदशोऽध्यायः १५ श्रीकृष्णार्पणमस्तु ❀ इतिश्रीज्योतिर्वित्कुलावतंस·
व्यंकटरामात्मजहरिकृष्णविनिर्मितेबृहज्ज्योतिषार्णवेअष्टमेधर्मस्कंधेचतुर्थेमासस्तवकेपौषमासमाहा·
त्म्यंदशमंसमाप्तम् १० श्रीगोपालकृष्णोजयति श्रीरस्तुशुभम् श्रीशुभमस्तु

यह पौष मास माहात्म्य मुंबई में पंडित श्रीधर शिवलाल
जीके मत्तायुक्तज्ञानसागर छापखाना मे छाप्यो
मिति फाल्गुन कृष्ण १४ संवत् १९४५
शके १८१० तारीख ३१ मा
हे मार्च सन १८८९

इतिमासस्तवकेपौषमास माहात्म्य समाप्त



अथमासस्तबकेमाघमासमाहात्म्यसटीकमारभ्यते·


सूत·
शौनक·
वसिष्ठ·
दिलीपरा·
ब्रह्मा·
नारद·
अप्स·
राक्षस·
दिव्यपुरू·
नदीस्नान·
दत्तात्रेय
सहस्त्रार्जु·
देवद्यु
पिशा·
दिव्यपु·
सरस्वतीन्.
केरल·
उरु·
गगान·
लका·
दि·पु·
मारसप·
वानर·
गंधर्वके·
ब्रह्मचा
वेदविधि·
लौ
मशा
अच्छोदसरो·
ब्रह्माधर्मतोल
तेहैं·
माघध·
भारीहुआ
तिलोत्त·
सुंददैत्य·
उपसुंद
कुंनिका·
भृगुऋ·
व्याघ्रमु·पु
स्त्री
मरी रूपम·
सुधर्मारा·
यापि·
ऋ·
गोविषतीक·
माहिष्मतीराजा
मरा·


प्रयागराज तीर्थ·
किल्ला·
तोप
यमुनानदी·
गंगानदी

त्रिवेणीमाधवंविष्णुंभारद्वाजंचवासुकिं॥वंदेक्षयव
टंसोमंप्रयागंतीर्थनायकं॥१॥ धनुस्त्रीशतविस्तीर्णेसि
तनीलांबुसंगमे॥ अपुनरावृत्तिमाधीरा॥जनस्तथीपुन-
र्भवेत्॥२॥ गंगायमुनयोर्मध्येबालरंडातपस्विनी॥
बलात्कारेणगृण्हंतितद्विष्णोःपरमंपदम्॥३॥


वामदे.
हिरण्यपु.
सर्प.
मुनिस्था.
चित्रकूट
वि.
यमदूत.
विकुंड.
श्रीकुंड.
नरकुं.
विकुंड.
सुपित्र
यमुना
वीरसे
रा.
ऋषि.
हि.पु.
भद्रकश्रा.
प्रयाग.
विवि
श्वर.
रा.
ऋषि
विष्णुपू.
वृषभ.
व्या.
रुभद्र.
भद्र.
विष्णुदू.
यमदूत.
भद्र.
ब्रह्मा.
ऋ.
हिरण्यपु.
पिशाच२
शाकिनी
ब्रह्मरा
प्रेत२
कूष्मांडादि
सुयज्ञ
ब्रह्मरा.
डाकिनी.
२८प्रेत.
सुयज्ञ.
२८दिव्य
पुरुष.
शांडि
ऋ.
सुयज्ञ.
कौशिकीनदी.


वासिष·
अरुंध·
विश्वा मित्र·
स्त्री·
शिवलं·
चंद्र
इंद्र
ब्रह्मा
माड्व्य ऋषि·
ब्रह्मा
सौ बालक·
राक्षस·
स्त्री शोक करती है
राक्ष·
सुचताल्नी
धनुर्धराविष्णु


मत्सव्रत ग्राम
सहृत्तपाणु·
धृत्यधाम्ना·
दीघवपा·
हरिसिं
धनञ्ज·
रेव
भ·
वेश्यार
वत्तु·
विष्णुदूत·
यमदूत·
प्रयागक्षेत्र·
यमुना·
गंगानदी·
विराटपुरुष·
भ
सत्यलो·
तपोलो·
जनोलो·
महर्लो·
गौरीश्वर·
पाताल·
यमराज·
नारद·
लक्षणवेश्या·
थाजकन्या·
भुजंगरस्तु·
लसर्वीतेरीपदा·
गालव·
लुब्ध·
दिव्यपु·
शुक·
वानर·
शतमन·
इंद्र·
नारद·
वशि·
विश्वा·
सूर्य·
ब्रह्मा·
वसि·
विश्वा

अथमाघमास माहात्म्य विषयानुक्रमणिका·

अ॰ विषयः

१ मंगलाचरणं ततोवृद्ध हारीतोपदेशेन माघस्नानमाहात्म्यश्रवणेच्छोर्दिलीपस्यवसिष्ठंप्रति गमनं ततो वसिष्ठः दिलीपंप्रतिगृहस्नानप्रभृतिवापीकूपाद्यनेकतीर्थस्नान फलनिरूपण·पूर्वकं मकरे प्रयागराजतीर्थ स्नानस्यातिप्राशस्त्यं फलविशेषं पंचगंधर्वकन्यानां प्रयागस्नानेन पैशाच्ययोनितो मुक्तिंचाह· श्लो· ५१

१ मनसो कालुष्यनाशनोपायं पृच्छतो नारदस्याग्रे ब्रह्मासर्वधर्मापेक्षया माघस्नानस्यावश्यकरणीयत्वेन महाफलप्रदत्वेनच तन्माहात्म्यप्रतिपादनंचकार कुक्षिका ब्राह्मणी माघस्नानात्सूर्यलोकंजगामेति कथांतरनिरूपणम् श्लोकाः ६७

अ॰ विषयः

२ स्नानमाधवपूजनकथाश्रवणविधिः १२७

३ परस्त्रीसंगदोषेण मृतस्य माहिष्मतेर्नृपस्य माघस्नान पुण्य दानेन पुनरुत्थानमिति कथानिरूपणम्· श्लोकाः ६५

४ माधवस्यदुग्धाभिषेकादयोधर्माः श्लो· ८०

५ माघमाहात्म्यश्रवण पुण्येन श्वेतगुल्यकस्यसर्पयोनिसकाशान्मुक्तिकथनं श्लो॰ ६५

६ तिथ्यादिपरत्वेनाभिषेक ब्राह्मणभोजनादिमाहात्म्यं· श्लोकाः ६४

७ स्नानादिषु ख्यातिपुण्यस्थान व्रतकथनं तत्र कालिंद्यांमाघद्वयस्नानेनविकुंडलस्यस्वर्गप्राप्तिर्जातेति इतिहासः वीरसेनभद्रकयोः स्वर्गप्राप्तिवर्णनं विचित्ररथनृपस्येतिहासः

अ॰ विषयः

श्लोकाः ७३

८ सुभद्रभद्रेतिहाससहितं स्नानमाहात्म्यं ९०

९ कावेरीस्नानयोगेन गुरुनिंदादोषेण ब्रह्मराक्षसत्वंप्राप्तस्यपरिधिनामकशिष्यस्य मोक्षोजातइति वर्णनं· श्लोकाः ७९

१० सुयज्ञंप्रति अष्टाविंशतिपिशाचानांसमागमस्ततोनद्योनिप्रापकस्वस्वपूर्वजन्मकर्मकथनंक्रमेणाध्याय श्लो॰ ७३।६८।७८।५५।७२

१५ तेषांपिशाचानांसुयज्ञकृत स्नानात्तद्योनिमुक्तौशांडिल्यकृतज्ञानोपदेशेजीवानामनादिसंसार बंधस्यसहेतुकस्वरूपप्रतिपादनपूर्वकं तन्निवृत्तिप्रकारनिरूपणं· श्लो॰ १११

१६ विष्णोस्तत्वाभिमानिदेवतासाहित्येनस्तुत्या

अथ माघमासमाहात्म्यविषयानुक्रमणिका॰

अ॰	विषय॰
	दिकर्तृत्वप्रतिपादनपूर्वकंतात्विकदेवताकर्मणोः स्वरूपकथनंच॰ श्लो॰ ६४
१७	ज्ञानयोगवेदोक्तसर्वशब्दसमन्वयानंदतारतम्यनिरूपणम्॰ श्लो॰ ८३
१८	ध्यानयोगसाधननित्यानित्यविवेकज्ञान॰कारणभूतसप्रमाणस्वतंत्रपरतंत्रतत्वस्वरूपनिरूपणम् श्लो॰ ८३
१९	सांगध्यानयोगेनक्रमशः दक्षिणोत्तरमार्गप्रदर्शनपूर्वकमर्चिरादिमार्गेण मुक्तिप्राप्तिविचारः श्लो॰ ८५
२०	मोक्षोपायभूतज्ञानकर्मणोः साधनरूपश्रवणमाहात्म्यंपुण्यघईतिहासकथनंम॰ श्लोकाः ८६
२१	कर्मफलप्राप्तिकारणभूतचित्तैकाग्र्यविचारः स्कृवृत्तवृत्तेतिहाससमेतः श्लो॰ ६८
२२	विराड्विग्रहचिंतननामसंकीर्तनमहिमाच॰ श्लोकाः ७५
२३	धर्मसहाय्यकर्तुर्महाफलप्रतिपादकलक्षवर्तिइतिहासकथनं श्लो॰ १०९
२४	माघमासीयस्नानादिधर्मफलंसारसवानरेतिहाससहितंकथाश्रवणमाहात्म्यंच ८९
२५	माधवस्तवराजमहिमास्तवराजकथनंच १०१
२६	वसिष्ठाय ब्रह्मकृतमाधवस्तवराजोपदेशः १३९
२७	ब्रह्महत्यापीडितविश्वामित्रस्यगायत्रीजपतः शंकरस्थापनाच्च ब्रह्महत्याकुष्ठरोगाभ्यांमुक्तता॰ श्लो॰ १०९
२८	गुरुतल्पपापनिवृत्त्यैमाघे अश्वदानलक्षवर्तिव्रतनिरूपणंताराहरणेतिहाससहितंकथाश्रवणमहिमाच॰ श्लो॰ १५४
२९	लक्षवर्तिव्रतलब्धपातिव्रत्यमहिमा॰ ७९
३०	चाणाक्ष्करकल्माषपादयोर्मुक्तिः फलश्रुतिश्च॰ श्लो॰ ६४

समाप्तः॰

इति माघमासमाहात्म्यविषयानुक्रमणिकासमाप्ता॰

अथमाघव्रतिनः ५

व्रतंपौषशुक्ल१० मारभ्यमाघशुक्ल १० पर्यंतंकुर्यात् अथवा·
व्रतंपौषशुक्ल१५ मारभ्यमाघशुक्ल १५पर्यंतंकुर्यात् अथवा·
व्रतंमकरसंक्रमणमारभ्यकुंभसंक्रमण पर्यंतंकुर्यात्·
प्रातःस्नानंकुर्यात्·
उदितेरवौप्रातःस्नानंकुर्यात्·
अनुदितार्केस्नानंकुर्यात्·
अर्धोदितसूर्यमंडलेस्नानंकुर्यात्·
किंचिदभ्युदितेरवौस्नानंकुर्यात्·
नदीतडागकुंडवाप्यादिषुस्नानंकु०
ग्रामाद्बहिर्जलेस्नानंकुर्यात्·
अशक्तेनउष्णोदकेनापिगृहेउक्तकालेस्नानंकु०
स्नानकालेगंगादिस्मरणंअर्घ्यदानंचकुर्यात्·
माधवपूजनंचकुर्यात्
मासस्नानाशक्तौदिनत्रयंस्नानंकु०
माधवमंदिरेमार्जनं·लेपनं·रंगवल्ल्यादिकरणं·
माधवप्रतिमादानंकुर्यात्·
माधवपूजनंअतसीपुष्पैःकमलैः तुलसीपत्रमंजरीभिःतुलसीकाष्ठचंदनेनगुग्गुलधूपेनघृततैलदीपेन कर्पूरदीपेनचकुर्यात्·
दीपदानंकुर्यात्·
दीपदानाभावेपरदीपप्रबोधनंकु०
कथाश्रवणंकुर्यात्·
ब्राह्मणभोजनंकुर्यात्·
शालग्रामपूजनंकुर्यात्·
शालग्रामतीर्थंगृह्णीयात्·
शालग्रामतीर्थेनमस्तकक्षालनंकु०
पत्रावल्यांभोजनंकुर्यात्·
तत्रापिब्रह्मपत्रेषुमध्यवर्जितेषुभोजनंकुर्यात्·
गीतापाठंकुर्यात्·
भागवतपारायणंकुर्यात्·श्रवणंवा·
वैष्णवानांपूजनंकुर्यात्·

अगस्त्यपत्रशाकभोजनंकुर्यात्·
धात्रीफलमालाभिःपूजनंकुर्यात्·
धात्रीफलगतदीपदानंकुर्यात्·
धात्रीफलपिष्टेनस्नानंकु०
धात्रीफलराशिदानंकुर्यात्·
मातुलिंगदानंकुर्यात्·
माधवार्थपुष्पमंडपंकुर्यात्·
माधवस्तवराजपठनंकुर्यात्·
मिष्टान्नदानंकुर्यात्०
माधवार्थेआम्रपल्लवतोरणंकु०
माधवार्थेकदलीस्तंभमंडपंकु०
वस्त्रदानंकुर्यात्·
कंबलदानंकुर्यात्·
अन्नदानंकुर्यात्·
द्वादश्यांविशेषतःदानादिकंकु०
पद्मकपौंड्रकयोगेविशेषतःदानादिकंकुर्यात्·
शिशुमारमूर्तिदानंकु०
सवत्सगोदानंकु०
वृषोत्सर्गंकुर्यात्·
शूर्पद्वययुक्तसौभाग्यदानंकु०
अपूपदानंकुर्यात्·
इंधनदानंकुर्यात्·
अग्निदानंकु०
गोपीचंदनदानंकु०
वैश्वदेवार्थतंडुलदानंकु०
अखंडदीपदानंकु०
उपानहदानंकु०
कुंकुमदानंकु०
तैलदानंकु०
कार्पासदानंकु०
कोष्ठदानंकु०
तुलसीदानंकुर्यात्·
तूलपटीदानंकु०
सुवर्णदानंकुर्यात्·
दक्षिणादानंकुर्यात्·
एकादशीवन्माघोद्यापनंकुर्यात्·
तिलाज्यहोमंकु०
तिलगुडदानंकुर्यात्·

5

तिलपात्रदानंकुर्यात्॰
तैलदीपदानंकुर्यात्॰
घृतदानंकुर्यात्॰
तंडुलदानंकुर्यात्॰
तांबूलदानंकु॰
विष्णुसहस्रनामपठनंकु॰
गजेंद्रमोक्षपठनंकु॰
गायत्रीजपंकु॰
दीपमालांकु॰
विष्णोः पंचामृतस्नानंकुर्यात्॰
कांस्यदानंकुर्यात्॰
घृतवर्तिसंयुक्तकांस्यपात्रदानंकु॰
अश्वदानंकु॰
भूमिशयनंकुर्यात्॰

निराहारव्रतंकु॰
जितेंद्रियत्वंतिष्ठेत्॰
त्रिकालस्नानंकु॰
त्रिकालंविष्णुपूजनंकु॰
{रथसप्तम्यांकूष्मांडदानं॰भूदानं॰ति
लपात्रदानं॰गुधदानं॰हिरण्यश्राद्धं
अन्नश्राद्धंचकुर्यात्॰
प्रयागेमाघस्नानंकुर्यात्॰
सप्तगोदास्नानंकु॰
सप्तगंगास्नानंकु॰
कुजपंचम्यांआढकगुडदानंकु॰
लक्षवर्तिव्रतंकु॰
{एष्वन्यतमंयथाशक्तिनियमंकुर्या
दिति॥

अथ माघव्रतिनःवर्ज्यपदार्थानाह॰

श्वानमूत्रसमंगृहेस्नानंनकुर्यात्॰
उष्णजलस्नानंनकुर्यात्॰
प्रातर्नाडिचतुष्टयानंतरंस्नानंनकु॰
पूजाकालेलोकवार्ताप्रसंगंनकु॰
कांस्यपात्रेभोजनंनकुर्यात्॰
तैलाभ्यंगंनकु॰
तैलभोजनंनकु॰
आरनालंनभक्षयेत्॰
पिण्याकंतिलकल्कंनभक्षयेत्॰
मूलकभक्षणंनकु॰
गृंजनं॰लशुनंनभक्षयेत्॰
छत्राकंनभक्षयेत्॰
वृंताकंनभक्षयेत्॰
उपोदकींराजगिरिंनभ॰
भिःसटंनभ॰
अलांबुनभ॰
अदानंमासंननयेत्॰
अव्रतंमासंननयेत्॰
अस्नातंमासंननयेत्॰
रथसप्तम्यांद्विवारभोजनंनकु॰
द्वादश्यांतैलाभ्यंगंनकुर्यात्॰

॰शरीरस्वानपानस्रग्गंधभोगान्त्य
जेत्॰
पराग्निंनगृण्हीयात्॰
पराग्निसेवनंनकुर्यात्॰
प्रतिग्रहंनकुर्यात्॰
परान्नंनगृण्हीयात्॰
तीर्थजलेनशौचकर्मनकु॰
अपुष्पपूजनंनकुर्यात्॰
किंचिद्भोज्यत्यागंकु॰
परापवादंत्यजेत्॰
पैशुन्यंत्यजेत्॰
परनिंदांत्य॰
जीवहिंसांत्य॰
दुःसंगंनकु॰
दुर्भाषणंनकु॰
अनृतभाषणंन॰
मिथ्यालापंनकु॰
विवादंनकु॰
अभक्ष्यभक्षणंनकु॰
एवमादीन्असत्पदार्थान्नकु
र्यादिति॰

श्रीगणेशायनमः आदिनारायणोब्रह्म विष्णुरुद्रादिदेवताः यस्यानुवर्तिनस्तस्मैनमोगोलोकवासिने १ अथपरमकारुणिकोभगवान्
बादरायणः द्वापरांते कलौजनिष्यमाणलोकानांत्रिवेण्यादौ कल्पवासाद्यनेककाय क्लेशयोगेन व्रतदानतपोभिश्च पापक्षयपूर्वक पुण्य-
योगेनज्ञानसिद्धिद्वारा परब्रह्मप्राप्त्यर्थं सूतशौनकसंवादनिरूपणेन माघमाहात्म्यं प्रस्तावयन् मंगलमाचरति नारायणमिति १ दिली-

श्रीगणेशायनमः नारायणंनमस्कृत्यनरंचैवनरोत्तमम् देवींसरस्वतींव्यासंततोजयमुदीरयेत् १
सूतउवाच अध्वरावभृथस्नात ऋषिभिःकृतमंगलः पूजितोनागरैःसर्वैःस्वपुरान्निर्गतोबहिः २ दिली
पोभूभुजांश्रेष्ठोमृगयारसिकोभृशम् नानावृक्षसमाकीर्णंपशुपक्षिसमाकुलम् ३ वनंप्रविश्यददृशेका
सारंसागरोपमम् उवाससरसस्तीरेतस्यांरात्रौश्रमातुरः ४ ततःप्रातःसमुत्थायस्वपुरंगंतुमुद्यतं रा·
जानंस्वभटैर्युक्तंमुनिःप्रोवाचधर्मवित् ५ वृद्धहारीतउवाच किमर्थंगम्यतेराजन् कालेपुण्यतमे
शुभे माघमासेविहायैवप्रातःस्नानसरोवरे ६ सूतउवाच प्रत्युवाचततोराजानाहंजानेद्विजो
त्तम माघस्नानफलंकीदृक्तन्मेकथयविस्तरात् ७ इतिभूपवचःश्रुत्वाप्राहवैखानसोमुनिः हारीतो
वृद्धपूर्वश्चदृष्ट्वास्सूर्योदयंभ्रमात् ८ स्नानकालोयमस्माकंनकथावसरोनृप त्वंवागच्छवासिष्ठंतंपृच्छस्व
स्वकुलप्रभुम् ९ इत्युक्त्वातापसोमौनीप्रातःस्नानायनिर्गतः नृपोपितत्रस्नात्वावैवसिष्ठस्याश्रमंययौ १०
नत्वाप्रोवाचब्रह्मर्षिंविनयाचारपूर्वकम् दिलीपउवाच भगवन्त्वत्प्रसादेनश्रुताधर्माह्यनेकशः ११

पइत्युत्तरेणान्वयः २ ३ कासारंतडागं पद्माकरस्तडागोऽस्त्रीकासारःसरसीसरइत्यमरः ४ ५ ६ ७ वैखानसः
वैखानसमतानुयायी वृद्धपूर्वः वृद्धहारीतइति ८ त्वंस्नानार्थमागच्छवा अथवा त्वंवसिष्ठंगच्छेति ९ १० ११

विधेयं करणीयं कर्मयत् १२ १३ दानेति अत्र विशेषः पाद्मे गोभूमितिलवासांसिस्वर्णधान्यादिकानिच अदत्वेच्छंतियेनाकं
तेमाघेस्नांतुसर्वदा व्रतेति त्रिरात्रेंदुव्रतैः कृच्छ्रैः पराकैश्चनिजांतनुं आशोष्येच्छंतियेस्वर्गंतपसिस्नांतुतेसदा माघेस्नात्वातुयोधेनु
मुपानह्कमंडलून् सगुडांश्चतिलान्दद्यात्तथाब्राह्मणभोजनम् पितॄन्संतर्प्यशक्त्यात्मायातिविष्णोःपरंपदम् तस्मात्सर्वप्रयत्नेनमा
घोदानेननीयते तपेति माघेतुस्नानमेवतपः तदुक्तं माघस्नानमयंराजन् कुर्वाणस्तपउत्तममिति १४ कदाचिदपिमाघस्नानंन
त्याज्यमितिकैमुतिकन्यायेनाह तप्तेनेति ननुगृहेउष्णोदकेनमाघस्नानंनकर्तव्यमित्यग्रेवक्ष्यते योगृहेमाघमासेतुस्नानकर्मसमाचरे

अधुनाश्रोतुमिच्छामिमाघस्नानंचयत्फलम् विधेयंयाद्विधानेनतन्मेब्रह्मन्मुनेवद १२ वसिष्ठउवा
च सम्यगुक्तंपरंश्रेयोलोकद्वयहितावहम् होमोदानंचवैशाखेतपःपूजाचकार्तिके १३ तपोहोमस्त
थादानंत्रयंमाघेविशिष्यते दानव्रततपोहोमपूजास्तुत्यभिवादनं १४ अकृत्वेच्छंतियेस्वर्गंतपसिस्ना
तुतेसदा तप्तेनवारिणास्नानंयद्गृहेक्रियतेनरैः १५ षडब्दफलदंतद्धिमकरस्थेदिवाकरे बहिःस्नानंतु
वाप्यादौद्वादशाब्दफलंस्मृतम् १६ तडागेद्विगुणंराजन्नद्यांचैवचतुर्गुणम् शतधादेवखातेतुशतधा
तुमहानदीम् १७ शतंचतुर्गुणंराजन्महानद्याश्चसंगमे सहस्रगुणितंसर्वंतत्फलंमकरेरवौ १८

त् श्वानमूत्रेणतद्विद्यान्नात्रकार्याविचारणा माघेमासिसकरवेतिधनुर्यःस्नायादुष्णवारिणा वन्हिराशौमहाघोरेपतत्याशुनसंशयइतिवच
नात्कथमत्रषडब्दफलदमुक्तमितिसंशयेउत्तरोत्तरंफलसोपानकथनार्थंगृहस्थोष्णोदकस्नानग्रहणं तर्हिफलकथनं वाचारंभणं व्यर्थंस्या
दितिचेन्नैवंकिंतुबहिर्गमनाशक्तेनपुरुषेणगृहेउष्णोदकेनापिवक्ष्यमाणकालेमाघस्नानंकर्तव्यंसमर्थेननद्यादौस्नानंकर्तव्यमितिकिं
वक्तव्यमितिभावः १५ १६ देवखातेकुंडाकारतीर्थेमहानदींसमुद्रगामिनीं १७ १८ ६ ६

गंगायामिति पाद्मेच गंगांयेचावगाहंति माघमासेनृपोत्तम चतुर्युगसहस्रंतुनपतंतिसुरालयात् दिनेदिनेसहस्रंतुसुवर्णानांविशां
पते तेनदत्तंतुगंगायांयोमाघेस्नातिमानवइति १९ २० सिताश्वेता गंगाधारा असिता कृष्णायमुनाधारासरस्वत्यासरस्वतीधारया
विगर्भितामध्येमिश्रिता २१ तत्स्थानंब्रह्मलोकस्यमार्ग उक्तंच शृणुस्थानमिदंसम्यक्सितासितजलंकिल· पापरूपपशूनांचब्रह्मणा-
विहितंपुरा सितासितजलेमज्जेदपिपापशतान्वितः मकरस्थेरवौमाघेनैवगर्भेषुमज्जति तेजोमयेषुलोकेषुभुक्त्वाभोगाननेकशः पश्चाच्च
किणिलीयंतेप्रयागेमाघमज्जनात् गंगायमुनयोर्मध्येबालरंडांतपस्विनीं बलात्कारेणगृण्हंतितद्विष्णोःपरमंपदमिति २२ अथप्रयागेयत्र
कुत्रवामाघेमासपर्यंतंस्नानाशक्तौत्रिदिनंस्नानंकर्तव्यमितिवक्तुंतन्माहात्म्यमाह संवत्सरशतमिति अत्रविशेषःपाद्मे पुष्करेचकुरुक्षे-

गंगायांस्नानमात्रेणलभतेमानवोनृप शतेनगुणितंमाघेसहस्रंराजसत्तमम् १९ निर्दिष्टमृषिभिःस्ना
नंगंगायामुनसंगमे पापौघभूरिभारस्यदाहार्थंचप्रजापतिः २० प्रयागंविदधेभूपप्रजानांचहितास्थि
तः सितासिततुयाधारासरस्वत्याविगर्भिता २१ तन्मार्गंब्रह्मलोकस्यसृष्टिकर्तासिसर्जवै दुर्मदा·
वैष्णवीमायादेवैरपिसुदुस्त्यजा २२ प्रयागेदृश्यतेस्नातुमाघेमासिनराधिप संवत्सरशतंसाग्रंनि
राहारस्ययत्फलम् २३

त्रेब्रह्मावर्तेपृथूदके अविमुक्तोप्रयागेच गंगासागरसंगमे यत्फलंदशभिर्वर्षैःप्राप्यते
नियमैर्नरैः तत्फलंप्राप्यतेमाघेत्र्यहस्नानान्नसंशयः स्वर्गलोकेचिरंरागोयेषांमनसिवर्तते यत्रक्वापिजलेतैस्तुस्नातव्यंमृगभास्करे आ
कल्पजन्मभिःपापंनरस्यविलयंव्रजेत् प्रयागेमाघमासेतुत्र्यहस्नातश्चानिश्चितं प्रयागेमाघमासेयस्त्र्यहंस्नातिचमानवः पापंत्यक्त्वादिवं
यातिजीर्णांत्वचमिवोरगः प्रयागेमाघमासेतुत्र्यहस्नानस्ययत्फलं नाश्वमेधसहस्रेणतत्फलंलभतेभुवि मज्जंतियेपित्र्यहमत्रमानवा-
स्तीर्थेप्रयागेबहुपापकंचुकाः व्रजंतितेनोनिरयेषुधर्मिणःस्वर्गेशुभेचारुचरंतिदेववदिति २३ ५ ६

अथत्र्यहस्नानविषये इतिहासमाह कांचनमालिनीति स्पष्टोर्थः अत्रप्रसिद्धाकथा पाद्मे कार्तवीर्यप्रतिदत्तात्रेयउवाच शृणुराजन्वि
चित्रंत्वमितिहासंपुरातनम् अप्सरारूपसंपन्नानाम्नाकांचनमालिनी प्रयागेमाघमासेसास्नात्वायातिहरालयम् निकुंजेगिरिराजस्य
तिष्ठतागुरुरूपिणा दृष्टागगनमारूढातेनदृष्टेनरक्षसा तांदृष्ट्वारूपसंपन्नामुवाचराक्षसस्तदा कात्वंकमलपत्राक्षिसार्द्रंतेवसनंकुतः
कुत्रआगम्यतेभीरुकुतस्तेखेचरीगतिः त्वद्वस्त्रबिंदुपातेनममभूर्ध्निस्थलोचने क्षणेनत्वगमत्स्वार्तिंक्रूरंमेमानसंसदा नीरस्यमहिम
यमेतद्व्याख्यातुमर्हसि कांचनमालिन्युवाच श्रूयतामप्सराश्चाहंभोरक्षःकामरूपिणी प्रयागतश्चागताहंनाम्नाकांचनमालिनी
आर्द्रःपरिकरोमेतःस्नाताहंसितासिते गंतव्यंतुमयारक्षःकैलासेतुनगोत्तमे वेणीवारिप्रभावेनरक्षस्तेक्रूरतागता·जाताहंयेनपुण्येन
गंधर्वस्यसुमेधसः कन्यकादिव्यरूपानुतत्सर्वंकथयामिते कलिंगाधिपतेराज्ञस्त्वहमासंविलासिनी तज्जन्मनिमयारक्षोभुक्ताभोगा·

प्रयागेमाघमासेतुत्र्यहस्नानस्यतत्फलम्·

न्ययेच्छया मोहितंतत्पुरंसर्वंममायौवनसंपदा मासेतुचार्धकेकालेशुशोचहृदयंमम नदत्तंनहुतंजप्तंनव्रतंचरितंमया नाराधितोम
यादेवःपातकंतुकृतंबहु बहुधैवंविलप्याहंब्राह्मणंशरणंगता केनवैकर्मणाब्रह्मन्पापेभ्योनिष्कृतिर्भवेत् इतिपृष्टःसविप्रर्षिर्मामु·
वाचदयान्वितः द्विजउवाच निषिद्धाचरणंजानेसर्वंतेहंवरानने कुरुमेसत्वरंवाक्यंयाहिक्षेत्रंप्रजापतेः प्रयागस्नानशुद्धात्वंस्व
र्गंयास्यसिनिश्चितम् गौतमस्यचशापेनमुक्तोभूद्यत्रवृत्रहा लोचनानांसहस्रेणशोभमानोऽभवत्तदा इतितस्यवचःश्रुत्वासौत
संसमंगलम् तदैवसंभ्रमापन्नात्यक्त्वासर्वंपरिच्छदान् प्रयागत्वाकृतंस्नानंमाघेमासिसितासिते तस्यस्नानस्यमाहात्म्यंशृणुवृ·
ड्निशाचर त्र्यहात्पापक्षयोजातःसप्तविंशतिभिर्दिनैः शेषैर्मेयदभूत्पुण्यंतेनदेवत्वमागता रममाणातुकैलासेगिरिजायाःप्रि
खी जातिस्मरातथाजाताप्रयागस्यप्रभावतः स्मृत्वाप्रयागमाहात्म्यंमाघेमाघेव्रजाम्यहम् इतिराक्षसयत्पृष्टंत्वयाविस्मितचेतसा

1

७

तन्मयाकथितंसर्वंचरितंप्रीतयेतव मत्प्रीतयेचरित्रंस्वंत्वंब्रूहिममराक्षस कर्मणाकेनजातोसिविरूपोतिभयंकरः राक्षसउवाच शृणुष्वभो· पहंकाश्यांबह्वृचोवेदपारगः वाराणस्यांकृतोघोरोमयादुष्टप्रतिग्रहः तन्नास्तिदुष्कृतंकर्ममयायन्ननतत्कृतम् नधर्मस्तुमयाकश्चित्संचितस्त्वज्जन्मनि ततोबहुतिथेकालेमृतस्तत्रैवशोभने अविमुक्तप्रभावेनन्वाहंनरकंगतः वज्रलेपेनपापेनतेनमेजन्मराक्षसं दुर्दंतुदशमंजन्मराक्षसंममभामिनि अस्यदुःखोदधेःपारंकथंयामीतिचिंतयन् तवसंदर्शनंजातंदुःखान्मुक्तिंविचिंतय दत्तात्रेयउवाच इतितस्यवचःश्रुत्वादयार्द्रीकृतमानसा धर्मदानेमतिंकृत्वाजगौकांचनमालिनी करिष्येनिष्कृतिंरक्षइदानींखलुमाशुचः बहवोहिकृतामाघावर्षेवर्षेयथाविधि श्रद्धापूर्वंमयाभद्रब्रह्मक्षेत्रेसितासिते तत्रदास्यामितेमित्रसद्यःपापविनाशनम् निष्पीड्याथततोवस्त्रंजलंकृत्वाकरांबुजे ददौसामाघजंपुण्यंत-

त्र्यहस्नानफलंप्राप्यपुराकांचनमालिनी २४ राक्षसायददौभूपतेनमुक्तःसपापकृत् यापश्चाद्वाहिनीगंगाकालिंद्यासहसंगता २५ हंतिकोटिकृतंपापंसामाघेनृपदुर्लभा यत्कथ्यतेमृतराजन्सावेणीभुविकीर्तिता २६

स्मैवृद्धायरक्षसे शृणुराजन्विचित्रंहिप्रभावंमाघधर्मजम् तदैवंप्राप्यतत्पुण्यंविमुक्taराक्षसीतनुः संभूतोदेवताकारोद्वितीयइवभास्करः ततोभिनंदयामाससतांकांचनमालिनीम् भद्रेमयित्वयानूनंकृतश्चानुग्रहोमहान् आचंद्रार्कंरमस्वत्वंकैलासेशिवसन्निधौ इत्युक्त्वानुप्रणम्याथसतांकांचनमालिनीं जगामराक्षसःस्वर्गंगंधर्वैर्बहुभिःस्तुतः श्रुत्वातद्वचनंराजन्सावैकांचनमालिनी हृष्टातेनैवदानेनकृतकृत्यातदासतीति २४ पश्चाद्वाहिनीगंगायाः विशेषमाहात्म्यंकुरुक्षेत्रसमागंगायत्रकुत्रावगाहिता तस्माच्छतगुणागंगाकाश्यामुत्तरवाहिनी काश्याःशतगुणाप्रोक्तागंगायामुनसंगमे सासहस्रगुणातासांभवेत्पश्चिमवाहिनी याराजन्दर्शनादेवब्रह्महत्यापहारिणीति २५ वेणीस्नानंमहापुण्यकरंयथा स्वर्णभारसहस्रेणकुरुक्षेत्रेरविग्रहे यत्फलंलभतेमाघेवेण्यांस्नानाद्दिनेदिनेइति २६

* * * * * *

तस्यांवेण्यांस्नानार्थंमुहूर्तकालः देवानामपिदुर्लभइत्याह केदेवाआगच्छंतीत्यपेक्षायामाह पाद्मे पृथिव्यांयानितीर्थानिपुर्यैःसम-
चयाःपुनः स्नातुमायांतिवैमाघेमासिसर्वेनृपोत्तम सर्वतीर्थानिकृष्णानिपापिनांसंगदोषतः भवंतिशुक्लवर्णानिप्रयागेमाघमज्जनात्
ब्रह्माविष्णुर्महादेवोरुद्रादित्यमरुद्गणाः गंधर्वालोकपालाश्चयक्षाकिन्नरपन्नगाः अणिमादिगुणैःसिद्धायेचान्येतत्ववादिनः ।
पार्वतीलक्ष्मीशचिर्मेनादितिर्दितिः सर्वास्तादेवपत्न्यश्चतथानागांगनानृप घृताचीमेनकारंभाउर्वशीचतिलोत्तमा गणाश्चाप्सरसांसर्वे
पितृणांचगणास्तथा स्नातुमायांतितेसर्वेमाघेवेण्यांनराधिप कृतेयुगेस्वरूपेणकलौप्रच्छन्नरूपिणइति २७ २८ २९ ३०

तस्यांमाघेमुहूर्तेतुदेवानामपिदुर्लभम् तत्राप्लुतादिवंयांतिश्रुतिरेषासनातनी २७ द्विजहानिनरस्तत्र
प्राक्तनकर्मदुष्कृतम् प्रयागस्नानतोनास्तिकाप्यन्यदधिकंपरम् २८ प्रायश्चित्तंतपोरूपंदानरूपंक्रियात्म
कम् यागयोगाधिकंविद्धिप्रयागंपापिनामपि २९ स्वर्गापवर्गयोर्द्वारंतत्पृथिव्यामपावृतम् सितासि
तोदवेणीयातांहित्वाभुविनापरा ३० सितासितस्यमाहात्म्यमहवक्तुंनतक्षमः

अत्रकेरलकविषयेइतिहासमाह पाद्मे लोमशउवाच पुरादेवद्युतिर्विप्रोवैष्णवोवेदपारगः प्लक्षप्रस्रवणेपुण्येसरस्वत्यास्तटेशुभे न्य
वसन्नाश्रमंकृत्वाशैलवृक्षविराजिते अनुद्विग्नस्तपोनिष्ठोवेदवेदांगपारगः इत्थंजगामवर्षाणांसहस्रंतस्यकानने तत्रकश्चित्पिशाचो
वैपर्यटन्शोकपीडितः हाहतोस्मीतिचाक्रंदत्घोरमुच्चैःपुनःपुनः इत्थंतस्यपिशाचस्यरोदनंदीनचेतसः देवद्युतिरधीयानःशुश्रावक-
रुणामयं तत्रैत्यकौतुकाविष्टःपप्रच्छमुनिपुंगवः कोसित्वंभीषणाकारःकुतोरोदिषिदारुणम् श्रुत्वेतद्वचनंभीतःपिशाचस्त्यक्तरोदनः
नयावाचाप्रश्रयावनतस्तदा यन्मेस्तिसुकृतंकिंचित्तेनदृष्टोसिमेद्विज इत्युक्त्वाकथयामासपूर्ववृत्तांतमादितः अहमासंचि ८
त्रनामाद्राविडेविषयेपुरा सोमान्वयेमहावीरःशूरःशास्त्रार्थपारगः विष्णुनिंदापरोनित्यंवैष्णवान्द्वेष्टिसर्वदा तेनकर्मविपाकेनद-

शामेतामहंगतः इदानीमुचितंकर्मब्रूहिपैशाचनाशनं देवद्युतिरुवाच प्रयागंगच्छभोभद्रमाघमासंविचारय यत्रतेनास्थितामुक्तिःपैशाच्यान्नात्रसंशयः पिशाचश्शृणुपुण्यामेकथांकथयतःशुभाम् केरलेवस्कनामात्रब्राह्मणोवेदपारगः दायादैर्हृतवित्तस्तुनिर्धनोबंधुवर्जितः जन्मभूमिंपरित्यज्यमहादुःखेनदुःखितः देशाद्देशंपरिभ्राम्यकालेनमहतापुनः प्रविश्यसमहारण्यमीषद्व्याधिप्रपीडितः गच्छंस्तीर्थो श्रांतः क्षुत्क्षामोविंध्यपर्वते दुर्भिक्षेणमृतिंलेभेनदाहंचोर्ध्वदेहिकं तेनकर्मविपाकेनतत्रैवगिरिगह्वरे प्रेतोभूतश्चिरंकालमुवासनि नेवने इतस्ततःपरिभ्राम्यवायुभूतःसकेरलः अतिवाह्यचिरंकालमपश्यत्पथिकंपथि वहंतंद्वौकरंडौचवेणीजलप्लुतौतदा तंदृष्ट्वासहसाप्रेतोमार्गरोधंचकारसः दर्शयामासचात्मानमाभैषीरित्युवाचसः पानीयंपातुमिच्छामित्वत्तःकार्पटिकोत्तम नपास्यसिजलंचेन्मा प्राणायास्यंतिमेध्रुवम् इतिप्रेतवचःश्रुत्वापांथःप्रत्याहकौतुकात् पश्चामस्पृष्टभूमिस्त्वंनिर्मांसोदरबाहुकः इतितद्वचनंश्रुत्वाप्रेतोवाक्यमथाब्रवीत् शृणुधर्मिष्ठतेवच्मियेनाहमीदृशोभवम् ब्राह्मणोऽदत्तदानोहंब्रह्मधर्मविवर्जितः माघवादिषुमासेषुकृतंमासव्रतंनहि इष्टापूर्तंनहिकृतंनकृतंदेवतार्चनम् इत्यपूर्वभवोवंध्योममजातोद्विजोत्तम मांसानिफलमूलानिकंदानिसुबहून्यपि शीतलानिजलानीहवर्त्तंतेसुलभानिच नेक्षेहमशनंपानंदैवेनापिहतंसदा एवंब्राह्मणातिष्ठामिभुंजानःकर्मणःफलम् नशोचामीतिमत्वाहंविमृश्यच पुनःपुनः नदुनोमितथातावद्यावज्जंबालिनीतटे सारसोदीरितंवाक्यंश्रुतंपर्यटतामया कार्पटिकउवाच सारसोदीरितंवाक्यंकीदृशंहिश्रुतंत्वया तदहंश्रोतुमिच्छामिब्रूहित्वंप्रेतसत्वरम् प्रेतउवाच ब्रवीमिसत्वरंवाक्यंशृणुकार्पटिकोत्तम गुहिकानामकस्त्वस्मि न्नदीगिरिसमुद्भवा तस्यास्तीरमहंप्राप्तोगाहमानोवनंघनम् मयिनिष्ठतिवैतत्रश्रमापनुत्तिकाम्यया वनांतरात्समुड्डीयसारसोलक्ष्म उतः आगत्यपुलिनंनद्याःसेवितंबहुपक्षिभिः पीत्वातत्रैवपानीयंरमित्वाभार्ययासह कृतःपक्षपुटेवामेप्रवेश्यचशिरोमुखम् एतस्मिन्नंतरेदृष्टःपादपादवतीर्यच रक्ताननःस्फुरक्ताक्षोदंडीरदनखावलिः लोमशोदीर्घलांगूलश्चलचेष्टोहिवानरः यत्रासौसारसःसुप्तस्तत्रवेगेनागतः समागत्यजग्राहसारसंचरणेदृढम् कराभ्यांक्रूरयाबुद्ध्यापश्यतांबहुपक्षिणाम् उड्डीयोड्डीयतेसर्वेगताश्चान्यत्रखेचराः सा

रसीभीतभीताचविरावान्कुर्वतीस्थिता सारसोभग्ननिद्रस्तुत्रासाच्चलितलोचनः अवलोकितवान्शीघ्रंतदोत्तम्यशिरोधरां विलोक्यवानरंदुष्टंहंतुकामंसुदारुणम् तदासंभाषयामासगिरामधुरयाखगः अपराधंविनामांत्वंकिंशाखामृगबाधसे नपीडयितुमर्हसित्वादृशाउत्तमाजनाः अस्मानहिंसकान्साधून्परवृत्तिपराङ्मुखान् जलशैवालभक्षांश्चखेचरान्वनवासिनः स्वदाररतिशीलांश्चपरदाराभिवर्जितान् परापवादपैशून्यान्द्विजान्परमसेवकान् शाखामृगविमुंचाशुसर्वथामामनागसं जानामितवजन्माहंनत्वंचेत्थतुमामकं इत्याकर्ण्यवचस्तस्यमुमोचसारसंतदा चपलोवानरःशीघ्रमाहदूरेव्यवस्थितः ब्रूहित्वंकथंवेत्थममजन्मपुरातनं त्वंपक्षीज्ञानहीनश्चतिर्यक्चाहंवनेचरः सारसउवाच जानेहंतावकंजन्मजातिस्मरमितिस्फुटं त्वंहिविंध्याधिपोराजाप्राग्भवेपर्वतेश्वरः अहंपूज्यतमोविप्रस्तववंशेपुरोहितः तेनप्रत्यभिजानामित्वांसम्यग्वानरोत्तम इमांपालयताभूमिंप्रजाःसर्वाःप्रपीडिताः त्वयाविवेकहीनेनतेनपापेनदारुणे कुंभीपाकानलेतीव्रास्त्वनुभूताश्चयातनाः निस्तीर्णनरकोभूपःपापशेषेणसांप्रतम् प्राप्तोसिवानरंजन्मयेनमांहंतुमिच्छसि विप्रस्योपवनात्पूर्वं पक्वरंभाफलानिचे अननुज्ञाप्यभुक्तानित्वयापरहृत्यपौरुषात् विपाकःकर्मणस्तस्यफलतेपश्यदारुणः वानरस्त्वंवनेवासोत्यधुनातेनवर्तसे इत्थंत्वज्जन्मजानामियथावत्तुसहेतुकम् प्राप्तःसारसदेहोपिज्ञानेनपरिमोहितः इतिश्रुत्वाकथांविप्रवानरोप्याहसारसं सम्यग्वेत्तिभवान्नूनंकथंत्वंपक्षितांगतः सारसउवाच कथयिष्यामितत्कर्मयेनाहंपक्षितांगतः दुःखयोनिंगतोयेनतत्सर्वंश्रोतुमर्हसि धान्यंखारिशतंसाग्रमुत्सृष्टंहित्वयापुरा बहुभ्योब्राह्मणेभ्यश्चनर्मदायांरविग्रहे पौरोहित्यमदाल्लोभाद्वंचयित्वाद्विजांस्तथा किंचिद्दत्वातुतेभ्यश्चगृहीतमखिलंमया विप्रसाधारणद्रव्यग्रहणोत्पन्नपातकात् पतितःकालसूत्रेहंनरकेरक्तकर्दमे अपहृत्यपुराकांस्यभाजनंभगिनीगृहात् आक्षिकायमयादत्तंतेनमेसारसीगतिः इयंचब्राह्मणीपूर्वंकांस्यचोरीसुदारुणा तेनेयंसारसीजाताममभार्यासधर्मिणी इत्थंवानरतेसर्वंकथितंकर्मणःफलं भूतंचवर्तमानंचभविष्यंशृणुसांप्रतम् अहंहंसोभविष्यामित्वंचहंसोभविष्यसि हंसीयमपिमद्भार्यासारसीचभविष्यति ततश्चमानुषंजन्मप्राप्स्यामोदुर्लभंपुनः नान्यथाशक्यतेकर्तुंविपाकःपूर्वकर्मणां उपायैःप्रज्ञयावापिशाखामृगसुरैरपि

पुरात्वंभूपनिर्जातःपश्चाज्जातोसिनारकी अधुनावानरोभूयोजन्मप्राप्स्यसिताद्दशम् इतिमत्वाविशोकस्त्वंशाखामृगयथासुखं प्रतीक्षांकुरुकालस्यपरमप्राणोत्रकानने अहमप्येवमीशानमायाबद्धोवनेवने क्षपयिष्यामिवैजन्मधैर्यमास्थायसंसारे केरलप्रेतउवाच पक्षिवानरसंवादंश्रुतंयावन्नदीतटे तावन्ममापिबोधोभूत्तेनशोकःक्षयंगतः इदानींजान्हवीतोयमाहात्म्यंपरमाद्भुतं दृष्ट्वात्रब्राह्मणश्रेष्ठत्वायाचेजान्हवीजलं प्रेतत्वात्तर्तुकामोहंतीव्राद्दैन्यात्प्रपीडितः संतर्पयममप्राणान्कंठमात्रावलंबितान् एतस्मिन्प्राणदानेहिमाविलंबंकृथाबहु ततःप्रत्याहपांथस्तुवचनंन्यायगर्भितं भृगुक्षेत्रेशृणुप्रेतपितरौममतिष्ठतः तदर्थंतीर्थराजस्यमयावारिसमाहृतं तत्सितासितपानीयंमध्येचप्रार्थितंत्वया नजानेधर्मसंदेहःकिमत्रममयुज्यते सर्वेभ्यःप्रबलंमन्येप्राणिनांप्राणरक्षणं इतिदत्वावरंवारिकृत्वा

यत्तोयकणसंस्पृष्टोमुक्तःकेरलकोद्विजः ३१ दिलीपशृणुतत्सर्वंतत्तीर्थंनुसितासितम् दृष्ट्वात्रैवमहा
यज्ञंस्रष्टुकामःप्रजापतिः ३२ अवापस्रष्टिसामर्थ्यंततःसृष्टिंचकारसः अत्रनारायणःसस्नौपत्नीकामः
सितासिते ३३ अतःसलब्धवान्लक्ष्मींभार्यांह्यमृतमंथने उषित्वाचात्रषण्मासंस्नात्वावेण्यांयथेच्छया ३४

प्रेतस्यरक्षणं पित्रर्थंपुनरादायजलंनेष्यामिपावनम् एषमेप्रबलोभातिशुद्धधर्मप्रदोविधिः परोपकरणादन्यत्सर्वमल्पंस्मृतंबुधैः इत्युक्त्वाप्रददौतोयंगंगायामुनसंभवम् प्रेतायप्राणरक्षार्थंसधर्मिष्ठोवरोद्विजः प्रेतःप्रीतोजलंपीत्वाह्यभिषिच्यशिरस्तथा प्रजहौप्रेतदेहंतंदिव्यदेहोऽभवत्क्षणात् तदाश्चर्यंमहद्दृष्ट्वानिजगादसकेरलः आयुष्मान्भवपांथस्त्वंमाधर्मविरतोभव अहंहितारितःसाधोगंगांबुकणदानतः इत्युक्त्वाप्रस्थितोनाकंपिशाचस्तुसकेरलः आशीर्भिरभिनंद्याथपांथंबंधुवरंनरं प्रेतंविमोक्ष्यपांथोपिपुनरादायतज्जलं गतस्तेनैवमार्गेणतदातीर्थोदकंवहन् इत्थंप्रयागमाहात्म्यंश्रुत्वानत्वाचतंमुनिम् प्रयागंसहसामाघेपिशाचःसत्वरंगतः स्नात्वासिताऽसितेसोपिमाघमासेद्विजोत्तम पिशाचःक्षीणपापस्तुपैशाचींविजहौतनुं दिव्यदेहोविमानेनपुरंदरपुरंययाविति ३१ यत्कामनापूरकंचकारेतिशेषः ३२
३३ ३४

इमानि सिताऽसितासरस्वतीगर्भितानि ३५ ३६ ३७ ३८ ३९ विकर्तनसलोकत्वं सूर्यलोकत्वं ४०

त्रिपुरंघातयामासत्रिबाणेनत्रिशूलभृत् इमानित्रीणिकुंडानिदीप्तान्यत्रजवह्निभिः ३५ एषवह्नितिंगतो
वह्निर्यःकेनापिनतुष्यति अत्रदेवास्त्रयस्त्रिंशद्वृक्षामुमुदिरेभृशम् ३६ आविर्भूतोमहेशोत्रनीलकंठः
कपालभृत् अनिशंसस्करैःसेव्यःआयातोजलयेवटः ३७ मृकंडसूनुनाकल्पेप्रविश्ययन्मुखेस्थित
लोकेज्वालाकुलेसोयंयोगरूपीजनार्दनः ३८ सेयंभागीरथीशंभोःसर्वदुःखापहारिणी सिद्ध्यर्थंसेव्य
तेसिद्धेभुक्तिमुक्तिफलप्रदा ३९ यदंभःस्नानमात्रेणविकर्तनसलोकतां लभंतेप्राणिनःसर्वेनदीसायमुनाख्य
यम् ४० अनयोःपुण्यनद्योश्चसंगमःसुखदोनृप अत्रस्नातानपच्यंतेनरकेज्ञानभाविताः ४१ विनाज्ञा·
नंप्रयागेस्मिन्मुच्यंतेसर्वजंतवः अन्यच्चश्रूयतांराजन्नितिहासंपुरातनम् ४२ कश्चित्केनपुराशप्तोगंधर्वोवा·
यसोभवत् शापंमुमोचसोत्रैवस्नातःसद्यःसितासिते ४३ वासवस्यतुशापेनस्वर्गाद्भ्रष्टाप्सरोर्वशी स्वर्ग·
कामाचसासस्नौलेभेस्वर्गंततोचिरात् ४४ पुत्रंचशंकरंलेभेययातिर्नाहुषोनृप पुत्रकामःप्रयागेहिस्नात्वापु
ण्येसितासिते ४५ धनकामःपुराशक्रःस्नातोत्रनृपोत्तम धनदस्यनिधीन्सर्वान्जहारसचमायया ४६
कश्यपोत्रतपस्तेपेशिवाराधनतत्परः अस्मिन्तीर्थेभरद्वाजोयोगसिद्धिमवाप्तवान् ४७ अस्मिन्तीर्थेपु
राराजन्योगेशाःशांतमानसाः योगस्यफलभूमिंतुलेभिरेसनकादयः ४८ अस्मिन्माघेतुयेस्नातागंगाया १०
मुनसंगमे तारारूपाश्चतेसर्वेतैर्व्याप्तंसकलंजगत् ४९

४१ ४२ ४३ ४४ ४५ ४६ ४७ ४८ ४९

५० मुनिवरवचसा लोमशमुनिवचसा कलुषंपापं अभिगतलाभं मनसेप्सितं पंचगंधर्वकन्याः प्रमोदिनी सुशीला सुतारा चंद्रिकासुस्वरा
त अत्रेतिहासमाह पाद्मे दिलीपंप्रतिवसिष्ठउवाच शृणुतांराजशार्दूलधर्मगर्भांकथांपराम् गंधर्वःसुरवसंगीतिस्तस्यकन्याप्रमोदिनी
शीलाचसुस्वरास्वरवेदिनः सुताराचंद्रकांतस्यचंद्रिकासुप्रभस्यच कुमार्यःपंचसर्वास्तावयसासुसमाःपुनः चंद्राननाःसुके
न्यश्चंद्रामृतरसाधराः पितृभिर्लालिताःसत्यन्नेरुश्चधनदालये कौतुकादेकदापंचामिलित्वामासिमाधवे गौरींसमाराधयितुंवरांग-
नाःकदाचिदच्छोदसरोवरंययुः हेमांबुजानिप्रवराणिताःपुनस्तस्मादुपादायवरोत्पलैःसह वैडूर्यशंखस्फटिकाच्छकुट्टमेस्नात्वातडागे-
परिधायचांबरम् मौनेनचस्थंडिलपिंडिकामयींस्वर्णस्यसिक्ताभिरुमांविनिर्ममुः समर्चितांचंदनचंद्रकुंकुमैरभ्यर्च्यगौरीवरपंकजादिभिः
नानोपचारैश्चसुभक्तिभाविताःस्तालप्रयोगैर्ननृतुःकुमारिकाः तस्मिन्सुनादेरसवर्षहर्षदेकन्यास्वलंनिर्भरनृत्यवृत्तिषु अच्छोदतीर्थप्रव-

विंदंतिकामिनःकामान्मुक्तिंयांतिमुमुक्षवः विंदंतिसाधकाःसिद्धिंप्रयागेहिनृपोत्तम ५० इतिरूप
वरमाघेस्नानसंजातपुण्यान्मुनिवरवचसाद्राक्तीर्थराजप्रयागे

रेतदागतःस्नातुंमुनेर्वेदनिधेःसुतोग्निपः
सब्रह्मचारीसशिखोविराजतेदंडेनयुक्तोधनुषेवमन्मथः विशालवक्षाःसुभुजोतिसुंदरःश्यामच्छविःकामइवापरोहिसः तंदृष्ट्वा
ब्राह्मणंबालास्तास्तत्रसरसस्तटे जहृषुःकौतुकाविष्टास्तस्यालोकनतत्पराः पश्यपश्येतिजल्पंत्य ऊचुस्ताश्चपरस्परम् यद्ययंकामदेवो
हिरतिहीनःकथंव्रजेत् ऋषिपुत्रोथवाकश्चित्कश्चिद्वामानुषोत्तमः अस्तुवाकश्चिद्देवोयंधात्रासृष्टोहिनःकृते तस्मादयंकुमारीणांगौ
र्योनीतोवरोत्तमः मयावृतस्त्वयाचायंत्वयावृतस्तथामया एवंपंचसुकन्यासुवदंतीषुनृपोत्तम श्रुत्वातद्वचनंतत्रकृत्वामाध्याह्नि
कीःक्रियाः आलोच्यस्वहृदयेसोपिविघ्नमेतदुपस्थितम् ब्रह्मविष्णुगिरिशाद्याःसुरायेचासिद्धमुनयःपुरातनाः तेपियोगबलिनोवि-
मोहितास्त्रीलयातदबलाभिरद्भुतम् दारुणाहिपरिकीर्तितांगनासन्निधिर्विमलबुद्धिभिर्बुधैः यावदत्रनसमीपगाइमास्तावदेवाहि

गृहंव्रजाम्यहम् समीपंतस्ययावद्भिनागच्छंतिवरांगनाः वैष्णवेनप्रभावेनतावदंतर्द्धेद्विजः तस्ययोगबलाद्रूपगतस्यादर्शनंतदा दृष्ट्वातदद्भुतंकर्मददृशुस्तादिशोदश व्याप्तंतुहृदयंतासांतद्देवविरहाग्निना हाकष्टंदर्शितःकस्माद्धात्रात्वंघटितःपुनः ज्ञातंमहानुसंतापहेतोर्नस्त्वंविनिर्मितः सर्वथादर्शनंदेहिकारुण्यंभजसर्वथा इत्थंविलप्यताःकन्याःप्रतीक्ष्यचबहुक्षणम् तत्प्रेमनिगडैर्बद्धा भृशंविरहविक्लवाः कथंचिद्धैर्यमालंब्यताःस्वंस्वंगृहमागताः इत्थंयुगसमांरात्रिंमानयंस्तावरस्त्रियः कथंचिद्धीरतांकृत्वाविह्वलाः सज्वराइव प्रातर्व्योममणिंदृष्ट्वामन्यमानाःस्वजीवितं विज्ञाप्यमातरंस्वांस्वांगौरींपूजयितुंगताः स्नात्वातेनविधानेनपुष्पैर्धूपैर्यथातथा विधायपूजनंदेव्यागायंत्यस्तत्रताःस्थिताः एतस्मिन्नंतरेविप्रःस्नातुंसोपिसमागतः पित्राश्रमपदात्तस्माद्दृष्ट्वोदेचसरोवरे उत्फुल्लनयनाजातास्तंदृष्ट्वाब्रह्मचारिणं गत्वातद्देवताःकन्याःसमीपंब्रह्मचारिणः सव्यापसव्यबंधेनभुजपाशंचचक्रिरे गतोसिधूर्तपूर्वेद्युर्गंतुमद्यनशक्ष्यसे वृतस्त्वंनूनमस्माभिर्नात्रतेस्तुविचारणा इत्युक्तोब्राह्मणःप्राहप्रहसन्बाहुपाशगः तथ्यंवोवचनंकिंतुसमाप्येहस्वकंव्रतम् प्राप्यानुज्ञांगुरोःसर्वंवैवाहंकर्मनान्यथा इत्युक्त्वापुनरूचुस्ताःस्फुटंमूढोसिसुंदर दिव्यौषधंब्रह्मरसायनंचासिद्धिर्निधेःसाधुकलावरांगनाः मंत्रस्तथासिद्धिरसश्चधर्मतोनेमेनिषेध्याःसुधियासमागताः तस्मादस्मादिदानींतुस्वीकुर्यान्मंगलंभवान् गांधर्वेणविवाहेनत्वन्यथानोनजीवितं श्रुतवाक्यस्ततःप्राहब्राह्मणोधर्मवित्तमः भोमृगाक्ष्यःकथंत्याज्योधर्मोधर्मधनैर्नरैः धर्मश्चार्थश्चकामश्चमोक्षश्चैतच्चतुष्टयम् यथोक्तंसफलंज्ञेयंविपरीतंतुनिःष्फलम् तस्माच्छृणुतहेकन्यानसमीहेस्वयंवरं एवंज्ञात्वाशपंतस्यसमीक्ष्यैताःपरस्परम् करात्करंविमुच्याथजग्राहांघ्रीप्रमोदिनी भुजौजगृहतुस्तस्यसुशीलासुस्वरातथा स्वालिलिंगसुताराचचुचुंबेचंद्रिकामुखं तथापिनिर्विकारोसौप्रलयानलसन्निभः शशापब्रह्मचारीताःक्रोधेनात्यंतमूर्छितः पिशाच्यइवमांलग्नास्तत्पिशाच्योभविष्यथ एवंतेनाशुशप्तास्तास्तंसंत्यज्यपुरःस्थिताः किमेतच्चेष्टितंपापत्वनागसिजनेत्वया प्रियकृत्स्वःप्रियंकृत्वाधिकृताधर्मज्ञतातव तस्मात्त्वमपिनःशापात्पिशाचोभवसत्वरम् इत्युक्तोपरताबालानिःश्वसंत्यःक्रुधाकुलाः तदाचान्यो

न्यसंरंभात्तस्मिन्सरसिपार्थिव ताःकन्या ब्रह्मचारीसःसर्वेपैशाच्यमागताः पिशाच्यःसपिशाचश्चक्रंदमानाःसुदारुणम् सूपयंतिविपाकंतंपूर्वोपात्तस्यकर्मणः क्रंदंतिपितरस्तासांमातरस्तत्रतस्यच अप्रमादश्चबालानांदैवोपिदुरतिक्रमः ततऊर्ध्वंपिशाचास्तेआहारार्थेसुदुःखिताः इतस्ततश्चधावंतोवसंतिसरसस्तटे एवंबहुतिथेकालेलोमशोमुनिसत्तमः पौषेमासिचतुर्दश्यामच्छोदेस्नातुमागतः दृष्ट्वातंब्राह्मणंसर्वेपिशाचाःक्षुत्समाकुलाः धावंतोहंतुकामास्तेमिलित्वायूथवर्तिनः दह्यमानाःसुतीव्रेणतेजसालोमशस्यच असमर्थाःपुरःस्थातुंसचैतेदूरतःस्थिताः तत्रवेदविधिर्विप्रस्तदैवाहिसमागतः समीक्ष्यलोमशंराजन्साष्टांगंप्रणिपत्यसः उवाचसूनृतांवाचंबध्वाशिरसिचांजलिं इमागंधर्वकन्यास्ताबटुःसोयंममात्मजः सर्वेपिशाचरूपेणमिथःशापविमोहिताः दीनाननास्तुतिष्ठंतितवाग्रेमुनिसत्तम त्वद्दर्शनेनबालानांनिस्तारोद्यभविष्यति श्रुत्वातल्लोमशोराजन्कृपार्द्रीकृतमानसः प्रत्युवाचमहातेजास्तंमुनिंपुत्रदुःखितं मत्प्रसादाच्चबालानांस्मृतिःसपदिजायतां धर्मंचवच्मितंयेनमिथःशापोलयंव्रजेत् मयासार्द्धंप्रकुर्वंतिमाघस्नानंविधानतः शापान्मुच्यंतिमाघांतेनान्यथानिष्कृतिर्भवेत् सप्तजन्मकृतंपापंवर्तमानंचपातकम् माघस्नानंदहेत्सर्वंपुण्यतीर्थेविशेषतः तीर्थैरन्यैर्दानतपोभिरध्वरैः सार्धंविधात्रातुलयाधृतंपुरामाघेप्रयागस्यतयोर्द्वयोरभून्माघोगरीयानतएवसोधिकः धनुस्त्रिशतविस्तीर्णेसितनीलांबुसंगमे अपुनरावृत्तिर्माघीसाराजसूयीपुनर्भवेत् किमत्रबहुनोक्तेनश्रूयतांद्विजनिश्चितम् समुद्भूतफलंपापंतीर्थेमाघःप्रणाशयेत् अधुनातुमयासार्द्धमिमाःकन्याःसुतश्चते त्वंचायातुप्रयागंवैसर्वेसद्गतिमीप्सवः माघस्नानंप्रकुर्मोत्रदेवानामपिदुर्लभम् तत्रमोक्ष्यंतिपैशाच्यंसद्यःपापसमुद्भवम् एवंलोमशवक्त्राब्जकथामधुरसंमुदा पीत्वाप्रमुदिताःसर्वेनिस्तीर्णानरकार्णवात् प्रस्थितास्तेनसार्द्धंतेसत्वरंव्योम्निहर्षिताः अथोचेलोमशस्तत्रसदयंगगनांगणे पश्यंतुश्रद्धयासर्वेतीर्थराजमिमंभुवि विनाज्ञानंप्रयागेस्मिन्मुच्यंतेसर्वजंतवः सांप्रतंमुक्तिकामास्तुकन्याश्चापिसुतश्चते मद्वाक्यादत्रमज्जंतुसत्वेत्वंचसितासिते एवमार्षवचस्तस्यअतींद्रियमलंघनम् श्रुत्वाचोक्तंउचितास्तेसर्वेस्नानायचोद्यताः प्रयागंप्राप्यदुःप्राप्यंपैशाच्यंविजहुःक्षणात् विमुक्ताःशापदुःखेनतनुंस्वांस्वांच

लेभिरे दृष्ट्वावेदनिधिःपुत्रंताःकन्या दिव्यरूपिणीः तुष्टावलोमशंप्रीत्याप्रसन्नेनांतरात्मना त्वदनुग्रहमात्रेणोत्तीर्णाःपापमहार्णवः इदानीमुचितंब्रूहिबालानामृषिसत्तम लोमशउवाच कुमारोधीतवेदोयंसमाप्तनियमोयुवा आज्ञांतुसानुरागाणांगृह्णातुकरपंकजम् ततोलोमशवाक्येनस्वपितुर्वचनात्तदा विवाहविधिनाचासौब्रह्मचारीसधार्मिकः शुभद्रव्यैश्चमंत्रैश्चऋषिभिःकृतमंगलः पंचानामपिकन्यानांपाणिंजग्राहधर्मतः आनंदिन्यस्तदासर्वाःकन्याःपूर्णमनोरथाः बभूवुःसकुमारश्चसंतुष्टश्चबभूवह दत्वानुज्ञांमुनिःसोथलोमशस्तैर्नमस्कृतः जगामस्वाश्रमंमेरुपर्वतेसुरसेवितम् ततोवेदनिधीराजन्स्नुषाःपंचसुतंतथा पुरस्कृत्यमु

सकलकलुषमुक्ताःपंचगंधर्वकन्याअलमभिगतलाभंप्राप्यहर्षंचजग्मुः ५१ इतिश्रीपद्मपुराणेसारांशे
माघमाहात्म्येमाघप्रयागप्रशंसावर्णनंनामप्रथमोऽध्यायः १ छ सूतउवाच पुराकलियुग
स्यांतेब्रह्मलोकंगतोमुनिः ददर्शलोकनाथेशंध्यायंतंवैजनार्दनम् १ नारदउवाच संसारेक्लिश्यमा
नानाजंतूनांपापकारिणाम् कर्मणाभ्राम्यमाणानांकागतिःकमलोद्भव २ सुखमिच्छंतितेमूढानेच्छं
तिसुखकारणम् नेच्छंतिदुःखलेशंवातद्धेतौसततंयताः ३

दायुक्तोधनदस्यपुरंययौ परमिममितिहासंपावनंतीर्थभूतंवृजिनविलयहेतुंयःशृणोतीहनित्यम् सभवतिखलुपूर्णःसर्वकामैरभीष्टैर्व्रजतिचसुरलोकेदुर्लभेधर्मयुक्त इति ५१ इतिश्रीमाघमाहात्म्यटीकायांप्रथमोऽध्यायः १ छ पुरेति इंद्रादिलोकंपरित्यज्यातिदूरसत्यलोकगमनेकिंकारणमित्याशंकायामाह लोकनाथेशमिति लोकनाथाइंद्रादयस्तेषामीशंब्रह्माणमित्यर्थः इतरेषामपूर्णज्ञानतयालभ्यस्तत्वज्ञानप्राप्तिर्नभविष्यतीतिसर्व [illegible] कंप्रत्येवगमनंयुक्तमितिभावः अतएवनवमश्लोकेत्वमेकोवेत्सितत्वतइतिवक्ष्यति १ २ पापकारित्वंविवृ [illegible]ति सुखमिति सुखकारणंसत्कर्मकर्तुमिच्छांनकुर्वंतीत्यर्थः सत्कर्मकरणंतुसुतरांनास्तीतिभावः लेशंवालेशमपि तद्धेतौदुःखहेतौ पापकर्माचरणेयताः यत्नवंतः ३

भवेदिति आवृत्त्यामुक्तिरित्यत्रापियोज्यंकेनापिप्रकारेणमुक्तिधर्मरतीभवेतामित्यर्थः ४ तस्मात् आदिशब्देनवैराग्यादेर्ग्रहणं ५ तेषांमुक्तिर्धर्मेरतिश्चमाभूतांतत्रममकिंमनिष्टापादनमित्यतआह वन्हिमित्यादित्रिभिः आदातुंकामोयेषांतेपृषोदरादित्वात्पूर्वपदांत्यस्य लोपः बालानांवन्हिग्रहणेच्छांनिवर्तयित्वा वन्हिग्रहणादित्यर्थः फलेयथेति निवर्तनंफलेरुचिजननंचेतिधर्मद्वयाभिप्रायेणयथाशब्दस्य द्विरुक्तिः ६ लोकेसमदर्शनाः संतः समंस्वकीयदेहादिवत् दर्शनंयेषांते विषयानलमादातुमिच्छतः बोधेनधर्माद्युपदेशेन ७ समदर्शनत्वमेवोपपादयति शास्तारइतियतः साधवोज्ञानिनोऽज्ञानांनृणांविशिष्टज्ञानवत्त्वात्शास्तारः अनिष्टपरिहारपूर्वकेष्टप्राप्तिकारक-

अलसाधर्मविमुखाः विषयासक्तचेतसः तेषांमुक्तिःकथंब्रह्मन्रतिर्धर्मेकथंभवेत् ४ कृपाविष्टेनचित्तेननरानेतान्समुद्धर धर्माद्युपेतवचसाविष्णुभक्तिविवर्धिना ५ वन्हिमादातुकामानांबालानांमातरोयथा विवर्तयित्वासरुचिंजनयंतिफलेयथा ६ तथाभागवतालोकेसाधवःसमदर्शनाः निवर्तयित्वाबोधेनविषयानलमिच्छतः ७ जंतून्धर्मफलंतेषांदर्शयंतिहितेच्छवः पितरोमातरोज्ञानांशास्तारःसाधवोनृणाम् ८ त्वमादिवक्ताधर्माणांत्वमेकोवेत्सितत्वतः कर्मणाकेनकालुष्यंमनसोगच्छतिध्रुवम् धर्मास्तुबहवःसंतिस्मृतिश्रुत्युदिताअपि ९

शासनकर्तारः अतएवमातापितृतुल्याः यथामातापित्रोः स्वदेहवत् बालेषुदर्शनं तथासाधूनामपि अज्ञलोकेषुसमदर्शनमेवयुक्तमित्यर्थः एवंचयथाबालानांदुःखनिवृत्तिपूर्वकसुखप्राप्तिविषयेशासनाकरणेनमातापित्रोर्निर्दयत्वनिंदादिदोषप्राप्तिर्भवतितथाशास्तृत्ववतांअकरणेदोषप्राप्तिःस्यादितिभावः ८ अन्यसाधून्परित्यज्यमामेवकिमर्थंपृच्छसीत्यतआह त्वमिति यतस्त्वमादिवक्ताअतएवत्वंमनसः कालुष्यंकेनकर्मणाध्रुवंगच्छत्येतत् तत्वतो-

चेत्सीत्यन्वयः त्वमेवनत्वतोचेत्तातस्त्वामेवपृच्छामीतिभावः ९ कालुष्यापनयनेश्रुत्यादिप्रतिपादिताः प्रसिद्धाधर्मास्तवविज्ञाताः संतीत्यतोऽविज्ञातप्रार्थनंचप्रश्नइत्यभिधीयतेइतिवचनेनप्रश्नस्याविषयएवनास्तीतिचेत्तत्राहधर्मास्त्विति हियस्मात् तेकष्टसाध्यास्तस्मान्नरास्तेषुकष्टसाध्येषुधर्मेषु आदौपूर्वमेवविमुखाः क्लेशासहिष्णुत्वादेवपराङ्मुखाः संतीत्यर्थः एवंचेत्तर्हिमयाकिमुमित्यतआह यदेति सुखसाध्यधर्मस्याऽविज्ञातविषयत्वात् प्रश्नोयुक्तइतिभावः १० समस्तबंधः अविद्याकर्मादिबंधः ११

तेधर्माः कष्टसाध्याहितेष्वादौविमुखानराः यद्धर्मंसुखोपास्यंसर्वबंधविनाशनम् १० यत्कुर्वतोपैतिसमस्तबंधोजायेतश्रद्धामतिरास्तिकीच भक्तिर्हरौतत्पुरुषेचसख्यंतद्वदतेषांहितकाम्ययावद ११ इतितद्वचनंश्रुत्वाब्रह्मालोकपितामहः संप्रहृष्टमनाभूत्वानारदवाक्यमब्रवीत् १२ ब्रह्मोवाच त्वमेवनूनंवतभूरिभागोऽनिमित्तबंधुर्भुविमानवानाम् त्वमग्रणीधर्मदृशामृषीणांद्यापराभागवताहिलोके १३ किंवर्णयामिममभाग्यमहमहात्माभवादृशोभागवतस्तनूद्भवः तएवधन्याःखलुपुण्यशीलायेषांसुताभागवताहिलोके १४ हितेच्छयाहिमंदानांकृतःप्रश्नस्त्वयामुने संतोषयतिलोकांश्चसंतोषयंतिमेमनः १५ पुनातिशास्त्रसंप्रश्नोवासुदेवकथाश्रयः वक्तारंपृच्छकंश्रोतॄन्सद्यस्त्रीःनृपुरुषान्मुने १६ प्रणम्यविष्णुंपुरुषंपुराणंनिरामयंनिश्चलमद्वितीयम् वक्ष्यामिगोप्यंसकलंशुभावहंधर्मंत्वयापृष्टमवद्यनाशनम् १७

१२ सद्धर्मविषयेप्रश्नकर्तॄणांसर्वैः प्रोत्साहनंकार्यमितिलोकेशिक्षांप्रदर्शयितुंनारदंप्रशंसंतित्वमेवेति १३ १४ १५ स्त्रीनितित्रित्वंवक्तृत्वश्रोतृत्वपृच्छकत्वाभिप्रायेण १६ १३
धर्मकथनेविघ्ननिवारणार्थंविहितंविष्णुप्रणामरूपंमंगलाचरणंकरोति प्रणम्येति १७ ६९ ५९

स्नानमेवविदुःसर्वकर्ममूलत्वेनेत्यर्थः गजभुक्तेति गजभुक्तं कपित्थमस्फुटितमेवनिःसारंतदपानमार्गेणनिःसरतीति प्रसिद्धं तथेत्यर्थः
१८ तत्रापिमाघस्नानेश्रेष्ठेसत्यपिसर्वमासेषुप्रातः प्रातःकाले १९ २० २१ २२ २३ २४ भगोदयेसूर्योदये
२५ कियज्जन्मसुकृतानिपापानिविलयंयांतीत्याह जन्मकोटीति २६ २७ कुब्जिकाइति भृगुवंशजाभृगुवंशोत्पन्ना रवेर्लोके-

सर्वेषामेवधर्माणांस्नानंमाघेविदुर्बुधाः विनास्नानंकृतंकर्मगजभुक्तकपित्थवत् १८ तत्रापिप्रातर्यःस्ना
याद्विष्णुधर्मपरायणः नतस्मिन्पापलेशोस्तिकृतघ्नेसुकृतंयथा १९ शौचंस्नानंद्वयंमातापितरौसर्वकर्मणां
प्रातःस्नानेत्वशक्तस्तुकुर्यान्मासत्रयंबुधः २० तुलासंस्थेदिनकरेमकरस्थेचभास्वति मेषसंस्थेसदाकुर्या
त्प्रातःस्नानमतन्द्रितः २१ नकुर्यात्त्रिषुमासेषुप्रातःस्नानंनराधमः रौरवंनरकंयातियावदिंद्राश्चतुर्दश २२
कार्तिकेसर्वमासेभ्यःसहस्रफलदंविदुः तस्माल्लक्षगुणोमाघइतिप्राहजनार्दनः २३ नमाघमासात्परमो
स्तिधर्मःसंसारदुःखंविनिवर्तितुंकलौ यथाकलौविष्णुकथापरागतिःतथैवस्नानंमकरेदिवाकरे २४
पापानिविलयंयान्तितमांसीवभगोदये समागच्छन्तिपुण्यानियथागुरुकृपोदये २५ जन्मकोटिसहस्रेषुय
त्पापंसमुपार्जितम् तत्पापंसकलंघोरंमाघस्नानेननश्यति २६ नमाघस्नानादपरोस्तिलाभोनमाघस्नानाद
परापरागतिः नमाघस्नानादपरोस्तिधर्मोनमाघस्नानादपरंपरायणम् २७ (क्षेपकः कुब्जिकानामकल्या
णीब्राह्मणीभृगुवंशजा

सूर्यलोके अत्रप्रसिद्धांकथामाह पाद्मे सहस्रार्जुनंप्रतिदत्तात्रेयः शृणुराजन्महाश्चर्यंमा
घस्नानप्रभावजं कुब्जिकानामकल्याणीब्राह्मणीभृगुवंशजा बालवैधव्यदुःखार्तातपस्तेपेसुदुस्तरं विंध्यपादेमहाक्षेत्रेरेवायाःपर
कंटके तत्रसाव्रतिनीभूत्वानारायणपरायणा षष्टिमाघास्तयास्नातारेवाकपिलसंगमे ततःसातपसाक्षीणातस्मिन्तीर्थेमृतानृप माघ

स्नानजपुण्येनतेनसावैष्णवेपुरे उवासप्रमुदायुक्ताचतुर्युगसहस्रकं स्कंदोपस्कंदनाशायपश्चात्पद्मभवापुनः तिलोत्तमेतिनाम्नासा ब्रह्मलोकेवतारिता तेनपुण्यस्यशेषेणरूपस्यैकायनंययौ अयोनिजाऽबलारत्नंदेवानामपिमोहिनी तामुत्पाद्यविधातावैतुष्टोनुज्ञांतद्ददौ एणशावाक्षिगच्छत्वंदैत्यनाशायसत्वरम् ततःसाब्रह्मणोलोकाद्वीणामादायभामिनी गतापुष्करमार्गेणयत्रतौदेववैरिणौ तत्रस्नात्वातुरेवायाःपवित्रेनिर्मलेजले परिधायांबरादींश्चगायंतीविचचारह दृष्ट्वादैत्यभटास्तांतुवर्णयामासुरादरात् हेदैत्यौनविजानीमोदेवीवादानवीनुकिंयुवांरत्नभुजौलोकेरत्नभूतातुसाबला इतिसेनापतीनांतौश्रुत्वावाचंमनोहराम् चषकंसीधुनस्त्यक्त्वाविहायजलसेवनं उत्तमस्त्रीसहस्राणित्यक्त्वातस्माज्जलाशयात् शतभारायसींक्रूरांकालदंडोपमांगदां भिन्नाभिन्नांगृहीत्वातुजवेनाभिप्लुतागतौ यत्रशृंगारसज्जासाहंतुंचंडीवसंस्थिता राजन्संधुक्षयंतीवदैत्ययोर्मन्मथानलं स्थित्वातस्याःपुरोजाल्मौतद्रूपेणविमोहितौ विशेषान्मधु

भुंक्तेद्यापरिखेर्लोकेमाघस्नानफलंमहत् २७ अकृत्वामाघमासेतुप्रातःस्नानंनराधमः पैशाचींयोनिमा
साद्यातिष्ठत्याभूतसंप्लवम् २८

नामत्ताचूचतुस्तौपरस्परम् भ्रातर्विरमभार्येयंममास्तुवरवर्णिनी त्वमेवार्यत्यजैतांमेभार्यास्तुमदिरेक्षणा इत्याग्रहेणसंरब्धौमातंगाविवसोन्मदौ अन्योन्यंकालनिर्दिष्टौगदयाजघ्नतुस्तदा परस्परमहारेणगतासूपतितौभुवि तौमृतौसैनिकैर्दृष्ट्वाकृतःकोलाहलोमहान् कालरात्रिसमाकेयंह्याकिमेतदुपस्थितम् एवंवदत्सुसैन्येषुदैत्यौस्कंदोपस्कंदकौ पातयित्वागिरेःशृंगेन्ह्लादिनीवतिलोत्तमा प्रस्थितागगनंशीघ्रंद्योतयंतीदिशोदश देवकार्यंततःकृत्वाआगताब्रह्मणःपुरः ततस्तुष्टेनदेवेनविधिनासानुमोदिता स्थानंसूर्यरथेदत्तंतवचंद्राननेमया भुंक्ष्वभोगाननेकांस्त्वंयावत्सूर्योंबरेस्थितः इत्थंसाब्राह्मणीराजन्भूत्वाचाप्सरसांवरा भुंक्तेद्यापरिखेर्लोकेमाघस्नानफलंमहत् तस्मात्प्रयत्नतोराजन्श्रद्दधानैःसदानरैः स्नातव्यंमकरादित्येवांछद्भिःपरमांगतिमिति १ माघस्नानस्याकरणेनरकभोगानंतरंउर्वरितपापजन्यमनर्थांतरंचाह अकृत्वेति २८ ६१ ६२ ६२

१४

अनूदितार्केइति अनुपश्चादुदितमुदयोयस्येत्यनूदितः तादृशोर्कोयस्मिन् तत्कालेसूर्योदयात्प्राङ्मुहूर्तइत्यर्थः तस्मिन्मनुजे २९ देवखातानि देवताकुंडानिपुष्करिण्यः पुष्करादिसरोवराणि ३० ३१ माघस्नानेनसर्वपापमोचनंनकेवलंमयैवोच्यते माघमासाधीश्वरेणमाधवेनापिब्रह्मघ्नमित्यादिभिःसप्तभिःश्लोकैःपुनःपुनर्मेघतुल्यगर्जनयोच्यतेइत्याह ब्रह्मघ्नमिति ३२ अभक्ष्याभक्षिणं अ·

नपापलेशोनचकर्मबंधःपुनर्भवोवामनुजेमुनींद्र येनेहमाघेमकरस्थभानौनद्याजलेस्नातमनूदितार्के २९
गंगाद्याःसरितःसर्वाःदेवखातानियानिच पुष्करिण्योह्रदावाप्योयेचान्येचजलाशयाः ३० सन्निधानंप्रकु
र्वंतिजलमात्राशयेमुने प्रातःकालेमाघमासेमकरस्थेदिवाकरे ३१ ग्रामाद्बहिर्जलेस्नात्वामुच्यतेसर्वकि·
ल्बिषैः ब्रह्मघ्नंवापितृघ्नंवागोघ्नंभ्रूणहनंतथा ३२ स्त्रीघ्नंसुरापंमित्रघ्नंस्तेयिनंगुरुतल्पगम् अभक्ष्याभ·
क्षिणंक्रूरंसदापैशून्यवादिनम् ३३ अधर्मनिरतंदांभंतथैवानृतवादिनं परस्वसूचकंदेवद्विजद्रव्यापहारिणं
३४ निंदकंसाधुवृत्तीनांतथैवोन्मार्गवर्तिनम् हेतुवादरतंद्यूतकर्माणंनिंदिताश्रयम् ३५ अयाज्ययाज
कंविप्रंतथादुष्टप्रतिग्रहम् परदाराभिनिरतंपरद्रव्यापहारिणम् ३६ वृत्यापादपछेत्तारंवर्णसंकरकारिणं
गृहेष्वग्निप्रदातारंविषकर्मप्रयोगिनम् ३७ पंक्तिभेदंप्रकुर्वाणंदंपत्योर्विरहप्रदम् एवमादीनिपापानि
कुर्वाणमपिनारद ३८ प्रातःस्नानात्पुनामीतिमाघोगर्जतिगर्जति किंचिदभ्युदितेभानौरटत्यापोदिवा·
निशम् ३९

भोज्यपदार्थभक्षिणम् ३३ दांभंदंभस्यायमाश्रयोदांभः तंदंभवंतंपरस्वसूचकंहरणकर्तॄणामित्यर्थः ३४ हेतुवादरतंसंध्यादिकर्मकरणेकोहेतुरितिवादरतं ३५ दुष्टप्रतिग्रहंदुष्टात् दुष्टदानंवाप्रतिगृह्णातितं ३६ ३७ ३८ एवंतीर्थदेवतावरुणभागीरथ्यादयश्चमाघस्नानस्यपापमोचकत्वंवदंतीत्याह किंचिदिति ३९

४० ४१ पूर्वोक्तपिशाचजन्मानंतरंकिंचिच्छिष्टपापस्यचरमफलमाह अस्नातइति ४२ ४३ ४४ सत्वमंतःकरणंनिरू·

अत्युग्रपापिनंचापिमाघस्नानात्पुनीमहे तिस्रःकोट्योर्धकोट्यश्चतीर्थानिभुवनत्रये ४० निरीक्ष्यमाघ
मासंतुसदाप्रातर्जलाशये अस्नातंपापिनंमूढंशापंदत्वाव्रजंतिहि ४१ अस्नातोमाघमासेतुप्रातर्नाडीचतु
ष्टये नरश्चांडालतांयातिनारीचविधवाभवेत् ४२ सम्यक्चीर्णानिपुण्यानिवासुदेवपराङ्मुखान् नपुनंति
यथातद्वन्माघस्नानपराङ्मुखान् ४३ अनंतजन्मानुगतंमहांतंदुष्कर्ममूलंप्रतिबंधमुग्रम् स्नानैरेवाचभ्यु·
द्दिनेनराणांनिवर्तयत्याशुरविर्यथाहिमम् ४४ सत्वंचशुध्यत्यचिरेणपुंसोभक्तिर्हरौतत्पुरुषेषुसख्यम्
निरूपमंभाग्यमनल्पमायुर्माघेबहिःस्नानपरस्यजायते ४५ माघस्नानस्यमाहात्म्यंवाच्यमानंद्विजोत्तम
नशृणोतिविमूढात्मातस्मात्कोन्यपरःपशुः ४६ यथागंगानदीनांतुदेवतानांयथाहरिः वृक्षाणांचयथाश्व
त्थःपशूनांगौर्यथामुने ४७ तथावैमाघमासोयंमासानामुत्तमोत्तमः वेदानांचयथासाममंत्राणांप्रणवोय
था ४८ गायत्रीछंदसांयद्वत्पक्षिणांगरुडोयथा वैष्णवानांयथारुद्रःऋतूनांमाधवोयथा ४९ मासानांप्र·
वरोमासोमाघमासउदाहृतः यथाहीनांतुगरुडोरोगाणामौषधंयथा ५० पर्वतानांयथावज्रंमातंगानांय·
थांकुशः हिमानांतुयथावन्हिः कौशिकानांयथारविः ५१ पापानांविष्णुनामैवदैत्यानांकेशवोयथा त·
थामनुष्यबंधानांमाघमासोनिवर्तकः ५२ नसूर्यादिग्रहाश्चैनंनपिशाचानचोरगाः माघस्नानरतंजंतुंनस्पृशं
तिकदाचन ५३

पमं अनुपमं आर्षत्वाद्दीर्घः ४५ ४६ ४७ नमयैवोत्तमोत्तमत्वमुच्यते अ·
न्यैर्देवादिभिरपिदृष्टांतपूर्वकंउत्तमत्वमुदाहृतमित्याहवेदानांचेति ४८ ४९ ५० ५१ ५२ नस्पृशंतिनपीडांकुर्वंतीत्यर्थः ५३

१५

लिखितानिचपापानिबहूनियमशासने परिमार्जयतिक्षिप्रंचित्रगुप्तोयमाज्ञया ५४ माघस्नानंकृतंयद्यद्यजंतुना
नेनसत्वरम् तेनपापानिनष्टानितस्मान्मार्जयशासनम् ५५ यमश्चाज्ञापयत्येवंचित्रगुप्तंमहामतिं संगाद्द्वेषात्स्व
भावाद्वामाघस्नानंकरिष्यति ५६ तदास्माकमवस्थानंकुत्रस्यादित्यहर्निशम् इतिगर्जंतिपापानिहत्यादीनि-
महांत्यपि ५७ कृत्वोषसिस्नानमनन्यमानसोमाघेतुसंस्थेमकरेदिवाकरे भक्त्यासमभ्यर्च्यहरिंतुयेवमा-
तुःस्तनंनैवपुनःपिबंति ५८ संसारसर्पदष्टानांजंतूनामविवेकिनाम् माघेतूषसिस्नानस्यकरणंपरमौषधम्
५९ इहजन्मनियत्पापंयत्पापंपूर्वजन्मसु तत्पापंनाशमायातिमाघस्नानेननारद ६० माघस्नानंकरिष्यामीत्ये-
वंसंकल्पतोमुने ध्रुवंनश्यंतिपापानिचलंत्यत्रप्रयत्नतः ६१ बहिर्गमनमात्रेणविद्रवंतिदिशोदश ब्राह्मणःक्ष
त्रियोवापिवैश्यःशूद्रोथवासती ६२ प्रातर्माघेबहिःस्नानंकुर्यादितिश्रुतीरितम् ब्रह्मचारीगृहस्थोवावनस्थोयति
र्वचा ६३ प्रातःप्रातःसदास्नायान्माघेमास्युदितेरवौ अस्नात्वाचाप्यदत्वाचमाघमासोगतोयदि ६४ श्वान
योनिशतंप्राप्यविष्ठायांजायतेकृमिः तस्मात्स्नानंप्रकुर्वीतमाघेमासिद्विजोत्तम अयंहिपरमोधर्मःसंसारोत्ता
रकारणम् ६५ (क्षेपकः स्नानान्नास्तिपरंकिंचित्पवित्रंपापनाशनम्

५४ ५५ संगात् अन्ययोगात् स्वभावात् स्वेच्छावशात् ५६ ५७ ५८ ५९ पापनाशनंविवेचयति इहेति ६० केन केनप्रकारेणपापानिनश्यंतीत्याह माघस्नानमिति ६१ वाचार्थे ६२ नेदंस्नानंमयास्वकल्पनयोक्तं किंतुतत्रश्रुतिप्रमाणमस्तीत्याह श्रुतीरितमिति ६३ सदाप्रतिसंवत्सरं ६४ सिद्धांतयति माघस्नानस्यतदकरणस्यचात्यंतपुण्यपापजनकत्वात् परमानंदेन पुनरप्यध्यायांते माघस्नानमाहात्म्यंमंगलरूपेणप्रतिपादयति अयंहीति ६५ स्नानादितिस्पष्टार्थः अत्रप्रसिद्धाकथा पाद्मे कदाचित् द्वादशाब्ददुर्भिक्षेणपीडितेः शिष्यादिभिः सह भृगुः रम्य

रेवातटान्निर्गत्य हिमाद्रेः पश्चिमतः कंदमूलफलपुष्पयुते मणिकूटपर्वते गत्वाचिरकालंतपस्तेपे तत्रैकदा विद्याधरदंपती समागम्य मुनिंनत्वादुःखितौसंतौस्थितौ तदाभृगुः युवांकिमतिदुःखिताविति पप्रच्छ विद्याधरउवाच हेद्विज ममदुःखस्यकारणंश्रूयतां अहंपुण्यकर्मवशात्देवतादेहंलब्ध्वा स्वर्गंप्राप्तोस्मि तन्मेमुखंव्याघ्रस्याभवत् अयंकस्यकर्मणः विपाकः उपस्थितः तन्नजानेतेनममसुखंनाकिंचेयंभार्यानृत्यगीतकलाभिज्ञासर्वसद्गुणशालिनी केयंदेवमुखीरामाक्काहंव्याघ्रमुखः पुमान् इतिब्राह्मणसंचिंत्यदह्यामिहृदिसर्वदेति तच्छ्रुत्वा त्रिकालज्ञोभृगुः प्राहप्रहसन्दिव्यलोचनः शृणुविद्याधरश्रेष्ठतवपूर्वकथानकम् उपोष्यैकादशींमाघेतैलाभ्यंगः कृतस्त्वया द्वादश्यांप्राग्भवेदेहेतेनव्याघ्रमुखोभवान् उपोष्यैकादशींपुण्यांद्वादश्यांतैलसेवनात् कुरूपंप्राप्तवान्देहंपुरात्वेवंपुरूरवाः ततोराजागिरिराजंगत्वानिराहारःमासत्रयंतपस्तेपेतेनतुष्टःकृष्णः माघस्यशुक्लपक्षेतुद्वादश्यांमकरेरवौ शंखाद्भिरभिषिच्याशुसुदातंचक्रवर्तिनम् वासुदेवोददौतस्मै

विद्याधरायसंगीतंभृगुणामणिपर्वते १) नमाघमासात्परमोस्तिबंधुर्नमाघमासात्परमः सखास्ति

रूपंचातिमनोहरम् तस्मात्कर्मगतिंज्ञात्वाकिंविद्याधरखिद्यते माघमासेकुरुस्नानंमणिकूटनदीजले पौषस्यैकादशींशुक्लामारभ्यस्थंडिलेशयः मासमेकंनिराहारस्त्रिकालंस्नानमाचरेत् त्रिकालमर्चयन्विष्णुंत्यक्तभोगोजितेंद्रियः माघस्यैकादशींशुक्लांयावद्विद्याधरोत्तम तेनत्वंनिर्दग्धपापः सन्स्कंदरवत्कंप्राप्स्यसि इतिभृगोर्वाक्यंश्रुत्वा तस्मिन्नेवाश्रमे भृगुणाभार्ययाचसह गिरिनिर्झरिणीह्रदे विधिनामाघेस्नानमकरोत् मणिमयगिरिराजेस्नानमात्रेणमाघेमदनवदनरूपस्तत्रविद्याधरोभूत् क्षपितनियमदेहोविंध्यपादावतीर्णोभृगुरपिसहशिष्यैराजगामाथरेवामिति १ माघस्नानेविशेषफलमाह पाद्मे सहस्रार्जुनंप्रति दत्तात्रेयः श्रूयतांनृपशार्दूलमाघस्नानफलंशुभम् यथादेशंयथातीर्थंयथाश्रद्धंयथाक्रियम् अस्मिन्वैभारतेवर्षेकर्मभूमौविशेषतः अमाघस्नायिनांनृणांनिष्फलंजन्मकीर्तितं असूर्यंगगनंयद्वच्चंद्रमुडुमंडलं तद्वन्नाभातिसत्कर्ममाघस्नानंविनानृप व्रतैर्दानैस्तपोभि

श्वनतथाप्रीयतेहरिः माघमज्जनमात्रेणयथाप्रीयातिकेशवः अवैष्णवोहतोविप्रोहतंश्राद्धमयोगिच अब्रह्मण्यंहतंक्षेत्रमनाचारहतंकुलं
सदंभश्चहतोधर्मःक्रोधेनैवहतंतपः अदृढंचहतंज्ञानंप्रमादेनहतंश्रुतम् गुर्वभक्ताहतानारीब्रह्मचारीतथाहतः अदीप्तेग्नौहतोहोमोहता-
मंत्रीअसतासिका उपजीव्याहताकन्यास्वार्थेपाकक्रियाहता शूद्रभिक्षोर्हतोयागः कृपणस्यहतंधनम् अनभ्यासाहताविद्याहतोराजावि-
रोधकृत् जीवनार्थंहतंतीर्थंजीवनार्थंहतंव्रतं असत्याचहतावाणीतथापैशून्यवादिनी संदिग्धश्चहतोमंत्रोव्यग्रचित्तोहतोजपः हतमश्रो-
त्रियेदानंहतोलोकश्चनास्तिकः अश्रद्धयाहतंसर्वंकृतंयत्पारलौकिकं इहलोकोहतोनृणांदारिद्र्येणनृपोत्तम मनुष्याणांतथाजन्ममाघस्ना-
नंविनाहतं ब्रह्महाहेमहारीचसुरापोगुरुतल्पगः माघस्नायीविशुद्धःस्यात्तत्संसर्गीचपंचमः माघमासेरटंत्यापःकिंचिदभ्युदितेरवौ ब्र-
ह्मघ्नंवासुरापंवाकंपतंनपुनीमहे उपपापानिसर्वाणिपातकानिमहांत्यपि भस्मीभवंतिसर्वाणिमाघस्नायिनिमानवे कंपंतिसर्वपापा-

नमाघस्नानादपरंतपोस्तिनमाघस्नानादपरःक्रतुर्वा ६६ इतिश्रीवायुपुराणेमाघमाहात्म्येब्रह्मनार
दसंवादेप्रथमोऽध्यायः १ ६७ आदितोद्वितीयः नारदउवाच साधूदितंदेवगुरोमहामृतंश्रुतं
चगोप्यंमनसोतिहर्षणम्

निमाघस्नानसमागमे नाशकालोयमस्माकंयदिस्नास्यतिवारिणि प्रासादिकंच-
यत्पापंज्ञानाज्ञानकृतंचयत् स्नानमात्रेणतन्नश्येन्मकरस्थेदिवाकरे नृणांजन्मांतराभ्यासान्माघस्नानेमतिर्भवेत् पावनंपावनानां-
चमाघस्नानंपरंनृपेति ६६ एवंब्रह्मणानारदायसर्वदुःखनाशकोऽत्यंतफलप्रदःसर्वेणकर्तुंयोग्यःमाघस्नानरूपधर्मः तथातस्याक-
रणेमहादोषश्चनिरूपितः इत्यध्यायतात्पर्यम् १ इतिवायुपुराणीयमाघमाहात्म्यटीकायांप्रथमोऽध्यायः १ ६७ ५
र्वाध्यायेमाघमासेअवश्यंप्रातःस्नानंकर्तव्यमितिकथितंतदुत्तरमस्मिन्नध्यायेमाघस्नानविधिंश्रीमाधवस्यपूजनप्रकारंनित्यंभग-
वत्कथाश्रवणविधिंचनारदायब्रह्माकथयति तत्रादौनारदः स्नानविध्यादीन्पृच्छति साधूदितमिति महामृतमिति स्वर्गस्यामृतं

किंचित् कालपर्यंतंमृत्युनिवारकंस्करवदंचइदंतु निरंतरंमरणादिसकलदुःखनिवारकमत्यंतस्करवदंचेत्यतोमहामृतमित्यर्थः सानंदबाष्पे
इतित्वद्दर्शनेनप्रहृष्टेमेनयनेस्नानमाहात्म्यामृतश्रवणेनानंदबाष्पयुक्तेजातेइत्यर्थः १ कोविधिरितिमाघमासधर्मस्यविधिःकइत्यर्थः कस्य
भगवद्रूपस्यपूजनंकार्यमितिसंबध्यते २ ननुनापुत्रायाशिष्यायवैपुनरितिश्रुतेः पुत्रशिष्यव्यतिरिक्तायातिरहस्यंनवक्तव्यमितिप्रतिपादि
कायाः स्वस्मिन्नप्रवृत्तिं दर्शयति पुत्रायेति ३ अत्रविशेषःपाद्मे कार्तवीर्यार्जुनंप्रति दत्तात्रेयउवाच निसर्गात्सलिलंमेध्यंनिर्मलंशु
चिपांडुरं मलघ्नंपुरुषव्याघ्रद्रावकंदाहकंतथा तारकंसर्वभूतानांपोषणंजीवनंचयत् मकरस्थेरवौमाघेप्रातःकालेतथामले गोष्पदेपिज
लेस्नानंस्वर्गदंपापिनामपि अस्मिन्योगेत्वशक्तोपिस्नायाद्याद्दिनत्रयं त्रिस्नानेनापिमाघस्यधनिनोदीर्घजीविनः तस्मान्माघेबहिः

सगद्गदंमेवचनंचजातंसानंदबाष्पेनयनेप्रहृष्टे १ माघस्नानंकथंकार्यंकोविधिःकस्यपूजनम् किंदा
नंकिंव्रतंजाप्यंकिंपुण्यंकिंफलंस्मृतम् २ किमवश्यंनरैःकार्यंमासेमाधववल्लभे पुत्रायवदशिष्याय॰
विस्तरात्कमलासन ३ ब्रह्मोवाच माघमासविधिंवक्ष्येश्रृणुनारदसादरम्

स्नायाद्यात्मनोहितकाम्यया अथातःसंप्रवक्ष्यामिमाघस्नानविधिंपरम् कर्तव्योनियमःकश्चिद्व्रतरूपीनरोत्तमैः फलातिशयहेतो॰
र्वैकिंचिद्भोज्यंत्यजेद्बुधः भूमौशायीनहोतव्यमाज्यंतिलविमिश्रितं त्रिकालंचार्चयेद्विष्णुंवासुदेवंजनार्दनम् दातव्योदीपक॰
श्चमाधवम् इंधनंकंबलंवस्त्रमुपानत्कुंकुमंघृतं तैलंकार्पासकोष्ठंचतूलींतुलपटींतथा अन्नंचैवयथाशक्तिदेयंमाघेनराधिप स्ववर्णं॰
रक्तिकामात्रंदद्याद्वेदविदेतथा परस्याग्निंनसेवेतत्यजेच्चैवप्रतिग्रहम् माघांतेभोजयेद्विप्रान्यथाशक्तिनराधिप देया द न
त्मनःश्रेयमिच्छता एकादशीविधानेनमाघस्योद्यापनंतथा कर्तव्यंश्रद्धयानेनत्यक्त्वाप्यस्वर्गवांछया अनंतपुण्यप्राप्त्यर्थंवि
तिहेतवे मकरस्थेरवौमाघेगोविंदाच्युतमाधव स्नानेनानेनभोदेवयथोक्तफलदोभव इतिमंत्रंसमुच्चार्यस्नायान्मौनीसमाहितः मा

घेन्नदाताम्रृतपःकरालये हेम्नश्चदाताबलभित्समीपगः दीपाग्निवासांसिददन्नरः सदासूर्यस्यलोकेवसतिप्रभामयः यज्ञैःसदानैःकृतपोभिरुज्ज्वलैःसब्रह्मचर्यैर्वरयोगसेवया शक्ताभवंतीहनथानपापिनः स्नानैर्यथातीर्थभवैश्चमाघजैः दुःखौघसंतापिमसत्ययातनांयामीं नतेयांत्यपिपापकारिणः येमाघमासेवरतीर्थमज्जनंकुर्वंतिचार्धोदितसूर्यमंडले ४ ५ ६ दशम्यामिति दशम्यांमारभ्यो·

यच्छ्रुत्वामनुजोवस्सनभूयोजायतेभुवि ४ पुष्यमासेसितेपक्षेदशम्यांमारभेद्व्रती माघमासदशम्यांतुव्रतंतत्समापयेत् ५ पूर्णिमायांसमारभ्यपूर्णिमायांसमापयेत् मकरेवासमारभ्यकुंभेचाथसमापयेत् ६ देवमासोदशम्यांतुसमासःशुभकर्मणि पूर्णिमादिर्याज्ञिकानांपितॄणांसंक्रमादितः ७ एतेष्वन्यतमंपक्षंसमारभ्यव्रतंचरेत् माघस्नानंकरिष्यामिमकरस्थेदिवाकरे ८ आसमाप्तिंमहादेवनिर्विघ्नंकुरुमाधव इति संकल्प्यपूर्वेद्युःकुर्यात्स्नानमनन्तरम् ९ अरुणोदयवेलायांसमुत्थायद्विजोत्तम कृत्वाबहिःस्थलेदूरेमलमूत्रविसर्जनम् १० नगोष्ठेनशुभेदेशेनवनेकेवलस्थले नवल्मीकेनापकूलेनच्छायायांनपद्धतौ ११ नदीतीरेनकर्तव्यंमलमूत्रविसर्जनम् योनद्यांवानदीतीरेमलमूत्रविसर्जनम् १२ कुर्याद्यदिविमूढात्मारौरवंकल्पमश्नुते तस्माद्दूरेतुकर्तव्यंमलमूत्रविसर्जनम् १३ ततःशौचंतुकर्तव्यंपात्रस्थेनैववारिणा नदीजलेनयःकुर्याच्छौचकर्मीद्विजाधमः १४ विष्ठाकूपेपतत्याशुस्वर्गस्थैःपितृभिःसह वापीकूपतडागादिजलैःशौचंकरोतियः १५ कल्पकोटिशतैर्वापिनरकान्नानिवर्तते तस्मात्कमंडलुजलंनत्यजेत्तुकदाचन १६

॥ : समासोदेवमासः देवतोद्देश्यकशुभकर्मणिग्राह्यइत्यर्थः याज्ञिकानांयज्ञकर्तॄणां ७ ८ ९ १० शुभेपुण्येकेवलस्थले तृणाद्याच्छादनरहितस्थलेऽनाच्छाद्यचतृणैर्भूमिमिति मलमूत्रविसर्जनविधौचाराहोक्तेः ११ १२ कल्पंकल्पकालपर्यंतं १४ १५ १६

वक्ष्यमाणसंख्ययादुर्गंधक्षयाभावेयावत्तावत्क्षयस्तावत्यामृत्तिकयाशौचंकार्यमित्याह यथागंधक्षयइति तिस्रइतित्रिवारंमृत्तिकादेयाइतिभावः एवमुत्तरत्रापिबोध्यं १७ मृत्तिकाविधिरिति पुरीषेउत्सृष्टे एवंमृत्तिकाविधिरित्यर्थः १८ व्रतिनांब्रह्मचारिणां १९ पूर्वस्मादितिगृहस्थशौचविध्यपेक्षयावनवासिनांत्रिगुणंयतीनांचतुर्गुणंशौचंप्रोक्तमित्यन्वयः २० २१ अन्यत्रेति वल्मी

मृदाशौचंतुकर्तव्यंयथागंधक्षयोभवेत् लिंगेतिस्रोगुदेपंचप्रत्येकंकरयोर्दश १७ उभयोःपादयोस्तिस्रः
पुरीषेमृत्तिकाविधिः लिंगेचैकाकरेतिस्रतिस्रस्तपदयोर्द्वयोः १८ मूत्रोत्सर्गविधिस्त्वेषगृहस्थानांविधिः
स्मृतः एतस्माद्द्विगुणंप्रोक्तंव्रतिनांवनवासिनाम् १९ पूर्वस्मात्त्रिगुणंप्रोक्तंयतीनांचचतुर्गुणम् गंधक्षय
करंशौचंस्त्रीशूद्राणांप्रकीर्तितम् २० वल्मीकेमूषकोत्खातेसेतौमार्गेथवागृहे अन्यशौचावशिष्टांचवर्जये
न्मृत्तिकांबुधः २१ नान्यत्रमृदमादायकुर्याच्छौचंह्रदादिषु आप्रकोष्ठकराद्वारिमृत्तिकांवासमाहरेत् २२
पादौप्रक्षाल्यविप्रेंद्रदंतधावनमाचरेत् प्रतिपत्पर्वषष्ठीषुनवम्येकादशीदिने २३ दंतानांकाष्ठसंयोगाद्दह
त्यासप्तमंकुलम् अनिषिद्धदिनेयस्तुनकुर्याद्दंतधावनम् २४ भुक्त्वानुयातनांघोरांदरिद्रोजायतेभुवि तृ
णपर्णैःसदाकुर्यादमामेकादशींविना २५ गंडूषमथवाकुर्याद्दशवारंद्विजोत्तम संकल्प्यविधिवत्स्नाया
त्सवासाजलमाविशेत् २६ स्नानेश्राद्धेनमस्कारेमहायज्ञेतथैवच चतुर्ष्वेकंपरीधानंद्वितीयंकटिबंधनं
२७ समस्तजगदाधारशंखचक्रगदाधर देवदेहिममानुज्ञांयुष्मत्तीर्थनिषेवणे २८

काद्यन्यत्रविद्यमानांमृदंगृह्णीयात् ह्रदादिषुशौचंनकुर्यादित्यर्थः आप्रकोष्ठेति वाचार्थे प्रकोष्ठकरात्कूर्परपर्यंतंहस्तमभिव्याप्योदकंमृत्तिकांच । त्यर्थः २२ २३ २४ २५ सवासाःवासोभ्यांपरिधानीयकटिबद्धवस्त्राभ्यांसहितः २६ कुतइतितत्राह स्नानइति कटिबंधनंकटिर्बध्यते अनेनेतिकटिबंधनंवस्त्रं २७ २८

२९ ३० ३१ ३२ नामानिभागीरथ्याइत्यर्थः ३३ ३४ ताःगंगायमुनाद्याः ३५ ३६ गृहाणेतिमासदेवतामा·

यन्नखाग्रसमुद्भूतागंगात्रिपथगामिनी यत्पादेतीर्थजातानिमाधवंतन्नमाम्यहम् २९ योसौतीर्थपदोविष्णु
स्त्रिरूपीपरमेश्वरः सएवद्रवरूपेणवसत्येवजलाशये ३० गंगाद्याःसरितःसर्वायस्मिन्कस्मिन्जलाशये
संस्मरेत्स्नानकालेतुसद्यःसन्निहितास्तदा ३१ नंदिनीनलिनीसीतामालतीच्चमलापहा विष्णुपादाब्जसंभू
तागंगात्रिपथगामिनी ३२ भागीरथीभोगवतीजान्हवीत्रिदशेश्वरी द्वादशैतानिनामानियत्रयत्रजलाशये ३३
स्नानकालेपठेन्नित्यंतत्रसन्निहितातुसा याःप्रवतइतिमंत्रेणइमंमेइतिमंत्रतः ३४ नदीस्ताःप्रार्थयित्वैवंदेवा·
यार्घ्यंनिवेदयेत् नमस्तेपद्मनाभायनमस्तेजलशायिने ३५ नमस्तेस्तुहृषीकेशगृहाणार्घ्यंनमोस्तुते माघे
मासिमहादेवव्रतस्थोहंजगत्पते ३६ गृहाणार्घ्यंमयादत्तंमाधवाद्यप्रसीदमे विष्णुपादाब्जसंभूतेगंगेत्रिपथ
गामिनि ३७ गृहाणार्घ्यंमयादत्तंजलेसन्निहिताभव वृद्धगंगेमहापुण्येगौतमस्याघनाशिनि ३८ गोदावरि
नमस्तुभ्यंगृहाणार्घ्यंनमोस्तुते कलिंदशैलतनयेपृथक्सागरगामिनि ३९ गृहाणार्घ्यंमयादत्तंयमुनेफल
दाभव अन्यानदीःसमुद्दिश्यदद्यादर्घ्यंयथाविधि ४० पृथक्सागरगामिन्यांनद्यांस्नानपरोनरः विनागो·
दांविनागंगांनदीमन्यांनकीर्तयेत् ४१ पितॄन्गुरून्समुद्दिश्यप्रत्येकंस्नानमाचरेत् ततोघमर्षणंस्नानंकुर्या
न्मंत्रादतंद्रितः ४२ शालग्रामशिलावारिशिरसाधारयेत्ततः जलात्ततोविनिस्तीर्यतर्पयेद्देवताऋषीन् ४३

धवोद्देशेनद्वितीयमर्घ्यमिदम् ३७ ३८ ३९ ४० ४१ मंत्रादितिलुल्यब्लोपेपंचमीयं कृतंचेतिमंत्रमुच्चार्येत्यर्थः ४२
४३

दक्षिणेतुतुरेयार्थेदक्षिणेएवस्कंधेन्यसेत् स्थापयेत् ततः दक्षिणस्कंधात् पिबंतितदुदकपानेनसंतुष्यंतीत्यर्थः ४४ शिखोदकपाने
नसंतोषेकिंकारणमित्यतआह पुरेति गरुडभीतः पुरायदागरुडः स्वधाग्रहणेच्छया इंद्रलोकंप्रतिप्राप्तस्तदायंप्रबलः सर्वास्वधाग्र-
हीत्वागमिष्यतिचेत्त्वस्यस्वधाभावःस्यादितिहेतुनागरुडाद्भीतः चेंद्रःपक्षींद्रोगरुडः ४५ शिखाक्षिप्ताशिखास्वाक्षिप्ता ४६ मत्कृपा
लयाः ममदयास्पदभूताः उपस्थितब्राह्मणानांनिंदनेअनुपस्थितपितॄणांस्वधादानेचकिंनिमित्तमित्यतआह द्विजानिति आक्षिप्यनिं
दित्वा ४७ हेद्विजोत्तमाः शक्रः वः युष्माकंशिखास्वस्वधांन्यक्षिपत् किमितिद्विजान्पप्रच्छेत्येकोन्वयः तेद्विजोत्तमाः लोभात्इंद्रप्रीति-

पितॄंस्ततः शिखास्कंधेदक्षिणेतुन्यसेत्ततः शिखोदकंभूपतितंपिबंतिपितरोखिलाः ४४ पुरागरुडभीत-
स्तुस्वधाशक्रःशिखास्वसः चिक्षेपांतर्विलीनांतांज्ञात्वावींद्रःशशापह ४५ ब्राह्मणानांशिखाक्षिप्तास्व-
धाशक्यनोभवेत् ब्राह्मणानांशिखोत्सृष्टजलद्वारेणतांस्वधां ४६ भूमौपतितामश्नंतुपितरोमत्कृपाल
याः द्विजानाक्षिप्यपक्षींद्रोनजग्राहशिखास्वधाम् ४७ द्विजान्पप्रच्छगरुडः किंशक्रोन्यक्षिपत्स्वधाम्
वःशिखास्विति तेप्रोचुर्नेतिलोभाद्द्विजोत्तमाः ४८ तस्मिन्नपरपक्षेतुपितरोद्विजसद्मगाः यूयंतस्माद्द्विजानीथस
त्यंब्रूतेतिसोब्रवीत् ४९ अस्तीतिपितरःप्रोचुस्ततस्तुष्टोवरंददौ शिखासंस्थास्वधाभूमौपित्राहारोभवत्विति
५० मार्जयंतिशिरोयेतुनधिस्पृष्टंशिखोदकम्

लोभादमृतलोभाद्वा अस्माकंशिखास्वस्वधांनन्यक्षिपदिति
प्रोचुरित्यन्वयोद्वितीयः ४८ तस्मिन्निति हेपितरःयतोयूयंद्विजसद्मगाःस्थतस्माद्यूयंशिखासंस्थांस्वधांविजानीथातः सत्यंब्रूतेति
तस्मिन्यस्मिन्नपरपक्षेद्विजान्पप्रच्छतस्मिन्नपरपक्षेएवपितरोद्विजसद्मगाआसन्निति योजना ४९ ५० स्नानकर्तृभिः
५ पातनेअकृतेसतिवरप्रदानंविफलंस्यादित्याशंकायामाह मार्जयंतीति नधिस्पृष्टं पृषोदरादित्वात्अलोपाभावः

नविसृष्टंअपातितंशिखोदकंयस्यतदितिनञ्समासपूर्वपदकबहुव्रीहिः पतंत्वितीति पतंत्वितिनिर्बंधेनशिखास्थसुधाहाररूपंवरंददाविति
पूर्वेणान्वयः नरकभयेनशिखोदकपातनमवश्यंकरिष्यंतीतिनवरप्रदानंविफलमितिभावः ५१ निष्कृतिर्निवृत्तिःयापीयूषसंसर्गाज्जाताअमृ
तसानस्यात्क्वापिएकमर्त्यंचनभवेदितिशापेतिद्वयोरन्वयः ५२ ५३ पितरः तएवभूमिलोकेशिखास्थामृतपानकर्तारः एव
मृतपानकर्तृत्वेनदेवधर्मत्वाद्भूमिदेवाःप्रकीर्तिताइत्यर्थः ५४ निक्षिप्यसंस्थाप्यवारिणेतिनकदाचित् गौणाकर्णस्पर्शादिनेत्यर्थः ५५

असृक्कूपानेमहाघोरेनरकेतेपतंत्विति ५१ इतिदत्वावरंतेभ्योगरुडोरक्तलोचनः विप्रान्शशापरोषेण
जरामृत्योस्तुनिष्कृतिः ५२ जातापीयूषसंसर्गान्नस्याद्वोऽमृतभाषिणाम् नैकमर्त्यंभवेत्क्वापिततःसोंतरधी
यत ५३ तस्माद्द्यात्पितृभ्यस्तुशिखोदंतुष्टिकारणम् तएवपितरोलोकेभूमिदेवाःप्रकीर्तिताः ५४ पश्चा
द्वस्त्रंपरीधायपीडयित्वार्द्रवस्त्रकम् वामप्रकोष्ठेनिक्षिप्यसम्यगाचम्यवारिणा ५५ भूमौनिक्षिप्यपश्चात्तु
मंत्रराजेनप्रोक्षयेत् धृत्वाद्वादशपुंड्राणिसंध्याकर्मसमाचरेत् ५६ प्रातर्होमंतथाकृत्वादेवर्षिपितृतर्पणं
माघमासप्रियंदेवंशंखचक्रगदाधरम् ५७ प्रसन्नंसस्मितंशांतंमाधवंपूजयेत्ततः गंधैःपुष्पैश्चनैवेद्यैर्धूप
दीपैर्मनोहरैः ५८ अपुष्पंपूजयेद्यस्तुमाधवंमाघवल्लभम् कुलनाशोभवेत्तस्यपुण्यंतस्यविनश्यति ५९

मंत्रराजेनगायत्रीमंत्रेण पुंड्राणीति आवश्यकधार्याणामन्येषामप्युपलक्षणमिदं ५६ पूजनप्रकारमाह माघमासप्रियमिति
५७ माधवंप्रसन्नादिविशेषणयुक्तंध्यात्वागंधादिभिःपूजयेदित्यर्थः पुष्पैश्चेतिचकारेणानुक्तोपचाराणांपाद्यादीनांग्रहणंज्ञे-
यं ५८ अपुष्पमितिक्रमप्राप्तप्राथमिकगंधोपचारविचारंपरित्यज्यपुष्पसमर्पणविचारः गंधापेक्षयापुष्पोपचारस्यातिप्रिय-
त्वद्योतनार्थंपूर्वंकृतइतिभावः इदमेवमनसिनिधायाग्रेयस्मात्पुष्पंहरेःप्रियमितिवक्ष्यति ५९ ६० ६१

६० मौल्यादितिस्त्रीसाक्षात्पूजानधिकृतत्वात् मौल्येनशूद्राद्यैः पुष्पाद्यंपुष्पतुलस्याद्यानीयब्राह्मणैः पूजांकारयेत् ६१ तुलस्यु
पचारस्यपुष्पोपचारसहचरितत्वेनपुष्पांतःपातित्वं अतएवपूर्वोत्तरपुष्पोपचारविचारमध्येऽस्यविचारः कृतः अतस्तत्समर्पणफलमाह मा
धवमिति ६२ तुलसीप्रसंगात्तत्काष्ठगंधसमर्पणफलमाह योदद्यादिति ६३ ६४ ६५ श्रीखंडंदमनचूर्णं गंधमित्येकवचन-

पुष्पेणैकेनमाघेतुमाधवंपूजयेद्यदि कुलकोटिसमायुक्तोविष्णुलोकेमहीयते ६० मौल्यादानीयपुष्पाद्यं
स्त्रीशूद्राद्यैर्द्विजोत्तम ब्राह्मणैःकारयेत्पूजांयस्मात्पुष्पंहरेःप्रियं ६१ माधवंतुलसीपत्रैर्मकरस्थेदिवाक
रे सकृदभ्यर्च्यदेवेशंनपुनर्जायतेभुवि ६२ यःपूजांतुलसीहीनांविष्णोःकुर्याद्द्विजोत्तम कुलान्निपातये
त्समनरकेरुधिरोदके ६३ योदद्यात्तुलसीपत्रंपादयोश्चक्रपाणिनः कुलकोटिसमायुक्तोविष्णुलोकेमही-
यते ६४ योदद्यात्तुलसीगंधमपिसर्षपमात्रकं कोटिजन्मार्जितंपापंतत्क्षणादेवनश्यति ६५ श्रीखंडंचंद
नोन्मिश्रंकृष्णागरुसमन्वितम् तुलसीचंदनोन्मिश्रंयोगंधंविष्णवेर्पयेत् ६६ कल्पकोटिसहस्राणिकल्प
कोटिशतानिच वैकुंठेमोदतेनित्यंदशपूर्वैर्दशापरैः ६७ यस्तुलस्याःपत्रशतंविष्णवेपरमात्मने समर्पय
तितत्पुण्यंवक्तुंशक्तोनविद्यते ६८ पितॄन्गुरून्समुद्दिश्यतुलसीविष्णवेर्पिता ब्रह्महत्याकोटिशतंअग-
म्यानासहस्रकम् ६९ अभितःकोटिपापानिदहत्यग्निरिवेंधनम् यःपूजयतिदेवेशंकमलैःकमलेक्षणम् ७०
तस्यपुण्यफलंवक्तुंकःशक्तोदिविवाभुवि कमलैःपूजितेविष्णौकमलावसतेगृहे ७१

मार्षद्रव्यवाचकगंधशब्दस्यनित्य
बहुत्वात् ६६ ६७ शक्तःकोपिनविद्यते ६८ ममपितरोगुरवश्चतुलसीसंमर्पणाजन्यफलभोक्तारोभवंतुइतिपितॄन्गुरून्समुद्दि २०
श्यअर्पितातुलसीब्रह्महत्याकोटिशतंदहतीतियोजना ६९ अभितः समीपेकाले ७० ७१ ७२ ७३

७२ ७३ ७४ तुलसीपत्रैः पूजाकरणेस्त्रियाः फलमाह विधवात्वंनेति ७५ ७६ ७७ ७८ ७९ धूपसमर्पण
कालेघंटानादस्यावश्यविहितत्वेनप्रसंगात्तत्फलमाह घंटानादमिति ८० ८१ मूकइतिमूकःसन्बाधिरोभवेदित्यर्थः ८२

फलंतिकामाःसर्वेपिदारिद्र्यंनैवजायते द्वात्रिंशदपराधान्क्षमतेपुरुषोत्तमः ७२ अर्चितस्तुलसीपत्रै
र्माधवोभक्तवत्सलः अपराधसहस्रंवासहतेनात्रसंशयः ७३ यःपूजांतुलसीपत्रैःकुर्याद्विष्णोर्महात्मनः
जन्मकोटिसहस्रेषुनदरिद्रोभवेन्नरः ७४ विधवात्वंनचाप्नोतिनारीजन्मशतेष्वपि नारीवापुरुषोवापिमाघे
पुष्पंस्रग्गंधिमत् ७५ दत्वार्चेकंमहाविष्णोर्ब्रह्मभूयायकल्पते आगंधपूजयेद्यस्तुमाघेमाधवमव्ययम् नार
कीयातनांभुक्त्वाविड्वराहोभवेद्ध्रुवम् ७६ योदद्याद्गुग्गुलंधूपंमाधवायमहात्मने सभित्वामंडलंसौरंविष्णोः
सायुज्यमाप्नुयात् ७७ धूपहीनांसपर्यांतुयःकुर्यात्परमात्मनः विष्ठाक्रिमित्वमाप्नोतिजन्मकोटिशतेष्वपि
७८ दशांगगुग्गुलंधूपं समर्पयतिविष्णवे नतस्यसंततेर्हानिर्निष्पापीजायतेकुले ७९ स्वयंमोक्षमवाप्नोति
नात्रकार्याविचारणा घंटानादंतुयःकुर्यात्पूजाकालेमहात्मनः ८० स्तूयमानोमुनिगणैर्विष्णुलोकेमहीयते
घंटानादविहीनंतुयःकुर्याद्देवतार्चनम् ८१ भुक्त्वाहिनरकान्घोरान्समूकोबधिरोभवेत् दीपदानंतुयःकु
र्याद्देवायपरमात्मने ८२ अज्ञानाधतमोभित्त्वासाक्षात्पश्यतितंहरिम् श्रूयतेपितृगाथापिदीपदानेमुनीश्वर
८३ यःकोवास्मत्कुलेजातोमाघेमासिहरेःपुरः दद्याद्दीपंक्षणंवापिसनःसंतारयिष्यति ८४

८३ क्षणंचेति बहुषुसंतारकधर्मेषुमध्येक्षणपर्यंतंदीपदानमप्यस्तीत्यभिप्रायेणपक्षबोधकोवाशब्दः संतारयिष्यती
तिपितृगाथापिश्रूयतेइतिपूर्वेणान्वयः ८४ श्रीगोपालकृष्णायनमः छ छ छ

योनरः पुनः दीपार्थंतैलादिदानानंतरमित्यर्थः तस्यतैलादिदातुः कर्मणांपापकर्मणांलेशमात्रमपिनविद्यतेनतिष्ठतिसर्वंनश्यतीत्यर्थः मासत्त॰४
८५ ८६ ८७ ८८ पूजाप्रसंगात्तदंगंनिषिद्धवर्जनंप्रत्यवायमुखेनाह लोकेति नरकभयात्पूजाकालेलोकवार्ताप्रसंगंनकुर्यादित्यर्थः माघमा॰११
अ॰२

दीपायवर्तितैलंवापात्रंवायोददातिच नारीवानपुनः कर्मलेशमात्रंचविद्यते ८५ तैलपात्रंतथावर्तिंनददातिस्वशक्तितः सजात्यंधोभवेन्नूनंभुक्त्वासर्वाश्चयातनाः ८६ अलाभेसर्वथाकुर्यात्परदीपप्रबोधनम् विदधातिहरेः पूजांविनानैवेद्यमल्पधीः ८७ कुंभीपाकेमहाघोरेपच्यतेनरकाग्निना अन्नंबहुगुणंभक्ष्यंफलंनानाविधंतथा ८८ निवेदयतिविप्रेंद्रब्रह्मभूयायकल्पते लोकवार्ताप्रसंगेनयःकुर्याद्देवतार्चनम् ८९ तप्तायसेमहाघोरे यमःपातयतिस्वयम् स्तोत्रपाठमृतेकुर्यान्निर्माल्यस्यविसर्जनम् ९० सचोन्मादीभवत्याशुनात्रकार्याविचारणा नीराजयतियोविष्णुंमाधवंकमलाप्रियम् ९१ कोटिगुर्वंगनासेवाब्रह्महत्यायुतानिच पापान्यन्यानिचोग्राणितस्यदग्धान्यसंशयम् ९२ मुखंनीराजनेविष्णोःपश्यंतिपुरुषाःस्त्रियः तेधन्याःकृतिनोलोकेतेषांपुण्यमनंतकम् ९३ कर्पूरस्यार्तिकंभक्त्याविष्णोर्यस्तुनिवेदयेत् ब्रह्मलोकंसमासाद्यभुक्त्वाभोगान्मनोरमान् ९४ जन्मकोटौसार्वभौमःसर्वसंपत्समावृतः भूत्वापश्चाद्द्विजकुलेजन्मासाद्यमहायशाः ९५ ज्ञानविद्यास्तुनिष्णातोविष्णोःसायुज्यमाप्नुयात् पूजांतेमाधवस्याग्रेसाष्टांगंप्रणमेद्यदि ९६ अश्वमेधसहस्रेषुसम्यक्चीर्णेषुयत्फलम् तत्फलंसमवाप्नोतिनात्रकार्याविचारणा ९७ अपिधर्मसहस्राणितथाक्रतुशतानिच विष्णोर्दंडप्रणामस्यकलांनार्हंतिषोडशीम् ९८

८९ प्रसंगात्स्तोत्रपाठंविनापूजांगनिर्माल्यविसर्जननिषेधमाह स्तोत्रेति विष्णुसहस्र २१
नामादिविहितस्तोत्रपाठेनैवनिर्माल्यविसर्जनंकुर्यादित्यर्थः ९० ९१ ९२ ९३ ९४ ९५ ९६ ९७ ९८

९९ १०० १०१ मार्जनंसमार्जन्यादिनानिर्मलताकरणम् १०२ १०३ १०४ माधवस्यगृहमित्यनुवर्तते उपलिप्येति अत्रल्यबा देशाभावश्छांदसःचेतिमार्जनादिसमुच्चायकोयम् १०५ यानारीति रंगवस्त्राद्यलंकरणस्यप्रायेणस्त्रीधर्मत्वान्नारीत्युक्तिः ६ किंतत्पुण्यफ

माघेमासिमहाविष्णोःकुर्याद्यदिप्रदक्षिणाम् पदेपदेश्वमेधस्यफलमाप्नोत्यसंशयम् ९९ यानिकानिचपापा-
निजन्मांतरकृतानिच तानिसर्वाणिनश्यंतिप्रदक्षिणपदेपदे १०० तावत्पापभयंनृणांजन्ममृत्युजराभयम् याव
त्प्रदक्षिणंकर्तुंमनोयस्यनविद्यते १ नारीवापुरुषोवापिमार्जनंकेशवालये कृत्वागोचर्ममात्रंवाविष्णोर्लोकेमही
यते २ बहिश्चाभ्यंतरेविष्णोःपरिमार्जयतेगृहे सकोटिकुलमुद्धृत्यविष्णुलोकेमहीयते ३ यःप्रोक्षयतिदेवस्य
गृहंगोमयवारिणा तस्यपापानिशांतानिमुक्तिस्तस्यकरेस्थिता ४ माघमासिमहाविष्णोर्माधवस्यमहात्मनः
गोमयेनोपलिप्याच्चगोसहस्रफलंलभेत् १०५ यानारीरंगवस्त्राभिःपंचरंगैर्हरेर्गृहम् अलंकरोतिसद्भक्त्यात-
स्याःपुण्यफलंशृणु ६ आजन्मशतपर्यंतंवैधव्यंनचाप्नुयात् नापुत्राजायतेक्कापिनाधर्मेजायतेमतिः ७
मातापित्रोःकुलंभर्तुःसमुद्धृत्यसुभामिनी सर्वभोगसमायुक्ताविष्णुलोकेमहीयते ८ अलंकरोतिपूजायाःस्थ
लंदेवस्यचक्रिणः मृदाधातुविकारैश्चशंखैःपद्मैश्चस्वस्तिकैः ९ तस्याःपुण्यफलंवक्तुंनशक्तोदिविचाभुवि एवं
संपूज्यदेवेशंकथांश्रुत्वाहरेरिमाम् ११० एवंस्नात्वामासमेकंसमभ्यर्च्यचमाधवम् इमाःकथास्तथाश्रुत्वान-
गर्भेवसतिध्रुवम् ११ स्नानसंध्यादिकर्माणिपरित्यज्यहरेःकथां शृणोतिभक्तिसंपन्नःकर्मपाशाद्विमुच्यते ११२

लमित्याह आजन्मेति शतजन्मनांपर्यंतोऽ तस्तंमर्यादीकृत्य क्कापिकस्मिन्नपिजन्मनिमतिस्तस्याइतिशेषः ७ ८ ९ श्रुत्वेति इमांमाघ माहात्म्यप्रतिपादिकांकथांश्रुत्वापुनर्गर्भेनवसतीत्युत्तरश्लोकेनान्वयः ११० इमाःकथाः भागवतादिगतचरित्राणिस्वासन्नत्वेनापरो क्षनिर्देशः ११ १२

खड्गमिति नपुंसके प्रथमैकवचनं ११३ ननुकर्मपरित्यागेकर्मलोपजनितपापेननरकाद्यनर्थप्राप्तिःस्यादित्याशंकायामाह कथानिमित्तमितिकथानिमित्तेन निमित्तशब्दप्रयोगेसर्वासांप्रायदर्शनमित्यनुशासनेनतृतीयार्थेद्वितीया अनिंद्यकर्मानिंद्यविरुद्धमनिंद्यंस्तुत्यंकर्मयस्यसभगवान्तदीयेजनेसकर्मलोपोनभवेन्नभूयात् एवंविचार्यकृपयाआत्मभवोद्भवानांचतुर्मुखोद्भवानांमुनीनांतिस्रःकोटीःसमादिदेशेत्युत्तरेणान्वयः ११४ किमित्याह यूयमिति हेमुनयोयूयंभगवत्कथाश्रोतुर्जनस्यननुस्वकीयसर्वकर्मकरणेप्यस्माकंसामर्थ्यंनास्तिकथमन्येषांकर्मकरणेसमर्थाभवेमेत्यतआह कल्पाइति मदीयपरमानुग्रहेणसर्वकर्मकरणसमर्थाभवथैवेत्यर्थः ११५

खड्गंयथाशाणनिशातमुग्रंघोरंप्रमुक्तंखलुहंतिशत्रून् एवंकथाशाणनिशातितंमनोहिनास्तिकामाद्यारिषड्वर्गान् ११३ कथानिमित्तंयदिकर्मलोपोभवेज्जनेभागवतेनृलोके सकर्मलोपोनभवेन्मदीयेजनेविचार्यैवमनिंद्यकर्मा ११४ कोटीस्तुतिस्रःकृपयामुनीनांसमादिदेशात्मभवोद्भवानां यूयंमदीयस्यजनस्यकर्मकृत्यानिशंपूरयताशुकल्पाः ११५ इत्यादिष्टाभगवताऋषयःशासितव्रताः सदाविष्णुकथासक्तचेतसोभावितात्मनाम् १६ कर्मलोपंपूरयंतिकृत्वाकृत्वाप्यहर्निशम् स्नात्वाविष्णुकथांश्रुत्वातथासंपूज्यमाधवम् १७ सवपापविनिर्मुक्तोविष्णोःसायुज्यमाप्नुयात् आदावंतेतथामध्येयथाशक्तियथारुचि १८ माधवप्रीतिमांदद्याद्व्रतस्यास्यसमाप्तये पंचाशद्वाशतंवापिब्राह्मणान्भोजयेत्ततः १९

आदिष्टाआज्ञप्ताः ११६ कर्मलोपंज्ञात्वेतिशेषः कृत्वाकृत्वेतिकर्मेतिशेषःपुनःपुनःकृत्वापीत्यर्थः नसर्वेषांतंत्रेणवैश्वदेववत्सकृत्कुर्वंतिकिंतुतत्तज्जनानांपृथक्पृथक्कुर्वंतीतिभावः एवंचकर्मलोपाभावेननरकाद्यनर्थप्राप्तिर्नास्तीतिज्ञात्वाऽत्यंतफलप्रदंभगवत्कथाश्रवणमवश्यंकर्तव्यमित्यवधेयं ११७ यथारुचियथेच्छंसुवर्णादीनांमध्येयस्यद्रव्यस्यप्रतिमास्वस्येष्टास्तितेनद्रव्येणकर्तव्येत्यर्थः ११८ शतंचेति शतंपंचाशद्वाब्राह्मणानपिभोजयेदित्यर्थः ११९

२१ २२ २३ २४ वक्तुमिति इदंभवति इयद्वाभवतीतिवक्तुंनशक्नुवंतीत्यर्थः सांगस्नानकर्तुर्यद्यदिष्टंतत्तत्सर्वंयोग्यतानुरूपं भवतीतिभावः १२५ १२६ अतीवेति तस्यनरस्येतिशेषः नश्यंतीति बंधेभ्योमुक्तोभवतीतियावत् अतएवदृष्टांतप्रदर्शनंयुक्तंभवति इदंनकेवलंमयाउच्चारितमेवापितुलोकानुभूतंदृष्टंचेत्यर्थप्रदर्शनार्थंश्रोतॄणांपुनः भगवत्कथाप्रश्नविषयेअनायासेनांतःकरणस्यप्रवृत्त्यर्थंचाह यथेति १२७ इतिश्रीवा॰माघमा॰टी॰स्नानविध्यादिकथनोनामद्वितीयोऽध्यायः २ ६९ अस्मिन्नध्यायेकुधर्मराजन्यायाः पापकर्मबंधमोचनस्येतिहासंनारदायब्रह्माकथयति तत्रादौनारदः इतिहासश्रवणोत्कंठयेनपृच्छति कथमिति सेति याकर्मबंधान्मुक्तेतित्वयाकथितासेत्यर्थः सकर्मबंधइति यस्मात्कर्मबंधान्मुक्तासइत्यर्थः कोवेतिकश्चेत्यर्थः १ श्रोतुमिति कर्मबंधान्मुक्तिंकर्म-

एवंमाघेकृतस्नानोनभूयोजायतेभुवि स्नानपूजादिकंसर्वंसमाप्यमुनिपुंगव १२० एतच्छास्त्रप्रवक्तारंयथा
विभवमर्चयेत् अपूजयित्वावक्तारंयःशृणोतिकथामिमाम् २१ इक्षुयंत्रेचिरंस्थित्वाव्यालोहिभुविजायते न
शृणोतिकथांयस्तुवाच्यमानामिमांद्विज २२ अरण्येनिर्जलेदेशेभवतिब्रह्मराक्षसः धर्मशास्त्रप्रवक्तारंशां
तंदांतंजितासनम् २३ मिष्टान्नैर्भोजयेद्यस्तुसर्वपापैःप्रमुच्यते अनेनविधिनायस्तुमाघस्नानंकरोतियः २४
तस्यपुण्यफलंवक्तुंविष्णुर्ब्रह्माशिवोयमः नेंद्रोनसूर्योवरुणोमन्वाद्याःकिमुतापरे १२५ माघस्नानंसमुद्दिश्य
बहिर्गच्छेद्यदानरः पदेपदेश्वमेधस्यफलमाप्नोत्यसंशयः २६ अतीवप्रतिबंधाश्चनश्यंतिस्नानमात्रतः यथा
कुधर्मस्यसुताकर्मबंधान्मुमोचह १२७ इतिश्रीवायुपु॰माघमा॰ब्रह्मनारदसं॰द्वितीयोऽध्यायः २ ६९
नारदउवाच कथंकुधर्मस्यसुताकर्मबंधान्मुमोचसा सकर्मबंधःकोवासीत्केनासौनाशमागतः १ श्रो
तुंकौतूहलंब्रह्मंस्तस्माद्विस्तरतोवद ब्रह्मोवाच पुरागयस्यदौहित्रःकुधर्मानामबाहुजः २

बंधविशेषंतन्नाशकारणंचश्रोतुंयस्मान्ममकौतूहलंआश्चर्यंभवतितस्मादित्यर्थः २ नगरेइति स्थित्वेतिशेषः वैदर्भइति विदर्भाणां राजेत्यर्थः ३ ४ रंतुमनाः अतिकाममितिपदच्छेदः संधिरत्रार्षः यद्वारंतुंअनितियतनेइतिरंतुमनापचादित्वादचिटाप् ५ रोदनंश्रुत्वा मृतंज्ञात्वा ६ आक्रंदंरोदनं ७ ८ द्रविणंप्रतिद्रव्यंप्रतियाचितुं ९ शोकलालसंशोकव्याप्तं १० कालमृत्युरिति अप-

कुंडिनेनगरेरम्येविदर्भान्पर्यपालयत् तस्यकालेनदुहितानाम्नारोचिष्मतीसती विदर्भोनामतनयोवैदर्भोप्यभवत्ततः ३ सधर्मस्तनयांप्रादाद्वात्तोमाहिष्मतीपतेः षष्ठेहनिविवाहस्यमृतोमाहिष्मतीपतिः ४ भर्तारमाभाषयितुंप्रवृत्तारोचिष्मतीरंतुमनातिकामम् शय्यागृहेसतमभाषमाणंज्ञात्वामृतंसाथरुरोदचोच्चैः ५ श्रुत्वासर्वोजनस्तस्याःप्रविष्टोंतःपुरंमृतं उपायैर्बहुभिर्ज्ञात्वारुरोदोच्चैरहर्निशम् ६ संश्राव्यतत्पिताक्रंदंतत्सखीभिर्निवेदितं सशोकानलसंतप्तोमूर्छामापमृतोपमाम् ७ मूर्छितंपतितंदृष्ट्वामातरश्चोपमातरः मूर्छामापुर्महादुःखाद्रुरुदुःपुरवर्तिनः ८ अकस्मादंगिरानामयज्ञार्थेद्रविणंप्रति अभ्याशान्नृपतेःप्रागाद्दृष्ट्वावस्थांतदागताम् ९ दयालुःसमुनिःप्राहनृपतिंशोकलालसम् ध्यात्वाचसचिरंकालंज्ञात्वातन्मृत्युकारणम् १० उज्जीवयामिनृपतेमृतंजामातरतव नकालमृत्युरस्यासीन्माशोकंकर्तुमर्हसि ११ इत्याश्वास्यनृपंप्राज्ञःप्रादात्तस्यमृतस्यच माघेमासिकृतस्नानफलंचत्रिदिनस्यच १२ दिनस्यैकस्यचफलंजामातुःपर्यकल्पयत् दिनद्वयफलंतस्याःपश्चाज्जप्त्वामहामनुम् १३

रिहार्यमृत्युरित्यर्थः ११ माघेइति त्रिदिनस्यत्रिदिनसंबंधिमाघेमासिकृतस्नानफलंस्नानोत्पन्नंफलंप्रादादितिपूर्वेणसंबंधः १२ त्रिदिनफलस्यव्यवस्थामाह दिनस्येति जामातुः मृत्युजनकपापनाशाय तस्याः राजपुत्र्याः वैधव्यप्रापकपापनाशायपर्यकल्पयत् मुंचामित्वेति महामनुं महामंत्रंच १३

नृपुपातितांविश्वेश्वरस्यकरुणांतत्कृतदयांययामाघमासीयधर्मः प्रकाशितः किंवर्णयामिमाघमासधर्मस्यफलंसाकल्येनवक्तुंममसा·
मर्थ्यंनास्तीतिभावः अंबुजनाभवश्यं अंबुजनाभः वश्योयेन ५७ ५८ ५९ ६० ६१ ६२ शांतोभगवन्निष्ठोस्कास्मितोकिंचिद्धास्य

किंवर्णयामिमनुजेश्वरमाघमासंविश्वेश्वरस्यकरुणांनृषुपातितांवा किंवर्णयामिमनुजान्स्वहितानभिज्ञान्किं
स्नानपुण्यफलमंबुजनाभवश्यम् ५७ नाक्लिश्यंतिनरालोकेमाघस्नानपरायणाः तस्माद्दुहित्राजामात्राक·
र्तव्यंस्नानमंजसा ५८ तेनपुण्यप्रभावेनदशवर्षसहस्रकम् भुक्त्वेहविपुलान्भोगान्पुत्रपौत्रसमावृतौ ५९
भविष्यतस्ततोमोक्षंदंपतीतौगमिष्यतः इतिसर्वंसमाख्यातंश्वोयज्ञोभवितामम ६० तदर्थंदक्षिणांदेहि
गच्छाम्याश्रममंडलम् इत्युक्तस्तोषयामासतंमुनिंशंसितव्रतम् ६१ ततोनुज्ञामवाप्याथस्कधर्मस्यापिनार
द जगामस्वाश्रमपदमंगिरानामवैऋषिः ६२ प्रहृष्टोस्कस्मितौशांतौजामातादुहितातथा भार्यामादायजा
माताजगामस्वपुरींप्रति ६३ चक्रतुर्माघमासेतुप्रतिवर्षंतुदंपती स्नानंपूजांमहाविष्णोस्तथामाधवसंज्ञि·
नः ६४ दशवर्षसहस्रंतुएतत्पुण्यप्रभावतः भुक्त्वानानाविधान्भोगानापतुर्मोक्षमव्ययम् ६५ इति·
श्रीवायुपुराणेमाघमाहात्म्येतृतीयोऽध्यायः ३ ६५ नारदउवाच तववागमृतंपीत्वातृप्तिर्नास्तिममा
त्मनः विनाजडमतिंलोकेश्रवणात्कोनुतृप्यति १ भूयोमाघस्यमाहात्म्यंतातविस्तरतोवद ब्रह्मोवाच शृ
णुनारदवक्ष्यामिमाघमाहात्म्यमुत्तमं २

युक्तौबभूवतुः जामातास्कधर्मस्येत्यर्थः ६३ ६४ ६५
इतिश्रीवायुपुराणीयमाघमाहात्म्यटीकायांतृतीयोऽध्यायः ३ ६५ अस्मिन्नध्यायेपुनःस्नानमाहात्म्यंश्रीमाधवस्यक्षीर·
राभिषेकादिनानाविधपुण्यकारकमाघधर्मांश्चब्रह्माकथयतितत्रादौनारदःपृच्छतितवेति १ २ ६५ ६५

४३ माभैषिमाव्यथेतिइमावार्षप्रयोगौ माव्यथदुःखितोमाभूः ४४ आगतंनिवेश्यप्राह ४५ ४६ ४७ ४८ कोकनदैःरक्तोत्पलैः
४९ पपातेति व्याधस्पर्शदोषनिवारणार्थंस्नानंकृतवानित्यर्थः ५० भक्षणार्थंबिसानिकमलमूलानि ५१ चेदिराडभवत् ५२

अध्वभ्रांतंद्विजंकंचित्क्षुत्तृषापरिपीडितम् तंदृष्ट्वास्यदयाजज्ञे लुब्धकस्यापिभाग्यतः ४३ इतएहीत्युवाचैनंमत्तोमाभैषिमाव्यथ भयादपससारासौभ्रांतोगच्छन्शनैःशनैः ४४ अंतिकंत्वागतंप्राहवटमूलेनिवेश्य त्वं कस्माच्चरसित्वंभद्रवनेदुष्टमृगाकुले ४५ इतिब्रुवाणंतंप्राहतृषयापीडितोऽस्म्यहम् नोपलब्धंयदिजलंप्राणागच्छंतिमेधुना ४६ नाम्नाभ्रमममाणेनदृष्टंक्वाप्यटवीपथे यद्यस्तिनयमांतत्रमयिचेदस्तितेकृपा ४७ इत्यूचिवांसंविप्रेंद्रंस्कंधेनोह्यासत्वरम् सरोवरंमनोरम्यंकमलोत्पलमंडितम् ४८ नीलोत्पलैःकोकनदैःकल्हारैःपरिशोभितम् वीचिविक्षेपशोभाढ्यंजलपक्षिभिरावृतम् ४९ प्रापयामासविप्रेंद्रंक्षुत्तृट्श्रांतंसरोजलम् सपपातजलेतस्मिन्भूरिवारिपपौचसः ५० बिसान्यादायविप्रायलुब्धकोदात्प्रसन्नधीः ततोगतश्रमोविप्र आशीर्भिरभिनंद्यतम् ५१ आमंत्र्यप्रययौधीमान्स्वदेशंद्विजसत्तमः तेनपुण्यप्रभावेनलुब्धकश्चेदिराडयम् ५२ परस्त्रीसंगदोषेणगतायुरभवन्नृप भर्तुर्हननजंपापंपरपूरुषसंगमम् ५३ इतितेदुहितुःपापद्वयंतस्योपशांतये दिनद्वयकृतंस्नानमाघेमासिमहीपते ५४ दत्तंपुण्यंततोभूपतस्मात्पापद्वयापहितम् अत्युग्रंदुःखमूलंयद्बालवैधव्यकारणम् ५५ परस्त्रीसंगजंपापंजामातुर्मृतिकारणम् अपमृत्युविनाशायस्नानमेकंकृतंदिने तेनपुण्यप्रभावेनपुनरुज्जीवितोनृप ५६

५३ पापद्वयमासीत् ५४ स्नानोत्पन्नंपुण्यंत्वद्दुहित्रेदत्तं
तस्मादितितेनेतिशेषः ५५ मृतिकारणंअपमृत्युकारणमासीत् तदपमृत्युविनाशाययत्माघमासदिनेकृतमेकस्नानमासीत्तदुत्पन्नं
पुण्यंतवजामात्रेदत्तम् ५६

ब्राह्मणंगत्वाऽभाष्य २९ ३० संभारान्फलादिपदार्थान् ३१ ३२ असौअत्रस्थितिकर्ता तैःपांथैः आययौआसमंतात्जगा
म ३३ ३४ परिसरआसमंतात्संयोजयअग्निसंयोगेनशीतपीडांनिवारयेत्यर्थः ३५ ३६ तात्कालिकमितितत्कालेक्षौमाति॰

इत्याज्ञप्तातुसादूतीगत्वाभाष्यागतापुनः अध्वश्रांतोद्विजःकश्चित्तीर्थयात्रापरायणः २९ तृष्णासुपीडित
स्तिष्ठन्कुड्यपार्श्वमुपाश्रितः इतिदूतीवचःश्रुत्वादयामापचदेवतः ३० तदर्थेस्वगृहंसम्यग्गोमयेनोपलि
प्यसा तत्रनिक्षिप्यसंभारान्ताम्रपात्राणिसासती ३१ दासीरूपंस्वयंधृत्वागत्वाविप्रमथाब्रवीत् ब्राह्मणा
नांगृहमिदंपांथानामुपकारकम् ३२ असौगृहपतिस्तीर्थयात्रार्थंतैःसहाययौ गच्छन्मामब्रवीद्विप्रायए॰
ष्यंत्यध्वगागृहम् ३३ तेषांत्वंदेहिवासार्थंस्थानंभोज्यफलादिकम् तस्मादागच्छभद्रत्वंगृहेविश्रामयस्व॰
यम् ३४ वर्ततेद्यापिमहतीवृष्टिरध्वगतोभवान् तस्मादग्निंपरिसरभुंक्ष्वभोज्यफलादिकम् ३५ इतितस्या
वचःश्रुत्वाविप्रःशीतेनपीडितः ओमित्यूचेततोगेहेतद्रात्रौन्यवसत्सुखम् ३६ परिधानायसाक्षौमंददौ॰
तात्कालिकंमुनेः रंभाफलानिलवणंद्विजवर्यायसाददौ ३७ गीतापाठेनस्तोत्राणांपठनात्सद्विजोनिशाम्
तांनीत्वागाद्दिशंचैंद्रींयत्रास्तेरंगराड्विभुः ३८ तेनकर्मविपाकेनतवपुत्रीत्वमागता पूर्वकर्मविपाकेनबाल्ये
वैधव्यमागता ३९ अयंतस्याउपपतिर्जामातातवभूपतिः सभुक्त्वायातनांघोरांभुविचांडालजन्मसु ४०
क्रमाद्दशसुचोत्पन्नोजन्मन्यन्येकादशेततः लुब्धकोभून्महाक्रूरोमृगहिंसापरायणः ४१ कांतारेविपिनेघोरेमृ
गयांव्यचरद्भुवि ततोमध्यान्हवेलायांदेशेऽसौजनवर्जिते ४२

रिक्तंब्राह्मणपरिधानार्हंगृहेऽक्षतम्वस्त्रंनासीदित्यतः क्षौमंदुकूलवस्त्रमेवददावित्यर्थः ३७ ३८ ३९ ४० ४१ मृगयांकुर्वन् ४२

१४ वैधव्यंप्राप्तम् १५ वैधव्यंप्रतिपरिहर्तासि १६ १७ १८ वयस्थातरुणी प्रोषिते प्रवासस्थेसति १९ २० २१ काले

मुंचामित्वेतिचऋषिस्तंभूपमुदजीवयत् तदासुधर्मःसंतुष्टःपप्रच्छांगिरसंमुनिम् १४ केनकर्मविपाकेनजामातामेमृतिंगतः वैधव्यंदुहितुश्चापिकेनकर्मफलेनतु १५ परिहर्तासिवैधव्यंदुहितुःकेनकर्मणा पुनरुज्जीवितःकेनजामातामेद्यतद्वद १६ महत्कौतूहलंश्रोतुमेतद्विस्तरतोवद ऋषिरुवाच गौडदेशेपुराकश्चिद्वैश्योभून्मेघनामकः १७ तस्येयंदुहिताचासीत्सुरूपानामसुरूपिणी समानकुलगोत्रायवैश्यायदात्कन्यकांस्वकाम् १८ अथकालेनकियतावयस्थासासुरूपिणी भर्तरिप्रोषितेकंचिद्युवानंचर्मकारकम् १९ वरयित्वाचोपपतिरममाणाचिरंस्थिता अथकालांतरेपत्यावागतेस्वैरचारिणी २० जारस्नेहाद्गृहंभर्त्रासुहितंसादहन्निशि जारेणसहितापापादेशेषुविचचारसा २१ ततोमृतिंगताकालेनरकेभुक्तयातना वेश्याभूत्कर्मशेषेणचतुर्दशसु जन्मसु २२ अर्जितंपुण्यमतुलंयथावेश्यास्वजन्मनि तीर्थयात्राप्रसंगेनसुमेधानामवैद्विजः २३ रंगक्षेत्रंजिगमिषुरिमंदेशंसमागतः स्थितेयमूर्मिलानामहैहयाधिपतेःपुरि २४ द्वारिस्थिताचसायाह्नेकामुकानभिकांक्षति तस्मिन्दिनेनैकमपिकामुकंप्रत्यपद्यत २५ तस्मिन्रात्रौ महावृष्टिरभूदेकार्णवंजगत् तदा वृष्टिपरिक्लांतःसुमेधानामवैद्विजः २६ द्वारस्थशालावलभेरधोदेशेस्थितोमुनिः त्रियामामनयद्विप्रोगीतापाठपरायणः २७ सासर्वांप्रेषयामासप्रायोयंब्राह्मणोभवेत् द्विजश्चेद्द्रुतमागच्छकामुकश्चेत्समाह्वय २८

आयुःसमाप्तिकाले २२ तयाभक्तयातनयया स्त्रिया· वेश्यास्वजन्मनिवेश्यारूपेस्वकीयजन्मनि २३ रंगक्षेत्रंश्रीरंगक्षेत्रं इमंदेशंगौडदेशंपुरिमाहिष्मतीनगर्यां २४ २५ तस्मिन्नगरेएकार्णवमिति तूपचारादतिवृष्टिद्योतकं नतुमुख्यार्थपरं २६ २७ २८

महदंहसः महांति अंहांसिदोषायस्मिन् ३ ४ ५ ६ ७ ८ तत्स्नानंश्वानमूत्रेणाकृतंविद्यादित्यर्थः

यच्छ्रुत्वाजायतेशुद्धिर्मनसोमहदंहसः नार्यःपतिभ्योबालभ्यःस्वैरिण्यःकामबुद्धयः ३ मातापित्रोर्विघा
तिन्योगरदालोकगर्हिताः पुरुषाःपापिनोघोराःसर्वकर्मबहिष्कृताः ४ माघस्नानाद्विमुक्ताःस्युर्नात्रकार्यावि
चारणा तत्पापंनास्तिलोकेस्मिन्स्नानान्नापहृतंकलौ ५ कृत्वापापसहस्राणिनपापैर्लिप्यतेजनः जलेय
थानिमग्नानिपद्मपत्राणिचांभसा ६ माघस्नानंसमुद्दिश्ययेगच्छंतिबहिर्जलम् पदेपदेश्वमेधस्यप्राप्नुवंति
फलंध्रुवम् ७ माघमासिमुनिश्रेष्ठयोजलस्पर्शमाचरेत् जलस्यस्पर्शमात्रेणमुच्यतेसर्वकिल्बिषैः ८ योगृ
हेमाघमासेतुस्नानकर्मसमाचरेत् श्वानमूत्रेणतद्विद्यान्नात्रकार्याविचारणा ९ सर्वाण्यपिचपापानित्रैलो
क्यांतर्गतानिच गृहस्थजलमाश्रित्यवसंत्याश्रयकांक्षया १० माघमासिकरवेतिष्ठन्यःस्नायादुष्णवारिणा
वन्हिराशौमहाघोरेपतत्याशुनसंशयः ११ योमाघेमाधवंदेवंपयसास्नापयेद्यदि सकोटिकुलमुद्धृत्यविष्णु
लोकेमहीयते १२ घृतेनस्नापयेद्यस्तुगव्येनासुरघातिनं वैकुंठेमोदतेनित्यंदशपूर्वैर्दशापरैः १३ पंचगव्ये
नदेवेशेस्नापितेकैटभद्विषि सजीवन्नेवमुक्तःस्यान्नस्यात्क्वापिपुनर्भवः १४ शालग्रामशिलापूजांमाघेमासि
करोतियः वांछतिकरसंस्पर्शंतस्यदेवाःसवासवाः १५ शालग्रामशिलायस्यगृहेतिष्ठतिनारद अपिपाप-
शतैर्युक्तंयमस्तंनेक्षितुंक्षमः १६ येमाघेस्नानरहिताःमाधवार्चाविवर्जिताः येषांधर्मेरतिर्नैवतेषांस्वामीयमःस्व
यम् १७ रोगाःपिशाचायक्षाद्यामाघस्नानविवर्जितं ग्रहाश्चपीडयंत्येनंयमःपश्चाच्चशिक्षति १८

९ १० ११ १२ १३ पुनर्भवस्तस्यपुनर्जन्मक्वापिकस्मिन्नपिकाले १४ १५ १६ १७ १८

माधवेअर्चितेइतिशेषः १९ २० २१ २२ २३ २४ २५ माकाशीति काशीनसेवितव्याएवमुत्तरत्राप्यूह्यं काशीपुष्करादीनिपुण्यस्थलानिमहापुण्यसंपादनार्थंनाश्रयितव्यानीतिभावः २६ कुतोनसेव्यानीत्यतआहतेइति यत्रयस्मिन्शालग्रामशिलातीर्थेसेवितेसति

नार्यायापुरुषैर्वापिकुंकमैर्गंधलेपनैः मासिमाघेमाधवेन्चपावितंसकलंकुलम् १९ शंखोदकेनदेवेशंस्नापयेन्माधवंयदि कल्पकोटिसहस्राणिमोदतेविष्णुमंदिरे २० शंखमध्येस्थितंतोयंभ्रामितंकेशवोपरि अंगलग्नंमनुष्याणांब्रह्महत्यांव्यपोहति २१ पीठस्थःपूजितःशंखोयत्रतिष्ठतिनारद प्रयागसदृशंक्षेत्रंतद्गृहंप्राहुकेशवः २२ यद्गृहेकेशवस्याग्रेपूजितोब्धिसमुद्भवः तेनेष्टाःसकलायज्ञास्तेनसर्वमनुष्ठितम् २३ यन्मूलेसर्ववेदाश्चयन्मध्येसर्वदेवताः यदग्रेसर्वतीर्थानितस्माच्छंखंप्रपूजयेत् २४ समाप्तेपातकेघोरेप्रायश्चित्तविवर्जिते मूर्ध्निशंखोदकंधार्यमितिप्राहुर्मनीषिणः २५ माकाशीमागयागंगामाकांचीमाचपुष्करम् माकेदारंद्वारकान्चमानवोमाचमानसम् २६ तेसर्वेसेवितायत्रशालग्रामशिलोदके गंगाद्याःसरितःसर्वाःसागराःसप्तनारद २७ शालग्रामशिलातीर्थकलांनार्हंतिषोडशीम् माघेमासिद्विजश्रेष्ठशालग्रामशिलोदकात् २८ शिरःप्रक्षालयेद्यस्तुतस्यपुण्यफलंशृणु जन्मकोटिसहस्रेषुजन्मकोटिशतेषुच २९ गंगादिसर्वतीर्थेषुस्नातोभवतिनारद आजन्मकृतपापानिजन्मांतरकृतानिच ३० शालग्रामोदकंमूर्ध्निभस्मसाद्यांतिबिभ्रतः भोजनानंतरंयस्तुशालग्रामशिलोदकं ३१

तेसर्वेकाश्यादिसर्वपुण्यदेशाःसेविताःभवंतिइतियोजना काश्यादिषुबहुपुण्यस्थलेषुयुगपद्वासासंभवेननिरंतरंकाश्यादिपुण्यस्थलसेवनंकर्तुंदुर्घटमतःशालग्रामशिलातीर्थसेवनेननिरंतरकाश्यादिसेवनजन्यपुण्यंभवतीतिभावः २७ २८ २९ ३० मूर्ध्निशालग्रामोदकंबिभ्रतइतियोजना ३१ ६२ ६२ २६

३२ ३३ यातिप्राप्नोति ३४ ३५ प्रातःस्नानमिति माघमासेइति पूर्वोक्तमनुवर्ततेगीतापाठइत्यादित्रिषुव्यत्ययेनद्वितीयास्थानेप्रथमातेषांमाहात्म्यातिशयप्रदर्शनार्थामायाः लक्ष्म्याः भर्तुर्धवस्यमाधवस्येत्यर्थः ३६ सर्वेषांब्राह्मणक्षत्रियवैश्यानांहीनजातीनांशूद्रादीनांएषःप्रातःस्नानादिःसनातनोस्तितत्रेयंव्यवस्थाब्राह्मणादित्रयाणांस्नानादिसर्वंतत्स्त्रीणांप्रातःस्नानंवैष्णवपूजाब्रह्मपत्रेभोजनम्

पीत्वापुण्यमवाप्नोतिचांद्रायणशताधिकम् शालग्रामार्पितांयस्तुतुलसींभक्षयेद्यदि ३२ तेनभुक्तंपंचगव्यंको
टिवारंनसंशयः माघमासेतुविप्रेंद्रयःकुर्यात्पत्रभोजनम् ३३ सोऽश्वमेधफलंयातिविष्णुलोकंचविंदति यः
कुर्यान्माघमासेतुब्रह्मपत्रेषुभोजनम् ३४ ब्रह्मलोकसमासाद्यमोदतेब्रह्मवच्चिरम् ब्रह्मपत्रेषुभुंजानोनरक
न्नैवगच्छति ३५ प्रातःस्नानपूजनंमाधवस्यगीतापाठोवैष्णवानांचपूजा शास्त्राभ्यासोभोजनंब्रह्मपत्रेमाया
भर्तुर्मूर्तिदानंचकुर्यात् ३६ सर्वेषामपिवर्णानामाश्रमाणांचनारद स्त्रीणांचहीनजातीनामेषधर्मःसनातनः
३७ प्रातःस्नानेमाधवस्यार्चनेचयेषांबुद्धिर्जायतेसत्कथासु तेषांलोकात्यक्षयाःकर्मलभ्यास्तेषांकुलस्यापि
तंविष्णुलोके ३८ येपुण्यहीनामनुजाश्चपूर्वंनशिक्षितायेगुरुभिर्विशिष्टैः तेषांमतिर्माधवेमाघमासेनजायते
क्वापिकृतान्यधर्मे ३९ यःकांस्यपात्रभुक्माघेसजंबूकोभवेद्ध्रुवम् तस्मात्कांस्येनभोक्तव्यंमाघेमासिद्विजोत्त
म ४० तैलाभ्यंगंतैलभोगंमाघमासेतुवर्जयेत् तैलाभ्यंगकृतेविप्रवज्रवृक्षोभवेद्ध्रुवम् ४१ शृगालोजायतेभू:
मौमाघेवैतैलभोजनात् आरनालंचपिण्याकंयोमाघेमासिभक्षति ४२

माधवपूजनंगीतापाठश्चब्राह्मणद्वाराशास्त्राभ्यासोनास्त्येवहीनजातीनांब्रह्मपत्रेभोजनंविनासर्वंस्त्रीवत् ३७ ३८ ३९ कांस्यपात्रभुक्कांस्यपात्रेभुनक्तीतिकांस्यपात्रभुक् ४० भोगंभोजनं वज्रवृक्षः निवडुंगइतिमाहाराष्ट्रभाषयाप्रसिद्धः ४१ आरनालंतंडुलेभ्यः पाककालेतत्सारांशसहितंनिष्कासितमुदकं पिण्याकंतिलकल्कं ४२

गतंगमनविषयीकृतंलोकंनरकमित्यर्थः गृंजनंलशुनं ४३ उपोदकीराजगिराइतिप्रसिद्धा ४४ ४५ पौष्यंपुष्पाणामिदंपौष्यं ४६
४७ फलगैःफलेषुस्थापितैः ४८ पातककिल्बिषैःपातकसंबंधिपीडाभिः ४९ ५० विसर्जयेद्दद्यात् ५१ तिलगव्याक्तंतिलमिश्रित

स्करापेनगतंलोकंसनुगच्छतिनिश्चयम् मूलकंगृंजनंछत्रंवृंताकंभिःसटंतथा ४३ उपोदकीमलाबुंचमाघे
मासिविवर्जयेत् अगस्त्यपत्रशाकंचयोमाघेमासिभक्षति ४४ तस्यापराधसाहस्रंक्षमतेविष्णुरव्ययः माध
वंमुनिपुष्पैस्तुयःपूजयतिमानवः ४५ यःपूजयतिदेवेशंशतपत्रैर्मनोरमैः विमानंपौष्पमारुह्यस्वर्गलोकेम-
हीयते ४६ योधात्रीफलमालाभिर्माधवंपरिपूजयेत् तस्यपुत्रान्महाप्राज्ञान्स्वयंयच्छतिमाधवः ४७ योधा-
त्रीफलगैर्दीपैर्नीराजयतिमाधवम् मुच्यतेनात्रसंदेहोमहापातककोटिभिः ४८ आलिप्यधात्रीपिष्टेनयःस्नानं
कर्तुमिच्छति तावन्मात्रेणमुच्येतनरःपातककिल्बिषैः ४९ योधात्रीफलराशिंतुब्राह्मणायप्रयच्छति सपुत्रा
न्यापहानिंचलभतेनात्रसंशयः ५० धात्रीफलानियोमर्त्योब्राह्मणेभ्योविसर्जयेत् नतस्यसंततेर्हानिर्भुक्तिंमुक्तिंच
विंदति ५१ योमाघेमासिसप्तम्यांशुक्लायांरविवासरे कूष्मांडंतिलगव्याक्तंब्राह्मणायप्रयच्छति ५२ कूष्मांडब
हुबीजाढ्यंब्रह्मणानिर्मितंपुरा तस्मादस्यप्रदानेनसंततिर्वर्धतांमम ५३ इतिमंत्रेणास्यफलंसंततिःशतपौरुषी
वर्धतेनात्रसंदेहःस्त्रियोवश्यमयंविधिः ५४ माघेतुरथसप्तम्यांकूष्मांडंनददातियः विच्छित्तिःसंततेस्तस्यस
कूष्मांडोभवेद्ध्रुवम् ५५ पुरामेरौतपःकुर्वन्नभाषेपितृदेवताः स्थितोहंतपसेमह्यंशुश्रूषानाविधीयताम् ५६

गोघृतेनाभ्यक्तं ५२ ५३ इतिमंत्रेणेतिअस्यप्रयच्छतीतिपूर्वेणान्वयः अस्यकूष्मांडदानस्यफलंफलभूतालस्यदानकर्तुःसंततिःशतपौरुषीश-
तपुरुषाणामियंशतपौरुषीशतपुरुषपर्यंतमित्यर्थः स्त्रियःउद्दिश्यआवश्यमस्ति ५४ कूष्मांडस्तन्नामकःपिशाचविशेषः ५५ पुरेतिपूर्वकल्पस्य
ब्रह्मेतिशेषः मह्यंमम ५६

५७ ५८ स्वातंत्र्यात्संततेर्विना ५९ इतिशापेदत्तेसाध्वसंभयंप्राप्ताः ६० सत्वरंवदेतित्वयाचन्निति पूर्वेणसंबंधः ६१ अन्यतोन्यां
गतिमुपायंकथयेवदामि ६२ ६३ अर्थेउद्धारार्थेदानार्थेदानमर्थः प्रयोजनंयस्यतत् ६४ ६५ ६६ ६७ अव्रतंब्रह्म

इत्युक्तेब्रह्मणातेनप्रत्यूचुःपितृदेवताः वयंमोक्षायतपसाहरेराराधनोद्यमाः ५७ अतोस्माभिस्तुशुश्रूषानश
क्याचरितुंतव इत्युक्तेपितृभिःसोपिशशापातीवकोपितः ५८ संतत्याबोभवेन्मोक्षोनस्वातंत्र्यात्कदाचन अ
भावेसंततेर्यूयमधःपतनमाप्स्यथ ५९ दत्तेशापेकंजजेनसाध्वसंतमयाचयन् वंश्यैःकृतेनदोषेणविच्छित्तिः
संततेर्भवेत् ६० दयालोगतिरस्माकंत्वंतस्माद्वदसत्वरम् एवंविज्ञापितोब्रह्माप्रत्युवाचपितॄनथ ६१ नानृतं
मेवचोब्रूयात्कथयेगतिमन्यतः कूष्मांडरथसप्तम्यांयोददातिद्विजातये ६२ नतस्यसंततेश्छेदोभवेदितिव
रंददौ कूष्मांडानामदानेनविच्छित्तिःस्याच्चसंततेः ६३ इत्याश्वास्यपितॄन्देवान्ब्रह्मालोकपितामहः तेषा
मर्थेचकूष्मांडदानार्थमसृजद्विभुः ६४ प्रवालमुक्तासहितंतिलगव्येनलेपितम् सदक्षिणंसताम्बूलंदेयंसंतति
मिच्छता ६५ अदानेरथसप्तम्यांकूष्मांडस्यद्विजातये ब्रह्मशापेनसंतत्याविच्छेदोभवतिध्रुवम् ६६ म
करेसंक्रमेभानोःसप्तम्यांवाद्विजातये मातुलिंगानियोदद्यात्सुपुत्रान्भाग्यवतोलभेत् ६७ अदानमव्रतयः
स्तुमासमेनंव्यतिक्रमेत् सजीवन्नेवचांडालःपश्चाद्रौरवमश्नुते अधोलोकंकुलशतैर्युक्तोसौगच्छतिध्रुवम्
६८ अस्नात्वाचाप्यदत्वाचमासमेनंनयेद्यदि स्वर्गस्थैःपितृभिःसार्द्धंरौरवंकल्पमश्नुते ६९ मासिमाघेमाध
वायवःकुर्यात्पुष्पमंडपम् श्वेतद्वीपेवसेन्नित्यंदशपूर्वैर्दशापरैः ७०

पत्रभोजनादिनियमरहितं ६८ अदत्वेति
अदानंनकेवलंस्वयंरौरवमश्नुतेअपितुस्वर्गस्थैः पितृभिः सार्धंरौरवमश्नुतेइतिविशेषकथनार्थंपुनरुक्तिः ६९ ७०

७१ ७२ नालंअहंसमर्थोनास्मि ७३ ७४ ७५ ७६ लोकाःपुण्यलोकाः नक्षीयंतेनवियुज्यंतेइत्यर्थः ७७ तंहरिकथाप्रवक्तारंविष्णुबुद्ध्याविष्णुप्रीणनबुद्ध्या ७८ यःअनंतबुद्धिंनअंतोनाशोयस्याः साअनंताबुद्धिर्यस्य तंअनश्वरपरमात्मविषयकज्ञानवंतंवायद्वाअनंतेपरमात्मनिबुद्धिरंतःकरणंयस्यतंभगवभिन्नं अग्रबुद्ध्यासर्वोत्तमश्रीविष्णुप्रीणनबुद्ध्याअपूजयित्वातिष्ठति उग्रः क्रुद्धः सन्-

यश्चूतपल्लवैर्विष्णोस्तोरणंविदधातिसः तपोलोकंकुलशतैर्युक्तोसौगच्छतिध्रुवम् ७१ यःपूजांकदलीस्तंभैर्विदधातिरमापतेः कमलासनलोकंवैपितृभिःसहगच्छति ७२ करोत्यभ्यंजनंविष्णोस्तैलैश्चंपकगंधिभिः तस्यपुण्यफलंवक्तुंनालंवर्षशतैरपि ७३ वासोदानंतुयःकुर्याच्छीतार्तायद्विजातये सचैकविंशतिकुलैःश्वेतद्वीपेवसेद्ध्रुवम् ७४ योदद्यात्कंबलंमाघेशीतार्तायद्विजन्मने सार्वभौमोभवत्येषकोटिजन्मसुनारद ७५ अन्नदानंतुयःकुर्याच्छ्रोत्रियायकुटुंबिने अन्नवान्जायतेकामीनिष्कामोमोक्षमाप्नुयात् ७६ मिष्टान्नंभोजयेद्यस्तुव्याकुर्वाणंहरेःकथाम् नतस्यलोकाःक्षीयंतेकल्पकोटिशतैरपि ७७ तंपूजयित्वाधनवस्त्रदानैर्गोभूगजाद्यैरपिविष्णुबुद्ध्या भुक्त्वाचभोगान्सकलान्प्रयातिपदंहरेरेवदुरापमन्यैः ७८ अपूजयित्वागुरुमग्र्यबुद्ध्या धर्मप्रवक्तारमनंतबुद्धिम् छित्वाचकर्णौरविसूनुरुग्रस्तंपातयत्यंधतमस्यपारे ७९ योनिंदयत्यमुंमूढःपरोक्तांतांशृणोतिवा वासोस्याधेचतमसिनिष्कृतिर्नास्यविद्यते ८० इतिश्रीवायुपु॰ माघमाहात्म्येचतुर्थोऽध्यायः ४ छ ब्रह्मोवाच माघस्नानस्यमाहात्म्यंकथितंविष्णुनापुरा

न्नित्यर्थः ७९ अमुंगुरुंपरोक्तामन्यैरुक्तांभगवत्कथाम् अस्यगुरुनिंदादिपापकर्तुः अस्यगुरुनिंदादिपापस्यनिष्कृतिः प्रायश्चित्तंगुरुप्रसादंविनानविद्यते ८० इतिश्रीवायुपुराणीयमाघमाहात्म्यटीकायांचतुर्थोऽध्यायः ४ छ अस्मिन्नध्यायेपुनर्माघमाहात्म्यंश्रवणस्यमाहात्म्यंगुह्यकेतिहासपूर्वकंब्र-

ह्मापरमौकंठ्येन कथयति माघेति महालक्ष्म्याः महालक्ष्म्यैकथितं सिंधुतीरेक्षीराब्धितटे १ ब्रह्महत्यापीडितायमदीयपंचमशिर
श्छेदादितिभावः १ २ ३ ४ ५ कथंकेनप्रकारेणाभूत् तस्यदुर्योनिमोचनार्थंकस्यसत्पुरुषस्यसंगमः कुत्रचास्यासीत् ६ श्वेतना

महालक्ष्म्याःसिंधुतीरेमत्त्वमाहरमाचसा १ ब्रह्महत्यापीडितायरुद्रायावोचमंगज ततःपरंतुकस्यापि
गोप्यत्वान्नोदितंत्विदम् २ शुश्रूषवेचपुत्रायश्रद्दधानायधीमते वक्ष्यामिपरमंगुह्यंमाघमाहात्म्यमुत्तमम्
३ माघेमासिसकृत्स्नात्वातथासंपूज्यमाधवम् दत्वान्नंद्विजवर्यायकृतकृत्योभवेन्नरः ४ योवदेन्माघमा
हात्म्यंवाच्यमानंशृणोतियः दुर्योनिहेतुपापेनमुच्यतेगुह्यकोयथा ५ नारदउवाच कोनामगुह्यकोब्रह्म
न्दुर्योनिःकेनकर्मणा तस्यांयोनौकथंसोभूत्कुत्रासीत्कस्यसंगमः ६ ब्रह्मोवाच गुह्यकःश्वेतनामा-
भूदलकाद्वारपालकः कदाचिद्धिमवत्पृष्ठेरंतुकामोप्सरोगणैः ७ संवृतोमदिरांपीत्वाययौगंगातटंशुभम्
वनेमनोरमेदिव्येमत्तकोकिलकूजिते ८ वीचिविक्षोभसंभिन्नपृषद्भिःशीतवायुना विकसत्कंजनलिनशो-
भयाशोभितेशुभे ९ लताकुटीरकुसुमरसमत्तालिमंडिते लताकुड्मलसंभिन्नतमालहरितांबरे १० नदीवि-
लंबशाखाग्रगलत्पुष्पाधिवासिते रम्येपुलिनपर्यंकेरमेरामाभिरावृतः ११ नाकिंचिज्ज्ञातवान्श्वेतोदेशका-
लादिकांस्तदा तदाचलोमशोनामकैलासादागतोमुनिः १२ तंदृष्ट्वामदिरामत्तोविवस्त्रोंगनयासह नोत्त-
स्थौमुनिशार्दूलमजहासचतंमुनिम् १३

मेति अलकायाः कुबेरपुर्याः कोनामेतिप्रश्नस्योत्तरमिदं ७ ८ संभिन्नानि
संचलितानि शुभेसुखप्रदे ९ कुटीराणिलघुगृहाणि रसमत्तारसपानमत्ताः संभिन्नाः संयुक्ताः १० अधिवासितेसुगंधयुक्ते वनेवि
घमाने रम्येपुलिनपर्यंके मृदुवालुकारूपपर्यंके ११ १२ नोत्तस्थाविति दुर्योनिः केनकर्मणेति प्रश्नस्योत्तरमिदम् १३ ६

हेतुत्थकत्वंमत्तः सन् १४ दंडःकृतइति १५ तत्रदृष्टांताभिप्रायेणाह उपकारायेति मातुःमातृकर्तृकंतर्जनम् १६ धातूनामिति·
यथा धातूनांयावत्सम्यक्मलशोधनंभविष्यति तावत्अग्निसंस्कारः मलशोधनानंतरंसनास्तितथामयिमदनाशपर्यंतंमातृवत्तवनिग्रहो
युक्तः संप्रतितुगतमदेमयिकृपांकुर्वित्यर्थः विशापंविगतः शापोयेनसत्आशीर्वादस्तं १७ वामदेवःयदाव्याकुर्वाणोभवेदितिशेषः व्याख्या

तदात्वंकोपतात्मास्तोलोमशस्त्वंशशापह मत्तस्त्वंनोत्थितोयस्माद्भवव्यालोद्रिकंदरे १४ इतिशप्तोमुनींद्रेण
प्रार्थयामाससत्वरम् त्वयाद्यानुगृहीतोस्मिनमन्येदंडइत्यहम् १५ उपकारायहिखलुशिशोर्मातुश्चतर्जनं
कृपांकुरुकृपालोत्वंदीनेगतमदेमयि १६ धातूनामग्निसंस्कारोयावदामलशोधनम् इतिप्रसादितस्तेनविशा
पमददात्तदा १७ वामदेवःस्वशिष्येभ्योव्याकुर्वाणंकथामिमाम् यदाश्रोष्यसिमाघस्यतदामोक्षमवाप्स्य·
सि १८ इतिदत्वाविशापंचययौबदरिकाश्रमम् श्वेतस्तुब्रह्मदंडेनचित्रकूटाद्रिकंदरे १९ व्यालोभूद्योजना
यामशरीरोनिलभोजनः सचासीद्वर्षसाहस्रंपशुपक्षिमृगाशनः २० एतस्मिन्नेवकालेतुवामदेवोमहामुनिः
सेतुंद्रष्टुंमुनिगणैःपरीतोद्रिममुंययौ २१ सव्यालाधिष्ठितगुहाद्वारस्थवटपादपे नीत्वारात्रिंबहुविधैःक
थालापैःसुखावहैः २२ ततोभानूदयेजातेप्रयाणायोद्यतेमुनौ तदाशतर्चिनोनाममुनयःसंशितव्रताः
२३ त्रिकूटाग्रेदेवखातेमाघेमास्युदितेरवौ स्नात्वाजग्मुःस्वाश्रमंगंतुमभ्यादवतरन्क्षणात् २४

स्यतीत्यर्थः तदाइमांमाहात्म्यप्रतिपादिकांकथांश्रोष्यसितेनमोक्षमवाप्स्यसीतिसंबंधः १८ १९ व्यालइतितस्यांयोनौकथंसोभूदि·
तिप्रश्नस्योत्तरमिदंवर्षसाहस्रंवर्षसहस्रपरिमितकालपर्यंतमित्यर्थः २० २१ सवामदेवःव्यालाधिष्ठितगुहाद्वारस्थःवटपादपोयस्मिन्
देशे २२ २३ अभ्यादाकाशात् अवतरन्अडागमाभावश्छांदसः अवारोहन् आकाशमार्गेणाश्रममगच्छन्नित्यर्थः २४

तेर्गतेगमनेक्रियमाणेसतिवटस्याग्रेऽपतन्नितिपूर्वेणान्वयः २५ तंदृष्ट्वामुनिगणेचिंताकुलेसतिगौतमतनूद्भवोवामदेवस्तुविस्मितःसन्
कोसौत्वमसिकस्मात्तवायंभावः वटदेहः मुक्तिः कस्माद्धेतुकीतिवाक्यमब्रवीदितिपूर्वोत्तरश्लोकाभ्यांयोजना २६ २७ वामदेवादिति
।विवक्षयापंचमीवामदेवेनेत्यर्थः इत्युक्तेवामदेवेनेतिचापाठः तस्मैमुनिगणाय २८ २९ तत्रतास्मिन्नरण्येऽऽगतातत्पुत्रीत्वरं

गतेतदार्द्रवस्त्राणामपतन्नुदबिंदवः वटस्याग्रेक्षणादेववटोपिन्यपतद्भुवि २५ उत्तस्थौपुरुषस्तस्मात्तदे-
वाद्भुतदर्शनः तंदृष्ट्वावामदेवस्तुविस्मितोवाक्यमब्रवीत् २६ कोसौकस्मादयंभावोमुक्तिःकस्माद्धेतुकी
चिंताकुलेमुनिगणेगौतमस्यतनूद्भवः २७ इतिपृष्टोवामदेवात्सोयमद्भुतपूरुषः प्रणम्यशिरसातस्मैवामदे-
वमथाब्रवीत् २८ मार्कंडेयस्यशिष्योहंस्कनपानामवैऋषिः समित्कुशपलाशार्थमरण्यंगुरुचोदितः २९ आ-
गमत्तत्रतत्पुत्रीनाम्नागुणवतीसती चरंतीकंदुकक्रीडाव्याजात्सख्यासहागता ३० गांधर्वेणविवाहेनभद्रेरंतु
मनाह्यहं आहसारोषताम्राक्षीकिंनजानासिमूढधीः ३१ शिष्यत्वान्मेपितुर्भ्राताकथंत्वंकांक्षसेनुजाम् अ
त्यक्तोभवदुर्बुद्धेवटोभूम्यांवनेर्बुदम् ३२ शशापमांगुरुस्तत्रातेनाहंवटतांगतः नजानेकर्मणाकेनजडजन्मगतम
म ३३ एतत्कौतूहलंश्रोतुंकारणंवक्तुमर्हसि गुरुतल्पगपापंयत्कल्पकोटिशतैरपि नतत्संक्षीयतेकस्मादि
दानींभस्मसाद्ययौ ३४ तद्धर्मसूक्ष्मंवदवामदेवकरोमिभूयोपिचवृद्धिकामः क्षेमायलोकस्यभवत्प्रचारोनिष्का
मुकानामिहनास्तिकृत्यं ३५

तीइ नस्ततःसंचरंती ३० तदातांगांधर्वेणविवाहेनभद्रेत्वयासहरंतुमनाअहमस्मीत्यवोचमितिशेषः
३१ मेपितुःशिष्यत्वाज्ज्येष्ठभ्रातात्वंअत्यक्तः अतिमूढस्त्वंअर्बुदंदशकोटिवर्षाणिवटोभव ३२ एवंशशाप ३३ श्रोतुंकौतूहलमौत्सुक्य
। यः ३४ येनममपापंनष्टंतद्धर्मसूक्ष्मंधर्मरूपंसूक्ष्मकारणं भवत्प्रचारः युष्माकंसंचारः ३५

३६ सर्वैकृतंस्नानादि नभोगताः नभसान्माकाशमार्गेणागताः ३७ पूर्वेरूपः पूर्वैरूपंयस्यसः जडजन्मसाधकः वृक्षादिस्थावरयो-
निप्रापकः ३८ उग्रंसुरापानादि अन्यदोषादिउपपातकपिशाचपीडादिकंपापंसमूलस्य वासनाबीजसहितस्य घातोयस्मिन्निति समूलघा

श्रुत्वातद्वचनंवामदेवोध्यानपरायणः ज्ञात्वातत्कारणंसम्यक्चाविस्मितोवाक्यमब्रवीत् ३६ वामदेवउवाच
शतर्चिनीनामपुराभगोद्याद्गिरींद्रशृंगेद्भुतदेवखाते माघेचमासेकृतसर्वकृत्स्नानभोगताःस्वाश्रममापुरोज-
सा ३७ तदार्द्रवस्त्राद्बालिनोदबिंदुभिःसिक्तोवटोयंतवपूर्वरूपः प्रातर्जलस्पर्शनपुण्यलेशात्वंयोगतस्तेजड
जन्मसाधकः ३८ हत्यायुतंपापसहस्रमुग्रंगुर्वंगनाकोटिनिषेवणंच तथान्यदोषादिचमाघमासेस्नानेननश्यं
तिसमूलघातम् ३९ नपापबुद्धिर्नचकर्मबंधोनचाकुयोनिर्नपिशाचदेहः नाग्न्यर्कसोमानिलबाधलेशःप्रात
र्जलस्पर्शनमात्रतोग ४० जिह्वानवक्तिर्यदिमाधवनामधेयंचेतश्चनस्मरतिमाधवपादपद्मं प्रातर्नयायेनच
माघमासेस्नानंकृतंतस्यहिकर्मबंधः ४१ अस्मत्सहागतानांतेमुनीनांचसमागमात् प्रातर्माघेजलस्पर्शोभा
ग्यदःसत्समागमः ४२ सर्वदानेषुयत्पुण्यंसर्वतीर्थेषुयत्फलम् तत्फलंसमवाप्नोतिमाघस्नानेनपंडितः
४३ तादृक्पापंनास्तिलोकेयच्चमाघान्ननश्यति तस्मान्माघेकृतस्नानःसुखीभवचिरंमुने ४४ इतिश्रुत्वावाम-
देवभाषितंकृतपामुनिः भूयोभूयोनमस्कृत्यतमामंत्र्ययथौवनम् ४५ श्रुत्वामाघस्यमाहात्म्यंवामदेवमुनी-
रितम् तद्देवव्यालोमुक्तोभूद्दुर्योनेर्दुःखकारणात् ४६ तदैवाद्भुतरूपोभूच्छ्वेतोनामसगुह्यकः वामदेवंनमस्कृ
त्यस्ववृत्तांतंन्यवेदयत् ४७

नंयथातथा ३९ ४० वाकटाक्षे ४१ समागमात्तज्जनितपुण्यादित्यर्थः जलस्पर्शोऽभूत् तस्मात्सु ३०
समागमः भाग्यदोस्ति ४२ पंडितःज्ञानवान् ४३ ४४ नवामदेवंआमंत्र्यआज्ञांगृहीत्वा ४५ दुःखकारणात् दुःखहेतुभूतायादुर्योनेरित्यर्थः
४७

पूर्वंकृतः प्रश्नः दुर्योनिप्राप्तिविषयकोयेनसतथोक्तः तच्छ्रवणेनचहर्षोत्फुल्लविलोचनोभूत् तदनंतरंतेनानुज्ञातोसौगुह्यकः ४८ ४९ लेशोमाहात्म्यलेशः ५० नचअलंभूयते इतिशेषः नशक्यतेइत्यर्थः क्षणादयः क्षणाः कालावयवा आदयोयेषुते आदिशब्देनरजः कणपर्जन्यधारादयः यथानक्षत्राणांकणादीनांचगणनाकेनापिकर्तुंनशक्यते तथामाघमाहात्म्यस्यापीतिभावः ५१ ५२ ५३ ५४ ५५

कृतप्रश्नोवामदेवोहर्षोत्फुल्लविलोचनः अनुज्ञातोविमानेनगतोसावलकांपुरीम् ४८ वामदेवोपिमाघस्यमाहात्म्यंप्रशंसंसह शिष्येभ्यःस्वानुगेभ्यश्चदक्षिणाशांततोययौ ४९ तदेतन्माघमाहात्म्यंकथितंतवपुत्रक अनंततस्यमाहात्म्यंलेशोयंकथितंमया ५० साकल्येनमयावक्तुंनालंवर्षशतैरपि नक्षत्राणिचगण्यंतेगण्यंतेचक्षणादयः ५१ नरेणयेनवालोकेतेनेदंगण्यतांमुने यथामुरारिःसर्वेषुदेवेषुप्रवरोमतः ५२ तथासर्वेषुधर्मेषुमाघधर्मोविशिष्यते सुखोपास्योमहापुण्यफलदःपापनाशनः ५३ तस्मान्माघसमोधर्मोनभूतोनभविष्यति इंद्राद्यालोकपालाश्चदिलीपाद्याश्चभूभृतः ५४ माघस्नानस्यमाहात्म्यादापुःसिद्धिंपरांपुरा देवतानामृषीणांचमाघस्नानमभीप्सितम् ५५ संसारेक्लिश्यमानानांमानुषाणांतुकाकथा अहोमाधवनामास्तिमाघस्नानंमलापहम् ५६ तथापिमनुजालोकेक्लिश्यंतीत्येतदद्भुतम् स्वाधीनएवदेहस्तुनकस्यापिवशेजलं मासोयंस्वयमभ्येतितथाप्येतेजडाअहो ५७ यदानृदेहोस्तियदाद्विजत्वंयथाचपट्वीकरणप्रवृत्तिः तदैवनैजंपदमीप्सितव्यंकदामृतिस्त्वेतिजनोनवेद ५८

मलापहमितिस्नाननाम्नोरन्वेति ५६ जडाअज्ञानिनः अलसावास्वहिताप्रवर्तनादित्यर्थः ५७ यस्मात्जनः मृतिर्मरणंमां कदाएति प्राप्नोतीति नवेदतस्माद्यदाजंतोर्नृदेहोस्तियदाद्विजत्वंद्विजजन्मयदाचकरणप्रवृत्तिः इंद्रियव्यापारः पट्वीसमर्थास्तितदैवनैजंस्वकीयंपदंसालोक्यादिमुक्तिस्थानंकालप्रतीक्षाकदापिनकार्येतिभावः ५८

५९ ६० ६१ माघस्नानमिति अल्पस्यतपसः फलंनभवतिकिंतुमहातपसःफलमित्यर्थः ६२ ६३ ६४ ६५ इतिवा॰
युपु॰मा॰टी॰पंचमोऽध्यायः ५ छ तुभ्यंरोचते १ यथाविभुर्व्यापकः तथायद्यपिमाघमासेसर्वतिथिस्थानव्रतानिप्रशस्तानिसंति॰

वृथाजन्ममनुष्याणामनाराधयतांहरिम् मृतस्यपुरुषस्येवसर्वालंकारमंडनम् ५९ सर्वेवेदाःसर्वधर्मा
श्चलोकेसर्वाणितीर्थानिचयानिलोके दानानियज्ञाश्चयथैवतेषांयेषांनचेद्भक्तिरनंतबाहो ६० प्रायश्चि
त्तानिचीर्णानिश्रुतिस्मृत्युदितान्यपि माधवेभक्तिहीनंतुनपुनंतिकदाचन ६१ माघस्नानंविष्णुभक्तिर्गी
तापाठश्चसंततं सहस्रनामपठनंनाल्पस्यतपसःफलम् ६२ नित्यंसहस्रनामोत्थंश्लोकार्द्धंश्लोकमेववा
प्रातर्माघेपठित्वातुविष्णोःसायुज्यमाप्नुयात् ६३ स्नात्वाप्रातर्माघमासेसंपूज्यकमलापतिम् श्रुत्वाभा
गवतंशास्त्रंविष्णोःसायुज्यमाप्नुयात् ६४ श्लोकार्द्धंश्लोकपादंवानित्यंभागवतोद्भवम् पठित्वामोक्षमा॰
प्नोतिनात्रकार्याविचारणा ६५ इतिश्रीवायुपुराणेमाघमाहात्म्येपंचमोऽध्यायः ५ छ नारद
उवाच स्नानस्यमाघमासेपिशस्ताःकास्तिथयोमताः स्थानानिकानिशस्तानिकार्याण्यपिव्रतानिच
एतद्विस्तरतोब्रह्मन्यदान्यदपिरोचते १ ब्रह्मोवाच यथागंगासर्वदेशेषुपूज्यायथाविष्णुःसर्वदेशेवि
भुश्च गंगाख्यातास्थानयोरुत्करापिकाश्यांत्रिवेण्यांखलुपूज्यतेसौ २ व्याप्तोपिभगवान्विष्णुस्तुलसीका
ननेंबुजे अश्वत्थेगविविप्रेषुयथासन्निहितःसदा ३ तथामाघस्यतिथिषुप्राशस्त्यंकथ्यतेमया स्थानानामि
हसर्वेषांव्रतानामिहनारद ४

तथापिउत्करामाहात्म्यात् प्रसिद्धात्मसौसर्वत्रपूज्यागंगाकाश्यांत्रिवेण्यांएतयोःस्थानयोर्यत्नैःखलुनिश्चयेनविशेषेणेत्यर्थः पूज्यते २ व्याप्तोपिसर्वत्रव्याप्तोपिफलप्रदत्वेनसन्निहितः ३ विशेषतिथिषुविशेषस्थानानांविशेषव्रतानांच ४

५ ६ येनस्नाप्यते समहीयते ७ हरिंस्नापयति सस्नापयन् ८ इहपूर्णायुः परत्रपरांगतिंयाति ९ तेनब्रह्मसहस्रस्य ब्राह्मणसहस्रस्य भोजनंकृतंदत्तंभवति १० शुचिःशुद्धोभवतिमुक्तत्यादिनिभावः ११ १२ १३ १४ तस्यांस्नानदानादिकर्तॄणांक्रतुकोटिशताधिकफलंभवति

द्वादशीसर्वतःशस्तातिथिभ्योविष्णुवल्लभा तस्यांस्नानाधिकंसर्वंकोटिकोटिगुणंभवेत् ५ उपरागसहस्राणिव्यतीपातायुतानिच अमालक्षंतुद्वादश्याःकलांनार्हंतिषोडशीम् ६ द्वादश्यांमाघमासस्यपयसाशंखवर्तिना स्नाप्यतेमाधवोदेवोविष्णोर्लोकेमहीयते ७ योमाघशुक्लद्वादश्यांशुद्धैःपंचामृतैर्हरिम् स्नापयन्यातिसायुज्यंनात्रकार्याविचारणा ८ सकृद्भक्तेनसंस्नाप्यमाघेमाधवमव्ययम् द्वादश्यांयातिपूर्णायुःपरत्रेहपरांगतिम् ९ द्वादश्यांभोजयेद्यस्तुशुद्धंभागवतंद्विजम् कृतंब्रह्मसहस्रस्यभोजनंनात्रसंशयः १० देवान्विष्णुंसमुद्दिश्यब्राह्मणं भोजयेद्यदि माघस्यशुक्लद्वादश्यांदेवानामृणतःशुचिः ११ तथैवासितद्वादश्यांपितॄनुद्दिश्यनारद ब्राह्मणं भोजयेद्यस्तुसमुक्तःपैतृकादृणात् १२ योभानुवारेमाघस्यभोजयेद्वेदपारगम् ऋषीणांऋणतोमुक्तोनात्रकार्याविचारणा १३ यद्दानंक्रियतेमाघेद्वादश्यांचविपश्चिते तद्दानंकोटिगुणितंभवत्येवनसंशयः १४ द्वादशीरविवारेण संक्रमेणचयुज्यते सातिथिःपुष्कलानामक्रतुकोटिशताधिका १५ द्वादशीभानुवारेवाव्यतीपातेनसंयुता सातिथिःशृंखलानामतीर्थयात्राफलप्रदा १६ द्वादशीशनिवारेणविष्णुभेनचसंयुता सातिथिर्वैष्णवीनाममोदते दुर्लभाकलौ १७ शस्त्राज्जलाद्विषात्सर्पाच्चांडालात्पुल्कसादपि वृषादश्वाद्गजाद्वापिकृशानोःपाशबंधनात् १८

त्यर्थः १५ १६ विष्णुभेनश्रवणनक्षत्रेणकलौदुर्लभावैष्णवीनामसातिथिर्मोदतेआनंदयुक्ताभवति स्नानादिकर्तॄणामानंदंकरोतीत्यर्थः १७ शस्त्रादित्यादिषुहेत्वर्थेपंचमी पुल्कसात्शूद्रात्क्षत्रियायांजातोनिषादस्तस्माच्छूद्रायांजातःपुल्कसः तस्मात्जातोनिषादाच्छूद्रायांजास्याभवतिपुल्कसइतिमनुस्मृतेः १८

गलग्रहात् गलग्रहणात् १९ २० वंशाभावेनपिंडदानाभावात् लुप्तपिंडाः क्रियालोपगताः क्रियाणामौर्ध्वदेहिककर्मणांलोपंगताः वंश्येन सपिंडेनब्राह्मणस्यभोजनेकृतेदत्तेइत्यर्थः २१ असंस्कृताउपनयनादिरहिताश्चतेप्रमीतामृताश्चतेषां त्याजितानांलोकैः भर्त्रादिद्वाराव्यभिचारसंशयाद्यपवादेनपरित्यक्तानांकुलस्त्रियांवस्तुतोयोग्यस्त्रीणां २२ द्वादशीभोजनंद्वादश्यांब्राह्मणभोजनं २३ इंदुक्षयेअमावास्या·

जिह्वाच्छेदाद्गलग्राहादकस्मात्पतनादपि इत्यादिहेतुभिर्लोकेदुर्मृतिंयेगतानराः १९ तेषांगतिविहीनानांद्वादश्यांविप्रभोजनम् माघेमासिद्विजश्रेष्ठगतिरुक्तामनीषिभिः २० येचलोकेलुप्तपिंडाःक्रियालोपगताश्चये तेषां वंश्येनकेनापिद्वादश्यांभोजनेकृते २१ माघेमासिगतिस्तेषांभवत्येवनसंशयः असंस्कृतप्रमीतानांत्याजितानां कुलस्त्रियाम् २२ पतितानांमाघमासेद्वादशीभोजनंगतिः नद्वादशीसमादिनंनभूतंनभविष्यति २३ माघस्येंदुक्षयेभानौस्नानदानादिकाःक्रियाः पितृनुद्दिश्यकुर्वंतिकृतकृत्याःकलौयुगे २४ अमासोमेनभौमेनरविणागुरुणा तथा सयोगःपद्मकोनामशशिग्रहशताधिकः २५ सयोगोमाघमासेचेत्कोटींदुग्रहसंमितः मघासंयुक्तगुरुणापूर्णिमायुज्यतेयदि २६ सयोगःपौंड्रकोनामकलौसंतानदायकः यामघायुक्तपौर्णम्यांगुरुणाचमुनीश्वर २७ प्रतिमांशिशुमारस्यस्वर्चितांयोददातिच मृतापत्याख्यदोषेणमुच्यतेनात्रसंशयः २८ नमःसर्वग्रहाधार लोकानुग्रहकारक तवदानेनमेभूयान्मृतापत्यस्यनिष्कृतिः २९ इतिदद्यात्प्रयत्नेननान्यथेदंभविष्यति पौर्णम्यां माघमासस्यनस्नायाद्योबहिर्जले ३० शूद्रःपिशाचतांयातिब्राह्मणोब्रह्मराक्षसः आमासंयोनयेद्रोगादालस्याद्वामुनीश्वर ३१

यां २४ शशिग्रहशताधिकः चंद्रग्रहणशताधिकफलप्रदइत्यर्थः २५ २६ २७ शिशुमारस्यसुसरइतिप्रसिद्धजलजंतुसदृशाकारभगवद्रूपस्य एतद्रूपंपंचमस्कंधेप्रसिद्धमस्ति २८ मृतापत्यस्यएतन्नामकदोषस्यनिष्कृतिःप्रायश्चित्तं २९ ३० आमासंमासपर्यंतंकालंव्यर्थमितिशेषः ३१ ७

तमेवार्थंस्पष्टीकरोति नकुर्यादिति ३२ मायाः लक्ष्म्याः धवंकांतं ३३ पितृभ्येमघानक्षत्रेगोः रोमसंस्थानि ३४ यःसूनुः शूलाद्यंकंशूलादि शूलचक्रेअंकौचिन्हेयस्यसः आचार्येणोत्सर्जयित्वा आस्तेतेनकृतं ३५ भगवत्कथानांश्रवणात् माधवादीनांपूजनात् जीवतःपितुः वाक्यकरणात् वाक्येनवचनेनसर्वकर्मकरणात् आज्ञापरिपालनादितियावत् ३६ ३७ ३८ नीलंवृषंपिंगलमितिस्वोक्तार्थेभग

नकुर्यान्माघमासेतुस्नानदानादिकाः क्रियाः माघ्यांस्नानंसकृत्कृत्वासंपूर्णफलमश्नुते ३२ योमातुलिंगंप्रददातिमाघ्यामुद्दिश्यमायाधवमादिहेतु सत्कीर्तिमंतंतनयंप्रसूतेयथार्जुनंहैहयदेशराजः ३३ यःपौर्णमास्यांपितृभ्येगुरौचददातिगांवत्सयुतांद्विजाय सरोमसंख्यानिकुलानिविष्णोर्लोकेभिसंस्थाप्यस्वयंमुदास्ते ३४ नीलंवृषपिंगलंवाथमाघ्यांपितॄन्समुद्दिश्ययुवानमध्यम् शूलाद्यंकंसूनुरुत्सर्जयित्वागयाश्राद्धकोटिवारंकृतंस्यात् ३५ स्नानान्माघ्यांवृषोत्सर्गात्श्रवणात्पूजनादपि जीवतोवाक्यकरणात्पंचभिःपुत्रतामियात् ३६ अनपत्योवृषोत्सर्गंकुर्याघ्यादियथाविधि दीर्घायुषंसपुत्रंचप्राप्नोतीत्यब्रवीद्धरिः ३७ वृषोत्सर्गसमंलोकेकर्मग्रंथिनिकृंतनम् नदृष्टंनश्रुतंकापिऋणत्रयविमोचकम् ३८ माघ्यांपितॄन्समुद्दिश्ययोनीलंवृषमुत्सृजेत् गयाश्राद्धंकोटिवारंकृतंतेननसंशयः ३९ गयाश्राद्धंवृषोत्सर्गसममाहुर्मनीषिणः सत्वेन्माघ्यांकोटिगुणइतिप्राहजनार्दनः ४० माघेशुक्लत्रयोदश्यांफलराशिविमोचनम् तस्यवैसंततेर्हानिराकल्पंनैवजायते ४१ योषिन्माघेत्रयोदश्यांसरुक्मंतालपत्रकम् सांजनंसफलंशूर्पयुग्मंकार्पाससंयुतम् ४२

यतोजनार्दनस्य वाक्यंप्रमाणत्वेनानुवदति· ३९ समंसमंचसमश्चसमंनपुंसकस्य एकशेषएकवचनंचभवति ४० विमोचनंदानंनकरोति ४१ तस्यैसरुक्मंसुवर्णस [illegible] र्णयास्मिन् तत्शूर्पयुग्मंतत्रैकंशूर्पपदार्थस्थापनार्थंद्वितीयंतदाच्छादनार्थमितिशिष्टाचारः ४२

क्वापिकस्मिन्नपिजन्मनि ४३ ४४ धौतांबरापरिहितधौतवस्त्रा ४५ धातुनाकषायादिरक्तद्रव्येण ४६ माल्यैः मालाभिः ४७ उपहा·
तः निवेदनेनप्रपूजयेत् ४८ तस्याः हिताहितं ४९ स्नात्वेतिरथसप्तमीमाहात्म्यप्रकरणात् चतुर्थाध्यायोक्तकूष्मांडदानस्यपुनरुक्तमइतिनपुनरुक्तिःशंक्या ५० ५१ ५२ ५३ ५४ ५५

याजीवत्पतिपुत्रांश्चदद्यात्संपूज्यतांसतीम् नतस्याःकंठसूत्रस्यहानिःक्वापिचजायते ४३ माघेमासिचतुर्दश्यां
योपूपान्घृतसंयुतान् दद्याद्विजातयेभक्त्याज्ञानमोक्षंचविंदति ४४ माघेतुरथसप्तम्यांनारीत्विष्टफलेप्सया
उत्थायपश्चिमेयामेस्नाताधौतांबरासती ४५ रथमालिख्यसवितुर्गोष्ठेवृंदावनेपिवा रथेप्राच्यामष्टदलंपद्ममा·
लिख्यधातुना ४६ सूर्यमंडलगंविष्णुंतत्रपद्मेप्रपूजयेत् रक्तैःपुष्पैरक्तमाल्यैरक्तचंदनवाससा ४७ गुग्गुलेनच
धूपेनपायसस्योपहारतः तांबूलंचततोदद्यान्निद्रांकुर्यात्ततःपरम् ४८ सूर्यमंडलगोविष्णुःस्वप्नेवक्तिहिताहितं
ददातीष्टांस्तथाकामान्नान्यथेदंक्वचिद्भवेत् ४९ स्नात्वातुरथसप्तम्यांदद्यात्कूष्मांडमुत्तमम् नारीसुतमवाप्नोतिन·
रोहत्यांव्यपोहति ५० द्विजेंद्रंरथसप्तम्यांपायसंभोजयेद्यदि ग्रहपीडादिभिःसर्वैर्मुच्यतेनात्रसंशयः ५१ योदद्याद्र·
थसप्तम्यांतिलपात्रंद्विजातये विमुक्तःसर्वपापेभ्योग्रहपीडांव्यपोहति ५२ यःकुर्याद्रथसप्तम्यांहिरण्यश्राद्धमंजसा
प्रीणंतिपितरःसर्वेनेच्छंत्यन्यत्कदाचन ५३ पितॄनुद्दिश्ययोदद्यादन्नश्राद्धंतुतद्दिने तदन्नंमेरुणातुल्यंतेषांभवति
निश्चितम् ५४ योमाघेरथसप्तम्यांभूमेर्दानंकरोतिच सकोटिकल्पपर्यंतंविष्णुलोकेमहीयते ५५ राजसूयाश्वमे·
धाभ्यामाप्तोलोकोहिक्षीयते क्षीयतेरथसप्तम्यांभूदानाप्तोनवैक्वचित् ५६ योमाघेसितसप्तम्यांदद्यादन्नंद्विजातये
तदन्नंकोटिगुणितंभवत्येवनसंशयः ५७

भूदानतः भूमिदानेनप्राप्तः ५६ कोटिगुणितंकोटिब्राह्मणभोजनफलप्रदम् ५७ 〃 〃 〃

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

भस्मसात् भस्मीभूतानि ५८ ५९ ६० ६१ ६२ यदिएष्टव्याः स्पृहणीयाः अपेक्षिताइत्यर्थः ६३ अस्मत्कुलेविद्यमानएकअन्नंवा
दद्यादिति पित्तरोवांछांकुर्वंति तस्माद्वश्यंतस्यामन्नदानंकार्यमित्यर्थः ६४ इतिश्रीवायुपुराणीयमाघमाहात्म्यटीकायांषष्ठोऽध्यायः ६
अस्मिन्नध्यायेस्नानादिकर्मसुअत्यंतपुण्यप्रदस्थानानि कानिचिद्दतानिच नारदायब्रह्माकथयति माघस्नानमिति १ कावेर्यांतुलास्नानं

योनसीपुष्पमालाभिः सप्तम्यामर्चयेद्धरिम् भस्मसाद्यांतिपापानि इंधनानीववन्हिना ५८ चतस्रास्तिथयोगो-
व्यादुर्लभात्यक्तात्मनाम् द्वादशीसप्तमीपूर्णातथाशुक्लात्रयोदशी ५९ भुक्ताद्विवारंसप्तम्यांमाघेस्याद्वाय
सोध्रुवम् अस्नात्वाचाप्यदत्वाचयस्यगच्छतिसप्तमी ६० सतुचांडालतामेतिसप्तजन्मसुनिश्चितम् अस्ना
त्वाचाप्यदत्वाचमाघेचेयंगतायदि ६१ पापननश्यतेभूयः कल्पकोटिशतैरपि माघेतुरथसप्तम्यांगुप्तदान
करोतियः ६२ तस्यविष्णुः स्वयंदातुजागरूकोभवत्यलम् एष्टव्याबहवः पुत्रायद्येकोपिगयांव्रजेत् ६३
माघेतुरथसप्तम्यामन्नंदद्याद्द्विजातये वांछांकुर्वंतिपितरएकोवास्मत्कुलेत्विति ६४ इतिश्रीवायुपुराणे
माघमाहात्म्येषष्ठोऽध्यायः ६ ॥ ७ ब्रह्मोवाच माघस्नानंप्रयागेतुप्रशंसंतिमनीषिणः तुलास्नानं
तुकावेर्यांप्रशस्तमितिमेमतिः १ मेषस्नानंतुरेवायांतुंगायांकर्कटेतथा स्थानान्येतानिशस्तानिप्रातःस्नाने-
षुनारद २ नद्यःसमुद्रगाःसर्वास्तासुस्नानंप्रशस्यते त्रिरात्रयज्ञफलदायाःकाश्चिदसमुद्रगाः ३ यच्छंतिप
क्षसवनफलंसागरगाः पृथक् सागरोमाससवनफलदःसरितांपतिः ४ कार्तिकस्नानं मेषस्नानंवैशाखस्नानंरेवायांनर्मदायां
कर्कटके आषाढेस्नानंतुंगायांप्रशस्तमितिमेमतिरस्तिइत्यन्वयः तस्मात्एतानिप्रयागादीनिमाघादिसंबंधिप्रातःस्नानेषुअत्यंतशस्तानि २ अन्या
न्यपिस्नानानिफलतारतम्येनप्रशस्तानिसंतीत्याह नद्यइति त्रिरात्रयज्ञफलदाः त्रिरात्रसाध्ययज्ञफलंददातिइति ३ पक्षसवनस्यफलंपक्ष[illegible]
ध्ययज्ञफलंयच्छंतिददति ४

सरस्वतीवसंतयागफलदा ५ वैश्यइतिकालिंद्यांमाघस्नानेनविकुंडलोवैश्यः श्रीकुंडलेनभ्रात्रासहदिवंस्वर्गंययौ अत्रप्रसिद्धाकथा पाद्मे सहस्रार्जुनंप्रतिदत्तात्रेयउवाच अत्रतेकथयिष्यामिइतिहासंपुरातनम् पुराकृतयुगेराजन्नैषधेनगरेवरे आसीद्वैश्यःकुबेराभोनामतो हेमकुंडलः कुलीनःसत्क्रियोदांतोद्विजवन्हिसुरार्चकः कृषिवाणिज्यकर्तासौ इष्टापूर्त्ततथाकृतम् तथानानाविधैर्वैश्यः उपायैःपरमैस्तदा द्रव्याण्युपार्जयामासअष्टौहाटककोटयः तस्येत्थंवर्त्तमानस्यसंजातौ द्वौसुतौनृप तौतुप्रसिद्धनामानौश्रीकुंडलविकुंडलौ तयोर्मूर्ध्निगृहंत्यक्त्वाजगामतपसेवनम् तपःक्लिष्टशरीरोसौजगामहरिमंदिरम् अथतस्यसुतौराजन् धनमानमदान्वितौ तरुणौरूपसंपन्नौधर्मकर्मविदूरगौ अधर्मनिरतौदुष्टौमद्यस्त्रीरतिमोहितौ क्षयंप्राप्तंधनंसर्वंकुमार्गेणतयोस्तदा द्रव्याभावेपरित्यक्तौवनवासंप्रचक्रतुः मांसाहारपरौतौचएकदानिधनंगतौ शार्दूलेनहतोज्येष्ठः कनिष्ठःसर्पदंशितः दूतानीतौतुतौडस्वायमःप्रोवाचतान्प्रति एकस्तुनीयतांघोरं निरयंतीव्रवेदनम् अपरःस्थाप्यतांस्वर्गेयत्रभोगाह्यनुत्तमाः तदाज्ञांतुसुसंप्राप्य दूतैस्तैःक्षिप्रकारिभिः निक्षिप्तोरौरवेघोरे तत्रज्येष्ठोनराधिप तेषांदूतवरःकश्चिदुवाचमधुरंवचः विकुंडलमयासार्द्धमेहिस्वर्गंददामिते भुंक्ष्वभोगान्सुदिव्यांस्त्वमर्जितान्स्वेनकर्मणा तदाहृष्टमनाःसोपिदूतंपप्रच्छतंपथि विकुंडलउवाच भोदूतवरपृच्छामिसंदेहंत्वामहंपरं आवांजातौकुलेतुल्ये तुल्यंकर्मतथाकृतम् दुर्मृत्युरपितुल्योभूत्तुल्योदृष्टोयमस्तथा कथंसनिरयेक्षिप्तस्तुल्यकर्माममाग्रजः ममभार्यो कथंस्वर्गइतित्वंछिंधिसंशयम् यमदूतउवाच सत्यंवदामितेभीत्यानरःकर्मशुभाशुभम् स्वकृतंभुंजतेवैश्यकालेकालेपुनःपुनः अतस्तुनरकेपापैस्तवभ्रातासुदारुणः त्वंचधर्मेणधर्मात्मन्स्वर्गंप्राप्स्यसिशाश्वतम् शृणुवैश्यप्रवक्ष्यामियत्त्वयापुण्यमर्जितम् जानामितदहंसर्वंनत्वंवेत्सिसुनिश्चितम् हरमित्रसुतोविप्रःसुमित्रोवेदपारगः आसीत्तस्याश्रमःपुण्योयमुनादक्षिणेतटे तेनतस्मिन्वनेस-

गोदाषण्माससवनफलदाचसरस्वती वसंतयागफलदाकालिंदीगोसवप्रदा ५ क्षेपकः (वैश्योविकुंडलः पूर्वंकालिंद्यांमाघमज्जनात्

ख्यंजातंतवविशांवर तत्संगेनत्वयास्नातंमाघमासद्वयंतथा कालिंदीपुण्यपानीयेसर्वपापहरेशुभे एकेनसर्वपापेभ्योविमुक्तस्त्वंविशांवर द्वितीयमाघपुण्येनप्राप्तःस्वर्गस्त्वयानघ त्वंतत्पुण्यप्रभावेनमोदस्वसुचिरंदिवि नरकेषुतवभ्रातासहतांयमयातनाम् छिद्यमानोसिपत्रैश्चभिद्यमानश्चमुद्गरैः चूर्ण्यमानःशिलापृष्ठैस्तप्तांगारेषुभर्जितः इतिदूतवचःश्रुत्वाभ्रातृदुःखेनदुःखितः पुण्यपापगतिंबुध्वादेवदूतमुखात्ततः उवाचदेवदूतंतंदीनोसौविनयान्वितः देवदूतततोब्रूहि कारुण्यान्ममपृच्छतः नरकान्निर्गतिःसद्योभ्रातुर्मेजायतेकथम् यमदूतउवाच यत्तुवैश्याष्टमेपुण्यंत्वयाजन्मनिसंचितं तत्भ्रात्रेदीयतांशीघ्रंतस्यस्वर्गंयदीच्छसि विकुंडलउवाच किंतत्पुण्यंकथंजातंकिंजन्माहंपुराभवम् तत्सर्वंकथ्यतांदूततच्चदास्यामिसत्वरम् दूतउवाच शृणुवैश्यप्रवक्ष्यामितत्पुण्यंचसहेतुकम् पुरामधुवनेपुण्येमुनिरासीच्चशाकुली जज्ञिरेतस्यरेवत्यांनवपुत्राग्रहाइव ध्रुवःशशीबुधस्तारोज्योतिष्मानत्रपंचमः अग्निहोत्रपरास्त्वेतेगृ-

सर्वपापविनिर्मुक्तःभ्रात्रासहदिवंययौ १)

हधर्मेषुरेमिरे निर्मोहोजितमायश्चध्यानकामोगुणातिगः एतेगृहवियुक्तास्तुचत्वारोद्विजसूनवः चतुर्थाश्रमसंपन्नास्तथाग्रामैकवासिनः एवंतेतवविप्रस्यपूर्वमष्टमजन्मनि तिष्ठतोमत्स्यदेशेषुपुत्रदारकुटुंबिनः गेहंतावकमाजग्मुर्मध्यान्हेक्षुत्पिपासिताः वैश्वदेवोत्तरेकालेत्वयादृष्टागृहागते प्रणम्यचरणौस्पृष्ट्वाकृत्वापाणिपुटांजलिम् तदाभिनंदिताःसर्वेत्वयासूनृतयागिरा ततःसंपूज्यतेषांतुचरणक्षालनंत्वया धृतंमूर्ध्निचपादोदं श्रद्धयापरयातदा यतिपादोदकंवैश्यहंतिपापंपुराकृतम् संपूज्यसंस्कृतैरन्नैर्भोजितायतयस्त्वया तृप्ताःपरमहंसास्ते विश्रांतामंदिरेनिशि इतितेसंचितंपुण्यमष्टमेपूर्वजन्मनि स्वभ्रात्रेदेहितत्पुण्यंनरकाद्येनमुच्यते इतिदूतवचःश्रुत्वाददौपुण्यंससत्वरम् हृष्टेनचेतसाभ्रात्रेनिरयात्सोपिनिर्गतः देवैस्तौपुष्पवर्षेणपूजितौचादिवंगतौ ताभ्यांचपूजितःसम्यग्गतोदूतोयथागतमिति १

* * * * * *

पद्माकरः महासरोवरंरथक्रांतसवनस्याविश्वजिद्यज्ञस्य ६ देवखातंदेवकुंडंसंक्रांतिफलदंसंक्रांतिकालसाध्ययज्ञफलदंतडागं अल्पसरोवरं ७ ८ सप्तनदीसंगेगोदावर्याःसप्तभिर्मुखैःसमुद्रेणसहसंगमे ९ १० कास्ताःसप्तगंगाइत्याह जान्हवीतिवेणीकृष्णा

जान्हवीवत्सराख्यस्ययज्ञस्यफलदामता पद्माकरोरथक्रांतसवनस्यफलप्रदः ६ तयासंक्रांतिफलदंदेवखातमुनीश्वर सौत्रामण्याश्वफलदंतडागंपल्वलंतथा ७ बहिर्वाप्योप्यवभृथफलदाःपरिकीर्तिताः तत्तस्थानफलंयस्तुमाघेकोटिगुणंभवेत् ८ माघेसप्तनदीसंगेस्नानंयःकुरुतेनरः राजसूयाश्वमेधानांफलंप्राप्नोत्यसंशयः ९ यःकुर्यात्सप्तगंगासुयथाप्राप्तासुमानवः माघस्नानंमुनिश्रेष्ठतस्यपुण्यमनंतकम् १० जान्हवीवृद्धगंगाचकालिंदीचसरस्वती कावेरीनर्मदावेणीसप्तगंगाःप्रकीर्तिताः ११ माघेमासिसकृत्स्नात्वागोमत्यांकृष्णासन्निधौ सायुज्यपदवींयातिदुरापामकृतात्मनाम् १२ योमाघेप्रातरुत्थायगोमतींसंस्मरेद्यदि सगोमतीस्नानफलंप्राप्नोतिकिमुसेवया १३ क्षणमात्रंवसेद्यस्तुगोमत्यांकृष्णसन्निधौ माघेमासिमुनिश्रेष्ठसयोगीभवतिध्रुवम् १४ कावेर्यांमाघमासेतुमकरस्थेदिवाकरे त्रिरात्रस्नानमात्रेणमुच्यतेपापकोटिभिः १५ कावेरीसलिलेस्नात्वामाघमासेद्विजोत्तम ब्रह्महत्यासहस्रैर्वामुच्यतेनात्रसंशयः १६ माघेपुष्करमासाद्ययःस्नानंकर्तुमिच्छति तावतामुच्यतेपापैःकिमुस्नानेमुनीश्वर १७ प्रभासेस्नानमात्रेणमाघेमकरगेरवौ सविश्वजिद्यज्ञफलंदिनमात्रेणगच्छति १८ माघेत्विंदुक्षयेविप्रगोकर्णेसागरेतुयः स्नानंक्रतुशतफलं सर्वकर्मविमोचनम् १९

११ अकृतात्मनांकृतःज्ञातः आत्मापरमात्मायैः तेकृतात्मानः तद्भिन्नाः अकृतात्मानः तेषामकृतात्मनां १२ १३ १४ १५ वानिश्चयेन १६ स्नानेकृतेसति १७ गच्छतिप्राप्नोति १८ स्नानंकुर्यात् तस्यक्रतुशतफलंयज्ञशतस्यफलंसर्वकर्मविमोचनंसर्वकर्मबंधेभ्योविमोचनंचभवति १९

कुरुक्षेत्रेऽर्थात् गंगायांस्नानंकुर्यात् २० २१ सरोवरेपुष्करे २२ २३ चिदभ्रस्यद्राविडदेशेचिदंबरइतिप्रसिद्धस्य २४ २५ श्वित्रीकुष्ठीरोगात्कुष्ठात् २६ आपूज्यआसम्यक्पूजयित्वा २७ मघासहायेमघासहायात्अनुकूलायस्यतस्मिन्मघानक्षत्रयुक्तेदिनेदुग्धनदीजलेफल्गुनद्याजलेपूज्यसंपूज्यसत्याभामेतितत्र्संपदस्यलोपः छांदसत्वाद्वा २८ २९ तथास्नात्वाब्रह्मेश्वरेब्रह्मेश्वरनामकेरौद्रेरुद्रस्वामि

कुरुक्षेत्रेतुयः कुर्यात्सप्तम्यांभानुवासरे संपूज्यमाधवंदेवंकुष्ठरोगाद्विमुच्यते २० योभानुरथसप्तम्यांपुष्करे मकरेरवौ स्नात्वासंतर्प्यपितॄंश्चमुच्यतेपैतृकादृणात् २१ स्नात्वांगारचतुर्दश्यांमाघेमासिसरोवरे शालग्रामशिलांदत्वामुच्यतेचऋणत्रयात् २२ माघेमाधवमभ्यर्च्यस्नात्वामाध्वसरोवरे सवत्सांगांतथादत्वागोसहस्रफलंलभेत् २३ योवाभ्रसरसिस्नात्वामाघेभौमाष्टमीदिने नभूयोजायतेक्वापिचिदभ्रस्यप्रसादतः २४ माघेशुक्लत्रयोदश्यांपर्वतेश्वेतनामके स्नात्वाचश्वेतसरसिश्वेतद्वीपेवसत्यसौ २५ माघेहस्तिगिरौयस्तुस्नात्वानंतसरोवरे दत्वाचश्वेतप्रतिमांश्वित्रीरोगाद्विमुच्यते २६ मूकांबिकेगिरौयत्रस्नात्वाकामसरोवरे बालदुर्गांतथापूज्यसर्वसिद्धिमवाप्नुयात् २७ माघेमघासहायेतुस्नात्वादुग्धनदीजले क्षीराब्धिशायिनंपूज्यतेनसायुज्यमाप्नुयात् २८ माघेपैठिनासिक्षेत्रेगोदायांस्नानकृन्नरः पिप्पलेशप्रसादेनसज्ज्ञानीजायतेभुवि २९ ब्रह्मेश्वरेतथारौद्रक्षेत्रेगोदानदीतटे स्नात्वाब्रह्मेश्वरंलिंगंदृष्ट्वामोक्षमवाप्नुयात् ३० राकायांमाघमासेतुश्रीकृष्णासागरेद्विज

केक्षेत्रेविद्यमानः ३० श्रीकृष्णाचसागरश्चानयोःसमाहारः श्रीकृष्णासागरंतस्मिन्श्रीकृष्णा समुद्रसंगमेइत्यर्थः माघमासेतीर्थस्नानप्रसंगेनान्यतीर्थानामपिफलविशेषमाह पाद्मे सप्तजन्मकृतंपापंवर्तमानंचपातकं माघस्नानंदहेत्सर्वंपुण्यतीर्थेविशेषतः प्रायश्चित्तंनपश्यंति यस्मिन्पापेमुनीश्वराः पातकंपुण्यतीर्थेषुनश्येत्तदपिमाघतः ज्ञानकृन्मानसेमाघस्तस्मान्मोक्षफलप्रदः हिमवत्पृष्ठतीर्थेषुसर्वपापप्रण

शनः इंद्रलोकप्रदोऽच्छोदेनिर्दिष्टोवेदवादिभिः सर्वपापहरोमाघोमोक्षदोबदरीवने पापहादुःखहारीचसर्वकामफलप्रदः रुद्रलोक
नार्मदःपापनाशनः यामुनःसूर्यलोकायभवेत्कल्मषनाशनः सारस्वतोघविध्वंसीब्रह्मलोकफलप्रदः विशालफलदोप्र
यशालायांद्विजोत्तम पातकेंधनदावाग्निर्गर्भहेतुक्रियापहः विष्णुलोकायमोक्षायजान्हवःपरिकीर्तितः शरयूगंडकीसिंधुश्चंद्रभागा
चकौशिकी तापीगोदावरीभीमापयोष्णीकृष्णावेणिका कावेरीतुंगभद्राच अन्यायाश्चसमुद्रगाः आशमाघीनरोयातिस्वर्गलो
कमषः नैमिषेविष्णुसायुज्यंपुष्करेब्रह्मणोंतिकः आखंडलस्यलोकोहिकुरुक्षेत्रेतुमाघतः माघोदेवन्हदेविप्रयोगसिद्धिफलप्रदः प्र
भासेमकरादित्येस्नानाद्रुद्रगणोभवेत् देवक्यांदेवतादेहोनरोभवतिमाघतः माघस्नानेनभोधिप्रगोमर्त्यानपुनर्भवः हेमकूटेमहाका

स्नात्वाश्चेनवराहंतुदृष्ट्वामोक्षमवाप्नुयात् ३१ स्नानाशक्तोमाघमासिपरिधायचवाससी प्रयागस्मरणंकृ
त्वामाघस्नानफलंलभेत् ३२ क्षेपकः (योराजसूयाश्वमेधयज्ञतःस्नानात्फलंसंप्रददातिचाधिकम् पापानि
सर्वाणिविलोप्यलीलयानूनंप्रयागःसकथंनवर्ण्यते १) लेश्वोंकारेअमरेश्वरे नीलकंठेर्बुदेमाघाद्रुद्रलोकेमहीयते

सर्वासांसरितांविप्रसंगमेमकरेरवौ स्नानेनसर्वकामानामवाप्तिर्जायतेनृणामिति ३१ वाससी धौतवस्त्रे ३२ यःप्रयागः सर्वाणिपा
पानिलीलया विलोप्य दूरीकृत्य राजसूयाश्वमेधाभ्यामधिकंफलंस्नानात् स्नानमात्रेणनूनंसंप्रददाति सप्रयागः कथंनवर्ण्यतेअत्र
:पाद्मे अवंतिविषयेराजावीरसेनोभवत्पुरा नर्मदातीरमागत्यराजसूयंचकारसः षोडशैरश्वमेधैश्चस्वर्णचाटविराजितैः स्वर्ण-
भूषणरूप्याद्यैरीजेसोपियथाविधि ब्राह्मणोभद्रकोनाममूर्खोहीनकुलस्तथा कृषीवलोदुराचारः सर्वधर्मबहिष्कृतः
सुहृद्भिर्बंधुभिस्त्याज्यसंस्कृतः इतस्ततःपरिभ्रम्यनिर्गतःक्लमपीडितः दैवतैःसार्द्धमावेश्यप्रयागंससमागतः महामाघींपुरस्कृत्य
अनघःस्नानमात्रेणभूत्वेहसद्विजोत्तमः प्रयागाच्चलितस्तत्रपुनर्यस्मात्समागतः सराजासोपिविप्रश्चविपन्नावेक

दातदा तयोर्गतिः समादृष्टामयाशक्रस्यसन्निधौ इतिदृष्टंहिमाहात्म्यंक्षेत्रस्यकथमुच्यते माघःसितासितेविप्रराजसूयैः समोमया माघस्त
प्राप्यतेधन्यैः प्रयागेद्विज सत्तम अपुनर्भवदंतत्रसितासितजलंयतः गायंतिदेवाः सततंदिविस्था माघः प्रयागेकिलनोभविष्यति स्नानान्नराय
त्रनगर्भवेदनांपश्यंतितिष्ठंतिचविष्णुसन्निधौ स्नाताश्चयेमकरभास्करोदये तीर्थेप्रयागेसुरसिंधुसंगमे तेषांगृहद्वारमलंकरोतिकिंभृंगावलिः

प्रयागदर्शनान्मुक्तिर्नजानेस्नानजंफलम् तत्रापिमाघमासश्चेत्कोवावर्णयितुंक्षमः ३३ प्रयागेमाधवंदृष्ट्वामा
घेस्नात्वापितॄनथ उद्दिश्यकृत्वाश्राद्धंचकृतकृत्योभवेन्नरः ३४ व्यतीपातेरवौमाघेब्राह्मणान्भोजयेद्यदि
पायसंघृतयुक्तंचवंध्यापुत्रमवाप्नुयात् ३५ माघमासेभानुवारेरविग्रहशताधिके माघेमकरगेभानौभानुवारो
विशिष्यते ३६ तत्रसूर्यगतंविष्णुंपूज्यकामानवाप्नुयात् रविवारेकृतस्नानरात्रौभोजनवर्जितम् ३७ पायसं
भोजनंदत्वाब्रह्महत्यांव्यपोहति यःशुक्रवारेचाष्टम्यांस्नात्वामाधवपूजनम् ३८ माल्लिकाकुसुमैःकृत्वालक्ष्मी
स्थैर्यमवाप्नुयात् योमाघेकुजपंचम्यांमाधवंमालतीस्रजा ३९ संपूज्यादकदानानिकृत्वामृत्युंजयेन्नरः अ·
त्रैवोदाहरंतीममितिहासंपुरातनम् ४० कालमृत्युहरंसौम्यंमहापातकनाशनम् पुरासौवीरदेशेषुनाम्नाव-
सुमतिर्बली ४१ तस्यासीत्तनयोनाम्नाविचित्ररथइत्यथ शस्त्रविद्यासुनिष्णातोवृद्धसेवीबलान्वितः ४२
बालारुणसमप्रख्योद्वितीयइवभास्करः तासितातुदिशोजित्वाकृत्वाविश्वजितंमखम् ४३ कुंजरकर्णताडिता इ-

ति १ वानिश्चयेन ३३ ३४ ब्राह्मणान्घृतयुक्तंपायसंयदिभोजयेत् ३५ तस्मात्माधवमासेविद्यमानेभानुवारेरविग्रहशताधिकेसूर्यग्रह
णशतादधिकफलप्रदे ३६ तत्रभानुवारेपूज्यसंपूज्यउपसर्गाभावश्चार्षः कृतस्नानंकृतंप्रातःस्नानंयेनसः भोजनवर्जितंभोजनंवर्जितंयेन
तंब्राह्मणंप्रतिरविवारे ३७ पायसंपयसायुक्तं ३८ यःकश्चिदपि ४० ४१ ४२ प्रख्यः स्वच्छः ४३

४४ यज्ञस्यार्थेभिक्षार्थेद्रव्ययाचनायवसुमतिं आजगाम ४५ पूज्यसंपूज्यहेमुनेतेतपसःस्वस्त्यस्तिकच्चिदितिकुशलंपप्रच्छ ४६
४७ भ्रमरायते भ्रमरइवाचरति भवदागमनंभवतामागमनकारणंमह्यमुपदिश्यकथयित्वा ४८ ४९ कोट्यःप्रथमाद्वितीयार्थे ५०

सर्वस्वंदक्षिणांदत्वासोभूत्पूर्णमनोरथः एतस्मिन्नंतरेकालेमुनिर्गृत्समदाह्वयः ४४ आजगामसभिक्षायै
यज्ञस्याध्वरदीक्षितः मुनिंवसुमतिर्दृष्ट्वाप्रत्युत्थायार्घ्यपाद्यकैः ४५ पप्रच्छकुशलंपूज्यस्त्वास्तितेतपसोमुने
अद्यमेसफलंजन्मपावितंसकलंकुलम् ४६ यत्त्वांघ्रियुगांभोजंदैवाद्दृष्टिपथंगतम् अद्यमेपितरस्तुष्टाःसु
कृतंफलितंमम ४७ यत्त्वांघ्रियुगांभोजेमन्मूर्धाभ्रमरायते भवदागमनंमह्यमुपदिश्यानुगृह्यताम् ४८ इतित
द्वचनंश्रुत्वामुनींद्रोवाक्यमब्रवीत् आगमंयज्ञभिक्षार्थंतद्दातव्यंनृपत्वया ४९ कोट्यस्तिस्रस्तदादत्वाप्राहि
णोदाश्रमायच मुनींद्रंभोजयामासशांतंगृत्समदंमुदा ५० भुक्तोपविष्टेतुष्टेचपुनःप्रपच्छतंमुनिं सुतस्नेहा
ज्ज्ञातकतुमायुर्दृष्ट्यभिकाक्षया ५१ इतिपृष्टस्तदाराज्ञाकिंचिद्ध्यात्वाजगादह अयंपुनःपूर्वभवेसुशर्मानाा
मवैद्विजः ५२ सुमतस्यात्मजःप्राज्ञःस्त्रीजितःस्त्रीवशोस्थितः पितासन्यस मानःसन्भार्यांपुत्रेनिधायच
५३ ताम्रपर्णीनदींप्राप्यमोक्षमार्गमुपेयिवान् ततःस्वभार्यावचनंश्रुत्वामातुःकरोतिच ५४ विरोधंभर्त्सना
द्यैश्चक्रुद्धोनिंदतिदुःखिताम् नप्रयच्छतिचाहारंदुःखान्मृतिमवापसा ५५ दोषात्षष्टितमोविप्रोत्यल्पायुष्य
मवापच चत्वारिंशत्समायुष्यमवशिष्टमभूत्तदा ५६ तथापिमातृद्रोहेणमृतोसावपमृत्युना इदानींत्वत्सुतो
भूत्वानीतमायुश्चशेषितं ५७ इतोयामत्रयादूर्ध्वंमरिष्यतिनसंशयः इतितद्वचनंश्रुत्वाराजाशोकपरायणः ५८

५१ पूर्वभवेपूर्वजन्मनि ५२ ५३ मातुर्विरोधम् ५४ ५५ दोषात्तद्दोषात् षष्टिसमः षष्टिसमावर्षाणियस्यसः ५६ ५७ ५८

गृत्समदऋषिंययाचेप्रार्थितवान् ५९ शिवोक्तंशिवेनशंकरेणोक्तं उपायंतंराजानं ६० गिरिजाकृते पार्वत्यर्थंशिवोक्तमुपायं ६१ आढका
नितुवरीः तुरीइतिख्याताः ६१ त्वमिच्छसिपुत्रस्यहस्तेनदेहि तवपुत्रइतिशेषः ६३ अद्यैवकुजपंचम्यांस्नाप्यस्नापयित्वा ६४ तस्ना
यित्वा तेनपूजयित्वा ६५ ६६ राजपुत्रस्यायुष्यंराज्ञास्तूयमानः ६७ ६८ कृष्णाव्रतपूर्वकाणि शरीरंकर्षतीतिकृष्णंतच्च तद्व्रतंकृ

पादौप्रगृह्यब्रह्मर्षेर्बहुधाप्राप्यदुःखितः ययाचेस्वसुतस्यायुरभिवर्धयितुंपुनः ५९ इतिचाभ्यर्थितोराज्ञामु-
निश्चिंतापरायणः स्मृत्वाशिवोक्तंपार्वत्यैतंजगादकृपाकरः ६० शृणुभूपप्रवक्ष्यामिशिवोक्तंगिरिजाकृते योमा
घेकुजपंचम्यांस्नात्वामाधवपूजनम् ६१ कृत्वाढकानियोदद्याद्गुडखंडयुतानिच बलीवर्दाद्वाहितानिमृत्युंज
यतिनिश्चितम् ६२ राजन्भोस्तवपुत्रस्ययदिकल्याणमिच्छसि एतद्दानंततोदेहिमृत्युंजित्वायुरेष्यति ६३
माघेतुकुजपंचम्यांसुतंस्नाप्यनदीजले दानंदापयशीघ्रंत्वमाविलंबितुमर्हसि ६४ इतितद्वचनंश्रुत्वाराजाच
र्मण्वतीजले स्नापयित्वाविधानेनपूजयित्वाचमाधवम् ६५ तुवरीगुडयुक्ताश्चवृषभोद्वाहितास्तुताः दाप
यामासविप्रायतेनमृत्युर्विनाशितः ६६ षट्षष्टिवर्षमायुष्यंववृधेस्नानदानतः ततोगृत्समदःप्रायात्स्तूयमा-
नःस्वमाश्रमम् ६७ तस्माद्वैकुजपंचम्यांमाघेस्नात्वागुडान्वितं आढकंवृषभेक्षिप्तंदातव्यंहितमिच्छता ६८
माघेतुकृष्णाव्रतपूर्वकाणिकाम्यानिसद्यःफलदानिसत्यं उप्तानिबीजानिफलंतिकालेकालोबलीयानिति
साधुवादः ६९

ष्णाव्रतं कृच्छ्रव्रतमित्यर्थः कृच्छ्रव्रतेति सुगमः पाठः कुतः सद्यः फलदानितत्राह उप्ता-
त यस्माद्योग्यकालेएवउप्तानि बीजानिफलंतितस्मात्कालः सर्वसाधनेषुमध्येबलीयान्बलवत्तरः मुख्यइत्यर्थः एवंचमाघमासका
लस्यात्युत्तमत्वात्तत्र कृतानि कर्माणिनिश्चयेनसद्यःफलदानिभवंतीतिभावः ६९ ७ ७ ७

तस्यतत्कर्मकोटिगुणं ७० तस्मादवश्यंअनुत्तमंनास्ति उत्तमंयस्मादत्यंतमुत्तमंफलमाप्नोति ७१ इतिश्रीवायुपुराणीयमाघमाहात्म्ये टीकायांसप्तमोऽध्यायः ७ छ पुनःपुरातनेतिहासकथनपूर्वकमाघस्नानमाहात्म्यंब्रह्माकथयति वक्ष्यामीति अनुष्ठानवतांमाघस्नानादिकर्तॄणांविमोचनंविमुक्तिकारणं १ निराश्रयःपुण्यरूपाश्रयरहितः वर्णाश्रमविहीनोपिपश्वादिरपि माघस्नानेनमाघस्नानजनितपुण्येन २

निष्कामंवासकामंवा माघेनिर्वर्त्यमानवः मासात्परात्कोटिगुणंफलत्येवनसंशयः ७० अवश्यंकामुकःकृत्वाकाम्यव्रतमनुत्तमम् माघेमासिमुनिश्रेष्ठफलंप्राप्नोतिनिश्चितम् ७१ इतिश्रीवायुपुराणेमाघमाहात्म्ये सप्तमोऽध्यायः ७ छ ब्रह्मोवाच वक्ष्यामिभूयोमाघस्यमाहात्म्यंपापनाशनम् अनुष्ठानवतांनॄणां कर्मग्रंथिविमोचनम् १ जन्मप्रभृतियोमर्त्योदुराचारीनिराश्रयः वर्णाश्रमविहीनोपिमाघस्नानेनमुच्यते २ अत्रैवोदाहरंतीममितिहासंपुरातनम् शृणुतामवधानेनशृण्वतांपापनाशनम् ३ पुराशतबलिर्नामशूद्रोधर्मविवर्जितः लोभीकृषिपरःक्रूरस्तथावार्धुषिकःशठः ४ तेनार्जितंधनंभूरिदानभुक्तिविवर्जितम् जातौतुतनयौतस्यकभद्रोभद्रसंज्ञकः ५ तस्मिंस्तातुमृतिंप्राप्तोनरकंप्रत्यपद्यत तौयुवानौस्वरूपाढ्यौम त्तौधर्मपराङ्मुखौ ६ व्यवायकर्मनिरतौसदाद्यूतपरायणौ स्वैरिणीकांक्षिणौनित्यंचरतोलोकगर्हितौ ७ वनखेटकपल्लीषुनगरीपट्टनादिषु प्रातिलोम्येनपिशुनौवर्णसंकरकारकौ ८ एवंकदाचित्कालेनतद्धनंनिधनंगतं पित्रार्जितंततःपश्चान्निर्धनौतौनराधमौ ९

अत्रैवस्नानपुण्यमाहात्म्यविषयएवइमंवक्ष्यमाणंऋषयउदाहरंतितमितिहासमहंकथयामि सत्वयाशृणुतामितिवाक्ययोजना ३ इतिहासमाहपुरेति वार्धुषिकःवृद्धिजीवी ४ भुक्तिरुपभोगः ५ ६ ७ पल्लीग्रामतिलघुग्रामःनगरीपट्टनादिषुप्रातिलोम्येनजात्युत्तमस्त्रीगमनेनवर्णसंकरकारकौचरतइतिपूर्वश्लोकस्यपदेनसंबंधः ८ पित्रार्जितंतद्धनम् ९

लोकस्यधनसंचयं १० मृगयुधर्मेणपशुवधादिव्याधव्यापारेण ११ १२ १३ विषयांतरंदेशांतरं १४ स्वार्थविवर्जितौस्वधनविवर्जितौ
१५ नीयतुःनिइत्युपसर्गःईयतुरितिक्रियापदंनिन्यतुरित्यर्थः १६ १७ प्रतिश्रुतंपूर्वप्रतिज्ञातंवैद्यस्वंवैद्यस्यदेयंधनम् १८ स्कभद्रावरजं

औषधैर्मंत्रवश्याद्यैःपरदाराभिकांक्षिणौ चौर्यधर्मैर्वनस्थौतौजह्रतुर्धनसंचयम् १० ताभ्यांभीतानराःकेपि
नचरंतिहिपद्धतौ ततोमृगयुधर्मेणचेरतुःपिशिताशनौ ११ तद्वनेपिमृगानासंस्ताभ्यांमृतिमुपागताः संपर्का
त्पापिनोर्भूमावनावृष्टिर्बभूवह १२ दुर्भिक्षमतुलंजातंतद्देशोविजनोभवत् बभक्षतुस्ततोन्यांश्चमहिषादिपुरः
सरान् १३ शुनोवृकान्गर्दभांश्चविड्वराहांश्चकुक्कुरान् तद्देशेतेपिनोलब्धास्ततस्तौविषयांतरम् १४ जग्मतुःपाप
निरतौक्रूरौस्वार्थविवर्जितौ ततःकलिंगदेशेतौप्राप्यचंपापुरींविटौ १५ चौर्यमंत्रौषधाद्यैश्चनीयतुर्दिवसानिच
चंपायांब्राह्मणःकश्चिद्धनुर्वायुप्रपीडितः १६ संप्रार्थयन्चिकित्सार्थंजीवनेच्छुश्चतौतदा तौचक्रतुर्महाव्या-
धिपीडितस्यमहात्मनः १७ चिकित्सामौषधैर्दिव्यैस्तथाव्याधिशमोभवत् ततोविप्रमयाचातेवैद्यस्वंचप्रतिश्रुतं
१८ सविप्रोद्रविणाभावात्स्कभद्रावरजंतदा याचयित्वादापयितुंदौहित्रोपांतिकंययौ १९ ग्रामोनंदिवरोनामपं
चयोजनदूरतः चंपायांब्राह्मणावासोयत्रचंपावतीनदी २० तस्यास्तीरेमहारुद्रश्चंपकेश्वरसंज्ञकः नित्यंसंनिहि
तस्तत्रकलिंगानांकुलेश्वरः २१ दिनानित्रीणिन्यगमंस्तद्ग्रामेभद्रसंज्ञिनः ब्राह्मणाद्द्रविणमादातुंदैवात्कालोबलीय
सः २२ तदासीन्माघमासोपिसर्वधर्मालयोमहान् ब्राह्मणानांप्रसंगेनजातबुद्धिःसपादजः २३

भद्रंगृहीत्वादौहित्रेणधनं
याचयित्वा १९ चंपायांचंपायाःपंचयोजनदूरतः ब्राह्मणावासः बहूनांब्राह्मणानामावासोयस्मिन् २० २१ द्रविणमादातुंइदंपूर्वान्वयि २२
बलीयसः दैवात्प्रारब्धपुण्ययोगात् माघमासःकालोप्यासीत् प्रसंगेनसमागमेनस्नानविषयेजाताबुद्धिर्यस्यसजातबुद्धिः भद्रसंज्ञकःपाद
जःशूद्रः २३

२४ २५ स्कभद्रेणसमन्वितः २६ २७ २८ २९ ३० ३१ ३२ यमकिंकराः संध्यारुणांबरावीतान् संध्याकालिकसूर्यकांतिसदृशैरंबरै-

चंपावत्यांचत्रिदिनंमाघस्नानंचकारसः ततश्चंपापुरींप्राप्यस्कभद्रेणसमन्वितः २४ जन्मभूमिंप्रतिपुनःप्रयाणा
योपचक्रमे गच्छन्मध्याह्नवेलायामरण्येजनवर्जिते २५ श्रांतोभद्रःस्कभद्रेणकस्मिंश्चिद्गिरिगह्वरे उपविश्यक्षणं
किंचिज्जलार्थंचसरोययौ २६ गह्वरस्थोमहाव्याघ्रःस्कभद्रंकालचोदितः कंठेजग्राहभद्रोपिजलमादायसत्वरं
२७ आगतोभ्रातरंदृष्ट्वाव्याघ्रग्रसितमग्रजं विह्वलःखड्गमादायव्याघ्रंहंतुमुपाद्रवत् २८ तंदृष्ट्वाकुपितोव्याघ्रः
तंविहाययथावमुं तंजग्राहगलेतद्वत्सोपिविव्याधखड्गतः २९ त्रयोपिमरणंजग्मुर्व्याघ्रोभद्रःस्कभद्रकः त्रीने-
तान्नेतुकामास्तुयमलोकंयमानुगाः ३० आजग्मुःसहसाक्रूरादंडपाशासिपाणयः पाशैराबध्यतानेतान्ययुर्ध
र्मनिकेतनम् ३१ आज्ञापयत्तदाविष्णुःपार्षदांश्चतुरःशुभान् भद्रमानयत क्षिप्रंमाघस्नानपरायणम् ३२ इत्या
ज्ञप्ताभगवताविष्णुदूताःसमागमन् संध्यारुणांबरावीतांश्चतुर्बाहून्मनोहरान् ३३ दुद्रुवुर्भयतोविप्रतान्दृष्ट्वावि
ष्णुपार्षदान् तानूचुर्भगवद्दासाधर्मज्ञान्यमकिंकरान् ३४ भद्रंमुंचतनिष्पापनायमर्हतियातनाम् इत्युक्तायम
दूतास्तेभगवत्पार्श्ववर्तिभिः ३५ प्रत्यूचुस्तेयमभटाःविस्मयोत्फुल्ललोचनाः नायंपापीदुराचारोभवद्भिर्नेतुमर्हति
३६ भवद्भिर्नेतुमर्हास्तेयेचधर्मपरायणाः अपिसर्षपमात्रोपिधर्मोनानुष्ठितोमुना ३७ इत्युक्ताविष्णुदूतांस्तां
स्तूष्णीमासंस्तदातुते इतितैरुदितेविष्णुपार्षदाःपुनरब्रुवन् ३८ यदियूयंधर्मभटाश्रुतधर्मान्यमोदितान् इत्यु
क्ताविष्णुदूतैस्तेयमोक्तानथाब्रुवन् ३९ ७ ७ ७ ७ ७ ३९

रासम्यक्वीतान्युक्तान् ३३ ३४ ३५ स्वर्गलोकंनेतुंनार्हतिनार्ध्यते ३६ ३७ ३८ ३९

उदितोयोविधिः सः धर्मइतियमेनोच्यते योविरुद्धः सः तद्विपर्ययस्तस्यधर्मस्यविपर्ययःविरुद्धः अधर्मइत्यर्थः ४० येधर्मशब्दवाच्यास्ते-
केइत्याकांक्षायांसामान्यतस्तल्लक्षणमुक्त्वाधर्मशब्दवाच्यांस्तद्विशेषानाहुः येइति ४१ गृहेशालग्रामशिलावर्तते ४२ तस्यविष्णोर्भजनेसेव-
नेआशयश्चित्तवृत्तिर्येषांतेतद्भजनाशयाः ४३ ४४ पारणाविषयेस्वल्पामपिद्वादशींनअतिलंघंतेनोल्लंघंतेइतिद्वादशीनातिलंघिनः पराधी

श्रुतिस्मृतिपुराणाद्यैरुदितोधर्मउच्यते श्रुतिस्मृतिपुराणानांविरुद्धस्तद्विपर्ययः ४० येनित्यकर्मनिरतायेचश्रा
द्धकरानराः प्रातःस्नानरतायेचनतेयांतियमालयम् ४१ येषांगृहेचतुलसीरोपितावर्धतेनिशम् शालग्रामशि-
लावापिनतेयांतियमालयम् ४२ येचविष्णुकथासक्तायेचतद्भजनाशयाः गायत्रीजपनेसक्तानतेयांतियमाल
यम् ४३ सहस्रनामपठनेनिरतास्तोत्रपाठकाः गीतापाठेतुनिरतानतेयांतियमालयम् ४४ एकादशीव्रत-
स्थाश्चद्वादशीनातिलंघिनः दर्शश्राद्धपरायेचनतेयांतियमालयम् ४५ येविष्णोर्दीपदालोकेयेचपुष्पसमर्पि
णः गुग्गुलधूपदातारोनतेयांतियमालयम् ४६ येनमंतिसकृद्वापिविष्णुंनारायणंहरिम् प्रदक्षिणांवाकुर्वंति
नतेयांतियमालयम् ४७ येषांजिह्वावदत्यद्धागोविंदाच्युतमाधव हरेमुकुंदेतिसदानतेयांतियमालयम् ४८
स्वयंधर्मंचरंतश्चपरेषांचप्रवर्तकाः येवेदशास्त्रनिरतानतेयांतियमालयम् ४९ गोदानस्यप्रदातारोगंगायाश्चाप-
रायणाः गोपीचंदनलिप्तांगानतेयांतियमालयम् ५० येसायमतिथिंप्राप्तंभोजयंतिस्वशक्तितः येमातृपितृभक्ता
श्चनतेयांतियमालयम् ५१ येषांगृहेभागवतंलिखितंवर्ततेयदि गीतायाःपुस्तकंवापिनतेयांतियमालयम् ५२

नतादिसंकटेनकदाचिद्द्वादशीलंघनेतुनदोषइतिबोध्यं ४५ ४६ ४७ ४८ ४९ ५० अतिथिलक्षणमुक्तंमार्कंडेयपुराणे अज्ञातकुल
नामानंतत्कालसमुपस्थितं बुभुक्षमागतंश्रांतंयाचमानमकिंचनं ब्राह्मणंप्राहुरतिथिंसंपूज्यः शक्तितोबुधैरिति ५१ ५२

५३ घृतसमन्वितंपयोघृतंचेत्यर्थः ५४ ५५ जागरमिति एकादशीसंबंध्युपोषणस्यांगभूतंजागरं ५६ आद्येमासेश्रावणेशाकविवर्जिताः शाकेनशाकभोजनेनवर्जितायेदधित्यक्तंपैस्ते ५७ बहुबीजानिफलानिद्विदलानिधान्यानि अत्रपयोबहुबीजानिद्विदलानीतिचप्रथमास्तृतीयार्थाः तैरित्यर्थः विवर्जिताः जयंतीव्रतनिरताः ५८ गुप्तदायिनः गुप्तदानकर्तारः ५९ धात्रीधात्रीमालां ६० आदिशब्देनानुक्तानपिकांश्चिद्धर्मान् तत्प्रसंगेनाधर्मोप्याह पाद्मे मनसाकर्मणावाचासर्वावस्थासुसर्वदा परपीडांनकुर्वंति नतेयांतियमालयं मशकान्

येचमाधवपूजार्थंगोमयेनोपलिप्यच रंजयंतिचपद्माद्यैर्नतेयांतियमालयम् ५३ येवाशिशुभ्योयच्छंतिपयो घृतसमन्वितम् येवापर्यंकदालोकेनतेयांतियमालयम् ५४ तुलसीमृदमालिप्ययेवास्नानंप्रकुर्वते ललाटेतिलकंवापिनतेयांतियमालयं ५५ एकादश्यांप्रकुर्वंतिजागरंकेशवालये येवारामकथास्नातानते॰ ५६ चातुर्मास्यव्रतेप्राप्तेआद्येशाकविवर्जिताः दधित्यक्ताद्वितीयेतुतृतीयेतुपयस्तथा ५७ चतुर्थेबहुबीजानिद्विदलानि विवर्जिताः जयंतीनिरतायेचनतेयांति॰ ५८ येगुप्तदायिनोलोकेग्रीष्मेचजलदायिनः शीतेकंबलदायेचन॰ तेयां॰ ५९ तुलसीमणिमालांतुयेबिभ्रतिगलेमुदा पद्माक्षमालांधात्रींवानतेयां॰ ६० इत्याद्याबहवोधर्मा अस्माकंतुप्रमोदिताः

मत्कुणान्दंशान्मूकादिप्राणिनस्तथा आत्मौपम्येनरक्षंति नतेयांतियमालयं सुस्नातःसर्वतीर्थेषु सर्वयज्ञेषुदीक्षितः अजयंयेनभूतेभ्योदत्तमत्रविशांवर निजान्निजांश्चशास्त्रोक्तान्वर्णधर्मानमिश्रितान् पालयंतीहयेमर्त्यानते ब्रह्मचारीगृहस्थश्चवानप्रस्थोयतिस्तथा स्वधर्मनिरताःसर्वेनाकपृष्ठेवसंतिते इष्टापूर्तरतायेचपंचयज्ञरताश्चये दवनाश्चयेनित्यंनेक्षंतेतेयमालयं अनाथस्त्रीद्विजार्थेचशरणागतपालने प्राणान्त्यजंतिमेवैश्य तेमोदंतेसदादिवि पंग्वंधबालवृद्धानांरोग्यनाथदरिद्रिणां येपुष्णंतिसदावैश्यनच्यवंतेदिवस्तुते गोग्रासंयेप्रयच्छंतिशुश्रूषंतिचगांसदा येनारोहंतिचगोपृष्ठेतेस्युः

स्वर्लोकवासिनः अश्वत्थमेकंपिचुमंदमेकंन्यग्रोधमेकंदशाचिंचिणीश्च कपित्थबिल्वामलकत्रयंच पंचाम्रवापीनरकंनपश्येत् प्रसंगेना
पिमोहेनदंभेनापिहिलोभतः येसेवंतेमहादेवंनतेपश्यंतिभास्करीम् द्रव्यमन्नंफलंतोयंशिवस्वंनस्पृशेत्क्वचित्
पेसर्वंचतत्क्षिपेत् माक्षिकापादमात्रंहिशिवस्वमुपजीवति मोहाल्लोभात्सपच्येतकल्पांतंलभतेनरः येधर्ममठगोशालाःपथिविश्राममं
दिरम् यतीनांसदनंवैश्यदीनानांचकुटीरकम् ब्रह्मशालांचविपुलांब्राह्मणस्यचमंदिरम् रक्षायांतिविशांश्चेव इंद्रस्यभवनंनराः

नतेष्वयंकिंचिदपिकृतवान्भद्रसंज्ञकः ६१ कथंचायंभवद्भिस्तुनेतुमर्हतिपापधीः नयामैनंवयंमूढंभव
त्तेजोहृतावयम् ६२ इतितेषांवचःश्रुत्वाविष्णुदूतास्तथाब्रुवन् विस्मृतोयंकिमर्थंवानोक्तवान्धर्मराडिमं
६३ अयंभद्रःकृतस्नानोमाघेमासिदिनत्रयम् माघस्नानंहिपापानांप्रायश्चित्तंपरंस्मृतम् ६४ नचास्मि
न्पापलेशोस्तिनायमर्हतियातनाम् तस्मादेनंविमुच्यैवयूयंगच्छतसत्वरम् ६५ इतितैरुदितेमार्गेय
मदूताविहायच भद्रस्कभद्रोव्याघ्रश्चद्वौशिष्टौनेतुमुद्यताः ६६ तेविष्णुदूतास्तंभद्रमाधिरोप्यचपुष्पके
आदायगंतुमुद्युक्ताभद्रोवैवाक्यमब्रवीत् ६७ भ्रातरौतुल्यपापौनौव्याघ्रोयंप्राणिहिंसकः तन्मध्येस्त
गतिर्मेद्यतयोर्वादुर्गतिःकथम् ६८

जीर्णोद्धारेणचैतेषांतत्फलंद्विगुणंभवेत् तद्भंगंयस्तुयःकुर्यात्सगच्छेन्निरयंध्रुवम् दे
वविप्रयतीनांचगवांचैवाधिपत्यकम् यःकरोतिविमूढात्मासयातिनरकंचिरम् तीर्थेप्रतिग्रहस्त्याज्यस्त्याज्योधर्मस्यविक्रयः दुर्जरं
पातकंतीर्थेदुर्जरश्चप्रतिग्रहः तीर्थेषुदुर्जरंसर्वंतस्मात्सनरकंव्रजेत् किमत्रबहुनोक्तेनयात्यधर्मेणदुर्गतिम् आरोहंतिदिवंधर्मै
र्नराःसर्वत्रसर्वदेति ६१ ६२ धर्मराड्यमः युष्मान्प्रतिइमंमाघस्नानइमंरूपंधर्मंकिमर्थंनोक्तवान् यमेनोक्तोयंधर्मोयुष्माभिर्वि-
स्मृतोवेतियोजना ६३ ६४ ६५ मार्गेधर्ममार्गे ६६ ६७ ६८ ६९ ७०

वैषम्यंकिमर्थं ६९ ७० ७१ कर्मचिताःकर्मभिश्चिताःसंपादिताः ७२ लोकाःभवंतीतिशेषः ७३ तत्रकर्मत्रयमध्येसत्कर्मणा
७४ स्नानात्स्नानेनपुण्यमर्जितमितिपूर्वेणान्वयः ७५ तवइयंगतिःगच्छतांदुःखमितिशेषः ७६ ७७ विमुच्यथविमुंचयेत्य-

वैषम्यंभवतांवापितदेतद्वक्तुमर्हथ नाहमेतत्करवंमन्येसहायौतौविहायच ६९ तस्मात्सहायावानयतमां
विमुच्याथगच्छत इत्युक्तास्तेविष्णुदूताभद्रवाक्यमथाब्रुवन् ७० शृणुभद्रप्रवक्ष्यामोलोकावैत्रिविधामताः
अधोमध्योर्ध्वसंस्थास्तेत्वधोलोकास्तुनारकाः ७१ मध्यलोकाश्चस्वर्गाद्याश्चोर्ध्वंसत्यादयोमताः सर्वे
लोकाःकर्मचितास्तत्कर्मत्रिविधंमतम् ७२ पापंचकाम्यधर्मश्चनिष्कामोधर्मएवच पापेननिरयालोकाःकाम्येन
चस्वरादयः ७३ निष्कामेनैवसत्यादिरितिवेदविदांमतं त्वयातत्रार्जितंपुण्यंब्राह्मणानांसमागमात् ७४
दिनत्रयमाघमासेस्नानात्तेनेदृशीगतिः पापमेवार्जितंताभ्यांनपुण्यंलेशमात्रकम् ७५ ततोगतिस्तयोर्भिन्ना
तवचेयमुपागता अतोभद्रत्वरंगच्छगच्छतांतौचपापिनौ ७६ इत्युक्तोविष्णुदूतैस्तुभद्रोदैन्याद्याब्रवीत्
साधूनांसमचित्तानांयेजनाश्चपुरोगताः ७७ नतेषांदुर्गतिःक्वापितस्मादेतौविमुच्यथ इत्युक्तास्तेतु
भद्रेणविष्णुदूतास्तमब्रुवन् ७८ दयाचेदस्तितेपुण्यंदिनद्वयसमुद्भवम् माघस्नानात्तयोर्देहितयोर्मुक्तिर्भविष्यति ७९ इतितेषांवचःश्रुत्वाभद्रःपुण्यंददौतयोः तेनपुण्यप्रभावेनतौमुक्तौयमपाशतः
८० तयोर्विमानेसंप्राप्तेउद्यदादित्यसन्निभे दयालूनांस्वभावोहियाप्रहर्तरिसत्क्रिया ८१ शार्दूलस्यततो
भद्रोददौपुण्यमनुत्तमम् विष्णुदूतैस्तथात्तमस्त्रयस्तेगतकिल्बिषाः ८२

र्थः विमुंचतेतिपाठोयुक्तः ७८ माघस्नानाद्दिनद्वयसमुद्भवंदिनद्वयेसमुद्भवं ७९ ८० हियस्मात्प्रहर्तर्यपिप्राणहंतर्यपि यासत्क्रियासदाचरणंसदयालूनांस्वभावएवास्ति ८१ ८२

वयंनयामः नगच्छामः ८३ यूयंकुतोनगच्छथेत्यतआह स्वर्गइतिनगच्छामइतिचेत्तर्हियूयं कंलोकंगंतुमिच्छथेत्यतआहुः युष्मदिति पुण्यात्स्नानजनितपुण्यात् ८४ अवाप्नुमःप्राप्स्यामः ८५ इतितैर्विज्ञापिताविष्णुदूताइतिउत्तरश्लोकस्थपदेनसंबंधः तेभ्योजन्मदत्वा ८६ ८७ ८८ इमंपूर्वोक्तमितिहासंगोप्यंविद्धीतिशेषः ८९ इदंस्नानमाहात्म्यं ९० इतिश्रीवायुपुराणे।

माघस्नानप्रभावेनत्रेताग्नयइवापराः यूयंगच्छतस्वर्लोकंनयामइतितेब्रुवन् ८३ स्वर्गोनश्यो यतोलोको नगच्छामोवयंततः युष्मत्प्रसादात्पुण्याच्चभूत्वास्माद्द्विजजन्मसु ८४ तत्रमाघेपुनःकृत्वास्नानदानादिकाः क्रियाः तेनपुण्यप्रभावेनविष्णोर्लोकमवाप्नुमः ८५ इतिविज्ञापितास्तैस्तुदत्वाविप्रेषुजन्मच धर्मेमतिंतथा युष्यांविष्णुभक्तिमहैतुकीम् ८६ विष्णुदूताययुर्लोकंविष्णोरेवमहात्मनः तेषांप्रसादान्माघस्यस्नानजात फलादपि ८७ चक्रुर्माघेतुतेस्नानंभुविवैविप्रजन्मसु ततोज्ञानंसमासाद्यमोक्षमापुस्त्रयोपिच ८८ इतिहासमिमंपुण्यपुत्रत्वात्तेसमीरितम् नकस्यापिसमाख्येयंगोप्यंभागवतोत्तम ८९ यइदंशृणुयान्नित्यं माघस्नानपरायणः सकर्मबंधान्मुक्तःसन्विष्णोर्लोकेमहीयते ९० इतिश्रीवायुपुराणेमाघमाहात्म्ये अष्टमोऽध्यायः ८ ७ ब्रह्मोवाच स्नात्वामाघेमघायुक्तपौर्णम्यांविष्णुतत्परः गुरुनिंदाकृतात्पापान्मुच्यतेपरिधिर्यथा १ नारदउवाच कोवापरिधिर्नामासीत्कस्यासौशिष्यतांगतः अनिंदयद्गुरुं कस्मादेतद्विस्तार्यमेवद २ ब्रह्मोवाच कोसलेसरयूतीरेप्रगाथोनामवैऋषिः शांतोदांतस्तपस्वीचवेद वेदांगपारगः ३

यमाघमाहात्म्यटीकायांअष्टमोऽध्यायः ८ ७ मुख्यकालत्वात्पौर्णम्यामित्युक्तिः तेनसर्वतिथीनामुपलक्षणंवक्ष्यमाणेतिहासेसर्वतिथिषुस्नानस्यप्रतिपादितत्वात् १ २ ३ ७ ७

रुद्धानां गोव्याघ्रादीनां ४ ५ सांगान्व्याकरणाद्यंगसहितान् सोपांगान्निघंट्वाद्युपांगसहितान् कलाः शिल्पशास्त्राणि विद्याः ब्र
ह्ममीमांसादिविद्याः स्नानकव्रतंस्नातीतिस्नातः स्नातएवस्नातकः अध्ययनसमाप्त्यनंतरंतदंगस्नानकर्तातस्यव्रतंनिमित्तंविनाननक्तं
१ . । ननग्नः स्नास्यामीत्यादिसूत्राद्युक्तंव्रतम् ६ ७ ८ ९ ममायंगुरुः सुरापीअस्तीत्येवंनिश्चितः निश्चयवान्परिधिः १०

यदाश्रमेविरुद्धानांनाभूद्वैरंमहात्मनः सर्वर्तुफलसंपत्तिसहिताः पादपाअपि ४ ओषध्योकृष्टफलिताभ
वंतिचतपोबलात् तस्यासीत्परिधिर्नामशिष्यः कौशिकगोत्रजः ५ वेदान्सांगांश्चसोपांगान्कलाविद्याश्चतु
र्दश अधीत्यस्नानकव्रतमकरोद्गुर्वनुज्ञया ६ जगामतीर्थयात्रार्थंछत्रीदंडयजिनांबरः सर्वविद्याः समाप्या·
थप्रगाथस्तपसिस्थितः ७ दूर्वामूलानिचादायपेषयित्वाचतद्रसम् आहारार्थंकल्पयित्वासचकारतपोम·
हान् ८ वर्षांतेपरिधिश्चागाद्गुरोरंतिकमेवसः तदागमनवेलायांगुरुःसायाह्नसत्क्रियाः ९ कृत्वादूर्वामूलर
सफेनिलंसपपौमुनिः तंदृष्ट्वापरिधिर्मोहात्सुरापीत्येवनिश्चितः १० नतनामगुरोःपादौनवृत्तांतमचोदयत्
अत्यान्नारीपथभ्रष्टंपतितंवर्णीगुरुंस्वकम् ११ इतिधर्मविदःप्राहुस्तस्मादेनंत्यजाम्यहम् प्रगाथंमुनिमत्रैवसु
रापीतिचनिंदयन् १२ स्वदेशंप्रययौपापीगृहाश्रममुपेयिवान् ततःप्रगाथोदेवेंद्रसभांप्रतिययौमुनिः १३ देवा
निवारयामासुर्मुनेनार्हसित्वंसभाम् प्रवेष्टुंनिंदितोयस्मात्सुरापीतिचशिष्यतः १४ स्वभावाद्वाऽस्वभावाद्वा
निंदितायेजनैर्भुवि नतेषामूर्ध्वलोकाःस्युस्तस्माद्भूमिपुनर्विश १५ वृत्तांतंकुशलवृत्तांतंश्रोतुंगुरुंनात्वोदयन्नप्रार्थितवान्

भा. न् :पथश्चमार्गश्चेतिकोशात्पथशब्दः अकारांतोपि ११ अत्रैवशरयूतीरेपिसुरापीतिचप्रगाथंमुनिंनिंदयन्पा
शयथाविद्युत्तरेणसंबंधः १२ १३ प्रवेष्टुंनार्हसिशिष्यतःशिष्येण १४ स्वभावात्स्वस्यस्वीयपापकर्मणः भावात् सत्वात् सत्वेनेः
त्यर्थः १५

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

१६ १७ तद्रसाहारोमप्रवर्तते किमर्थंतद्रसाहारइत्यत्राह तद्रसेनाप्यायनंदेहस्यपोषणंकर्तव्यमिति ममव्रतंवर्त्तते १८ १९ दाता
दास्यति नसंशयइत्युवान्वेतिसप्तदशश्लोकस्थपदेनान्वयः २० २१ २२ २३ २४ २५ तस्यप्रगाथऋषेःशिष्यस्यपरिधेर्वचोबला

सर्वेषांपुरतः पिस्वाद्दूर्वामूलरसंपिब इतितैर्वारितोभूयः प्रगाथोत्यवनिंगतः १६ ततोभूमिंपुनःप्राप्यतपस्तपु
मथोद्यतः जनानाहूयदेशीयानुवाचजरठोस्म्यहम् १७ नमेभूरवमनेशक्तिर्दूर्वामूलानिहेजनाः आदत्ततद्रसा
हारस्तद्रसाप्यायनंव्रतम् १८ तस्माच्चदूर्वामूलानिमुनयेजरठायमे आदायपिष्ट्वातन्मूलरसंदास्यतप्रत्यहम्
१९ तपस्विनांचवृद्धानांसेवांकुर्वंतियेनराः तेषांदातास्वयंविष्णुर्भुक्तिंमुक्तिंनसंशयः २० विश्वस्याश्वततोलो
कास्तद्ग्रामस्थादयालवः तद्ग्रामस्थंद्विजंकंचिज्ज्योतिषार्णवसंज्ञकम् २१ सेवार्थंकल्पयामासुः प्रगाथस्यम-
हात्मनः प्रगाथस्तपसेप्रायात्ततोचैज्योतिषार्णवः २२ दूर्वामूलानिचाहृत्यसायाह्ने तान्युलूखले अवहत्यच
पिष्ट्वाचरसंपात्रेनिवेश्यच २३ प्रगाथागमपर्यंतंतद्गृहेस्थोपयत्यसौ सचदूर्वारसःपात्रेफेनिलोजायतेक्षणा
त् २४ सायमभ्यंततोहृत्वा प्रगाथोत्यपिबद्रसम् तंदृष्ट्वातीवनिर्वेदमाययौज्योतिषार्णवः २५ वृथायंनिंदि
तोस्माभिःक्रूरापीतिवचोबलात् परिधेस्तस्यशिष्यस्यजनांस्तानितिचाब्रवीत् २६ पश्चात्तापेनसंतप्तामिथए
वंबभाषिरे मिथ्याभिशंकयास्माभिर्निंदितोयंमहामुनिः २७ धर्मार्थकामानश्यंतिह्यविचारितकारिणाम्
येलोकेपरदोषांश्चव्याहरंत्यविचारिणः २८ मिथ्याचेद्द्विगुणंपापंसत्यंचेत्समभागिनः कोलोकःपरिधेस्तस्याशि
ष्यस्यास्यापवादिनः २९

न्निंदितइतिसंबंधः इतिएवं तान्ग्रामस्थान् २६ २७ अविचारितकारिणांअविचारितमनिर्णीतंकर्मकु
र्वंतितेदोषान्पालकानि २८ तान्मिथ्याचेत्व्याहरंतीतिपूर्वेणान्वयः तेव्याहृतपापद्विगुणंपापंप्राप्नुवंतिसमभागिनः व्याहृतपापतुल्यं

पापंप्राप्नुवंतीत्यर्थः अस्यप्रप्रायस्याकोलोको भविष्यति कुत्सितोलोकएवभविष्यतीत्यर्थः २९ ३० भद्रकल्याणकारकपरमशांतेत्यर्थः
३१ तवअभिशप्तानांत्वांमिथ्याभिशपमानानां ३२ ३३ ३४ ३५ अस्वर्ग्यंस्वर्गेपरलोकेसाधुः स्वर्ग्यः परलोकप्रापक इत्यर्थः तद्भिन्नोऽस्वर्ग्यः
तंलोकविद्विष्टंलोकविरुद्धम् ३६ तादृशंधर्मं कृत्वानरकमाप्नोति नतुसतामुपकारकंअतीवानिंदितं बहुहिंसायुगेव

परिधेः पापिनस्तस्यवचोविश्रंभणाद्वयम् आभिनिंद्यमहात्मानंपापभाजोभवामहे ३० इतिनिर्वेदमापन्नाः
प्रार्थयामासुरंजसा प्रगाथतेनमोभद्रक्षमस्वागांसिपापिनाम् ३१ अस्माकंत्वभिशप्तानादयांकुरुदयानिधे
इतितेषांवचःश्रुत्वाप्रगाथोवाक्यमब्रवीत् ३२ सुखंदुःखंतथानिंदांबहुमानंजयाजयौ भयंशोकंच
हानिंचलाभालाभौजरामृतिः ३३ पूर्वकर्मानुसारेणदैवमेवददातिहि यस्मिन्देशेयदाकालेवयसायादृशे
नच ३४ यादृगेवकृतंकर्मजीवैःसंसारवर्तिभिः तस्मिन्कालेचदेशेचवयसातादृशेनच ३५ अवश्यंतज्जनैरेव
तादृगेवानुभूयते अस्वर्ग्यंलोकविद्विष्टंधर्ममप्याचरेन्नतु ३६ कृत्वानरकमाप्नोतितस्मात्सर्वमतंचरेत्
अतीवनिंदितंकर्मतत्कृत्वानैवदुष्यति ३७ सनायेनोपकारःस्याद्बहुहिंसायुगेववा दधीचिर्दुर्मतिंप्राप्य
देवार्थेसद्गतिंययौ ३८ शिबिर्मांसान्यभक्ष्याणिदत्वाकीर्तिंचसद्गतिम् हत्वावृत्रंद्विजंत्विंद्रोवृत्रहेतिच
विश्रुतः ३९ पित्रर्थेभार्गवोरामोहत्वामातरमंगनां अतिकीर्तिंसमापेदेरामोराजीवलोचनः ४० पुराकश्चिद्द्विजवरः
सत्यवादीजितेंद्रियः तीर्थयात्राप्रसंगेनविपिनेव्यचरत्क्वचित् ४१

वामहाहिंसायुक्तमपिवाकर्मकृत्वेव
कृत्वापिचनदुष्यतीतियोजनात्रतेया ३७ अत्रार्थेदृष्टांतानाह दधीचिरिति ३८ ३९ अंगनामिति मातृहत्यांस्त्रीहत्यांचकृत्वेति
भावः अत्यंतंपित्राज्ञापरिपालनकर्तेत्यादिरूपामतिकीर्तिं ४० ४१ ५ ५ ५ ५

४२ द्विजान्हत्वा तद्धनंगृहीतुं तेब्राह्मणाः ४३ ४४ तान्वदतेआगताः ४५ ४६ तस्मात्कौलीनं कुलीनानांप्रसिद्धकुलोत्प
न्नानामयंकौलीनस्त्वं तैराचरितमित्यर्थः धर्ममितिशेषः ४७ हेहतांहसः दूर्वारसमितिक्लीबत्वमार्षं ४८ ४९ ५० ५१ त्रिसप्त

दिगंबरोनिराहारोमांसरक्तविवर्जितः पल्वलेवेणुगुल्मेतुनिषसादमुनीश्वरः ४२ तदानींलुब्धकःकश्चित्पृष्ठतो
गाद्द्विजान्वने तेगुल्ममूलेलीनाःस्युर्नापश्यल्लुब्धकोप्यभूत् ४३ निषण्णंपल्वलेदृष्ट्वाव्याधोवाक्यमुवाचत्
किंनुजानासित्वंविप्रद्विजानआगतान्क्वचित् ४४ वदतानास्तिमेकृत्यंततःसत्यपरायणः तेविप्रागुल्ममध्ये
तुनिषण्णाइतिचाब्रवीत् ४५ अथतान्लुब्धकोदृष्ट्वाहत्वादायधनंययौ साब्रह्महत्याविप्रेंद्रंपीडयामास
चाजसा ४६ देशकालानुगंशुद्धंकौलीनंवेदचोदितम् कुर्वन्करवमवाप्नोतिसर्वसज्जनसंमतम् ४७ भवद्दृ
ष्टिविरुद्धंतुपीतंदूर्वारसंमया ममायमपराधोहिनकस्यापिहतांहसः ४८ नपापलेशोभवतामितितेषांवरं
ददौ ततोभूमौकृतानिंदांपरित्यज्यमहामुनिः ४९ देवेंद्रस्यसभांप्राप्तोदेवाद्यैरपिपूजितः परिधिस्तेनदो
षेणभुक्त्वामन्वंतरेषुच ५० चतुर्दशस्वनिर्वाच्यांयातनांरौरवेततः अरण्येनिर्जनेदेशेवृतंकंटकपादपैः ५१
छायाहीनेमहाघोरेसोभवद्ब्रह्मराक्षसः तत्राब्दानिव्यतीतानिअर्बुदानित्रिसप्तच ५२ आजगामवनंतच्च
देवान्मौद्गलनामकः यज्ञार्थंपांड्यराजस्यतस्मिन्मार्गेददर्शतम् ५३ आहारार्थंप्राद्रवत्तंतेजसाचनिवारितः
ऊर्ध्वकेशंविरूपंचललज्जिह्वंदिगंबरम् ५४ तंदृष्ट्वामौद्गलःप्राहकस्त्वंसत्यंवदानघ इतितद्वचनंश्रुत्वासोब्रवी
द्राक्षसस्तदा ५५ अहंपुराप्रगाथस्यशिष्यःपरिधिनामकः अज्ञात्वातत्कृताहारंकरापीत्याभिनिंदितः ५६

तिएकविंशत्यर्बुदानीत्यर्थः ५२ तस्मिन्वनेमार्गेतंब्रह्मराक्षसं ५३ सःतंमौद्गलम् ५४ ५५ दूर्वारसाहारम् ५६

५७ ५८ कालायतेकालइव मृत्युरिवाचरति पवनायतेवायुरिवाचरतीतिवायुवन्ममबुद्धेः स्वास्थ्यंनास्तीत्यर्थः ५९ रजोमलंच आहारइत्यन्वयः मलोस्त्रियामितिकोशात्क्लीबत्वं ६० अद्येतिराक्षसदेहस्थितिकालपर्यंतमित्यर्थः ६२ ६३ इतित्वदुद्धारहेतोः

गुरुर्मयाकृतघ्नेन प्रगाथोलोकविश्रुतः तेनकर्मविपाकेनजातोहंब्रह्मराक्षसः ५७ अत्राब्दानिव्यतीतानिन जानेनिर्जनेवने क्वमुक्तिः कथंभूयादनायासेनकर्मणा ५८ छायाविषायतेमह्यंजलंमेज्वलनायते कालायतेपादपश्चवृष्टिर्मेपवनायते ५९ आहारोमलमूत्रंमेशवासृङ्मांसभक्षणम् व्रणशोणितपूयेन्वतथानारीरजोमलं ६० अतोद्याशक्तचिनाकर्तुंनशक्यानिष्कृतिर्मया दयांकुरुदयाहीनेसाधवोह्निदयालवः ६१ अथातिविस्मितोदृष्ट्वामुद्गलोब्रह्मराक्षसम् जगादपरयावाण्यामाभैषीरितितंस्फुधीः ६२ इत्यतोनातिदूरेतुकावेरीनामवैनदी तस्यामहंकरिष्यामिमाघेमास्यरुणोदये ६३ प्रातःस्नानंमासमेकंप्रीत्यैमाधवसंज्ञिनः त्वंचागच्छमयासार्द्धंकरिष्यामिचत्वत्कृते ६४ आवाह्यत्वांकुशग्रंथौतेनसार्द्धंनिशाचर यतःसाक्षात्त्वयाकर्तुंनशक्यमितिचावदत् ६५ इत्याश्वास्यततस्तेनसाकंकीनाशपालितां दिशंययौमुनींद्रस्तुक्रमात्कतिपयैर्दिनैः ६६ कावेरींप्राप्यमाघेतुप्रातःस्नानंविधायच आवाहितकुशग्रंथिसहितःसत्यभाषणः ६७ देवर्षिपितॄनुद्दिश्यदत्तवानुदकांजलीन् मासमेकंचकार्यैवंकुशग्रंथिसमन्वितः ६८ ततोमुक्तिश्चपरिधेःकुशग्रंथेश्चमज्जनात् किंसाक्षात्कृतमाघस्यमुक्तिरित्यथकोवदेत् ६९

नातिदूरेकिंचिद्दूरेनदीवर्तते ६३ त्वत्कृतेत्वदर्थं ६४ त्वात्वांतेनकुशग्रंथिना ६५ कीनाशेनयमेन ६६ ६७ ६८ अथकुशग्रंथिमज्जनेनपरिधिमुक्तिश्रवणानंतरंसाक्षात्कृतमाघस्यकृतमाघस्नानस्यसत्याभामेतिचन्माघेतिपदैकदेशग्रहणंमुक्तिर्भविष्यति किमितिकोवदेत् कः प्रश्नंकुर्यात् कोपिनकुर्यादित्यर्थः साक्षात्कृतमाघस्नानस्यजंतोर्मु

क्तिभावेनिश्चितज्ञानेनअज्ञातप्रार्थनरूपप्रश्नस्यैवासंभवइतिभावः ६९ ७० ७१ तादृगपिब्रह्महत्याधिकमपि ७२ ७३ ७४ ७५
७६ तुलामारोपिताइतिमाघधर्मः माघस्नानधर्मः ७७ कर्मविपाकेनपापकर्मपरिणामेनबहुविधाब्रह्मराक्षसादिनानाविधरूपाः ७८

तस्मान्माघस्यमाहात्म्यंकोवदेत्भुवनत्रये गुरुनिंदासमंपापंनक्वापिश्रूयतेक्वचित् ७० गुरोर्निंदाहरेर्निंदा
तथासच्छास्त्रदूषणम् देवस्वहरणंचैवब्रह्मस्वहरणंतथा ७१ तडागसेतुच्छेदश्चब्रह्महत्याधिकानिषट् त
स्मात्पापंतादृगपिमाघस्नानव्यपोहति ७२ तथासंबोध्यपरिधिंतेनसम्यक्प्रपूजितः पांड्येशनगरेप्राप्य
स्वशिष्यैःसहमुद्गलः ७३ परिधिःशापनिर्मुक्तोययौबदरिकाश्रमम् तदेतत्कथितंपुत्रमाघमाहात्म्यमुत्तमम्
७४ यदुक्तंहरिणापूर्वंमहालक्ष्म्याःपयोनिधौ मयाचालोडिताःसर्वेधर्माःशास्त्रेषुचोदिताः ७५ नमाघः
सदृशोधर्मोयतोदृष्टःकदाचन सर्वेधर्माश्चयज्ञाश्चदानानिचव्रतानिच ७६ तुलामारोपिताःपूर्वंमाघस्नानं
तथैकतः सदासकलधर्मेभ्योमाघधर्मोधिकोभवत् ७७ बहुकर्मविपाकेनजाताबहुविधास्त्वपि माघमासि
जलस्पर्शान्मुच्यंतेगतकिल्बिषाः ७८ यथाष्टाविंशतिपुरापिशाचाबहुरूपकाः साभिक्कुशादानपरात्स्कयज्ञा
द्दिववैमुने ७९ इतिश्रीवायुपुराणेमाघमाहात्म्येनवमोऽध्यायः ९ छ नारदउवाच स्कयज्ञःकस्य
शिष्योभूत्स्कुत्रासीन्मुनीश्वरः पिशाचानांकथंतेषांसंगतिर्भावितात्मनः १ किंवाकरोत्स्कयज्ञोपितेषांनिष्कृति
कारणम् शिष्यायश्रद्दधानायश्रोतुंकौतूहलायच २

पिशाचाः मुक्ताः ७९ इतिश्रीवायुपुराणीयमाघमाहात्म्यटी
कायांनवमोऽध्यायः ९ छ पूर्वाध्यायांतोपक्षिप्तस्कयज्ञेतिहासप्रस्तावायनारदःपृच्छति स्कयज्ञइति भावितात्मनः पुण्यात्मनः स्क
यज्ञस्य १ किंवाकिंचनिष्कृतिकारणंपापनिवृत्तिकारणंकौतूह लाय कुतूहलस्यायंकौतूहलः उत्कंठाविशिष्टायेत्यर्थः २ छ

चित्रमाश्चर्यंकार्यंक्रियतेतत्कार्यंकर्म ३ सुमनाःसुष्ठुउत्तमं अतिशीघ्रविद्याग्राहकं मनोयस्यसः अतिबुद्धिमानित्यर्थः ५ एवंअध्ययन·
निमित्तेन ६ पलाशानिपत्राणि ७ ८ नीलांजनसमप्रख्याः कज्जलतुल्याः अत्यंतकृष्णवर्णाइत्यर्थः लोककंटकाःलोकानांकंटकाइवा·
त्यंतदुःखप्रदाइत्यर्थः ९ घूर्णयद्धूम्रताम्राक्षाः घूर्णयंतिभयेनलोकानांचित्तंभ्रामयंति धूम्रवत्ताम्राणि अक्षीणियेषांते ह्रदसमोदराः ब्रह्म

पुत्रायैतच्चित्रकार्यंभूयोविस्तरतोवद ब्रह्मोवाच पुराचाक्षुषमन्वंते द्वापराख्येयुगेतथा ३ जाबालिर्नामत·
श्चासीन्मुनिर्नारायणाश्रमे सुयज्ञोनामतस्यासीत्तनयोवेदपारगः ४ सचोपनीतोविद्यार्थीसुमनाःसप्तवा·
र्षिकः शांडिल्यंगुरुमासाद्यचकाराध्ययनंततः ५ एवंसदशवर्षाणिगुरुशुश्रूषणेरतः समित्कुशपलाशा
र्थंकदाचिदटवींययौ ६ तत्राश्वत्थंमहावृक्षंसप्तशाखासमन्वितम् विजनेनिर्जलेदेशेददर्शांबरचुंबितं ७
ततःसमाद्रुताःक्रूरास्तंदृष्ट्वाब्रह्मराक्षसाः ततोभक्षयितुंबालमाजग्मुस्त्वरयान्विताः ८ नीलांजनसमप्र·
ख्याभयदालोककंटकाः दंष्ट्राकरालवदनाःशुष्ककंठोष्ठतालुकाः ९ घूर्णयद्धूम्रताम्राक्षाऊर्ध्वकेशाह्रदो
दराः तान्दृष्ट्वाभीतभीतःसन्सप्रोचींदुद्रुवेभयात् १० अनुजग्मुर्भक्षयितुंनजङ्गभयविह्वलम् रुरुधुस्तूर्णमा
गत्यप्राचीमार्गंततोर्भकः ११ दुद्रावदक्षिणाशांचैतेभ्यःप्राणपरीप्सुकः तत्रापश्यद्वटंकंचिच्छतशाखिनमु·
च्छ्रितम् १२ अटमानंततोदृष्ट्वावटादस्मादथाययुः पिशाचाःसप्तकूष्मांडाभुजादागतमूर्धकाः १३ स्रवद्र·
क्तकबंधाश्चतान्दृष्ट्वातीवविह्वलः प्रतीचींदिशमापेदेद्रुतंप्राणपरीप्सुकः १४

राक्षसाइतिपूर्वेणान्वयः भीतभीतः अत्यंतभीतः १० ११ प्राणपरीप्सुकः प्राणपरिरक्षणेच्छुः १२ भुजात् आगतमूर्धकाः
आगताः प्राप्ताः उत्पन्नाः मूर्धानोयेषांते १३ १४

तस्मात्शाल्मलीवृक्षात् १५ १६ १७ आभयं अभयं अभयायाहरीतक्याः अयं आभयः तंहरीतकीवृक्षमित्यर्थः १८ १९ २० २१ वन्हिपालितांआग्नेयींदिशं २२ स्पर्शासोस्पर्शौआशाइच्छाययोस्तौ २३ २४ भवान्इमंबालकंमास्पृशंतु कुतइतिचेत्तत्राह एषइति एष-

शाल्मलींयोजनायामांदृष्ट्वातामभ्यपद्यत तस्माद्व्याययुःसप्तपिशाचाडाकिनीगणाः १५ जानुदेशशिराःकश्चि
दूरुदेशशिराःपरः तथैवभुजमूर्धाचकटिमूर्धातथापरः १६ तथाप्रकोष्ठमूर्धाचस्तनमूर्धातथापरः पार्ष्णिमूर्धा-
चसप्तैतेडाकिनीयोनिमाश्रिताः १७ दृष्ट्वातानद्भुताकारानुदीर्घांदुद्रुवेभयात् तत्राभयंमहावृक्षंदृष्ट्वातंप्रत्यप-
द्यत १८ तस्माद्धावयतुर्द्वौचवृकव्याघ्रसमाननौ आगच्छंतौदंडधरौवृक्षेशानींदिशंययौ १९ दृष्ट्वाकदंबंतत्रा
पितन्मूलंप्रत्यपद्यत तस्माच्चत्रयआजग्मुर्गृध्रशीर्षाभयंकराः २० नराकारादीर्घदेहाःशाकिनीयोनिमाश्रि-
ताः तमर्भकंभक्षयितुंतीक्ष्णतुंडाभयंकराः २१ तान्दृष्ट्वातीवनिर्विण्णःप्रपेदेवन्हिपालितां तत्रोदुंबरमासा
द्यद्वावपश्यद्भयानकौ २२ प्रेतावाहाररहितौनिरंगौमांसपेशिनौ तावप्याजग्मतुर्दीनंस्पर्शाशौभक्ष्यकामिनौ
२३ तौदृष्ट्वातीवनिर्विण्णोदुद्रुवेचदिशोदश धावत्येवंमुनिसुतेपिशाचास्तेपरस्परम् २४ अहंपुरोगमिष्यामि
मास्पृशन्त्वेषमामकः ममायंचममायंचममायमितिचापरे २५ मयापूर्वदृष्टोयंमयादृष्टःपुरात्वयम् इतितेषा-
मभूद्युद्धंमुष्टामुष्टिकचाकचि २६ नकेचिदस्पृशन्नेनंपरस्परवधेच्छवः ततोनिर्वेदमापेदेमुनिपुत्रोभयाकुलः
२७ अनन्यशरणःक्षुब्धोभयात्कर्तव्यमूढधीः शरण्यंचिंतयामासदुःखाद्बाष्पजलाकुलः २८

बालकः मामकः ममायंमामकः मद्रक्षणीयः २५ कुतस्त्वद्रक्षणीयइतिचेत्तत्राह मयेति २६ २७ अनन्यशरणक्षुब्धः नास्तिअन्यत्शरणंरक्षणकर्तायस्यसचासौक्षुब्धश्चतस्मिन्कर्तव्यमूढधीः कर्तव्येपिशाचादिनिवारणकर्मणिमूढाअज्ञानविशिष्टाधीर्यस्य बाष्पजलाकुलः अत्यंतनेत्रोदकेनव्याप्तः २८

ुःखस्यविमोक्षणस्यदुःखविमोचनस्यसुखस्यच परमःउत्तमः २९ यतःयेनरक्षितंभक्षितंसंहृतम् ३० यःसाक्षिचेतनः साक्षीसर्वस्यद्रष्टासचासौचेतनश्चसर्वज्ञश्च ३१ एवंविचार्यमाणस्यसतः दुःखनिवर्तकःपापस्येतिशेषः ३२ उपांशुकंउपांशुरेवोपांशुकस्तं अत्यंतपरावेद्योच्चारणरूपं ३३ तेजसामंत्रसामर्थ्येन ३४ ३५ साअशरीरवाक् ३६ नृसिंहबीजाक्षरमंत्रंमंत्रशास्त्रप्रणीतंमंत्रंजपन् तस्यां

दिशोनजानेनलभेचशर्मपश्यामिकंवापुरुषंदयालुं नान्योहिविष्णोःपरमोस्तिदातासुखस्यदुःखस्यविमोक्षणस्य २९ तस्माद्विष्णुंशरण्यंतंभक्तवत्सलमच्युतं यस्माज्जगदिदंजातंरक्षितंभक्षितंयतः ३० येनेदमखिलंव्याप्तंजगत्स्थावरजंगमम् कर्ताकारयिताविष्णुःप्रेरकःसाक्षिचेतनः ३१ शरण्यंतंमहाविष्णुंप्रपद्येदुःखमुक्तये एवंविचार्यमाणस्यतत्रोभूदशरीरवाक् ३२ मुनिपुत्रनदींगच्छजपमंत्रमुपांशुकम् तन्मंत्रतेजसादूरात्तिष्ठंत्येतेसुदारुणाः ३३ तेजसाहृततेजस्काविवदंतःपरस्परम् एतस्मिन्नंतरेत्वंचनिमज्ज्यचनदीजले ३४ उत्थायपयसासिंचपिशाचानागतानिमान् तेमुक्ताःस्युर्नसंदेहस्ततःसुखमवाप्स्यसि ३५ आगतोविप्रमाघोयमित्युक्त्वाविररामसा ३६ ततःपिशाचाहृतएवविप्रोनृसिंहबीजाक्षरमंत्रमुग्रम् जपन्नदीमापचकौशिकाह्वयांनिमज्ज्यतस्यांपयसासिषेच ३७ तेचैत्तटस्थाःपयसाभिषिक्तामुनींद्रपुत्रेणदयान्वितेन तेशुद्धभावाःशिरसाप्रणेमुःपूर्णेंदुसंकाशमुखंमहांतम् ३८ तानागतांस्त्यक्तनिजस्वभावान्नूत्नेगतक्लेशभयामहात्मा केकेभवंतोभवतांचकर्मदशेदृशीयेनसमागताश्च ३९ ब्रूतेहनूनंपृथगेवमत्यंकर्मानुगंजन्मयतश्चजातं इतीरितास्तेमुनिपुत्रमूचुःपुराकृतंकर्मयथानुपूर्वं ४०

नद्यांनिमज्ज्यपिशाचान्सिषेच ३७ ३८ ३९ यतःयस्यपापकर्मणोनुगंब्रह्मराक्षसादिजन्मजातं तत्कर्ममत्यं इहनदीतटेयूयंपृथगेवयूयंपृथक्पृथक्ब्रूतकथयतेतियोजनायथानुपूर्वंयथानुक्रमम् ४०

४१ ४२ ४३ अहंपरैः श्राद्धकर्माणिकारयित्वाआसं ४४ मयानभुज्यते ४५ पूजनंकृतंलोभेनद्रव्यलोभेन ४६ नैवेद्यादिनिमित्तेनधनव्ययोभवेदितिहेतोःगृहेनैवपूजितः ४७ सैकतेवालुकाप्रदेशे ४८ यात्रांप्रतिगंतुं ४९ ५० नव्याख्यातंवेदादिअर्थतः नप्रतिपादितं ५१

ब्रह्मराक्षसाऊचुः शृणुनामानिवक्ष्यामः सप्तानांपापकर्मणाम् दग्धपाणिरयंपूर्वोदग्धजिह्वस्तथापरः ४१ अ
माघोयंतृतीयस्तुचतुर्थोदूनिकोमतः निंदकःपंचमोज्ञेयःषष्ठोवैमलभोजनः ४२ सप्तमोदैवतोनामसप्तानांचरि
तंशृणु दग्धपाणिरुवाच माधवोहंपुराकाश्यांब्राह्मणोग्रामज्योतिषः ४३ वेदवेदांगतत्वज्ञःसर्वधर्मपराङ्मु
खः परैरहंकारयित्वाश्राद्धकर्माणिभूरिशः ४४ प्रत्यहंतत्रभोक्ताहंनगृहेक्वापिभुज्यते नदीतीरेजलेशालग्रा
मपूजांकरोम्यहम् ४५ धनस्यार्जनचित्तेननपुण्यार्थंकृतंमया लोभेनदीपोधूपोवादेवायननिवेदितः ४६ वेदि
कायांगृहेक्वापिपूजितोनैवकेशवः पूजितेतिगृहेविष्णोनैवेद्यादिभवेदिति ४७ सैकतेवोदकेनैवपूजयित्वान्य
मानसः वस्त्रेणबंधयित्वातंकक्षेनिक्षिप्यदांभिकः ४८ पुनर्यात्रांप्रयत्नेहंश्राद्धदानार्हकांक्षया याम्यहंतत्रत
त्रैवनजप्तंनहुतंमया ४९ मातापित्रोर्दिनेप्राप्तेव्याजमुत्पाद्याम्यहम् ग्रामांतरंप्रयातीत्येवपुनर्यामिचसद्गृहम्
५० नव्याख्यातंमयाक्वापिनाध्यापितंमयापिवा श्राद्धादिकांक्षिणावापिनश्रुतातुहरेःकथा ५१ यामात्पूर्वंतुबुध्वा
हंरात्रावायाममेवाहि प्रतीक्ष्यतेमयाकालोमृताहमपिकांक्षिणा ५२ तिलभारःकुशाभारइतिलोकावदंतिमां कु
शपाणिःशिखाबंधोधौतवस्त्रःसदाशुचिः ५३ देवपूजाकक्षपालिःकक्षेपाणौकमंडलुः चलदोष्ठोवृथाधर्मवादीदं
भकइत्यहम् ५४

यामंआअभिव्याप्य ५२ तिलभारःतिलान्बिभर्तिइतितिलभारः कुशाभारःकुशान्आसम्यक्बिभर्तीतिशिखाबंधोयस्यसः ५३ देवपूजार्थंकक्षपालिः कक्षेपाल्यतेसामंजूसा विष्णुसहस्रनामादीनांपठनमहंकरोमीतिलोकेप्रदर्शनार्थंचलदोष्ठःव्यर्थेति स्वयंधर्मंनकरोमीत्यर्थःदंभकःदंभकर्त्ता ५४

५५ कालोमृत्युः ५६ असंततेरपुत्रस्यौर्ध्वदेहिकाभावाद्युक्तंपिशाचत्वं ५७ वृत्तांतमितिक्लीबत्वमार्षं ५८ ५९ आसम्यक्भक्षणे ६० शिग्रुःशेवगेतिप्रसिद्धः शाकविशेषः निष्पावं पावटेतिप्रसिद्धोधान्यविशेषः ६१ संधितानिपक्वादिरक्तमांसमलमूत्रसंयोगजानि अतएवकुरंगाणि कुत्सितः रक्तादितुल्यः रंगःवर्णोयेषांतानिबिल्वंशाकविशेषः बाफळीतिकोकणदेशेप्रसिद्धः एतेशाकावर्द्धिताइत्यन्वयः उपोदकीचिर-

वंचयित्वाजनान्सर्वानर्जयित्वाधनं बहु नभुक्तंचनदत्तंचनसत्स्वसोषितोजनः ५५ पश्चादागतकालोहिजातोहं ब्रह्मराक्षसः प्रतिग्रहेणदग्धोयंपाणिर्मेतेनकर्मणा ५६ दग्धपाणिरितिख्यातोनाम्नाहंब्रह्मराक्षसः लक्षाणि त्रीण्यतीतानिममवर्षाण्यसंततेः ५७ तवाद्यदर्शनादेवजातंदुःखविमोचनं इतिसर्वंमयाख्यातंमद्वृत्तांतंजुगुप्सितम् ५८ दग्धजिह्वउवाच अहंहिद्विजःपुरानंदीग्रामेमुद्गलगोत्रजः वेदवेदार्थतत्वज्ञःकृत्याकृत्यविवेकवान् ५९ नाम्नास्फकमनामाहमभक्ष्याभक्षणेरतः नतस्नंनहुतंजप्तंनचाकिंचिदनुष्ठितम् ६० गृहारामेमयोप्तानिशिग्रुशाकंचमूलकम् वृंताकानिकलिंगानिनिष्पावानिचगृंजनम् ६१ संधितानिकुरंगाणिबिंबाबिल्वादिवर्धिताः उपोदकीचकौसुंभघृतकोशातकीतथा ६२ शाबरीकुबरीचैवश्फकशाकंतथैवच तंडुलीयकशाकंचवर्धितानिगृहेमया ६३ मद्गृहोपरिवैगच्छंस्तुवरुर्यानसंस्थितः सांगनोन्यपतत्सद्योमन्द्यामगतयासुना ६४ भूमिंचारीसगंधर्वोगत्वा गोदावरींनदीम् माघेस्नात्वामासमेकंपतंगेमकरेस्थिते ६५ तेनलब्धप्रभावःसन्ब्रह्मलोकंययौपुनः चातुर्मास्यद्वादशीषुतथापुण्यदिनेषुच ६६ संक्रमेषुचसर्वेषुतथान्यादिवसेषुच भक्षितानिमयैतानिपिण्याकंचैवभक्षितम् ६७

घोकेतिप्रसिद्धा घृतकोशातकीघोंसाळेतिप्रसिद्धा ६२ शाबरीवनस्पतिविशेषशाकंउंदिरमारीतिप्रसिद्धं कुचरीकषायरसयुक्तशाकाश्फकशाकंदिंडाइतिकोकणदेशेप्रसिद्धः ६३ यानेविमाने ६४ पतंगेसूर्ये ६५ प्रभावःसामर्थ्यं ६६ ६७ ६८

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

आरनालं कांजिकं आद्यान्नं प्रेतस्यप्रथमैकोद्दिष्टश्राद्धान्नं षोडशान्नं षोडशमासिकश्राद्धान्नं हे श्राद्धकर्तरेकोद्दिष्टादिश्राद्धभोजनाय कृपयामामामंत्रयेति प्रार्थनापूर्वकं ६८ शक्तिभ्यः पूतनादिबालग्रहरूपाभ्यः ६९ देवताभुक्तं देवताभ्यो निवेदितं ७० निषिद्धभोजनेनात्यजमित्यर्थः ७१ ७२ वाचा मदपराधस्य क्षमां कृत्वा कृपां कुर्विति वाण्या ७३ इति श्रीवायुपुराणे माघमाहात्म्ये टीकायां दशमोध्यायः १०

पाचयित्वात्वारनालं भुक्तमन्नं मयानिशम् आद्यान्नं षोडशान्नं च प्रार्थनापूर्वकं मया ६८ बहुधा भुक्तमत्यंतं बिंबमौदुंबरं तथा पिशाचेभ्यश्च नागेभ्यः शक्तिभ्यो यन्निवेदितम् ६९ तथान्यदेवताभुक्तं मया भुक्तं सहस्रशः भानुवारे पर्वणि च तथा श्राद्धदिनेषु च ७० रात्रौ भुक्तं मया जिह्वालालसेन दुरात्मना आर्यैश्च गुरुभिश्चैव बहुधा बोधितोप्यहं ७१ जिह्वाचापल्यदोषेण नात्यजनशकभंकृतं दग्धजिह्वोस्मि तेनैव जातोहं ब्रह्मराक्षसः ७२ इत्युक्त्वा दग्धजिह्वस्तु शिरसा तं प्रणम्य च वाचाहितं प्रसाद्याथ विरराम स राक्षसः ७३ इति श्रीवायुपुराणे माघमाहात्म्ये दशमोऽध्यायः १० छ अमाघउवाच अहं पूर्वं द्राविडेषु नाम्ना शचौ द्विजाधमः जमदग्निकुलोत्पन्नो वेदवेदांगपारगः १ लिंगभस्मजटाधारी शूद्रपाखंडमार्गगः ब्राह्मणादुत्तमं मन्ये वर्णधर्मविवर्जितम् २ तीक्ष्णः कौतुकविद्यासु वाचालो गायकः शठः वशंकुर्वन् भैरवाद्यैर्मंत्रैर्वेदविनिंदकः ३ कदाचिदागतो वेषी भिक्षाकांक्षी च मद्गृहम् कौतुकं दर्शयामास येन लोको वशो भवेत् ४ भिक्षा दत्ता मया तस्मै गृहीत्वांतरधीयत ततो महत्त्वबुद्ध्यास्मिन्प्रणामस्तु मया कृतः ५ अस्तु वं कपटं वेषं दंडवत्पतितो भुवि त्वं रुद्रोसि न संदेहो भाग्याद्दृष्टिपथं गतः ६

---

१ शूद्रजातीयपाखंडानां आत्मानं ब्राह्मणात् ब्राह्मणजातेरुत्तमं मन्ये २ कौतुकविद्यासु लोकानां चमत्कारप्रदर्शकविद्यासु तीक्ष्णः बुद्धिमान् अन्यं वशंकुर्वन् ३ ४ ५ ६ छ छ छ

७ निष्फलादृश्यतेइतिकाकुः नकापिनिष्फलादृश्यतइत्यर्थः ममजीवनंप्राणधारणंमांरक्षवाभक्षसंहर ८ ममपादयोःसिद्धेसिद्धिविशिष्टेपादुकेयस्यसःसिद्धपादुकः तरित्वाउत्प्लुत्य ९ विप्रायमह्यमितिशेषः १० ११ अहंप्रस्थातुंप्रकृष्टंस्थातुंअर्थयंप्रार्थनांकृतवान्अडभावश्छांद-

कस्मात्पुनरदृश्योसिकृपांकुरुकृपानिधे तववागमृतैःसम्यङ्मामुज्जीवयतापस ७ निष्फलादृश्यतेक्वापिजा
तादृशैर्महात्मनाम् त्वदर्थेजीवनंचेदंरक्षवाभक्षवाप्रभो ८ पश्चादाविरभूत्सापीजटिलःसिद्धपादुकः कृत्वा·
तुपादयोर्लेपंतरित्वामेरुपर्वतम् ९ जगामतत्रसर्वाणिविशेषाणिचयानिच दर्शयामासविप्रायसूर्यदेवान्मुनी·
नपि १० हिमवंतंततोगत्वामद्गृहेपुनरागतः भुक्त्वातुमद्गृहेपश्चात्स्वयंगंतुमुपाक्रमत् ११ पादौगृहीत्वातंपा
पंगृहेप्रस्थातुमर्थयं प्रार्थितस्तुमयासोपितस्थौवार्षिकमासकम् १२ स्थित्वापाखंडमार्गेणमामबोधिपुनश्चसः
तेनाहंबोधितःशीघ्रंपाषंडेनिरतोभवम् १३ मांविधायततःशिष्यंसोगमाद्विषयांतरम् तस्मादनुपथंमाघमासो·
पित्यगमत्तदा १४ भार्यामेस्नातुकामासाययाचेमांपुनःपुनः नापिचाज्ञामयादत्तावेदमार्गविनिंदकम् १५
सापिमांबोधयामासधर्मवाक्यैःपुनःपुनः वेदाभ्यासीकुलीनश्चजमदग्निकुलोद्भवः १६ कथंपाषंडमार्गेषु
वर्तसेज्ञानदुर्बल मांनिषेधसिवाकस्मान्माघस्नानविधौरताम् १७ इतिब्रुवाणांतांभार्यांदंडेनाहंन्यवर्तयम्
सादुःखात्तत्यजेमाघस्नानंबाष्पाकुलेक्षणा १८ नकृतंतुमयास्नानंदूषितंचपुनःपुनः तेनदोषेणचाल्पायु
स्तस्मात्पापान्मृतोस्म्यहं १९ जातोहंगुणनामैवंपिप्पलेब्रह्मराक्षसः अमाघेनैवमुक्तेतुदूतिकोवाक्यमब्रवीत् २०

सः वार्षिकमासकंवर्षर्तुसंबंध्येकमासपर्यंतं १२ १३ १४ वेदमार्गविनिंदकंमामित्युत्तरेणान्वयः १५ १६ १७ दंडेनदंडताडनेन १८
१९ तस्मादेवंगुणनामागुणेनमाघस्नानस्याभावकरणेननामसंज्ञाअस्तियस्यसः अमाघनामकइत्यर्थः २० ६१ ६९

नाम्नेतिनतुबाकलशाखोत्पन्नत्वेनेत्यर्थः २१ वेदश्चवेदांगपंचकंचानयोःसमाहारः २२ नाविमर्शितंनाभ्यस्तं २३ काकपक्षात्मजः काकपक्षाभ्यांसन्द्धितएकवर्षात्मकः आत्मजस्त्यक्तः कालेविहितंकालेकिंचित्कर्म २४ २५ २६ दूतिकः दूत्यादास्याचरतिसः २७ २८ तत्रशंकुकर्णाश्रमे

अहंकाश्मीरदेशीयोब्राह्मणोवेदपारगः धनीकौशिकगोत्रोहंनाम्नाबाष्कलसंज्ञितः २१ मृतेपितरिमेचासीत्कालःषोडशवार्षिकः पितुःसकाशाच्चाधीतंवेदवेदांगपंचकम् २२ विस्मृतंचमयासर्वंनपुनस्तद्विमर्शितम् ज्ञानेलुप्तेततःपश्चाद्दासीसंगरतोस्म्यहम् २३ त्यक्तागुणवतीभार्याकाकपक्षात्मजोमया कालेनानुष्ठितंकिंचिन्मध्याह्नादिमयाकृतम् २४ भार्यात्वेकल्पितादासीदासीत्वेचकुलांगना दासीपुत्राश्चमेपुत्राश्चत्वारस्तेममानुगाः २५ एवंकालोमयानीतःसर्वोप्येवंदुरात्मना ततोमृतिमवाप्तोहंसर्वधर्मबहिष्कृतः २६ कर्मणातेनजातोहंदूतिकोब्रह्मराक्षसः इत्युक्त्वाविररामाथनिंदकोवाक्यमब्रवीत् २७ शृणुवृत्तंप्रवक्ष्यामिममवृत्तांतमंजसा पुराहंमागधेदेशेग्रामेपंचजनाह्वये २८ ब्राह्मणःकाश्यपोनामपैंग्यगोत्रसमुद्भवः शंकुकर्णस्यशिष्योहंतत्राधीताःसमस्तशः २९ वेदाःषडंगाःस्मृतयःपुराणंचेतिहासकम् आन्वीक्षिकीतथाविद्यामीमांसाद्वयमेवच ३० गीताद्याश्चकलाःसर्वानाधीतंविद्यतेमया द्वापराख्ययुगस्यांतेराज्ञोज्योतिष्मतीशितुः ३१ धर्माधिकारमापन्नःपौरोहित्येनियोजितः लोपामुद्राप्रसादेनजयशीलोनिराकुलः ३२ राजद्वारिमयासर्वेविद्वांसोनिर्जिताःक्षणात् अविद्वानयमित्युक्त्वाप्रत्यपादिसुधीरपि ३३ नदापितंयाचकस्यकापिपुण्यदिनेष्वपि मदीयाःपोषिताःसर्वेतेनराज्ञामहात्मना ३४

२९ आन्वीक्षिकीतर्कविद्यातथाचान्याविद्याःमीमांसाद्वयंब्रह्मधर्ममीमांसेइत्यर्थः ३० नाधीतंअनधीतंकिंचिदपिविद्यतइतिकाकुःनकिमपीत्यर्थः ३१ ३२ प्रत्यपादिप्रतिपादितं ३३ राज्ञानदापितम् ३४

केनापिदत्तंधनं अयंधर्मइत्यपि अयमधर्मइति ३५ ३६ ३७ ३८ मयासोपि विमनीकृतः दुःखयुक्तः कृतः ३९ नामप्रसिद्धःषष्ठोमलभो

धनंगृहीत्वाकेनापि अधर्मेधर्मइत्यपि साधयामिकचिद्धर्ममधर्मइतिचावदं ३५ आचाराद्व्यवहाराद्वामयासर्वैर्विनिंदिताः नकोपिसदृशोलोकेनभूतोनचवर्तते ३६ इत्यहंकारमूढेनमहांतोपिविनिंदिताः कदाचिद्गुरुपुत्रोपियज्ञार्थीराजमंदिरम् ३७ आगतोममसख्येनसमयापिनिराकृतः दूषितोबहुधाविद्यानांप्रसंगेनदुरात्मना ३८ सतूष्णीमगमद्गेहंमयासौविमनीकृतः ततोमृतिंगतःपापीकर्मणानेनदुष्टधीः ३९ नाम्नाचानंदकोनामजातोहंब्रह्मराक्षसः तस्यवाक्यविरामांतेषष्ठोवाक्यमथाब्रवीत् ४० देवयाजीतिनाम्नाहंवंगदेशेधनाधिपः आगस्त्यगोत्रेचोत्पन्नोग्रामेमंडलसंज्ञके ४१ दृष्टिहीनौमहात्मानौजरठौपितरौमम नार्चितौपितरौतौचकलत्राधीनचेतसा ४२ कष्टान्नंदीयतेताभ्यांमिष्टमश्नामिसार्भकः अद्यश्वोवामरिष्यावःस्वादुकिंचित्प्रदीयताम् ४३ आवयोरिदमत्यन्नंप्रियमित्युदितेपिच नदत्तंचमयाकिंचिद्भर्सितौचपुनःपुनः ४४ आतिथ्येऽनागतेविप्रेचान्नमन्यत्प्रदीयते मयातुभुज्यतेमिष्टंनार्चिताभिक्षुकामया ४५ तेनकर्मविपाकेनमहतामुनिपुंगव नाम्नापिकर्मणाचापिजातोहंमलभोजनः ४६ मलभोजनवाक्यांतेऽदैवतोवाक्यमब्रवीत् शृणुब्रह्मन्प्रवक्ष्यामिनिदानंममजन्मनः ४७ पुराहंगणकश्चापिकाश्यांकापेयगोत्रजः नाम्नाग्निदूतइत्यासंवेदवेदांगपारगः ४८ राज्ञादत्ताधिकारस्तुततोदेवालयेमया हृतंदेवस्यसर्वस्वंधान्यंतैलंघृतंतथा ४९

जनः ५० ४१ पितरौआस्तां ५२ आवांमरिष्यावःहेपुत्रत्वयाप्रदीयतां ४३ इदंअन्नंअतिअत्यंतंप्रियमस्तीतिमातापितृभ्यामुदितेउक्ते ४४
अर्चिताःभिक्षाप्रदानेनादृताः ५५ ५६ ४७ कापेयगोत्रजःकपिगोत्रोत्पन्नः ५८ दत्तःअधिकारोयस्मैसदत्ताधिकारः ५९ ध

४९

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

५० ५१ ५२ व्येतीति व्ययंकृतंअपात्रेव्ययःकृतइत्यर्थः अर्हेसत्पात्रेनार्हेनयोग्योभवामितत्रव्ययोनकृतइत्यर्थः ५३ गीतंगानं
५४ स्थानंप्रयागादि ५५ ५६ ५७ ५८ धनुःषुबाणायेषांतेधनुर्बाणाः ५९ ६० ६१ ६२ तस्मिन्जन्मनिनकृतंतद्देशेव

पिष्टंशाकंगुडश्चैवतंडुलामरिचादयः कुड्याद्यारंभकालेषुजीविकार्थंमयाहृतम् ५० गृहीतमतुलंद्रव्यमाति
कम्यैववेतनम् राजद्वारिप्रवक्तॄणांदेवस्वंदीयतेमया ५१ अपिसर्षपमात्रंवाधर्मार्थंनोपपादितम् व्ययंकृतंतु
देवस्वमपात्रेकीर्तिमिच्छता ५२ नार्हेर्हेचव्ययंकर्तुंव्ययोमेबहुरेवतु नशिष्टाःपूजिताःक्वापिपूजिताश्चनटाद
यः पश्चात्तापोनचैवासीन्नसंतोषोवर्धतेमम ५३ देवद्वेषोवेदविश्वासहानिर्गीतासक्तिर्नृत्यविद्यारतिश्च
भोगेलौल्यंनिंद्याकर्मणांचस्थितिर्जातापापिनोमेनिशंच ५४ नध्यातंपदमीश्वरस्यमहतःसंध्यापिनानु
ष्ठितासंतःक्वापिनसेवितामहदपिस्थानंनयातंमया नोदेवाःपरिपूजिताश्चापिमरैर्धर्मोपिनोपार्जितोबुद्ध्या
संसृतिबंधमोचनकरीविद्यापिनोपार्जिता ५५ तेनचादैवतोनामजातोहंब्रह्मराक्षसः भिन्नदेशमृतानांचसंग
तिनोवदाम्यहं ५६ पुरासप्तापिवयंनिषादाधिपतेःसुताः संबाहुर्वीरबाहुश्चदीर्घबाहुर्विरोचनः ५७ दीर्घ
कायोदीर्घजिह्वोदीर्घोष्ठइतिसप्तते वनेचराश्चौर्यकर्मनिरताःपापचारिणः ५८ अस्मिन्वनेचरंतश्चधनुर्बाणा
इवांतकाः एतदश्वत्थमूलेतुकदाचिद्वैश्यपुत्रकाः ५९ मारिताधनिनोस्माभिर्युगपत्सप्ततेबत ततःकियताका
लेनस्वामिक्षेत्रमनुत्तमम् ६० प्रयातंमातुलाद्भीतैरस्माभिःशुभकर्मणि कार्तिक्यांकृत्तिकायोगस्तदासीत्पु
ण्यवर्धनः ६१ तत्रास्माभिःकृतंस्वामिदर्शनंमातुलाज्ञया तेनास्माभिस्तुपुण्येनप्राप्ताविप्रकुलेजनिः ६२ पूर्वक
र्मानुरोधेननास्माभिःसुकृतंकृतं तद्देशेतादृशेकालेतस्मिन्वैपिप्पलेद्रुमे ६३ पुत्रमारणेवनेनादृशेतन्मारणकालसदृशकाले ६३

लतानांवैश्यपुत्राणांमारणरूपपापकर्मणाचतीर्थयात्राप्रसंगेनमिलिताएववयं ६४ पूर्वकर्मानुरोधेननिषादजन्मार्जितकर्मानुरोधं
सुहृदःसंतःवसामइतिपूर्वेणान्वयः दर्शनेजातेसतिफलितंपूर्णफलंविशिष्टंजातं ६५ तथानःजातिस्मरत्वंब्राह्मणजात्यादिस्मरणं ६६
त्वयाचोदितंप्रेरितंपृष्टमित्यर्थः अस्माकंएतत्जन्मकर्मादिकंअस्माभिराख्यातं ६७ ६८ इतिश्रीवायुपुराणेमाघमाहात्म्येटीकायां

तीर्थयात्राप्रसंगेनमिलितानांचकर्मणा वयंतुमृतिमापन्नावसामोऽत्रततोधुना ६४ पूर्वकर्मानुरोधेनसुहृद
श्चपरस्परम् स्वामिदर्शनपुण्यंचफलितंतवदर्शने ६५ जातिस्मरत्वंचेदानींजायतेपूर्वजन्मनाम् अद्यनोभग
वांस्तुष्टोगतिरद्यभविष्यति ६६ नक्वापिचवृथायातिमहतांदर्शनंशुभम् इत्येतत्सर्वमाख्यातंचोदितंपाप
कर्मणाम् ६७ अस्माकंमुनिशार्दूलरक्षनःकरुणाबलात् इत्युक्त्वातेप्रणेमुश्चसर्वेप्रांजलयोभवन् ६८
इतिश्रीवायुपुराणेमाघमाहात्म्येएकादशोऽध्यायः ११ ६७ कूष्मांडाऊचुः शृणुनामानिसार्या
निनःकर्माणिगुरूणिच कारणानिचदुर्योनेर्वदतांपापकारिणाम् १ उच्छिष्टभोजनश्चाद्योद्वितीयोभद्र
संज्ञकः तृतीयोनीरसोनामचतुर्थोहीननामकः २ पंचमोनिष्ठुरोनामषष्ठश्चापिनिराश्रयः शास्त्रोक्तः
सततस्तुकर्माण्यथनिशामय ३ उच्छिष्टभोजनउवाच ब्राह्मणोहंपुराचासंक्षेत्रेछायाग्रहाह्वये वीति
होत्रस्यतनयःकलिंगइतिनामकः ४ चामुंडादेवताभक्तोवेदकर्मबहिष्कृतः पिशाचयक्षनागानागरीया-
न्पूजकेषुच ५ पिशाचयक्षनागानांनैवेद्यंभक्तवानहम् हरेर्निवेदितंक्वापिभक्षितंनमयाद्विज ६ पिशा
चादेश्चदासानांहीनजानांद्विजोत्तम निंदितानांचदासोहंतस्मादुच्छिष्टभोजनः ७

ब्रह्मराक्षसभाषणंनामैकादशो
ऽध्यायः ११ ६७ कूष्मांडाख्यगणस्यभाषणप्रकारंकथयति कूष्मांडाऊचुरिति १ २ ३ ४ ५ ६ पिशाचाद्युच्छिष्टंभुनक्तीतिउच्छिष्टभोजनः
७

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

हीने अन्यथाभुजादागतमस्तकाइतिदशमाध्यायविरोधापत्तिः भुजसंबंधिन्यंसे भुजाशिरोदेशेकंशिरोयस्येतित्तथा ८
९ १० तेप्रसिद्धाः निरंकुशोगजइवउन्मत्तइत्यर्थः ११ भैरवीचक्रकरणस्यफलमाह यस्मिन्निति नावत्साजात्यंजातिभेदोनास्तीत्यर्थः १२
योषिद्विनिमयः अन्योन्यस्त्रीसंभोगः १३ इतराब्राह्मणादिजातयः १४ आत्मनिव्यापकात्मनि भ्रांत्याअनात्मत्वभ्रमेणमतिर्बुद्धिर्जायते

तेनकर्मविपाकेनजातोस्मिन्वटपादपे कूष्मांडाख्यगणोविप्राशिरोहीनेभुजांसके ८ निशम्योच्छिष्टवाक्यं
तुत्यभद्रोवाक्यमब्रवीत् पुराभीमरथीतीरस्थेचेनीलाह्वयेशुभे ९ जैमिनेर्गोत्रजश्चाहंनाम्नाजैत्रोमहामनाः
निःशंकाख्यस्यतनयोवेदवेदार्थकोविदः १० पाखंडानांचसंसर्गात्पठितास्तेदुरागमाः व्याख्याताश्चमया
तेनबहुशोयनिरंकुशः ११ करोमिभैरवीचक्रंकारयामिपरैरपि यस्मिन्प्रवृत्तेविप्रेंद्रसाजात्यंप्रतिपद्यते १२
अष्टादशानांवर्णानांयावद्व्रतसमापनम् योषिद्विनिमयोप्यत्रनफलंपापकर्मणाम् १३ चांडालोब्राह्मणीं
गच्छेच्छ्वपचीमपिवैद्विजः स्त्रीत्वंपुंस्त्वंद्विधाजातिरितराभ्रांतिकल्पिताः १४ इमेभोगाश्चबुद्ध्यैःस्युर्भ्रां-
त्याचात्मनिवैमतिः कर्मणाजायतेजंतुर्नपरोस्तिहिकर्मणः १५ उपादानंप्रधानंचकर्ताकर्मनिगद्यते च-
राचरंदृश्यमानंजगदेतन्निरीश्वरम् १६ वैराग्यात्परमात्सम्यक्संविद्विच्छेदसंज्ञकः आत्मनोजायतेमोक्षो
विकल्पोयत्रनश्यति १७

परः अन्यः कर्मैवजंतुरित्यर्थः १५ कथंकर्मैवजंतुरित्याशंकायामाह उपादानमिति घटंप्रति-
कारणंप्रधानं जडप्रकृतिः कर्ताकर्मेतिचनिगद्यतेउच्यते कर्तृशब्दवाच्यजडप्रकृतिरेवकर्मतदेवजंतुरितिभावः निरी
र्गतईश्वरोयस्यतत् जडमेवजगदुत्पत्तिकारणंनपरमात्मेत्यर्थः ज्ञात्वा १६ जातात्परमाद्वैराग्यात् पश्चात्संविद्विच्छेदसंज्ञकः संवि-
यार्थज्ञानेनभ्रांतिंविशेषेणासर्वात्मनाच्छिनत्तीतिविच्छेदः यत्रमोक्षेजातेसति विकल्पः विविधः विकल्पः घटपटादिकल्पना १७

१८ नीलमितिअतिश्वेतवस्त्रस्यकज्जलसंबंधवत्मद्दोषसंबंधेनअत्यंतदूषितत्वान्नीलमित्यभिधीयतेइत्यर्थः अथनरकान् १९ २० २१
कापेयः कपिगोत्रोत्पन्नः २२ २३ तेषांपशूनां २४ २५ शिशूनांपरकीयबालकानांचतुर्विंशतिप्रस्थाः परिमाणंयस्यतत् २६ प्रमाणंनै

इत्यादितथ्यमित्येवज्ञातंवैबोधितंमया कुतर्कैर्वेदविद्याश्चमखाद्याश्चपिदूषिताः १८ मदावासेनतत्देशेनीलमित्यभिधीयते ततोमृतिमयापन्नोनरकान्प्रतिपद्यवै १९ तेनाभद्रेणजातोहंकर्मणावटपादपे पिशाचोभद्रसंज्ञोहंकूष्मांडानांगणेग्रणीः २० इत्यभद्रवचःश्रुत्वाव्याजहारचनीरसः ह्रियानत्तमुखोदीनस्तथागद्गदभाषणः २१ पुरायवनदेशेषुमालतीनामवैपुरी तस्यांकद्युम्नइत्यासीत्कापेयोब्राह्मणोत्तमः २२ तस्याहमभवपुत्रोनाम्नातिग्मद्युतिस्तथा गतेतुपितरिस्वर्गेरसविक्रयिकोभवम् २३ अजाविगोमहिष्यश्च मयासंपादिताद्विज तेषांदधिघृतंक्षीरंविक्रीतंबहुशोमया २४ घृतेनपयसादध्नास्नापितोनैवकेशवः नदीपोज्वालितःक्वापिहरयेपरमात्मने २५ नवनीतंदधिक्षीरंशिशूनांनोपपादितम् चतुर्विंशतिप्रस्थंहिघृतंमेजायतेन्वहम् २६ दध्नश्चपयसश्चैवप्रमाणंनैवविद्यते अपिसर्षपमात्रंवासायान्हेविद्यतेनच २७ विना शिशून्गृहेकैश्चित्क्वापिनास्वादितोरसः तथाधाराघृतादीनांश्राद्धंनक्रियतेमया २८ अजाविगोमहीषीणांक्रियतेक्रयविक्रयः क्रयविक्रयद्रव्याणांगणनानैवविद्यते २९ एवंकालोमयानीतोनध्यातोहरिरीश्वरः कर्मणातेनजातोहंनाम्नानीरसनामकः ३० तूष्णींस्थितेनीरसेतुहीनवृत्तिरथाब्रवीत् पुरापुष्कलदेशेषुग्रामेसुष्वभिधेद्विजः ३१

वेतिशततशः प्रस्थात्मासमित्यर्थः २७ घृतादीनांरसोनास्वादितः धाराचनदृष्टा २८ २९
नीरसनामकः निरंतररसविक्रयकर्तृत्वान्नीरसइतिनामप्रसिद्धिर्यस्यसः ३० ३१ ५ ५ ५

पृथोःपृथुनामकब्राह्मणस्यग्रामण्याखिलसंश्रयः ग्रामण्यंग्रामाधिपतिंअखिलंनिरंतरंयथाभवतितथासंश्रयतीति ३२ ग्रामाधिपतिनायुक्तः आविकेषुमेषरक्षणेनजीवनकर्तृषु ३३ हैमेषुस्वर्णकारेषुपुरोपजीविषुनगरादिरक्षणेनोपजीवनकर्तृषुपुल्कसेषुआयोगवेषुकाष्ठभेदनकर्तृषु म्लेच्छादिष्वितिसर्वायोग्यजातीनांग्रहणं ३४ तेषांविप्रादीनां ३५ शांतिररिष्टनिवर्तकंकर्मपुष्टिरिष्टप्रापकंकदाभवेत् ३६ वैतरण्यादिआदि

जातोहंचपृथोःपुत्रोनाम्नाविप्रामसंज्ञकः वात्स्यायनकुलोत्पन्नोग्रामण्याखिलसंश्रयः ३२ पौरोहित्यैर्नियुक्तश्च
तथैवायाज्ययाजकः विप्रेषुक्षत्रेषुतथैववैश्यशूद्रेषुगोपेषुतथाविकेषु ३३ कुलालहैमेषुचकांस्यकेषुपुरोपजी
विष्वथपुल्कसेषु व्रात्येषुरजकेषुचनापितेषु तथैवम्लेंछादिषुवृत्तिरासीत् ३४ मौंजीविवाहादिषुयच्चकर्म
यदौर्ध्वदेहादिककर्मजातम् तथैवसंक्रांतिशशिग्रहादिहोमादितेषांत्वमयाविधीयते ३५ शांतिश्चपुष्टिश्च
भवेदितिस्मचिंताकुलाबुद्धिरहर्निशंच श्राद्धेषुदर्शेषुचजन्मवारेष्वशेषयोगादिषुतत्प्रतिग्रहः ३६ तथैववै
तरण्यादिगोदानानित्यनेकशः प्रतिगृह्यप्रतिगृह्यसुखमासंनिराकुलम् ३७ एकोद्दिष्टेतथाश्राद्धेभोजनं
तुमयाकृतम् शूद्रादिजातिऋक्षाणांग्रहाणांचैवचिंतनम् ३८ प्रातर्मेत्यटतासायंसायान्हेपिचभुज्यते रा
त्रौग्रहाणांसर्वेषांबलाबलविचिंतनम् ३९ क्रियामात्रंततःसंध्यासायंप्रातर्मयाकृता नावकाशोहरेर्ध्यानेचिं
ताकुलितमानसः ४० तेनकर्मविपाकेनहीनःकूष्मांडयोनिजः जातोहंमुनिशार्दूलवनेस्मिन्वटपादपे ४१
इत्याकर्ण्योदितंहीनान्भिक्षुरोवाक्यमब्रवीत् पुराहंचंडकोविप्रःकौशीतककुलोद्भवः ४२

शब्देनोल्कांत्यादीनांग्रहणम् ३७ ३८ प्रातरारभ्यासायंसायंकालपर्यंतमटतागच्छतामेमया ३९ क्रियामात्रंक्रियैवनतुमंत्रदेवतादिध्यानमित्यर्थः ४० हीनःहीनवृत्तिनामकः ४१ उदितमुत्पन्नंवाक्यं चंडकःचंडकनामा ४२

संगे संगमे ४३ ४४ ४५ ४६ ४७ तथामरणरूपां ४८ ४९ ५० तावत्कर्मपर्यंतं ५१ ५२ ५३ ५४

सुभगस्यतथापुत्रोधनाढ्योवेदपारगः सिंधुगोदावरीसंगेजातोनिष्ठुरभाषणः ४३ वैश्यवृत्तौप्रवृत्तोहंसदैवा
तीव्रकोपनः अर्थातुरस्यमेचासीन्नगुरुर्नचवासुहृत् ४४ सदावार्धुषिकःक्रूरःकृत्याकृत्येषुमूढधीः कदाचि
द्गुरवेदत्तमृणंवृध्यभिकांक्षया ४५ तद्गृहीत्वागुरुःप्रायात्सुनंदोनामयोद्विजः प्रयागंभार्ययासार्द्धंपुत्रेभारंनि
धायच ४६ प्रयागमुत्तमंक्षेत्रंगत्वाकतिपयैर्दिनैः पंचत्वमभिपद्याथमोक्षमार्गमुपेयिवान् ४७ भार्यान्वबंधु
भिःसार्द्धंपुत्रांतिकमुपाययौ तस्यश्रुत्वातथापत्नींतत्पुत्रंजगृहेकुधीः ४८ पितातेस्वर्गतःपापीत्यक्त्वाऋ
णनिष्कृतिम् ऋणंसवृद्धिकंदेहिमाविलंबितुमर्हसि ४९ क्षणंनस्थीयतेपुत्रत्वद्गृहीत्वानगम्यते इत्युक्तेते
नशिष्येणगुरुपुत्रस्तुमेब्रवीत् ५० कृत्वौर्ध्वदैहिकंकर्मयद्द्रव्यंतच्चदीयते क्षमस्वतावन्महापत्नीत्याद्दशाःख
लुबाधयाः ५१ इत्युक्तेतुपुनश्चोक्तंमयापापेनचेतसा त्वमर्भकोनार्जयितुंसमर्थोनवागृहेवास्तिपितुर्महद्धनं
५२ नविश्वसेत्वांचपलंयुवानंतावत्त्वयाद्यमनर्घ्यवस्तु इत्यूचिवांसंकृपणंमहात्माप्रत्युक्तवांस्तेत्वरयाकिमा
सीत् ५३ अहंचभार्यामपत्येवमातात्वद्दासत्वमेत्यवसामगेहे इत्युक्तेमुनिपुत्रेणऽहंवाक्यमुदाहरम् ५४ त्वं
सभार्यःसुखंवातिष्ठचरन्क्वापिचमदृणम् प्रतिदेहितुमद्दास्येमातैषानुविधीयताम् ५५ तदेतद्वचनंश्रुत्वाविस्मि
तोमुनिपुत्रकः मातैषाचावयोस्तातशिष्यपुत्रेणपश्यति ५६ किंनजानासितन्मूढमवत्येषागृहेतव भार्या
मेस्थीयतांतावद्यावत्तेऋणनिष्कृतिः ५७ इत्युक्तेमुनिनातेनतथास्त्वितिमयोदितं आस्थितामद्गृहेपुण्याभिर्दि
नंचपतिव्रता ५८

५५ पुत्रेणसमम् तस्मात्एषामेभार्यातवगृहेदासीभवतु तावत्तयास्थीयताम् ५७ ५८

कृत्वाधनंआददे संपादितवानित्यर्थः अनंतरंऋणंददौ ५९ ६० ६१ नाम्नानतुपुण्यभूम्यादिरक्षणसंबंधेनेत्यर्थः ६२ ६३ ६४ ६५ तंतुमात्रेणतंतुप्रमाणेनअत्यल्पधनेन ६६ पित्रादीनांनिराकृतआश्रयोयेनसनिराश्रयनामकः ६७ ६८ ६९ संपूर्णयथाभव-

आददेमुनिपुत्रोपिसगत्वाराजमंदिरम् व्रतंनिरशनंकृत्वात्रिदिनांतेऋणंददौ ५९ मोचयित्वास्वपत्नींच जनकस्यचकारसः भक्त्याचसमहात्मासौसकलंपारलौकिकम् ६० तेनकर्मविपाकेनकूष्मांडोनिष्ठुरोभवं एवंनिष्ठुरवाक्यंतुश्रुत्वाचाहनिराश्रयः ६१ सुमित्रस्यात्मजःपूर्वंनाम्नागोपीथसंज्ञकः गार्ग्यगोत्रेसमुत्पन्नः पुरेनागाह्वयेद्विजः ६२ पित्रामयाचसंपूर्णमुपायैर्बहुधार्जितम् धनंपश्चाद्विनष्टंतुचक्षुषीचापितुर्मम ६३ ततस्तुधनलोभेनमहतामूढधीरहम् निष्कासितौचपितरौबाधयाश्चमदाश्रयाः ६४ नाद्याः पूजिताःक्वापि नचाभिक्षाशिनःपरे पितरौतुमयात्यक्तौमृतौस्वर्गपुरंगतौ ६५ तंतुमात्रेणसकलंकृतंवैपारलौकिकम् नकृताःपंचयज्ञाश्चनाधीतंनेष्टमेवच ६६ तेनकर्मविपाकेनकूष्मांडस्तुनिराश्रयः निराश्रयोदितंश्रुत्वाशास्त्रोद्वृत्तस्तमब्रवीत् ६७ पुराहंचांध्रदेशेतुग्रामेकुक्कुटसंज्ञिते सुकच्छइतिनाम्नाहंसुच्छायस्यसुतोमहान् ६८ सर्वान्वेदानधीत्यापिसेतिहासपुराणकान् नकृतंशास्त्रविहितंजानतापिमयामुने ६९ धर्मस्यवक्तासंपूर्णंनानुष्ठाताकदाचन तेनकर्मविपाकेनशास्त्रोद्वृत्तोभवाम्यहम् ७० एतेषामेवसप्तानांजातादैवाच्चसंगतिः वटेस्मिन्विपिनेघोरेमृतमत्तगजाह्वयम् ७१ वटेकूष्मांडतांयाताःसप्तवैनिधनंगताः पुरासोमान्वयेजाताअस्मिन्नागाह्वयेपुरे ७२

तितथावक्ता शास्त्रात्शास्त्रमार्गात्उद्वृत्तंवर्तनंयस्यसशास्त्रोद्वृत्तनामा ७० दैवात्दुष्प्रारब्धात् वटेतत्समीपदेशे- ७१ अथसप्तनिधनंगताः संतोवटेकूष्मांडतांयाताइत्यन्वयः वयंजाताः ७२ ६२ ६२ ६२

७३ ७४ तदनंतरं तेचोराः अज्ञातंलिंगंचोरचिन्हंयेषांतेअज्ञातलिंगालीनागुप्ताः संतोऽभित आसमंतात्द्रुतंदुद्रुवुः उन्मार्गवर्तिनः
उन्मत्तमार्गवर्तिनः क्षत्रियस्रुताः ७५ महात्मानः भगवद्ध्यानकर्पणास्वदोषनिरासपूर्वकभगवत्कृपासंपादनकर्तृत्वान्महात्मानइत्यर्थः
दुर्विचारणातत्परान् ब्राह्मणवधादिविषयकदुर्विचारेआसक्तान् ७६ अस्मिन्वनेतेविप्राः ७७ अहमल्पवयस्कोबाल्ये भवत
कथंप्रभवामीत्याशंकायामाह दयालूनामिति लोकेनसमीक्ष्यते महतां महापुण्यवतांभवादृशामल्पवयस्कानांसप्तवर्षात्मकश्रीकृष्ण

स्रुवर्हिषः क्षत्रियस्यस्रुताः सप्तापिमानद वहिर्जनपदेगाश्चहृताश्चोरैः कदाचन ७३ पृष्ठानुयायिनस्तेषा
मभवन्शस्त्रपाणयः भीताश्चोरावटेह्यस्मिन्निषण्णाध्यानकर्मणि ७४ अज्ञातलिंगाआभितोलीनास्तेदुद्रुवु
र्द्रुतम् अताडयंश्चतान्विप्रान्शस्त्रैरुन्मार्गवर्तिनः ७५ शशपुस्तेमहात्मानोदुर्विचारणातत्परान् मत्तत्वाद्द्रुवत्तां
भूयान्मृतिर्मत्तमतंगजात् ७६ अस्मिंश्चतुवटेह्यस्मिन्समकालंमृतिंययुः अस्मात्शापाद्वयंसर्वेदैत्यत्वसंगति
मागताः ७७ युगपन्मत्तमातंगान्मृताःसर्वेवटेवयम् इत्येतत्कथितंसर्वमस्मानुद्धरपंडित दयालूनांचमहतां
नवयोहिसमीक्ष्यते ७८ इतिवायुपुराणेमाघमाहात्म्येद्वादशोऽध्यायः १२ ७ डाकिनीगणाऊचुः वृत्तां
तमपिचास्माकंशृणुविप्रसमाहितः डाकिनीत्वमवाप्तानांशाल्मलीतलमीयुषां १ जानुशिराउवाच ब्रा-
ह्मणोहंपुराचांध्रदेशेकौंडिण्यगोत्रजः स्रुवल्गोस्तनयोनाम्नावर्चिष्मानितिविश्रुतः २

स्तेगोवर्द्धनमाहाद्रिधारणमिवअस्मदुद्धारादिसर्वंयुक्तमितिभावः ७८ इतिश्रीवायुपुराणेमाघमाहात्म्येकूष्मांडभाषणंक
शोऽध्यायः १२ ७ अत्राध्यायेडाकिनीगणभाषणप्रकारंकथयति डाकिनीगणाऊचुरिति जानुदेशशिराऊरुदेशशिरा इत्यादि
नाम्नांदशमाऽध्यायेएवक्रमेणकथितत्वान्नाम्नामत्रपुनःकथनंनकृतमितिज्ञातव्यं १ २ ७ ७ ७

३ आपणे हट्टेऽर्थात् क्रयविक्रयेणजीवतीतितथा ४ तत्पुण्यादधिकपुण्यप्रदमेकादशीव्रतं ५ एकादशीव्रतम कृत्वासर्वपापाधिकंपापंअसंशयंयथाभवतितथाप्नोतिसर्वाधिकत्वंस्पष्टयति वरमिति वरंश्रेष्ठं एतत्पदस्य नत्तल्लिंगंविपरिणामेनजीवहननमित्येतत्पर्यंतंसंबंधः कर्तव्यःस्वमातृगमनंस्वमातृसदृशपितृव्यपत्न्यादिगमनंसाक्षात्स्वमातृगमनस्यहत्यादिपंचकमित्यनेनसिद्धत्वात् ६ हत्यादिपंचकंब्रह्महत्यादि-

दरिद्रः कर्मभिः पूर्वैःपतितोत्यंतमंबली कुटुंबभरणेसक्तः कृत्यैर्बहुविधैरपि ३ पश्चाद्धेमपुरींप्राप्तंसःयात्यापण
जीविना मयाद्वादशवर्षंतुकृतंचैकादशीव्रतम् ४ दानयज्ञतपोभिश्चतीर्थयात्रादिभिस्तथा यत्पुण्यमधिकं-
प्रोक्तंवेदैःस्मृतिपुराणकैः ५ अकृत्वापापमाप्नोतिसर्वाधिकमसंशयम् वरंस्वमातृगमनंवरंगोमांसभक्षणम्
६ काश्यांपित्रोर्वधश्चापितथाहत्यादिपंचकम् गोवधादिमहापापंस्त्रीवधाद्युपपातकम् ७ अनस्थिजी
वहननमेभ्यःश्रेष्ठतमंमतम् श्रुतिस्मृतिपुराणेषुचैकादश्यांतुभोजनम् ८ गतिर्हिपापिनांलोकेकृतमेकादशी
व्रतम् एकादशीव्रतजपुण्यमनंतराधसः प्रीत्यैकृतंस्वपितृकुलोद्धरणैकहेतुम् कीनमयाकृतमस्यव्रत
स्यकारणंमोक्षादिदिव्यपुरुषार्थकुलस्यपावनम् ९ दत्तंवणिग्भ्योधनकांक्षिणा मया हि षट्सुवर्षेषुकृतंच
भूरिशः तेनैवपापेनधनंचनष्टंकुलंचसर्वंनरकेचपातितम् १० अर्जितंचमयाभूरिधनंपापेनकर्मणा गृही
त्वाशाल्मलींप्राप्तंज्ञात्वाचोराःसमाययुः ११ निहत्यमांस्थलेत्रास्मिन्धनमादायतेययुः डाकिनीत्यभवंनाम्ना-
जातोस्मिन्शाल्मलीद्रुमे १२

महापातकपंचकं ७ अनस्थिजीवहननंवरंश्रेष्ठमित्यर्थः एभ्यःमातृगमनादिमहापापेभ्यः एकादश्यांभोजनरूपंपापंश्रुत्यादिषुश्रेष्ठतममेवमतंसिद्धांतितंगतिःपापोद्धारकं ८ अनंतमपरिमितंराधःस्वरूपंयस्यसोऽनंतराधाः श्रीमन्नारायणस्तस्यकुलस्य अस्यकेवलसमुदायवाचकत्वमत्रबोध्यं समुदायस्यकारणंहेतुः ९ भूरिशःपुनःपुनर्दत्तं १० धनंकथंनष्टमित्यत्राह आर्जितमिति ११ १२

निश्चलंअनश्वरंपुण्यंदत्तमितिशेषः १३ अतऊरुजापेक्षयापितृकुलस्यअधोदेशेनरकेप्रापणात् १४ वेदेनवेदपाठादिनाकीर्तिर्यस्यस
आमकस्य १५ १६ १७ १८ पद्मइतिअभिधायस्येत्यभिधः अर्शआदित्वादच् १९ २० २१ २२ २३ विद्योपजीवनब्राह्म

अधःस्थलंपितृकुलंप्रापितंपुण्यविक्रयात् अनंतैःपुण्यमौल्यैश्चऊरुजेभ्यश्चनिश्चलम् १३ अतऊरोरधोदे-
शेजातोमेशिरआगतम् द्वितीयोयममग्रामीऊरुदेशंशिराअयम् १४ मातुलोममपापात्माक्रूरःशांडिल्य
गोत्रजः धीमतोवेदकीर्तेश्चतनयोधर्मसंज्ञकः १५ हेमनाम्नीपुरीमेवप्राप्तोवेश्योपजीवकः द्वादशाब्दंस्थि
तंतेनमयासार्द्धंद्विजोत्तम १६ कुटुंबभरणासक्तोधनस्यार्जनतत्परः अमुनाजान्हवीयात्रादशवारंकृताः
अपि १७ क्रीतंतस्यामहापुण्यंऊरुजेभ्यस्ततोह्ययम् ऊरुदेशेशिराजातोडाकिनीशाल्मलीद्रुमे १८ मयै
वसाकमभ्यागाच्चोरेभ्यश्चमृतिंगतः तृतीयोयंभुजाशिराःपुरापद्मेतिचाभिधः १९ कुत्सगोत्रसमुत्पन्नो
वाजिनाम्नस्तनूद्भवः भागिनेयोमयासार्द्धंययौहेमपुरींद्विजः २० शिष्यानध्यापयामासद्वादशाब्दमतं
द्रितः क्रीतंतत्पुण्यमतुलंगृहीत्वातुलमौल्यकम् २१ धनंहेमपुरीक्षेत्रेशिष्येभ्योगुरुदक्षिणाम् गृहीत्वा
पिमयासार्द्धंप्राप्तोवैशाल्मलीद्रुमम् २२ चोरेभ्यश्चमृतिंप्राप्यडाकिनींभुजशीर्षकः बाहुजाययतःक्रीतंत-
स्माद्भुजाशिराअयम् २३ विद्योपजीविनीवृत्तिर्ब्राह्मणानांश्रुतीरिता अयाचितेभ्यःशिष्येभ्यःशुश्रूषुभ्यश्च
मानद २४ दक्षिणागुरवेदत्तासावृत्तिःश्रुतिचोदिता

पास्यविहितंतत्करणेनकथंदुर्गतिर्जातेत्याशंकायामाह विद्योपजी-
तेगुरुणात्वंमह्यममुकंदेहीत्ययाचितेभ्यःशुश्रूषाकर्तृभ्यः शिष्येभ्यः प्रदीयमानाविद्याश्रुतिचोदिताब्राह्मणानामुपजीविनीवृत्तिरित्यन्व
यः २५ विद्यैवकथंवृत्तिरित्याकांक्षायामाह-दक्षिणेतिदत्तागुरवेदक्षिणातयायाउपजीविकासावृत्तिःश्रुतिचोदिताआस्तिब्रह्मक्षत्रियवैश्येभ्यो

गृहीत्वावेदाध्ययनशीलेभ्यःशिष्येभ्यः व्याख्यातृभ्योवेदाध्यापनव्याख्यानकर्तृभ्योमहात्मभिः षष्ठांशोदेयइतिउत्तरेणान्वयः २५ चोदिताउक्तेत्यर्थः चोदनाविधिः २६ षष्ठांशदानेकारणमाह अर्जकानामिति धनस्यसंपादकानांस्वीयः स्वकीयः कुतः स्वकीयत्वमित्यत्राह षष्ठांशइति धनिनांसंपादितधनषष्ठांशोब्राह्मणानांक्रियायांवेदाध्ययनाध्यापनव्याख्यानादिकर्मणिविनियुक्तोभवेत् २७ द्विविधमिति द्विविधप्रकारातिरिक्तप्रकारेणविद्योपजीवनकरणाद्दस्युदुर्गतिर्युक्तेतिभावः मितिमियत्तांशिष्यानध्यापयतिइतिउत्तरेणसंबंधः २८ एवंवेदांगपंचकंअध्यापितंय-

ब्रह्मक्षत्रियवैश्येभ्योधनाढ्येभ्योमहात्मभिः २५ वेदाध्ययनशीलेभ्योव्याख्यातृभ्योमुनीश्वर षष्ठांशोदे
यइत्येवचोदनाश्रुतिचोदिता २६ अर्जकानांचषष्ठांशोविप्राणांस्वीयउच्यते षष्ठांशोब्राह्मणानांचक्रियायांध-
निनांभवेत् २७ इतिविद्योपजीवित्वंद्विविधंश्रुतिचोदितम् कालद्रव्यमितिंकृत्वायोध्यापयतिमूढधीः २८
शिष्यानध्यापितावेदास्तथावेदांगपंचकम् सवेदविक्रयोनामतेनपातयतिध्रुवम् २९ शतकुलानिनरके
विष्ठाकूपेचरौरवे ब्रह्मकल्पसहस्राणिस्वयंभुक्त्वाचयातनाम् ३० सडाकिनीभवेत्पापीमृतमेवविदांविद
तस्मादयंमहापापीक्रीत्वावैबाहुजायन्च ३१ गृहीत्वाधनमस्यंतमयासाकमगाद्द्रुमम् चोरेभ्यश्चस्मृतिंभ्रा
मःपापीतेनैवकर्मणा ३२ अयंजातोभुजशिराडाकिनीशाल्मलीद्रुमे तुर्यश्चापेनृपस्त्रीयोमद्धामएयोदुरा
त्मवान् ३३ भरद्वाजकुलोत्पन्नःक्षत्रियस्त्रीकृतोबली नाम्नादरिद्रःपापात्माबहुशास्त्रविशारदः ३४

सवेदविक्रयोनामश्रुत्यादिषुप्रसिद्धः तेनवेदविक्रयेणकुलानिपातयतिइत्युत्तरेणान्वयः २९ ब्रह्मकल्पसहस्राणिबहुब्रह्मादिनकल्पपर्यंतमित्यर्थः ३० अध्यापनजन्यंपुण्यंक्रीत्वा अध्यापनपुण्यविक्रयेणाध्यापनमेवकालद्रव्येयत्तयाक्रीतप्रायंभवतीत्यतस्तत्पुण्यविक्रयोपिवेदविक्रयइतिभावः ३१ ३२ भुजशिराइतिपूर्वोक्तार्थस्यस्पष्टीकरणान्नपौनरुक्त्यदोषः ३३ नाम्नाबलीत्यस्ति ३४

मयासहवैश्येभ्योवैश्यैरित्यर्थः कर्तुर्हेतुत्वेनविवक्षायांपंचमीदत्तमौल्यकः दत्तंदत्तप्रायंप्रतिज्ञातंयज्ञजन्यंपुण्यग्रहणस्यमौल्यंयस्मैसः ३५ ३६ पूर्वपापत्रयात्एकादशीव्रतभागीरथीयात्रावेदाद्यध्यापनजन्यपुण्यविक्रयजनितपातकात् ३७ ३८ धनकातरःधनेतत्प्राप्तिविषयेकातरःआसक्तः ३९ ४० तथामाघमासेसम्यक्यथाविधिकृत्वाआसीत् ततःप्रभुभ्योधनिकेभ्यः अनेनगृहीतं ४१ यतोय

मयाहेमपुरींप्राप्यवैश्येभ्योदत्तमूलकः तेभ्यएवप्रतिगृह्याप्यभवत्कुलपांसनः ३५ यज्ञान्बहुविधान्कृत्वाप्रतिज्ञातंचमौल्यकम् प्रतिगृह्यमुनेक्रीतंतत्पुण्यंबहुशोमुना ३६ ऊरुजेभ्योयतोदत्तंपूर्वपापत्रयादपि यतोलब्धायुस्तस्माच्छकटिदेशेशिराश्रयम् ३७ शाल्मलींप्राप्यचास्माभिश्चोरेभ्यश्चमृतिंगतः पंचमोमातृष्वस्रीयस्तथासंकृतिगोत्रजः ३८ अनघस्यतथापुत्रोनाम्नासंक्रांतिरित्यपि प्राप्यहेमपुरीमेभिःसहायंधनकातरः ३९ तुलामासेमेषमासेमाघमासेद्विजाधमः प्रातःस्नानंतथासम्यक्कृत्वायंप्रतिवार्षिकम् ४० तज्जातमतुलंपुण्यंकुलकोट्युद्धरक्षमम् क्रीत्वाप्रभुभ्यस्तेभ्यश्चगृहीतंभूरिवैधनम् ४१ धारापूर्वंस्वतोहस्ताद्गृहीतंपाप्मनामुना ततःप्रकोष्ठमूर्धायंडाकिनींशाल्मलीद्रुमम् ४२ अस्माभिःप्रेत्यतन्मूलंचोरेभ्योनिधनंगतः षष्ठोयंममदौहित्रस्तथामौद्गलगोत्रजः ४३ सनामकोमहापापीप्राप्तोहेमपुरीमिमां अपुत्रायंत्रयःपुत्राःक्रीताःपापेनचेतसा ४४ गुणाढ्याःश्रोत्रियाःपुण्याःकुलोद्धरणहेतवः क्रीतायेनौरसाःपुत्रास्तेनैवस्तनमूर्धजः ४५ क्रयाल्लब्धधनंभूरिगृहीत्वास्माभिरेवच चोरेभ्योमरणंप्राप्तःशाल्मल्यांडाकिनीपतिः ४६

स्मात्कारणात्उदकधारापूर्वंधनं ४२ तन्मूलंशाल्मलीमूलं ४३ सनामकःसमानंगोत्रसमंमौद्गलइतिनामयस्यसः पापेनचेतसाधनासक्तमनसा ४४ येनकारणेनश्रोत्रियावेदाध्ययनकर्तारः ४५ ४६ ६९ ६९ ६९ ६९

५५

वाचस्पतेः तन्नामकब्राह्मणस्य ४७ संस्कारान्निमित्तात् संस्काररूपकर्मकृतम् ४८ तत्पुण्यस्यमूर्ध्निपादौनिधायतदनादृत्येतिभावः तत्कर्मकृतमितिपूर्वेणसंबंधः ४९ पार्ष्णिमूर्ध्नेतिपूर्वोक्तानांषण्णांडाकिनीनाम् शिरसांहस्तादीनांचपुरोभागेविद्यमानत्वेनपरस्परानुकूल्येनदुःखंभवति एतस्यतुपृष्ठभागेशिरःपुरोभागेहस्ताद्यवयवाइत्यतः परस्परानुकूल्याभावेनपूर्णंदुःखंभवतीतिभावः ५० पूर्णदुःखे कारणमित्यत्राह दत्वेति अनेनपूर्वस्मादेकादशीव्रतादेः पुण्याद्युत्तमंपुण्यममानयित्वापूर्वमेवमौल्यंदत्वास्वीकृत्यगृहीत्वापूर्वोक्तसंस्कारः कृतस्तस्मात्कारणात्पुरोक्तेभ्यएकादशीव्रतादिविक्रयजनितेभ्यः पापेभ्यः कोटिगुणितमेतस्यपापंभवति अतः पार्ष्णिशिरस्त्वेनपूर्णदुःखंभवतीतिभावः ५१ पापेनद्रव्यलोभदुष्टेन ५२ परोक्षत्वेनस्वाभिप्रेतंकथयन्तत्रऋषिपुत्रंप्रतिसप्तडाकिन्यः प्रार्थयंतिश्लोकेनपरोपकारइति अस्मत्कृतपीडापराधस्यक्षमांकृत्वास्माकंदुःखनिवर्तकोपकारंकुर्वितिभावः ५३ मयादुःखनिवृत्तिःकर्तुमशक्येत्यत्राह दुःशकमिति त्वादृशानांसाधूनांकिंकर्मदुःशकंनुतर्क्यतेसर्वंसुशकमेवतपोमाहात्म्यादितिभावःकिमकार्यमितिदृष्टांतार्थं तथाहिदुरात्मनांकिंदुष्टंकर्मअकार्यंकर्तुमशक्यमितितर्केसर्वंसुशकमेवयथातथासाधूना

सखायंसप्तमोनाम्नाकुशःश्रीवत्सगोत्रजः वाचस्पतेस्तथापुत्रःप्राप्तोहेमपुरीमिमाम् ४७ अनाथप्रेतसं-
स्कारात्पौरेभ्योमौल्यमाप्यच कृतंद्वादशवर्षेषुप्रत्यहंपापचेतसा ४८ अनाथप्रेतसंस्कारात्कोटियज्ञफ
लंलभेत् इतिज्ञात्वापितत्पुण्यमूर्ध्निपादोन्यधायिसः ४९ तस्मादयंपार्ष्णिमूर्धासोप्यस्माभिःसहायको
पंचत्वमेत्यचौरेभ्योडाकिनीशाल्मलीद्रुमे ५० दत्वामौल्यंपुरोक्तेभ्यः पापेभ्यःपुण्यमुत्तमम् पूर्वस्मात्कोटि
गुणितंभवत्येवनसंशयः ५१ मौल्यमादाययोदत्तेपुण्यंपापेनचेतसा अस्माकंगतिमाप्नोतिनात्रकार्याविचा
रणा ५२ परोपकारःपुण्यायपापायपरपीडनम् पुराकैलासशिखरेपार्वत्यैशंकरोवदत् ५३ दुःशकंकिन्नुसा-
धूनांकिमकार्यंदुरात्मनाम् एतत्सर्वंसमाख्यातमस्मद्वृत्तांतमुत्तमम् ५४

मित्यर्थः उक्तमंत्रातिशयदुष्टं ५४ ५५ इतिश्रीवायुपुराणीयमाघमाहात्म्येटीकायांडाकिनीगणभाषणकथकोनामत्रयोदशोध्या-
यः १३ ६२ पूर्ववच्छाकिनीगणप्रेतद्वयभाषणप्रकारंकथयति उदग्दिक्स्थाऊचुरिति अगांगतवानस्मि १ शंबरारेः कामदेवस्य
२ ३ कर्मजाः कर्मणादेवपदंप्राप्तादेवविशेषाः ४ ५ प्रत्यवस्थायि प्रातिकूल्यंकृतम् ६ केनप्रकारेणनिंदितइत्यत्राह ॰ ७

त्वयाद्यस्क्रविनोजातायतस्तस्मात्समुद्धर इतिविज्ञाप्यतंतूष्णींबभूवुर्मुनिपुत्रकम् ५५ इतिश्रीवा
युपुराणेमाघमाहात्म्येत्रयोदशोऽध्यायः १३ ६२ उदग्दिग्स्थाऊचुः स्कानन्उवाच पुराहं
तुंदिलोनाम्नागंधर्वोदेवगायकः अगांदेवेंद्रसदनंकदाचित्सानुगोमुने १ शंबरारिसभायांतुनिविष्टावि-
जराइमे वसवोष्टौद्वादशार्काअष्टौदिक्पालकास्तथा २ एकादशतथारुद्रामनवश्चचतुर्दश देवर्षयोनार
दाद्यास्तथासप्तर्षयोमुने ३ यक्षाः किंपुरुषानागाः कर्मजाः पितरस्तथा विद्याधराः किन्नराश्चभूमिपाबहु-
वोपिच ४ प्रसंगाबहवोजातानानाख्यानपुरःसराः तदाप्रसंगास्तुमयाकलाविद्यास्कवेकृताः ५ प्रत्यवस्था
यिमुनिनामतंगेनमहात्मना सनिंदितोमयादुष्टचित्तेनात्मप्रशंसिना ६ कपलाशाशनस्त्वचकचालापाः कलाः
शुभाः कश्यामातरुणीप्रोटावृद्धोविदशनः क्वचित् ७ कवारसिकविद्यास्यात्कयमान्वीक्षिकीकला कवासु
कामयीमालाकचशारवामृगश्चलः ८ जराकर्कशदुष्टांगः स्वयमेकोगुहाशयः स्काशिक्षितः सदाभ्यासीसदा
लक्ष्यपरीक्षकः ९ लक्ष्यलक्षणसंवेत्तातादृशोहंसभांतरे

लापागीतरूपाः शुभाः सर्वेषांसुखकारकाः ७ रसिकवि-
याविषयक्रीडादिरसप्रतिपादिकाविद्या आन्वीक्षिकीगोतमप्रणीतातर्कविद्यान्चलइति तवालापविषयेकिमपिज्ञानंनास्तीतिभावः ८
गुहाशयोयंऋषिरस्ति ९ लक्षणंगांधर्वशास्त्रं अनात्मज्ञेनस्वकीयविद्यापरिमाणज्ञानशून्येननिंदाश्रवणानंतरं कोपनः समतंग-

ऋषिरशपदितिउत्तरेणान्वयः १० ११ अतिदयालुनेतिअतिदुःखकारकः शापोनदत्तइत्यर्थः १२ १३ विप्राद्यवज्ञयाब्राह्मणादी
नांब्राह्मणवृद्धानामवज्ञया १४ तेनक्षौरनिमित्तेनअभयाशाखिनंहरीतकीवृक्षम् १५ एतद्वृक्षप्राप्तौकिंकारणमित्यत्राह पुरेति १६

अनात्मज्ञेनमुनिनाप्रत्यवस्थायिकोपनः १० तदासोप्यशपन्मूढमहंकारेणदूषितम् अत्यहंकारयुक्तत्वा
त्वंभूमौक्षाग्नेयोभव ११ इतिशप्तस्तदातेनमुनिनातिदयालुना भोजवंशेत्वहंनाम्नाश्रुतकीर्तिरितिक्षणा
त् १२ बलीसुरूपोवित्ताढ्योजातोरुक्मरथात्मजः ब्राह्मणान्निष्ठुरंवादीसदाहंकारदूषितः १३ तादृशेन
मयाक्षौरकर्मविष्णोर्दिनत्रये कृतंनिषिद्धदिवसेवारेविप्राद्यवज्ञया १४ तेनकर्मविपाकेनजातोवृकसमा
ननः अभयाशाखिनमाप्यशाकिनीत्वमवाप्तवान् १५ पुरादिग्विजयेकालेकार्तवीर्यार्जुनोबली भोजे·
शमगमज्जेतुमामहंकारदूषितम् १६ प्रत्युत्थितशौर्यमदान्मयामत्तेनधीमता अभूद्घोरंमहायुद्धंहेह·
याधिपतेर्मम १७ तदार्जुनस्तकाचिच्छेदपादौमेयुधिनिष्ठुरः एतद्वृक्षतलेमर्त्यंमृतिर्दैवेनचोदिता १८ रणां
गणेमृतस्यापिनस्वर्गोभूद्दुरात्मनः विष्णुप्रियतमेशुद्धव्रतेवैत्रिदिनात्मके १९ निराकृत्यद्विजान्वृद्धान्कृ
तेतुक्षौरकर्मणि इतिवाचोविरामांतेतुदिलस्यमहात्मनः २० व्याघ्राननस्तुमुनयेस्ववृत्तांतमचोदयत् मत्स्य
देशपतिश्चाहमूर्मिलोनामवीर्यवान् २१ धृष्टकेतोःसुतःपापीवीर्यैश्वर्यमदान्वितः नित्याभ्यंगव्रतत्वेनपवन·
व्याधिनामया २२ कृतंवैकुंठदिवसेनत्यक्तपापबुद्धिना तेनपापेनमहताजातोव्याघ्रसमाननः २३ प्रवक्ष्याम्य·
स्यवृक्षस्यमूलेचसतिकारणं एतद्देशपतेःकन्यानाम्नाचैत्ररथस्यच २४

१७ १८ १९ क्षौरकर्मणिकृतेतुकृतेसत्येव
रणांगणेमृतस्यापिदुरात्मनोमेस्वर्गोनाभूत्इतिपूर्वेणान्वयः विरामांतेसमाप्तिसमीपकाले २० स्ववृत्तांतंश्रोतुमचोदयत् २१ २२
२३ २४

२५ २६ मेशिरः २७ २८ २९ ३० क्षत्रियदायादाः क्षत्रियकुलोत्पन्नाः ३१ ३२ वागुरिकैः वागुरयाजालेनचरंतीतिवागु

दत्ताकांतिमतीनामवैदेह्यायस्वयंवरे मयाहृतातुसाकन्यातस्यराज्ञःसभांतरे २५ विदेहाधिपतिस्तूर्णंसबलःसानुगोबली युयुधेमांमहावीर्यस्त्वहनहलमंजसा २६ हयान्रथान्गजान्पत्तीन्निःशेषंचमदोत्थितः गृहीत्वामांततोबध्वाकृत्वापंचशिखंशिरः २७ विहायमांययौकन्यामादायस्वांपुरींप्रति व्रीडयामेपुरींप्राप्तुंमनआसीन्नजातुचित् २८ एकाकीभ्रममाणस्तुवृक्षमेनमुपाश्रितः रात्रौवृक्षेशयानंचसिंहोमामवधीद्बली २९ तैलाभ्यंजनदोषेणविष्णोःपुण्यदिनत्रये शाकिनीयोनिमाश्रित्यजातोव्याघ्रसमाननः ३० इत्यूर्मिलस्यवाक्यांतेत्रयऋजुःकदंबगाः वयंक्षत्रियदायादाःकुंतिभोजसुतास्त्रयः ३१ नीलकेतुःपीतकेतुश्चित्रकेतुरितित्रयः शौर्यौदार्यादिसद्गुणैर्महेंद्रसदृशावयम् ३२ कदाचिदटवींप्राप्तामृगयासक्तचेतसः भ्रममाणावागुरिकैर्बहुभिश्चसमन्विताः ३३ भृत्यैरुपशमस्थैश्चजालिभिर्वक्रदारुभिः रणतोधावतोलीनान्पातितान्पतितानपि ३४ मृगान्नानाविधान्हत्वातान्गृहीत्वामदान्विताः प्राप्तंशोणतटंभोक्तुमस्माभिरनुगैःसह ३५ तत्रदेवालयंदिव्यंविष्णोर्देवस्यचक्रिणः तद्द्रष्टुंगतमस्माभिर्लीलयाचानुगैःसह ३६ तदाविप्रास्तुबहवऋषयःशंसितव्रताः आजग्मुर्देवसेवार्थंविविशुश्चतदालयम् ३७ मानितास्तुपुरातेचैधर्मचित्तादयालवः तदादैशिकमाहूयकुड्यादेवलकंवयं ३८

रिकाव्याधास्तैः ३३ उपशयस्थैः उपसमीपेशयाः शयनकर्तारोयस्यसउपशायः शयनगृहवहिर्देशस्तस्मिंस्तिष्ठंतितेउपशयस्थास्तैर्भृत्यैश्चसमन्विताइतिपूर्वेणान्वयः रणतःशब्दंकुर्वतः ३४ मदान्विताबभूवुः ३५ ३६ ३७ देवलकेनपु
१। ।निताः सत्कृतास्तेसदालयंविविशुरितिपूर्वेणान्वयः दैशिकंदेवगृहप्रवेशार्थमार्गप्रदर्शकंअवदामभाषणमकुर्मः इत्युत्तरेणान्वयः ३८

३९ भिक्षुकायाचनाकर्तारोविप्राः ४० इमेभिक्षुकाः कृतघ्नाः कृतंकर्ममात्रंजानंतीतिराजातुलोकपरित्राता ५१ एतेभिक्षुकाः सुखिनः कृताःइमेभिक्षुकाः अहंकारादिदूषितत्वात्पूर्वमानार्हानभवंति वयमेवभिक्षुकादिसर्वलोकपरिपालनादिकर्तृत्वात् भिक्षुकाणांयोगक्षेमवहनकर्तृत्वाच्चतत्पूर्वगमनार्हाइतिभावः ५२ ततोब्रह्मस्वंचब्रह्मस्वापहरणात्मकुकर्म ५३ कल्पसाहस्रंमनुकल्पसहस्रपरिमितकालपर्यंतंयातनानरकया

अवदामतदारोषाद्धिस्मृतिश्चकुतस्तव नज्ञानंकिंत्वयालोकपतयोत्यागताइति ३९ भिक्षुकामानिताःपूर्वंत्वया वयममानिताः तस्मात्तोविदुषोलोकेदंडोस्माभिर्विधीयते ५० अनात्मज्ञाः कृतघ्नाश्चवृथाहंकारदूषिताः राजालोकपरित्रातादातामाताचशिक्षकः ५१ अस्माभिःसुखिनोप्येतेकथमेतच्चविस्मृतम् इत्युक्त्वाबहिरागत्यक्रुद्धास्ताम्राविलोचनाः ५२ अहरामचदेवस्वंब्रह्मस्वमखिलंततः स्वदत्तंपरदत्तंचभूमिधान्यधनादिकं ५३ तस्माद्दोषान्मृतिंप्राप्तास्त्वनुभूयचयातनाः बहुधाकल्पसाहस्रंपश्चादेतत्कदंबगाः ५४ शाकिनींयोनिमास्थित्यगृध्रशीर्षाभयार्दिताः निवामःसुचिरंकालंवह्निज्वालासमाकुलाः ५५ पूर्वजन्मनिचवयंयवनाधिपतेःसुताः अस्मिन्कदंबेचास्माभिर्गर्भिण्योगाहृतास्तदा ५६ अस्मिन्जन्मन्यपिततःकदंबोस्मिन्महाद्रुमे वसंतेरंतुकामैस्सुवनेस्मिन्प्रमदागणैः ५७ उपविष्टंसहास्माभिर्भोक्तुंवृष्टिस्तदाभवत् तदाचाशनिपातेनमृतिर्जातादुरात्मनाम् ५८ तस्मादेतद्द्रुमेवासोभविताकर्कशोमहान् वाक्यांतेगृध्रशिरसःप्रेतावौदुंबराश्रयौ ५९ पुराब्रह्मन्सुतौवीरौवसुषेणमहीभृतः समाकारौसमाचारौयमौसमविभूषणौ ५०

तनाः ५४ सुचिरंबहुवर्षात्मकं ५५ कदंबेतत्संयुक्तेदेशे ५६ अस्मिन्प्रारब्धपुण्यकर्मणाप्राप्तेजन्मनीतिभावः ५७ भोक्तुंभोजनंकर्तुं ५८ भविताभवतिगृध्रशिरसःजात्येकवचनमिदंगृध्रशिरसावित्यर्थः प्रेतोऊचतुः ५९ ५० ६१ ६२

विघोषाविति समानंनामययोस्तौ ५१ ५२ विषयांतरंदुःखकारकदेशांतरप्रापणेनदंडितादयिताः क्लेशिताइत्यर्थः ५३ ५४ जृंभंतिविकसंति किंशुकाः पलाशवृक्षाः पलाशानांपर्णानांनीलवर्णः सएवगगनंतस्मिन्भ्राजंत्यः बकुलफलरूपास्तारकायस्मिंस्तत् ५५ मत्तभ्रमरझंकारेणजनितआटोपनिर्भरोगर्वोतिशयोयस्यतत् अत्यंतझंकारशब्दयुक्तइत्यर्थः बहूनांकोकिलानांकल्कलारावेणसमुदितमधुरशब्दे

सामांबरौसमरथौसनामानौबलान्वितौ विघोषाविति विख्यातौकालमृत्यूइवापरौ ५१ वंगदेशपतीआवां
प्रजापीडापरायणौ नंदवत्यांमहापुर्यांस्थितौलोकस्यकंटकौ ५२ आवाभ्यांपालितेराज्येनासीत्कोपिसुखी
जनः विनापराधंसर्वोपिदंडिताविषयांतरम् ५३ श्वोभोक्तुंचित्तंकस्यापिनासीद्राज्येमुनीश्वर आवांकदाचिद
टवीमापतुर्विषयेच्छया ५४ वसंतेकोकिलारावकोमलेकुसुमोत्करे जृंभच्चंपकपुष्पाढ्येकिंशुकाशोकमंडि
ते ५५ मत्तभ्रमरझंकारजनिताटोपनिर्भरे कोकिलाकल्कलारावमिलद्वंशस्वनेशुभे ५६ रेमातेरमणीप्राणौ
कुटीरेषुयथेच्छया ततःसायंपुरींगंतुमुद्यतावुद्यतायुधैः ५७ ग्रामंप्राप्तौसृगालाख्यंनानाजनपदाश्रयम् प-
द्मकाख्यस्यशूद्रस्यतद्ग्रामाधिपतेःकृतौ ५८ क्रीडंतौमृगयामार्गेश्येनाभ्यांतौमहाबलौ ग्रसन्ताकलविंका
दीन्शिक्षिताभ्यांमुहुर्मुहुः ५९ आवाभ्यांयाचितौश्येनौक्रीडतोःशूद्रपुत्रयोः लोभाद्दुद्रुवतुःशूद्रकुमारौसुंदरौशु
भौ ६० आवांकोपकषायाख्यौपृष्ठमन्वीयतुः क्षणात् शरैस्तयोःशिरश्छित्वाताभ्यांश्येनौहृतौतदा ६१ आव-
योस्तेनदोषेणनाभूत्संतानमुत्तमं निःसंतानौततःकालात्कालेयमपुरींयातौ ६२

नमिलंतः मिश्रीभवंतोवंशस्वनावेणुस्वना यस्मिंस्तत्शुभेआनंदकारकेवने ५६ विद्यमानेषुकुटीरेषुअल्पक्रीडागृहेषु ५७ नानाजनपदाश्रयंबहुदेशाश्रयंमहाराजकार्यनियुक्तबहुलोकविशिष्टमितियावत् ५८ कलविंकादीन्चटकादिपक्षिणः ५९ श्येनलोभात्तौगृहीत्वा ६० कुमारयोःपृष्ठंआर्षत्वात्पुरुषव्यत्ययः ६१ उत्तमं चिरकालस्थितिकर्तृ ६२

वृक्षेतिष्ठावः ६३ कारणांतरमाह पुरेतिनामप्रसिद्धोमुनिः ६४ ६५ विस्मृताः सज्जनाः साधुजनायाभ्यांतौमृतिर्दुं मरणंस्फुटमशापनू
६६ अथकौशिकशापानंतरे ६७ ताभ्यांसह ६८ ६९ कंठजात्येकवचनंकंठावित्यर्थः ७० निर्व्यलीकमिति सत्यंनतुकपटरूपमायोसन्नभित्यर्थः
७१ राज्येकश्चनआस आसीत् छांदसत्वादस्तेर्लिट् प्रेतत्वंप्राप्तमद्यापिननिवृत्तं कर्तव्येति दुःखनिवृत्तिः कर्तव्येत्यर्थः

प्रेतावौदुंबरेवृक्षेबहुदुःखसमाकुलौ मृतिरौदुंबरेवृक्षेआवयोःकारणांतरात् ६३ पुरातुकौशिकोनामयज्ञार्थं
गृहमागतः ययाचेद्रविणंतौतुआवाभ्यांचनिराकृतः ६४ आवांलोकगृहीतारौनदातारौकदाचन त्वदीयं
चेदस्तिधनंदत्वागच्छेतिवैमुनिः ६५ सकोपादशपत्नौत्वमदाहिस्मृतसज्जनौ अरण्यौदुंबरेवृक्षेमृतिर्वांस्यादिति
स्फुटम् ६६ पुत्रौचित्ररथस्याथगंधर्वस्यमहात्मनः आजग्मतुःसनारीकावस्मत्क्रीडाशनशुभम् ६७
तच्छ्रुत्वातुतदाशीघ्रमावांजातक्रुधौततः युद्धंताभ्यांचकुर्वहौजितौदुद्रुवतुर्भयात् ६८ तावूचतुःसुतौपित्रेदुःखं
चित्ररथायच श्रुत्वापराभवंक्रोधादारुरोहरथंशनैः ६९ गंधर्वमाययानीयवृक्षेस्मिन्कंठमावयोः छित्वावयोस्तयादायशिरसीपुत्रयोःपुरः
७० निधायसुखमापेदेनिर्व्यलीकंमहामतिः तस्मादौदुंबरेवृक्षेचावयोराश्रयोभवत्
७१ अराजकंततोराज्यंपरैराक्रांतमासच पुत्राभावादावयोश्चप्रेतत्वंदुःखपूरितम् नानिवृत्तमिदानींचकर्तव्याभवतादया
७२ इतिश्रीवायुपुराणेमाघमाहात्म्येचतुर्दशोध्यायः १४ छ ब्रह्मोवाच ततःसंभूयतेसर्वेपिशाचागतकल्मषाः आत्मवाच्वमनूद्येवंप्रणम्याशिरसामुनिम् १

७२ इतिश्रीवायु॰माघमा॰ टीकायांशाकिनीप्रेतसंभाषणकथकोनामचतुर्दशोध्यायः १४ छ अथास्मिन्नध्यायेपूर्वोक्तपिशाचानांसुयज्ञमुनिशिष्यकृतमाघस्नानोत्पन्नपुण्यदानेनमुक्तिंशांडिल्यमुनिकृतज्ञानोपदेशप्रकारंचकथयति ततइति संभूयएकत्रमिलित्वाआत्मवाच्यं

आत्मनांस्तेषांचार्च्यं वक्तुंयोग्यंपापसमूहं एवंपूर्वोक्तप्रकारेणानूद्योच्चार्य१ २ पंकशोषणेपंकइवपंकः पापकर्दमस्तच्छोषणेमहापवन·
तोपिमहावायोरपिकोविदकुशलेत्यर्थः ३ निशाकरायेति आनंदवृद्धिकारकायेत्यर्थः करीरजन्मनेअगस्त्यमुनयेसर्वदुःखनाशकायेत्यर्थः
चिद्ध्वांतदिवाकरायचितः बुद्धेर्ध्वांतस्यांधकारस्याज्ञानस्यदिवाकरायबुद्धिसंबंध्यज्ञाननाशकायेत्यर्थः ४ ५ महांतः साधवः स्वकथा
भिधामुत्तमकथाभिधेयामत्रभूलोकेअन्यजनसंतरणायतरिंनौकांनिधायस्थापयित्वामुक्तिंयाताःगताः परेअन्येइदानींविद्यमानाइत्यर्थः

तुष्टुवुर्विविधैस्तोत्रैः संतोषात्तंमुहुर्मुहुः नमस्तेमुनिशार्दूलनमस्तेकरुणाकर २ महापवनतः पंकशोषणेव
तकोविद ३ अस्मत्प्रमोदाब्धिनिशाकरायनमोस्तुशोकाब्धिकरीरजन्मने नमोस्तुचिद्ध्वांतदिवाकरायनमो
स्तुतेभूरिविभूतिदाय ४ भवाजगरदष्टानांदीनानामकृतात्मनाम् कृपास्वधौषधंदेहिकृपालोत्रातुमर्ह
सि ५ पुरामहांतस्तरिमत्रयातानिधायधीराःस्वकथाभिधांच एवंपरेभागवताभवादृशास्तीर्त्वास्वयंतार
यितारएते ६ भवादृशानांखलुसेवयैवलभ्याःपुमर्थाइतिवेदवादः भवापहोमाधवएषविष्णुर्भवत्सुयज्ञे
षुचगोषुयस्मात् ७ भवादृशानांखलुसंगमोपित्वनेकजन्मार्जितपापनाशात् समस्तपुण्योदयपादपस्य·
फलत्यहोनान्यदुपायकैश्च ८ महानुभावाःसमदर्शिनोयेसुदुर्लभाभागवताहिलोके दुरात्मनांसंगवतां
हिसंगस्तमस्यपारेपतनायसोभवत् ९

६ ७ समस्तपुण्योदयपादपः समस्तपुण्यानामुदयउत्पत्ति
र्यस्मात्सचासौपादपः बहुकर्मशाखासमुदायरूपोवृक्षः अन्यदुपायकैः उपयंतिकार्यसाधनार्थंसमीपंआगच्छंतितेउपायका
उपायाअन्येचतेउपायकाश्चअन्यदुपायकास्तैः अन्यशब्दस्यदुगागमश्छांदसः सत्सेवयैवसत्कर्मणांफलंभवतिनत्वन्योपा
यैरित्यर्थः ८ दुरात्मनामित्यस्यसंगवतामित्येकदेशसंगपदार्थेअन्वयः यः संगोस्ति ९ ६ ६

प्रायः बहुलं श्रेयः एवंविधास्यति प्रदास्यतीत्यर्थः तस्मात्तदुक्तहेतोः स एकयज्ञनामको मुनिरित्युत्तरेणान्वयः २० २१ पिशाचेभ्यो
ददौ तस्मात्पुण्यदानाद्धेतोः पिशाचदेहान्मुक्तिः शरीराणि पिशाचदेहान् विहायेत्युत्तरेणान्वयः २२ शुद्धेन सर्वपापनाशकेन कर्मणा·
स्नानेन पूर्वदेहान् पूर्वं ब्राह्मणादिदेहसदृशदेहांश्च प्रापुः २३ प्रेमकातरः प्रेमासक्तः २४ अंतरे पिशाचग्रस्तएकयज्ञमुनिबालकस्य मरणांते

अद्यैव भगवान्विष्णुः प्रायः श्रेयो विधास्यति ब्रह्मोवाच इत्याश्वास्य ततस्तस्मात्कौशिक्यां स मुनीश्वरः २०
प्रत्येकं नामगोत्राणि मुनिः शुद्धेन चेतसा समुच्चार्य करोत्स्नानं मृदालिप्य महामतिः २१ ददौ तत्कर्मजं पुण्यं
तस्मान्मुक्तिः क्षणादभूत् शरीराण्यपि ते सर्वे पूर्वकर्मार्जितानि च २२ विहाय पूर्वदेहांश्च प्रापुः शुद्धेन कर्म-
णा ततः परस्परालापमुदितेंद्रियगात्रकाः २३ साष्टांगं च प्रणेमुस्ते मुनिं तं संशितव्रतम् नानुत्थाप्य स एकय-
ज्ञोपि सस्वजे प्रेमकातरः २४ एतस्मिन्नंतरे चासीद्दुर्निमित्तं महाद्भुतम् उल्कापाता निपेतुश्च दिशो धूम्राश्च स
वेशः २५ गोमायवो दिवाक्रोशं कुर्वंत्यूर्ध्वमुखास्तदा रक्तवृष्टिस्तदा चासीद्दिवा चारा गुहाशयात् २६ च-
लंति वामगात्राणि शांडिल्यस्य महात्मनः तथा दक्षिणगात्राणि धर्मपत्न्या महात्मनः २७ तदा भयाकुला-
पत्नी स्वाश्रमे जातमद्भुतम् दृष्ट्वा सवेपथुः प्राह पतिं संध्यापरायणम् २८ मुनेद्भुतान्यत्र भवंति चाश्रमे नभूत
पूर्वाणि च हानिदानि पुत्रा इमे मे एकदमेव चातः समासते तत्स्वरूपधा नियुक्ताः २९ शिवा इमे पादपाश्च गा-
वश्चाग्निस्तथौषधीः शिष्यो वनं गतो नागात्कालो भूयान्गतो बत ३०

भयजनके काले उल्कापाताः उल्केव अग्निरिव पाताः पातनं यासां तास्ताराः निपेतुः अत्यंतं पेतुः २५ चारो निष्क्रांता आसन् २६
२७ २८ अग्निशुश्रूषाद्यर्थे नियुक्ताः २९ ओषधीः ओषध्यः पादपाः शिवा निरुपद्रवाः समासते ३० ५

उक्तार्थेदृष्टांतमाह पृक्तः संपृक्तश्चासौ अमृतानामौषधानांसंघः समुदायः सोस्त्यस्मिन्नितिअमृतसंघीपदार्थविशेषस्तस्यसंगः संबंधोस्त्येषांतेभोगाः भक्षणपानादयः १० सत्क्रियासत्कर्म ११ सेवयावासस्नानपूजनादिभिः अंतेसेवायाः समाप्तिकालेवीतोगतोमलोरागादिर्येषांतेवीतमलाः गुरुणासुशिक्षितामहाज्ञानिनः साधवइत्यर्थः दर्शनादनुखलुदर्शनानंतरमेव १२ तीर्थादीनि
स्वसेवयानसाक्षात्पुनंति किंतुसत्संगतिद्वारैवपुनंतीत्याह तीर्थानामिति क्षेत्रदेवतयोरपिग्रहणंबोध्यं तीर्थाद्यपेक्षयाभवादृशानां

गरेणोपृक्तामृतसांधिसंगिनोभोगाः समस्ताः शुभदेहनाशकाः १० अंतःकरणनैर्मल्ययोनिदानंसत्क्रियायथा
पुमर्थानानिदानंतुमहत्सेवासमीरिता ११ क्षेत्राणितीर्थानिचदेवतानिपुनंतुशश्वत्खलुसेवयाते
गतांहसोवीतमलाः सुशिक्षिताः पुनंतिलोकान्खलुदर्शनादनु १२ तीर्थानांसेवयाकर्मकरणात्संगतिः सतां
सत्संगत्तलक्षणादेवपुनात्येवनसंशयः १३ निर्धूतपापानस्मांश्चदर्शनाज्ज्ञानसंपदः गतदुष्टस्वभावांश्चत्वमुद्धर्तुमिहार्हसि १४ इतितैः प्रार्थितः सम्यक्प्रत्युवाचमुनीश्वरः माबिभ्यथभवंतश्चमाविषीदथवाक्वचित् १५
भवताभविताविष्णोः प्रसादोबंधमोचनः अविदूरेणकालेनत्रस्तंमामशरीरवाक् १६ आहमाभैषितातेतिसंबोध्यन्हरे मुनिं उपदिश्यभवद्बंधान्मोचकफलदंशुभम् १७ माघोपवर्तते मासोमघायुक्ताचपूर्णिमा नदी
चकौशिकीनामप्रातःकालोमहानयम् १८ तत्रस्नात्वाभवान्पूर्वपश्चादेतांश्चसिंचय तेनतेशुद्धभावाःस्युर्भवतश्चयशोमलम् १९

समागमएवअत्यंतपावित्र्यकारकइतिभावः १३ संपत्सुखादिसंप्राप्तिः १४ माबिभ्यथनबिभ्यंतुमाविषीदथनविषीदंतुछांदसप्रयोगौइमौ १५ दुष्टकर्मबंधमोचकः अविदूरेणाल्पेनभविताभविष्यतिकुतइत्यत्राह त्रस्तमिति १६ भवतांयुष्माकंभयजन्यदुःखबंधात् फलदंभयनिवृत्तिपूर्वकसुखप्रदम् १७ महान्महापुण्यप्रदः १८ अमलस्यात् १९

गजैः पीडितोमृतः तस्याशिष्यस्यआशिवंदुःखंअन्यथाशिष्यस्यदुःखाभावेननूउल्कापातादिदुर्निमित्तंवृथानिष्कारणंकदापिनभवेत्-
तस्माच्छिष्यस्यैववक्तुंदुःखमभूदितिआहंनिश्चितोमीत्यर्थः ३१ स्वीयानिस्वस्मिन्जातानिचाअंगचलनरूपाणि ३२ ३३ ३४ ३५
तैर्दिव्यपुरुषैः सार्द्धंरूपत्ताशिष्येणवंद्यमानोनमस्कृतः एवंपूर्वंकदापित्वयाकालः नैवआविलंबितः अत्यंतंविलंबितः ३६ शंकयामरणा-

किंव्याघ्रैः पीडितोबालकिंवामत्तैर्गजैर्मृतः अशिवंवाभवेत्तस्यनान्यथानवृथाभवेत् ३१ इतितस्यावचःश्रु
त्वाशांडिल्योमुनिसत्तमः सदृष्ट्वातान्यभद्राणिस्वीयान्यप्यशिवानिच ३२ शिष्यस्यैवपदंमेनेसद्रष्टुमगम-
न्मुनिः पुत्रैः कतिपयैः शिष्यैस्ततःशंकाकुलेक्षणः ३३ वृक्षाद्वृक्षान्वशिष्यस्यपदान्येवचपद्धतौ गच्छंस्तेनैव
मार्गेणदिव्यपूरुषसेवितम् ३४ शिष्यंददर्शदेवाभंराहुमुक्तमिवोडुपम् आश्लिष्याश्लिष्यतंशिष्यंमूर्ध्न्या
घ्रायतमुहुः ३५ वंद्यमानश्चतैःसार्द्धंशांडिल्योवाक्यमब्रवीत् कुतश्चासीदियान्कालःपूर्वंनैवाविलंबितः ३६
दुर्निमित्तान्यहंदृष्ट्वात्वयिशंकासमाकुलः आगतंतुमयारण्यकच्चितेस्वास्तिमेवद ३७ श्रुत्वातद्वचनंपूर्वमु-
दंतंसमचोदयत् तेपिचोचुःस्ववृत्तांतंप्रणम्यचपुनः पुनः ३८ श्रुत्वाशिष्याद्विपत्तिंचश्रुत्वातेषांचसंस्थितिं
दुर्निमित्तंततःस्मृत्वामनसाविस्मितोभवत् ३९ तानामंत्र्यततःशिष्यसहितोगंतुमुद्यतः रूपयत्तंतपुरस्कृ-
त्यरूपन्मादिव्यपूरुषाः शांडिल्यंतंमहात्मानमपृच्छन्मुनिपुंगवम् ४० दिव्यपुरुषाऊचुः दिष्ट्यास्माकं
शिष्यतोमुक्तिरासीज्ज्ञातयुष्मद्दर्शनंविप्रवर्य ज्ञानंयथानस्पृशतेमाययालंभूयोनालंलभ्यतेजन्मजात ४१

दिशंकयाहेशिष्यतेस्वस्त्यस्तिकच्चित्मेमह्यंवृत्तांतंवदकथय ३७ ३८ विपत्तिंतद्दुःखंसंस्थितिंअवस्थां ३९ उद्यतोऽभवत् ४० सु
ष्मद्दर्शनंकथमस्तीत्यतआहुः ज्ञानमितियथानः ज्ञानंअलंस्पृशतेमाययाअलंअत्यंतंजन्मजातंचनलभ्यते तथास्माकंयुष्मद्दर्शनंजातमि
तिसंबंधः ४१

४२ अंतरात्मना अंतःकरणेन ४३ बंधवृक्षाश्रयाबंधोवृक्षइवबंधवृक्षस्तस्यभूमिवदाश्रयाप्रकृतिः गुणत्रयंसत्वरजस्तमांसिमूलं प्रसिद्धवृक्षमूलवत्संति ४४ परिणामः आकारांतरभवनंजन्मास्तित्ववृद्धिविपरिणामापक्षयविनाशा एतेषट् अस्यबंधवृक्षस्य आत्मामुख्यदेहस्थानीयाइत्यर्थः ४५ त्वक्उपरितनस्थूलचर्माधस्तनंसूक्ष्मचर्मत्वगादयः सप्तधातुस्थानीयाःस्युः ४६ स्थावराणिवृक्षादीनि अष्टौविटपाः शाखाः इतिपूर्वेणान्वयः अक्षगोलकइंद्रियगोलकंजात्येकवचनमिदं ४७ प्रवृत्तिनिवृत्तिमार्गस्थौप्रवृत्तिमो

केनवाजायतेजंतुः केनवाबध्यतेपुनः केनवामुच्यतेबंधादेतद्विस्तार्येनोवद ४२ इतितन्नाधियांतेषांवचः श्रुत्वामहामतिः तान्प्रत्युवाचशांडिल्यः प्रसन्नेनांतरात्मना ४३ शांडिल्यउवाच बंधवृक्षाश्रयात्वेषाप्रकृतिश्चगुणत्रयम् मूलमात्राःशिफास्तस्यपुण्यपापेफलेतथा ४४ परिणामस्तथासत्ताद्यपायश्चजनिस्तथा ह्रासवृद्धीषडात्मास्यमेदोस्थिरुधिराणिच ४५ त्वङ्मांसूचर्मणीमज्जाधातवोविटपास्तथा देवदानवगंधर्वातिर्यङ्नरपिशाचकाः ४६ राक्षसाःस्थावराण्यष्टौकोटरंत्वक्षगोलकं दशेंद्रियाणिपत्राणिकुड्मलभूतपंचकम् प्रवृत्तिनिवृत्तिमार्गस्थौखगौनित्यंसमाश्रितौ एतत्कारणकंदेहवृक्षमेतन्निशामय ४८

क्षेतरपुरुषार्थः निवृत्तिर्मोक्षस्तयोर्मार्गः साधनंतत्रतिष्ठतः यत्नंकुर्वतस्तौजीवविशेषौखगौपक्षिस्थानापन्नौ एनंवृक्षंप्रतिसमाश्रितौ प्रसिद्धवृक्षेकेचनपक्षिणः प्रवर्तंते केचनवृक्षान्निवर्तंते इतिप्रवृत्तिनिवृत्तिमार्गस्थपक्ष्याश्रितत्वं प्रसिद्धम् बंधवृक्षेकेचनप्रवृत्तिमार्गस्थाजीवाः केचननिवृत्तिमार्गस्थाः संतिइतितत्साम्योक्तिः जीवानांपक्षिणांचानेकत्वेपिप्रवृत्तिनिवृत्तिलक्षणमार्गद्वयविवक्षयाक्रोडीकारेणद्विवचनप्रयोगः इतिबंधवृक्षः कथितः अथदेहवृक्षमाह एतदिति एषः बंधवृक्षः कारणंहेतुर्यस्यसः तंएनंप्रत्यक्षसिद्धंनिशामयजानीहि ४८

तस्यदेहवृक्षस्यब्रह्मपरमात्माआश्रयः भूमिवदाधारः प्रवृत्तंकाम्यंनिवृत्तकंनिष्कामंचकर्मफलंफलस्थानीयंप्रवृत्तमित्यादिजात्येकवचनं ४९
तमोऽज्ञानंप्रकाशोज्ञानं स्वर्गमोक्षौचेतिचत्वारोरसाः यस्यासौचतूरसः देहवृक्षः यथातिस्रोवस्थामूलंतथैवकर्मपंचप्राणाश्चमूलानिप्रकीर्तिताः
प्रसिद्धाइत्यर्थः ५० शोकोदुःखंमोहोमूर्छाअशनाआभाति इतिअशनाभक्षणेच्छाएतत्षडात्माएतेशोकादयः षट्आत्मानोमुख्यदेहस्थानीयायस्यसः देहवृक्षोस्तिछंदांसिगायत्र्यादीनिसप्तदेहवृक्षस्थित्यादिहेतवः धातवः ५१ व्यवहाराः भाषणग्रहणादयःप्राणाः इंद्रियाणि
इतिदेहवृक्षनिरूपणम् ५२ जंतोरेतस्यवृक्षरूपस्यबंधस्यप्राप्तौकारणमाह अविद्येति अविद्यापरमात्मेच्छाकामकर्मादिकाम्यकर्माहं

ब्रह्माश्रयस्तस्यफलंप्रवृत्तंचानिवृत्तकम् तिस्रोवस्थाजागराद्यास्तन्मूलंपरिकीर्तितम् ४९ तमश्चैवप्रकाश
श्चस्वर्गोमोक्षश्चतूरसः तथैवकर्ममूलानिपंचप्राणाःप्रकीर्तिताः ५० शोकमोहजरामृत्युपिपासाअशना-
पिच एतत्षडात्माछंदांसिधातवोभूतपंचकम् ५१ मनोबुद्धिरहंकारोप्यष्टौचविटपाःस्मृताः व्यवहाराःको
टराणिदशप्राणाश्छदानिच ५२ अविद्याकामकर्मादिबंधस्यैतस्यकारणम् जगद्बीजप्रधानस्यत्रयःसत्वाद
योगुणाः ५३ चिद्रूपीनिर्गुणोजीवस्तयोर्जीवप्रधानयोः अहंकारनिदानेनकर्मणासंगतिर्भवेत् ५४ प्रकृत्या
च्छन्नरूपस्तुजातोजातोमृतोमृतः

कारादिएतस्यबंधस्यप्राप्तौकारणंभवति बंधकारणीभूतगुणत्रयात्मकाविद्या-
जीवस्यचकथंसंबंधोजातः इत्याशंकायामाह जगद्बीजेतिसार्द्धश्लोकेनजगतः बीजस्यकारणस्यप्रधानस्यजडप्रकृतेः सत्वादिगु-
५३ चिद्रूपीचिदेवज्ञानमेवरूपंस्वरूपंअस्त्यस्येतिनिर्गुणः सत्वादिगुणत्रयरहितोजीवोस्तिअहंकारनिदानेनअहंकारः स्वक
: प्रथमप्रकृतिकार्यत्वात्निदानमादिकारणंयस्यतत्तेनकर्मणाकृतासंगतिः संबंधोभवेत् परमात्मनाअविद्याकामकर्मा-
हंकारादिनाजंतुर्बध्यते इतिकेनवाबध्यतेइतिप्रश्नस्योत्तरमिदंबोध्यम् ५४ एवंप्रकृत्याच्छन्नरूपः जडप्रकृत्यातिरोहितंरूपंयस्यसजा

तोजातइति पुनः पुनरुत्पन्नः पुनःपुनर्मृतः असौजंतुः प्रथमप्रश्नस्योत्तरमिदं ५५ सतुषंसत्वं ५६ दग्धप्रधानाख्यलिंगदेहः प्रधानमिति आख्यानामयस्य सप्रधानाख्यः दग्धः प्रधानाख्यः लिंगदेहोयस्यसजंतुः नजायते नोत्पद्यतेबंधान्मुक्तोभवतीत्यर्थः तृतीयप्रश्नस्योत्तरमिदं ५७ उक्तसत्वादिगुणत्रयस्वरूपस्यप्रधानस्यपंचभूताद्यात्मकत्वमाह भूतानीति तन्मात्राः तेषांभूतानांमात्राः शब्दादिविषयाः प्रधानंजडप्रकृतिः एतदात्मकंएतेभूतादिपदार्थाः आत्मास्वरूपंयस्यतत् चतुर्विंशतितत्वात्मकमस्तीतिभावः ५८ सूक्ष्मंअतिशयेनअणुभूतंनित्यंनाशरहितंअतिसूक्ष्मपदार्थस्यदुर्ज्ञेयत्वेनजगत्कारणत्वासंभवःस्यादित्याशंकायामाहमितमिति वि

भ्रमत्यसौमहाघोरेसंसाराब्धौपुनःपुनः ५५ सतुषंतुयथाबीजंपुनर्बीजत्वमेतिच तथाप्रकृतिबद्धस्तु
पुनर्बीजत्वमेतिच ५६ यथादग्धंतुषंबीजमुप्तंनैवाधिरोहति एवंदग्धप्रधानाख्यलिंगदेहोनजायते ५७
भूतानिपंचतन्मात्रामनोबुद्धिरहंकृतिः महत्तत्वदशाक्षाणिप्रधानंचैतदात्मकम् ५८ सूक्ष्मंनित्यंजग-
द्बीजंमितंत्रातंचविष्णुना अष्टधेतिवदंत्यन्येसप्तविंशतिचापरे ५९ पंचविंशतिधाकेचित्त्रयस्त्रिंशत्तथाज-
गुः

ष्णुनाजगदुत्पादकेनसर्वज्ञेननारायणेनमितंत्रातं ननुमहाप्रलयेमहतोपिपृथिव्यादेः अग्निनानाशसत्वेनसुतरांसूक्ष्म८र्थस्यनाशसंभवेननित्यत्वंनसंभवतीत्याशंकायामाह त्रातमिति अग्नेर्दाहकशक्तिप्रदेनसर्वव्यापकेनविष्णुनारक्षितमितिनित्यत्वयुक्तमितिभावः प्रसंगात्तत्वानांप्रभेदंमतभेदेनाह अष्टधेति अन्येज्ञानिनः ५९ तेतुपूर्वोक्तज्ञानिनस्कव्याससमासाभ्यांविस्तारसंकोचाभ्यांतत्वानिजगुरूचुर्नतुविरुद्धार्थतया अयंभावः महदहंकारमनःसहितंभूतपंचकमितिसंक्षेपेणाष्टधावदंति भूतेषुतन्मात्राणांमनसिबुद्धेरिंद्रियाणामहंकारेअंतर्भावः इतिचतुर्विंशतितत्वानांसंक्षेपेणाकथनंमहत्तत्वादिष्वंतर्भूतस्यसत्वादिगुणत्रयस्यपार्थक्यविवक्षयासप्तविंशतितत्वानिभवंतिपूर्ववदंतर्भूतगुणत्रयरूपमेकंतत्वंप्रकल्प्यतस्यपार्थक्यविवक्षयापंचविंशतितत्वानिभवंतिपूर्ववदंतर्भू

तगुणत्रयस्यवाय्वंतभूतस्यप्राणपंचकस्यचपार्थक्यविवक्षयात्रयस्त्रिंशत्तत्वानिभवंति एवंचतुर्विंशतितत्वानांविस्ताररूपेणकथनंतेषां उपसंहरतितत्वेति इदंप्रधानंज्ञानिभिस्तत्वात्मकंस्मृतंज्ञेयमित्यर्थः ६० जतुनालाक्षयामहाविद्यया महतः परमात्मनः अविद्यायाइच्छयाकामकर्मभिश्चक्षोभिताद्बंधादिकार्योन्मुखीकृतात्प्रधानात् हेत्वर्थेपंचमीप्रधानेनजडप्रकृत्येति ६१ तस्मात्बंधात् ननुप्रकृतिसंबंधादेवकथंसाक्षाद्दुःखप्राप्तिः दुःखस्यशरीरभोग्यत्वाच्छरीरस्यचकर्मकार्यत्वादित्यतआह· तत्संबंधादिति अन्यानिप्रकृतिबंधहेतुकामकर्मभ्योन्यानिदेहांतरारंभकाणिदेहांतरोत्पादकानिअनेकधानिश्चयेन ६२ नत्वेकस्मिन्छरीरेकृतानांकर्मणांतस्मिन्नेवजन्मनिभोगसंभवात्कथंशरीरांतरप्राप्तिरित्यतआह मुनिरिति स्वकर्मशीलोपि स्वकर्मणिशीलं·यस्यसः सांगकर्मानुष्ठातेतियावत् कर्मकुर्वन् दशावराणां दशदेहाः अवरान्यूनानतुततोन्यूनायेषुतेदशावरास्तेषांदेहानामुत्पत्तिकारणंकर्मप्रतिपद्यतेइतिउत्तरेणान्वयः सांगकर्माननुष्ठानादशाधिकदेहान्प्राप्नोतीतिकिमुवक्तव्यंप्राप्नोत्येवेत्यर्थः ६३ तादृग्बंधः दुःखप्रदप्रकृतिबंधः महागुल्मइववेणुगुल्मइवतादृग्बंधमहागुल्मस्तस्यमूलंकामकर्मादिसत्कर्मणांनिष्कामपूर्वकपरमात्मप्रीतिहेतुभूतकर्मणांसंततिः परंपरानिर्गतंमूलंयेनतन्निर्मूलंननिर्मूलमनिर्मूलंयथास्यात्तथादहतिकामकर्मादिमूलंविहायेत्यर्थः दृष्टांतेदाहानंतरमंकुरोत्पत्तिदर्शनेनानिर्मूलदहनस्यैवसत्वात् ६४ उक्तमेवस्पष्टयति कर्मणइति आत्यंतिकनिष्कृतिः समूलनाशः ६५ ७ ७

तेतुव्याससमासाभ्यांतत्वात्मकमिदंस्मृतं ६० यथाग्निशिखयाक्षुब्धंजतुनाहेमलिप्यते तथामहाविद्ययाच क्षोभितात्कामकर्मभिः ६१ प्रधानाद्बध्यतेजीवस्तस्माद्दुःखानिविंदति तत्संबंधादयंजीवः कर्मण्यन्यान्यनेकशः ६२ देहांतरारंभकाणिकरोत्यस्थापुनःपुनः मुनिःस्वकर्मशीलोपिकुर्वन्नेकदिनेनवै ६३ दशावराणांदेहानांकारणंप्रतिपद्यते नादृग्बंधमहागुल्ममूलंसत्कर्मसंगतिः ६४ अनिर्मूलंदहत्येषवेणुगुल्ममिवानलः कर्मणःकर्मणाजातुर्नत्वात्यंतिकनिष्कृतिः ६५

ननुसत्कर्मसंतत्यैवदुष्टकर्मादिनाशोसिद्धेपापपरिहारार्थकप्रायश्चित्तविधिर्व्यर्थस्यादित्यतआह प्रायश्चित्तानीति भावितः श्रुत्यर्थादिना विचारितआत्मापरंब्रह्मयैस्तैर्भावितात्मभिः यानिप्रायश्चित्तानिजडात्मनांजडः ज्ञानाद्यहेतुभूतः आत्मामनोयेषांते अतएवाज्ञानांसत्कर्मसंतत्यापापादिनाशोभवतीतिज्ञानशून्यानांजंतूनांपापनाशार्थमुक्तानीतिनप्रायश्चित्तविधिर्व्यर्थइतिभावः ६६ समूलनाशोपायमाह ज्ञानेनेति ज्ञानयोगः परमात्मज्ञानरूपोपायः धर्मः आतपः ६७ ज्ञानस्यकथंप्राप्तिः स्यादित्यतआहतदिति तत्आत्यंतिकबंधनिवर्तकं सम्यक् निष्कामबुद्ध्याप्रयोजितंपरमात्मप्रीत्यैतस्मैसमर्पितं ६८ यथाव्यवहारेअहंकारविहीनस्यइदंधनादिमदीयमित्यहंकारवि

प्रायश्चित्तानिचोक्तानिमुनिभिर्भावितात्मभिः तानिलोकेचजंतूनामज्ञानानांजडात्मनाम् ६६ ज्ञानयोगो
दहत्याशुबंधगुल्मंसमूलकम् ग्रीष्मेधर्मःपंकमिवनीहारमिवभास्करः ६७ तत्ज्ञानंकर्मणासाध्यंकर्मसम्य
क्प्रयोजितम् उत्पादयतितज्ज्ञानंतस्मात्कर्मसमाचरेत् ६८ विनाकर्मचतज्ज्ञानंनस्वार्थानभिपद्यते अहं
कारविहीनस्यपुरुषस्यफलंयथा ६९ विनाकर्माण्ययंजीवः फलंनाप्नोतिजातुचित् सहकारिविहीनस्यपुरु
षस्यफलंयथा ७० कर्मणैवविनाज्ञानात्फलंनाप्नोतिजातुचित् शाल्मलीफलमादायभोक्तुमिच्छोर्यथा
क्रिया ७१ उभेविवेचनेज्ञेयेतस्माद्धितमभीप्सुना अनुष्ठानविधिज्ञानायोगिनांचरितेनच ७२

हीनस्यफलंधनादिस्वार्थप्राप्तिविषयंनभवतितथास्वार्थान्काम्यकर्ममूलनाशसुखादिपुरुषार्थान्नाभिपद्यतेयद्वाविप्रियइत्यादिवत्विशब्दोनिषेधार्थः तथाचअहंकारेणविहीनस्यअहीनस्यतद्युक्तस्येतियावत्पुरुषस्यफलंज्ञानमोक्षादिकं ६९ फलंपूर्णफलं ७० ज्ञानंविनाकर्मणैवकर्ममात्रेणफलंकाम्यकर्मादिमूलनाशादियथाशाल्मलीफलंमहाराष्ट्रभाषयासांवरीतिनाम्नाप्रसिद्धावृक्षस्यफलंक्रियाभोजनक्रियानभवति ७१ उभेतेकर्मज्ञानरूपेविधेप्रकारौ योगिनांकर्मयोगिनांचरितेनआचरितेनकर्मणाज्ञानफलकेननिष्कामकर्मणेतिउत्तरेणान्वयः ७२

सहानुगः जीवेनसहवर्तमानः कर्मानुगः ज्ञानंवेदांतश्रवणादिजन्यंज्ञानंविज्ञानंब्रह्मापरोक्षज्ञानंबंधान्मोक्षं ७३ स्वांस्वकीयांसर्वसाक्षा
त्पश्यतीतिसाक्षीचेतयतिज्ञानंजनयतीतिचेतनः ततः कर्मधारयः ७४ सत्कर्मणांफलदः भोक्ताचकर्मणिजाग्रत्स्वप्नरूपेसत्कर्मणिचअ
कर्मणि नास्तिकर्मयस्मिन्सुषुप्त्यादौकर्माकरणेनिषिद्धकर्मणिचेतितंत्रेणार्थः तन्नियामकत्वेनास्थितः कर्मकुर्वन्तेनकर्मणा ७५ माता
परिपाति तथाविष्णुर्जीवेनकर्मकारयिता दयालुत्वादेवसर्वंकरोतीतिनस्वप्रयोजनापेक्षयेतिभावः ७६ ध्रुवंनिश्चितंकर्मविधिज्ञानंगु-

कर्मणाक्षीयतेमृत्युःसंसाराख्यःसहानुगः योगीमोक्षमवाप्नोतिज्ञानविज्ञानसंपदा ७३ कर्मकुर्यान्
सदाविद्वान्कर्तृतांस्वांविहायच कर्ताकारयिताविष्णुःप्रेरकःसाक्षिचेतनः ७४ कर्मणांफलदोभोक्ता
स्थितःकर्मण्यकर्मणि एवंज्ञात्वासदाकुर्वन्नसलिप्यतिकर्मणा ७५ यथादायाशिशुंमातापाययित्वास्त-
नौस्वयम् परिपातितथाविष्णुर्दाताकारयितास्वयम् ७६ कर्ताहमितिमत्वायंजीवःसंसरतिध्रुवम् शांतदां
तंविनीतंचसर्वविद्यासुकोविदम् ७७ निःसंशयंगुरुंप्राप्यश्रुत्वाशास्त्राणिचोदितः विधानंकर्मणांज्ञात्वात
तःसम्यक्समाचरेत् ७८ कुर्वन्कर्मफलत्यागंकुर्वन्विष्ण्वर्पणंतथा ततःकरणशुद्धिंचतद्द्वाराज्ञानमाप्नुयात्
७९ कर्माणित्रिविधान्याहुर्गुणभेदात्फलान्यपि गुणानुषंगाज्जीवांश्चषड्विधाःपरिकीर्तिताः ८०

रूपदेशेनसंपादनीयमित्यतआह शांतमिति शांतंभगवन्निष्ठबुद्धिंदांतंनिगृहीतेंद्रियंकोविदंकुशलम् ७७ ज्ञात्वाचोदितःक-
र्मकुर्वीतिप्रेरितः सम्यक्निष्कामबुद्ध्या ७८ विष्ण्वर्पणंकुर्वन्कर्मसमाचरेदितिपूर्वेणान्वयः करणशुद्धिंकरणानामंतःकरणादीं-
द्रियाणांशुद्धिंदुष्टविषयकप्रवृत्त्यभावपूर्वकंपरमात्मचिंतनादियोग्यविषयकत्वंतद्द्वाराज्ञानंच ७९ प्रसंगात्कर्मविभागमाह क-
र्माणीति गुणभेदात्गुणानांसत्वादिगुणानांभेदात्त्रैविध्यात् ८० ७ ७ ७ ७

सात्विकाःशुद्धसत्वाश्चराजसाःशुद्धराजसाः तमसाश्चतथाशुद्धतामसालक्षणंब्रुवे ८१ भावादन्याद्भिन्नरूपात्संगात्सत्वंसमाचरेत् योनिजांप्रकृतिंयायात्ससत्वोजीवउच्यते ८२ क्षितिपामनुष्यगंधर्वादेवाश्चपितरश्चिराः आजानजाःकर्मजाश्चदेवायेसात्विकामताः ८३ सापरोक्षाहरौयेतुनान्यभावसमाश्रयाः योगाद्भावंवर्धयंतःशुद्धसत्वाइमेमताः ८४ तत्वाभिमानिनोदेवाब्रह्माद्याःपरिकीर्तिताः रजोमिश्रःस्वभावायेभजंत्यन्याश्चकर्मभिः ८५ पश्चाद्गुरुप्रसादेनशुद्धभावमुपेयुषः

सात्विकादीनांलक्षणंब्रुवे ८१ भावादित्यादिपंचमीत्र्यल्पब्लोपनिमित्तंकंस्वस्वरूपादन्यमितरंभिन्नरूपंरजस्तमोगुणात्मकंभावंस्वरूपंसमाश्रित्यसंगात्स्वीयगुणसंबंधात्यःसत्वंकार्यकारणयोरभेदव्यवहारात्सात्विककर्मादिसमाचरेत्कुर्यात्सजीवःसत्वःसात्विकउच्यते सत्वाचरणस्यफलमाहनिजामितिअनेनकिंचिद्रजस्तमोयुक्तसत्वगुणसंबंधेनसत्वाचरणवत्वंसात्विकलक्षणमित्युक्तंभवति ८२ सात्विकजीवानुदाहरति क्षितिपाइति क्षितीपाःपृथ्वादियोराजानःमनुष्यगंधर्वाःपरंपरयादेवप्रेष्याःगंधर्वाःदेवाःदेवगंधर्वाःसाक्षाद्देवप्रेष्याःभीमसेनस्यभीमेतिवत्देवेतिनामैकदेशग्रहणंचिराःपितरःअग्निष्वात्तादयोत्यंतप्राचीनाःपितरःआजानजाःअप्रसिद्धाःकर्मजाःकर्मणादेवत्वंप्राप्ताश्चदेवाः ८३ शुद्धसात्विकान्लक्षयति सापरोक्षेति येहरौतद्विषयेसापरोक्षाःअपरोक्षज्ञानयुक्ताःसंतःस्वस्वरूपदन्यभावसमाश्रयाःअन्यभावमन्यरूपंसमाश्रयंतितेऽन्यभावसमाश्रयानभवंतियोगात्स्वीयगुणसंबंधात्स्वभावंहरिभक्तिंस्वकीयसत्वगुणंवावर्धयंतश्चसंतितेइमेशुद्धसत्वाःशुद्धंरजस्तमोभ्याममिश्रंसत्वंसत्वगुणोयेषांतेमताःनिर्णीताइत्यर्थः ८४ तान्दर्शयति तत्वाभिमानिनइति तत्वाभिमानिनःमहदहंकारादितत्वाभिमानिनःराजसान्लक्षयति रजइति रजोमिश्रस्वभावाःसात्विकजीवापेक्षया अधिकरजसामिश्रःस्वभावोयेषांतेब्रह्मादौहरेरन्यान्इंद्रादीन्कर्मभिर्भजंतिनतुसर्वकर्मणांसर्वनियामकेपरमात्मनिसमर्पणंकुर्वंतीत्यर्थः ८५ शुद्धभावंअमिश्रसत्वस्वभावंउपेयुषःउपेयिवांसःछांदसत्वात्प्रथमार्थेद्विती

६.४

यामाप्नुवंतः येजीवास्तेराजसाः तान्दर्शयतिमुक्तिगाइति ८६ शब्द्राजसान्लक्षयति क्वेतिक्वाचित् कदाचित्तामसभावाः तामसस्वभावाः
क्वचित्रजस्तमोभ्यांमिश्रस्वरूपिणः सत्वारंभविहीनाः सत्वगुणांकुरशून्याः ८७ तामसान्लक्षयति सत्येतिसदारजस्तमोभ्यांमिश्र
: उच्चावचेषुलोकेषु स्वर्गाद्यूर्ध्वनरकाद्यधोलोकेषुभ्रमंतः पुनः पुनरावर्तमानाः ८८ इत्थमिति इत्थंनित्यंसंसृतिबद्धाः येजीवाः
: स्मृताइतिपूर्वेणान्वयः शब्द्राजसानांतामसानांचैकनामकत्वात् उभयलक्षणांतेनान्दर्शयति मानुषसंज्ञिनइति मानुषइति-
।७. षांतेमानुषमध्यमाइत्यर्थः शब्द्तामसान्लक्षयति क्रूरेति क्रूराचाराः हिंसादिभयंकराचाराः ८९ क्वापिकदापिस्म

जीवास्तुराजसाः प्रोक्तामुक्तिगामानुषोत्तमाः ८६ क्वचित्तामसभावाश्चक्वचिन्मिश्रस्वरूपिणः सत्वारंभ
विहीनायेतेस्मृताः शब्द्राजसाः ८७ सत्यशौचदयाहीनाः सदायेमिश्रबुद्धयः उच्चावचेषुलोकेषुभ्रमंत-
स्तामसाः स्मृताः ८८ इत्थंसंसृतिबद्धास्तेजीवामानुषसंज्ञिनः क्रूराचारादयाहीनाभक्तिलेशविवर्जिताः
८९ अनूर्ध्वलोकगाः क्वापितेजीवाः शब्द्तामसाः तेजीवायातुधानाद्यादैत्यदानवराक्षसाः ९० एवंजीव
स्यषाड्विध्यात्कर्माण्यपिगुणाश्रयात् द्वैविध्येनचप्रत्येकंषाड्विधानिविदुर्बुधाः ९१ प्रकृतिस्थाइमेजीवाः
स्वानुरूपगुणेरिताः स्वानुरूपाः क्रियाः कृत्वाप्रपद्यंतेनिजांगतिम् ९२

नूर्ध्वलोकगाः ऊर्ध्वलोकगमनकर्तारोनभवंतीत्यर्थः तान्दर्शयति तेजीवायातुधानाद्याइति आद्यशब्देन मनुष्याधमानांग्रहणं ९० त
त्कर्माण्यपि गुणाश्रयात् गुणानांसत्वादिगुणानामाश्रयाद्धेतोः प्रत्येकंद्वैविध्येनसात्विकशब्द्सात्विकत्वादिप्रकारद्वयेनषाड्विधानि
९१ प्रकृतिस्थाः स्वीयस्वभावस्थाः जीवाः स्वानुरूपाः स्वकीयसत्वादितत्तद्गुणानुरूपाः निजांस्वरूपानुसारिणीम् ९२

तत्रषड्विधजीवेषुमध्ये तदानिष्कामेषुस्वकर्मसुयत्नेनतिष्ठेदितिशेषः ९३ ननुपरमात्मनएकसर्वकर्तृत्वात्जीवस्यकर्मकर्तृत्वाभावेसुतरांकर्मजन्यफलप्राप्त्यभावेनप्रयत्नोनिष्फलःस्यादित्यत्राह कर्तेति सर्वकर्तृत्वात् कर्तास्वातंत्र्यात् स्वतंत्रत्वात् कारयिताचविष्णुरितियद्यपिसंमतंसर्वशास्त्रेषुनिर्णीतं ९४ तथापीजीवान्तर्गतोहरिः यत्नवतामेवनृणांप्रेरयित्वामयासत्कर्मकर्तव्यमितिइच्छामुत्पाद्यकर्मनृभिः कारयित्वास्वयंजीवार्थंकर्मकृत्वाचसदृशाकारंकर्मानुरूपंतत्फलंकर्मफलंददातिअन्यथायत्नाभावे ९५ कर्माणिकर्तुमि र्जीवस्यकर्मणः विष्णुः सदामुख्यः कर्तासदाकारयिताच ननुअयंपुरुषः श्रीविष्णुंपूजयतीत्यादिनाजीवेकर्मकर्तृत्वस्यप्रत्यक्षसि

तत्रयः सद्गतिंप्राप्तुंपुमानिच्छतिचेत्तदा वर्णाश्रमोचितेष्वेवप्रयतेतस्वकर्मसु ९३ कर्ताकारयि
ताविष्णुरितियद्यपिसंमतम् स्वातन्त्र्यात्सर्वकर्तृत्वाद्धरिर्यत्नवतान्नृणाम् ९४ कारयित्वाप्रेर·
यित्वाकृत्वाकर्मचतत्फलम् ददातिसदृशाकारनान्यथातुकदाचन ९५ कर्तुमिच्छोः सदाविष्णुः
कर्ताकारयितासदा स्वयंगन्तुमशक्तस्यपातुमिच्छोःस्तनशिशोः ९६ कर्तृत्वंमातुरेवस्यात्तदधी
नंतदाश्रयम् तत्कर्तृतातदधीनातदाजीवस्यकर्तृता ९७ यथाप्रकृतिजीवानामिच्छासंजायतेसदा
यथेच्छतितथाविष्णुर्जीवंकारयतिध्रुवं ९८

द्धत्वेनकुतोविष्णोः कर्तृत्वादिकमित्यतआह स्वयमितिस्तनंपातुंमातरंप्रतिगन्तुंशिशोः ९६ तदधीनंमातुरधीनंतदाश्रयंसामाताआश्रयोनिमित्तंयस्यतत्कर्तृत्वंस्तनपानकर्तृत्वंयदस्तितत्मातुरेवमुख्यतः च्छायामपियथातत्कर्तृतातस्यशिशोःकर्तृतास्तनपानकर्तृतातदधीनामातुरधीनातथाकर्मकरणेच्छायामपिजीनाएवंचआगमानुमानविरोधेनकेवलप्रत्यक्षस्यदुर्बलत्वाद्विष्णोःकर्तृत्वमुक्तमितिभावः ९७ कर्मकरणेच्छाजननेकारणमाह यथेति यथाप्रकृतिस्वीयसत्वादिस्वभावानुसारेणयथाविष्णुरिच्छति ९८

ननुशिशोर्यत्स्तनपानकर्तृत्वं तस्यस्वयंगमनाशक्तत्वेनकारणेनमात्रधीनत्वंयुक्तंजीवेतुतथात्वाभावान्नतत्कर्तृत्वस्यविष्ण्वधीनत्वमि-
त्याशंक्यात्रापितदेवकारणमस्तीत्याह पिपीलिकांताइतिअंडगोचराः अंडास्थिताइत्यर्थः क्वचिद्देशेक्वापिकस्मिन्नपिकस्मैकर्मस्वयंकर्तुं
९९ एवंजीवकर्मणईश्वराधीनत्वमुपपाद्यतदेवप्रपंचयति यदेतिसः विष्णुः यदाश्नातितदापरानुगः परस्यपरमात्मनोऽनुगः अनुलक्ष्ये-
णगच्छतीत्यनुगः जीवः अश्नात्येवमुक्तश्चापियोज्यं १०० देहभृज्जीवः ब्रह्माविष्णुः १०१ अत्रभगवदधीनत्वेबहुनाउक्तेनकिमस्ति

पिपीलिकांताब्रह्माद्याजीवायेचांडगोचराः तेषुकोपिक्वचित्क्वापिनकर्तुंक्षमतेनरः ९९ यदाश्नातितदाश्नाति
यदावक्तितदैवसः यदाजिघ्रतिजिघ्रतितदाजीवःपरानुगः १०० यदागच्छतिवादेवस्तदागच्छतिदेहभृत्
शृणोतिचयदाब्रह्मतदाजीवःशृणोतिच १ यदैवस्पृशतेकिंचित्तदायःस्पृशतेजनः किमत्रबहुनोक्तेनना-
कृतंक्रियतेजनैः २ एवंकर्तरिदेवेशेकर्ताहमितिमन्यते तेनसंसरतेजीवोदुःखीजन्मसुजन्मसु ३ एवंवि-
द्वान्विनीतःसन्निःस्पृहश्चफलेषुच अनुध्यायन्महाविष्णोःस्वातंत्र्यंसर्वकर्तृताम् ४ फलदत्वंतदीशत्वंकु-
र्यात्कर्मविचक्षणः अनुष्ठातातपस्वीचसर्वधर्मपरोपिवा ५ विनायदर्पणंसम्यक्फलंनाप्नोत्यसंशयम् दे-
हिनांयाःप्रवर्तंतेप्रातरारभ्यस्वाःक्रियाः १०६ ताश्चविष्ण्वर्पणंकुर्वन्कर्मपाशैर्विमुच्यते सेवार्थंभगवान्वि-
ष्णुर्देशकालक्रियाश्रयान् ७

इत्यतः मुख्यंतात्पर्यमाह नाकृतमिति विष्णुनाकृतंकिमपिकर्मजनैर्न-
क्रियते एवंचसर्वकर्ताश्रीहरिरेवेतिभावः १०२ १०३ १०४ तदीशत्वंतस्यफलस्यईशत्वंस्वामित्वंफलमपिस्वेच्छयैवददा-
तीत्यर्थः अनुध्यायन्नितिपूर्वेणान्वयः विचक्षणः कर्मकुर्यात् कर्मणामनुष्ठाता १०५ यदर्पणायस्मैविष्णवेअर्पणंसमर्पणंविनासम्य-
स्वाः स्वकीयाः १०६ यस्मात्भगवान्विष्णुः सेवार्थंजीवोद्धारकारणीभूतस्वसेवनार्थं १०७

तस्मात् भगवान् कर्मकरणे सामर्थ्यवान् स्वयंजीवः निजमाश्रमाद्युचितंस्वकीयंकर्मपरिचरेत् कुर्यादितिआदौ कर्मकरणात् पूर्वं संकल्प्यनिश्चित्य १०८ अर्थेमीत्यर्थेनित्यकर्म करिष्यामिअनिषिद्धमन्नमाहरामि भक्षयामि स्वर्णादिकंददामिस्वेच्छाप्राप्तानिषिद्धान्नभक्षणादिविषयोपभोगान् दानादिनैमित्तिकंकर्मचविष्णुप्रीत्यर्थंकरिष्यामीत्यर्थः क्वापि कस्मिन्नपिदेशेकालादौ आत्मार्थे स्वस्वार्थेनवेनैवइतिसवदेत् १०९ सदाआज्ञाधरोभूत्वाश्रुतिस्मृत्युक्तंकर्मकृत्वेत्यर्थः नफलेच्छयेतिभावः ११० कर्मफलंत्यजन् विष्णवेसमर्पयन्कर्मकुर्वन्योजीवः सःकर्मसिद्धिंकर्मणांफलमंतःकरणादिशुद्धिंतद्वाराज्ञानंचप्राप्यबंधमोक्षमवाप्नोति अन्य

सृष्टवान्भगवानादौतस्मात्परिचरेन्निजम् इतिसंकल्प्यचोत्थायसर्वकर्मसमाचरेत् १०८ विष्णोरर्थेकरिष्यामिचाहरामिददामिच नात्मार्थमितिवैक्वापिवदेत्कर्मकरोतियः १०९ श्रुतिस्मृतिहरेराज्ञेतस्याहमनुगःसदा तस्मादाज्ञाधरोभूत्वायावज्जीवंवसाम्यहम् ११० इत्थंत्यजन्सदाकुर्वन्ध्यायेद्विष्णुमतंद्रितः कर्मसिद्धिमवाप्नोतिनान्यथातुकदाचन १११ इतिश्रीवायुपुराणेमाघमाहात्म्येपंचदशोऽध्यायः१५

शांडिल्यउवाच स्वतंत्रोपिस्वयंविष्णुर्देवैस्तत्वाभिमानिभिः करोतितनुभृत्कर्मराज्यांगैरिवभूमिपः १ अव्यक्ततत्वरूपिण्यौभारतीचसरस्वती ब्रह्मवायूमहात्मानौमहत्तत्वनियामकौ २

थाकर्मकर्ताहमित्यभिमानेविष्णवेकर्मसमर्पणाभावेच १११ इतिश्रीवायुपु॰माघमा॰टीका॰पंचदशोऽध्यायः १५ ६९ एवंइतिकर्तव्यतासहितकर्मस्वरूपंनिरूप्यविष्णुःस्वयमेकएवकर्मकर्तुंसमर्थोपिलीलयातत्वाभिमानिदेवतासहितःसन्करोतीतिप्रतिपादनपूर्वकंतत्वाभिमानिदेवतास्वरूपंतत्प्रसक्तानुप्रसक्तंचदर्शयन्कर्मस्वरूपंप्रतिपादयत्यस्मिन्अध्याये स्वतंत्रोपीतिदेवैःसहतनुभृत्कर्मतनुभृतःजीवस्यकर्म १· केतेतत्वाभिमानिनोदेवाइत्यतस्तान्देवानाह· अव्यक्ततत्वेतिअव्यक्ततत्वरूपिण्यौसत्वादिगुणत्रयात्मकप्रधानतत्वरूपमभिमन्यमा

नमस्तिययोस्तेभारतीसूत्रवायुपत्नीसरस्वतीचतुर्मुखपत्नीचेतिहूस्तः अव्यक्ततत्वाभिमानिन्यौभारतीसरस्वत्यौदेवतेइत्यर्थः एवमुत्तरत्रापूर्वृद्धवायुः सूत्रवायुः २ वींद्रोगरुडः मनस्तत्वंस्वरूपमिवययोस्तौमनस्तत्वरूपौमनस्तत्वाभिमानिनावित्यर्थः ३ प्रकारांतरेणाभिमानिर्देशानाह अथवेतिअव्यक्ततत्वात्माअव्यक्ततत्वस्यआत्माअभिमानिनीमहत्तत्वस्यस्वाभिमन्यमानत्वात् आत्मकआत्मैवआत्मकःमुख्याभिमानीत्यर्थः ४ मनस्तत्वमिति अभिमान्यभिमन्यमानयोरैक्यव्यवहारात् मनस्तत्वंपार्वतीभवतीत्युभयोरभेदेनान्वयः

शेषवींद्रमृडाख्येतेअहंतत्वाभिमानिनः मनस्तत्वस्वरूपौतुशचीपतिमनोभवौ ३ अथवाऽव्यक्ततत्वात्मादेवीलक्ष्मीरुदाहृता महत्तत्वात्मकोब्रह्मामृडोहंकृतिरूपवान् ४ मनस्तत्वंपार्वतीचकामेंद्रावर्थरूपिणौ दिग्देवताश्चंद्रमाश्चश्रोत्रतत्वाभिमानिनः ५ प्राणस्त्वगात्मासूर्यश्चचक्षुरिंद्रियदेवता जिह्वात्मावरुणोघ्राणस्वरूपावश्विनौतथा ६ वाक्तत्वात्मातथावह्निःपाण्यात्मादक्षसंज्ञकः पादात्माचजयंतश्चमित्रःपाय्वात्मकस्तथा ७ उपस्थात्मामनुश्चैवशब्दात्माचबृहस्पतिः अपानस्पर्शतत्वात्मारूपात्माव्याननामकः ८ रसात्मकउदानश्चसमानोगंधउच्यते व्योमात्मागजवक्त्रश्चवायुर्वायुःस्वरूपवान् ९ तेजस्तत्वात्मकोवह्निर्जलात्मावरुणोमहान् पृथिव्यात्माचपृथिवीदेवाविष्णोरधीनगाः १० शक्तिःप्रतिष्ठासंविच्चप्रकृतिःस्फूर्तिरेवच कलाविद्यामतिश्चैवमायानियतिरेवच ११

मनस्तत्वाभिमानिनीपार्वतीत्यर्थः अथअनंतरंकामेंद्रौअर्थरूपिणौमनस्तत्वरूपिणौअमुख्याभिमानिनावित्यर्थः ५ जिह्वात्मारसनेंद्रियाभिमानी ६ मित्रःसूर्यः ७ ८ गंधःगंधरूपविषयाभिमानी ९ देवाःइमेअभिमानिनः १० प्रतिष्ठामहत्त्वं संविज्ज्ञानं प्रकृतिःस्वभावः मायाममत्वंभ्रमोवानियतिर्नियमनम् ११

इतिद्वादशात्माद्वादशानांशक्त्यादीनां आत्मास्वामीस्वयंसाक्षात् हरिरस्ति अतोनकस्याभिमानी परदत्तस्वामित्वंत्वभिमानः नहीश्वरस्यैवंविधाभिमानःसंभवतीतिभावः तत्वाढ्याः तत्तत्वाभिमानित्वात् तत्वानांआढ्याइव आढ्याअव्यक्तमित्यादिनामानि येषांतेतत्वाढ्याः १२ शरीरिणांजीवानांजीवैःक्रियाःकारयंति १३ यतः पृथक्विष्णुंविना ततः स्वयंस्वतंत्रः नतुतत्वाभिमानिदेववदन्यप्रेरितइत्यर्थः १४ १५ यथाराजामात्यजनाध्यक्षप्रजाधीनाः अमात्यजनः अध्यक्षोनियामकोयस्याः साआमात्य

कालश्चपुरुषश्चेतिद्वादशात्माहरिःस्वयम् अव्यक्ताद्याः पृथिव्यंतायेतत्वाढ्याःक्षराःस्मृताः १२ शरीरिणां शरीरस्थास्तत्तत्स्याश्चनित्यशः विष्णुनाप्रेरिताःसर्वेकारयंत्यनिशंक्रियाः १३ तेषुस्थित्वास्वयंविष्णुस्तत्वाढ्येषुशरीरिषु तत्वाढ्यैःकारयत्यद्धापृथक्शक्तानतेयतः १४ विष्णुर्वायुंपुरस्कृत्यसर्वेष्वेतेषुसंचरन् करोतिकारयत्यद्धाजगत्कार्यमतंद्रितः १५ राजामात्यजनाध्यक्षप्रजाधीनाजगत्क्रियाः तथाविष्णुमरुत्तंत्राःप्रतिजीवकृताःक्रियाः १६ एतेजीवादिविष्ण्वंताःकर्तारश्चोत्तरोत्तरम् जीवंविनातुतत्वेशादक्षाजीवक्रियासुच १७ तथातत्वाभिधान्हित्वादक्षोवायुश्चतत्कृतौ विनावायुंस्वयंदक्षएतत्सर्वक्रियासुच १८

जनाध्यक्षासाचासौप्रजा आमात्यजनाध्यक्षप्रजाराजाच आमात्यजनाध्यक्षप्रजाचराजामात्यजनाध्यक्षप्रजेतयोरधीनाः स्वाधीनाः तथाविष्णुमरुत्तंत्रा विष्णुमरुतोर्विष्णुवाय्वोस्तंत्राः स्वाधीनाः प्रतिजीवकृताः जीवेन जीवेनेति प्रतिजीवंकृताः क्रियाः कर्माणिभवंति १६ दक्षाः समर्थाः १७ तत्कृतौतेषांतत्वाभिमानिदेवानांकृतौ कर्मकरणे एतेचतेसर्वेच एतत्सर्वेजीवादिवाय्वंताः तेषांक्रियासुतत्तत्कर्मकरणे स्वयंविष्णुरित्यर्थः १८ छ छ छ छ छ

विष्णुनैवसर्वकर्मनिर्वाहेब्रह्मादीनांदेवानांतत्वाधिपत्यदानंव्यर्थमित्याशंकायामाह अधिकारस्येति तेषांब्रह्मादिदेवानांमुक्तौ अधिकारस्यतत्वाधिपत्यस्यहेतुत्वान्निमित्तत्वात् हरिः तथामुक्तिकारणीभूतमधिकारंतत्वाधिपत्यंप्रापयित्वादेवतानांमोक्षंददातीत्युत्तरेणान्वयः १९ देवानांमोक्षफलभागिवत् हरेरपिसर्वकर्मकर्तृत्वेनापूर्वफलंस्यादित्याशंकायामाह आत्मारामइतिस्वयंस्वतंत्रः हरिः आत्मारामः आत्मन्येवारामः पूर्णानंदोयस्यसतथाभूतोस्ति अतएवश्रीहरिः परार्थमेवजीवानांकर्माणिकरोतिनतुफलापेक्षयेतिभावः २० जीवादिविष्ण्वंतानां कर्तृत्वंज्ञात्वा तत्तन्महदल्पविभागानुसारेणक्रियाफलंकर्मफलंचजानीयात् कुतइत्याह तत्तत्कर्मेतिशास्त्रोक्तंत-

विष्णुंविनातथासर्वेनापितेचलनेक्षमाः अधिकारस्यहेतुत्वात्तेषांमुक्तौतथाहरिः १९ अधिकारं
प्रापयित्वाततोमोक्षंददातिच तत्वाह्वानांदेवतानामात्मारामः स्वयंहरिः २० एवंज्ञात्वाचकर्तृत्वंजा
नीयाच्चक्रियाफलम् तत्तत्कर्मफलंज्ञात्वाश्रद्धावान्जायतेयतः २१ श्रद्धाजनित्रीधर्माणांश्रद्धामाता-
परास्मृता श्रद्धाहीनाःक्रियाःसर्वानफलंतिकदाचन २२ तांप्राहुरास्तिकींबुद्धिंविंद्यात्कर्मफलंयतः न
आप्रामाणिकींबुद्धिंनकुर्यात्कर्मणःफले २३ क्रियाफलान्यर्थवादान्येवदंतिनराधमाः तेसर्वेनरकंयांतिया
वदाभूतसंप्लवम् २४ महदप्यल्पदंकिंचित्किंचिदल्पंचभूरिदम्

त्तत्कर्मफलंयतोजायतेतस्मादित्यर्थः २१ जनित्रीजनयित्रीउत्पादिकामातामातेवसंरक्षिका २२ यतःययाश्रद्धयाविंद्यात् लभेत् तामास्तिकीं अस्तिशास्त्रोक्तंसर्वंसत्यमित्यास्तिकीतां तन्नकर्मणःफले २३ क्रियाफलानिक्रियाणांकर्मणांफलानियेषुवाक्येषुतानि अर्थवादान् प्रशंसावाक्यानिकर्मणिजीवस्यप्रवृत्त्यर्थंप्रशंसाकथनमात्रपराणिनतुवास्तवानितत्तत्कर्मफलानीतिभावः आभूतसंप्लवंभूतानांसंप्लवोनाशोयस्मिन्सः तंकालंअभिव्याप्य २४ किंचित् अज्ञानिकृतंकर्ममहदपिबहुप्रयत्नवित्तादिसाध्यमपिअल्पदंअल्पफलदंकिंचित्ज्ञानिकृतंकर्मअल्पंअल्पप्रयत्नवित्तादि-

साध्यमपिभूरिदंबहुफलदंकिंचित् अल्पज्ञानिकृतंकर्म अल्पमात्रकृतोधर्मोभवेज्ज्ञानवतोमहान् महानपिकृतोधर्मोह्यज्ञानांनिष्फलोभवेदितिस्मृतेः ज्ञानिफलशून्यः निष्फलः एवंकर्मगतिः गम्यतेइतिगतिः फलंगहनाद्दुस्थमेवेतिनिश्चेतुमशक्या २५ २६ २७ नियमः यथाकालंमितभक्षणादिनियमः इति इत्येतानिषडंगानीतिपूर्वेणान्वयः हस्तपध्यमुखस्थानीयानीत्यर्थः २८ प्रबोधः सावधानताशक्तिविमर्शनंशक्तेः शरीरद्रव्यादिसामर्थ्यस्यविमर्शनंविचारः शुचित्वंशुद्धत्वंचेतियान्यंगानिसंतितानितुतत्साध्यांगानिषडंगसाध्यांगानिइतिपूर्वेणसंबंधः प्रधानांगंतुउत्तमांगस्थानीयंतु इदंवक्ष्यमाणंविष्णोरर्पणंमतंसंमतमित्यर्थः २९ तदेवाह विष्णोरितिकर्मफलस्यार्प-

किंचित्समफलंकर्मगहनाकर्मणोगतिः २५ श्रुतिस्मृतिपुराणोक्तंश्रद्धेयंहितमिच्छता कर्मणाराध्यमानेनविष्णुभक्तिःसदाभवेत् २६ षडंगानितुचैतानिक्रियमाणस्यकर्मणः श्रुतिस्मृतिविचारश्चश्रद्धासत्संगतिस्तथा २७ आराध्यदेवताभक्तिस्तथाकर्तृत्ववर्जनम् नियमश्चेतिचत्वारितत्साध्यांगानितानितु २८ कालेकालेप्रबोधश्चतथाशक्तिविमर्शनम् मनस्वास्थ्यंशुचित्वंचप्रधानांगमिदंमतम् २९ विष्णोरर्पणमेवैकंसर्वेषांकर्मणांमतं निष्कामत्वंहरिप्रीतिकामनालोचनद्वयम् ३० तथैवतदुपांगानितान्येतानिविदोविदुः गंडूषदंतकाष्ठंचशौचाचामौतथैवच ३१ स्नानंवस्त्रपरीधानसप्तमंपुंड्रधारणम् एवंकर्मविजानीयात्सम्यक्कर्मसमाचरेत् ३२ कर्मणानेनसज्ज्ञानंजायतेमोक्षसाधनम् एतज्ज्ञानंविनाकर्मकृतंवाबहुशोनरैः ३३ नतेनवर्धतेक्वापिनोकनीयान्भवेत्क्वचित्

णंप्रधानांगंमतमित्यर्थः शरीरेलोचनद्वयमस्तितत्स्थानीयमाह निष्कामत्वंमोक्षव्यतिरिक्फलकामरहितत्वंहरिप्रीतिकामनाचेतिलोचनद्वयंमतं ३० यानिगंडूषादीनितान्येतानि ३१ एवंसांगोपांगंकर्म ३२ तेनसांगोपांगेन एतज्ज्ञानं एतेषामंगादीनांज्ञानंविनायत्कृतंकर्म ३३ नवर्धतेनमुक्तोभवतीत्यर्थः कनीयान्सर्वदाकर्मकारित्वात् अत्यंतनीचोपि

नोभवेत् ननुनिष्कामस्यकर्मांगत्वेस्वीकृतेवेदादिषुमोक्षेतरकाम्यफलोक्तेर्वैयर्थ्यापत्तिरित्याशंकायामाह वेदेति फलचोदना फलविधिः ३४ रुच्यर्थंरुचयेइतिरुच्यर्थंअभिप्रीत्यर्थंनतुतत्तत्फलप्राप्त्यर्थं कर्मकर्तव्यमितितात्पर्येणेत्यर्थः नन्वेवंकृतोंगीकर्तव्यंफलेएवतात्पर्यंकिन्नस्यादित्यतआह निःसंगइति फलकामनारहितः कर्मकर्तासर्वतः सर्वेषुकालेषुसुखीभवतीमोक्षानंदंप्राप्नोतीत्यर्थः ३५ ३६ पश्चात्गुडदानानंतरंततः गुडात् परंश्रेष्ठमत्यंतसुखकारकमित्यर्थः तथाश्रुतिस्मृतिपुराणानिफलचोदनांकृत्वा पश्चात्श्रुतिचोदितांश्रुति·प्रेरितांश्रुत्युक्तमित्यर्थः निष्कामचोदनांकुर्वंतीत्यर्थः ३७ ननुसर्वेवेदायत्पदमामनंति वेदैश्चसर्वैरहमेववेद्यः इत्यादिश्रुतिस्मृतिभिर्वेदाना

वेदस्मृतिपुराणेषुयाचोक्ताफलचोदना ३४ येकर्मविमुखामंदास्तेषामादौप्रवृत्तये रुच्यर्थंमुदितासाचनिःसं·
गःसर्वतःसुखी ३५ यथामाताशिशोरादौमहारोगप्रशांतये औषधंदातुकामासागुडंदत्वाततःपरम् ३६
प्रयच्छत्यौषधंपश्चात्तथैवश्रुतिचोदिता श्रुतिस्मृतिपुराणानिपश्चान्निष्कामचोदना ३७ अर्थावेदाश्चसर्वत्र
क्रियातात्पर्यकाःपुरा तथैवामुख्यवृत्त्यातुदेवतास्वितरास्वपि ३८ सर्ववेदाःसघोषाश्चसर्वेवर्णाःस्वराश्चापि
समात्राःसविसर्गाश्चसानुस्वारपदानिच ३९ गुणसांद्रेमहाविष्णौमहातात्पर्यगौरवाः

विष्णुपरत्वेनकर्मपरत्वाभावात् कर्मकरणेप्रमाणाभावेनसुतरांतन्निष्कामचोदनानसंभवतीत्याशंकायामाह अर्थाइति अर्थाः वेदार्थाः वेदाः क्रियानांअक्षरानुपूर्व्याविनियुक्ताः गायत्र्यादिमंत्ररूपाः सर्वत्रसर्ववाक्येषुअमुख्यवृत्त्यागौणवृत्त्याज्ञानात्पुरापूर्वंकर्मकाले इत्यर्थः क्रियातात्पर्यकाः क्रियासुकर्मसुतात्पर्यंयेषांतेकर्मांगमंत्रत्वेनवेदवाक्यानांकर्मस्वरूपप्रदर्शकत्वेनवेदार्थानांचकर्मपरत्वमस्तीतिभावः तथैवइतरासुविष्णोरन्यासुवेदास्तदर्थाश्चतात्पर्यवंतइत्यर्थः ३८ सघोषाः नदीघोषादिध्वन्यात्मकशब्दसहिताः स्वराउदात्तादयः समात्राः मात्राभिः एकमात्राद्यात्मकोच्चारणकालैःसहिताः ह्रस्वादिनामकवर्णनिष्ठाः शब्दविशेषाः ३९ गुणसांद्रेगुणपूर्णेमहातात्प

र्यगौरवाः महातात्पर्यंमुख्यविष्णुपरत्वंगौरवंश्रेष्ठत्वंयेषांतेमहातात्पर्यगौरवाःसंति एषाम्श्रुतिः मुख्यानुभावप्रधानोनिर्देशः मुख्यत्वा·
: ४० तदधीनांविष्ण्वधीनांजात्येकवचनमेतत्तदधीनाः देवताइत्यर्थः वेदविधिंवेदप्रतिपादितकर्मविधिंकर्मश्चाचरति ४१ फलं
मोक्षादिकंयस्मात्कर्मविधिंज्ञात्वैव ४२ तस्मात्तज्ज्ञानार्थंसर्वत्रसर्वशास्त्रेषु ४३ ज्ञानयोगंबंधमोक्षस्यज्ञानलक्षणमुपायंगुरोरनुज्ञयान·

प्रतिपादयतिह्येषा मुख्याद्विष्णुंततःपरम् ४० तदधीनांदेवतांच पश्चात्कर्मयथाक्रमम् इतिजानन्वेदवि
धिंपश्चाच्चरतिसन्मनाः ४१ सकर्मफलमाप्नोतिनान्यथातुकथंचन ज्ञात्वैवकृत्वाकर्माणियस्मात्फलमवा·
प्नुयात् ४२ तस्माद्गुरुकुलेवासःसर्वत्रादौविधीयते यज्ञादिसर्वधर्माणांगुरुसेवापरास्मृता ४३ ततोगुरुंस
मासाद्यविनयात्तंप्रसाद्यच ज्ञानयोगंक्रियायोगंज्ञात्वागुरुरनुज्ञया ४४ क्रियायोगंज्ञानयोगंसाधयेत्क्रमस·
माहितः ज्ञानाद्विष्णुप्रसादाप्त्यप्रसादान्मोक्षमाप्नुयात् ४५ भुंजंतंपथ्यमेवान्नंनतुदंतेरुजोयथा नेंद्रियाणि
तुदंत्येनंदमैर्नियमकारिणम् ४६ इंद्रियाणिप्रवर्तंतेविषयेषुस्वभावतः तेषांजयेयतेतादौपश्चाद्योगमवाप्नु
यात् ४७ सहायंमनएतेषांदुर्जयानांस्वभावतः तत्रापिदुर्जयंचित्तंवायोरिवसुदुर्ग्रहम् ४८ सततंश्रवणेनैव
मनोवैजयतिध्रुवम् नान्योस्त्युपायोमनसोविनाश्रवणमादरात् ४९ इंद्रियाणिपुरस्कृत्यधावमानंगुणेषु·
तत् श्रवणाज्ज्ञातविज्ञस्याम नोवारयितुंक्षमः ५०

वाएकेनाक्षरेणछंदांसिवियंतिनद्वाभ्यामितिवचनान्नात्रछंदोभंगःशंकनीयः ४४ ४५ तुदंतेव्यथंतेदमैर्दुर्विषयेषुप्रवृत्तिप्रतिबंधै
र्नियमकारिणंसद्विषयमात्रप्रवृत्तिकारिणं ४६ ४७ वायोरिववायोःप्रवाहइवसुदुर्ग्रहंस्वत्यंतदुःखेनग्रहणीयंगृहीतुमशक्यमित्यर्थः
४८ जंतुःभगवन् माहात्म्यश्रवणेनैवमनसःजये ४९ गुणेषुविषयेषुविज्ञस्याविशेषज्ञानेननरःक्षमःसमर्थोभवति ५०

गृहंगृहस्थाश्रममित्यर्थः ५१ विषयान्जयतः पुंसः पुरुषां स्त्रीणामप्युपलक्षणं विषयाः बलात्स्वसामर्थ्येन ५२ योगीकर्मयोगी तानिविषयेषु प्रवर्तमानानि इंद्रियाणियोगित्वंज्ञानयोगित्वंकर्मणिउद्देश्यत्वेनाधिकृताः ५३ स्वांतरस्थं स्वांतर्यामिणं ५४ अयंविष्णुः पूजितोभवति कथं पूजितोभवतीत्यत्राह स्वीयैः स्वपूजकैः उपार्जितां संपादितांपूजांतत्सामग्रींविष्ण्वर्पितांकृत्वा ५५ किंचित्फलंदत्वादंडयंतिअधःपातरूपंदंडं कुर्वंति यद्यपि देवैः स्वपूजायाः विष्णौसमर्पणात् विष्णुस्तैः पूजितएवतथापितैः स्वबुद्ध्या विष्णुपूजायाअकृतत्वात्तेषामधः पातनंयुक्त-

षट्सपत्नान्जिगीषुश्चगृहंपूर्वंहिसंश्रयेत् यथादुर्गसमाश्रित्यदुर्बलोजयतिस्थिरान् ५१ क्रमाज्जिगीषुर्वि
षयान्शनैर्मोक्षायकल्पते तूर्णंवैजयतः पुंसः समाकर्षंतिवैबलात् ५२ तानिजित्वाक्रमेणैवयोगीयोगित्वमा
प्नुयात् कर्मण्यधिकृतायेचदेवाः सूर्यादयोखिलाः ५३ विनाविष्णुंस्वांतरस्थंस्वांश्चपूजयतोजनान् तान्
धः पातयंत्यहोसंसाराब्धौपुनः पुनः ५४ देवानन्यान्पूजयद्भिरयंयद्यपिपूजितः देवाविष्ण्वर्पितांकृत्वापूजां
स्वीयैरुपार्जिताम् ५५ किंचिद्दत्वादंडयंतिसंसाराब्धौपुनः पुनः स्वामिभक्तायथाचोरांस्तदीयंप्रतिगृह्यच
५६ निवेद्यस्वामिनेसर्वंदंडयंतियथाभुवि तस्मात्कर्मण्यधिकृतान्पूजयंतिसुरान्द्विजाः ५७ पूजयंत
स्तदंतस्थंहरिंसिद्धिमवाप्नुयुः देवान्हित्वायजंतोपिविष्णुंदेवेशमव्ययम् ५८ नाधिगच्छंतितेविष्णोः प्रसा
दंमोक्षसाधनम् अपूजितात्मधर्मादिदातारोयजतांसुराः ५९ यथाप्रजाः पातयंतिमानवैरपुरस्कृताः

मितिभावः भक्ताः भृत्याः ५६ येद्विजाः ५७ तेतदंतस्थंअधिकृतदेवांतर्यामिणंहरिंपरमात्मानंपूजयंतः संतएवसिद्धिंमोक्षप्रापकं ज्ञानं ५८ अपूजिताः सुराः विष्णुमेवयजतांपूजकानां अधर्मादिदातारः प्रसादप्रतिबंधेच्छया अधर्माज्ञानादिदातारोभवंति ५९ अत्रदृष्टांतमाह यथेति प्रजाभिश्चिकीर्षितंप्रसादकारिणंस्वामिसेचनंनेच्छंतिस्वामिदर्शनात्किंनकारयंतीत्यर्थः मानवैरपुरस्कृताः

आदौत्वपमानिताः प्रजाः पश्चात् पातयंतिराजगृहाद्बहिर्गमयंतिच ६० हरिद्विषइतिदेवभक्तानांविशेषणस्करद्विषइतिहरिभक्तानां
विशेषणंयातनालयान् यातनाप्रदाणिनरकानित्यर्थः ६१ ६२ स्वेनवर्णाश्रमोचितेननियतेननित्येननतुकाम्येनेत्यर्थः गतिंमोक्षस्था
६३ योगेनकर्मयोगेनमोक्षायकल्पते उपयुक्तंभवति ६४ इतिवायुपुराणीयमाघमाहात्म्यटीकायांषोडशोऽध्यायः १६ छ
अस्मिन्नध्यायेज्ञानयोगस्वरूपंनिरूपयति शांडिल्यउवाचेति येसमचित्ताः मानापमानादिषुसमंनिर्विकारंचित्तंयेषांते १ २

अवज्ञाताराज्ञभृत्यानेच्छंतिस्वामिसेवनम् ६० हरिद्विषोदेवभक्ताहरिभक्ताःस्करद्विषः उभयेतेव्रजंत्य
हाद्दारुणान्यातनालयान् ६१ यथाश्रुतिस्तथाचारःकर्तव्योहितमिच्छुभिः तस्माद्विष्ण्वनुगान्देवान्वि
ष्णुंचैवयथाक्रमम् ६२ पूजयन्कर्मणास्वेननियतेनचवैनरः निजांगतिमवाप्नोतिनात्रकार्याविचारणा ६३
एवंविज्ञातयोगेनयत्कृतंकर्मविद्यते तदेवज्ञानमुत्पाद्यक्रमान्मोक्षायकल्पते ६४ इतिश्रीवायुपुरा
णेमाघमाहात्म्येषोडशोऽध्यायः १६ छ शांडिल्यउवाच एवंभूत्वाकर्मयोगीमहात्माज्ञानप
श्वादभ्यसेच्छुद्धबुद्ध्या तच्चज्ञानंलभ्यतेसाधुसंगात्तेसाधवःसमचित्तामहांतः १ इंद्रियाणिनियम्याथ
सर्वकामेषुनिस्पृहः श्रद्धावाननसूयश्चभक्तिमानप्यधोक्षजे २ जिज्ञासयेत्ततोविष्णुंसर्वधर्मपरायणः
गुणपूर्णंदोषदूरमुपास्यमाप्यमंजसा ३ श्रवणंमननंध्यानंजिज्ञासेत्यभिधीयते आदौशास्त्राज्ज्ञेयएषोम
हात्मानान्यस्मानाद्वेदगम्योजनैस्तैः

सर्वधर्मपरायणोभूत्वाततः गुणपूर्णंआनंदाद्यनंतगुणैः पा॰
॰दूराः यस्मात्तंचिंतादिदोषवर्जितमित्यर्थः उपासाप्राप्यंसद्भिर्वैराग्यभक्त्यादियोगात्प्राप्तिविषयीभूतं ३ अन्यान्॰
मानात् प्रत्यक्षादिप्रमाणात् नज्ञेयः कुतइत्यतआह वेदेतितैः पूर्वोक्तभक्त्यादिगुणयुक्तैर्जनैः वेदगम्यः वेदैश्चगम्यः वेदैकवेद्यइत्यर्थः॰

निशास्त्राणिअनुवर्तैः तिअनुवर्तंते. शास्त्रैः शास्त्ररूपैः मानैः प्रमाणैः ४ नान्यान्मानादित्युक्तमेवस्पष्टयति नाक्षादिति एषः जीवः एनंपरमात्मानं अक्षात् अक्षाणामिदमाक्षंतस्माच्चक्षुरादींद्रियजन्यप्रत्यक्षात् ज्ञातुं कदापिअलंसमर्थोनभवेदितिसर्वत्रयोजना तर्कादिति तर्कस्यानुमानात्ः पातित्वेपिब्राह्मणवासिष्ठन्यायेनपृथगुक्तिः स्मृतेः स्मरणात् मानांतरात् वेदाननुकूलसांख्यादिशास्त्रात् शास्त्रशब्दवाच्यात्कणादयः एनंपरमात्मानंसंशयविपर्ययज्ञाननिरसनपूर्वकंयथार्थज्ञानेनवेदयंतिज्ञापयंतिइतिहेतोःवेदाइत्युच्यंते ५ तेपिवेदाअपिलिंगैर्हेतुभिः तानिलिंगानि ६ उपक्रमेति प्रकरणस्यादिरूपक्रमः तदंतः उपसंहारः युक्तिरुपपत्तिः एकविषयाअसकृदुक्तिरभ्यासः प्रमाणांतरासिद्धार्थप्रतिपादकत्वमपूर्णता निर्णीतस्थलेस्वसमानोक्तिः समाख्या अनेकप्रमेयप्रतिपादकमेकार्थेतात्पर्ययुक्तंस्थानं एकप्रमेयप्रतिपादकानेकवाक्यानिप्रकरणं ७ फलंफलबोधकत्वंचएतेउपक्रमादयः एतैर्लिंगैः महावाक्यतात्पर्यंमहतमुख्यंचतद्वाक्यतात्पर्यंच तत्तात्पर्यज्ञानेनबुधैःजिज्ञास्यः हरिरेवोदाहृतः एवकारव्यावर्त्यमाह अन्यइति अन्यश्चतुर्मुखादिः ८ अन्येदेवानांमोक्षदानेस्वातंत्र्याभावात् अविद्यादिनाज्ञाननाशात् अनाद्यनेकवासनाभिर्दुष्टत्वात् अल्पशक्तितइतिभावप्रधानोनिर्देशः अल्पशक्तित्वादित्यर्थः ९ अन्यदेवजिज्ञासापरवाक्यानां समन्वयः सबंधः १०

तथावेदाननुवर्तंतियानिशास्त्रैर्मानैर्ज्ञायतेवेदवेद्यः ४ नाक्षादेनंनानुमानाच्चतर्कान्नैवस्मृतेर्नापिमा
नांतराच्च अलंभवेज्जीवएषःकदापिज्ञातुंचैनंवेदयंतीतिवेदाः ५ उपक्रमादिलिंगैश्चतेपिसम्यग्विचा
स्ताः स्वार्थंतेज्ञापयंत्यज्ञातान्येतानिनिबोधय ६ उपक्रमोपसंहारौयुक्तिरभ्यासएवच अपूर्वतासमा-
ख्याचस्थानप्रकरणातथा ७ फलंचैतैर्महावाक्यतात्पर्यंज्ञायतेबुधैः जिज्ञास्योहरिरेवान्योनजिज्ञास्यउदा
हृतः ८ अस्वातंत्र्यादज्ञाननाशाद्दुष्टत्वादल्पशक्तितः यान्यन्यदेवजिज्ञासापराण्यपिपदानितु ९ तत्रस्थैर्बलवल्लिं
गैर्ज्ञेयोविष्णोसमन्वयः सएवमुख्यतःशब्दैर्वाच्यएकोजनार्दनः १०

मुख्ययापरयावृत्त्यामुख्यार्थप्रतिपादकत्वेनबहुधात्मनांबहुधाबहुप्रकारकः आत्माऽर्थोयेषांते हरेरेववाचकत्वंसचसविष्णुरेवशब्दानांसमन्वयो-मुख्यवृत्त्यापर्यवसानंयस्मिन्निति शब्दसमन्वयःउच्यते ११ समस्तनामधासर्वनामधारकः १२ सर्वनामत्वंविष्णोः कुतइत्यतआह यदिति शब्दानांप्रवृत्तेर्यत्निमित्तंमुख्यकारणंतत्विष्णोअनंतगुणपूर्णपरमात्मन्येवयुज्यते १३ समन्वयान् उपक्रमादियुक्तिभिर्वेदादिसर्वशब्दसंबंधात् सम्यक्कृतागुणपूर्तिनागुणपूर्णता अधिकारिभिः ज्ञानाधिकारिभिः १४ यथाधिकारमितिप्रसक्तानधिकारिणोदर्शयति ज्ञेयाइति तेजीवाः

मुख्ययापरया वृत्त्याशब्दानांबहुधात्मनाम् वाचकत्वंहरेरेवसचशब्दसमन्वयः ११ कृतेसमन्वयेप्येवं
नान्योजिज्ञास्यइष्यते समस्तनामधाविष्णुःसर्वदोषविवर्जितः १२ यत्प्रवृत्तेर्निमित्तंचविष्णोरेवहियुज्य
ते अतःसर्वाणिनामानिविशंत्येनंगुणाकरम् १३ समन्वयान्कृतासम्यग्विष्णोश्चगुणपूर्तिता यथाधि
कारंजीवैस्तज्ञायतेतेधिकारिणः १४ ज्ञेयाबहुविधास्तत्रवेदज्ञोगतसंशयः शांतोदांतोनिस्पृहश्चदृढभ-
क्तिर्दृढव्रतः १५ विष्ण्वर्थमर्थयन्मोक्षंनमोक्षार्थविभुंचसः सउत्तमोधिकारीतुतत्तुदेवानवैपरे १६ पूर्वो
क्ततद्गुणोपेतोमोक्षार्थीविष्णुमर्चयेत् समध्यमोधिकारीस्यात्सोपिलोकेसुदुर्लभः १७ वेदाध्ययन-
हीनस्तुपूर्वोक्तगुणसंयुतः अधमंतंविजानीयात्सोपिमोक्षायकल्पते १८ नारीणांचैवशूद्राणांतंत्रमार्गे
धिकारिता

उत्तममध्यमाधमभेदेनबहुविधाः संतीत्यर्थः तत्रतन्मध्येशांतः भगवन्निष्ठबुद्धिः १५ यः विष्ण्वर्थसंसारकार्याव्यवधानेननिरंतरसेवया विष्णुप्रीत्यर्थमेवमोक्षमर्थयन् प्रार्थयमानः मोक्षार्थंकेवलबंधमोक्षार्थंविभुंपरमात्मानंनार्थयतेनप्रार्थयतेनानुदाहरति तेइतिउत्तमाधिकारवंतः १६ तद्गुणैर्वेदज्ञानादिगुणैः १७ वेदाध्ययनहीनइति तदधिकाराभावात् मोक्षायमोक्षंप्राप्तुंकल्पतेसमर्थोभवति १८ वेदानधिकृतानांस्त्रीशूद्रादीनांकथंमोक्षःस्यादीश्वरज्ञानोपायाभावादित्यतआह नारीणामिति तंत्रमार्गे भार

ताद्विज्ञानेअधिकारित्वाअधिकारइत्यर्थः ग्रंथपुरःसरं ग्रंथाध्ययनपुरःसरंअधिकारित्वानास्तिकिंतु केवलग्रंथानुपूर्वीश्रवणेनेत्यर्थः १९ संकराः जातयोयेषांतेसंकरजातयः येकेचित्प्राणिनःसंति २० एतेषांसंकरजातिप्राणिनांआनुपूर्व्येणसर्वग्रंथानुक्रमेणातत्त्वज्ञानेधिकारोनास्ति किंतुकथामात्राधिकारिताग्रंथोक्तभगवत्कथामात्रज्ञानेधिकारः पुल्कसलक्षणंषष्ठाध्यायटीकायामुक्तंनाममात्रेनामार्थज्ञानमात्रे २१ गुणकृतभेदमुक्त्वाजातिकृतभेदमाह तत्रेति तत्रब्रह्मज्ञाने देवाःउत्तमाःअधिकारिणःपरिकीर्तिताः इतिसंबंधःपितरः अग्नि-

तत्त्वज्ञानेपिशूद्राणांनतुग्रंथपुरस्सरम् १९ तथाब्राह्मणीनारीनस्याग्रंथपुरःसरम् तत्त्वज्ञानेधिकारोस्ति केचित्संकरजातयः २० एतेषांनानुपूर्व्येणकथामात्राधिकारिता चांडालपुल्कसादीनांनाममात्रेधिकारिता २१ तत्राधिकारिणोदेवाउत्तमाःपरिकीर्तिताः ऋषयःपितरोभूपामध्यमाःपरिकीर्तिताः २२ तत्राधिकारिणःसर्वेअधमामनुजोत्तमाः विष्णुभक्तिविहीनायेनतेषामधिकारिता २३ यस्माद्धरिप्रसादेनलभ्योमोक्षउदाहृतः जिज्ञास्योभगवांस्तस्माच्छास्त्राल्लक्षणतोहरिम् २४ जन्मादिजगतोयस्मात्तद्ब्रह्मसहरिःस्मृतः यस्मादिमानिभूतानिजायंतेतद्भवानिच २५ जीवंतियेनविभुनासंहृतानियुगात्यये तद्ब्रह्मपरमंज्ञेयंसविष्णुःपरिकीर्तितः २६ उदयत्राणनाशानाप्रकाशस्यावृतेस्तथा बंधस्यमोक्षस्यतथाकर्तायोनियमस्यच तद्ब्रह्मपरमज्ञेयनान्यद्ब्रह्मसमीरित २७ कर्माविद्याप्रधानंचतथाकालोगुणाश्चये नतेषांकर्तृताक्कापि यस्मादेतेह्यचेतनाः २८

ष्वात्तादयः भूपाः पृथ्व्यादिराजानः २२ सर्वेमानुषोत्तमाः तत्रब्रह्मज्ञानेअधमाःअधिकारिणः २३ २४ लक्षणमाहजन्मादीति सःब्रह्मशब्दवाच्यः उक्तलक्षणंप्रपंचयति यस्मादिति २५ २६ पुनश्चलक्षणंविशेषतःपरिज्ञानायप्रपंचयति उदयेति उदयोजन्मप्रकाशस्यज्ञानस्यआवृतेरज्ञानस्य २७ अविद्याअज्ञानंप्रधानंजडप्रकृतिःगुणाःसत्वादयः २८

लिंगादिभ्यः लिंगंअसाधारणधर्मोहर्यर्थज्ञापकंचिन्हंआदिशब्देनप्रकरणादीनांग्रहणंहरिंहरिरूपमर्थं २९ सदापिकालत्रयेपिअन्योब्रह्मा:ननुहरिःकिंजगज्जन्मादिकंविशेषप्राप्त्यर्थंकरोतीत्याशंकायामाहलीलेति एषाजगज्जन्मादिकर्तृतालीलाक्रीडाकावाअपूर्वफलप्राप्तिःकावाकांक्षाविशेषसुखप्राप्तीच्छा बालकस्येवक्रीडयासुखप्राप्तेरभावात् किमर्थातत्प्रवृत्तिरितिचेत्तत्राह सैवेति साजगज्जन्मादिकर्तृतातस्यविष्णोः ३० साब्रह्मरुद्रादिजननानुकूलासर्वमनुविश्यसमस्तंलोककृत्यंकरोतीतियोजना ३१ स्वातंत्र्येणतृणस्यचालने ३२ यथाएषाप्रसिद्धासूत्रप्रोतासूत्रेप्रोतासंबद्धाकाष्ठप्रतिमाहरिःपरःस्वतंत्रःसर्वकर्तानस्यात्तर्हितस्यवशेजगत्कथंस्यात् यस्माज्जगत्परमात्मा

यत्रब्रह्मादयश्चोक्ताःकर्तारइतिचश्रुतौ तत्रब्रह्मादिशब्देभ्योलिंगादिभ्योहरिंवदेत् २९ नान्योस्तिकर्त्ता
जगतश्चविष्णोःपूर्णज्ञानात्पूर्णशक्तेःकदापि लीलात्वेषापूर्णकामस्यकावाकांक्ष्यावास्यात्सैवतस्यस्वभा
वः ३० जातायस्माद्ब्रह्मरुद्रेंद्रपूर्वाःकथंतेषांसाभवेत्कर्तृताच सृष्ट्याचैताननुविश्यैवसर्वंकरोत्यद्धालोक·
कृत्यंसमस्तम् ३१ ब्रह्मेशाद्याःप्रेरणाद्यस्यविश्वकृत्यंसर्वंकर्त्तुमलंसमर्थाः वीनाविष्णोःप्रेरणंक्वापितेतु
सर्वेदेवाश्चालनेचाप्यशक्ताः ३२ सूत्रप्रोताप्रतिमाचालनादिकरोत्येषाकर्मतद्वत्समस्तं विश्वंचैतत्प्रेरितंविष्णु
नैवकरोत्येवंस्वहितंकर्मजालं ३३ यदिनानपरोनस्यात्कथमेतज्जगद्वशे वशोयदिजगन्नस्यान्नित्यानंदःकथंभ·
वेत् ३४ अथवाजगदेतन्ननित्यानंदंकथंभवेत् पृथिवीचरबीजंचसेकउत्पतथैवच ३५

धीनमस्तितस्मात्परमात्मास्वतंत्रःसर्वकर्तास्तीतिभावः यदिहर्यधीनंजगन्नस्यात् तर्हिहरिःनित्यानंदःकथंभवेत्स्वतंत्रजगतःविरोधकर्तृत्वसंभावनयादुःखप्राप्तिसंभवादितिभावः ३३ ३४ प्रकारांतरेणजगतःस्वातंत्र्याभावप्रतिपादयति अथेति हर्यधीनंनस्यादितिस्वतंत्रंस्यादित्यर्थः तर्हिनित्यः आनंदोयस्यतत्नित्यानंदंकथंनभवेत् यस्माद्धरिःश्रुत्यांनित्यानंदोस्तिजगच्चदुःखानुभवयुक्तमस्तितस्मा

त्सर्वंपरमात्माधीनमस्तीतिभावः बीजंसेकः पृथ्वीचर्तनइतिप्रत्येकंसंबंधः उप्तंचरबीजं ३५ ३६ औषधव्याधिशमयोः शुक्रदेहयोः इत्यादेश्चअत्यद्भुतकार्यकारणयोः सकाशतः दर्शनयोगेनेत्यर्थः ३७ विभुत्वतः स्वामित्वात् ३८ कर्मणामितिविषयषष्ठीकर्मविषयइत्यर्थः इदंस्वतंत्रत्वादिहेतुषुप्रत्येकंसंबंध्यते निस्पृहत्वात् फलेच्छारहितत्वात्चनलिप्यतेइति पूर्वेणसंबंधः ऊर्णनाभिः तंतुवायः तंतुजालंस्वस्मातद्गतः जालगतः ३९ अबद्धः सन्नेवसर्वान् समीपेवर्तमानान् जंतून्बंधयतिबद्धान्करोतीतिपश्चात्स्वयंतदेवजालमेव ४० तद्ब्रह्मादिजगत्स्वस्मात्प्रविश्यचतद्गतोपिब्रह्मादिदेहगतोपिसर्वकर्मणांकर्तासन्नपिकर्मणानलिप्यते निदर्शनार्थंदृष्टांतार्थंपरेऊर्णनाभ्यादयः स्वशक्त्युपबृंहिताः स्वशक्त्याअ

कालश्चवर्ततेद्यापिनमरोहतिचांकुरं जानीयात्तेनजीवान्यंकर्तारंपरमेश्वरम् ३६ औषधव्याधिशमयोः त-
थावैशुक्रदेहयोः जानीयाद्विष्णुव्यापारमित्यादेश्चसकाशतः ३७ कुर्वन्सर्वंजगत्कर्मतत्रस्थोपिमहाप्रभुः
नलिप्यतेस्वतंत्रत्वादसंगत्वाद्विभुत्वतः ३८ संपूर्णज्ञानवत्वाच्चनिस्पृहत्वाच्चकर्मणां ऊर्णनाभिर्यथास्वस्मातंतु-
जालंचनद्गतः ३९ अबद्ध एवसर्वांश्चजंतून्बंधयतिस्वयम् पश्चात्तदेवग्रसतितद्वदेवहरिःस्वयं ४० तत्प्रविश्यच
तद्गोपिकर्ताप्येवंनलिप्यते निदर्शनायलोकानांस्वशक्त्युपबृंहिताःपरे ४१ अतीवाघटितशक्तेश्चप्राकट्यायमहा
त्मना मत्तः सृष्टस्यजीवस्यशक्तिर्वैतादृशीखलु ४२ किमुस्रष्टुरितिज्ञातुंसृष्टाऊर्णादयोसवः अपादगमनेचैव-
चक्षुषाश्रवणेपिच ४३

बद्धत्वादिस्वीयशक्त्याउपबृंहिताः पूर्णाः सृष्टाः ४१ प्रयोजनांतरमाह अतीवेतिमहात्मनापरमात्मनास्वस्यअतीवाघटितशक्तेः लोकेषुप्राकट्यायप्रकटनायचसृष्टाः कथमनेनाघटितशक्तिप्रकटनमित्यतआह तेनेति तेनपरमात्मनाजीवस्यऊर्णनाभेः तादृशीअबद्धत्वादिरूपा ४२ ऊर्णनाभ्यादिजीवानांस्रष्टुः परमात्मनः शक्तिः किमुवक्तव्याऊर्णादयः ऊर्णनाभ्यादयः तंतुवाद्यादयः स्वकीयेअपादगमने पादंविनागमने चक्षुषाश्रोत्रंविनापीत्यर्थः ४३ ॐ ॐ ॐ

चक्षुर्विनापीदृष्टुं ४४ हरिः मूर्धामूर्ध्नीत्यर्थः कृमियूं कालिक्षादिसंज्ञं हरिः जगत् गिरतिइत्यादि ४५ हरिः स्वस्यअतिअत्यंतंदौर्घट्यंदुर्घटत्वंयस्यतत्करणंकर्मतस्य समस्तफलदस्य समस्तफलदत्वस्य तंस्करभिसंज्ञकं सृष्टवांश्चेत्युत्तरेणान्वयः ४६ ४७ चिंतेतिजन्मनापंगुमित्यस्याप्युपलक्षणंचिंतामणिंकल्पतरुंचप्रतिमत्यंउत्तमंरूपवर्णादिदेहीत्वंप्रार्थनायांकृतायांउदारपुरुषवत् तौ हेमादिदानंकुरुतः पर्वतानां तुपक्षच्छेदनात्पूर्वंचेतनकार्यंप्रसिद्धमेवास्ति ४८ इतिजडकृतचेतनकृत्यानिपंगुश्चेतनवत्वेपितूष्णींतिष्ठतीतिचेतनकृतजडक्रियाः ४९ ननुअपादगमनादीनांगुणानामत्यंतविरुद्धत्वात् कथमीश्वरेतेअंगीकार्याइत्यतआह गुणाइतिगुणाः ज्ञानानंदापादगमनादिगुणाः तत्रके-

दृष्टांतायसवैसृष्टोमहासर्पोमहात्मना दृष्टुंविनापिचेच्चक्षुःसमर्थोहमितिस्फुटम् ४४ ज्ञापनायासृजन्मूर्धाक्कृमिंचक्षुर्विवर्जितम् सौधानिस्करभिर्लोकेगिरत्युद्गिरतिस्वयम् ४५ ददात्यभिमतान्कामांस्तथायंभगवान्हरिः अतिदौर्घट्यकरणज्ञापनायचतंपरम् ४६ तथासमस्तफलदज्ञापनायचसृष्टवान् जडैश्चेतनकृत्यानिचेतनैश्चजडक्रियाम् ४७ अहंकारयितुदक्षइतिज्ञानायसप्रभुः चिंतामणिकल्पतरुपर्वतान्सृष्टवान्प्रभुः ४८ जडंचचेतनंकर्तुंचेतनंचजडंतथा कर्तुंसमर्थोभगवानचिंत्याद्भुतशक्तिमान् ४९ गुणाःसुमंगलाःपूर्णाःसुविरुद्धाश्चलोकतः संतिविष्णौजगद्व्यातेज्ञाताऽज्ञाताःश्रुताश्रुताः ५० अनंतगुणवत्वाच्चतत्प्रवृत्तिनिमित्तकाः शब्दाःसर्वेविष्णुमेववदंत्यन्यानमुख्यतः ५१

चित्कमंगलाः अतिरमणीयाः पूर्णाःदुःखाद्यमिश्रिताः केचित्लोकतःलोकेस्वाविरुद्धाश्चअतिविरुद्धाः आश्चर्यकारकाइत्यर्थः केचित्लक्ष्मीब्रह्मादिभिरज्ञाताः केचित्तैर्ज्ञाताश्चकेचित्श्रुताश्रुताः श्रुताःश्रुतिप्रतिपादिताः अश्रुताविशेषरूपेणश्रुत्यप्रतिपादिताः जगद्व्याप्तेव्याप्तंजगद्येनसः एवमनंतगुणाःवर्ततइतिभावः ५० तत्प्रवृत्तिनिमित्तकाःप्रवृत्तौनिमित्तंप्रवृत्तिनिमित्तंतत् अनंतगुणत्वंप्रवृत्तिनिमित्तंयेषांतेविष्णुमुख्यतःवदंति ५१

परेलक्ष्म्यादयः अमुख्यया लक्षणादिरूपया जिज्ञासायाःमोक्षार्थवेदविचारस्य ५२ ५३ ५४ कर्मणानिष्कामकर्मणा हरेःसःकर्मजप्र
सादः श्रवणमुपनिषदादीनांआदिशब्देनमननध्यानेग्राह्ये ५५ अपरोक्षदृशापरमात्मापरोक्षज्ञानेनचक्रपाणिनःचक्रपाणोय
: अधमात्प्रसादात्इत्यर्थः पदंस्थानंसत्यलोकंस्वर्गादिषुपरमात्मज्ञानंसंपाद्यपश्चान्मुक्ताभवंतीतिभावः ५६ ५७ शब्दसमन्वयंविद्धि ५८

एकैकगुणयोगेनशब्दैःकतिपयैःपरे वृत्यात्वमुख्ययावाच्याजिज्ञासाविषयानच ५२ दुःखैकरूपसंसारात्
प्रसादेनचचक्रिणः मुच्यतेकर्मपाशैस्तुनान्योपायैःकदाचन ५३ तस्मान्मुमुक्षुभिःकर्मपाशादस्मादनर्थ-
दात् नारायणास्तुजिज्ञास्यःपरमोविष्णुरव्ययः ५४ प्रसादःकर्मणाजातःसहरेरधमःस्मृतः जातस्तुश्रवणा
दिभ्योमध्यमःपरिकीर्तितः ५५ अपरोक्षदृशाजातःप्रसादोत्युत्तमोत्तमः अधमात्स्वर्गलोकादिर्मध्यमा
द्ब्रह्मणःपदम् ५६ उत्तमान्मोक्षमाप्नोतिप्रसादाच्चक्रपाणिनः गुणोत्कर्षंहरेर्ज्ञातुरपरोक्षंभवेद्ध्रुवम् ५७ नज्ञा
यतेगुणोत्कर्षोविनाशब्दसमन्वयम् तत्समन्वयविज्ञप्तिर्बहुधाश्रवणेनच ५८ मननेनभवत्यद्धाशृणुयात्सततं
ततः ब्रह्मादिमानुषांताश्चज्ञेयास्तरतमाःक्रमात् ५९ ज्ञाततरतमेभावेविष्णोर्माहात्म्यमंजसा ज्ञायतेनिष्क
लंकंतुतस्मादेतन्निशाम्यताम् ६० कोशशौर्यवयःपुत्रदेहदार्ढ्ययुतस्यच सप्तद्वीपवतीभर्तुर्यत्सुखंजायतेतु
लम् ६१

युक्तशब्दानांसम्यक् उपक्रमादियुक्तिसहितः अन्वयः संबंधोयेनज्ञानेनतत् तत्समन्वयवि-
ज्ञप्तिः शब्दसंबंधज्ञानं ५८ श्रुत्याद्युक्तमाहात्म्यंशृणुयात् विष्णुमाहात्म्यज्ञानंच तारतम्यज्ञानसाध्यमित्याह ब्रह्मेतिब्रह्मपरं ब्रह्मा
नुषाः मनुष्योत्तमाः तरतमाः ज्ञानानंदादिगुणाल्पत्वमहत्वरूपतारतम्यवंतः ५९ तरतमेभावेतारतम्येज्ञातेसति एतत्तारतम्यम् ६० वयः
तारुण्यंउत्तमभार्यादीनामप्यन्नग्रहणंबोध्यम् अतुलंअपरिमितंपूर्णमित्यर्थःदुःखाद्यमिश्रितमितियावत् ६१ ५ ५

मानुषानंदः मनुष्योत्तमानामानंदः एकः एकत्वसंख्यास्थानीयः महीशानांपृथुकार्तवीर्यादिराज्ञां शतगुणानंदः शतगुणितानंदः निगद्यतेइतिसः मोक्षेप्रतिपद्यतेप्राप्नोतीत्यपिबोध्यं एवमुत्तरत्रापि ६२ तस्मान्महीशानंदात् मानुषइवआत्मास्वरूपंयेषांतेमानुषात्मकाः शतगुणाः स्वानंदोयेषांतेशतगुणानंदाः तस्मान्मनुष्यगंधर्वानंदात् ६३ पितृगणस्यअग्निष्वात्तादिचिरपितृगणस्य पितृभ्यः मोक्षेपितृभ्यः प्राप्ताच्छतानंदादित्यर्थः एवमुत्तरत्राप्यूह्यं कर्मजानांदेवानांशतानंदोस्तीतिश्रुत्याईरितः प्रतिपादितः ६४ ६५ ऋषयः मरीच्यादयः सप्तब्रह्मपुत्राःतथाशतानंदाइत्यर्थः प्रसूतिर्दक्षपत्नी ६६ अब्धिनद्देवतावरुणः मानवीमनुपत्नीशतरूपा ६७ मनुःस्वायंभुवः अनिरुद्धः कामपुत्रः ६८ वारुणीशेषपत्नीततःउमाद्यानंदात्वींद्रोगरुडः ६९ बुद्धिःचतुर्मुखपत्नीसरस्वतीगीः सूत्रनामकवायुपत्नीभारतीचैतेशतानंदे सूत्रतन्नामकोमुख्यवायुःततःपरमितिशतानंदावि स्यस्यानंतरंयोज्यम् ततःपरंतदनंतरंचतुर्मुखसूत्रानंदानंतरंकोटिगुणेः आधिकाएतेभ्योमानुषादिलक्ष्म्यंतानंदेभ्यः अनंतगुणवान् अनंतगुणा

सएकोमानुषानंदोमोक्षेतुप्रतिपद्यते तस्माच्छतगुणानंदोमहीशानांनिगद्यते ६२ तस्माच्छतगुणानंदागंधर्वामानुषात्मकाः तस्माच्छतगुणानंदागंधर्वादेवसंज्ञकाः ६३ तस्माच्छतगुणानंदोभवेत्पितृगणस्यच पितृभ्यश्चशतानंदः कर्मजानामितीरितम् ६४ कर्मजेभ्यःशतानंदामुक्ताश्चाजानजाःसुराः आजानजेभ्योधनपविष्वक्सेनगणाधिपाः ६५ शतानंदास्तथातेभ्यऋषयस्तेभ्यएवच शतानंदास्तुनिर्दिष्टाभृगुवह्निप्रसूतयः ६६ तेभ्यस्तुनारदोत्थाब्धिःशतानंदोततोपिच चंद्रसूर्यौमानवीचयमवायूतथैवच ६७ शतानंदास्ततोदक्षाधिषणोमनुरेवच रतिशच्यनिरुद्धाश्चशतानंदास्ततःपरम् ६८ शतानंदाविंद्रकामौततस्तूमाचवारुणी सौपर्णीचशतानंदावींद्राहींद्रमृडास्ततः ६९ शतानंदास्ततोबुद्धिर्गीरिताभ्यांततःपरम् विधिसूत्रौशतानंदोलक्ष्मीःकोटिगुणाधिका एतेभ्योभगवान्विष्णुरनंतगुणवान्विभुः ७०

नंदवान् एवंसंक्षेपेणात्रतारतम्यमुक्तंविस्तरस्तुग्रंथांतरेभ्योवगंतव्यः ७० अनंताःगुणाःज्ञानाद्योयस्यसः अनंतगुणः अनंतानिअसंख्यातानि अमितानिअपरिच्छिन्नानिचरूपधामानिशरीराणिआकाशकालदेशादिस्थानानिचयस्यसः अनंतामितरूपधामा रूपेषुमत्स्यादिरूपेषु गुणैः आनंदादिभिःसमानः तारतम्यहीनश्च सर्वरूपेषु अनंतशक्तिः अनंतगुणाः सर्वकर्तृत्वंचास्तीतिभावः ७१ गुणाः ज्ञानानंदादयः प्रत्येकशः प्रत्येकंव्याप्ताः अपरिमिताः सर्वशः सर्वाणिअंगानिहस्तपादाद्यवयवाः तथैवव्याप्तान्येवेत्यर्थः व्याप्तत्वंविष्णोः त्तिज्ञानेतिचशब्दः आनंदादिगुणानंतरग्राहकः हिशब्दः श्रुत्यादिप्रमाणप्रसिद्धिद्योतकः ७२ ननुईश्वरस्यानंतगुणत्वंरूपवत्त्वंच नयुक्तं

अनंतशक्तिर्भगवाननंतगुणोह्यनंतामितरूपधामा सर्वेषुरूपेषुसमानशक्तिर्गुणैःसमानोखिललोककर्त्ता
७१ प्रत्येकशोगुणाव्याप्तातथैवांगानिसर्वशः ज्ञानानिशक्तयश्चापिह्यनंताश्चनसंशयः ७२ सत्वादिगुण
हीनत्वान्निर्गुणोहरिरीश्वरः अप्राकृतशरीरत्वादरूपोभगवान्विभुः ७३ असंख्यावयवैर्योगान्निरंगंतंविदु-
र्बुधाः अक्लिष्टकरणाद्विष्णुरकर्तेत्यभिधीयते ७४ ज्ञानानंदस्वरूपस्यनाज्ञतातुकदाचन बद्धवद्दुःखिव-
च्चैनविह्वलवद्बलहीनवत् ७५

साक्षीचेताकेवलोनिर्गुणश्चारूपमव्ययमित्यादिश्रुतेरित्यतआह सत्वादीति सत्वरजस्तमोरूपैर्जडप्रकृतिगुणैर्हीनत्वाद्धरिः निर्गुणउच्यते नतुज्ञानानंदादिगुणहीनत्वादिति भावः अरूपः नास्तिलोकप्रसिद्धंप्राकृतंरूपंयस्यसः नतुसच्चिदानंदरूपराहित्येनेतिभावः ७३ नास्तिसंख्यायेषांतेअसंख्याः अवयवास्तैर्योगात् संबंधात् तंभगवंतंनिरंगंविदुः नतुसर्वथानिरवयवत्वेनेत्यर्थः क्लेशेननकरोतीत्यकर्ता नतुकर्तृत्वशून्यत्वेनेतिभावः ७४ ननुसर्वेषुरूपेषुगुणपूर्णत्वंअनुपपन्नंरामादिरूपेषुसीतान्वेषणादेरज्ञानकार्यस्यप्रतीयमानत्वादित्यतआह ज्ञानेति अज्ञतेत्युपलक्षणंबद्धत्वादीनामपि अज्ञतानसंभाति बद्धवत्कृष्णरूपेयशोददुःखिवत् रामरूपेसीतावियोगेनविह्वलवत् परशुरामरूपेभीष्मेणबलहीनवत् तत्रैवभीष्मेणपराजितत्वात् ७५

७६ ततः सर्ववेदोक्तगुणेभ्यः अधिकान्गुणान्वेत्ति ७७ तेसामान्यरूपेणश्रुत्युक्ताः ७८ अनेनविष्णुनाअवधेर्हेतुत्वेनविवक्षयातृतीयाअस्माद
धिकइत्यर्थः नञ्द्वयस्योत्तरश्लोकस्थक्रियापदाभ्यांसंबंधः भूतोयवाभविष्यन्नित्यर्थः स्वेनअभिन्नाः शक्त्यंगगुणाः सामर्थ्यावयवज्ञानानंदा
गुणाः येषांतानिअभिन्नशक्त्यंगगुणानिपूर्णशक्त्यादिविशिष्टानीत्यर्थः रूपाणिमत्स्यादीनि ७९ संहृतचेतसः संहृतंनाशितंचेतोयेषांतेदु-
ष्टांतःकरणाइत्यर्थः येसंतितेअवताराः मत्स्यादयः रूपाणियस्यसः अवताररूपस्त्वंविष्णुनानाभिन्नं ८० वस्तुजातेसत्त्वादिहेतुः सत्ताप्रवृ

प्रपश्यंत्यबुधाः पापामाययावृतचेतसः नकश्चित्त्वत्तोवेत्ति पूर्णषाड्गुण्यविग्रहम् ७६ सर्ववेदेषुयेचोक्ता
गुणाविष्णोः सुमंगलाः तानेवभगवान्ब्रह्मावेत्तिलक्ष्मीस्ततोधिकान् ७७ अनंताश्चतथालक्ष्म्याः कोटिशःसं
तितेगुणाः नानेनसदृशःकापिनानेनाभ्यधिकोपिवा ७८ बिभर्तिरूपाणिसहस्रशोपिक्षेमायलोकस्यचराच
रस्य अभिन्नशक्त्यंगगुणानिविष्णुर्नित्यानिदोषैरहितानिशश्वत् ७९ अविद्ययासंहृतचेतसोयेपश्यंते-
नानात्ववताररूपम् विपश्चितस्तंजगदीशमच्युतंपश्यंतिनिर्भेदमनंतरूपम् ८० भूतेषुदेहेषुतथेंद्रियेषु
चित्तेषुजीवेषुचशेमुषीषु तथैवदेवेषुचवस्तुजातेसत्त्वादिहेतुर्भगवाननंतः ८१ अंतर्यामिस्वरूपेणबिंबना
मात्मसौहरिः स्थूलांगुष्ठप्रमाणेनहृत्पद्मेषुवसंत्ययम् ८२ देहपुरुषनामासौस्थित्वाप्रेरयतिप्रभुः तस्मा
त्सएवजिज्ञास्यः परमोमोक्षमिच्छता ८३ इतिश्रीवायुपुराणेमाघमाहात्म्येसप्तदशोऽध्यायः १७ छ
शांडिल्यउवाच निमित्तत्वेनसज्ञेयः सृष्ट्यादीनांजगत्पतिः

त्तिशक्त्यादीनांकारणं ८१ जीवांतर्यामिस्वरूपेणजीवेषु अ
स्तिअयंहरिः ८२ तस्मात् अनंतगुणपूर्णस्यान्यस्याभावात् परमः अनंतगुणपरिपूर्णः सएवविष्णुरेवजिज्ञास्यः वेदादिश्रवणादिनाज्ञात
व्यइत्यर्थः ८३ इतिमाघमाहात्म्यटीकायांसप्तदशोऽध्यायः १७ छ जिज्ञासाशब्दवाच्यश्रवणमनननध्यानेषुश्रवणमननकर्तृ

ध्येइतिउक्तं तदनंतरंध्यानंकर्तव्यमितिवक्तव्यमस्ति तच्चध्यानंताभ्यानसाक्षाद्भवतिकिंतुअतिशयितवैराग्यद्वारासर्वथाबात्यार्थानुसंधानराहित्येनाचंचलतयामनसः अवस्थानेसत्येवध्यानसंभवात् अतिशयितवैराग्यंचनित्यानित्यवस्तुविवेकसाध्यंतादृशविवेकश्चस्वतंत्रपरतंत्रतत्वरूपज्ञानाधीनः प्रमाणाधीनश्चअतः सप्रमाणंतत्वस्वरूपंनिरूपयति अस्मिन्नध्यायेतत्रादौतत्वस्यज्ञेयत्वंसहेतुकमाह- निमित्तत्वेनेति यस्मात् मोक्षार्थंजंगमाजंगमयोः सृष्ट्यादीनांनिमित्तत्वेनकारणत्वेनसः परमात्माज्ञेयः ज्ञातव्योस्ति तस्मात्जंगमाजंगमादिकं जंगमंचेतनंअजंगमंअचेतनंतयोः आदिंउत्पत्तिंकरोतितत् आदिकं अत्रजंगममजंगमंचतयोःकारणतत्वंचतंत्रेणोपात्तं तथाचजंगमाजंगमरूपं तयोःकारणरूपंतत्वंज्ञेयमित्युक्तंभवति नहीश्वरस्यजगन्निमित्तत्वज्ञानंईश्वरजगज्ज्ञानंविनासंभवति १ कथंविज्ञेयमित्यत्राह

तस्मात्तत्वंचविज्ञेयंजंगमाजंगमादिकं १ बध्यंचबंधकंचैवतत्कर्तारंविचिंतयेत् जीवानांचजडानांचजीवानांचपरस्परम् २ तथान्योन्यजडानांचतथाजीवेशयोरपि भेदंजानीतमोक्षेच्छुस्तथैवचजडेशयोः ३ तद्भेदप्रतियोगित्वात्ज्ञातव्यंतत्वमंजसा स्वतंत्रपरतंत्राभ्यांद्विविधंतत्वमिष्यते ४ परानपेक्षंयत्तत्वंरूपज्ञानप्रवृत्तिषु स्वतंत्रंतत्वमित्याहुः सहरिर्भगवान्विभुः ५

बध्यमिति चेतनस्वरूपंजीवसमूहं बध्यमेवबंधविषयमेव अचेतनंबंधकमेवबंधनकारणमेव ईश्वरंतत्कर्तारंबंधनकर्तारमेवविचिंतयेत् विजानीयात् कुतइत्यतआह जीवानामिति जीवानांलक्ष्मीचतुर्मुखादिचेतनानां २ जीवेशयोः जीवेतिजात्येकवचनंजीवानामीशस्यचेत्यर्थः ३ तद्भेदप्रतियोगित्वात् सचासौभेदश्चतद्भेदः मोक्षसाध । ५ दस्तस्यप्रतियोगित्वात् भेदज्ञानप्रतिजंगमादितत्वज्ञानस्यकारणत्वादित्यर्थः मोक्षेच्छुनातत्वंजीवजडेश्वररूपतत्वंअंजसासविस्तरंज्ञातव्यं स्वतंत्रपरतंत्राभ्यांप्रकाराभ्यांप्रामाणिकैरिष्यते ४ रूपंचज्ञानंचप्रवृत्तिश्चरूपज्ञानप्रवृत्तयस्तासुरूपज्ञानगमनादिक्रियास्वपरानपेक्षंयत्तत्वं ज्ञानिनः तत्तत्वंस्वतंत्रमित्याहुः तत्किमित्याकांक्षायामाह सइति सः स्वतंत्रतत्वरूपः ५ ५ ५

प्रमितौज्ञानेयत्परापेक्षंतत्त्वं तत् अस्वतंत्रमित्याहुः तच्च अस्वतंत्रंतत्त्वंच भावाभावस्वरूपवदितिद्विधावर्तते· ६ विधिप्रतीतिविषयः अस्तीतिप्रथमज्ञानविषयः ज्ञानिभिरभिधीयतेनिषेधात्मानिषेधस्यनास्तीतिप्रतीतेरात्माविषयइत्यर्थः तत्र भावाभावयोर्मध्ये ७ कार्यस्यप्राक् असत्तातस्सत्तायाअभावः प्रागभावइत्यर्थः कार्यनाशः कार्यस्यघटादिरूपस्यनाशः ध्वंसः प्रध्वंसाभाव इत्यर्थः शशविषाणादेः सदाविद्यमानः अभावः अत्यंताभावइत्यर्थः इतित्रयोऽभावाः संतिसः पूर्वोक्तभावः चेतनाचेतनत्वेन द्विविधोमतः ८ दुःखस्पृष्टंदुःखयुक्तंअस्प·

परापेक्षंस्वरूपेचप्रवृत्तौप्रमितौचयत् अस्वतंत्रंद्विधातच्चभावाभावस्वरूपवत् ६ विधिप्रतीतिविषयोभाव·
इत्यभिधीयते अभावश्चनिषेधात्मातत्राभावस्त्रिधामतः ७ प्रागसत्ताकार्यनाशस्सदाभावइतित्रयम् चेतना·
चेतनत्वेनस्वभावोद्विविधोमतः ८ दुःखस्पृष्टंतदस्पृष्टंद्विविधंचेतनंभवेत् दुःखास्पृष्टाक्षरादेवीदुःखस्पृष्टास्तथा·
परे ९ मुक्तामुक्तप्रभेदेनदुःखस्पृष्टंद्विधामतं तत्रामुक्तंमुक्तियोग्यमयोग्यमितिचद्विधा १० मुक्तियोग्यंपंचविधंदे·
वताऋषयस्तथा तथैवपितरोज्ञेयागंधर्वामानुषोत्तमाः ११ द्विविधंमुक्त्ययोग्यंचतमोयोग्यंसृतिस्थितम् चतुर्विधं
तमोयोग्यंदैत्यरक्षःपिशाचकाः १२ मर्त्याधमाश्चतेसर्वेप्रत्येकंद्विविधामताः प्राप्तांधतमसःकेचित्सृतिसंस्था
स्तथापरे १३ नित्यसृतिस्थाद्विविधाःस्वर्गस्यनरकस्यच यतमानास्तथाकेचित्स्वर्गेषुनरकेषुच १४

रानाशरहितादेवीलक्ष्मीः अपरेचतुर्मुखादिचेतनाः ९ मुक्तेरयोग्यंच १० पितरः अग्निष्वात्तादयः मुक्तियोग्यानांविभागेनैवमुक्तानांविभागसिद्धेस्तदनुक्तिर्नदोषाय ११ तमोयोग्यमंधतमोयोग्यंचेतनजातंनिरंतरंसृतौसंसारेतिष्ठतीतिसृतिस्थितंचेति १२ तदैत्यादयः सृतिसंस्थाः संसारस्थाइतिद्विविधामताः १३ नरकस्यचसाधनेयतमानाः अनुष्ठानकर्तारः नरकेषुचयतंतइति द्विविधामताः १४ ९

चेतनभावविभागकथनानंतरमचेतनभावविभागमाह अचेतनमितितत्लोकप्रसिद्धमचेतनंतत्त्वं नित्यंतथाऽनित्यमिति एकः प्रकारः द्विरूपवच्च
नित्यानित्यरूपवच्चेत्येकः प्रकारः इतिद्विधैवमतं नतुएकं एतेनकेचित्सर्वंक्षणिकंमन्यमानाः नित्यंतत्त्वंनमन्यंते अपरेतुसत्कार्यवादिनः अनित्यं
नांगीकुर्वंतीतिमतद्वयंनिरस्तं तत्रनित्यमाह नित्याइतिनित्याः आद्यंतशून्याः १५ अव्याकृतंपंचमहाभूतगताकाशभिन्नंव्यापकं अंबरं आ
काशंनित्यमित्यर्थः १६ वेदानुकूलाः वेदार्थानुकूलाः पुराणान्येव पुराणकानि तत्सहिताः स्मृतयश्चेतित्रिधेतिपूर्वेणान्वयः कालस्यदीर्घा-
कारेणप्रवाहरूपेणेत्यर्थः नित्यत्वंक्षणाद्यैः क्षणलवमुहूर्तादिकार्यरूपैः अनित्यतापि १७ कार्यकारणरूपतः स्थूलपृथिव्यादिकार्यरूपेणानि

अचेतनंतथानित्यमनित्यंचद्विरूपवत् इतिद्विधैवतत्तत्त्वंनित्यावेदाःसमस्तशः १५ तथावर्णाःसमस्ता
श्चतथाव्याकृतमंबरम् नित्यानित्यंत्रिधाप्रोक्तंकालःप्रकृतिरेवच १६ वेदानुकूलाःस्मृतयःसेतिहासपुरा
णकाः दीर्घाकारेणनित्यत्वंक्षणाद्यैरप्यनित्यता १७ कालस्यप्रकृतेश्चापिकार्यकारणरूपतः स्मृत्याद्याश्चा
र्थतोनित्याव्यत्यासात्तेविनाशिनः १८ असंसृष्टंचसंसृष्टमनित्यंद्विविधंमतम् महानहंबुद्धिमनइंद्रियाणि
दशैवतु १९ पंचभूतानितन्मात्राःकिंचिदेवविवर्धिताः त्रयोविंशदसंसृष्टंसंसृष्टंचद्विधामतम् २० ब्रह्मांडं
तद्गतंचेतिप्राहुस्तत्त्वविदोजनाः

त्यतासूक्ष्मपृथिव्यादिकारणरूपेणनित्यत्वमपिस्मृत्याद्याः स्मृतीतिहासाद्याः व्यत्यासात्
प्रतिकल्पंग्रंथानुपूर्वीभेदात् स्मृत्याद्याः विनाशिनः अनित्याः इत्यर्थः १८ संसृष्टंसम्यक्बहुजडप्रकृत्यंशैः सृष्टमुत्पन्नंमहान् महत्तत्त्वंअहं अहं
कारतत्त्वं बुद्धिश्चमनश्चअनयोः समहारः बुद्धिमनः १९ तन्मात्राः इतिमनोबुद्ध्योरैक्यविवक्षया त्रयोविंशत् आधिक्याचासौविंशतिश्चेतिमध्यमप
दलोपीसमासे इकारलोपश्छांदसः प्रकृत्यंशैः किंचिदेवविवर्धिताः अचेतनतत्त्वजातमसंसृष्टंमतं २० तद्गतंचतदंतर्गतंचेतिद्विधाद्विप्रका
रकंमतमितिपूर्वेणान्वयः जनाः ऋष्यादयः इतिशब्दस्यावृत्त्योभयत्रान्वयः इतिपूर्वोक्तप्रकारेणास्वतंत्रंतत्त्वंप्राहुः यदीदंविष्णुव्यतिरिक्तंजगत् अस्वतं

नंतर्हितस्यकिमधीतंसृष्ट्यादिकमित्यत्राहसृष्टिरिति नियमोगमनादिकर्मसुप्रेरणं अज्ञानबोधनेज्ञानाभावांतः प्रकाशो २१ आवृतिर्वा
त्यघरादिपदार्थाज्ञानंज्योतिस्तज्ज्ञानपूर्वेण स्वतंत्रात् स्वतंत्रत्वाद्विष्णुनैवेति अस्यजगतः समासव्यासयोगतः संक्षेपविस्ताररूपोपायाभ्यांजड
स्यसृष्ट्याद्यज्ञानांताः पंचेतिसंक्षेपः चेतनस्यसृष्ट्यादिर्ज्योतिरंताः सर्वेइतिविस्तारः २२ एतत्पूर्वोक्तंतत्वंमानवेद्यंमानेनप्रमाणे
मस्ति २३ तच्चचतुर्विधमिति सामान्यरूपेणोक्तं मानंप्रत्यक्षादिविशेषरूपमस्तीत्यर्थः अनुमां अनुमानं आगमोवेदादिशास्त्रं ज्ञानमवबोधनं
तत्रप्रत्यक्षादिषुमध्ये तत्रत्रिविधमध्ये २४ अक्षरज्ञानंलक्ष्मीज्ञानंदुःखस्पृष्टंदुःखस्पृष्टश्चतुर्मुखादिचेतनज्ञानंयोगिजेतियोगः

सृष्टिस्थितिःसंहृतिश्चनियमोज्ञानबोधने २१ बंधोमोक्षःसुखंदुःखमावृतिर्ज्योतिरेवच विष्णुनास्य
समस्तस्यसमासव्यासयोगतः २२ स्वतंत्रादस्वतंत्रस्यप्रवृत्त्येवनसंशयः एतत्सर्वंमानवेद्यंमानंत
च्चचतुर्विधम् २३ तच्चप्रत्यक्षमनुमागमोज्ञानंतथैवच ज्ञानंचात्रिविधंतत्रतत्राद्यंपारमेश्वरम् २४ द्वि
तीयमक्षरज्ञानंदुःखस्पृष्टंतृतीयकम् योगिजायोगिजत्वेनदुःखस्पृष्टंद्विधामतम् २५ तत्रेशज्ञानंस्वप
राखिलगोचरमिष्यते स्वसत्तादौस्वतंत्रंचासर्वगोचरमीश्वरे २६ स्वसत्तादौपराधीनंस्वपराखिलगोचरं
द्वितीयंचतृतीयंचत्रिविधंपरिकीर्तितं २७

भगवद्ध्यानयोगःसाधनमस्तियस्यसः योगीप्रभावः तस्माज्ज्ञानंयोगिजंतद्भिन्नमयोगिजं
तयोर्भावः योगिजायोगिजत्वंतेन २५ तत्रत्रिषुमध्येस्वपराखिलगोचरंस्वपरसर्वविषयकंज्ञानंलक्षणांतरमाह स्वसत्तेति स्वसत्तादौ
स्वस्थिति गमनादिविषये स्वतंत्रंपरानपेक्षंज्ञानंचईशज्ञानं द्वितीयज्ञानस्यलक्षणमाह असर्वेति ईश्वरेपरमात्मविषयेनईश्वरस्यसर्वेगुणादयः
गोचराः विषयायस्यतत् असर्वगोचरं ईश्वरसंबंधिसर्वगुणाद्यविषयकं २६ स्वपराखिलगोचरं ज्ञानंपराधीनं ईश्वरैकाधीनंज्ञानंचद्वितीयं
लक्ष्मीज्ञानमित्युत्तरेणान्वयः तृतीयंयोगिजज्ञानं दुःखस्पृष्टज्ञाने आद्ययोगिजज्ञानस्यापितृतीयत्वात् द्वयमुक्तिः २७

ऋजूनांतात्विकानांचातात्विकानांचभेदतः आलोचनेसर्वविषयमीशादन्यत्रचार्जवम् २८ तच्चस्वरूपंबाह्यं
चद्विविधंपरिकीर्तितम् अनादिनित्यंतत्राद्यंक्रमाद्योगाद्विवर्धितम् २९ प्रवाहतोनादिबाह्यंविनाशिपरिकी-
र्तितम् तात्विकानांतुपूर्वस्माल्क्रमाद्ध्रासेनसंयुतम् ३० पूर्ववद्विविधंतच्चस्वरूपंनित्यमेवच बाह्यंत्वनाद्य
नित्यंचसाद्यनित्यमयोगिजम् ३१ एतत्प्रमाणप्रमितंविष्णवधीनमिदंजगत् वैराग्यायप्रभवतियेनमोक्षोभव
त्यलं ३२ नित्यानित्यविवेकज्ञोममतांचपरित्यजेत् ममतैकाभवत्येषानिदानंसुखदुःखयोः ३३ मदीयमित्यभिम
तेगाविपुष्टेतुमोदति ह्रासेदुःखमवाप्नोतिस्वकीयस्यजनोल्पयं ३४

ऋजूनां चतुर्मुख पद योग्यानांजीवानांतात्विकानां ऋजु व्यतिरिक्त तत्वाभिमानि गरुडादि देवानां अतात्विकानां तात्विक व्यतिरिक्त देवानां भेदतः ज्ञानभेदेनत्रिविधं परिकीर्तितमिति पूर्वेणान्वयः तत्रईशादीश्वरात् अन्यत्र अन्यस्मिन् विषये आलोचनेचिंतने कृतेसति सर्वविषयोयस्यतत् सर्वविषयं ज्ञानं आर्जवं ऋजुसंबंधि २८ तच्चऋजुज्ञानंचस्वरूपं स्वरूपभूतं ब्रह्माडादि सर्वविषयकंचेति द्विविधमध्ये आद्यं स्वरूपभूतंज्ञानंयोगात् योगप्रभावादित्यर्थः २९ बाह्यंप्रवाहतः प्रवाहेण अनादि उत्पत्तिरहितं विनाशिच परिकीर्तितं तात्विकानांज्ञानं पूर्वस्मात् ऋजुज्ञानात् ह्रासेनन्यूनतया तथाहि अहंकारतत्वाभिमानिगरुडज्ञानस्याकिंचित्न्यूनतातदपेक्षया मनस्तत्वाभिमानीद्रज्ञानस्यकिंचिन्न्यूनतेत्येवंक्रमेणबोध्यं ३० तच्चतात्विकज्ञानं पूर्ववत्ऋजुज्ञानवत् स्वरूपंबाह्यंचेतिद्विविधंतत्रस्वरूपं स्वरूपभूतंज्ञानंनित्यं अन्याद्येवच बाह्यंप्रवाहतोनादि अतात्विकज्ञानस्यतात्विकज्ञानात् अतिवैलक्षण्याभावेनतल्लक्षणेनैवतल्लक्षणस्यसुगमत्वादनुक्तिः अयोगिजं मनुष्यादिज्ञानमित्यर्थः द्विविधं तत्रस्वरूपभूतज्ञानंनित्यं बाह्यंघटपटादिविषयकंज्ञानं सादिउत्पत्तिमत् अनित्यंनश्वरम् ३१ एतत् प्रमाणप्रमितं प्रत्यक्षादिचतुर्विधप्रमाणैः यथार्थत्वेनज्ञातंजगत् विष्णवधीनं ज्ञात्वा येनवैराग्येणअलंसम्यक्तस्मैवैराग्याय वैराग्यंप्राप्तुंजीवः प्रभवतिसमर्थोभवति ३२ ३३ अभिमते अभिमानविषये पुष्टेसति स्वकीयस्यगोर्ह्रासेकृशत्वेजातेसति ३४

क्रमात् दानक्रयादिक्रमेण गविपरवशंयातेसति तस्यगोः ३५ समस्तेषुपुत्रादिषुयोगीवाज्ञान्यपिकिमुतअज्ञानीत्यर्थः ३६ मुनिः भगवन्माहा
त्म्यमननशीलः ज्ञानीत्यर्थः भरतः राजा हरिणे ममेदमितिममेदंवास्त्वितिबुध्यातंहरिणं ३७ निषिद्धः बंधकः विष्णुवशेस्थितः विष्णुभ-
क्तिमानित्यर्थः प्राप्तमनिषिद्धंविषयंभुंजन् ज्ञानीनिषिद्धभोगरहितः सम्बंधकभोगरहितःसन् ३८ यस्यविष्णोः संपर्कात् संबंधात् विष-
सन्निभाः दुःखकारकाइत्यर्थःस्नेहोभवति ३९ यस्मिन्पुरुषेविद्यमानेहृदियस्यपुरुषस्यहृदयेइत्यर्थः ब्रह्मणिविष्णौप्रविष्टेसत्येवसः

क्रमात्परवशंयातेमदीयत्वंचगच्छति नतुष्यतिचगोवृद्धौह्रासेनतस्यनदुःखति: ३५ यथातथासमस्तेषुममतां-
चपरित्यजेत् योगीवाममतायुक्तोमहानर्थमवाप्नुयात् ३६ ममेदमितिबुध्यातुहरिणेभरतोमुनिः अनुध्यायंस्तमे
वान्तेहरिणत्वमवापसः ३७ निषिद्धभोगरहितोनिषिद्धंममतांत्यजेत् ज्ञानीतुक्रमणाप्राप्तभुंजन्विष्णुवशेस्थितः
३८ यःसंपर्कात्प्रियाआसन्विषयाविषसन्निभाः तस्मिन्नेवसदास्नेहःकर्तव्योहितमिच्छता ३९ यस्मिन्हृदिप्रविष्टे
तुब्रह्मण्यमिततेजसि स्वाम्यादिव्यवहारेणप्रेमाविषयोभवेत् ४० यस्मिन्निर्यातिसत्येनपरेतमितियंविदुः तंदुः-
खविषयंतस्माद्विष्णोःकोन्वपरःप्रियः ४१ सर्वस्मादधिकःस्नेहोभक्तिरित्युच्यतेबुधैः सैवैनमूर्ध्वंनयतिसाक्षात्का-
रयतित्यजं ४२ तस्मात्साभूयसीभक्तिःसैकानिःश्रेयसेप्यलम् भक्त्यातुममताहानिर्जायतेनात्रसंशयः ४३

:ममायंस्वामीराजाअयंभृत्यः अयंपुत्रः इत्यादिव्यवहारेणप्रेमाविषयोभवेत् ४० यस्मिन्ब्रह्मणिहृदयान्निर्यातिनिर्गतेसतियमे-
इतिविदुः अनंतरंतंप्रेतरूपंपुरुषंदुःखविषयंविदुः कोनुकोपिनास्तिकिंतुविष्णुरेवप्रेमविषयइत्यर्थः ४१ भक्तिस्वरूपमा
सर्वेति सर्वस्माद्देहादेःयःस्नेहःसा भक्तिः ऊर्ध्वंश्रेष्ठलोकं तत्रनयनेकारणमाह साक्षादिति साजीवंअजंपरमात्मानं ४२ तस्मात्परमात्मसा
क्षात्कारजनकत्वात् सापूर्वोक्ताभूयसीपरमश्रेष्ठानिःश्रेयसेमोक्षंप्रापयितुमपिअलंसमर्थाअस्तितयाभक्त्या ४३ ६२

अत्रार्थेइतिहासमाह पुरेति ४४ मिथिलाभ्याशेमिथिलानगरीसमीपे पुण्यदेशेस्थित्वा ४५ मुनयः मननशीलाःयतयः ४६ एवंवक्ष्यमाणप्रकारेण ४७ तंप्रकारमाह प्रभुत्वादिति प्रत्यबोधिज्ञानमुपदिश्यतेस्मेत्यर्थः वृथाधनप्राप्तिरूपफलरहितं वाक्यं भाषणं येषांते वृथावाचस्मास्तान् ज्ञानंबोधयति ४८ लोकप्रसिद्धकारणमाह येकेइति वृद्धाः अधिकाः ४९ असौव्यासःसंभावयतिसम्यक् आदरय-

पुरातुजनकोनामराजर्षिर्लोकविश्रुतः हरेर्भक्त्यैवममतांतत्याजाखिलसंपदि ४४ पुरातुमिथिलाभ्याशे-
सराजर्षिर्महामतिः व्यासाच्छुश्रावसकलरहस्यंमंगलप्रदम् ४५ शुश्रुवुस्तेनसाकंचमुनयोपिसहस्रशः
विद्यमानेषुयतिषुभगवान्बादरायणः ४६ जनकंतुनिरीक्ष्यैवव्याजहारमहामतिः तदातुमुनयःसर्वेव-
दंत्येवंपरस्परम् ४७ प्रभुत्वाज्जनकंवीक्ष्यप्रत्यबोधिमहात्मना विरक्तान्वृथावाक्यान्कुतोस्मान्नबो-
धयत्ययं ४८ येकेचनतपोवृद्धाज्ञानवृद्धास्तथैवच वयोवृद्धास्तथासर्वेधनवृद्धस्यकिंकराः ४९ राजाधि-
राजंजनकंधनवृद्धंमहाप्रभुम् संभावयत्यसौकस्माद्भिक्षुकांश्चीरवासिनः ५० यतिगीतंततोज्ञात्वाकृष्ण-
द्वैपायनोमुनिः स्फुटीकर्तुंमुनीनांसचित्तकालुष्यमंजसा ५१ मनःशुद्धिंनृपस्यापिततोमायांससर्जसः
माययामिथिलायांचवह्निर्बाधामहत्यभूत् ५२ तदाव्याख्यानसदसिप्रोचुस्तंकोशपालकाः दहत्यग्निःपु-
रींसर्वांकोशोदग्धोधुनेतिच ५३ तच्छ्रुत्वाजनकःप्राहनमेकिंचनदह्यति तच्छ्रुत्वात्वरितंजग्मुर्यतयोत्यभि-
मानिनः ५४ मठशाट्यादिरक्षार्थमनिमंत्र्यागुरुंनृपम्

तीत्यर्थः अस्मान्भिक्षुकान्कस्मात्कारणात्संभावयति अस्मदादरकरणेकिमपिकारणंनास्तीत्यर्थः ५० यतिभिःगीतंउक्तंज्ञात्वाततः अंजसायुक्त्याकालुष्यंदुष्टत्वं ५१ ततःमनःशुद्धिंकर्तुं ५२ तंजनकं ५३ अत्यभिमानिनः मठादिषु अत्यासक्ताः ५४ गुरुंभगवत्कथाप्रवक्तारंव्यासंनृपंच अनिमंत्र्य अविचार्य आ-

दिशब्देनआसनादिकंजग्मुरितिपूर्वेणान्वयः ५५ परेअन्येभृत्याः आदिना गजाश्वशालादिकं ५६ केचिदवशिष्टास्तेमठमभिद्रुत्यसमीपं
गत्वासकृदुःखिताःजाताः इत्युत्तरेणान्वयः ५७ तंजनकराजंपुनः गत्वागत्वाप्रोचुः ५८ कमंडलुःजात्येकवचनंकमंडलवोपिदग्धाः सोपस्क-
राणिदेवतार्चनोपयोगिपात्रसहितानिअन्यानिवस्तूनिदग्धानीत्यर्थः तावतादग्धेनपदार्थजातेनअस्माकंमनः ५९ अग्निनादह्यतेय

भृत्याश्चपुनरूचुर्दग्धमंतःपुरंत्विति ५५ तच्छ्रुत्वा॰ परेप्यागत्यतंप्रोचुर्दग्धंसौधादिकंत्विति ५६ त-
च्छ्रुत्वाजनकःप्राहनमेकिंचनदह्यति तदाभिद्रुत्यतेसर्वेत्वरयामुनयोखिलाः ५७ वन्हिज्वालाकुलंवीक्ष्य
मठस्वंस्वंसकृदुःखिताः गत्वागत्वापुनःप्रोचुस्तंनृपंयतयोखिलाः ५८ अस्माकंचमठाःशाट्योदग्धाश्चैवकमं
डलुः सोपस्कराणिचान्यानितावताखिद्यतेमनः ५९ पुरंकोशगृहंसर्वंदह्यतेद्यापितेनृप यस्मिन्स्थितेभवा
न्भूपस्तदेवाद्यतुगच्छति ६० श्रोवापिशक्यतेश्रोतुंशामयाग्निंजनैःसह शांतेग्नौनोवसिष्ठंचकिंचिद्दाशि
ष्यतेनृप ६१ स्वार्थंवापिपरार्थंचगत्वाशीघ्रमुपद्रवम् शामयेतिचतद्वाक्यंनृपोप्याहचतान्मुनीन् ६२
ईश्वरीयमिदंसर्वंकोशोवित्तंधनादिकम् पूर्वकर्मानुरोधेनदत्तंतद्धरिणाममम ६३ सएवहर्ताचेदानींनमे
किंचनदह्यति लाभानामुत्तमोलाभोकथावैकैटभद्विषः ६४ ६५ ६६

स्मिन्पुरकोशाधिकेस्थितेसतिभवान्भूपः पृथ्वीपालकोस्ति तदेवतदपि अद्यतु अद्यैव ६० केषांचिन्नः अस्माकंपुरेअवशिष्टमद-
ग्धंस्थास्यति केषांचिदस्माकंकिंचित् अल्पदग्धंवा तस्मात् हेनृपत्वंशमयेत्यन्वयः ६१ तद्वाक्यंश्रुत्वेतिशेषः ६२ आदिशब्दे
नराज्यादिकमस्ति तत्कोशादिकंममस्वमित्यर्थः दत्तमस्ति ६३ कथाश्रवणरूपः ६४ श्रीसीतारामचंद्राभ्यांनमः ६५

कोटिलाभः नकिंचित् उत्तमोलाभः अपितुकोटिसंख्याकोत्तमलाभः इदमपिसाधारणलोकरीतिमंगीकृत्योक्तम् वस्तुतः अतुलः अनुपमः असंख्यातइत्यर्थः मुनेः वेदव्यासस्य अभ्याशे समीपे मदीयं मदीयत्वेनाभिमतम् ६५ रागात् मठादिषु अनुरागात् ६६ इतिवदन् इतश्चेतश्च धावतीति पूर्वेणान्वयः ६७ राजन्याराज्ञिसाधवः राजन्याः भृत्याः नदग्धमित्यपिप्रोचुः ६८ असौजनकः तत् अग्निनिवृत्तिप्रतिपादकभृत्यवाक्यम् पूर्वं दाहविषयकंवाक्यंनाभूत् सत्यवतीकृतः इतिशेषः महात्मनःजनकस्य ६९ जातसाध्वसाः उत्पन्नभयाः यतयः तुष्टुवुः ७० भूमन् अनंतगु-

कोटिलाभोतुलोलाभोगतेमयिगमिष्यति अभ्याशेचमुनेरस्यमदीयंवर्ततेखिलम् ६५ मिथिलादह्यमानासा
नमेकिंचनदह्यति रागाद्यतिगणश्चैवइतश्चेतश्चधावति ६६ हाकष्टमतुलंप्राप्तंहानष्टमखिलंत्विदम् पश्चात्तां
शमयामासमायासत्यवतीकृतः ६७ पुनरागत्यराजन्याः प्रोचुस्तन्नृपपुंगवम् अग्निज्वालागताःसर्वानकिं
चिद्दग्धमित्यपि ६८ तच्छ्रुत्वानमुमोदासौश्रुत्वापूर्वंनशोकवान् यतिभ्योदर्शयामासचित्तशांतिंमहात्मनः ६९
व्रीडयाननमूर्धानोयतयोजातसाध्वसाः क्षमस्वेतिवदंतश्चसर्वेप्रांजलयोभवन् तुष्टुवुर्विविधैस्तोत्रैर्महापुरु
षमव्ययम् ७० भूमन्विभोवयमिमानविदामशक्तिंवेदैकगम्यपुरुषोत्तमविश्वरूप सज्ज्ञाननिर्वृतितनोःकुत
एवतेस्याद्वैषम्यमस्यजगतोहितमिच्छतस्ते ७१ लोकेमहापुरुषगौतमशापनष्टासज्ज्ञानसंततिरभूत्किलभूरि
कालम्

णापरिपूर्णवेदैकगम्यकेवलंवेदेनज्ञेयशक्तेइत्यर्थः अनेनशक्त्यज्ञानेकारणंध्वनितंतेशक्तिंसत्ज्ञाननिर्वृत्तितनोः यथार्थज्ञानकेवलानंदरूपशरीरस्यहितमेवपूर्णानंदत्वेनधनादेरपेक्षाभावात्जगद्धितेप्सुत्वाच्च त्वयिकिमपिवैषम्यंनास्तीत्यर्थः ७१ जगद्धितेच्छुत्वमेवावतारप्रयोजनकथनद्वाराविवृणोति लोकेइतिगुरूत्पन्नसज्ज्ञानसंततिः यथार्थज्ञानपरंपरागौतमशापनष्टेत्यादौस्कंदपुराणगताऽऽख्यायिकानुसंधेयाकदाचिद्दुर्भिक्षपीडिता मुनयस्तपोबलात् सस्यसंपन्नेगौतमाश्रमेन्यवसन् ततोदुर्भिक्षांतेस्वाश्रमान्जिगमिषवोपिगौतमेनसत्सहवा

सलिप्सयाचिरमुपरुद्धास्ते तदाश्रमान्निर्गमनोपायभूतां मायया कांचिद्धेनुमुदपादयन् तांचपंथानं प्रतिबध्नतीं गौतमस्तृणेन प्रजहार तेन-
चसपदि साजीवितं त्यक्तवती तद्वीक्ष्य प्रणिधानितयासर्वं मुनिकृतं विज्ञाय गौतमस्तान्नष्टज्ञानाभवतेति शप्तवान् ततो ब्रह्मादिसुरप्रार्थितो
नारायणः सत्यवत्यामवतीर्य यथापूर्वं ज्ञानं संस्थापितवानिति ७२ लोकतमसं लोकानामज्ञानं निराचिकीर्षुः निराकर्तुमिच्छुः सन्जज्ञे प्रसू
तिः प्रसूयतेऽस्मादिति प्रसूतिरसि स्थीयते जीव्यतेऽनेनेति स्थानं निधीयते लीयतेऽस्मिन्निति निधानं चासि जगदुत्पत्तिस्थितिप्रलयका

अभ्यर्थितः सुरगणैर्जातो हिताय नारायणः परमकारुणिको जगत्याम् ७२ जज्ञे भवान्किल कलिंदकुमा-
रिकायां द्वीपे च लोकतमसं च निराचिकीर्षुः त्वमेव साक्षाज्जगतः प्रसूतिस्थाननिधानं भवदाश्रयस्य ७३
अविद्यया संवृतमानसाये दोषाविलं त्वां मनुजं महात्मन् तस्माद्वयं त्वान विदाम मौढ्यात्कृतावतारं जगतो
हिताय ७४ व्यासो हि भगवान्साक्षात्कृष्णद्वैपायनो हरिः न तस्य मनुजैः कृत्यं वृथास्माभिस्तु दूषितः
७५ मुने पाहि मुने पाहि पाहि नो भवसागरात् वयमज्ञा दुरात्मानो वृथा पंडितमानिनः ७६ करावलंबनं दत्वा
वर्तयानिंद्यवर्त्मनि अभिष्टुतस्ततः सर्वैर्भगवान्बादरायणः ७७ यतीनवोचयत्स्वस्थान्मेघगंभीरया गिरा
युष्मन्मनस्थकालुष्यं परिहर्तुं मयाधुना ७८ सृष्टा मायानसावन्हिस्तया वोऽहंकृतिर्हृता ममता खलु सर्वज्ञनि
दानं सुखदुःखयोः ७९ नृपोयमममताहीनो मयि संन्यस्तमानसः तस्मात्प्रियतमोप्यासीद्ध्रुवद्ब्रश्च महामतिः ८०

रणं त्वमेवासीत्यर्थः ७३ त्वां दोषाविलं दोषैः कलुषं मनुजं मनुष्यं मन्वत इति शेषः ७४ वेदव्यासस्तुतिं कृत्वा परस्परं पश्चात्तापं कृत-
वंत इत्याह व्यास इति तस्य पूर्णषड्गुणैश्वर्यसंपन्नस्य वेदव्यासस्य मनुजैः किंचिदैश्वर्ययुक्तजनकादिमनुष्यैः कृत्यं अपूर्वफलप्राप्तिरूपं
किमपि नास्ति ७५ अज्ञानत्वतः ७६ वर्तय प्रवर्तय अस्मानिति शेषः ७७ ७८ वः युष्माकं ७९ ८० ८१ ८२

ममताहीनत्वंज्ञानहरेर्वाप्रियतमत्वेकारणमित्याह अहमिति यत्रयद्यपि ज्ञानिनोमंमप्रियाइत्येवमुक्तोपयुक्तं तथापिलोकदृष्टांतेनज्ञानिनांभगवत्प्रियत्वमुपपादयितुमहज्ञानिप्रियः ज्ञानिनांप्रियइत्युक्तं लोकेयस्ययस्मिन् प्रीतिः तस्यतस्मिन्प्रीतिरितिप्रसिद्धमेवेति ८१ ममतायुक्तचेतस्त्वेन भवंतः विद्यमानाः यूयंतुएव ८२ मुनिः व्यासः शांडिल्यमहामुनिः अध्यायार्थंउपसंहरतितस्मादिति ८३ इतिवायुपुराणेमाघमाहात्म्यटीकायामष्टादशोऽध्यायः १८ छ एवंध्यानोपयुक्तत्वनिश्चयादिप्रकारंप्रदर्श्यइदानींसकारणकार्यध्यानस्वरूपंनिरूपयत्यस्मिन्नध्याये एवमिति योगीज्ञानयोगीनिष्पन्नज्ञानःजातनिश्चिततत्वज्ञानः सन् आहारः प्रत्याहारः पं

अहंज्ञानिप्रियोनित्यंज्ञानिनोपिममप्रियाः ज्ञानंप्रतिष्ठितंतस्मिन्ममताहीनचेतसि ८१ इतःपरंभवंतश्च हित्वातुममतामतिं भजध्वंमाततोमोक्षमवाप्स्यथनसंशयः ८२ इतितान्बोधयन्भूयस्तत्रैवासीच्चिरंमुनिः तस्मात्तुममताहीनोज्ञानीयोगित्वमाप्नुयात् ८३ इतिअष्टादशोऽध्यायः १८ छ शांडिल्य उवाच एवंनिष्पन्नज्ञानःसन्योगीध्यानंसमाचरेत् यमनियमासनप्राणायामाहारैश्चपंडितः १ ध्यानेन धारणेनापियुक्तश्चापिसमाधिना योगांगैरष्टभिर्विद्वान्योगीसिद्धिमवाप्नुयात् २ दुर्जयानांमहायत्नैरिंद्रियाणांस्वभावतः बलान्निवर्तनंयच्चतंयमंतद्विदोविदुः ३ क्षमासत्यंचशौचंचतथैवेंद्रियनिग्रहः मनसोनिग्रहश्चैवयमइत्यपरेजगुः ४ तत्साधनव्रतादीनिनियमंतंप्रचक्षते

डितोबंधमोक्षज्ञः १ यमादिसमाध्यंतैरष्टभिर्योगांगैर्युक्तःसिद्धिंमोक्षं २ महायत्नैःश्रवणादिभिःबलात् विष्णुप्रसादसामर्थ्येनेत्यर्थः दुष्टविषयेभ्यः निवर्तनं तद्विदः यमस्वरूपज्ञातारः ३ प्रकारांतरेणयमस्वरूपमाह क्षमेति ४ तत्साधनव्रता दीनियमसाधनभूतकृच्छ्रचांद्रायणादिव्रतानिआदिपदेनहरिमाहात्म्यश्रवणादीनितेषांमपिषोडशोऽध्यायेसततंश्रवणेनैवेत्यादिनाइंद्रियनिग्रहसाधनत्वेनउक्तत्वात् यानिसंतितंप्र-

तादिसमुदायं पद्मोति पूर्वशब्देनार्धासनस्य ग्रहणं ऊर्वोरुपरि उभयपादतलकरणपूर्वकमवस्थानं पद्मं जानूरुद्वयोर्मध्ये पादतलद्वयकरणपूर्वकमवस्थानं स्वस्तिकं वामेऊरौ दक्षिणपादतलस्थापनपूर्वकमवस्थानमर्धासनं एवंलक्षणानि स्मृतिषूक्तानि ५ कुंभकइतित्रितत्रत्रिषुमध्ये ६ वामरंध्रमंगुल्येति वक्ष्यमाणं अत्रापि संबंध्यते निरुध्य नासारंध्रात् वायोरिति वक्ष्यमाणमत्र संबंध्यते वायोर्यत् विसर्जनं तत् रेचकउच्यते इति पूर्वेण संबंधः ७ पूरणं पूरकउच्यते इत्यर्थः ८ द्वेपुटे सन्निरुध्य स्थाप्य वायुं स्थाप्य श्वासो वायुश्च स्थापयितुं शक्यं

पद्मस्वस्तिकपूर्वाणि त्वर्धासनानि विदो विदुः ५ प्राणायामस्त्रिधा प्रोक्तः पूरको रेचकस्तथा कुंभको
रेचकस्तत्र नासारंध्राच्च दक्षिणात् ६ निरुध्य वामरंध्रं वा नासिकायाविसर्जनम् विरुध्य दक्षिणरंध्रं
वामरंध्रात्प्रपूरणम् ७ तथैव वायोरंगुल्यापूरणं तु तदुच्यते रेचकात्पूरकात्पश्चाद्द्वेपुटे नासयोस्तथा
८ संनिरुध्य त्वहादिस्थाप्य वायुं तिष्ठेत्स कुंभकः अगर्भश्च सगर्भश्च प्राणायामो द्विधा मतः ९ अग
र्भो ध्यानरहितः सगर्भो ध्यानसंयुतः अगर्भात्कोटिगुणितः प्राणायामः सगर्भकः १० सोपांशुरनुपां
शुश्च प्राणायाम इति द्विधा निरुद्ध्य कुंभकाद्वायुं यावच्छक्यं हरिं त्हृदि ११ ध्यायेत्तं मनसा विष्णुं न्यस्त
नासाग्रदृष्टिकः इंद्रियाणि प्रवर्तंते विषयेषु स्वभावतः १२

वायुं तिष्ठेत् स्थापयेत् तिष्ठेदिति यत् सकुंभकउच्यते रेचकादिस्वरूपः प्राणायामः पुनः अगर्भः सगर्भश्चेति द्विधा ९ कोटिगुणितः उत्तमः १० पुनश्च प्राणायामः मंदमुच्चार्यमाणमंत्रेण सहितः सोपांशुः स्पष्टमुच्चार्यमाणमंत्रसहितोनुपांशुश्चेति द्विधा सगर्भे ध्यानप्रकारमाह निरुध्येति प्राणायामकर्ता त्हृदि कुंभकात् प्राणायामाद्धेतोः वायुं निरुध्य न्यस्तनासाग्रदृष्टिः सन् हरिं सर्वदोषनाशकं तं सर्वोत्तमत्वेन प्रसिद्धं विष्णुं यावत् ध्यानं कर्तुं नशक्यं तावत् मनसा ध्यायेदित्युत्तरेणान्वयः ११ १२ छ छ छ

विषयात्प्रत्याहृत्यनिवर्त्येत्यर्थः एतत्प्रत्याहरणपूर्वकस्थापनंधार्यमवश्यंकार्यमित्यर्थः यः प्रत्याहरणपूर्वकस्थापनप्रकारः सः प्रत्याहारः
१३ तच्चिंतातस्यरूपस्यचिंताचिंतनंयदस्ति तद्ध्यानमितिप्रमाणज्ञाःप्राहुः येनध्यानेन १४ हृदिस्थापितेरूपेकेनचित्कारणेनसंचलि
तेसतिचिंतनाविषयेसतिपुनः रूपेतद्रूपविषयेमनसायथावत्पूर्ववदित्यर्थः यच्चिंतनंयाचिंतासाधारणा १५ ध्यानधारणाप्रकारस्पष्टय
ति अनंतेति नास्तिअंतोनाशोयेषांतानिअनंतानिनित्यानीत्यर्थः द्वितीयानंतशब्देनासंख्यातानियानिरूपाणितेषु १६ सुलक्षणा

प्रत्याहृत्यपुनस्तानिस्थापयेत्ध्येयवस्तुनि विषयाद्धार्यमेतच्चप्रत्याहारः सउच्यते १३ विष्णोरनंतरूपेषुयदि
स्वरूपमात्मनः तच्चिंताध्यानमित्याहुर्येनविष्णुःप्रसीदति १४ पुनःसंचलितेरूपेमनसास्थापितेहृदि यथाव
च्चिंतनंरूपेधारणेत्यभिधीयते १५ अनंतानंतरूपेषुविष्णोरमिततेजसः यच्छ्रेष्ठरूपमत्यंतंप्रतिमातस्यकार
येत् १६ पुष्टासुलक्षणारम्यामनोयत्रप्रसीदति प्रतिष्ठितांस्वचिंतातांपुरःस्थाप्यावलोकयेत् १७ तांमूर्तिंहृ
दिसंस्थाप्यध्यायेद्विद्वाननंद्रितः पुनश्चचलितेचित्तेप्रतिमामवलोकयेत् १८ दत्तनासाग्रदृष्टिश्चपुनर्ध्यायेद्ध
रिंहृदि यथैवाविकलांगःस्यात्तथाध्यायेत्समाहितः १९ अशक्तश्चेत्समस्तांगंध्यातुमादौयदातदा ध्याये
दंगुष्ठमेवादौपादौगुल्फौचजानुनी २० क्रमादूरूकटिंनाभिंस्तनौहृद्बाहुयुग्मकम् कंठंचवदनंचक्षुर्नासां
श्रोत्रेललाटकम् २१ शिरोध्यायेत्क्रमादेवंध्यायेद्विष्णुमतंद्रितः पूर्वंध्यातंयदेवांगंदृढंयावद्भवेन्मुनिः २२

शिल्पिशास्त्रोक्तशोभनलक्षणायुक्तांयत्रयस्मिन्देशेतस्मिन्देशेप्रतिष्ठितांस्थापितांतांप्रतिमाम् १७ पुनःप्रतिमां १८ हरिःयथाअविक
लांगः सर्वांगविशिष्टः ध्यातःस्यात्तथासर्वांगविशिष्टं १९ आदौप्रथमंसमस्तांगंध्यातुमशक्तश्चेत्तर्हिअंगुष्ठमेवादौध्यायेदितियो
जना २० २१ अशक्तः एवंक्रमात् विष्णुंध्यायेत् तदेवध्यानंविवृणोतिपूर्वेतिमुनिर्ध्यानकर्ताइदंमनसिस्थिरम् २२

पुनर्ध्यानार्थमंगांतरंव्रजेत् अनंतरमंगांतरंध्यायेदित्यर्थः यावत्सर्वांगसंपत्तिः सर्वांगध्यानपूर्तिः भवेत् २३ सर्वांगसंपूर्णोध्यातोहरिः यदायस्मिन्कालेध्यानाच्चलति तदापुरःस्थितांप्रतिमां २४ एवंया भगवच्चिंतासातुसैव २५ येनयाधारणाकृतावासनाद्भगवदिच्छया२६ अस्यधारणांकुर्वतः दुष्टानिजन्मानि विरुध्यचनिरुध्यैव अविच्छेदेनअव्यवधानेन पुनःपुनः आगच्छतीतिपूर्वेणान्वयः यः धारणांचिकीर्षुरपिपुमान्धारणाशक्तः धारणांकर्तुमशक्तोस्तीत्यर्थः २७ स्वधर्मेब्राह्मणधर्मेसदाचारेस्थितः सुष्ठुश्रुतंवेदादिश्रवणंयस्यसः सुश्रुतः सुत

तावत्तदेवसंध्यात्वापुनरंगांतरंव्रजेत् यावत्सर्वांगसंपत्तिस्तावद्ध्यायेद्विचक्षणः २३ एवंसर्वांगसंपूर्णोभगवान्हरिरीश्वरः यदाचलतिचेद्ध्यानात्प्रतिमामवलोकयेत् २४ पुनर्नासाग्रदृष्टिस्तुध्यायेद्देवमधोक्षजम् सैषातुधारणाप्रोक्तासमीहितफलप्रदा २५ कृतेचधारणायत्नात्पुनर्जन्मांतरेपिच सैवागच्छतिसंस्काराद्वासनाढ्यापुनःपुनः २६ अविच्छेदेनदुष्टानिजन्मान्यस्यनिरुध्यच यःपुमान्धारणाशक्तःसन्तुजन्मांतरेष्वपि २७ स्वधर्मेवासदाचारेसुश्रुतःसुतपःस्थितः गुरुंशांतंसमासाद्यधारणायास्त्वचचलाम् २८ पुरुषोधारणाहीनो दुष्टकामार्दितःसदा दुष्टजन्मांतरंप्राप्यहानिंयातिपुमानयम् २९ श्रवणादिमहाभ्यासाज्जातज्ञानादिसंपदा धारणातुततःकार्यापुंसावैहितमिच्छता ३० धारणाभ्यस्तमनसिहरिर्वैवासनात्मकः निश्चलस्फुरतिध्येयध्यातुर्वैहृदयेपुनः ३१ तत्राविष्टमनाभूत्वाध्यायेद्देवमधोक्षजम् एवंध्यातुर्महाविष्णुःस्वरूपंबिंबसंज्ञकं ३२

पसिस्थितश्चसन् २८ दुष्टकामार्दितःदुष्टविषयेच्छाप्राप्तइत्यर्थः अतएवधारणाहीनः यःसोयंस्वार्थस्यहानिं २९ ततःस्वार्थस्यहानिसत्वात् जाताज्ञानादिसंपत् यस्यसतेनहितंमोक्षस्वरूपंधारणातुधारणैव ३० धारणाभ्यस्तमनसिधारणाभ्यासयुक्तेमनसिजातेसतिवासनात्मकःवासनायांध्यातुः मनोमयप्रतिमायांआत्मास्वरूपंयस्यसः हरिःनिश्चलमितिक्रियाविशेषणं ३१ तत्रवासनात्मकेहरौआविष्टंआसक्तंमनोयस्यसःआविष्टमनाः स्वरूपंहृत्कमलस्थितंरूपं ३२

यस्ययथायोग्यंतथा ३३ सस्मिताननसुंदरंस्वरूपंदर्शयतीतिपूर्वेणान्वयः मुनिः ध्यानकर्तातन्निविष्टमनाः तत्रबिंबसंज्ञकेरूपे निविष्टंस्थापितंमनोयेनसः भूत्वाकदाचित्तत्भीत्यादिषुप्रपतन्कदाचिद्भूमौसंपतन् पतंतिआनंदबाष्पाणियस्यसः तथाभूतः ३४ ३५ ३६ ध्यानकर्तुःक्षुद्नास्ति ३७ यावत्निवाताचलदीपवत्हृदयेविष्णुःस्फुरतिसः ध्यानकर्ताएवंपूर्वोक्तप्रकारेणआगामीनिकरिष्यमाणानीत्यर्थः ३८ नाशःसाक्षाद्दृष्टुःजंतोःसंबोधनभवतीत्यर्थः प्रारब्धंवा वाअवधारणेप्रारब्धमेवेत्यर्थः ३९ तत्रशुभाशुभमध्ये ४० विष्णुःस्वयंस्व-

रूपयादर्शयत्यस्ययथायोग्यंमनोरमम् निर्दोषंस्वप्रकाशंचसच्चिदानंदविग्रहम् ३३ सूर्यकोटिप्रतीकाशं सुस्मिताननसुंदरम् प्रपतन्संपतन्तुष्यन्पतदानंदबाष्पकः ३४ सदापुष्टवपुःशीघ्रंहृष्टरोमांचकोमुनिः तन्निविष्टमनाभूत्वापूर्णसंतोषसंभृतः ३५ नवेत्तिबाह्यंकिमपिकुठारेणासिनाहतः नस्पर्शसुखमाप्नोतिनशृणोतिनपश्यति ३६ नक्षुदस्तिपिपासाचनग्लानिर्नापिचिंतना विस्मृत्यबाह्यंनिखिलंनिवाताचलदीपवत् ३७ यावत्स्फुरतिवैविष्णुस्तावदेवंसतिष्ठति एवंसाक्षात्कृतेविष्णौसंचितागामिकर्मणाम् ३८ सद्यएवभवेन्नाशःप्रारब्धंवावशिष्यते प्रारब्धंकर्मणोन्यस्यज्ञानादेवपरिक्षयः ३९ प्रारब्धकर्मभोक्तव्यंशुभंवाशुभमेववा तत्रयच्छुभमारब्धमनुभावयतित्यमुं ४० क्रमाद्विष्णुःस्वयंप्रीत्यातथैवाशुभमच्युतः दत्वातावंतिजन्मानियुगपद्भगवान्विभुः ४१

स्यप्रीत्याप्रीतिहेतुनातत्प्रारब्धममुंसाक्षाद्द्रष्टारमनुभावयतिअनुभवंकारयतीत्युत्तरेणासंबंधः प्रारब्धकर्मणाबहुत्वात् भोगेनपरिसमाप्त्यसंभवान्मोक्षोनस्यादित्यतआह दत्वेति तावंतीतियावज्जन्मसुप्रारब्धंभोक्तव्यमस्तितावंतिजन्मानियुगपत्एककालेदत्वात दित्यम् यमनामकजंतोरवस्थानकाले एवविदुरजन्मधार्मयजजन्मचतथा श्रोत्रेंद्रियतत्वाभिमानित्वेनानेकजन्मानीति एवंबोध्यम् ४२ ❧ ❧ ❧

प्रारब्धमनुभावयति ध्यानकर्ताहृदयेअचंचलतयाअवतिष्ठतेइत्यवस्थानः तंयेनबाह्यज्ञानविवर्जितोभवति ४२ तदेकताननताप्राप्तिः हर्येकायताप्राप्तिश्चभवतिसः समाधिः क्षयेजातेसति विरजांप्राप्तिविरजायांनद्यामाप्लुतःस्नातः ४३ बंधमोचनंविवृणोति गुणैरितिगुणैःवेदोक्तैःसच्चिदानंदादिगुणैः यथायोग्यंयोग्यतानुसारेणेत्यर्थः उपासितःसम्यक्ध्यातः ४४ उपासितस्यबंधभंगंयोग्यतानुसारेण उपासनाप्रकारमाह ब्रह्मणेति ब्रह्मणाचतुर्मुखेन ४५ ब्रह्मणःस्त्रीब्रह्माणीसरस्वतीसान्याद्यायेषांतेब्रह्मण्याद्याःसरस्वतीगरुडशेषाद्याः भूपान् अभिप्रेत्याभूपं पृथुकार्तवीर्यादिपरिगणितराजपर्यंताःजीवाः क्रमादूनाःऊनगुणोपासकाःसंति तैश्चतुर्मुखगुणापेक्षया क्रमेणऊनैर्गुणैः पर

अनुभावयतित्यक्त्वापश्चान्मोक्षंददातिच अवस्थानंहरिंदृष्ट्वाबाह्यज्ञानविवर्जितः ४२ तदेकताननताप्राप्तिःस
समाधिरुदाहृतः प्रारब्धस्यक्षयेभोगाद्विरजामाप्लुतोमुनिः ४३ लिंगदेहंविसृज्यैवंब्रह्मणासहमुच्यते गुणैरु
पासितोविष्णुर्यथायोग्यंमहाप्रभुः ४४ बंधभंगंकरोत्याशुप्रसन्नोभगवान्हरिः ब्रह्मणासर्ववेदोक्तैर्गुणैर्ध्ये
योमहाप्रभुः ४५ ब्रह्माण्याद्याः क्रमादूनाआभूपंमानुषोत्तमैः गुणैश्चतुर्भिश्चोपास्योनान्यत्किंचिदुपासयेत् ४६
निर्दोषःसच्चिदानंदोव्याप्तःस्वामीममेतिच अखिलाअपितेज्ञेयागुणाःशक्त्यनुसारतः ४७ नोपास्यःसकलैर्विष्णु
र्मानुषैर्भावितात्मभिः यथायोग्यक्रमादेतैर्गुणैःसर्वैःसुमंगलैः ४८

गात्माध्येयइत्यर्थः अन्यत्निर्दोषादिवक्ष्यमाणगुणभिन्नंवेदोक्तगुणं ४६ निर्दोषइतिनिर्दोषः चिंतासंतापादिदोषरहितःसच्चिदानंदः अपरिमितज्ञानानंदवान्व्याप्तःसर्वव्यापकःसमस्वामीनियामकश्चेतिचतुर्भिरितिपूर्वान्वयः उपासनात्ज्ञानेविशेषमाह अखिलाअपीति तेवेदोक्ताःज्ञानानुसारतःज्ञेयाः नोपास्याइत्यर्थः ४७ भावितात्मभिः भक्तियुक्तांतःकरणैर्मानुषैः मानुषोत्तमैः सकलैः वेदोक्तसर्वगुणैः यथायोग्यंहरिगुणोपासनाअवश्यंकर्तव्येति प्रतिपादयितुंपूर्ववत्पुनरनुवदति यथायोग्यमिति सर्वैः ब्रह्मण्यादिभूपांतैः देवैः मुक्तियोग्यैर्जीवैरित्यर्थः एतैर्वेदोक्तैर्गुणैः उपास्यइत्युत्तरेणान्वयः ४८

मानुषैरपिचतुर्भिः पूर्वोक्तनिर्दोषाद्विगुणैः उपास्यः एवमुपासनात् उपासनेनलिंगाकृतेः लिंगदेहस्यनाशेजातेसति ततः परं अनंतरं ४९ ५० अपरोक्षदृशः परमात्मापरोक्षज्ञानात् ५१ यद्यपिकर्मलेपंकर्मत्यागजनितंपापंतादृक्योगीवाअपरोक्षज्ञानयोग्यपि ५२ मर्यादार्थंतुसंप्रदायप्रवृत्त्यर्थमेव ५३ तस्यापरोक्षज्ञानिनः द्रोहेजातेसति अन्यत् महद्द्रोहादिमहापातकव्यतिरिक्तं पापकर्म नविलिप्यते नसंबध्यते ५४ तस्यआनंदस्यकदाचित् अनभिव्यक्तिस्तु अभावकत्वमेव अभिव्यक्तिस्तु पूर्णाभिव्यक्तिरेव सेत्थं परमात्मदर्शनशब्दसाति

देवैरुपास्योभगवांश्चतुर्भिर्मानुषैरपि विष्णोरुपासनादेवंनाशेलिंगाकृतेःपरम् ४९ स्वस्वरूपचिदानंद
गुणाविर्भावलक्षणम् मोक्षमाप्नोतिवैयोगीजन्ममृत्युविनाशनम् ५० अपरोक्षदृशःप्राग्वैयोगीकर्माणि
संत्यजन् नरकादिमहादुःखंप्राप्नोत्येवनसंशयः ५१ नप्राप्नोतिकर्मलेपमपरोक्षदृशःपरम् तथापिता
दृग्योगीचाकर्मकुर्याद्दतोद्भितः ५२ मर्यादार्थंतुजगतःकुर्याद्विष्णोरनुज्ञया तेनानंदस्यवृद्धिःस्यान्मो
क्षेतस्यमहात्मनः ५३ तस्यापिमहतांद्रोहेकृतश्चित्कारणांतरात् आनंदस्यभवेद्ध्रासोनान्यत्कर्मविलि
प्यते ५४ ह्रासोनामानाभिव्यक्तिर्विद्यमानस्यतस्यतु अभिव्यक्तिस्तुतस्यैववृद्धिरित्यभिगीयते ५५
वृक्षादिजातिर्जीवानांसानित्यैवयतस्ततः मुक्तिंतेनैवरूपेणयांतितेकामरूपिणः ५६

कभोगादिभिः सर्वानंदकारणैः या आनंदस्याभिव्यक्तिरिति ५५ जीवानांमध्येयावृक्षादिजातिः वृक्षाः कल्पतरुपारिजातादयः वृक्षत्वरूपाःजीवाः आदिशब्देनगरुडारुणपत्न्यादिस्वरूपजीवानांग्रहणं यतः सानित्यैवास्ति ततः तेवृक्षादिजातिमंतोजीवाः कदाचित्कामरूपिणःसंतः तेनैववृक्षादिरूपेणैव ५६ ६ ६ ६ ६

ननुवृक्षादिस्वरूपाणां जीवानां मोक्षसाधनानुष्ठानं नस्याद्वृक्षादिशरीरेण तदसंभवादित्यतआह संसृताविति तनुभृतां कर्मजन्यप्राकृतदेहधारयाकर्तॄणांतेषां वृक्षादिजातिमज्जीवानामन्यथाभावः मनुष्यादिशरीरांतरप्राप्तिर्भवति तथाच मोक्षसाधनानुष्ठानंयुक्तमितिभावः तत्रजीवमध्ये स्थावरमुक्तेभ्यः वृक्षादिमुक्तजीवेभ्यः जंगममुक्तिगाः पशुपक्ष्यादिस्वरूपवंतोमुक्तजीवाः वराः ५७ मानुष्यमुक्ताः त्रिवर्णेतरमानुषमुक्ताः द्विजाः क्षत्रियवैश्याः पराः उत्तमाः तत्वोपदेशकर्तारः ब्राह्मणाः ५८ भूपालाःचक्रवर्तिनोराजानःपितरःअ-

संसृतावन्यथाभावस्तेषांतनुभृतांकिल तत्रस्थावरमुक्तेभ्योवराजंगममुक्तिगाः ५७ तेभ्योमानुषमुक्ताश्च
तेभ्योमुक्ताद्विजाःपराः तत्वोपदेशकर्तारोमुक्तास्तेभ्योऽधिकामताः ५८ तेभ्योधिकास्तुभूपालामुक्तिगाः
परिकीर्तिताः भूपेभ्यःपितरोज्ञेयामुक्तिगास्तेभ्यएवच ५९ वसवोभ्यधिकाःप्रोक्तास्तेभ्योवैकर्मजाःपराः
तेभ्यश्चाजानजादेवास्तेभ्यःसप्तर्षयःपराः ६० तेभ्योवह्निस्ततःसूर्यस्तस्माद्वाचस्पतिःपरः तस्मादिंद्रःप
रोमुक्तोतस्माद्गौरीततोहरः ६१ हराद्बुद्धिस्ततोब्रह्मामुक्तोजीवाधिकोमतः नतस्मादधिकःकोपिमुक्तोजीवे-
षुचोत्तमः ६२ ब्रह्मणःपरमव्यक्तंतस्माद्विष्णुर्महाप्रभुः देहान्निष्क्रामतांपुंसांमार्गौद्वौपरिकीर्तितौ ६३
संसारेभ्रममाणानांमार्गोयोदक्षिणायनः धूम्रादिरितितंप्राहुःपितृयानवनंविदुः ६४

ग्निष्वात्तादयः ५९ कर्मजाःदेवाः ६० ६१ बुद्धिः तदभिमानिनीसरस्वती ६२ अव्यक्तंश्रीतत्वंलक्ष्मीरित्यर्थः कर्मक्षयकथनानंतरंप्रासंगिकमुक्त्वा इदानींमोक्षकालिकमुत्क्रमणं उत्क्रांतानांमार्गंचदर्शयितुमुत्क्रमणसामान्यंचदर्शयति देहादिति ६३ भ्रममाणानांपुनरावर्तमानानांकर्मयोगिनामित्यर्थः योमार्गःसदक्षिणायनः तन्नामकइत्यर्थः धूम्रादिः धूम्रः धूमलोकः आदिर्यस्यसः पितॄन् अग्निष्वात्तादिपितॄन्यांत्यनेनेतिपितृयानः तंपितृयानं ६४ छ

विपश्चितांब्रह्मापरोक्षज्ञानिनांक्षीणकर्मणामित्यर्थः योमार्गःसचउत्तरायणः अर्चिर्लोकः आदिर्यस्यसः अर्चिरादिरिति द्विविधः प्रामाणिकानांमतःसन्तैःप्रोक्तोस्ति ६५ देवयानंदेवान्यातिअनेनेतिदेवयानः ब्रह्मपरमात्मानंयात्यनेनब्रह्मयानस्तंइतिच ६६ दक्षिणाःतद्भागस्थाः सर्वानाड्यः ६७ पिंगलेडानाडीनां किमपेक्षयादक्षिणत्वंवामत्वंचेत्यतः उक्तमेवस्पष्टयति सुषुम्नेति दक्षिणोस्यादिजात्येकवचनं ६८ दक्षिणायनोत्तरायणमार्गोपयुक्तत्वेननाडीनांदक्षिणायनोत्तरायणसंज्ञे दर्शयति पिंगलायाइति याःपिंगलाः पंचपंचचारंशतंपंचशतानीत्यर्थः ताः

विपश्चितांतथामार्गोद्वितीयश्चोत्तरायणः अर्चिरादिरितिप्रोक्तःसचवैद्विविधोमतः ६५ देवयानंब्रह्मयानमितितं
चविदोविदुः देहेतिस्रश्चनाड्यःस्युःपिंगलेडासुषुम्नकाः ६६ दक्षिणाःपिंगलाःसर्वाइडावामाःप्रकीर्तिताः नाड्यो
थमध्यमाःप्रोक्ताःसुषुम्नावेदपारगैः ६७ सुषुम्नानाडिपार्श्वस्थेइडापिंगलसंज्ञके पिंगलादक्षिणानाडीइडावामाप्र-
कीर्तिता ६८ पिंगलायाःशतंपंचनाड्योवैदक्षिणायनाः तावत्यएवचेडायानाड्यस्ताश्चोत्तरायणाः ६९ दक्षिणाय
ननाड्यस्तुतिर्यग्वामेप्रसारिताः उत्तरायणनाड्यस्तुतिर्यग्दक्षिणगामताः ७० उत्तरायणमार्गस्थानिष्क्रामंतःकले-
वरात् गच्छंतिदक्षिणात्कर्णादामुक्तेर्महरादिगाः ७१ दक्षिणायनमार्गस्थानिर्गच्छंतःकलेवरात् गच्छंतिवामक
र्णेनपुनर्निरयभूमिगाः ७२ तत्रधूम्रादिमार्गेणनिर्गताःकर्मिणस्तुये पितृयानस्यमार्गस्थारात्रिशब्दाह्वयानराः ७३

दक्षिणायनाःतन्नामकाइत्यर्थः याइडा ६९ दक्षिणगाःदक्षिणेप्रसारिताइत्यर्थः ७० ततउत्तरायणमार्गस्थाःउत्तरायणसंज्ञकनाडीद्वारस्थायेजीवास्ते आमुक्तेःमुक्तिकालपर्यंतं महरादिगाःमहर्जनोलोकादिषुभगवदुपासनांकृत्वातिष्ठंतीत्यर्थः ७१ पुनरितिपूर्वंयथानिरयभूमिगाबभूवुःतथापुनःनिरयभूमिगाभवंतीत्यर्थः ७२ तत्रोक्तमार्गद्वयस्थानांमध्येवामकर्णेननिर्गताःयेकर्मिणः तेपितृयानस्यमार्गस्थाः रात्रिशब्दाह्वयाः रात्रिरितिशब्दःरात्रिशब्दसः आह्वयोनामयेषांते रात्र्यभिमानिदेवतालोकंगतत्वेनउपचाराद्रात्रिनामकाःनराः ७३

क्रमात् पितृमेघजलादीनि प्राप्ताः संतः योनिषु योनिषु मनुष्यपश्वादिसर्वयोनिष्वित्यर्थः ७४ अर्चिषंअर्चिर्लोकं आतिवाहिकं वायुलोकम् ७५ अहरादिचतुर्भिः शब्दैस्तदभिमानिदेवतानांलोकाः ग्राह्याः अहः दिनं पूर्वपक्षं शुक्लपक्षं उदक् उदगयनं तडितं विद्युद्रूपं वायुलोकं वरुणादिशब्दैस्तल्लोकाः ग्राह्याः प्रजापं दक्षं ७६ वैश्वानरमग्निं दिवंततो महरादिलोकांश्चगच्छंति परंवायुं मुख्यं वायुसूत्रनामकमित्यर्थः तेनैव वायुना सहैव पुरुषोत्तमं हरिं प्राप्य ७७ विधिनाश्रुत्यादिविहितमार्गेण तेउत्तरायणमार्गस्थाः मुक्तिगाः मुक्तिंगंतारः ७८ शिंशुमारात्मकं हरिंभित्त्वेति पूर्वेणसंबंधः क्रमात् पूर्वोक्तक्रमेणेत्यर्थः तंप्रसिद्धं वैकुंठादिस्थंहरिं ७९ महर्लोकादिगताः सुषुम्नानाडितः सुषुम्नानाडीद्वारा

पितृमेघजलादीनिक्रमात्प्राप्ताःपुनर्भुवि जायंतेकर्मभिर्घोरैर्नानायोनिषुयोनिषु ७४ उत्तरायणमार्गस्थानि गच्छंतः कलेवरात् गच्छंत्यर्चिषमेवादौततश्चैवातिवाहिकम् ७५ ततोहःपूर्वपक्षंचाप्युदक्संवत्सरंतथा तडितंवरुणंचैवप्रजापंसूर्यमेवच ७६ तथावैश्वानरंचंद्रंध्रुवंचैवदिवंतथा ततोवायुंपरंप्राप्यतेनैवपुरुषोत्तमम् ७७ अनेनविधिनातेतुक्रमाद्यांतिहरेःपदम् देहान्निष्क्रममाणास्तेमुक्तिगाःप्रथमंहरिं ७८ शिशुमारमजंहित्वाक्रमात्सत्याद्व्रजंतिते तथालिंगशरीरस्यभंगकालउपस्थिते ७९ सुषुम्नानाडितोयांतिक्रमेणानेनतेहरिम् योगशक्त्यामहात्मानोमनश्चातेश्यचात्मनि ८० पृथिवीमप्सुसंयोज्यह्यपोग्नौतंसदागतौ संयोज्यवायुमाकाशेतन्मात्राण्यपिवैक्रमात् ८१

शिरोमध्यस्थब्रह्मरंध्रेणतेजोमयशरीरात् उत्क्रांताः जीवाः अनेनक्रमेणपूर्वोक्तार्चिरादिमार्गेणदेहादुत्क्रांतिसमये तत्त्वानांतदभिमानिदेवतानांचलयचिंतनमवश्यंकर्तव्यमित्यभिप्रेत्यलयप्रकारंलेशतोदर्शयति योगशक्त्येति महात्मानः अपरोक्षज्ञानिनः योगशक्त्याध्यानसामर्थ्येन ८० तमग्निंसदागतौवायौक्रमात् महाभूतलयक्रमेणतन्मात्राः गंधरसाद्याश्चसंयोज्यप्रविलाप्यतदित्थं पृथिवीमप्सुगंधद्वारा आपोग्नौरसद्वारातंवायौ रूपद्वारावायुंचाकाशे स्पर्शद्वाराप्रविलाप्य महात्मानोविष्णोःपरंपदंयांतीतिचतुर्थेनान्वयः ८१

आकाशशब्दद्वारा मनस्तत्वेचकाराद्दशेंद्रियाणिसंयोज्य तच्च बुद्धितत्वेऽहंकारकार्यरूपे ८३ तच्च महत्तत्वंच अव्यक्ततत्वे तथा तेनैव प्रकारेण तत्वाभिमानिनोदेवांश्चयथायथतत्तदंतस्थहरिणासह तेषुतेषु संयोज्य प्रविलाप्य अभिमानिदेवतांऽतर्यामिहर्योः संयोजनप्रकारश्चेत्थं अश्विनौवरुणे तेचंद्रे तंचानिरुद्धेऽनिरुद्धं कामे कामंच वारुण्यां तांशेषे शेषं सरस्वत्यां शारदां चतुर्मुखे ब्राह्मणंच हरौ प्रविलापयेत् पृथिव्यंतरगतमन्नमयनामानमनिरुद्धं तेजआदित्रयेंद्रियांतर्यामिप्राणमयनाम्निप्रद्युम्ने तं मनोबुद्ध्यंतर्यामिणि मनोमयाभिधे संकर्षणे तंचाहंकारांतर्गतविज्ञानमयाख्यवासुदेवे वासुदेवंचाव्यक्तांतर्यामिण्यानंदमयनाम्निनारायणेइति संयोजयेत् ऐक्येन भावयेत् अत्रतत्वानांसंयोजनंस्वरूपतोलयचिंत

आकाशंचमनस्तत्वेसंयोज्यचमहामतिः मनस्तत्वंबुद्धितत्वेबुद्धितत्वमहंकृतौ ८२ अहंकारंमहत्तत्वेतच्चाव्यक्तेमहामतिः तत्वाभिमानिनोदेवास्तथासंयोज्यचक्रमात् ८३ तत्तदंतस्थहरिणासाकंविष्णुपुरःसरः निर्गत्यब्रह्मरंध्रेणयातिविष्णोःपरंपदम् ८४ एतन्मार्गक्रमंज्ञात्वा मुच्यतेसर्वकिल्बिषैः किमन्वनुष्ठानवतांनृणांमुक्तिःकरेस्थिता सतांचमुक्तिफलभाग्दुर्लभाह्यकृतात्मना ८५ इतिवा॰मा॰ एकोनविंशोऽध्यायः १९

नं अभिमानिनांदेहे लयचिंतनं तदंतर्यामिरूपाणांतु ऐक्यचिंतनमिति विवेकः ८३ विष्णुः पुरस्सरोयस्यसः तथाभूतःसन् ब्रह्मरंध्रेणसुषुम्नानाड्यानिर्गत्यशरीरादिति शेषः परं गुणत्रयसंबंधशून्यत्वेन तद्विलक्षणं वासुदेवाख्यं पदंयातिप्राप्नोतीत्यर्थः ८४ एवंमार्गत्रयंप्रतिपाद्य तज्ज्ञानिनां तदनुष्ठानवतांच फलंप्रदर्शयन्नुपसंहरति एतदिति मार्गाणामीडापिंगलासुषुम्नाख्यानांक्रमंगतिं करेस्थिताऽतिसुलभास्तीतिकिंवक्तव्यं अस्त्येवेत्यर्थः ननुकिंयोग्यायोग्यानांसर्वेषामेव मार्गत्रयज्ञानानुष्ठानाभ्यां मुक्तिःस्यादित्याशंकायामाह सतामिति हिशब्दः प्रमाणप्रसिद्धिद्योतकः तथाचसर्वसज्जनविषयकमेवेति भावः ८५

इतिश्रीवायुपुराणस्यमाघमाहात्म्येशांडिल्यपंचाध्यायीटीकायामेकोनविंशोऽध्यायः १९ ७ ७ ७

पूर्वंहिशांडिल्यतत्वे पंचमाध्यायांते एतन्मार्गकमंज्ञात्वेत्यनेन किमन्वनुष्ठानवतामित्यनेनचज्ञानानुष्ठानसंपन्नानामेवसज्ज्ञानानांस्वरूपानंदाविर्भावलक्षणामुक्तिर्भवतीतिनिष्कर्षितं तन्नज्ञानकर्मणोर्गहनस्वरूपत्वात्तत्साधनानुष्ठानज्ञानंविनातस्याप्तेरशक्यतया मुमुक्षूणांतदुपकथनमावश्यकमितिपर्यालोच्य तदेवारभते ऽनेनाध्यायेन भगवान्शांडिल्यः ज्ञानस्येति ज्ञानस्य भगवत्स्वरूपज्ञानस्य कर्मणः निष्कामस्यकारणंजनकं अभ्यसेत्पुनः पुनरावर्तयेत् तर्हिकर्माणिकदासविस्तरमाचरितव्यानीत्यपेक्षायामाह कथायाः अभावः विरहः १ श्रमहारिणि

शांडिल्यउवाच ज्ञानस्यकर्मणश्चापिश्रवणंकारणंततः संकोच्यसर्वकर्माणिश्रवणंचाभ्यसेत्सुधीः कार्याणिसर्वकर्माणिकथाभावोहरेर्यदा १ कथासुधानदीयत्रप्रवहेत्श्रमहारिणी संपाद्यासेवयत्नेनसंकोच्येतरकर्मच २ नयत्रगोविंदकथामृतानदीनयत्रनारायणपादसंश्रयाः नवर्ततेयत्रहरेर्महोत्सवो नयात्यहोब्रह्मपदंहिसेव्यताम् ३ तत्रैवकाशीयमुनाचनर्मदागोदावरीतत्रसरस्वतीच नद्यःसमस्ता अपिदेवखातावसंतियत्राच्युतसत्कथापगा ४ गयाप्रयागंकुरुजांगलंचब्रह्मेश्वरंपुष्करमभ्रसंज्ञम् प्रभासकेदारमुखानितत्रसंत्यत्रतीर्थानिचयानिलोके ५ देवाहिब्रह्मेशमुखाश्चतत्रधर्माश्चयज्ञादिमुखाः समस्ताः लक्ष्मीश्चयोगाअपिसांख्यमुख्याविष्णोःकथायत्रवसंतितत्र ६

संसारश्रमपरिहारिकासंपाद्याअत्यादरेणसेवितव्येत्यर्थः इतरकर्मनित्यनैमित्तिकंकर्मसंकोच्यप्रत्यवायपरिहारपर्याप्तंकृत्वा २ भगवत्कथायांकर्मापेक्षयाऽत्यादरेणमुमुक्षूणांप्रवृत्तयेतामेवप्रशंसति नयत्रेत्यादिभिः गोविंदस्यपरमात्मनः कथैवामृतंयस्यांसानदीकथारूपिण्यमृतनदीत्यर्थः नारायणपादसंश्रयाः साधवः महोत्सवः जन्माष्टम्यादिपर्वसुकरणीयः एतत्कथानद्यादित्रयंयत्रनास्तितद्ब्रह्मपदंहि सब्रह्मलोकोऽपिसेव्यतांनयातीत्यन्वयः ३ कथापगाकथानदी ४ अभ्रसंज्ञंसरः ५ ६ ७ ७ ७

७ ८ ९ सत्यव्रते तन्नाम्नि दीर्घतपसइति कर्मणिषष्ठी तत्वोपदेशमकरोदित्युत्तरेणान्वयः १० विष्णुकथायामेव लयः अ
र्थान्मनसो विलीनता यस्य सः ११ वृद्धतपसइति कर्तरिषष्ठी तेनवाच्यमानामित्यर्थः १२ स्नानंसंत्यज्य गुरुशुश्रूषणेरत आसीदित्यु

नकर्मलेपोनचबंधलेशोनदुःखलेशोनचजन्मयोगः नभूतयक्षादिपिशाचपीडायत्राच्युतोदारकथाप्रसं
गः ७ अत्रैवोदाहरंतीममितिहासंपुरातनम् संवादंद्विजयोस्तत्रपुण्यधाम्नोमहात्मनः ८ पुराकृत
युगस्यांतेपुण्यधर्मा द्विजोत्तमः गंगादक्षिणकूलेतुसार्द्धयोजनदूरतः ९ ग्रामेसत्यव्रतेपुण्येतत्रावासी
वृद्धतपाः शतार्धदीर्घतपसोजात्यंधस्यमहात्मनः १० तत्वोपदेशमकरोत्कृपयानुवृद्धतपाः तन्मध्ये-
नाकरोद्गंगास्नानंविष्णुकथालयः ११ पुण्यधामापितद्ग्रामवासीविष्णुकथांशुभाम् वाच्यमानांतुशुश्रा
वसवृद्धतपसोमुनेः १२ सार्द्धंचदीर्घतपसाशतार्धंमुनिपुंगवः सकथालोलुपोगंगास्नानमाशतवार्षिकं
१३ संत्यज्यसर्वकर्माणिगुरुशुश्रूषणेरतः तीर्थयात्रापुराणाच्चाध्वगानांमहात्मनां १४ आतिथ्यक
र्मनिरतोनैच्छद्गंगावगाहनं श्रीरामचरितंपुण्यंशतकोटिप्रविस्तरम् १५ तावत्संख्यंपंचरात्रंपुराणानिच
सर्वशः इतिहासांस्तथावेदांस्तथावेदशिरांसिच १६ साकंचदीर्घतपसासकथाश्रावकमहामतिः सोकरो
द्दशगायत्रीजपसंध्येतथैवच १७ अन्यानिनित्यकर्माणितंतुमात्रंचकारसः मार्गस्थमहतांसेवासदाविष्णु
कथाश्रुतिः १८ पुण्यधाम्नोद्विजस्यास्यत्वभूत्तद्द्वयोर्गतिः एतस्मिन्नंतरेकालेज्ञानसिंधुर्धृतव्रतो १९

त्तरेणानुषंगः १३ शतवर्षाणिस्नानत्यागेप्रयोजनानंतरमाह तीर्थेति अध्वगानांपथिकानां आतिथ्येत्यादिनाऽग्रिमेणसंबंधः १४ १५ तावत्संख्यंशतकोटिसंख्याकं पंचरात्रंआगमं वेदशिरांसिउपनिषदः १६ १७ तंतुमात्रंप्रत्यवायपरिहारपर्याप्तं श्रुतिःश्रवणं १८ द्वयोर्द्विप्रकारा विष्णुकथाश्रवणमहत्सेवनरूपा गतिःसाधनम् १९

दूरपथेन दूरमार्गाक्रमणेनेत्यर्थः २० २१ २२ निर्गत्य संमानार्थं गृहान्निष्क्राम्येत्यर्थः २३ २४ २५ प्रसादितः संतोषितो मयेतिशेषः
२६ २७ निकृंतने नाशे आत्मा मनः हरिर्वा २८ संवाह्य संप्रापय्य संस्थाप्येतियावत् २९ ३० ३१ मम तिष्ठतः सतः दीर्घतपः कृते दीर्घ-

आजग्मतुरुभौ तौ तु पुण्यधामगृहं प्रति दिवाकरास्तसमये श्रांतौ दूरपथेन तु २० अगात्पुण्यकथां श्रुत्वा पुण्य-
धामापि स्वगृहम् तदापश्यन्महात्मानौ ज्ञानसिंधुधृतव्रतौ २१ संतोषमतुलं लेभे मृतः प्राणागमादिव तयो-
र्ववंदे चरणौनुसतन् संवदन् भ्रमन् २२ संतोषपुलकांगश्च तथा गद्गदभाषणः प्रत्युत्थाय च निर्गत्य पादौ प्रक्षा-
ल्य वै तयोः २३ तज्जलं शिरसा धृत्वा कृतकृत्य इवाभवत् संपूज्य मधुपर्काद्यैर्यथाविभवमंजसा २४ तौ द्वौ
तु भोजयित्वाथ सूपविष्टौ महामतिः तयोः पप्रच्छ कुशलं प्रसन्नेनांतरात्मना २५ दिष्ट्या च वामसंगो भूत्पा-
वितं च कुलं मम अद्य नः पितरस्तुष्टा माधवोपि प्रसादितः २६ बहुजन्मार्जितैः पुण्यैर्महतां संगतिर्भवेत्
दुर्लभाः साधवो लोके सदा विष्णुकथारताः २७ अलमेतावता पुंसां सर्वाघानां निकृंतने महत्संगेन च सदा ये-
नात्मा सुप्रसीदति २८ भार्यया वीज्यमाने तु पादौ संवाह्य स्वांकयोः पीडयामास हृष्टात्मा यावच्छ्रमनिवार-
णम् २९ तावप्यथोचतुः पुण्यधामानं मुनिपुंगवम् किं वा करोषि ग्रामेस्मिन् किं शृणोषि निरंतरं ३० दूरे कियति सा
गंगा वर्ततेत्यंतपावनी पृष्टस्ताभ्यां स्ववृत्तांतं पुण्यधामाप्यभाषत ३१ शतान्यब्दान्यतीतानि तिष्ठतो मे म-
मालये बृहत्तपा दीर्घतपःकृते तत्त्वावबोधनं तावदब्दस्थितिश्चक्रे कर्माण्यपि परित्यजन् ३२ अहं विष्णुक-
थालापलोलुपस्तत्प्रसादतः शृणोमि दीर्घतपसा साकं वर्षशतं त्वहं दूरे कियति सा गंगा न जाने न गतं मया ३३

तपसो मुनेरर्थे तत्त्वावबोधनं ज्ञानोपदेशं चक्रे इत्यन्वयः तावदब्दानि शतवर्षाणि स्थितिः अवस्थानं यस्य सः तावदब्दस्थितिः बृहत्तपाः ३२
अहं न जाने इति योजना ३३

३४ ३५ महामुनिंपुण्यधामानं ३६ ३७ गंगामाहात्म्यविषये विशेषमाह पाद्मे ब्राह्मणंप्रतिप्रेतउवाच इदानींजान्हवीतोयमाहात्म्यं
रमाद्भुतम् दृष्टात्रब्राह्मणश्रेष्ठत्वांयाचेजान्हवीजलं अस्मिन्नेवाचलेदृष्टंमयाश्चर्यंचवैद्विज पारियात्रोद्भवःकोपिब्राह्मणोग्रामयाजकः अया
ज्ययाजनाद्विप्रेसभूतोब्रह्मराक्षसः अस्मत्संगानुरोधेनस्थितोसौहायनाष्टकम् तस्यास्थीनिस्वपुत्रेणसंचितानिद्विजोत्तम क्षिप्तान्यानीय

कदापिमुनिशार्दूलोश्रुतासासार्द्धयोजने तिष्ठतीतिमहापुण्याजनानांवार्तयामया ३४ इत्येवमेगति-
श्चासीत्सदाविष्णुकथारतिः पांथसत्पुरुषसेवाचनान्यत्किंचिद्धरोचते ३५ इतितद्वचनंश्रुत्वाज्ञानसिंधुधृत-
व्रतौ अन्योन्यमूचतुश्चैवंनिंदयंतौमहामुनिं ३६ पापस्यास्यगृहेचास्मिन्नावाभ्यांभुक्तमंजसा नानेनस
दृशःपापीयेनगंगानसेविता ३७ गंगागंगेतियोब्रूयाद्योजनानांशतैरपि मुच्यतेसर्वपापेभ्योविष्णुलोकंसग
च्छति ३८ कथंनसेवितागंगातादृशीलोकपावनी शापकृत्तोनदास्यंतिपितरोस्यदुरात्मनः ३९ कथंदेवा-
श्चतुष्यंतिकथंवामधुसूदनः योगंतुमुत्सहेद्यापिगंगालोकैकपावनीम् ४० ससर्वकुलमुद्धृत्यविष्णुलोके
महीयते ४० सन्निधौविद्यमानोपिगंगायस्तुनसेवते आत्महासतुविज्ञेयःसर्वकर्मबहिष्कृतः ४१ सन्निधौवि-
द्यमानस्तुगंगासेवांनचेच्छति पितृदेवमुनीनांसआशाच्छेदीभवेद्ध्रुवम् ४२ अहोआश्चर्यमत्यंतंपुण्यधा
म्नापिनाकृतं गंगावगाहनंक्वापिकस्येदंकर्मणःफलम् ४३ विलप्यतौबहुविधंतंविनिंद्यपुनःपुनः अज्ञानात्पापिसं
गेनमहत्पापमुपागत ४४

गंगायांतीर्थेकनखलेऽमले तत्क्षणादेवमुक्तोसौराक्षसत्वात्सुदारुणात् इतिगंगाजलस्नानमहिमानं
हृदद्भुतं साक्षाद्दृष्टोमयातेनगांगेयंप्रार्थितंजलमिति ३८ कुतोनदास्यंति दास्यंत्येवेत्यर्थः ३९ महीयतेपूज्यते ४० ४१ आशांतीर्थतर्पणा-
दिविषयकेच्छांछिनत्तीतिआशाच्छेदी ४२ कर्मणोदुष्कर्मणः ४३ महापापमुपागतमित्यादेरुच्चार्येतितृतीयश्लोकस्येनसंबंधः ४४

४५ ४६ आरात् सद्यः दर्शनक्षण एवेत्यर्थः ४७ ४८ ४९ ५० हिमवतः उत्तरंतटंगंगोद्गमस्थानमित्यर्थः ५१ ५२ अस्तोषातांतुष्टुवतुः सागराः सगरात्मजाः ५४ नेतुर्भ्यंकृपालुर्विष्णुः ५५ ५६ ५७ तंशिशुम् ५८ समजायत आविर्बभूव ५९ रणताशब्दा-

अनिच्छयापिसंस्पृष्टोदहत्येववह्निपावकः किंदुःखंनकरोत्येषदुःसंगोमहतामपि ४५ इत्युच्चार्यततःशीघ्रंराजावेवनुतावुभौ ययतुर्निर्दयंतौततस्मिन्ग्रामेस्थलातुर ४६ मातर्गंगासमीपंचजग्मतुःशीघ्रंगौमुदा आरात्स्वरेणैमतुर्गंगांप्रसन्नेनांतरात्मना अप्यगंगातटपश्चान्नाभोददृशतुश्चतौ ४७ सर्वेपिचावगाहंतिनैनयोर्जलदर्शनं अभूत्क्वापितनश्चापिगंगायामटतोरपि ४८ आगंगासागरांतंचकाशीमारभ्यतौगतौ आपिगोष्पदमात्रंवानलब्धंजलमेतयोः ४९ स्वैरंसर्वेवगाहंतितिष्ठंत्यत्रसदाजनाः तथापिनैतयोश्चासीज्जलंसर्षपमात्रकम् ५० पश्चाद्दुःखेनमहताप्राप्तौहिमवदुत्तरम् नापश्यतांचतत्रापिपयःकणमथापिवा ५१ पुनर्यातौसागरांतनप्राप्तंकिंचिदंबुवै काशीमेवपुनःप्राप्यदुःखाकुलितमानसौ ५२ अस्तौषातांततोगंगांस्तोत्रैर्नानाविधैरपि रुद्रोपिभगवानवयाष्टत्वांवैशिरोमणिं ५३ कृष्णांगुष्ठसमुद्भूतांधृत्वालोकेशिवोभवत् सागराश्चापिभूपालास्त्वत्तआपुःशुभांगतिं ५४ नमस्तेसर्वकल्याणीनमस्तेलोकपावनी कंभगेत्राहिनौपापौकृपालुनखसंभवे ५५ उद्दिश्यत्वांमहोत्साहौत्वच्चित्तौतत्परायणौ कृतार्थतांमन्यमानौदूरादावांसमागतौ ५६ त्वंमातासर्वलोकानांत्वमेवजगतांगतिः यथात्वज्जनकोविष्णुस्तथात्वंजनरक्षिका ५७ अपराधकरमाताशिशुंनिर्भर्त्स्यवैपुनः कामानिष्टान्ददात्येवनाहितंसापरित्यजेत् ५८ तस्मादिदंजगन्मातर्नौयत्कृतंतत्क्षम्यतां इतिताभ्यांस्तुतागंगाप्रत्यक्षंसमजायत ५९ स्तनभारनमन्मध्यारणत्कंकणनिःस्वना पूर्णेंदुवदनापुण्यावरदाभयपाणिना ६०

यमानानांकंकणानांनिःस्वनोयस्यांसा-वरदाभयपाणिनेतिजात्येकवचनंपाणिभ्या-
मित्यर्थःउपलक्षितेतिशेषः ६०

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

६१ ६२ तस्याः कथायाः आश्रयः प्रतिपाद्यविषयरूपः ६३ ६४ तयोर्विष्णुकथालापतद्विस्मृत्योः किंकराः सेवका इत्यर्थः ६५ ६६ नि

तांदृष्ट्वाचक्रतुर्दंडप्रणामंतौमहामती दुःखाद्बाष्पनिरुद्धाक्षौतयागद्गदभाषिणौ ६१ उवाचसस्मितंगंगामे
घगंभीरयागिरा भवद्भ्यांनिंदितोयस्मात्पुण्यधामामहामतिः ६२ आकांक्षमाणायत्पादरेणुंतिष्ठाम्यहर्नि
शं यत्रविष्णुकथालोकेमाधवश्चतदाश्रयः ६३ तत्रतीर्थानिसर्वाणिनात्रकार्याविचारणा विधिर्विष्णुकथा-
लापोनिषेधस्तस्यविस्मृतिः ६४ विधयश्चनिषेधाश्चतयोरेवहिकिंकराः ब्रह्महत्यासहस्रस्यपापंशाम्येत्क
थंचन ६५ निंदनाद्विष्णुभक्तानांजनानांपापकारिणाम् पापंननश्यतेतच्चकुलकोटिशतैरपि ६६ अपिपा
पसहस्रस्यनिष्कृतिस्तुभविष्यति विष्णोर्विष्णुकथायाश्चतद्भक्तानांचनिंदया ६७ यत्पापंतच्चकेनापिक्षी
यतेनैवसर्वशः यस्तुविष्णुकथालापपरोनित्यंमहामतिः ६८ किंवानानुष्ठितंतेनतेनसर्वमनुष्ठितम् अप
राधसहस्रंवास्वस्यागच्छेदमेववा ६९ क्षमतेभगवान्विष्णुर्येनकेनापिकर्मणा भक्तावमानंक्षमतेनैव-
क्वापिकथंचन ७० कथंचिद्रमणींत्यक्तुंविष्णुरुत्सहतेक्वचित् त्यक्तुमुत्सहतेक्वापिनभक्तान्भक्तवत्सलः
७१ तस्मात्प्रसाद्यतंविप्रंपुण्यधामानमादरात् तावन्नाहंप्रसन्नास्मिविष्णोराज्ञांकरिष्यती ७२ प्रतीपकारि-
णोविष्णोस्तद्भक्तानांविशेषतः नगोपनसमर्थास्तुदेवाब्रह्मपुरःसराः पश्चादागच्छतंशीघ्रंददामीष्टान्मनोरथान् ७३
तौहिसंप्रेषितौदेव्यासाध्वसान्मुनिपुंगवौ ग्रामंसत्यव्रतंप्राप्तौप्रार्थयामासतुर्द्विजम् ७४

ष्कृतिः प्रायश्चित्तं ६७ ६८ ६९ येनकेनापि क्षमापनादिरूपेणकर्मणा ७० ७१ तंविप्रं प्रसाद्य संतोष्य यावन्नागमिष्यथ इतिशेषः तावदाज्ञां करिष्यती कुर्वतीत्यर्थः ७२ प्रतीपकारिणो विरुद्धाचारशीलस्य पुंसः पश्चात्पुण्यधाम्नः प्रसादानंतरम् ७३ ७४ ध ध ध

७५ क्षमस्वास्मत्कृतनिंदामित्यर्थः गंगायाहेतुभूतयात्वदवज्ञातः त्वदवमाननिमित्तेन प्राप्तोदंडः गंगाप्रवाहादर्शनरूपं शासनंयाभ्यांतौ-
तथाभूतौ आवांकृपालयो कृपायाः आलयौपात्रभूतौस्वः इतिशेषः ७६ ७७ ७८ गंगांआगच्छाम इतिपूर्वेणसंबंधः ७९ ८० ८१ ८२

इत्थंकथायामाहात्म्यंदृष्टंभागवतस्यच वृथापंडितमानिभ्यांनिंदितस्त्वंमहामते ७५ क्षमस्वकृपयाब्रह्म
न्कृपांकुरुकृपानिधे त्वदवज्ञाप्राप्तदंडौगंगयाचकृपालयौ ७६ पुण्यधामानतस्ताभ्यांश्रुतस्वगुरवेब्रवीत्
बृहत्तपास्तुतच्छ्रुत्वाज्ञानसिंधुधृतव्रतौ ७७ उवाचपरयाप्रीत्यावयवर्षद्वयोत्तरे समाप्यसकलांविद्यामाग
च्छामस्ततःपरम् ७८ गंगांविष्णुपदोद्भूतांजान्हवींभुवनेश्वरीम् तावद्भवंतौवसतांगंगातीरेशुभप्रदे ७९
उत्सुकावूचतुस्तेनमुनींद्रंसंशितव्रतम् गत्वाकिंवाकरिष्यावस्तावदावांतवांतिके ८० तिष्ठावइतितंचोक्त्वा
तस्थतुस्तौमहामती ततोवर्षद्वयस्यांतेसर्वाविद्याःसमाप्यच ८१ शिष्याभ्यांचतथाताभ्यांययौसाकंबृह
त्तपाः जान्हवींतांततोज्ञात्वा प्रत्युत्थायार्हणादिभिः ८२ उपतस्थेमहागंगासंभ्रमाकुलमानसा सहागतौमु
नींद्रौतौजलपूर्णांमहानदीम् ८३ दृष्ट्वाप्रहृष्टमनसौतैरनुज्ञांसमाप्यच तैःसाकंचक्रतुःस्नानंसिद्धिमापु
श्चपंचते ८४ अतःसर्वंपरित्यज्यश्रुताविष्णुकथाशुभा ददातिसर्वानर्थांश्चनात्रकार्याविचारणा ८५ कृता
न्यपिचकर्माणिविनाविष्णुकथांशुभाम् अजागलस्तनामिवव्यर्थानिविदोविदुः ८६ इतिश्रीवायुपुराणे
माघमाहात्म्येविंशोऽध्यायः २०

मुनींद्रौ ज्ञानासिंधुधृतव्रतौ ८३ तैः बृहत्तपोदीर्घतपःपु-
ण्यधामभिः तैरितिकर्तरि तृतीया तैः कृतामित्यर्थः सिद्धिंमुक्तिं ८४ उपक्षिप्तेतिहासतात्पर्यंदर्शयन्नुपसंहरति अतःसर्वमिति
८५ ८६ इतिश्रीवायुपुराणेमाघ माहात्म्यटीकायांविंशोऽध्यायः २० ५ ५ ५

पूर्वाध्यायेज्ञानकर्मणोः कारणत्वेनश्रवणस्यावश्यकर्तव्यतांप्रतिपाद्येदानींतस्यश्रुतार्थानांमननंविनापरोक्षज्ञानजनकत्वायोगात् मननस्यच मनोजयसाध्यत्वात्तमेवप्रतिपादयत्यस्मिन्नध्यायेशांडिल्यः योगाद्विनि योगात्कथाश्रवणादियोगात् शुभान् भगवत्स्वरूपादीन् श्रुतार्थान् अशुभांस्तद्भिन्नान् तेनाशुभचिंतनेन १ शुभाशुभचिंतकस्य मनसएवमोक्षबंधहेतुत्वात् मनोजये ऽवश्यंयतितव्यमित्याश

शांडिल्यउवाच योगाद्विश्रामकालेचमनसाचिंतयेच्छुभान् नाशुभांश्चिंतयेत्क्वापितेनदुःखानिविंदते १
मनएवमनुष्याणांकारणंबंधमोक्षयोः तस्मान्मनोजयेनित्यंयत्नंकुर्याद्विचक्षणः २ जितेमनसियत्नेनसर्वा-
न्कामानवाप्नुयात् तस्मिन्नैवजितेसर्वान्कामान्नैवाप्नुयात्क्वचित् ३ अत्रैवोदाहरंतीममितिहासंपुरातनम्
शुभशीलपुत्रयोर्वृत्तंश्रवणाद्रोमहर्षणम् ४ सकर्मतनयःपुण्यःशुभशीलोवैमहाद्विजः काशिदेशेमहापुण्येश्रा
मेनंदिवरेशुभे ५ शुभवृत्तवृत्तनामानौतस्यपुत्रौवयोगतौ याजकौगुणसंपन्नौनानाविद्याविशारदौ ६ क-
दाचिदटमानौतौप्रयागंययतुर्मुनी कृष्णाष्टम्युत्सवश्चासीत्तस्याराज्ञोगुणोत्तमः ७ देवालयेमहापुण्ये-
माधवस्यमहात्मनः तौगतौचोत्सवंद्रष्टुंप्रतोल्यांपुरुषध्वजौ ८ महावृष्टिस्तदाचासीत्तथाभ्रष्टपथावुभौ
वेश्यागारमगादेकएकोदेवालयंगतः ९ वृत्तोदेवालयंगत्वाचिंतयामासदुष्टधीः शुभवृत्तोत्वगमद्वेश्यागा-
रंक्रीडापदंशुभम् १० कोमलांग्यातयासार्द्धंसूपविष्टोमहासने यथाशुखंचसरसंसहालपतिनिश्चयम् ११
तांबूलचर्वणात्कालतयासाकंगमिष्यति निर्भरंपरिरंभंचकरिष्यातिनसंशयः १२

येनाहुःमनइति २ यत्नेनप्राणायामादिना ३ ४ ५ वयोगतौप्रौढवयस्कौ ६ ७ प्रतोल्यांदेवालयमार्गे ८ वेश्यागारंदेवालयसमीपस्थं ९ चिंतयामास वक्ष्यमाणमितिशेषः चिंताप्रकारमाह शुभवृत्तइत्यादिभिस्त्रिभिः १० निश्चयंनिश्चितमित्यर्थः ११ १२

१३ पश्यन्नपिनपश्यतीत्यादिना मनोविरहितानांकेवलशारीरवाचिककर्मणांवैयर्थ्यंदर्शयतित्रिभिःस्वर्चितंसुष्ठुपूजितं १४
चंचलः मनसेतिभावः १५ १६ सन्मनाः सुवृत्तः एवंवक्ष्यमाणप्रकारेण १७ तेनवृत्तनाम्ना १८ १९ चंद्रसमंम्माननंमु·

संशेतेचतयासार्द्धंपर्यंकेचमनोहरे इत्यादिचिंतयानीतोरात्रिशेषोदुरात्मना १३ पश्यन्नपिमहाविष्णुंस्व·
र्चितंचनपश्यति शृण्वन्कथामहादिव्यानशृणोतिहिचिंतया १४ नमस्करोतिकायेनमनसानमस्कृयाम् वा·
चास्तोत्रंवदन्वापिनवदत्येवचंचलः १५ रात्रौभक्तैश्चनृत्यद्भिर्नृत्यन्नपिननृत्यति आलपंबहुधालापन्नालपत्यपि
वतिष्ठति १६ गतेमनसिचान्यत्रचित्रार्पितइवस्थितः वेश्यागारस्थितोप्येवंचिंतयामाससन्मनाः १७ किंतेन
सुकृतंपूर्वंकृतंजन्मसहस्रकैः तदद्य फलितंतस्यप्रायोद्रक्ष्यतिमाधवम् १८ कृष्णायार्घ्यंददात्यद्याधिहृद्भि
रनुमोदितः नेत्राभ्यांमाधवस्यास्यपूजांपश्यतिनिश्चयम् १९ विष्णोःसर्वाधिकंपुण्यंदिव्यंचंद्रसमाननं
येनदृष्टंनेत्रफलंसम्यगाप्तंनसंशयः २० पुष्पांजलिंमहाविष्णोर्धामेयामेकरिष्यति नमस्करोतिमूर्ध्नाचवाचास्तौ·
तिनिरंतरम् २१ कथांश्रोष्यतिवैकुंठपतेर्नारायणस्यच श्रोत्रारामांमहापुण्यांसद्भक्तमुखनिःसृतां २२ नृत्य·
द्भिरुत्सवेभक्तैःसहनृत्यतिनिश्चयम् धूपकालेहरेर्मूर्तिंधूपधूम्रांचपश्यति २३ नानेनसदृशोलोकेकृतकृत्योभ·
विष्यति पश्याद्यमममुनेर्दिवसेकृष्णवल्लभे २४ वेश्यागारेमयावासःसर्वपापालयेशुभे सकालोद्य वृथा·
यातःश्रोत्ररंध्रेचमेवृथा २५ वर्हायितेमेनयनेमहोत्सवमपश्यतः भस्त्रायितोममोच्छ्वासस्तन्निर्माल्यमजिघ्रतः
२६ दर्वीभूतौतुमेहस्तौवृथाजातौदुरात्मनः नांजलिःशिरसाबद्धोविष्णवेपरमात्मने २७

एवं तेनम्प्राप्तमितियोज्यम् २० २१ २२ २३ २४ वृथा भगवत्कथाश्रवणविरहान्निष्फलावित्यर्थः २५ २६ २७

२८ २९ ३० दुरदृष्टंदुर्दैवं ३१ ३२ ३३ ३४ द्वंद्वदुःखंशीतोष्णादिद्वंद्वाज्जनितंदुःखं ३५ भिन्नपथेनागतोस्मि चे-

न्नाहिन्नाहीतिनोजातुप्रार्थितोहरिरीश्वरः प्रदक्षिणानमस्कारैस्तोत्रैर्नानाविधैरपि २८ मयानतुष्टोभगवा
न्संसारार्णवतारकः विनासमागमसद्भिस्त्रुटिर्मेद्ययुगायते २९ कालोविषायतेमेद्यकंसशत्रुमसेवतः
क्रियतांजन्मनापापंफलितंमेदुरात्मनः ३० दुरदृष्टंमहादृष्टिस्वरूपेणाद्यचागतम् अहोचातीवपापीयान्प्र
यागेमुक्तिदेशुभे ३१ दुःसंगोनरकावाप्तिकारणंचकुतोमम एकस्यैवकृतावावांपथाचैकेनचागतो ३२
ग्राममेकंगतोविप्रोस्थितिर्भिन्नाचयोःकथम् कृष्णाजन्मदिनेपुण्येनचार्घ्यंविष्णवेऽर्पितम् ३३ नजागरःकृ-
तोरात्रौप्रीतयेमधुहात्मनः मयाश्रुतानिशास्त्राणिवेदाश्चैवविचारिताः ३४ कथंनोत्सादयंत्येतेद्वंद्वदुःखस
हिष्णुताम् कथंपुंसोल्पभाग्यस्यभविष्यंतिसमृद्धयः ३५ कथंतेनसहायातःकथंभिन्नपथागतः मतिदा-
र्ढ्यविहीनानांमायाविष्णोर्दुरत्यया ३६ कृपुष्टंबहुधापापैःकायमेतत्पतिष्यति अनेकदोषदुष्टेऽस्मिन्कु-
थंलोभोमयार्जितः ३७ तेधन्याप्राणिनोलोकेक्षरवदुःखसहिष्णवः येषांगतिर्महाविष्णुर्योगिध्येयांघ्रि
पंकजः ३८ शरीरपोषणेसक्तादुरात्मानश्चमादृशाः पुष्टंदेहंविनश्यंतंतंविहायपतंत्यधः ३९ इतिसंचिंत-
यानस्यरात्रिशेषोगतोभवत् पुनःप्रातर्मिलितयोर्भ्रात्रोर्दैवानुकूलतः ४० अभूदशनिपातेनयुगपन्मर-
णंतयोः आजग्मतुस्तुतौनेतुंद्वौविष्णोःकिंकरौशुभौ ४१ यमदूतास्त्रयश्चापिसहसालोकशिक्षकाः कृ
त्तंविष्णुदूतौद्वौविमानेस्थाप्यतस्थतुः ४२

श्यागारमितिशेषः ३६ अस्मिन्काये ३७ ३८ ३९ दैवानुकूल-
तः दैवस्यानुकूल्यादित्यर्थः ४० अशनिपातेन विद्युत्पातेन ४१ ४२ ७ ७ ७ ७

४३ ४४ नश्रुतंकर्मणोर्वैषम्यं इतिपूर्वेणसंबंधः ४५ ४६ ४७ ४८ ४९ सहैवआसर्वतः श्रुतंशास्त्राध्ययनंययो

स्थितंदेवालयेवृत्तंबबंधुस्तेयमानुगाः दूतास्तेविष्णुयमयोःक्रमाद्धंतुंसमुद्यताः ४३ स्कन्दोविस्मितोभूत्वाविष्णुदूतावथाब्रवीत् वैषम्यंक्रियतेकस्मात्कर्मणोःपापपुण्ययोः ४४ नश्रुतंनचदृष्टंचवैदिकेलौकिकेपिवा व्रतेनपुण्यदिवसेजयंत्याकृष्णावल्लभे ४५ प्रयागेचास्थितंतेनतथामाधवमंदिरे जागरस्त्वकृतस्तेनकृष्णायार्घ्यंनिवेदितम् ४६ पुष्पांजलिःकृतःतेनश्रुताविष्णुकथाशुभा तथैवमहतांसंगोजातोदैवान्महात्मनः ४७ वेश्यागारेप्रयागेतुस्थितंदुष्टात्मनामया नकृतःपुण्यदिवसेजागरोविष्णुवल्लभः ४८ तथाकृष्णजयंत्यांनोकृष्णायार्घ्यंनिवेदितम् सर्वपुण्याधिकःकालोवृथानीतोमयात्रवै ४९ पूर्वंचसमकर्माणौ सहाधीतौसहाश्रुतौ तथापिगतिवैषम्यमावयोर्विष्णुकिंकरौ ५० कस्माज्जातंचवदतंविस्तरान्मेमहामती इतितद्वचनंश्रुत्वास्कंदवृत्तस्यमहात्मनः ५१ प्रत्यूचतुर्विष्णुदूतौस्कंदवृत्तंविस्मयाकुलम् शृणुधर्मरहस्यंत्वंविचित्ररोमहर्षणम् ५२ कर्मणाकृतिमात्रंतुनददातिफलंमहत् सर्वेषामपिधर्माणांमनःशुद्धिहिकारणम् ५३ मनसाचंचलेनैवकृतंकर्मचदुःखदम् शुद्धेनचेतसाकर्मकृतंभूरिफलप्रदम् ५४ मनसाचिंतितोवापिधर्मःफलविवर्द्धनः कृतंभूयसकृत्कर्मचित्तेनाशुभचिंतया ५५ तस्मात्तुनरकंयाति घोरेणचतथाह्यसौ त्वयानुगम्यतेलोकोह्यप्राप्योवैदुरात्मनाम् ५६

स्तौसहाश्रुतौ ५० ५१ ५२ ५३ ५४ चिंतितएवफलप्रदः किमुततदानुकूल्येनानुष्ठितइत्यर्थः चित्तेस्थितयाऽशुभचिंतया भूर्यपिकृतंवाक्शरीराभ्यामित्यर्थः कर्मफलविवर्द्धनंनेतिपूर्वेणसंबंधः ५५ असौवृत्तः घोरेणवेश्याचिंतनरूपेणदुष्कर्मणा ५६

दातुर्मोक्षादिदानशीलस्यविष्णोश्चिंतयेति पूर्वान्वयीदं ५७ ५८ मांअनुस्मरंयथातथेतिक्रियाविशेषणं ५९ ६० ६१ ६२ पतगद्यु-
तिसूर्यसदृशप्रभं ६३ ६४ ६५ ६६ गुरुणेतितृतीयापंचम्यर्थे गुरोःसकाशादित्यर्थः सत्कर्मश्रुतिः सत्कर्मणांश्रवणंतत्पूर्वकम्

चिंतयाशुभयादातुर्विष्णोर्देवस्यचक्रिणः इत्युक्तोविष्णुदूताभ्यांसकृत्तोवाक्यमब्रवीत् ५७ नैनंविहायगंतुंमे
मनउत्सहतेप्रभुः कथंचायमपाशाभ्यांमुक्तिस्यादातुरस्यमे ५८ वदतांकरुणार्द्रेणचित्तेनानुस्मरंचमाम् श्रा-
श्रुत्यैवंसकृत्तोक्तंप्रूचतुर्विष्णुकिंकरौ ५९ यद्यस्तितेदयातस्मिन्माघस्नानफलंशुभम् पूर्वजन्मकृतंतस्मिन्म
नःपूर्वंस्त्वनुष्ठितम् ६० देहितत्पुण्यमतुलंमुक्तिरस्यभविष्यति विष्णुदूतवचःश्रुत्वासकृत्तःसुमनाद्विजः ६१
ददौतेनोक्तमार्गेणपुण्यंतस्मैसमाहितः तेनपुण्यप्रभावेनमुक्तोभूद्यमपाशतः ६२ ततोभ्रात्रासहास्थायविमा
नंपतगद्युति विष्णुलोकंगतोधीमान्विष्णुपार्षदचोदितः ६३ तस्माद्दानंतपोहोमःस्वाध्यायःपितृतर्पणम्
नित्यनैमित्तिकंचापिचरेच्छुद्धेनचेतसा ६४ तेनकामानवाप्नोतिभुक्तिंमुक्तिंनसंशयः अवशीकृतचित्तस्यकु
तोयोगसमाधयः ६५ मनोनिग्रहणेतस्माद्यत्नंकुर्याद्विचक्षणः सच्छास्त्रश्रवणेनैवमनसोनिग्रहोभवेत् ६६
संप्रदायज्ञगुरुणासंशयच्छेदशक्तिना श्रोतव्यंसततंभक्त्यासत्कर्मश्रुतिपूर्वकम् ६७ तेनांतःकरणकालुष्यंप्र-
यात्येवनसंशयः गुरुशुश्रूषयाभक्त्याश्रद्धयाचदमेनच शमेननियमेनैवयोगीयोगित्वमाप्नुयात् ६८ इति-
श्रीवायुपुराणेमाघमाहात्म्येएकविंशोऽध्यायः २१

श्रोतव्यंभगवान्माहात्म्यमितिशेषः ६७ भक्त्याप्रेमलक्षणया श्रद्धयास्तिक्यबुद्ध्या· ६८ इतिश्रीवायुपुराणेमाघ-
माहात्म्यटीकायांएकविंशोऽध्यायः २१ श्रीद्वारकावासीयदुकुलोत्पन्नायनमः ५ ६५

एवंवृत्तस्कवृत्तेतिहासकथनद्वारामनःपूर्वकस्यैवकर्मणोमोक्षादिफलकत्वंप्रतिपाद्यतज्जयेश्रवणशमदमादीनुपायांश्चप्रदर्श्यतत्राप्यशक्त
तयाखिद्यतांमुमुक्षूणांमनोनिग्रहसाधनत्वेन भगवतःस्थूलरूपधारणांप्रतिपादयति चित्तेति १ कथंसंधारयेदित्याकांक्षायांतत्प्रकारमा
ह विशेषइति नियतात्मनःनित्यस्वरूपस्यतस्यभगवतः जितेंद्रियादिधर्मविशिष्टोध्याता २ ३ धारयेदिति प्रोक्तायाधारणायाः फलमाह

शांडिल्यउवाच चित्तस्वास्थ्यंयदानास्तितदाविष्णोर्महात्मनः स्थूलरूपेमनस्तत्रधियासंधारयेद्बुधः १ वि
शेषस्तस्यदेहोयंमहानपिमहीयसाम् जितेंद्रियोजितश्वासोनिःसंगोनियतात्मनः २ भूतंभाविभवच्चापि
दृश्यतेयत्रचाखिलम् विराड्रूपेमनस्तस्मिन्धारयेदव्ययात्मनि ३ याधारणात्वस्यपुंसोदहत्याशुमनोमलं
पातालपादमूलेवचिंतयेच्चरसातलम् ४ साक्षात्तुविष्णोःप्रपदेगुल्फयोस्तुमहातलम् तलातलंजंघयोश्च
जान्वोश्चसुतलंतथा ५ वितलंचातलंचोर्वोर्जघनेचमहीतलं नाभौनभस्तलंविष्णोर्हृदिज्योतिर्गणंविदुः
६ ग्रीवायांतुमहर्लोकोवदनेतुजनस्तथा ललाटेतुतपोलोकंसत्यंशीर्ष्णिमहात्मनः ७ इंद्राद्यावाहवस्त
स्यादिग्देवाःश्रोत्रयोर्विदुः आहुस्तादिंद्रियेशब्दंनासायामश्विनौविदुः ८ घ्राणेंद्रियेतथागंधंमुखेचाग्निसमु-
द्भवः तस्यद्यौरक्षिणीप्रोक्तेचक्षुःशशिदिवाकरौ ९ पक्ष्मणीचाहनीतस्यसंध्येचास्यचवाससी मूर्धजेष्वंबु
वाहाश्चहृदयेव्यक्तमेवच १० विकारकोशश्चंद्रश्चमनस्तस्यमहात्मनः मनोविज्ञानशक्तिंचगिरित्रंचांतरादयः ११

याधारणेति विष्णोःपादमूलेपातालंचिंतयेत् अत्र प्रपदादिषुभगवदंगेषुनिर्दिष्टान्रसातलादीन् चिंतयेदितिज्ञेयमग्रेपि ४
५ ६ ७ ८ अग्नेःसमुद्भवःस्थितिः अक्षिणीनेत्रगोलके चक्षुरिंद्रियं ९ अहनीरात्रिदिवसौ मूर्धजेषुकेशेषु अंबु
वाहामेघाः १० विकारकोशःमनोभिमानित्वाच्चंद्रस्यनानाविकारग्रहत्वमुपचारः ११ ६२ ६२

मनीषायांब्रह्मा मनुंस्वायंभुवं १२ १३ १४ १५ प्रजापतिंदक्षं १६ सदागतिर्वायुः भ्रूविजृंभणं भ्रूविलासः १७ १८ १९ अधर्मपद्धतिः अधर्ममार्गः २० एतावता हरेः स्थूलस्वरूपधारणामात्रेण २१ गदाभृतोविष्णोः गुणकर्मणांयत्कीर्तनं तत्कलुषचित्तानां मंदा·

अश्वाश्वतर्युष्ट्रगजानखेष्वस्य महात्मनः मनीषायांमनुंचाहुर्निवासेमनुजंविदुः १२ गंधर्वचारणाद्याश्चस्वरेवि
ष्णोर्महात्मनः वचांसितद्व्याहरणस्मृतावक्षरसंततिः १३ मृगाश्चपशवश्चैवश्रोणिदेशेमहात्मनः कुक्षौसमु·
द्राःसर्वेपिनद्योनाडीषुसंस्थिताः १४ गिरयश्चास्थिसंघेषुतरवश्चतनूरुहाः ब्राह्मणाश्चमुखेतस्यबाह्वोःक्षत्र·
विदोविदुः १५ ऊरौवैश्यःपदेशूद्रस्तलेसंकरजातयः गुह्यंप्रजापतिंचाहुर्वृषणौमित्रमेवच १६ वीर्यंचान्नंस्थि
तंचाहुःश्वसितेचसदागतिः गतिर्वयश्चजंतूनांब्रह्मायुर्भ्रूविजृंभणम् १७ तालुरापोरसोजिह्वागिरश्छंदांसि
वैहरेः दंष्ट्रयोर्यमंमृत्युंचदंतानुडुगणान्विदुः १८ जनोन्मादकरीमायाहासस्तस्यमहात्मनः जगत्सृष्टिश्चमह
तीयस्यापांगविमोक्षणम् १९ लज्जोर्ध्वोष्ठेमहाविष्णोर्लोभस्तस्याधरोष्टके धर्मश्चस्तनयोराहुःपृष्ठेचाधर्मपद्ध·
तिः २० यदेतत्सकलंलोकेविष्णोरंगेषुचिंतयेत् अलमेतावतापुंसःपापनिर्हरणायवै २१ गुणानांकर्मणांचै
वकीर्तनंचागदाभृतः कलौकलुषचित्तानांनराणामल्पमेधसाम् २२ गुणसंकीर्तनंविष्णोःसकलाध्यानसंततिः
विष्णोरेकैकनामापिसर्ववेदाधिकंमतम् २३ नाम्निसंकीर्तितेनित्यंकिंतस्यसुकृतैःपरैः मृतपत्यायथानार्याः
सर्वलक्षणसंपदः २४ शरीराणागतासूनांयथालंकरणक्रिया विद्योनपुरुषस्येवसर्वेंद्रियपरिष्क्रिया २५

धिकारिणांपापनिर्हरणायालमितिपूर्वेणान्वयः २२ २३ मृतपत्यायथानार्याइत्यादीनांत्रयाणामन्वयः सर्वलक्षणानिसंपच्चयथानिरर्थकाः तथाविष्णुभक्तिविहीनस्यजन्मनिरर्थकमित्यादियोजनीयं २४ विद्योनःमूर्खः तस्यसर्वेंद्रियपरिष्क्रिया सर्वेषुइंद्रियेषुपरि ५१ ।।

धारणं· २५

वंध्यायाःपरिग्रहः परिणयः २६ निर्हारेनाशे २७ स्वयंनामसंकीर्तनाशक्तस्य पक्षांतरमाह परेणेति २८ नारदस्येतिकर्तरिषष्ठी नारद
कर्तृकामित्यर्थः २९ किंसाधनंव्यधादकरोत् ३० ३१ विशेषान्चमत्कारान् ३२ ३३ ३४ ३५ ३६ क्वाथ्यमानान्-

नपुंसकस्यभार्येवपुंसोवंध्यापरिग्रहः यथैवापयशाःपुत्रःकुलस्येवदुरात्मवान् २६ विष्णुभक्तिविहीनस्य
तथाजन्मनिरर्थकम् याशक्तिःपापनिर्हारेनाम्नोस्तिमहतीविभोः तावत्कर्तुंनशक्नोतिपातकंपातकीजनः २७
परेणोच्चारितंवापिश्रुतंनामाघपावकम् नयत्यूर्ध्वंनसंदेहोनरकस्थानपिध्रुवम् २८ नजानंतिनराःकिंवाना
रदस्यमहात्मनः वसतांयमलोकेतुनारकाणांसमुद्धृतिम् २९ अष्टाविंशानिदिव्यपुरुषाञ्चतुः किंव्य
धाद्यमलोकेतुनारदोभगवान्मुनिः कथंवाभून्नारकाणांमुद्धारःपापकर्मणाम् एतद्ब्रह्मन्वदाश्चर्यंश्रो
तुंकौतूहलंहिनः ३० शांडिल्यउवाच पुरातुनारदोगत्वावैकुंठंविष्णुमंदिरं स्तुत्वातुविविधैस्तोत्रैर्नारा
यणमनामयम् ३१ अनुज्ञातस्ततस्तेनदेवेंद्रभवनंययौ दृष्ट्वातुविष्णुंतत्रस्थान्विशेषानप्यचिंतयत् ३२ इतःप
रंतुगंतव्यंमयाकुत्रेतिनारदः सर्वेदृष्टामयालोकाविशेषाश्चापितत्रगाः ३३ कदाप्यदृष्टोलोकोयंयमस्यचमहा
त्मनः सद्रष्टव्योमयेदानींनरकाश्चापिदारुणाः ३४ विचार्यैवंययौधीमान्यमलोकंदुरासदम् तत्रापश्यन्मु-
नींद्रोसौपुरींसंयमिनींमहान् ३५ नरकान्दारुणांश्चैवभृशमाक्रंदितान्जनान् तप्तताम्रकटाहस्थान्धावत-
श्चनतस्ततः ३६ तैलकुंभेनिरुद्धांसेक्वाथ्यमानान्क्वचित्क्वचित् तैलयंत्रेपीडमानानिक्षुयंत्रेतथापरान् ३७
क्रकचैर्भिद्यमानांश्चछिन्नांगानसिपत्रकैः वज्रकल्पजलूकाभिर्गृध्रैःकंकैर्मदोत्कटैः ३८

पच्यमानान्यमदूतैरितिशेषः ३७ वज्रकल्पाभिर्वज्रतुल्याभिर्जलूकाभिः ३८

शिंशमारैः कसरइति प्रसिद्धजलचरैः ३९ व्रणसंचितान्क्षतयुक्तान् ४० ४१ तप्तेनसीससरसेन प्रोतानिपूर्णानिकर्णयुग्मानियेषांतैः
४२ मांसानिनितिपुंस्त्वमार्षं अकल्पकान् अशक्तान् ४३ ४४ शस्त्रैश्छिन्नेषु अंगेषुसंलिप्तानि क्षारद्रव्याणियेषांतान् ४५

शिंशमारैस्तथामत्स्यैः कृमिभिश्चसुदारुणैः बकैश्चपक्षिभिर्घोरैर्मांसादैर्जलवासिभिः ३९ विष्ठाकूपेमहाघोरे
छिन्नांगान्व्रणसंचितान् यमदूतैर्महाघोरैःपादग्राहिभिरंजसा ४० शिलातलेपोथ्यमानांश्चूर्णितांगान्
जनानपि याचितान्क्वथितान्क्वापितप्तायःपिंडभोजिनः ४१ तप्तसीसरसप्रोतकर्णयुग्मानपिक्वचित्
सूचीपूरितजिह्वांश्चजिह्वोत्पाटनदुःखितान् ४२ वन्हिवर्षैःशिलावर्षैःशस्त्रवर्षैश्चपीडितान् क्षुधयाचात्म
तोमांसान्स्वकायस्थाननल्पकान् ४३ व्याधिभिःपीड्यमानांश्चभक्ष्यमाणान्वृकादिभिः क्वचित्ताडनतस्त्र
स्तांस्तर्जनैर्भर्जनैरपि ४४ बद्धपादभुजादंडान्पृष्ठेजानुहतान्जनान् शस्त्रछिन्नांगसंलिप्तक्षारद्रव्याननेकशः
४५ अंगारराशिमध्येतुपातितान्दग्धधातुकान् भूतरक्षःपिशाचाद्यैर्व्याघ्रसिंहैःश्वभिस्तथा ४६ भक्ष्यमाणान्
विशीर्णांगांश्शिलापाताद्विचूर्णितान् क्वचिद्विषमगर्तेचतप्तपंकेसुदारुणे ४७ आकंठमग्नान्दुःखार्तान्
दुरुच्चारान्भयाकुलान् शोचतःस्वानिकर्माणिस्मृत्वास्मृत्वापुनःपुनः ४८ तान्दृष्ट्वाकृपयाविष्टोभगवान्
नारदोमुनिः अतिविस्मयमापन्नोवाक्यमेतदुवाचह ४९ नारदउवाच नारायणेतिमंत्रोस्तिवागस्तिवशवर्तिनी
तथापिनरकेघोरेपतंतीत्येतदद्भुतं ५० पापिनांकर्महीनानामलसानांदुरात्मनाम् जीवनहारिनामैव
गतिर्नान्याह्निविद्यते ५१ विचार्यैवंसदुःखेनकृपयाकुलचेतनः शिलामारुह्यमहतींवीणामादायसुस्वरं
सजगौहरिनामानिभृशमुच्चैर्मुदान्वितः ५२

४६ ४७ दुरुच्चारान्दुःखेनाप्युच्चारयितुमशक्यान् ४८ ४९ ५० ५१
महतीतन्नाम्नीं ५२

५३ दुरंतशक्तेअनंतप्रभाव निदानमूर्ते आदिकारणस्वरूप ५४ निरूप आप्राकृतरूप निराश्रय स्वाश्रय ५५ उन्नियातिः स्वातंत्र्येण॰

गोविंदनारायणवासुदेव मुकुंदकृष्णाच्युतमाधवेति नृसिंहदेवेशहरेमुरारेरमेशलोकेशजगन्निवास ५३ अनं
तवैकुंठदुरंतशक्तेसमस्तलोकस्यनिदानमूर्ते निरंजनानंतगुणाकरेशाचिद्रूपनिर्दोषजगद्विहार ५४ निरूपनित्या
व्ययनिर्विकारनिराश्रयानंतविचित्रकर्मन् दाशार्हकृष्णखगवाहनवारिजाक्षनारायणाखिलगुरोजगतामधी
श ५५ दामोदरादिपुरुषोत्तमवासुदेवजनार्दनेशमधुसूदनरामविष्णो विश्वोदयस्थितिलयोन्नियतिप्रदेतिग
यन्मुमोदमुदमापितवान्जनानाम् ५६ तच्छ्रुत्वानारकस्यास्तेहरेर्नामामृतशुभम् उत्तस्थुर्यातनास्थानान्मुक्त
पाशाश्वसर्वतः ५७ तत्क्षणात्पुष्पकारूढादिव्यरूपामनोरमाः दिवंजग्मुःप्रांजलयःस्तुवंतोनारदमुनिम् ५८
तदायमपुरीशून्याजनार्तस्वरवर्जिता अभवत्तत्क्षणादेवयमदूताःसुविस्मिताः ५९ तूष्णींभूताःकृत्यहीं
नायमायैतन्न्यवेदयन् धर्मराजोपितच्छ्रुत्वानारदस्यविचेष्टितम् ६० आगत्यनारदाभ्याशंजगादातीववि
ह्वलः नमस्तेनारदमुनेलोकानुग्रहकारक ६१ स्वस्तितेस्तुपुरींपाहित्वमेचेतःपरमुने लोकनाथाज्ञयाविप्र
पालितैषापुरीमया ६२ शून्याजातात्वयैवैषाशून्यागारेतुकिंफलं आगताःसपदालोकेनाशयातिबलीयसा
६३ अथवातेनभुज्यंतेतस्मात्त्वंशाधिमेपुरीम् इतिकीनाशवचनंश्रुत्वासौनारदोब्रवीत् ६४ मावादीर्धर्म-
राजैवंमयाकिमपिनोकृतं कस्माज्जातापुरीशून्यानजानेऽहंसुरोत्तम ६५ स्वर्लोकंद्रष्टुकामोहंदेवादिहसमागतः
आर्तानांदर्शनेलोकेकृपासंजायतेध्रुवं ६६

नियमनंजनानामितिकर्मणिषष्ठी नारकजनानित्यर्थःमुदंआपीतवान् प्रापया
मास ५६ ५७ ५८ ५९ ६० ६१ लोकनाथोविष्णुः ६२ त्वयाहेतुभूतेन ६३ शाधिपालयकीनाशोयमः ६४ ६५ ६६

क्लिन्नमनाआर्द्रचित्तः सन्नवोचंभगवान्नामावलिमितिशेषः ६७ तस्यहरिनामसंकीर्तनस्ययानसंस्थिताः विमानस्थिताः ६८ सः यमइत्युत्तरे
पासंबंधः ६९ ७० उक्तः नारदइतिशेषः ७१ ७२ ७३ शौचेत्यादिद्वयोरन्वयः अन्येधार्मिकाः नामस्मरणंविहाय अन्यधर्मकर्तारः ७४ ७५

ममापिकरुणाजाताभृशार्तानांचदर्शने कृपयातिक्लिन्नमनाअवोचंवैस्वभावतः ६७ महिम्नातस्यनिर्गत्य
तेगतायानसंस्थिताः ययुःस्वर्गंदिव्यरूपाःकिंमयात्रकृतंवद ६८ दुःखंकस्माद्भवेन्नूनंवृथामाशप्तुमर्हसि तेपुरीं·
नागमिष्यामिकदाद्यप्रभृतीतिसः ६९ आश्वस्तोपियमस्तस्मैददौशापस्कृदुःखितः एतद्दिवसपर्यंतस्करवदो·
सितन्नूभृताम् ७० अद्यप्रभृतिविप्रत्वंभवाशुकलहप्रियः यमेनोक्तस्सकैलासंयमस्तस्यपुरींययौ ७१ तस्मा
न्नामामृतंनित्यंसेव्यंनिर्वृतिमिच्छता अनेनसदृशोमंत्रोलोकेनास्तियतोमहान् ७२ स्मरतःस्मारयतश्चवि·
ष्णोर्नामानिनित्यशः येपठंतिहरेर्वार्तांतेगच्छंतिहरेःपदम् ७३ शौचाचारविहीनाश्चब्रह्मचर्यविवर्जिताः
तपोहीनाज्ञानहीनानाममात्रैकजल्पकाः भक्तानांगतिमायांतिनान्येसर्वेपिधार्मिकाः ७४ जिह्वाग्रेवर्ततेय
स्यविष्णोर्नामामृतशुभम् श्वपचोपिगरीयान्स्यान्नात्रकार्याविचारणा ७५ इतिश्रीवायुपुराणेमाघमाहा
त्म्येद्वाविंशोऽध्यायः २२ छ अष्टविंशतिपुरुषाऊचुः अतिभूरीणिकर्माणिकृतान्यस्माभिरंजसा
अनायासकृतेनास्यक्षयस्तस्यैवकर्मणा १ कथंनष्टानिब्रह्मर्षेचेतादृक्त्वायनोवद शांडिल्यउवाच अना
यासमहायासोनफलेतुप्रयोजकौ किंतुकर्मस्वरूपंहिकारणंतद्विदोविदुः २ इतिश्रीवायुपुराणीयमाघ·
माहात्म्यटीकायांद्वाविंशोऽध्यायः २२ छ अस्मिन्नध्यायेज्ञानकर्मणोःपूर्वोक्तंश्रवणैकसाधनत्वंस्फुटीकर्तुंलघुगुरुकर्मविषय·
कंप्रश्नमुद्भाव्यशांडिल्योक्त्यासमाधत्तेतत्रप्रश्नमाह अतिभूरीणीतिकर्माणिदुःष्कर्माणिकर्मणामाघस्नानरूपेण १ २ छ

३ तावतास्वल्पप्रयाससाध्यत्वमात्रेण ४ दुरापंमहायाससाध्यं ५ अणवपि अत्यल्पमपीति उत्तमविशेषणं किंचिदप्युत्तमंनेत्यर्थः ६

गुरुत्वंचलघुत्वंचनफलेतुप्रयोजके अपिचाल्पप्रयासेनगोदुग्धंसाध्यमित्यथ ३ नहीनंतावतालोकेसर्वदुःख-
निवारणम् ४ दुरापमपिशार्दूलीदुग्धंलोकेनशस्यते लघुदीपोगृहेतिष्ठतमोनाशयतिध्रुवम् ५ अतिधौतंकांस्यपा-
त्रंस्थूलमणवपिनोत्तमम् माघेमासिजलस्पर्शःस्वल्पोप्ययघविदारणः ६ प्रभातेमकरेभानौविचित्राकर्मणोगतिः
पूर्वोक्तवर्त्मनायस्तुमाघस्नानंकरोतिवै ७ तेनसर्वाणिकर्माणिकृतान्येवनसंशयः अनुतापविहीनस्यसम-
स्तानिष्फलाःक्रियाः ८ जलसेकविहीनस्यगलेतृप्तिक्रियायथा अतिगोष्पदनीरेवायःस्नानंकर्त्तुमिच्छति
९ तावन्मात्रेणमुक्तःस्यान्नात्रकार्याविचारणा पुण्यांविष्णुकथांश्रुत्वायःस्नानंकर्तुमिच्छति १० तावन्मा-
त्रेणाविप्रत्वंकोटिजन्मसुलभ्यते योमाघेमकरेभानौश्रुत्वाविष्णुकथांशुभाम् ११ प्रातःस्नात्वातथाभ्यर्च्य
माधवंपुरुषोत्तमम् दिनमेकंनयत्येवंकोटियज्ञफलंलभेत् १२ योमाघेकेतकीपुष्पैर्माधवंसकृदर्चयेत् स
भुक्त्वासकलान्भोगान्विष्णुलोकेमहीयते १३ सुवर्णतुलसीपत्रैर्माधवंयस्तुपूजयेत् पत्रेणैकेनकोट्यब्दं
पूजितस्तेनकेशवः १४ माधवप्रतिमांकृत्वामाघेमासिददातियः सर्वपापविनिर्मुक्तःसयातिपरमांगतिम्
१५ योमाघस्नानधर्माणांसाहाय्यंकुरुतेनरः सोपितत्फलमासाद्यमहत्फलमवाप्नुयात् १६ अत्रैवोदाहरं-
तीममितिहासंपुरातनम् लक्षणायाश्चसंवादंयाजकस्यमहात्मनः १७ आर्यावर्तेपुराकाचिद्वेश्याऽभूल्लक्ष-
णाह्वया तस्याभुजंगःशूद्रोभूद्दासोनामयुवाबली १८

गतिः स्वरूपं विचित्रादुर्ज्ञेयेतिभावः ७ ८ ९ १० लभ्यतेतेनेतिशे-
षः ११ १२ १३ १४ १५ १६ १७ भुजंगः जारः १८

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

१९ २० २१ २२ मृतापत्यं मृतापत्यत्वं २३ २४ इदंवैधव्यदुःखकेनोपायेननिवर्तेत इतिकोवावेत्तीतिस्वभुजंगमुवाचेतिद्वाविंशनिम श्लोकस्थेनान्वयः अथतांवेश्यांदासनामोवाचेतियोजना २५ स्रष्टा ब्रह्मणा २६ स्वभावाद्भगवद्गीतोक्तनैसर्गिकशमादि

सालक्षणाऋतुस्नातास्थितागोदावरीतटे बालवैधव्यदुःखेनरुदंतींचकुमारिकाम् १९ मृतंपतिंपुरस्थाप्य बंधुभिः परिवारितां आक्रंदंतींततोवीक्ष्यशनैस्तांप्रत्यपद्यत २० लुठंतींभुवितापेनमुहुर्घ्नंतीमुरोबहु जनानामपिकारुण्यंजायतेतांचपश्यताम् २१ तदासालक्षणावाक्यंस्वभुजंगमुवाचह कुलजानांतुनारीणांदशेयञ्चसुदारुणा २२ पारवश्यंचनारीणांदुःखमामरणांतिकम् मृतापत्यंचवैधव्यंनयैवापुत्रतास्त्रियाम् २३ असत्यमेतञ्चितयंवैधव्यंचोत्तरोत्तरम् बालेयंशोचतेऽतीवकस्येदंकर्मणःफलम् २४ निवर्ततेवाकेनेदं कोवावेत्तीतिनामथ उवाचदासनामाऽसौभुजंगःसूनृतंवचः २५ शृणुभद्रेप्रवक्ष्यामिस्रष्टास्रष्टाःपुराद्विजाः देवानांचैवलोकानांहितार्थंमंत्रकोविदाः २६ शास्त्रज्ञानात्स्वभावाच्चजीवानांचपुराकृतम् जानंतिकर्मजफलंतेप्रवृत्त्याधृतव्रताः २७ भुजंगवचनंश्रुत्वातथैवोमितिसापुनः तत्रागतंमहाराष्ट्रयाजकंनामवैद्विजम् २८ पप्रच्छतद्यादीनाप्रश्नकातरमानसा लक्ष्मणोवाच मुनेत्वहंदुराचाराकुलटालक्ष्मणाह्वया २९ तथापितेदयापात्रंपृच्छंतींमांनिबोधय साधूनांसमचित्तानांजनाःसर्वेसमाभुवि ३० दुर्गंधोवासुगंधोवायथावायोःसमोभवेत् मुनेदशेयंनारीणांतृतीयातीवदुःसहा ३१ कर्मणाजायतेयेनकेनवाथनिवर्तते एतद्विस्तार्यमेब्रह्मन्नुकृपयावदस्वप्रभो ३२ शांडिल्यउ० इतितस्यावचःश्रुत्वायाजकोवाक्यमब्रवीत् दैवेकर्मणिपित्र्येचनार्यःपाकेषुसंस्थिताः ३३

प्रभावात् २७ ओमिति अंगीकृत्येतिशेषः २८ प्रश्नेकातरंभीतंमानसंयस्याःसा २९ ३० इयंदशावैधव्यरूपा ३१ ३२ ३३

अकस्माद्रजसादुष्टाःस्पृष्टभांडाद्युपस्कराः अज्ञानाद्वाभयाद्वापिकामाल्लोभात्कचित्स्त्रियः ३४ आवेदूषितागच्छंतितेनदुष्यंतिसत्क्रियाः क्रियालोपकराद्येनाःपापादस्माद्दुरत्ययात् ३५ दशामिमांप्राप्नुवंतिसर्वाश्चपिनसंशयः बाल्येपियौवनेचापिवार्धकेवाकदाचन ३६ तत्रयातुदुराचारापरानेवाभिकांक्षति श्वश्र्वोश्चपतिबंधूनांनित्यमात्रकदुःखदा ३७ एतत्साहाय्यतोनारीयादूषयतिसत्क्रियाः बाल्येवैधव्यमाप्नोतिसानारीनात्रसंशयः ३८ ऋतुस्नातातुयानारीबालकाननवलोकयेत् लब्ध्वाभर्तृतोगर्भंबालानामुपघातिनी ३९ एतत्कर्मसहायेनरजसादूषितातुया मृतापत्यातथाभूत्वावैधव्यंयौवनेव्रजेत् ४० यानारीरजसादुष्टासर्वभांडादिसंकरम् कुरुतेयदिसानारीवैधव्यंवार्धकेव्रजेत् ४१ याचानुकूल्यरहितापतिधर्मेषुसर्वशः बाल्येवैधव्यमापन्नागतिहीनाभवत्यलम् ४२ सर्वासामपिवैधव्यनिदानंपुष्पसंभवम् शांतिंतस्यप्रवक्ष्यामिकर्मणोस्यापिलक्षणे ४३ कृतायामृषिपंचम्यांव्रतेनास्यावशेषितम् पापंगच्छतिनारीणामितिवेदविदोविदुः ४४ शूर्पस्यवायनंदत्वाकृतेलक्ष्मीव्रतादिके मूलावशेषंव्रजतिरजोदोषोनसंशयः ४५ निर्मूलंतुव्रजत्याशफलसवर्तीव्रतेकृते रजसोत्थमहापापंनारीणांनात्रसंशयः ४६

३४ गच्छंतिस्वकर्मस्वितिशेषः प्रवर्तंतइत्यर्थः ३५ इमांदशांवैधव्यं ३६ श्वश्वोः श्वश्रूश्वशुरयोः आर्षत्वात्स्त्रीशेषः ३७ एतत्साहायतः एतेषांपरपुरुषाकांक्षादिपातकानांसाहाय्येसति या सत्क्रियादूषिणी ३८ ऋतुस्नाताऽस्वला भर्त्रेतितृतीयापंचम्यर्थेभर्तुःसकाशाद्गर्भंलब्ध्वा बालानामर्थाद्गर्भगतानां शिशूनां उपघातिनीतारुण्यभंगभियाविनाशकर्त्रीत्यर्थः ४० ४१ गतिहीनादुर्गतिगामिनीत्यर्थः ४२ पुष्पसंभवंरजोदोषजन्यं ४३ अस्यरजःसंसर्गदोषस्य ४४ मूलमवशिष्यतेऽस्मिन्नितिमूलावशेषं यथातथा ४५ ४६

४७ गृहिणीव्रते मादृशगणिकानामनधिकारात् मम्मविषयेसभयं ४८ ४९ ५० ५१ अतोत्तमं कर्तृकोटिगुणं फलं दत्ते ददाति ५२
५३ ५४ घृतेन· अर्कैरार्दिकृतैः ५५ ५६ वरेत् वृणुयादित्यर्थः ५७ अग्नेनयसुपथेति ऋचावर्त्याः जात्येकवचनं·

इतितद्वचनंश्रुत्वापुनःपप्रच्छलक्ष्मणा मनसाशंकिताभूत्वासादरंमुनिपुंगवम् ४७ साधुसाधुमहाभागवि
त्तंमेभयविह्वलम् लक्षवर्तीव्रतस्यास्यविधानंकीदृशंवद ४८ कस्मिन्मासेतुकर्तव्यंकस्यवातुसमर्पणम्
उद्यापनंकथंकार्यंकिंफलंतस्यवामुने ४९ तयापृष्टोयाजकोपिलोकानांहितकाम्यया फलंविधानंयत्सर्वंत
द्वोचत्महामुनिः ५० कालोहिकार्तिकोमासोमाघोवैशाखएववा सहस्रगुणितंतच्चुव्रतमेतद्धिकार्तिके ५१ त
स्मात्कोटिगुणंदत्तेमाघेमासिघृतोत्तमं तस्मादनंतगुणितंफलंवैशाखमासिवै ५२ एतस्मिन्मासत्रितयेयस्मि
न्मासिसमाप्यते तस्मान्मासद्वयात्पूर्वंप्रारंभेत्तुव्रतंत्विदम् ५३ अंतेमासिप्रकुर्वीतसमाप्तिंचविचक्षणः सह-
स्रवर्तिभिःकुर्यादार्तिक्यंविष्णवेऽन्वहम् ५४ घृतेनाप्यथतैलेनसम्यगर्कैर्मनोरमैः यस्मिन्मासेसमाप्तिःस्यात्
पौर्णम्यांतत्रकारयेत् ५५ उद्यापनंविधानेनव्रतसंपूर्तिकारणम् प्रातःस्नात्वाशुचिर्भूत्वापंचगव्यंतुप्राशयेत्
५६ पुण्याहवाचनंकृत्वावरेदाचार्यमुत्तमम् ब्राह्मणमृत्विजश्चैवकुर्यात्तर्पणमंजसा ५७ सतिलैश्चयवैःकु
र्यादग्नेनयऋचाद्विजः चर्त्यादशांशतःकुर्यात्तर्पणंतुविचक्षणः ५८ तर्पणस्यदशांशेनहोमंकुर्याद्विधानतः
तर्पणोक्तेनमंत्रेणपायसंचघृतान्वितम् ५९ पालाशसमिधश्चैवमंत्ररत्नैश्चवैष्णवैः घृतंतुविष्णुगायत्र्याहोमस्या
यंविधिःस्मृतः ६० कलशंतुतथास्थाप्यसापिधानंसवस्त्रकम् तत्तन्मासाधिदेवस्यप्रतिमांकारयेत्ततः ६१

वर्तीनां ५८ ५९ वैष्णवैः विष्णुदेवताकैः मंत्ररत्नैः श्रेष्ठमंत्रैः ६० ६१ ६२ ६२ ६२

कालोविष्णुरित्यादिविंशतिनामभिः हरिंपूजयेदितितृतीयेनान्वयः ६२ ६३ शिरःप्रभृतीन्यंगानि कथंकेषुस्थानेषुपूजयेदित्याकांक्षायाह शिरइति एतैरेवपूर्वोक्तैर्नामभिःपूजयेदितितृतीयेनसंबंधः ६४ ६५ ६६ ६७ ६८ ६९ ७० जीवतीतिजीवःपतिर्यस्याःसाजीवप-

कालोविष्णुस्तथावन्हिरविरापोनिशाकरः रुद्रःशेषोजगद्व्यापीतेजोरूपीमहेश्वरः ६२ निरंजनःफलाध्यक्षोविश्वरूपीजगत्प्रभुः स्वप्रकाशःस्वयंज्योतिश्चतुर्व्यूहोजनाश्रयः ६३ परब्रह्मेतिद्विदशनामभिःपूजयेद्धरिम् शिरोललाटंनेत्रेचकर्णौनासामुखंतथा ६४ कंठस्कंधौतथाबाहूस्तनौवक्षस्तथोदरम् नाभिंकटिंचजघनेऊरूजानूचगुल्फके ६५ पादौतदग्रंक्रमशोह्यंगान्येतैश्चपूजयेत् धूपदीपौततोदत्वानैवेद्यंतुनिवेदयेत् ६६ आचार्यंपूजयेत्सम्यग्ब्राह्मणांश्चत्विजतथा गौर्दातव्यासवत्साचसालंकारागुणान्विता ६७ त्रिंशत्पलंकांस्यपात्रंघृतेनपरिपूरितम् सुवर्णवर्तिसंयुक्तमाचार्यायनिवेदयेत् ६८ यद्वादशपलंकांस्यंतथाघृतसमन्वितम् सुवर्णवर्तिसंयुक्तमाचार्यायनिवेदयेत् ६९ अथवातुयथाशक्त्याद्द्यादावश्यकंत्विति व्रताभावेचयोदद्यात्कांस्यंतुघृतपूरितम् ७० यावज्जीवंजीवपत्नीभवत्येवनसंशयः रजोदोषाद्विमुक्तास्यात्पौर्णमा यांददातिया ७१ ब्राह्मणान् भोजयेत्सम्यग्वित्तशाठ्यंनकारयेत् याचैवंकुरुतेनारीतस्याःपुण्यफलंशृणु ७२ आबाल्याज्जन्मपापानिरहस्येवकृतानिच नश्यंतितानिसर्वाणिव्रतस्यास्यप्रभावतः ७३ चांडालगामिनीवापितथाशूद्राभिमर्शिनी कारूकरजकादीनांकामिनीदुष्टचारिणी ७४ ब्रह्मक्षत्रियवैश्येषुप्रातिलोम्येनगामिनी मातुलेयपितृव्याप्तभ्रातृपुत्राभिमर्शिनी ७५ बालघ्नीवापतिघ्नीवामातापित्रोर्वधेरता गोघ्नीवातस्करीवापिरजःसंकरकारिणी ७६

त्नी विभाषासपूर्वस्येतिङिप् नत्वे

७१ ७२ ७३ कारूकाः रथकारनापितादयः ७४ ब्रह्मक्षत्रियेति प्रातिलोम्येनगामिनी नीचवर्णसमागमकारिणीत्यर्थः ७५ ७६

कुटीरकनाम्नि ३० ग्राहिग्रण्हाती सिन्नाहिगलंविसृज्य ३१ ३२ काल्यंप्रातःकरणीयं ३३ मुनेःसकाशात् ३४ ३५ पुप्लुवेउड्डीयागमत् शा

कदाचिन्माघमासेतुप्रातर्मत्स्याभिकांक्षया शरयूपवनेरम्येपुण्यक्षेत्रेकुटीरके ३० उपविश्यजलेगाधेगलग्रहिविसृज्यच प्राप्तंप्राप्तंगृहीत्वातुपुनरादातुमिच्छति ३१ प्रातःस्नातुंतदाजग्मुर्ब्राह्मणाश्चब्रह्मवादिनः शरयूंतांमहापुण्यांमाघेमकरगेरवौ ३२ तस्यास्नातामहापुण्याःकाल्यंकर्मनिवर्त्यच तत्तीरेश्वत्थमूलेतुसम्यगभ्यर्च्यमाधवम् ३३ गालवाख्यमुनेस्तेपिशुश्रुवुश्चहरेःकथाम् तदाचमर्कटःकश्चित्सारसश्चाविहंगमः ३४ शाखेउभेसमाश्रित्यतदागत्यैवतिष्ठतः श्रुताताभ्यांकथादिव्याक्षणंकर्मानुरोधतः ३५ क्षणान्तान्तेतयोरासीत्तिर्यग्योनिजयोरपि पश्चात्स्वभावचांचल्यात्पुप्लुवेमर्कटस्तदा ३६ शाखांचसारसाक्रान्तांसारसग्रहणेच्छया गृहीतोमर्कटेनापिपक्षिपक्षौविधूयच ३७ साकंपपातहरिणाप्रातर्नद्याजलेतदा जलेनिमग्नौचमृतौतदासारसमर्कटौ ३८ विमानंपतगज्योतिरारूढौदिव्यरूपिणौ प्रकाशयंतौदिशःसर्वाजग्मतुर्विष्णुमंदिरं ३९ पतितौतुमृतौपश्चाद्विमानौदिव्यरूपिणौ गीयमानौचाप्सरोभिर्लुब्धदृष्टिपथंगतौ तौदृष्ट्वालुब्धकःपापीविस्मयोत्फुल्ललोचनः ४० निवृत्तोदुष्टभावेनगालवंपर्यपृच्छत मुनेदृष्टंमयाश्चर्यंमत्स्यानादातुमिच्छुना ४१ शाखामृगःखगश्चायंदैवाच्छाखेउभौगतौ क्षणंस्थितौतयोरन्योमर्कटःपप्लुवेतदा ४२ जग्राहसारसंचापितेनसार्द्धंपपातच युगपत्तौमृतौमग्नौयानारूढौदिवंगतौ ४३ तौदृष्ट्वाविस्मितोभूत्वादुष्टभावंविसृज्यच त्वांप्रष्टुकामोविप्रेन्द्रतवांतिकमुपागतः ४४ तौकौपुराखगहरीकेनवाकर्मणाभुवि तिर्यग्योनिंसमापन्नौमुक्तौकेनचकर्मणा ४५

खामिनिउत्तरैयासंबंधः ३६ ३७ हरिणामर्कटेन ३८ पतगज्योतिःसूर्यप्रकाशं ३९ ४० ४१ ४२ ४३ ४४ ४५

४६ ४७ पैठिनसिःऋषिः तत्कुलोत्पन्नः ४८ ४९ कथाकथेति आदरेवीप्सा अहरहः प्रतिदिनंकथैवश्रोतव्या सैवपठितव्येतिहेतोः
यैः पंडितमानिभिः अपराणिसंध्यावंदनादिनित्यकर्माणि परित्यक्तानि तानेतान्मूढान् ब्रह्मवादिनइतिवदंति एतन्महाश्चर्यं इतिसार्धश्लोक

तच्छुश्रूषोःश्रद्धालोःपृच्छतोवदविस्तरात् लुब्धकस्यवचःश्रुत्वागालवोमुनिसत्तमः ४६ तमुवाचमहात्मानंपश्चात्तापमुपेयुषम् पश्यतामेवसर्वेषांस्नानार्थंसमुपेयुषाम् गालवउवाच शृणुलुब्धकवक्ष्यामितयोर्वृत्तांतमंजसा ४७ स्वयंपंडितमान्यज्ञोमर्कटस्त्वपुराद्विजः पैठीनसिकुलीनोयंमर्कटःकनकाह्वयः ४८ संत्यज्यापरकर्माणिशृण्वतांचहरेःकथां निंदांचक्रेद्विजेंद्राणांहासपूर्वंदुराग्रहः ४९ परित्यक्तानिकर्माणियैर्नित्यान्यपिपापिभिः कथाकथेत्यहरहरितिपंडितमानिभिः ५० मूढानेतान्महाश्चर्यंवदंतिब्रह्मवादिनः हासकृरोत्यनुदिनंतेषांदोषमुदीरयन् ५१ उत्क्रोशन्नेवचवदतिसभामध्येदुराग्रही नतेषांसंगतिःक्वापिपापभीत्यनुकांक्षति ५२ तेनदोषेणपापीयान्ब्रह्मकल्पत्रयेपिच नारकीयातनांभुक्त्वातिर्यग्योनिशतेषुच ५३ भूत्वापुनश्चपापीयान्मार्कटींयोनिमाश्रितः माघेतुदीपदानेनतस्मिन्नेवतुजन्मनि ५४ जन्मन्यस्मिन्क्षणप्राप्तःपूर्वजन्मस्मृतिंहरेः शारदाश्रयेवसन्पापीश्रुत्वाचेमांकथांशुभाम् ५५ येकुर्वंतिकथाक्षेपंवृथापंडितमानिनः तिर्यग्योनिसहस्रेषु जायंतेतेनराभुवि ५६ प्रसंगानुप्रसंगेनप्रसंगोयंसमागतः तदिदानींहरिःश्रुत्वापश्चात्तापक्षणंययौ ५७ पुनश्चयोनिजाद्दोषाच्चापल्येनविदूषितः पुप्लुवेविहगग्राहीतेनसाकंपपातच ५८

स्यान्वयः ५० ५१ पापभीतत्संगतिरितिबुध्या·
कापिकदापितांनानुकांक्षतीनेच्छतीत्यर्थः ५२ चकारात्तशेषांयातनांभोक्तुंतिर्यग्योनिशतेषुभूत्वाइत्युत्तरेणसंबंध ५३ तस्मिन्येवाद्विजजन्मन्येव
५४ शारदाश्रयेवसन् हरेःकथांश्रुत्वाशुभामर्थान्मतिंप्राप्तइतियोजना ५५ ५६ प्रसंगेति प्रसंगेपूर्वजन्मस्मृतिरूपेयोऽनुप्रसंगःहरिकथाश्रवणप्रस-
क्तिःतेनायंमाघजलस्पर्शरूपःप्रसंगःसमागतःप्राप्तइत्यर्थः श्रुत्वाकथामितिशेषः ५७ ५८

१०९ इतिश्रीवायुपुराणेमाघमाहात्म्यटीकायांत्रयोविंशोध्यायः २३ ६२ माघमासेस्नानादिफलमाह माघइति १ २ ३
४ ५ ६ ७ ८ कांस्यपात्रपरित्यागीकांस्यपात्रेभोजनमकुर्वाणइत्यर्थः ९ १० शतंकुलंकुलानी

गायत्र्यामंत्रितंचांभः प्रोक्षयेन्मूर्ध्निचद्विजः सोपिस्नानफलंप्राप्यमोदतेविष्णुमंदिरे १०९ इतिश्रीवायुपु
राणेमाघमाहात्म्येत्रयोविंशोऽध्यायः २३ ६२ शांडिल्यउवाच माघमासेतुसंप्राप्तेमकरस्थेदिवाकरे
पूर्वोक्तविधिनास्नात्वाकोमलैस्तुलसीदलैः १ माधवंचसमभ्यर्च्यस्तुत्वातुस्तवराजतः माधवप्रतिमांदत्वा
भोजयित्वाद्विजोत्तमम् २ एवंकृत्वामासमेकंयत्नमेतत्समापयेत् कोटिजन्मार्जितंपापंनिर्धूयाखिलसंपदः ३
भुक्त्वेहसर्वान्कामांश्चपुत्रपौत्रादिभिर्वृतः सकोटिकुलमुद्धृत्यविष्णोःसायुज्यमाप्नुयात् ४ कलौकलुषचित्तानां
नराणांपापकर्मणाम् माघस्नानंगतिस्तेषांसर्वाघौघविनाशनम् ५ सर्वदुःखोपशमनंनिदानंसर्वसंपदाम्
प्रातर्माघेतुयःस्नात्वासकृन्माधवमर्चयेत् ६ तावतैवविशुद्धात्मायातिब्रह्मसनातनम् शीतार्तानांचसाधूनां
स्नातानामरुणोदये ७ योददातींधनंवन्हिंवन्हिलोकंसगच्छति माघेमकरगेभानौप्रातःस्नानपरोनरः ८ तैला
भ्यंगपरित्यागीतथावैपत्रभोजनः कांस्यपात्रपरित्यागीविष्णुलोकेमहीयते ९ योर्चयेन्माघमासेतुविष्णावेपर
मात्मने सगुडंतिलपिंडंचसोपिमृत्योर्विमुच्यते १० माघेमाधवरूपंतुसौवर्णंयोददातिच सतुभोगसमवाप्नोतिकुलं
मुद्धरतेशतम् ११ योमाघेशिशुमारस्यप्रतिमांचद्विजातये मृतापत्याख्यदोषेणमुच्यतेनात्रसंशयः १२ सुवर्ण
कोटिभारंतुयोदद्यात्कुरुजांगले तत्पुण्यंलभतेमाघेगोपीचंदनदानतः १३ योमाघेवैश्वदेवायतंडुलंतुददातिवै पू
र्णायुष्यमवाप्नोतिनरकंनैवगच्छति १४ त्यर्थः ११ प्रतिमांददातीतिपूर्वस्थेनयोज्यं १२ १३ तंडुलंजातावेकवचनंतंडुलानित्यर्थः
१४

१५ १६ १७ १८ १९ २० २१ २२ २३ २४ सलुब्धकः पक्षिमृगादीन्हत्वाजीवनमापेतितृतीयेनान्वयः २५ गोधाः घोरपडेतिख्या-

घृतप्रस्थंतुयोदद्यान्माघेमाधववल्लभे अलक्ष्मीमपमृत्युंचजयत्यत्रनसंशयः १५ तैलदीपंतुयोदद्यात्सौर्णस्थां
विष्णुमंदिरे कालमृत्युंजयत्याशुमधुशासनशासनात् १६ योदद्याद्वस्त्रदानंतुशीतार्तायद्विजातये पूर्णायुष्यम
वाप्नोतिविष्णुलोकंसगच्छति १७ तांबूलंप्रत्यहंदद्यान्माघेमासिद्विजातये पूर्णायुष्यमवाप्नोतिविष्णुलोकंचग-
च्छति १८ दारिद्र्यदोषनिर्मुक्तोमहदैश्वर्यमाप्नुयात् योदद्यात्तिलपात्रंतुमाघस्नानपरोनरः १९ निर्धूयसर्वपापानि
ग्रहपीडाव्यपोहति योमाघेतुबहिःस्नात्वामाधवस्यमहात्मनः २० रंभाफलैरिक्षुदंडैर्धूपदीपैर्मनोहरैः सश्र
द्धापूजितोविष्णुःपूजितःकोटिवत्सरम् २१ एकस्मिन्वादिनेयस्तुप्रातर्माघेजलाप्लुतः क्षणंश्रुत्वाहरेर्दिव्यां
कथांश्रोत्रमनोहराम् २२ सर्वाघौघैर्विनिर्मुक्तोविष्णुसायुज्यमाप्नुयात् अत्राप्युदाहरंतीममितिहासंपुरा
तनम् २३ श्रुत्वाविमुच्यतेपापात्पूर्वजन्मशतार्जितान् पुरातुदारुणोनामलुब्धकोलोककंटकः २४ शरयूवनवा
सीचकालमृत्युरिवापरः पक्षिणःसमृगांश्चैवमत्स्यान्कूर्मांश्चमर्कटान् २५ पतंगान्मूषकांश्चैवगोधाकर्परदेहि
नः जालैःशस्त्रैश्चशूलैश्चधनुर्मुक्तैःशिलाकणैः २६ खातैर्बंधनलेपैश्चतथाफूत्कारलोष्टकैः सारमेयैःसहचरै
र्हत्वाजीवनमापसः २७ पथिकान्बाधतेनित्यंचोरवृत्त्याधनुर्धरः ग्राम्यान्पशून्बहिर्नीत्वागवादींस्तान्महानि
शि २८ हत्वाचवृत्तिमकरोत्सापात्मालुब्धकोह्ययम् वृत्तिहीनस्तथाप्यासीन्महताकर्मणाधमः २९

ताः कर्परदेहिनः गेंडेइतिप्रसिद्धान् शिलाकणैः लघुप्रस्तरैः २६ खातैः गर्तैः बंधनार्थयेलेपा भक्षणीयपदार्थास्तैः २७ २८
महतामहाप्रयाससाध्येनापि कर्मणा मृगहननादिना २९

७७ ७८ ७९ ८० ८१ ८२ ८३ ८४ ८५ ८६ रुदतीत्यत्रइडुगुणाभावआर्षः ८७

वन्हिदागरदावापिनित्यमप्रियवादिनी पत्यौजीवतियानारीमृतेवाव्यभिचारिणी ७७ एवमादिमहापापैरावृता
पिकुलांगना कृत्वाचैतद्व्रतपुण्यंमुच्यतेनात्रसंशयः ७८ व्रतानामुत्तमंचैतन्नृस्त्रीणामावश्यकंत्विदम् एकार्तिकप्र-
दानेनविष्णोरमिततेजसः ७९ कोट्योब्रह्महत्यानामगम्यागमकोटयः तथैवात्युग्रपापानाकोटयोथसहस्रशः
८० नश्यंतिनात्रसंदेहोनारीणांवानरस्यच किंलक्षवर्तिभिर्विष्णोःकृतेचारार्तिकार्पणे ८१ किमत्रबहुनोक्तेनना
नेनसदृशंव्रतम् पुरुषोपिव्रतंकृत्वापूर्वोक्तैःपापसंचयैः ८२ मुच्यतेनात्रसंदेहोमधुसूदनशासनात् एतत्स-
र्वंमयाख्यातपृच्छत्यास्तवमानदे ८३ व्रतंकुरुस्वतन्निष्ठयथातेरोचतेमनः इतितद्वचनंश्रुत्वापुनःपप्रच्छल-
क्षणा ८४ अज्ञानाद्दुष्टभावाद्वानविश्वासोममेहच प्रत्ययार्थंततोब्रह्मन्प्रत्यक्षंकुरुमेधुना ८५ इतितद्व-
चनंश्रुत्वायाजकोवाक्यमब्रवीत् कथंतेप्रत्ययोभूयादितितांकरुणानिधिः ८६ साचोवाचपुनर्विप्रंविस्मयोत्फुल्ल
लोचना नववैधव्यमापन्नारुदत्येषाकुमारिका ८७ अस्याःपतिःकथंजीवेद्वैधव्यंचैवगच्छति तथाकुरुमु
निश्रेष्ठदयाशमवतांधनम् ८८ इतितद्वचनंश्रुत्वाविस्मितोवाक्यमब्रवीत् अद्यैवमकरंप्राप्तोभास्करोलोक-
भास्करः ८९ माघोयंचवरोमासःसर्वक्रतुफलाधिकः अत्राद्यत्वमृतुस्नातालब्धंतेनातुलंफलम् ९० स्नानंकृ
ष्णार्पणंकृत्वादेहिचास्मैमृतायच तेनजीवेदयंनूनंब्रह्मन्घोयंपुरापिच ९१ तस्मादयंराजयक्ष्मारोगेणत्वमृ-
तिंगतः तथापिमाघमासस्यपुण्यादुज्जीविताध्रुवम् ९२

८८ लोकभास्करः लोकप्रकाशकः ८९ ऋतुस्नाताऋतुकाले
स्नातारजोसिद्धिनिर्मुक्ताऽसि लब्धमितिवर्तमानसामीप्याद्भूतवन्निर्देशः ९० ९१ उज्जीविताजीविष्यतीत्यर्थः ९२

आर्ति आर्तिकम् ९३ वचनंद्विजस्येतिशेषः ९४ ९५ ९६ ९७ ९८ ९९ १०० १०१ माघमासस्यमाघसंबंधि

दापयित्वाहरेरार्तिकांस्यपात्रंतथैवच जीवपत्नीभवेदाशु यावदामरणांतिकम् ९३ लक्ष्मणावचनंश्रुत्वाजलं
स्पृष्ट्वाचवाग्यता स्नानंविष्णवर्पणंकृत्वाददौतस्मैफलमुद्रा ९४ अस्याःपुण्यप्रभावेनतत्क्षणादेवसोत्थितः
भुजगस्त्वप्रेषयित्वानीत्वाकांस्यंचपात्रकम् ९५ कुमार्योदापयामासवैधव्यस्यापनुत्तये एतत्पुण्यप्रभावेन-
कुमारीसापिशोभना ९६ यावज्जीवंजीवपत्नीबभूवबहुपुत्रिका कुमारीशोभनानामतत्पतिःकणभाजनः ९७
तद्बांधवास्तयासर्वेतुष्टुवुस्तांचलक्ष्मणाम् याजकंचैवसंप्रीत्याजग्मुस्तेचनिकेतनम् ९८ लक्ष्मणासैवतेनापि
भुजगेनचसंयुता माघस्नानंतथाकृत्वाव्रतमेतच्चकारसा ९९ ततस्तुमरणंप्राप्तोदासस्तस्याःसहायकृत् गयो
नाममहाराजश्चक्रवर्तीबभूवसः १०० सालक्ष्मणाचतत्पत्नीसर्वलक्षणसंयुता बभूवलोकविख्याताजीवपत्नी
सुपुत्रिका १ तस्माद्योमाघमासस्यसहायंकारयिष्यति धर्मस्यतत्फलंप्राप्यमुच्यतेनात्रसंशयः २ नित्यस्ना
नेत्वशक्तस्तुकुर्यात्तेनदिनत्रयम् द्वादश्यांरथसप्तम्यांपौर्णमास्यांतथैवच ३ सोपिपूर्णफलंप्राप्यविष्णुलो
केमहीयते अथवापौर्णमास्यांवामाघस्नानंचरेद्बुधः ४ तावन्मात्रेणमुक्तःस्यान्नात्रकार्याविचारणा संध्या
वन्नित्यकर्मेदंमहापातकनाशनम् ५ योनस्नायाद्दृढोमाघेमकरस्थेदिवाकरे ब्रह्महासतुविज्ञेयःसर्वकर्मसु
गर्हितः ६ नारीवापुरुषोवापिनस्नायादरुणोदये शाश्वतंनरकंप्राप्यतिष्ठत्याभूतसंप्लवं ७ रोगाद्युपहतोयस्तु
पादौप्रक्षाल्यवाग्यतः धौतवस्त्रंपरीधायत्रिराचम्यचवारिणा ८

नं: धर्मस्यसाहाय्यमितियोजना २ तेनाशक्तत्व
कारणेन दिनत्रयमित्यस्यांतसंयोगद्वितीया ३ ४ ५ ६ आभूतसंप्लवंप्रलयपर्यंतं ७ ८ ९ ९

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

५९ ६० माघीनस्नाताइत्यत्रमाघादिपूर्णिमाकृतस्नातमित्यर्थः अस्नाताः नस्नातं स्नानंकृतंयाकृताः तयानदत्तंयाकृताः अदत्ताः ६१ माधवे

प्रातर्माघेजलेदैवान्निमज्ज्यचमृतिंगतः जातिस्मृत्याक्षणंश्रुत्वावाच्यमानांहरेःकथाम् ५९ प्रातर्माघेजलस्पर्शान्मुक्तो
यंदिवमागतः क्षत्रबंधुःसारसोयंसदाभोगेषुलोलुपः ६० वैशाखीकार्त्तिकीमाघीनस्नातानेनलुब्धक अस्नाता
अप्यदत्ताश्चताएतास्तिथयोमुना ६१ किमुतान्याश्चतिथयोनीताइतिविकिंब्रुवे कदाचिदध्वनिश्रांतंमाधवेमासि
वैद्विजम् ६२ ब्राह्मिष्ठभोजयामासपुण्यस्यास्यप्रभावतः जातिस्मरत्वंदेहेस्मिंस्तस्माद्दोषात्कुयोनिता ६३ अ
यंकश्चावशास्त्वाग्रेमाघमाहात्म्यमुत्तमम् निर्वेदंक्षणमापेदेपूर्वजन्मकृतंस्मरन् ६४ विधिनामर्कटग्रस्तः प्रातर्मा
घेजलेमृतः पापान्मुक्तोविहंगोथयानारूढोदिवंययौ ६५ एतत्सर्वंसमाख्यातलुब्धगच्छयथासुखं श्रुत्वात
दीरितंव्याधःपुनर्गालवमब्रवीत् ६६ लुब्धकउवाच जन्मप्रभृतिपापीयान्सदाहिंसापरायणः नाकिंचिद
पिजानेहंसुकृतंनैवदुष्कृतम् ६७ पापाचारस्यमेमुक्तिःकथंवास्यान्मुनीश्वर कियद्वावर्ततेचायुरेतन्मेवदसुव्र
त ६८ इतिलुब्धवचःश्रुत्वागालवोवाक्यमब्रवीत् इदानींसर्पदष्टोसिनजानास्यन्यचिंतया ६९ नेमुहूर्ताद्
यादूर्ध्वंमरणंचभविष्यति इदानींमाघमासस्यपुण्याशुक्लत्रयोदशी ७० कालस्यप्रातरेवायंतस्माच्छीघ्रंनदीं
व्रज संस्मृत्यमाधवंदेवंकुरुस्नानंयथाविधि ७१ पश्चान्मदीरितांश्रुत्वाकथांविष्णोर्महात्मनः पुत्रमित्रक
लत्रादौममतांत्यजचेतसा ७२ हरौचित्तंसमाधायभक्त्यात्यजकलेवरं मुक्तिस्तेभवितानूनंमाधवश्चप्रसीदति
७३ इतितद्वचनंश्रुत्वागालवस्यमहात्मनः ततोहृष्टमनाभूत्वास्नात्वानद्यांयथाविधि ७४

वैशाखे ६२ ६३ निर्वे
दंवैराग्यं ६४ ६५ ६६ ६७ ६८ अन्यचिंतयाव्यग्रत्वात्स्वजातसर्पदंशंनज्ञातासीतिसंबंधः ६९ ७० ७१ ७२ ७३ ७४

७५ ७६ दुर्मृताः दुर्मरणमापन्ना अपितेयोगिदुर्लभांगतिमापुरीत्युत्तरेणान्वयः ७७ ७८ ७९ ८० ८१ प्रत्यक्षंयथातथाअपरोक्षमि

माधवेमनआवेश्यगालवेचगुरौतथा कथांतदीरितांश्रुत्वानाकरोद्धाल्यचिंतनम् ७५ जहौकलेवरंतीरेकमाकालउपस्थिते विमानंदिव्यमारुह्यजगामहरिमंदिरम् ७६ खगोहारिर्लुब्धकश्चदुर्मृताश्चापितेत्रयः माघस्नानस्यमाहात्म्यात्कथायाश्चमधुद्विषः ७७ पश्यतामेवसर्वेषांयोगिनामपिदुर्लभाम् गतिमापुर्महात्मानः क्षणेनैकदिनेनच ७८ कुटीरस्थजनाःसर्वेगालवंमुनिपुंगवम् तुष्टुवुर्विविधैःस्तोत्रैर्विस्मयोत्फुल्ललोचनाः ७९ तंप्रत्यूचुर्महात्मानंसंतोषाकुलचेतसः माघस्नानप्रभावश्चकथायाश्चापिवैहरेः ८० प्रत्यक्षेणैवदृष्टोऽभूच्चित्रंचित्रमहोयतः अयमर्थःपुरास्माकंशास्त्रगम्योभवन्मुने ८१ प्रत्यक्षमभवन्नूनमधुनारुपयानव समागमोहिमहतांसद्यःक्षेमायकल्पते ८२ सर्वेधर्मामहाब्रह्मन्ज्ञेयाःसूक्ष्माःसहस्रशः तेपिशास्त्रकथालापैर्व्यक्तीकुर्वंतिसज्जनाः ८३ सूपदिष्टाश्चतेधर्माजनान्वैशुद्धचेतसः पुनंतिनात्रसंदेहोनपुनंतिदुरात्महान् ८४ अपितुश्रोतुमिच्छामोमाघमाहात्म्यमुत्तमम् यद्यदस्तिविशेषोत्रतद्वदस्वदयानिधे ८५ नानेनसदृशोधर्मोनानेनसदृशंतपः नानेनसदृशोयज्ञइतिमेभातिसत्तम ८६ बहुशःशृण्वतांचापितृप्तिर्नोद्यापिविद्यते कोनुतृप्येतभगवान्कथालापामृतंपिबन् ८७ मनांसिचप्रसन्नानिपापान्यपिगतानिच गालवस्यमुनेः संगात्संशयाश्चापिछेदिताः ८८ शुश्रूषूणांचशिष्याणांवदविष्णोःकथांशुभाम् ८९ इतिश्रीपा०मा०मा० चतुर्विंशोऽध्यायः २४

त्यर्थः ८२ तेपीतिद्वितीयार्थेप्रथमातान्धर्मानित्यर्थः व्यक्तीकुर्वंतिस्पष्टतांनयंति ८३ ८४ ८५ अनेन माघधर्मेण ८६ ८७ संगाद्धेतोः छेदिताः छिन्नाइत्यर्थः ८८ शिष्याणांनः इतिकर्मणिषष्ठी शिष्यानित्यर्थः ८९ इतिमा० चतुर्विंशोध्यायः २४

इदानीं भगवद्गीताविष्णुसहस्रनामभागवतमाधवस्तवराजानां पठनमाहात्म्यं भगवान्गालवो निरूपयत्यस्मिन्नध्याये यःस्नातीत्यादिना १ जलाप्लुतः स्नातः २ मे मनः निशामय शृणु ३ ४ ५ शुचिर्मनसेतिशेषः ६ ७ पूज्य संपूज्य सायुज्यमित्यस्य मुक्तिमित्यग्रिमेण

गालवउवाच यःस्नातिमाधवप्रीत्यैप्रातर्माघेबहिर्जले संपूज्यमालतीपुष्पैर्विष्णुलोकमवाप्नुयात् १ गीतापाठंतुयःकुर्याद्बहिर्माघेजलाप्लुतः तस्यपुण्यफलंवक्तुंविष्णुनापिनशक्यते २ विभूतिंविश्वरूपंचयश्चाध्यायद्वयंपठेत् तस्यपुण्यस्यविस्तारंवदतोमेनिशामय ३ विभूतिंविश्वरूपोत्थंयःपाठंपठतेनरः माघेपापविनिर्मुक्तो दिविदेवैश्चगीयते ४ श्लोकार्द्धंपठतेयस्तुमाघमासिजलाप्लुतः ससर्वंकुलमुद्धृत्यस्वर्गलोकेमहीयते ५ प्रातःस्नात्वाशुचिर्भूत्वायःश्लोकंपठतेनरः सचैकविंशतिकुलैः सत्यलोकमवाप्नुयात् ६ माघेस्नात्वातुयःकुर्यात्पाठंश्लोकद्वयस्यतु एकेनपापनाशःस्याद्द्वितीयान्मोक्षमाप्नुयात् ७ माघेस्नात्वाहरिंपूज्ययस्तुश्लोकत्रयंपठेत् एकस्मात्संसृतेर्नाशःसायुज्यंचद्वितीयतः ८ मुक्तिंददातिवैविष्णुर्ऋणीशेषेणमाधवः माघेचाध्यायपठनेकृतेस्नातेनचोषसि ९ तस्यपुण्यफलंवक्तुंनालंवर्षशतैरपि यश्चाध्यायद्वयंनित्यंप्रातःस्नात्वातुयःपठेत् १० ब्रह्माद्यैरपिदेवैश्चविष्णुनाशंभुनातथा नशक्यतेफलंवक्तुंमहाकल्पशतैरपि ११ माघस्नानंहरेःपूजागीतापाठत्रयंयदि एकस्मिन्दिवसेयस्यमुक्तिस्तस्यकरेस्थिता १२ स्नात्वातुमृदमालिप्यप्रातर्माघेबहिर्जले सहस्रनामभिःपूज्यकृतकृत्योभवेन्नरः १३

भिन्नलिंगत्वेपिवेदाःप्रमाणमित्यादिवत्संबंधः ८ मुक्तिंद्वितीयतः द्वितीयेन शेषेणतृतीयेन ९ १० वक्तुमिति इयदेवेतिवक्तुंनशक्यतइत्यर्थः ११ यस्येतिकर्तरिषष्ठी भवतीतिशेषः १२ मृदंतुलसीमृत्तिकाम्आलिप्य लेपनपूर्वकंस्नात्वा एतद्विषयेतुपूर्वमष्टमाध्यायेविष्णुयमदूतयोःसंवादेमाहात्म्यमुक्तं सहस्रनामभिः तुलसीपुष्पादिभिः विष्णुमितिशेषः १३

सहस्रनामेतिपृथक्पदं पठनंस्पष्टोच्चारणं यथास्यात्तथापठेदितिक्रियाविशेषणं १४ इतिनिश्चयः १५ १६ १७ १८ १९ जीवन्नेवमुक्तिगः जीवन्मुक्तएवेत्यर्थः २० २१ २२ २३ इष्टंयज्ञाः कृताः २४ २५ इहखलुसुखमेवमेस्याद्दुःखंमनागपिमाभूदितिनिखिलापेक्षितमोक्षसुखस्यपरस्यप्रसादात्सरमार्निरूपादस्मात्संसारान्मुच्यतेनापरेणेत्यादिश्रुतेः श्रीमन्नारायणप्रसादैकसाध्यत्वात्तत्प्रसादस्यचतमेवंवि-

सहस्रनामपठनंपूजाकालेतुयःपठेत् तद्देशानांभवेन्मुक्तिःकिमुतस्यमहात्मनः १४ नाम्नाचैकेनवायस्तुपूजयेन्मधुसूदनं कोटिसंवत्सरंविष्णुःपूजितस्तेननिश्चयः १५ योवानाम्नांसहस्रेणस्तोतुमिच्छतिमाधवं तावतातेनवैपुंसास्तुतएवनसंशयः १६ एकंश्लोकंपठेद्यस्तुनित्यंभागवतोद्भवं तस्यपुण्यफलंवक्तुंकःशक्तोदिविवाभुवि १७ पूजयेन्माधवंदेवंप्रातर्माघेजलप्लुतः पठन्भागवतंशास्त्रंमुक्तिमेतिनसंशयः १८ गजेंद्रस्तोत्रपठनंकुर्यात्माघेजलाप्लुतः तस्यविष्णुःस्वयंप्रीणन्दद्यात्तीष्टान्मनोरथान् १९ श्लोकार्द्धंश्लोकपादंवानित्यंभागवतोद्भवम् यःपठेत्प्रातरुत्थायसजीवन्नेवमुक्तिगः २० यद्गेहेलिखितंशास्त्रंपुण्यंभागवतंशुभम् वर्ततेतद्गृहंपुण्यंसर्वक्षेत्राधिकंमतम् २१ यःप्राक्सूर्योदयात्स्नात्वाकृत्वामाधवपूजनं माधवस्तवराजेनयदिस्तौतिहरिंसकृत् २२ निर्धूयसर्वपापानिकुलान्युद्धृत्यसर्वशः सवितुर्मंडलंभित्वाविष्णोःसायुज्यमाप्नुयात् २३ माधवस्तवराजंतुमाघेनित्यंपठेन्नरः तेनेष्टंतेनदत्तंचतेनसर्वमनुष्ठितं २४ विष्णोर्नामसहस्रस्यनिरावृत्यातुयत्फलं तत्फलंसमवाप्नोति माधवस्तवराजतः २५ कुटिरस्याउ० स्तोत्रमेतन्महापुण्यंयत्वयोक्तंद्विजोत्तम माधवस्तवराजंतुश्रोतुमिच्छामहेवयं २६

ज्ञानमृतइह भवतिनान्यःपंथाअयनायविद्यते विद्यैवतुनिर्धारणात् ज्ञानसंपत्प्रसादस्तूच्चमोमतइत्यादिनाज्ञानैकसाध्यत्वात्तस्यज्ञानस्य विविदिषंति ब्राह्मणायज्ञेनदानेनतपसानाशकेनेत्यादिनाभगवत्प्रतिपादकमंत्रजपादितपःसाध्यत्वाचगमात्तन्मंत्रंविविदिषवोब्राह्मणाःस्व-

यंज्ञानंतोपिलोकानुजिघृक्षयाब्राह्मिष्ठंगालवमासाद्यतंपरिपृच्छंति कुटीरस्थाइत्यादिनाद्विजोत्तमेत्यत्रननिर्धारणइतिषष्ठीसमासनिषेधात्सप्तमीसमासः सतुशब्दः स्येतिकर्तव्यस्यमंत्रस्यशुश्रूषायांतेनपादौप्रक्षाल्येत्यादिनापृष्टोक्तीनांसंग्रहः २६ किंफलमितियद्यपि प्राक्सूर्योदयात्स्नात्वेत्यादिनाप्रागनुपदमेवफलमुक्तं तथापि विशेषज्ञानाय लोकेस्थापनायवाफलविषये पुनःप्रश्न इतिभावः कृतन्यासः कृतःन्यासः तत्वन्यासोमातृकान्यासश्चयेनसतथोक्तः तदुक्तंगौतमीतंत्रे प्रथमंवैष्णवीमंत्रे तत्वानांन्यसनंपुरा एकपंचाशद्वर्णानांन्यसनंचततःपरमिति २७ आसनानंतरंतत्वन्यासात्पूर्वंकर्तव्यमाह आदाविति पार्श्वकेइत्यस्याग्रिमेणसंबंधः २८ दक्षिणहस्ततइतितृतीयार्थे

किंफलंतस्यपठनेकेनलोकेप्रकाशितं एतद्ब्रह्मन्वदास्माकंपरंकौतूहलंहिनः गालवउवाच पादौप्रक्षाल्यचाचम्यकृतन्यासः कृतासनः २७ स्तोत्रमेतत्पठेद्भक्त्यामाघेमासिविशेषतः आदौनत्वागुरून्सर्वान्पश्चाद्वामेचपार्श्वके २८ पापंचपुरुषंध्यायेत्स्पृष्ट्वादक्षिणहस्ततः ब्रह्महत्याशिरःकंचस्वर्णस्तेयभुजद्वयम् २९ सुरापानहृदायुक्तंगुरुतल्पकटिद्वयम् तत्संयोगपदद्वंद्वमंगप्रत्यंगपातकम् ३० उपपातकरोमाणिरक्तश्मश्रुविलोचनं खड्गचर्मधरंकृष्णंकुक्षौपापंविचिंतयेत् ३१ नाभिंस्पृष्ट्वाततःपश्चाद्वायुबीजमनुस्मरन् षट्कोणचक्रगंनीलंभगवंतमनुस्मरन् ३२

तासांचिंतनमाह ब्रह्महत्येति ब्रह्महत्याब्राह्मणवधः शिरसियस्यसतथोक्तः एवमुत्तरत्रापि २९ सुरापानेत्हृन्मनः तेषांब्रह्महत्यादीनां संयोगःसंसर्गः पदद्वंद्वेयस्यसतथोक्तः ३० उपपातकानि परस्त्रीगमनादीनि रोमसुयस्यसतथोक्तस्तंयद्वाब्रह्महत्यैवशिरोयस्येत्यादिव्याख्येयं ३१ नाभिमिति वाय्वग्निवरुणमंडललक्षणमुक्तं हारीते नाभिस्थानस्थितंनीलंचक्रंषट्कोणसंयुतं त्रिकोणमनलंचक्रंरक्तबीजयुतंहृदि वर्तुलंवरुणंचक्रंमूर्ध्निस्फाटिकसन्निभमिति अत्रनाभिहृदयमूर्धगतषट्त्रिकोणवर्तुलमंडलगतभगवद्रूपाणि क्रमेणप्रद्युम्नसंकर्षणवासुदेवाख्यानीतिवदंति तत्र प्रद्युम्नस्यनीलत्वमनेनैववचनेनज्ञेयम् ३२ ६९ ६९

वायुनांवायुबीजेन ३३ अग्निनाग्निबीजेन ३४ ३५ आप्लाव्येत्यनंतरं वरुणबीजेनेतियोज्यं तानिबीजान्युक्तानिपद्ममालायांवाय्वग्निवरुणानांचबीजानियरवाः क्रमादिति तज्जपसंख्याचोक्ता हारीते षड्द्विषट्चतुर्विंशत्संख्याबीजंजपेत्क्रमात् इति ततोगायत्रीमंत्रेण प्राणायाममाचरेत् प्राणायामशब्दार्थस्तु प्राणोवायुरितिप्रोक्तआयामस्तन्निरोधन प्राणायामइतिज्ञेयोयो गेनायोगसाधनमित्युक्तप्रकारेण ज्ञेयः पंचांगन्यासमाचरेदित्यस्याग्निममाधवादिनामभिःसंबंधः अन्यथाअंगन्यासंनथाध्यानसम्यगेवसमभ्यसेत् न्यासहीनेहरेदायुर्ध्यान

देहस्थंपापपुरुषंवायुनाशोषयेत्पुरा ततोहृदिकरन्यस्यवन्हिमंडलगंहरिम् ३३ त्रिकोणचक्रगंरक्तंभगवंतमनुस्मरन् देहस्थपापपुरुषंनिर्दहेदग्निनाततः ३४ पश्चान्मूर्ध्निकरन्यस्यास्थितवरुणमंडले चतुर्दलेस्फाटिकाभंस्मृत्वाचामृतवृष्टिभिः ३५ आप्लाव्यसकलंदेहंप्राणायामंततश्चरेत् गायत्र्याचैवमंत्रेणपंचांगन्यासमाचरेत् ३६ माधवोनित्हृदिन्यस्यन्यसेन्मूर्ध्निचकेशवम् नारायणंशिखायांचनेत्रयोरच्युतंतथा ३७ विष्णवेनमइति चवदेदस्त्रायफट्ततः मंत्रस्ततःप्रयोक्तव्यःसर्वपापोपशांतये ३८ भुक्तिमुक्तिप्रदोनृणांसर्वरोगविनाशनः अच्युतानंतगोविंदप्रणतार्तिविनाशन देहिमेद्यमनःशुद्धिंत्वन्नामस्मरणाद्धरे ३९ हृषीकेशजगद्व्यापीन्सर्वसाक्षीन्दयानिधे इंद्रियाण्यनुकूलानिसदाधर्मेषुमेकुरु ४० यश्चक्रगःसूर्यगश्चसूर्यात्मासूर्यसेवितः दर्शयस्वमहाबाहोसदामेधर्मपद्धतिम् ४१

हीनेतुनिष्फलमित्यादिस्मृत्याऽनर्थाभिधानादितिभावः प्राणायामसंख्योक्ता हारीते उत्तमोमुनिभिःप्रोक्तःप्राणायामोनृपोत्तम जपेद्द्वादशवारंवैमध्यमस्तुप्रकीर्तितः षड्वारंतुकनीयान्स्यात्त्रिवारंसमुदाहृतइति ३६ अंगन्यासमंत्रानाह माधवेत्यादिना ३७ ३८ यदंगतयान्यासादिकमुक्तंतमंत्रमाह अच्युतेति ३९ धर्मेषुवेदविहितेषु ४० धर्मपद्धतिं धारकत्वाद्धर्मोभगवांस्तस्यपद्धतिंतत्प्राप्तिहेतुभूतमार्गं ४१ ६ ६ ६ ६

श्रुतिबोधिनेनहि जिज्ञासुस्त्वेतिश्रुत्या कर्तव्यतयाबोधितेकथालापे ४२ त्वत्पादसौरभेत्वत्पादनिर्माल्यस्यसौरभेसुगंधे ४३ तवरसस्वादे त्वन्निवे
दितइतिभागवतोक्तेः ४४ अजः जन्मरहितः ४५ खं इतिनामयस्यसः बलज्ञानसमाहारः पूर्णः स्वमितिशब्दितइति

दिग्रूपीचश्रुतिस्थोयः सर्वप्रत्ययगोचरः वर्तयस्वकथालापेश्रोत्रेमेश्रुतिबोधिते ४२ नासत्यरूपीभगवान्नासास्थो
हरिरव्ययः नासामेवर्तयस्वाशुदिव्येत्वत्पादसौरभे ४३ जिह्वात्मावरुणस्त्वंचमाधवानंतशक्तिधृक् जिह्वातवर
सास्वादेवर्तयस्वमहाप्रभो ४४ प्राणात्मकोविष्णुरजस्त्वक्स्पर्शात्मा महाप्रभुः त्वक्स्पर्शाभ्यांकृतपापशमया
च्युतमाधव ४५ खस्थः खनामाभगवान्सर्वव्यापिन्महाप्रभो यदाकाशात्प्रवृत्तंचपापप्रशमयाच्युत ४६
वायुगोवायुनामात्वंजगत्साराव्ययाच्युत वायोर्भूतात्कृतपापंशमयाच्युतमाधव ४७ तेजास्थितोवन्हिनामास्व
यंज्योतिस्त्वमादिदृक् तेजोभूतात्कृतंपापशम०। ४८ अप्स्थितोभगवान्विष्णुरबात्माजीवनप्रदः अब्भूतात्त्व-
कृतंपापंशम० ४९ भूमिस्थितोभूमिनामाजगदाधारकेशव भूमेर्भूतात्कृतपापंश० ५० महान्महद्भूतोविष्णुर्ज-
गद्धेतुर्जनार्दनः निदानकर्मणोविष्णोश० ५१ यश्चाहंकारगोविष्णुर्जगद्धेतुर्निराश्रयः अहंकारात्कृतपापंश०
५२ मनास्थितः कामरूपीप्रवर्तकनिवर्तक मनसानुकृतंपापंश० ५३ बुद्धिगोबुद्धिनामात्वबोधात्माहरिरीश्वरः
बुद्ध्यातुयत्कृतंपापंश० ५४ वाचिस्थितोवन्हिरूपीगुह्याश्रयनिराश्रयः वाचाकृतंमहत्पापंश० ५५ हस्तस्थोभग
वान्विष्णुर्दक्षगःपुण्यविग्रहः यद्धस्ताभ्यांकृतपापंश० ५६ पादस्थितोजयताङ्घ्रोभगवान्गरुडासनः यस
द्भ्यांचकृतपापंश० ५७

छांदोग्यभाष्योक्तेः ५६ भूतात् भूतरूपिणः ४७ आदिदृक् आदिं सृष्ट्यारंभंपश्यती
तितथासर्वेषामाद्य इत्यर्थः ४८ ४९ ५० निदानंकारणं वासनामितियावत् ५१ ५२ ५३ ५४ ५५ ५६ ५७

५८ ५९ वामस्कंदर ६० त्रिधामान्नृषुश्वेतद्वीपानंतासनवैकुंठेषु धामानिस्वरूपाणियस्यसतथोक्तः ६१ वेदान्नयति प्रापयति ब्रह्माणं इतिवेदने
तासचासौमहामीनस्तत्संबुद्धिः ६२ वज्रादपिकल्पानि समर्थानिश्चतपवमहांतिनरवानियस्यसतथा ६३ अध्वनिकर्मज्ञानमार्गेप्रसिद्धमार्गेच ६४

गुह्यास्थितोगुह्यरूपी मसाविष्णूरमापतिः यद्दुःख्येनकृतंपापंश० ५८ हरेकृष्णहरेकृष्णशंखचक्रगदाधर
सर्वदासर्वतोमह्यंकुरुमाधवरक्षणम् ५९ वामवामनविश्वात्मन्बलिध्वंसिन्बटोहरे कृपालयस्थलेषुत्वंकरुमा०
६० त्रिविक्रमत्रिकालज्ञत्रिधामंस्त्वंत्रयीमय सर्वाश्चर्यकरव्योम्निकुरु० ६१ वेदनेतृमहामीनजलेवरुणपाशतः
यादोगणेभ्योदेवेशकुरु० ६२ महाविष्णोनृसिंहत्वंवज्रकल्पमहानख दुर्गाटवीगृहादिभ्यःकुरु० ६३ यद्दंष्ट्रंदुक
लालग्नाकलंकइवयाक्षितिः वराहाध्वनिमेनित्यंकुरु० ६४ शार्ङ्गधन्वन्महावीर्य नारायणपरात्पर प्रमादोत्थ
महादुःखात्कुरु० ६५ अनसूयागर्भरत्न योगिध्येयात्रिगोत्रज योगोपायविहीनस्यकुरु० ६६ सनत्कुमारकपि
लहयग्रीवजनार्दन देवहेलनबंधेभ्यः कुरुमाधवरक्षणम् ६७ समस्तजगदाधारसर्वदेवभयापह घोरेभ्यो
नरकेभ्यश्वकुरुमाधवरक्षणम् ६८ धन्वंतरेचिदानंदस्वरूपिन्विश्वभेषज अपथ्यजान्महादुःखात्कु
रु० ६९ धिततात्मन्महाशक्तेबलज्ञानवृषाव्यय द्वंद्वादिभ्योमहादुःखात्कुरु० ७० कृष्णद्वैपायनहरबुद्ध
कल्किन्शरभप्रद अज्ञानादिभयान्नित्यंकुरु० ७१ केशवाच्युतगोविंद दामोदरजनार्दन प्रातःसंगवम-
ध्यान्हेकुरु० ७२ कालमूर्तेमहाविष्णोपद्मनाभगदाधर प्रदोषदुष्टकालेभ्यः कुरुमाधवरक्षणं ७३

६५ योगोपायैः योगशास्त्रोक्तज्ञानसाधनैः विहीनस्यममेतिशेषः ६६ देवानांभूसुराणांस्सुराणांवाहेलनेबंधोनिर्बंधोयेषांते
हेलनबंधाः दुर्जनास्तेभ्यइत्यर्थः ६७ ६८ ६९ बलज्ञानयोर्वृषसेचकद्वंद्वादिभ्यः शीतोष्णकामक्रोधादिभ्यः ७० ७१ ७२ ७३

७४ ७५ ७६ ७७ ७८ ७९ ८० अरतेः क्रोधाद्दुःखाद्वा ८१ ८२ क्षेत्रंअव्यक्तं ८३ ८४ तर्जनैः भयोत्पादनैः स्वकृतात् स्व

श्रीवत्सलांछनश्रीमंश्चक्रपाणे भवार्तिहन् अज्ञानतिमिरान्नित्यं कुरु० ७४ वासुदेवजगद्योने जितामित्र चतुर्भुज भयाज्ञानात्कृतात्पापात्कुरु० ७५ वेदसार जगत्प्राण सत्यवाक्सत्यविक्रम अनृताच्च महापापात्कुरु० ७६ समस्तपातकध्वंसिन्सर्वावस्थानियामक त्वद्विस्मृतेर्महापापात्कुरु० ७७ परानंदपरब्रह्मन्सत्यबोधाव्ययात्मक अध्यानात्ते महापापात्कुरु० ७८ सर्वकर्तःसर्वसाक्षिंछिवरूपाशिवप्रद क्वाशिवज्ञानराहित्यात्कुरु० ७९ यज्ञभृद्यज्ञकृद्यज्ञयज्ञभुग्यज्ञसाधनः क्रियात्यागान्महापापात्कुरु० ८० भक्तप्रियाखिलाधार पुण्यकीर्ते निरामय अरतेस्तु महादोषात्कुरु० ८१ निरंजन निराकार निर्गुणानंत निश्चल गुणत्रयकृताद्घात्कुरु० ८२ क्षेत्रज्ञ क्षेत्रकृत्क्षेत्रिन् क्षेत्रदूर कृपाकर क्षेत्रजाच्च महापापात्कुरु० ८३ उत्तिष्ठन्प्रस्वपन्गच्छन्पिबन्भुंजन्विजृंभयन् यत्पापं कुरुते तस्मात्कुरु० ८४ दाक्षिण्याद्यलोभाद्वा भयाद्वा दुष्टसंगतेः स्वकृतात्तर्जनैः पापात्कुरु० ८५ आलस्याद्दुष्टभावाद्वा मोक्षोपायो न साधितः अपराधाद्दयासिंधो कुरु० ८६ अगम्यागमनात्पापादभक्ष्याभक्षणाद्विभो अकार्यकरणाच्चापि कुरु० ८७ भोगलौल्याद्दुरभ्यासाद्दुष्टानां तु समागमात् प्रतिग्रहाद्दुराचारात् कुरु० ८८ अग्नित्यागाद्दुरन्नाच्च संध्याकर्मादिलोपनात् अपूजनाज्जगन्मूर्तेः कुरु० ८९ एकादश्यशनात्पापाद्वादश्यां च द्विर्भुक्तितः श्राद्धकर्मपरित्यागात्कुरु० ९० वेदभ्रंशाद्व्रतभ्रंशात्कर्मभ्रंशाद्दुराग्रहात् निंदनाद्गुरुसाधूनां कुरु माध० ९१

पंकृतात् ८५ अपराधात् उपायस्यासाधनरूपादितिभावः ८६ अभक्ष्यस्य भक्षणात् आदरेण भक्षणात् ८७ ८८ जगदेवमूर्तिः शरीरं यस्य तस्य विष्णोरित्यर्थः यस्य पृथ्वी शरीरमित्यादिश्रुतेः ८९ ९० ९१ ९२ ९

९२ विवाहस्यकंटकात् अयंभावप्रधानोनिर्देशः कंटकत्वादित्यर्थः निरोधादुच्छेदाद्वा ९३ भार्याद्वयेति भार्याद्वयेएकस्याः भार्यायाः दुष्टचेतसापरित्यागात् इतिसापेक्षत्वान्निर्धारणेसप्तमीसमासः ९४ ९५ ९६ ९७ ९८ सपुमान्त्रिषुलोकेषुसुपूज्योभवतीति पूर्वेणान्वयः स-

अनाश्रमादनध्यायादज्ञानाद्दनुजांतक अविश्वासाद्गुरौनित्यंकुरु० ९२ दूषणात्कुलकन्यानांविवाहस्यचकंटका
त् आशाच्छेदान्महाबाहोकुरु० ९३ भार्याद्वयपरित्यागादेकस्यादुष्टचेतसा परदाराभिमर्शाच्चकुरु० ९४ मेरुमं
दरसमात्पापादुपपापाच्चपातकात् ब्रह्महत्यादिपापाच्चकुरु० ९५ इतीदंकीर्तितंपुण्यंमहापातकनाशनम्
दारिद्र्यनाशनंधन्यमायुष्यंचयशःकरम् ९६ यइदंपठतेनित्यंमाघस्नानेद्विजोत्तमः यन्माघेचकृतंपुण्यंकोटि
कोटिगुणंभवेत् ९७ नित्यंप्रातःपठेन्मर्त्यःशुचिःशांतोजितेंद्रियः देवैरपिसुपूज्यःस्यात्सवैलोकोत्तरोत्तरः ९८
माधवस्तवराजंतुयःपठेन्नियतःशुचिः सपुमांस्त्रिषुलोकेषुसएवस्याज्जनार्दनः ९९ पठतस्तवराजस्यन्महा
दिव्ययाभवेत् माधवस्तवराजोयंपापगुल्मदवानलः १०० धर्मादिमोक्षपर्यंतंपुरुषार्थस्यकारणम् यःपठे-
त्पुण्यकालेषुस्तवराजंमहामनु कल्पकोटिसहस्रेषुमोदतेविष्णुमंदिरे १०१ इतिवायुपुराणेमाघमाहात्म्ये
माधवस्तवराजोनामपंचविंशोऽध्यायः २५ ६२ गालवउवाच एतत्स्तोत्रंमहापुण्यंवसिष्ठायमहा-
त्मने वेधाउपदिदेशेदमार्तायात्मजशोकतः १ कुटीरस्थाऊचुः कुतोवाभूत्पुत्रशोकोवसिष्ठायमहात्मने
शोकनाशःकथमभूदुपदेशात्प्रजापतेः २ एतदाचक्ष्वनोब्रह्मञ्छुश्रूषूणांमहामते गालवउ० कोपांशतोमहाते
जाविश्वामित्रोमहातपाः ३

एवजनार्दनः जनार्दनस्वरूपः मुक्तोभवतीत्यर्थः ९९ पापमेवगुल्मः स्तंबः तस्यदवानलःदाहकइ-
तिभावः १०० १ इतिश्रीवा·मा·मा·टी· माधवस्तवराजकथनंनामपंचविंशोऽध्यायः २५ ६२ वेधाःब्रह्मा १ प्रजापतेःब्रह्मणः २ को-
पांशतः क्रोधांशेनउग्रतेजाः ३ १०५

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

दिव्यायुतंदेवमानेनदशसहस्रवर्षाणीत्यर्थः ४ ५ ६ ७ बलसूदनःइंद्रः ८ ९ १० भारतीरमणःवायुः ११ १२ अयंनारदोक्तोर्थःवेदे

ब्रह्मर्षित्वंसमासाद्यवासिष्ठाधिक्यकांक्षया तपस्तेपेमहाघोरंदिव्यायुतमतंद्रितः ४ वसिष्ठादधिकंमेनेत्वा
त्मानंचतपोबलात् कदाचिदिंद्रसदसिदेवेंद्रोदेवसेवितः ५ महदैश्वर्यसंपन्नोदेवेंद्रोवाक्यमब्रवीत् भोभोदे-
वाःसमासीनाऋषयःसंसितव्रताः ६ कोजीवेष्वधिकोजीवःकोवाब्रह्माभिधोमतः ब्रह्मर्षीणांचकःश्रेष्ठोदेव
र्षीणांकउत्तमः ७ मयापृष्टामहात्मानोब्रूतप्रश्नस्यचोत्तरं सदस्येवंमहात्मानोबलसूदनचोदिताः ८ नारदंचोद-
यामासुर्दातुंप्रत्युत्तरंद्विजाः तेनाज्ञप्तोमहाप्राज्ञोनारदोवाक्यमब्रवीत् ९ सर्वज्ञश्चसभामध्येप्रांजलिःसत्यभा-
षणः नारदउवाच तिर्यग्योनिमनुष्येषुभूमिपेषुबुधेषुच १० भारतीरमणःश्रेष्ठोजीवेभ्योयंपरःपुमान् परंब्र
ह्महरिःसाक्षाद्देवदेवोरमापतिः ११ ब्रह्मर्षीणांवसिष्ठोयंवेदवेदांगपारगः देवर्षीणामहंविद्वानितिमेभाति
निश्चयम् १२ सभ्यास्तेतुष्टुवुःसर्वेश्रुत्वानारदभाषितं अयमर्थोवेदसारःसाधुसाधुवचोब्रुवन् १३ विश्वामित्र-
स्तुतच्छ्रुत्वावसिष्ठाभ्युदयंरुषा उत्तस्थौचसभामध्याच्चलदोष्ठोविनिंदयन् १४ क्रोधादातप्यमानस्तंनारदंप्रत्य
भाषत यद्यपीदंत्वयाप्रोक्तंहरिर्ब्रह्मेतिनान्यथा १५ तथाजीवाधिकोवायुरेतत्सर्वंनसंशयः ब्रह्मर्षीणांवसि
ष्ठश्चदेवर्षीणामहंत्विति १६ चित्रमेतद्द्वयंप्रोक्तमृषीणांयेनसंसदि कथमात्मप्रशंसावाकृतापंडितमानिना
१७ मार्कंडेयेस्थितेप्यस्मिन्कल्पस्थायिनिसंसदि विद्यमानेसभामध्येभृगौब्रह्मर्षिसत्तमे १८ कथमस्याप्यना
त्मज्ञवसिष्ठेनाभिमानिना। नारदःसत्यवादीतिप्रसिद्धोभुवनत्रये १९

षुसारइतिसर्वेनारदभाषितंतुष्टुवुरितियोजना १३ १४
१५ १६ १७ मार्कंडेयेसंसदिसभायांस्थितेभृगौचविद्यमानेसति कथंअब्रवीत्युत्तरेणसंबंधः १८ अस्याविश्रुतात्मप्रशंसेतिशेषः १९

२० भूरिशः भूयसीशक्तिर्यस्यसः २१ निशंकाः राज्ञः विषयेआश्रये इदंचाग्रेस्फुटी भविष्यति २२ २३ २४ २५ द्रुतोच्चारणेनब्रह्मसद
वगत्वा निर्णयंलभेयेत्यादिवाक्यस्यशीघ्रोच्चारेणगद्गदःस्खलिताक्षरः २६ २७ ब्रह्मसदोब्रह्मसभा २८ २९ कारणंवदतमिति पप्रच्छे·

आत्मानंवाकथंस्तौतिसनकादिषुसत्स्वपि ब्रह्मर्षित्वंमयाप्राप्तंतपसादुश्चरेणच २० किंनजानातिलोकोयंप्र·
थितंभुवनत्रये तपसाभूरिशःशक्तिर्ब्रह्मणासमविक्रमः २१ किंवसिष्ठनजानासिनिशंकोविषयेपिमाम् दृष्ट्वा
प्यर्थंनभात्येवदृथापंडितमानिनः २२ तन्नजानासिकिंप्राज्ञनारदेतिचविश्रुतः त्वयातर्हिस्मृतंपूर्वंविचार्यो
द्यपुनर्वद २३ इतितद्वचनंश्रुत्वाप्रहसंस्तमुवाचह भवतश्चवसिष्ठस्यविवादंतुपितामह २४ तवेववचसा
सद्योहरिष्यतिनसंशयः ब्रह्मणःसदनंगच्छवसिष्ठेनापिसंयुतः २५ सएववेत्तासर्वस्यशृणुगाधितनूद्भव
इतितद्वचनंश्रुत्वाद्रुतोच्चारणगद्गदः २६ ओमित्युक्त्वावसिष्ठंतंसमाहूयदनंदितः वसिष्ठोपिहसन्तेनविश्वा
मित्रेणधीमता २७ साकंययौब्रह्मसदोविस्मयोत्फुल्ललोचनः अपश्यतांमहात्मानौब्रह्माणंमुनिसेवितम्
२८ प्रणामंचक्रतुस्तस्यलोकस्रष्टुर्महात्मनः जानन्नपिस्वयंब्रह्मामुनीपप्रच्छसन्मनाः २९ किमर्थमागताव
त्रभवंतौलोकपूजितौ युवयोराननेखिन्नेवदतंकारणंत्विति ३० विश्वामित्रस्तदाचाहब्रह्माणंताम्रलोचनः अ
न्योन्याधिक्यबुद्ध्याद्वौविवदंतौपरस्परं ३१ तवाभ्याशंरुषापन्नावावांत्वांप्रष्टुमीप्सितौ यच्चयावच्चलोकानां
वेत्तात्वंनारदोब्रवीत् ३२ निर्धार्यसत्यमेवोक्त्वाकलहंचावयोर्हर विश्वामित्रवचःश्रुत्वाब्रह्मावाक्यमथाब्रवीत् ३३
विवादनिर्णयःकार्यस्त्रिभिःसाक्षिभिरन्वितः तस्माच्छेषंतथासूर्यमगस्त्यंचसमाह्वय ३४

निपूर्वेणसंबंधः ३० अन्यो
न्यस्मात् याऽधिक्यबुद्धिस्तया ३१ प्रष्टुंईप्सितंइच्छाभावेक्तः ययोस्तौप्रष्टुकामावित्यर्थः त्वंवेत्ता इतिनारदोब्रवीदित्यर्थः ३२ ३३ ३४

३५ साक्ष्यर्थे साक्षिविषये त्वं समाह्वयेति ब्रह्मणाभिनिर्दिष्ट इत्यग्रिमेण संबंधः ३६ ३७ मूर्धसहस्रतः सहस्रफणासु सार्वविभक्तिकस्तसि
३८ लोकभारो धृतः इयं च भारोद्वहनविषयाज्ञाप्तास्तीति योज्यं तेन शेषेण इति पूर्वोक्तप्रकारेण निराकृतः प्रत्याख्यातः ३९ ४० तस्माद्गच्छेति तं

इति ब्रह्मविनिर्दिष्टो विश्वामित्रो गमद्द्रुतम् नागलोकमुवाचाथ नागेंद्रं मुनिपुंगवः ३५ अन्योन्याधिक्यविषये वसि
ष्ठस्य मम चापि च विवादोभून्निर्णयार्थं साक्ष्यर्थे तान्समाह्वय ३६ इति ब्रह्मविनिर्दिष्टस्तवांतिकमगामहं तस्मा
दागच्छ त्वं शेष सत्यं ब्रूहि सभां गतः ३७ इति तद्वचनं श्रुत्वा विश्वामित्रमुवाच सः न मया शक्यते गंतुं धृतो मूर्धसहस्र
तः ३८ लोकभारो हरेराज्ञा गच्छ त्वं च यथासुखम् पश्चात्सूर्यं पयोधीमानिति तेन निराकृतः ३९ सूर्यं समाह्व
यांचक्रे स्ववृत्तांतं निवेद्य च सोप्याह न मया शक्यं गंतुं लोकहितेच्छया ४० नियुक्तो हरिणा पूर्वं यज्ञाद्यर्थं मुनीश्व
र कालज्ञानाय जगतां तस्माद्गच्छेति तं मुनिम् ४१ अगस्त्यं सपयोधीमान्सूर्येणापि निराकृतः मुनींद्रमाह्व
यांचक्रे सोप्याहात्मीयसंस्थितिम् ४२ अगस्त्योपि तमाहेदं मुने पूर्वं क्षितिस्त्वियं हिरण्याक्षेण दैत्येन कटवद्धा
निकुंच्य च ४३ नीता पश्चाद्वाराहेण हत्वा तं पुनरुद्धृता प्रसार्य स्थापिता भूमिः पूर्ववद्धरिणांजसा ४४ संस्का
रात्कटवद्भूयः पुनः संकुचिता क्षितिः पूर्ववत्स्थापनायाहं दिग्गजाश्चापि विष्णुना ४५ दक्षिणोत्तरतस्तेन स्थापि-
ता वयमत्र हि तत्रापि दक्षिणाशायां स्थापितोहं व्रजेति तं ४६ निराकृतस्ततस्तेन ब्रह्मलोकं पुनर्ययौ एतद्वृत्तां
तमखिलं ब्रह्मणोयन्यवेदयत् ४७ ते नागता इति श्रुत्वा स्वाधिकारेषु संस्थिताः वसिष्ठं प्रेषयामास त्रीनाहूय सह त्रिभिः ४८

मुनिं विश्वामित्रमाहेति पूर्वेण संबंधः ४१ आत्मन इयं आत्मीया सा चासौ संस्थितिः तां आत्मवृत्तमित्यर्थः ४२ कटवत् तृणास्तरणवत् निकुं-
च्य संकोच्य नीतेति अग्रिमेण संबंधः ४३ ४४ ४५ अहं स्थापितोस्मि त्वं व्रजेति तं आहेति पूर्वं चतुर्थेनान्वयः ४६ ४७ त्रिभिः शेषसूर्यागस्त्यैः सह
समागच्छेत्युत्तरेण संबंधः ४८

एतैर्महात्मभिःशीघ्रंसमागच्छेतितैःपुनः सोपिशेषांतिकंगत्वातमागच्छेतिचाब्रवीत् ४९ स्वाधिकारंनिवेद्याथनशक्य
मितिसोब्रवीत् तदेतद्वचनंश्रुत्वावसिष्ठोब्रह्मनंदनः ५० स्वदंडंस्थापयामासलोकोद्वाहनकर्मणि दंडेनचधृतेलोक
भारेतेनसहाययौ ५१ ततःसूर्यंसमासाद्यतमागच्छेतिचाब्रवीत् स्वाधिकारंनिवेद्याथनशक्यमितिसोब्रवीत् ५२
तच्छ्रुत्वाप्रहसन्मंदंवसिष्ठोब्रह्मनंदनः उदयादिनिदानत्वेशास्त्रंसूर्यरथेक्षिपत् ५३ पटेनैवंयथापूर्वंसूर्यंकृत्येकृते
सति सहाययौचशेषेणसूर्योलोकपितामहम् ५४ दक्षिणाशांततोगत्वामुनिंप्राप्यनिवेद्यच स्ववृत्तांतंयथापूर्वंतमा
गच्छेतिचाब्रवीत् ५५ स्वाधिकारंनिवेद्याथनशक्यमितिसोब्रवीत् अगस्त्यस्याधिकारेतुस्थापितःस्वकमंडलुः
५६ कृतेचोदकपात्रेणत्वकृत्येसमुनिस्तया साकंचसूर्यशेषाभ्यांब्रह्मलोकमथाययौ ५७ त्रीनाहूयययौशीघ्रं
वसिष्ठोब्रह्मणःपदम् उपवेश्याथतान्ब्रह्माविवादंचतयोरथ ५८ निवेद्यनिश्चितंब्रूतेत्येतानाहपितामहः त्रयस्तेब्र
ह्मणादिष्टाविश्वामित्रमथाब्रुवन् ५९ नशक्तिस्तेपुराचासीदस्मदाह्वानकर्मणि अस्मद्द्वारानयंचोद्वास्मानाहूय
सहाययौ ६० अनेनयुवयोर्विप्रस्फुटमन्यतरस्यच आधिक्यंत्वंविचार्यैवमनःपृच्छपुनर्मुने ६१ ब्रूहिसत्यंत्वमे
वेतिव्रीडयानिश्चलोभवत् तूष्णींस्थितेगाधिसुतेह्रियानम्रमुखेपिच ६२ ब्रह्मणाचाभ्यनुज्ञातायययुःस्थानंयथा
क्रमम् अंतर्ज्वलत्यमानःसन्विश्वामित्रोययौभुवम् ६३ पितरंचानुमंत्र्याथवसिष्ठःस्वाश्रमंययौ विश्वामित्रस्त
तःक्रोधाद्वसिष्ठस्याहितंस्मरन् ६४ ब्रह्मणश्चमनोकारंचिंतयंस्तपसिस्थितः तपसस्तुमहिम्नैवप्रतिसृष्टिंचकारह ६५
एतस्मिन्नंतरेकश्चिद्राक्षसोलोककंटकः तपसातोषयामासशंकरंलोकशंकरं ६६ पितरंब्रह्माणं ६७ प्रतिकारंवैरनिर्यातनम्

६५ ६६

१०७

६७ ६८ निश्चयंनिश्चितं ६९ नन्वेवंविधावरः किमर्थमस्मैराक्षसायशंकरेणदत्तइत्यतआह विश्वामित्रेत्यादिना वसिष्ठाहितायायत्विश्वामित्रतपस्तेन तुष्टः शंकरः तस्मैविश्वामित्राय पूर्वंराक्षसवरदानात्प्राक्वरंददावित्युत्तरेणसंबंधः ७० वरदानप्रकारमाह कांक्ष्यतीत्यादिचतुर्भिः हेविश्वामित्रयदाकश्चिद्राक्षसोमोक्षमुद्दिश्य तपः करिष्यतीत्यन्वयः ७१ दुष्टः आग्रहोऽभिनिवेशोयस्यसदुराग्रहः

शिवोप्याविरभूत्तस्य वृणीष्वचवरंत्विति आहतंसपुनश्चाह मोक्षंदेहीतिशंकरम् ६७ शंकरोपिविचार्याथपापि
ष्ठायेदमब्रवीत् देत्याहारवसिष्ठायदुष्टमानुषमांसतः ६८ स्वेनैवकर्मणासर्वगतिस्त्वायातिनिश्चये त्वद्भक्तिभ
वितातेनकर्मणास्वेनानिश्चयम् ६९ इतितस्मैवरंदत्वातत्रैवान्तरधीयत विश्वामित्रतपस्तुष्टोवसिष्ठाहितकांक्षया
७० तस्मैवरंददौपूर्वंकरिष्यतितपोमहत् राक्षसोमोक्षमुद्दिश्यकश्चिल्लोकस्यकंटकः ७१ जरामरणराहित्यमो
क्षेजातन्दुराग्रहः मुक्तिगाश्चाखिलानार्योब्रह्माण्याद्याःसहस्रशः ७२ आक्रम्यानुभविष्येहमनास्मद्दंडधरःक्ष
मःइत्येतत्तदुष्टमनसातपोदुश्चरमाचरन् ७३ स्यास्यत्यचिरकालेनतन्मार्गाद्भ्रंशयन्नहम् ददाम्यस्मैवरंक्रूरंतेनष्ट
तेभविष्यति ७४ तस्मात्तथावरंचास्मैशंकरोदात्सरक्षसे सराक्षसोलब्धवरःसंचरन्भुविदुष्टधीः ७५ उपाय
ज्ञोवसिष्ठायदातुंमानुषमामिषम् विश्वामित्राश्रमप्राप्तःस्ववृत्तान्तमचोदयत् ७६ तच्छ्रुत्वाचवचनंपश्चात्संतो
षाकुलमानसः आगतराक्षसधीरमुपायमपिसोब्रवीत् ७७

दुराग्रहमेवदर्शयति मुक्तिगाइति अहंमुक्तः सन् मुक्तिगाः मुक्तिप्राप्ताः ब्रह्माण्याद्याः सरस्वतीप्रमुखाः नार्योनारीः आक्रम्यबलात्कृत्यानुभविष्यइत्यभिप्रायानुषंगः ७२ तत्रहेतुमाह अस्मद्दंडधरःममशास्ताकोपिनक्षमः मुक्तत्वात्इतिमत्वा ७३ मार्गात्मोक्षमार्गात् ददामि दास्यामितदातेनवराक्षसायदत्तवरेणइष्टंवसिष्ठानिष्टरूपं ७४ तस्मात्विश्वामित्रायतादृशवरप्रदानात् ७५ स्ववृत्तांतंशंकरवरप्राप्तिरूपं अचोदयत्न्यवेदयत् ७६ ७७

सप्तद्वीपवतीपृथ्वी तस्याईशिताईश्वरः सूदःपाककर्ता ७८ ७९ ८० ८१ ८२ ८३ मेध्यस्य श्राद्धादियोग्यशशाद्यामिषस्यापेक्षया दुष्टं
मानुषामिषमित्यर्थः ८४ ८५ ८६ नृपकुलेनृपविषये ततःसकल्माषपादइतिशेषः नमयेदंकृतमित्यादिविचार्यगुरवेशापंदातुंउत्थि·

नृपः कल्माषपादोस्तिसप्तद्वीपवतीशिता गृहंगच्छभवाशुत्वंसूदःपाकविशारद ७८ अचिरेणास्यकालेनपितुःश्रा
द्धंभविष्यति पुरोहितोवसिष्ठश्चतत्रागच्छतितिनिश्चितम् ७९ तदात्वंकपटेनैवदेहिमानुषमामिषं ततोमनोरथस्तेतुभ
वितानात्रसंशयः ८० इतितेनसमाज्ञप्तोजगामाथसराक्षसः कल्माषपादसदनंसूदरूपीचदुष्टधीः ८१ पश्चादल्पे
नकालेनतेनाहूतःपुरोहितः वसिष्ठःश्राद्धदिवसेचाजगामनृपालयम् ८२ ततोमध्यान्हवेलायांकिंचिन्मंदायितेरवौ
ब्राह्मणान्भोजयामाससनृपःश्रद्धयान्वितः ८३ तदासराक्षसःपापीवसिष्ठायमहात्मने मेध्यस्यचामिषस्याथदु
ष्टंमानुषमामिषम् ८४ ददौपश्चाद्वसिष्ठोऽपिज्ञात्वादुर्गंधतोऽशुचि मांसंमानुषमित्येवकोपात्ताम्रविलोचनः
८५ शापंददौनृपायास्मैयत्त्वयादत्तमामिषं मानुषंतद्भवाशुत्वंराक्षसोमानुषाशनः ८६ मुनेःकोपंनृपश्छतेज्ञात्वा
सूदःपलायितः नमयेदंकृतंकर्मवृथाशापंददौमुनिः ८७ अविचार्यततस्तस्मैपुनःशापंददाम्यहं इतिचांजलिनानी
रमादायोत्थितन्नृपाशुतं ८८ भार्यानिवारयामासगुरुरित्येवबोधयत् भार्यानिवारितोनीरंपादयुग्मेव्यविक्षिपत् ८९
तेनदग्धौचतत्पादावभूत्कल्माषपात्ततः शापंदत्वावसिष्ठोपिस्वाश्रममत्यपद्यत ९० ततःसराक्षसोभूत्वावनेचोचा·
सभूमिपः राक्षसीयोनिमापन्नविश्वामित्रस्तकभूमिप ९१ योनिदोषाद्दुष्टबुद्धिर्बोधयामासचित्रधा दुर्जनादंडसा·
ध्याहिनगुणेनकदाचन ९२

तइतिद्वयोरन्वयः ८७ तंनृपम् ८८ बोधयत् अबोधयत् अडागमा
भावश्छांदसः ८९ ९० ९१ बोधनप्रकारमेवाह दुर्जनाः गुणेनशांत्यादिनानसाध्याइत्यर्थः ९२ ९३ ९४

अयंवसिष्ठः येनताभिः संपद्भिः त्वमितिशेषः वियोजितोसि ९३ ९४ ९५ ९६ ९७ ९८ ९९ १०० तस्यविलापमाह किमर्थमि-

अयंस्वभावतोदुष्टोमुनिश्छिद्रदुराग्रही विद्यमानासुसंपत्सु वृथाताभिर्वियोजितः ९३ त्वयातस्यततोदंडःका-
र्यःसम्यङ्नसंशयः पुरातेननृपःशप्तस्त्रिशंकुश्चपृथुश्रवाः ९४ चांडालत्वंसमापन्नोदिविदेवैर्निराकृतः मच्छिष्यो
भूत्तदासोपितस्मैस्वर्गंप्रकल्प्यच ९५ स्थापितोदिविचाद्यापिदृश्यतेचांबरेजनैः गत्वातदाश्रमंरात्रौतस्मात्त्वंपृ-
थिवीपते ९६ शक्तिज्येष्ठान्शतपुत्रान्भक्षयेतिचबोधितः योनिदोषात्सभूपोपिरात्रौगत्वातदाश्रमं ९७ समाधि
स्थेवसिष्ठेचतत्सुतांश्चैवनिद्रितान् भक्षयामासपापात्माक्षणेनैवमहाबलः ९८ अरुंधतीरुरोदाथलुंठतीबहु-
शोभुवि आर्तस्वरततःश्रुत्वावसिष्ठोब्रह्मनंदनः ९९ मृतान्पुत्रांस्ततोदृष्ट्वाशोकानलविदूषितः मूर्छामापमु-
हूर्तंतुपुनःशोकाद्रुरोदसः १०० किमर्थंविधिनादत्ताःपुत्रसंपत्करावहा हृतानेनैवविधिनादयाहीनेनचा-
कृतः १०१ तथैवजन्मतःशुद्धाःसदाचारादयालवः आयुःक्षयंनपश्यामिकारणंचविधिंविना २ शक्तेभगोदयो
जातस्तातोत्तिष्ठक्रियांकुरु गच्छभद्रकुशार्थंत्वमयासाकंनदींव्रज ३ नाप्रियंचोदितंपित्रामात्रावापिकदाच
न कृतोवास्नेहविच्छेदःकुतोलोकांतरंगतः ४ शून्यानिवाकुटीराणिकथंपश्यामिचान्वहं कालोमाध्यान्हि
कोजातःस्नानागच्छगृहान्प्रति ५ भुंक्ष्वमांबाधतेक्षुच्चकोचेत्थंमांवदिष्यति किंभुक्तास्थकुमारामेकानुद्दिश्य
वदाम्यहम् ६ निर्बाधंवर्ततेचांकःलड्डुबालफलंत्विति चक्षुर्हीनेनविधिनादुर्जनालोककंटकाः ७

स्यादिभिः १
दयालवःयेपुत्रास्तेषामायुःक्षयेइतियोजना २ भगोदयः सूर्योदयः ३ कुतोवालोकांतरंस्वर्गलोकंगतोऽसीतिशेषः ४ ५ मेकुमाराःभु-
क्ताःकिं भोजनंकृतवंतःकिमितिकानुद्दिश्यवदामि ६ अंकःयुष्माकमारोहणार्हःउत्संगःनिर्बाधंबाधरहितंयथातथावर्ततेयूयमेवनष्टाः

स्येति भावः विधिनानदृष्टा इत्युत्तरेणसंबंधः ७ सः वसिष्ठः वृथानिष्फलेनेत्रे यस्येतितथा हे वृथानेत्र इत्यात्मानं संबोध्यताडयन् पांसुपिंडान्
रजोमुष्टीः ९ हावत्सेखेदंचकारेत्यर्थः १० ११ तेषामेवस्वयमेवकारणेइत्थंध्वन्यते येस्तस्यौर्ध्वदैहिकंकर्तव्यं तेषामेवसत्कारयामासेति १२ १३

गृहद्वारनिकटस्थामेपुत्रादृष्टिपथंगताः पुनर्लुठंश्चभूमौसः शिरोवक्षस्तताडच ८ प्राक्षिपत्पांसुपिंडानि वृथानेत्रेति
ताडयन् कुटीराण्यथतेषांचदृष्ट्वादृष्ट्वापुनःपुनः ९ तत्रतत्रचहावत्सेपुत्रपुत्रेतिवैरुदन् कुंडलानितदीयानिगृहीत्वा-
ह्वयतिक्षणं १० क्षणात्तूष्णींगलद्बाष्पोरात्रिशेषमनीनयत् बांधवाःप्रातरागत्यसांत्वनैःपर्यसांत्वयन् ११ मायेमा-
सिमृतानांचसत्पुत्राणांमहात्मना कथंचित्कारयामासतेषामेवौर्ध्वदैहिकम् १२ प्रत्यहंस्वगृहंगच्छन्मृतपुत्रानथा-
ह्वयन् प्रलपन्मतपश्चित्यंसोढुंनैवसशाकसः १३ मरणायोद्यमंचक्रेविषपूर्वंजघाससः भुक्तंजीर्णंविषंतस्यभो-
क्तव्यत्वान्महात्मनः १४ प्रविवेशानलंपश्चान्मेरुमंदरसन्निभं शांतोभवत्ततोवन्हिर्भोक्तव्यत्वान्महात्मनः १५ मेरुशृं-
गंसमारुह्यपपाताधस्तलेमुनिः नततोपिमृतिंप्राप्तोभोक्तव्यत्वाच्चकर्मणः १६ सिंहव्याघ्रादिवदनेप्रवेशमपिचेच्छ-
ति जगृहुर्नैनमाशासुमृगाः क्वापिकदाचन १७ गिरिंबध्वोदरेपश्चात्पयोधौसपपातच तत्रापिनमृतिंप्रापभोक्त-
व्यत्वाच्चकर्मणः १८ पश्चात्खड्गंसमादायशिरश्छेत्तुमथोद्यतः ब्रह्मातत्राजगामाथस्वपुत्रमनुसांत्वयन् १९ उवा-
चचाश्रुपूर्णाक्षंश्रांतंश्रांतंपुनःपुनः विबोधतातमहाश्चर्यंवयंशंकरपूर्वकाः २० बलिंवहामदेवायसदातद्वशवर्ति-
नः यस्मात्तत्कस्वंदुःखंसंगतोगुरुकर्मणाम् २१ चक्षुष्मतानीयमानोऽचक्षुष्मानिवनित्यशः ईशदत्तंचभोक्तव्य-
मत्पूर्वैः किमुतापरैः २२ कर्षणाद्भ्राम्यमाणानांजनानामिहसंसृतौ ऋणानुबंधरूपेणप्रपायामिवसंगतिः २३

१४ १५ कर्मणः प्रारब्धस्य १६ आशासु दिक्षु १७ १८ १९ शंकरपूर्वकाः शिवप्रमुखाः २० २१ अचक्षुष्मानंधः मत्पूर्वैः अस्मत्प्रभृतिभिः २२ २३

ईश्वरः विपणंसंसाराख्यंक्रयस्थानंकृत्वाजनान्जीवरूपाननडुहोबलीवर्दान्वेदाध्वनि भागवतेतंतिशब्दरूपितायांवेदपङ्क्तौगुणोरज्जुः इत्याह्व योनामयस्य तस्मिन्नाम्निजात्येकवचनंब्राह्मणक्षत्रियादिनामस्वित्यर्थः नासारज्जुंव्यक्तिगतनामरूपंबध्वा लोकेहिगलबंधनमात्रेण।स्वाधीनस्यदुर्दांतवृषभस्यकंठबंधनीयंदामतन्नासाप्रोतरज्ज्वामेवबध्यतेइतिप्रसिद्धिः पापपुण्याख्यभारंवाहयतीत्यग्रिमेणान्वयः वहतेर्हिंकर्मकत्वाद्भारानडु

ईश्वरोविपणंकृत्वाजनाननडुहोबली नासारज्जुंनाम्निबध्वावेदाध्वनिगुणाह्वये २४ पापपुण्याख्यभारंतंवाहय
त्यनिशंहरिः नशक्तोहंनिराकर्तुंशक्यतेवाकुतश्चनः २५ इत्यादिबहुभिर्वाक्यैःसतत्वैश्चपितामहः दुःखंचशम
यामासवसिष्ठस्यमहात्मनः २६ पुनःपप्रच्छब्रह्माणंवसिष्ठोमुनिपुंगवः संततेर्वाकथंभूयादभिवृद्धिरितःपरं
२७ नमेकोप्यवसिष्ठोभूच्छतपुत्रेषुसत्स्वपि कृत्वामेसंततेर्वृद्धिंशमदुःखंचमामकम् २८ इतिपृष्टस्ततस्त्वा
हब्रह्माब्रह्मविदांवरम् पुत्राश्चस्वर्गताब्रह्मन् माघमासप्रसादतः २९ यद्गत्वाननिवर्तंतेतांगतिंप्रापुरोजसा
पुनरुज्जीवनेतेषांकथंशक्तिर्भविष्यति ३० तस्माच्छक्तेश्चभार्येयंगर्भिणीलोकसुंदरी विश्वामित्राज्ञयाभूयः
पुनरेतांतुगर्भिणीम् ३१ हनिष्यतिनसंदेहस्तस्मादेतांमहामते मनुनानेनतांरक्षस्नुषांतेगर्भिणींमुने ३२
माधवस्तवराजेनह्युपदिष्टेनविष्णुना तेनगुप्तांस्नुषांहंतुंशक्तोनैवसराक्षसः ३३ विश्वामित्रकृतामायानिरर्था
तुभविष्यति माघेमकरगेभानौकुरुस्नानंयथाविधि ३४ तेनवंशोभवेद्विष्णुर्व्यासरूपीजनार्दनः इतितंबोध
यामासददौमंत्रमनुत्तमम् ३५ ब्रह्माययौततःपश्चात्स्तूयमानःसुरोत्तमैः शोकंमुक्त्वावसिष्ठोपिस्तवराजेनगर्भिणीं
३६

होःकर्मत्वं २४ अन्येनेतिशेषः अन्येनापिनशक्यतइत्यर्थः २५ सतत्वैःतत्वज्ञानसहितैः २६ २७ शमशमय २८ २९ ३० ३१
हनिष्यति कल्माषपादइतिशेषः अनेनपूर्वाध्यायोक्तेन मनुनामाधवस्तवराजाख्यमंत्रेण ३२ ३३ ३४ भवेत् अवतरिष्यतीत्यर्थः ३५ ३६

जलेऽप्लुतिंस्नानं ३७ वसिष्ठइतिशेषः पौत्रायपराशराय ३८ १३९ इतिवायुपुराणेमाघमाहात्म्यटीकायांषड्विंशोऽध्यायः २६
हत्याशतंब्रह्महत्याशतंकर्त्तृ १ ऊर्ध्वकेश्यादीनिहत्यानांविशेषणानिऊर्ध्वकेश्यादिरूपाः हत्याः तिष्ठंतमित्यादिविशिष्टंविश्वामित्रं अनु

रक्षयामासत्दृष्ट्वात्माकुर्वन्माघेजलाप्लुतिं तेनपुण्यप्रभावेणपुत्रोभूत्त्वपराशरः ३७ तस्माज्जज्ञेमहाविष्णु
व्यासरूपीरमापतिः ददौमंत्रंचपुत्रायसोपिव्यासस्समावदत् ३८ इतिक्रमाद्भुविख्यातः सर्वरक्षाकरोत्य·
यम् मंत्रागमप्रकारश्चकथितस्तेमुनीश्वराः ३९ इतिश्रीवायुपुराणेमाघमाहात्म्येषड्विंशोऽध्यायः २६
गालवउवाच विश्वामित्रंमहात्मानंततोहत्याशतंमुनिम् पीडयामासनियतंपरिचार्याप्यहर्निशम् १
ऊर्ध्वकेशीविरूपाक्षीऊर्ध्वबाहुर्भयंकरी तिष्ठंतंचस्वपंतंचनिश्वसंतंभयाकुलम् २ गच्छंतंप्रस्खलंतंचधावंत्य
नुमहामतिम् दुद्रुवेभयतःशीघ्रंयमस्यांतिकमेवसः ३ तमुवाचततोभीतस्त्राह्यस्मादितिसादरं ततोदंडधरः
प्राहनमेशक्तिरितिस्फुटम् ४ एवंनिराकृतस्तेनवरुणांतिकमाययौ तमुवाचततोभीतस्त्राह्यस्मादितिसादर ५
ततःपाशधरःप्राहनमेशक्तिरितिस्फुटम् एवंनिराकृतस्तेनसूर्यस्यांतिकमाययौ ६ तमुवाचततोभीतस्त्राह्यस्मा
दितिसादरं हरिदश्वस्ततंप्राहनमेशक्तिरितिस्फुटम् ७ एवंनिराकृतस्तेनसोमस्यांतिकमाययौ तमुवाचततोभी
तस्त्राह्यस्मादितिसादरम् ८ तमुवाचाब्धिजश्चंद्रोनमेशक्तिरितिस्फुटम् एवंनिराकृतस्तेनदेवेंद्रस्यांतिकंय·
यौ ९ तमुवाचततोभीतस्त्राह्यस्मादितिसादरम् ततोवज्रधरःप्राहनमेशक्तिरितिस्फुटम् १० एवंनिराकृतस्तेन
रुद्रस्यांतिकमाययौ तमुवाचततोभीतस्त्राह्यस्मादितिसादरम् ११

वंतीत्यग्निमेषणसंबंधः २ सःवि
श्वामित्रः ३ अस्मात् हत्याशनात् ४ ५ ६ हरिदश्वः सूर्यः ७ ८ ९ १० ११ ष

मुनौधावतिसति ब्रह्महत्याशतमनुधावतीतियोज्यम् १२ १३ १४ १५ १६ रुधंरुध्यतेजनैरितिरुत् मार्गः तंरातीतिरुद्रः सन्मार्गप्रदइत्यर्थः १७ यथेष्टाचरणाज्जीवकदंबंरुंधंतीतिरुधोवेदास्तान्रातिददातितथारुद्रः १८ सर्वलोकानांजेताकामः पतःसकाशाद्रुद्रः

श्रुत्वारुद्रः सहगणैस्तत्रैवांतरधीयत ब्रह्महत्याशतंपृष्टमनुधावतिधावति १२ ततस्तुष्टावतंरुद्रंभगवंतंमहेश्वरम् संसाराख्योमहारोगोयन्नामस्मृतिमात्रतः १३ दुद्रुवेत्वत्तोरुद्रतस्मैतुभ्यंनमोनमः यन्नामस्मरणात्पापद्रुद्रुवेचद्रुतंयतः १४ अतोरुद्रोसिभगवान्तस्मैतुभ्यंनमोनमः क्षयापस्माररोगादीन्यतोद्रावयतेहि यः १५ अतोरुद्रंवदंतित्वांमुनयस्संशितव्रताः रुजंद्रावयतेयस्मात्तस्माद्रुद्रंविदुर्बुधाः १६ नमस्तस्मैभगवतेनिदानायश्रियामपि रुधमार्गमितिप्राहुस्तंमार्गरातिवैसताम् १७ अतोरुद्रमितिप्राहुर्नमःसन्मार्गहेतवे रुधोवेदाःसमुद्दिष्टागतिदाःशाश्वताइमे १८ तान्रात्यादौसतांयस्माद्रुद्रत्वामुनयोविदुः जयिष्णुःसर्वलोकानांत्वत्तोरुत्धोमनोभवः १९ अतोरुद्रेतित्वांप्राहुस्तस्मैधूर्जटिनेनमः रुधमावरणाविद्यांप्राहुर्ब्रह्मविदोजनाः २० तस्यांतःपावकोयस्माद्रुद्रस्तुभ्यंनमोनमः त्रैपुराणांचदैत्यानांयतोबाष्पविमोचनं २१ यतोराति ततोरुद्रोमृडस्तस्मैनमोनमः रुदितिज्ञानमुद्दिष्टंतद्रात्यस्मादमुंततः २२ वदंत्येनरुद्रमितिनमस्तस्मैमहात्मने रुधःक्रियाःसमुद्दिष्टास्तासांसाक्षीयतोहरः २३ अतोवदंतित्वांरुद्रंनमस्तस्मैवृषध्वज रुद्रशब्दनिरुक्त्यैवतुष्टोरुद्रोमहाप्रभुः २४

प्रतिबन्धोऽभवदित्यर्थः १९ आवरणाविद्यांस्वरूपाच्छादिनां अविद्यांरुधंरुणद्धि आवृणोति स्वरूपमितिरुत्तांतथाभूतामाहुः तस्याः रः अग्निरिवेतिरुद्रः अविद्यादाहकः २० त्रैपुराणांत्रिपुरवासिनांरुदनइतिरुद्रोदनंतद्रातीतिरुः यतोरोदनाद्बाष्पाणांविमोचनंस्यात् यतः तद्रातिततोरुद्रइतियोजना २१ अमुंएनंजीवसमुदायं २२ रुधः क्रियाइति रुधंति संसारेजंमितिरुधःक्रियाः २३ रुद्रशब्दस्यनिरुक्त्यानिर्वचनेन २४

माघ्यांमघायुक्तपूर्णिमायां २५ परब्रह्मैव ऋषिर्मंत्रवक्तादेवताप्रतिपाद्यश्चयस्यास्सा २६ २७ २८ २९ ३० ३१ ३२ जपन्नृणांजपतांनृ·

माघ्यांजपेतिगायत्रींतमुवाचांतरिक्षगः ततःसप्तनदीसंगंप्राप्यमाघ्यांमहामुनिः २५ स्नात्वारुद्रंप्रतिष्ठाप्यसम्यक्·
संपूज्यभक्तितः गायत्रींचजजापासौपरब्रह्मर्षिदेवताम् २६ वेदमातुर्जपान्माघ्यांस्नानाद्रुद्रस्यस्थापनात् ब्रह्म
हत्याशनेनापिसद्योमुक्तोभुनीश्वरः २७ ततःप्रभृतिगायत्र्याविश्वामित्रोऋषिःस्मृतः गोवधाद्युपपापानिक्षुद्रपा
पानियानिच २८ तानिसर्वाणिनश्यंतिगायत्र्येकजपाद्ध्रुवम् गायत्रींचजपेन्माघेसकृदंगुलिपर्वणि २९ प्रातःस्ना
त्वाशुचिर्भूत्वाब्रह्महत्यांव्यपोहति गायत्रींजपतेयस्तु नित्यंमाघेजलाप्लुतः ३० नलिप्यतेपातकेनपद्मपत्रमि·
वांभसा स्नात्वामाघेजपन्वेदमातरंचद्विजोत्तमः ३१ सर्वान्कामानवाप्नोतिसर्वयज्ञफलंलभेत् योवेदमातरंनि
त्यंमासेष्वेतेषुवैपठन् ३२ जपेनैकेनलभतेराजसूयाधिकंफलम् माघेमासिजपन्नृणांतस्मात्कोटिगुणंभवे
त् ३३ योवेदमातरंनित्यंमाघेस्नात्वाबहिर्जले कुष्ठरोगाद्विनिर्मुक्तःपरासिद्धिमवाप्नुयात् ३४ विश्वामित्रस्तपः
सिद्धिंगायत्र्याश्चप्रभावतः प्राप्यसंतोषमापेदेस्तुवन्माघफलंपुनः ३५ मंत्रगर्वात्पुनश्चापिवसिष्ठाधिक्यकांक्ष
या दुश्चरंचतपस्तेपेजपन्वैवेदमातरम् ३६ दिव्यषष्टिसहस्रंतुवर्षाणिक्रोधविह्वलः मुष्टिमात्रमयश्चूर्णमाहा
रार्थंप्रकल्प्यच ३७ तपस्तेजःसमुद्भूतोवह्निरूर्ध्वंददाहसः त्रीन्लोकानभितोत्यंतान्दिशांप्रज्वलितोमहान्
३८ इंद्रस्तुभयमापेदेतपसोस्यमहात्मनः किमुद्दिश्यतपस्त्वेषप्रायोमत्पदमिच्छति ३९ तपोविघ्नस्ततःकार्य
इतिदेवैःसमन्वितः कामंचप्रेषयामासतत्तपोविघ्नसिद्धये ४०

यां ३२ वेदमातरंगायत्रींजपेदितिशेषः

३४ ३५ ३६ प्रकल्प्य कल्पयित्वा तपस्तेपइतिपूर्वेणान्वयः ३७ दिशां अंतान् प्राप्तान् ३८ ३९ ४०

माधवेनवसंतेन ४१ ४२ ४३ जिघृक्षयाग्रहीतुमिच्छया अनुद्रुतवान् अनुधावतिस्म ४४ असाविंद्रः ४५ शक्रेउदितेसभांप्राप्तेस

तस्याश्रमंययौधीमान्माधवेनसमन्वितः पुष्पभारभराक्रांतांस्तरून्कामप्रबोधितान् ४१ अकरोन्माधवःसद्यो
मोहकृन्महतामपि दृष्ट्वाकालंवसंतंतंकिमेतदितिचिंतयन् ४२ इदंकृत्यमितिज्ञात्वाकामंचागतमित्यपि व्या-
घ्ररूपंसमास्थायतंकामंसाप्सरोगणं ४३ जिघृक्षयानुद्रुतवान्तंदृष्ट्वादुद्रुवेस्मरः कोपासन्नोगाधिपुत्रोहन्यान्
मामप्यत्रमुनिः ४४ नतस्याशक्यमित्येवदेवेंद्रायन्यवेदयत् पुनःसभांप्रविष्टोसौचिंताव्याकुलमानसः ४५
प्राहकेनतपोविघ्नोभवेदस्यमहात्मनः दुःखेनैवोदितेशक्रेप्राहदेवेंद्रमूर्वशी ४६ शृणुशक्रप्रवक्ष्यामित्यज-
दुःखकरंस्वयम् जयामीमंमुनिंतुकापट्येनैवयोषिताम् ४७ मद्वाक्यंकुरुशक्रत्वंत्यजसंदेहमंजसा म-
हातोपिविमुह्यंतिमाययायोषितांध्रुवम् ४८ पुरूरवामुनींद्रश्चमैत्रावरुणसंज्ञकः रुक्मांगदःशंतनुश्चमनु-
जाःकिमुतापरे ४९ सूर्यचंद्रौसमाहूयराजानौभवतत्विति आज्ञापयमहाबाहोइंदुपूर्यौकुरुतांत्विति कुरु-
तांतौप्रजापीडांपरस्परजयेच्छया ५० विद्रवंतिप्रजाःसर्वाराजन्विदुरतस्तदा साध्वीरूपंसमास्थायसहते
श्चपलायिता ५१ तदाश्रमंचसायान्हेयाम्येवातीवसुंदरी नदृष्ट्वापतिपुत्राद्यैःस्यामहाविरहातुरा ५२
तदाचातिथिकालेनुसायान्हेगृहमागते शोचतीपतिपुत्रादीन्यायातस्यांतिकंशनैः ५३ तदाचातिथिका
लत्वाद्दीनामांचक्षुधातुराम् कृपयाविद्धचित्तःसन्नातिथ्यंमेकरिष्यति ५४ तदाहंतंप्रवक्ष्यामिच्युतमा
र्गोऽबलानिशि क्षयास्याम्यद्यमारक्षप्रातर्गच्छामिमार्गयन् ५५

ति ४६ ४७ ४८ ४९ तौचंद्रसूर्यौ ५
विद्रवंतिवर्त्तमानसामीप्याद्वर्त्तमानवन्निर्देशः विदुरतःविप्लवात् ५१ ५२ मुनौगृहमागतेसति यायांयास्यामीत्यर्थः ५३ ५४ ५५

मार्गयन् पुंस्त्वमार्षं मार्गयंतीत्यर्थः ५६ एवंपूर्वोक्तप्रकारेण तंविश्वामित्रं विप्रलंभये वंचये वर्तमानसामीप्यात्तथानिर्देशः ५७ एतिए
ते ५८ व्रजे व्रजामि सारमेयस्वरूपेन श्वानरूपेण ५९ आश्रमस्य विश्वामित्राश्रमस्य आरात्समीपे ६० तंघातीकृतं मुनिं विश्वामित्रं

पतिभ्रातृसुतादींश्चचरंतीपतिपद्धतिम् । आर्तानांगतिहीनानामंगनानांतुसागतिः ५६ सद्राजाच्चमहां
तोपिएवंशास्त्रविनिर्णयः तस्मान्मामद्यसरक्षत्वमेवाविप्रलभये ५७ रात्रौकामोमुनींद्रेतुसक्तेबाणप्रसार-
णम् करोतुतेनविद्धःसन्सद्योमामेतिनिश्चयम् ५८ आज्ञापयततःशीघ्रंकृत्वाकार्यंपुनर्व्रजे सारमेयस्व-
रूपेणविरहंमेसहिष्णुना ५९ सद्घातेनमुनिनापुनर्यामितवांतिकम् त्वमप्यारादाश्रमस्यराजाभूत्वाभुवंव्र-
ज ६० सभायातेतुपश्यतुविसिष्ठाद्यामुनिव्रतम् इतितस्यावचःश्रुत्वाशक्रःकौतूहलाकुलः ६१ आहूयवि-
श्वकर्माणंपुरीनिर्माणहेतवे ममचेंदोःपतंगस्यपुरास्तिस्रोगुणाकराः ६२ कुरुशीघ्रंभुवंगत्वातामित्याज्ञापयत्प्रभुः
सोपिभूमिंसमासाद्यपुरीस्तिस्रोविनिर्ममे ६३ तटयोरुभयोर्नद्याःकृष्णावेण्यामहाबलः सोमशीलासूर्य-
शीलांतथाराजशिलामपि ६४ सोमसूर्यौनृपौभूत्वास्वनामाढ्यापुरींगतौ विवादंचक्रतुस्तत्रक्रुद्धाविवप-
रस्परम् ६५ शक्रोराजशिलांप्राप्यसुखमासीन्निराकुलः मायायुद्धमभूत्तत्रतदावैचंद्रसूर्ययोः ६६ यदात-
योर्जिगमिषोस्तदादेशांतरंचते दुद्रुवुश्चयथाकामंराजविड्वरतोजनाः ६७ काचित्पतिंसुतंकाचित्काचिद्बंधून्-
विहायच उर्वशीनुतदागस्त्यसाध्वीरूपमुपेयुषी ६८

६१ पतंगस्य सूर्यस्य गुणाकराः गुणवत्य इत्यर्थः ६२
प्रभुरिंद्रः ६३ ६४ ६५ मायायुद्धं कपटसंग्रामः ६६ मयोर्जिगमिषोः सतोः ६७ ६८ ६२ ६९

६९ ७० ७१ ७२ ७३ यायजूकस्ययज्ञशीलस्यबहिस्कृतन्नामकस्येतिभ्रमः ७४ ७५ दुर्जनाःरक्षकंविनाऽटंतींबालांमांभोक्ष्यंतीतिनिश्चित्यतवांतिकमागतास्मीत्युत्तरेणान्वयः ७६ सदर्चिषा साधुतेजसा ७७ ७८ विप्रलब्धः वंचितः ७९ ८० ८१ तस्मादु

मार्गभ्रष्टेवसाखिन्नारुदंतीवशनैर्भयात् स्मरंतीपतिपुत्रादीन्पश्यंतीवदिशोदश ६९ कुचित्स्थानांक्वयांचक्रेस-
ध्योलोकभयशंकरी शनैस्तदाश्रमंप्राप्यसायान्हेसाश्रमंगता ७० रुदंतीसाबलाखिन्नागृणंतीनामतःस्वकान् ता
न्दृष्ट्वाकृपयाविष्टोविश्वामित्रोमुनीश्वरः ७१ पप्रच्छकुशलंकासिकस्यपुत्रीपतिश्चकः कस्माद्रुदसित्वंबालेकु
तश्चेतःसमागता ७२ इतितस्यवचःश्रुत्वासानारीवाक्यमब्रवीत् नारायणस्यकन्याहंनाम्नाकांतालकेतिच ७३
यायजूकस्यपत्नीचविद्धिनिस्पृहमांमुने अदृष्ट्वापतिपुत्रादीन्रुदंतीकरुणास्वरा ७४ राजविड्वरतोभीताजनाः
सर्वेपलायिताः अकस्माद्द्रुतवेचाहंविहायात्मजनानिह ७५ निरीक्ष्यदुर्जनाबालामटंतींरक्षकंविना भोक्ष्यंतीत्ये
वनिश्चित्यशंकयाहंतवांतिकम् ७६ सायान्हेचागताधीराज्ञात्वात्वांचतपोनिधिम् साध्वीनांचैवसंरक्ष्यपातिव्र
त्यसदर्चिषा ७७ मुनेचार्हसितुयोग्यस्त्वंसाधूनांनसंशयः स्वःश्रुत्वाबांधवाःसर्वेविश्वसंतिनसंशयः ७८ तस्मा-
न्मामद्यत्वंरक्षकुरुष्वातिथ्यमेवच इतितस्यावचःश्रुत्वाविप्रलब्धोमुनीश्वरः ७९ ओमित्युक्त्वाऽकरोत्तस्यैचातिथ्यं
चफलादिभिः गुहायांतांविनिक्षिप्यस्वयंद्वारिस्थितोमुनिः ८० क्षणंनिद्राचकारासौतन्मध्येकामउल्बणैः श
रैर्विव्याधतंविप्रंतेनासौज्वलितोभवत् ८१ निंदयन्मनसात्मानंबहुधापिमुनीश्वरः आहृत्याहृत्यचमुनिर्मनस्त
स्माद्दुराग्रहात् शतवारंमुनींद्रोसौप्रत्यागत्यधृतव्रतः ८२

वेशीसमागमविषयकात् मनश्चाहृत्याहृत्य पुनःपुनर्निवर्त्यशतवारं प्रत्यागत्यतांगत्वा पुनरागत्य आत्मानंनिंदयन्नासीत् ८२

८३ प्रलपत् प्रलापंचक्रे अडभावश्चार्षः ८४ ८५ तयामार्गभ्रंशकालेदुर्जनामांभोक्ष्यंतीत्यादिप्रकारेणआविलपंतिच अत्रवकारोव
धारणेविलापंकुर्वंत्येवसद्यः अस्यमुनेर्वशगता ८६ ८७ ८८ तांपुनर्निगृह्यालिलिंगेतिशेषः ८९ प्रतिश्रुतैः प्रतिज्ञाभिः क्वापिकदा

तथापिनशशाकासौमनोनिग्रहणेमुनिः कृशोदरीमालिलिंगकामांधोबहुनिंदिताम् ८३ साबुद्ध्वाप्रलपच्चित्रं
साध्वीवान्यवशंगता किंकरोषिमुनेचित्रंत्वांविश्वस्तासमाश्रिता ८४ अविचार्यागतायामेगतिःकावाभवि
ष्यति धर्मसेतुस्त्वभग्नोद्यमुनिनानेननिश्चयम् ८५ विलपंतीवृचतथामुनेरस्यवशंगता यथान्यस्त्वांविहाया
न्यांपतिःपरिणयिष्यति ८६ लोकभीत्यास्वभावाद्वामनोनिर्वर्त्यस्वमुने कृत्वात्वंदूषितांलोकेमांविहायगमि
ष्यसि ८७ अहमेकातदानष्टात्यजमांमूढधीस्ततः इतिनिर्भर्त्स्यतंबालानिर्ययौस्वगुहामुखात् ८८ पुनर्निगृ
ह्यतांबालांबलात्कारान्मुनीश्वरः प्राणत्यागेमतिंचक्रेगलबध्वाकुमारिका ८९ तदातांसांत्वयामासबहुधैवप्र
तिश्रुतैः विश्वस्तासाप्रतिश्रुत्यमुनिवाक्यमथाब्रवीत् ९० नत्याज्याहंत्वयाक्वापित्वन्निषेधेममापिच स्वेच्छ
यागमनेविप्रधर्मःसाक्षीतित्वंवद ९१ ओमित्युक्त्वातयारेमेषष्टिवर्षसहस्रकम् नित्यकर्मादिकंसर्वंत्यक्त्वा
वान्कामुकोमुनिः ९२ तेनदोषेणतस्यापिकुष्ठोभूत्सार्वदैहिकः गंतुंविहायतंनारीशनैःसाचोपचक्रमे ९३
विश्वामित्रंतदाप्राहमुनेदूरेस्तिबांधवः मातुलेयश्चतंद्रष्टुमिच्छामेजायतेभृशम् ततोगच्छामित्वंतिष्ठपुन
र्यामिनसंशयः ९४ इतितस्यावचःश्रुत्वाविरहाकुलमानसः त्वयैवसहयास्यामित्वांविनानोत्सहेक्षणं ९५
इतितद्वचनंश्रुत्वामुनिवाक्यमुवाचह जारंतुत्वांसविज्ञायमातुलेयोहनिष्यति ९६

कदापि त्वन्निषेधेत्वत्कर्तृ
केनिषेधे प्रत्याख्याने ममापिचेतिकर्तरिषष्ठी मत्कर्तृकेस्वच्छंदगमनेचधर्मःसाक्षीतिवद ९१ ९२ ९३ ९४ ९५ ९६

९७ ९८ तस्यविश्वामित्रस्य इदंवाक्यंउरीकृत्यांगीकृत्य ९९ १०० १ २ ३ ४ निर्विण्णमनुतप्तं ५ ६ हरिणाइंद्रेण ७ ८

मांचतत्रनसंदेहतनः शंकेत्वयासह गंतुंनचोत्सहेतिष्ठशीघ्रंयामिपुनर्मुने ९७ पुनस्तस्यावचः श्रुत्वामुनिर्वा
क्यमुवाचह प्राप्याहंसारमेयत्वंत्वयासाकंव्रजामिच ९८ त्वत्पोषितंचजानातिनावयोर्विरहोभवेत् उरीकृ
त्यचतस्येदंसारमेयंस्वरूपिणा ९९ सार्धंतेनमुनींद्रेणअयोराजशिलांपुरीम् देवेंद्रस्यसमामध्येस्थितेयंदे
वरूपिणी १०० विश्वामित्रंवसिष्ठस्तुकिमेतदितिचाब्रवीत् आत्मानंचात्मनानिंदन्व्रीडयावनतोभवत् १
विश्वामित्रंनिरीक्ष्याथदेवेंद्रोवाक्यमब्रवीत् तथ्यंवदामिनातथ्यंहितंबुध्वास्करवव्रज २ महदतिक्रमणंपुंसा
मनर्थायभवेद्ध्रुवम् वसिष्ठद्रोहसंभूताविपदश्चतवागताः ३ तस्मात्तुप्रसाद्यैवस्करवंतिष्ठमुनीश्वर इतिरीत
हरेः श्रुत्वापश्चात्तापमुपेयिवान् ४ वसिष्ठंप्रार्थयामासक्षमस्वेतिपुनर्वदन् निर्विण्णंतंततोदृष्ट्वावसिष्ठोपिदयान्वितः
५ ददौस्वसाम्यमतुलंविश्वामित्रायधीमते उपादिश्यतथाकुष्ठनिवृत्त्यर्थंमुनीश्वरः ६ माघस्नानंहरेः
पूजांगायत्र्याजपमेवच वसिष्ठोहरिणासार्द्धंतत्रैवांतरधीयत ७ सापिनारीययौस्वर्गंमुनिश्चतपसेययौ मा
घस्नानंतथाकृत्वाकृत्वाविष्णोश्चपूजनम् ८ जपंकृत्वाचगायत्र्यामुक्तः कुष्ठात्ततोभवत् तस्मान्नमाघसदृशः
परोधर्मोऽस्तिकश्चन तस्मात्सेव्यःसदापुंसांपुमर्थानांचसिद्धये ९ इतिश्रीवायुपुराणेमाघमाहात्म्येसप्तविंशोऽध्यायः
२७ छ गालवउवाच मातर्माघेनदीस्नानंतथामाधवपूजनम् गीतापाठश्चसततंनाल्पस्य
तपसःफलम् १ योदद्यान्माघमासेतुमाधवप्रतिमांद्विजः ससर्वंकुलमुद्धृत्यविष्णुलोकेमहीयते २

पुमर्थानां धर्मादिपुरुषार्थानाम् १०९ इतिश्रीवायुपुराणीयेमाघमाहात्म्येटीकायांसप्तविंशोऽध्यायः २७ छ १ २

गुरुमुद्दिश्यगुरुप्रीत्यर्थं ३ ४ ५ ६ ७ ८ ९ १० ११ विष्णोःस्नानंकुर्याद्विष्णुंस्नापयेदित्यर्थः १२

योमाघेगुरुमुद्दिश्यस्नानमेकंकरिष्यति अज्ञानतिमिरंहत्वाभित्वावैसूर्यमंडलम् ३ सायुज्यंसमवाप्नोति
विष्णुनाप्रभविष्णुना योमाघ्यांकुरुतेश्राद्धंपितृनुद्दिश्यमानवः ४ गयाश्राद्धशतंतेनकृतमेवनसंशयः योमा
घ्यांवृषभंनीलंपितृनुद्दिश्यचोत्सृजेत् ५ पितरश्चोद्धृतास्तेनगयाश्राद्धशतंकृतम् योमाघ्यांभोजयेद्विप्रं
शांतंनिष्कल्मषंशुचिम् ६ तेनसख्यंकरोत्यद्धाभगवान्विष्णुरव्ययः योदद्याद्दीपमालांतुप्रयतोविष्णुमं
दिरे ७ प्रकाशयन्दिशःसर्वाद्वितीयइवभास्करः विष्णोःसायुज्यमाप्नोतिनात्रकार्याविचारणा ८ गोदानं
माघमासस्यपौर्णम्यांकुरुतेनरः तस्यपुण्यफलस्यास्यसंख्यानैवोपजायते ९ दीपदाःकार्तिकेमासि
माघेमासिचवस्त्रदाः वैशाखेचान्नदाश्चैवनाप्नुवंतिपुनर्भवम् १० योदद्यात्कपिलांमाघेपौर्णम्यांवि-
ष्णुतत्परः साकंपितृगणैश्चैवविष्णोःसायुज्यमाप्नुयात् ११ गोःक्षीरेणचयःकुर्यात्स्नानंविष्णोर्महात्म-
नः प्रीणंतिपितरःसर्वेनात्रकार्याविचारणा १२ सहस्रनामस्तवनंपठन्माघेजलाप्लुतः संपूज्यमाधवं
देवंविष्णोःसायुज्यमाप्नुयात् १३ योमाघ्यांचगृहेस्नायान्मानवस्कदृढांगकः सजीवन्नेवचांडालःसर्वकर्म
स्वगर्हितः १४ यानारीकुरुतेशूर्पयुग्मस्योपायनंशुचिः माघशुक्लत्रयोदश्यांगौरीमुद्दिश्यसादरम् १५
एतस्याःकंठसूत्रस्यबाधानैवोपजायते स्वर्चितंमाधवंदृष्ट्वाप्रातःस्नायीद्विजोत्तमः १६ तावन्मात्रेणमुक्तः
सन्विष्णुलोकेमहीयते योदद्याच्चंदनंविष्णोर्धूपंवापिमहात्मनः १७

१३ १४ १५ कंठसूत्रस्यबाधानैवोपजायते सौभाग्यहानिर्नभवतीत्यर्थः १६ १७ ५

१८ यः कन्यादानशतं ददत् ददातीति ददत् स्यात् स यत्फलमाप्नोति तत्फलं कांस्यदानतः प्राप्नोति १९ २० २१ क्षीरान्नं पायसं
२२ अर्पयेदिति शेषः २३ २४ करदीकृतभूमिपः करं ददतीति करदाः बलिप्रदाः अकरदाः करदाः कृताः भूमिपाः सर्वैर्नृपा येने

तस्येप्सितान्सकलान्कामान्दाता विष्णुर्न संशयः अश्वतेन नयेद्यस्तु मासमेनं नराधमः सशरीरं समासाद्यतिष्ठत्या-
भूतसंप्लवम् १८ कन्यादानशतं यस्तु ददन्यत्फलमाप्नुयात् तत्फलं समवाप्नोति माघ्यां कांस्यप्रदानतः १९ घृत
पूर्णकांस्यपात्रं यो दद्याद्वृत्तिसंयुतम् नवैधव्यमवाप्नोति मांगल्यं चाधिगच्छति २० पंचगव्यान्मुहुर्विष्णुं यः स्ना
पयति केशवम् राजसूयसहस्रस्य फलं प्राप्नोत्यसंशयं २१ क्षीरान्नं शर्करायुक्तं सघृतं विष्णवेर्पयेत् सार्वभौ-
मो भवेद्राजा सप्तस्वपि च जन्मसु २२ यः क्षीरान्नं पौर्णमास्यां विष्णवे परमात्मने सोश्वमेधसहस्राणां फलं-
प्राप्नोत्यसंशयः २३ योश्वं दद्यात्पौर्णमास्यां माघे मासि द्विजातये गुरुतल्पकृतात्पापान्मुच्यते नात्र संशयः
२४ पुरा तु चंद्रमा राजा सप्तद्वीपवतीं महीम् प्रशशास महावीर्यः करदीकृतभूमिपः २५ पुरोहितस्तु तस्या-
सीद्धिषणो भगवान्मुनिः सकदाचिन्नवम्यां तु मासस्याश्विनसंज्ञिनः २६ उत्सवं कारयामास महालक्ष्म्या महा
धनः राज्ञा तेनेंदुना पुण्यं सर्वसंपद्विवर्धनम् २७ राज्ञीभिर्निर्ययौ साकं भार्या तस्य बृहस्पतेः गजाश्वादिविभू
तीनामातिथ्यं कर्तुमुद्यता २८ नारीमध्ये तु सा तारा ब्राह्मणी नायकायते तां दृष्ट्वा मोहितो राजा पुनरंतःपुरीं-
गताम् २९ निरुध्य बुभुजे ब्रह्मजायां कामवशंगतः यया चेद्धिषणो भूप भार्यां देहीति निश्चयम् ३० सोमं संबोध
यामास नोचितं च महात्मनः ब्रह्मजाया महाघोरा क्षत्राणां मातृसंमिता ३१ ति तथा सर्वेभ्यः करग्राही सार्वभौम इत्यर्थः। २५
२६ इंदुना चंद्रेण राज्ञा। २७ २८ नायकायते श्रेष्ठेवाचरति २९ ३० महात्मनः तवेदं नोचितमिति बोधयामासेत्यन्वयः संमिता तुल्या ३१

३२ ३३ ३४ आत्मशंसा आत्मप्रशंसा अविज्ञातेऽप्रते ज्ञानिभिरिति शेषः विज्ञानंविशेषेणज्ञानंवक्तव्यम् ३५ इति हेतोः नोचितंब्रह्म
स्त्रीधर्षणमितिशेषः ३६ स्वयमर्थे स्वसामर्थ्ये ३७ क्षात्रधर्मेणैषाबुद्धिस्या अशक्तिर्भविष्यति ३८ तयाब्राह्मण्यस्यविच्छेदोपिनभ

आयुष्यंचतथावित्तंमानंसौभाग्यमेवच संततिंसंपदश्चापिसर्वंहंतिकुलांगना ३२ चतुरंगबलैर्युक्तमपित्वां चमदोद्धतं शक्तिर्मेभूयसीभूपहंतुंनात्रविचारणा ३३ नानामंत्रप्रवीणोहंसर्वशस्त्रास्त्रकोविदः नमयासदृशःकोपिधनुर्विद्याविशारदः ३४ मावमंस्थादुरात्मात्वमात्मशंसापरायणः विज्ञातमपिवक्तव्यमविज्ञानेदुरात्मनि ३५ इतित्वंबोधितोराजन्नोचितंतात्यजस्त्रियम् ब्राह्मणार्थेगवार्थेमहाविपदिभूमिप ३६ योद्धव्यंब्राह्मणेनापिस्वयमर्थेनसंशयः विपदेचापिमहतीभार्याहानिस्वरूपिणी ३७ ममसंविदितपूर्वंभार्याहृत्वा त्वयाबलात् इतःपरंक्षात्रधर्मेणैषाशक्तिर्भविष्यति ३८ ब्राह्मण्यस्यापिविच्छेदोप्यधिकंचापदिष्यति वेदाध्ययनसंपन्नेकुलीनेपिमहात्मने ३९ विनाविपत्तिसंजातेब्राह्मणेशस्त्रधारिणी गतब्रह्मकलोभूत्वानरकानेवगच्छति ४० पूर्णकामस्यविप्रस्यकुलीनस्यमहात्मनः निष्णातस्यापिविद्यासुहलांतब्रह्मवर्चसम् ४१ आपद्धर्माऋषिःप्रोक्ताःसंतिशास्त्रेष्वनेकधा वृत्तिहीनस्यविप्रस्यवृत्त्यर्थंचोदिताइमे ४२ नोपास्यःक्षत्रधर्मोहिप्राग्विपन्नैर्द्विजोत्तमैः प्राणापदाद्विजेनैवक्षत्रवृत्तिःकथंचन ४३ हिंसारूपाक्षात्रवृत्तिर्ज्ञानिनाचद्विजन्मना नोपास्यासासदाक्वापीत्येवमाहजनार्दनः ४४ योग्निंनोपचरेद्विद्वान्द्विजन्मावैगृहाश्रमी वर्षादूर्ध्वंसचांडालोब्राह्मण्याद्विविहीयते ४५

विष्यति अधिकंयथातथा आपदपिनेष्यतीति नञ्जन्माऽवृत्त्या-
योजना ३९ ४० हलांतंकर्षणांतं ४१ ४२ क्षत्रवृत्तिःउपास्यासेवितव्या ४३ सदाक्वापिकदापीत्यर्थः ४४ ४५ ७

४६ रिक्तान्निःस्नेहान्तिलपिण्याकमित्यर्थः ४७ ४८ शांतिविधायिनि संतापहारिणी ४९ ५० ५१ ५२ ५३ मयानकार्यः कर्तुयोग्यः यतः

तैलयंत्रंचेक्षुयंत्रंत्रिवर्षंयःकरोतिच ब्रह्महासतुविज्ञेयोब्राह्मण्याच्चविहीयते ४६ अज्ञानाद्ब्राह्मणोविद्वान्योरिक्तान्भक्षयेत्तिलान् द्विजाधमःसपापीयान्ब्राह्मण्याद्विविहीयते ४७ ब्राह्मण्यंसर्वदारक्ष्यंसर्वयोनिषुदुर्लभम् ह्यधिकाशीतिभेदेषुक्रमाज्जातस्तुयोनिषु ४८ बहुपुण्यवशाज्जीवोब्राह्मणींयोनिमाव्रजेत् किंचिद्वक्ष्यामिराजर्षेत्वयिशांतिविधायिनि ४९ कोटिशूद्रवधात्साम्यंस्त्रीवधस्यविदोविदुः कोटिस्त्रीवधतुल्यंतुगोवधंतुमनीषिणः ५० कोटिगोवधतुल्यंतुजनाब्रह्मवधंविदुः पट्टाभिषिक्तभूपस्यकोटिब्रह्मवधाधिकः ५१ दुष्टानांशिक्षणंचैवशिष्टानांप्रतिपालनं उभौक्षात्रियधर्मौतुनविप्रस्यकदाचन ५२ ब्राह्मणाःकुपिताहन्युर्लोकांल्लोकेशसंयुतान् किमुतत्रविशिष्टाश्चब्राह्मणाब्रह्मवादिनः ५३ कार्योत्रवैनमेदंडोविहितस्तेयतस्ततः त्यजेनांब्राह्मणींघोरांगुरुपत्नींकुलाधम ५४ ब्राह्मण्यधर्मनिष्णातोगुरुस्तस्माद्विनिर्ययौ सप्तर्षीन्प्रतिपद्याथराज्ञोदोषंन्यवेदयत् ५५ शृणुध्वमृषयःसर्वेमद्व्यथामिंदुनार्पितां सृष्ट्वेमान्सकलान्लोकान्भगवान्विष्णुरव्ययः ५६ साम्राज्येस्थापयामासब्रह्माणंत्वचतुर्मुखम् युवराज्येमहाबाहुंबलरूपंसमीरणं ५७ गोप्तारंतस्यराष्ट्रस्यमहारुद्रंबलोत्कटम् आमात्यत्वेतथेचंद्रंदेवान्राज्यांगकर्मणि ५८ प्रजेशान्नवसंख्याकान्पत्रलेख्यादिकर्मसु मनूंश्चदेशाधिकारित्वेऋषीन्धर्मविनिर्णये ५९ तथाधिकृतमानुष्ये· चंद्रसूर्यग्रहौबलौ कारागृहाधिकारेतुयमंलोकस्यकंटकं ६० दुराचारेसदाचारेसदावेदोक्तकर्मणि नवग्रहान्महाक्रूरान्गूढचारान्वसूनथ ६१

सदंडस्तेनवैवक्षत्रियत्वाद्विहितः ५४ ५५ ५६ समीरणंवायुंस्थापयामासेतिप्रत्येकंसंबंधः ५७ ५८ प्रजेशान्मरीच्यादीन् ५९ अधिकृतंअधिष्ठितंयन्मानुष्यंतत्र ६० दूराचारादिषुयथायथंनवग्रहादीन्स्थापयामासेत्यग्रिमेणसंबंधः ६१

ब्र.ज्यो.ए
धर्मस्कंध.
५९.३

सौविदल्लान्कंचुकिनः ६२ ६३ ६४ परिचारत्वेसेवकत्वे ६५ भूपंचंद्रं ६६ ६७ ६८ ६९ ७० ७१ ७२ ७३ निवेद्य

एकोनपंचाशत्संख्याकान् मरुतः कश्यपात्मजान् सौविदल्लान्महाविष्णुर्गंधर्वाप्सरसस्तथा ६२ गीतनृत्यादि कृत्येषुकिन्नरांस्तुनिपाठकान् विद्याधरान्वादिनोग्निदीपधारणकर्मणि ६३ ग्रामग्रामाधिपान्भूपांस्तत्तल्लोकपतींस्तथा निषादान्राक्षसांश्चक्रे भगवान्विष्णुरव्ययः ६४ देवांश्चपरिचारत्वेत्वन्यान्जंतूंश्चपोषकान् सार्वभौमः स्वयंविष्णुः सर्वलोकैकनायकः ६५ धर्मसंस्थापनार्थायजगदेवंविनिर्ममे आशुभूपंबोधयध्वंयूयंधर्माधिकारिणः ६६ सप्तर्षयोमहात्मानोगुरुणाप्रार्थिताइमे बोधयामासुरभ्येत्यसोमराजानमंजसा ६७ शृणुभूपहितंवाक्यं वर्णानांब्राह्मणोगुरुः अयंपुरोहितोविद्वान्गुरुश्चाप्यधिकोगुरुः ६८ तत्पत्नीतवमान्येयंमालिनीलोकसुंदरी हेतोरस्यभूकांतबहुहानिंत्वमिच्छसि ६९ अनेनकर्मणाभूयाद्बहुदुःखंनसंशयः इतितैर्बोधितोराजानतत्याजगुरोः सतीम् ७० गीष्पतिंतेततःखिन्नाःप्रोचुःसप्तर्षयोपिते नास्माभिर्बोधितुंशक्योराजाचायंदुराग्रही ७१ वयंधर्मस्यवक्तारोनवयंशिक्षकाभुवि मनूनिंद्राग्निवेद्यैवतत्कार्यंकुरुमानद ७२ तेभ्यःखिन्नोगुरुःपश्चाद्देवेंद्रसदनंययौ सोमराजस्यदौरात्म्यंदेवेंद्रायन्यवेदयत् ७३ सभ्येभ्यश्चैवदेवेभ्यःप्रजेशेभ्योनिवेद्यच मनुभ्यश्चवसुभ्यश्चरुद्रेभ्यश्चमहामतिः ७४ देवाचार्यंततःप्रोचुर्देवाइंद्रपुरोगमाः नास्माभिर्हन्यतेराजाशशांकोयंबलोत्कटः ७५ महेश्वरदर्पणाजयिष्णुर्देवतास्वपि समुद्रमथनेपीत्वाविषंलोकैककंटकम् ७६ विषज्वालोपशांत्यर्थंदधौचंद्रकलांहरः तदावरंददौतस्मैयदाराजाभविष्यसि ७७ तदासर्वैश्चभूपालैर्देवैश्चमनुजैस्तथा राक्षसैरुरगैर्दैत्यैरवध्योभवसंगरे ७८

इतिशेषः ७४ ७५ ७६ ७७ ७८ ७९

मासस्त.४
माघमा.११
अ.२८

११६

७९ असांप्रतं अयुक्तं तेनरोपणकर्त्रा ८० यथारुचि रुचिमनतिक्रम्यकुरु तथा तेन प्रकारेण निराकृतः प्रत्याख्यातः ८१ कोपस्यारोपेन आवेशेन ८२ विप्लवे नाशे ८३ तेषां राज्ञां ८४ ८५ भवतां मम शिष्यत्वाद्यनेकविद्याध्ययनादिना मम गुरुत्वात्पुरोहितत्वाच्च उभययाऽपि भवत्पापा-

तस्माद्देवगणैः सर्वैर्न दंड्यो मृगलांछनः किंचास्माभिर्दत्तवरस्तथा दत्तरथायुधः ७९ अभिषिक्तस्य साम्राज्ये त
तो हंतुमसांप्रतम् विषात्मकोपि न च्छेद्यो वृक्षस्तेन कदाचन ८० तस्मान्न दंड्यो भूपोयं यथारुचि तथा कुरु निरा-
कृतस्ततस्तैस्तु गुरुर्दुःखाकुलोऽभवत् ८१ ततो देवानुवाचेदं कोपारोपेन गीष्पतिः विष्णुनाधिकृता यूयं लोके धर्म
स्य गुप्तये ८२ नचित्रारोहि भवतां प्राप्ते धर्मस्य विप्लवे स्वाधिकारे नियुक्ता ये प्रभुणा प्रभविष्णुना ८३ तैः प्रापात्र
पित्यक्तव्याः संप्राप्ते धर्मविप्लवे राजानो देवता यूयमहं तेषां पुरोहितः ८४ राज्ञो राष्ट्रकृतं पापं राजपापं पुरोधसः
पत्युर्भार्याकृतं पापं शिष्यपापं गुरोरपि ८५ मच्छिष्यत्वाच्च भवतां गुरुत्वादपि देवताः भवद्भिश्च कृतं पापं मामे
वसमुपेष्यति ८६ यथापराधं दंडो हि तस्माद्दुःक्रियते मया ब्राह्मणत्वान्न शक्या भूर्हिंसा मे भवतामपि ८७ यु
ष्माद्विचारहैन्येन यस्माज्जायापमानिता जायापमानापत्तिभिः सदृशी भवतामपि ८८ भवद्दारापमानार्थं बहु
रूपी भवाम्यहम् नेदं हे युष्मदंगानि प्रविशामि न संशयः ८९ सहे चानुभविष्येऽहं युष्म दारान्स्वदेहगः इत्युक्त्वा वि
रराम अथ देवेंद्रादीन्बृहस्पतिः ९० कियत्कालं निरीक्ष्यैव नोचितं त्विति तानवदन् स भूत्वा बहुरूपोपि देवांगानि वि
वेशाह ९१ पश्यतामेव सर्वेषां जंभारेश्चैव संसदि दृष्ट्वैव प्रार्थयांचक्रुर्निषण्णास्ते तदा सुराः ९२ वयं ब्रह्माणमेवैत्य
करिष्यामो घनिष्कृतिम् तदुक्तौ वर्तमानाश्च ते भार्याया विमोक्षणम् ९३

नां मय्येव पर्यवसानं ८६ ८७ युष्माद्विचारहै-
न युष्माकं विचारहीनत्वेन अपिविपत्तिः निष्कृतिः सदृशी योग्या ८८ ८९ स्वदेहग भवद्देहप्राविष्टसूक्ष्मशरीरस्थः ९० ९१ जंभारेः इंद्रस्य ९२ ९३

१४ १५ १६ आवश्यकेअवश्यंभाविनी·१७ विश्वस्यआश्वास्य१८ १९ सांत्वेनसाम्ना१०० १०१ २ ३ ४ ५ ६ ७ ८ ९

तावत्क्षमस्वधिषणमाविषादंयथाकृताः कारणंसुखदुःखानांभगवान्हरिरीश्वरः १४ पूर्वकर्मानुरोधेन भवितव्यंद
दातिसः समपश्यतिवैधीरामानामानौजयाजयौ १५ लाभालाभौसुखंदुःखंभयंचाभयमेवच पूर्वकर्मानुरोधेनदाता
विष्णुर्निवर्तकः १६ तस्मादावश्यकेकार्येनोविषादोमहात्मनां निवृत्तिर्विपदश्चास्याभवितातेनसंशयः १७ नोपे-
क्षांकुरुतेब्रह्मालोकानांचपितामहः गुरुंविश्वस्यतेदेवाब्रह्मणःसदनंययुः १८ देवाब्रह्मसदोगत्वातस्मैसर्वंन्यवेद
यन् श्रुत्वाब्रह्माथतान्प्राहदेवानिंद्रपुरोगमान् १९ ब्रह्मोवाच प्राप्तेशत्रुविवादेतुशत्रुणाशत्रुमुद्धरेत् विवा
देमित्रयोःप्राप्तेसांत्वेनैवशमंनयेत् १०० देवबंधुःसदासोमोगुरुश्चापिमहामतिः तस्माद्भार्याविमोक्षार्थंदेवाचा-
र्यस्यधीमतः १ युष्माभिःसहगंतव्यंमयासोमानिकेतनं इत्युक्त्वाप्रययौब्रह्मादेवैःसोमानिकेतनं २ ब्रह्माणंचाग-
तंवीक्ष्यदेवान्मुनिगणावृतान् व्रीडयावनतोभूत्वात्रस्तःसोमोविनिर्ययौ ३ पूजयामासविधिवद्देवान्ब्रह्मादिकां
स्तथा किंचिन्नोवाचत्रपयासोमोराजाभयाकुलः ४ देवान्वीक्ष्यततोब्रह्मासोमराजानमब्रवीत् त्यजेनात्मगुरोःप-
त्नीमातुरभ्याधिकातव ५ राज्ञांचधर्मशीलानांनिंद्यंकर्मनचोदितं किंचविष्णुश्चधर्मात्माधर्मविघ्नकरान्जनान् ६
हनिष्यतिनसंदेहोयतोधर्मवपुर्हरिः यदायदातुधर्मस्यग्लानिर्भवतिशाश्वती ७ तदातदावतारोस्यदयालोःपरमा
त्मनः त्यजशीघ्रंब्रह्मजायांमयाबधुतयोदितम् ८ निशम्यतद्वचोराजातस्याजातीवविह्वलः पश्चात्तापीब्रह्मजायांहृ
दनुस्मृत्यास्वकर्मच ९ ततोदेवाःसमाहूयदेवाचार्यंमहामतिं जायांनिवेदयामासुस्तस्मैचिंताकुलात्मने १० सासूतन
नयतावद्बुधंचंद्रस्यवेश्मानि अतीतान्यपिवर्षाणिषड्यपंचवार्षिकः ११ १० षडितिगर्भापेक्षयोक्तं अयंबुधःपंचवार्षिकोजातः

११

११७

१२ तद्विदः वादनिर्णयज्ञान्ऋषीन् १३ प्रजार्थिभिः संतानेच्छुभिः १४ १५ १६ १७ १८ १९ बालजननींपृच्छ किमितिचेदाह हेमातः

यथाचेत्क्षेत्रजंबालंगुरुश्चंद्रमहामतिः मद्वीर्यजः कुमारोयंनतंदास्यामिचंद्रमाः १२ इतिप्राहकुमारार्थेविवादःपुनर
प्यभूत् ततोब्रह्माऋषीनूचेकस्यायमितितद्विदः १३ ऋषयऊचुः क्षेत्रिणाभ्यर्थितोयस्तुतदीयैर्वाप्रजार्थिभिः परक्षे
त्रेबीजवापीफलंनाप्नोतिनिश्चयम् १४ बलात्कारात्परक्षेत्रेबीजीतुफलमश्नुते नदोषःप्रथमेपक्षेनार्याचानकुलस्यच
१५ पक्षेद्वितीयकेनारीकुलंपातयतेध्रुवं मुनिभ्यस्तत्तदाब्रह्माश्रुत्वाधर्मविनिर्णयं १६ न्यवेदयत्तदाब्रह्मागुरुचंद्रम
सोस्तथा मदीयमितिचाचक्षेगुरुरादौचसंसदि १७ मदीयमितिचाचक्षेचंद्रमास्तुततःपरं ततःसंशयमापन्नादे
वाएवंन्यमंत्रयन् १८ मातैवतद्विजानातिपुत्रजन्मनचापरे तस्मादेषैवप्रष्टव्याइतिनिश्चित्यतेसुराः १९ बुधमाहूय
तंप्रोचुर्जननींपृच्छबालक त्वयिकस्माज्जनिरभूदितिपृष्टानिवेदय २० इतिदेवैस्तथाज्ञप्तोबुधोपृच्छत्स्वमातरं त्व
यिकस्माज्जनिरभून्मातस्तथ्यंनचान्यथा २१ नानृतात्परमंपापंदेवानांचैवसंसदि इतिपृष्टात्मजेनाथचंद्राज्जन्मे
तिचाब्रवीत् २२ तच्छ्रुत्वाथबुधःप्राहदेवान्ब्रह्मपुरोगमान् माताहमेजनिंदेवाश्चंद्रादाहेतिचस्वैरिणी २३ तच्छ्रुत्वा
देवताऊचुर्गुरुंप्रत्याभिकांक्षिणं चंद्रस्तुबीजिनंप्राहुर्बलात्कारीयतोविधुः २४ नप्रार्थितस्त्वयापूर्वमतश्चंद्रोर्हति
ध्रुवम् गुरुर्देववचःश्रुत्वापुत्रंचंद्रमसेर्पयत् २५ सभार्यकोगुरुस्तस्थौसभामध्येभिवीक्षितः प्रादाद्राज्यंबुधा
यासौप्रजाश्चाहूयचंद्रमाः २६ राज्यंनिवेदितंत्वस्मैसत्तुवःपालयिष्यति इत्युक्तेतुशशांकेनप्रजाऊचुश्चसंसदि २७

यिकस्माद्गुरुचंद्रयोरन्यतरात् ममजनिर्जन्माभूदिति २० तथ्यंसत्यंचदेतिशेषः २१ २२ २३ २४ २५
अभिवीक्षितः लब्धकलत्रत्वाद्देवैः सादरमवलोकितः २६ २७ ६२ ६२ ६२ ६२

कुंडत्वेनजातः कुंडजः पत्यौजीवतिजारजातःकुंडः २८ अनूचानगुरोःसकाशात्कृतसांगवेदाध्ययनः विशःप्रजाः २९ ३० ददेददौ १०
तारा कुमारकोबुधः ३१ ३२ आवयोःसतः विद्यमानस्यएनसःपापस्यनिष्कृतिःप्रायश्चित्तंचेदस्तितर्हि तत्कुरुध्वमितियोज्यं उपदेशः उप-

शृणुचंद्रप्रवक्ष्यामः कुंडजत्वात्तवात्मजः राज्यंनार्हतिकुंडत्वात्तस्यधर्मेमतिःकुतः २८ अनूचानकुलीनस्तुराज्यम
र्हतिनापरः नांगीचक्रुर्विशःसर्वेबुधंचंद्रतनूद्भवं २९ गुरुःप्राहनिजांभार्यांदुष्टांत्वांतुनपालये नहनिष्यामित्वांपा
पांयावदामरणांतिकां ३० कुड्यमध्येविनिक्षिप्याकिंचित्तेजीवनंददे गुरोर्विशांतदावाक्यंश्रुत्वामाताकुमारकः
३१ संसदंतुसमासाद्यप्रोचतुर्देवतामुनीन् जायांगुरुर्जहौपापांनांगीकुर्वंतिमांजनाः ३२ निष्कृतिश्चेनसोप्य
स्तितत्कुरुध्वंचावयोःसतः नास्तिचेदुपदेशोहिदेहनाशोदुरात्मना ३३ तदेवान्यतरपक्षमास्तिनास्तिविनिश्चये
आवामेवकरिष्यावोनात्रकार्याविचारणा ३४ इत्युक्तेचतदाताभ्यांमुनीन्ब्रह्मावलोकयत् ब्रह्मणोहृदयंज्ञा-
त्वास्वमतंतेन्यवेदयन् ३५ पत्यौजीवतियानारीमृताचाव्यभिचारिणी चांडालीसातुविज्ञेयासर्वकर्मसुगर्हि
ता ३६ दाक्षिण्यादर्थलोभाद्वासंसर्गंयेप्रकुर्वते तेसर्वेनरकंयांतियावदाभूतसंप्लवम् ३७ तौस्मृतौकर्मचांडा
लौह्यौप्रोक्तौकुंडगोलकौ इत्युक्तेमुनिभिःसर्वैस्तदाधर्मस्यनिर्णये ३८ तदानिर्वेदमापन्नादेवाब्रह्माणमूचि
रे अस्माकंतुवृथाजातःप्रयासःकमलासन ३९ स्वात्मनेविष्णुनाप्रोक्तंप्रायश्चित्तंप्रचोदय युक्तानांचैवनारी
णांमहापातककोटिभिः ४० लक्षवर्तीव्रतंचैवमाघस्नानंतुनिष्कृतिः कुंडानांगोलकानांचमहापापकृतामपि ४१
कथायाःश्रवणंचैवमाघस्नानंतुनिष्कृतिः माघ्यांस्नात्वातुयोदद्यादश्वंलक्षणसंयुतम् ४२

दिश्यतइति उपदेशःस्यात् आज्ञाप्यइत्यर्थः ३३ ३४ ३५ ३६ ३७ ३८ ३९ ४० ४१ ४२

: चंद्रताराबुधैः ॰ अयंमाघेस्नानदानलक्षवर्तिव्रतकथाश्रवणरूपं ४३ ४४ ब्रह्मजायागुरुपत्नीतारा ४५ ब्रह्मणाउदितंविश्वसन्गुरुरिति

गुरुतल्पाद्विमुक्तस्यादेवमाहजनार्दनः तस्माद्देवैस्त्रिभिःकार्यमेतत्त्रयमनुत्तमम् ४३ तेशक्राद्यास्तेनुपूज्यास्तुनात्र कार्याविचारणा उपदिश्यजनान्सम्यग्गुरुंचैवबुधंतथा ४४ ब्रह्माथकारयामासहरिणोक्तंत्रयंतदा ब्रह्मजायातदा लक्षवर्तीव्रतप्रभावतः ४५ साध्वीनामग्रगण्याभूत्स्मृतासर्वाघनाशिनी निःशंकोजगृहेभार्याविश्वसन्ब्रह्मणोदितं ४६ बुधंजनाश्चजगृहुर्निष्पापंमेनिरेध्रुवम् कृत्वादेवागुरोःकार्यंब्रह्माद्याश्चयथागताः ४७ माघप्रभावंशंसतःस्वस्वधामानितेययुः गालवउवाच तस्मान्माघप्रभावोयंलेशमात्रेणकीर्तितः ४८ नक्षत्राणिचगण्यंते गण्यंतेचोदबिंदवः भूकणाश्चापिगण्यंतेयेनकेनमहात्मना ४९ नगण्यतेमाघमासप्रभावोलेशतोपिचा विचारितामयासर्वेधर्माःशास्त्रेषुचोदिताः ५० नमाघसदृशोधर्मोनदृष्टोनापिचैश्रुतः यत्किंचित्कुरुतेकर्ममाघेमासिद्विजोत्तमः ५१ तदक्षय्यफलंप्राहुर्वर्धतेवटबीजवत् माघधर्मान्नयदाश्रुत्वानकरोतिनराधमः ५२ सआत्महाब्रह्महाचनरकानेवगच्छति यइदंशृणुयान्नित्यमितिहासंपुरातनं ५३ सर्वपापविनिर्मुक्तःसर्वानुद्धृत्यवैपितॄन् भुक्त्वेहकामान्सर्वांश्वविष्णुलोकेमहीयते ५४ इतिश्रीमाघमाहात्म्येअष्टाविंशोऽध्यायः २८ छ

गालवउवाच भूयःशृणुध्वंवक्ष्यामिमाघमाहात्म्यमुत्तमम् यज्ज्ञात्वामुच्यतेजंतुःकिमनुष्ठानतत्परः १ पुराकौशीकदेशेतुपट्टणेसगराह्वये वैश्योभूद्धर्मराजाख्यस्तस्यपुत्रीशकचिव्रता २ तान्ददौविठ्ठलाख्यायधर्मराजास्तु तत्पिता कियतासाथकालेनब्राह्मणानांसमागमात् ३

शेषः ४६ ४७ ४८ ४९ ५० ५१ ५२ ५३ ५४

इतिश्रीवायुपुराणीयेमा॰टीकायामष्टाविंशोऽध्यायः २८ छ किमनुष्ठानतत्परः कस्यानुष्ठानेतत्परः मुच्यतेतच्चवक्ष्यामि १ २ ३

४ ५ ६ उपचितात् संपादितात् ७ भुजंगंवेश्याजारंपतिं प्रतिअनुवर्तिनीतिअनुकूला ८ ९ मन्येमन्यतइत्यर्थः पुरुषव्यत्ययआर्षः १०

लक्षवर्तीव्रतंचक्रेविह्वलानुगतासती वेश्यागंतातुतद्भर्ताकंचिद्रूपंनचाश्रितः ४ पुनर्जन्मांतरेसाथजातासत्यव्र
ताह्वया चित्रकर्मेतितद्भर्तासजातः कौशिकाह्वये ५ वेश्यापतिर्बभूवासौ पूर्वकर्मानुरोधतः ऋणानुबंधरूपे
णसैवजायाबभूवह ६ पूर्वजन्मन्युपचिताल्लक्षवर्तीव्रतात्ततः जन्मन्यस्मिन्सदाख्यातापातिव्रत्येदृढाभवत्
७ पातिव्रत्येतुसानारीचतुर्दशस्वचाभवत् विख्यातातेषुलोकेषुभुजंगमनुवर्तिनी ८ पतिर्भुक्त्वागृहेनित्यं
वेश्यागारंव्रजन्सदा नोपतस्थेऋतोःकालंनचकारगृहोचितं ९ अशनाभ्यंगतांबूलपादसंवाहनादिभिः पति
मेवसदामन्येदेवबंधुगुरुंतया १० मनसावेदनांक्वापिनचकारदृढव्रता आर्तार्तेमुदितेहृष्टाप्रोषितेमलिनी
कृशा ११ मरिष्यमाणंतमनुगन्तास्मीत्येवंविनिश्चिता कियत्कालेनतद्भर्ताव्रणव्याधिप्रपीडितः १२ दुरात्मापं
गुरभवत्कर्मणातेनवैद्विजः अत्युत्कटैःपुण्यपापैरिहैवफलमश्नुते १३ दुरत्ययाकर्मगतिर्मनुष्याणांनसंशयः
पंगुर्भूत्वागृहेतिष्ठन्वेश्याचिंतासमाकुलः १४ नशक्तस्तद्गृहंगंतुंपंगुत्वात्सकुलाधमः सएवव्याधिरभवद्वि
रहःकामिनोन्वहम् १५ नखादतिनचाप्नातिनशेतेनापिबत्यपि कामानलसमुद्भूतज्वालामालाकुलोद्विजः
१६ तंप्राहरमणीपुण्याप्राणनाथकिमिच्छसि यद्यादिष्टंकरिष्यामिनशंकामयिशोभन १७ त्वद्दासीचैवत्वद्दे
वात्वद्भक्तात्वत्परायणा यद्वेषिकंस्करवंलोकेतत्स्यात्पुरितिमेमतिः १८ मोक्षादप्यधिकंमन्येसेवायाश्चसुखंतव कस्मा
त्तपसिप्राणेशकेनत्वंनिर्व्यथोवद १९

आर्तेदुःखितेपत्यौस्वयमार्ता एवमग्रे ११ १२ १३ १४ १५ १६ १७ त्वमेवदेवोयस्याः
त्वः ऐषिकं इच्छाविषयंपृषोदरादित्वात्साधु तदेवमार्याइतिशेषः स्करवंस्यादितिमेमतिरित्यन्वयः १८ तपसि तापंप्राप्तोसि १९

२० २१ अनेन व्याधिना व्रणरोगेण दुर्बुद्धिरहं तद्वार्त्तांनैवसम्मुखे पंगुत्वाद्वेश्यागृहगमनासंभवेन तस्यावार्तामपिन शृणोमीत्यर्थः २२ २३ २४ २५ २६ २७ २८ अनुपृष्ठं पृष्ठभागेनिक्षिप्य पश्यन्नितिशेषः २९ ३० व्यथयतः दुःखंप्रापयतः शूलाद्धिक दुःखकरइत्यर्थः ३१ ३२ तवदुःखकारंयदज्ञानंतस्माद्धेतोः मांक्षम क्षमस्व अज्ञानात्तव दुःखकारिण्यभवं तस्मात्क्षंतव्यमित्यर्थः ३२ गर्तांधुसरितः गर्तकूपनदीः ३४

इत्युक्तः सा द्विजः प्राह तां जायामनुवादिनीम् वेश्यायामेव मे चित्तं नान्यवस्तुनि मंगले २० तया भुक्ते तु भुंजामि पीते पानं पिबामि च देहयात्राणि सर्वाणि तया साकं न चान्यथा २१ व्याधिनानेन दुर्बुद्धिस्तद्वार्त्तां नैव सम्मुखे तयै वाचिंतयामेद्य भोजनादिं न रोचते २२ विरहव्याधिरत्युग्रः प्राणान् हरति निश्चयम् त्वं स्कंधे चैव मामूढ्वा यासि चेन्नायि कालयम् २३ तदा स्वपे सुखं भद्रे व्याधिर्मे लुगमिष्यति इति तद्वचनं श्रुत्वा सा नारी तु पतिव्रता २४ मनसातीव संतुष्टा ओमित्यूचे दृढव्रता अर्धरात्रस्तदा कालः कृष्णपक्षाष्टमी दिनम् २५ मासे भाद्रपदे चैव तस्मिन्व्योमघनाविले तस्मिन् भयंकरे काले सा नारी तु धृतव्रता २६ स्कंधमारोप्य भर्तारं ययौ ग्रामांतरस्थितं वेश्यागारं महापुण्या प्रीणयंती प्रियोक्तिभिः २७ राजकीयाश्च पूर्वेद्युश्चौराश्च पशुहारिणः अन्वधावंस्तदा चौरा मांडव्यस्य महात्मनः २८ अनुपृष्ठं तु निक्षिप्य दुद्रुवुर्भयतो वनम् समाधिस्थं च मांडव्यं राजभृत्या महाव्रत २९ बहुधा तं विनिर्भर्त्स्य चक्रुस्तं शूलरोपितं अपश्यंती च सा मार्गे मांडव्यं शूलरोपितं ३० प्रस्खलंती पपात ह मांडव्यो वेदनाकुलः मम दुःखकरः को वा शूलाद्व्यथयतोऽनिशं ३१ इत्युक्तो विह्वला प्राह मांडव्यं शूलरोपितं ऋषे मा सुव्रतां विद्धि पत्युरिष्टाभिकांक्षिणीं ३२ तव दुःखकराज्ञानात्पुत्रीं मां क्षमस्व व्रत रात्रिस्तु तमसा व्याप्ता वृष्टिश्चातीव दुःसहा ३३ न जाने तेन मार्गं तु गर्तां धुसरितस्तथा पतिदेवं मन्यमाना सदा भर्तुर्हितंकरी ३४

३५ ३६ ३७ ३८ उदयमर्थात्सूर्यस्यबंधयोंचक्रे प्रतिबद्धंचकारेत्यर्थः ३९ इत्थंइत्युद्दिश्येत्यर्थः ४० ४१ ४२ ४३ ४४ ४५

स्कंधेनोद्धापनिवेश्यागारंगंतुमिहोद्यता दैवहीनाप्रस्खलंतीतवदुःखकरास्म्यहम् ३५ कोसिकस्यांगनात्वंविप्रकस्मा
त्तवेदृशीदशा इत्युक्तः सघृणांप्राहमांडव्योस्मीतिदुःखितः ३६ शूलेत्वारोपितोव्यर्थंराजभृत्यैर्मदोत्कटैः श्वस्तु
सूर्योदयेजातेभर्तातेतुमरिष्यति ३७ ममदुःखकरायस्माद्वनिताचशशापसः शापंगृहीत्वासानारीदुःखिता·
तीवविह्वला ३८ उदयंबंधयांचक्रेपातिव्रत्यप्रभावतः लक्षवर्तीव्रतेनास्याः पूर्वजन्मकृतेनच ३९ वैधव्यंनभवेदित्थं
चिंतितोहरिरीश्वरः उदयप्रतिबंधेतुसहायमकरोद्विभुः ४० लक्षवर्तीव्रतोद्भूतपातिव्रत्यप्रभावतः नोदेतुम·
भवद्भानुः शक्तःकालात्मकोरविः ५१ भर्तुःप्राणहरोभानुःकापिनोदेतुमेप्रियः इत्युक्तस्तत्तयासाध्व्यानैवोदेति
चभास्करः ४२ आवर्षंतुक्रियाःसर्वालुप्ताश्चानुदयेरवेः ततश्चेंद्रादयोदेवाब्रह्मांतिकमुपाययुः ४३ नास्मानु
पैतिभागस्तुदेयपुष्टिकरस्ततः पतिव्रतामहापुण्यात्रिषुलोकेषुविश्रुता ४४ शूलारोपितमांडव्यशापग्रस्तामहा
मतिः भर्तुरिष्टकरापुण्यावेश्यागारमुपेयुषी ४५ उदयंबंधयांचक्रेसूर्यस्यास्यमहात्मनः अज्ञातकालास्तेनैव
जनाःसीतार्दिताभुवि ४६ नयज्ञंकारयामासुर्नापिनित्यक्रियाश्चापि अस्माकंवितथीचक्रेप्रयत्नान्भूरिशोबला
४७ वज्राद्यायुधजातानितत्रमुक्तानिभूरिशः भग्नान्येवाभवंस्तूर्णंपातिव्रत्यप्रभावतः ४८ स्वयंरक्षानितांविष्णु
र्धनुर्बाणधरोविभुः ततोभग्नावयंसर्वेतवांतिकमुपागताः ४९ यज्ञभागविहीनान्नः क्षीणशक्तीन्सुरानिमान्
शीतार्दितान्जनान्सर्वांश्चोरबाधानिपीडितान् ५० त्रिलोकनाथदेवेशत्राहिनोद्यातिविह्वलान् इतिदेवैःप्रार्थि
तःसन्ब्रह्माब्रह्मविदांवरः ५१

४६ ४७ तत्रउदयप्रतिबंधके ४८ ४९ ५० ५१ ५२ ५२

५२ ५३ शाश्वतीःनिरंतरभोग्याः लभतइतिशेषः लक्षवर्तिव्रतेन्आत्मामनोयेषांते ५४ ५५ ५६ अनुनयेनसांत्वनेनआययौप्राप ५

नानागतानर्थंमोचेनेयंदंड्याधृतव्रता लक्षवर्तीव्रतात्तुष्टः पूर्वजन्मकृतान्हरिः ५२ वैधव्याद्धिमहादुःखात्त्वयं
रक्षतिचापभृत् अलभ्यंकिंभवेल्लोकेहरौतुष्टेजनार्दने ५३ हरौतुविमुखेलोकेविपदःशाश्वतीर्ध्रुवम् नाशुभं
विद्यतेक्वापिलक्षवर्तीव्रतात्मनाम् ५४ लक्षवर्तीव्रतकरीसुभगापूर्वजन्मनि तेनपुण्यप्रभावेनपुण्यासाध्वीप-
तिव्रता ५५ पातिव्रत्यप्रभावेनशक्तिरेतादृशीसुराः नशक्नुमोवयंदंडेतस्याःसाध्व्याःकथंचन ५६ तस्मादनु
नयनेवप्रार्थयामोवयात्विति आभाष्यदेवताःसर्वास्तैःसाकंभूमिमाययौ ५७ तदासाध्वीमहापुण्यापतिंवे
श्यागृहंगतं अनुभुक्तंपुनःपंगुमानिन्येस्वगृहंक्षणात् ५८ आजगामतदागेहंब्रह्मादेवैःसमन्वितः प्रार्थया
मासतांसाध्वींसात्वैर्बहुविधैरपि ५९ विह्वलाप्रणताभूत्वासानारीविधिमब्रवीत् पत्युर्हितकराबालापति
मूढ्वामहानिशि ६० व्रजंतीकुलटागारंविव्यथेशूलरोपितम् मांडव्यंचमहात्मानंतेनशप्तास्मिभामिनी ६१
उदयंबंधयांकुर्वेनववैधव्यकातरा विपदोन्याश्चनारीभिःसहनीयाःकथंचन ६२ वैधव्यविपदःक्वापिवा
ताऽसत्यास्त्रियामिह स्वस्तिभूयात्कथमेद्यदेवतानांमुनेस्तथा ६३ इत्युक्तोद्रुहिणःप्राहतांसाध्वींचधृत
व्रतां शृणुबालेमहापुण्येमंगलाधायिमेवचः ६४ लक्षवर्तीव्रतोद्भूतंक्षणिकंपुण्यमुत्तमम् मांडव्यस्तेनपु
ण्येननिर्व्यथोद्याभविष्यति ६५ तेनतदापयिष्यामिसाध्व्यास्नानफलंशुभम् भर्तुस्तेनैवपुण्येनकालमृत्यु
र्गमिष्यति ६६

५७ ५८ ५९ ६० विव्यथे इत्यंतर्भावितण्यर्थे व्यथयांचकारेत्यर्थः ६१ ६२ ६३ म
कल्याणसाधने इतिमंगलाधायि वचः वचनं ६४ क्षणिकं क्षणोत्पन्नं प्रयच्छेतिशेषः ६५ ६६ ५ ५ ५

महात्मनामांडव्येनयःशापोदत्तः सूर्योदयेपतिनाशरूपः सतस्यव्याध्यापनयने व्याधेः आसर्वतः अपनयने दूरीकरणे भवेत् शापेनव्याधिरेव
नश्येदित्यर्थः तत्रोपपत्तिमाह व्याधिमुक्तमिति ६७ ६८ वायुनायुवराजेनकरणभूतेन अब्जजः ब्रह्मा ६९ ७० ७१ ७२ व्यसनं

व्याध्यापनयनेशापोभवेद्दत्तोमहात्मना व्याधिमुक्तमिमंदेहंपुनर्जातंविदोविदुः ६७ शरीरत्यागमेवाहुर्मरणंविपदो
खिलाः शरीरेपातितःशापोनजीवेचाव्ययात्मनि ६८ तस्माच्छापाद्व्याधिमोक्षोभवेदितिवरंददौ मांडव्यवायुनानि
न्येशूलरोपितमब्जजः ६९ लक्षवर्तीव्रतोद्भूतंतथापुण्यमनुत्तमम् दापयामासविप्रायतेनाभून्निर्व्यथोमुनिः ७०
मुनिनातुकृतंमाघ्यांस्नानजंसुकृतंतथा तद्भर्त्रेदापयांचक्रे कालमृत्युविनाशकृत् ७१ पूर्णायुष्यंतेनलेभेतद्भर्तासु
कृतेनच शापाद्व्याधिविनिर्मोक्षःपंगुत्वस्यापिमानद ७२ व्यसनंतुतदासाध्व्यानिवर्त्यैवमहाप्रभुः तद्भर्तुश्चमु
नेश्चास्यदेवानांचमहात्मना ७३ लब्धकामैःसुरैःसर्वैःसार्धंधामस्वकंययौ देवाःसविस्मिताभूत्वादेवेंद्राद्या
महाबलाः ७४ तुष्टुवुस्तसतींपुण्यांलक्षवर्तीव्रतांतथा माघस्नानस्यमाहात्म्यंसाधुसाध्वितिचाब्रुवन् ७५
तथैवानुमताःसर्वेब्रह्मणासहतेययुः बुभुजेसकलान्कामान्भर्त्रातेनमहात्मना ७६ सोपिनिर्वेदमापेदेपा
पीयानितिनित्यशः तयासार्द्धंमहात्मासौमाघस्नानंचकारच लक्षवर्तीव्रतंसोपिपुनर्माघेचकारच ७७ ते
नभौमान्महाकामान्भुक्त्वादशसहस्रकं पुत्रपौत्रसमायुक्तौजीवंतौमोक्षमापतुः ७८ तस्मान्माघसमोधर्मो
नराणांपापकर्मणां नास्त्यन्योधर्मइत्येवसर्वधर्मविदांमतं ७९ इतिश्रीचा॰मा॰ एकोनत्रिंशोऽध्यायः २९ छ

दुःखं ७३ ७४ ७५ बुभुजेसापतिव्रतेतिशेषः ७६ सोपितद्भर्तापि पापीयानतिपापीयस्मीति निर्वेदंवैराग्यमापेदे ७७ भौमान्भूमिगता-
न् दशसहस्रकंवर्षाणीतिशेषः जीवंतौ मोक्षमापतुः जीवन्मुक्तावभूतां ७९ धर्मविषये ७९ इतिश्रीचा॰ माघमा॰ टीकायांपतिव्रतामाहात्म्ये
नामैकोनत्रिंशोऽध्यायः २९ छ

१ २ ३ ४ ५ ६ कापरिवेदनाकिंदुःखं अपरिहार्यहितदुःखमितिभावः ७ त्र्यंबकेतिवक्तव्ये त्रियंबकेत्यार्षं ८ वृंतात्प्रसवबंधनात्

कुटीरस्थाऊचुः दत्तंयेनदुरन्नंतुवसिष्ठायमहात्मने राक्षसोयंसदुर्बुद्धिः कांवागतिमवाप्सः १ नहीश्वरव्याहृतपःफलत्यन्यदभीप्सितं राजर्षिःकांगतिंप्रापब्रह्महत्याशतालयः २ विस्तारैतत्कथांसम्यगस्मान्बोधयसुव्रत इतिपृष्टःकुटीरस्थैर्गालवोवाक्यमब्रवीत् ३ शृणुध्वमितिचाभाष्यसाधुसाध्वितिसंस्तुवन् गालवउवाच कालमृत्युभयापन्नंराक्षसंचकृतागसम् ४ तन्नेतुमाययुर्घोरायमदूतायमोदिताः तान्दृष्ट्वादुद्रुवेशीघ्रंकैलासाधीशमीश्वरम् ५ प्रणम्योवाचतद्भीतःकितंवचनमन्यथा मातायदिविषंदद्यात्पिताक्रीणातिचेत्सुतम् ६ राजाहरतिसर्वस्वंतत्रकापरिवेदना शिवशंकरसर्वात्मंस्त्राहिमांकरुणाकर ७ महाकायमहाबाहोविश्वरूपनमोस्तुते त्रियंबकमहादेवसुगंधेपुष्टिवर्धन ८ वृंतादुर्वारुकंपक्कंमृत्योर्मुक्षीयमांयथा इतिमंत्रार्थकैर्वाक्यैःस्तुतःशंभुर्दयानिधिः ९ प्रोचेकरुणयादैत्यंमेघगंभीरयागिरा दुर्बुद्धिनाप्रार्थितोहंमोक्षमित्येवछद्मना १० अजरामरणंमन्येमोक्षंसर्वात्मनापुरा कांक्षयन्देवरमणीस्त्वंदुष्टेनैवचेतसा ११ निर्द्वंद्वोनिरहंकारोनिर्ममस्त्वंजितेंद्रियः वेदाभ्यासीविष्णुभक्तोनित्यानित्यविवेकवान् १२ निःसंदेहोमोक्षमेतिनान्यथातुकथंचन तस्मान्निष्कामुकोभूत्वानिर्द्वंद्वोनिरहंकृतिः १३ दयावान्सर्वभूतेषुविंध्याद्रौत्वंतपःकुरु प्रीतस्तेतपसाविष्णुरिष्टान्कामान्ददातिच १४ एकमेवास्तितेजन्मबलिपुत्रोभविष्यसि सहस्रबाहुर्बाणाख्यस्तदातेभविताध्रुवम् १५ संबंधोविष्णुनासाकंयादवेनमहात्मना तेनतेभवितायुद्धंतदाबाहुसहस्रकम् १६

उर्वारुकंकर्कटीं मुक्षीयमोचय ९ १० आर्षत्वात्पुरुषव्यत्ययःमन्यसेइत्यर्थः ११ १२ १३ १४ १५ १६

ददातिदास्यति १७ १८ १९ २० यमस्यकेतनंगृहं २१ तेनविष्णुनादत्तःवरोमोक्षविषयकोयस्मैसः २२ २३ राजर्षिःकल्माषपादः २४ २५ २६

छित्वाजित्वाचमांनत्वयासख्यमुपेयुषम् युद्धंविधायत्वांपश्चात्सनुमोक्षंददातिते १७ त्वयाविद्धोबाणसंज्ञस्त्वदु
र्बुद्धिदोःपरः विष्णुद्रोहान्महापापीनरकानेवविंदति १८ त्वयिजातेबलेःपुत्रेद्वारपालोभवामिते बहुसंपत्समृद्धश्च
पुत्रपौत्रैःसमन्वितः १९ भुक्त्वाकल्पंमहाभोगान्कल्पांतेमोक्षमेष्यसि इत्युक्त्वांतर्दधेरुद्रोराक्षसंगतकल्मषं २० हृ
राज्ञयाययुःसर्वेयमदूतामदोत्कटाः विहायराक्षसंक्रूरंयमकेतनमाययुः २१ सविंध्याद्रिंततोगत्वातपस्तेपेति
दारुणम् प्रीणयंस्तपसाविष्णुंतेनदत्तवरःपुनः २२ पातालेबलिपुत्रत्वंप्रायात्सकमहामतिः तत्रभुक्त्वामहाभो
गान्क्रमान्मोक्षमवाप्तवान् २३ सराजर्षिर्दुरात्मायःसंचरंश्चवनेवने अपश्यद्ब्राह्मणंकंचिद्दारेभ्योऋतुदंनिशि
२४ अथाभ्यधावद्भक्षार्थेक्रूरकर्मापिराक्षसः सभार्ययाप्रार्थितोपिपतिदेहीत्यनेकधा २५ अभक्षयत्ततो
भार्यातंशशापातिदुःखिता ऋतुकालेयदाभार्यांत्वंगमिष्यसिभूमिप २६ तदातेमरणंभूयान्नान्यथामेवचो
भवेत् चित्तोदेहंविसृज्यैवपश्चान्नारीदिवंययौ २७ प्रत्यहंसोपिशक्तेश्चभार्यांहंतुंपुनःपुनः दग्धस्तस्तवरा
जेनगच्छत्येववनांतरम् २८ श्वशुरंशक्तिभार्यासायाचेकरुणस्वना स्वाभाविकःप्रमादोहिदेवानामपिदेहि
नाम् २९ जागरेणकथंकालोनेयोस्माभिर्महामते कालंप्रमादिकंदृष्ट्वासहनिष्पातिनोध्रुवम् ३० तस्मान्मु
नेकृपालोत्वंशापमोक्षंद्रुतंकुरु पुत्रकल्पस्तशिष्योहिदयापात्रस्ततोविभो ३१ अस्मत्कर्मानुरूपेणदुःखा
न्येतानिजज्ञिरे राजानिमित्तमात्रंतुतस्मात्तस्मिन्दयांकुरु ३२

२७ शक्तेःवसिष्ठपुत्रस्यभार्यांहंतुंपुनःपुनरुद्यु
क इतिशेषः स्तवराजेनमाधवस्तवराजेन २८ २९ ३० शापमोक्षंअर्थात्कल्माषपादस्य ३१ ३२ ६२ ६२

१ २ ३ ४ ५ ६ कापरिवेदनाकिंदुःखं अपरिहार्यहितदुःखमितिभावः ७ त्र्यंबकेतिवक्तव्येत्रियंबकेत्यार्षं ८ वृंतात्प्रसवबंधनात्

कुटीरस्थाऊचुः दत्तंयेनदुरन्नंतुवसिष्ठायमहात्मने राक्षसोयंसदुर्बुद्धिः कांवागतिमवाप्सः १ नहीश्वरव्याहृतयःफलत्यन्यदभीप्सितं राजर्षिःकांगतिंप्रापब्रह्महत्याशतालयः २ विस्तारैतत्कथांसम्यगस्मान्बोधयसुव्रत इतिपृष्टःकुटीरस्थैर्गालवोवाक्यमब्रवीत् ३ शृणुध्वमितिचाभाष्यसाधुसाध्विति संस्तुवन् गालवउवाच कालमृत्युभयापन्नंराक्षसंचकृतागसम् ४ तन्नेतुमाययुर्घोरायमदूतायमोदिताः तान्दृष्ट्वादुद्रुवेशीघ्रंकैलासाद्रींशमीश्वरम् ५ प्रणम्योवाचतभीतःकितवचनमन्यथा मातायदिविषंदद्यात्पिताक्रीणातिचेत्सुतम् ६ राजाहरतिसर्वस्वंतत्रकापरिवेदना शिवशंकरसर्वात्मन्त्राहिमांकरुणाकर ७ महाकायमहाबाहोविश्वरूपनमोस्तुते त्रियंबकमहादेवसुगंधेपुष्टिवर्धन ८ वृंतादुर्वारुकंपक्वंमृत्योर्मुक्षीयमांयथा इतिमंत्रार्थकैर्वाक्यैःस्तुतःशंभुर्दयानिधिः ९ प्रोचेकरुणयादैत्यंमेघगंभीरयागिरा दुर्बुद्धिनाप्रार्थितोहंमोक्षमित्येवछद्मना १० अजरामरणंमन्येमोक्षंसर्वात्मनापुरा कांक्षयन्देवरमणीस्त्वंदुष्टेनैवचेतसा ११ निर्द्वंद्वोनिरहंकारोनिर्ममस्त्वजितेंद्रियः वेदाभ्यासीविष्णुभक्तोनित्यानित्यानित्यविवेकवान् १२ निःसंदेहोमोक्षमेतिनान्यथातुकथंचन तस्मान्निष्कामुकोभूत्वानिर्द्वंद्वोनिरहंकृतिः १३ दयावान्सर्वभूतेषुविंध्याद्रौत्वंतपःकुरु प्रीतस्तेतपसाविष्णुरिष्टान्कामान्ददातिच १४ एकमेवास्तितेजन्मबलिपुत्रोभविष्यसि सहस्रबाहुर्बाणाख्यस्तदातेभविताध्रुवम् १५ संबंधोविष्णुनासाकंयादवेनमहात्मना तेनतेभवितायुद्धंतदाबाहुसहस्रकम् १६

उर्वारुकंकर्कटींमुक्षीयमोचय ९ १० आर्षत्वात्पुरुषव्यत्ययःमन्यसेइत्यर्थः ११ १२ १३ १४ १५ १६

ददातिदास्यति १७ १८ १९ २० यमस्यकेतनंगृहं २१ तेनविष्णुनादत्तःवरोमोक्षविषयकोयस्मैसः २२ २३ राजर्षिःकल्माषपादः २४ २५ २६

छित्वाजित्वाचमांनत्वयासख्यमुपेयुषम् युद्धंविधायत्वांपश्चात्सनुमोक्षंददातिते १७ त्वयाविद्धोबाणसंज्ञस्त्वदु
र्बुद्धिदोःपरः विष्णुद्रोहान्महापापीनरकानेवाधिदति १८ त्वयिजानेवलेःपुत्रेद्वारपालोभवामिते बहुसंपत्समृद्धश्च
पुत्रपौत्रैःसमन्वितः १९ भुक्त्वाकल्पमहाभोगान्कल्पांतेमोक्ष मेष्यसि इत्युक्त्वांतर्दधेरुद्रोराक्षसंगतकल्मषं २० हृ·
राष्टयाययुःसर्वेयमदूतामदोत्कटाः विहायराक्षसंक्रूरंयमकेतनमाययुः २१ सविंध्याद्रितटंगत्वातपस्तेपेति·
दारुणम् प्रीणयंस्तपसाविष्णुंतेनदत्तवरःपुनः २२ पातालेबलिपुत्रत्वंप्रायात्सकमहामतिः तत्रभुक्त्वामहाभो·
गान्क्रमान्मोक्षमवाप्तवान् २३ सराजर्षिर्दुरात्मायसंचरंश्चवनेघने अपश्यद्ब्राह्मणंकंचिद्दारेभ्योऋतुदंनिशि
२४ अथाभ्यधावद्भक्षार्थेक्रूरकर्मापिराक्षसः सभार्ययाप्रार्थितोपिपतिदेहीत्यनेकधा २५ अभक्षयत्ततो·
भार्यातंशशापातिदुःखिता ऋतुकालेयदाभार्यांत्वंगमिष्यसिभूमिप २६ तदातेमरणंभूयान्नान्यथामेवचो
भवेत् चित्तौदेहंविसृज्यैवपश्चान्नारीदिवंययौ २७ प्रत्यहंसोपिशक्तेश्चभार्याहंतुपुनःपुनः दग्धस्तकस्तवरा
जेनगच्छत्येववनांतरम् २८ श्वशुरंशक्तिभार्यासाययाचेकरुणस्वना स्वाभाविकःप्रमादोहिदेवानामपिदेहि
नाम् २९ जागरेणाकथंकालोनेयोस्माभिर्महामते कालप्रमादिकंदृष्ट्वासहनिष्पातिनोध्रुवम् ३० तस्मात्सु
नेकृपालोत्वंशापमोक्षंद्रुतंकुरु पुत्रकल्पस्तकशिष्योहिदयापात्रस्ततोविभो ३१ अस्मत्कर्मानुरूपेणदुःखा·
न्येतानिजज्ञिरे राजानिमित्तमात्रंतुतस्मात्तास्मिन्दयांकुरु ३२

२७ शक्तेःवसिष्ठपुत्रस्यभार्यांहंतुंपुनःपुनरुद्यु
क्तइतिशेषः स्तवराजेनमाधवस्तवराजेन २८ २९ ३० शापमोक्षंअर्थात्कल्माषपादस्य ३१ ३२ ६२ ६९

३३ ३४ सार्हणाः सोपायनाः पाणयोयेषांते ३५ बहुकामः मनःपूर्वक आदरोयस्मिन्निति क्रियाविशेषणम् ३६ कियत्कालमिति अत्रेदमनुसंधेयं कियत्कालंमदयंत्यातत्पत्न्या ब्राह्मणीशापभयाभिवारितोजितेंद्रियतयासुखंतिष्ठन् कालमृत्युसमये पाशाकृष्टइव कामाकृष्टः क

स्नुषयाबोधितोविप्रोवसिष्ठोब्रह्मनंदनः आदायपाणिनावारिस्वकमंडलुतःशुचिः ३३ दत्वामाघ्यांस्नानफलंमोक्षितःपुनरागतः तस्मात्समुक्तपापःसन्पूर्वरूपमुपेयिवान् ३४ आगच्छंतंतदाभूपंपौराःसार्हणपाणयः अलंकृत्यपुरींसर्वोद्रष्टुंदूरंविनिर्ययुः ३५ पौरांसंभाव्यराजर्षिर्बहुकामंयथाक्रमं प्रविवेशततःस्वांतःपुरंराज्ञीभिरीक्षितः ३६ कियत्कालंसुखंस्थित्वारमणींरंतुमाह्वयत् रममाणस्तयासाकंमृतिमापमहामनाः ३७ वसिष्ठस्यप्रसादेनमुक्तिमापसुदुर्लभाम् गालवउवाच इत्येतत्कथितंसर्वंमाघमाहात्म्यमुत्तमम् ३८ निर्विशेषेणमेववक्तुंनालंकल्पशतैरपि माघमासस्यमाहात्म्यमंशांशेनप्रकीर्तितम् ३९ तस्मादेतदनुष्ठेयंधर्मंभार्गवतंशुभम् धर्मेणानेनसंतुष्टःसम्यक्चीर्णेनवैहरिः ४० ददात्यभिहितान्कामान्मुक्तिंचैवसुदुर्लभाम् इत्युक्त्वाविररामाथगालवोमुनिसत्तमः ४१ ततःकुटीरक्षेत्रस्थाब्राह्मणाब्रह्मवादिनः गालवंपूजयामासुर्यथाभूतियथाबलम् ४२ गोभूतिलहिरण्याद्यैधान्यांबरविभूषणैः प्रणेमुर्युगपद्भक्त्यातुष्टुवुर्विविधैःस्तवैः ४३ अनुज्ञातागृहंजग्मुर्गालवेनमहात्मना तदातुनिमिनाहूतोयज्ञार्थेसंशितव्रतः ४४ गोदावरीतटप्रायाच्छिष्यैःसहतपोनिधिः एतद्वृत्तांतमखिलंशांडिल्योथमहामुनिः ४५ अष्टाविंशतिसंख्येभ्यःपुरुषेभ्योभ्यधात्ततः श्रुत्वातेप्यतिसंतुष्टामाघमाहात्म्यमुत्तमम् ४६

कल्माषपादस्तयासहरममाणोमृतिमापवानिति ३७ ३८ निर्विशेषेणसाकल्येनवक्तुंनालंनसमर्थोस्मि ३९ एतद्धर्मंस्याद्धर्ममस्त्रियामित्यमरोक्तेःक्लीबत्वं ४० ४१ यथाभूमियथाविभवं ४२ गवादिभिः पूजयामासुरितिपूर्वेणसंबंधः ४३ ४४ तपोनिधिःगालवः ४५ ४६

४७ ४८ ४९ ५० अब्जजः ब्रह्मा ५१ भगवत्कथामिनिशेषः स्फुरदंगरुहः रोमांचिततनुः ५२ पर्यटन्जगा

शांडिल्यंपूजयामास्कःस्कयज्ञंचमहामतिं अनुज्ञातास्तथाताभ्यांयथाकामंगतास्तते ४७ तत्रैकस्तुंदिलो नामगंधर्वस्तद्दिवंययौ सप्तविंशतिसंख्याकाःपुरुषाःसंशितव्रताः ४८ बभूवुस्तनयास्तस्यस्कयज्ञस्यमहात्मनः नाम्नापंचशिखाःसर्वेतपोनिष्ठामहाबलाः ४९ माघेमासिपुनःकृत्वास्नानमाधवपूजनं तेनलब्ध्वामहाज्ञानंमुक्तिंचापिप्रपेदिरे ५० शांडिल्योथस्कयज्ञेनसाकंस्वाश्रममाययौ सूतउवाच एतद्वृत्तांतमखिलंनारदायाब्जजोऽवदत् ५१ श्रुत्वाथनारदोदिव्यांस्कधाकस्यामनोहराम् संतोषमतुलंलेभेस्फुरदंगरुहोमुनिः ५२ विधिं प्रणम्यबहुधाकृत्वाकृत्वाप्रदक्षिणं अनुज्ञातस्ततस्तेनत्रीन्लोकान्पर्यटन्मुनिः ५३ सूतउवाच एतत्सर्वं समाख्यातंमाघमाहात्म्यमुत्तमम् शुश्रूषेभ्योभवद्भ्यश्चसदागोप्यतमंनृणां ५४ कस्यापीदमनाख्येयंश्रद्धाहीनस्यदुर्मतेः देयंशिष्यायपुत्रायचिरज्ञातस्वरूपिणे· ५५ सर्ववेदसमंशास्त्रंसारभूतंमनोरमं अधीत्वा सर्वशास्त्राणिपयःसारमिवोद्धृतम् ५६ नानेनसदृशंशास्त्रंविष्णुप्रीतिकरंशुभम् विज्ञातेयेनशास्त्रेतुसर्वंज्ञातमिदंभवेत् ५७ श्रवणादेवशास्त्रस्यविलयंयातिसर्वशः दूरत्ययानिपापानिबहुजन्मार्जितानिच ५८

वः ५३ ५४ ज्ञातंस्वरूपंयस्यतस्मैपरिचितशीलायेत्यर्थः ५५ पयःसारंनवनीतम् ५६ येनकारणेन अस्मिन्शास्त्रेविज्ञातेसति इदंसर्वंज्ञातंभवेत् ५७ ५८ ५९ ६० ६१ ६२

५९ ६० ६१ ६२ ६३ ६४ इतिश्रीवायुपुराणीयमाघमाहात्म्येटीकायां त्रिंशोऽध्यायः ३० ६॥

भक्त्यातुपूजयेद्यस्तु लिखित्वापुस्तकंगृहे तद्गृहंतुकुरुक्षेत्रंतस्यमुक्तिःकरेस्थिता ५९ लिखित्वापुस्तकंयस्तु
भक्त्यादद्याद्विजन्मने वाचस्पतिसमोभूयोजायतेब्रह्मयोनिषु ६० श्रुत्वाशास्त्रंसकृद्वापिपुनर्मातुःपयोरसं
बहुकर्मकरोवापिनपिबत्येवनिश्चयम् ६१ पुत्रार्थीविंदतेपुत्रान्धनार्थीधनमाप्नुयात् रोगार्तोमुच्यतेरोगा
ज्जयार्थीजयमाप्नुयात् ६२ धर्मार्थीप्राप्नुयाद्धर्मंभोगार्थीभोगमाप्नुयात् किमत्रबहुनोक्तेन मोक्षार्थीमोक्ष
माप्नुयात् ६३ इतिश्रुत्वाशौनकाद्यामाघमाहात्म्यमुत्तमम् संतोषमतुलंप्रापुर्विस्मयोत्फुल्ललोचनाः सू
तंपौराणिकंतेतुपूजयामासुरंजसा ६४ इतिश्रीवायुपुराणेमाघमाहात्म्येब्रह्मनारदसंवादेत्रिंशोऽध्यायः
३० आद्येनसहएकत्रिंशोऽध्यायः ३१ सर्वश्लोकसंख्या २६०६ इतिश्रीज्योतिर्विदकुलावतंस
व्यंकटरामात्मजहरिकृष्णविनिर्मितेबृहज्ज्योतिषार्णवेअष्टमेधर्मस्कंधे· चतुर्थेमासस्तबकेमाघमासमा·
हात्म्यंएकादशंसमाप्तम्॥११ श्रीसीतासमर्चंद्रोजयति श्रीरस्तु शुभमस्तु ६॥

यह माघमाहात्म्य मुंबईमैं पं० श्रीधर शिवलालकै ज्ञानसागर छापखानामैं छाप्यो· सं·१९४६ शाके १८११ ज्येष्ठशुक्ल १

इतिमासस्तबकेमाघमासमाहात्म्यंसमाप्तं

अथमासस्तवकेफाल्गुनमासमाहात्म्यप्रारभ्यते·


सूत
शौनक
विष्णु
नार
विष्णु
रेवत
इन्द्रादिदे
विष्णु
कपि
पिश
वासि
विश्वा
फल्गुन
केला
नार
शिव
नार
शुक
नारद
इक्षुरा
शत्रुघ्न
लवक
ब्रह्मादि


सूता·
कृ·
रा·
स्त्री·
कपिञ्ज·
लवकर्ण
यम·
अप्सरा
जाबालि
ऋ·
पिशाच·
होलीपूज·
होलासुरदैत्य
युद्ध·
नारद·
शिर·
शिव·
होलि·
विष्णु
गालवऋषि·
सुदर्शनरा·
नृत्यक्रीडा

अथ फाल्गुनमासमाहात्म्यविषयानुक्रमणिका·

अध्याय	विषय
१	शौनकप्रश्नेनसूतस्यकथारंभः दुःखितजनानुद्धर्तुं वरुणासह नारदस्यवैकुंठगमनं तत्रनारदविष्णुसंवादे सर्वदुःखोपशांत्यैकुंभसंक्रांतौफल्गुस्नानप्रतिपादनं· श्लोकाः ५०
२	फाल्गुनेफल्गुस्नानंकिमर्थमितिप्रश्नेगयासुरकथारंभः तत्रगयासुरप्रपीडितदेवकृतविष्णुस्तवनं ततः विष्णोर्वचनेनइंद्रस्यगयासुरंप्रतिगमनं तत्रेंद्रस्यपलायनं ततः गयासुरसेनापतिनालोहदंष्ट्रेणसह देवानां महायुद्धं ५८
३	ततोगयासुरेणसह विष्णोर्महायुद्धं तत्रगंडकीशिलारूपीविष्णोरनेकस्वरूपोत्पत्तिः ततः गयासुरकृत विष्णुस्तवनं विष्णोर्वरदानेनगयापुरनिर्माणं पुनःपुनः नद्युत्पत्तिः फल्गुनद्युत्पत्तिः अक्षय्यवटप्रशंसा· श्लो० ६१
४	गयायांवटरूपेणब्रह्मणःस्थितेः कारणंगयाक्षेत्रस्यत्रिसंध्यातीर्थमहिमा· श्लो० ५७
५	फाल्गुनेफल्गुस्नानमहिमा· श्लो० ५२
६	स्नानविधिकथनं तत्र कपिंजलपिशंजलकथा- विश्वामित्रवसिष्ठयोर्विरोधः श्लो० ५६
७	फाल्गुनेदानविधिस्तत्फलंच· श्लो० ४९
८	फाल्गुनमाहात्म्यंप्रकाशयितुंभुविद्विजरूपेणनारदस्यपरिभ्रमणं तदाफल्गुस्नानादिनालोकेनिरोधेसति यमस्यशिवाराधनं तदानारदंहंतुंशिवेनत्रिशूलंप्रेषितं त्रिशूलभयान्नारदस्यवैकुंठगमनं ततो शिवक्रोधशांत्यर्थं शिवारूपेण शिवंप्रतिविष्णोर्गमनं ततः फल्गोरंतस्तोयत्मकः शिवस्य शापः शिवस्त्वंदिगंबरोभवेतिफल्गोः शाप० श्लो० ६७
९	फल्गुफाल्गुनमाहात्म्येनष्टेपुनः नारदस्यकैलासगमनं तत्रनारदवाक्येनतुंबरोः पक्षिरूपेणस्थितिः ततः शिवभयाच्छुकरूपस्यतुंबरोः सत्यवत्योदरे प्रवेशः सएवशुकयोगींद्रः, श्लो० ४६
१०	मनःशुद्ध्यर्थंनारदोपदेशतः पृथोः फल्गुतीरे फाल्गुनव्रताचरणं· श्लो· १०७
११	फाल्गुनमाहात्म्यगुप्तकरणे कारणं लंबकर्णस्यवरदानं तेनराहोः संयोगः; श्लो० २३
१२	राहोर्वचनेनब्रह्माणंहंतुंलंबकर्णस्यसत्यलोकगमनं श्लो० ३५
१३	लंबकर्णभयात्ब्रह्मादीनांजलमध्येनिवासः
१४	अनेकविधदानानि राधागोपालयोर्धात्रीमूलेपूजा· श्लो० २९
१५	देवकृतविष्णुस्तोत्रं स्तोत्रानुष्ठानंच· श्लो· २८
१६	लंबकर्णदैत्यनाशार्थं मायातपोवननिर्माणं तत्रकपिंजलब्रह्मर्षेर्निवासः श्लो· ३१
१७	कपिंजलभार्याहरणनिमित्तेन लंबकर्णस्यनाशः तत्सैन्यनाशश्च· श्लो० २८
१८	यमवचनेनफाल्गुनमाहात्म्यगुप्तकरणार्थंमायास्त्रीणां निर्माणं· श्लो० २८
१९	फाल्गुनव्रतेनजाबालेःपिशाचयोनिसकाशा

त्युक्तिः श्लोकाः २५
२० भद्रायांहोलिकादीपने ग्रामनाशः तत्रनृसिंहभूपकथा· श्लो० २६
२१ होलिकाव्रतकथनार्थं होलास्कराख्यान होलास्करकन्योत्पत्तिः श्लो० २८
२२ होलास्करदिग्जयः श्लो० ३०
२३ हुताशनीदेव्युत्पत्तिः ततःस्वभगरूपाभवेनिशुक्रशापः शिवरात्रिनामप्रयोजनव्रतपूजाच-शिवस्यचंडगणोत्पत्तिः श्लो० १००
२४ होलिकाविवाहः ततस्तस्यास्त्यागः वनेनारद-होलिकासमागमः नारदोपदेशतः होलिकातपःकरणं· श्लो० ३३
२५ होलास्करदैत्यदूतस्य वैकुंठगमनं· श्लो० ३०
२६ होलास्करसैन्यवधः होलासुरस्ययुद्धार्थंवैकुंठगमनं तत्रहोलास्करस्यवधेजाते तत्शीर्षंतपोनिष्ठितायाः होलिकायाः करेपतितं· ततो· होलिकायाः विष्णुनासहयुद्धं· श्लो० ६०
२७ पराजितायाः होलिकायाः स्मरणाच्छिवप्रादुर्भावः ततोवरप्राप्तिःफाल्गुनपौर्णमास्यां हुताशने होलिकादेहदहनं· माघपौर्णिमामारभ्यफाल्गुनपौर्णिमापर्यंतंनृपाणांरात्रौकृत्यं होलिकादीपने भूस्नानं होलिकाप्रतिमाकरणं· श्लो· ३२
२८ होलिकापूजामंत्रादिकथनं· श्लो० २४
२९ होलिकापरेह्नि भस्मवंदनविधानंगोपीगीतमाहात्म्यधूलिचंदनाकरणेदोषः तद्दिने देशांतरगमनेनमरणकथाच· श्लो० ३१
३० विरूपनृपकथा· श्लो० २९
३१ फाल्गुनकृष्णपक्षेधूलीव्रतपंचकं सुदर्शननृपकथा· श्लो० २९
३२ सुदर्शनगालवसंवादे विष्णुस्तवनं· श्लो० ३३
३३ फाल्गुनपौर्णिमायांचाम्राग्निव्रतंतद्विधिश्च· ३३
३४ धूलिव्रतसांगतार्थं अवभृथस्नानविधिः तत्रवापीलक्षणं सोमदत्तविप्रकथा श्लो· ३१
३५ धूलिव्रतनिंदादोषशांत्यर्थंगणपतिव्रतं ३३
३६ फाल्गुनशुक्लषष्ठीमारभ्यदशाह्निकव्रतं तद्विधिः पंचोपासकानांपंचायतनपूजाविधिः ३२
३७ नटनृत्यावलोकनविधिः मगधनृपकथा· श्लोकाः ४६
३८ होलिकाव्रतविधानंतद्व्रतेनजारदोषशान्तिः श्लोकाः ३४
३९ अष्टादशपुराणश्रवणमहिमाकथनं स्कबुद्धबुधकथानकं· श्लो० २९

इतिफाल्गुनमासमाहात्म्यानुक्रमणिका·

इतिफाल्गुनमासमाहात्म्यानुक्रमणिका समाप्ता·

श्रीगणेशायनमः शौनकउवाच साधुसाधुमहाप्राज्ञसर्वज्ञवदतांवर त्वत्प्रसादेनदेवेशसर्वलोकोपकारकं १ श्रुतंमा
घस्यमाहात्म्यंमकरस्थेदिवाकरे प्रयागेसमनुप्राप्तेनालंतृप्त्यैममप्रभो २ अतोहंश्रोतुमिच्छामिमाहात्म्यंफाल्गुनस्यच सूतउवा
च साधुपृष्टंमहाभागप्राणिनांहितकारकं ३ नालंवर्णयितुंशक्योमहिमाफाल्गुनस्यच यस्माच्छिवेनप्रच्छन्नोममानुग्रहमिच्छ
ता ४ गतेबहुतिथेकालेदेवाल्लब्धंशक्रकेनच शक्रान्मयाश्रुतंकिंचित्परमयापिगोपितं ५ तवभक्त्यावशीभूतः कथयिष्याम्य
तोनघ शौनकउवाच सूतसूतमहाभागसर्वमासान्विहायवै ६ कस्मात्तुगोपितंचात्रशंभुःप्रेतराजकृपावशः पुनःकथित
वान्कस्मात्कथंलब्धंशक्रकेनच ७ एतत्सर्वंसमासेनसेतिहासेनवापुनः कथयस्वविदांश्रेष्ठयदितेस्यात्कृपामयि ८ सूतउ०
पुराकलियुगेघोरेवर्तमानेजनार्दने स्वेच्छयाब्रह्मतनुजोनारदस्तुंबरोःसह ९ मृत्युलोकंसमासाद्यभ्रममाणइतस्ततः द
दर्शजनसंघाताःशोकसंविग्नमानसाः १० अनपत्यान्मृतापत्यानपत्यकलहाकुलाः मृतस्त्रीकान्बहुस्त्रीकान्निःस्त्रीकाःस्त्री
जितास्तथा ११ पाकलापतयश्चान्येभृत्याधीनास्तथापरे क्षिप्रापस्माररोगार्ताःकुष्ठाष्टादशभिर्वृताः एतादृशान्जनान्वी-
क्ष्यतुंबरुःप्राहनारदम् १२ तुंबरुरुवाच सचेत्कृपार्द्रहृदयःकरिष्यतिजगत्कृपां भविष्यतितदासर्वंयत्तेमनसिवर्तते १३
एवंतुंबरुवाक्यात्तेदुःखसंविग्नमानसः वैकुंठंप्रययौक्षिप्रंनारदोगगनाध्वना १४ ददर्शवैष्णवंधामशंखचक्रगदाधरं पीतां
बरपरीधानंवनमालाविभूषितं १५ श्रीवत्सांकितवक्षःश्रीनिवासंपक्षिवाहनं तुलसीकोमलदलमालाभूषितकंधरं १६ कि
रीटकुंडलधरंवैजयंत्यालसद्गलं चतुर्भुजंघनश्यामंपुंडरीकनिभेक्षणं १७ सेवितंलोकपालाद्यैर्गीतंचित्ररथादिभिः स्तुतं
तुभिः सांगैश्चवेदैर्विग्रहधारिभिः १८ गंधर्वाप्सरसैर्यक्षैःकिन्नरैरथचारणैः ऋषिभिर्बहुभिश्चान्यैः कपिलाद्यैर्महात्मभि
१९ प्रणम्यदंडवद्भूमौकृतांजलिरभाषत जयनित्यपरानंदजगद्योनेपरावर २० नमस्तेभूतभव्येशछंदसांपतयेनमः तुभ्यं
नमस्त्रयीमूर्तेगुणातीतायतेनमः २१ गोलोकवासिनेतुभ्यंगोपालायनमोनमः भक्तार्तिनाशिनेतुभ्यंदुःखदावाग्निनाशि

३

द २२ स्तुत्वैवंदेवदेवेशंमाधवंकरुणानिधिं तूष्णींबभूवधर्मात्मानारदोवदतांवर २३ तंदृष्ट्वाशोकसंविग्नंनारंविदुषांवरं
प्रहस्योवाचभगवान्सर्वभूताशयस्थितः २४ किमर्थंम्लानवदनःकस्माच्चिंतासमागता निस्पृहस्यतवाप्यद्य
अहोचित्राविधेर्गतिः २५ एवंपितामहवचःश्रुत्वोवाचपुनर्वचः नारदउवाच नमेचिंतानमेदुःखंत्वत्प्रसादेनकेशव
२६ परंदृष्टंमयाताातमर्त्यलोकेसुपीडनं शूलैःप्रमेहातिसारैस्त्रिदोषैश्चज्वरैर्युताः २७ एवंरोगैश्चबहुभिःपीडिता
भृशदुःखिताः तथाकाणाश्चबधिराःकुब्जाःश्चांधाश्चपंगवः २८ महारोगहताश्चान्येदरिद्रानित्यसेवकाः ऋणग्रस्ताश्चहीनांगा
स्तथैवान्येप्रवासिनः २९ बुभुक्षिताःपीड्यंतेभ्रमंतश्चइतस्ततः अनावृष्ट्यातिवृष्ट्याचशलभैर्मूषकैः
शुकैः ३० पीडिताःपरचक्रेणस्वचक्रेणतथापुनः तथैववनितादृष्टाःश्चाविष्योमृतवत्सकाः ३१ एकापत्यास्त्वपत्याश्च
ऋतुहीनाःसदार्तवाः आधिभिर्व्याधिभिश्चान्यैर्जगत्सर्वंसुदुःखितम् एवंबहुविधंदृष्ट्वादुःखसंविग्नमानसः ३२
तस्यदुःखेनदेवेशदुःखितोहंनसंशयः तस्यक्लेशविनाशार्थमागतोस्मितवांतिके ३३ सर्वस्यार्तिहरोनित्यंयतस्त्वंक्लेशनाशनः
पोषकःसर्वलोकस्यस्वयंपालयिताविभुः ३४ नारदीयंवचःश्रुत्वाहृष्टोवैपरमःपुमान् उवाचमधुरंवाक्यं
नारदंप्रतिचादरात् ३५ श्रीभगवानुवाच शृणुनारदभद्रंतेसर्वलोकोपकारक फल्गोश्चस्नानमाहात्म्यंकुंभसंस्थेदिवाकरे
३६ स्नानदानंजपोहोमस्तर्पणंद्विजपूजनं गदाधरस्यदेवस्यपूजनंचयथोदितं ३७ सर्वदुःखोपशमनंमहापातकनाशनम्
यःकरोतिनरोभक्त्यासर्वपापात्प्रमुच्यते ३८ प्राप्नोतिपरमंसौख्यमिहलोकेपरत्रच भुक्त्वाचविविधान्भोगानंतेसायुज्यमाप्नुयात् ३९
इतिश्रीभविष्योत्तरपुराणेतपस्यमाहात्म्येप्रथमोऽध्यायः १ ७ नारदउ०
किमर्थंफाल्गुनेमासिफल्गुस्नानंमहाफलं गदाधरस्यदेवस्यकिमर्थंतत्रपूजनं १ कैरिदंतुपुराचीर्णंकथयस्वेतिहासतः
श्रीभगवानुवाच शृणुष्वावहितोब्रह्मन्इतिहासंपुरातनं २ अप्रकाश्यमनिर्वाच्यंकथयामिसमासतः तवस्तु

त्तिवशीभूतोध्यानेनब्रह्मनंदन ३ पुरागयासुरोदैत्यस्तपस्तेपेसुदारुणं शंभुप्रवरानमरानजयत्सकलानपि ४ अव
ध्यः सर्वभूतानामजेयास्त्रिदशैरपि जित्वाचसकलान्देवान्लोकपालान्ग्रहानपि ५ स्वभृत्यान्स्थापयामासअधिका
रेदिवौकसां स्वयमग्निः स्वयंवायुः सूर्यचंद्रमसौस्वयम् ६ स्वयमिंद्रश्चवरुणः कुबेरोग्रहतारकाः एवंतेनजिताः सर्वेअम
राः क्षीरशायिनं ७ ऋषिभिः सहितासजग्मुः केशवंक्लेशनाशनं योगमायासमाक्रांतं दृष्ट्वेंद्रपुरोगमाः ८ नालंप्रबोधि
तुंशक्ताभृशमुद्विग्नमानसाः मिथोविचारयामासुः कपिलाद्यामहर्षयः ९ स्तुतिप्रियोदेवदेवः श्रुतोदृष्टोप्यनेकधा इति
कृत्वामतिदेवाविष्णुंस्तोतुंप्रचक्रमुः १० देवाऊचुः जयनित्यपरानंदविश्वयोनेजगत्पते गुणातीतनिराभासजयब्र
ह्मेंद्रपूजित ११ क्षीराब्धिशायिनेतुभ्यंनमस्तेदनुजांतक नमस्तेजगतामीशसर्वक्लेशनिषूदन १२ पाहिपाहिजगद्वि
श्वंपीडितंदनुजाधिपैः त्वदन्योनास्तिनस्त्राताअतस्त्वांशरणंगताः १३ नमस्तेस्तुहृषीकेशजगत्पालकचाव्यय चि
त्स्वरूपनिजावासयोगिहृत्पद्मसंस्थित १४ नमःसहस्रशीर्षायसहस्राक्षायतेनमः सहस्रबाहवेतुभ्यंनमस्तेय
ज्ञसाधन १५ यज्ञाययज्ञरूपाययज्ञानांफलदायिने तुभ्यंसहस्रपादायनमस्तेविश्वपालक १६ सुदर्शनेननःपाहि
पाहिशार्ङ्गेणमाधव आमणेनचपद्मस्यचाहिदानवजाद्भयात् इतिसंस्तूयमानानांदेवानांदुःखकर्शिनां १७ आविरासी
त्परानंदः स्तवेनानेनतोषितः उवाचसुप्रसन्नात्माकिमर्थमिहचागताः १८ किमर्थंम्लानवदनाः कारणंब्रूतसत्वरम् ।
देवाऊचुः त्रिकालज्ञोसिभगवन्सर्वज्ञास्यसितत्वतः १९ परंब्रुवामःसकलंआज्ञयातवकेशव गयासुरोमहादैत्यस्त्रै
लोक्येपरमेश्वर २० राजानोविजिताःसर्वेयक्षरक्षांसिदानवाः देवाअपिमहेंद्राद्याजितास्थानाद्बहिष्कृताः २१ देवदै
त्यमनुष्याणांस्वर्गपातालवासिनां अधिकारेषुविन्यस्ताःस्वकीयाएवसर्वशः २२ किंपुनर्बहुनोक्तेनजीवशेषाःसमा
गताः उत्पत्तिस्थितिसंहारान्यःकरोतिस्वलीलया २३ शयालुत्वात्तवविभोअस्माकमिहकागतिः निद्रयाव्याकुला

येचतेहताःस्वयमेवहि २४ सर्वदानिद्रितोसित्वमतोदुःखस्यभागिनः देवानांगिरमाकर्ण्यप्रहस्यत्रिदशेश्वरः २५ प्रोवाच
मधुरंवाक्यंजगदानंदकारकम् विदितंवोमयासर्वंगयासुरविचेष्टितं २६ नानिद्रितोवाजागर्मिसाक्षित्वेनस्थितोस्म्यहं
तस्योच्छेदंकरिष्यामिशौचैरपिवरैर्युतः २७ देवानाश्वासयामासमहेंद्रंवाक्यमब्रवीत् दूतत्वंगच्छमघवन्पार्श्वेतस्यगयस्य
च २८ दूतोहंप्रेषितस्तेनतवांतिकमुपागतः त्यजस्वेंद्रपदंशीघ्रंपातालंयाहिसांप्रतं २९ इत्याज्ञापयतेविष्णुरितिब्रूहिग-
यासुरं सूतउवाच इत्थंश्रीहरिणादिष्टोजगामेंद्रस्तदास्पदं ३० दृष्ट्वातंस्वपदारूढंगंधर्वाप्सरसेवितं भ्रांतःकोपीमहेंद्रो
पिननामस्वामिनंयथा ३१ कोसित्वमितिसंपृष्टःकथयामासचात्मनः भगवन्देवदेवस्यविष्णोर्नारायणस्यच ३२ दूतो-
हंप्रेषितस्तेनतवांतिकमुपागतः त्यजस्वेंद्रपदंशीघ्रंपातालंयाहिसांप्रतं ३३ ममभक्तोसिवात्सल्यात्अपराधाहिभूरिशः
क्षमिताःप्रीतिभावेननिद्रितेनाथवापुनः ३४ जागृतोहमतोयाहिपरिवारेणसंयुतः नोचेदेकेनबाणेनप्रेषयामियमांतिकं
३५ इतिदूतवचःश्रुत्वाकोपप्रस्फुरिताधरः ध्रियतांयोब्रवीद्वाक्यंरक्तनेत्रोद्यतायुधः ३६ पलायमानंदेवेशंधृत्वापादेव्य-
विक्षिपन् भ्रामयित्वादशदिशःक्षीराब्धौमाधवांतिके ३७ ततआहूयसेनान्यंलोहदंष्ट्रंत्रिलोचनं तिस्रःकोट्योर्धकोटींच
रथवाजिपदातीनां ३८ नागानांभद्रजातीनांदत्वादिव्यायुधानिच युद्धायप्रेषयामासक्षीराब्धौशेषशायिनं ३९ गयासु-
रकरादृष्टःशक्रोब्धौश्रीशसन्निधौ विशीर्णगात्रःसहसापक्वशिंशफलंतथा ४० पपातभयदःसर्वान्गतास्तंस्वसुरान्ऋषी-
न् अहोकिमेतत्पतितंकिंवादैत्येनपातितं ४१ एवंविचार्यमाणस्तैर्बुद्धःकृच्छ्राच्छचीपतिः सर्वेशंकथयामासवज्रपा-
णिरिमांदशाम् ४२ धन्वंतरिंसमाहूयशक्रंसंप्रेषयन्प्रभुः शक्रंसंजीवयामाससंजीविन्यामृतेनच ४३ देवंप्रणम्याविधि
वद्वृत्तांतंन्यवेदयत् वदतीत्थंमघवतीश्रुतोदुंदुभिनिस्वनः ४४ ज्ञात्वादूतमुखात्सर्वंशत्रुसेनासमागमम् स्वसेनांकल्प-
यामासपरसैन्यविनाशिनीं ४५ पंचवक्त्रांचतुर्वक्त्रांषण्मुखांद्वादशाननां दशाननां कुंभकर्णांशतास्यांशूर्पकर्णकां ४६

व्याघ्रास्याःकुंजरास्याश्चहयग्रीवाःखराननाः उष्ट्रास्याःपक्षिवदनाःसर्पास्यामाहिषाननाः ४७ एवंविनिर्मितास्तेनगणाःशतसहस्रशः शस्त्रास्त्रधारिणःसर्वेसर्वेयुद्धविशारदाः ४८ सर्वेतेवाहनारूढाः कृतांतइवदुःसहाः दध्मुर्वाद्यान्यनेकानिदिव्यानिसुमहांत्यपि ४९ आज्ञयादेवदेवस्यनिजघ्नुःपरसैनिकान् रथीरथंसमासाद्यअश्वसाद्यश्वसादिनं ५० यन्तागजस्थंयंतारमंकुशैःसमयुद्ध्यत एवंद्वंद्वंसमभवत्पदातिस्तुपदातिनं ५१ कदाचिद्देवसैन्येनदैत्यसैन्यंपराजितं निरीक्ष्यलोहदंष्ट्रोथस्वयंयुद्धायनिर्ययौ ५२ ववर्षशरसंघातंवर्षाकालेघनोयथा शरैःसंपूरयामासधरणींगगनांतरं ५३ हस्त्यश्वारथिनोयोधानचलंतिइतस्ततः सर्वेचित्रधृताएवशरजालेनपूरिताः ५४ बभुःसर्वेसुरगणाःपंजरस्थाःशुकाइव नैवपलायितुंशक्ताःहाहाशब्दमभूत्तदा ५५ विलोक्यभगवान्विष्णुर्वन्ह्यस्त्रंसमयोजयत् दग्धंसर्वंतदातेनशस्त्रसंभववन्हिना ५६ अमृतंवर्षयामासस्वसैन्येकमलेक्षणः वन्हिधौतंयथास्वर्णंतथैवाचिरभौबलं ५७ पूर्वस्मादधिकंजातंबुद्धिवीर्यबलान्वितं ५८ इतिश्रीभ० फाल्गुनमा० द्वितीयोध्यायः २ छ नारदउवाच किमकारिततस्तेनलोहदंष्ट्रेणमानिना दग्धेषुसर्वसैन्येषुगजवाजिरथेषुच १ श्रीभगवानुवाच लोहावशिष्टःसमरेदग्धश्मश्रुनखत्वचः पश्चाजगामचैकाकीशंसितुंदेवचेष्टितं २ तंतथाविधमालोक्यअसमानंपराभवं क्रोधरक्तेक्षणोदैत्यःखड्गेनहतवान्रुषा ३ स्वयंचम्लानवदनस्तूष्णींमासगयासुरः ध्यात्वामुहूर्तंसकलानाहूयनिजसैनिकान् ४ ददौरत्नानितेभ्यश्चगजवाजिरथानपि सन्नद्धावाहिनींरुध्वाययौयुद्धायसत्वरं ५ यत्रास्तेभगवान्विष्णुस्तत्रयातःस्वयंतदा संदधेशतसंख्याकान्बाणान्सूर्यसमप्रभान् ६ चिच्छेदभगवान्सर्वान्बाणानाशीविषोपमान् ततइंद्रःसमभ्येत्ययोद्धुंदैत्येनसंगरे ७ ऐरावतसमारूढोजयंतेनसमन्वितः दिव्यैर्बाणशतैर्विद्धोप्यसुरोनैवमन्यत ८ पुनर्जघानगदयातोमरेणासिधारया यानिचान्यानिमघवाशस्त्राण्यस्त्राणिचाक्षिपत् ९ आदायतानिसर्वाणिस्वकरेणैवलीलया तैरे

वतद्धनुश्छिन्नंरथः सारथिनासह १० वज्रमादायहस्तेनअभ्यधावतवृत्रहा ततः शरसहस्रेणसहस्राक्षिण्यपूरयत् ११ विद्धः सहस्रबाणेनविचेष्टोनिपपातह केशेषुमातलिंधृत्वाचिक्षेपनिजमंदिरं १२ त्रिशूलेनातितीक्ष्णेनजयंतोपिनिपातितः ऐरावतंकल्पतरुंहयराजंभिषग्वरम् १३ रंभां तिलोत्तमां चान्यान् सुरराजगृहेस्थितान् अनीतानिंद्रभवनात्तान्सर्वान्विगतस्पृहः १४ अविचार्यैवतान्सर्वान्क्षीराब्धौचव्यचिक्षिपत् एवंतेनहृताः सर्वेमज्जिताब्धौसमंततः १५ एकोवशिष्टोभगवान्शंखचक्रगदाधरः लक्ष्म्याकेवलयाजुष्टोपश्यतिस्मइतस्ततः १६ चिक्षेपकमलंहंतुंदैत्यंदुष्टमतिंखलम् आगतंकमलंदक्षाबलाद्धस्तेनसोदधौ १७ भ्रामयित्वादशदिशोवायुचक्रेनिवेशितं तदादिकमलोत्पत्तिर्जातासर्वजलाशये १८ ततः क्रुद्धः सभगवान्चक्रंचिक्षेपतंरिपुं तदप्यादायहस्तेनप्राक्षिपत्गंडकीतटे १९ तस्यचक्रस्यसंघर्षात्सर्वाश्चक्रांकिताः शिलाः अनंताविष्णुरूपास्तु भुक्तिमुक्तिफलप्रदाः २० ततः कोपेनमहतादध्मौशंखंप्रतापवान् श्रुत्वैवंशंखनिनदंकोपप्रस्फुरिताधरः २१ बलाद्गृहीत्वातच्छंखंपारावारपरिक्षिपत् तद्भयाच्चंचलालक्ष्मीर्विष्णुंत्यक्त्वाप्यपीपलत् २२ नलेभेनिर्भयस्थानमतोसागरमाविशत् तदैकाकीसभगवान्गदापाणिर्महौजसा २३ सशापलक्ष्मींचरुषा चंचलात्वंभविष्यसि ततः समभवद्युद्धंद्वयोरपिद्वयोरिव २४ दिव्यवर्षसहस्राणिबाहुप्रहरणोद्यतौ नातिम्लानौनसंतुष्टौयुद्ध्यमानौदिवानिशम् २५ ततः कतिपयैःकालैःक्षीणशक्तिर्गयोभवत् पश्चादाक्रम्यतद्गात्रंगदयाताडितोभृशम् २६ तथापिप्राणान्नजहौप्रसादाच्छूलपाणिनः गदाघातविनिर्भिन्नगात्रक्लेशेनदुःखितः २७ नप्रापशरणंकिंचिद्विष्णुंस्तोतुंप्रचक्रमे दैत्यउवाच शिवंवरेण्यंपुरुषंपुरातनंसनातनंकारणकारणानाम् विश्वस्ययोनिंप्रकृतेःपरात्परंत्वांबीजभूतंशरणंप्रपद्ये २८ ब्रह्मोपेंद्रायेचसाध्यादियक्षारुद्रादित्यालोकपालाःसुरेशाः मोहाविष्टानैवजानंतितत्त्वंत्वांबीजभूतंशरणंप्रपद्ये २९ ध्यानैर्योगैःसाधनैर्योगिनोपिवेदैःशास्त्रैर्नैवजानंतिरूपं भ्रमंतिचान्येगिरिगह्वरे·

स्तुत्वांविश्वयोनिंशरणंप्रपद्ये ३० कृतापराधोस्मिजगन्निवासमांत्राहित्राहिशरणागतोहं कृपानिधेमेऽपराधंक्षमस्वयत·
स्त्वाहंशरणागतोस्मि ३१ स्तुत्वैवंदेवदेवेशंगदापाणिमधोक्षजं हस्ताभ्यांचरणौगृह्यनेत्राभ्याममसृजज्जलं ३२ कृपासमु-
द्रोभगवान्परेशोवरंवृणीष्वेतिकृतागसाय ऊचेप्रसन्नःप्रणतायतस्मैसंस्पृश्यगात्रंस्वधयाकरेण ३३ हरिरु० वत्सोसि
त्वंमयाचाद्यपरस्कृतिविमोहितः प्रीतोस्मितवभावेनदास्यामितवकांक्षितं ३४ इदंहिस्तोत्रंपरमंपवित्रंदिनावसानेमनुजाः
पठंति तेमृत्युबाधांसहसाविहायमोदंतिपुत्रैश्चममप्रसादात् ३५ मृतश्चेन्मोक्षमाप्नोतिमत्प्रसादान्नसंशयः ममप्रीति
करंस्तोत्रंसर्वसंपत्प्रदंनृणां ३६ निपीयवैष्णवींवाणीमथोवाचगयासुरः नयाचेराज्यमतुलंनचामोक्षंगदाधर ३७ त्वत्पा
दाब्जंशिरोदेशेयाचेहंममसर्वदा अन्यंवरंवरिष्यामिदेहित्वंभुवनेश्वर ३८ देशोयंकीकटःपापोनराणांदुर्गतिप्रदः तत्राहं
पतितोयस्मात्तस्मात्त्वंकुरुकेशव ३९ मन्नामनगरंरम्यंसर्वतीर्थैरलंकृतं भुक्तिमुक्तिप्रदंनृणांपितॄणांतृप्तिकारकं ४० त
थेत्युक्त्वाभगवतात्क्रोशमात्रेगयाशिरे दत्वाचैकंपदंरम्यंतन्नाम्नीमकरोत्पुरीम् ४१ सागयेतिचविख्यातात्रिषुलोकेषुवि
श्रुता पंचक्रोशमितासाचपर्वतैःसमलंकृता ४२ एवंरम्यंपुरंकृत्वादृष्ट्वाशून्यंजगत्त्रयं एकेनैवतुचक्रेणसूर्योभ्रमतिनित्य
दा ४३ तथैकेनपदाविश्वंभ्रममाणोजनार्दनः ददर्शदेवान्निश्चेष्टांविशीर्णावयवांस्तथा ४४ प्रविष्टान्सागरेघोरेदश
दिक्षुपलायितान् मृतान्संजीवयामासच्छिन्नान्वैपाणिनास्पृशन् ४५ अब्धेर्निष्काशयामासप्रभावेणपुनःपुनः तत्र
जातानदीरम्यास्नानान्मोक्षप्रदायिनी ४६ पुनःपुनेतिविख्यातापितॄणांतृप्तिदायिनी ततःपंचामृतस्नानंदत्वास्नातश्च
चक्रिणे ४७ सर्वतीर्थमयंतोयंस्थितंब्रह्मकमंडलौ तेनैवस्नपनंचक्रुःसूक्तैर्वेदसमुद्भवैः ४८ तत्रैवचनदीजातापंचामृत·
जलाविला विष्णोःसर्वांगसंभूताफलेनगुरुणायुता ४९ नाम्नाफल्गुरितिख्यातात्रिषुलोकेषुविश्रुता फल्गुतीर्थेतुयःस्नात्वा
दृष्ट्वादेवंगदाधरं ५० फाल्गुनेसमनुप्राप्तेनतस्यपुनरागमः एवंसाफाल्गुनेमासिफल्गुर्जातामहानदी ५१ आसितायांतृतीया

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

यांमध्यान्हेरविमंडले तदास्नानेनदानेनपूजनेनजगद्गुरोः ५२ मुच्यतेसर्वपापेभ्योब्रह्मसायुज्यमाप्नुयात् पूजयित्वा
विधानेनस्तुत्वाजप्त्वासमाहिताः ५३ आज्ञामादायतेसर्वेस्वाधिकारान्यथापुरा चक्रुःप्रसन्नवदनाःशांताविनिर्वृतार-
यः ५४ यानिचान्यानिरत्नानिचाब्धेर्मग्नानिसर्वशः तस्मात्तौमथितश्चाब्धिःपुनर्लब्धानितानिवै ५५ अंशेनदेवताःस-
वास्तीर्थानिविविधानिच क्षेत्राण्यपितुसर्वाणिआगतानिवसंतिच ५६ ब्रह्मापिवटरूपेणास्थितःशर्वस्यसन्निधौ
वटच्छायेतिसाप्रोक्ताअक्षय्यफलदायिनी ५७ पितॄणांपरलोकस्यशासनात्तस्यशूलिनः फाल्गुनेमासिसंप्राप्तेवटच्छा-
यांसमाश्रितः ५८ यःकुर्यात्पिंडदानंसपितॄंस्तारयतिध्रुवम् गयायांकिंपुनःप्रोक्तंऋणत्रयविमोचनं ५९ इतिश्रीभ-
विष्यो०पु० फाल्गुनमाहात्म्येतृतीयोऽध्यायः ३ छ नारदउवाच ब्रह्मावटस्वरूपेणाकिमर्थंतत्रसंस्थितः ए-
तन्मेकारणंब्रूहिकृपयाधरणीधर १ नारायणउवाच धाताकदाचिदात्मानममन्यतगुरुंसच तीर्थयात्राप्रसंगेनपुरींवा-
राणसींययौ २ स्नात्वाभागीरथींरम्यांपंचवक्त्रःशिवंययौ निनिंदशंभुंसगणंमत्तोवारुणिभिर्यथा ३ ततःकोपेनम-
हताशिवेननाविलोकितः भैरवायददावाज्ञांदुष्टोयंहन्यतामिति ४ खड्गमादायहस्तेनयदैकमहरच्छिरः तदाकोला-
हलोजातोब्रह्मांडेसकलेपिच हाहाकृत्वाप्रधावंतिदेवाइंद्रपुरोगमाः पलायनपरोब्रह्माप्यत्रतस्यापतच्छिरः ६ क-
पालतीर्थेतत्राभूद्वाराणस्यांमुनीश्वराः कीकटेषुगतोब्रह्मादुःखार्तोवृक्षमाश्रितः ७ उवाहरक्तंबहुधातत्रजातानदी-
शुभा तज्जलस्पर्शमात्रेणकृतंकर्मविनश्यति ८ अतःस्वाकर्मनाशेतिविख्याताजगतीतले ततोगयांसमागम्यविष्ण-
वेतन्न्यवेदयत् ९ पुनर्निंदांचकारोच्चैःशप्तोसौप्रभविष्णुना शिवेविष्णौचकोभेदोविष्णुःसाक्षाच्छिवःस्वयं १० ब्रह्म-
न्निनिंदमांयस्मात्तस्मात्त्वंवटपादपः काकेष्ठापूरितोनित्यंपिशाचैःपरिवारितः ११ भवत्वममवाक्येनसर्वकर्मबहिष्कृतः
ततःप्रसादयामासविष्णुंसत्यस्वरूपिणम् १२ ततःप्रसन्नोभगवाननंतस्तंपद्मयोनिंवटरूपधारिणं उवाचवाक्यंमधुरं

CSU-Jaipur Campus Collection

हितायसर्वस्यलोकस्यचराचरस्य १३ येमूलमाश्रित्यजनानृलोके कुर्वंतिकर्माणितवप्रसादात् श्राद्धानियज्ञान्विविधप्र
कारान्दानानिचब्राह्मणभोजनानि १४ तेभुक्तिमुक्तीसहसालभंते मुक्ताभवंत्येवऋणत्रयेभ्यः १५ पूज्योसित्वंसदानृणां
सान्निध्यंममसर्वदा विश्वेशोपितदातत्रययौसांत्वयितुंविधिं १६ स्वयमेवावसत्तत्रलिंगरूपधरःप्रभुः देवाःसर्वेसमवस
न्नंशेनवटसन्निधौ १७ ब्रह्माचतुर्मुखोजातोन्यग्रोधःपूज्यतामयात् न्यग्रोधाद्दक्षिणेभागेतीर्थंमुक्तिप्रदायकं १८ मुक्तिदं
सर्वजंतूनांस्थितोयत्रकमंडलुः सावित्रीचैवगायत्रीतथैवचसरस्वती १९ तीर्थानितत्रजातानिदिव्यानिसुमहांतिच त्रि·
कालंतत्रमनुजःस्नात्वासंध्यांसमाचरेत् २० यथाक्रमेणविधिवत्तत्फलंशृणुनिश्चितं ब्रह्मघ्नोवासुरापोवाकृतघ्नोगु
रुतल्पगः २१ मुच्यतेसर्वपापेभ्योब्रह्मनिष्ठोभविष्यति फाल्गुनेसमनुप्राप्तेत्रिसंध्यामाचरेत्तुयः २२ शतजन्मभवेद्वि
प्रोवेदवेदांगपारगः कथयामिकथांदिव्यांपुरावृत्तांनरोत्तम २३ यस्याःश्रवणमात्रेणनरोविगतकल्मषः विशालायांपुरा
कश्चिद्ब्राह्मणोवेदपारगः २४ कुटुंबपोषणार्थायउपायमकरोद्गृही नसलेभेधनंकिंचिद्व्यापारैर्विविधैरपि २५ तदाको
पसमाविष्टःस्तेयवृत्तिमथाकरोत् तस्करैर्बहुभिर्युक्तोजातिभ्रंशकरोभवत् २६ मद्यमांसाशनैर्दृप्तोहृतवान्बहुशोधनं
ब्राह्मणानिहताःकेचिद्भ्रमतापर्वतांतरे २७ हतागावोहतामर्त्याःबालकाबहवश्चवै परस्त्रियाचापहृताहृतावैभो·
गिनाबलात् २८ एवंदुरत्ययंकर्मम्लेच्छैरपिसुदुष्करं चकारपापनिर्भिन्नोधनीजातोद्विजाधमः २९ कदापर्यटमानश्च·
स्वभृत्यपरिवारितः धनिकस्यगृहेगच्छन्तद्भृत्यैःसधृतोबलात् ३० निगडेस्थापितोराज्ञाबहुकालंनराधमः कदाचिन्मुक्तः
कृच्छ्रेणपरिवारविवर्जितः ३१ एकाकीभ्रममाणोपिक्षुधयापीडितोभृशं नलेभेन्नंत्रिचतुरैर्दिवसैस्तस्यकर्मणा ३२ बभ-
क्षसकलंमांसंश्वानगर्दभसंभवं तदातद्दैवयोगेनब्राह्मणःसमुपागतः ३३ बहुभृत्यगणाकीर्णोबहुपत्न्यैरलंकृतः ब
हुदारैःपरिवृतोदिव्यवस्त्रैःसुभूषितः ३४ दृष्ट्वासरोवररम्यंतत्रस्नानंचकारसः पूजांकृत्वाविधानेनविष्णोरन्नंन्यवेद

यत् ३५ विष्णोर्निवेदितान्नेनवैश्वदेवंचकारसः सकांक्षन्नतिथिंयावत्तावद्ददर्शोपुरः ३६ अनापृच्छन्कुलंशीलंभोजयामासचाजसा भुक्त्वानदन्नंपरमंपवित्रंपापनाशनं ३७ मोहाद्धिमुक्तःसतदाकोभवानितिचाब्रवीत् यत्त्वदन्नेनविमलाजातामममतिःप्रभो ३८ ब्राह्मणउ॰ विवेकइतिमेनामगयायांगंतुमुत्सुकः फाल्गुनेफल्गुतःस्नानंत्रिसंध्यंकर्तुमुद्यतः ३९ इतितद्वचनंश्रुत्वानमस्कृत्वाद्विजोत्तमं किंफलंफल्गुस्नानस्यत्रिसंध्यायाःफलंकिमु ४० वदस्ववदतांश्रेष्ठकुंभेदिनमणौस्थिते ततःसोकथयत्सर्वंमाहात्म्यंफाल्गुनस्यच ४१ त्रिसंध्यायाःफलंतद्वद्दुर्लभंत्रिदशैरपि कोसित्वंपृच्छतेकस्मात्त्वंब्रूहिममाग्रतः ४२ सर्वंनिवेदयामासकृतंयद्यच्छुभाशुभम् पुनःप्रणम्यविप्रंतमुवाचकरुणंवचः ४३ पापोहंपापकर्माहंपापात्मापापसंभवः त्राहिमांकृपयाभद्रद्विजवर्यनमोस्तुते ४४ तमुवाचपुनर्विप्रोयादितेविमलामतिः गयांगच्छमहाभागमासेस्मिन्दैवचोदिते ४५ मासस्नानेह्यशक्तस्त्वंपरसंध्यादिकंकुरु तेनैवत्वंविपापःसन्ब्रह्मनिष्ठोभविष्यसि ४६ पुनरूचेसकरुणंकथंसंध्यांसमाचरेत् द्विजउवाच प्रभातेविमलेस्नात्वासावित्र्यामजसन्निधौ ४७ प्रातरौपासनंकृत्वासावित्र्याप्रयुतंजपेत् पूजयित्वापदंविष्णोस्तथैवचगदाधरं ४८ ततोमध्याह्नसमयेगायत्र्यांस्नानमाचरेत् मध्याह्निकंसमाप्याथत्रिपदांचतथाजपेत् ४९ तथैवनत्वादेवेशंगच्छेदथसरस्वतीं तत्रैवविधिवत्स्नात्वाकृत्वासंध्यांजपंपुनः ५० पूजयेच्चैवदेवेशमुपचारैरनेकधा पायसान्नैश्चपक्वान्नैः षड्रसैर्विविधैरपि ५१ नैवेद्यंकल्पयित्वातुब्राह्मणांश्चैवभोजयेत् ब्रह्मचर्यादिनियमैस्त्रिदिनंतत्समाचरेत् ५२ एतत्तेकथितंसर्वंपापानामशनिर्ध्रुवम् त्रिसंध्यायाःस्वरूपयत्किमन्यच्छ्रोतुमिच्छसि ५३ विष्णुरुवाच द्विजस्यवचनंश्रुत्वाशनैर्यातोगयापुरीम् सर्वंतत्कृतवांस्तत्रब्राह्मणेस्नुमोदितः ५४ बभूवपापनिर्मुक्तोविमानवरमाश्रितः दिव्यदेहधरोभूत्वायातोब्रह्मपरंपदं ५५ एवंत्वयापिव्यासेनकपिलेन विवस्वता योगिनायाज्ञवल्क्येनतथाचान्यैर्महर्षिभिः कृतंसंध्यादिकंकर्मयतस्तेयोगिनांवराः ५६ इतिश्रीभविष्यपुराणे-

फाल्गुनमाहात्म्येचतुर्थोऽध्यायः ४ ६५ नारदउवाच श्रुतंमयाभगवनःसंध्यायाःफलमुत्कटं अधुनाश्रोतुमि
फल्गुस्नानस्यमाधव १ श्रीभगवानुवाच आसीत्पुराविंध्यदेशेविद्युत्सेनोनराधिपः बहुभृत्यगणाकीर्णःपुत्रदारै॰
रनिंदितः २ समुद्रमेखलांपृथ्वींशशासैकपुरीमिव मातृवद्योषितःसर्वाःपितृवत्सकलास्तथा ३ भ्रातृवत्सुहृदः
सर्वेपुत्रवत्सकलाःप्रजाः मित्रवत्सकलाभृत्याभृत्यवच्छत्रुमंडलं ४ कृतायज्ञाश्चविविधाव्रतानिचबहून्यपि नकोपि
विमुखोजातोयाचकस्तस्यभूपतेः ५ अन्नदानैर्महादानैस्तोषिताभूसुराःपरं बहवःसेतवोनेकदेवतायतनानिच
६ शालाछत्राणिशतशोकूपारामाःसहस्रशः वाप्यःसरांसिकुल्याश्चरक्षाश्चैवजलाशये ७ एवंसर्वेषुदेशेषुग्रामेषुन॰
गरेषुच कृतवान्धर्मतत्वज्ञतत्वज्ञैःसेवकैर्नृपः ८ तस्यपुत्रोमहाप्राज्ञःपुंडरीकेतिविश्रुतः जितवान्सगुणैस्तान्परतंद्रच॰
नेस्थितः ९ कदाचिद्दैवयोगेनमृगयायैवनंययौ भ्रमताविपिनेतेनदृष्टःपोत्रीमदोद्धतः १० लीलयातद्वधंकर्तुंबाणंधनु
षिसंदधे जगामत्वरयाकोलःपृष्ठलग्नोमहीपतिः ११ एवंपलायमानस्यशूकरस्यनृपस्यच सेनावियोगिनीतेनभ्रम॰
तिस्मवनांतरे १२ ततस्तुविपिनेघोरेसिंहव्याघ्रसमाकुले हयादुत्तीर्यरभसान्नृपतिःकालचोदितः १३ क्षुत्तृड्भ्यांपीडि
तोजातोऽस्तंयातोविभावसुः तिमिरेणावृतोनिस्संजगत्स्थावरजंगम १४ तदैकत्वंसमभजद्धूलचिभिर्गुणैर्हियन् ए
वंगाढेंधतमसिएकाकीनृपनंदनः १५ शुश्रावशब्दंघोराणांवेतालानांवनौकसां ददर्शचाथतान्सर्वान्दीपिकापरि
वारितान् १६ भूतान्प्रेतगणांश्चान्यान्दृश्यादृश्यानणून्महान् नग्नान्विरूपान्विकटान्कुत्सितान्घोरस्वरान् १७ नाप
श्यशूकरंध्वांक्षेतदानींसव्यचारयत् क्वागतोहंक्वगच्छामिकुत्रास्तेममसैनिकाः १८ इतिचिंतातुरोभूत्वावृक्षमूलसमा
श्रयन् निद्रामवापमहतींगिलीतोजगरेणाहा १९ धनुषासहबाणेननकिंचिदवशेषितं ततःप्रभातसमयेसैनिका॰
विपिनांतरे २० भ्रमंतोददृशुर्बद्धंतुरंगंवृक्षमूलके ततस्तत्पदविन्यासैश्चिन्हिताध्वानमाययुः २१ दृष्ट्वात्वजगरंघो

८

रंज्ञात्वातेनैवभक्षितं शोकेनमहताविष्टायातास्तन्नगरंप्रति २२ श्रुत्वातदाखिलंराजाशोकमोहसमन्वितः स्वासनात्पति
तोभूमौहाहेतिविलपन्मुहुः २३ आगत्यसांत्वयामासमंत्रिणश्चपुरोधसः भवादृशाश्चराजानःपंडिताश्चविवेकिनः २४
मृतान्नैवचशोचंतिनद्रक्ष्यंतिभवेष्वपि अतस्त्वंविदुषांश्रेष्ठनैवशोचितुमर्हसि २५ विद्युत्सेनोऽपिमतिमान्तदादैवंविचिंत
यन् त्यक्त्वाशोकंचमोहंचब्राह्मणैरनुमोदितः २६ ततःसकृतवान्राजातत्क्रियांपारलौकिकीम् स्नुषाविवेशदहनंवारि
ताप्यखिलैर्जनैः २७ पतिरेवपरस्त्रीणांधर्मकामार्थमोक्षदः नगतिःपतिहीनानांनारीणामुभयत्रच २८ अतस्त्रीणांपरो
धर्मःपतिरेवसनातनः दत्वादानान्यनेकानिब्राह्मणेभ्योयथाविधि २९ राज्यंदंडंचकोशंचसचिवेषुन्यविक्षिपत् दा
रैःसहरथारूढोनृपोवनमथाविशत् ३० आश्रमादाश्रमंयातःकपिलस्यमहात्मनः बहुपक्षिगणाकीर्णंसर्वर्तुफल-
संयुतम् ३१ ददर्शतत्रकपिलंक्षममौनमिवह्रदं ध्याननिष्ठंजिताहारंनिमीलनयनंविभुम् ३२ पपातदंडवद्भूमौक
पिलस्यमहात्मनः ध्यानंविसृज्यसमुनिःकोसिकोसीतिचाब्रवीत् ३३ कस्मादिहागतोसीतिकिंतेकार्यंवदस्वमे ते
नपृष्टोपिनोवाचनोत्तस्थौभृशदुःखितः ३४ पुनःप्रोवाचसमुनिर्ज्ञातंतेदुःखकारणं उत्तिष्ठोत्तिष्ठभद्रंतेमत्प्रसादाद्भ
विष्यति ३५ करुणामृतसंसिक्तंवाक्यंमुनिवरांबुजात् श्रुत्वाचोत्थितवान्राजासंयोज्यकरसंपुटम् ३६ उवाचम-
धुरांवाणींकपिलंमुनिपुंगवम् राजउवाच भगवान्सर्वभूतस्थचरमेवयसिस्थितं ३७ कृतवान्केनदोषेणयो-
मादुःखस्यभाजनं बाल्येमातृवियोगश्चयौवनेस्त्रीविहीनता ३८ चरमेपुत्रशोकश्चनाल्पस्यत्येनसःफलं कथयस्व-
ांदुःखात्समोक्ष्यति ३९ कपिलउवाच पुराजन्मनिभोराजन्मेघराजोवणिग्वरः वाराणस्यांचानिव
सन्बंधुभिर्बहुभिर्वृतः ४० धनाढ्योबहुपत्नीकःपुत्रैर्भृत्यैर्विराजितः एवंनिवसतस्तस्यबहुकालोव्यतिक्रमत्
४१ सएकदावणिक्राजन्स्त्रीजितोभूद्विधेर्वशात् तदाज्ञयाप्रवृत्तेनबांधवानिहतास्तथा ४२ तेषामादायतद्द्रव्य

भार्ययासहितोमुदा तेनाकार्य्येणमहतामृतानीतायमालये ४३ त्यक्त्वातुपितरंपुत्रायातास्तेश्वशुरालये
हृधनोदुःखितःस्वेनकर्मणा ४४ सर्वस्वंप्रददौविप्रान्काशीस्थान्विमलाशयः ततोदिगंबरोभूत्वातीर्थयात्रांपरिभ्र न्
४५ कृत्वातीर्थान्यनेकानिदैवात्पुष्करमागतः तत्रस्नात्वाकतिपयैर्दिवसैर्निधनंगतः ४६ गतोवैकुंठभुवनंस्थित्वाया
तोपुनर्भवम् नकर्मक्षीयतेभोगैःपापंबंधुवधोद्यत ४७ यतस्त्वमसिराजेंद्रपुत्रशोकसमाकुलः अतोयाहिगयांभ
द्रफल्गुस्नानंसमाचर ४८ फाल्गुनेसमनुप्राप्तेपूजयस्वगदाधरं एवंतेननसंदेहस्तवपुत्रोभविष्यति ४९ गृहं
ययौराजाकृत्वास्नानंयथाविधि विमुक्तःपातकात्तस्मात्ययौस्वनगरंप्रति ५० शशाससकलांपृथ्वींपुत्रपौत्रादिसं
युतः अंतेजगामपरमंधामनारायणस्यच ५१ इत्येतत्कथितंसर्वंफल्गुस्नानफलंमहत् ५२ इतिश्रीभविष्यपु०
फाल्गुनमाहात्म्येपंचमोऽध्यायः ५ ॥ छ ॥ नारदउवाच फल्गुस्नानंफाल्गुनेचयत्त्वयाकथितंविभो कथयतन्मनु
जैर्लब्धुंशक्यंभवतिकेशव १ श्रीभगवानुवाच फाल्गुनेमासिसंप्राप्तेयत्रकुत्रजलाशये स्नानंविदध्यादमले
ब्राह्मेकालेऽजनार्दन. २ तप्तोदकाद्दूरंशीतंशीतात्कूपोदकंवरं कूपाद्दशगुणावापीवाप्याःस्वातोदकंवरं ३ तस्मा
न्निर्झरजंप्राहुर्निर्झराच्चवरंसरः सरसोपिनदीश्रेष्ठाचतुर्योजनगामिनी ४ तस्याश्चापिवरंतीर्थंतस्मात्सागरगामि
नी तासांवरिष्ठाःसप्तैवताभ्यःफल्गुर्वरास्मृता ५ तस्मात्कलियुगेघोरेपातालंप्रतियास्यति फाल्गुनेसमनुप्राप्ते
सर्वंब्रह्ममयंपयः ६ यतस्तस्मिन्स्थितोब्रह्माशासनाज्जगतःप्रभोः तस्मात्सर्वप्रयत्नेनस्नानंकुर्याच्चफाल्गुने ७
ब्राह्मेमुहूर्तेचोत्थायकृत्वाशौचादिकाःक्रियाः स्नानंबहिर्जलेकुर्याद्व्रतयाचनपूर्वकं ८ शक्तेरभावात्कर्तव्यंस्नानमु
ष्णेनवारिणा कथयामिविधिंतस्यशृणुनारदतत्त्वतः ९ स्नानोदकेविनिक्षिप्यतिलदर्भशतावरीं पंचामृतानिग
व्यानितथैवचतुलसीदलं १० गंगेचयमुनेचेतिमंत्रेणावाह्यमंत्रवित् तथावरुणसूक्तैस्तुपुष्कराद्यतिचापुनः ११ स

वैःसमुद्राःसरितस्तथान्यैर्मंत्रविस्तरैः अभिमंत्र्यजलंसर्वमभिलोड्यपुनःपुनः १२ तिलामलककल्केनमर्दयित्वानिजंवपुः
स्मृत्वातुदेशकालादिकरिष्येस्नपनंविभो १३ गयागदाधरप्रीत्यैफाल्गुनस्यागतस्मयः आपोहिष्ठेतिसूक्तेनकनिकदिति
वापुनः १४ तथैवान्यैःस्वगृह्योक्तैःस्नानसूक्तैर्विचक्षणः मंत्रैःपौराणिकैश्चान्यैःस्नात्वार्घ्यंप्रविदापयेत् १५ नमस्तेगय
फाल्गुनप्रिय नमस्तेस्तुगदापाणेगृहाणार्घ्यंनमोस्तुते १६ कृत्वास्नानंचविधिवद्धौतवस्त्रोप्यान्वि
तः त्रिपुंड्रधारणंकृत्वापूजयित्वाविभुंमुदा १७ एवंविधंयःस्नपनंकरोतिश्रीफाल्गुनेमासिसमागतेच प्राप्नोतिराज्यं
विविधांश्चभोगान्फल्गोःप्रसादात्सकलाघमुक्तः १८ नारदउवाच किमर्थंभगवान्ब्रह्मामासेजलसमाश्रितः
कस्मात्फाल्गुनमासंतुतपस्येतिवदंतिच एतत्कथयमेतातकृपयारिनिषूदन श्रीभगवानुवाच एकार्णवेहिभगवा
न्यदाशेतेदलांतरे २० न्यग्रोधस्यतदाब्रह्मानाभिपद्माद्विनिःसृतः कोहंकिमर्थमुत्पन्नोनजानेकरवाणिकिं २१ पृच्छा
मिकंकगच्छामिसुप्तेतस्मिन्जनार्दने इतिचिंतापरोब्रह्माशुश्रावाकाशजांगिरं २२ तपस्येतिजलेस्थित्वादिशश्चस
मलोकयत् नापश्यदपरंकिंचित्तथैवचचकारसः २३ मासमात्रंजलेस्थित्वाध्यात्वादेवंगदाधरं जपन्नष्टाक्षरमनुंदिवा
रात्रमतंद्रितः २४ ततःप्रसन्नोभगवान्वरान्दातुमुपागतः ब्रह्माणंतमुवाचाथकुरुसृष्टिमनेकधा २५ चैत्रमासिज
गद्ब्रह्माससर्जप्रथमेहनि अतस्तुफाल्गुनेमासिपवित्रंसकलंपयः २६ तस्मात्सर्वप्रयत्नेनप्रातःस्नानंविधीयते त
पस्यइतितन्नामत्रिषुलोकेषुविश्रुतम् २७ यस्मिन्मासिकृतंयज्ञतपोदानसुरार्चनं मासेभ्यश्चैवसर्वेभ्यस्तदनंतगुणं
भवेत् २८ अत्रेदंवर्णयिष्यामिइतिहासंपुरातनम् द्राविडविषयेपूर्वंकुंजरोनामभूपतिः २९ तस्यराज्येवणिक्श्रेष्ठौ-
पिशंजलकपिंजलौ समौद्रव्येणवयसाविद्ययापिगुणेनच ३० कीर्त्यादिकंयदाज्ञात्वापरस्परविरोधिनौ परस्परादिच्छ-
मानौगुरुत्वंयेनकेनवा ३१ इत्येवंस्पर्धमानौतौनालभंतौयदोन्नतिं तदानींपरलोकेचचक्रतुर्मतिमुज्ज्वलां ३२ तदाक

पिंजलोनामवसिष्ठंप्रत्यपद्यत प्रणम्यशिरसाभूमौकृतांजलिरभाषत ३३ कपिंजलउवाच पृच्छामित्वांद्विजश्रेष्ठसर्वधर्म
विदांवर केनोपायेनपूतोहंयास्यामिपरमंपदं ३४ वसिष्ठउवाच स्नानंदानंजपोहोमस्तर्पणंद्विजभोजनं पूजनंतीर्थया
त्राचयास्यस्यैतैःपरंपदं ३५ अहिंसासत्यमक्रोधममात्सर्यमलोभता एतैर्हियुक्तोयदिचेदकापट्यमदंभता ३६ वसिष्ठो
दीरितंश्रुत्वाचक्रेस्नानादिकंतदा दत्वादानान्यनेकानिजप्त्वामंत्रांस्त्वनेकशः ३७ हुत्वायज्ञैश्चविविधैर्देवर्षिपितृमानवा-
न् संतर्प्यभोजयित्वाथद्विजान्संपूज्यदेवताः ३८ कृत्वातीर्थान्यनेकानिक्षेत्राणिविविधानिच एवंकृतवतस्तस्यबहुका
लोव्यतिक्रमत् ३९ पिशंजलोपितज्ज्ञात्वाईर्ष्याव्याकुलमानसः कथामीतिविचार्यैवंवसिष्ठादधिकोस्तिकः ४० तमद्य
शरणंयामिइतिचिंतातुरोयदा पूर्वार्जितेनतपसानारदसमपश्यत ४१ नामामृतसमायुक्तंयस्यैवमुखपंकजम् प्रण
म्याकथयत्सर्वमाशयंतस्यनिष्कृति ४२ क्षणंविचार्यमनसितमुवाचद्विजर्षभः ज्ञातंमेवणिजश्रेष्ठतवदुःखस्यकारणं
४३ विश्वामित्रमितोयाहिसतेसौख्यंविधास्यति उक्त्वैवांतर्हितेब्रह्मनंदनेतुपिशंजलः ४४ विश्वामित्रंसमासाद्य-
प्रणम्योवाचभक्तिमान् पिशंजलउवाच अहंपिशंजलोनामसर्वसंपद्युतोपिसन् ४५ कुलेममसमुत्पन्नःकपिंज
लइतिश्रुतः तेनसाकंविरोधेनत्यक्तंसौख्यंद्विलोकजं ४६ तत्रापिसावसिष्ठेनकृतश्चांतेममाधिकः अतस्त्वांशरणंया-
तोऽनाथोमयिकृपांकुरु ४७ ततःकृपार्द्रहृदयोबभाषेथपिशंजलं॥ विश्वामित्रउवाच कपिंजलायमुनिनावसिष्ठेन-
कृपावता ४८ उपदिष्टंतुयत्किंचित्तेनावशिष्ठव्रतादिकं जपहोमादिकंसर्वंतीर्थयात्रानिषेवणं ४९ परंतेकथयिष्यामि-
यद्गोप्यंभुवनत्रये फाल्गुनेमासिसंप्राप्तेस्नानदानादिकंचयत् ५० फलौवाचान्यतीर्थेवातदनंतगुणंभवेत् इतितद्व
चनंश्रुत्वाचकारस्नानमुत्तमं ५१ दत्वादानान्यनेकानिप्रास्थतासंभवानिच एवंमासंकृतवतोविमानंदिव्यमागतं १०
५२ सेवितंअप्सरोभिश्चविष्णुदूतैःसमंततः विमानवरमारुह्यगुरुंनत्वायथाविधि ५३ कपिंजलंवसिष्ठंचअभिवंद्य-

दिवंययौ कपिंजलोपिस्वंदेहमनोहृत्वादिवंययौ ५४ तदादिविग्रहोजातोविश्वामित्रवसिष्ठयोः इतितेकथितंविप्रमा-
हात्म्यंफाल्गुनस्यच ५५ नातःपरतरंकिंचित्किमन्यच्छ्रोतुमिच्छसि ५५ इतिश्रीभविष्यपुराणेफाल्गुनमाहात्म्येषष्ठो-
ऽध्यायः ६ ६२ नारदउवाच कानिदानानिमासेस्मिन्कस्मैवादीयतामिति किंफलंलभतेमर्त्यस्तत्सर्वंकथयस्व
मे १ श्रीभगवानुवाच शय्यादानंभूमिदानंगृहदानमतःपरं तिलदानंचगोदानंतिलधेनुघृतादिकं २ धेनवश्च
वृषोत्सर्गऊर्णोपानहवाससी अन्नंपयस्तथाक्षीरंधान्यानिविविधानिच ३ शय्यांसालंकृतांकृत्वाछत्रस्तंभादि-
संयुतां सपत्नीकंद्विजंपूज्यधुवानमुपचारकैः ४ नानालंकरणैर्वस्त्रैःपक्वान्नैर्विविधैरपि तांबूलंदक्षिणांदद्यात्भोज-
येद्द्विजपुंगवान् ५ एवंयःकुरुतेराजन्सइहामुत्रमानवः भुक्त्वाविविधान्भोगानंतेसायुज्यमाप्नुयात् ६ दुःखंस्त्रीवि-
रहोत्पन्नंस्वप्नेपिसनपश्यति तथैवभूमिदानंचश्रोत्रियायकुटुंबिने ७ चरद्यात्तिकरंदेयंसवृषंबहुदक्षिणं स्वर्णलांग-
लसंयुक्तंतथैवकृषिसाधनैः ८ योदद्याद्द्विजवर्यायतस्याक्षय्यपदंभवेत् पुनर्नस्पृशतेभूमिंनात्रकार्याविचारणा ९
गृहदानंप्रवक्ष्यामिदानानामुत्तमोत्तमं तीर्थेक्षेत्रेप्रदातव्यंपारंपर्यस्थितायच १० गृहंनिर्मायसुदृढंसर्वलक्षणसंयु-
तं द्वारद्वययुतंगोभिर्युक्तंदासीसमन्वितं ११ धान्यैर्वस्त्रैःपाकपात्रैरन्यैश्चबहुभिर्वृतं सजलपुष्पवृक्षैश्चचतुष्काभ्यां
विराजितं १२ येयेचास्योपयोग्यावैतैस्तैरापूर्यसर्वतः एवंसुशोभितंकृत्वावस्त्रेणपरिवेष्टयेत् १३ ब्राह्मणायप्रदात-
व्यंश्रोत्रियायकुटुंबिने बहुपुत्रवतेदेयंबहुकालनिवासिने १४ तस्यस्वास्थ्यंप्रकर्तव्यंप्रशक्तेनाब्दमात्रकम् एवंददा-
तियोदानंसइंद्रपदमश्नुते १५ कश्यपाङ्गसमुत्पन्नाहविषांपरमामताः पितृकर्मसुसर्वेषुतिलाएवमताःस्मृताः १६
अभावेसर्वद्रव्याणांतिलाग्राह्यास्तुसर्वतः प्रस्थंतिलानांपात्रेणसुवर्णेनसमन्वितं १७ योददातिशुभेमासेद्विजाय
वेदवादिने शक्त्यभावेप्रदातव्यंतिलपात्रंसदक्षिणं १८ सयातिब्रह्मसदनंयावत्तिलसहस्रकं गवामगेषुनिष्ठति-

भुवनानिचतुर्दश १९ अतोनास्तिसमंदानंगोदानस्यमहीतले गोदानस्यविधिंवच्मिसंक्षेपेणकथंचन २० गवांताम्राव·
प्रोक्तानस्याः श्वेताऽधिकामता तस्याश्चषड्गुणाकृष्णायदिसाचपयस्विनी २१ तस्यादुग्धंयदिपिबेच्छूद्रश्चांडालतांव्र
जेत् दानंतस्यास्त्रियोदद्यात्तृणभूमिसमन्वितं २२ स्वर्णशृंगींरौप्यशफांताम्रपृष्ठींचचामरां माणिक्यनयनांनासामौ
क्तिकांगलघंटिकां २३ ललाटेस्वर्णतिलकांशृंगमध्यप्रवालकां पादनूपुरशोभाढ्यांपंचरत्नविराजितां २४ कांस्यदोह
नसंयुक्तांवस्त्रयुग्मेनवेष्टितां तथैवभूषयेद्वत्सगंधमाल्यैःप्रपूजयेत् २५ ब्राह्मणंपूजयेद्वस्त्रैःसाग्निकंसपरिग्रहम्
वेदशास्त्रप्रवक्तारंधर्मशास्त्रार्थकोविदं २६ शिरोग्रीवाकर्णकंठअंगुलीकाबाहुषु दत्वास्वभूषणान्सचानुवस्त्राणिवि
धानिच २७ छत्रोपानहदंडांश्चआमान्नकलशैस्तथा नीरदानेनदानेनब्रह्मलोकोप्यधःकृतः २८ गोलोकेवसमासा
द्यमोदतेकृष्णसन्निधौ तिलधेनुंस्वर्णधेनुंजलधेनुंघृताभिधां २९ मधुधेनुंधान्यधेनुंगुडधेनुंरसाभिधां रत्नधेनुंतथास
प्तधातुनामपिगास्तथा ३० तथैवभूषितांकृत्वाभूषितायद्विजन्मने योददातिद्विजश्रेष्ठसोपिगोलोकमाविशेत् ३१
मासेस्मिन्फाल्गुनेरम्येनीलंयोवृषमुत्सृजेत् ताम्रावत्सतरींतद्वत्सालंकारांयथाविधि ३२ दानानिचतदंगानिदातव्या
निद्विजन्मने वृषोत्सर्गस्यपुण्येनशिवसामीप्यभाग्भवेत् ३३ फाल्गुनेसमनुप्राप्तेऊर्णादानंद्विजातये प्रातःस्नानकृते·
नित्यसाग्निकायविशेषतः ३४ विष्णुलोकमवाप्नोतियावत्स्यात्तनुसंख्यया उपानहौतुयोदद्यात्प्रोषितेचाद्विजन्मने ३५
नासौगच्छतिपादेनकदाचिदपिचाध्वनि भुंक्तेचविविधान्भोगानंतेशिवपदंव्रजेत् ३६ वस्त्रदानेनसततंवसूनास्था
नमालभेत् दातव्यंसर्ववर्णेभ्योब्राह्मणेभ्योविशेषतः ३७ अकिंचनेभ्यःकृतिभ्यःसर्वसौख्यमयेसदा ननग्नत्वम·
वाप्नोतिवस्त्रदानप्रभावतः ३८ अन्नंचषड्रसंस्वादुप्राणिनांजीवनंपरं दातव्यंसर्वजंतूनांभुक्तिमुक्तिप्रदायकं ३९ अन्न
दानात्परंदानंनभूतंननिरीक्षितं इहैवसकलान्भोगान्भुक्त्वाब्रह्मसनातनम् ४० अन्नदानपरायस्तुनैवान्नंभुंजतेपुनः

अमरत्वंसदातस्यसोमृतत्वायकल्पते ४१ यतोवदंतिमुनयश्चान्नंब्रह्मेतिनिश्चितं नचास्तसर्वबीजानांजंतूनांचविशेषतः
४२ जीवनंसर्वकालेषुतस्मान्नान्यत्परंमहत् तोयदानेननियमः कस्मैदेयंनवापुनः ४३ आपोनारायणःसाक्षाच्चनृणाम्
पिसंततं अतोयोजलदानस्यदातावरुणसंनिभः ४४ तत्रैवनिवसत्येषयावच्चंद्रार्कतारकाः क्षीरंददातिविप्राणांबालानां-
चविशेषतः ४५ अपुत्रोलभतेपुत्रंसपुत्रःपौत्रमालभेत् धान्यदानंचसर्वेषांप्राणिनांप्रददातियः ४६ कौबेरींपुरमासाद्य
कुबेरइवराजते एवमन्यानिदानानिदातव्यानिस्वशक्तितः ४७ शक्तेरभावादपिवोकिंचिद्धानंद्विजातये दातव्यंभ-
क्तिभावेनतदनंतगुणंभवेत् ४८ श्रीभगवानुवाच पृष्टंत्वयायत्सकलंतत्सर्वंकथितंमया नावशिष्टंपरंकिंचिद्भक्तो-
सीनियतोमम ४९ इतिश्रीभविपु० फाल्गुनमाहात्म्येसप्तमोऽध्यायः ७ छ सूतउवाच एवंभगवतोवा-
क्यंश्रुत्वासंहृष्टमानसः सर्वलोकोपकारार्थंनारदोभूतलंययौ १ धृत्वातुचाडवंरूपंमहिमास्तस्यकाशितः ग्रामेग्रामे
पुरेदेशे देशेदेशांतरेपिच २ प्रकाशयित्वामाहात्म्यंमुनिरंतर्दधेपुनः तदातिमनुजाःसर्वेफल्गुस्नानायमागताः ३ कृत्वा
स्नानंविधानेनदत्वादानान्यनेकशः फाल्गुनेकुंभसंस्थेर्केध्यात्वादेवंगदाधरं ४ एवंसर्वव्रतंचक्रुर्नद्यांकूपेजलाशये मा
सस्नानप्रभावेनफल्गोश्चापिप्रभावतः ५ सर्वेपिपापाःसंजातादुःखदारिद्र्यवर्जिताः तथैवरोगरहिताःस्फारिवनोविग
तज्वराः ६ दिव्यंविमानमारुह्यगताःकेचित्परंपदं व्याधिकारास्तदारोगामिथोमन्त्ययभयस्तुः ७ तेषांप्रधानायेरोगावात-
पित्तकफाटिकाः विषमाःसन्निपाताश्चातिसाराविषूचिकाः ८ भगंदराःप्रमेहाश्चवायुःशूलंवमिस्तथा क्षयापस्मार
कुष्ठाद्याराजयक्ष्माविचर्चिकाः ९ गलगंडाश्मरीदद्रुःपीनसाःपलितादयः येचान्येबहवोरोगायमलोकनिवासिनः
१० यमाज्ञयाचिरंतोययुस्तेपियमालयं प्रणम्यप्रेतराजायरोगाऊचुःपरवचः ११ अहोयममहाबाहोसर्वसत्वनिषूदन
तवाज्ञयावयंयाताःपीडनायधरातले १२ पीडिताबहवोलोकाःप्रेषितास्तवमंडले एवंप्रवर्तमानेतुकश्चिद्विप्रःसमागतः १३

प्रकाशितंधर्मंतत्वंसर्वभूतहितायच धर्मेप्रवर्तमानेवैसर्वेविगतकल्मषाः १४ रोगहीनादुःखहीनाःसर्वेतेस्वर्गवासिनः अ
नःक्षीणबलाजातावयंतेशरणागताः १५ नवैचकागतिर्देवकिंकरिष्यामिसांप्रतं कथंतेनिरयातस्याजीवाजीवतिनांतक १६
इतिदुःखाभिभूतास्तेश्रुत्वास्वभुवनंगताः गतेषुतेषुप्रेतेशश्चित्रगुप्तममंत्रयत् १७ पृष्टवान्लोकचरितमवनीतलसंभवं
प्रणम्योवाचमधुरंधर्मराजंद्विजर्षभाः १८ नारदेनकृतंलोकेधर्मसंस्थापनंपुनः सर्वेविपापाःसंजातारोगदुःखविव-
र्जिताः १९ गतारौवैष्णवंधामशैवंब्राह्ममथापिवा नकोपियमलोकेह्यफाल्गुनस्यप्रभावतः २० एवंनिगदितेतस्मिन्प्रेत
राजस्यकिंकराः निरस्तावैष्णवैर्दूतैरनाथाइवतेययुः २१ आत्मानंस्वामिनंसेनांदैवंतेचनिनिंदिरे अलंतेसेवयाजात-
निर्बलस्यगतायुषः २२ दूतानांवचनंश्रुत्वाकोपेनप्रज्वलन्निव अपृष्ट्वैवजगामाशुतपस्तप्तुंसुदारुणं २३ स्वर्णशैलसमा
साद्यशिवमुद्दिश्यसादरं ज्ञात्वामुकुंदस्वरिपुंनारदंचतथाद्विजम् २४ गतेवैवत्सरेराजन्यमलोकनिवासिनः हाहाकृ
त्वाप्रधावंतइतश्चेतश्चसर्वतः २५ सापूर्विकंबुकीजाताअष्टानष्टास्तदाश्रिताः दिव्यंवर्षशतंजातंतप्यमानेर्कनंदने २६
तदारुद्रश्चभगवानाविरासीज्जगत्पतिः नीलग्रीवश्चसंतुष्टःप्रोवाचमधुरंवचः २७ शिवउवाच उत्तिष्ठोत्तिष्ठभद्रं
तेतपसानेनचारुणा वरंदातुंसमायातोयत्तेमनसिवर्तते २८ प्रेतराजोपितच्छ्रुत्वाशैववचनमाहृतं विस्मयोत्फुल्लनयनो
ददर्शशिवमव्ययम् २९ पंचवक्त्रंदशभुजंत्रिनेत्रंवृषभध्वजं पार्वतीगणसंयुक्तंत्रिशूलवरधारिणं ३० दिगंबरंशशिधरं
मुंडमालाविभूषितं एवंविधंशिवंदृष्ट्वाप्रणम्योवाचभक्तिमान् ३१ यमउवाच त्रिकालज्ञजगन्नाथत्रिवर्गफलदाय-
क त्वयाविसृष्टाःसकलाब्रह्मविष्णुमहेश्वराः ३२ लोकपालाश्चदिक्पालामन्वाद्यावसवस्तथा तथैवान्येचबहवोत्रयस्त्रिं
शच्चकोटयः ३३ अधिकारेषुविन्यस्तास्त्वयैवविश्वकर्मणा तवाज्ञयाप्रवृत्तस्यदुष्टसंहारकारिणः ३४ ममावज्ञाकृता
नूनंविष्णुनाप्रभविष्णुना नारदेनकृतंसर्वंममकर्मविनाशनं ३५ यतोहंदुःखितोजातोदेवत्वांशरणंगतः यदिमात्वंप्रस

ञोसिस्वाधिकारेनियोजय ३६ इतिवैवस्वतंवाक्यंश्रुत्वाक्रोधसमन्वितः त्रिशूलंयोजयामासनारदस्यजिघांसया ३७ शि
वहस्ताद्विनिर्मुक्तस्त्रिशूलोनारदंययौ त्रिशूलमागतंदृष्ट्वामुनिर्विकलमानसः ३८ ब्रह्मलोकंपययौतूर्णंपृष्ठशूलोभयातुरः
ब्रह्मापितंसमालोक्यनसशाकनिवारितुं ३९ त्रिशूलतेजसातप्ताब्रह्मलोकनिवासिनः जग्मुःप्राणभयात्सर्वेयत्रब्रह्मजना
र्दनः ४० वैकुंठेचसुखवासीनंसत्रिशूलोमुनीश्वरः तदाकोलाहलोजातोवैकुंठेविष्णुमंदिरे ४१ सिंहासनेप्रचालितोवैकुं
ठोदेवकीसुतः ददर्शतमिमंपौत्रंसत्रिशूलभयाकुलम् ४२ पृष्ठवान्किमिदंब्रह्मन्सर्वमाचष्टनारद फल्गुस्नानस्यमा
हात्म्यंश्रुत्वागंगारुषाकुला ४३ हस्तेत्रिशूलमादायशिवाभूत्वाशिवंययौ उवाचपरुषंवाक्यंशंभुंक्रोधारुणेक्षणं ४४
गंगोवाच केयंफल्गुरितिख्याताकथंजाताममाधिका सर्वासामहमेवास्मिगुरुर्नान्याममाधिका ४५ यतोजगद्गु-
रोस्त्वद्यसर्वदाशिरसिस्थिता शपेनांयदिमेप्रीतिर्नोचेद्यामियथागतम् ४६ श्रुत्वागंगोदितंवाक्यंशास्त्रतःपरमेश्वरः
गंगाप्रीतिधियाफल्गुंसशापसकलेश्वरः ४७ फल्गूरपिययौतावत्त्रिकालज्ञाशिवांतिकम् दृष्ट्वाफल्गुंभूतनाथउवाच
मद्गर्विता ४८ यतस्त्वंकृपयाविष्णोःसर्वासामवमन्यसे नदीनांपूर्वजातानांगंगादीनांयथासुखं ४९ अतस्त्वंभव
न्युब्जोतिसर्वदाममवाक्यतः उद्धाटयंतियेतोयंतेनरादुःखभागिनः ५० फाल्गुनंचशशापाथयमानुग्रहवांछया त्वयि
पौरजनाःसर्वेव्यभिचारादिकाःक्रियाः ५१ मुखवाद्यान्यनेकानितथादुर्भाषणान्यपि अकर्मकारिणःसर्वेवर्णसंक
रकारिणः ५२ भवंतिनात्रसंदेहोमद्यपाइवसर्वदा ततःक्रुद्धावसाफल्गुःशंभोरपिशशापह ५३ कारणेनविनाश
संत्वोजितेनत्वयायतः अतोदिगंबरोभूत्वास्मशानेविचरिष्यसि ५४ रुंडमालाधरोनित्यंपिशाचैःपरिवारितः ए
तस्मिन्नंतरेविष्णुःशिवरूपधरःशिवं ५५ दृष्ट्वाकोपपरीतांगंसांत्वयामाससादरम् विष्णुरुवाच किमसाम
यिकंशंभोप्रलयंकर्तुमुद्यतः ५६ त्वयिकोपसमाविष्टेइदंभवतिभस्मसात् नायंतेकोपसमयः क्षमस्वकरुणानिधे ५

इतिप्रसादितःशंभुः करुणाब्धिर्महेश्वरः उवाचपरमात्माचकस्मात्त्वमिहचागतः ५८ श्रीभगवानुवाच त्रिशूल-
मुपसंहृत्यनारदजीवयप्रभो मासोभवतुपुण्योयंवरःफल्गोस्त्वदीयतां ५९ शिवउवाच यदिच्छसिजगन्नाथनार
दचचिरायुषं नवैवनामघोषस्यविरामोमास्तुसर्वदा ६० यतोनामामृतेनैवचन्नमरोप्यमरोभवेत् यदितस्यविरामःस्या-
न्त्रिशूलस्त्वंहनिष्यति ६१ नैकवासःसदाकार्योनैवान्यत्कर्मकारयेत् देशेवापिपुरेचापियत्रतिष्ठतिमानवः ६२ उद्यो
गरहितस्तत्रअनर्थोजायतेसदा अतःसर्वप्रयत्नेनसवर्ज्यःसुखमिच्छता ६३ ज्ञातान्युब्जापिसाफल्गुरंतस्तोयाभवि
ष्यति प्रोद्घाटयित्वास्नानार्थंपुनःपूर्ववदाचरेत् ६४ नोचेत्कीटाकुलंसर्वंजलंभवतिनान्यथा न्युब्जापित्वंसदा
मर्त्येपूर्ववत्फलदाभव ६५ तपस्येयन्मयाप्रोक्तंत्वयितन्नैवदोषभाक् येनकुर्वंतिमनुजास्तेसदादुःखभागिनः ६६
इतितेकथितंसर्वंफल्गोःशापस्यकारणं ६७ इतिभविष्यपुराणेफाल्गुनमासमाहात्म्येअष्टमोऽध्यायः ८ ७
सूतउवाच तदाप्रभृतिभोविप्राःशिवोजातोदिगंबरः न्युब्जाभवत्तदाफल्गुःफाल्गुनोभूच्चदारुणः १ गतेबहुतिथे-
कालेलुप्तंसर्वंमहत्फलम् फल्गोर्वाफाल्गुनस्यापिसर्वाघौघविनाशनं २ जनाःपातकिनोजाताःशोकदुःखसमन्विताः
पुनस्तान्नारदोदृष्ट्वामनसैवंव्यचारयत् ३ पुरैकदाकृतंकर्मफलंतस्यभुनज्म्यहं विचिंत्यैवंययौतूर्णंकैलासशिव-
मंदिरं ४ ध्यानस्थितंशिवंदृष्ट्वापार्वतींप्रययौमुदा पार्वत्यापूजितोब्रह्मनंदनःखिन्नमानसः ५ नोचेकिंचित्तदाशै
लतनयोवाचनारदम् कस्मात्खिन्नोसिभगवान्काचिंताकुत्रवाभयं ६ गिरिजागिरमाकर्ण्यउवाचकरुणंवचः शृणु
त्वंगिरिजेनूनंममदुःखस्यकारणम् ७ नास्तितेसदृशानारीनदृष्टानश्रुतामया वंचितासिशिवेनत्वमतोदुःखतरोस्म्य
हम् ८ पार्वत्युवाच कथंतेनवंचिताहंशिवेनप्रीतिमिच्छती नारदउवाच सर्वविद्यानिधिःशंभुर्मंत्रतंत्रविशा-
रदः ९ व्रतदानान्यनेकानिसर्वंजानातितत्वतः तेषांप्रभावान्नकदाविनाशस्तपिनाकिनः १० नवैवभवितानाशो-

यतःखिद्यामिसांप्रतं अत्रैवदृश्यतेमातर्निश्चयाद्द्रक्ष्यसिसांप्रतं ११ इत्युक्त्वानारदोदेवीययौस्वभुवनंपुनः गतेतस्मिन्मुनौदे
वीहिमवंतंनगेश्वरम् १२ शिवंपृष्ट्वाययौतूर्णंतपस्तप्तुंसुदारुणं वानाशीशनवर्षाणिहिशतानिचतोयभुक् १३ शीतोष्ण
वातवर्षाणांसहनानिरहंकृती एवंकुर्वतीतीव्रंतपःपरमदारुणम् १४ दशवर्षसहस्राणिस्थिताचैकासनेसती ततः
प्रसन्नोभगवान्पार्वत्यंतिकमाययौ १५ दृष्ट्वातथाविधांतांतुवल्मीकच्छन्नविग्रहाम् यथाघनघनच्छन्नंमार्तंडमिवभा
स्करम् १६ करैर्निश्वासयामासशंभुःप्रीतिपुरःसरं प्रक्षाल्यसर्वगात्राणिआलिंग्यचपुनःपुनः १७ उवाचप्रीतिवात्स
ल्यात्कस्मात्तपसिसांप्रतं किंतेन्यूनंत्रिलोकेषुईप्सितंतेस्तिकिंपुनः १८ किमर्थंदुष्करंतातंतपःकैवल्यदंत्वया अतोव
रयतेभद्रवरंचित्तेभविष्यति १९ प्रीतोदास्यामिसकलमदेयमपिकस्यचित् इतिशंभुमुखोद्गीर्णंश्रुत्वावाक्यंतदासती
२० याचयामासदेवेशंनारदेकंयथातथा ततःसचिंतयामासकेनेयंवंचितासती २१ ओमित्युक्त्वाभगवांस्तस्यास्तपवि
मोहितः तयासाकंजगामाथनिर्जनंस्थानमीक्षयन् २२ नारदोपिचसंचिंत्यप्रोवाचइतितुंबरुं तुंबरोमद्वाक्येनपक्षि
रूपधरोभव २३ गच्छत्वंशिवपार्श्वेतुतद्वाक्यंशृणुसादरं परगूढतयाकार्यंनोचेद्भस्मीभविष्यसि २४ गृहीत्वाज्ञांययौ
तूर्णंशुकरूपधरःक्षणात् अन्विष्यमाणःसाशिवांपार्वतींपापनाशिनीम् २५ भ्रमताददृशेतेनाशिवःशिवगतिप्रदः वि
मृग्यमाणःसशिवोददर्शहिमवद्गुहाम् २६ विविक्तांगाढतमसायत्नावाप्यादिवार्जितां प्रविश्यतेनवयसातांदृष्ट्वान्यंव
कोपिसः २७ अंकेगृहीत्वागिरिजाकथयामाससादरं सर्वेमंत्राश्चयंत्राणिस्तोत्राणिविविधानिच २८ पुराणानिच
सर्वाणियानिगौणानिसर्वदा तानिसर्वाणिकथयन्प्रियायैभगवान्शिवः २९ शुकोपिश्रुतवान्सर्वंहर्षेणोत्फुल्ल
लोचनः विसस्मारनिजंवृत्तमुच्चैर्गर्जितमाकरोत् ३० शिवोपिचकितोभूत्वाकोसित्वमितिचाब्रवीत् शुकोपिभय
भीतःसन्गव्हराद्द्रुतमुद्यतः ३१ शिवोपिप्रययौतावत्शुकंहंतुबलाद्विभुः पलायनपरोजातोयत्रयत्रपलायितः३२

तत्रतत्राशिवोगच्छन्वधायकृतनिश्चयः गच्छन्स्वर्गंचपातालंनप्रापशरणंक्वचित् ३३ तदाभूलोकमागत्यसस्मारह्री नारदं नारदोपिययौतस्मिन्यावन्नहतवान्शिवः ३४ शक्रंप्रोवाचतरसानारदोजीविताशया नारदउवाच त्यजत्वं वाडवंदेहंयोषितायाः कलेवरं ३५ विशसूक्ष्मेणरूपेणनोचेच्छंभुर्वधिष्यति इतितद्वचनंश्रुत्वाद्विजाश्रममथाविशत् ३६ आश्रमादाश्रमंगत्वाव्यासाश्रममथाविशत् व्यासपत्नींततोदृष्ट्वाशक्रःस्मारहासितन्मुखे ३७ विवेशसूक्ष्मरूपेणनज्ञातं येनकेनवा दृष्टःशिवेनगत्सर्वतत्रचास्थितवान्शिवः ३८ स्त्रीवधोबहुधानिंद्यतस्मात्तांनैवचाहनत् मार्गंप्रतीक्षतस्तस्यद्वादशाब्दमतिक्रमत् ३९ उदरस्थोजपन्सूक्तंरुद्रंचाथत्र्यंबकं ततस्तुष्टोहिभगवान्सर्वज्ञोलोकवंदितः ४० माभैषीतिवदन्वत्सनिर्गच्छजठरानिलात् भविताशक्रयोगींद्रः प्रसिद्धोजगतीतले ४१ इतितद्गिरमाकर्ण्यनिर्गतः शक्ररूपधृक् प्रणम्यशिरसादेवंकृतांजलिरभाषत ४२ शक्रउवाच देवलोकोपकारार्थंवंचितोसिमयाधुना तत्क्षमस्वापराधंमेयदित्वंकरुणानिधिः ४३ उक्त्वैवांतर्दधेदेवः शिवः शर्वोमहेश्वरः शक्रोव्यासात्मजोजातोद्वादशाब्दाद्विनिर्गतः ४४ नारदेनसमागम्यगोप्यंसर्वंप्रकाशितं तदादिफाल्गुनस्यास्यमहिमापूर्वविश्रुतः इतितेकथितंसर्वंपुनरुत्पत्तिकारणम् ४५ इतिश्रीभविष्यपु॰फा॰माहात्म्येनवमोऽध्यायः ९ छ श्रीशक्रउवाच शूलीचापिययौतत्रयत्रसापार्वतीस्थिता तयासहययौतूर्णंकैलासंस्थानमात्मनः १ एकदानारदोब्रह्मन्वसुधायांपरिभ्रमत् भ्रमताददृशेतेनपृथुः शोकातुरोभृशं २ त्यक्तराज्यंकलिभयात्तंपृथुंमुनिरब्रवीत् नारदउवाच किमर्थंम्लानवदनः पृथोपरमधार्मिक ३ पृथुरुवाच ब्रह्मपुत्रनमेदुःखशब्दोवात्वत्प्रसादतः परंकलिजितश्चाहमतः किंकरवाण्यहो ४ राज्यंसर्वंपरित्यक्तंतपसेकृतनिश्चयः नारदउवाच ज्ञात्वैवाहंसमायातस्तवभक्त्यासुतोषितः ५ उपायंकथयिष्यामिकिंतपैर्बहुवत्सरैः कुरुष्वफाल्गुनस्नानंसर्वसंकटहारकं ६ सर्वपापप्रशमनंविष्णुनागोपितंपुरा पृथुरुवाच

कथंफाल्गुनमासस्यव्रतंस्नानजपादिकं ७ कर्त्तव्यंसेतिहासंतत्कृपयावदसांप्रतम् नारदउवाच शर्वर्यांत्स्वपदार्धेतुसमु
त्थायविचक्षणः ८ कृत्वाद्वादशगंडूषान्गुरुदेवऋषीन्स्मरेत् उत्थायोषसिराजेंद्रशौचादिविधिवच्चरेत् ९ दंतानांधावनं
पश्चात्स्नानमर्घोदितेरवौ राधागोपालिकंपश्चात्संपूज्यचयथाविधि १० एवंदिनेदिनेविद्वान्यःकरोतिशुभामये ततस्य
पुण्यमहिमावक्तुंत्रिजगतिद्विज ११ अस्मिन्मासेविशेषेणदानंनीरस्यदुर्लभम् जलदानंतुयोदद्यात्तस्यपुण्यफलंशृ
णु १२ कोटिकन्याप्रदानस्यअश्वमेधशतस्यच वाजपेयसहस्रस्यदानानांकोटिशःक्रमात् १३ तत्फलंसमवाप्नो
तिनात्रकार्याविचारणा मासेस्मिन्सुकृतश्रेष्ठानिर्जलेपथियेप्रपां १४ कुर्वंतितेषामस्तुतंवासोवैकुंठमंदिरे अस्मि
न्वह्निमासेतुवाडवानांतुपूजनम् १५ सुगंधचंदनैर्माल्यैर्व्यंजनैर्धूपदीपकैः नानाभक्ष्यैःशीतनीरैः कुर्वंतिमनुजो
त्तमाः १६ तेषांवैकुंठसदनेवासःकियद्वेदिति नवेद्मिपुरुषव्याघ्रतथापुण्यचयंशुभम् १७ तस्मात्सर्वप्रयत्नेनक
र्तव्यंफाल्गुनव्रतम् देवेषुयज्ञेषुतपःसुचैवदानेषुयोगेषुचतीर्थराजे यःपुण्ययोगोभवतिक्षणेन तत्फाल्गुनेचैवक्षणा
ईयोगात् १८ इतिश्रीभविष्यपुराणेफाल्गुनमाहात्म्येनारदपृथुसंवादेदशमोऽध्यायः १० छ नारदस्य
वचःश्रुत्वाहर्षनिर्भरमानसः प्रणम्यशिरसाभूमौकृतांजलिरभाषत १ पृथुरुवाच देवफाल्गुनमाहात्म्यंकस्मा
द्बुसंचविष्णुना तत्सर्वंश्रोतुमिच्छामित्वत्तोब्रह्मविदांवर २ नारदउवाच साधुपृष्टंमहाभागसर्वभूतहितैषिणा
तत्सर्वंकथयिष्यामिसावधानमनाःशृणु ३ पुरामयामहाभागगाथाष्टादशसाहिताः शोधितादीर्घदृष्ट्याताःसारभू
तंमयाहृतम् ४ फाल्गुनस्यतुमाहात्म्यंसर्वपापप्रणाशनम् सर्वरोगहरंपुण्यंगोपितंचप्रयत्नतः ५ जातेबहुतिथे
कालेकदाचित्समयेनृप स्वयंभूःसुखमासीनःसत्यलोकेमहर्षिभिः ६ स्तूयमानःसगंधर्वैरप्सरोभिःसमंततः एताव
त्समयेराजन्जृंभमाणःपितामहः ७ जृंभणात्सरमोजातोदानवोभयवर्धनः दृष्ट्वातंविस्मितोब्रह्माबभाषेचवचनंनृप

८ कोसौत्वंकुतआयातोनामकिंतेवदस्वमे दानवउवाच अहंतवमुखाज्जातस्तवपुत्रःप्रजापते ९ कर्तात्वंसर्व-
भूतानांमांनजानासिकिंततः दयालोदेहिमेनामकृपांकुरुममोपरि १० दानवोक्तंवचःश्रुत्वाविस्मयाकुलचेतसः विह
स्यकिंचिद्वचनंप्रत्युवाचपितामहः ११ यतस्त्वंलंबकर्णोसितद्भविष्यतिनामते यतोसिममपुत्रस्त्वंददामिचवरांश्चते
१२ दानवउवाच नमोनमस्तेस्तुपितामहायसर्वादिदेवायनमोनमस्ते उत्पत्तिकर्तासिजगत्त्रयस्यब्रह्मस्वरूपेण
यत्नःस्थितोऽसि १३ विष्णुस्वरूपेणतथात्रयाणांगोप्तासिनूनंलयविश्वमूर्ते १४ एवंस्तुत्वातदादैत्योयथाभिलषितंवरं
वव्रेत्रिजगतोरिष्टनाशकंसर्वदेहिनां क्रोधावेशेनयद्रक्तंद्रक्ष्यतेसहसामया १५ नूनंभवतुतद्रत्नंयदितुष्टोसिमेप्रभो
१६ तथेत्युक्त्वात्मभूराजन्जगामान्तर्हितोविभुः ततोविचार्यदैत्येंद्रःकिंमयाक्रियतेधुना १७ इतश्चेतश्चविचरन्वायु
चक्रेततोनघ चक्रधरायामगमत्भ्रमताददृशेपुमान् १८ उत्तमांगमयोदिव्यपुरुषोनिःकलेवरः विस्मयाविष्टमनसाउ
वाचपुरुषंप्रति १९ कोसौत्वंकुतआयातः कस्मात्त्वंनिःकलेवरं किन्नामकुत्रवासस्तेब्रूहिसत्यंममाग्रतः २० राहु
रुवाच अहंदैत्यकुलोत्पन्नोराहुनामामहासुरः अमृताशनवेलायांचंद्रेणकथितंपुरा २१ ततश्चक्रेणहरिणाया
वन्ममहृतंशिरः तावन्मयामृतंपीतंतस्मादेकंस्थितंशिरः २२ इतितस्यवचःश्रुत्वाकोपात्प्रस्फुरिताधरः चचर्वदशनैर्जि
ह्वांरक्तवक्षोधरेक्षणः २३ इतिक्रोधसमाविष्टउवाचवचनंरुषा लंबकर्णउवाच भोभोराहोममेष्टोसिसखासि
ममबांधवः २४ कदात्वयामृतंपीतंकिमर्थंहरिणाहृतम् चंद्रेणकथितंकस्मात्सत्यंब्रूहिममाग्रतः २५ राहुरुवा
च पुरादेवासुरगणैर्मथितःक्षीरवारिधिः तस्माज्जातानिरत्नानिचतुर्दशमितानिच २६ गृहीतादेवगणाःप्रत्येकं
जगृहुस्तदा सुधारसेतुहरितेत्यसुरैःकलहःकृतः २७ तत्रप्रोवाचभगवान्सर्वेषाममृतंमया दीयतेक्षणमात्रेणत्वा
लापान्माकुरुथात्वया २८ इत्युक्त्वामोहिनीरूपंजगृहेभगवान्हरिः देवताश्रेणिरपराचासुराणांतथापरा २९ सुरापा

चंक्रेधृत्वाद्वितीयेत्वमृतंतथा देवश्रेणिषुपीयूषंसुरांचासुरश्रेणिषु ३० निरीक्ष्याहृच्छलंज्ञात्वादेवतारूपमास्थितः
देवश्रेणिषुसंप्राप्तोनिक्षिप्तावदनेसुधा ३१ तावच्चंद्रेणसूर्येणकथितंचक्रपाणिनः चक्रेणक्षुरपातेनजघानमममस्तकम्
३२ तदाप्रभृतिदैत्येंद्रसूर्यचंद्रमसौकिल पीडयामिशिरोमात्रोदृश्यतेद्यापिमानवैः ३३ इतिश्रीभविष्यपुराणेफाल्गुन
माहात्म्येलवकर्णजननंएकादशोऽध्यायः ११ ॐ राहोश्चवचनंश्रुत्वाकोपादरुणलोचनः हनिष्येदुष्टचरितान्देवान्
परमघातकान् १ निर्जीवस्त्वंराहोकोत्यादौविनिपात्यते राहुरुवाच योसौपितामहोदेवःसर्वसंततिवर्धनः २ स
घातितोजगत्सर्वंघातितंनिश्चयेनहि तस्यतद्वचनंश्रुत्वासत्यलोकंजगामह ३ नारदपुरतोदृष्ट्वावीणावादनतत्परं कृष्ण
कृष्णेतिभाषंतंजटावल्कलधारिणम् ४ तंदृष्ट्वास्वयमापन्नउवाचपुरुषर्षभम् कोसित्वंपुरुषव्याघ्रकुतस्थः कुतश्चागतः
५ तस्यतद्वचनंश्रुत्वाप्रत्युवाचनारदोमुनिः ऋषिवेषोनारदोहंपर्यटामिइतस्ततः ६ सत्यलोकादागतोहंस्वयंभुतनुजः
स्मृतः आत्मवृत्तंनिवेद्याथतस्मैवृत्तमपृच्छत ७ कस्त्वंभोःकुतश्चायातोनामकिंतेवदस्वमे दैत्यउवाच लवकर्णो
दैत्यवर्योजातोहंब्रह्मजृंभणात् ८ पितामहाद्वरंप्राप्तोजातोहंक्षितिमंडले ततोराहुर्मयादृष्टोवंचितोदेवतागणैः ९
तस्माद्देवान्सगंधर्वान्ऋषीन्यक्षान्सकिन्नरान् घातयामिक्षणार्धेनब्रह्मविष्णुशिवंतथा १० अधुनाभस्मसात्कुर्यात्वां
तथैवपितामहं तद्गिरंनारदःश्रुत्वाभयव्याकुलमानसः ११ प्रकर्षंकंपयामासवातेनचयथातरुः शिथिलावसनग्रंथिःशि
खाग्रंथिस्तुनिर्गता १२ त्रुटितोवेणवस्तंतुर्धर्मेणाथस्रवन्निव नोवाचवचनंकिंचिज्जगामातर्हितोमुनिः १३ ब्रह्मलोकम
गात्तूर्णंप्रोवाचगद्गदयागिरा भोब्रह्मन्नूनंमहादुष्टोह्यस्माकंघातकःकिल १४ तंतथाविधमालोक्यब्रह्मातस्यपुरोगतः व
त्सत्येतादृशंकेननगरिष्टंविनिर्मितं १५ कस्मात्त्वंम्लानवदनःकंपमानोसिकिंकृत तत्सर्वंममचाचक्ष्वहरिष्यामितवाहि
तं १६ नारदउवाच हातातनचकिंज्ञातंदुष्टायदत्तवान्वरं महाघोरतरसर्वप्राणमोचनकारणम् १७ तेनसार्द्धंनशक्ता-

स्तेयोद्धुंहरिहरादयः किंपुनस्त्वंचशक्रश्चतथान्येदेवतागणाः १८ त्वदाज्ञयानिर्गतोहंपार्थिवेनावलोकितः मामपृच्छ
त्सदैत्येंद्रःकोसित्वंपुरुषर्षभ १९ मयानुचात्मनःसर्वःसंबंधःकथितःपुरा दैत्यस्तनूजंनेज्ञात्वाद्गुतंमांहंतुमुद्यतः २०
तदाहंदैवयोगेनस्वच्छंदेनेनवापिच त्वत्समीपागतःशीघ्रंशृणुष्वेतादृशींकथाम् २१ त्यजत्वंब्रह्मलोकंचपरिवारेण-
संयुतः अन्यथासौक्षणार्धेनदहेत्त्वांसपरिग्रहं २२ इत्युक्त्वानारदोयोगीजगामांतर्हितोनृप गतेतस्मिन्मुनौधाताभि
तयाविस्मितमानसः २३ विमृश्यैवंतदाधातादेवेंद्रंमनिगम्यतां परिग्रहसमासाद्यचारूढोहंसपृष्ठके २४ जगामस
द्योयत्रास्तेमघवादेवतागणैः दैत्येंद्रोनारदंपश्यन्इतश्चेतःसमंततः २५ नदृष्टवान्नारदायकोपेनप्रज्वलन्निव तः
दामेनंदानवेंद्रोदेवाःकिंविमरूपिणः २६ चचालदानवस्तस्माद्यत्रास्तेप्रपितामहः यत्रयत्रकृतंतेनदृष्ट्यावलोक
नंनृप २७ तत्रतत्रचदावाग्निःप्रवृत्तःक्षभयंकरः पशुपक्षिश्वापदानांदाहकःपरमःस्मृतः २८ एवंहाहाकृतंतेनदा
नवेनकृतंजगत् सत्यलोकमगात्तूर्णंतत्रनास्तिपितामहः २९ ददाहसत्यलोकंसपशुपक्षिगणाकुलं नानाद्रुमलता
कीर्णंपुष्पवाटीसमन्वितम् ३० उद्यानश्रेणिरचितंगोपुरैश्चविराजितम् अनेकरथ्यारचितंगोपुरैश्चसुशोभितं ३१
यत्रप्रसादवल्यश्चस्पृशंतिविधुमंडलम् अज्ञावदंतिइत्येवंकलंकंचंद्रमंडले ३२ इदंतैर्नश्रुतंतात तार्किकैनैवनिश्चितं
यदाहर्म्याणिदग्धानिज्वालाव्याप्तदिगंतरं ३३ तदाज्वालाव्रणकिणोविस्फुरन्विधुमंडले लोकेस्मिन्पश्यनृपतेक्षतं
वैश्वाग्निसभवम् ३४ यावत्तिष्ठतिशारीरंतावत्तस्यकिणोभवेत् अन्यथाश्वंकपंकादिकथमद्यापितिष्ठति ३५ इति
श्रीभविष्यपु॰फाल्गुनमा॰लंबकर्णश्री॰द्वादशोऽध्यायः १२ ॥ पृथुरुवाच किमकारिततस्तेनभयमुक्ते-
नब्रह्मणा दैत्यस्तक्रुद्ध्यमानःसन्किंकरोन्मायिकथ्यतां १ नारदउवाच दूराद्ददर्शमघवाब्रह्माणंसपरिग्रहम्
बृहस्पतिंसमासाद्यतर्कयामासचानघ २ ब्रह्मलोकात्किमर्थोयंआगतःसपरिग्रहः भयभीतइवाभातिभयंकिंसमुप-

स्थितं ३ किंवादुष्टेनदैत्येनब्रह्मलोकान्निराकृतः विचार्यैवंजगामाथसकाशंब्रह्मणःस्वयं ४ ब्रह्माणंतुसमासाद्यमघ
वादेवतागणैः आनयामासभवनंस्वात्मीयंनृपसत्तम ५ विधिवत्पूजयामासनिवेश्यमृदुविष्टरे प्रणम्यशिरसाभूमौ
कृतांजलिरभाषत ६ ब्रह्मलोकंभवान्ब्रह्मन्किमर्थंत्यक्तवानिति तत्सर्वंकथयस्वामिन्भयंकिंदानवोत्थितं ७ ब्रह्मो
वाच देवेंद्राहंस्करवासीनोआत्मलोकेपरिग्रहः तदामेजृंभणंजातंजृंभणान्निर्गतःशिशुः ८ तंदृष्ट्वाकृपयाविष्टोमोहात्तं
दत्तवान्वरं यन्निरीक्षसिकोपेनतस्यभस्मभवेदिति ९ एवंलब्ध्वावरंमत्तोदानवोदुष्टमानसः राहूपदेशात्संक्रुद्धो
नारदंहंतुमुद्यतः १० कृच्छ्रात्तस्मान्निर्गतस्तुमांचप्रत्यागतोमुनिः तत्सर्वंकथयामासयत्कृतंतेनभूपते ११ तस्मात्तुत्वात्महननंभवतांचसुरेश्वर देवताहननेतस्यबुद्धिर्महतिवर्तते १२ अतोविचारःकर्तव्यःसर्वेषांप्राणरक्षणे वदत्येवं
विधौराजन्ब्रह्मलोकात्कपिंजलः १३ ब्रह्मलोकादागतस्तुतेनसर्वंनिवेदितम् तस्यैतद्वचनंश्रुत्वाभयव्याकुलमानसाः
१४ लंबकर्णंददृशुस्तेदूराद्देवगणास्तदा उवाचेंद्रस्तदावाक्यंक्षीराब्धिंप्रतिगम्यतां १५ विचार्यैवंतदाशक्रोदेववृंदैर्जगामह
माघफाल्गुनयोर्मध्येअमायांदेवतागणाः १६ जलमध्येनिमग्नास्तेयावत्फाल्गुनमासकः अतोफाल्गुनमास
स्यस्नानंकोटिगुणाधिकं १७ अस्मिन्मासेप्रकुर्वंतिजलदानंचयेनराः तेषांपुण्यस्यमाहात्म्यंवक्तुंशेषोपिनप्रभुः १८
लंबकर्णोमरावत्यांयदादेवान्नपश्यति तदादैत्यान्समासाद्यअधिकारंकरोतिच १९ सूर्येंद्राग्न्यनिलेंदूनांयमस्यवरुण
स्यच अन्येषांचैवदेवानांअधिकारंचकारह २० भूमावप्यागमत्सद्यःपीडयामासमानवान् राजानोनिहतास्तेनमहाब
लविमोहिताः २१ अग्निहोत्राणिछिन्नानिदेवतायतनानिच भ्रष्टाचाराःकृतास्तेनब्राह्मणायागवर्जिताः २२ हृतदाराधाडवास्तेहतशेषाश्चमानवाः ऋषयःसिद्धगंधर्वाजग्मुःक्षीराब्धिसन्निधौ २३ फल्गुसंगमोयत्रास्तेतत्रतेसंस्थितानृप तत्र
स्नानेनदानेनमासिफाल्गुनकेद्विजाः २४ यत्फलंलभ्यतेनृभिर्वक्तुंकेपिनशक्नुवन् एवंहाहाकृतंसर्वंजगदेतच्चराचरम् २५

दानवेनातिबलिनास्वामित्वंत्रिजगत्सुच कृतंचदानवैःसार्द्धंबलिभिर्दुष्टविग्रहैः २६ शुक्राचार्यंसमासाद्यराज्यंचकृतवान्बली
कुत्रास्तेदेवतावृंदइतिशोधंचकारह २७ अमात्यास्तस्यचत्वारोनामानिकथयामिते नीलकंठोवक्रदंतोलंबनासोरुविक्रमौ
२८ विकटोविकटास्यश्चस्थूलदंतोबृहत्कटिः नागाननोयुग्मभुजोमेघवर्णःकरालकः २९ अष्टौतस्याभवन्पुत्राः
शक्रतुल्यपराक्रमाः तेषांचत्वारश्चत्वारःपुत्राश्चासन्नरोत्तम ३० एवंसपुत्रपौत्र स्तकरराजदनुजाधमः अक्षौहिणीनासाहस्रैर्दानवैःपरिवारितः ३१ इतिश्रीभविष्यपु० फाल्गुनमा० त्रयोदशोऽध्यायः १३ छ पृथुरुवाच किंच-
चक्रुर्देवगणागंधर्वाऋषयस्तदा जलमध्येविषण्णास्तेतत्सर्वंकथयप्रभो १ नारदउवाच जलेस्थितादेवगणाश्चिंतयापरयावृताः
मिथोविचार्यमाणास्तेशोकदावाग्निपीडिताः २ एतस्मिन्समयेराजन्वाण्याकाशास्थिताभवत् मासानांफाल्गुनोमासोफल्गुतीरेतुदुर्लभः
३ सोयंयूयंदैवयोगात्संप्राप्ताफल्गुरप्यतः तस्मिन्स्नानेनदानेनप्रभुराविरभूत्किल ४
हरिष्यतिचवोदुःखंकृपयापरयाविभुः एवंत्वागिरमाकर्ण्यविस्मितादानवारयः ५ मिथोचुर्निर्जराःसर्वेकेनोक्तंवचनंत्विदम्
केप्यूचुः भवतांकृपयादेवःस्वर्वाण्याकथयत्प्रभुः ६ केप्यूचुः कृपालुनाभगवताकथितंयदिनोव्रतं विधिःकेस्मान्नकथितस्नानदानस्यचानघाः
७ एवंसंचिंतमानास्तेदानवेनातिधर्षिताः एतस्मिन्समयेराजन्योगींद्रोबादरायणः
८ ययौयत्रसगंधर्वादेवाश्चासन्भृशातुराः तंदृष्ट्वामुनिशार्दूलममराविस्मिताभवन् ९ तैरुत्थायासनेस्थाप्यविधिवद्देवतागणैः
अर्हणाचकृत सर्वैःस्ववृत्तांतंनिवेद्यच १० स्वर्वाण्याकथितंयच्चतत्सर्वंविनिवेद्यच आत्मनीद्फाल्गुनस्यव्रतंपप्रच्छतुर्मुदा
११ व्यासउवाच साधुपृष्टंमहाभागादानवेनातिधर्षिताः सर्वसंकटदावाग्निवृष्टिभूतंवदामिवः
१२ प्रातरुत्थायविधिवत्शौचादिविधिपूर्वकं दंतधावनकंकार्यंपश्चात्स्नानंसमाचरेत् १३ राधागोपालकंध्यात्वापूजयित्वाप्रयत्नतः
धात्रीफलैश्चतत्पत्रैः कोमलैस्तुलसीदलैः १४ नानापरिमलैःपुष्पैरनेकैर्ऋतुसंभवैः अस्मिन्मासेविशेषेण

दध्यन्नंप्रीतिवर्धनम् १५ ब्राह्मणेभ्योयथाशक्तिदातव्यंप्रीतिहेतवे धात्रीमूलेपूजनन्तु भोजनन्तत्रकारयेत् १६ कुंभदा
नंदिनेदद्याद्विजेभ्यश्चसदक्षिणं अस्मिन्नेवाह्निकर्तव्यानिर्जलेपथिकेप्रपा १७ दिनेदिनेप्रकर्तव्यंचंदनैर्द्विजपूजनम् चणको
द्भवलड्डुकान्त्रयस्त्रिंशतिकांस्तथा १८ विप्रायवायनंदद्यात्कोटिकोटिगुणाधिकं दानेनचंदनस्यास्यचंद्रकांतोभवेन्नरः १९
द्राक्षादीनंप्रयत्नेनकर्तव्यंमासिचानघ उशीरव्यजनस्यास्मिन्दानंसकृतवर्धनम् २० वटकान्तंडुलभवान्दध्नाभोजनमे
वच दातव्यंगोपिनाथायविप्रेभ्यश्चयथारुचि २१ कालिंगणस्यदानेनगोपिनाथःप्रसीदति एवंफाल्गुनमासेतुकर्तव्यं
प्रीतिहेतवे २२ एवंकृतेत्वयाशक्र एतैश्चदेवतागणैः साक्षात्प्रसन्नोभगवान्वांछितंपूरयिष्यति २३ इत्युक्त्वांतर्हितस्त
स्मात्महर्षिर्बादरायणः गतेतस्मिन्मुनौराजन्शक्रादिदेवतागणाः २४ चक्रुस्तुव्रतराजंतंयत्रास्तिफल्गुसंगमः स्नानदा
नंजपंहोमंगोपीनाथस्यपूजनं २५ कृत्वाशर्करयामूर्तिराधागोपालकस्यच दिनेदिनेतुविधिवत्कृत्वापूजाविधिंनृ
प २६ रात्रौजागरणंतत्रगीतवादित्रमंगलैः भोजनंद्विजवर्याणांदध्यन्नैर्लड्डुकैस्तथा २७ वटकैरन्यभक्ष्यैश्चभोज्यैर्द
त्वाचानेकशः एतद्व्रतप्रभावेणशंखचक्रगदाधरः २८ गोपीनाथोह्याविरभूद्देवानांपश्यतांनृप २९ इतिश्रीभ०पु
राणे फा०मा० चतुर्दशोऽध्यायः १४ ६७ ददृशुस्तेसुरादेवंशंखचक्रगदाधरं पीतांबरपरीधानंसर्वतोक्षिशिरोमुख
१ सर्वतःपाणिपादंतंसर्वव्यापिनमीश्वरम् नमस्कृत्वासगंधर्वाःपूजयामासुरच्युतं २ तदास्तोत्रंप्रचक्रुस्तेसर्वाभी
ष्टप्रदंनृणां देवाऊचुः दीननाथदयासिंधोयोगिहृत्पद्मसंस्थित ३ अनादिसिद्धअव्यक्तभूतानामीश्वरप्रभो
त्वंगतिःसर्वलोकानांदीनानांदीनवत्सल ४ अनेकपापनिकरदावभूतजगत्पते अस्माकंसर्वशक्तिस्त्वंतुभ्यंसर्वात्मनेनमः
५ सर्वभूताशयस्त्वंहिसर्वभूतहृदिस्थितः सर्वभूतातिरिक्तस्त्वंतुभ्यंसर्वात्मनेनमः ६ जगद्भासचिदाभासज्ञानगम्य
नमोनमः शंखासुरबलघ्नायवेदसंरक्षकायच ७ पालकायचलोकानांमत्स्यरूपायतेनमः समुद्रमथनेपूर्वंमंद

राद्रिधरायच ८ दुष्टदानवहारायकमठायनमोनमः यज्ञवाराहरूपायनृसिंहायनमोनमः ९ बलिदर्पहृतेतुभ्यंशक्रस्यप्रियकारिणे अस्माकंदुःखनाशायवामनायनमोनमः १० क्षत्रियस्यकुलोन्मत्तनाशकायनमोनमः कृपाकरायरामाय नमस्तेपरशुधारिणे ११ अस्माकंबंधनाशायदशग्रीवांतकायच मुनिमानसहंसायरामचंद्रायतेनमः १२ शेषायदानवघ्नामोहलधरायच कंसांतकायदेवायरामकृष्णायतेनमः १३ तपोरूपायमौनायनमःकारुण्यमूर्तये पालकायचलोकानांबौद्धरूपायतेनमः १४ म्लेच्छांतकायदुष्टानांदानवानांचमृत्यवे भक्तिप्रियायदेवायकल्किरूपायतेनमः १५ यदायदाहिदुष्टानांदानवानांभयंभवेत् तदातदावतीर्णायतुभ्यंकारुण्यमूर्तये १६ एवंस्तुत्वातदादेवाःपुष्पवृष्टिमुमोचिरे ततऊचेसुरान्देवस्तुष्टोहंभवतांस्तवैः १७ पूजयाचैवभक्त्याचप्रातःस्नानेनफाल्गुने संकष्टहरमेतच्चस्तोत्रंख्यातिमुपैष्यति १८ यइदंपठतेनित्यंसंकष्टंतस्यनश्यति एकवारंद्विवारंवात्रिवारंवापियःपठेत् १९ वांछितंलभतेनित्यंयशश्चायुःप्रवर्धनं सप्तवारंपठेन्नित्यंमासिफाल्गुनकेसुराः २० ब्राह्मणोलभतेविद्यांक्षत्रियस्तुवसुंधरां धनंचलभतेवैश्यःशूद्रस्सुखमश्नुते २१ नाभिमात्रेजलेस्थित्वामासिफाल्गुनकेशुभे सप्तवारंपठेद्यस्तुभार्यांप्राप्नोत्यसंशयं २२ मातृहापितृहाचैवब्रह्महागुरुतल्पगः सुरापोदासिगामीचान्यनेकैःपातकैर्वृताः २३ सप्तवारंदिनेभानोः भानोश्चाभिमुखःपठन् निःपापाश्चभवंतीहनात्रकार्याविचारणा २४ दशावर्तंपठेन्नित्यंभूमिशायीजितेंद्रियः देवतायतनेविद्वान्शुधौ २५ त्रिःसप्ताहंपठेद्यस्तुतस्यपुत्रोभविष्यति अथत्रिंशतिवारंतुयःपठेद्रजनीमुखे मासेनचानघस्तस्यकुष्टनाशोभविष्यति २६ विद्यार्थीलभतेविद्यांधनार्थीलभतेधनं पुत्रार्थीलभतेपुत्रंनिष्कामोमोक्षमाप्नुयात् २७

इतिश्रीभ·फा·मा·पंचदशोऽध्यायः १५ ६२ नारदउवाच एवमुक्त्वासभगवान्पुनःप्राहनरोत्तम दैत्यनाशककियत्कालंप्रतीक्ष्यतां १ महाबलेनदैत्येनधर्षिताःपरमापदं प्रापिताःस्वल्पकालेनस्वाधिकारानवाप्स्यथ २

भगवद्वचनंश्रुत्वाऊचुस्तेदेवतागणाः यदिप्रसन्नोभगवानस्माकंजगदीश्वरः ३ अचिरेणैवकालेनदैत्यनाशंकरुप्रभो
सन्निधौतावदस्माकंवासंकुरुयथाशनः ४ तथेत्युक्तंभगवताशंखचक्रगदाभृता जगामाथात्मनःस्थानंदैत्यनाशःकथंभ
वेत् ५ एवंसंचिंतयामासभगवान्कमलेक्षणः वरदत्तेनदैत्येनयोद्धुंसाकंनवैप्रभुः ६ अहमेवापिकोवापिस्वमायामसृ
जन्हरिः विंध्यस्यचोत्तरेभागेमायारूपंतपोवनं ७ शतयोजनविस्तीर्णंनानाद्रुमलताकुलं अनेकपुष्पसौगंध्यवासितो
८ पूर्णात्तृप्तिमवाप्नोतिमलयंनैवगच्छति नानापक्षिगणाकीर्णंफलस्तबकराजितं ९ लुब्धाश्चंदनवृक्षेषु
वृन्दाइवभुजंगमाः कदानैवोत्तरंतीह वटशाखाइवाबभुः १० सिंहशार्दूलनागाद्यागवयाद्धरिणादयः सहोदराइवाभा
सकेवलम् ११ तस्यदक्षिणदिग्भागेउद्यानंदिव्यन्वक्षषः कपिंजलस्यब्रह्मर्षेराश्रमस्तत्रवर्तते १२ तस्यभा
र्यावस्कमतीरूपयौवनशालिनी तस्यशिष्योमहानासीत्पिंगलाक्षेतिनामतः १३ कदाचिद्दैवयोगेनमायारूपेतपोवने
आगतःपिंगलाक्षोसौपत्रपुष्पसमित्कुशान् १४ छेदनार्थंतुतद्दृष्टंदिव्यरूपंतपोवनं निवेदयामासगुरुंस्वाश्रियंनृपस
त्तम १५ मुनिरप्यागतस्तस्मिन्सशिष्यःसपरिग्रहः चकारचाश्रमंतस्मिन्नकरोद्दुष्करंतपः १६ एवंचकारसमुनिर्मायाभू
वने लंबकर्णस्यविख्यातोधूमलोवाहिनीपतिः १७ चम्वापरिवृतोरण्येमृगयांचचकारह मायारूपस्तदैत्येनम
यूरःस्वर्णरूपधृक् १८ एकाकीहयमारुह्यपार्षदैर्वर्जितःकिल मयूरपृष्ठतोराजन्महत्यात्वरयाययौ १९ मयूरोपव
नंप्राप्यपर्णकुट्यांमुनिर्ययौ दैत्योपिहर्षमापन्नोमुनेराश्रममभ्यगात् २० अवतीर्याद्वनिकुट्यांप्रविश्यदनुजाधिपः
मित्कुशं २१ दृष्ट्वावस्कमतींरम्यांरूपयौवनशालिनीं विदीर्णःकामबाणेनधर्षणं
चकारह २२ तावन्मायामयंचक्रंज्वालाव्याप्तदिगंतरं दृष्ट्वागोचरमत्युग्रंदृष्ट्वाभयप्रकंपितः २३ पदातिर्निर्ययौतस्मा
अश्वस्यानयनेबुद्धिर्नैवजातानराधिप २४ त्वरयापरयाविष्टोभ्यगाद्यावत्स्वपत्तनं तावत्पृष्टे

गाचक्रंपश्चात्गुप्तंभवत्किल २५ विश्रम्यक्षणमात्रंतु लंबकर्णः पुरंययौ कौतुकंकथयामासयज्जातंचतपोवने २६
देवएतादृशीभार्यानभूतानभविष्यति त्वंसर्वरत्नभोक्तासिदेवासुरनिबर्हणः २७ स्त्रीरत्नमनिच्चार्वंगीत्वयाकस्मा
न्गृह्यते धूम्रलस्यवचःश्रुत्वायोगमायाविमोहितः २८ चकारसिंहतुरगंहर्षनिर्भरमानसः मुख्यामात्यैःसमागम्य
ईषत्सैन्यकसंवृतः २९ जगामसद्योयत्रास्तेपर्णकुट्यांनरोत्तम स्त्रीत्येवकारणंवेदमृत्योस्तस्यनसंशयः ३० दशाननो
पिशक्रोपिस्त्रीनिमित्तंलयंगताः तस्मात्सर्वप्रयत्नेनपरस्त्रीणापरिग्रहः ३१ इतिश्रीभ०पु०फा०मा०षोडशोऽध्या-
यः १६ ६५ नारदउवाच तस्यदुष्टाभवन्मार्गेशकुनाश्चनरोत्तम तथापिनपरावृत्तोविष्णुमाययातिमोहितः १
इत्थमल्पेनकालेनउद्यानेविष्णुनिर्मिते बभ्रामदनुजैःसार्द्धंदृष्टवानाश्रमंऋषेः २ पूर्ववत्तत्रपुष्पार्थंसशिष्योमुनिपुंग
वः निर्जगामनरव्याघ्रशंकितोदुष्टचेष्टितात् ३ चेतोदैत्यश्चदुर्बुध्यापर्णकुट्यांविवेशह तांदृष्ट्वारूपसंपन्नांकृशांगीं
यौवनोन्नतां ४ प्रहस्यदानवःकिंचित्स्मरबाणेनताडितः उवाचतांमदोन्मत्तोज्ञात्वाएकाकिनींनृप ५ देवित्वंनिर्ज
नेदेशेकिंयत्कालंतुवर्त्तसे तपसस्तवचेदानींफलरूपोहमागतः ६ त्रैलोक्याधिपतिश्चाहंदेवासुरनिबर्हणः मत्प-
रिग्रहतांप्राप्ययाहिशीघ्रंममाश्रयं ७ दैत्यस्यगिरमाकर्ण्यप्रोवाचमधुरंवचः इतोयाहिमहादुष्टभाषणंमाकृथावृ-
था ८ देव्याश्चवचनंश्रुत्वाउत्थायदानवाधमः तस्याःकरेकरंकृत्वास्कंधमारोप्यनिर्ययौ ९ तंदृष्ट्वासऋषिर्दूरादंतिके
प्रययौक्षणात् रेरेदानवदुष्टत्वंवृथाधर्षितुमुद्यतः १० त्यजभार्यांगुणवतींयदिजीवितुमिच्छसि नोचाववचनंकिंचित्त्व
रयानिर्ययौखलः ११ शशापसमुनिःकोपाद्भस्मसाद्भववारितः निर्गत्यसत्वपुराच्चूर्णंयत्रास्तेसमुनिर्नृप १२ मुनेःसमीप
मासाद्यहतवीर्योबभूवह पृथुरुवाच मुनेएवंतुकृतवान्किमर्थंभगवान्हरिः १३ तत्सर्वंकृपयातातकथयस्वम-
माग्रतः शृणुराजन्प्रवक्ष्यामित्वयापृष्टंयदद्भुतं १४ असौमुनिःकापिलश्चराक्षस्यामभवत्किल रावणस्यप्रियोत्य

थँशक्रस्यहरणायच १५ परंतपश्चाचरतितस्यनाशस्यहेतवे इदंचक्रकृतवान्विघ्नंसर्वलोकहितावहम् १६ दुष्टेनदुष्टह
ननमकरोद्दीनवत्सलः एवंसभगवान्विष्णुः कृष्णःकपटनायकः १७ ज्ञात्वाभयाकुलंनित्यं आत्मानंक्षीणशक्तिकं तपोव-
नाच्चसमुनिर्निर्ययौप्रथमाश्रमम् १८ गतेतस्मिन्मुनौराजन्तपोवनमगाद्द्रुतम् अष्टौतस्यमहापुत्राश्चामात्याश्चतुरस्त
था १९ रथनागाश्वपत्तिभिरनेकैःपरिवारिताः विप्रचेरुःसमंतात्तेतत्रनास्तिमुनिर्मठे २० चक्रुस्तस्योत्तरकार्यंशोकदावाग्नि
पीडिताः २१ वृद्धब्राह्मणरूपंतुजगृहेभगवान्हरिः तेषामंतिकमागत्यकृष्णःकपटनाटकः २२ उवाचतेषांमधुरंवचनं
जगदीश्वरः श्रीकृष्णउवाच इतोगच्छथहेदैत्यायदिजीवितुमिच्छथ २३ तस्यैवंवचनंश्रुत्वाकोपादरुणलोचनः
यावज्जघानपरशुनातावदाविरभूत्प्रभुः २४ तेषांयुद्धमभूद्राजन्मुनिविस्मयकारकम् चक्रेणबलिनातेननिहताश्चाम
रारयः २५ ततोहाहाकृतंसर्वंदैत्यसैन्यंपराजितम् तदातेदानवाराजन्शेषाःपातालमाययुः २६ जज्वलुश्चाग्नयःशांताः
स्वप्रभोभूद्दिवाकरः ववुःपुण्यास्तदावातादिशश्चविमलाभवन् २७ तत्रायसुःसुरगणाननृतुश्चाप्सरोगणाः जगुर्गं
धर्वपतयोवेदघोषंचवाडवाः २८ इतिश्रीभ०पु० फा० मा० पृथुनारदसंवादेसप्तदशोऽध्यायः १७ ६ नारदउवाच एवं-
स्तुतस्तदादैवैर्जगामांतर्हितोहरिः स्वेस्वेधिकारेदेवास्तेययुर्विनिहतारयः १ तदाप्रभृतिराजेंद्रसर्वलोकहितावहम् प्रकटं
फाल्गुनव्रतंजातंचक्षितिमंडले २ सर्वेतेमनुजात्यर्थंचक्रुश्चफाल्गुनव्रतम् तेषांसंसर्गयोगेनपशवोज्ञानमाप्नुवन् ३ फाल्गु
नस्नानदानेनरेजुस्तेपुण्यशालिनः दिनेदिनेयथाचंद्रःकलाभिरतिवर्धते ४ तथावैमनुजस्त्वाघरेजुस्तेपुण्यशालिनः यः
कश्चित्पुरुषःकुत्रवर्ततेपापकर्मकृत् ५ तेषांसंपर्कयोगेनपुण्यवान्भगवन्किल एवंक्षितितलेकोपिमनुजाःपापशालि
नः ६ नावसीदंतिराजेंद्रपुण्यशालिनिमासके मृतावैप्राणिमात्रावैभवेवैकुंठवासिनः ७ नकोपियमलोकस्यगामीक्षि-
तितलांतरे यमोपिखिन्नमनसश्चिंतयाविष्टमानसः ८ चित्रगुप्तसमासाद्यमंत्रंचक्रेहितायच एतस्मिन्समयेतत्रगतोहंनृप

सत्तम ९ अर्हणांविधिवच्चक्रे पृष्टस्तेनाप्यहंकिल यमउवाच अनाधिकारिणासाधोकिंकर्तव्यंमयाधुना १०
नारदउवाच फाल्गुनेस्नानदानेनमनुजाः पुण्यशालिनः नयांतितवलोकेस्मिन्नतस्त्वंव्रतमाचरत् ११ एतद्व्रतप्रभा
वेनविष्णुस्त्वांचप्रसीदति वरंयाचयतस्मात्त्वंकुरुगुप्तमिदंव्रतम् १२ एवमुक्त्वागतोहंचव्रतंसोपिचकारह तस्यव्रतप्र
भावेनविष्णुराशीरभूत्किल १३ शमनःपूजयामासप्रणनाममुहुर्मुहुः यमउवाच भगवन्देवदेवेशलोकनाथजग-
त्प्रभो १४ तवाज्ञयाहंतिष्ठामिअधिकारस्तथापिच अधुनानाशमायातिकिंकर्तव्यंमयाधुना १५ यदिप्रसन्नोभग
वान्कुरुगुप्तंजगत्पते तथेत्युक्त्वातुभगवान्जगामांतर्हितोनृप १६ मायारूपांमोहिनींतुकृतवान्जगदीश्वरः अव
नीव्रतविघ्नायप्रेषयामासतांशिवाम् १७ आगताजगतीपृष्ठेविघ्नानिचचकारह तयासंमोहितंविश्वंजगदेतच्चरा
चरम् १८ मायारूपायुवतयोनिर्मिताश्चसहस्रशः रूपलावण्यसंपन्नास्ताभिर्व्याप्तंचभूतलम् १९ मोहितामनुजा-
स्ताभिःकामबाणेनपीडिताः रेमुर्दिवानिशंराजन्स्नानदानविवर्जिताः २० एवंक्षितितलेजातामानवादोषतत्पराः न
चक्रुस्तेस्नानदानजपहोमादिकाःक्रियाः २१ एवंतयाकृतंविश्वंशमनस्यमहात्मनः जगदीशसकाशंसाययौप्रोवाचमो
हिनी २२ मोहिन्युवाच कार्यंकृतंजगत्स्वामिन्मयाकिंक्रियतामिति भगवानुवाच युगेकलौतुसंप्राप्तेफाल्गु
नस्यतुयद्व्रतम् २३ नयेकुर्वंतितेषांचैमोहनंकुरुसर्वदा सूतउवाच शमनंकृपयाएवंफाल्गुनस्यशुभोन्नतं २४ चक्का
रगुप्तंभगवान्जगदात्माजगत्प्रभुः नारदउवाच यदाकलिःप्रवृत्तस्तुजनासुकृतवर्जिताः २५ यमस्यलोकंसर्वेतेग
म्यमानाःसहस्रशः तेषांचकृपयाराजन्पुनश्चप्रकटंभवेत् २६ एवंफाल्गुनमासस्यसुकृतंपरमंमतम् सर्वेषांचैवमासा
नामुत्तमोयमुदाहृतः २७ मासानांमार्गशीर्षस्तुविभूतिश्चोच्यतेबुधैः अयंतुसाक्षाद्भगवान्नात्रकार्याविचारणा २८ २०
इतिश्रीभविष्यपुराणेफाल्गुनमाहात्म्येपृथुनारदसंवादेअष्टादशोऽध्यायः १८ ५ नारदउवाच अत्रैवो

दाहरंतीममितिहासंपुरातनम् पुराकृतयुगस्यांतेकांचीपुर्यांनरोत्तम १ जाबालिर्नामविप्रोभूत्स्वकर्मनिरतःसदा क
दाचिद्दैवयोगेनजातिभ्रष्टोबभूवह २ सर्वाणिदुष्टकर्माणिह्याचरन्द्विजनायकः मद्यमांसानिसर्वाणिबुभुजेमुनिपुंग
वः ३ दिनेदिनेतुवेश्यायाःगृहेतिष्ठन्निराकुलः एवंदृष्ट्वानागरीकैःस्वग्रामाच्चबहिष्कृतः ४ ततस्तुवेश्ययासार्द्धंकोलापु
र्योजगामह चकारोदरपूर्त्यर्थंमांसादिविक्रयंततः ५ मार्गेमार्गेचरान्हत्वामृगपश्वादिकांस्तथा वेश्ययासहितस्तत्रनि
नायबहुवासरम् ६ कालेनबहुनाराजन्सपंचत्वमगाद्द्विजः यमदूतैस्ततोबद्धापाशैःपरमदारुणैः ७ ताडयामासुर्बहु
लंतमकंटकसंभवैः मार्गेतंनिन्युःपापिष्ठंदृष्टवान्यमराड्यमः ८ चित्रगुप्तंसमासाद्यपुण्यलेशंपप्रच्छच पुण्यलेशो
नवैज्ञात्वापीडांचक्रुरनेकधा ९ कुंभिपाकादिनिरयेलोहकंटकतापिते क्षिप्त्वापुनःपुनस्तस्मैताडयामासुःपाशकैः १०
ततःपैशाचिकींयोनिंक्षिप्तवान्शमनोद्विजम् पैशाचींयोनिमापन्नोभक्षयामासमानवान् ११ द्विजबंधुंमृतंज्ञात्वावे-
श्याशोकंचकारह शोकंत्यक्त्वानागरीकैःसमागम्यद्विजस्यच १२ चकारोत्तरकार्यंतुचिंतयामासचात्मनि किंकर्तव्यम-
याद्यकालक्षेपकथंभवेत् १३ तस्मिन्नेवपुरेविप्रोदेवदत्तोह्यासीत्किल कृत्वातस्यगृहेवासःसेवांकृतवतीतदा १४
कदाचिद्दैवयोगेनफाल्गुनोमासआगतः सविप्रःफल्गुस्नानार्थंजगामचतयासह १५ वेश्यापिचक्रेविधिवत्यथावद्गुरु
णोदितम् स्नानंदानंजपोहोमंश्राद्धकर्मचकारह १६ तत्तज्जाबालिमुद्दिश्यवेश्यापिकृतवान्नृप तस्यव्रतस्यपुण्येनपि-
शाचोज्ञानमन्वगात् १७ वेश्याशोधंचकारासौक्षणेनक्षितिमंडले फल्गुतीरेतुतान्दृष्ट्वाउवाचकरुणंवचः १८ पिशा
चउवाच जाबालिरहंसंविप्रवरोभ्रष्टोहंपूर्वकर्मणा चरित्वाहंत्वयासार्धमनेकैर्दुष्टकर्मभिः १९ तेनदोषेणशमनःएत-
स्यांक्षिप्तवान्ततो अतोमांकृपयाभद्रेक्षिप्रंसंतारयस्वभो २० तस्यतांगिरमाकर्ण्यसावेश्यादीनवत्सला फल्गुनीर
करेधृत्वाफाल्गुनस्नानजंफलम् २१ ददौतस्मैपिशाचायदिव्यरूपोभवत्तदा विमानंदिव्यमगमदप्सरोभिःसमन्वितं

२२ विष्णुरूपधरैःसाक्षाद्विष्णुदूतैरलंकृतम् दिव्यरूपधरावेश्यासाभवद्राजसत्तम २३ दूतैर्विमानेसंस्थाप्यवेश्ययासाहि
तोद्विजम् पश्यतांसर्वलोकानांविष्णुलोकंजगामह २४ एतत्तेकथितंराजन्माहात्म्यंफाल्गुनस्यच सर्वपापप्रशमनंभूयः
किंश्रोतुमिच्छसि २५ इतिश्रीभविष्यपु॰ फाल्गु॰ एकोनविंशोऽध्यायः १९ छ पृथुरुवाच फाल्गुनस्यउ
पांगानिव्रतानिकथयाशुनः कृतेषुयेषुभवतिसंपूर्णफाल्गुनव्रतम् १ नारदउवाच पूर्णिमायांफाल्गुनस्यहो
लिकापूजनंस्मृतम् विष्टिचिह्नेनकर्तव्यंसंकटेविष्टिपुच्छके २ भद्रायांद्वेनकर्तव्येश्रावणीचहुताशनी श्रावणीनृप
तिंहंतिग्रामंदहतिफाल्गुनी ३ अत्रैवोदाहरंतीममितिहासंपुरातनम् पुरातनेयुगेकालेनृसिंहपुरपत्तने ४ तत्रनृसिं
होभूपतिरासीद्बहुधनेश्वरः अष्टौप्रधानास्तस्यासन्नामानिकथयामिते ५ सुमंगलोभंगलश्चविरूपाक्षःप्रभंजनः
नीलग्रीवोविश्वमूर्तिःसुमतिश्चसुमेधसः ६ पुत्रास्तस्यचत्वारोगोपीनाथोनलस्तथा वृहद्रथोविश्वमूर्तिःसर्वेशक्र-
पराक्रमाः ७ तस्यभार्यागुणवतीसतीसर्वगुणाश्रया एवंसराजास्वपुरेबुभुजेगांनिराकुलः ८ पूर्णिमाफाल्गुनेमा
सिआगतानृपसत्तम तस्यांव्रतंहुताशन्यांभद्रायुक्तंचकारह ९ अज्ञानाद्दैवयोगाच्चकृतंकर्मसुदुष्करं तेनदोषेणस-
कलंदग्धराज्यंबभूवह १० तदाचिंतातुरोराजामंत्रिभिःपरिवारितः किंजातंराष्ट्रदग्धेनकिमर्थंक्षोभितोनलः ११
यदानबुबुधेकोपितदासनृपसत्तमः राष्ट्रंसंस्थाप्यविधिवन्मंत्रिणंसहितंशुभम् १२ तपोवनंजगामाशुकतिभिः
सेवकैर्वृतः पुरोधसश्चब्रह्मर्षेर्वसिष्ठस्यमहात्मनः १३ ययौतपोवनेदिव्येनानाद्रुमलताकुले नानापक्षिगणाकीर्णेश्वा
पदैश्चविराजिते १४ त्यक्तवैराश्चगोव्याघ्रास्तिष्ठन्त्यस्मिन्निराकुलाः मुनेस्तस्यांतिकंगत्वाप्रणनाममुहुर्मुहुः १५ नोवा
चकिंचिन्नोत्तस्थौबाष्पपूरितलोचनः ध्यानंविसृज्यसमुनिःकराभ्यांनृपसत्तमम् १६ उत्थापयित्वासच्छिष्यंजगादऋ
षिसत्तमः नृपतेवदमांशीघ्रंकिमर्थमिहचागतः १७ किमर्थंम्लानवदनःकिमर्थंशोकसंकुलः पराभूतोवाशत्रुभ्योभ-

यंवादानवोत्थितम् १८ तत्सर्वंमांसमाचक्ष्वजानोसिनिर्भयोयतः उवाचकृच्छ्रंनृपतिः शोकगद्गदयागिरा १९ त्व
त्प्रसादेनभगवन्सकलंमेसर्वएवहि परंत्विदानींभगवन्क्षोभोत्रानलसंभवः २० राष्ट्रस्यदहनंजातंतत्सर्वंवदकिंप्रभो
ध्यानमासाद्यसमुनिर्मुहूर्तंज्ञानचक्षुषा २१ पश्यन्किमर्थमनलक्षोभोजातःस्वराष्ट्रके पुनःप्रोवाचसमुनिर्ज्ञात्वात
त्कारणंनृप २२ वसिष्ठउवाच शृणुतत्कारणंराजन्येनराज्यक्षयोभवत् पूर्णिमायांफाल्गुनस्य होलिकायाव्रतं-
शुभम् २३ त्वयाकृतंविष्टियुक्तंफलंतस्यतुनिश्चितम् तेनकर्मविपाकेनराष्ट्रदाहोभवत्क्षणात् २४ तच्छांतयेपुनस्त्वं
हिव्रतंकुरुविधानतः पूर्णिमायांफाल्गुनस्य भद्रासंगंपरित्यजन् २५ एवंतद्वचनंश्रुत्वा प्रणम्यऋषिपुंगवम् आ
ज्ञांगृहीत्वातस्यर्षेर्ययौस्वनगरंनृपः २६ चकारविधिवत्तच्चव्रतंफाल्गुनसंभवम् तेनव्रतप्रभावेनराज्यंस्वस्थमभूत्कि
ल २७ एतत्तेकथितंराजन्विष्टिसंगमजंफलम् तस्मात्सर्वप्रयत्नेनविष्टिसंगंपरित्यजेत् २८ व्रतानामुत्तमंनूनंभूयःकिं
श्रोतुमिच्छसि २९ इतिश्रीभविष्योत्तरपुराणेफाल्गुनमाहात्म्येपृथुनारदसंवादेविंशोऽध्यायः २० ७
पृथुरुवाच मुनेफाल्गुनमासस्यपूर्णमास्यांव्रतंस्मृतम् किंदानंकिंफलंतस्यकोदेवःकस्यपूजनम् १ काहुताशिनी
कस्माद्वैपूजनंचउदाहृतम् तत्सर्वंकृपयाब्रूहिकृपांकृत्वाममोपरि २ सूतउवाच साधुपृष्टंमहाभागसावधानम-
नाभव पुरादैत्यकुलोत्पन्नोहोलनामामहासुरः ३ तपश्चकारपरमंहिमवद्गिरिकंदरे पंचवर्षसहस्राणिधूम्रपान
मधोमुखः ४ तपसावर्द्धितस्यतेजःपरमदारुणं तस्यतापेनसंतप्तादिविदेवगणान्नृप ५ सपर्वतवनंतेनज्वालारूप
मभूत्किल नगस्थाःपेतुःसर्वेतेद्विपदाश्चचतुष्पदाः ६ ययुःकैलासनिलयंशिवदूतागिरिस्थितं ऊचुःसांबंतंतुदेवंस-
र्वोपद्रवनाशकम् ७ गणाऊचुः देवत्वद्गिरिपृष्ठेतुतपस्तप्यतिदारुणं किंवादैत्योथगंधर्वोप्सरोराक्षसएववा ८ किं
नरोवाथमनुजोस्माकंतुननिर्णयः तस्यतापेनतप्तास्त्वांवयंवदितुमागताः ९ नारदउवाच एवमुक्ताशिवगणास्तं

निपत्यचपुनर्नृप शंभुर्विचार्यमनसिज्ञात्वातंभक्तमात्मनः ययौतस्यांतिकेतूर्णंदृष्टवान्दानवंनृप भस्मनाधवलंशांतंचे
तसाभजतेशिवम् ११ रुद्राक्षमालावलयंअपरंशिवमीश्वरं नपश्यंतंचआत्मानंवल्मीकच्छन्नविग्रहं १२ उवाचभगवान्
शंभुर्नीलकंठोवृषध्वजः शिवउवाच उत्तिष्ठोत्तिष्ठदनुजपूर्णस्तवमनोरथः १३ शिवस्यवचनंश्रुत्वानेत्रेउन्मील्यदान-
वः अपश्यद्देवजगतांकारणंप्रभुमीश्वरम् १४ ननामशिरसाभूमौकृतांजलिःस्तुवन्शिवं दैत्यउवाच देवदेवजग
न्नाथसंसारार्णवतारक १५ त्वमेवसर्वजीवानांकारणंतेनमोनमः १६ त्रिपुरांतकसर्वेशनमोमन्मथघातिने ईशानःस
र्वविद्यानांत्वंशक्तिःसर्वदेहिनां १७ अद्यमेसफलंजन्मदर्शनात्तवपादयोः जातोहंकृतकृत्योवैधन्यास्तेममपूर्वजाः
१८ दैत्यस्यगिरमाकर्ण्यसशिवोदीनवत्सलः वरंयाचयभद्रंतेयस्तेमनसिवर्तते १९ दैत्यउवाच यदितुष्टोसिदेवेश
तवभक्तिर्दृढास्तुमे त्रैलोक्यकंदनेशक्तिर्ममाप्यस्तुजगत्पते २० शिवउवाच तथास्तुदनुजव्याघ्रअंतर्धानंययौ
शिवः अंतर्हितेशिवेतस्मिन्दनुजःस्वगृहंययौ २१ उपयेमेसविस्वस्य असुरस्यसुतांनृप तुक्कुडानामविख्यातांत्रिंशद्यो
जनविस्तृतां २२ घोरस्वनांवृहन्नासांलंबोष्ठींलंबकर्णकां तस्यांचोत्पादयामासकनांपरमदारुणाम् २३ शतयोजन
विस्तीर्णांपिंगाक्षींदीर्घनाशिकाम् लंबोष्ठींलंबकर्णांचदशनैरतिभीषणाम् २४ साकन्यावरधेतस्यगृहेविंध्यगिरिर्यथा
एवंसदनुजव्याघ्रबुभुजेगामनाकुलम् २५ शिवस्याराधनेभक्तिर्दृढाआसीद्दिनेदिने ततस्तैर्दनुजैःसर्वैर्मेलयित्वा-
विचारितं २६ कृत्वातस्यतदाबोधंसर्वेषांप्राणहारकं कालेनवलिनातस्यबुद्धिर्जातानराधिप २७ पीडनेसुरगंधर्वय-
क्षाणांमनुजस्यच अन्येषांचैवजंतूनांपीडांचक्रेसुदारुणां २८ इतिश्रीभवि० फाल्गुनमा० एकविंशोऽध्यायः २१
७ नारदउवाच वलिनातेनदैत्येनभूमिसंस्थाश्चमानवाः ब्राह्मणानिहताराजन्भ्रष्टाचारास्तथाकृताः १ यज्ञ २२
कर्मविहीनाश्चअग्निहोत्रविवर्जिताः स्नानसंध्याविहीनाश्चजाताःक्षितितलेद्विजाः २ एवंहाहाकृतंसर्वंजातंक्षिति

तलंनृप एवंविजित्यभूलोकंस्वर्गंजेतुमथाययौ ३ आगतंदानवंदृष्ट्वासुरराड्देवतागणैः ययौतस्यांतिकेतूर्णंयुयुधे शरवृष्टिभिः ४ भिंडिमालैर्मुद्गरैश्चतोमरैःपट्टिशैस्तथा एवंदेवासुरगणैःकृतंयुद्धंसुदारुणम् ५ तदादेवगणैःसर्वं दानवानांबलंहतं चुक्षोभसेनाधिपतिर्दनुजस्यमहात्मनः ६ सुमंगलोमहावीर्योदृष्ट्वातूर्णंरणेययौ युयुधेसंगरेतेभ्यो दारुणैःशरवृष्टिभिः ७ तदापेतुःसुरगणादिशोभेजुर्भयातुराः पलायमानंस्वबलंविलोक्यसुरराड्ययौ ८ सुमंगलस्यशक्रस्ययुद्धंसमभवन्नृप शक्रःसपंचबाणैस्सुविव्याधदनुजाधमं ९ द्वाभ्यामश्वौध्वजौद्वाभ्यांमुकुटश्चनिपातितः सारथ्येकेननिहतोदृष्ट्वाकोपसमाकुलः १० केशान्बध्वाचहस्तेनखड्गचर्मधरोसुरः पद्भ्यांययौसविरथोहताश्वोहतसारथिः ११ चिच्छेदखड्गंतद्धस्तात्तदापाणिरयुध्यत यावन्मुमोचसगदांमहेंद्रस्यचवक्षसि १२ तावच्चिच्छेदवज्रेणपातयामासचूर्णितां तेनवज्रेणबलिनाविहतोदानवःक्षणात् १३ सगतासुःपपातोर्व्यांदृष्ट्वादैत्यस्सुकोपनः बलंचनिहतंदृष्ट्वास्वयंयोद्धुमथाययौ १४ चचर्वदशनैर्जिह्वांकोपप्रस्फुरिताधरः महेंद्रंलक्ष्यदनुजश्चिक्षेपशरसंहतीः १५ महेंद्रंव्याकुलंकृत्वासिंहनादंचकारह मुहूर्तेनततःप्राप्यचेतनामात्तकार्मुकः १६ युयुधेचपुनःशक्रो दानवेनमहात्मना दैत्यस्यचमहावक्षेवज्रंचिक्षेपदेवराट् १७ शिलायामुपलक्षेपायथाभवतिशौनक तद्वद्वज्रस्यद्विगतिर्ध्रुवंजातानराधिप १८ तस्मादुड्डीयतद्वज्रंलग्नंनागकपोलके तस्यप्रहारात्संत्रस्तोगतोसौमेरुकंदरे १९ पेतुश्चसर्वेत्रिदशागतेतस्मिन्नराधिपे दैत्येंद्रस्त्वमरावत्यांस्वसैन्यपरिवारितः २० ययौचातिबलोन्मत्तोदानवोबुभुजेदिवम् दैत्येंद्रोमाययादध्रेरूपाणिचह्यनेकशः २१ सूर्यस्यतपनंचक्रेह्यधिकारंतथैंदवम् तामेचपवनार्द्धंचचक्रेचैववन्हिकर्मच २२ यमस्यवरुणस्यापिकुबेरस्यमहात्मनः अन्येषांचैवदेवानांगंधर्वाप्सररक्षसां २३ सर्वेषामधिकारांश्चस्वयमेवावतिष्ठते स्वर्गान्निराकृतास्तेनशेषादेवगणाभुवि २४ विचेरुश्चयथामर्त्यादुःखदावाग्निपीडिताः सूतउवाच

एवंदैत्येनभोविप्राःपीडितादेवतागणाः २५ मेरोर्गुहायांमिमिलुःविचारंचक्रुरर्दिताः चिंतयामासुःसर्वेतेभगवंतंजग-
द्गुरुं २६ देवाऊचुः पाहिविश्वेशसर्वात्मन्सर्वव्यापिन्नमोस्तुते अस्माकंदुःखनाशायसुखदायनमोनमः २७ यदा
यदाहिविश्वस्यदानवानांभयंभवेत् तदातदावतीर्णस्त्वंनिर्भयंचजगत्कृतं २८ अधुनाक्वगतस्त्वंहिदेवदेवरमापते त्व-
द्विनागतिरस्माकंनास्तिनास्तिजगत्पते २९ करुणोदितमाकर्ण्यदेवानांजगदीश्वरः आविर्भूतस्ततःसद्योयत्रदेवग-
णावसन् ३० इतिश्रीभविष्योत्तरपुराणेफाल्गुनमाहात्म्येद्वाविंशोऽध्यायः २२ छ नारदउवाच पीतांबरं
चतुर्बाहुंशंखचक्रगदाधरं कोटिसूर्यप्रतीकाशंजगदानंदकारकम् १ दृष्ट्वादेवंसुरगणाःप्रणेमुश्चमुहुर्मुहुः मृद्वासने
समारोप्यपूजयामासुरच्युतम् २ स्तवंचचक्रुःसर्वेतेननृतुश्चाप्सरोगणाः एवंप्रसादितोदेवश्चक्रपाणिरुवाचह
३ श्रीभगवानुवाच भवत्कार्यंमयाज्ञातंदानवस्यवधादिकं शिवभक्तिबलीदैत्योदत्तःशंभुवरेणहि ४ तथापि
तंहनिष्यामिकियत्कालंप्रतीक्ष्यतां उवाचैवंसुरगणंजगामांतर्हितोहरिः ५ गतेतस्मिन्हरौदेवाभक्ष्यभोज्यविव-
र्जिताः प्रतीक्षांतस्यकुर्वंतःस्थितास्तेमेरुकंदरे ६ असुरोबुभुजेविश्वंसमग्रंगतकंटकं शिवात्सत्वाधिनापूर्वंकन्यात्वेना-
पिरक्षिता ७ साहोलिकेतिविख्यातासर्वदेवभयंकरी ऋषिरुवाच याहोलिकात्वयाख्याताजाताकस्माद्भयंकरी ८
शंभोःपलायिताकस्मात्तत्समासेनमेवद नारदउवाच फाल्गुन्यांपौर्णमास्यांवैप्रदोषेहोलिकार्चनम् ९ येकुर्वंतिनरा-
स्तेषांसर्वंभवतिशोभनं शौनकउवाच सूतसूतमहाभागहोलिकायात्वयोदिता १० साकाकिमर्थमुत्पन्नापौर्णमा-
स्यांचपूजनं कस्मात्कुर्वंतिविद्वांसएतदाचक्ष्वसांप्रतम् ११ सूतउवाच अत्रतेकथयिष्यामिकथांपौराणिकींशुभां
पुरातुमथुरेदेशेदुंदुभिर्नामविश्रुतः १२ सम्राड्दैत्यकुलोत्पन्नःशशासजगतीतलं आमंत्र्यभार्गवंराजायज्ञारंभमथाक- २३
रोत् १३ विनेंद्रंयजतातेनविष्णुद्वेषवतातदा ततस्तादेवताःसर्वायज्ञभागविवर्जिताः १४ देवेंद्रप्रणताःप्रोचुःसर्वे

दुंदुभिचेष्टितं महेंद्रोपिचतज्ज्ञात्वाक्रोधाद्दीप्तोनलंवमन् १५ सर्वेदेवाश्चकुपिताःमुखेभ्यश्चानलंवमन् वमतांचानलाःस
र्वैएकीभूताभयानका १६ तावदेवाभवन्नारीत्विषाख्यामजगत्त्रया ऊर्ध्वकेशनखानिम्ननाशिकाचदिगंबरा १७ पिंगाक्षी
वज्रदशनाखड्गजिह्वाभयानका अन्नंदेहीतिगृणाया आज्ञांदेहिमयोचितां १८ तयोक्तांगिरमाकर्ण्यादिदेशाज्ञांपुरंदरः ग
च्छत्वंसुभगेमर्त्यलोकेशीघ्रंममाज्ञया १९ दुंदुभेश्चमखंसायंकर्त्विग्भिःसहितंहन इतिप्रबोधितादेवैःसुभगाभूतलंय-
यौ २० मखंविध्वंसयामासहव्यंसर्वंमखादति हुतमन्नानिसायस्मात्तस्मात्सेयंहुताशनी २१ ऋत्विजोभिहताःसर्वेयज्ञ
पात्राणिखादति शुक्रोगृहीत्वाकेशेषुस्वयोन्यांस्थापितोबलात् २२ यत्रयत्रददर्शाथहव्यकव्यादिकाःक्रियाः तत्रतत्रच
सागत्वाविध्वंसमकरोद्बलात् २३ एवंयज्ञादिकंसर्ववर्जितंजगतीतले हताःकामदुघागावोयाज्ञिकाश्चैवबाडवाः २४ एवं
पर्यटमानाया भगाच्छुक्रोविनिःसृतः हुताशनीशशापेतिभगरूपाभविष्यसि २५ यथैवेंद्रःपुराशप्तोसहस्रभगसंवृतः
तथात्वंममशापेनभववैभगसंकुला २६ शुक्रशापेनसासद्योभगैश्चानेकशोयुता तथापिसावभौराजन्सहस्रभगमा-
लिनी २७ लोकेविख्यातिमायाताशुक्रंधर्तुंप्रधावति शुक्रोप्यंतर्दधेभीत्यातस्याश्चनिजमायया २८ शुक्रंनिरीक्षितुं
सापिबभ्रामपुरपत्तने भ्रमतीददृशेयंब्राह्मणंवानरोत्तम २९ तंतंभगेनिक्षिपतिशतयोजनविस्तृता एवंसर्वेद्विजश्रेष्ठा
राजानोन्येनरास्तथा ३० भगेषुसर्वेनिक्षिप्ताहाहाकारोह्यभूत्तदा विनाशंखेनतेशंखंकेवलेनमुखेनच ३१ करसंयोग
मात्रेणचक्रुःकोलाहलंतथा पलायनपराःसर्वेपृष्ठलग्नाभगांकिता ३२ एवंतेमुनयःसर्वेहोलिकाभयविह्वलाः नप-
श्यंतेन्यशरणंहिमवंतंगिरिंगताः ३३ विष्णुमुद्दिश्यतेसर्वेतपस्तप्तुंप्रचक्रमुः गतेषुकतिमासेषुतपसातेनचारुणा ३४
सुप्रसन्नोहिभगवानाविरासीत्ततोद्विजाः ततस्तेमुनयःसर्वेस्तुत्वानत्वायथाक्रमं ३५ निवेद्यसर्वंस्वंदुःखंपुरुषायम-
हात्मने पुरुषउवाच ज्ञानमेवास्तितत्सर्वंहोलिकायाःकृतंपरं ३६ शक्रेणनिर्मिताकोपात्तस्यैब्रह्मावरान्ददौ अव

ध्यासर्वभूतेषुयथेच्छसितथाकुरु ३७ अहमेवास्मिवरदोयदाशक्रेणशापिता तयासाकंययौशक्रः शयानंमांप्रबोध·
यत् ३८ वृत्तंनिवेदयामासतांदृष्ट्वाभगसंयुतां कृपयापरयाभक्त्यासांत्वयामाससादरं ३९ योनयः सर्वगात्रेषुसंजाताः
कविवाक्यतः ताःसर्वामत्स्वरूपाःस्युःविष्णुर्योनिरितिश्रुतिः ४० शिवप्रसादात्तेमुक्तिःख्यातालोकेभविष्यसि एत
स्मात्कारणाद्देवनाहंतांबाधितुंक्षमः ४१ यदाशिवःप्रसन्नोभूद्दुष्टदानवदर्पहा सर्वधर्मक्षयकरीतांक्षणाद्घातयिष्य
ति ४२ इतिविष्णुवचःश्रुत्वासर्वेतेभयविह्वलाः दैवंविचिंतयामासुरूचुश्चैवंपरस्परं ४३ सर्वेषांशरणंविष्णुर्दैत्यानाम
शनिःस्वयम् सोयमेवंविधंवक्तिअहोचित्राविधेर्गतिः ४४ ततस्तेमुनयःसर्वेकैलासंगिरिशालयं गत्वैवोग्रतपश्चक्रुः
शयनाहारवर्जिताः ४५ शिवंप्रपूजयामासूरसालकुसुमैःशुभैः नलेभिरेन्यपुष्पाणितस्मात्तैरेवनित्यदा ४६ एवं
पूजाजपैर्होमैस्तर्पणैर्ध्यानसंभ्रमैः शिवमाराधयामासुःस्तुतिस्तोत्रैरतंद्रिताः ४७ ततःप्रसन्नोभगवानाविरासी-
त्कृपानिधिः फाल्गुनस्यासितेपक्षेचतुर्दश्यांमहानिशि ४८ सर्वेषांपश्यतांतत्रऋषीणांविजितात्मनां करेदधानंप
रशुंमृगंचवरदाभयम् ४९ पंचवक्त्रंदशभुजंत्रिनेत्रंचंद्रशेखरम् मृडानीसहितंव्याघ्रगजचर्मविराजितं ५० विभूति
धवलशांतंरुंडमालाविराजितं भुजंगभूषणयुतंनीलकंठंत्रिशूलिनं ५१ एवंविधंशिवंदृष्ट्वातेतंस्तोतुंप्रचक्रमुः ऋ
षयऊचुः नमःशिवायशांतायनमस्तेलोकसाक्षिणे ५२ नमोभवायरुद्रायपशुपाशविमोचिने त्रिशूलधारिणेतु-
भ्यंनमःखट्वांगधारिणे ५३ कामारयेनमस्तुभ्यंभीषणायनिषंगिणे स्तुत्वैवंदेवदेवेशंकथयामासुरात्मनः दुःख-
स्यकारणंसर्वंहोलिकाजनितंपरं ५४ ततःप्रभृतिसारात्रिःशिवरात्रीतिविश्रुता शिवप्रीतिकरानित्यंत्रिषुलोकेषु·
सर्वदा ५५ तस्यांजागरणंशंभोःपूजनंचाभिषेचनं अर्पणंबिल्वपत्रस्यरुद्राध्यायस्यपाठनं ५६ तत्कथाश्रवणंसम्य
क्गुणाश्चशिवसंनिधौ चतुर्दश्यांविशेषेणआम्रपुष्पैःसुपूजनं ५७ येकुर्वंतिनरास्तेषांगेहेलक्ष्मीःस्थिराभवेत्

ज्ञानतोज्ञानतोवापिशिवरात्र्यामुपोषितः ५८ आम्रप्रसूनैर्योर्चेतसयातिपरमंपदम् अत्रतेकथयिष्यामिइतिहासंपुरातनं ५९ यस्यश्रवणमात्रेणसर्वपापैःप्रमुच्यते मिथिलायांपुराविप्रःसुधन्वानामविश्रुतः ६० अधर्मनिरतोनित्यंकेवर्तकुलपांसनः नितांतंमृगयासक्तोनूतनामिषभोजनः ६१ पुत्रदारैःपरित्यक्तोहिंसासंसक्तमानसः कदापर्युषितंमांसंनभुंक्तेदुर्मतिःखलः ६२ एवंप्रतिदिनेकुर्वन्हननंमृगपक्षिणां पानकेनसमायुक्तोबहुकालोव्यतिक्रमत् ६३ कदाचिद्दैवयोगेनमृगयायैवनंययौ नलब्ध्वाभ्रमतातेनमृगयूथंवनांतरे ६४ क्षुधयापीडितोजातोगतेस्तंतिग्मतेजासि नययौस्वगृहंतानरिक्तपाणिःक्षुधातुरः ६५ इतस्ततश्चविचरन्व्याघ्रमेकंददर्शसः क्षुधितंतरसायुक्तंधावमानंवनांतरे ६६ तेनापिधीवरोदृष्टोययौतावज्जिघांसया पलायनपरोजातस्तस्माज्जीवितुमक्षमः ६७ व्याघ्रोपिचययौपृष्ठेक्षुत्पिपासाकुलोभृशं नपश्यदन्यंशरणंतदायातोवनांतर ६८ भ्रममाणोघनेघोरेव्याघ्रभीत्यापुलिंदराट् ददर्शाम्रवनंतत्रआरुरोहाम्रपादपं ६९ पुष्पितंभ्रमरैर्जुष्टंशोभितंनवपल्लवैः तस्याम्रशाखामारुह्यजल्पन्शिवशिवेतिच ७० अहोकिमेतत्संजातंसर्वसत्वभयंकरं निराहारःस्थितोवृक्षेकथंजीवामिसांप्रतं ७१ व्याघ्रोपिधीवरंदृष्ट्वाचूतवासनिवासिनं अशक्तोवृक्षमारोढुंमूलमाश्रित्यसंस्थितः ७२ व्याधोपितंसमालोक्यनिषण्णंक्रूरनिःस्वनं गतोवानगतोवेतिमार्गमाणःप्रतिक्षणं ७३ संहतान्दृष्टिपथगान्पल्लवान्कुसुमान्वितान् उर्व्यांनिक्षेपयामासनरस्तेञ्छित्वामुहुर्मुहुः ७४ तत्रासीत्पिहितंलिंगंयत्पूज्यंबहुकालिकम् तत्रैवतानिसर्वाणिपतितानिद्विजर्षभाः ७५ पूर्वजन्मकृतैःपुण्यैर्योगोयंनात्रसंशयः पतितंकिमितिभ्रांत्याव्याघ्रोलिंगांतिकंययौ ७६ अत्रैवचूतशाखायांव्याधोभवतिनिश्चितं निद्रयाविह्वलीभूतःपतिष्यतिनसंशयः ७७ व्याधोपित्रोटयामासकुसुमानिपुनःपुनः शीतार्तःक्षुधयाव्याप्तःखिद्यन्जल्पन्शिवेतिच ७८ एवंजागरणंरात्रौउपवासादिपूजनं शिवलिंगस्य-

सान्निध्यंव्याघ्रधीवरयोःपरं जातंतपस्यप्रभावेणद्वयोश्चविमलामतिः ७९ एवंरात्रिमतिक्रम्यप्रभातेविमलेसति
चित्तेविचारयामासधीवरोविमलाशयः ८० जन्मतोहंमहापापीपापकर्मरतःसदा नमेस्कृतलेशोस्तिअतोमेकागति
र्भवेत् ८१ अतःपरंकरिष्यामिपुण्यंपरमदुर्लभम् व्याघ्रोयंवनिनांश्रेष्ठःक्षुधितोममयाचते ८२ अतोभवतुमद्गात्रेणपा
रणायैमृगद्विषः अयमेवपरोधर्मोनापरोममदृश्यते ८३ इतिसंचिंत्यमनसिवृक्षादवततारच गत्वाव्याघ्रांतिकंब्रह्म
न्प्रणम्यमधुरंवचः ८४ व्याधउवाच भोभोव्याघ्रमृगश्रेष्ठश्रमितोसिममातिथिः कुरुष्वपारणांशीघ्रंममदेहे
नमानद ८५ व्याघ्रोपिचिंतयामासशिवरात्रिप्रभावतः व्याधंसत्यवतांश्रेष्ठंकथंहन्मिचसांप्रत ८६ पूर्वकर्मविपाके
नजातोहंहिंसकःपरः अतोहंनकरिष्यामिहिंसांपरमनिंदितां ८७ प्रायश्चित्तंकरिष्यामिदेहत्यागेननान्यथा विचिं
तयन्नुवाचाथव्याधंधर्मभृतांवरं ८८ व्याघ्रउवाच गच्छस्वभवनंभद्रहनमांपापकारिणं. हतेमयिनदोषस्तेपरंपुण्य
मवाप्स्यसि ८९ नेक्षितस्त्वत्समोलोकेसर्वभूतदयापरः नाधमोमत्समोलोकेत्यतोमांमोचयप्रभो ९० अस्मात्कलेवरात्
साधोयदित्वंनैवमोक्ष्यसे प्रायोपवेशनेनैवत्वात्मानंमोचयाम्यहं ९१ पुनरप्याहतंव्याधःकिंमांवंचयसिप्रभो अनुप
योगिनानेनममदेहेनसांप्रतम् ९२ इत्युक्त्वाधोमुखोभूत्वापपातामिषपिंडवत् जातानुपुष्पवृष्टिश्चतयोर्विवदतोर्दिवः शै
वंविमानमप्यागात्स्वशैवगणसंयुतं ९३ त्यक्तदेहौतुतौभूत्वाविमानवरमाश्रितौ शिवरात्रिप्रभावेणशिवरूपौबभूवतुः
९४ गतौकैलासशिखरंशिवसायुज्यतांगतौ शिवरात्रिप्रभावेणत्वाम्रपुष्पैःप्रपूजनात् ९५ शिवेनप्रीतिभावेनशृंगिणस्तु
समौकृतौ सचंडइतिविख्यातःसर्वलोकेषुविश्रुतः विनाचंडेनयोमोहाच्छिवपूजनतत्परः ९६ सयातिनरकंघोरंयावच्चं
द्रार्कतारकाः यथावृषस्तथाचंडस्ताभ्यामेवप्रदक्षिणा ९७ सोमसूत्रीतिविख्याताशिवप्रीतिकरीसदा व्याघ्रस्यप्रीति
भावेननिकुंभइतिविश्रुतिं ९८ कृतवान्तस्यतच्चर्मपरिधानायकेवलम् शिवरात्रेश्चमाहात्म्यमाम्रपुष्पार्पणेफलम्

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

९९ इतिश्रीभविष्योत्तरपुराणे तपस्यमाहात्म्ये त्रयोविंशोऽध्यायः २३ ऋषयऊचुः कथंनाशितवान्शंभुर्हो-
लिकांजनपीडकां सूतउवाच ततस्तेमुनयःसर्वेस्कृत्वानत्वासदाशिवम् १ होलिकाचरितंसर्वंकथयामासकृतादरात्
देवकाचिन्महाघोराहोलिकानामविश्रुता २ अनेकभगसंयुक्तादिग्वस्त्राचभयानका तयाभूमंडलंसर्वंसर्वकर्मबहिष्कृ-
तं ३ नशक्तास्तद्वधेकोपिब्रह्मोपेंद्रादिनिर्जराः कथंतुमर्त्यलोकास्तेतदग्रेजीवितुंक्षमाः ४ राजानोराजपुत्राश्चयुद्धेधृत्वा
स्वयोनिषु भस्मत्वंप्रापितानूनंब्रह्मदत्तवरोद्धता ५ तयानिपीडिताःसर्वेवयंत्वांशरणंगताः त्राहिनोदेवदेवेशाविना
थास्त्वयिसंस्थिते ६ श्रीशिवउवाच ज्ञातंऋषिगणाःसर्वंतयायच्चरितंपरं अधुनानाशयिष्यामिहोलिकांवरगर्वि-
तां ७ इत्युक्त्वावृषमारुह्यत्रिनेत्रोहोलिकांतिकं ययौतस्याजपरस्कंहोलिकानिधनेच्छया ८ ततःसांतर्हिताजाताय
योहोलास्कररयात् उवाचतमहादैत्यंकन्याहृतवरक्षमां ९ अनपत्योथदनुजतथेतिप्रतिजज्ञिवान् तंशशापशिवः
कोपाद्विष्णुस्त्वांनाशयिष्यति १० सापिकन्याबृहन्नाम्नीहोलिकानामविश्रुता दत्तवान्पंचशीर्षायदानवायवराशि-
ने ११ साहोलिकाव्यवायेनुरतान्यैर्दैत्यबालकैः जातेबहुतिथेकालेकदातत्समयेस्करः १२ दृष्टवान्सोपितत्कर्मता-
डयामासतांस्त्रियम् ताडयित्वाबहुतरंखरमारोप्यहोलिकां १३ गोमयैस्ताडयामासससर्वैःपौरजनैःसह चतुष्पथभ-
वांधूलिंचवर्षमस्तकेतथा १४ करोष्टपुटजंशब्दंचक्रुस्तेमनुजान्नृप एवंविभत्संतस्यास्तुकारयित्वाजनैस्तदा १५ त्यक्त-
वान्समहारण्येययौनागरिकैर्गृहं होलास्करेणनकिंचित्नज्ञातंनरपुंगव १६ नययौसापितुर्गेहंलज्जयापरयावृता
नगस्याविवरेगुप्तावसत्तत्कमआचरत् १७ मार्गेयेपथिकायांतिपरस्त्रीपुरुषादयः बलात्तान्स्वगृहंनीत्वाइतिसाकृत्य-
माकरोत् १८ पुरुषेभ्यश्चसाभोगंस्त्रीणांभगविदारणं पशूनांभक्षणंनित्यंनित्यंचक्रेत्विदंत्रयम् १९ कदाचिद्दैवयोगे
नतेनमार्गेणचानघ अहमप्यागतोराजंतयादृष्टोययौचरन् २० अन्यजन्मार्जितेनैवसुकृतेनहिदर्शनं नूनंभवतिसा-

धूनांदर्शनात्गतकल्मषः २१ नरोभवानिचात्रास्तिप्रमाणंवेदशास्त्रयोः गंगातापंहरिःपापंदैन्यंकल्पतरुस्तथा २२ पापं-
तापंचदैन्यंचहंतिसाधुसमागमः सूतउवाच दर्शनान्नारदमुनेस्तस्यावैमुनिपुंगवाः २३ धर्मरतिस्तुसंजाताप्रणनाममु
निंविभुं उवाचवचनंदीनंहोलिकागतकल्मषा २४ होलिकोवाच भोमुनेऽद्यधुनामत्वंतारयस्वजगत्पते पातका
नामनेकानांपुंजोहंकेवलंमुने २५ एवंतयाबहुविधंस्तुतोदेवर्षिसत्तमः उवाचवचनंतांतुजातात्वमघवर्जिता: २६ गि
रेःपृष्ठेहिमवतोगच्छत्वंशिवमर्चय शिवपंचाक्षरींविद्यांदत्तवान्नारदोमुनिः २७ लब्ध्वातस्मात्परांविद्यांसाजगामहि-
माचलं नारदउवाच मयाकृतोपदेशासात्वकरोदुष्करंतपः २८ होलासुरोपित्रिदिवेभुक्त्वाभोगाननेकशः स्थित-
स्तावन्महाविष्णुस्तन्नाशोद्यममाकरोत् २९ द्वारस्थौविजयाख्यंचवेषंदत्वाऽसुरस्यच ऊचेत्वंगच्छदैत्याग्रेवक्तव्यंतसु
रांतकम् ३० किमास्तित्रिदिवेदैत्यवैकुंठंगच्छसांप्रतम् तत्रास्तिजलजादेवीरूपयौवनशालिनी ३१ हननतस्यास्तुभर्ता
रराज्यंकुरुतयासह एवमाज्ञाप्यतंदूतंप्रेषयामासदानवं ३२ क्षणाद्दूतोययौतूर्णंरथाद्धोलासुरांतिकं प्रणम्याविधि
वत्तस्मैउवाचमधुरंवचः ३३ इतिश्रीभविष्यपुराणेतपस्यमाहात्म्येचतुर्विंशोऽध्यायः २४ छ दूतउवाच

दैत्येश्वरमहाबाहोवैकुंठादागतोस्म्यहं पर्यटन्बहुलंदेशममरैस्त्वानिराकृतः १ अस्माकंकुलदीपस्त्वमतस्त्वांशर
णंगतः महाबलमहाबुद्धेवैकुंठेहरिवल्लभा २ वर्ततेब्धिसुतानाथविधिनापिनानिर्मिता नैवतादृक्क्वचिद्रूपंभूतंभ-
व्यंजगत्पते ३ तांविनातवनोभातिराज्यंत्रिभुवनस्यच सालक्ष्मीर्यदितेगेहेनास्तिदैत्येंद्रकुत्सिता ४ तावल्लक्ष्मीर्नवै-
भांतिनिःसत्वाइवजंतवः तदानिःकंटकंराज्यंयदासौनिहतोहरिः ५ तदातद्गिरमाकर्ण्यक्रोधप्रस्फुरिताधरः शिवव
चनंसस्मारकालचक्रेणमोहितः ६ उवाचवैष्णवंदूतंसदैत्योहर्षपूरितः दैत्यउवाच वैष्णवत्वंममगृहेवसदूतय-
थासुखम् ७ इतिविश्वास्यतंदूतंपंचवक्रंजगामह भोःपंचवक्रस्त्वबलैर्बहुभिःपरिवारितः ८ वैकुंठंगच्छसहसानि

हत्वजगदीश्वरम् आनयस्वजवात्पद्मामादेशान्मममानद ९ तस्यादेशात्पंचवक्त्रः स्वसेनांचतुरंगिणीं चकारसिद्धांवै-
कुंठसदूतस्त्वरयाययौ १० सदैत्यः सुकृतीमन्येसशरीरोपिगच्छति वैकुंठनिलयंराजन्गतास्फारिवदृश्यते ११ दृष्टवान्
रमयासार्द्धंभगवंतंजनार्दनं प्रोवाचउद्धतंराजन्त्यजएतादृशींस्त्रियं १२ यदिजीवितुमिच्छास्तितर्हिगच्छइतोद्रुतम्
दानवंकथयिष्यामिमयासानिहतोहरिः १३ नोचेत्त्वामधुनाहन्मिक्षणमात्रेणनिश्चितं श्रीभगवानुवाच हेलासु
रेणप्रहितोबलवान्बलसंयुतः १४ मांहत्वाजलजांनेतुमुद्यतः किंकरोमिते पंचवक्त्रोपिजलजांयावद्धर्षितुमुद्यतः १५
तावच्चक्रेणभगवानपातयततच्छिरः ततोहाहाकृतंसर्वंदैत्यसैन्यंदुरात्मनः १६ योद्धुमभ्याययौविष्णुंभिंडिपालै
श्चपट्टिशैः युगपत्सैनिकाः सर्वेववर्षुःशरसंहतीः १७ पक्षींद्रः क्षोभमापन्नःपातयामासदानवान् कांश्चिच्चंचुप्रहारेण
पक्षक्षेपैस्तथापरान् १८ नखैर्विदारयामासभक्षयामासचापरान् एवंतस्यबलंसर्वंपक्षिराजेनघातितं १९ केचित्पे
तुर्दिनिस्कनाययुर्होलाक्कारंद्रुतम् आचख्युर्दैत्यराजायजातयत्संगरेहरेः २० दैत्याऊचुः वयंत्वदाज्ञयादेवगताश्च
हरिसन्निधौ उक्तंत्वंगच्छभगवन्त्यक्त्वाएतादृशींस्त्रियम् २१ निशम्यतेनबलिनाचक्रेणनिहतोरुषा सगतासुःपपा
तोर्व्यांपंचवक्त्रोमहाबली २२ वयमप्यतिक्रुद्धास्तेयुगपद्धंतुमुद्यताः एतस्मिन्समयेस्वामिन्महापक्षीसमागतः २३
पक्षिणातेनहिबलं अस्माकंनिहतंक्षणात् अस्माभिस्तस्यपुरतःस्थातुंनाथनशक्यते २४ आज्ञादेहिगमिष्यामःस्व
स्थानंदानवोत्तम जामातुःपंचवक्त्रस्यनिःशेषस्यबलस्यच २५ श्रुत्वातास्यांचनिधनंसभूमौनिपपातह हावत्सहापंच
शिरःक्वगतोसिमयाविना २६ एवंशशोचबहुलंपुनर्भूमौपपातह इतिशोकातुरेदैत्येपुत्राःप्रकृतिभिर्युताः २७ ययु
श्चसांत्वयांचक्रुःशोकव्याप्तंमहासुरं चक्रुश्चशपथान्पुत्राःपितुरग्रेनरोत्तमाः २८ शोकंत्यजमहाबाहोहनिष्यामोहरिंक्ष
णात् पश्यास्माकंतुसामर्थ्यंसर्वलोकभयंकरं २९ अहत्वादुष्टचारितंहरिंदानवकंटकं यमाग्रेतुतवाग्रेवैव्रजामःपितृ-

हागतिं ३० इतिश्रीभविष्यपुराणेतपस्यमाहात्म्येपंचविंशोऽध्यायः २५ ६५ नारदउवाच एवंबहुविधं
पुत्रैःसामात्यैःसांत्वितःप्रभुः चकारकोपमतुलंजिघृक्षन्निवरोदसी १ चचर्वदशनैर्जिह्वांज्वालाव्याप्तदिगंतरः गृहीत्वा
पितुराज्ञांनेसिद्धांकृत्वास्वचाहिनीं २ विनद्यशंखनादोच्चैर्वादयामासकरानकान् अनेकानिचवाद्यानिविचित्राणिमहान्त्य
पि ३ दैत्यास्तेवादयामासुर्घोषव्याप्तदिगंतराः सघोषस्त्रिदिवंभित्वावैकुंठंचजगामह ४ भगवानपितांसेनांसन्नद्धां
चाकरोन्नृप निर्गतादानवास्तूर्णंत्वाजग्मुर्विष्णुसन्निधौ ५ ववर्षुःसायकांस्तीक्ष्णान्प्रावृट्कालेघनाइव केचिच्चचि-
क्षिपुःशक्तीर्भिंडिपालानथापरे ६ केचित्खड्गप्रहारैस्तुयुगपद्धंतुमुद्यताः तेषांप्रहारान्विविधान्निवार्यजगदीश्वरः
७ ववर्षस्वशरान्दिव्यान्तेत्रस्ताश्चमहासुराः केचिद्दूरादिशःपेतुःकेचिन्निपतिताभुवि ८ पलायमानंस्वबलंवि-
लोक्यामर्षमुद्वहन् होलस्यज्येष्ठस्तत्तनुजोययौयुद्धायतंहरिं ९ हरिस्तुक्रोधमापन्नस्तद्वक्त्रान्निर्गतःपुमान् पिंगाक्षो
मूर्तिधवलःसाक्षात्छिवइवापरः १० वृहद्रथंददौतस्यभगवान्जगदीश्वरः ययौसदानवंयोद्धुंबलवीर्यमदोद्धतं ११
अभवत्प्रथमंयुद्धंमुनिविस्मयकारकं विव्याधपंचबाणैस्तुदानवंदेवकंटकं १२ एकेनमुकुटंछिन्नोहतानश्वाश्चवाःप
रेणच चिच्छेदैकेनचध्वजमपरेणापिसारथिम् १३ कार्मुकंछेदयामासकरस्थंदानवस्यच सच्छिन्नधन्वाविरथोहताश्वो
हतसारथिः १४ गदांगृहीत्वावेगेनक्षिप्तातस्यरथोपरि गदापातेनदैत्यस्यरथःसारथिनासह १५ गतस्तुचूर्णतांनू-
नमभवन्यावैष्णवोपतत् अग्निदग्धोभवत्खड्गःसकोशस्तत्क्षतांव्रजन् १६ नदासवैष्णवःशूरोत्यातिक्रुद्धोबभूवह
गदांचिच्छेदतद्धस्तात्कुठारेणतदाबली १७ गदांहिभिन्नामालोक्ययोजयामासतोमरं कुठारंछेदयामाससत्रिशूलंचज
गृहे १८ त्रिशूलेनहतोदैत्यःपपातधरणीतले गतासुश्छिन्नभिन्नश्चज्ञात्वातस्यानुजोबली १९ वीरसेनोमहाक्रूरः २७

+ नवाग्रेहरिंश्चहत्वा यदिव्रजामस्तर्हि यमाग्रेपितृहागतिंव्रजामः इत्यन्वयः पितृघ्नः अगतिं दुर्गतिं

कोपादरुणलोचनः शुशोचसक्षणंदैत्योययौयुद्धायसत्वरः २० तिष्ठतिष्ठेतिप्रलपन्ययौतस्यांतिकंरथात् त्रीन्शरान्योजयामाससत्रिशूलंचजगृहे २१ त्रिशूलेनहतोदैत्योपपातधरणीतले गतासुश्छिन्नभिन्नश्चज्ञात्वातस्यानुजोबली २२ पुनःप्रापमहावीर्यश्वेतनामात्तकार्मुकः स्वर्णपुंखंकृतांतस्यशरंदूतमिवस्थितं २३ योजयामासचतुरोनत्वाश्रीजगदीश्वरम् क्षणद्युतिसमोबाणोनलक्ष्योदानवेनच २४ जवाज्जहारतच्छीर्षंसर्वेषांपश्यतांनृप पपातधरणीपृष्ठेवज्राहतइवाचलः २५ ततोहाहाकृतंसर्वंदैत्यसैन्यंदिशोदश निर्गतंचैत्यशक्तास्तेसैनिकावैष्णवंप्रति २६ होलंनिवेदयामासुःपुत्रसंहननादिकं श्रुत्वाशुशोचनिपतन्कराभ्यांताडयन्महीम् २७ मूर्छामवाप्यमहूर्तात्सावधानःक्षणादभूत् सुमतिःप्रकृतिश्रेष्ठोययौतस्यांतिकंरथात् २८ पुनश्चकारहिपणंयेनस्वानिधनंभवेत् सिद्धांचकारमहतीम्स्वसेनांचतुरंगिणीम् २९ एकादशाक्षौहिणीकामध्येभातिमहासुरः ययौवैकुंठभुवनंमृत्युनाकर्षितोयथा ३० ददर्शपुंडरीकाक्षंववर्षशतसायकान् ययौसवैष्णवःतूर्णंकुठारेणाहिचिच्छिदे ३१ स्वर्णपुंखंशरंत्यक्त्वाछेदयामासकार्मुकं छिन्नधन्वाबलीदैत्योधनुरादायचापरं ३२ स्वशरंयोजयामासपरस्यप्राणहारकं वैष्णवोन्यपतद्भूमौवज्राहतइवाचलः ३३ तंदृष्ट्वापक्षिराड्योद्धुंनिर्ययौदानवंरथात् पक्षीचंचूप्रहारेणचूर्णयामासतद्रथम् ३४ धनुश्चिच्छेदनखरैःपक्षपातैर्महारथान् छिन्नधन्वाहताश्वश्चविरथोहतसारथिः ३५ बाहुयुद्धेनयुयुधेतेनोग्रैरनिचारिणा बलिनातेनदैत्येनपक्षिराजस्यपक्षकाः ३६ उत्पाटयित्वासहसानिक्षिप्तागिरिकंदरे मुहूर्ताद्वैष्णवःप्राप्यचेतनामात्तकार्मुकः ३७ ययौयुद्धायतंदैत्यंदीपाग्नौशलभोयथा गदायुद्धंपुनस्तेनकृतवान्दनुजेश्वरः ३८ बाहुयुद्धंचकृतवान्देवविस्मयकारकम् पद्भ्यामादायतंदैत्यंत्यक्तवान्वायुमंडले ३९ एवंसुरबलंतेननिहतंदानवेनच तंदृष्ट्वानिर्ययौयोद्धुंस्वयंश्रीजगदीश्वरः ४० युयुधेतेनदैत्येनवर्षाणामयुतंनृप दैत्योयदाप्यवध्योभूत्तदासजगदीश्वरः ४१ निर्मायमहतींमायांवैष्णवींलोकमोहिनीं

हरिरूपाद्यनेकाश्चसर्वतः पुरुष स्थिताः ४२ तदाभवद्व्याकुलात्मासंपश्यन् सर्वतोहरिं शरान्ववर्षुः सर्वेतेनसमर्थौनि
वारितुं ४३ तदाचक्रेणाविच्छेदाशिरस्तस्यनराधिप होलिकायचन्यवसत्तपस्तत्तुस्कंदारुणं ४४ अंजलौन्यपतत्तस्या
दानवस्यशिरोनृप ध्यानंविसृज्यसाकन्याज्ञात्वाशीर्षंपितुस्तदा ४५ शुशोचकरुणंदीनाहातातक्वगतोसिमां दीनां-
त्यक्त्वात्र महतीशोकदावेस्मरांतक ४६ देवासुराणांनिर्जेताघातितः केनसांप्रतं एवंविलप्यबहुलंशोकव्याकुलमानसा
४७ पपातधरणीपृष्ठेवज्राहतइवाचलः गतामूर्छांमुहूर्त्तेनमनस्येवंविचारयत् ४८ येनमेनिहतस्तात तंहनिष्यामि
सांप्रतं करेगृहीत्वातच्छीर्षंययावन्वेषतीसती ४९ पितरस्त्वपतिंभ्रातॄनूगतासूनवलोकयत् तेषामग्रेहरिंदृष्ट्वादेवता-
परिचारितं ५० गंधर्वैस्तूयमानंचशक्राद्यैश्चनमस्कृतं एवमानंदमग्नंतंदृष्ट्वानादंचकारह ५१ तेननादेनसंत्रस्ताःशक्रा
द्यादेवतागणाः पेलुर्दशदिशोभीतानकेचिदवशेषिताः ५२ हरिमेकाकिनंज्ञात्वारूपंदध्रेस्कविस्तृतं हरिंभक्षितुमुद्युक्ता
यावत्साभिमुखंययौ ५३ हरिः कौमोदकींतावत्क्षिप्तवांस्तन्निरोधने आगतांतद्गदांज्ञात्वामुखेसाजगृहेरयात् ५४
मुखेगृहीतापिगदावेगाद्दिव्यानराधिप निनायपृष्ठतोवेगाच्छतयोजनमायतं ५५ पुनर्ययौहोलिकापिगृहीत्वाताल
पादपं चिक्षेपवेगात्तंरक्षांविष्णुमूर्धनिकोपतः ५६ ताबच्चक्रेणवैच्छित्वापातयामासभूतले पुनःसाजगृहेस्थूलानुपला
न्गिरिसंभवान् ५७ ववर्षभगवन्मूर्ध्निगिरिशृंगेयथाघनः न्यवारयद्वैचक्रेणभगवान्जगदीश्वरः ५८ एवंसमभवद्यु-
द्धंदिव्यवर्षसहस्रकं हरिहोलिकयोस्तत्रत्यद्भुतंनृपसत्तम ५९ त्रस्तास्तेखेचरास्तत्रपेलुःसर्वादिशोदश अद्भुतंहिमहद्यु
द्धंवरदानप्रभावतः ६० इतिश्रीभविष्यपुराणेतपस्यमाहात्म्येषाड्विंशोध्यायः २६ ध्र नारदउवाच एवंबहुति
थंकालंकृतयुद्धंतयासह चक्रप्रहाराभिहतांपातयामासभूतले १ तदासस्मारसाहोलाह्यात्मनःकुलदैवतं त्रिभूति २८
धवलंशांतमक्षमालाधरंविभुम् २ भोःसांबशिवशर्वेतिउच्चैःशब्दंप्रकुर्वती तदाकर्ण्यहरिःसोपिकरुणापूर्णमानसः

३ यथातयास्मृतश्चित्तेतद्रूसोभूच्छिवःस्वयं शिवस्यहृदयंविष्णुर्विष्णोश्चहृदयंशिवः ४ तयोर्नभेदःकिंचिद्वैभेदवु
द्धिर्विनश्यति श्रीभगवानुवाच नेत्रेउन्मीलयाशुत्वंभद्रेस्मरासित्वहं ५ स्वयंशिवोहंवैसाक्षादागतस्त्वच्चिंतना
त् एवंतद्गिरमाकर्ण्यहोलिकाविस्मयंगता ६ उन्मील्यनेत्रेसहसापश्यतिस्मशिवंस्वयं उत्थातुंनैवशक्तासाप्रणनाम-
मुहुर्मुहुः ७ उवाचकरुणंदीनाहोलिकादीनवत्सलं नाथनाथकृपासिंधोत्राहिमांशरणागतां ८ मामुद्धरविरूपाक्षकृ
पानाथविभूषण एवंस्तुत्वातुतंशर्वंतूष्णीमासचहोलिका ९ नारदउवाच चक्रेणच्छिन्नगात्रांतांहस्ताभ्यांभक्तवत्सलः
अंकमारोप्यवेगेनमार्जयामासतन्मुखं १० उवाचकरुणासिंधुर्होलिकांदीनवत्सलः शिवउवाच वरंयाचयभद्रंतेहोलि
केहोलकन्यके ११ तपसाचरितेनैवविक्रमेणतथापिच तुष्टोहंतवदास्यामियथाभिलषितंध्रुवम् १२ होलिकोवाच
यदितुष्टोसिदेवेशजगदीशजगत्पते मयापूर्वंतुयत्सर्वंकृतंकर्मसुदुष्करं १३ व्यभिचारात्मकंसर्वंतेनाप्याचरितेनवै त
दाप्रभृतिलोकेस्मिन्वाममार्गस्यभूषणं १४ कुर्वंतियेनरालोकेस्थिरामातेषुसर्वदा भर्गाकृतेनचैवास्तुमुक्तिरस्तुमम-
प्रभो १५ श्रीशिवउवाच यथामनसिकल्याणिवर्ततेतत्तथाखलु भविष्यतिनसंदेहोममवाक्येनसर्वथा १६ नार
दउवाच एवंलब्ध्वावरंतस्मात्त्याजराक्षसींतनुं देवतारूपमास्थायशिवसांनिध्यमभ्यगात् १७ तस्याःकलेवरंशंभुः
क्षिप्तवान्वैहुताशने तद्भस्मत्वेषुगात्रेषुलेपंकृत्वापरेहनि १८ पूर्णमास्यांफाल्गुनस्यप्रदोषेभगवान्हरे· ददाहहोलिकां·
देहंशुभाभिर्नरपुंगव १९ तदाप्रभृतिलोकेस्मिन्होलिकाव्रतमुत्तमम् आविर्भूतंनरश्रेष्ठविश्वस्यसुखदायकं २० मुन
यऊचुः साधुसाधुमहाभागहोलिकायाव्रतंशुभम् उक्तंचतद्विधिंब्रूहिकृपांकृत्वाजगद्धितं २१ सूतउवाच माघ
स्यपौर्णमास्यांस्तुयावत्फाल्गुनपौर्णिमा तदाग्रामाधिपतिनामीलयित्वाजनैःसमं २२ शुभानांचैवदारूणांकार्यंचौर्यंनिशा
सुच व्यभिचारोपिकर्तव्योहोलिकाप्रीतयेतदा २३ करपृष्ठोश्जनिताभगस्मरणपूर्वका मासेमुहुःप्रकर्तव्यागर्जनाहो

लिकामुदे २४ एवंकृत्वापौर्णमास्यांप्रदोषेनरपुंगव पुराद्बहिर्नृपतिनापौराश्चस्वगृहाद्बहिः २५ संमार्जनंकारयित्वालेपनंचततःपरं स्वस्तिकानिविचित्राणिकृत्वापौरैस्ततः २६ शुभाभिरभितस्थाय दारुभिश्चोरकर्मणा तस्योपरिचितांकृत्वा वर्तुलांसुमनोहरां २७ ग्रामाधिपतिनाकार्यापुरद्वारमितानृप गृहाधिपतिनाकार्यागृहद्वारप्रमाणिका २८ शक्त्यभावेस्वमानाच्चतदर्धार्धाभिशक्तितः शक्तौशाठ्यंनकर्तव्यमन्यथाहुतभुग्भयं २९ तस्मात्सर्वप्रयत्नेनहोलिकांरचयेच्छुभां होलिकाप्रतिमांकृत्वास्वर्णाद्याराजतीतथा ३० तस्याअभावेताम्रमयींवित्तशाठ्यंनकारयेत् पूजयेत्प्रतिमांतत्रचितायांनिक्षिपेत्ततः ३१ एरंडैरिक्षुदंडैश्चकारयेद्भूषितांनृप प्रत्यब्दंपूर्णिमास्यांतुतपस्येकारयेत्सुधीः ३२ इतिश्रीभविष्यपुराणेतपस्यमाहात्म्येसप्तविंशोऽध्यायः २७ ॐ पृथुरुवाच पूजनंकेनमंत्रेणकर्तव्यंमुनिपुंगव तत्सर्वंममव्याचक्ष्वकृपांकृत्वाजनोपरि १ नारदउवाच स्नानंकृत्वानदीतीरेहोलिकासन्निधिंव्रजेत् उपविश्यासनेविद्वान्देशकालौतुसंस्मरेत् २ आत्मनःसर्वकामार्थसिद्ध्येश्रीविवृद्धये अग्निबाधानिरासार्थंहोलिकाप्रीतयेतथा ३ वार्षिकंचपूजनंकुर्वेयथावैगोमयाचले तेनमेहोलिकादेवीप्रीयतांशुभदायिनी ४ सप्तहस्ताचतुःशृंगासप्तजिह्वाद्विशीर्षका त्रिपदान्हस्वचदनांसुखासीनांशुचिस्मितां ५ मेषारूढांजटाबद्धांजिह्वाललनभीषणा तप्तकाञ्चनसंकाशांहोलिकांहृदिचिंतये ६ ध्यानं आगच्छदेविकल्याणिवृषारूढेजगन्मये यावत्पूजासमाप्येततावत्त्वंसन्निधौभव ७ आवाहनं आसनंहेमसंयुक्तंस्थापितंतेपुरःशुभम् स्वीकुरुष्वमहाकालीहुताशनिनमोस्तुते ८ आसनं अग्निरूपधरेतुभ्यंनमस्तेविश्वरूपिणी होलिकेदेविकल्याणिपाद्यंगृह्णनमोस्तुते ९ पाद्यं अक्षतापुष्पसंयुक्तंपूगीफलसमन्वितं अर्घ्यंगृहाणदेवेशीहुताशनिनमोस्तुते १० अर्घ्यं कमंडलुस्थताम्भंचशीतलोदकपूरितं आचम्यदेवदेवेशिप्रीत्यर्थंप्रतिगृह्यतां ११ आचमनीयं पंचामृतंमयानीतं॰ पंचामृतस्नानं॰ गंगासरस्वतीकृष्णारेवाता

पीपयोष्णिकाः ताभ्यःस्नानार्थमानीतंगृहाणविमलंजलं १२ स्नानं प्रसीदद्देवदेवेशिप्रसीदकरुणानिधे नमस्तेऽब्रह्मरूपिण्यै वस्त्रयुग्मंगृहाणभोः १३ वस्त्रं० हरिद्राकुंकुमंचैव० हरिद्राकुंकुमं० श्रीखंडचंदनंदिव्यं० चंदनं० अक्षताश्चसुरश्रेष्ठे० अक्षतान् मल्लिकाशतपत्राणिजातीपुष्पाणिचैवहि पंचकंबिल्वसंयुक्तंपुष्पंगृण्हनमोस्तुते १४ पुष्पं० वनस्पतिरसोद्भूतो० धूपं० साज्यंचवर्ति० दीपं० अपूपंघृतसंयुक्तंनानाभक्ष्यसमन्वितं नैवेद्यंतेमयादत्तंगृहाणपरमेश्वरि १५ नैवेद्यं० इदंफलंमया० फलं० पूगीफलंमहत्० पूगीफलं० हिरण्यगर्भ० दक्षिणा० नीराजनदीप नमस्तेदेविकल्याणिनमस्तेकरुणानिधे नमस्तेहोलिकेदेविरुद्रस्यप्रियवादिनि १६ मंत्रपुष्पं० होलिकेहोलतनयेपूजांस्वीकुरुमेशुभे स्वस्थानंगच्छभवतिरक्षमामग्निजाद्भयात् १७ गुडोद्भवान्वर्त्तिकाश्चगृहाणपरमेश्वरी वर्त्तिकोत्थानमेबाधाभवतुत्वत्प्रसादतः १८ पश्चात्प्रदक्षिणांकुर्यात्होलिकायैसमंततः करपृष्ठोष्ठसंयुक्तोभगस्मरणपूर्वकः १९ उच्चैर्नादःप्रकर्तव्यःस्वस्वशक्त्यनुसारतः होलिकाप्रीतयेतत्रविप्राणांपूजनंस्मृतं २० भूयसींदक्षिणांदद्याद्विप्राणांभोजनंतथा भोजनंतुसुवासिन्यैहरिद्राकुंकुमंतथा २१ एवंपूजाविधिःप्रोक्तोहुताशिन्यानरोत्तम एवंकृतेनभवतिनराणामग्निजंभयम् २२ बहुसौख्यमवाप्नोतिशिवसायुज्यमाप्नुयात् तत्रजागरणंकार्यंसर्वैर्नागरिकैःसमं २३ महान्कोलाहलःकार्योभगःस्मरणपूर्वकः २४ इतिश्रीभविष्यपुराणेतपस्यमा० अष्टाविंशोऽध्यायः २८ छ नारदउवाच एवंकृत्वापौर्णमास्यांविधिंराजन्प्रयत्नतः प्रातःस्नानंतुविधिवत्कृत्वाचोत्तरपूजनं १ कारयेद्विधिवत्तस्यततोभस्माभिमंत्रणं होलिकेत्वंमहामायेवाममार्गप्रदेशिवे २ तवांगभस्मसंस्पर्शात्पापंगच्छतुमेसदा एवंसंप्रार्थ्यमनसाअष्टांगेविनियोजयेत् ३ पुनर्भस्मगृहीत्वावैपादांगुष्ठाच्छिरःप्रति लेपयेत्तुप्रयत्नेनसर्वरोगोपशांतये ४ मूर्तिंहस्तमितेवस्त्रेजीर्णेवंशयुतांवहेत् तस्मिन्ग्रंथिद्वयंकृत्वामणिबंधंतुबध्नीयात् ५ ग्रामनाथंपुरस्कृत्यवाद्यघोषसमन्वितं प्रतिगेहंततोगच्छेन्न

त्रस्यान्बालकान्मुदा ६ चतुष्पथंसमानीयक्षुद्रदुंदुभिवादनं जययंत्रैर्वैणवैश्चतथाचर्मोद्भवैरपि ७ परस्परंततोभस्मनिक्षि-
पेन्मस्तकोपरि जलयंत्रैस्तथासिंचेद्गीतहास्यविनोदतः ८ मार्गेदृष्टान्जनान्कार्यसक्तानानीययत्नतः तेषामुपरिभस्मांबुनि-
क्षिपेद्धास्यपूर्वकं ९ एवंसर्वजनैःसार्द्धंग्रामनाथःसमाचरेत् ततोगच्छेत्पुरद्वारेनानाकौतूहलान्वितः १० परस्परंततोयुद्धंल
पयेद्बुद्धिपूर्वकम् ततोमध्यान्हसमयेजलक्रीडांसमारभेत् ११ ततोमाध्यान्हिकंकुर्याद्गोपीगीतंपठेत्ततः गोविंदोगोपीना
थश्चगोपालोगोधनप्रियः १२ गोनारिपदद्दाताचगोवर्द्धनधरोहरिः गोपीचंदनलिप्तांगोभक्तसंसिद्धिदायकः १३ गीतापाठर
तानंददायकोगोधनप्रियः द्वादशैतानिनामानियःपठेच्छृणुयादपि १४ तस्यवित्तर्द्धिविभवैर्धनदारादिसंपदः भवंत्येव-
नसंदेहोयःपठेत्सततंनरः १५ विद्याकामोभवेद्विद्वान्धनार्थीधनमाप्नुयात् पुत्रार्थीलभतेपुत्रंयशोर्थीलभतेयशः १६
कन्यार्थीचाप्नुयात्कन्यांदारार्थीचाप्नुयात्स्त्रियं सहस्रावर्तनान्मर्त्योलभतेवांछितंफलम् १७ लिखित्वापुस्तकंचास्य
पूजयेद्योनिरंतरं नाग्निचोरभयंतत्रविष्णुभक्तिस्थिराभवेत् १८ अयुतावर्तनान्मर्त्योराजानंवशमानयेत् भूर्जपत्रेलिखित्वे
दंत्वष्टगंधैर्विग्रहे १९ भूतप्रेतपिशाचादिबाधातत्रनजायते बहुनात्रकिमुक्तेनभुक्तिंमुक्तिंसविंदति २० एवंस्तोत्रंपठि
त्वातुपुनःस्नानंसमाचरेत् ततोमाध्यान्हिकंकृत्वास्वस्ववेश्मनिचव्रजेत् २१ देवतापूजनंकृत्वाभोजनंद्विजसाक्षिकं कद
न्नेनैवभक्षेनततस्तांबूलचर्वणं २२ एवंहिफाल्गुनेमासिद्वितीयदिवसेव्रतं नकरोतिनरोमूढोरौरवंनरकंव्रजेत् २३ तस्मिन्
दिनेनगंतव्यंकेनापिकुत्रचित्क्वचित् यदिगच्छतिचेन्मर्त्योमृत्युमाप्नोतिनिश्चितं २४ नारदोक्तमितिश्रुत्वाराजावचनमब्रवीत्
यद्मेकृपयाब्रह्मन्कोमृतस्तद्दिनेगतः २५ एनंमेसंशयंछिंधिसर्वज्ञोसिमहामते नारदउवाच आसीद्बंगालविषयेनगरं
दुर्मदाभिधं २६ तस्मिन्राजाशूरसेनःप्रजापालनतत्परः दानशूरोवदान्यश्चशत्रुसंहारकारकः २७ तस्यपत्नीसुशीले
तिरूपौदार्यगुणान्विता तस्यपुत्रोमंदबुद्धिर्विरूपइतिविश्रुतः २८ प्रधानास्तस्यचत्वारोनीतिशास्त्रविशारदाः एवंराजाव-

हृदिनंतैर्युक्तः पालयन्प्रजाः २९ तस्मिन्शासतिभूचक्रेजनोनंदयुतोभवत् पूर्णिमायांपूजयित्वाहोलिकामपरेहनि
गृहाद्बहिर्निर्गतस्तुविरूपोनिधनंगतः ३० इतिश्रीभविष्यपुराणेतपस्यमाहात्म्येएकोनत्रिंशोध्यायः २९ ६२
पृथुरुवाच किमर्थंकस्यदाहेतोःकार्यार्थंकुत्रवागतः विरूपोपिकुतोब्रह्मन्निषिद्धदिवसेगतः १ नारदउवाच
अहंतेकथयिष्यामिविरूपस्यकथानकं शृणुष्वावहितोराजन्हितायजगतोपिच २ शूरसेनस्यवैराज्ञः कदाचिच्छ
त्रवोभवन् आंध्रकर्नाटसौराष्ट्रराजानोमिलिताययुः ३ तानागतान्समाकर्ण्यविरूपस्तुसमादिशत् गणका-
स्तुसमाहूयसमुहूर्तंव्यचारयत् ४ नृपस्यासितपक्षेतुनंदायामविलंबितम् आहुस्तेगणकाराजन्नाद्यैवराज
सत्तम ५ विजयोभवितानूनंनात्रकार्याविचारणा तत्रैकोगणकोधीमान्राजानंवाक्यमब्रवीत् ६ अयंमुहूर्तो-
भोराजन्नतेदत्तोमयानहि यदिस्वकल्याणमिच्छुस्तर्हिमेवचनंशृणु ७ पुरातुजाह्नवीतीरेराजासीद्दालवाभिधः त
स्यदुर्व्यसनंचासीन्मृगयायांनराधिप ८ कदाचिद्दैवयोगेनराजादुर्घटकर्मणा तपस्यासितपक्षेतुनंदायांमृगयांग
तः ९ बहुसैन्यसमायुक्तोमृगयोपस्करैर्वृतः ग्रामसिंहैःसमायुक्तोत्यग्निशस्त्रधरैस्तथा १० चतुरंगचमूमध्येशु
शुभेसमहीपतिः वनंप्रविश्यगहनंमृगान्हत्वात्यनेकशः ११ तरक्षून्गवयान्व्याघ्रान्रुरून्सिंहाननेकशः हतान्
हतान्मृगान्राजास्वग्रामेप्रेषयत्तदा १२ अष्टापदंनाममृगंमृत्युदूतमिवास्थितं निकटेदृष्टवान्राजातंहंतुसमनोद
धे १३ अष्टापदस्तुराजानंतरसाहतवान्बली अष्टापदहतंभूपंदृष्ट्वातेसैनिकाःक्षणात् १४ पलायनपराजाता
श्चतुरंगबलंमहत् दशदिक्षुततोराजन्भयभीतमभूत्तदा १५ ततोऽमात्याःसर्वसैन्यमिलित्वानगरंययुः वृत्तांतरा
जपुत्रायकथयामासुरंजसा १६ पितुःक्रियांततश्चक्रेराजपुत्रोतिभक्तितः शोकंकृत्वाराजपत्नीपतिनास्वर्गतिंय-
यौ १७ वृद्धगणकउवाच एतस्मात्कारणाद्राजन्नगंतव्यंकदाचन इतिद्विजस्यवचनंश्रुत्वासंशयमागतः १८

पुत्रमाहूयतद्वाक्यंश्रावयामाससादरं दुराग्रहीविरूपोसौनिर्भर्त्स्योद्विजपुंगवम् १९ सर्वेमूढास्त्वमेकोसिसुज्ञः किंचि
दसेखलु अतःपरंमावदत्वंगच्छस्वभवनंप्रति २० विप्रावमानिनंपुत्रंराजावचनमब्रवीत् तोविरूपंनगच्छस्वहंतुंशत्रु
ममाज्ञया २१ द्विजनिर्भर्त्सनामेवंमाकुरुष्वकथंचन गतश्रीर्गणकान्द्वेष्टिगतायुश्चचिकित्सकान् २२ गतश्रीश्च·
गतायुश्चब्राह्मणान्द्वेष्टिपुत्रक पितुर्वचनमाकर्ण्यविरूपोभ्यवदत्तदा २३ अहमद्यैवगच्छामिकृत्वाशत्रुवधंपुनः
आगमिष्यामिराजेंद्रपश्यमेपौरुषंमहत् २४ ततोप्येनंद्विजंराष्ट्राद्बहिर्निष्काशयाम्यहम् एवंप्रवादिनंपुत्रंराजावच
नमब्रवीत् २५ ब्राह्मणस्यावमानात्तेजयोनैवभविष्यति एवंब्रुवंतंराजानंविरूपोभ्यवदत्खलः २६ नवापिबुद्धिनाशो·
स्तिवयसोतिक्रमान्नृप अहंत्वद्यैवगच्छामिशत्रून्हंतुंनसंशयः २७ विरूपस्यवचःश्रुत्वातूष्णीमासनृपस्तदा स
ज्यसैन्योमहावीरान्निग्रहीतुंरणाययौ २८ कृत्वातुतुमुलंपश्चात्पंचत्वमगमत्ततः एतस्मात्कारणाद्राजन्सावर्ज्योस
र्वजंतुभिः २९ इतिश्रीभविष्यपुराणफाल्गुनमाहात्म्येत्रिंशोऽध्यायः ३० छ पृथुरुवाच पुनस्त्वंवदविप्रें
द्रतपस्योपव्रतानिच तपस्यासितपक्षेयानंदानामापिकीर्तय १ नारदउवाच वदामितवराजेंद्रसर्वमेतदशेषतः
फाल्गुनस्यासितेपक्षेप्रतिपत्कारिसंयुता २ पातादिदोषादधिकागमनेवर्जयेत्सदा ३ तपस्यासितपक्षेतुकार्यंहिव्रतपं
चकम् धूलिव्रतंतुकथितंपूर्वमेवनराधिप ४ तस्याकरणदोषास्तुकथ्यंतेवैमयाधुना विभूतिलेपनाभावात्कुष्ठरोगो
भिजायते ५ पुनर्जन्मनिराजेंद्रगार्दभीयोनिमाविशन् एतदर्थंमहाराजकथांपौराणिकींशृणु ६ रेवातीरेपुराकश्चिद्व
णिकोवैश्यवर्णजः सुदर्शनोनामराजन्सर्वविद्याविशारदः ७ पंचयज्ञरतोनित्यंदेवतातिथिपूजकः अध्यात्मविद्या·
निरतःसर्वयत्नपरायणः ८ तेनज्ञानमदांधेनतपस्येमासिसुव्रत पूर्णिमांप्राप्यराजेंद्रहोलिकापूजनंनृप ९ नकृतं
चोपहासोक्त्याधूलिकाव्रतपंचकं करपृष्ठोष्ठसंयोगध्वनिर्नैवकृतस्तथा १० रात्रौजागरणंचापिनकृतंमंदबुद्धिना ते

नास्यसकलंवित्तंगृहदारादिकंतथा ११ नष्टंतुहोलिकाक्षोभात्परंदारिद्र्यमाप्तवान् तदादुःखवशाद्वैश्योगृहंत्यक्त्वा
वनंगतः १२ वनाद्वनांतरंगच्छन्मुनेराश्रममाविशत् गालवस्यतुराजेंद्रपर्णकुट्यांसमाविशत् १३ पादौप्रगृह्यसमु
नेर्दंडवत्प्रणनामसः ध्यानंविसृज्यसमुनिःपुरतस्तमपश्यत १४ पृष्ठवान्समुनिःपश्चात्कोभवान्कुतआगतः
एवंपृष्टस्तुमुनिनावैश्योवचनमब्रवीत् १५ माहिष्मतीनामपुरीरेवातीरसुभूषिता तत्रस्थोहंधनीवैश्यःसुदर्शनइति
स्मृतः १६ कदाचिद्दैवयोगेननष्टंबहुधनंमम सदाचाररतोनित्यंसत्यधर्मपरायणः १७ सर्वव्रतकरश्चाहंब्रह्मविद्याक
रस्तथा इदानींकेनदोषेणदारिद्र्यंसमुपागतं १८ देहेकुष्ठसमुत्पत्तिर्जातामेमुनिसत्तम कुत्रापिनलभेशर्ममनसो
भ्रमएवच १९ जातस्तदानींतुममउपायाबहवःकृताः कुष्ठादिरोगनाशार्थंतथादारिद्र्यशांतये २० उपायानिष्फला
विप्रजातामेदैवयोगतः तदामयागृहंत्यक्तमरणंसमुपागतः २१ दारिद्र्यरोगभीत्यातुमरणंचिंतयाम्यहं व्याघ्रादि
हिंसकाःसर्वेमांनहिंसंतिभोमुने २२ इदानींत्वत्सकाशेहंप्राप्तोस्मिकरुणाबुधे अत्रापिमहदाश्चर्यंमयादृष्टंतवाश्रमे
२३ सिंहव्याघ्राश्चतरसागजागावःसरीसृपाः बिडालानकुलाश्चैवमूषकामंडुकास्तथा २४ क्रीडंतित्यक्तवैराश्चौर
साबांधवायथा प्रमोदंगमिताःसर्वेत्वहंदुःखीतवाग्रतः २५ एतस्यकारणंब्रह्मन्कृपयावदाधुना एवंवैश्यवचःश्रुत्वा
ध्यानस्तिमितलोचनः २६ गालवोविस्मयाविष्टोवैश्यंवचनमब्रवीत् त्वयाज्ञानमदांधेनतपस्येव्रतपंचकम् २७ नकृतं
हेलयातेनदारिद्र्यंपतितंत्वयि कुष्ठादिरोगसंभूतिर्देहेजातातथाधुना २८ एवमुक्त्वागालवस्तुतूष्णीमासनृपोत्तम
२९ इतिश्रीभविष्यपुराणेफाल्गुनमाहात्म्येएकत्रिंशोऽध्यायः ३१ ६९ नारदउवाच श्रुत्वातुवाक्यंमुनि
पुंगवस्यसुदर्शनोत्तीवस्मयान्वितोभूत् पप्रच्छदारिद्र्यविनाशकृत्परंभूयोमुनिंक्लेशविनाशहेतवे १ सुदर्शनउ
वाच महाराज ऋषिश्रेष्ठसर्वकल्याणसाधक दारिद्र्यरोगनाशार्थंहोलिकाक्षोभशांतये २ ब्रूहिमेपरमेशान

त्सुपायंक्लेशनाशनं कथितवान् वैश्यनंदनेप्युक्तोदेहशुद्धयर्थमेव च ३ सर्वपापविनाशायप्रायश्चित्तंपृथक्पृथ
भोः पूर्वजन्मनियत्पापंव्याधिरूपेणदृश्यते ४ यथादारिद्र्यरूपेणदृश्यतेभवतांतथा रुक्मदर्शनउवाच प्रायश्चि-
त्तंदिशमुनेदेहशुद्धयर्थमेव च ५ कृतेनयेनदारिद्र्यंलयंकुष्ठगदोव्रजेत् गालवउवाच शृणुतापससमायुक्तःपु
र्वंभूयात्ततःपरम् ६ वेदशास्त्ररतान्साधून्कामलोभविवर्जितान् निर्मत्सरान्निर्हिंसान्शुद्धान्विष्णुभक्तिपुरस्कृ-
तान् ७ महाभागवतान्शांतान्विष्णुमुद्रांकितांस्तथा दृष्ट्वाचार्यान्वैश्यपतेविचारयवदांतिते ८ वैश्यउवा
च वैष्णवानांलक्षणंमेकथयत्वंमुनेऽधुना तानहंशरणंगच्छेप्रायश्चित्तार्थमेव च ९ गालवउवाच विष्णुकीर्ति
येसततंपठंतिहरेर्गुणान्कर्णपुटैःपिबंति कुर्वंतिनित्यंतुलसीदलैर्येकुर्वंतिपूजांसततंहिविष्णोः १० रुक्मदर्शनउवा
च ब्रूहिमेभगवन्विष्णोःस्तुतिंपापहरांपराम् गालवउवाच ॐनमोभगवतेतुभ्यंविष्णवेप्रभविष्णवे अ-
हंत्वांशरणंयामिपापमेनुदसर्वदा ज्ञानप्रदायमोक्षादिदात्रेतुभ्यंनमोनमः १२ भूयान्मनःकृष्णपदारविंदेजिह्वाच
तेदिव्यकथानुवर्णने नेत्रेममात्वत्प्रतिमेक्षणेसदाश्रोत्रेकथायांतुपदेस्तुतीर्थे १३ घ्राणंतुतत्पादसरोजसौरभेतद्भक्त
गंधादिविलेपनेत्वक् स्यातांचहस्तौतवमंदिरेविभोसंमार्जनादौममनित्यदेव १४ वाणीतवाद्भुतकथागुणराजितास्या
न्मूर्धाचमेस्यात्तववंदनेऽनिशं कामश्चमेस्यात्तवसत्कथायांबुद्धिश्चमेस्यात्तववेदनेऽनिशं १५ दिनानिमेस्युस्त
वसत्कथोद्यैरुद्गीयमानैर्मुनिभिर्गृहागतैः हीनप्रसंगस्तुनमेभवेत्क्षणंकदानिमेषार्धमथापिविष्णो १६ नपारमे-
ष्ठ्यंनचसार्वभौमंनचापवर्गंस्पृहयामिविष्णो त्वत्पादसेवांचसदैवकामयेप्रार्थ्यांश्रियाब्रह्मभवादिभिःसुरैः १७
हेकृष्णविष्णोमधुकैटभारेब्रह्मादिभिर्वंदितवंदनीय संसारकूपेपतितंस्मरेशकरावलंबंजगदीशदेहि १८ संसा
रसर्पदष्टंमांविषयौघविषाविलं विषान्मोचयमानाथसंजीवयकृपांबुधे १९ गुणाधीशगुणातीतगुणत्रयवि

वर्जित भवपोतकृपापूरगुणाभावनतेनमः २० निर्मायनिरहंकारभक्तानांमुक्तिदायक शेषशायिन्रमानाथनवा-
हंशरणंगतः २१ उपेंद्रमत्स्यकूर्मादिव्यवतारप्रवर्तक स्वमायानिर्जितजनत्वाहंशरणंगतः २२ प्रह्लादभक्तवच
नात्त्वंभाविर्भूतभूतिद हिरण्यकशिपोर्हंतस्त्वाहंशरणागतः २३ पापोहंपापकर्माहंपापात्मापापसंभवः त्राहि-
मांपापशमनत्वाहंशरणंगतः २४ ममापराधोनास्त्येवृत्वाहमितिवादिनः शरणागतसंत्यागात्पापंतवभविष्यति
२५ हृदिस्थितोसिसर्वेषांबुद्धिदातात्वमेवच सद्बुद्धिंदेहिमेविष्णोपापद्रुमकुठारक २६ पापदावाग्निमध्येहं प-
नितोस्मिजनार्दन पाहिमांकरुणासिंधोदासानांहितकारक २७ अनेकजन्मनिमयायत्कृतदुरितंविभो तत्वनाश
यदेवेशशरणंतेगतोस्म्यहम् २८ एवंस्तुवंतियेनित्यंविद्धितान्वैष्णवान्शुभान् अंतर्निष्ठारतान्विद्धि इतरेदांभि
काःस्मृताः २९ नारदउवाच येपठंतिस्तवंनित्यंवैष्णवावैष्णवाश्चापि उभयोश्चोभयंप्राप्यंऐहिकामुष्मिकंसु
खम् ३० सकामोलभतेभोगान्निष्कामोमोक्षमाप्नुयात् शैवाःसौराश्चगाणेशाःशाक्ताश्चापिनराधिप ३१ आर्ता
जिज्ञासवोभक्ताज्ञानिनोर्थार्थकामुकाः चतुर्विधाःस्वकीयानिफलानिविविधानिच ३२ लभंतेतानिराजेंद्रभक्तियु
क्तानसंशयः तस्माद्भक्तिंपरांविद्धिपुमर्थपरिसाधने ३३ इतिश्रीभविष्यपुराणेतपस्यमाहात्म्येद्वात्रिंशोऽध्या
यः ३२ ६७ नारदउवाच सकृद्दर्शनगालवस्तत्पुनःप्रोवाचभूपते गच्छत्वंवैष्णवान्वैश्यप्रायश्चित्तविधिंकुरु
१ तेनकृत्वादेहशुद्धिंकुरुष्वव्रतपंचकं ममावकाशोनास्त्यत्रतपश्चर्यांतरादिह २ श्रुत्वागालववाक्यंतुवैश्योगाद्वै-
ष्णवान्प्रति तेभ्यःस्वकीयाचरणंश्रावयित्वासकृद्दर्शनः ३ शुद्ध्यर्थंप्रार्थयत्तेहिब्रूयुस्तंनिष्कृतिंपरां विप्राज्ञयातदा-
चक्रेप्रायश्चित्तविधिंतथा ४ तपस्यपंचकंचापिगतोदारिद्र्यकुष्ठकौ इहभुक्त्वाखिलान्भोगान्पुत्रपौत्रसमन्वितः
५ कीर्तिंचविपुलांप्राप्यविष्णोःसायुज्यतांगतः नारदउवाच अयंतेकथितोराजन्नितिहासःपुरातनः ६ एनंसंकीर्त

येग्निस्यंशृणुयाद्वासमाहितः दारिद्र्यकुष्टरोगादिनाशोभवातितत्क्षणात् ७ एतस्मात्कारणाद्राजन्सर्वंजपव्रतादिकं
कार्यमात्महितंयद्व्रतपस्यव्रतपंचकम् ८ पृथुरुवाच सर्वव्रतेभ्यस्तपसस्तपस्येपंचकंहितं यत्वयोक्तद्विजश्रेष्टतन्मेवि
स्तारतोवद ९ नारदउवाच फाल्गुनेपौर्णमास्यांतुकार्यमग्निव्रतंद्विजैः विधिंतस्यप्रवक्ष्यामिशृणुष्वावहितोनृप १० अ
ग्निमूर्तिंपुराध्यायेन्माम्नातुवरदांशुभाम् तांमूर्तिंहोलिकादेविद्वारदेशेक्षिपेततः ११ उपचारैःषोडशभिःपूजयित्वा
व्रतीपुनः तिष्ठेद्यावच्चार्धदेहोहोलिकायास्तुप्रज्वलेत् १२ प्रदक्षिणात्रयंकृत्वापरिवारयुतस्तथा करपृष्ठोष्टजनिता
न्शब्दानुच्चांस्तुकारयेत् १३ रात्रौजागरणंकुर्याद्भगोच्चारणगायनैः एवमग्निव्रतंकार्यमादित्यस्योदयावधि १४ शूद्रैस्त
थावर्णबाह्यैः कार्यमग्निव्रतंनृप ततःकार्यंप्रयत्नेनद्वितीयदिवसेजनैः १५ भस्मव्रतंभूतिकरंविधिंतुप्रवदामिते सू
र्योदयेसमुत्थायप्रणमेच्चदिवाकरं १६ होलिकायाश्चितादेशमागत्यजलकुंभकैः दुग्धकुंभैस्तथाराजन्भस्मधूलिंतु
सेचयेत् १७ तद्भस्मसर्वगात्रेषुलेपयेन्मंत्रपूर्वकं होलिकादेहसंभूतसर्वभूतविनाशन १८ मदीयदेहजान्रोगान्भ
स्मनाशयनाशय इतिमंत्रंसमुच्चार्यशिखामारभ्यपादतः १९ एवंभस्मव्रतंकार्यंसर्वैरपिजनैःसदा तृतीयदिवसे
राजन्धूलिकाव्रतमाचरेत् २० होलिकाभूमिसंभूतांधूलिंगृह्यस्वशक्तितः तथाचतुष्पथगतांखरैःखुरविदारिताम्
२१ प्रगृह्योत्साहसंयुक्तैरन्योन्यंशिरसिक्षिपेत् क्षुद्रदुंदुभिशब्दाश्चमुरवशब्दास्तथैवच २२ एवंधूलिव्रतंराजन्चतुर्ये
गोमयव्रतं विधिंतस्यप्रवक्ष्यामिमाहिषीणांगवामपि २३ खरोष्ट्रगर्दभानांचपुरीषगृह्ययत्नतः अंगानिलेपयि
त्वातुमुरवशब्दपुरःसरं २४ एवंव्रतंगोमयस्यचत्वारिपंचमेहनि कर्दमस्यव्रतंकार्यंविधिंतस्यवदामिते २५ गोमूत्रोद्भव
पंकंतुप्रगृह्यनृपसत्तम तथास्वमहिषीमूत्रखराजामूत्रसंयुतां २६ मृदंप्रगृह्यएतस्मिन्स्थानेऐक्यंतुकारयेत् तेन
सर्वैस्तुसर्वांगेलेपयेदुत्सवान्वितैः २७ करपृष्ठोष्ठशब्दांश्चक्षुद्रदुंदुभिनिःस्वनान् भगोच्चारणपूर्वंतुकारयेद्धिपुनःपुनः

२८ एवंव्रतानांपंचानांविधिस्तेपरिकीर्तितः पंचाह्निकोयंयज्ञस्तेकथितोराजसत्तम २९ यज्ञेत्ववभृथस्नानंप्रोच्य
तेतेमयाधुना विधिंतस्यापिराजेंद्रविस्तरेणवदामिते ३० ग्रामाद्बहिः पूर्वदिशिदक्षिणेपश्चिमोत्तरे चतुर्णांतुदि
शांमध्येयादिक्समतराभवेत् ३१ दिशितस्यांवापिकांतुकारयेद्यथाविधि तस्यामवभृथस्नानंकार्यंसर्वजनैः
सदा ३२ व्रतपंचकसाफल्यंतेनसंजायतेनृप ३३ इतिश्रीभवि॰ फाल्गुनमा॰ त्रयस्त्रिंशोऽध्यायः ३३ ७
पृथुरुवाच यात्वयाकथितावापीकीदृशीसावदस्वमे नारदउवाच वाप्याःस्वरूपंवक्ष्यामिश्रवणात्पापनाशनं
१ अष्टास्रांचतुरस्रांवाषडस्रांवान्नृपोत्तम विस्तारतश्चतुर्हस्तांगंभीरांतावतीमपि २ चर्मयंत्रोद्धृतजलैःपूरयि
त्वाप्रयत्नतः तन्मध्येनिक्षिपेन्मृत्स्नांनानास्थानगतांनृप ३ अश्वशालास्थितांचैवगजशालास्थितांतथा निक्षि
प्यतस्यांसततंपूजयेत्तांप्रयत्नतः ४ षोडशैरुपचारैस्तुमधिशोद्विजपूर्वकं इमंमंत्रंसमुच्चार्यस्नानसंकल्पपूर्वकं
५ सर्वतीर्थोत्तमात्वंहिस्फोटकादिभयापहे तपस्येतापसजनैर्वंदितासिनमोस्तुते ६ करपृष्टोष्ट्रसंयुक्तान्भा
गस्मरणपूर्वकान् कारयेद्धिविधान्शब्दान्एवमावभृथंचरेत् ७ कृतेत्ववभृथेराजन्पंचकंसफलंभवेत् अकृ
त्वावभृथस्नानंदेहरोगसमुद्भवः ८ भवत्येवनृराजेंद्र कृतेतुव्रतपंचके अत्रतेकथयिष्यामि इतिहासंपुरातनम्
९ पुराचर्मण्वतीतीरेनगरंरुद्राह्वयं तत्रासीद्ब्राह्मणःकश्चित्सोमदत्तइतिश्रुतः १० धनवान्ज्ञानसंपन्नोवेद
शास्त्रार्थतत्त्ववित् भार्यारूपवतीतस्यचित्तज्ञातन्मनोहरा ११ सुशीलशीलनामानौद्वौपुत्रौतस्यसुव्रतौ विद्वांसौता
वपिउभावेकचित्तौजनप्रियौ १२ कदाचित्फाल्गुनेमासिहोलिकायामहोत्सवं सर्वेजनाःप्रकुर्वंतोयथाविधिनृपो
त्तम १३ पुत्राभ्यांसोमदत्तेनहोलिकापंचकव्रतं यथाविधिकृतंराजन्तदानींदैवयोगतः १४ देहज्वरसमुत्पत्तिःसो
मदत्तस्यचाभवत् ततोवभृथवेलायांस्नानार्थंमीलिताजनाः १५ आगताःसोमदत्तस्यगृहेतेव्रतिनोजनाः एहिए

हीतिजल्पंतोभगोच्चारणपूर्वकं १६ करपृष्ठोष्ठसंयोगात्कुर्वंतोविविधान्रवान् तेषांकोलाहलंश्रुत्वासोमदत्तोज्वरा
न्वितः १७ तैसार्द्धंनोजगामाथज्वरितोस्मीतिचावदत् तेतदावभृथस्नानंकर्तुंतत्पुत्रसंयुताः १८ गतास्तदातीर्थ-
तटेमंत्रपूर्वंमज्जचक्रमुः समाप्यावभृथस्नानंगतोमासस्तुफाल्गुनः १९ तन्मासाभ्यंतरेराजन्सोमदत्तोभगान्वितः रोमे
रोमेस्फोटकाश्चसंजाताबहवस्तथा २० तस्योपशमनार्थायउपायाबहवःकृताः तथापिस्फोटशमनंनैवजातंनृपोत्त
म २१ रोगोपशमनार्थायदेवताराधनंकृतं तथापिरोगनाशस्तुनैवजातःकथंचन २२ तदात्रासंसमापन्नोगृहंत्यक्त्वा
वनंगतः वनाद्वनांतरंगच्छन्वसिष्ठस्याश्रमंययौ २३ साष्टांगंप्रणनामाथतथैवपतितोह्यभूत् ध्यानंविसृज्यब्रह्मर्षि
र्नेत्रेउन्मील्यदृष्टवान् २४ सोमदत्तमुवाचाथवसिष्ठःकरुणान्वितः किमर्थमागतस्त्वंहिदशामेतांकुतोगतः २५ एवंपृ
ष्टोवसिष्ठेनसोमदत्तोब्रवीत्तदा ब्रह्मन्रोगाभिभूतोहंत्वत्सकाशमिहागतः २६ इहजन्मनिपूर्वेवायत्कृतंदुष्कृतंमया
तेनमेरोगसंप्राप्तिःसंजाताबहुदुःखदा २७ तद्दुष्कृतंनजानामितदर्थमिहचागतः त्वंतुसर्वंविजानासिउपायंदुष्कृतं
तथा २८ मह्यंकथयविप्रेंद्रपापरोगविनाशनं उपायमितिसंश्रुत्यवसिष्ठस्त्विदमब्रवीत् २९ वसिष्ठउवाच जनैःस
र्वैःप्रार्थितेनत्वयात्यज्ञानतःकृतः पंचकावभृथस्नानस्त्यागस्तेनेदृशीगतिः जाताहितवविप्रेंद्रतस्योपायमतःशृणु
३० इतिश्रीभ॰विष्यपुराणेतपस्यमा॰चतुस्त्रिंशोऽध्यायः ३४ छ पृथुरुवाच कउपायोमुनेतेनकथितस्तंच
मेवद नारदउवाच सोमदत्तंवसिष्ठस्तुप्रोवाचवचनंतदा १ फाल्गुनस्यासितेपक्षेचतुर्थ्यांगणनायकं पूजयस्वार्क-
पुष्पैश्चशमीदूर्वांकुरैस्तथा २ कृत्वामूर्तिंगणेशस्यस्वर्णारौप्यमयींतथा अथवामृन्मयींकुर्याद्वित्तशाठ्यंनकारयेत्
३ उपचारैःषोडशभिः पूजयित्वागजाननं एकैकनाममंत्रेणह्युपचारान्समर्पयेत् ४ प्रथमंगणनाथायनामानिक
थयाम्यहम् भक्तसंकटनाशायमहाविघ्नौघनाशिने ५ विघ्नारण्यकुठारायगजवक्त्रायतेनमः सुमुखोदुर्मुखश्चैव-

विकटोविघ्ननाशनः ६ अमोघसिद्धिरमृतोभक्तचिंताहरःकविः ब्रह्मांडमंडपस्तंभःशुंडादंडविराजितः ७ ब्रह्माविष्णुमहेशानामधिकारप्रदःशिवः योगिहृत्पद्मवासायतुभ्यंनित्यंनमोनमः ८ मोदकापूपलड्डुकैःपक्वान्नैर्विविधैरपि पायसैःपंचखाद्यैश्चनैवेद्यंतुसमर्पयेत् ९ ततोदूर्वांकुरान्गृह्यएकविंशतिसंख्यया एकैकनाम्नाएकैकामस्तकेतुसमर्पयेत् १० ज्ञानप्रदोज्ञानगम्योज्ञानदोज्ञाननाशकः ज्ञानदीपप्रकाशेनयोगिहृत्पद्मवासकृत् ११ ज्ञानामृतप्रदश्चैवभक्तानांभक्तिवर्धनः मुक्तानांमुक्तिदश्चैवसिद्धानांसिद्धिदःस्मृतः १२ साधकानांसाधकश्चरसज्ञानांरसप्रदः प्रत्यवायसमेतानांप्रत्यवायहरस्तथा १३ दीनानांदैन्यहरणोबद्धानांमुक्तिदःस्मृतः चतुर्वेदविदाचार्यश्चतुर्वर्गफलप्रदः १४ पंचकावभृथस्नानस्यागिस्नानफलप्रदः ततोनीराजनंकुर्यान्मंत्रपुष्पंनिवेदयेत् १५ प्रदक्षिणानमस्कारान्कृत्वापूजांपुनःपठेत् विविधानिचस्तोत्राणिमनुमेकाक्षरंजपेत् १६ एवंचतुर्थीव्रतकंएकविंशतिसंख्यया भक्त्यात्वयानुकर्तव्यंकार्यसिद्धिर्भविष्यति १७ एतद्धिपरमंगोप्यंप्रीत्यातेकथितंमया त्वयानुयस्यकस्यापिवक्तव्यंनकदाचन १८ भक्तिहीनायदुष्टायवंचकायशठायच परदोषप्रवक्त्रेचनवक्तव्यंकदाचन १९ एवमुक्तोवसिष्ठेनसोमदत्तस्तदानृप प्रदक्षिणीकृत्यगुरुंप्राणिपत्यगृहंययौ २० पश्चाद्विचार्यसिद्ध्यर्थंक्षेत्रंकिंक्षिप्रसिद्धिदं विचार्यसर्वक्षेत्राणिमृत्युलोकगतानिच २१ तेभ्योधिकतरंक्षेत्रमविमुक्तंययौततः ढुंढिराजस्यनिकटेव्रतंचक्रेमुनीरितम् २२ यथोक्तंमुनिनातेनतुष्टोभूद्विघ्ननाशकः सोमदत्तस्यपुरतःस्वरूपंप्रकटीकरोत् २३ चतुर्भुजंशूर्पकर्णंशुंडादंडविराजितं कोटिसूर्यप्रतीकाशंकोटिचंद्रांशुनिर्मलं २४ एवंविधंतदारूपंदृष्ट्वासोविस्मयान्वितः तुष्टावपरयाभक्त्यागद्यपद्यैरनेकशः २५ बद्धांजलिःपुरस्तिष्ठन्निदमुच्चैर्जगादह व्रतत्यागीमदन्योनदुराचारीतथैवच २६ सापराधोपिशरणमिदानींतेसमागतः बहुनात्रकिमुक्तेनयदिच्छसितथाकुरु २७ एवंस्तुतस्तदादेवःसोमदत्तेनधीमता वरंब्रूहिवरंब्रूहिवरंब्रूहीतिचाब्रवीत् २८ इतिदेवस्यवाक्यांतेसोमदत्तोब्रवीत्त

दा सर्वेषांत्वद्भूतस्त्वंहित्वद्भूतंवोसियानवा २९ वरंब्रूहिकिमर्थंमांयांचयायोजायिष्यासि ततोदेवोऽब्रवीद्विप्रंपूर्णंतेस्तुवांछितं ३० इत्युक्त्वागणनाथोपितत्रैवांतरधीयत सोमदत्तोदोषमुक्तःस्वगृहंप्रत्यपद्यत ३१ भगंदरःकुष्टरोगोद्यान्येदेहसमुद्भवाः तेसर्वेसोमदत्तस्यदेहात्स्वस्थानमाऽभवन् ३२ नारदउवाच एतस्मात्कारणाद्राजन्हीनांगेनव्रतंचरेत् व्रतेंगहीनेविहितेहीनांगोजायतेनरः ३३ तस्मात्सांगव्रतंकुर्यात्सोमदत्तोयथान्यथा ३४ इतिश्रीभ॰ पु॰ तपस्यमा॰ पंचत्रिंशोऽध्यायः ३५ छ सूतउवाच इतिहासमिमंश्रुत्वापुनःप्रोवाचभूपतिः ब्रूहिनारदभक्तायफाल्गुनस्यकथामृतम् १ नारदउवाच अतःपरंतुराजेंद्रकथयामिकथांतरं फाल्गुनस्यासितेपक्षेषष्ठ्यांकुर्याद्दशान्हिकं २ व्रतंकार्यंतुसर्वैश्चस्वस्वशक्त्यनुसारतः गाणेशैश्चापिशैवैश्चसौरैःशाक्तैश्चवैष्णवैः ३ गणेशभक्तैःसततंप्रत्यहंविप्रतर्पणं मोदकापूपलड्डुकैरेकविंशतिसंख्यया ४ कर्तव्यंतुतथाशैवैःपूर्त्यर्थंविप्रतर्पणं पक्वान्नैर्विविधैश्चैवरात्रौपूजाशिवस्यच ५ पूर्वोक्तविधिनाकार्यंबिल्वपत्रार्पणंतथा पंचाक्षरिमंत्रजपोध्यात्वादेवंचनामभिः ६ नामानिकथयिष्यामिमंत्ररूपाणिशृणुत विरूपाक्षःशंकरश्चस्वयंभूर्मृत्युनाशनः ७ गंगाधरोनीलकंठोद्विजराजविभूषणः त्रिनेत्रोभूतनाथश्चपिनाकीवृषवाहनः ८ विशेषार्घ्यंततोदद्याद्देवशाक्तैश्चपूजनं कार्यंपूर्वोक्तविधिनात्रिसंध्यांमंत्रपूर्वकं ९ सौभाग्यद्रव्याभरणैश्चंपकाशोकपुष्पकैः सततंपूजयेद्देवींततोमंत्रजपःस्मृतः १० नमोदेव्यैमहादेव्यैशिवायैसततंनमः नमःप्रकृत्यैभद्रायैनियताःप्रणताःस्मता ११ जयंतीमंगलाकालीभद्रकालीकपालिनी दुर्गाक्षमाशिवाधात्रीस्वाहास्वधानमोस्तुते १२ एतयोक्तजपःकार्योह्यष्टोत्तरशतंनृप पूजाकांडोक्तविधिनासर्वांपूजांतुकारयेत् १३ त्रयोदशेभ्योविप्रेभ्योदीयतांवायनानिच तावन्मितान्ब्राह्मणांस्तुपक्वान्नैर्भोजयेन्नृप १४ पीतचंपकपुष्पाणित्रयोदशतुनामभिः समर्पयेज्जगन्मात्रेनामानिकथयाम्यहं १५ विद्याप्रदाविभवदाविश्वमंगलकारिणी करुणापूर्णहृदयाशारदाभक्तव-

त्सला १६ एवंशाक्तैः शक्तिपूजाकार्याभक्त्यानराधिप एवंसौरैः सूर्यपूजाकार्याभक्त्यातुपूर्ववत् १७ विशेषमन्त्रवस्त्या·
मिमंत्रतंत्रविधानतः अष्टचत्वारिंशतिकानर्घ्यान्दद्यात्तुमंत्रतः १८ एहिसूर्यसहस्रांशोतेजोराशिजगत्पते करवीरैर्द्वाद
शभिर्भक्त्यासूर्यंप्रपूजयेत् १९ तावद्भिस्तैर्नामभिस्तुनामानिकथयाम्यहं मित्रोरविस्तथासूर्योभानुरादित्यएवच २०
प्रभाकरस्तिमिरहादिक्पतिश्चविभावसुः लोकचक्षुःकर्मसाक्षीसर्वधर्मप्रवर्तकः २१ एतैस्तुनामभिःसूर्यंपूजयेत्सा
धकोत्तमः ब्राह्मणान्भोजयेत्पश्चात्संख्ययाद्वादशोत्तमान् २२ तिलतंडुलसंमिश्रैः पक्वान्नैर्विविधैरपि ततोमंत्रजपं·
कुर्याद्दष्टार्णंभक्तितत्परः २३ अतःपरंवैष्णवैस्तुपूजनंभक्तिपूर्वकं पूर्वोक्तविधिनाकार्यंविशेषस्तत्रचोच्यते २४ पंचा·
मृतैःपूजयित्वाकोमलैस्तुलसीदलैः चतुर्विंशैर्नामभिस्तुप्रणवाद्यैर्नमोंतकैः २५ भक्त्यासमर्पयेद्राजन्नामानिकथया
मिते केशवायनमस्तुभ्यंनमोनारायणायच २६ माधवायनमस्तुभ्यंगोविंदायनमोनमः विष्णवेचनमस्तुभ्यंमधु
सूदनवामन २७ त्रिविक्रमहृषीकेशदेवकीनंदवर्धन रथांगपाणेलोकेशसर्वहृक्वासवानुज २८ विश्वकर्ताविश्व
भोक्ताविश्वात्माविश्ववर्धनः त्रिलोकेशोभक्तिगम्योकर्ताहर्ताजगत्पतिः २९ सामगानरतःसौम्यःसर्वप्रहरणायुधः
एवंविष्णुंपूजयित्वाब्राह्मणान्भोजयेत्ततः ३० परमान्नैस्तुपक्वान्नैश्चतुर्विंशतिसंख्यया एवंविष्णुव्रतंकुर्याद्भवेत्पूर्ण
मनोरथाः ३१ व्रतांतेपंचभिश्चापिरात्रौजागरणंनृप यथोक्तविधिनाकार्यंविधिंतेकथयाम्यहम् ३२ इतिश्रीभ०पु०
तपस्यमा० षट्त्रिंशोऽध्यायः ३६ ६७ पृथुरुवाच येनयेनप्रकर्तव्यंयथाजागरणंमुने तंविधिंश्रोतुमिच्छा
मित्वत्तोब्रह्मविदांवर १ नारदउवाच गणेशभक्तैःकर्तव्यंगणेशस्तवकीर्तनैः स्वस्वदेवस्यवेषाणांधारिणोनट
नर्तकान् २ संपूजयेच्चवस्त्राद्यैर्भूषणैर्विविधैरपि पंचानांनैचभेदोस्तिभेदबुद्धिःपतत्यधः ३ एतस्मात्कारणात्सर्वै·
र्विष्णोश्चैवानुकीर्तनैः अवतारचरित्राणिरूपाणिविविधानिच ४ मत्स्यःकूर्मोवराहश्चनारसिंहोथवामनः जा·

मदग्न्यस्तथारामोहलधारीतथैवच ५ बौद्धःकल्कीदशैवैतेकृष्णस्तुभगवान्स्वयं एतेषामवताराणांयेयेस्युरूपधारिणः ६ पुरुषास्तांस्तुपश्येतयतोविष्णुमयंजगत् दैवतैःपंचभिर्विष्णोःस्वरूपंकथ्यतेबुधैः ७ अतःसर्वैरपिजनैःकर्तव्यंविष्णुपूजनम् रात्रौजागरणंकार्यंस्वस्वोपासनयाजनैः ८ विलोकनीयास्तद्वेषानटान्नृत्यंविलोकयेत् दिवातुपूजयेत्कृष्णंराधयासहितंनृप ९ माहात्म्यश्रवणंकार्यंफाल्गुनस्यातिभक्तितः माहात्म्यश्रवणेनैवपुराणोक्तफलंलभेत् १० विनोदोत्थनृतंचौर्यंफलकाष्ठतृणादिनां तत्सर्वंविलयंयातिपुराणश्रवणादिना ११ हुताशिन्याःसमुद्दिश्ययदानीतंगृहेजनैः ब्राह्मणैःसहभोक्तव्यमुद्दिश्यचैवहोलिकां १२ ज्ञानतोऽज्ञानतोवापिचौर्येणापहृतंजनैः पंचकेतैर्नभोक्तव्यंभुक्त्वादुःखमवाप्नुयात् १३ पंचकेतुप्रकर्तव्यंगीतहास्यविनोदनं नटनाट्यैश्चविविधैःकुशब्दैरेवसर्वशः १४ अवताराद्विचरितंनटेभ्यःकारयेद्बुधः एवंनिशामतिक्रम्यप्रभातेविमलेसति १५ तद्भस्मलेपनंकार्यंसर्वैर्नागरिकैर्जनैः सिंचनंपयसाकार्यंतथापंचामृतेनच १६ ततस्तुश्वपचंस्पृष्ट्वातैलाभ्यंगंसमाचरेत् तैलाभ्यंगमकुर्वाणोनरकंप्रतिपद्यते १७ गोमयेनोपलिप्याथस्नानंसाकंसमाचरेत् एवंकृतेनसंदेहःकलिजित्वंभविष्यसि १८ नारदोक्तंवचःश्रुत्वापृथुःपरमहर्षितः संपूज्यनारदंभक्त्याजग्मतुस्तौयथागतं १९ पृथुर्नारदवाक्येनचकारव्रतमुत्तमं एतद्व्रतप्रभावेणकलिदोषंसुदारुणम् २० निर्धूयसकलंराज्यमकरोद्वसुधातले सर्वशोकविनिर्मुक्तोऽस्यचापपरमंसुखम् २१ एवमेवप्रकर्तव्यंशूद्रविट्क्षत्रियैर्द्विजैः अन्यथादुःखभागीस्याद्दरदानाच्छिवस्यच २२ अत्रार्थेकथयिष्यामिइतिहासंपुरातनं पुरामगधदेशेषुमागधोनामभूपतिः २३ तस्यभार्याविशालासीत्सर्वदाकलहप्रिया नभर्तृसेवनंचक्रेनशृणोतितदीरितं २४ तदात्वन्यांचोपयेमेसापिवैतादृशीभवत् नाशृणोद्भर्तृवचनंनचक्रेसेवनंपतेः २५ एवंदुःखाभिभूतस्यपुत्रहीनस्यभूपतेः नासीत्पुत्रोनेकयत्नैःस्त्रीभ्यांविरहितोऽभवत् २६ चकारभो

गपत्नीभ्यस्ताभिःक्रीडतिनित्यशः तत्रापिदुःखंसंप्राप्तंयांचसंभुक्तवान्पृथक् २७ शत्रुभिश्चहृतंराज्यंमंत्रिभिश्चहृतं
धनम् भार्याभिश्चहृतंसर्वंनिर्धनःसबभूवह २८ एकाकीनिर्जनेरण्येबभ्रामसइतस्ततः केनमेदुःखनिर्मुक्तिरितिचिं
तयतेमुहुः २९ क्षुधयातृषयाक्रांतोवृक्षमूलमुपाविशत् तंदृष्ट्वाशुकबालास्तुक्षुधितंचिंतयान्वितं ३० फलान्यानी
यपक्वानिददौनजगृहुःस्वयं ऊचुस्मवचनंतातंस्मरधर्मंसनातनम् ३१ दिवारात्रौसमायातंयोभुंक्तेह्यतिथिंविना
पापमेवाशितंतेनकृतंपुण्यंविनाशितम् ३२ वृक्षस्कंधसमारुह्यउवाचवचनंशुकः भोभोःपुत्राःसचात्मायुर्योभुंक्ते
ह्यतिथिंविना ३३ यस्त्वंवृक्षेभुक्तिहीनस्त्वांविनाममबालकाः नभक्षयंतिस्वंदुःखंनिवेदयकृपांकुरु ३४ नृपउ
वाच नभक्षयामिवैकिंचित्प्राणागच्छंतुवैसुखम् दुःखाभिभूतःसततंप्राणान्दातुंसमागतः ३५ शुकस्तु
चिंतयाविष्टोजगामगहनंवनम् नबभक्षशुकःकिंचित्स्थाप्यनीडेतुवैसुखम् ३६ भ्रमतादृष्टशेतेनसरएकंवनां
तरे तत्रहंसैःसमानीयफलमूलानिकंदकान् ३७ तत्रातिथिंशुकंदृष्ट्वातैराहूतोनचागतः किंतेदुःखंसमाख्या
हितेनसर्वंनिवेदितम् ३८ एतस्मिन्नंतरेतत्रभरद्वाजःसमागतः तत्सर्वंकथयामासुःप्राणिपत्यसमंविधेः
३९ भरद्वाजंशुकोत्यथवृक्षमूलमुपागतः सर्वेह्युपोषितास्तत्रनृपदुःखादतीवच ४० भरद्वाजउवाच
सचासीत्पूर्वजननेदेवदत्तोद्विजोत्तमः विद्वानपिहिमान्यश्चनचकारहुताशिनीम् ४१ नशंखशब्दंकृतवान्भ
स्मगोमयजंतथा स्नानंनकृतवान्सर्वनदायांफाल्गुनस्यच ४२ तेनदोषेणतज्जन्मक्षांतंदुःखान्यनेकशः यौवै
फाल्गुनजान्धर्मान्नकरोतिसदुःखभाक् ४३ फाल्गुनेमासितांबूलस्तेनदत्तोद्विजन्मने तेनपुण्येनसंप्राप्तोराज्यं
शुकनिवेदय ४४ धर्मान्कारयसंपूर्णांस्तेनसंततिवर्धनम् श्रुत्वाशुकश्चहंसाश्चनृपेणसहभोजिताः ४५ज
ग्मिरेस्वगृहंसर्वेसुखिनःफाल्गुनव्रतात् ४६ इतिश्रीभविष्यपुराणेतपस्यमाहात्म्येसप्तत्रिंशोऽध्यायः ३७

ऋषयऊचुः श्रुतंमासस्यमाहात्म्यंस्नानदानजपादिकम् अधुनाश्रोतुमिच्छामोव्रतंपापप्रणाशनम् १ स्तेयाद्वाव्यभिचाराद्वाजातिभ्रंशात्तथैवच पातकेभ्यस्तथान्येभ्योमुच्यतेयत्कृतेसति २ सूतउवाच साधुपृष्टं महाभागाः सर्वलोकोपकारकम् होलिकाख्यंव्रतंदिव्यंफाल्गुन्यांतत्समाचरेत् ३ सर्वपापविनिर्मुक्तः शिवलोके महीयते ऋषयऊचुः सूतकेनविधानेनकर्तव्यंहोलिकाव्रतम् ४ तत्सर्वंश्रोतुमिच्छामः सेतिहासंसविस्तरम् सूतउवाच कुरुक्षेत्रेपुराविप्राः कुरुपांडवसैनिकैः ५ कृतंयुद्धंमहाघोरंदेवदैत्यभयंकरम् एकदाकुरुसैन्येनजितंपांडुबलंमहत् ६ तस्मिन्युद्धायप्रययौसुभद्रातनयोबली अभिमन्युरितिख्यातोमहाबलपराक्रमः ७ हतेषुकुरुमुख्येषुपतितः कालनोदितः पतितेर्जुनजेतस्मिन्ततोहाहाकृतंबलम् ८ हाहाकारोमहानासीत्पंडुपुत्रः समागतः कृष्णोपिप्रययौतत्रशोकसंविग्नमानसः ९ सर्वेमिलित्वाशोचंतोनचैसान्त्वयितुंक्षमाः इतिशोकाकुलेजातेपांडुसैन्येमहानिशि सत्यलोकात्समागत्यनारदोभगवानृषिः १० नारदउवाच भगवन्देवदेवेशश्वंतकालयपालक ११ कालस्यापिचकालस्त्वंकिमर्थंशोचसेप्रभो गुरुपुत्रस्त्वयानीतोबहुकालंयमालयात् १२ पीतोदवाग्निःसहसालीलयाक्ष्माधरोधृतः त्रैलोक्यंदर्शितंवक्त्रेकिमर्थंशोचसेप्रभो १३ नारदस्यवचःश्रुत्वाभगवान्प्राहतत्वतः नाहंसमर्थःकस्यापिभाविनःपरिमार्जितुं १४ नाहंशिवोनाब्जयोनिर्नदेवोनचभास्करः भवितव्यप्रतीकारंकर्तुंकोन्योस्तिचक्षमः १५ वंचकाःसर्वविश्वस्याविषवैद्यसमाययं कर्तुंचैवान्यथाकर्तुंनसमर्थाःकदाचन १६ अवश्यंकर्मभोक्तव्यंदेवैर्दैत्यैश्चमानवैः कर्मणांपूर्वजातानांनभोगेनविनाक्षयः १७ भगवद्वाक्यमाकर्ण्यऋषिःखेदनसंयुतः विनम्रवदनोदेवंभीमसेनोजगादह १८ भीमउवाच भगवन्सर्वधर्मज्ञनानृतंनवभाषितम् भवता-गोकुलेपूर्वंजारकर्मकृतंसदा १९ स्तेयंभ्रंशकरंवापितथान्यान्यपिसर्वशः कृतानिसर्वकर्माणिनाथकातेगतिर्भवे

तू २० श्रीभगवानुवाच साधुपृष्टंमहाभागलोकानुग्रहकारकं गोकुलेवसतापूर्वंकृतंसर्वंसुदारुणं २१ परं
नगणयांचक्रेदेवोहमितिवैधिया कस्मिंश्चित्समयेभीमृगोपैश्चपरिवारितः २२ यमुनातीरमासाद्यपारंगंतुंसमु-
त्सुकः नमार्गंलेभिरेसर्वेजलपूर्णामहानदी २३ एतास्मिन्नंतरेतत्रदुर्वासाःसमुपागतः उवाचपुंडरीकाक्षएहित्वं
ममपृष्ठतः २४ इत्युक्त्वायमुनातीरेआगत्योवाचप्रांजलिः अहंषष्टिसहस्राणांभोक्ताचान्नस्यनित्यदा २५ उ-
पोषितश्चेन्मेमातर्देहिमार्गंचसूर्यजे दुर्वासोदीरितंश्रुत्वाद्विभागारविनंदिनी २६ जगामपरतीरसमांप्रोवाचद्वि-
जर्षभः कुरुष्वशपथंविष्णो तवमार्गंप्रदास्यति २७ मुनिवाक्यंसमाकर्ण्यशपथंकृतवानिति यद्यहंब्रह्मचर्येण
वसामिसततंयदि २८ सर्वभूतेषुवासश्चेद्देहिमार्गंयमस्वसः इत्याद्यनेकशपथान्कृत्वापिरविनंदिनी २९ नमा-
र्गंप्रददौमत्वंतदाहंदुःखितोभृशं त्यक्तुंप्राणान्मतिंचक्रेतावद्द्वैपायनोययौ ३० पृष्टोहंतेनकिमितिकरिष्यसिज-
नार्दन मयातदेतदाख्याधिस्त्वदुःखस्यैवकारणम् ३१ ततःसोकथयन्मह्यहोलिकायाव्रतंशुभम् कार्यंतेन-
प्रभावेणजातोहंवीतकल्मषः ३२ प्रभासद्रष्टुकामेनयाचितासामयासरित् ददौमार्गंतदामह्यंहोलिकायाःप्र-
भावतः ३३ एतदाख्यातवान्देवंव्रतंद्वैपायनोमुनिः जगामस्वाश्रमंव्यासःकृष्णःस्वभवनंगतः ३४ इतिश्रीभ
विष्यपुराणेतपस्यमाहात्म्येअष्टत्रिंशोऽध्यायः ३८ ॥ ऋषयऊचुः कथयस्वप्रसादेनपुराणस्यफल
श्रुतिम् सूतउवाच एकदाब्रह्मणापूर्वंपृष्टोदेवोवृषध्वजः १ पुण्यानामपिसर्वेषामल्पायासंमहत्फलम् शि
वउवाच कृतेज्ञानेनलभ्यंतत्त्रेतायांजपतःकिल २ द्वापरेर्चनतोलभ्यंपुराणश्रवणात्कलौ कलौनास्त्येवनास्त्ये-
वपुराणश्रवणंविना ३ अष्टादशपुराणानांमोक्षःस्याच्छ्रवणेनवै अष्टादशमितावृत्त्याएकस्यापिहिमोक्षता ४
एकस्यश्रवणंनैवकर्तव्यंभूतिमिच्छता श्रुतस्यापिपुराणस्यश्लोकंश्लोकार्धमेवच ५ श्रोतव्यंतत्रचेद्भक्तिस्तदन्यं

वाहरिप्रियम् एकेनह्रीयतेदोषोद्वितीयेनाहिहैतकं ६ तृतीयंहरतेदुःखंचतुर्थेनस्थिरारमा पंचषष्ठादिश्रवणात्पुत्रपौत्र
प्रपौत्रवान् ७ पशून्संपत्तिमाप्नोतिवसुधारश्रवान्नरः सर्वतोरोगनिर्मुक्तोरुद्रादित्यत्रयोदशात् ८ मनुपंचदशाद्यष्ट
श्रवणाच्चक्रवर्तिता देवत्वंलभतेमर्त्यःश्रवात्सप्तदशस्यच ९ अष्टादशपुराणोक्तविष्णोःप्रियतरोभवेत् श्रवणा॰
ल्लभतेमोक्षंपुराणोपपुराणतः १० तुलायांस्थापितंपुण्यंपुराणस्यविरिंचिना अन्यत्रतीर्थदानानांव्रतयागादिना
तथा ११ पुराणस्यमभूद्भूरिद्दक्षाश्चर्यसमन्वितः १२ तदाप्रख्यातिमकरोत्पुराणेपुण्यमाधिकम् अत्रार्थेकथ
यिष्यामिइतिहासंपुरातनम् १३ सुबुद्धबुद्धनामानौब्राह्मणौसंबभूवतुः कापिलेविदुषांश्रेष्ठौतीर्थयात्रांप्रचक्र
तुः १४ एकदावदमानौतुकस्मात्स्याद्गतिरुत्तमा केचिदूचुस्तीर्थयात्रांदानानिद्विजपूजनम् १५ इष्टापूर्तानिक॰
र्माणिपुराणश्रवणंपरे बुद्धश्चकारतत्सर्वंस्वस्यकल्याणहेतवे १६ सुबुद्धस्तुपुराणानिश्रुतवान्नियमेनच काले॰
ननिधनंप्राप्यविष्णुलोकंसमाविशत् १७ बुद्धेनस्वर्गाद्दृष्टस्तुविष्णुलोकंगतोइति प्रोवाचवचनंबुद्धोवैकुंठमानया
शकवे १८ सुबुद्धउवाच अहंदूतपराधीनोममबुद्धिःपरार्थके दूताऊचुः ददस्वत्वंपुराणस्यश्रुतस्यतुवि॰
भागशः १९ तेनवैकुंठवासस्याद्न्यैःस्वर्गगतिःखलु दत्वाफलंपुराणस्यउभौवैकुंठमीयतुः २० ऋषयऊचुः
वदमासस्यमाहात्म्यंपुराणस्येश्रुतेफलम् सूतउवाच साग्रपक्षंतदर्धवापुराणंयेनवैश्रुतम् २१ सर्वपापविनि
र्मुक्तोविष्णुलोकंसगच्छति एकतःसर्वदानानितीर्थान्यायतनानिच २२ पुराणश्रवणस्यास्यकलांनार्हंतिषोडशी
म् नारदउवाच श्रुत्वापुराणंराजेंद्रपूजयेच्चसरस्वतीम् २३ वस्त्रालंकरणैश्चैवकंचुक्याद्यैस्तुशक्तितः सप॰
त्नीकंद्विजंपूज्यव्यासरूपिणमीश्वरम् २४ पादप्रक्षालनंकार्यंवस्त्रालंकारभूषितम् पुष्पमालास्रगंधाद्यैर्द्र
व्यैर्व्यासंप्रपूजयेत् २५ मांगल्यैर्विविधैर्वाद्यैर्नैवेद्यैर्मुखवासनैः स्वशक्त्यादक्षिणांदद्यात्पुराणोक्तफलंलभे॰

त् २६ सरस्वतींचव्यासंच यः करोतिप्रदक्षिणम् पृथ्वीप्रदक्षिणायाश्च फलमाप्नोतिनिश्चितम् २७ पृथुस्तुपूजयामासश्रुत्वावैनारदंतथा चकारफाल्गुनस्नानकलिंजित्वाचिरेणच २८ बुभुजेसकलापृथ्वीवैकुंठगतवान्शुभम् २९ इतिसूतमुखोद्गीतंश्रुत्वातेशौनकादयः सूतंचापूजयन् भक्त्याजग्मुस्तेतपसेपुनः ३० इति श्रीभविष्योत्तरपुराणेपृथुनारदसंवादेतपस्यमाहात्म्येपुराणश्रवणफलंनाम एकोनचत्वारिंशोऽध्यायः ३९

॥ श्रीमद्गोपालकृष्णार्पणमस्तु श्रीसीतारामचंद्रार्पणमस्तु श्रीरस्तुशुभम् कल्याणमस्तु

३९

इतिमासस्तबकेफाल्गुनमासमाहात्म्यसमाप्त·

अथश्रीमासस्तबके पुरुषोत्तममासमाहात्म्यसटीकप्रारभ्यते


सूत
संवाद
शौनक
विष्णु
वैकुंठ
लक्ष्मी.
शाकल्य.
दीप.
सुशीला
वाल्मि
दृढधन्वा
राजा.
खट्वांगराजा.
देव.
नारद
स्कंद
नारायण.
नारद
शाकल.
दीपस्था.
मूषक
बिडाल
चित्रबाहु.
अगस्ति
ऋषि.
उग्र
देव
मार्कंडेय
युधिष्ठिर.
हंसा
स्नान
नक्र
मेनका.
अरुंध.
पार्व.
पूजक
स्त्री.
वीरबाहु
मंडलप.
स्त्री.
सुमतिराज.
अंगिरा
वीरकेश्य
पांडव
कृष्ण

१


विष्णु·
आधिकमा·
गोलोक·
कृष्ण
पु·
मेधावी
क·
दुर्वास·
देवाल·
कं·
ध्रुव
धन्य·
वाल्मि·
गरुड·
स्त्री·
सुदेवब्रा·
देवल·
बालक·
धनुर्भोस
पुत्र
पर्वत·
विष्णु·
ऋषिपूजाक·
महिष·
कद्र्पोत्रा·
वानर
विमा·
दिव्य पुरुष
मंगली
स्त्री
व्यधू·
शिवमंदि·
वृषभ·
पुरा
हर्यश्व
शूकर
विश्वसख·
वैश्य·
ब्राह्मण·
पंचपिशाच·
शूद्र
वृषभ
साधु·
पाठकर·
धर्मशर्मा·
प्रेत·
दिव्यपुरु·
विमा·
गोदा·
अप्सरा·
दुर्वास·
तपस्वी
पिशा·


गोकर्णप·
विमदा
शिव
विमान·
७००
प्रेत·
विमान·
दि·
पु·
शिवशर्मा·
राक्षस·
स्त्री·
दुर्वास·
स्त्री.
पुत्र·
मयूरी
वैश्य·
तापसी·
दासी
विमान·
अर्धदान
देव
शर्मा·
विमान·
अवन्तिनगर
कुशावर्ते·
कुशालु
शर्माख्या·
मंगलागौ
नर्म·
ब्राह्मण·
धनपालशूद्र
गोपूजन·
उपाध्या
वसिष्ठ
ऋषिः
विश्वामित्र
कामधेनु
कामधेनुसेना·
विश्वामित्रसेना·
महापुरु·

२


व्यास
धर्म
वसिष्ठ
स्त्री·
पुत्र
श
त्रिशंकु
व·
वि·
जय·
यम
विजयवै·
मार्कंडे·
विमा·
वेद·
नौका
समुद्र·
पुत्रो
किक·
ऋषु
दै·
पु·
शव
ब्राह्म·
नर·
वा
वर·
पिप्पला-
यन-
प्रेत·
गरु·
दे·
यत्नि-
ऋग·
स्त्री
शुभदेव
दिव
म
स्त्री
उत्तानपा·
नारद
ध्रुव
यम·
वि·
राक्षस
यमदूत·
सोमद·
मृतकपुरुष
निषा·
निषाद
स्त्री·
सुवाहु
पुं·
मंजुभाषिणी
ब्राह्मण
कांस्यपात्र
दान·
महाकाल·
मैत्रेय·
नारद
पुराणपा·
श्रोता-

अथ पुरुषोत्तममासमाहात्म्यानुक्रमणिका·

अध्याय·	विषयाः
१	मलमासमाहात्म्यजिज्ञासभि; शौनकादिभिपृष्टः सूतः लक्ष्मीविष्णुसंवादप्रस्तावेन संक्षेपतो मलमासव्रतनिरूपणंचकार· श्लो॰ ४९
२	विष्णुः लक्ष्मींप्रतिअधिकमास प्रशंसामाह· श्लोकाः ३६
३	अधिमासादिषुसेव्यानिपुण्यकर्माण्याह· श्लोकाः ६३
४	निषिद्धकर्माणिचाह· श्लोकाः ४४
५	पुरुषोत्तममासे करणीयव्रत नियमकथनं तत्रचित्रबाहुनृपेतिहासं खड्वांगनृपेतिहासकथनंच· श्लोकाः ६५
६	पुरुषोत्तममासव्रतविधिकथनंपूर्वकं नित्यपूजाविधिकथनम्· श्लोकाः ९६
७	आह्निकधर्मकथनं· श्लोकाः ८९
८	पुरुषोत्तममासे मेनकाव्रतनिरूपणपूर्वकं मंडनेतिहासं वीरवैश्येतिहासकथनंचाह श्लोकाः ८२
९	मलमासस्यपुरुषोत्तममासनामप्राप्तिकारणनिरूपणं· श्लोकाः ६३
१०	मलमासव्रतस्यानादरणेन दुःखं भवतीति वक्तुं· श्रीकृष्णः पांडवान्प्रति द्रौपदीपूर्ववृत्तांतमाह· श्लोकाः ७७
११	नारायणः नारदंप्रति दृढधन्वोपाख्यानं स्फदेवोपाख्यानंचाह· श्लो॰ १४२
१२	स्नानमहिम प्रसंगेन शाखामृगेतिहासकथनपूर्वकं पंचपर्वांतर्गतवैधृतिमाहात्म्यं व्यग्रधुब्राह्मणेतिहासंचाह· श्लो· ३७
१३	व्यतीपातव्रतमाहात्म्यं विश्वसरववैश्येतिहासकथनंचाह· श्लो॰ ४१
१४	अमापूर्णापर्वद्वयमाहात्म्यं श्लो॰ २८
१५	द्वादशीपर्वमाहात्म्यं पंचपिशाचबलिवर्दद्वयमुक्तिकथनंचाह· श्लो॰ ७४
१६	पुरुषोत्तममासे स्नानमाहात्म्यं तत्राप्सरेतिहासं सप्तशतप्रेतमुक्तिकथनं धर्मशर्मेतिहासं सोमशर्मेतिहासं वैश्यपुत्रेतिहासंचाह· श्लोकाः ९१
१७	नामस्मरणमाहात्म्यं मासोपवासकथनं तत्रवेश्याब्राह्मण्योरितिहासंचाह· श्लो· ५१
१८	पुरुषोत्तममासेएकभुक्तव्रतं मौनव्रतंवेरा

शरामेतिहासंचाह· श्लो· ४८

१९ एकांतरोपवासव्रतं तत्प्रसंगेन कुशलशर्मा धनपालशूद्रेतिहासकथनं द्विजसेवामाहात्म्यंचाह· श्लोकाः ४४

२० गोपूजाविधानं गोमाहात्म्यं गोदानंचाह· श्लोकाः ६४

२१ विश्वामित्रवसिष्ठवादप्रवृत्तौ विश्वामित्रतपोवनगमनवर्णनं· श्लो०९६

२२ पुरुषोत्तममासव्रतेन गायत्रीपुरश्चरणेनचविश्वामित्रस्य ब्रह्मर्षित्वप्राप्तिं त्रिशंकोः स्वर्गप्राप्तिवर्णनंचाह· श्लो· ८५

२३ पुरुषोत्तममासव्रतसेवनेनच्यवनऋषेः स्वरूपप्राप्तिवर्णनं· श्लो०७८

२४ पुरुषोत्तममासव्रतसेवनेनबटुवेदवती मुक्तिकथनं· पिप्पलादोत्पत्तिप्रसंगंचाह· श्लोकाः ९५

२५ पुरुषोत्तममासव्रतेन प्रल्हादस्य पार्षदत्वप्राप्तिवर्णनं· श्लो०८०

२६ कुपात्रदानप्रसंगेन सोमदत्तेतिहासकथनं श्लोकाः ९०

२७ सत्पात्रदान प्रसंगेन हिंसकनिषादस्य भवांतरे नृपत्वप्राप्तिवर्णनं· दुष्प्रतिग्रहदोषेण द्विजस्य शुकपक्षीजन्मप्राप्तिवर्णनं· श्लो· ९२

२८ स्त्रीधर्मनिरूपणं· श्लो० १०३

२९ कांस्यपात्रदानमाहात्म्यं प्रियकरेतिहासकथनंचाह· श्लो० ४४

३० पुरुषोत्तममासव्रतोद्यापनकथनं तत्प्रसंगेन मैत्रेयद्विजेतिहासकथनंचाह· श्लोकाः १०८

३१ मासमाहात्म्यश्रवणफलनिरूपणपूर्वकं देवरातविष्णुशर्मणोरितिहासवर्णनमाह· श्लोकाः ५१

इत्यनुक्रमणिकासमाप्ता·

श्रीगणेशायनमः इहखलुभगवान् ज्ञानानंदाद्यनंतगुणपरिपूर्णः परमकारुणिकः श्रीवेदव्यासः सकलपुरुषार्थसाधनप्रकाशकस्यानंतवेदमहार्णवस्य तत्वज्ञानार्थमष्टादशमहापुराणान्यष्टादशोपपुराणानिच चकार तत्रच कलियुगमहाभुजगदष्टानां पापकारिणां स्वधर्मविमुखानां योग्यप्राणिनां संसृतिदुःखनिवारणपूर्वकं स्वरूपानंदाविर्भावलक्षण मोक्षसुखप्राप्तये निखिलवेदार्थसारभूतं श्रीपुरुषोत्तममासमाहात्म्यप्रतिपादकं प्रकरणं कथामयं सरइवपृथिव्यांप्रतिष्ठापयामास अत्रहि कर्मज्ञानभक्तिवैराग्यादयोवि नसंक्षिप्यनिरूपिताः तत्रग्रंथा ऽशेषप्रत्यूहव्यूहव्यपोहायाभिमतदेवतानमस्कारलक्षणं मंगलमाचरणीयमित्यन्याञ्जौराणिकानुपशिक्षयन्स्वयमाचरति नारायणमिति अत्रनारायणपदेनांतर्यामिजलशायि श्रीकृष्णग्रहणात् तदुक्तं नारोजीवसमूहःस्यादयनंतस्यव

श्रीगणेशायनमः नारायणंनमस्कृत्यनरंचैवनरोत्तमम् देवींसरस्वतींव्यासंततोजयमुदीरयेत् १ यास्वर्गेब्र
ह्मभुवनास्करपतेरग्रेसदापठ्यते पातालेपिचकंबलाश्वतरतोऽनंतेनयाश्रूयते ऋष्यग्रेबदरीवनेप्रतिदिनंसूतेनयात
न्यतेशेषापुण्यकथायथामतिहरिप्रीत्यैमयाकथ्यते २

र्तनमित्यंतर्यामिनोग्रहणं तथा आपोनारायणइति

वैनरसूनवः अयनंतस्यताः पूर्वंतेननारायणःस्मृतइतिजलशायिनोग्रहणं इतरयोस्तुप्रसिद्धं यथाहिश्रीभागवते ताविमौवैभगवतोहरेरंशाविहागतौ भारव्ययायचभुवः कृष्णौयदुकुरूद्वहौ तंत्रेच अर्जुनेतुनरोवेशः कृष्णोनारायणःस्वयमिति नरपदेनाहिरण्यगर्भव्यष्टिजीमुन्यर्जुनानांग्रहणं नरोऽजेमनुजेऽर्जुनेइतिमेदिनी· नरोत्तमंनॄन्उत्तमयति श्रवणादिनाश्रेष्ठत्वंगमयतीति नरोत्तमोव्यासः तत्संप्रदायप्रवर्तकत्वात्तंचनमस्कृत्य· देवींसरस्वतींतदुपदेशाढ्यांसरस्वतींवाचं देवींद्योतनात्मिकांचनमस्कृत्य· व्यासमितिपाठे नरोत्तममितिमत्स्यैकसंबंधनीयंजयत्यनेनाविद्यांतत्कार्यंसंसारंचेतिजयोग्रंथस्तमुदीरयेत् इतिशिक्षा· जयशब्देनेतिहासपुराणादीनांग्रहणमिति· १ अथकथापठनंनित्यमेवकर्तव्यमितिसदृष्टांतंद्रढयति यास्वर्गइति बृहदश्वनामकऋषिणा ऋष्यग्रेव्यासाग्रेसूतेनरोमहर्षणेन साकथा तन्मतेवि·

स्तार्यते ननुगुर्वग्रेशिष्येणकथंकथाकथनमितिसंशयेशिष्यज्ञानदार्ढ्यायगुर्वग्रेकथनमिति नसंशयइति २ ३ शौनकाद्याः शौनकः आद्यो मुख्यो येषु एषु केष्वित्यपेक्षायामाह बृहन्नारदोक्ताधिकमासमाहात्म्ये असितोदेवलः पैलः सुमंतुः पिप्पलायनः सुमतिः कश्यपश्चैवजाबालि र्भृगुरंगिराः वामदेवः सुतीक्ष्णश्चशरभंगश्चपर्वतः आपस्तंबोऽथमांडव्योऽगस्त्यः कात्यायनस्तथा रथीतरोऋभुश्चैवकपिलोरैभ्यएवच गौतमोमुद्गलश्चैवकौशिकोगालवःक्रतुः अत्रिर्बभ्रुस्त्रितःशक्तिर्बुधोबौद्धायनोवसुः कौंडिन्यः पृथुहारीतोधूम्रशंकुश्च संकृतिः शनिर्विभांडकःपंकोगर्गःकाणादएवच जमदग्निर्भरद्वाजोधूम्रपोमौनभार्गवः कर्कशोवृद्धगार्ग्यश्चशतानंदोमहातपाः विशालाक्षोविष्णुवृद्धोजर्जरोजयजंगमौ पारःपाशधरःपूरोमहाकायोथजैमिनिः महाग्रीवोमहाबाहुर्महोदरमहाबलौ उद्दालकोमहासे

असारेस्मिन्भवांभोधौसारमेतत्त्रयंस्मृतं गंगास्नानंहरिकथाश्रवणंविष्णुसेवनम् ३ व्यासउवाच
एकदाऋषयःसर्वेशौनकाद्यास्तपस्विनः नैमिषारण्यमाजग्मुर्मुनयःसत्रकाम्यया ४ विशालायांरतायेच
हरिद्वारनिवासिनः सशिष्यास्तेसमागम्यपरोपकृतिशीलिनं ५

नश्चार्तश्चामलकप्रियः ऊर्ध्वबाहुरूर्ध्वपादएकपादश्चदुर्धरः उग्रशीलोजलाशीचपिंगलोऽत्रिऋभुस्तथा शांडीरःकरुणःकालः कैवल्यश्चकलाधरः श्वेतबाहूरोमपादःकद्रुःकालाग्निरुग्रगः श्वेताश्वतरएवाद्यःशरभंगःपृथुश्रवाः एतेसशिष्याब्रह्मिष्ठावेदवेदांगपारगाः लोकानुग्रहकर्तारः परोपकृतिशीलिनः परप्रियरतानित्यंश्रौतस्मार्तपरायणाः नैमिषारण्यमासाद्यसत्रंकर्तुंसमुद्यताइति ४ अत्रोपकारविषयेविशेषः पुराणसंहितायां परेषामुपकारं योव्रतैर्दानैस्तथार्जवैः तीर्थाटनैःकथालापैर्जपैर्होमैर्दयादिभिः उपासनैश्चदेवानामाचारैर्मुनिनिर्मितैः करोतिसभवेन्नूनं प्रकुर्वाणोहरिप्रियः एतान्दशपदार्थान्योविष्णुप्रीत्यर्थमादिशेत् कर्तारोमुक्तिभाजस्स्युःप्रेरकोपिदशांशभाक् नमस्कारप्रियोभानुर्जलधाराप्रियःशिवः उपकारप्रियोविष्णुः सर्वेषांद्विजभोजनं तस्मात्परोपकारार्थंव्यासेनामितबुद्धिना न्यस्यवेदंचतुर्धाकोज्ञात्वामंदमतीन्

द्विजान् पुराणानांतुसंदोहंलोकोपकृतिहेतवे चतुर्लक्षश्लोकसंख्यंचकारोच्चैर्हरिप्रियं व्यासोक्तमक्षरंचैकं पुनातिभुवनत्रयमिति ५
कुतस्तदेवागतमित्यत्राह बृहन्नारदीये एकदातस्यशिष्योथव्यासस्यकरुणात्मनः तीर्थयात्रामथोद्दिश्यगेहात्सूतोविनिर्गतः त-
दापौराणिकश्चित्तेधृत्वाबदरिकाश्रमं जगामतीर्थयात्रायैप्रीणयन्कथयाहरिं पुष्कराद्यानितीर्थानिगंगाद्याःसरितस्तथा चगत्वाविधिवत्त-
त्रश्राद्धंकृत्वायजन्हरिं दानंदत्वायथाशक्त्याततःस्वैरंजगामसः दिनैःकतिपयैःसूतोनैमिषेदृष्टवान्मुनीन् तान्सशिष्यान्नमस्कर्तुंसं-
सारार्णवतारकान् सूतःप्रहर्षितःप्रागाद्यत्रासंस्तेमुनीश्वराः ततःसूतंसमायातंरक्तवल्कलधारणं प्रसन्नवदनंशांतंपरमार्थविशारदं
अशेषगुणसंपन्नमशेषानंदसंप्लुतं ऊर्ध्वपुंड्रधरंश्रीमन्नाममुद्राविराजितं शंखचक्रधरंदिव्यंगोपीचंदनमृत्स्नया लसच्छ्रीतुलसीमालंज-
टामुकुटमंडितं जपंतंपरमंमंत्रंहरेःशरणमद्भुतं सर्वशास्त्रार्थसारज्ञंसर्वलोकहितेरतं जितेंद्रियंजितक्रोधंजीवन्मुक्तंजगद्गुरुं व्यासप्र-

तदेवचागतंप्रोचुर्व्यासशिष्यमकल्मषम् ऋषयऊचुः सूतसूतमहाभागभाग्यवानसिसांप्रतं ६ पारा
शर्यवचोहार्दत्वंवेदकृपयागुरोः वदशीघ्रंकथासारभवरोगरसायनम् ७

ज्ञाढ्यसंपन्नंव्यासवद्विगतप्रभं तंदृष्ट्वासहसोत्थायनैमिषेयामहर्षयः श्रोतुंकामाःसमावव्रुर्विचित्राविविधाःकथाः ततःसूतो-
विनीतात्मासर्वान्ऋषिवरान्मुदा बद्धांजलिपुटोभूत्वाननामदंडवन्मुहुः ततोऋषिगणाःसर्वेनैमिषारण्यवासिनः मधुपर्कंनि-
वेद्याद्यौगांदत्वाचपयस्विनीम् शुभासनंसमादायसूतंतत्रोपवेश्यच प्रणिपत्यसुखासीनंसर्वेप्रोचुर्मुनीश्वराः सूतसूतचिरंजी-
वमहाभागवतोभवान् अस्माभिस्त्वासनंचेदंकल्पितंसुमनोहरम् अत्रास्यतांमहाभागश्रोतोसीत्यवदन्द्विजाः इत्युक्त्वासूपवि-
ष्टेषुसर्वेषुचतपस्विषु तपोवृद्धिंततः पृष्ट्वासर्वान्मुनिगणान्मुदा स्वकीयमासनंभेजेविनयाद्रोमहर्षणिः सुखासीनंततस्तंतुविश्रां-
तमुपलक्ष्यच श्रोतुकामाःकथाःपुण्या इदंवचनमब्रुवन्निति ६ ६ ५ ५ ७ ५

८ ९ १० साधुसमागमइति साधुसमागमप्रशंसामाह पुराणसंहितोक्तमाहात्म्ये साधूनांदर्शनंपुण्यंतीर्थीभूताहिसाधवः तीर्थंपुनाति कालेनसद्यःसाधुसमागमः नह्यम्मयानितीर्थानिनदेवामृच्छिलामयाः तेपुनंत्युरुकालेन दर्शनादेवसाधवः सत्संगाद्भवतिहिसाधुताखलानांसाधूनां नहिखलसंगमात्खलत्वं आमोदंकुसुमभवंमृदेवधत्तेमृद्गंधंनहिकुसुमानिधारयंति सत्संगकल्पद्रुममूलवासीयस्तस्यकिंमुक्तिनिधेः

त्वत्तःश्रुतानिसर्वाणिव्रतानिविविधानिच मासानांदुरितघ्नानिसर्वसौख्यप्रदानिच ८ नश्रुतंमलमासस्यव्रतंसर्वाघनाशनम् कार्याणिविहितानीहकानिनोऽविहितानिच ९ कोदेवःपूजनीयोत्रकिंदानंकोविधिःस्मृतः तत्सर्वंब्रूहिनःसूतकृष्णद्वैपायनेरितं १० तएवदिवसाधन्यायत्रसाधुसमागमः सूतउवाच शृण्वंतुमुनयःसर्वेमदुक्तंसुमनोहरम् ११ पुष्कराद्यानितीर्थानिभ्रमित्वाहंचिरंबहु गंगातीरंसमासाद्यदेवर्षिगणसेवितम् १२ राज्ञापृष्टंशुकेनोक्तंश्रीमद्भागवतंपरम् शुकप्रसादात्तच्छ्रुत्वादृष्ट्वाराज्ञोविमोक्षणम् १३ अत्राहमागतोविप्रान्सत्रोद्यमपरायणान् द्रष्टुकामःकृतार्थोहंजातोदीक्षितदर्शनात् १४ शृण्वंतुसुमयत्नेनकथयामिकथानकम् पुरुषोत्तममासस्यमाहात्म्यंभक्तिवर्धनम् १५ कथितंनारदेनैवस्कंदायपरिपृच्छते युधिष्ठिरायकथितंकृष्णेनसुमहात्मना १६ निवृत्तेभारतेयुद्धेविरक्तायमहात्मने नारायणेनकथितंनारदायस्वकेस्थले १७ विष्णुनाकथितंलक्ष्म्यैवैकुंठेसर्वमादितः पुरुषोत्तममासेपिनृणांभक्तिविधायकः १८ अत्रस्नानेनदानेनस्वर्गलोकेमहीयते पुरुषोत्तममासस्यकालोयंवर्ततेऽनघाः १९

प्रयासः सुधाशयस्थांपरित्यज्यदक्षः कथंपिबेत्क्षारजलंसुखार्थीति ११ अद्यानियमुनागंगाकाशिसेतुबंधबदरीवनसिद्धक्षेत्रादीनिबृहन्नारदोक्तानि १२ १३ १४ १५ १६ स्वकेस्थले बदरिकाश्रमे १७ १८ १९ छ छ छ छ छ

अधिमासस्यपुरुषोत्तमसंज्ञां श्रुत्वा विस्मितः शौनकः ईश्वरस्य पुरुषोत्तमत्वं दर्शयति द्वाविमाविति क्षरश्चाक्षरश्चेति द्वाविमौपुरुषौलोके प्रसिद्धौ तावेवाह तत्राक्षरः पुरुषोनाम सर्वाणि भूतानि ब्रह्मादिस्थानगतानि शरीराणि अविवेकिलोकस्य शरीरेष्वेव पुरुषत्वप्रसिद्धेः कुतः शिलाराशिः पर्वतइवदेहेषुनश्यत्स्वपि निर्विकारतयातिष्ठतीति कूटस्थः चेतना भोक्तासतु अक्षरः पुरुषइत्युच्यते विवेकिभिः यदर्थमेतौ लक्षितौ तदाह उत्तम इति एताभ्यां क्षराक्षराभ्यां अन्योविलक्षणस्तूत्तमः पुरुषः वैलक्षण्यमेवाह परमश्चासावात्मेतिचोदाहृतः उक्तः श्रुतिभिः आत्मत्वेनक्षरादचेतनाद्विलक्षणः परमत्वेनाक्षरात् चेतनात् भोक्तुः विलक्षणइत्यर्थः परमात्मत्वमेवदर्शयति योलोकत्रयमिति यईश्वरः ईशनशीलः अव्ययश्चनिर्विकारएवसन् योलोकत्रयंकृत्स्नमाविश्य बिभर्ति पालयति गीतायांच यस्मात्क्षरमतीतोहमक्षरादपिचोत्तमः अतोस्मिन्लोके वेदेच प्रथितः पुरुषोत्तमइति २० २१ परिच्छिन्नतया पृथक्रूपतया २२ अपाकुरु दूरीकुरु २३ त्रयीमयः वेदत्रयकर्मप्रतिपादकः २४ यः मेषादिराशिसंत्यक्तः मेषादिराशिप्रवेशकालरहितः संक्रमरहितइत्यर्थः संक्रमोपूर्वराशिंपरित्यज्याऽन्यराशौक्रमंगमनं सर्वेमासाः राशिपरिच्छिन्नाः स्वस्वराशिसंक्रमभेदाभिन्नाः अयंतुताननतिक्रम्यस्थितइति २५ तस्मात्सर्वद्वादशमासात्मककालावयवेभ्योऽधिकत्वात्स्वयंकालात्मकः मासः इष्यते कथ्यते २६

देशकालोचितंचैतत्पुराणंश्रूयतामिह शौनकउवाच द्वाविमौपुरुषौलोकेक्षरश्चाक्षरएवच २० क्षरःसर्वाणि भूतानि कूटस्थोक्षरउच्यते उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः २१ योलोकत्रयमाविश्य बिभर्त्यव्ययईश्वरः सकथं मासरूपः स्यात्परिच्छिन्नतयाव्ययः २२ संदेहोयंमहान्साधोहृदिस्थस्तमपाकुरु सूतउवाच सत्यमुक्तमिदं साधो मामोहाब्धौमनःक्षिप २३ कालात्मासर्वभूतात्मासूर्यस्त्रयीमयःस्मृतः राशिद्वादशगोनित्यंनृणामायुःक्षिणोतिसः २४ मेषादिराशिसंत्यक्तःसमासःपुरुषोत्तमः सर्वेराशिपरिच्छिन्नास्तानतिक्रम्ययःस्थितः २५ तस्मात्कालात्मकोमासःपुरुषोत्तमइष्यते अत्रस्नानंगयातुल्यंतडागेपिभवेन्नृणाम् २६

६२

६

२७ तन्माहात्म्यं वक्तुमितिहासं प्रस्तौति पुरेति २८ २९ ३० सेतिहाससमन्वितं इतिहासेन सहिताः सेतिहासाः व्रतदानपूज-
नादयः तैः सहितं उद्यापनं च ३१ ३२ ३३ सर्वाः क्रियाः वक्ष्यमाणाः ३४ देवकार्यं पुरुषोत्तमातिरिक्तान्यदेवताकर्म पितृकार्यं ना-
गबलि नारायणबलि गयाश्राद्धादि काम्यं तीर्थयात्रा अधिमासस्नानोद्देशातिरिक्ततीर्थयात्रा व्रतं च तीर्थनिमित्तं व्रतं मुंडनं चोपवासश्च सर्व

मेरुदानसमं पुण्यं गुंजास्वर्णप्रदानतः त्रिंशन्मासकृतं पापं मासैकेन लयं व्रजेत् २७ पुरा वैकुंठनिलये देवदेवं
जनार्दनम् कृतांजलिपुटो भूत्वा पप्रच्छ कमलालया २८ लक्ष्मीरुवाच देवकेन विधानेन व्रतेन तपसाथवा प्राप्य
ते तव सान्निध्यं तन्मे ब्रूहि सविस्तरम् २९ विष्णुरुवाच संति व्रतान्यनेकानि मम प्रीतिकराणि च मलमासव्रतं तेषु
मत्प्रीतिकरणं परम् ३० लक्ष्मीरुवाच मलमासः कथं ज्ञेयो विधानं तत्र किं स्मृतम् सर्वं कथय देवेश व्रतं दानं च पूजनं
३१ उद्यापनं च विधिवत्सेतिहाससमन्वितम् विष्णुरुवाच शृणु प्रिये महाभागे वक्ष्यामि हितकाम्यया मनुष्याणां
हि सर्वेषां मलमासव्रतं शुभम् ३२ संक्रांतिरहितो मासोऽधिमासः प्रोच्यते बुधैः मलमासोऽधिमासश्च पुरुषोत्तममा
सकः ३३ विसंक्रमोऽर्कमासश्च पर्यायैः स निगद्यते मलिम्लुचेति संप्राप्ते क्रियाः सर्वाः परित्यजेत् ३४ देवकार्यं पितृका
र्यं तीर्थयात्राव्रतादिकम् क्षौरं मौंजीविवाहौ च व्रतं काम्योपवासिकं ३५ मलिम्लुचे सदा त्याज्यं गृहस्थैश्च विशेषतः
तस्मिन् शुभं न कुर्वीत स्नानदानार्चनं विना ३६ स सर्वेभ्योऽधिकत्वाच्च स्मृतोऽधिमासको बुधैः पुरुषोत्तमप्रियत्वाच्च पु
रुषोत्तमसंज्ञकः ३७ मलमित्युच्यते पापं मकरो मार्जने स्मृतः सुसमर्थत्वे सकारश्च ततोऽयं मलमासकः ३८ गर्भे वार्धुषि-
के मृते श्राद्धकर्मणि मासिके सपिंडीकरणे नित्ये नाधिमासं विवर्जयेत् ३९ तीर्थेश्चयं विधि रित्यादिना तीर्थयात्रोद्देशेन यत्कृतं आदि
शब्देन मुंडनमपि ३५ ३६ अथाधिमासस्य पर्यायनाम्नामर्थमाह स इति सर्वेभ्यो द्वादशेभ्यः स्वार्थे कः प्रत्ययः ३७ ३८ गर्भे गर्भमासगणा

नार्यांपुंसवनादिषु वार्धुषिके वृद्धिजीवनव्यापारकर्त्ते कुसीदकोवार्धुषिकोवृद्ध्याजीवश्च वार्धुषिरित्यमरः ३९ कुत्रचित्काम्यकर्मणोपिम·
लमासेप्रवृत्तिमाह प्रवृत्तिमासादितिस्पष्टार्थः ४० अथमलमासव्रतस्य प्रारंभावसानकालप्रमाणमाह शुक्लइतित्रिभिः ४१ ४२ विर·
तिर्नामयस्याआदेर्नैयमोगृहीतः तदन्नादिकंतद्दिने भक्ष्यंस्वयंभुंजीतवाग्यतइतिवक्ष्यमाणवचनात् नतुस्नानदीपदानादिनियमानामेकभु·
क्तिनक्तमौनादिव्रतानांचत्यागः सर्वदर्शेषुद्विवारंभोजनस्यनिषेधेकिम् पुनराधिकस्यदर्शेइतिवक्तव्यम् ४३ ४४ नियमत्यागेविशेषमाह य·

प्रवृत्तमलमासात्प्राक्यत्काम्यमसमापितं आगतेमलमासेपितत्समाप्यमसंशयम् ४० शुक्लप्रतिपदारभ्ययाव
त्स्यात्सितृतोषिणी तावद्व्रतंप्रकर्तव्यंश्रीहरिप्रीतयेरमे ४१ कार्तिकादिषुमासेषुव्रतारंभोऽखिलेंदुतः समाप्तिरपि
पूर्णायांव्रतस्यकमलालये ४२ अधिमासव्रतस्यास्यउक्ताद्यातिथितःकिल प्रारंभस्तुस्मृतोविद्भिरमायांविरतिःस्मृता
४३ एवंत्रिंशद्दिनंकुर्याद्व्रतंविष्णुजनप्रियं ततश्चोद्यापनंकुर्याच्चतुर्दश्युत्तरेदले ४४ यस्यान्नस्यकृतोयेननियमःप्र·
थमेदिने तदेवान्नंहिभोक्तव्यंभूतायामेवभामिनि ४५ रात्रौजागरणंप्रोक्तंवित्तशाठ्यंविवर्जयेत् अथप्रभातेदर्शस्य
स्नात्वाचैवयथाविधि ४६ ततोनित्यंप्रकुर्वीतपूर्ववत्कमलासने ब्राह्मणान्भोजयेद्भक्त्यास्वयंभुंजीतवाग्यतः ४७ स्ना
नदानंव्रतंकुर्याद्वक्ष्यमाणक्रमेणच नवधाभक्तिसंयुक्तोपूजयेद्विष्णुमव्ययम् ४८

स्यान्नस्येतिस्पष्टार्थः भूतायांचतुर्दश्यां अ
न्ननियमग्रहणंतूद्यापनविषयपरंनव्रतविसर्जनपरं अमायांविरतिःस्मृताइति एवंत्रिंशद्दिनंकुर्याद्व्रतमितिचवचनविरोधात् ४५ ४६
४७ नवधाभक्तिलक्षणमाह पुराणसंहितोक्तमाहात्म्ये भक्तिर्हिनवधाप्रोक्तातद्भेदान्वर्णयामिवः नवस्वेकायदालब्धातयामुक्तिर्हिसा
ध्यते श्रवणंकीर्तनंविष्णोःस्मरणंपादसेवनं अर्चनंवंदनंदास्यंसख्यमात्मनिवेदनं श्रीविष्णोःश्रवणेपरिक्षितिरभूद्वैयासकिःकीर्तनेप्रल्हादः
स्मरणेवयांघ्रिभजनेलक्ष्मीःपृथुःपूजने अक्रूरस्त्वभिवंदनेकपिपतिर्दास्येचसख्येर्जुनः सर्वस्वात्मनिवेदनेबलिरभूत्कैवल्यमेषांपदमितिशेषंस्पष्टं
४८

सहंसहंसाभविमानसंस्थः हंसस्याभेवाभायस्यतद्विमानंच हंसाभविमानं हंसैः शुद्धैर्विष्णुदूतैः सहितंसहंसेनंचसहंसाभविमानंचतस्मिन्संस्थः
४९ इतिश्रीपुरुषोत्तममासमाहात्म्यटीकायांप्रथमोऽध्यायः १ ५ विष्णुरुवाचेति १ २ ३ ४

एवंव्रतंयःपुरुषोत्तमस्यमासस्यमर्त्यःप्रकरोतिभक्त्या सहंसहंसाभविमानसंस्थोप्रयातिविष्णोःपरमंपदंतत्
४९ इतिश्रीसप्तपुराणसारोद्धारेपुरुषोत्तममासमाहात्म्येसंक्षेपतोव्रतनिरूपणंनामप्रथमोऽध्यायः १ ७
विष्णुरुवाच शृणुदेविमहाभागेसर्वलोकस्यहेतवे अदत्तंनैवलभ्येतदत्तंचैवोपतिष्ठति यथावंध्यागृहस्थस्य
पतिवंशविनाशिनी १ तथादानविहीनंतुजंतोर्जन्मनिरर्थकम् स्वयंदातास्वयंभोक्तायोददातिद्विजातये २
नान्योदातानभोक्तान्योइहलोकेपरत्रच अधिमासेतुसंप्राप्तेमामुद्दिश्यव्रतंचरेत् ३ स्नानंदानंजपोहोमःस्वाध्यायः
पितृतर्पणम् देवार्चनंतथाविप्रान्येर्चयंतिनराइह ४ अक्षय्यंतद्भवेत्सर्वंमामुद्दिश्यचयत्कृतम् तेषांदास्याम्यहं
कांतेस्वल्पंदत्तंत्वनंतकं ५ नदीनांचयथागंगासरसांसागरोयथा पर्वतानांयथामेरुस्तथाश्रेष्ठंव्रतेष्विदं ६
नक्षत्राणांयथाचंद्रोग्रहाणांचरविर्यथा पशूनांचयथाधेनुस्तथाश्रेष्ठंव्रतेष्विदम् ७ पतिव्रतासुनारीषुयथाचारुंधती
वरा योगिषुचयथाभर्गोव्रतेष्वेतत्तथाव्रतम् ८ विविधानिचपापानिमनोवाक्कायजानिच सद्योयांतिलयंदेविमलमास
निषेवणात् ९ मद्यपानरतस्वर्णस्तेयीचगुरुतल्पगः त्यक्तधर्माभिकमश्चब्रह्महापरदारगः १० कृतघ्नश्चवदचा
हीनोनिंदकोजंतुहिंसकः संध्यास्नानपरिभ्रष्टोऽनृतवादीगरप्रदः ११ एतेचान्येचबहवोमलमासनिषेवणात्
सद्योनिर्धूतपापास्युर्यांतितेमत्सलोकतां १२ वंध्योनकार्योसहसामलमासोविचक्षणैः येषांशून्योगतोमासोपुरुषोत्तम
संज्ञकः १३

५ ६ ७ भर्गःशिवः ८ ९ गुरुतल्पगःमातृगामी १० गरंविषम् ११ १२ १३

१४ १५ १६ १७ १८ ऊर्जे कार्तिके स्वर्णाद्रिः स्वर्णपर्वतः तन्मानमुक्तं पाद्मे उत्तमः पलसाहस्रोमध्यमः पंचभिः शतैः तदर्धे
नाधमस्तद्वदल्पवित्तोपि शक्तितः अल्पवित्तःपलादूर्ध्वंकुर्यादिति १९ २० २१ २२ २३ २४ २५

इहामुत्रसुखंतेषांनास्तिपद्मालयेध्रुवम् सूर्येंद्वोपरागेच यत्पुण्यंगोप्रदानतः १४ तत्पुण्यंकोटिगुणितंमल
मासेन्नदानतः माघस्नानेनयत्पुण्यंप्रयागेर्केमृगास्थिते १५ प्रातःस्नानेनतत्पुण्यंप्राप्यतेत्वधिमासके हरिस्थिते
सुराचार्येवर्षेगोदावगाहनात् १६ तत्पुण्यंमलमासेषुप्राप्यतेविष्णुपूजनात् मायापुर्यांघटस्थेज्येनित्यंगंगांबुसेव
नात् १७ तत्पुण्यंमलमासेनविष्णोर्नैवेद्यभक्षणात् अर्धोदयेपुष्कराख्येतुलापुरुषदानतः १८ तत्पुण्यंप्राप्यते-
नूनंकांस्यपात्रप्रदानतः काश्यांपंचनदेतीर्थेऊर्जेस्वर्णाद्रिदानतः तत्फलंलभतेचात्रगुंजामात्रसुवर्णदः १९ य-
थोक्तव्रतिनंदृष्ट्वामासेश्रीपुरुषोत्तमे यमदूताःपलायंतेसिंहंदृष्ट्वायथागजाः २० एतन्मासव्रतंलक्ष्मिश्रेष्ठंक्रतुश-
तादपि क्रतून्कृत्वाऽप्नुयात्स्वर्गंगोलोकंपौरुषोत्तमे २१ पृथिव्यांयानितीर्थानिक्षेत्राणिसर्वदेवताः तद्देहेतानि-
तिष्ठंतियःकुर्यात्पुरुषोत्तमं २२ दुःस्वप्नंचैवदारिद्र्यंदुष्कृतंत्रिविधंचयत् तत्सर्वंविलयंयातिकृतेश्रीपुरुषोत्तमे २३
पुरुषोत्तमसेवायांनिश्चलंहरिसेवकं विघ्नादक्षांतिशंकाद्याः पुरुषोत्तमप्रीतये २४ पुरुषोत्तमस्यव्रतिनोयत्रयत्रवसं-
ति च भूतप्रेतपिशाचाद्यानतिष्ठंतितदग्रतः २५ एवंयोविधिनाकुर्यात्पुरुषोत्तमसेवनं सहस्रवदनोनालंतत्फलंवक्तुमं-
जसा २६ मधुर्वामाधवोवापिशुक्रोवाश्रावणःशुचिः नभस्योवाथवान्यश्चयस्तुसंक्रांतिवर्जितः २७ सएवमल
मासःस्यात्परस्तुशुद्धउच्यते सर्वेष्वधिकमासेष्वयमेवविधिःस्मृतः २८

८

२६ मधुश्चैत्रः माधवोवैशाखः शुक्रोज्येष्ठः शुचिराषाढः नभस्योभाद्रपदः अन्यः आश्विनः २७ २७ ६९ ६९

२९ ईषः आश्विनः तत्राशोकव्रतस्यमहत्फलप्रतिपादनात् वैशाखाधिकेच भृगुकच्छनिकटेनर्मदायांरावणकृतकोटिलिंगानांप्रादुर्भावत्वात् कार्तिकस्यतुक्षयमाससंभवत्वात् दुर्लभत्वमितिसिद्धं ३० ३१ मेनकाव्रतमष्टमाध्यायेवक्ष्यमाणं ३२ सत्तमेहेलक्ष्मि ३३ ३४ ३५ अत्रविहितानां वेदशास्त्रपुराणप्रतिपादितनित्यनैमित्तिकादिकर्मणामाचरणंकार्यंनिषिद्धं अभक्ष्याभक्ष्यं अगम्यागमनंचौर्यं कामक्रोधलोभमोहेर्षादिकंवर्जयेत् अन्यमासकृतपापं अन्येषुचैत्रादिद्वादशेषु सार्द्धद्विवारंपर्यावर्तनेनत्रिंशन्मासेषुकृतंयत्पापंतत् मलमासेस्नानादिव्रतेनविनश्यतीति ३६ इतिमलमासमाहात्म्यटीकायांद्वितीयोऽध्यायः २ ६२ ६२ अथपूर्वाध्याये श्रीविष्णुनाविहिताचरणं कार्यंनिषिद्धं परिवर्जयेदितिप्रतिज्ञातं तत्रकानिविहितानीति जिज्ञासायांलक्ष्मीप्रश्नंसेव्यानीति इहास्मिन्समये १ ६२ ६२ श्रीसीतारामचंद्रोजयति ६२ ६२ ६२

लक्ष्मीरुवाच किंसमानफलादेवसर्वेमासामलिम्लुचाः विशेषोवाथकस्यापितदेतद्वदमेप्रभो २९ श्रीविष्णुरुवाच समानफलदादेविसर्वेमासामलिम्लुचाः विशेषफलदास्त्वेते ईषवैशाखकार्तिकाः ३० त्रिष्वेतेष्वधिमासेषुयःकृतंसुकृतंप्रिये तदनंतफलंप्रोक्तमतोत्येतेस्कदुर्लभाः ३१ अशक्तेनापिचैकाहंमेनकाव्रतमाचरेत् अधिमासेशुक्लकृष्णात्तृतीयायांप्रयत्नतः ३२ ब्राह्मणक्षत्रियविशांस्त्रीशूद्राणांचसत्तमे सर्वदुःखोपशमनंसंसारोच्छेदकारणं ३३ अथवातुलसीसेवाशून्यलिंगप्रपूजनम् गंगास्नानमवाप्नोतिसर्वतीर्थफलंभवेत् ३४ अश्वमेधसहस्राणिवाजपेयशतानिच तावद्युगसहस्राणिविष्णुलोकेवसेन्नहि ३५ विहिताचरणंकार्यंनिषिद्धंपरिवर्जयेत् अन्यमासकृतंपापंमलमासेविनश्यति ३६ इतिश्रीसप्तपुराणसारोद्धारेश्रीपुरुषोत्तममासमाहात्म्येमलमासप्रशंसनंनामद्वितीयोऽध्यायः २ ६२ लक्ष्मीरुवाच सेव्यानियानिकर्माणिसतांस्वर्गप्रदानिच पुण्यरूपाणितानीहममाचक्ष्वजनार्दन १

त्रिविधंकायिकवाचिक मानसिक भेदेन तत्राप्येकैकंत्रिविधं सत्वरजस्तमप्रभेदेनेति ,इहास्मिल्लोके अमुत्रपरलोके इहजन्मनिजन्मांतरेचेत्यर्थः २ दमः बाह्येंद्रियनिग्रहः शमः मनोनिग्रहः नित्यानित्यविचारणानित्यवस्त्वेकं ब्रह्मतद्व्यतिरिक्तंसर्वमनित्यमिति नित्यानित्यविवेकः ३ स्वाध्यायः वेदाध्ययनं ४ ५ द्विजादीनां ब्रह्मक्षत्रवैश्यानांसर्वेषांसर्ववर्णानाम् ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७

विष्णुरुवाच शृणुदेविप्रवक्ष्यामिसंक्षेपेणतथाऽनघे त्रिविधंचापिसत्कर्मयेनेहाऽमुत्रशंलभेत् २ दमः शमोदमध्याननित्यानित्यविचारणा सर्वभूतस्पृहत्वंचमानसंतपईरितं ३ जपश्चप्रियवक्तृत्वंस्वाध्यायःसत्यभाषणम् शास्त्रादिपठनंचैववाङ्मयंतपउच्यते ४ कृच्छ्राद्याचरणंविष्णोरर्चनंतीर्थसेवनम् यज्ञादिकरणंचैवस्मृतंशारीरकंतपः ५ तपःशौर्यंचवाणिज्यंसेवनंतीर्थसेवनम् द्विजादीनांहितंकर्मसर्वेषांकीर्तनंहरेः ६ एवंविधानिकर्माणिस्वर्गमोक्षप्रदानिच तानिसंक्षेपतोमत्तःशृणुत्रैलोक्यवंदिते ७ परवादेषुयेमूकाःपरस्त्रीषुनपुंसकाः परद्रव्येषुयेऽन्धास्तेषांगंगापदेपदे ८ स्ववर्णाचारनिरतोब्रह्मचर्यपरायणः पंचयज्ञपरोनित्यंप्रतिग्रहपराङ्मुखः ९ सत्संगनिरतोनित्यंवापीकूपकरोनरः तीर्थसेवीदयायुक्तोमल्लोकेवसतेचिरम् १० पितृभक्तिरतायेचदेवब्राह्मणपूजकाः अनाथरक्षिणोयेचममलोकेवसंतिते ११ स्वतीर्थमरणंप्राप्तासन्मुखंबहवोहताः हिमालयंप्रविष्टाश्चममलोकेवसंतिते १२ गोनाथद्विजदेवार्थस्वाम्यर्थेयेमृतानराः तीर्थराजोज्झितप्राणाममलोकेवसंतिते १३ एकादशीव्रतपरःपात्रेदानप्रदःशुचिः आत्मवत्सर्वभूतेषुमल्लोकेवसतेचिरम् १४ गोप्रदोवैष्णवेलोकेसूर्यलोकेऽश्वदानतः वृषदःशिवलोकेचकल्पमेकंवसेन्नरः १५ यमस्ययातनांनैवपश्यतिमहिषीप्रदः गजप्रदोनरोयातिशक्रलोकंसुखेनच १६ शिबिकादानतोमर्त्यःसोमलोकंहिगच्छति दासीदोप्सरसांलोके शक्रलोकेरथप्रदः १७

१८ १९ २० २१ २२ २३ २४ २५ २६ जपमंत्रमाह गोवर्धनधरमिति २६ २७ २८

अन्नदोब्रह्मणोलोकेकल्पमेकंवसेन्नरः भूमिदोसूर्यलोकेच इंद्रलोकेसुवर्णदः १८ नाक्षत्रेधान्यदोदिव्यशताब्देवस
तेनरः गायत्रीजपसन्निष्टोब्राह्मणोमोक्षमालभेत् १९ संक्षेपतोऽंबुजपत्रनेत्रप्रोक्तास्त्वयाग्रेत्रिविधाहिधर्माः स
माननांयांतिनतेऽधिमासव्रतस्यपुण्येनममप्रियस्य २० तस्मात्सर्वप्रयत्नेनसंसेव्यः पुरुषोत्तमः सर्वसाधनतः श्रेष्ठः
सर्वार्थफलदायकः २१ वित्तशाठ्यमकुर्वाणोदानंदद्याद्द्विजातये विद्यमानेधनेशाठ्यंकुर्वाणोरौरवंव्रजेत् २२ दिने
दिनेद्विजेंद्रायदत्वाभोजनमुत्तमम् दिवसस्याष्टमेभागेव्रतीभोजनमाचरेत् २३ धन्यास्तेपुरुषालोकेयेनित्यंपुरुषोत्त
मम् अर्चयंतिविधानेनभक्त्याप्रेमपुरःसरम् २४ इंद्रद्युम्नःशतद्युम्नोयौवनाश्वोभगीरथः पुरुषोत्तममाराध्यययुर्भ
गवदंतिकम् २५ गोवर्धनधरंवंदेगोपालंगोपरूपिणम् गोकुलोत्सवमीशानंगोविंदंगोपिकाप्रियम् २६ कौंडिन्ये
नपुराप्रोक्तमिमंमंत्रंपुनःपुनः जपन्मासंनयेद्भक्त्यापुरुषोत्तममाप्नुयात् २७ ध्यायेन्नवघनश्यामंद्विभुजंमुरलीधरम्
लसत्पीतपटंरम्यंसराधंपुरुषोत्तमम् २८ ध्यायंध्यायंनयेन्मासंपूजयन्पुरुषोत्तमं एवंयःकुरुतेभक्त्यास्वाभीष्टस
र्वमाप्नुयात् २९ उपवासेननक्तेनत्वेकभक्तेनवानृप एकस्यनियमंकृत्वादानंदद्याद्दिनेदिने ३० दानंदद्यादपूपानां
दक्षिणापात्रसंयुतम् मलमासावमानंहिनकर्तव्यंकदाचन ३१ हरिश्चंद्रेणदेवेशिमलमासोवमानितः तेनपापप्र
भावेनगोवाड्जातोत्यजगृहे ३२ द्रौपद्याचैकदादेव्यामलमासोवमानितः तेनपापेनवैराटगेहेदासीसभर्तृका ३३
दमयंत्यैकदादेविमलमासोवमानितः तेनपापेनचलनंपुष्करोतीचपीडयत् ३४ सीतयाचैकदादेविमलमासोवमा
नितः तेनपापप्रभावेनलंकावासमचीक्लृपत् ३५

२९ ३० मलमासावमानफलमाह मलमासावमानमिति ३१ ३२ ३३ ३४ ३५

३६ ३७ ३८ ३९ ४० ४१ ४२ ४३ दानान्याह यद्दति ४४ ४५

एवमादित्ययाज्ञेयंमलमासावमानने दुःखमेवभवेन्नूनंसुखंस्वप्नेपिदुर्लभम् ३६ माहात्म्यंशृणुदेवेशिमलमासस्य·
मस्मिये येचमासाःससंक्रांतास्तेषांस्वामीरविस्मृतः ३७ मलमासेषुसर्वेषुस्वयंदेवोजनार्दनः तमुद्दिश्यकृतंयच्च
स्वल्पंवायदिवाबहु ३८ हुतंदत्तंतपस्तप्तंतदक्षय्यकरंभवेत् स्नानंव्रतंयथाशक्तिकुर्याद्ब्राह्मणभोजनम् ३९ एकभ
क्तेननक्तेनतथैवायाचितेनच उपवासेनकुर्वीतमलमासव्रतंनरः ४० दानेवापिव्रतेवापियस्यशक्तिर्नविद्यते शरीरशो·
षणंतेनकर्तव्यंतीर्थसेवनम् ४१ सर्वथानास्तिसामर्थ्यंतैःकार्यंद्विजसेवनम् साधूनांसेवनंकार्यंसर्वतीर्थफलप्रदं
४२ शृणुस्कंदविवक्ष्यामिलोकानुग्रहहेतवे प्रविधानंतुदानानांफलानिमममासके ४३ योवैमलिम्लुचेमासिहिरण्यं·
शक्तिमात्रकं ददातिद्विजमुख्यायसप्राप्नोतिसमीहितं ४४ सुवर्णंहिसुवर्णायसुवर्णमिवमंदिरे सुवर्णायचयो·
दद्यात्नचशोच्यःकदाचन ४५ सुवर्णेसहिद्विजेदत्तेवह्निस्तुष्यतिदैवतैः तस्मिंस्तुष्टेभवेद्देविदारिद्र्यंनैवजन्मनि ४६ गो
दानेनभवेल्लोकोगवांलोमाभिसंख्यया कल्पांतंब्रह्मणोलोकोभवेत्पापप्रणाशनम् ४७ नित्यंदानंसदादेयंहिरण्यादि
मलिम्लुचे तेनदानप्रभावेनब्रह्मलोकमवाप्नुयात् ४८ रजतंश्रद्धयोपेतोद्विजेयोवितरत्यणु पितरस्तस्यसंतुष्टाभ·
वंतिनिखिलेष्टदाः ४९ ताम्रंवाताम्रपात्रंवायोददातिमलिम्लुचे श्रीरुद्रःसर्वदस्तस्यरुद्राणीसहितोभवेत् ५० पद्म
रागादिरत्नानांदानाद्भवतिभूपतिः मुक्तादानंविशेषेणभुक्तिमुक्तिप्रदायकम् ५१ वस्त्रदस्त्विंद्रसालोक्यमाविकंपापना
शनम् और्णिकंचमहामूल्यंवस्त्रंदत्तंभयापहं ५२ यथाकालोपभोगायवस्त्राद्यमुपकारकम् तद्दानंविविधान्लोकान्द
दात्येवनसंशयः ५३

४६ ४७ ४८ ४९ ५० ५१ ५२ ५३ ५४

५४ ५५ ५६ ५७ ५८ ५९ ६० ६१ ६२ ६३ ६४ नृगकथानकं श्रीम-

धान्यदानंमहादानंसदादेयंद्विजातये प्रीतयेवासुदेवस्यममसर्वार्थसाधनम् ५४ जलार्थिनेजलंदेयंतत्पुण्यमक्षयं
भवेत् उपानहाद्यदानेनयममार्गस्तरत्यावहम् ५५ घृतदानप्रभावेनसूर्यलोकमवाप्नुयात् सपत्नीकंद्विजंपूज्यवस्त्रा
भरणकंतुयः ५६ प्रदद्यान्मानवोभक्त्याकृतकृत्योभवेन्नरः सप्तधान्यप्रदानेनसप्तर्षिलोकमाप्नुयात् ५७ व्रीहयश्चय
वाश्चैवगोधूमाश्चप्रियंगवः मुद्गामाषास्तिलाश्चैवसप्तधान्यंप्रकीर्तितम् ५८ सहेमतिलदानेनसर्वाभीष्टमवाप्नुयात्
मोदकान्घृतकर्पूरसिताखाद्यविनिर्मितान् ५९ मधुराज्यविशिष्टांस्तुबालानजनमोदकान् नानावस्तुसमुद्भूतान्
मोदकान्स्कमनोहरान् ६० द्विजातिभ्यःप्रदत्वातुममलोकेमहीयते दानेनधनधान्याप्तिश्चतुर्वर्गसमागमः ६१ दानेन-
पापनाशश्चरोगनाशश्चदानतः दानेनवांछितावाप्तिर्दानात्पुत्रप्रपौत्रकाः ६२ तस्माद्दानंसदादेयंमलमासेविशेषतः
पात्रापात्रंविचार्याद्दौब्राह्मणायनिवेदयेत् ६३ ब्रह्मस्वंनैवगृण्हीयात्स्वल्पंवायदिवाबहु कुलंसमूलंदहतिब्रह्मस्वा
रणिपावकः ६४ ब्राह्मणार्थोह्यपहृतोहर्तारंपातयत्यधः अजानंतमपिह्येनंनृगंब्राह्मणगौरिव ६५ इतिश्रीसन-
पुराणसारोद्धारेश्रीपुरुषोत्तममासमाहात्म्येपुण्यकर्मदानधर्मनिरूपणंनामतृतीयोऽध्यायः ३ ६५ ६५
श्रीलक्ष्मीरुवाच निषिद्धानिचकर्माणिममाचक्ष्वसुरेश्वर तत्कृतेयागतिश्चैवपरलोकेचतांवद १ श्रीविष्णुरुवाच
त्रिविधानिचकर्माणिनिषिद्धानिपराणिच तान्यहंसंप्रवक्ष्यामिमनोवाक्कायजानिच २ मनसायत्कृतंपापंमानसंतद्धि
कीर्तितम् वाचाकृतंवाचिकंस्यात्कायजंकायिकंस्मृतम् ३ परद्रव्यापहारेच्छापरानिष्टविचिंतनं श्रुतिवाक्येष्व
विश्वासस्त्रिविधंमानसंस्मृतम् ४

द्भागवतेप्रसिद्धं ६५ इतिटीकायांतृतीयोध्यायः ३ ६५ १ २ ३ ४

५ ६ तामिस्रः आद्यः प्रथमोयेषु तेकेइत्याह स्कांदे तामिस्रंलोहशंकुंचमाहानिरयशाल्मलं रौरवंकुड्मलंपूतीमृत्तिकंकालसूत्रकं संघा-
तंलोहितोदंचसविशंसंप्रतापनं महानिरयकाकोलंसंजीवनमहापथम् अवीचिमंधतामिस्रंकुंभीपाकंतथैवच असिपत्रवनंघोरंतपनंतमश्चा-

प्रत्यक्षंचापरोक्षंवापरदोषानुकीर्तनम् असत्प्रलापमनृतंत्रिविधंवाचिकंस्मृतम् ५ अगम्यागमनंस्तेयंवृथाप्राणि
विहिंसनम् त्रिविधंकायिकंज्ञेयंतस्मादेतत्त्रयंत्यजेत् ६ तामिस्राद्याश्चबहवोनरकाश्चकुयोनयः व्याधयोनिर्मितादे-
वि भोगार्थंपापकर्मिणाम् ७ परोत्कर्षासहायेचपरानिष्टविचिंतकाः विविधान्नरकान्भुक्त्वादरिद्रोजायतेनरः ८ परो-
त्साहद्वेषिणोयेचपरदाराभिलाषिणः तेवैनिरयभोगांतेजायंतेभुविदुःखिताः ९ मिथ्याप्रवादिनोयेचपरपैशून्यवादिनः
रौरवंनिरयंभुक्त्वाजायंतेहीनयोनिषु १० ब्रह्महारौरवेघोरेआकल्पंपीड्यतेनरः तदंतेमानुषेलोकेक्षयरोगीहजायते
११ क्षत्रियघ्नोहिमनुजोतामिस्रेपरिपच्यते ततःकर्मक्षयाद्भूमौभवेदुष्टव्रणान्वितः १२ वैश्यहाकालसूत्राख्येपीड्य-
तेबहुवत्सरम् ग्रहणीगदसंयुक्तोपश्चादिहप्रजायते १३ शूद्रघ्नोमानवोदेविपीड्यतेसंप्रतापने शिशुघ्नस्त्वंधता-
मिस्रेंगनाघ्नःपूतिमृत्तिके १४ कुंभीपाकाख्यनरकेगोघ्नस्तुपरिपच्यते साधारणपशुघ्नश्चलोहशंकुंप्रपद्यते १५ ब्रह्म-
स्वहारिणोयेचदेवद्रव्यापहारिणः असिपत्रवनेघोरेपच्यंतेतेशरच्छतम् १६ एवंहिपापकर्माणोपच्यंतेनरकेचिरम्
इहलोकेप्रजायंतेदरिद्रामयसंयुताः १७ पुत्रपौत्रादिदुःखार्तापुनःपापपरायणाः दासीवेश्यारतोमर्त्योरेतःकूपेहिप-
च्यते १८ विधवागमनात्कुर्य्यंशाल्मलंनरकंव्रजेत् परदाररतोमर्त्योनानानिरयदुःखभाक् १९

लुकम् रेतःकूपमस्त्रग्वृष्टिः शृंखलायंत्रपीडनम् गिरिपातोंगभेदश्च तप्ततैलेषुपातनम् लोहस्तंभालिंगनंच छेदनंहस्तपादयोः एतेचा-
न्येचबहवो नरकाश्चकुयोनयइति ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९

मातास्तिति मात्रादीनांभेदानाह स्कांदे वर्गोत्तमोगुरुर्भूयोज्येष्ठोभ्राताच्चमातुलः पितृव्योवंशपूज्यश्चपित्रोश्चभगिनीपतिः इत्येतेपित ५।
षांपत्न्यस्तुमातरः तास्तयेरमतेमूढो मातृगामीसउच्यते पच्यंतेरौरवंघोरंयावच्चंद्रार्कतारकाः यदास्मिन्मानवेलोकेजायतेकर्मभागतः
मयग्रस्तोनिर्धनोबहुदुःखभाक् अनुजःशिष्यभृत्यश्चहीनवर्णश्चमित्रजः एतेपुत्रसमाज्ञेयायेषांपत्न्यःस्नुषास्मृताः स्वकन्यामि ५

मातास्तच्चस्वकन्यास्तस्नुषास्तभगिनीसुत्र रमतेयस्तमूढात्मारौरवादिषुपच्यते २० एवंस्त्रीणामपिज्ञेयंविविधंकर्म
जं:ऽलम् मद्यपानरतायेच्चमांसभोजनतत्पराः २१ तेसर्वेनिरयंयांतिभवंतिभुविदुःखिताः येशास्त्रविधिमुत्सृज्यवर्तंते
मूढबुद्धयः २२ ननिर्गमोभवेत्तेषांनिरयाद्बुराशिजे पापिनोयेदुराचारायेचलोकबहिष्कृताः २३ तेषांनकुर्यात्संसर्गः
कृतश्चेत्तत्समोभवेत् अभोज्यंनैवभोक्तव्यमनुक्तंनसमाचरेत् २४ तदहंसंप्रवक्ष्यामिशृणुसंक्षेपतःप्रिये अयज्ञःप
चयेन्मांसंमृतवत्सापयस्तथा २५ रजस्वलादिभिःस्पृष्टंचान्नंनीचाद्धृतंजलम् सेवनाद्धिनरोयातिनिरयंपरमार्तिदम्
२६ कपिलाक्षीरपानेनब्रह्मपत्रेषुभोजनात् शूद्रस्तुनिरयंयातिशालिग्रामशिलार्चनात् २७ ताम्रपात्रस्थितंदुग्धंगुडे
नमिश्रितंदधि कांस्यपात्रस्थितंतोयंसमंस्यात्सुरयाप्रिये २८ राजमाषामसूराश्चसूपरवल्वाटकास्तथा वल्लवाश्चक
लायाश्चकुलित्थाचणकास्तथा २९ पुण्येमासेविशेषेणनसेव्याःपापभीरुभिः वृंताकमूलकंतैलंदूषितान्नंतथाऽमिषं
३० दुर्नामकंपरान्नंचतथापर्युषितंप्रिये जंबीरंचैवपालांडुपुण्येच्छुःसर्वदात्यजेत् ३१

तरःस्मृताः तास्तयोरमतेमूढोक
न्यागामीसउच्यते तामिस्त्रंत्वंधतामिस्रेकुंभिपाकेचरौरवे स्तनागमनदोषेणक्रमेणपरिपच्यते सवर्णामित्रभार्याच्च पूर्वोक्तादशपितृजा स-
होदरासगोत्राचभगिन्यस्तुचतुर्दश एतास्तरमतेयस्तनरःपापपरायणः भगिनीगःसविज्ञेयःकुंभिपाकादिभोगभाक् अन्यात्तुपरनारीस्यात्-
यस्यांयोरमतेनरः परदारःसविज्ञेयःनानानिरयभोगिनइति २० २१ २२ २३ २४ २५ २६ २७ २८ २९ ३० ३१

३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९ ४० ४१ शाकलेतिहासमाह पाद्मे पुरामधुवने शाकलिर्नामब्राह्मण: आसीत् तस्यविमला सुशीलाइति भार्याद्वयं उभेशुभाचारयुतेपतिप्रियहितेरते आसातां एकदासुशीलाजलार्थंयमुनायांगता· तत्रस्नानार्थं लोकानां कोलाहलं दृष्ट्वा· नम्रतयापतिं प्रोवाच अद्यकिंदिवसंपुण्यं लोकः यमुनायांयाति शाकलिरुवाच हेभद्रे अयंश्रीपुरुषोत्तममासः प्राप्तः अ

प्रजानांपीडनेनैवराजाभ्योनीचसेवया पतिवाक्योल्लंघनेननारीनिरयमाप्नुयात् ३२ दिवानमदनः सेव्यो नित्यंचैवपरित्यजेत् रसानांविक्रयोनैवकार्योशूद्रंविनाऽखिलैः ३३ अस्मिन्मासेचकल्याणिनासच्छास्त्राण्युदाहरेत् नस्वपेत्परशय्यायांनालपेद्वितथंक्वचित् ३४ परापवादान्नब्रूयान्नकथंचित्कदाचन परान्नंचनभुंजीतनकुर्वीतपरक्रियाम् ३५ एकान्नेननरोयस्तुमलमासंनिषेवते चतुर्भुजोनरोभूत्वासयातिपरमांगतिम् ३६ पुनर्ग्रामाः पुनर्वित्तं पुनः पुत्राः पुनर्गृहम् पुनः शुभाशुभंकर्मनशरीरंपुनः पुनः ३७ तद्रक्षितंतुधर्मार्थंधर्मोज्ञानार्थमेवहि ज्ञानेनफलभोमोक्षस्तस्माद्धर्मंसमाचरेत् ३८ चलंवित्तंचलंचित्तंचलंसंसारजंसुखम् एवंज्ञात्वाविरक्तः सन्धर्माभ्यासपरोभवेत् ३९ गोभूहिरण्यदानानांयत्फलंलभतेनरः तत्फलंसमवाप्नोतिदीपदोनात्रसंशयः ४० दीपदः कांतिमाप्नोतिदीपदोधनमुत्तमम् दीपदोज्ञानमाप्नोतिदीपदोमोक्षमव्ययम् ४१ दीपविध्वंसनेपुण्यंसर्वंनश्यतियत्कृतम्

अत्रस्नानेनदीपदानेनचमहत्फलमिति दीपमाहात्म्यंश्रुत्वा सुशीलोवाच हेभर्तः दीपदानेममापिउत्साहो वर्तते तवाज्ञाचेत्तदासउवाच हेदेवि अहंप्रसन्नोस्मि त्वं· स्नानंदीपंचयत्नतः कुरुइतिभर्तुराज्ञांगृहीत्वा सुशीलया व्रतमारब्धंतदाविमला विमनासती सपत्नीद्वेषभावेनगृहकार्यंनकरोति किंचाखंडदीपस्यविघ्नंचकथंभवेदितिचिंतयित्वा सुशीलाभर्ताचबहिर्गतेसति गृहद्वारंविधाय दीपंशमयामास सुशीलागृहमागत्य नष्टंदीपमालोक्य दुःखितासती दीपंप्रबोधयामास द्वितीयेदिवसे दुष्टाफूत्कारेणप्रशाम्यति कदाचित्तैलंहरति एवंनित्यंविघ्नं करोति सुशीलाविमलायाः

कल्यंज्ञात्वापिशुभाशुभंनोक्तं भर्तृदेवप्रसादाभ्यांउत्तमंअन्नंपालितं ब्राह्मणाः भोजिताश्चविमलायाः दीपदानाशनयोगेन पुनर्नयनंदृष्टंअंध
त्वंचप्राप्ता स्वल्पकालेनमृत्युंप्राप्ता त्रिंशत्सहस्राब्दं रौरवेपतिता ततोपापशेषेण ग्रामशूकरीव्याली शृगाली वल्गुली गृहगोधाचक्रमेण भूत्वा
तेनिषादकुलेगलितकुष्ठरोगयुक्ताजाता एवंतथाविमलया दीपप्रशमनात्फलंप्राप्ता दुःखवियोगेनकाशीवासद्गतिंगताइति ४२ परंविष्णुलोकंप्रापेतिशेषः
यथामार्जारकः अत्रप्रसिद्धेतिहासमाह पुरासरस्वतीतीरे कृशर्माब्राह्मणः मलमासेविष्णुंसंपूज्य दीपंसंपाद्यनूमा
संनिध्ये एकदाएकादशीदिनेअर्धरात्रे मूषकार्थंमार्जारः दीपकस्थलेचागतः मंदतेजसिदीपेतैलपानार्थं मूषकेचागते मूषकार्थंमार्जारः

शाकलस्ययथाभार्याविमलादुःखमापह ४२ दीपप्रबोधनेबुद्धिंयोदद्यातिमलिम्लुचे सर्वपापविनिर्मुक्तोपरंमार्जारकोयथा ४३
एवंनिषिद्धकर्माणिमलमासेविवर्जयेत् वाल्मीकिनायेनियमाः प्रोक्तास्तान्वैसमाचरेत् ४४
इतिश्रीसत्तपुराणसारोद्धारेश्रीपुरुषोत्तममासमाहात्म्येनिषिद्धकर्मनिरूपणंनामचतुर्थोऽध्यायः ४ ६९
वाल्मीकिरुवाच पुरुषोत्तममासेयेनियमाःपरिकीर्तिताः तान्शृणुष्वमयाराजन्कथ्यमानान्समासतः १ हविष्यान्नंचभुंजीतप्रयतःपुरुषोत्तमे
गोधूमाःशालयःसर्वाःसितामुद्गायवास्तिलाः २ कलापकंचनीवारावास्तूकं
हिलमोचकाः आर्द्रकंकालशाकंचमूलंकंदंचकर्कटी ३

उद्यतः तस्यपादप्रहारेण दीपः संवर्धितः प्रातः केनचित्कारणेन मार्जारः ममारततः विमानमारुह्य दीपप्रबोधपुण्येनविष्णुलोकंजगामेति ४३ ४४
इतिपुरुषोत्तममासमाहात्म्यटीकायांचतुर्थोध्यायः ४ ६९ अथपुरुषोत्तममासनियमानाह· तत्रैकदादृढधन्वानृपंप्रतिपुरुषोत्तममासप्रसंगेन तद्व्रतिनोनियमान् वर्णयति वाल्मीकिः पुरुषोत्तममासेइति १ हविष्यान्नंगोधूमादितिलाःसिताः २ कलापकंलोकेकावळीलाकधान्यंवा नीवाराः देवतंडुलाः वास्तूकंलोकेचाकवतशाकं हीलमोचिका जलब्राह्मी कालशाकंशरपुंखा कर्कटीकाकडी ३

मासत्त्व·४
पुरु·मा·१३
अ·५

अनुस्रुतसारंपयः ४ नागरं शुंठिं क्रमुकं पूगीफलं लवली हरपारेवडी धात्रीफलानि प्रसिद्धानि अगुडं ऐक्षवं गुडरहितं इक्षुपदार्थं शर्करा·मिश्रिसंज्ञकं ५ ६ सर्वामिषाणि वक्ष्यमाणानि मांसं प्रसिद्धं क्षत्रियादिभक्ष्यविषयं क्षौद्रं मधु सौवीरं बदरीफलं कांजिं वा राजमाषं चवला रु

रंभासैंधवसामुद्रेलवणेदधिसर्पिषी पयोऽनुस्रुतसारंचपनसाम्रेहरीतकी ४ पिप्पलीजीरकंचैवनागरंचैवचिंचिणी
क्रमुकंलवलीधात्रीफलान्यगुडमैक्षवं ५ अतैलपक्वंमुनयोहविष्यंप्रवदंतिच हविष्यभोजनंनॄणामुपवाससमंवि
दुः ६ सर्वामिषाणिमांसंचक्षौद्रंसौवीरकंतथा राजमाषादिकंचैवराजिकामादकंतथा ७ द्विदलंतिलतैलंचतथान्न
शल्यदूषितं भावदुष्टंक्रियादुष्टंशब्ददुष्टंचवर्जयेत् ८ परान्नंचपरद्रोहंपरदारागमंतथा तीर्थंविनाप्रयाणंचपरदेशं
परित्यजेत् ९ देववेदद्विजानांचगुरुगोव्रतिनांतथा स्त्रीराजमहतांनिंदांवर्जयेत्पुरुषोत्तमे १० प्राण्यंगमामिषंचूर्णंफ
लेजंबीरमामिषम् धान्येमसूरिकाप्रोक्ताअन्नंपर्युषितंतथा ११ अजागोमहिषीदुग्धादन्यदुग्धादिचामिषं द्विजक्री·
तारसाःसर्वेलवणंभूमिजंतथा १२ ताम्रपात्रस्थितंगव्यंजलंचर्मणिसंस्थितम् आत्मार्थंपाचितंचान्नमामिषंतद्बुधैःस्मृ
तम् १३ ब्रह्मचर्यमधःशय्यांपत्रावल्यांचभोजनम् चतुर्थकालेभुक्तिंचप्रकुर्यात्पुरुषोत्तमे १४ रजस्वलांत्यजम्लेच्छ
पतितैर्व्रात्यकैःसह द्विजद्विड्वेदबाह्यैश्चनवदेत्पुरुषोत्तमे १५ एभिर्दृष्टंचकाकैश्चसूतकान्नंचयद्भवेत् द्विपाचितंच
दग्धान्नंनैवाद्यात्पुरुषोत्तमे १६ पलांडुलशुनंमुस्तांछत्राकंगृंजनंतथा नालिकंमूलकंशिग्रुंवर्जयेत्पुरुषोत्तमे १७

ष्णामुदान्नंवा मादकंभृंगा ७ शल्यदूषितं शल्यं अस्थिखर्परादि भावदुष्टंयथालशुणंश्वेतवृंताकंदूरतः अंडभ्रमः क्रियादुष्टंपनसादि ८ ९
१० ११ भूमिजं लवणं बागडक्षारादि १२ १३ १४ १५ १६ मुस्ता मोथा छत्राकं महाराष्ट्रभाषायां आ
लवे इतिप्रसिद्धं नालिकं नाडिशाकं शिग्रुं शेवगाइति प्रसिद्धम् १७ ५ ५ ५ ५

१३

१८ वृहती डोरली तरुणी शेवती मुरब्बा कलिंगं तर्बुजं १९ अलांबुं दुध्या भोपला इति प्राकृते प्रसिद्धं पटोलं कडुपडवलं चर्ममसूरिका जलजं शाकं कमलबीजादिशाकं २० २१ २२ २३ २४ २५ २६ २७ २८ २९ ३० चित्रबाहुरितिस्पष्टार्थः पूर्वजन्मांतरे

एतानिवर्जयेन्नित्यंव्रतीसर्वव्रतेष्वपि कृच्छ्राद्यंचापिकुर्वीतस्वशक्त्याविष्णुतुष्टये १८ कूष्मांडंवृहतीचैवतरुणीमूलकं
तथा श्रीफलंचकलिंगंचफलंधात्रीभवंतथा १९ नारिकेलमलांबुंचपटोलंबदरीफलम् चर्मवृंताजिकंवल्लिशाकंतुज
लजंतथा २० शाकान्येतानिवर्ज्यानिक्रमात्प्रतिपदादिषु धात्रीफलंरवौतद्वद्वर्जयेत्सर्वदागृही २१ यद्यद्वोवर्जयेत्किं
चित्पुरुषोत्तमप्रीतये तत्पुनर्ब्राह्मणेदत्वाभक्षयेत्सर्वदैवहि २२ कुर्यादेतांश्चनियमान्व्रतीकार्तिकमाघयोः नियमेन
विनाराजन् फलंनैवाप्नुयाद्व्रती २३ उपोषणेनकर्तव्यः शक्तिश्चेत्पुरुषोत्तमः अथवाघृतपानंचपयःपानमथान्वितम् २४
फलाहारादिवाकार्यंयथाशक्त्याव्रतार्थिना व्रतभंगोयथानस्यात्तथाकार्यंविचक्षणैः २५ पुण्येऽह्निप्रातरुत्थायकृत्वा
पूर्वाह्निकाः क्रियाः गृह्णीयान्नियमान् भक्त्याश्रीकृष्णंचहृदिस्मरन् २६ उपवासस्यनक्तस्यचैकभक्तस्यभूपते एकं
चानिश्चयंकृत्वाव्रतमेतत्समाचरेत् २७ श्रीमद्भागवतंभक्त्याश्रोतव्यंपुरुषोत्तमे तत्पुण्यंवचसावक्तुंविधातापिनश
क्नुयात् २८ शालिग्रामार्चनंकार्यंमासेश्रीपुरुषोत्तमे तुलसीदललक्षेणतस्यपुण्यमनंतकम् २९ कर्तव्यंदीपदानं
चपुरुषोत्तमप्रीतये अशक्तस्तिलतैलेनसर्पिषावैभवेसति ३० चित्रबाहुर्नृपःपूर्वमुग्रदेवप्रसादतः

अत्रप्रसिद्धाकथा

वृहन्नारदीये धृष्टधन्वानंप्रतिवाल्मीकिरुवाच शृणुष्वदीपमाहात्म्यंपंचपातकनाशकृत् सौभाग्यनगरेराजाचित्रबाहुरितिश्रुतः सत्यवादीविष्णुभक्तः शीलरूपदयान्वितः ब्रह्मण्योधर्मशीलश्चशूरो प्राज्ञोजितेंद्रियः तस्यभार्याचंद्रकलाचतुःषष्ठिकलान्विता पतिव्रतातयासाकं बुभुजेमेदिनींयुवा एकदाचागतंगेहेत्वगस्त्यंमुनिपुंगवम् पूजयामासविधिवत्कृतासनपरिग्रहं प्रसन्नोमुनिराडाहधन्योसित्वंनृपोत्तम धन्याइमा-

मासतत्त्व॰४
पुरु॰मा॰१३
अ॰५

प्रजाःसर्वाःश्रीकृष्णाचरणाश्रयाः अद्यमेसफलावाणीत्युच्यतेयत्त्वयासह इत्युक्त्वागंतुकामंतंननाममहिषीतदा अगस्त्यउवाच अवैधव्यंसदातेस्तुभक्त्याभजपतिंशुभे दृढातेस्तुसदाभक्तिः श्रीगोपीजनवल्लभे इत्थमाशीर्ददानंतंभूपःप्राहमहीपतिः विपुलांमेकथंलक्ष्मीः कथंराज्यमकंटकं पतिव्रताकथंपत्नीवदतन्मेमुनीश्वर अगस्त्यउवाच हेचित्रबाहो तवप्राग्जन्मवृत्तांतंमयाज्ञातं तदद्यसर्वंकथयामि पुराचमत्कारपुरे त्वं मणिग्रीवनाम्नाशूद्रः महापापकर्मरतः आसीत् इयंतवभार्या पूर्वजन्मनि पतिव्रताधर्मेण तवसेवा तत्परा आसीत् यदा अतीवपापकर्मा अयमिति लोकैर्बहिष्कृतः तदात्वंभार्यांगृहीत्वा निर्जनेवने जीवहिंसयाआत्मपोषणंचकार एकदामृगमांसलिप्सया वने भ्रमन्सन् दिङ्मूढंतृषासंपीडितं मुमर्षुं उग्रदेवनामकं ब्राह्मणंदृष्ट्वा दययातंस्वाश्रमे आनीय दंपतीभ्यांतस्यसेवाकृता ततः लब्धसंज्ञोउग्रदेवः मणिग्रीवभुजमालंब्य सरसीतटंगत्वा स्नात्वानित्यविधिंकृत्वा मणिग्रीवेनानीतं फलाहारंजलपानंचकृत्वा वटमूलमाश्रित्यास्थितः तदापादसेवा-

मलिम्लुचेदीपदानात्प्रापराज्यमकंटकम् ३१

तत्परंशूद्रं उग्रदेवउवाच हेमणिग्रीव त्वयामेजीवितंदत्तं तेकिंददामि तद्ब्रूहि दंपतिभ्यांवनंकेनदुःखेनसेवितं तद्ब्रूत सउवाच हेद्विजोत्तम चमत्कारपुरे धर्मपत्न्यासह निवसतः ममदैवयोगेन पापबुद्धिः समभवत् तदासर्वैस्त्यक्तोहं वनमागत्य जीवहिंसया निर्वाहंकरोमि अतः येनमेपापबुद्धिः दारिद्र्यंच नष्टंभवेत्तत्कर्म मेब्रूहि त्वामहंशरणंगतः उग्रदेवउवाच हेमहाभाग त्वंकृतार्थोजातः यत् आतिथ्यंममकृतं अतःतेकल्याणंभावि दानव्रततीर्थैर्विना तेदारिद्र्यंनष्टमिति मयानिर्धारितं अतःपरं तृतीयः मासः श्रीपुरुषोत्तममासः अस्ति तत्र भवद्भ्यां विपिने अस्मिन्सरोवरे स्नात्वा घृतेनवा तिलतैलेन मासपर्यंतं दीपदानं कर्तव्यं घृततैलाभावे इंगुदीजेन तैलेनवा कर्तव्यं तेनतव समूलं दारिद्र्यं नाशमेष्यति अगस्त्यउवाच इत्युक्त्वाउग्रदेवः प्रयागंजगाम ततः मासद्वयानंतरं सभार्यो मणिग्रीवः श्रीपुरुषोत्तममासव्रतं दीपदानं चचकार तेनउग्रदेवप्रसादेन निष्पापौतौ स्वर्गंगत्वा तत्रत्यं सुखंभुक्त्वा भोगांते हेनृप सः त्वं वीरबाहुगृहे चित्रबाहुनाम्नाजातः इयंचंद्र- १४

कलानाम्नीतवाधुनास्त्रीसाजन्मांतरे गुणसुंदरीतवसेवनतत्परासीत् पूर्वजन्मनिदीपदानेन तवराज्यैश्वर्यमाभिर्जाता वाल्मीकिरुवाच चित्रबाहु
चरितंपुरातनं सन्निरूप्यकलशोद्भवोमुनिः सत्कृतिंसमधिगम्यतत्कृतामस्तयाशिषमुदीर्यनिर्ययाविति ३१ भवतीतिशेषः ३२ ३३ ३४

ममामासेतुयःस्नानंकुरुतेशीतवारिणा सयातिमामकंधाममममैवातीववल्लभः ३२ कृत्वापूर्वंगृहेस्नानंपश्चात्स्नानंस
माचरेत् गुरोराज्ञांसमादायतीर्थेस्नानंप्रकीर्तितम् ३३ तीर्थेनद्यांदेवखातेतडागेह्रदनिर्झरे कुंडेवाप्यांतथाकूपेस्नानंकु
र्याद्यथोदितम् ३४ तेषामभावेस्वेगेहेघटस्नानंविधीयते घटमध्येजलंक्षिप्त्वामंत्रंचेममुदीरयेत् ३५ भोगंगेयमुनेदेवि
गोदावरिसरस्वति नर्मदेसिंधुकावेरिजलेस्मिन्सन्निधिंकुरु ३६ तीर्थस्नात्वागृहेवापिदेहंवस्त्रेणमार्जयेत् मुखपृष्ठेच
हृदयेबाह्वोःशिरसिचापरे ३७ श्रीमतांवस्त्रयुग्मेनमज्जनंहिविधीयते एवंयोमार्जयेद्गात्रंसस्नानस्यफलंलभेत्
३८ अन्यथामार्जनंगात्रेस्नानोच्छिष्टंसमंततः तस्मात्तीर्थेनकर्तव्यंमार्जनंविधिवर्जितम् ३९ समर्ज्जनंस्वगात्राणां
नकर्तव्यंनृभिःकदा तीर्थार्द्रकांशसलिलंपिबंतिपितरोसदा ४० समृज्यागंस्कधिधेना शुद्धवस्त्रोऽर्चयेद्धरिम् ज्वा
लयेत्सत्यहंदीपंयथाशक्तिसमन्वितः ४१ अशक्तोज्वालयेद्दंतेत्रिंशद्वर्तिसमन्वितम् पूजयेत्प्रत्यहंविष्णुंशृणुयाच्चह
रेःकथाम् ४२ तिलांश्चभक्षयेन्नित्यमेकभुक्तंचकारयेत् हविष्यान्नंतुयोभुंक्तेमासमेकंतिलांस्तथा ४३ अक्षारं
लवणंत्यक्त्वासयातिपरमांगतिम् भूमिशायीभवेद्यस्तु मासमेकंसदाव्रती ४४ विमानवरमारूढोमोदतेत्रिदशैः
समम् तैलाभ्यंगंतुयोमासंपरित्यजतिमानवः ४५ दिव्यदेहोवसेत्स्वर्गेसूर्यवद्भासतेसदा तांबूलंत्यजतेयस्तुमा
समात्रमहाव्रती ४६

३५ ३६ ३७ मज्जनंस्नानं एवंमुखादिक्रमेण अन्यथा मुखादि कर्मविना ३९ नृभिरित्यत्र स्त्रीभिरि
ति कुत्रचित्पाठः अत्रमार्जननिषेधः शिरःप्रभृतिविज्ञेयः मुखप्रभृति मार्जनविधि दर्शनात् ४० ४१ ४२ ४३ ४४ ४५ ४६

४७ ४८ ४९ ५० ५१ ५२ ५३ कांस्यान् कुंभानित्युत्तरेण संबंधः ५४ ५५

स्त्रवसौरभ्यमापन्नोदेवतैःसहमोदते भोगांस्त्यजेद्योमासंसस्वर्गेभाग्यवान्भवेत् ४७ ब्रह्मचर्यंचयोमासंकुरुतेव्रतचर्यया सस्वर्गेसत्स्त्रियंभुंक्तेभोगांश्चापिनिरर्गलान् ४८ निर्व्यंजनंचयोभुंक्तेमासमेकंव्रतादरी खाद्यलेह्यंतथाभोज्यं लभतेसुरसुंदरि ४९ मौनमकुरुतेयस्तुमासमेकंमहामनाः चक्रवर्तीभवेद्राजासर्वेषांमूर्ध्निसंस्थितः ५० सत्यंवदतियो मासंममभक्तिसमन्वितः सयातिवैष्णवंधामपुनरावर्तिवर्जितः ५१ योददातितिलप्रस्थंमासमेकंव्रतादरी तिलसंख्या वसेत्स्वर्गेवर्षाणित्रिदशार्चितः ५२ ब्राह्मणान्भोजयेद्यस्तुप्रत्यहंभक्तितत्परः भोजितास्तेनवैसर्वेपितरोऋषयोऽमराः ५३ मासांतेदापयेत्कांस्यान्स्वर्णान्रूप्यांश्च मृन्मयान् सजलान्वस्त्रसंवीतान्सममोदकसंयुतान् ५४ त्रिंशन्मितांश्च· योदद्यात्कुंभान्तोयप्रपूरितान् तदर्धंचतदर्धंचतथापंचमितान्घटान् ५५ भोजयेद्ब्राह्मणांस्त्रिंशत्तदर्धंचतदर्धकं पंचवाभोजयेद्विप्रानशक्तोपियथाविधि ५६ एवंयोद्वादशान्मासान्भक्त्यास्नातीहमानवः स्वात्मनस्तारयेत्सद्यः कुलमेकोत्तरंशतम् ५७ तिस्रःकोट्योर्धकोटीचतीर्थानित्रिभुवनत्रये जलमावृत्यतिष्ठंतिसंप्राप्तेहिमलिम्लुचे ५८ मलिम्लुचेतुसंप्राप्तेयोनस्नातीहमानवः तृषितोजान्हवींप्राप्ययथातिष्ठतिदुर्मतिः ५९ स्नानंमलिम्लुचस्यापिखट्वांगो नृपतीश्वरः

५६ द्वादशान्मासान् द्वादशाधिकमासान् ५७ ५८ ५९ खट्वांगोनृपःकृत्वेतिशेषः अत्रप्रसिद्धेतिहासमाह· स्कांदोक्तमाहात्म्ये शौनकंप्रतिसूतउवाच पुरासत्ययुगेनारदः लोकान्पर्यटन्सन् शिवदर्शनार्थंकैलासंगतवान् तत्रस्कंदः नारदमुवाच हेऋषे कुतोवोआगमनं कोनरः पावनीकृतः सउवाच खट्वांगनृपसकाशादहं आगतः सममपश्यतः अधिकव्रतपुण्येन विमानमारुह्य वैकुंठंगतवान् तच्छ्रुत्वाविस्मितंकुमारंनारदः पुनरुवाच पुरासत्ययुगे कांपिल्यनगरे धर्मध्वजोनामनृपः धर्मेणप्रजाःपालयामास तत्रधर्मपा

लोनामवैश्यः महाधनी महादानधर्मकर्ता आसीत् यस्यपुण्यसंख्यांकर्तुंनकोपिसमर्थः तस्यपंचपुत्राः आसन् तत्रज्येष्ठपुत्रः धृष्टधीः अतिपापिष्ठः आसीत् ऋतुस्नाता माताप्रथमं चांडालमुखदर्शनंचकार तेनदोषेणायं धृष्टधीश्चांडालकर्मतत्परः आसीत् पितरिमृते पितृधनंसर्वं कुमार्गेण व्ययीकृतं तदाचौर्येणधनंसंपाद्यवेश्यासंसक्तोबभूव चौर्यकर्मणियदाराज्ञाधृतःतदा धर्मपालपुत्रंज्ञात्वा मोचितः राज्ञाज्ञातिभिः वेश्ययाच यदापरित्यक्तः तदावनंगत्वा सन्मार्गलुंपकः शश्वत् साधूनांहिंसनेरतः वस्त्रार्थंमानुषान्हंति भक्षणार्थंमृगांस्तथा लुंपकस्यभयान्मार्गे हाहाशब्दोभवन्महान् एवंनिवसतस्तस्य व्यतीता द्वादशाः समाः एकदामलिम्लुचेनद्यांस्नानार्थमागतं मार्कंडेयंदृष्ट्वा बाणमादाय हननार्थंदुद्राव तदाऋणिः कमंडलुजलेन तंपापपुरुषंप्रोक्षयन् तज्जलस्पर्शेननिर्मलः धनुर्बाणान्त्यक्त्वाशीघ्रंपादयोरपतत् ममापराधं क्षमस्व पापात्मांमोचयेत्युवाच तदाकृपयामुनिः तमुवाच हेधृष्टबुद्धे अधुनानिकटेमलिम्लुचोमासः आगतः फलाहारीनित्यंस्नानंकुरु ते

भुक्त्वाभोगान्सुविपुलानंतेमोक्षंजगामसः ६०

तसर्वपापान्मुक्तोभविष्यसि मयासह महानद्यांमासमेकंदृढव्रतः कृत्वास्नानंयथाशक्त्या पश्चाच्छ्रेयमवाप्स्यसि प्रयुक्तोमुनिनासार्द्धं चक्रेस्नानंदृढव्रतः तदाधर्मध्वजः मनसिविचारमकरोत् अहोधर्मपालस्यपुत्रोमया ज्ञातिभिश्चपरित्यक्तः वनेस्वोदरपोषणार्थंपापंकरोति तत्पापंसर्वेषामस्माकंच भवेत् यतश्चोक्तं ज्ञातित्यक्तोहिकुरुते पापंज्ञाति विवर्जितः तत्पापंज्ञातिबंधूनां जायतेमनुरब्रवीत् इति अतःतंशीघ्रं आनयंतु नोचेद्दंड्याभविष्यथ एवंनृपवचःश्रुत्वा चत्वारोबांधवाः वनेगत्वा मार्कंडेयनिकटेस्थितंधृष्टधियं अतितेजस्विनंदृष्ट्वारथमारोप्यगृहमानिन्युः धृष्टधीरपितत्प्रभृति विविधधर्मानाचरत् शतंमलिम्लुचाः विधिनास्नाताः पुत्रपौत्रधनधान्यैश्वर्यसुखंभुक्त्वा वृद्धावस्थायांमृत्युंप्राप तदायमदूतैर्यमांतिकंनीतः तंदृष्ट्वायमः अनेनकिमाचरितमितिचित्रगुप्तमपृच्छत तदाचित्रगुप्तउवाच अस्यपापकलेखनेशतंलेखिनोधर्षिताः पापस्यांतोनास्ति परंतु मार्कंडेयप्रसंगेन भक्त्याविधिना शतमधिमासाः स्नाताः इदंपुण्यंजातं तच्छ्रुत्वायमः

तूर्णं आसनादुत्थाय तंनत्वा प्रोवाच हेवैश्याग्र्यत्वयाशतमधिकमासाः स्नाताः अतः अहंपावितोस्मि एकमासस्नानेन तवशतजन्मसमुद्भवं पापं
गतं मासाष्टकस्नानेन सार्वभौमोराजाभविष्यसि पश्चादेकोत्तरशतकुलैःसह विष्णुलोकंगमिष्यसि नारदउवाच इत्युक्त्वावैश्यवर्योसौधर्मराजे
नधीमता खट्वांगोनामराजर्षिःसार्वभौमः कृतोनृपः मलिम्लुचप्रसादेनविभवा मनसेप्सिताः भुक्त्वाचविपुलान्भोगान्दत्वादानान्यनेकशः
गतोसौवैष्णवंधाममयादृष्टोद्यचक्षुषइति ६० मलिम्लुचस्नायीतिशेषः ६१ ६२ ६३ ६४ ६५ बहुकथानकमध्येचतुर्विंशतिमे
ध्यायेविस्तरेणनिरूपयिष्यतीति ६६ इतिटीकायांपंचमोऽध्यायः ५ ६७ अथपुरुषोत्तममासव्रतिनः नित्यपूजाविधानंकथय

वैशाखस्यसहस्रंचैवकार्तिकस्यायुतंतथा माघस्नानस्यलक्षस्यफलंप्राप्नोतिमानवः ६१ मधुर्दद्यान्महालक्ष्मीं
माधवोमनसेप्सितम् शुक्रः शक्रपदंदद्याच्छुचिर्दद्याद्धरेंतिकम् ६२ नभोनभगतिंदद्यात्नभस्योब्रह्मणोंतिकं
आश्विनोप्यपतित्वंचकार्तिकोकीर्तिमुत्तमाम् ६३ मार्गशीर्षमनोयानंविमानंप्राप्नुयान्नरः तपसिस्यात्तपोलोकंतप·
स्येतापसीगतिम् ६४ यःस्नातिद्वादशान्मासान्भुक्त्वाभोगाननर्गलान् अंतेमोक्षमवाप्नोतिमलमासकृतमज्जनात् ६५
अधिमासप्रसादेनबहुर्मुक्तोमहाभयात् ६६ इतिश्रीसप्तपुराणसा॰ श्रीपु॰ मा॰मा॰ पुरुषोत्तममासनियमकथनं·
नामपंचमोऽध्यायः ५ ६७ विष्णुरुवाच पुरुषोत्तममासस्यविधिंवक्ष्यामिसत्व्रते ब्राह्मेमुहूर्तेचोत्थायचिंतयेदा
त्मनोहितं १ श्रीहरिंमनसाध्यात्वास्मृत्वागुरुपदांबुजं

ति· विष्णुरुवाचेत्यादिना ब्राह्मेमुहूर्ते सूर्योदयात्प्रागुपां·
त्योमुहूर्तः द्विघटिकात्मकः ब्राह्मसंज्ञकः १ जलाशयमिति जलाशयंगच्छेदित्यत्र मलमासेकीदृशंजलाशयंगच्छेदित्यपेक्षायामाह·
स्कांदोक्तमाहात्म्ये गंगागोदावरीरेवाचंद्रभागासरस्वती यमुनागोमतीकृष्णामहेंद्रतनयोत्तमा कावेरीसरयूश्चैवाक्षिप्राभीमरथीशु·
भा चर्मण्वतीतथातापीपयोष्णीगंडकीशिवा एतानद्योधिकेमासेदुर्लभाकमलोद्भवे एतासुदुर्लभंज्ञेयंस्नानदानार्चनंप्रिये विसंक·

मेतुसंप्राप्तेमानवैः पुण्यकर्मभिः आसामान्यतमेसेव्याद्वतंतत्रसमाचरेत् गंगादीनामलाभेचतडागेस्नानमाचरेत् तदभावेचवाप्यांवा·
कूपोद्धृतजलेनवा प्रातःस्नानंनरैः कार्यंयत्रकुत्रजलाशयेइति २ अर्घ्यांतंसंध्यावंदनंकर्मकृत्वापुरुषोत्तमंपूज्य पश्चान्माध्याह्निकंनि·

ततोजलाशयंगच्छेत्स्नात्वातत्रयथाविधि २ अर्घ्यांतंकर्मनिर्वर्त्यततःस्वगृहमाविशेत् एकांतेविमलेस्थाने मंडपं
तत्रकारयेत् ३ गोमयेनोपलिप्तेचरंगमाल्योपशोभिते वितानतोरणयुतेनियतोवाग्यतःशुचिः ४ वृत्तंवाचतुरस्रं
वामंडलंगोमयेनतु विधायाष्टदलंकुर्यात्तंडुलैर्व्रतसिद्धये ५ कुंकुमेनचद्रव्येणकेवलंचंदनेनवा धान्यराशि·
स्तत्रकार्यःकलशंतत्रविन्यसेत् ६ सौवर्णंराजतंताम्रंमृन्मयंवानवंदृढम् अव्रणंकलशंशङ्कंतथावस्त्रादिवे
ष्टितम् ७ तत्रोदकंसमापूर्यशङ्खतीर्थाहृतंशिवम् पंचपल्लवसंयुक्तंपंचरत्नसमन्वितम् ८ कलशस्यमुखेवि
ष्णुमित्यादिमंत्रलिंगकैः तीर्थानिदेवतास्तत्रनियोज्यचततःपरम् ९ ततःसंपूज्यकलशमुपचारैःसमंत्रकैः तस्यो
परिन्यसेत्पात्रंताम्रपीतांबराद्वृतम् १० तस्योपरिन्यसेद्धैमंराधयासहितंहरिम् राधयासहितःकार्यःसौवर्णः
पुरुषोत्तमः ११ पलमात्रसुवर्णेनतदर्धार्धेनवापुनः तदर्धेनतदर्धेनवित्तशाठ्यविवर्जितः १२ वामूर्तिंस्थाप
येत्तत्रत्वयासहममानघे ततःकुर्याच्चसंकल्पंव्रतीनियतमानसः १३ शुक्लप्रतिपदारभ्ययावत्स्यात्सितृतोषि·
णी तावद्व्रतंचरामीतिश्रीहरेःप्रीतयेतव १४ उपवासस्यनक्तस्यचैकभक्तस्यभामिनि स्नानदानार्चनादेश्चकृत्वै
कंनिश्चयंहृदि १५ व्रतेनानेनदेवेशप्रसन्नोमेसदाभव एवंविधंतुसंकल्पमादौकुर्याद्व्रतीनरः १६

त्यंकुर्यादिति तत्रपुरुषोत्तमनित्यपूजाक्रममाह एकांतेत्यादिना ३ ४ ५ ६ आदिशब्देनकौशेयंरक्तसूत्रंवातेनवेष्टितं ७ ८ ९
१० ११ पलप्रमाणंचतुःकर्षैःपलंप्रोक्तंकर्षःस्याद्दशमाषकइति पुनःशब्देनदशार्धंपंचमाषकः १२ वाअथवानित्यपूजनात्मिकांमूर्तिं १३
१४ १५ १६

अग्न्युत्तारणविषये विशेषो बृहन्नारदोक्तमाहात्म्ये अनलोत्तारणंकृत्वाप्रतिमायास्ततःपरं प्राणप्रतिष्ठांकुर्वीतेत्यन्यथाधातुरेवसा प्रतिमायाः कपोलौ द्वौ स्पृष्ट्वा दक्षिणपाणिना प्राणप्रतिष्ठांकुर्वीततस्यांदेवस्यवैहरेः अकृतायांप्रतिष्ठायां प्राणानांप्रतिमारूत्व यथापूर्वंतयाभावःस्वर्णादीनान देवता अन्येषामपिदेवानांप्रतिमास्वपिपार्थिवे प्राणप्रतिष्ठाकर्तव्यातस्यांदेवत्वसिद्धये पुरुषोत्तमबीजेन तद्विष्णोरित्यनेनवा तथैवत्हृदयेंगुष्ठंदत्वाशश्वच्चमंत्रवित् एभिर्मंत्रैःप्रतिष्ठांतुत्हृदयेपिसमाचरेत् अस्यैःप्राणाःप्रतिष्ठंतु अस्यैःप्राणाःक्षरंतुच अ-

ततोऽग्न्युत्तारणंकार्यंततःप्राणनिवेशनम् कृत्वाततश्चदेवेशंध्यायेच्छ्रीपुरुषोत्तमम् १७ श्रीवत्सवक्षसंशांतंनी-
लोत्पलदलछविं त्रिभंगललितंध्यायेत्सराधंपुरुषोत्तमम् १८ देशकालौसमुद्दिश्यनियतोवाग्यतःशुचिः षोडशो-
रुपचारैश्चपूजयेत्पुरुषोत्तमम् १९ आगच्छदेवदेवेशश्रीकृष्णपुरुषोत्तम राधयासहितश्चात्रगृहाणपूजनंमम २०
श्रीराधिकासहितपुरुषोत्तमायनमः आवाहयामि इत्यावाहन नानारत्नसमायुक्तंकार्तस्वरविभूषितं आसनंदेवदे-
वेशगृहाणपुरुषोत्तम २१ इत्यासनं गंगादिसर्वतीर्थेभ्योमयाप्रार्थनयाहृतं तोयमेतत्सुखस्पर्शंपाद्यार्थंप्रतिगृह्य-
ताम् २२ इतिपाद्यं नंदगोपगृहेजातोगोपिकानंदहेतवे गृहाणार्घ्यंमयादत्तंराधयासहितोहरे २३ इत्यर्घ्यं गं-
गाजलसमानीतंसुवर्णकलशेस्थितम् आचम्यतांहृषीकेशपुराणपुरुषोत्तम २४ इत्याचमनं स्नापनंपयसाद-
ध्नाघृतेनमधुनातथा सितयागांगकेनाथसूक्तेनपौरुषेणच २५

स्यैदेवत्वसंस्थायैस्वाहेतियजुरीरयन् मूलमंत्रैरंगमंत्रैर्वैदिकैरित्यनेनच प्राणप्रतिष्ठांसर्वत्रप्रतिमासुसमाचरेत् अथवानाममंत्रैश्चतुर्थ्यंतैःप्रयत्नतः स्वाहांतैश्चप्रकुर्वीततत्तद्देवाननुस्मरन् एवंप्राणान्प्रतिष्ठाप्य ध्यायेच्छ्रीपुरुषोत्तममिति १७ १८ समुद्दिश्यसम्यगुच्चार्येत्यर्थः १९ समंत्रकंआवाहनादिपूजाक्रममाह आगच्छेत्यादिना २० कार्तस्वरंसुवर्णंतेनविभूषितं २१ २२ २३ २४ २५

धातरिपितृरूपे २६ २७ २८ २९ ३० ३१ श्रीखंडं चंदनमिश्रितंदमनकचूर्णं ३२ ३३ ३४ अंगपू

कार्यंमेसिद्धिमायातुपूजितेत्वयिधातरि पंचामृतैर्मयानीतैराधिकासहितोहरे २६ पयोदधिघृतंगव्यंमाक्षिकंशर्क
रांतथा गृहाणेमानिद्रव्याणिराधिकानंददायक २७ इतिपंचामृतस्नानं योगेश्वरायदेवायगोवर्द्धनधरायच यज्ञानां
पतयेनाथगोविंदायनमोनमः २८ गंगाजलसमंशीतंनदीतीर्थसुसंभवम् स्नानंदत्तंमयाकृष्णगृह्यतांनंदनंदन २९
इतिपुनःस्नानं पीतांबरयुगंदेवसर्वकामार्थसिद्धये मयानिवेदितंभक्त्यागृहाणसुरसत्तम ३० इतिवस्त्रंश्चाचमनं
दामोदरनमस्तेस्तुत्राहिमांभवसागरात् ब्रह्मसूत्रंसोत्तरीयंगृहाणपुरुषोत्तम ३१ इत्युपवीतश्चाचमनं श्रीखंडचंदनं
दिव्यंगंधाढ्यंसुमनोहरं विलेपनंसुरश्रेष्ठप्रीत्यर्थंप्रतिगृह्यताम् ३२ इतिचंदनम् अक्षतास्तुसुरश्रेष्ठकुंकुमाक्ताःसुशो
भिताः मयानिवेदिताभक्त्यागृहाणपुरुषोत्तम ३३ इत्यक्षतान् माल्यादीनिसुगंधीनिमालत्यादीनिवैप्रभो मयाहृतानिपू
जार्थंपुष्पाणिप्रतिगृह्यतां ३४ इतिपुष्पाणि ततोंगपूजा नंदात्मजोयशोदायास्तनयःकेशिसूदनः भूभारोत्तारकश्चैवह्य
नंतोविष्णुरूपधृक् ३५ प्रद्युम्नश्चानिरुद्धश्चश्रीकंठःसकलास्त्रधृक् वाचस्पतिःकेशवश्चसर्वात्मेतिचनामतः ३६ पादौगु
ल्फौतथाजानूजघनेचकटीतथा मेढ्रंनाभिंचहृदयंकंठबाहूमुखंतथा ३७ नेत्रेशिरश्चसर्वांगंविश्वरूपिणमर्चयेत् पुष्पाण्या
दायक्रमशश्चतुर्थ्यंतैर्जगत्पतिम् ३८ प्रत्यंगपूजांकृत्वातुपुनश्चकेशवादिभिः चतुर्विंशतिमंत्रैश्चचतुर्थ्यंतैश्चनामभिः ३९
पुष्पमादायप्रत्येकंपूजयेत्पुरुषोत्तमम् ४० इत्यंगपूजा वनस्पतिरसोदिव्योगंधाढ्योगंधउत्तमः आघ्रेयःसर्वदेवानांधूपोयंप्रति
गृह्यतां४१ इतिधूपं

जनार्थनामानि ३५ ३६ अंगपूजाक्रममाह नंदात्मजायनमः पादौपूजयामि यशोदातनयायनमःगुल्फौपूजयामि इ
त्यादिसर्वत्रयोज्यं ३७ ३८ पुनःकेशवायनमः एवंकेशवादिचतुर्विंशतिनामभिः पुष्पाणिसमर्पयामि ३९ ४० ४१ ४२ ४३

४२ ४३ ४४ ४५ ४६ ४७ ४८ ४९ ५० ५१ ५२ नाममंत्रः केशवादिचतुर्विं

त्वंज्योतिःसर्वदेवानांतेजसांतेजउत्तमम् आत्मज्योतिःपरंधामदीपोयंप्रतिगृह्यतां ४२ इतिदीपं नैवेद्यंगृह्यतांदेवभ
क्तिमेत्यचलांकुरु ईप्सितंमेवरंदेहिपरत्रचपरांगतिम् ४३ इतिनैवेद्यं मध्येपानीयंउत्तरापोशनं गंगाजलसमानीतंसुवर्णक
लशेस्थितं आचम्यतांहृषीकेशत्रैलोक्यव्याधिनाशन ४४ इत्याचमनं इदंफलंमयादेवस्थापितंपुरतस्तव तेनमेसफलावाप्ति
र्भवेज्जन्मनिजन्मनि ४५ इतिश्रीफलं गंधकर्पूरसंयुक्तंकस्तूर्यादिकसंयुतं करोद्वर्तनकंदेवगृहाणपरमेश्वर ४६ इतिकरोद्वर्त
नम् पूगीफलसमायुक्तंसकर्पूरंमनोहरं भक्त्यादत्तंमयादेवतांबूलंप्रतिगृह्यतां ४७ इतितांबूलं हिरण्यगर्भगर्भस्थंहेमबी
जंविभावसोः अनंतपुण्यफलदमतःशांतिंप्रयच्छमे ४८ इतिदक्षिणां शारदेंदीवरश्यामंत्रिभंगललिताकृतिं नीराजयामि
देवेशंराधयासहितंहरिम् ४९ इतिनीराजनं रक्षरक्षजगन्नाथरक्षत्रैलोक्यरक्षक भक्तानुग्रहकर्तात्वंप्रदक्षिणंगृहाणमे
५० इतिप्रदक्षिणां यज्ञेश्वरायदेवायतथायज्ञोद्भवायच यज्ञानांपतयेनाथगोविंदायनमोनमः ५१ इतिमंत्रपुष्पं विश्वे
श्वरायविश्वायतथाविश्वोद्भवायच विश्वस्यपतयेतुभ्यंगोविंदायनमोनमः ५२ इतिनमस्कारः मंत्रहीनेतिमंत्रेणक्षमाप्यपु
रुषोत्तमं स्वाहांतैर्नाममंत्रैश्चतिलहोमोदिनेदिने ५३ पूजनांतेऽक्षतापुष्पफलसौवर्णमिश्रितं अर्घ्यंदद्याद्व्रतीभक्त्यामं
त्रेणानेनसुव्रते ५४ ताम्रपात्रस्थितंतोयंचंदनाक्षतपुष्पकं अर्घ्यंदद्यात्सपत्नीकोप्रहृष्टेनांतरात्मना ५५ पुरुषोत्तमगोविं
दगंधपुष्पाक्षतान्वितं गृहाणार्घ्यंमयादत्तंरमयासहकेशव ५६ देवदेवमहाभागप्रपन्नार्तिहराच्युत गृहाणार्घ्यंमया
दत्तंसर्वकामप्रदोभव ५७ कृतांजलिपुटोभूत्वास्तुत्वानानाविधैःस्तवैः तर्पणंवैष्णवंकार्यंपश्चाद्द्वादशनामभिः ५८

शतिनाममंत्रैः ५३ ५४ ५५ ५६ ५७ वैष्णवंतर्पणंवक्ष्यमाणगोविंदादिनामभिस्तर्पयाम् ५८ ५९

गोविंदंतर्पयामि एवंसर्वत्र ५९ ६० ६१ ६२ ६३ अथाखंडितदीपस्य माहात्म्यमाह बृहन्नारदीये वेदोक्तानिचकर्माणि दानानिविविधानिच पुरुषोत्तमदीपस्य कलांनार्हंतिषोडशीं तीर्थानिसकलान्येव शास्त्राणिसकलानिच पुरुषोत्तमदी० योगोज्ञानंतथासांख्यंतंत्राणिसकलान्यपि पुरुषोत्तमदी० कृच्छ्रचांद्रायणादीनिव्रतानिनिखिलान्यपि पुरुषोत्तमदी० वेदाभ्यासोगयाश्राद्धंगोमतीतटसेवनं पुरुषोत्तमदी० उपरागसहस्त्राणिव्यतीपातशतानिच पुरुषोत्तमदीप० कुर्वादिक्षेत्रवर्षाणिदंडकादिवनानिच पुरुषोत्तमदी० एतद्गुह्यतमंवत्सना देयंयस्यकस्यचित् धनधान्यपशुभ्रातपुत्रपौत्रयशस्करं वंध्यावंध्यत्वशमनमवैधव्यकरंस्त्रियः राज्यदंराज्यभ्रष्टस्यचिंतितार्थकरंनृणाम् कन्याविंदेतभर्तारंगुणिनंचिरजीविनं कांतार्थीलभतेकांतांसुशीलांचपतिव्रतां विद्यार्थीलभतेविद्यांसुसिद्धिंसिद्धिकामुकः तस्माद्दीपःप्रकर्तव्योमासेश्रीपुरुषोत्तमे इति ६४ ६५ ६६ ६७ ६८ ६९ ७०

गोविंदंगोपतिंविष्णुंविश्वेशंमधुसूदनं कृष्णंकामप्रदंकांतंकमलावल्लभंहरिं ५९ केशवंकंसदमनंतर्पयामिपृथक्पृथक् मयाद्यदेवदेवेशयत्कृतंपूजनंतव ६० तत्सर्वंपूर्णतांयातुत्वत्प्रसादेनकेशव एवंसंप्रार्थ्यदेवेशंततोब्राह्मणपूजनं ६१ ब्राह्मणान्भोजयेत्पश्चात्त्रयस्त्रिंशत्सपत्निकान् एकैकस्मैप्रदातव्यंकांस्यपात्रंसमोदकं ६२ स्मर्तव्योद्विजरूपेणतत्पत्नींत्वामनुस्मरन् पूजयेच्चफलैर्भोज्यैर्वस्त्रालंकारचंदनैः ६३ दीपःकार्यस्त्वखंडश्चयावन्मासंचसर्पिषा पुरुषोत्तमस्यप्रीत्यर्थंसर्वार्थफलसिद्धये ६४ यस्यस्मृत्येतिमंत्रेणनमस्कृत्यजनार्दनम् द्विजाशीर्वचनंगृह्यस्वयंभुंजीतवाग्यतः ६५ एवंनित्यंप्रकुर्वीतमासमात्रमतंद्रितः ततश्चोद्यापनंकार्यंव्रतसंपूर्णहेतवे ६६ श्रीविष्णुरुवाच शृणुदेविप्रवक्ष्यामिपूजायाःफलमुत्तमम् सर्वयज्ञेषुयत्पुण्यंसर्वतीर्थेषुयत्फलं ६७ तुलापुरुषदानेनयत्फलंलभतेनरः तत्सर्वंसमवाप्नोतिमलमासेमदर्चनात् ६८ पयःस्नानप्रकुर्वंतियेनरामममूर्द्धनि शताश्वमेधजंपुण्यंबिंदुनाबिंदुनास्मृतं ६९ क्षीरस्नानेनसौभाग्यंदध्नामिष्टान्नभोजनम् घृतेनस्नापयेद्योमांनरोममपुरंव्रजेत् ७०

७१ ७२ ७३ ७४ ७५ ७६ ७७ ७८ ७९ प्रशस्तानिकानीत्यपेक्षायामाह स्कांदोक्तमाहात्म्ये शृणुदेविप्रवक्ष्यामिमाहात्म्यंकुसुमोद्भवं बिल्वपत्रैःशमीपत्रैर्भृंगराजस्यपत्रकैः धात्रीतमालपत्रैश्चशस्तंमत्पूजनंप्रिये तमालपत्रंतेजपत्रं आर्द्रशाकादिसंस्कारादौनिक्षिप्यतेतत् परंतुशुष्कंनग्राह्यं द्रोणपुष्पसहस्रेण खदिरंतुविशेषतः द्रोणपुष्पंकुंभा इतिप्रसिद्धं खदिरंखैरवृक्षपुष्पं खदिरेणसहस्रेणशमीपुष्पसमंभवेत् शमीपुष्पसहस्रेभ्यो बिल्वपुष्पंप्रशस्यते बिल्वपुष्पसहस्रेभ्योबकपुष्पंविशेषतः बकपुष्पंबकुलपुष्पं बकपुष्पसहस्रेभ्योनद्यावर्तविशिष्यते नद्यावर्तेनपुष्पवि

स्नानंशर्करयायस्तुकारयेन्मलमासके सराजाजायतेलोकेपुनःस्वर्गादिहच्युतः ७१ कारयेन्मधुनास्नानंभक्त्यावैमलमा
सके गजाश्वरथसंकीर्णंसराज्यंलभतेभुवि ७२ स्नापयेन्मलमासेयेमांवैपंचामृतेनतु नजातुजननीगर्भेप्रविशंतिचतेनराः ७३
शंखेतीर्थोदकंकृत्वायःस्नापयतिमांनरः बिंदुनाप्यधिकेमासिस्वकुलंतारयेद्धिसः ७४ स्नानार्चनक्रियाकालेघंटानादंकु-
रोतियः पुरतोममदेवेशितस्यपुण्यफलंशृणु ७५ वर्षकोटिसहस्राणिवर्षकोटिशतानिच सवसेन्मामकेलोकेत्वप्सरोगणसे
विते ७६ योदद्यातिचमांनित्यंतुलसीकाष्ठचंदनं नतस्यपुनरावृत्तिर्ममलोकात्सुरेश्वरि ७७ सकुंकुमंचदनंचकर्पूरागरुवासितं
मृगनाभिसमायुक्तंममप्रीतिकरंपरम् ७८ पुष्पैःकाननसंभूतैःपत्रैर्वागिरिसंभवैः अथारामोद्भवैःपत्रैः पुष्पैःसंपूजयेच्चमाम्
७९ येषांसंतिचपुष्पाणिप्रशस्तानिमदर्चने तेषांपत्राणिशस्तानितदभावेफलानिच ८०

शेषं नद्यावर्तसहस्रेभ्यःकरवीरंविशिष्यते करवीरस्यकुसुमात्पालाशंपुष्पमुत्तमं पालाशाच्चसहस्राद्धिकुशपुष्पंविशिष्यते कुशपुष्पसहस्राद्धिवनमालाप्रशस्यते कुशपुष्पंदर्भपुष्पं वनमालासहस्राद्धिचंपकंपुष्पमुत्तमं चांपेयकशताद्धिवरंपुष्पमशोकजं अशोकपुष्पसाहस्रात्सेवतीकुसुमंवरं सेवतीपुष्पसाहस्रात्कुब्जकंपुष्पमुत्तमं कुब्जकंकांटेसेवतीपुष्पं कुब्जपुष्पसहस्राद्धिमालतीपुष्पमुत्तमं मालतीपुष्पंचमेलीपुष्पमितिप्रसिद्धं मालतीपुष्पसाहस्रात्त्रिसंध्यंपुष्पमुत्तमं त्रिसंध्यपुष्पंत्रिकालंसूर्याभिमुखंभवति तत्सूर्यमुखीपुष्पमितिप्रसिद्धं त्रिसंध्याच्चसहस्राणिकुंदपुष्पंविशिष्यते कुंदपुष्पंकागडाइतिभाषायांप्रसिद्धं

कुंदपुष्पसहस्राद्धिजातिपुष्पंविशिष्यते जातिपुष्पंजाईइतिप्रसिद्धं जातिपुष्पसहस्रेणयः करोतिममार्चनं कल्पकोटिसहस्राणि ममलोकेमहीयतेइति ८० तुलसीदलमाहात्म्यंतुसर्वग्रंथेषुप्रसिद्धंग्रंथविस्तारभयान्नात्रोच्यते ८१ ८२ ८३ ८४ ८५ ८६ ८७ ८८ अन्नंचतुर्विधं लेह्यपेयचोष्यखाद्यभेदेनविज्ञेयं नानाभेदसमन्वितमित्यत्र तत्प्रकारानाह स्कांदोक्तमाहात्म्ये नैवेद्यस्यचमाहात्म्यंविधानंशृणुभामिनि आदौहिरण्मयंपात्रंतदभावेपिराजतं तदभावेतुपालाशंविस्तीर्णंबहुसुंदरं कचोलाःशतशःकुर्यात्पात्रेवैपरितोनवाः कचोलाःनूतनलघुमृत्तिकापात्राणिद्रोणानिवा तन्मध्येव्यंजनादेया नानाफलमयाःशुभाः पायसंचंद्रसंकाशंपात्रेशर्करयायुतं भक्तंकुमुदवर्णाभंमुद्गान्कांचनप्रभान्

इमानिपुष्पाणिवराणिदेविमत्पूजनेन्यानिबहूनिसंति नार्हंतिसाम्यंतुलसीदलस्यपुष्पस्यचातीवममप्रियस्य ८१ कृष्णागरुसमुत्थेनधूपेनचममालयं धूपयेन्मानवोयस्तुसमुक्तोनरकार्णवात् ८२ अगरुंचसकर्पूरंदिव्यचंदनसौरभं दत्वामामधिकेमासिकुलानांतारयेच्छतम् ८३ माहिषगुग्गुलयुक्तंसर्पिषासितयायुतं धूपंददातियोवैमांतस्येष्टंददाम्यहम् ८४ दशांगधूपतोदेविममलोकेवसेन्नरः बहुवर्तिसमायुक्तंघृतकर्पूरसंयुतं ८५ कुर्यादारार्तिकंयस्तुकल्पकोटिदिवंवसेत् नैवेद्यस्यचमाहात्म्यंपात्रस्यशृणुभामिनि ८६ आदौहिरण्मयंपात्रंतदभावेपिराजतं तदभावेचपालाशंविस्तीर्णंबहुसुंदरं ८७ कचोलाशतशःकार्याःपात्रेवैपरितोनवा नानाव्यंजनसंपन्नास्त्रिभिःपंक्तिभिरेवच ८८ अन्नंचतुर्विधंकृत्वा नानाभेदसमन्वितम्

शुभान् निंबूरसेनचार्द्रैर्वाफलमूलयुतेनच वैकृताश्चतथाकार्याःशतशोभोजनेमम वैकृताः अथाणुलोणचें आचार इतिभाषात्रयेणविख्यातः द्राक्षातुमिश्रिताचूतकरमर्दकृताःशुभाः करमर्दःकरवंदइतिख्यातः मरीचिपिप्पलीभिश्चार्द्रकैलाचार्द्रकसंयुताः आर्द्राश्चते एलाश्चेतिसमासः आर्द्रकंप्रसिद्धं क्वथिकानटिकाकार्याभोजनेभूरिशोमम मंडकावर्तुलारम्याःसमाःसर्वत्रबिंबवत् मंडकागोधूमसूक्ष्मपिष्टसंभूताः लोकेमांडाइतिप्रसिद्धाःतेकथंभूता वक्ष्यमाणासिता दुग्धादिसहिताः सितयासहितेनाथदुग्धेनक्वथितेनच मधुच

र्णेनगव्येनयुक्तेतस्मिन्शक्मानने घृतंसुवासितंप्रीत्याप्रदेयंभोजनेमम ततोगोधूममात्रेयाचंद्रकेणाह्निचोज्वलं सौवालिकापूरिकास्तुशताच्छिद्राःसुवेष्टिकाः पूरिकाश्चतथाक्षीरप्रकारास्तुप्रकाशयेत् पुनःपूरिकाग्रहणंतत्रदुग्धपूरिकाप्राप्त्या मणयस्तंतुसंधाश्चमालतीकुसुमादयः तंतुसंधासेवयाइतिख्यातं पर्पटावर्तुलारम्यामाषकूष्माण्डसंयुताः वटकानवधारम्याकुर्यान्मासेऽधिकेमम स्निधाजातिमरीचैश्चपूरितार्द्रणाते·शुभाः युक्तेनलवणेनापिशुद्धतैलेनपाचिताः कुंकुमाभाःस्नेहहीनासहस्तादुर्जनाइव दधिदुग्धयुताःकेचिच्चिंचिणीचूतसंयुताःराजिकाजलमध्य·स्थास्तथान्येसितयासह रसैश्चतुरभिश्चैववटकानवधामताः वज्रप्रभानुकणिका चारुबीजैश्चखारिकैः शकलैर्नारिकेलस्यलवंगशतसंयुताः घृतक्षीरसिताढ्यास्ताःकदाहेतुप्रलोडिताः बध्वासितातुरुशरंरम्यासूत्रैकफेणिका पाराकिकातुवैपक्वा कृताश्चंद्रणद्योतिताः मोदकास्तत्रचैकार्याश्चारुबीजभवाःपरे सितयासहिताःकार्या अन्येदुग्धेननिर्ममेत् नारिकेलफलैश्चान्येर्वृक्षनिर्यासनिर्मिताः बदामैश्चशुक्तैश्चान्येस्तिलैश्चकणवीरकैः ईह

समर्पयेन्मांनैवेद्यंवित्तशाठ्यविवर्जितः ८९ भोजनानंतरंदेयमद्भिःकर्पूरवासितैः मध्यमाचमनंमध्येपानीयंकर·
मार्जनम् ९० फलंतांबूलसहितंदक्षिणांकनकान्वितां पुष्पांजलिंततःकुर्याद्भक्त्यादर्शंप्रदर्शयेत् ९१

शान्मोदकांश्चान्यान्तुष्ट्यर्थंममकारयेत् आर्षोध्रीसूरणंकंदंतथार्द्रकरमर्दकं नारिंगंचिंचिणीकंदंकंकोलफलमेवच दशारंत्रिपुरीजातंशुभनिंबुफलंविषं दशारंतुरैयाइति प्रसिद्धंफलशाकं त्रिपुरीनाम्नाइपत्रशाकं टिंटीफलंलवंगंचश्रीफलंतिलफंलुतिं टिंटीफलं केरा तिलकंतिलकवृक्षपुष्पं लुतिं बृहद्धुधी· वल्कलं वंशकलिरंतथाकापित्थकंफलं वल्कलंदालचिनी द्राक्षाफलंचूतफलंरम्यंकंटकिनीफलं कंटकिनीफलंवृंताकफलं धात्रीफलंशुक्तिभवं फलमंवाडवंतथा शुक्तिभवं कांजीतिप्रसिद्धं आम्लंवा· रंभाफलंपिप्पलींचमरीचांश्चमनोहराः शुद्धसर्षपतैलेनलवणेनसुवेधितं तथाराजिकयाविद्धंत्रिभिर्वर्षैर्घटेस्थितं एवंविधानिकार्याणियथालाभमशक्तकः नैवेद्यंकारयेद्विवित्तशाठ्यविवर्जितइति ८९ नैवेद्यसमर्पणानंतरंकृत्यमाह भोजनानंतरमित्यादिना करमार्जनंचंदनेनेति शेषः ९० ९१

९२ ९३ ९४ वक्ष्यमाणप्रकारेणैकोनत्रिंशाऽध्यायेवक्ष्यमाणविधिना ९५ ९६ ९७ इतिपुरुषोत्तममाहात्म्यटीकायांषष्ठोऽध्यायः ६ ७ अथास्मिन्नध्यायेआन्हिकंवक्ष्यति विष्णुरुवाचेत्यादिना ब्राह्मेमुहूर्तेउपांत्येमुहूर्ते १ २ ३ ४ वामेवामहस्ते त्रिः उभयोःकरयो

नीराजनंपुनःकार्यंकर्पूरंविभवेसति समर्प्यमुकुटादीनिभूषणंछत्रचामरे ९२ प्रसादस्कमुखंध्यात्वाकुर्याच्चैवप्रदक्षिणाम् नमस्कारंततःकुर्यात्साष्टांगंव्रतकृन्नरः ९३ जपेदष्टोत्तरशतंद्वादशाक्षरमंत्रकं एवंमदर्चनंकृत्वाशृणुयाद्वैष्णवींकथाम् ९४ वक्ष्यमाणप्रकारेणकांस्यदानंसमाचरेत् ब्राह्मणेभ्यस्ततोदेविभोजनंपायसान्वितम् ९५ समोदकंस्वादुरसंदद्यात्सघृतशर्करम् एवंत्रिंशाद्दिनंकुर्याद्व्रतंकेशवतुष्टिदं ९६ पंचरात्रमशक्तेनत्रिरात्रमथवाप्रिये तत्राप्यशक्तश्चैकाहंमलमासव्रतंचरेत् ९७ इतिश्रीसप्तपुराणसारोद्धारेश्रीपुरुषोत्तममासमाहात्म्येनित्यपूजाविधिकथनंनामषष्ठोऽध्यायः ६ ७ विष्णुरुवाच ब्राह्मेमुहूर्तेचोत्थायपरंब्रह्मविचिंतयेत् ततोग्रजन्मैकृताशो बहुलोदकभाजनः १ ग्रामाद्दूरतरंगच्छेत्पुरुषोत्तमसेवकः दिवासंध्यासुकर्णस्थब्रह्मसूत्रउदङ्मुखः २ अंतर्धायतृणैर्भूमिंशिरःप्रावृत्यवाससा वक्त्रंनियम्ययत्नेननोष्ठीवेन्नोच्छ्वसेदपि ३ कुर्यान्मूत्रपुरीषंचरात्रौचदक्षिणामुखः गृहीतशिश्नश्चोत्थायगृहीतशुचिमृत्तिकः ४ गंधलेपक्षयकरंशौचंकुर्यादतंद्रितः एकालिंगेगुदेपंचत्रिर्वामेदशचोभयोः ५ द्विसप्तपादयोश्चैवगार्हस्थ्यशौचमुच्यते कृत्वाशौचंतुप्रक्षाल्यपादौहस्तौचमृज्जलैः ६ तीर्थेशौचंनकुर्वीतकुर्वीतोद्धृतवारिणा अरत्निद्वयसंचारंत्यक्त्वाकुर्यादनुद्धृते ७

पुनःपंचपंच ५ द्विसप्तचतुर्दश ६ तीर्थेजलेशौचंगुद प्रक्षालनादिनकुर्यात् उद्धृतवारिणाकुर्यात् अनुद्धृतजले यत्रपात्राभावेउद्धृतजलंनतत्र अनुद्धृते लघुखातोदके अरत्निद्वयसंचारं हस्तद्वयपरिमितां भूमिंलघुखातोदकात्त्यक्त्वा शौचंकुर्यात् जलखानसमीपे लेप्य विष्टादिकंयथानयेत्तथा कर्तव्यमित्यर्थः ७ ६ ७ ६

शौचार्थजलग्रहणानंतरं तल्लघुखातस्यजलं निष्कासयेत् अन्यथा शौचार्थं जलंगृहीत्वा यावच्छोधनं नकृतं तावत्तज्जलपानादिषु अशुद्धंस्या

पश्चात्तच्छोधयेत्तीर्थमशुद्धमन्यथाहितत् एवंशौचंप्रकुर्वीत पुरुषोत्तमसद्व्रती ८ ततःषोडशगंडूषान्प्रकुर्याद्द्वादशैर्वा मूत्रोत्सर्गेतुगंडूषानष्टौवाचतुरोगृहीत् ९ उत्थायनेत्रेप्रक्षाल्यदंतकाष्ठंसमाहरेत् इमंमंत्रंसमुच्चार्यदंतधावनमाचरेत् १० आयुर्बलंयशोवर्चःप्रजाःपशुवसूनिच ब्रह्मप्रज्ञांचमेधांचत्वन्नोदेहिवनस्पते ११ अपामार्गंबादरंवाद्वादशांगुलमव्रणं कनिष्ठांगुलिवत्स्थूलंपर्वार्द्धकृतकूर्चकम् १२ शुचिर्द्वादशगंडूषैर्निषिद्धंभानुवासरे आचम्यप्रयतःसम्यक्प्रातःस्नानंसमाचरेत् १३ स्नानादनंतरंतावत्तर्पयेत्तीर्थदेवताः समुद्रगानदीस्नानमुत्तमंपरिकीर्तितम् १४ वापीकूपतडागेषुमध्यमंकथितंबुधैः गृहेस्नानंतुसामान्यंगृहस्थस्यप्रकीर्तितम् १५ ततश्चवाससीशुद्धेशुक्लेचपरिधायच उत्तरीयंसदाधार्यंब्राह्मणेनविजानता १६ उपविश्यशुचौदेशेप्राङ्मुखोवाउदङ्मुखः भूत्वाबद्धशिखःकुर्याद्दंतजानुभुजद्वयम् १७ सपवित्रेणहस्तेनकुर्यादाचमनक्रियाम् नोच्छिष्टंतत्पवित्रंतुभुक्तोच्छिष्टंतुवर्जयेत् १८ आचम्यतिलकंकुर्याद्गोपीचंदनमृत्स्नया ऊर्ध्वपुंड्रमृजुंसौम्यंदंडाकारंप्रकल्पयेत् १९ ऊर्ध्वपुंड्रंत्रिपुंड्रंवामध्येछिद्रंप्रकल्पयेत् निवसत्यूर्ध्वपुंड्रेतुश्रियासहहरिःस्वयम् २० त्रिपुंड्रेधूर्जटिःसाक्षादुमयासहसर्वदा विनाछिद्रंतुतत्पुंड्रंशुनःपादसमंविदुः २१ श्वेतंज्ञानकरंप्रोक्तंरक्तंवश्यकरंनृणां पीतंसर्वर्द्धिदंप्रोक्तमन्यत्तुपरिवर्जयेत् २२ शंखचक्रादिकंकार्यंगोपीचंदनमृत्स्नया सर्वपापक्षयकरंपूजांगंपरिकीर्तितम् २३ शंखचक्रादिचिन्हानिदृश्यंतेयस्यविग्रहे मर्त्योमर्त्योनविज्ञेयःसनित्यंभगवत्तनुः २४

त् ८ ९ १० ११ १२ १३ १४ १५ १६ १७ भुक्तोच्छिष्टंपवित्रंवर्जयेत् सपवित्रहस्ते नभोजने कृते तत्पवित्रंवर्जयेदित्यर्थः १८ ऋजुंसरलं १९ २० २१ पुंड्रचंदनस्यवर्णफलमाह श्वेतमिति २२ २३ २४

२५ २६ २७ सावित्रैः सौरैः अनघैः पूतैः २८ २९ ३० ३१ ३२ ३३ ३४ ३५

पापंकृतरूपंतुजायतेतस्यदेहिनः शंखचक्रादिचिन्हानियोधारयतिनित्यशः २५ नारायणायुधैर्नित्यंचिन्हितो
यस्यविग्रहः पापकोटियुतस्यापितस्यकिंकुरुतेयमः २६ प्राणायामंततःकृत्वासंध्यावंदनमाचरेत् पूर्वसंध्यांस
नक्षत्रामुपासीतयथाविधि २७ गायत्रीमभ्यसेत्तावद्यावदादित्यदर्शनम् सावित्रैरनघैर्मंत्रैरुपस्थायकृतांजलिः
२८ आत्मपादौतथाभूमौसंध्याकालेऽभिवादयेत् यस्यस्मृत्येतिमंत्रेणयदूनंपरिपूरयेत् २९ यस्तुसंध्यामुपासीत-
श्रद्धयाविधिवद्द्विजः नतस्यकिंचिद्दुःप्रापंत्रिषुलोकेषुविद्यते ३० दिवसस्यादिमेभागेकृत्यमेतदुदीरितम् ततोधिक
निमित्तंवैविष्णुपूजनमाचरेत् ३१ ततोमाध्यान्हिकींसंध्यांतिलतर्पणमाचरेत् ततःपंचमहायज्ञान्कुर्याद्भूतबलिंततः
३२ काकस्यचशुनश्चैवबलिंदत्वैवमुञ्चरन् ततआचम्यविधिवच्छ्रद्धयाप्रीतमानसः ३३ द्वारावलोकनंकुर्यादतिथि
ग्रहणायच गोदोहकालमात्रंतुभाग्यात्प्राप्नोतिथौयदि ३४ आदौसत्कृत्यवचसादेववत्पूजयेत्सुधीः तोषयेत्सरयाप्र
त्यायथाशक्त्यन्नपानतः ३५ भिक्षांचभिक्षवेदद्याद्विधिवद्ब्रह्मचारिणे आकल्पितान्नादुद्धृत्यसर्वव्यंजनसंयुतात्
३६ यतिश्चब्रह्मचारीचपक्वान्नस्वामिनावुभौ तयोरन्नमदत्वैवभुक्त्वाचांद्रायणंचरेत् ३७ यतिहस्तेजलंदद्याद्भैक्षंदद्यात्पु
नर्जलम् तद्भैक्ष्यंमेरुणातुल्यंतज्जलंसागरोपमम् ३८ सत्कृत्यभिक्षवेभिक्षांयःप्रयच्छतिमानवः गोप्रदानसमंपुण्य
मित्याहभगवान्यमः ३९ ततश्चभोजनंकुर्यात्प्राङ्मुखोमौनमास्थितः प्रशस्तशुद्धपात्रेचभुंजीतान्नमकुत्सयन्
४० नैकवासाःसमश्नीयात्त्वासनेनिजभाजने स्वयमासनमारुह्यस्वस्थचित्तःप्रसन्नधीः ४१

३६ ३७ ३८ सत्कृत्य सत्कारं कृत्वा भवतीति शेषः ३९ ४० ४१ ४२ ४२

कांस्यपात्रेभोजनंतु पुरुषोत्तममासविषयः अन्यत्रनिषेध दर्शनात् अस्यनिर्णयस्तु पूर्वंमया आन्हिकस्तबके भोजनपात्रनिर्णयेविशेषतोवर्णितोद्रष्टव्यइति ४२ भोक्तव्यमितिसामान्यतो कथनं नतु परिसेचनानंतरं भोजनमितिक्रम दर्शनं अग्नेबलिदानस्योक्तत्वात् ४३

एकएवतुयोभुंक्तेस्वकीयेकांस्यभाजने चत्वारितस्यवर्द्धंतेआयुःप्रज्ञायशोबलम् ४२ सत्यंत्वर्तेनेतिमंत्रेणजलमादाय
पाणिना परिषिच्यचभोक्तव्यंसघृतंव्यंजनान्वितं ४३ भोजनात्किंचिदन्नाग्र्यमादायैवंसमुच्चरेत् नमोभूपतयेपूर्वंभुव
नपतयेनमः ४४ भूतानांपतयेपश्चात्क्ष्मायचततोबलिम् दत्वाचचित्रगुप्तायभूतेभ्यइदमुच्चरेत् ४५ यत्रक्वचन
संस्थानांक्षुत्तृषोपहतात्मनां भूतानांतृप्तयेक्षय्यमिदमस्तुयथासुखम् ४६ प्राणायापानसंज्ञायव्यानायचततः
परम् उदानायततोब्रूयात्समानायततःपरम् ४७ प्रणवंपूर्वमुच्चार्यस्वाहाचांतेघृतप्लुतम् पंचकृत्वोग्रसेदन्नंजि
ह्वयानतुदर्शयेत् ४८ ततश्चतन्मनाभूत्वाभुंजीतमधुरंपुरः लवणाम्लौतथामध्येकटुतिक्तौततःपरम् ४९ प्रागद्र-
वंपुरुषोश्नीयान्मध्येतुकठिनाशनम् अंतेपुनर्द्रवाशीतुबलारोग्येनमुंचति ५० अष्टौग्रासामुनेर्भक्ष्याःषोडशारण्यवा
सिनः द्वात्रिंशच्चगृहस्थस्यत्वमितंब्रह्मचारिणः ५१ नाद्याच्छास्त्रविरुद्धंतुभक्ष्यंभोज्यादिकंद्विजः अभोज्यंभा-
हुराहारंशक्यंपर्युषितंतथा ५२ सर्वसशेषमश्नीयात्घृतपायसवर्जितम् अग्रांगुलीषुतच्छेषंनिधायभोजनोत्तरं
५३ जलपूर्णांजलिंकृत्वापीत्वाचैव तदर्द्धकम् अग्रांगुलिस्थितंशेषंभूमौधृत्वांजलेर्जलम् ५४ शेषंनिषिंचेत्तत्रैव
पठन्मंत्रमिमंबुधः अन्यथापापभाक्विप्रःप्रायश्चित्तेनशुद्ध्यति ५५ रौरवेपूयनिलयेपद्मार्बुदनिवासिनाम् अ-
र्थिनामुदकंदत्तमक्षय्यमुपतिष्ठतु ५६

४४ ४५ ४६ ४७ ४८ भोजनेपदार्थाशनक्रममाह ततइत्यादिना ४९
५० ५१ ५२ उत्तरापोशनविधिमाह अग्रांगुलीष्विति ५३ ५४ ५५ ५६ ५७

५७ ५८ ५९ ६० ६१ ६२ ६३ ६४ ६५ ६६ ६७

निषिच्यानेनमंत्रेणकुर्याद्दंतविशोधनम् आचम्यपात्रमुत्सार्यकिंचिद्वामेनपाणिना ५७ ततःपरंसमुत्थायबहिःस्थि
त्वासमाहितः शोधयेन्मुखहस्तौचमृदाशुद्धजलेनच ५८ कृत्वाषोडशगंडूषान्शुद्धोभूत्वासुखासनः इमौमंत्रौपठेन्नैव
पाणिनोदरमालभेत् ५९ अगस्त्यंकुंभकर्णंचशनिंचवडवानलं आहारपरिपाकार्थंस्मरेद्भीमंचपंचमम् ६० आतापीमा
रितोयेनवातापीचनिपातितः समुद्रःशोषितोयेनसमेऽगस्त्यःप्रसीदतु ६१ ततःश्रीकृष्णदेवस्यकुर्वीतस्मरणंमुदा
भूयोप्याचम्यकर्तव्यंततस्तांबूलभक्षणम् ६२ भुक्तोपविष्टःश्रीकृष्णंपरंब्रह्मविचारयेत् सच्छास्त्रादिविनोदेनसन्मा-
र्गाद्यविरोधिना ६३ ततश्चाध्यात्मविद्यायाःकुर्वीतश्रवणंसुधीः सर्वथावृत्तिहीनोपिमुहूर्तंस्वस्थमानसः ६४ श्रुत्वा-
धर्मंविजानातिश्रुत्वापापंपरित्यजेत् श्रुत्वानिवर्ततेमोहःश्रुत्वाज्ञानामृतंलभेत् ६५ नीचोपिश्रवणेनाशुश्रेष्ठत्वंप्रतिप
द्यते श्रेष्ठोपिनीचतांयातिरहितःश्रवणेनच ६६ व्यवहारंततःकुर्याद्बहिर्गत्वायथासुखम् श्रीकृष्णंमनसाध्यायेत्स
र्वार्थसिद्धिदायकं ६७ सूर्येस्ताशिखरंप्राप्तेतीर्थेगत्वाऽथवागृहे सायंसंध्यामुपासीतधौतांघ्रिःसपवित्रकः ६८ यः
प्रमादान्नकुर्वीतसायंसंध्यांद्विजाधमः सगोवधमवाप्नोतिमृतेरौरवमाप्नुयात् ६९ कदाचित्काललोपेपिसंकटेवापथि
स्थितः आनिशीथात्प्रकुर्वीतसायंसंध्यांद्विजोत्तमः ७० यस्त्रिसंध्यमुपासीतब्राह्मणःश्रद्धयान्वितः तत्तेजोवर्धतेत्यं
तंघृतेनैवहुताशनः ७१ सादित्यांपश्चिमांसंध्यामर्द्धास्तमितभास्करां प्राणानायम्यसंप्रोक्ष्यमंत्रेणाब्देवतेनतु ७२
सायमग्निश्चमेत्युक्त्वाप्रातःसूर्येत्यपःपिबेत् प्रत्यङ्मुखोपविष्टस्तुवाग्यतःसुसमाहितः ७३ प्रणवव्याहृतियुतां
गायत्रींतुजपेत्ततः अक्षसूत्रंसमादायसम्यगातारकोदयात् ७४

६८ ६९ ७० ७१ ७२ ७३ ७४

७५ ७६ ७७ उपधानंउच्छीर्षं उपधीयते आरोप्यते शिरोऽत्रउपधाने उपधानंतूपबर्ह इत्यमरः ७८ ७९ ८० ८१
८२ ८३ ८४ ८५ ८६ अदत्तंचौर्यंतस्य आदानंग्रहणंतस्माद्विरामं ८७ देहिभिर्जीवैः देहपरमैः देहतत्परैः

वारुणीभिस्तदादित्यमुपस्थायप्रदक्षिणं कुर्वन्दिशोनमस्कुर्याद्दिगीशांश्चपृथक्पृथक् ७५ उपास्यपश्चिमांसंध्यांहुत्वाग्निमश्नियात्ततः भृत्यःपरिवृतोभृत्वानातितृप्तोथसंविशेत् ७६ सायंप्रातर्वैश्वदेवः कर्तव्योबलिकर्मच अनश्नतापिसततमन्यथाकिल्बिषीभवेत् ७७ कृतपादादिशौचस्तु भुक्त्वासायंततोगृही गच्छेच्छय्यांततोमृद्वीमुपधानसमन्विताम् ७८ स्वगृहेप्राक्शिराःशेतेश्वाशुरेदक्षिणाशिराः प्रवासेपश्चिमशिरानकदाचिदुदक्शिराः ७९ रात्रिसूक्तंजपेत्स्मृत्वादेवांश्चसुखशायिनः नमस्कृत्वाव्ययंविष्णुंसमाधिस्थःस्वपेन्निशि ८० अगस्त्योमाधवश्चैव मुचुकुंदोमहाबलः कपिलोमुनिरास्तीकःपंचैतेसुखशायिनः ८१ मांगल्यंपूर्णकुंभंचशिरस्स्थानेनिधायच वैदिकैर्गारुडैर्मंत्रैरक्षांकृत्वास्वपेत्ततः ८२ ऋतुकालाभिगामीस्यात्सदारनिरतःसदा पर्ववर्जंव्रजेदेनांतद्व्रतीरतिकाम्यया ८३ प्रदोषपश्चिमौयामौवेदाभ्यासेनतौनयेत् यामद्वयंशयानस्तु ब्रह्मभूयायकल्पते ८४ एतत्सर्वमशेषेणकृत्यजातंदिनेदिने कर्तव्यंगृहिभिःसम्यक्गृहस्थाश्रमलक्षणम् ८५ अहिंसासत्यवचनंसर्वभूतानुकंपनम् शमोदानंयथाशक्तिगार्हस्थ्योधर्मउच्यते ८६ परदारेष्वसंसर्गोधर्मस्त्रीपरिरक्षणं अदत्तादानविरमोमधुमांसविवर्जनम् ८७ एषःपंचविधोधर्मोबहुशाखःसुखोदयः देहिभिर्देहपरमैःकर्तव्योदेहसंभवः ८८ अशेषवेदोदितसच्चरित्रमेतद्गृहस्थाश्रमलक्षणंहि उक्तंसमासेनचलक्षणेनतुभ्यंप्रियेलोकहितायसम्यक् ८९

८८ ८९ ९ ९ ९ ९ ९ ९ ९ ९

२३

इतिश्रीपुरुषोत्तममाहात्म्यटीकायांसप्तमोऽध्यायः।७ छ अथमेनकाव्रतप्रसंगमाह १ २ ३ देवस्यशिवस्यसमक्षंममातामेनका·

इतिश्रीसमपुराणसारोद्धारेश्रीपुरुषोत्तममासमाहात्म्येआन्हिकधर्मकथनंनामसप्तमोऽध्यायः ७ छ लक्ष्मीरुवाच मलमासव्रतस्याययथाशक्त्याकृतस्यच यत्फलंजायतेदेवतदेवकथयस्वमे १ विष्णुरुवाच अत्रार्थेकथयिष्यामि इतिहासंपुरातनम् अरुंधत्याश्चपार्वत्याःसंवादमतिसुंदरम् २ अरुंधत्युवाच सर्वेष्वपिहिमासेषुव्रतानिकथितानिमे अधिमासेचसंप्राप्तेकिंकार्यंगौरितद्वद ३ पार्वत्युवाच शृणुसाध्विपुरावृत्तमधिमासव्रतंप्रति समक्षंममदेवस्यमातामांचयथाब्रवीत् ४ एकदामेनयामात्रास्नेहाद्वात्सल्यभावतः मामुक्तंपुत्रिमत्तस्त्वमुत्पन्नाचसुलोचने ५ ख्याताखिलजगतामध्येत्वयाख्यातंचराचरम् ममचातिप्रियाकिंतुमयालभ्यंनतेतिकम् ६ अहंमहांतरेख्यातात्वंतुविश्वांतरेउमे एकोपियत्रनामापिनवेत्तिकमलानने ७ यत्रतत्रस्थितावापित्वंब्रह्मादिभिरीड्यसे मासापक्षाश्चपर्वाणिदिनानितवसुंदरि ८ व्रतैर्व्याप्तानिव्रतिभिरेवंत्वंपूज्यसेनरैः अप्येकपुष्पंमेमूर्ध्निनचाध्यारोपयेज्जनः ९ पंचषष्ट्याधिकवर्षेदिनानांचशतत्रयम् मद्वियार्हघटीनास्तिभाग्यंयोग्यजगत्त्रये १० पार्वत्युवाच अरुंधतियदामात्राएवंस्नेहेनचार्जिता भर्तुःसमीपेवात्सल्याद्दीनोदैनावभाषणात् ११ स्मितंकृत्वामयातत्रमेनाप्रोक्तागुणार्थिनी उमाउवाच मेनकेमातरेवंत्वंकस्माद्रूषेत्यमर्षणं १२ मलमासेपिमांकोपिनहिपूजयतिक्वचित् अन्याश्चापिक्रियाःसर्वानिवर्ततेसुधार्मिके १३ तस्मादत्राहंमेनेत्वांपूजयिष्यामिसुव्रते इत्युक्त्वाचाधिकेमासिव्रतंचाधिकृतंमया १४ अरुंधत्युवाच शिवप्रियेममत्वंवैव्रतंमेब्रूहिपार्वति नासौनिरर्थकोमासोपमात्तनियमःकथं १५ पार्वत्युवा॰ यदायदाधिमासःस्यात्संक्रांतोमुनिप्रिये तदातदाव्रतंकार्यंतथ्यंतत्तेवदाम्यहम् १६

मां ४ हेपुत्रि हेसुलोचने मत्तःत्वंउत्पन्ना ५ ६ ७ ८ ९ १० ११ अत्यमर्षणंअतिक्रोधनम् १२ १३ १४ १५ १६

१७ १८ ब्रह्मवृक्षंपालाशवृक्षं तच्छायायां स्मरफलंलोके मींढलइतिख्यातं मधूच्छिष्टं मेणइतिख्यातं स्वसे हेभगिनि १९ पतिपुत्र
समन्विता हिमालय गंधमादन सहिता गौरीपंचकसंयुक्ता गजस्कंधसमारूढा मेनका २० द्विजैःप्रतिष्ठाप्य ब्राह्मण द्वारा प्राणप्रतिष्ठां कारयि

अयंमासोमयादत्तोमेनायाःख्यातिकारणात् मासस्यादौतृतीयायांसितायांशुभ्रवस्त्रधृक् १७ नारीवाथनरोवापिगृ
ण्हीयान्नियमव्रतम् गुरोरादेशमासाद्यपूर्वाण्हेसंयतेंद्रियः १८ ब्रह्मवृक्षासनेस्थाप्यपंचस्मरफलानिच मधुच्छिष्टेनक
र्तव्यामेनातदुपरिस्वसे १९ गजस्कंधसमारूढापतिपुत्रसमन्विता गौरीपंचकसंयुक्तासर्वाभरणभूषिता २० प्रतिष्ठाप्य
द्विजैस्तांचपूजयेन्ममातरम् विधिनावस्त्रपुष्पाद्यैर्धूपैरर्घ्यनिवेदनैः २१ नीराजनैश्चदीपैश्चयथाप्राप्ते ररुंधति एवंतुसक
लंमासंपूजयेद्दीपकंदहेत् २२ एकभुक्तंचकर्तव्यंयावन्मासःसमाप्यते अथारंभेविसर्गेच अशक्त्यावापिकारयेत् २३ मासां
तेमेनकाख्यांचहैमींकृत्वाप्रपूज्यच दद्याद्विप्रायविधिवन्मातरंचार्चयेत्स्वयम् २४ वस्त्रपल्लवतांबूलैःकुंकुमैःफलपुष्पकैः ख-
र्जूरैःकंचुकैश्चापिपूजयेद्विप्रपंचकम् २५ भोजयेच्चसपत्नीकान्स्वशक्त्यापरिधापयेत् एवंकृत्वाविधानेनव्रतंचैवमलिम्लुचे
२६ सुखसौभाग्यसंताननारीप्राप्नोत्यरुंधति ममानंदकरंह्येतत्कर्तव्यंव्रतमुत्तमम् २७ विष्णुरुवाच अथान्यच्चप्र-
वक्ष्यामिमलमासव्रतंमहत् यच्छ्रुत्वामानवोभक्त्यामुच्यतेयोनिसंकटात् २८ वीरबाहुर्नृपःपूर्वमासीद्भूमितलेऽखिले दा
तायज्वासुरूपश्चसुभगोजनवल्लभः २९ तस्यभार्यासुरूपावैनाम्नाख्यातायशोमती धनयौवनगर्विष्ठासाभिमानवतीस-
ती ३० तस्यभूमिपतेराशीन्मंडनःसचिवःसदा तस्यभार्यागुणवतीसतीकुलशिरोमणिः ३१ वीरबाहुःसुखंभुंक्तेयशोमत्या
समन्वितः सचिवेन्यस्यभूभारंसंसारफलमल्पधीः ३२ साराज्ञेपिचनोकिंचित्कुरुतेचतथाल्पकं नदानंनव्रतंवापिनदेवद्वि
जसेवनम् ३३ त्वामातरंमेनकां २१ २२ २३ २४ २५ २६ २७ २८ २९ ३० मंडनःमंडननामकः ३१ ३२ ३३

३४ मंडनप्रिया गुणवती ३५ ३६ ३७ ३८ ३९ ४० ४१ ४२ ४३ ४४

तयोःपुत्रद्वयंजातंकालेनबहुनाप्रिये सुबाहुःशतबाहुश्चरूपयौवनसंयुतौ ३४ एकदामलमासेतुसंप्राप्तेमंडनप्रिया
जगामराजभवनंसेवायांचयशोमतीम् ३५ साददर्शराजभवनंधनरत्नविभूषितं दासदासीजनाकीर्णंसदास्वर्गपुरोपमम्
३६ विमृश्यत्हृदिपुण्यस्यप्रोक्तंतस्याखिलंफलम् भुज्यतेसहसख्यावैकेवलंनार्ज्यतेपुनः ३७ इतिसंचिंत्यसुचिरंपरोप-
कृतिहेतवे यशोमतींगुणवतीप्राहसाहसिकंवचः ३८ ध्यात्वामनसिसद्भावंसखीरूपंविलोक्यच गुणवत्युवाच य-
शोमतिशृणुष्वेदंवचनंमममानदे ३९ अधिमासव्रतंदेविकुरुष्वविधिपूर्वकम् तदवज्ञायवचनंयशोमत्यपिभामिनी ४०
उवाचसस्मितंवाक्यंशृणुमेवचनंसखि यत्प्रजाभिःकृतपुण्यंतीर्थयात्राव्रतादिकम् ४१ राजातदंशभागीस्यात्तद्योगादह-
मप्यथ किंव्रतेनविशालाक्षिस्वशरीरविशोषणात् ४२ तपसाब्रह्मचर्येणदत्तमेवोपभुज्यते इत्युक्त्वागृहकार्याणिकारया-
मासभामिनी ४३ संतोष्यवचनैःसातुविससर्जयशोमतीम् व्रतंचक्रेगुणवतीविधिवन्मलमासके ४४ व्रतलोपेनदेवेशिय-
शोमत्याःसुतौमृतौ परमज्वरपीडार्तौसुयौवनधरौप्रिये ४५ तद्दुःखदुःखिताराज्ञीविललापाकुलेक्षणा लुलुठेभूतले-
त्यंतंशोकसंविग्नमानसा ४६ राजापिविललापार्तःसर्वलोकसमन्वितः प्रबोधितोबहुविधोमंडनाख्येनधीमता ४७ अ-
ज्ञानाकुलत्वहृदयोनबुबोधतथापिसः मलमासव्रतावज्ञाकृताजातंफलंतयोः ४८ तदिदंसहसाजातंदुःखोद्वेगसमाकु-
लम् मंडनस्यप्रिया श्रुत्वाशोकतप्तासमागता ४९ उभेरुरुदतुःसख्यौपुत्रशोकाकुलेक्षणौ धारयामासुरन्यायादा-
स्यस्ताःसुविलोचनाः ५० विलापांतेयशोमत्यागुणवत्यामुखंशुभम् कुंकुमाजनसिंदूरस्रक्ताबूलविभूषितं ५१

४५ ४६ ४७ ४८ इदंपुत्रमरणफलं ४९ उभेगुणवती यशोमतीसख्यौ ५० ५१

मंडनं कुंकुमांजनसिंदूरादिधारणं अकारि कृतवती ५२ ५३ ५४ ५५ ५६ ५७ ५८ ५९ ६० ६१ ६२ ·४

मा·१३
अ·८

ददर्शोवाचकिमिदमकालेऽकारिमंडनं धृतमाभरणंवस्त्रंसख्येवंतवनोचितम् ५२ उत्तिष्ठोत्तिष्ठगच्छत्वंगृहंगुणवतीस्व
कम् अभाग्यादेवचात्यंतंदुःखमेवोपभुज्यते ५३ साभृशंप्रेषिताकांतं प्रत्युवाचगृहंगता नजानेप्राणनाथाहंसख्यासंप्रे
षितागृहम् ५४ महादुःखेपिपतितातद्विचारयवैप्रभो मंडनःप्राहतांपत्नींनकिंचिदपिकामिनि ५५ प्रातर्गच्छप्रिये·
भद्रमनिबोधयतांसखीम् अहंनरपतेःपार्श्वेगच्छामिजनसंसदि ५६ श्रीविष्णुरुवाच इतिसंमंत्र्यतौदेविदंपतीप्रतिजग्म
तुः उभयोःसन्निधौप्राप्तौपुत्रशोकापनुत्तये ५७ राज्ञीतथाविधंदृष्ट्वागुणवत्यामुखंशुभम् कोपाकुलाजगादेदंदासीच·
ल्केणाभूपतिम् ५८ राज्ञीप्रेमवशाद्राजातथागत्यानिरीक्ष्यच तौदिदांनेखिलसभ्याग्रेनिमत्वाचुकोपसः ५९ मंडनंबंधया
मासगुणवत्यासमंतदा सर्वंगृहगतंद्रव्यमानयामाससत्वरम् ६० कारागृहगतौकृत्वादंपतीतौरुषान्वितः नृपतिर्दयिता
युक्तःपुनःपुनरतर्जयत् ६१ मंडनःस्वांप्रियांप्राहप्रियेकिमिदमागतं नजानेकर्मणःकस्यविपाकोयमुपस्थितः ६२ गुणव·
त्युवाच देवसेवकवर्गस्यस्वाम्यायत्तंचजीवितम् कोपतःकोपनस्यास्यकाकथाक्रियतेवृथा ६३ आवयोर्दुःखमुदधिंवार
यिष्यतिकेवलम् विष्णुर्विश्वंभराभारधारणैकधुरंधरः ६४ श्रीविष्णुरुवाच इत्युक्त्वापतिताभूमौलोहशृंखलयान्विता
मंडनोपिचनिःश्वासपरमोविरतश्वसः ६५ अत्रांतरेश्रीपतिनातज्ज्ञातंदुःखबंधनम् स्वप्नेसमेत्यकथितंराज्ञेराज्ञेचसत्वरम्
६६ हरिरुवाच अहोनयुक्तंकृतवानसित्वंवीरबाहुक मुंचमुंचत्विमौराजन्दंपतीयौत्वयाधृतौ ६७ अधिमासव्रतफलं
जातमक्षयमेतयोः प्राग्भवेपिनिर्धनयोर्मामुद्दिश्यकृतंचयत् ६८ कुंकुमांजनसिंदूरस्वक्तांबूलदलादिकम् प्रक्षा·
लितेपिवदनेनयातिविलयंस्वयम् ६९

६३ ६४ ६५ ६६ ६७ ६८ ६९ ६२

२५

७० ७१ ७२ ७३ ७४ ७५ ७६ ७७ ७८ ७९ वीरवैश्यविषये प्रसिद्धेतिहासमाह पाद्मोक्तमाहात्म्ये विष्णुरुवा

शृणुदेविप्रवक्ष्यामिमहालक्ष्मीकथानकं सर्वपापप्रशमनंसर्वदुःखनिबर्हणम् आसीत्पुराकृतयुगेसुमतिर्नामभूपतिः सोमवंशोद्भवःश्रीमान्सप्तद्वीपैकराट्स्वयं धर्मात्मासर्वसंपन्नो हरिभक्तिपरायणः तस्यभार्यामहाभागासर्वलक्षणसंयुता पतिव्रतासुमतीनावुभौचरतोव्रतम् अ

ततोनदोषान्नृपतेर्गुणवत्याःप्रियस्यच नकृतंतवपत्न्याचतद्व्रतंमेसुदुर्लभं ७० पुत्रशोकाकुलादीनातेनजाताविशांपते तच्छ्रुत्वासहसोत्थायवीरबाहुर्नृपस्तदा ७१ स्वप्नवृत्तंविचिन्त्याशुपत्न्यैसर्वंन्यवेदयत् राजपत्न्यापिकथितंमयापिस्वप्नमीदृशम् ७२ लब्धंविलोकितंचैवसख्याप्रक्षालितंमुखम् कारागृहतदागत्यनृपतिःप्रिययासह ७३ स्वयंप्रक्षालयामासगुणवत्यामुखाम्बुजम् यावद्दर्शयतेपत्न्यैतावद्देवविभूषिता ७४ पूर्ववद्ददृशेसापिलज्जितातोतोस्वचेतसि ततः प्रमुदितंसर्वराजामात्यजनादिकम् ७५ विमोच्यबंधनाद्राजावस्त्रादिभिरपूजयत् कृतांजलिपुटःस्थित्वाक्षमाप्यचपुनः पुनः ७६ पुनरेवागतेकालेमलमासव्रतंशुभम् सर्वेचक्रुर्यथाशास्त्रंलोकाश्चश्रीपते प्रियम् ७७ तद्व्रतस्यप्रभावेनजातास्तेसुखभागिनः तदाप्रभृतिविख्यातंव्रतमेतद्भूद्भुवि ७८ सुखदंसर्वलोकानांदुःखदारिद्र्यनाशनम् पुत्रपौत्रर्धिदंलोकेधनधान्यविवर्धनम् ७९ वीरनाम्नापुरावैश्योमहापापरतःसदा

धिमासाभिधंनित्यमुभौजातिस्मरौपरौ अन्नदानरतौनित्यंजलदानपरायणौ तडागारामप्रासादानसंख्यातान्वितेनतुः आययौबहुभिःशिष्यैर्द्रष्टुकामोंगिरास्ततः तंदृष्ट्वासहसोत्थायत्वाब्रवीद्वचः राजोवाच भगवन्कृतकृत्योस्मिभवदागमनेनच ममपुत्राश्चदाराश्चसंपत्त्वयिसमर्पिता ममकायश्चशांतात्मन्ब्रह्मन्तेकरवाणिकिम् विनयावनतंभूतंनिरीक्ष्यसमुनीश्वरः स्पृशन्करेणराजानंप्रत्युवाचातिहर्षितः त्वामद्याचारनिरतंसर्वसंपत्समन्वितं नित्यंव्रतपरांभार्यांदृष्ट्वातेप्रीतिमानहं कथमेतद्धितेलब्धंयथावद्वक्तुमर्हसि सुमतिरुवाच शृणुष्वभगवन्सर्वंयत्पृच्छसिवदामितत्

आश्चर्यभूतंकमहदावयोश्चरितंविभो अहमासीत्पुरावैश्योनाम्नावीरइतिश्रुतः महापातकसंसर्गीविप्रद्रव्यापहारकः कुमार्गनिरतोनित्यंसर्वलोकाहितेरतः सर्वैर्बंधुजनैर्मुक्तोदुःखाद्वनमुपागतः मृगमांसाशनोनित्यंतथामार्गनिरोधकः एकदाक्षुत्परिश्रांतोदुःखितोतिपिपासितः जीर्णदेवालयंपश्यन्श्रीविष्णोर्विजनेवने सरसितत्समीपस्थेजलंपीत्वाक्षणंस्थितः अथयेमागतासाध्वीममपत्न्यातिदुःखिना बंधुवर्गपरित्यक्ताभ्रमंतीविजनेवने इमांदुःखवतींदृष्ट्वाजालामेविपुलांघ्रिणा मयादत्तंजलंचास्मैमहद्वनफलंतथा मामुवाचवनेचेयंममदुःखेनदुःखिता सुष्टुमत्युवाच स्वामिन्किमर्थमद्यापिपापंकर्तुमिहोद्यते ज्ञानेनाज्ञानतोवापिपापंकुर्वंतियेनराः स्वकर्मक्षयपर्यंतंतिष्ठंतिनरकेखलु किमर्थंपापकर्माणिकुर्वंतिहिपुनःपुनः किंत्वार्यनियतान्धर्मान्प्रवक्ष्यामिहितावहान् महापातकयुक्ताश्चयुक्तावासर्वपातकैः अंतकालेचसंप्राप्तेवि-

व्रतपुण्येनसंजातोसुमतिर्नामभूपतिः ८० सूतउवाच पुरुषोत्तममासस्यतस्माद्व्रतंसमाचरेत् शौनकउवाच
मलमासस्यचकथंपुरुषोत्तमनामकम् ८१ तन्मेविस्तरतोब्रूहिरोमहर्षणनंदन तववाक्यामृतेनैवतृप्तिर्नैवप्रजाय
ते ८२ इतिश्रीसप्तपुराणसा॰ श्रीपुरु॰ मासमा॰ मेनकाव्रतनिरूपणपूर्वकमंडनेतिहासकथनंनामाष्टमोऽध्यायः ८

ष्णोर्नामगृणंतिये यतीनांविष्णुभक्तानांपरिचर्यापरायणाः मुहूर्तंवामुहूर्तार्द्धंतिष्ठंतिहरिमंदिरे उपलेपनकर्तारःसन्मार्जनपरायणाः ऐहिकामुष्मिकफलंतेषांभवतिनिश्चितं मलमासव्रतंचापिश्रुतंमेबहुविस्तरं तत्कुरुष्वमहाभागयदिश्रेयोभिवांछसि एवमाभाषितंश्रुत्वानिश्चयोभूत्सुखावहः ततःपूर्वोक्तसद्धर्माः कृतामेशक्तितोमुने एवंबहुतिथेकालेजातंपंचत्वमावयोः तेनव्रतप्रभावेनजातोजातिस्मरोभुवि पूर्वजन्मार्जितंसर्वंमेहिकंचलयंगतं पापंहिदुःखदंसर्वंमलमासव्रतादरात् तस्मात्तातप्रभावोहंतदारभ्यमहामुने चरामिव्रतमेतत्तु यावदाजीवनावधि विष्णुरुवाच तदाचरणमात्रेणासराष्ट्रोराजनायकः वैकुंठमगमद्विपुण्यकोट्यापिदुर्लभं तस्माद्भागवतैःसर्वैरनुष्ठेयोधिमासकः विष्णुतुष्टिकरोनित्यंवांछितार्थप्रदायकइति ८० ८१ ८२ इतिपुरुषोत्तममाहात्म्यटीकायामष्टमोऽध्यायः ८ ५९ ५९

२६

अथमलमासस्यपुरुषोत्तममासनामप्राप्तिप्रसंगमाह सूतउवाचेत्यादिनायावदध्यायसमाप्ति १ २ मधुश्चैत्रः ३ ४ ५ ६ ७

सूतउवाच मलमासस्ययन्नामपुरुषोत्तमसंज्ञकं नारदाख्यपुराणोक्तंयेनासीत्तन्निबोधमे १ एकदानारदोगच्छन्नरनारायणा
श्रमम् नत्वास्तुत्वेश्वरंपश्चात्पप्रच्छविनयान्वितः २ संतिमध्वादयोमासाः सेश्वरास्तेश्रुतामया तन्मध्येनश्रुतोमासःपुरुषोत्तमसं
ज्ञकः ३ पुरुषोत्तमस्तुकोमासोयत्स्वामीपुरुषोत्तमः स्वरूपंतस्यमासस्यसविधानंवदप्रभो ४ श्रीनारायणउवाच शृणु·
नारदवक्ष्यामियदुक्तंहरिणापुरा राज्ञेयुधिष्ठिरायैवचैकदाकाम्यकेवने ५ दुःखितान्पांडवान्दृष्टुमाजगामहरिःस्वयम्
तदातेपूजनंचक्रुर्वन्यमूलफलैर्हरिः ६ ततोर्जुनश्चश्रीकृष्णंनामंनामंपुनःपुनः तंतथाकृतवान्प्रश्नंययापृच्छतियंभवान् ७
श्रुत्वैवंभगवान्दध्यौमुहूर्तंचततोब्रवीत् श्रीकृष्णउवाच अपूर्वोयंकृतःप्रश्नोऋषीणामपिदुर्घटः ८ तथापिवक्ष्येमित्रत्वा
द्भक्तत्वाच्चतवार्जुन मध्वादयश्चयेमासालवपक्षाश्चनाडिकाः९यामास्त्रियामऋतवोमुहूर्तान्ययनेउभे हायनंचयुगान्येव
परार्द्धांताःपरेचये १० नतेषांकश्चिदप्यास्तित्यपूज्यःस्वामिवर्जितः स्वस्वामियोगमाहात्म्यात्सर्वेसौभाग्यशालिनः ११ अधिमा
सःसमुत्पन्नःकदाचित्पांडुनंदन तमूचुःसकलालोकाअसहायंजुगुप्सितम् १२ अनर्होमलमासोयंरविसंक्रमवर्जितः अ-
स्पृश्योमलरूपत्वाच्छुभेकर्मणिगर्हितः १३ श्रुत्वैतद्वचनंलोकात्निरुद्योगोहतप्रभः चिंताग्रस्तोतिखिन्नात्मामुमूर्षुरभवत्ततः
१४ पश्चाद्धैर्यंसमालंब्यवैकुंठंप्राप्तवानसौ तत्रगत्वाधिमासोवैमांतुष्टावकृतांजलिः १५ अधिमासउवाच अयिनाथ
कृपानिधेहरेनकथंरक्षसिमामिहागतम् कृपणंप्रबलैर्निराकृतंमलमासेत्यभिधांविधायमे १६ शुभकर्मणिवर्जितंहिमां·
निरधीशंमलिनंसदैवतैः वदमांशरणागतंकथंनतथाद्यावसिदीनवत्सल १७

८ ९ १० ११ कदाचित्सौरचांद्रगमनंन्यूनाधिक्यभावेन १२ १३ १४ १५ १६ १७

१८ १९ २० २१ २२ २३ २४ २५ २६ २७ २८ २९ ३०

इतिविज्ञाप्यभूमानंपुनराहनिरीश्वरः किंनजानासिभगवान्निर्भाग्यस्यममव्यथाम् १८ तथापिवच्मिहेनाथदुःखजालमसं
वृत तादृशंनैवकस्यापिनश्रुतंनावलोकितम् १९ क्षणालवामुहूर्ताश्चपक्षामासादिवानिशम् स्वामिनामधिकारैस्तेमोदते-
निर्भयाःसदा २० नमेनामनमेस्वामीनहिकश्चिन्ममाश्रयः तस्मान्निराकृतःसर्वैःसाधिदैवैःसुकर्मणः २१ तस्माद्विनष्टुमिच्छा
मिनाहंजीवितुमुत्सहे पुनःपुनःपामरेणनवक्तव्यंप्रभुर्भवान् २२ इत्युक्त्वामलमासोयंविररामविधेःसुतः श्रीकृष्णउवाच
शृणुतत्त्ववृत्तांतप्रवक्ष्यामितवाग्रतः २३ नेत्रकोणसमादिष्टस्तदानींहरिणार्जुनः विजयामासपक्षेणतंमासंमूर्छितंखगः
२४ विलपंतंवेपमानंकृपयाहरिरब्रवीत् श्रीविष्णुरुवाच उत्तिष्ठोत्तिष्ठभद्रंतेविषादंवत्समाकुरु २५ त्वद्दुःखंदुर्निवार्यंमेप्रति
भातिनिरीश्वर इत्युक्त्वाक्षणंध्यात्वातदुपायंयथावदत् २६ श्रीविष्णुरुवाच वत्सागच्छमयासार्द्धंगोलोकंयोगिदुर्लभम्
यत्रास्तेभगवान्कृष्णःपुरुषोत्तमईश्वरः २७ गोपिकावृंदमध्यस्थोद्विभुजोमुरलीधरः नवीननीरदश्यामोरक्तपंकजलोचनः
२८ शारदीयपार्वणेंदुशोभातिरोचनाननः कोटिकंदर्पलावण्यलीलाधाममनोहरः २९ पीतांबरधरःस्रग्वीवनमालाविभूषि
तः चंदनोक्षितसर्वांगोकस्तूरीकुंकुमान्वितः ३० श्रीवत्सकौस्तुभप्रेमभूषणोभक्तवत्सलः सद्रत्नसाररचितकिरीटकुंडलो
ज्वलः ३१ रत्नसिंहासनारूढःपार्षदैःपरिवेष्टितः सएवपरमंब्रह्मपुराणपुरुषोत्तमः ३२ स्वेच्छामयःसर्वबीजंसर्वाधारःप
रात्परः निरीहोनिर्विकारश्चपरिपूर्णतमःप्रभुः ३३ प्रकृतेःपरईशानोनिर्गुणोनित्यविग्रहः गच्छावस्तत्रत्वद्दुःखंश्रीकृष्णोव्य
पनेष्यति ३४ श्रीनारायणउवाच इत्युक्त्वातंकरेकृत्वागोलोकंगतवान्हरिः त्रिकोटियोजनायामंविस्तीर्णंमंडलाकृति ३५
तदधोदक्षिणेसव्येपंचाशत्कोटिविस्तरात् वैकुंठःशिवलोकश्चतत्समःसुमनोहरः ३६

३१ ३२ ३३ ३४ ३५ ३६

३७ ३८ ३९ ४० ४१ ४२ ४३ ४४ ४५ ४६ ४७ ४८ ४९

कोटियोजनविस्तीर्णो वैकुंठोमंडलाकृतिः सव्येनशिवलोकश्चकोटियोजनविस्तृतः ३७ गोलोकाभ्यंतरेज्योतिरतीवसुम-
नोहरम् ध्यायंतेयोगिनःशश्वद्योगेनज्ञानचक्षुषा ३८ तदेवानंदजनकंनिराकारंपरात्परम् तज्ज्योतिरंतरेरूपंअतीवसुमनोह
रम् ३९ कोटिकंदर्पसौंदर्यंद्विभुजंमुरलीधरम् रत्नसिंहासनस्थंचपरमात्मस्वरूपकम् ४० नत्वोवाचरमानाथोबद्धांजलि
पुटःपुरः उपविश्यततोविष्णुःश्रीकृष्णचरणांबुजे ४१ नामयामासतंमासंवेपमानंतदग्रतः तदापप्रच्छश्रीकृष्णःकोयं
कस्मादिहागतः ४२ कस्माद्रुदतिगोलोकेनकश्चिद्दुःखमश्नुते तस्मादयंकथंविष्णोमदग्रेदुःखतःस्थितः ४३ श्रीविष्णुरु
वाच वृंदावनकलानाथश्रीकृष्णमुरलीधर श्रूयतामधिमासोयंदुःखवान्स्थितवाग्रतः ४४ तस्मादहमिहायातोगृहीत्वामुनि
रीश्वरम् दुःखदावानलंतीव्रंएतदीयंनिराकुरु ४५ स्नानदानशुभंकर्मकर्तव्यंनेशवर्जिते एवंतिरस्कृतःसर्वैर्वनस्पतिलतादि-
भिः ४६ मासैर्द्वादशभिश्चैवकलाकाष्ठालवादिभिः अयनैर्हायनैश्चैवस्वामिगर्वसमन्वितः ४७ अतस्त्वामाश्रितोनूनंकरेकृ
त्वानिराश्रयम् मदर्थमपिकर्तव्यमेतद्दुःखनिवारणम् ४८ श्रीपूर्णपुरुषोत्तमउवाच समीचीनंकृतंविष्णोयदत्रागतवा
नभवान् मलमासंकरेकृत्वालोकेकीर्तिमवाप्स्यसि ४९ यस्त्वयोरीकृतोजीवःसमयैवोरीकृतः अतएनंकरिष्यामिसर्वोप
रिमयासमम् ५० गुणैःकीर्त्यानुभावेनषड्गुणैश्चपराक्रमैः भक्तानांवरदानेनगुणैरन्यैश्चमामकैः ५१ अहमेतैर्यथालोकेप्रथि-
तःपुरुषोत्तमः तथायमपिलोकेषुप्रथितःपुरुषोत्तमः ५२ अहमेवास्यसंजातःस्वामीचमधुसूदन सर्वेमासाःसकामाश्चनिष्का
मोयंमयाकृतः ५३ अकामःसर्वकामोवायोऽधिमासंप्रपूजयेत् कर्माणिभस्मसात्कृत्वामामेवैष्यत्यसंशयः ५४ तपयोगादि
कष्टेनयत्पदंनैवप्राप्यते पुरुषोत्तमस्यभक्तास्तुमासमात्रेणतत्पदम् ५५

५० ५१ ५२ ५४ ५४ ५५

५६ ५७ ५८ ५९ ६० ६१ ६२ ६३ इतिपुरुषोत्तममासमाहात्म्यटीकायांनवमोऽध्यायः ९ ६९ अथमलमासस्यानाद

पुरुषोत्तमेनिमन्नामृतदप्यस्मैसमर्पितम् अतस्त्वद्भक्तसंकल्पाःपूरणीयामयैवहि ५६ पुरुषोत्तममासाद्यवर्षेवर्षेतृतीयके नाचरिष्यंतियेधर्मंकुंभीपाकेपतंतिते ५७ जायंतेदुर्भगादुष्टाःपरभाग्योपजीविनः तिरस्कुर्वंतियेमासंतेषांस्वप्नेसुखंनहि ५८ तस्मात्सर्वात्मनासर्वैःस्नानपूजाजपादिकम् विशेषेणप्रकर्तव्यंदानंशक्त्यनुसारतः ५९ अतस्त्वमाधिमासस्यचिंतांत्यक्त्वारमापते गच्छवैकुंठमतुलंगृहीत्वापुरुषोत्तमम् ६० श्रीनारायणउवाच अथश्रीरुक्मिणीनाथोवैकुंठंगतवान्मुदा तत्र गत्वाधिमासंतंवासयामासनारद ६१ सतत्रवसतिंप्राप्यमोदमानोऽभवत्तदा मासानामधिपोभूत्वारमतेविष्णुनासह ६२ द्वादशेष्वपिमासेषुमलमासंवरंप्रभुः विधायमनसातुष्टोबभूवप्रकृतिप्रियः ६३ इतिश्रीसप्तपुराणसारोद्धारेश्रीपुरु॰मा॰ मलमासवरप्रदानकथनंनामनवमोऽध्यायः ९ ६९ श्रीनारायणउवाच एवंश्रीमलमासस्यवरदानमहोत्सवं संश्राव्यपांडवानाहकृपयाभगवान्पुनः १ श्रीकृष्णउवाच जानेहंराजशार्दूल तपोवनमुपागतैः भवद्भिर्दुःखसंमग्नैर्नाहृतः पुरुषोत्तमः २ इंद्रकीलंगतवतिबीभत्सौरणशालिनि तद्वियोगपरिक्लिष्टैर्नज्ञातःपुरुषोत्तमः ३ अदृष्टयादृशंपुंसांतादृशं भासतेसदा अथापरंप्रवक्ष्यामिभवतांदुःखकारणम् ४ पांचालीयंमहाभागापूर्वजन्मनिसुंदरि मेधावीद्विजमुख्यस्यपुत्री जाताक्रमध्यमा ५ रूपलावण्यललितासंजातादशवार्षिकी चातुर्यगुणसंपन्नापितुरेकैवपुत्रिका ६ तन्मातास्वर्गतापूर्वं लालितापुत्रवत्सदा सानित्यंस्वसखीसौख्यंपृष्ट्वाचिंतयतीमुहुः ७ यथाऽसांभर्तृजनितंपुत्रपौत्रादिजंतथा सौख्यंहिव र्ततेतद्वन्नमाप्येवंकदाभवेत् ८ ममभाग्यंकथंसुखंभर्ताकोपिनवांछति पंडितोपिपितामूढोमातामेस्वर्गतिंगता ९

येनदुःखंभवतीतिवक्तुमितिहासंप्रस्तौति श्रीनारायणउवाच १ २ बीभत्सौअर्जुने पांचालीद्रौपदी ३ ४ ५ ६ ७ ८ ९

१० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० दुर्वासाप्रतापमाह येनाहमित्यादि

किंकृत्वामेस्करवंतस्यादिनिश्चिंताकुलोभवत् मेधावीचान्यविषयेविचिन्वन्सदृशंवरं १० तादृशंवरमप्राप्यनिराशःपुनराय
यौ स्नतास्वकीयभाग्याभ्यांभग्नसंकल्पपंजरः ११ अवापदैवयोगेनज्वरयोगान्मृतिंमुनिः प्राणोत्क्रमणमालोक्यहाहेतिसा-
सुतारुदत् १२ अंकेकृत्वापितुर्देहंविललापसुदुःखिता हाहापितःकृपासिंधोह्यात्मजानंददायक १३ कस्यांकेमांनिधा-
यायगतोसिवैष्णवंपुरम् नस्नातानैवबंधुश्चनमेमातातपस्विनी १४ भोजनाच्छादनेचिंताकोमेतातकरिष्यति असंपाद्यैववि-
वाहविधिंदुहितृवत्सल १५ क्वगतोसिपितस्तातइहागच्छतपोनिधे उत्तिष्ठोत्तिष्ठहेतातइत्युक्त्वाविललापह १६ तत्कृतारोदनंश्रु-
त्वाविप्रास्तद्वनवासिनः ससंभ्रमाःसमाजग्मुर्हाहाकारसमन्विताः १७ ततःसंरुरुदुःसर्वे मुनयःकाननौकसः स्नातोत्संगाच्छ-
वंनीत्वास्मशानेशिवसन्निधौ १८ अंतेष्टिंविधिनाकृत्वान्यदहन्काष्टवेष्टितं ततःकन्यांसमाश्वास्यसर्वेतेस्वगृहान्ययुः १९ क-
न्याधैर्यंसमालंब्यतत्रैवन्यवसच्चिरं तामाससाददुर्वासाभाविष्यद्बलनोदितः २० यदृच्छयावनेतस्मिन्परमःकोपनोमुनिः येना-
हमपिभूपालसर्वदेवनमस्कृतः २१ रथेसंयोजितःसाक्षाद्रुक्मिण्यासहनारद उभाभ्यांचालितेमार्गेरथेदुर्वाससान्वितः २२
सूचितोहंजलार्थिन्यास्कंधस्थयुगयापुरा गच्छन्नेवपदाग्रेणसंपीड्यवसुधातलम् २३ आनीतवान्भोगवतींप्रियाप्रेमपरि-
प्लुतः सैवोर्ध्वगामिनीभूत्वातावन्मात्रेणवारिणा २४ न्यवारयन्महाराजरुक्मिणीतृषमुल्बणाम् तदृष्ट्वातत्क्षणोद्भूतक्रोधे-
नप्रज्वलन्निव २५ प्रलयाग्निरिवोत्तिष्ठन्सशापकोपनोमुनिः यद्भवान्मामवज्ञायप्रियाप्रेम्णापायज्जलं २६ पाययामासयुवयो-
र्वियोगोऽस्तुसदाद्युतः एतादृशंमुनिंदृष्ट्वाकुमारीशोकसागरात् २७ उन्मज्योत्थायधैर्येणववंदेचरणौमुनेः पूजयित्वार्घ्यपा-
द्याद्यैस्ततःसंप्रार्थयेच्चतम् २८

ना २१ २२ २३ २४ २५ २६ प्रासंगिकमाह एतादृशमिति २७ २८

२९ ३० ३१ ३२ ३३ ३४ मलमासहेलनप्रसंगमाह ३५ ३६ ३७ ३८ ३९ ४०

किन्नवेत्सिदयासिंधोतन्निर्वापयशंकर यांयांदिशंप्रपश्यामिसासाशून्याविभातिमे २९ नमांकामयतेकश्चित्पाणिग्रहण
हेतवे अतःपरंभविष्यामिवृषलीतिमहद्भयम् ३० तस्मान्नजायतेनिद्रानरुचिर्भोजनेमम इत्युक्त्वाश्रुमुखीबालाविररामतद्
ग्रतः ३१ दुर्वासास्तदुपायार्थंविचार्याहस्वमित्रजाम् दुर्वासाउवाच शृणुसुंदरिवक्ष्यामिगुह्याद्गुह्यतरंमहत् आख्येयंनै
वकस्यापित्वदर्थंतुविचारितम् इतस्तृतीयःसुभगेमासस्तुपुरुषोत्तमः ३३ तस्मिन्संसेवितेबालेसर्वंभवतिवांछितम् अत
स्त्वंकुरुकल्याणितद्व्रतसुमनोहरम् ३४ दुर्वासोवचनंश्रुत्वाबालामूढधियाऽवदत् भाविनाप्रेरिताराजन्असूयापूरितास-
ती ३५ बालाउचुः नमित्थरोचनेब्रह्मन्यदुक्तंभवतामुने माघोर्जमाधवाःकिंवानदास्यंतिसुकामितम् ३६ अथवा-
पुविमार्तंडःशिवोवाजगदंबिका गणेशःसेवितःकिंवानसंयच्छतिकामितं ३७ अयंतुमलिनोमासःसर्वकर्मविगर्हितः असू
र्यसंक्रमःश्रेष्ठःक्रियतेचकथंमुने ३८ एवमुक्तस्तयाविप्रपुत्र्यासक्रोधनोमुनिः स्वस्थोभूत्वामुनिःप्राहतांबालांमतिविह्वलां
३९ दुर्वासाउवाच अहोबालेनमेकोपोस्त्यज्ञेत्वयिकश्चन यत्तेमनसिनिर्भाग्येयथारुचितथाकुरु ४० अपरंश्रूयतांबालेभ-
विष्यंकिंचिदुच्यते पुरुषोत्तममासस्ययत्त्वयानादरःकृतः ४१ सर्वथातत्फलंभावि इहवापरजन्मनि हिताहितंनजानातिबा
लभावाच्छुभाशुभम् ४२ शुभंशुभेतरंभावि नकेनाप्यनुलंघ्यते इत्युदीर्यजगामाशुदुर्वासाबद्रिकाश्रमं ४३ तत्क्षणंनिः
प्रभासाऽभूत्पुरुषोत्तमहेलया विमृश्यसुचिरंकालंतत्कालफलदंशिवं ४४ आराधयामिदेवेशमितिनिश्चित्यस्वाश्रमे अ
थारभतकल्याणीतपःपरमदारुणं ४५ चिंतयंतीशिवंशांतंपंचवक्त्रंसनातनम् ग्रीष्मेपंचाग्निमध्येचहेमंतेशिशिरेतथा ४६

४१ ४२ ४३ ४४ ४५ ४६ ४७ ४८ ४९

४७ ४८ ४९ ५० ५१ ५२ ५३ ५४ ५५ धूर्जटेः शिवस्य ५६ ५७

आकंठमग्नासीतोदेवर्षास्वासारसंस्थिता संध्ययोरुभयोस्तन्वीधूम्रपानमचीकरत् ४७ एवंनवसहस्राणिवर्षाण्याराधयेच्छि
वम् संतुष्टस्तपसातस्याःशिवोप्रत्यक्षमागतः ४८ वरंवरयभद्रंतेयत्तेमनसिवांछितं तंदृष्ट्वासहसोत्तस्थौदेहःप्राणमिवागतम्
४९ तपःकृशापिसाबालातुष्टावशंकरम् नमःशिवायशांतायभक्तदुःखार्त्तिनाशिने ५० दीनानाथदयासिंधोप्रसन्नस्त्वं
ममोपरि पतिंदेहिपतिंदेहि पतिंपतिमहंवृणे ५१ पतिंदेहिमहादेवनान्यन्मेचिंतितंहृदि तदाकर्ण्यमहादेवोजगादमुनिकन्यकां
५२ शिवउवाच त्वयायत्त्वंमुखेनोक्तंतदस्तुमुनिकन्यके पंचकृत्वस्त्वयायस्मात्पतिःसंप्रार्थितोऽधुना ५३ तस्मात्पंचभ-
विष्यंतिपतयस्तवसुंदरि शूराःसकलधर्मज्ञाःसाधवःसत्यविक्रमाः ५४ यज्वानःस्वगुणख्याता सपत्संधाजितेंद्रियाः त्वन्मु
खप्रेक्षकाःसर्वेराजन्यागुणशालिनः ५५ श्रीकृष्णउवाच इत्याकर्ण्यवचस्तस्यधूर्जटेरनतिप्रियम् उवाचावनतीभूत्वाबाला
वाक्यविशारदा ५६ बालोवाच एवंमेगिरिजाकांतमास्तुलोकेनिकौतुकम् नदृष्टानश्रुताक्कापिनार्येकापंचभर्तृका ५७ ए
कस्यपंचपत्न्यस्तुपुरुषस्यभवंतिहि त्वदीयाहंकथंशंभोभवेयंपंचभर्तृका ५८ तवैवजायतेलज्जात्वदीयाहंयतःप्रभो शि-
वउवाच मास्तुतेस्मिन्भवेभीरुभव्यंतत्परजन्मनि ५९ अयोनिसंभवातत्रभविष्यसितपोबलात् भर्तृजंसुखमासाद्यततो
गच्छपरंपदम् ६० यत्त्वयाबालभावेनपुरुषोत्तमहेलनम् कृतंतेनैवभर्तारःपंचभाविहिजात्मजे ६१ इत्युक्त्वाचगतेशंभौसा-
बालाविगतप्रभा निःश्वासपरमाभीताकालेनैवतपस्विनी ६२ तथाश्रमेस्वकेनष्टातपसादग्धकल्मषा तदानीमेवधर्मिष्ठोयज्ञसे
नोनराधिपः ६३ बृहत्संभारसंपन्नमकरोद्यज्ञमुत्तमम् तद्यज्ञकुंडादुद्भूताकुमारीकनकप्रभा ६४

५८ प्रस्मिन्भवेजन्मनि ५९ ६० ६१ ६२ ६३ ६४ ६५ ६५

द्रुपद एव यज्ञसेनः आर्षेयी मेधावी तनया ६५ ६६ कचग्रहं केशग्रहणं ६७ ६८ ६९ ७० ७१ ७२ ७३ ७४

सेयंद्रुपदशार्दूलतनयाप्रथिताभुवि द्रौपदीसर्वलोकेषुत्वार्षेयीयापुराभवत् ६५ सेयंस्वयंवरेराजन्मत्स्यवेधेकृतेसति
लब्धाऽर्जुनेनपांचाली क्षत्रियेराजमंडले ६६ तृणीकृत्यनृपान्सर्वान्भीष्मकर्णादिकान्बहून् सेयंकचग्रहंप्राप्तादुष्टदुः
शासनान्मुने ६७ मयाचोपेक्षितारराजन्पुरुषोत्तमहेलनात् पुरुषोत्तमतिरस्कारकर्तारंपातयाम्यहम् ६८ तस्मादाराधयस्त्वेन
मागामिपुरुषोत्तमम् वर्षेचतुर्दशेपूर्णेसर्वंतेभाविनाशकम् ६९ सर्वशत्रुक्षयंकृत्वात्वंचराजाभविष्यसि इतिकृष्णःसमाश्वास्य
पांडवान्द्रौपदींतथा ७० ययौद्वारावतीमेतान्परावृत्यानुगच्छतः श्रीनारायणउवाच अथश्रीद्वारकानाथेगतेराजायुधि
ष्ठिरः पुरुषोत्तमेमनःकृत्वाभ्रातॄनाहअहोइति कथंकरवाणिलभ्यंतेनाभ्यर्च्यपुरुषोत्तमम् ७२ तेधन्याभारतेवर्षेयैःकृतोपु
रुषोत्तमः एवंसर्वेषुतीर्थेषुभ्रमतःपांडुनंदनः ७३ पुरुषोत्तममासाद्यव्रतंचेरुर्विधानतः तदंतेराज्यमतुलमवापुर्गतकंटकम्
७४ पूर्णेचतुर्दशेवर्षेश्रीकृष्णकृपयामुने दृढधन्वानृपःपूर्वंसूर्यवंशसमुद्भवः ७५ पुरुषोत्तममासस्यसेवनान्महतींश्रियम्
पुत्रपौत्रकरंचैवभुक्त्वाभोगाननेकशः ७६ जगामभगवल्लोकमगम्यंयोगिनामपि एतन्मासस्यमाहात्म्यमतुलंमुनिसत्तम
७७ इतिश्रीसप्तपुराणसारोद्धारेश्रीपुरुषोत्तममासमाहात्म्येपुरुषोत्तमहेलनफलकथनंनामदशमोऽध्यायः १० ६९
श्रीनारायणउवाच शृणुनारदवक्ष्येहंभूपस्यदृढधन्वनः कथांपुरातनींरम्यांस्वर्धुनीमिवपावनीम् १ आसीद्धैहयदेशस्य
चित्रधर्मामहीपतिः तस्यपुत्रोऽतितेजस्वीदृढधन्वेतिविश्रुतः २ ससर्वगुणसंपन्नोसत्यवाक्धार्मिकःशुचिः पुष्करावर्तके
पुण्येनगरेत्यंतशोभिते ३ राज्यंचकारभूपालोनीतिशास्त्रविशारदः तस्यशीलवतीभार्यानाम्नायागुणसुंदरी ४

३०

७५ ७६ ७७ इतिश्रीपुरुषोत्तममासमाहात्म्यटीकायां दशमोऽध्यायः १० ६९ स्वर्धुनीगंगा १ २ ३ ४

५ दांतः इंद्रियजितः ६ वाग्मी वाक्चतुरः षड्वर्गाः कामक्रोधलोभमोहमदमात्सर्याः ८ ९ १० ११ १२ कासारं सरोवरं १३

विदर्भराजतनयास्सुषुवेचतुरःसुतान् चित्रवाक्चित्रवाहश्चमणिमान्चित्रकुंडलः ५ पुत्रींचारुमतींनामसर्वेतेगुणशालिनः
दृढधन्वागुणैःख्यातःशांतोदांतःस्वरूपवान् ६ वेदवेदांतविद्वाग्मीधनुर्विद्याविशारदः शूरोनिर्जितषड्वर्गःशत्रुसंघविदारणः
७ एकदानिशिसुप्तस्यचिंतासीत्तस्यभूपतेः अहोयंवैभवःकेनपुण्येनमहताभवत् ८ नमयाचतपस्तप्तंनदत्तंनहुतंक्वचित् एवं
चिंतयतस्तस्यरजनीविरतिंगता ९ ततःप्रातःसमुत्थायकृत्वाचान्हिकमात्मनः दानंदत्वाश्वमारुह्यमृगयांकर्तुमाययौ १० क-
श्चिन्मृगोहतोरण्येबाणेनदृढधन्वना वनाद्वनांतरंयातोबाणमादायसत्वरम् ११ शोणितस्रुतिमार्गेणराजाप्यनुययौमृगं मृगःकु
त्रापिसंलीनोराजाबभ्रामतद्वनम् १२ तृषाक्रांतःसकासारंददर्शसागरोपमम् तत्रगत्वासपीत्वासोपानीयंतीरमागतः १३ ततोदद-
र्शन्यग्रोधंघनच्छायंमहातरुं तच्छायायांनिबध्याश्वंनिषसादमहीपतिः १४ तत्रागमत्खगःकश्चिद्वाणींमानुषिमीरयन् शुकः
पपाठश्लोकमेकमेवपुनःपुनः १५ संबोध्यदृढधन्वानमेकाकिनमुपस्थितम् १६ विद्यमानातुलसुखमालोक्यातीवभूतले
नचिंतयसितत्वंत्वंतत्कथंपारमेष्यसि १७ वारंवारमिदंपद्यंपपाठनृपतेःपुरः श्रुत्वातस्यवचोराजामुमुदेमुमुहेपिच १८ किमेतदु
क्तवान्कीर एकपद्यंपुनःपुनः किंवानायंभवेत्कृष्णद्वैपायनसुतःपरः १९ विष्णुर्वामामिवोद्धर्तुंकृपयामाससमागतः इतिचिंत-
यतस्तस्यतत्सेनासमुपागता २० कीरस्त्वदर्शनंप्राप्तोबोधयित्वानराधिपम् राजास्वपुरमागत्यकीरवाक्यमनुस्मरन् २१ वा-
च्यमानोपिनावोचद्विनिद्रस्त्यक्तभोजनः स्वभार्ययानुनीतोपिनकिंचिदवदन्नृपः २२ अथचिंतातुरस्यास्यगृहंवाल्मीकिरा
ययौ राज्ञासंपूजितोवोचत्दृढधन्वानमादरात् २३ चिंतातुरःकथंराजन्वदसर्वंमनोगतम् दृढधन्वोवाच भवदीयपदां
भोजकृपयामेसुखसदा २४

न्यग्रोधं वटवृक्षम् १४ १५ १६ १७ १८ कीरः शुकः १९ २० २१ २२ २३ २४

२५ २६ २७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७

परंत्वेकोस्तिसंदेहोवन्यकीरमुखोद्भूतः कदाचिन्मृगयासक्तंमांसंबोध्यावदद्वचः २५ विद्यमानातुलसुखमालोक्यातीवभूतले
नचिंतयसितत्वंत्वंतत्कथंपारमेष्यसि २६ इतिवाचःशुकेनोक्ताआकर्ण्याहंसुविस्मितः नतज्जानाम्यहंब्रह्मन्तत्संदेहं
निराकुरु २७ समृद्धिरतुलाब्रह्मन्केनपुण्येनमेधुना वाल्मीकिरुवाच शृणुभूपतिशार्दूलप्राग्जन्मचरितंतव २८ पुराजन्मनि
राजेंद्रभवान्द्राविडदेशजः द्विजःकश्चित्सुदेवाख्यस्ताम्रपर्णीतटेवसन् २९ धार्मिकःसत्यवादीचस्वकर्मनिरतःशुचिः
गौतमीतिचतत्पत्नीधर्मयुक्तापतिव्रता ३० एवंधर्मपरायुक्तस्यनजातासंततिर्यदा तदास्वकांतांप्रोवाचविषण्णोगद्गदाक्षरं
३१ अयिसुंदरिसंसारेसुखंनास्तिसुतात्परं नलालितोमयापुत्रोवेदार्थोनप्रबोधितः ३२ नोद्वाहश्चकृतस्तस्यवृथाजन्मगतं
मम अमुत्रसद्गतिर्नास्तिसद्योमेमृत्युरस्तुवा ३३ इतिचिंताकुलपत्न्याबोधितोसौद्विजोत्तमः ताम्रपर्णीतटेगत्वात्वेकांतेचाकरोत्तपः
३४ शुष्कपर्णजलाहारश्चैवाब्दसहस्रकम् तदातत्तपसातुष्टोआजगामहरिःस्वयम् ३५ ततस्तुष्टावतंदेवंश्रीकृष्णं
भक्तवत्सलम् बद्धांजलिपुटोभूत्वासुदेवोगद्गदाक्षरः ३६ नमस्तेदेवदेवेशत्रैलोक्याभयदप्रभो सर्वेश्वरनमस्तेस्तु
त्वामहंशरणंगतः ३७ यदिप्रीतोसिहेनाथदीनबंधोदयानिधे सत्पुत्रंदेहिमेविष्णोपुराणपुरुषोत्तम ३८ श्रीहरिरुवाच
अदेयमपितेसर्वदास्येपुत्रंविनाद्विज त्वदीयभालफलकेवर्णाःसर्वेमयेक्षिताः ३९ सप्तजन्मसुतेपुत्रसुखंधात्राननिर्मितम् इत्या
कर्ण्यहरेर्वाक्यंवज्रनिर्घातनिष्ठुरम् ४० सपपातमहीपृष्ठेछिन्नमूलइवद्रुमः पतिंपतितमालोक्यप्रमदात्यंतदुःखिता ४१
पश्यंतीस्वामिनपुत्रस्पृहाशून्यमरूरुदत् तयोर्भाषणमाकर्ण्यतीव्रशोकसमन्वितम् ४२ वैनतेयोऽवदद्विष्णुंक्षोभसंजातवेपथुः
गरुडउवाच शोकसागरसमग्नाब्राह्मणींवीक्ष्यहेहरे ४३

३८ ३९ ४० ४१ ४२ ४३

॥

४४ ४५ ४६ ४७ ४८ ४९ ५० ५१ ५२ ५३ ५४ ५५

तथैवब्राह्मणानेनक्षरद्बाष्पकलाकुलम् दीनबंधोदयासिंधोदयाद्यक्वगताप्रभो ४४ अहोब्रह्मण्यदेवत्वंस्वधर्मःक्वगतो
ऽधुना त्वद्भक्तस्यचतुर्धाऽपिमुक्तिः करतलेस्थिता ४५ तर्हिविप्रस्यपुत्रेच्छापूरणेकःपरिश्रमः गजमर्पयतःपुंसोह्यंकुशेकःप
रिश्रमः ४६ यददृष्टगतंपुंसस्तदेवभविताध्रुवम् इतिलोकेप्रथाजातात्वद्भक्तिर्विलयंगता ४७ इतिगरुडवचोनिशम्यविष्णु
र्वचनमुवाचखगंसुधोपमानम् अयिखगवरपुत्रमेकमस्मै वितरमनोगतमाशुवैनतेय ४८ वाल्मीकिरुवाच इदंवचनम
हाराजशृणुष्ववचनंमम सुपर्णःकेशवादेशादिदमाहद्विजेश्वरम् ४९ गरुडउवाच सप्तजन्मसुतेपुत्रसुखंनास्तीतियद्व
चः हरिणोक्तंद्विजश्रेष्ठतत्तथैवतथाधुना ५० तथापिस्वामिनाज्ञप्तः कृपयादास्यतेसुतं मदंशसंभवःपुत्रोभवितातेतपोधन
५१ परंतज्जनितंदुःखंयुवयोर्भविताध्रुवम् दंपत्योःपश्यतोःसद्योदत्वावरमनुत्तमम् ५२ खगद्वाराहरिःशीघ्रंययौनिजनि
केतनम् सुदेवोपिसपत्नीकोययौनिजनिकेतनम् ५३ कियत्कालक्रमेणास्यकुमारःसमजायत तदासुदेवोत्यानंदाज्जात
कर्मचकारह ५४ द्विजेभ्यश्चबृहद्दानंददौपश्चात्द्विजोत्तमः नामचास्याकरोद्धीमान्शुकदेवेतिवल्लभम् ५५ सुपर्णेनयतो
दत्तःशुकदेवस्ततःस्मृतः द्विजत्वंप्राप्यतत्पुत्रोविद्यासर्वामवेयिवान् ५६ वाल्मीकिरुवाच एकदादेवलोभ्यागात्सुदेवस
द्मनिमुनिः तमालोक्यसुदेवोसौननामदंडवन्मुदा ५७ चरणेपतितंदृष्ट्वाकुमारंदेवलोब्रवीत् भोभोसुदेवधन्योसितुष्टस्तेभ
गवान्हरिः ५८ यतस्त्वंप्राप्तवान्पुत्रंदुर्लभंसुंदरंवरम् एतादृशःसुतःक्वापिकस्याप्यनवलोकितः ५९ परंत्वेकोमहान्दो
षोयेनसर्वंवृथाकृतम् इत्युक्त्वामौलिमाधुन्वन्विनिःश्वस्याब्रवीन्मुनिः ६० सुदेवतनयोयंतेद्वादशेहायनेजले मृत्युमेष्य
तितस्मात्त्वंशोकंमाकुरुमानसे ६१

५६ ५७ ५८ ५९ ६० ६१ ६२

६२ ६३ ६४ ६५ ६६ ६७ ६८ काननंवनं ६९ ७० ७१

इत्युदीर्यगतोब्रह्मलोकंदेवलकोमुनिः सुदेवःसहगौतम्यापपातधरणीतले ६२ विललापचिरंभूमौदेवल कवचःस्मरन्
अथसागौतमीपुत्रंस्वांकमारोप्यधैर्यतः ६३ चुचुंबवदनंप्रेम्णापश्चात्सानिम्नुवाचसा गौतम्युवाच द्विजराजनकर्तव्याप्रीति-
र्भाव्येषुवस्तुषु ६४ नाभाव्यंभविताकुत्रभाव्यमेवभविष्यति किंनुनोदुःखमापन्नानलरामयुधिष्ठिराः ६५ अतउत्तिष्ठहेना-
थहरिर्भजसनातनम् शरण्यंसर्वजीवानांनिर्वाणपददायकम् ६६ वाल्मीकिरुवाच इतिताःशीतलावाचःसमाकर्ण्यप्रि-
यामुखात् सुदेवोधैर्यमालंब्यहरौचित्तमधारयत् ६७ निःश्वस्यदीनवदनोयद्भाव्यंतद्भविष्यति इतिनिश्चित्यमनसापुष्पा-
द्यर्थंवनंययौ ६८ एवंकृतवतस्तस्यकियान्कालोगतःक्रमात् समित्कुशफलाद्यर्थंकदाचित्काननंययौ ६९ सुदेवोमन-
साध्यायन्हरेःपादसरोरुहम् तस्मिन्नेवदिनेगच्छत्वापींसूनुःसुहृद्वृतः ७० प्रविश्यवापींचिक्रीडेवयस्यैःसहवारिणि
जलयंत्रैःक्षिपन्वारिबालकेषुस्मयन्मुहुः ७१ जलेक्रीडांमुहुःकुर्वन्ग्रीष्मेमोदमुपाययौ एवंसर्वेषुबालेषुक्रीडत्सुप्रेमनि-
र्भरम् ७२ अगाधवारिणितिष्ठन्बालकैरुपमर्दितः सपलायनमान्विच्छन्सुहृद्गणभयाद्भुतम् ७३ विधिनानोदितस्तत्र
नियम्यश्वासमात्मनः ममज्जगाधतोयेसौवंचयन्नात्मनःसखीन् ७४ तत्रापिव्याकुलीभूयततोनिर्गतमुन्मनाः सहसा-
मृतिमापन्नःकुमारोऽगाधवारिणि ७५ जलादनिर्गतंवीक्ष्यसर्वेचकितमानसाः समानवयसःसर्वेहाहाकृत्वाप्रधाविताः
७६ गौतम्यैकथयामासुर्हृच्छोकपरायणाः वज्रपातोपमांवाचंबालानामनतिप्रियाम् ७७ श्रुत्वाभूमौपपाताशुगौतमी
पुत्रवत्सला एतस्मिन्नेवसमयेवनाद्विप्रःसमाययौ ७८ निशम्यपुत्रमरणंत्वेष्टेवावापतद्भुवि ततउत्थायतौविप्रदंपतीवा-
पिकांगतौ ७९

७२ ७३ ७४ ७५ ७६ ७७ ७८ ७९ ८

८० ८१ ८२ ८३ ८४ ८५ ८६ ८७ ८८ ८९ ९०

मृतंपुत्रंसमालिंग्यस्वांकेकृत्वाकलेवरम् सरुदन्विलपन्नेवगद्गदाक्षरमूचिवान् ८० सुदेवउवाच वदपुत्रकमांवाणींनत्वं
गंतुमिहार्हसि वत्साद्ध्यतिसन्निभंवेदाध्ययनहेतवे ८१ तूर्णमुत्तिष्ठहेपुत्रकथंसुप्तोसिसांप्रतम् त्वांविहायनगच्छामिगृहे
किंमेप्रयोजनम् ८२ नमयाचरितंगर्ह्यंब्रह्महत्यापिनोकृता केनकर्मविपाकेनपुत्रोमेनिधनंगतः ८३ अहोधातःकिमेताव
त्फलंलब्धंत्वयामहत् लोचनंममदीनस्यवृद्धस्यकृष्णानिर्दय ८४ कुत्राहंशोधयामाद्यपुत्रंप्रकृतिसुंदरं द्रक्ष्येतवान·
नंकुत्रपुत्रचारुसुलोचनम् ८५ पर्जन्यःस्रवतेवारिसूतेधान्यंवसुंधरा गिरयोरत्नजातानिमुक्तासारंपयोनिधिः ८६ नतं·
देशंप्रपश्यामियत्रपुत्रंमृतंलभेत् अननुज्ञाप्यपितरौनकदापिभवान्गतः ८७ आचामपृष्ट्वाकिंदीर्घमार्गंयातोसिपुत्रक
क्षुत्तृषादीर्यतेनोद्यत्वायसंहृदयंमम ८८ शठोमदन्योभुविनानकोपियोदेवकीसूनुवचोविलंघ्य पुत्रेदुराशांकृतवानभा·
ग्योलभेनकोदृष्टविनष्टवस्तु ८९ दृढधन्वासराजर्षिःस्तुत्वामात्मनमात्मनः अत्याश्चर्येणसंविष्टस्तदाहमुनिराट्पुनः ९०
वाल्मीकिरुवाच एवंविलपतस्तस्यविप्रस्यजगतीपते अकालजलदोऽभ्यागाद्गर्जयंश्चदिशोदश ९१ यावन्मासंववर्षैवम
हीपूर्णजलाभवत् नासौविज्ञातवान्किंचित्पुत्रशोकाग्नितापितः ९२ नपपौबुभुजेनैवपुत्रपुत्रइतिब्रुवन् एवंविलपतस्तस्यमा
सोयोविगतस्तदा ९३ श्रीकृष्णवल्लभोमासःसोभवत्पुरुषोत्तमः अजानतोपितस्यासीत्पुरुषोत्तमसेवनम् ९४ तेनात्यंतःप्र
सन्नःसन्प्रादुरासीद्धरिःस्वयम् ततोदृष्ट्वाहरिंविप्रोसपत्नीकःकृतांजलिः ९५ दंडवच्छ्रीहरिंनत्वासंस्थितःश्रीहरेःपुरः
भगवानपितुष्टःसन्कृपयामुनिमब्रवीत् ९६ श्रीहरिरुवाच भोभोसुदेवधन्योसिभाग्यवान्सांप्रतंभवान् त्वद्भाग्यंवर्णि
तुंकोवासमर्थोभुवनत्रये ९७

९१ ९२ ९३ ९४ ९५ ९६ ९७

९८ पुत्रशोकदूरीकरणार्थेइतिहासांतरमाह तवेति ९९ १०० १ २ ३ ४ ५ ६ ७ तांविष्णुमूर्तिं

शृणुवत्सप्रवक्ष्येऽहंयत्तेभावितपोधन द्वादशाब्दसहस्रायुःपुत्रस्तेभविताद्विज ९८ तवपुत्रसुखंदृश्यादेवाद्यासस्पृहा
द्विज अत्रतेकथयिष्यामिइतिहासंपुरातनम् ९९ पुरामुनीश्वरःकश्चिद्धनुर्नामामहामनाः अमरपुत्रमान्विच्छन्तपस्तेपेसु
दारुणम् १०० सहस्राब्देगतेकालेदेवास्तमब्रुवन्मुनिं वरंवरयभद्रंतेयत्तेमनसिवाञ्छितम् १ इतिदेववचःश्रुत्वासवव्रेत्व
मरंसुतम् तमूचुर्निर्जराःसर्वेनैवभूतोस्तिभूतले २ पुनराहमुनिर्देवान्निमित्तायुर्भवत्विति सुराःप्रोचुर्निमित्तंकिंवदसो-
प्यवदन्मुनिः ३ असौमहान्गिरिर्यावत्तावदायुर्विधीयतां एवमस्त्वितिसंपाद्यसेंद्रादेवादिवंययुः ४ धनुःशर्मासुतंले
भेकालेनाल्पेनतादृशं प्राप्तेतुषोडशेवर्षेपुत्रंप्राहमुनीश्वरः ५ हेवत्समुनयःसर्वेनावज्ञेयाःकदाचन शिक्षितोपितथापुत्रः
सोहेगानकरोन्मुनीन् ६ निमित्तायुर्बलान्मत्तोब्राह्मणानवमन्यत कदाचिन्महिषोनामामुनिर्विष्णुमपूजयत् ७
तदानींससमागत्यत मादायत्वरान्वितः चिक्षेपनिजचांचल्यात्कूपेपूर्णजलेहसन् ८ ततःक्रोधसमाविष्टःकालरुद्रइवाप
रःशशापधनुषःपुत्रमद्यैवम्रियतामयम् ९ तमृतंपुत्रमालक्ष्यदध्यौमनसिकारणम् निमित्तायुरयंदेवैःकृतोयंधनुषःसु
तः ११० इतिचिंतापरेणाशुनिःश्वासःप्रकटीकृतः महिषाःकोटिशोजाता स्तैर्गिरिःशकलीकृतः ११ तदानींमृतिमापन्नोमु
निपुत्रोतिदुर्मदः धनुःशर्मातिदुःखेनविलप्यबहुधामुहुः १२ प्रविवेशतदावह्निंगृह्यपुत्रकलेवरम् एवंहठात्पुत्रायेनसुखं·
यांतिकुत्रचित् १३ सुदेववैनतेयेनयोदत्तस्तनयस्तव तेनत्वंपुत्रवान्लोकेस्पृहणीयोभविष्यसि १४ गार्हस्थ्यमतुलंभुक्त्वा
सहपुत्रेणसर्वदा ततस्त्वंब्रह्मणोलोकंगत्वातत्रमहत्सुखम् १५ दिव्याब्दवर्षसाहस्रंभुक्त्वागंतासिभूतले ततोराजाचक्रव-
र्तीभविष्यसिद्विजोत्तम ११६

१०८ ९ ११० ११ १२ १३ १४ ११५ ११६

३३

१७ १८ १९ १२० २१ २२ २३ २४ त्रिषवणं त्रिकालम् १२५ २६ १२७

दृढधन्वेतिविख्यातःसमृद्धबलवाहनः संवत्सराणामयुतंराज्यंभोक्ष्यसिपार्थिव १७ गौतमीयंतवांगार्धानाम्नाचगुणसुं
दरी चत्वारस्तेसुताभाव्याकन्यैकाचद्विजोत्तम १८ कृतार्थोहंधरापीठेइत्यज्ञानविमोहितः अयंतेनमयोविप्रशुकोभूत्वातदा
वने १९ वटवृक्षंसमाश्रित्यत्वामेवबोधयिष्यति वैराग्योत्पादनंपद्यंपठन्नेवमुहुर्मुहुः १२० श्रुत्वावाक्यंशुकप्रोक्तंदुर्मनाःगृह
मेष्यसि अथचिंतार्णवेमग्नंत्यक्त्वाविषयजंसुखम् २१ वाल्मीकिस्त्वांसमागत्यबोधयिष्यतिभूसुर तद्वाक्यैश्छिन्नसंदेह
स्त्यक्त्वालिंगंहरेःपदम् २२ गमिष्यसिसपत्नीकःपुनरावृत्तिवर्जितम् द्विजराजसुतंयत्तेनेनदन्यःकरिष्यति २३ नतद्वेत्ति
भवान्नूनंयेनाहंतुष्टिमागतवान् अयंममप्रियोमासःप्रयातःपुरुषोत्तमः २४ तस्यैवांतेसमजनिशोकमग्नस्यसास्त्रियः मास
मात्रंनिराहारव्रतंत्रिषवणंसदा १२५ कृतंस्नानंचतेनैवसंप्राप्तंत्वेप्सितंतव एवमुक्त्वाहरिःशीघ्रंजगामस्वंनिकेतनम् २६
सपत्नीकःसुदेवस्तुविचारमकरोत्तदा अजानतोममैवासीत्पुरुषोत्तमसेवनम् २७ तदेवसफलंजातंयेनपुत्रोमृतोत्थितः
इत्येवंविस्मयाविष्टस्तंमासंसमपूजयत् २८ कर्ममार्गस्पृहांत्यक्त्वाभक्तिमार्गैकसस्पृहः भुक्त्वाथविषयान्सर्वान्सहस्त्रा
ब्दमहर्निशं २९ जगामपरमंलोकंसपत्नीकोद्विजोत्तमः तत्रत्यंसुखमासाद्यसपत्नीकोभवंगतः १३० वाल्मीकिरुवाच
सएवदृढधन्वात्वंप्रथितःपृथिवीपतिः पुरुषोत्तममासस्यसेवनात्सकलर्द्धिभाक् ३१ महिषीयंपुराराजन्गौतमीपतिदेव
ता एतत्तेसर्वमाख्यातंपृष्टवानसियन्मम ३२ शुकस्तुतवभूपालपूर्वजन्मनियःसुतः शुकदेवइतिख्यातोहरिणायोनुजी
वितः ३३ द्वादशाब्दसहस्त्रायुर्भुक्त्वावैकुंठमेयिवान् सएवारण्यसरसितटस्थवटमाश्रितः ३४ त्वामेवागतमालोक्यचिंतयामा
सकीरजः नबोधयामिचेद्भूपममापिबंधनंभवेत् १३५ २८ २९ १३० १३१ १३२ १३३ १३४ १३५

३६ ३७ ३८ ३९ १४० ४१ १४२ इतिपुरुषोत्तममाहात्म्यटीकायांएकादशोऽध्यायः ११ छ अथदृढधन्वनोमुक्तिकथनपूर्वकंपंचपर्वमाहात्म्यप्रस्तावंवर्णयत्यस्मिन्नध्याये १ २ ३ ४ ५ ६ ७ यथेतिशाखामृगः वानरः अत्रप्रसिद्धाकथा

पुन्नाम्नोनरकाद्यस्तुत्रायतेपितरंसुतः इतिश्रुत्यर्थबोधोपिस्याद्वैयाथान्यथाममम ३६ तस्मादुपकरिष्यामिपितरंपूर्वजन्मनः अवधार्यचश्चेत्यंकीरिजोऽजीगदन्नृप ३७ विद्यमानमतुलसुखमालोक्यातीवभूतले नचिंतयसितत्त्वंत्वंतत्कथंपारमेष्यसि ३८ दृढधन्वाउवाच अजानतोपिमेब्रह्मन्पुत्रशोकाद्धिचेतसः पूर्वजन्मनिसततंगतश्चपुरुषोत्तमः ३९ तस्याप्येतत्फलंजातंकिंपुनःश्रद्धयाकृते तस्मात्तद्वत्तमाहात्म्यंवदविस्तरतोमुने १४० एवंराज्ञासुसंपृष्टोवाल्मीकिर्मुनिपुंगवः कथयित्वासमग्रंवैमासमाहात्म्यमादितः ४१ तत्रश्वसजगामाशुसरयूंपापनाशिनीम् आसीमान्तमनुव्रज्यराजाप्यागतवान्गृहम् १४२ इतिश्रीसप्तपुराणसारोद्धारेपुरु० मा० दृढधन्वोपाख्यानेएकादशोऽध्यायः ११ छ श्रीनारायणउ०

वाल्मीकिनिर्गतेराजादृढधन्वास्वकंगृहम् आगत्यस्वप्रियामाहसुंदरींगुणसुंदरीं १ दृढधन्वोवाच अयिसुंदरिसंसारेस्मिन्नसारेकिंसुखंनृणाम् कृमिविट्भस्मसंज्ञातेदेहेमेकिंप्रयोजनम् २ अध्रुवेणशरीरेणध्रुवमर्जयितुंवने गमिष्यामिवरारोहेसंस्मरन्पुरुषोत्तमम् ३ तदाकर्ण्यप्रियाप्राहसाध्वीसागुणसुंदरी अहमप्यागमिष्यामित्वयैवसहभूपते ४ तच्छ्रुत्वानृपतिःपत्न्यासहैववनमाययौ हिमाचलसमीपेचगंगामासाद्यदंपती ५ त्रिकालंचक्रतुःस्नानंसंप्राप्तेपुरुषोत्तमे तपस्तेपेसपत्नीकःसंस्मरन्पुरुषोत्तमम् ६ एवंकृतवतस्तस्यसंपूर्णेपुरुषोत्तमे दिव्यंविमानमारुह्यजग्मतुर्हरिमंदिरम् ७ यथाशाखामृगःपूर्वंपंचाहस्नानमात्रतः

बृहन्नारदोक्तमाहात्म्ये नारदंप्रतिनारायणउवाच कश्चित्केरलदेशीयोद्विजःपरमलोलुपः नित्यंधनचयेदक्षःस[1]रघेवधनप्रियः लोकेकदर्यइत्याख्यांगतस्तेनैवकर्मणा चित्रशर्मपुरानामतस्यासीत्पितृकल्पितम् इष्टापूर्तेन

---

[1] सरघा मधुमक्षिका·

द्विकृतंपोष्यवर्गेनपोषितः सर्वंभूमिगतंचक्रेधनमन्यायसंचितम् च्चारधनलोभेनमूढधीर्भूतलेसदा लोकधिक्कारसंदग्धोबभ्रामोद्विग्नमानसः
तस्मिंवाटिकानाथःकश्चिदासीद्वनेचरः सततंनिवेदयामाससदुःखंसंरुदन्मुहुः तिरस्कुर्वंतिमांनित्यंपुटभेदनवासिनः अतस्तत्रमयास्थातुंनशक्यं
पुटभेदने इत्येवंवदतस्तस्यकदर्यस्यद्विजन्मनः अतिदीनतरांवाचमाकर्ण्यकृपयाप्लुतः मालाकारःप्रपन्नंतंदीनंमत्वाऽकरोद्दयां हेकदर्यत्वमस्मै
ववाटिकायांवसाधुना मालाकारवचःश्रुत्वाकदर्यःसर्वनागरैः तिरस्कृतःसतद्वाटीमध्युवासमुदायुतः नित्यंतन्निकटस्थायीतदाज्ञापरिपालकः
तेनवाटिपतिस्तस्मिन्विश्वासमकरोद्दृढम् अतिविश्वस्तचित्तेनतस्मिन्सवाटिकापतिः तमेवाचीकरद्विप्रंस्वकल्पंवाटिकापतिं ततःसर्वात्मभावेनममाय
मितिनिश्चयात् विहायवाटिकाचिंतांसिषेवेराजमंदिरम् पराधीनतयाचासौवाटिकांनजगामह तत्फलानिकदर्यस्तुजघासनिर्भरंमुदा अक्षीणनाव-
सिष्टानिलोभेनातीवदुर्बलः अगृण्हाद्द्रविणंतज्जंसर्वंस्वयमशंकितः यदापृच्छद्वनाधीशस्तदग्रेऽवीवदन्मुधा ग्रामंग्रामंचनगरंयान्त्वयान्त्वभैक्षकं
घासंघासंदिवारात्रौपरिचर्यामितेवचं तथाप्यस्यफलान्यासमासंगच्छंतिपक्षिणः पश्याभ्यंतोमयाकेचिन्नाशिताःखचराभृशं तेषांमांसानिपक्षाणिप-
जितानीहसर्वतः तद्दृष्ट्वातीवविश्वस्यजगामवाटिकापतिः एवंप्रवर्तमानस्यजग्मुर्वर्षाणिदुर्मतेः सप्ताशीतिकदर्यस्यजराजर्जरितस्ततः ममारमूढधीस्त
त्रैवापचन्हिदारुणी नाभुक्तंक्षीयतेपापमितिवेदविदोऽवदन् तस्माद्वाहामकुर्वाणोपापद्वयसमन्वितः फलचौर्यकृतंपापंविश्वासघातजंपरम् प्रेतत्वं·
प्रापतेनाघजलान्नवर्जितेवने प्रेतयोनिगतंदुःखमनुभूयततःपरम् फलचौर्यसमुद्भूतंकपियोनिमजीगमत् दिव्येकालंजरेशैलेजंबुखंडमनोहरे सुशीत
लजलच्छायेफलपुष्पसमन्विते तत्रासीद्देवराजेननिर्मितंकुंडमुत्तमम् मृगतीर्थमितिख्यातंसुराणामपिदुर्लभम् तत्रायंप्रथमंजन्मकापेयंलब्धवान्द्वि
जः नारदउवाच अस्मुत्तमेमृगेतीर्थेमहापापीसवानरः आवासंकथमकरोत्तद्वदस्वदयानिधे नारायणउवाच पुराचित्रकुंडलनाम्नाकश्चिद्वैश्य·
तारकानाम्नीतत्पत्नी तावुभौपुरुषोत्तममासव्रतंकृत्वा तदुद्यापनदिने ब्राह्मणेभ्योबहुदानादिकंचक्रतुः तत्रायंकदर्यः अमात्सदानः धनलोभेनपुरुषो
त्तममासंयजमानंच प्रशंसयामास तदातुष्टोयजमानः तस्मैधनमदात् एवंपुरुषोत्तममासस्तवनेनायंकपिः मृगतीर्थंप्राप किंतुरामस्य वरदानमप्य·
यत्रयत्रवानरावसंति तत्रतत्रपुष्पफलान्विताः घनच्छायावृक्षाः उत्तमजलानिचभवंतु अतःरामप्रभावेनवानरानांस्थलानंदः परंतुस्वरदुःखं

मासतत्त्व·४
पुरु·मा·१३
अ·१२

प्राक्तनवशांतस्माद्सौवानरः तस्मिन्वनेक्षुत्तृषापीडितः व्यचरत् तस्यजन्मतः वक्त्रेव्रणरोगः आसीत् तेनफलानिलुनीय मुखसमीपेनीत्वा तत्याजपया एकत्रस्थातुंचनसमर्थः जीवनान्मृत्युंवरंमन्यमानः एवंनित्यंनिराहारेण तिष्ठतोदैवयोगात्पुरुषोत्तममासः अगमत् तस्यकृष्णपक्षेपंचम्यांम्लियदिंद्रियजर्जरः सवानरः वृक्षाद्वृक्षांतरंगच्छन्सन् कुंडमध्येऽपतत् तदाशिथिलप्राणः कुंडप्रांतमुपाश्रित्य लुंठतः चतुर्दिनानिगतानि पंचमदिने मध्येदिनगतेरवौ तोयक्लिन्नवपुः मृगतीर्थेव्यसुः पपात ततोपुण्यशीलसुशीलकौविष्णुदूतौ दिव्यदेहधरंतंकदर्यं इदंविमानं आरुहेत्यूचतुः हेक

सर्वपापविनिर्मुक्तो गोलोकंसजगामह ८ अतःश्रेष्ठतमोमासः सर्वेभ्यःपुरुषोत्तमः अहोमूढानसेवंते मासंश्रीपुरुषोत्त
मं ९ तेधन्याकृतकृत्यास्तेतेषांचसफलोभवः पुरुषोत्तममासंयेसेवंतेविधिपूर्वकम् १० सूतउवाच इत्याकर्ण्यमुनिर्वि
प्रानारायणवचोमृतम् पुनराहातितृप्तोसौनामनामंपुनःपुनः ११ नारदउवाच सर्वेभ्यःसाधनेभ्योऽयंमासःश्रीपुरु
षोत्तमः वरीयान्निश्चितोमेद्यश्रुत्वामाहात्म्यमुत्तमम् १२ अतःपरंनकिंचिन्मेश्रोतव्यमवशिष्यते इत्युक्त्वाविरतोविप्रा
नारदोमुनिसत्तमः १३ तस्मात्सर्वप्रयत्नेनचाधिमासव्रतंचरेत् अधिमासेपिपर्वाणिपंचैवपुण्यदानिच १४ रमायैकथि
तान्येवविष्णुनाप्रभविष्णुना श्रीलक्ष्मीरुवाच मलिम्लुचेहृषीकेशपुराणपुरुषोत्तम १५ पंचपर्वकृतंनृणांकिंफ
लंस्याद्वदाधुना श्रीविष्णुरुवाच शृणुदेविप्रवक्ष्यामिपर्वाणितुयथाक्रमम् १६ वैधृतिश्चव्यतीपातोराकाचैवकुहू
स्तथा द्वादशीपंचपर्वाणिपरश्रेष्ठान्यनुक्रमात् १७ तुष्यामिवैधृतौचाहंव्यतिपातेतुधर्मराट् पितामहःपौर्णमास्यांपित
रोमादिनेशक्रमे १८

दर्य अज्ञानात्पुरुषोत्तमेमासे तवतीव्रंतपः संजातं तदाह मृगतीर्थेपंचाहंस्नानं फलानांदानं उपोषणंचेति तच्छ्रुत्वाहृष्टः सः तीर्थदेवान् सर्वगुल्मलतातरून् नमस्कृत्य विमानं प्रदक्षिणीकृत्य विमानमारुह्य सर्वदेवेषुपश्यत्सु सत्सुगोलोकंजगामेति ८

९ १० ११ १२ १३ १४ १५ १६ राकापौर्णिमा कुहूरमावास्या १७ १८ ६९ ६९

३५

पंचपर्वप्रशंसामाह पुराणसंहितोक्तमाहात्म्ये पंचपर्वव्रतंयैस्तुकृतंभावेनचारुणा बद्धः परिकरस्तैस्तुस्वर्गापगमनंप्रति आदौवैधृतिनामपर्वकमलेपा
पौघविध्वंसनंसर्वार्थप्रदमत्रनोनिगदितंरूपप्रदंपुत्रदम् नूनंदेविसपालियोगहरणंभूषाद्यनेकार्थदंसद्बुद्धिप्रदमादरान्निजगृहेकुर्वंतितेषांरमे द्वैतीयंव्य
तिपातनामकमुमेऽनंतार्थदंभूतले पर्वास्तीबहुपुण्यदंयदिकृतंदानैर्जपैःस्वल्पकम् अत्राप्यस्तिचतारतम्यमथवैधृध्यादियोगोद्भवंतस्मात्तन्नियतंश्च
रेद्बुधजनोसर्वार्थसौख्यप्रदम् राकापर्वसुखप्रदंनिगदितंपूर्वैरमेपुण्यदंश्रीमत्पुत्रसुबंधुगेहहयगोहास्तिप्रदंचैनृणाम् लावण्यप्रदमायुरादिसुखकंद्वैमा

सर्वदेवमयोहंवैद्वादश्यांकमलालये पंचपर्वसमंदेविव्रतंनास्तीहभूतले १९ तस्मात्सर्वप्रयत्नेनपंचपर्वव्रतंचरेत् प्रत्यब्दं
प्रतिमासंवातस्यस्वर्गोनदुर्लभः २० श्रीलक्ष्मीरुवाच वैधृतेकिंप्रदेयंस्यात्द्रव्यंविधिव्रतंचमे केनपूर्वंकृतंपर्वतद्वद
स्वजनार्दन २१ श्रीविष्णुरुवाच वैधृतौस्नानहोमाभ्यांदानेनकमलालये अहंविष्णुर्मनुष्याणांवांछितार्थंददाम्यहम्
२२ वैधृतौयत्प्रदत्तंहिधनंधान्यंफलादिकम् तिलाःसर्पिःपयश्चैवतेषामंतोनविद्यते २३ वैधृतौचाक्षयंपुण्यंसंक्रात्याधि
कमुच्यते निमिषेनिमिषेकांतेवर्धतेनात्रसंशयः २४ वैधृतान्सकलान्देविप्रतिमासंव्रतंचरेत् मलमासेविशेषेणमत्प्रिये
चारुहासिनि २५ तस्यपुण्यप्रभावेणप्रल्हादोदैत्यनायकः इंद्रत्वंप्राप्तवान्कांतेत्रिषुलोकेषुविश्रुतम् २६ अन्यायादेवताः
सर्वावैधृतेर्दानयोगतः देवत्वमुपपन्नास्तेसर्वत्रपूजिताऽभवन् २७ तद्वद्व्रतीसमाप्नोतिकुलेमहानिपूज्यताम् मधुनासि
तयानारीकेलैर्द्वादशभिस्तथा २८

निकानामिव तस्माद्बुधिसुकृतेसमाचरशुभ्रंराकाव्रतंसर्वथा चातुर्येकिलपर्वशास्त्रजनि
तंदर्शाख्ययुक्तंशुभे पूर्वेषांसुखदायकंपितृयज्ञोमुख्यंचश्रौतंतथा तस्मिन्दर्शविधौकृतेचविधिनापुंभिःसभार्यैर्मुदा जायंतेहृदयंगमास्तत्क्षण
परापुत्राश्चतेषांशुभाः श्रीमद्द्वादशिकाव्रतंशुभफलंपापौघविध्वंसनम् सर्वेषामपिपर्वणांनिगदितंश्रेष्ठंचविष्णोःप्रियं यस्तुत्वासुखिनोभवंतिमनु-
जाधनैर्धनैःसंयुताश्चांतेयांतिपरंपदंचतत्त्वतुलंदानंप्रदत्वार्थिनेइति १९ २० २१ २२ २३ २४ २५ २६ २७ २८

वैधृतौमध्वादिनासहितं षोडशकं पूगपत्रं पूगानिच पत्राणिच पूगपत्राणि तेषांसमाहारः पूगपत्रंषोडशपूगीफलतांबूलानियः दद्यात् सःषोडशाब्दप्रा
यश्चित्तफलं षडाधिक्यं षडब्दप्रायश्चित्ताधिक्यफलं संख्यया दानसंख्यया तत्दानफलंजायतेइति २९ ३० ३१ क्रमुकेनपूगीफलेन ३२
३३ क्षौद्रंमधु ३४ व्यग्रधूब्राह्मणस्येतिहासमाह पुराणसंहितोक्तमाहात्म्ये पुराअवंतिनगरे दीक्षितकुले व्यग्रधूनामतः ब्राह्मणः आसीत् तस्य
कोविदानामकीभार्यापतिव्रता महाकालेश्वरपूजनतत्पराआसीत् व्यग्रधूरपि क्षिप्रायास्नानंकृत्वातीरेप्रयोगादीन्कथयन् कणयाचनतत्परःआ-
सीत् तस्यएकपुत्रः कन्याचैकाजाता एकदा कोविदा व्यग्रधूमुवाच हेस्वामिन् पुत्रस्यउपनयनकालोस्ति कन्यापिपंचवर्षात्मिकाजाता कार्यद्वयंस

पूगपत्रंषोडशकंयोदद्याद्वैधृतौनरः षोडशाब्दंषडाधिक्यंसंख्ययाजायतेहितन् २९ एकेनाचरितेनापिवैधृतौनम-
लिम्लुचे पूर्वोक्तंसकलंपुण्यंजायतेनात्रसंशयः ३० वैधृतौपर्वणिप्राप्तेस्वर्णंदेयंद्विजातये तस्यपुण्यप्रभावेनसर्वसौ
ख्यमवाप्नुयात् ३१ मोदकान्योददात्येवदक्षिणाभिःसमन्वितान् यज्ञोपवीतयुक्तांश्चक्रमुकेनसमन्वितान् ३२ तेनरा
अथनार्यश्चपुण्यरूपानसंशयः कुसंस्कारोभवेद्येषांतेषांदानेमतिर्भवेत् ३३ कार्पासंलवणंक्षौद्रंवस्त्रंधान्यंधनादिकं
बहुफलप्रदंतस्माद्वैधृतौयःप्रयच्छति ३४ ब्राह्मणोव्यग्रधूर्नाम्नावैधृतौदानयोगतः

मायातंद्रव्यंविनाकथंभवेत् नि
धनस्यग्रहस्थाश्रममध्येजीवितंव्यर्थं अतः हेपति द्रव्यंआर्जय व्यापारेवसतेलक्ष्मीःसेवयानचभिक्षया व्यग्रधूरुवाच नदृष्टोस्तिमयादेशोनास्ति
मेयजमानकः नविद्याचास्तिमेभार्येकथंद्रव्यमुपार्जये एवंभर्तृवचःश्रुत्वाकोविदाप्राह हेस्वामिन् एवंचेत्तर्हि ममपितृगृहे गत्वा क्रूरान् पितृभ्रातृन्
विहाय एकांतेममातरंप्रति धनंयाचस्व एवंवदतोस्तयोः रात्रिःगता प्रातःगमनसमये ज्ञातिभोजननिमंत्रणमागतं तदासायंकाले भोजनार्थं गतः
तत्रैनंविहाय सर्वेभोजनंचक्रुः त्वमप्येवंकुर्विति सेर्षंचोचुः तदार्धंभुक्त्वा दुर्मनाःगृहेंचागत्य भार्यायैवृत्तांतंकथयित्वा प्रियांप्रोवाचविप्रोसौप्रातर्गंतुंस
मुत्सुकः देहिमेमार्गमध्येहि दिनैकस्यचवेतनं दिनद्वयस्यमार्गोस्ति पंथानंकथं निर्गमामि तदाभार्या अन्यतोगृहात् पिष्टंयाचयित्वा मल्लेददौ सोपि

तद्गृहीत्वा गच्छन् पंचयोजनदूरे नदीतटस्थिते कस्मिन्ग्रामे सायंकाले वसतिंचक्रे जलमात्रंप्राशयित्वा श्रांतः भुक्तिंनचाचरत् तत्रब्राह्मेमुहूर्ते ग्रामस्थस्त्रियः मलमासे अरुणोदये नद्यांस्नानार्थंकोलाहलंचक्रुः तासांशब्दंश्रुत्वा ऽयंव्ययधूः शीघ्रंनद्यांस्नात्वा संध्यावंदनंकृत्वा तीरेभूविपनितांताम्रमुद्रांगृहीत्वा गमनसमये कथांकथयंतं पौराणिकंदृष्ट्वा श्रोतुंमनोदधे तत्रस्नानदानादि महिमां पंचपर्वमाहात्म्यंच श्रुत्वा मनसिचिंतयामास होकृणाप्रियंमांधिक् मयापुण्यलेशोपिनकृतः देवोद्देशेनघृतमपि नाचरितं ममशिवंकथंभवेत् हे पौराणिक त्वत्कथामृतपानेनमे निर्मलाबुद्धिर्जाता तवबोधसमंदातव्यं मन्निकटेनास्ति परंतु कृपयाकिंचित्गृण्हामि चेदहंददामि पौराणिकउवाच हेद्विज शक्त्यादानंदद्यात् द्रव्याभावेकथाश्रवणासिद्धये तत्सेवांगृहकार्याणिवा कुर्यात् इतिश्रुत्वा व्ययधूः लब्धंताम्रमुद्रासमन्वितं पिष्टंद्विजेंद्रायदत्वा तद्दिनेक्षुधाक्रांतः श्वशुरसद्मनिगत्वा भुक्त्वापीत्वासुखंकृत्वास्थितः द्वितीयेन्हिगंतुंमनोदधे तदाश्वश्रागुप्तंधनंदत्तंतत् शालकेनज्ञातं अयंभागः गृहीत्वागच्छति तत्कपटेनगृण्हामि

ताम्रखंडस्यैवमुक्ताफलभारमवाप्तवान् ३५

इत्येवंनिश्चित्य नदीतीरेस्नातुकामे भामेतोयेप्रसपति वस्त्रमंद्रव्यंगृहीतवान् व्ययधूः मार्गे रजनींउषित्वा नष्टंधनंचिंतयन् स्वगोण्यां आमलकीफलानि क्षिप्त्वा सहर्षंगृहमागतः तत्पत्नीदूरादेवधनंगृहीत्वा सोआगत इति पतिंदृष्ट्वा तद्भोजनार्थं वणिक्गृहेगत्वा प्रोवाच अद्यअपेक्षितपदार्थानिप्रयच्छ तन्मौल्यधनंश्वः दास्यामि संशयंमाकुरु इत्युक्त्वागृहमागत्य पाकंकृत्वा परमान्नेन पतिंभोजयामास सचभुक्त्वाभयातुरः ग्राममध्ये . अतःपरं मदीयालज्जाकथं स्थास्यति धात्रीफलानांगोणीमया आनीता द्रव्यलेशोनास्ति गोणीविश्वास तयाभार्यया ऽन्नंसमर्पितं वैश्यवर्यो अन्नंकिंदास्यति अतएवशिवंप्रार्थये इतिनिश्चित्य शिवमंदिरेंगत्वाजातवेपथुः शिवंतुष्टाव अयिशंकर शर्वसर्वगप्रणतोस्मितवपादपंकजम् मयिचित्तसमुद्भवंविभो व्यसनंशीघ्रमपाकुरुप्रभो नभयंभवतोपितस्यवै भवयस्मैकृदृशंप्रयच्छति भजनार्यगुणार्णवाधुनाधनहीनंपरिपालयस्व इत्यादिस्तुवतस्तस्यआकाशवाक्प्रोवाच हेद्विज दुःखंत्यज गृहंगच्छ तवगोणिस्थामलकानिगजकुंभोद्भव मुक्ताफलानिजातानि वैश्यतोस्व-

स्यदानस्येदंफलं इत्युक्त्वांतर्दधे व्यग्रधूर्व्यग्रगृहंगत्वागोपीं पश्यन् प्रसन्नोऽभवत् भार्यामुक्ताफलं वैश्यायार्पयत् वैश्योपितन्मौल्यंगृहीत्वा परमानंदंप्राप व्यग्रधूरपिपुत्रोपवीतं कन्यादानंविविधयज्ञांश्च कृतवान् एवंवैधृतिदानफलमाहुरिति ३५ ३६ ३७ इतिपुरुषोत्तममाहात्म्यटीकायांद्वादशोऽध्यायः १२ ६९ अथव्यतीपातव्रतदानप्रसंगमाह १ २ सूर्यचंद्रयोगादुत्पन्नस्तत्रकारणमाह पुराणसंहितायां यदाबृ

तस्माद्दानंप्रयत्नेनवैधृतौकार्यमुत्तमम् कृष्णार्पणंविधायैवशिवप्रीत्यर्थमेववा ३६ योददातियथाशक्त्यादानंतस्यफलंबहु सहस्रगुणसंख्याकं पुण्यंस्याद्वैधृतौधनं ३७ इतिश्रीसमपुराणसारोद्धारेश्रीपु॰मा॰ पंचपर्वकथायां वैधृतिपर्वमाहात्म्यकथनंनामद्वादशोऽध्यायः १२ ६९ लक्ष्मीरुवाच व्यतीपातेचकिंदेयंकोवातत्रविधिःस्मृतः केनपूर्वंकृतंपर्वतत्सर्वंवदमेऽच्युत १ श्रीविष्णुरुवाच शृणुभद्रेप्रवक्ष्यामिव्यतीपातेचयत्फलं सदावैयोगराजोयंख्यातःसूर्यसमप्रभः २ धर्मस्कधर्मतांप्राप्तोव्यतीपातप्रभावतः सूर्याचंद्रमसोर्योगादुत्पन्नःसपुराकिल ३ पूर्वंपुराणेवाराहेविस्तरात्कथितंमया अधुनातन्नशक्नोमिवक्तुंयथाफलं४ प्रीणातिधर्मराजोयमत्रदानेनसुंदरि कुरुक्षेत्रेरवौग्रस्तेदानंदत्त्वाद्विजोत्तमे ५ व्यतीपातेतथादत्तंमाससंख्याविवर्द्धते चक्रतीर्थेतथाकाश्यांमरणेयत्फलंलभेत् ६ तत्फलादधिकंप्रोक्तंव्यतीपातेतुदानतः एकतःसर्वदानानिसर्वपर्वसुनित्यशः ७ एकतस्तुषमात्रंतुपातेहेमसदक्षिणम् सर्वदानादिकंपुण्यंव्यतीपातप्रभावतः ८ प्रतिमासंविवर्द्धेतसंख्यातेभ्यःशताधिका तस्मिन्तपःप्रभावेनऋषयःस्वर्गवासिनः ९

हस्पतेर्भार्यांतारांजग्राहशीतगुः मित्रत्वात्साहृतंसूर्यस्त्यजभार्यांबृहस्पतेःचक्रेचंद्रोनतद्वाक्यंहितंशिक्षापितंयदि रुष्टस्तदाकिलादित्योदीप्तदृष्ट्याव्यदेक्षत तावत्सोमोपिरुष्टोस्यततोन्योन्यमवेक्षतां उभयोर्दृष्टिसंयोगात्क्रुद्धयोःसोमसूर्ययोः उद्यतास्त्योभवद्घोरः पुरुषःपिंगलेक्षणः व्यतीपातइतिख्यातः क्रोधपाताद्यतोऽभवत् इति ३ ४ ५ ६ ७ ८ ९

१० ११ १२ १३ १४ १५ विषुवेमेषतुलयोः १६ सोमग्रहेसोमग्रहणे १७ व्यतीपातस्यषष्टिघटिकात्मकंफ

तन्नदत्तेनस्फ्रीतामदाभुंजंतिपूर्वजाः धान्यंदत्तंव्यतीपातेहिरण्यंवाद्विजेरवौ १० अनंतफलदंसर्वमग्निहोत्रफलंयथा
भाद्रपदेऽमावास्यायांगंगायांयत्फलंस्मृतम् ११ तत्फलंचाधिकंप्रोक्तंव्यतीपातेद्विजार्पितं व्यतीपातोमहायोगस्त्रिषुलोकेषु
विश्रुतः १२ धन्यास्तेमानवालोकेयैर्दत्तंतत्रश्रद्धया तिलपात्रंतत्रपदंप्राणांतेऽहंसमर्पयेत् १३ मलिम्लुचेव्यतीपातेएक-
स्मिन्नपियत्कृते स्नानदानादिकंदेविवक्तुंकेनैवशक्यते १४ स्वल्पेप्यस्मिन्कृतेपुण्येव्यतीपातेमलिम्लुचे पुण्यानाम
प्यनेकानांफलंभवतिनिश्चितं १५ दर्शेशतगुणंदानंतच्छतघ्नंदिनक्षये शतघ्नंतच्चसंक्रांतौशतघ्नंविषुवेतथा १६ युगा-
दौतच्छतगुणमयनेतच्छताधिकम् सोमग्रहेशतगुणंतच्छतंतुरविग्रहे १७ असंख्येयंव्यतीपातेदानंदानविदोविदुः
उत्पत्तौलक्षगुणितंभ्रमणेकोटिरुच्यते १८ अर्बुदंपतनेप्रोक्तमक्षय्यंपतितेफलम् द्वाविंशतिःस्मृतोत्पत्तौभ्रमणेचैकविं
शतिः १९ दशपातस्यपतनेपतितेसप्तनाडिका गणयित्वाव्यतीपातकालंयोर्चयतेनरः २० सर्वपापहरोतस्यभवतोभानु
शीलगू यथार्च्यतेव्यतीपातःसविधिःश्रूयतामिति २१ शुभेव्यतीपातदिनेऽवगाहयेद्यःपंचगव्येनमहानदीजलेउ-
पावसेद्वैपवमानजापकोजपेच्चमंत्रंव्यतिपाततेनमः २२ छादितेताम्रपात्रेणशर्करापूरितेघटे कांचनाब्जेप्रतिष्ठाप्याहेमम
ष्टभुजंनरम् २३ गंधपुष्पाक्षतैर्धूपदीपवस्त्रनिवेदनैः भक्ष्यैर्भोज्यैःफलैश्चित्रैर्मार्गादिषुसमर्चयेत् २४ नमस्तेस्तुव्यती
पातसोमसूर्यस्तनप्रभो यद्दानादिकृतंकिंचित्तद्दानंतमिहास्तुमे २५ इत्युक्त्वापंचरत्नाढ्यंस्वपुष्पाक्षतमंडलं माक्षिप्यतल्ल
पादेवसर्वपापक्षयोभवेत् २६ व्यतीपातव्रतस्यास्यविधानंशृणुतत्त्वतः व्यतीपातदिनेयस्मिन्नारभेद्व्रतमुत्तमम् २७

लविशेषमाह उत्पत्ताविति उत्पत्तौ आरंभे १८ १९ २० २१ २२ २३ २४ २५ २६ २७

शरावंमृत्तिकापात्रं २८ २९ ३० ३१ ३२ ३३ ३४ अत्रास्मिन्नितिहासमाह पुराणसंहितोक्तमाहात्म्ये पुराहर्यश्वोनामनृपः स्वल्पसैन्येनसंयुतः मृगयांचरन्वने दग्धपृष्ठकटिग्रीवमुखं शूकरंदृष्ट्वा कृपयातमुवाच हेशूकर केनकर्मणा इमांदशांत्वंप्राप्तः तद्ब्रूहि शूकरउवाच हेराजन् पुराअहंविश्वसखोनामवैश्यः सदैवपापकर्मरतः सन् स्वल्पोपिधर्मःनकृतः बहूनामाशाभंगश्चकृतः एकदाकश्चिद्द्विजः व्यतीपातदिने ममगृहमागत्य मांयाचते तदाहंनकिंचित्तंदत्तवान् निष्ठुरवचोभिःतिरस्कृतश्च तदाद्विजउवाच हेवैश्य व्यतीपातदिनेकिंचिद्दत्तं मेरुतुल्यंभवति तच्चत्वंअन्यजन्मनिप्राप्स्यसे तदामयाअतितिरस्कृतःसन् पुनरुवाच हेवैश्ययथाआशाममांगानिदह्यन्ते तथैवतवचांगानि अग्निनादह्यंतु निर्जलेवने शूकर

तिलैःपूर्णंशरावंचसगुडंगुरवेऽर्पयेत् शंखचक्रगदापाणिंपद्महस्तांहिरण्मयम् २८ वस्त्रयुग्मेनसंवेष्ट्यपूजयेद्गरुडध्वजम् गोक्षीरेणैवसंपूर्णंकांस्यभाजनमुत्तमम् २९ स्थापयेद्देवदेवस्यस्थानंतत्रैवकल्पयेत् शय्यायांसन्निधौतत्रस्थाप्यदेवमनुस्मरन् ३० लक्ष्म्यासहान्वितंविष्णुंभक्त्यासंपूजयेद्गुरुं वैदिकेनैवमंत्रेणजातिपुष्पैःसमर्चयेत् ३१ पायसान्नेननैवेद्यंशर्करासंयुतेनच दत्वापुष्पांजलिंकृत्वापुनःप्रार्थनमारभेत् ३२ व्यतीपातदिनेदेवतुभ्यंयद्यत्समर्पितं व्रतोपदेशाविप्रायब्राह्मणायविशेषतः ३३ भूमिर्वाथसुवर्णंवादक्षिणात्रविधीयते ब्राह्मणान्भोजयित्वातुव्रतमेतत्समापयेत् ३४ पुराविश्वसखोवैश्योआशाभंगेनशूकरः पालव्रतस्यपुण्येनदिव्यदेहोदिवंययौ ३५

जन्मप्राप्नुहि तदामयाप्रसादितःविप्रः शूकरेतवजातिस्मरणं भविष्यतीत्युक्त्वाजगाम अतः हेराजन् तेनाहंशूकरोजातः येनमममुक्तिःस्यात्तद्वदामि त्वयाव्यतीपातव्रतंपुराकृतं तस्यकिंचित्फलंदेहियेनमुक्तिर्भवेन्नाम इदंव्रतंत्वयाराजन् गृहीतंत्वन्यजन्मनि स्वर्गापवर्गदंनॄणां तत्फलंकिंचिदर्पय एवमुक्तो नृपः शूकरायव्यतीपातपर्वव्रतफलंददौ तेनशूकरः निष्पापःसन्दिव्यवपुर्धृत्वा विमानमारुह्य सर्वेषु व्यतीपातवैभवं दर्शयन् स्वर्गंजगाम हर्यश्वोपिविस्मितःसन् आमरणांतं व्यतीपातव्रतंदानंचकुर्वन् अंतेविष्णुपदंप्राप्नोति ३५ ६९ ६९ ६९

३६ ३७ ३८ ३९ ४० ४१ इतिश्रीपुरुषोत्तममाहात्म्यटीकायांत्रयोदशोऽध्यायः १३ छ पूर्णादर्शयोर्माहात्म्यप्रसंगमाह विष्णुरुवाचेति १ स्थावरंगृहक्षेत्रभूम्यादि जंगमं गोरथाश्वगजादि २ ३ माघादिपौर्णिमादेवतामाह माघ्यामिति ४ तुइतिपुनः आषाढ्यांब्रह्मासावित्री श्रावण्यांदेवाः प्रोष्ठपद्यां पितरः आश्विन्यांमनुष्याः कार्तिक्यां यक्षाः मार्ग्यांकिन्नरः पौष्यांभवानीदेवी इतिक्रमः ६ ७ ८ छ छ छ छ

तस्माद्यः कुरुतेभक्त्याव्यतीपातव्रतंशुभम् सर्वपापविनिर्मुक्तोविष्णुसायुज्यमाप्नुयात् ३६ पुत्रकामातुयानारीतयाकार्यंचसर्वदा आयुरारोग्यसंपन्नोविष्णुभक्तोभवेत्सुतः ३७ दरिद्रोवायकुरुतेसमाप्नोतिमहाधनम् प्रतिष्ठांजायतेतस्यचात्रलोकेपरत्रच ३८ कुरूपाणांरूपदंचभक्तिहीनस्यभक्तिदम् भोगेच्छावर्ततेयस्यतस्यभोगसुखावहं ३९ विप्रोभवतिसद्विद्योरणशूरश्चक्षत्रियः भ्रष्टराज्योलभेद्राज्यंवैश्यस्याद्धनसंयुतः ४० सर्वेतेमुक्तिगानारीशूद्रःकृषिफलंलभेत् विष्णुदैवतमित्युक्तंव्यतीपातव्रतंबुधैः ४१ इतिश्रीसप्तपु॰सारोद्धारेश्रीपुरु॰मा॰पंचपर्वकथायांव्यतीपातपर्वव्रतनिरूपणंनामत्रयोदशोऽध्यायः १३ छ विष्णुरुवाच पूर्णमास्याःफलंवक्ष्येब्रह्मणःप्राप्तिहेतवे प्रीतेब्रह्माणितुप्रीताःसर्वेपितृदिवौकसः १ स्नानंकृत्वाद्विजातिभ्यःप्रदातव्यंसुवर्णकम् यद्यदिष्टतमंवस्तुस्थावरजंगमंतथा २ यद्दत्तंपूर्णमास्यांतुसर्वेतृप्यंतिदेवताः पौर्णिमायांविदुःप्राज्ञा देवानांकेवलोविधिः ३ अग्निदेवाःपितरोदैवेकर्मण्यमादिने माघ्यांतुमाधवोदेवोफाल्गुन्यांरजनीकरः ४ चैत्र्यांतुदेवोत्थानंदोवैशाख्यांपितृदेवताः ज्येष्ठ्यांतुब्रह्मासावित्रीआषाढ्यांतुविशेषतः ५ मार्ग्यांदेवाश्चपितरोमनुष्या यक्षाकिन्नराः देवीभवानीपौष्यांतुप्रीताभवंतिसर्वदा ६ पैत्रिकंमुनिभिःप्रोक्तममावास्यादिनंयथा दिनंतथापौर्णमासंदैविकंपरिकीर्तितम् ७ पर्वभिस्तुकृतैरन्यैर्बहुभिःकिंप्रयोजनं यद्येकवासरोमर्त्यैःश्रद्धयापरिसेव्यते ८

९ १० ११ १२ १३ बहुला कृष्णपक्षीया १४ १५ क्षुधायाक्षामाः कृशाः कंबलवस्त्रं वह्निं वा अन्नं चेति शेषः तद्वदिति उत्तरेण

यावज्जीवंमर्त्यलोकेस्नानदानादिभिः कृतैः स्नानैकेनपौर्णिमायांदिनंभवतिसार्थकं ९ ऋणान्मुक्तोनरोदेवान्पितॄ
काद्दर्शकेदिने स्नानंकर्तुंनशक्तोयोप्रत्यहंचकरेश्वरि १० तेनकार्यंपौर्णिमास्यांस्नानंवापितृतर्पणम् पौर्णिमायाःफ
लंसर्वंकथितंसकलंप्रिये ११ अमावास्याफलंतोहिपितॄणांप्रीतिवर्धनम् पर्वाणामुत्तमंपर्ववक्ष्येसंक्षेपतस्तव १२ य-
च्छ्रुत्वासर्वपापेभ्योमुच्यतेनात्रसंशयः अमावास्यासमंदेविनास्तिपर्वजगत्त्रये १३ मासांतेबहुलासापिपितॄणांमुक्ति
दायिनी त्रयोदशगुणंदानंदर्शेतावद्दिनानिच १४ वर्धतेप्रत्यहंसत्यंनात्रकार्याविचारणा मासिमासित्वमावास्या-
दिनेप्राप्तेनराधमः १५ योहिदद्यान्नपिंडांस्तुनसपुत्रोपितानसः शीतार्तायद्वदिच्छंतिक्षुधाक्षामायथानराः १६ तद्व
दिच्छंतिपितरोसंप्राप्तेचेंदुसंक्षये निर्वपंतिचयेश्राद्धंप्रतीताःपुत्रकाःप्रिये १७ इंदुक्षयेमासिमासिब्रह्महाजायतेहि
सः योनकुर्यात्त्रिमासांतेपितॄणांपिंडपातनम् १८ सदावांछंतिसुप्रीतापुत्रपौत्रपशूंस्तथा वनस्पतिगतेसोमेनकुर्या-
त्पितृतर्पणम् १९ तंमासंपितरस्तस्यकुर्वंतोवायुभोजनम् तस्यविघ्नंप्रयच्छंतिक्षुधितास्तृषितास्तथा २० तेसंततिं
नाशयंतिसंपदोभवनानिच तस्मादमायांकर्तव्यंस्नानदानजपादिकम् २१ मलिम्लुचेविशेषेणमहापुण्यप्रदंस्मृतं
किंबहूक्तेनदेवेशिनरैःकार्यंमहाव्रतम् २२ यस्यांश्राद्धेनदानेनपितृलोकेवसेन्नरः दर्शश्राद्धसमंनास्तिपावनंभुव
नत्रये २३ तेधन्यास्ताःस्त्रियःप्रोक्ताःश्राद्धार्थपाककारकाः तेधन्यापुरुषाज्ञेयादर्शेपितॄन्यजंतिये २४

संबंधः निर्वपंतिकुर्वंति प्रतीताः विख्याताः १७ १८ सोमेचंद्रमसिवनस्पतिगते औषधिमध्ये निवासेकृते दर्शे इत्यर्थः
यइतिशेषः १९ २० २१ २२ २३ २४ २५ २६ २७

२५ २६ २७ २८ इतिपुरुषोत्तममाहात्म्यटीकायांचतुर्दशोऽध्यायः १४ ६५ पर्वचतुष्टयमाहात्म्यश्रवणेनात्पुत्सुकाल-
क्ष्मीर्द्वादशीपर्वमाहात्म्यंपरिपृच्छति द्वादश्याव्रतमिति विशदंसंशयरहितं १ २ ३ ४ ५ यथाश्राद्धप्रकरणेउक्तंतथा ६

श्राद्धंकुर्वंतियत्नेनतेषांपुत्रादिसंपदः पुत्रनाशोनतेषांस्याद्भूतानांदूषणंनहि २५ धननाशोनतेषांस्यान्नपितृदोषोन
विद्यते अमावास्यामहापर्वप्रोक्तंकांतेमुनीश्वरैः २६ सोमवारेणतच्चस्यात्तदापुण्यमनंतकं अमावास्यातुसोमेनस-
प्तमीभानुनासह २७ चतुर्थीभूमिपुत्रेणसोमपुत्रेणचाष्टमी चतस्रस्तिथयस्त्वेताःसूर्यग्रहणसन्निभाः २८ इति
श्रीसप्तपु० सारोद्धारेश्रीपुरुषोत्तममा० पंचपर्वकथायाममापूर्णापर्वद्वयमाहात्म्यकथनंनामचतुर्दशोऽध्यायः १४
६५ श्रीलक्ष्मीरुवाच द्वादश्याव्रतमिहनाथमेसमग्रंकिंकार्यंवदविशदंविशेषरम्यं केनेदंकृतमखिलंजगत्पवित्रं
किंप्राप्तंफलमतुलंजनेनतेन १ श्रीविष्णुरुवाच शृणुदेविप्रवक्ष्यामिद्वादशीपर्वजंफलम् मलमासेविशेषेणभाषि
तंमुनिभिःपुरा २ पर्वाणामुत्तमंपर्वसर्वसंपत्प्रदायकं यच्छ्रुत्वासर्वपापेभ्योमुच्यतेनात्रसंशयः ३ संक्षेपतोदानफलंश्रु
त्वाकृत्वाप्रमुच्यते सर्वतीर्थानिनार्हंतिद्वादश्याःषोडशींकलां ४ तावद्गर्जंतितीर्थानितावद्यत्तक्रियाऽखिलाः याव-
न्नसूयतेपुण्याद्वादशीपापनाशिनी ५ उषोष्यैकादशींश्रद्धापारणेद्वादशीदिने धात्रीमूलेपिंडदानंकरोतिपुरुषोयथा
६ कृतायज्ञाःसदातेनगयायांपितृपक्षके अहोस्कधन्यास्तेलोके येषांबुद्धिर्हरेर्दिने ७ तुलसीपत्रमिश्रान्नंमाक्षिकापाद
मात्रकं द्वादश्यांश्चदिनंप्राप्यतर्पणंकुरुतेप्रिये ८ जलंतदमृतीभूयपितृणामुपतिष्ठति दिनमेकंहरेर्यस्तुनकरोत्युत्क्षवा
हनं ९ तस्यक्षेत्रेखिलंधन्यमक्षय्यंजायतेनृणां द्वादशीदिनमेकंतुवाहनंनकरोतिच १० ७ ८ उत्क्षवाहनं ९ . ..

हनं ९ वाहनंशकटादिषुयोजनं प्रत्यक्षंवाआरोहणं वक्ष्यमाणश्लोके मार्गस्य संबंधात् १० ६५ ६५ ६५

अनेनपूर्वोक्तेन द्वादशीत्यागेन मार्गेव्रजेत् गच्छेत् मार्गेद्वादशींविहायगच्छेदित्यर्थः अत्रकिं अत्रद्वादश्यांप्रयाणवहने किंदूषणफलमित्तिवि

किमनेनव्रजेन्मार्गेनात्रकार्याविचारणा हरेस्तुदिवसेप्राप्तेभूमिदानंकरोतियः तस्यपुण्यप्रभावेनवैकुंठेवसनेध्रुवम्
११ हरेस्तुदिवसेप्राप्तेदत्तंवस्त्रंद्विजातये तेषांवासोष्टकल्पंवैचंद्रस्यभुवनंप्रति १२ माधवस्यदिनेप्राप्तेकपिलांयः
प्रयच्छति उद्धृतास्तेनपितरःसत्यंसत्यंवरानने १३ मुकुंददिवसेप्राप्तेविद्यादानंकरोतियः सचिरंवसतेस्वर्गेपुनरावृ-
त्तिदुर्लभम् १४ उपानहौघृतंवस्त्रंयोददातिद्विजातये द्वादश्यांद्वादशीनाथोददातिसर्वमीप्सितम् १५ पादुकेरत्न-
खचितेकारितेकनकादिभिः योयच्छतिस्वविप्रायवैकुंठेवसतेचिरम् १६ पट्टकूलंचकार्पासंकौशेयंतृणसंभवम् औ
र्णिकंभोजकंदत्वास्वर्गलोकेमहीयते १७ घृतंगव्यंमाहिषंचददातिद्वादशीदिने वैकुंठेवसतेदिव्येघृतबिंद्वब्दसं
ख्यया १८ केनाप्युपायतोदेवि घृतंदेयंमलिम्लुचे द्वादश्यांशुक्लपक्षेतुकृष्णेवापिविशेषतः १९ घृतदानंफलंवक्तुं
मयाशक्तिर्नसुंदरि यद्घृतंदेवभोज्यंस्याद्घृतंसर्वरसोत्तमम् २० द्वादश्यांतुदशप्रस्थसंख्याकंघृतमुत्तमम् द्वाद-
श्यामधिकेमासेद्वादशीशस्यतुष्टये २१ ददातितस्यकिंकार्यंद्वादशाब्दव्रतैरपि द्वादशाहमखैर्योगैःफलंतुल्यंभवे
त्प्रिये २२ अल्पस्यापिहिदानेनघृतस्यवरवर्णिनि यथाशक्तिप्रदत्तस्यवित्तशाठ्यंविनाजनैः २३ फलंसर्वेप्सितकर
मैहिकामुष्मिकोद्भवम् भोज्यंसम्यक्ददात्येवक्रमान्मामपिसुंदरि २४ योददातिघृतंविप्रेद्वादश्यांतुमलिम्लुचे घृ
तधेनुसहस्रैस्तुदत्तंविप्रेस्तुतत्फलम् २५ तत्फलंलभतेनूनंयथावैघृतकंबले पापकोटिसहस्राणिपापकोटिशता
नि च २६

चारणानकार्या पुराणज्योतिषयोर्द्वादश्यांप्रयाणस्यनिषेधाच्च पुराणेपि तस्यदानस्य सइतिशेषः ११ १२ १३
१४ १५ १६ १७ १८ १९ २० २१ २२ २३ २४ २५ २६ ६१

२७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७

संक्षयंयांतिदेवेशिघृतदानप्रभावतः गव्यंकोटिगुणंप्रोक्तंमाहिषंलक्षमात्रकम् २७ कपिलंतुघृतंदत्तमनंतंद्वादशीदिने
कांस्यपात्रेणसंयुक्तमनंतफलदंपुनः २८ मलमासेसमायातेवस्त्ररंगेणसंयुतम् ददातितस्यगेहेत्वंस्फास्थिराभवसुंदरि
२९ कुलानितारितान्येवपूर्वेषांसप्तवैस्त्वयम् आवयोःस्वर्णसंभूतप्रतिमादक्षिणायुता ३० घृतंदत्वाधिकेमासिद्वादश्यां
किमुशोचसे भयंत्यजमहाबुद्धेयमस्येत्यब्रवीन्मनुः ३१ मलमाससमोमासोनातिथिर्द्वादशीसमा नान्नदानात्समंदानं
नदेवःपुरुषोत्तमात् ३२ द्वादश्यामन्नदानंयेकुर्वंतिचक्रमध्यमे तेनैवतारिताःसर्वेनरकात्पूर्वजाःकिल ३३ अन्नदःपु
रुषोलोकेप्राणदःकथ्यतेबुधैः अन्नमाश्रित्यतिष्ठंतिजीवाब्रह्मांडगोलके ३४ चैत्रवैशाखयोर्नीरमिंधनंपौषमाघयोःस्व
कालपुण्यफलदमन्नंसर्वत्रसर्वदा ३५ उपरागसहस्राणिव्यतीपाताऽयुतानिच अमालक्षंतुद्वादश्याःकलांनार्हंतिषोड
शीम् ३६ द्वादश्यांयत्सकृद्दत्तमक्षय्यंतद्भवेदिह तस्माद्द्वादशिकायांतुदेयमेवनसंशयः ३७ पिष्टंलवणखंडंचाद्विदलेनस
मन्वितं घृतव्यंजनयुक्तंचदत्वाभुंजंतियेजनाः ३८ तेषांनास्तिमहाकष्टंगर्भवाससमुद्भवम् अंबरीषोयथागर्भेनगतःकृपया
मम ३९ अवतारादशैवैतेत्वंबरीषार्थमादरात् गृहीताःकमलेनूनंद्वादशीव्रतहेतवे ४० द्वादश्यामक्षयंदानंद्वादश्यामः
क्षयोजपः द्वादश्यामक्षयोहोमोद्वादश्यांसर्वमक्षयम् ४१ ऋषिभिर्देवगंधर्वैःशिवेनब्रह्मणामया इंद्रेणापिमहापर्व
निर्धारितमिदंमहत् ४२ तिथीनामधिपाःसर्वेब्रह्मणानिर्जराःकृताः यच्छंतितेफलंनित्यंद्वादश्याःफलदोत्यहं ४३
नगंगानगयानाद्दक्यादृशीद्वादशीतिथिः तिथीनामुत्तमाज्ञेयास्नानदानादिकर्मसु ४४ निधीनामधिपोजातःकुबेरोद्वाद
शीव्रतात् इंद्रत्वंदेवराट्प्राप्तोप्रजासंयमनोयमः ४५

३८ ३९ ४० ४१ ४२ निर्जराःदेवाः ४३ ४४ ४५

पंचपिशाचाः एकशूद्रः द्वौवृषभौ एतेसर्वेद्वादश्यादिपंचपर्वव्रताचरणेनस्वर्गंप्राप्ताः अत्रप्रसिद्धमितिहासमाह पुराणसंहितोक्तमाहात्म्ये मथुरायांकश्चिद्धनवान्वणिक् तस्यपत्नीयमुनाजलेस्नाता मलमासकथांश्रुत्वा गृहमागत्य विचारंकृतवती अहोव्यासमुखात्कथांश्रुत्वा तस्मैकिमपिनदत्तं नादत्तमुपतिष्ठति इतिशास्त्रंइतिविचार्य सेवकद्वयमाहूयप्रोवाच हेमहोदर विशालाक्ष युवांमद्वचनेन यमुनातीरेगच्छतां तत्रव्यासाय आम्रफलानिरंभाफलानि दशमोदकान् सुवर्णमुद्रांचेति इमानि पदार्थानिदत्वाशीघ्रमागच्छतां तच्छ्रुत्वातौ सर्वमादाय अर्द्धमार्गेस्थित्वा महोदरः प्राह हेविशालाक्ष इमानिफलानि समग्रेण व्यासायदत्तेनकिं इतिममम्मतिः अर्द्धंदीयतामितिसोप्याह किंचस्वामिन्याः व्यासे पूर्वस्नेहोपिनास्ति अतःयद्दत्तंतदेव तस्यलाभरूपं महोदरउवाच व्यासःकिंकष्टंकुरुते आवयोःनित्यंग्रहेप्रयासः तस्मान्मोदकानि फलानिच सर्वाणिच भक्षयामः इतिनिश्चित्य पदार्थ भक्षणंकृत्वा व्यासस्यउपहासंकृत्वा गृहमागत्य वैश्यपत्नीसमीपेगत्वा स्फुटंप्रोवाच हेस्वामिनि यमुनातीरे पौराणिकाः बहवः संति तत्रैकस्मैसर्वंदत्वाऽऽगतौ ततःतौ

द्वादश्यादिपर्वव्रतात् पिशाचाः पंचशूद्रकः

महोदरविशालाक्षौकालेनमृतौ स्वामिद्रोहविप्रद्रोहभक्ष्याभक्ष्यदोषेण कुलालगृहे गर्दभयोनिमागतौ ततःतौगर्दभौकुलालघरेन भारवाहकौ प्रभासक्षेत्रमागत्य तत्तीर्थजलंपीत्वा दिनत्रयतत्तीरेकर्दमालिप्तौजातौ पुनःस्वगृहमागतौ कालांतरेमृत्युमापन्नौ द्वौवृषभयोनिमागतौ शूद्रसद्मनिस्थितौ एकदाशूद्रःतौशकटेयोजयित्वा रेवायात्रार्थंगतः चैत्रपौर्णिमास्नानंविधाय पुनःगृहंजगाम तत्रमार्गेकश्चित्पुरुषः एकलः विष्णुभक्तः श्रांतःपथिस्थितःगंतुंनाशकत् तदाशकटेनव्रजन् शूद्रःवनस्थितंतंप्रोवाच हेसाधोउत्तिष्ठ शकटं समारुह्य मयासार्द्धं पुरंगच्छस्व निर्जनेवने त्वयानस्थेयं इत्युक्तः सवैष्णवः शकटंआरुहत् मार्गेगच्छतः मध्यान्हासमजायत वृषभौबाधाक्रांतौजातौ तदामार्गेएकस्मिन्वटच्छायायांशूद्रः साधुनासह विश्रांतिंचकार साधुरपितत्रगीतापाठंचकार तदातत्रस्थितः कश्चित्पिशाचः गीतापाठमाहात्म्यंश्रुत्वा जातिस्मरत्वंप्राप्तःसन् मुक्तकंठःरुरोदह तद्रोदनंश्रुत्वाअन्येचत्वारोपिशाचकास्तत्रागत्य किमर्थंरोदनंकरोषि इत्यूचुः पिशाचराट्उवाच अत्रगीताश्रवणमात्रेण जातिस्मरत्वमापन्नः सर्वेषाम-

मवपूर्वजन्मान्यहंजानामि एवंपिशाचानांभाषणंश्रुत्वाचकितंशूद्रंप्रति साधुनाप्रेरितः पिशाचः प्रोवाच अहंपूर्वजन्मनिविप्रः शास्त्रवर्जितः धनवान्म
याअनेकोपायेनधनंसंचितं स्नानदानव्रतादिकं किमपिनकृतं पतिव्रतांव्रतपरायणां ममभार्यांद्वादश्यांदानंकर्तुमुद्युक्तां द्वादश्यांदानासक्तंयजमा
नमपिनिवारितवान् तेनाहंपिशाचयोनिमापन्नः इमेचत्वारः मच्छिष्या मदाज्ञयापर्वधर्मनिषेधकाः जातास्तेनपापेन तेपिपिशाचाःजाताः अतःपरं
मुक्तिःकथंभवेत्तदद साधुरुवाच अत्रमेमिलिताःसर्वेदुःखभाजोनसंशयः पंचचैवभवतश्चबलिवर्दद्वयंतथा शूद्रेणसहिताद्योवैश्रृणुध्वंप्रव
दामिवः मलमासेरेवायांस्नानंकृतं तेनशूद्रस्यमदीयंदर्शनंजातं दययामांशकटंआरोपितः तेनद्वादशीव्रतंकृत्वा मुक्तिमाप्स्यति इमौद्वौवृष

बलीवर्दौचतेसर्वेविमुक्तास्त्रिदिवंययुः ६४ इत्थंबहुविधंप्रोक्तंमाहात्म्यंद्वादशीभवम् द्वादश्याहिसमंनास्तिपर्व-
वैभुवनत्रये ६५ तस्मात्कुरुप्रयत्नेनपंचपर्वाणिसिंधुजे नवकृत्यंकिमप्यास्तियतोहंतेवशंगतः ६६ नद्वारकानोज्जयि
नीनकाशीमधुरापिच गंगाद्वारनकांचीवानायोध्याद्वादशीसमा ६७ किंतस्यतीर्थैस्तपसाक्रपुण्यैर्वाकिमध्वरैः
मलिम्लुचेसितेकृष्णेद्वादस्यामन्नदूस्यच ६८ द्वादश्यांप्रातरुत्थाय भक्त्यासंपूज्यमामपि घृताद्युपस्करयुतंदेयम-
न्नंद्विजोत्तमे ६९ यस्यमासस्ययोदेवोद्वादश्यांतंप्रपूजयेत् असंक्रांतावहंपूज्योनाम्नावैपुरुषोत्तमः ७०

भौममवाहकौजातौ तेनपुण्येनवैश्यजन्मप्राप्य द्वादशीव्रतप्रभावेनमुक्तिंगमिष्यतः यूयंपंचपिशाचाः पानार्थंगच्छताम् गवांछायामाश्रि
त्य अस्मिन्पुरुषोत्तममासेरेवायांस्नानार्थंगच्छंतु नर्मदास्नानमात्रेणपिशाचत्वंगमिष्यथ ततःमनुष्यजन्मप्राप्य मलमासेद्वादशीव्रतेनह
रिभक्त्यामुक्तिंयास्यथ पूर्वजन्मनिमलमासेभवद्भिः अनाथप्रेतसंस्कारः कृतः तेनमत्संगोजातः एवमुक्तास्तेयथोक्तंचक्रुः हेलक्ष्मितत्रमार्गेयः
वैष्णवःमिलितःसः अहंशूद्रस्यभावंज्ञात्वानुपथिस्थि त्वापिशाचत्वमोचनंकृत्वा तत्रैवांतर्दधेमथुरायांवणिक्पुत्र्यायापुराप्रोक्ता सापिफलस्वर्ण ४२
दानेनमुक्तिमाप अतः द्वादशीसमंपर्वनास्तीति ६४ ६५ ६६ ६७ ६८ ६९ ७०

७१ ७२ भारसंख्यामाह चतुःकर्षैः पलंप्रोक्तं कर्षःस्याद्दशमासिकः तुलापलशतंप्राहुर्भारःस्याद्विंशतिस्तुलाःइति शतभारघृतदानंमहाधनिक
विषयः ७३ ७४ इतिपुरुषोत्तममाहात्म्यटीकायांपंचदशोऽध्यायः १५ छ अथास्मिन्नध्यायेस्नानमाहात्म्यंनिरूपयति लक्ष्मीरुवाचेति

प्रदद्याद्वस्त्रयुग्मंचयज्ञोपवीतंतथाघृतं उपानहौचदेवेशिद्वादश्यांमलमासके ७१ द्वादश्यामधिमासस्यफलंवक्तुंशतैरपि
कृतंदानस्यकमलेवक्तुंकेनापिभूतले ७२ द्वादश्यांहस्तयोगेनविष्णोःप्रीत्यर्थमाहृतः शतभाराज्यदोदेविमहाराज्याधिकार-
वान् भवेदत्रनसंदेहोसत्यंसत्यंवदाम्यहम् ७३ इत्येतत्कथितंदेविद्वादशीमहिमानकम् मलमासस्यसुभगेश्रुतंसर्वार्थ-
साधकम् ७४ इतिश्रीसप्तपुराणसा० श्रीपुरु० मा० पंचपर्वकथायांद्वादशीपर्वमाहात्म्यकथनंनामपंचदशोऽध्या-
यः १५ छ श्रीलक्ष्मीरुवाच भगवन्देवदेवेशभक्तानुग्रहकारक अधिमासेस्नानफलंवदमेसर्वमादरात् १
श्रीविष्णुरुवाच शृणुसुंदरिवक्ष्यामिस्नानस्यफलमुत्तमम् सर्वतीर्थेषुसुस्नातोऽधिमासेस्नातियोनरः २ वरदास्त-
स्यसर्वेस्युर्देवानास्त्यत्रसंशयः यमलोकंनपश्यंतिस्नानामासिमलिम्लुचे ३ यःस्नात्यनुदितेसूर्येचाधिमासिजलेऽ
मले तस्यवैदशमासस्यफलंस्नातस्यजायते ४ विष्णुपादोदकस्नानंमलमासेर्थकामदं तस्मात्सर्वप्रयत्नेनतत्स्ना
नंभुविदुर्लभम् ५ प्रयागेचाधिकेमासेस्नात्वादृष्ट्वाचमाधवम् प्रयातिसर्वपापानिदग्ध्वाममसलोकताम् ६ अपि
पापसहस्राणिकुर्वन्मर्त्योमलिम्लुचे पूर्वपापविशुद्धात्मास्नानमात्रेणजायते ७ सरस्वत्यांकृतंस्नानंयदिमर्त्यैर्मलि
म्लुचे तेषांजन्मसहस्राणांपापंयातिसहस्रधा ८ पितरस्तर्पितास्तेनपायसैर्मधुसर्पिषा येनस्नानंकृतंमासिसुतस्य
र्थमधिकेमले ९ कुरुक्षेत्रादितीर्थेषुनित्यस्नानेनयत्फलम् तत्फलंसमवाप्नोतिमन्मासस्नानयोगतः १०

प्रश्नपूर्वकं १ २ ३ ४ ५ ६ ७ ८ ९ १० छ छ

धर्मशर्मेतिस्पष्टार्थः अत्रमसिन्नेतिहासमाह पाद्मे पुरादक्षिणदेशेगौतमीतटेप्रतिष्ठाननगरेधर्मशर्मानामाद्विजः आसीत् स्वधर्ममाचरतस्तस्य-कदाचिद्दैवयोगेनमलमासोआगतस्तदाद्विजेनमनसिचिंतितं अहंकिंकरोमि वृद्धभावान्माघानित्यशः स्नानंकर्तुंनशक्यं परंदिनत्रयंस्नास्ये तिबुद्ध्यानिश्चित्य अंतिमदिनत्रयेविधिनास्नानमारब्धं एवंदिनद्वयंस्नानंतेनकृतं तृतीयदिनेअरुणोदयेसर्वसंभारान्गृहीत्वागोतमींप्रतिर्थमागच्छतो मार्गेभीमदर्शनं एकंप्रेतंदृष्ट्वा त्वंकोसीत्युवाच प्रेतउवाच हेद्विजेंद्र तवदर्शनेन ममकिंचित्ज्ञानमागतं मयापूर्वंचौर्यं परदारासे

धर्मशर्माद्विजःपूर्वंगोदावर्यांदिनत्रयं स्नानंकृत्वाधिकेमासिददौप्रेतायतत्फलम् ११ प्रेतोमुक्तिंतदैवापतस्मात्स्नानंसमाचरेत् स्नानाद्विप्रसहस्राणांभोजनस्यफलंलभेत् १२ गवांकोटिप्रदानस्यग्रहणेचंद्रसूर्ययोः अधिकेतदवाप्नोतिस्नात्वाविमलवारिणि १३ देवादेवत्वमापन्नामन्मासस्नानयोगतः ऋषयोनिर्मलाजातास्तथादेवर्षयोऽपरे १४ नकरोतिनरःस्नानंमन्मासेमूढचेतनः संसारनरकाद्घोरान्मुच्यतेनकदाचन १५ नस्नातिमलमासेचैयोनरोममतुष्टये तस्यजन्मवृथालोकेभुवोभारायकेवलम् १६ दंभेनापिकृतंस्नानंमन्मासेमुक्तिदायकम् संसर्गेणापिसवनंकृत्वामर्त्योदिवंव्रजेत् १७ भूधराःसरितोवृक्षानैवभारायभूतले परंभाराययोस्नातिविनास्नानंमलिम्लुचे १८ सर्वतीर्थमयंस्नानंमन्मासेजायतेध्रुवम् महेश्वरादिदेवानांसदासंतोषकारकम् १९ क्रतुंकृत्वामुनीनांयेप्रत्यासत्तिमखंडितां कामयंतेऽधिमासेतेकुत्रचित्स्नान्तुसर्वदा २०

मद्यपानादिकंचातिकृतं तेनपापेनबहुयातनाश्चभुक्ताः परंतुअद्यापि ममपापस्यांतोनदृश्यते अथवापापस्यांतोदृश्यते यतस्त्वंदर्शनंगतः अतः ममोपरिदयांकुरु इत्युक्तोब्राह्मणः जलमादाय मलिम्लुचदिनत्रयेयत्कृतंस्नानं तस्यपुण्यंतस्मैदत्तवान् तत्पुण्यप्राप्तिमात्रेण सप्रेतःदिव्यरूपःसन् द्विजंनत्वाविमानमारुह्यस्वर्गंजगामेति ११ १२ १३ १४ १५ १६ १७ १८ १९ कुत्रचिदित्यनेन मलमासेस्नानार्थंतीर्थक्षेत्रादिषुगमनाशक्तो यत्रकुत्रजलाशयेतन्निमित्तंस्नानंकर्तव्यमित्याशयः २०

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

२१ २२ २३ अथाप्सराविषयेकथानकमाह पाद्मे इंद्रलोकेस्मितविलासिनीनामाप्सरा सैकदास्वसखीभिः सहक्रीडनार्थंस्वर्गलोकात्कुरुक्षेत्र मुपागता तत्रक्षचिरंक्रीडिता हस्तेपुष्पमालांधृत्वा स्वसखीमित्याह हेसखि मेसमोभर्तान यस्यकंठेमालांसमर्प्यसुखमाप्नुयां एवंअतिकामाक्रांतेनचेतसा वदत्यांसत्यां तत्रातिकोपनोदुर्वासाऋषिरागतः तद्दृतया अविचार्य ऋषिकंठेकामभावेन मालासमर्पिता तदैवक्रोधभावेन दुर्वासाउवाच हेदुष्टेत्वं पिशाचीव ममांगेस्पृष्टासि तस्मात्पिशाची सत्वरंभव ततःसारुदती पादौगृहीत्वा उवाच हेऋषे अजानंत्यामया अपराधः कृतः अतोमयिअनुग्रहंकुरुष्व अपराधशतेनापिपीडिताः स्त्रियंनहंति दीनवत्सलाः क्षमामेवकुर्वंति इत्युक्तोदुर्वासाउवाच हेअप्सरे मद्वचनात् पिशाची त्वंभविष्यसि परंतुचतुर्युगसहस्रांते गुर्जरदेशे कुमारीक्षेत्रे महीसागरसंगमे काचित्तपस्विनी तत्रतपः कर्तुं मलमासे आयास्यति एवंस्नानदीपार्चनोपवासनक्तमौनायाचिताद्विव्रतादिना तपःकुर्वंत्यास्तस्याः अष्टोत्तराधिकशतंमलमासाः महीसागरसंगमेगमिष्यंति कदाचिद्दैवयोगेनमलमासस्यकृष्णद्वादश्यां तन्निकटेत्वयास्यसि तस्याःसंदर्शनादेव तवज्ञानंउत्सरस्यते शुभांवाणींविदिष्यसि हेमातः ममोपरिकृपांकरु जंतोः नित्यंमृत्युः वरंपैशाच्यंक्षणमपि माभवेत् एवंतद्वचः श्रुत्वासातापसी एकस्यैवाधिमासस्यतवफलंप्रदास्यति तेनमुक्तशापासती पारंएष्यसीति सैवाप्सरामलमासप्रभावतः शापान्मुक्तासतीसुखंप्रापेति २४ २५ २६

विनावह्निंविनायज्ञमिष्टापूर्तिंविनापिये वांछंतिस्वर्गंतेस्नांतु प्रातस्तोयेमलिम्लुचे २१ गोभूमितिलवासांसिस्वर्णधेन्वन्नकानिच अदत्वेच्छंतियेनाकंस्नांतुतेऽधिकमासके २२ ग्रामादिकंचयत्पापंज्ञानाज्ञानकृतंचयत् स्नानमात्रेणनश्येत मासिप्राप्तेममाधिके २३ स्नानादप्सरसाप्राप्तं फलंदुर्गतिनाशनम् मासेमलिम्लुचेदेवि महीसागरसंगमे २४ नातःपरतरंकिंचित्पवित्रंपापनाशनम् नातःपरंव्रतंकिंचिन्नातःपरतरंमहत् २५ एतदेवपरंवंद्यं सद्योदुरितनाशनम् मयातुभ्यंसमाख्यातंलोकानांहितकाम्यया २६

शिवपुर्यामिति श्रीकृष्णउवाच मरुसिंधौतुनगरीवर्ततेबहुविस्तरा नाम्नाशिवपुरीख्याताशिवस्यातिप्रियासदा गोकर्णस्यगिरेःपार्श्वेप्रासादाबालभूषिता बह्वाश्चर्यवतीरम्यारम्यचत्वरशोभिता तस्यामासीत्सदाचारः शूद्रःकश्चिहूरोग्रही नाम्नापिविप्रदासोसौकर्मणापितथाविधः तस्यपत्नीविप्रदासीसानाम्नाशुभलक्षणा मलमासेतुशूद्रेण सभार्येण द्विजाज्ञया स्नातुमारब्धमाढ्येननित्यंदानपरेणच गोकर्णगिरिमूलेतु सारंगेश्वरसन्निधौ गोकर्णीवर्ततेगंगासर्वपापप्रणाशिनी तस्यांनद्यांकृवंद्यायांस्नानंकृतवतःसदा विप्रदासस्यशूद्रस्यसभार्यस्यवरानने शिवपूजयतोनित्यंसमासःपूर्णतांगतः विधायोद्यापनंसर्वान् द्विजान्सपरितोष्यच समाप्यैवंविसृज्यैतान्यावदायातिमंदिरम् तावन्मार्गेमहारौद्रान् प्रेतान्देविददर्शसः तान्दृष्ट्वातस्यपत्नीचत्रस्तानेत्रेनिमील्यच लतागृहंप्रविश्याच शिवंसंस्मृतवत्यपि तस्थौस्वस्थःसशूद्रस्तुकेयूयमितिचाब्र-

शिवपुर्यांपुराशूद्रोस्नानपुण्यंददौयदा शतानिसप्तप्रेतानांमुक्तानिक्षणमात्रतः २७ तस्माद्यत्नेनकर्तव्यंस्नानं-
मासिमलिम्लुचे वर्ततेन्यान्यपिशुभे महाश्चर्याणिसुंदरि २८ भूयएवप्रवक्ष्यामिशृणुसर्वांगसुंदरि मलिम्लुचकृत-
स्नानफलमद्भुतकारणम् २९ सौराष्ट्रेसुजनेदेशेवृक्षच्छायाविवर्जिते तृणधान्याशनोपेतेगवाश्विकसमाकुले ३० त-
त्रास्तिपट्टनंदिव्यंप्रभासमितिनामतः तत्रासीद्ब्राह्मणःकश्चित्सोमशर्मागुणान्वितः ३१

वीत् तौनूत्वाप्रेतराजस्तुनाम्नावन्हिशिखांगजः उवाचवचनंसाधुसाधुशूद्रवरोत्तम अस्माकंभाग्ययोगेनविधिनात्वंप्रदर्शितः त्वद्दर्शनमात्रेणसर्वेषांनोत्थघंगतं किंचित्स्नानंसमायान मतस्त्वांप्रार्थयामहे निंद्याहारावयंसर्वेनिंद्यकर्मकराःसदा अनेकविधपापानांकर्तारोस्करवस्तयुताः शतानिसप्तसंख्याकाभ्रमंतोमरुमंडले तृषाक्षुधातुराःसर्वेकर्मपाशैःसुयंत्रिताः वर्तामहेमहाभागकुरुष्वास्मासुवैदयां मोचयास्मान्महापापात्साधवोदीनवत्सलाः इत्युक्तेवचनेसाध्वि तेनप्रेतेनसादरं मलिम्लुचकृतस्नानसप्तकस्यफलंददौ सर्वेभ्योमुक्तयेदत्ते तस्मिन्तत्क्षणमेवते प्रेतभावंपरित्यज्य दिव्यभावमुपागताः विमानान्यास्थिताःसर्वे स्वर्गंजग्मुरनुत्तममिति २७ २८ २९ ३० ३१

४८

३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९ ४० ४१ ४२

वेदशास्त्रकृताभ्यासःसदाचारपरायणः इष्टापूर्तप्रकर्ताचदत्तंदानमनेकधा ३२ स्नाताश्चबहवोमाघा अधिकाबहवःकृताः
कदाचित्तस्यविप्रस्यस्नानंगतवतःशुभे ३३ सरस्वत्यास्तुसंयोगेसमुद्रस्यचशोभने मार्गेकश्चित्घोररूपोराक्षसोदर्शनं
ययौ ३४ महाकायोमहावीर्योक्षुधापीडितविग्रहः तंदृष्ट्वाब्राह्मणःसोथश्रीनृसिंहंस्मरन्स्थितः ३५ राक्षसोविस्मयाविष्टो
ग्रहीतुंतंतुनाशकत् जाज्वल्यमानंतपसादृष्ट्वाग्निमिवदारुणम् ३६ उवाचवचनंचापिविवेकगतदुर्मतिः विप्रेंद्र त्वमधृष्योसि
तेजसाग्निरिवज्वलन् ३७ बहुपापवतोमेद्यभवान्साधुःसमागतः असाधुराक्षसत्वेपिभवद्दर्शनसंगमः ३८ मांमोच
यदयास्तिंधोदीनबंधोद्यदुर्गतेः इतिवाक्यंसमाकर्ण्यराक्षसस्यचसद्विजः ३९ तर्कयामासमनसिधर्मतत्वंदयानिधिः यद्य
हंभर्त्सयिष्यामिगमिष्यत्ययमन्यतः ४० परामन्यांबहुविधांहिंसांदुष्टःकरिष्यति यद्येनंमोचयिष्यामितन्मेधर्मोमहानयं
४१ भविष्यतिदयारूपोबहूपकृतिकारकः विचार्येत्थंजलंकृत्वाकर्णिकायाःकरेभुवि ४२ मलिम्लुचेकृतस्नानादेकवारं
द्विजोददौ तस्मैपापिष्ठरूपायस्वपुण्यंपुण्यभोगवान् ४३ तत्पुण्येनतुसद्योसौदिव्यरूपधरोबभौ द्विजोपरिसुरैर्मुक्तापुष्पवृष्टिःपपातह
४४ देवानीतंविमानाग्र्यमारुत्वाऽसुरसत्तमः नत्वास्तुत्वातुतंविप्रंजगामत्रिदशालयम् ४५ तस्मान्मनुष्यमासाद्यनस्नानमधिकेचरेत् तस्याऽमृतंकराभ्रष्टंप्रमादात्मगतंप्रिये ४६ मलमासेस्नानपुण्यंवदामिशृणुसादरम् य
स्यश्रवणमात्रेणस्नानंगंगासमंभवेत् ४७ मलमासस्तुदेवेशिसर्वेष्वपियुगेषुच विख्यातोस्तिनसंदेहःकालरूपीनसंशयः
४८ युगेयुगेचकर्तव्यंप्रातःस्नानंदिनेदिने मलमासेविशेषेणस्नानंनैवोष्णवारिणा ४९ यथामाघेरटंत्यापस्तथैवास्मि
न्मलिम्लुचे केधन्यास्तासुमज्जंतिवयंतांश्चपुनीमहे ५०

४३ ४४ ४५ ४६ ४७ ४८ ४९ ५०

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

५१ ५२ ५३ ५४ ५५ ५६ ५७ ५८ ५९ ६० ६१ ६२ ६३ ६४ अत्रविशेषः पुराणसंहिता

अत्रतेकथयिष्यामिस्नानपुण्येकथानकम् महाकष्टहरंनृणांनारीणांकष्टनाशनम् ५१ त्रिपुरासुरसंहारेनारदेनविनिर्मितम्
जैनमार्गप्रवृत्ताश्चतत्रस्थायेजनास्तदा ५२ त्रिपुरस्यैवदेशेतुजैनमार्गप्रसारितः नारदेनविनाशायत्रिपुरस्यसुधर्मिणः ५३
देवकर्मपरोनित्यंमुनिवत्त्रिपुरासुरः वेदोक्तेनविधानेनचाग्निहोत्रंजुहोतिसः ५४ संध्यास्नानपरोनित्यंजपहोमपरोसु
रः पापबुद्धिःकथंतस्ययथाकालमवाप्नुयात् ५५ देवादीन्पीडयामासवरदानेनदर्पितः तदादेवैःस्तुतःशूलीतत्राग
त्याब्रवीत्स्वयम् ५६ पृथिवीरथमास्थायधनुःकृत्वाचपार्वतम् विष्णुंशरंविधायाहंलक्षीकृत्यपुरत्रयं ५७ समका
लंविधिष्यामिब्रह्मसारथिमाश्रितः एवंकृत्वाहतोदैत्यस्त्रिपुरोदुःखदायकः ५८ पुण्यमार्गाद्यदादैत्योनारदेनैवभ्रंशि
तः जैनमार्गरतोवेदमार्गाद्भ्रष्टोऽसुरोऽभवत् ५९ वेदमार्गंपरित्यज्ययोन्यमार्गमुपासते त्रिपुरासुरवत्तस्यनाशोभव
तिसान्वयः ६० ज्वलितेत्रिपुरेदैत्येलोकेनिर्भयतांगते जैन्यमार्गप्रवृत्तिस्तुनगतानारदेरिता ६१ एकस्मिन्नगरेभूमौग.
लुकीदशयोजने वैश्यस्त्रीजैनमार्गस्थाबभूवपतिनासह ६२ तस्यास्तुगर्भसंभूतिःशूलयोगेभवत्ततः गर्भस्यपंचमे
मासेपतिस्तस्यामृतोध्रुवम् ६३ मृतेभर्तरिवैधव्यंतयाप्राप्तंसुमध्यया वृषोत्सर्गक्रियानैवकृताजैन्येऽनुसक्तया ६४
केशानांवपनंनैवकृतंप्रेतेसभर्तरि तयात्वेकादशाद्यंचनकृतंजैनमार्गया ६५ प्रेतोबभूवतत्स्वामीनिर्जनेमरुमंडले
तस्यास्तुदशमेमासेपुत्रोत्पत्तिर्बभूवह ६६ नकृतंजातकर्मादिवेदधर्मोनतद्गृहे पंचवर्षात्मकोबालोयदाजातस्तदारमे ६७

यां मृतेभर्तरियानारीनकेशान्वपतिपुनः मंडूकीजायतेसानुमृताकर्दमरूषिता तत्क्लेशगलितंतोयंभूत्वारुधिरमुल्बणम् पत्युर्मुखेपतत्येवतस्मात्
केशान्नधारयेत् इतिकेशधारणेदोषेसत्यपिजैनमार्गरतत्वात्केशवपनंनकृतवती ६५ ६७ ६७ ६८ ६८

६८ वीथिषु मार्गेषु ६९ ७० ७१ ७२ ७३ ७४ ७५ ७६ ७७ केकिनायिका मयूरस्त्रीमध्ये मुख्या ७८

संगनिर्विप्रपुत्राणांरमतांतस्यचाभवत् तैःसार्द्धंक्रीडतस्तस्यविप्रबालैर्निरंतरम् ६८ वर्षाणित्रीणिबालस्यरमद्भिस्तीर्थ-
वीथिषु एकदारमतांतेषांगतानांचसरित्तटे ६९ तैःसार्द्धंवैश्यबालोपिरमयामाससादरम् मलमासःसमायातःसर्वपाप
प्रणाशनम् ७० तत्रस्नानंकृतंबालैर्विप्राणांभूरिवर्चसाम् नकृतंजैन्यधर्मत्वाद्वैश्यपुत्रेणविस्मृतः ७१ मात्रानिवारि-
तोबालःशीतलोदककर्मणि हठात्कारेणतैःस्नानंकारितोसौवणिक्सुतः ७२ रोरूयमाणोबहुधामातृशासनतत्परः बाला
न्निर्भर्त्स्यबहुधानगतस्तैःसहगृहम् ७३ सरित्तीरेमहाकुंजेनीलिनोमातृभीतितः गच्छंतंस्वगृहेमाताताडयिष्यतिमांध्रु
वम् ७४ जैनमार्गमतिक्रम्यनद्यांस्नानंकृतंमया गतेषुतेषुबालेषुस्वेस्वेसद्मनिमाचिरम् ७५ वैश्यपुत्रःसरित्तीरेकुंजेगो
प्यतयास्थितः नदीतीरेमहत्कुंडंविश्वकर्मविनिर्मितम् ७६ रचितंमणिभिःसम्यक्कालेभग्नंक्वचित्क्वचित् जलंस्वच्छ
तरंतस्मिन्नमृतेनसमंरमे ७७ तत्रदूरात्समायातिस्नानार्थंकेकिनायिका पिच्छान्विकीर्यवेगेनमयूरीकृतकेकिका
७८ प्रक्षाल्यांगंचसकलंपापौकुंडगतेपयः अधिमासस्यसप्तम्यांहस्तर्क्षेरविवासरे ७९ सादृष्टावैश्यपुत्रेणमयूरीकृ
तमज्जना तदासैवाप्सरोरूपंप्राप्तंकुंडप्रसादतः ८० अतीवसुंदरांगीसादृष्टावैश्यसुतेनच आश्चर्यकलितस्तत्रवैश्य
पुत्रउवाचताम् ८१ कथंप्राप्तंत्वयारूपमस्मात्कुंडविनिर्गमात् आदौदृष्टामयूरीत्वंकथंजातावराप्सरा ८२ रक्तांबरधराप
क्वबिंबोष्ठीदीर्घनाशिका सौभाग्यमतुलंकस्मात्त्वयाप्राप्तंवदस्वमे ८३

७९ ८० ८१ ८२ ८३ विप्रशापस्यकारणमाह पुराणसंहितायां पुरादुर्वासाऋषिः गण्डकीतीरेतपश्च-
चार तत्रअधिकमासोआगतः एकदातत्तपोभंगार्थं इंद्रप्रेषिताअप्सराऋषिंमोहयितुं मयूरवत् नृत्यं आरब्धवतीसती कुपितोदुर्वासा हे दुष्टे मयूरनृत्यं

यतोमत्पुरः आरब्धं अतः मयूररूपेण भूमौविचरस्वेति तांशशाप तदाभीताऽप्सरा ऋषिंप्रतिशापस्यांतंप्रार्थयामास दुर्वासाउवाच हेभद्रेगण्डकी-
तीरतः दूरेशोभनाख्यनदीतीरेविश्वकर्मविनिर्मितेकुंडे अधिकमासंप्रत्यहंस्नानमाचर तेनपुनः अप्सरास्वरूपंप्राप्स्यसि इत्युक्तासाऽप्सरा मयू-
रतांप्राप्ता सावैश्यसूनुनादृष्टाततोशापान्मुक्तासतीस्वर्गंप्रापेति ८४ कुंडजन्यंमयूरीमोक्षादिकं ८५ विवादमाह वैश्यभार्योवाच त्वयाधि-
मुक्तंयदबालसांप्रतंव्रतंफलंतस्यविशेषतोमुदा स्नानेनमुक्तायद्विजंतवोभयंतदाहिमच्छादयएवकिंनते तथापिसत्यंयदिनेत्रमागतंनवेत्तिचे-

श्रीभगवानुवाच इत्थंपृष्टायदासौस्मितमुखकमलाकौतुकाविष्टचित्तं वैश्यंप्रोवाचबालंशृणुममचरितंमास्क
चिंतातवात्र शापाद्धिमस्यजाताकृतबहुतपसःकेकियोनौचपूर्वं मोक्षोपायोपितेनममरचितइहातेत्रशापान्निवृत्ता
८४ वैश्यबालोगृहेगत्वामातरंप्रणिपत्यच साश्चर्यंकथयामासकुंडजन्यंसविस्तरम् ८५ तच्छ्रुत्वाविस्मिताबाला
विवादंकृतवान्मुदा पुत्रेणसाकंचयदाकाशवाण्यभवत्तदा ८६ सत्यंवदतिबालोयंनानृतंतद्गृणेकृप्रिये स्कतोक्त
वचनंतथ्यंमत्वाकुरुस्कतप्रिये ८७ एवमाकाशवाण्यासाजैनमार्गानुसारिणी बोधितावैश्यभार्यासावेदमार्गानुसा
रिणी ८८ बभूवजैनमार्गंचविहायाधिकसेवितं विप्रमाहूयशास्त्रज्ञंगुरुंकृत्वाविधानतः ८९ तदाजयाव्रतंचक्रेपुरुषोत्त
मसंज्ञकम् कालेनमुक्तिमापन्नापुरुषोत्तमपूजनात् ९०

न्मांवदकौतुकंस्कत जैन्येनतुल्योनचवर्ततेधुनायया
चास्तिनहिंसनंतनोः आत्मानदीसंयमतोयपूर्णासत्यावहाशीलतटादयोर्मिः तत्राभिषेकंकुरुपांडुपुत्रानवारिणाशुद्ध्यतिचांतरात्मा अने
नवाक्येनचबालबोधिता पुराचतातेन तवैवसादरम् ततोरताहंसकलंविहायवैस्नानादिकंकर्मचजैनमार्गम् विप्रानवंद्याबहुजीवहिंसकाः
कुक्षिंभराहोमकराःपशूनाम् पुष्पाणिदूर्वाश्चितथैवदर्भान् फलानिछिंदंतिविनापराधम् गतेचदीपेकिमुतैलदानैर्मृतेचताते किमुतोयदानम्
शिलाश्चयारामइहप्रसारितंकूपोदकंस्यान्मस्करवायसूनो इति ८६ ८७ ८८ ८९ ९० ९१

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

९१ इतिपुरुषोत्तममासमाहात्म्यटीकायांषोडशोऽध्यायः १६ ६९ स्नानकरणाशक्तौहरिनामस्मरणंकर्तव्यमित्युपदिशन् तन्माहात्म्यं

नहिपुरुषोत्तमपरंव्रतमन्यद्विलासिनि श्रद्धयाकुरुतेयोवैसमुक्तःस्यान्नसंशयः ९१ इतिश्रीसत्पुराणसारोद्धारेश्रीपुरुषोत्तममा॰ धर्मशर्माऽप्सराशूद्रसोमशर्मावैश्यपुत्रेतिहासपंचकसहितंस्नानमाहात्म्यनिरूपणंनाम षोडशोऽध्यायः १६ ६९ श्रीलक्ष्मीरुवाच भगवन्भवताघौघनाशकंस्नानमीरितम् मलमासेत्वशक्तानांस्नानादौकिंफलंनृणाम् १ कृतेनैकेनतेमुक्ताभवंतिवदसांप्रतम् श्रीविष्णुरुवाच शृणुसाध्विप्रवक्ष्यामिलोकानुग्रहकारकम् २ नराणांचैवनारीणांसर्वेषामात्मनःप्रिये सर्वदासर्वदानोत्थफलदंसर्वकामिकम् ३ यज्ञादिफलदंसर्वंकथयामिसनातनम् रहस्यंकर्मराजाख्यंनैष्कर्म्यफलदायकम् ४ अपिकर्मफलौघानांदाहकंभवतारकम् अशक्तानांविशेषेणमल·मासेविशेषतः ५ हरेर्नामहरेर्नामकीर्तनंकथितंबुधैः कृष्णकृष्णेतिकृष्णेतिस्वपन्जाग्रन्तथानिशि ६ जपन्नितिकलौनित्यंकृष्णरूपीभवेन्नरः कृष्णकृष्णेतिकृष्णेतिप्रत्यहंवक्तिवैकलौ ७ नित्यंयज्ञायुतंपुण्यंतीर्थकोटिफलंलभेत् स्नात्वागायंतिगोमत्यांकृष्णंकलिमलापहम् ८ नतेषांविषयेदूतागच्छंतियमकिंकराः म्लेच्छतुल्यस्वभावास्तेयेन·भक्तामममानघे ९ संकीर्णयोनयःपूतायेभक्तामममभामिनि पठंतिगीतामध्येमेतेपिमुक्तानसंशयः १० स्त्रीराजबालघातीचयेचविश्वासघातकाः मातृगामीसुरापीचत्याततायीविनिंदकः ११ मातृहापितृहागोघ्नोभ्रूणहागुरुतल्पगः एतेचान्येचपापिष्ठामहापापरताश्चये १२ सर्वपापैःप्रमुच्यंतेकृष्णरामेतिकीर्तनात् नास्तिनास्तिमहाभागेयुगंहिकलिनासमम् १३ स्मरणात्कीर्तनाद्यत्रप्राप्यतेपदमव्ययम् किंवेदैःश्रद्धयाधीतैर्व्याख्यातैरपिकृत्स्नशः १४

निरूपयत्यस्मिन्नध्याये १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४

१५ १६ १७ १८ १९ २० २१ २२ २३ २४ २५ २६ २७

धर्मशास्त्रादिभिश्चैवयोगशास्त्रैश्चकिंभवेत् सेतिहासैः पुराणैश्चव्रतदानजपादिभिः १५ सप्तद्वीपादिभूदानैर्दानैश्चान्यैश्चकृत्स्नशः गजाश्वरथदानैश्चदेवालयप्रतिष्ठया १६ सेवितैः क्षेत्रतीर्थाद्यैस्तपोभिर्विविधैश्चकिम् सर्वेश्वरस्यकृष्णस्यस्मृतिर्मेयस्यजायते १७ कलौदोषनिधौकांतेगुणस्त्वेकोमहान्भुवि कीर्तनादेवकृष्णस्यमुक्तबंधः परंव्रजेत् १८ हरेर्नामैवनामैवनामैवममजीवनम् स्मरंतिस्मारयंत्येवमन्नामानिमलिम्लुचे १९ हरिनामपरायेचघोरेकलियुगेरमे शिवपूजाकरायेचाशिवनामपरायणाः २० तएवकृतकृत्याश्चनकलिर्बाधतेहितान् घोरेकलियुगेप्राप्तेसर्वकर्मबहिष्कृते २१ हरिकीर्तनमेवात्रसंपूर्णफलदायकं सकृन्नारायणेत्युक्त्वा पुमान्कल्पशतैरपि २२ गंगादिसर्वतीर्थेषुस्नातोभवतिमानवः सर्वेषांवेदशास्त्राणांसारंगोविंदकीर्तनम् २३ गोविंदस्मरणादन्यत्साधनंनैवविद्यते गणिकैकापुराकांतेशुकंप्रापनृपात्मजात् २४ तंशुकंवदरामेतिपाठयामासनित्यशः शुकाध्यापनयोगेनरामंसस्मारसातदा २५ तेनाध्यापनयोगेनमुमोचभवबंधनात् येनसाक्षादुच्चारितंरामनामसमुक्तिभाक् २६ तथैवविष्णुस्मरणंसर्वपातकनाशनम् अजामिलोमहापापीमुक्तोसौभवबंधनात् २७ नारायणेतिपुत्रस्यनाममात्रेणसर्वथा हरिरेवपरंधाममहरिरेवपरंपदम् २८ हरिरेवपरंसारंतस्मात्तन्नामकीर्तनम् श्रीविष्णुरुवाच शृणुक्षीरोदतनयेसर्वदानंददायिनि २९ तपसांचैवसर्वेषांयत्तपः परमव्ययम् यदाचरंतिमनुजा गच्छंतिपदमव्ययम् ३० तदहंसंप्रवक्ष्यामिलोकानुग्रहहेतवे अन्नंहिप्राणिनांप्राणा अन्नेलोकाः प्रतिष्ठिताः ३१ अन्नंवीर्यंबलंनामसर्वदेवमयंतथा नदत्तंयेनवैपुंसानदत्तंकिंशशिस्वसः ३२

२८ अथोपवासरूपंतपः प्रतिपादनार्थं अन्नप्रशंसामाह शृण्वित्यादिना २९ ३० ३१ ३२

३३ ३४ ३५ उपवासंदिवसभेदानाह मासोपवासमिति ३६ ३७ ३८ ३९ ४० तृखंजिका तृषुखंजिकागति

तेनात्मसुखसिद्धौतुसत्कृतंसर्वभोगतः तदन्नंयेनसंत्यक्तंतावद्यावन्ममप्रिये ३३ तेनसांसारिकंसर्वंकिलत्यक्तंमुमुक्षुणा
तस्मात्सर्वप्रयत्नेनमासेधिकसमाह्वये ३४ उपवासव्रतंकुर्यात्सर्वकामफलाप्तये मासोपवासंवाकुर्यात्पक्षेतूह्युपवासकं
३५ षड्रात्रंवात्रिरात्रंवाव्रतमेकांतरंतुवा एकंवाप्युपवासंतुशक्तितस्तत्समाचरेत् ३६ नरोवायदिवानारीकुमारीवाकुमा
रकः तरुणोवाथवृद्धोवाविधवातुविशेषतः ३७ एकेनाप्युपवासेनकृतकृत्योभवेदिह अत्रतेकथयिष्यामिकथांपौरा-
णिकींशुभाम् ३८ अस्तिश्रीनर्मदातीरेपुरीमाहिष्मतीकिल तत्रकाचिन्महाभागाब्राह्मणीत्यभवत्पुरा ३९ नाम्नासा
तापसीख्याताकर्मणाचापितत्समा तपश्चचारविपुलंमलमासोपवासिनी ४० तस्याःकदाचित्समयेसखीकाचित्तुरीय-
जा कर्मकर्त्रीसमाख्याताकुष्ठयुक्तातृखंजिका ४१ अभवत्सामुमूर्षुर्वैज्ञातातत्समयेतथा सोक्ताविप्रसहचरीमत्यांकिं
चित्तपोर्चय ४२ येनाहंकसुखंभुक्त्वासंसृतेःपारमाप्नुयां दयापरासिभूदेविसख्यंतेसार्थकंकुरु ४३ इत्युक्तासातया
सख्यातापसीकरुणापरा ददावेकोपवासस्यमलमासव्रतस्यवै ४४ कलसंसलिलंहस्तंदत्तमात्रोद्दिवस्तले विमानंमह
दायातंदिव्यभोगसमन्वितम् ४५ तत्रारूढातुतद्यानंतापसींस्वसखीमियम् स्तुत्वाबहुविधैर्वाक्यैर्जगामत्रिदशालयम्
४६ बहुकालंमहाभोगान्भुक्त्वाचैवभुवस्तले काशिनाथसुतात्वंचलब्ध्वातत्रापिशंबहु ४७ भुक्त्वादेहविसृष्टौतुपुनःशं
करलोकगा लोकानुग्रहणार्थायकाश्यांचंद्रेश्वरीपुनः ४८ वर्ततेद्यापिविबुधैर्वंद्यालोकैस्तुपूजिता मलमासदिनैकस्यफ
लंप्राप्तासखीकरात् ४९ काश्यांस्थास्यतिसाशश्वद्यावदाचंद्रतारकम् तस्मादेकोपवासोवैकर्तव्यःशुभमिच्छता ५०

विकलालंगडीतिविख्याता खंजकेखोडखोराविनिरभसः ४१ ४२ ४३ ४४ ४५ ४६ ४७ ४८ ४९ ५०

५१ इतिश्रीपुरुषोत्तममाहात्म्यटीकायांसप्तदशोऽध्यायः १७ ५२ अथोपवासाशक्तस्य मौनव्रतप्रसंगमाहात्म्यमिन्नध्याये १ २ ३

परत्रेहचसंसारभीरूणांचारुहासिनि ५१ इतिश्रीसप्तपुराणसारोद्धारेश्रीपुरु॰मा॰ नामस्मरणमाहात्म्योपवासफल
कथनंनामसप्तदशोऽध्यायः १७ ५२ श्रीलक्ष्मीरुवाच भगवन्ब्रूहिमेसर्वंमलमासस्ययत्फलम् उपवासस्य
सामर्थ्यंयेषांनास्तिमल्लिम्लुचे १ किंकर्तव्यंवरैस्तैरक्त कथंपापक्षयोभवेत् तद्वदस्वसुरश्रेष्ठ कृपांकृत्वाममोपरि २ श्री
विष्णुरुवाच शृणुदेविप्रवक्ष्यामिव्रतंपापप्रणाशनं येषामुपोषणेशक्तिर्नास्तिकिंचिच्चभक्षणे ३ तैरेकभुक्तंकर्तव्यंहवि
ष्यान्नेननित्यशः तथामौनंचकर्तव्यमनंतफलमीप्सुभिः ४ उपवासेनयत्पुण्यंतत्पुण्यंमौनभोजने मौनेनसर्वपापेभ्योनरो
मुच्येदसंशयम् ५ मौनाद्भवतिसौभाग्यंमौनाद्रूपंप्रजायते मौनात्प्रवर्धतेकीर्तिस्तस्मान्मौनंसमाचरेत् ६ मौनात्कलहहा
निःस्यान्मौनादायुःप्रवर्द्धते मौनाच्चैवाप्यतेसौख्यंतस्मान्मौनंसमाचरेत् ७ त्रिषुमौनंसदाकार्यंस्नानेहोमेचभोजने मौ
नेनयत्फलंदेवित्रिषुस्थानेषुतच्छृणु ८ स्नानेनप्राप्यतेतेजोजुह्वतःश्रियमुत्तमाम् भुंजानोलभतेचायुस्तस्मान्मौनंसमाच
रेत् ९ एतेषुत्यज्यतोमौनंपुरुषस्याल्पमेधसः आयुःश्रेयःश्रियंयातितस्मान्मौनंसमाचरेत् १० स्नानेनवरुणस्तेजोजुह्वतो
ऽग्निःश्रियंहरेत् भुंजानोमृत्युरायुष्यंतस्मान्मौनंसमाचरेत् ११ श्रीलक्ष्मीरुवाच मौनंकतिविधंप्रोक्तंकियंतंकालमेव
च एतत्सर्वंसविस्तारंब्रूहिमेवदतांवर १२ श्रीविष्णुरुवाच मौनंतुद्विविधंप्रोक्तंपापघ्नंममतुष्टिदम् प्रथमंभोजनां
तेचप्राणाहुत्यंतमेवच १३ प्रथमंपूर्णफलदंकिंचिन्न्यूनंद्वितीयकम् मौनाच्छीलमवाप्नोतिसर्वपापैःप्रमुच्यते १४ यः
करोतिनरोमासेमौनमक्षय्यमश्नुते प्रायश्चित्तंपरंह्येतन्महापातकनाशनम् १५

४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५

१६ १७ १८ १९ २० २१ २२ २३ २४ २५ २६ २७

यंयंकामयतेकामंतंतंप्राप्नोतिमानवः नारदेनपुरामौनात्प्राप्तंज्ञानमतींद्रियम् १६ सत्संगात्मकृपालोकान्मौनव्रतम
भावतः संत्यज्यदासिपुत्रत्वंब्राह्मणत्वमुपागतः १७ मलापकर्षकेमासेस्नानंतेनदिनत्रयम् कुरुक्षेत्रेततोजातोब्राह्मणो
मानसःसुतः १८ सर्वफलंचमौनेननिधिनस्तत्रयोस्कतं इष्टापूर्तफलंतस्यमलमासेतुमौनतः १९ मासानांमलमासो
यंश्रेष्ठःसर्वाधिकःस्मृतः किंस्यात्वतीर्थयात्राभिःक्लेशात्यंतप्रदायिभिः २० एकतोमलमासोयमेकतोद्वादशाब्दिकम् समान
मत्रमभवेत्किंपुनर्मौनभोजनात् २१ एकतःसर्वदानानिमलमासस्तथैकतः तुलयातोलितेदेविनसमानिमलिम्लुचे
२२ धन्योवैमानवोलोकेयःस्नातिमलमासिके ततोधन्यतमःसोपिदीपदःपुरुषोत्तमे २३ मौनव्रतीततोधन्यःस्नानेवैभो
जनार्चने आजन्मतःकृतात्पापान्मुच्यतेनात्रसंशयः २४ व्याजेनापिकृतंदेविव्रतंवैपुरुषोत्तमे तस्यदर्शनमात्रेणपुनाति
सकलंजगत् २५ मलिम्लुचेकृतंयैस्तुपक्षंतस्यामौनभोजनम् स्वर्गमोक्षफलावाप्तिस्तस्यसिद्धिर्नसंशयः २६ उपवासे
नयत्पुण्यंजायतेशतवत्सरान् तत्पुण्यंलभतेदेविमौनेनैकेनमानवैः २७ अत्रापिकथयिष्येहमितिहासंपुरातनम् यच्छ्रु
त्वासर्वपापेभ्योमुच्यतेनात्रसंशयः २८ पुराद्यवंतीविषयेब्राह्मणःसंशितव्रतः वेदशर्मेतिनाम्नावैख्यातःसूर्यइवापरः
२९ स्वाध्यायनिरतःशांतस्तपसादग्धकिल्बिषः निरीहोनिरहंकारोनिर्ममोविजितेंद्रियः ३० तस्येत्थंवर्तमानस्यस्वधर्म
निरतस्यच मलमासःसमायातःकदाचित्कालपर्यये ३१ मनसाचिंतयामाससद्विजःकिंकरोम्यहं शरीरेनास्तिसामर्थ्य
मुपवासस्यमेधुना ३२ कृत्वायदुपवासस्यसम्यक्फलमवाप्नुयात् इतिचिंतयतस्तस्यनिद्रयापहृतस्यच ३३ स्वप्नमध्ये
समागत्यकथितंमौनभोजनम् त्यक्त्वानिद्रांसमुत्थायआनंदाश्रुकुलेक्षणः ३४

२८ २९ ३० ३१ ३२ ३३ ३४

३५ ३६ ३७ ३८ ३९ ४० ४१ ४२ ४३ ४४ ४५

समौनमशनंचक्रे यावन्मासः समाप्यते मासांतेदर्शदिवसे प्रातश्चोद्यापनंकृतम् ३५ तस्यानुग्रहकामार्थमागतः पुरुषो
त्तमः वरेणछंदयामाससवव्रेवरमुत्तमम् ३६ भुविभक्तिंपरांचैव प्रेम्णाभक्तजनस्यच तज्जन्मानिपरंसौख्यंचक्रवर्तित्व·
दुर्लभम् ३७ नानाविभवभोगांश्चमहादानविधायिनाम् द्विजानांनित्यसेवाच मनोवाक्कायकर्मभिः ३८ दीनेष्वनुग्रहंचैव
परदुःखनियंत्रिता आरोग्यताशरीरस्यस्वजनस्यावियोगता ३९ धनंधान्यंगृहेक्षेत्रेशरीरारोग्यतातथा स्वदेहेनतुवैकुंठ
दर्शनंसुरदुर्लभम् ४० एवंनानाविधान्भोगान्वरामत्तोहिचार्थिताः दत्तामयासुमनसाव्रतेनपरितोषिणा ४१ अंतर्धानम
तश्चक्रेतंद्विजपरितोष्यवै मय्यतर्धानमापन्नेनेनभुक्तंसुखंबहु ४२ इष्टंबहुविधैर्यज्ञैःपूर्तंबहुविधंकृतम् नानादानानि·
दत्तानिसुहृदःसुखिनःकृताः ४३ तदिच्छयातुकालेनविमानंप्रेषितंमया नानाभोगैःसमाकीर्णंकाम्यमानंसुरैरपि ४४
उपविश्यविमानेवैवैकुंठंप्रतिनिर्ययौ आगच्छतस्तस्याद्रिपूजांचक्रुर्दिवौकसः ४५ इंद्रस्तमाहसंपूज्य देहिमेकिंचिदीप्सि
तम् मौनव्रतदिनैकस्यफलंकृत्वाकृपांमयि ४६ तेनदत्तंफलंतस्मैदिनैकस्यदयालुना तत्प्रभावात्सुरेंद्रेण दुष्टोवृत्रोनि·
षूदितः ४७ सविप्रोद्यापिवैकुंठेवसतेबहुसौख्यभाक् एवंध्यात्वाधिकेमौनव्रतीकिंलभतेनवै ४८ इतिश्रीसन
पुराणसारोद्धारेश्रीपुरुषोत्तममासमाहात्म्येमौनव्रतनिरूपणंनामाष्टादशोऽध्यायः १८ छ श्रीलक्ष्मीरुवाच
श्रीकृष्णत्वद्दयानंददेवदेवदयानिधे पुनःकथयतस्मिन्वैचीर्णेत्वेकांतरेव्रते १ किंफलंजायतेकेनचीर्णंप्रामाचकादशा
श्रीविष्णुरुवाच शृणुधर्मप्रियेदेवि मलिम्लुचकृतेनयत् २ छ छ छ

४६ ४७ ४८ इतिपुरुषोत्तममाहात्म्यटीकायामष्टादशोऽध्यायः १८ छ एकांतरोपवासव्रतमाह १ २ छ

३ ४ ५ भृगुकच्छाख्यं लोके भरूच इति विख्यातं ६ ७ ८ ९ १० ११ १२ १३ १४

एकांतरोपवासेनफलंदैवतदुर्लभम् पुराऽमरगिरौदेशेविंध्यपर्वतसंभवा ३ वर्ततेनिम्नगादिव्यासिद्धचारणसेविता
शिवहस्तसमुद्भूतासाक्षाच्छिवइवापरा ४ स्मरणादपिसर्वेषांपापपंकजभेदिनी नर्मदानामविख्याताऋषिसंघनिषेवि-
ता ५ तस्यास्तीरेपरेरम्येनानातरुविभूषिते नगरंभृगुकच्छाख्यंसर्वदेवैःसमाश्रितम् ६ तत्रासीद्ब्राह्मणःकश्चिद्भृगुवं-
शसमुद्भवः ज्योतिर्वित्सत्यवादीचसदाचारपरायणः ७ नाम्नाकुशलशर्मासौभार्यातस्यकुशावती तस्यपालयतोधर्मंजा-
तापुत्रीयशस्विनी ८ नाम्नामेधावतीसाध्वीरूपिणीश्रीरिवापरा कस्मैचिद्द्विजमुख्यायदत्तासाप्राप्तयौवना ९ केनचित्का-
लयोगेनदैवयोगेनसासती वैधव्यमगमत्स्त्रीणांदुःखदंमरणादपि १० तयाविचारितंपश्चादाचरामितथाव्रतम् नयेनजा-
यतेदुःखंसंसारभ्रमणोद्भवम् ११ इतिनिश्चित्यमनसिपित्रोक्तंव्रतमुत्तमम् एकांतरोपवासाख्यंसर्वदुःखनिवारणम्
१२ तयातस्मिन्समायातेऽधिकेमासितपोधिकम् प्रातःस्नात्वानर्मदायांप्रारब्धंव्रतमुत्तमम् १३ त्वयायुतमासंपूज्य
ब्राह्मणानधिपूज्यच भूशायिन्यासुवचसाहविर्भोजनशीलया १४ करुणापरयाजंतोर्नित्यंब्राह्मणसेवया सुवर्णदा-
नपरयोपानदानवदान्यया १५ उद्यापनविधिंसर्वंसदाकुर्वाणयाभृशम् तस्याएवंप्रकुर्वंत्याबहवोधिगताःसमाः १६ मा-
सामलिम्लुचाश्चैवसदाश्रद्धासमायुताः कस्यचित्त्वथकालस्यपर्यायेसाकृशासती १७ जहौप्राणान्जलेष्वेवसदाशंकरकिं-
करैः नीताशंभुपुरंदिव्यंदेव्याश्चात्यंतवल्लभा १८ तत्रभोगान्बहून्भुक्त्वाकालेनगिरिजातनौ लीनालोकसुखार्थायपुनर्वा-
राणशीपुरी १९ जातादेवीविशालाक्षीदर्शनात्स्मरणादपि नंदनात्पूजनाद्वापिसर्वकामप्रदायिनी २०

१५ १६ १७ १८ पुनःयावाराणशीपुरीतस्यांविशालाक्षीनाम्नाजाताइत्युत्तरेणान्वयः १९ २०

२१ अथनक्तव्रतमाह नक्तव्रतस्येति २२ २३ २४ २५ २६ २७ २८ २९ ३० विराटदेशस्यव
र्णनं तस्मिन्देशेमहाद्रेस्तुसह्याख्यस्यसमीपतः महापुराख्यंनगरंवर्ततेदेवदुर्लभम् यत्रदेवीरेणुकाख्यारामस्यजननीशुभा यत्रश्रीगौतमीगं

आरोग्यदायिनीचापिमोक्षदादेवतामयी एवंप्रभावंमन्मासंपुण्यकंपुण्यसेवितम् २१ नक्तव्रतस्याचरणात्फलमेतत्प्रकी
र्तितम् नक्तव्रतेनापितत्रतस्सखीसापिकोमला २२ गताकैलासमचलंमलमासप्रभावतः सापिकाश्यांसमुद्भूतागौरी-
मंगलपूर्विका २३ लोकानांमंगलंदत्ते दत्तेमोक्षंसुमंगलम् गौरीशंकरसंयोगात्गौरीशंकररूपतः २४ एवंज्ञात्वानरैर्देवि
नारीभिर्वापिबालकैः वृद्धैश्चयुवभिःकार्यंमलिनेस्नानमुत्तमम् २५ मन्मासप्रभवंपुण्यंवक्तुंशक्यंनवेधसा चतुर्भिर्व
दनैर्देविपंचभिर्वाशिवेनच २६ नमयाशेषसंज्ञेनसहस्रैर्वदनैरपि किंबहूक्तेनदेवेशिमलमासोर्तिनाशनः २७ श्रीलक्ष्मी
रुवाच भगवन्भजनासक्तमानसममसांप्रतम् मलिम्लुचेमहामासेनितरांतववल्लभे २८ वदब्राह्मणसेवायाःफलंकिंस्या
द्दयानिधे तत्सेवयाकस्यपुनःसंजातंसम्यगीहितम् २९ श्रीविष्णुरुवाच शृणुसुंदरिवक्ष्यामि द्विजसेवामहोदयम्
इतिहासमहापुण्यंदुःखदारिद्र्यनाशनम् ३० अस्तिदेशोविराटाख्योमहाधनजनावृतः तत्रासीत्पादजोवर्णोमहाशूद्रइती
रितः ३१ नाम्नातुधनपालाख्यःस्वधर्मपरिपालकः सर्वभावेनविप्राणांसेवांसकुरुतेसदा ३२ दासेषुविद्यमानेषुस्वस्यगर्वंवि
हायच पादप्रक्षालनंचक्रेद्विजांगणनिषेचनं ३३ मार्जयित्वापिसंस्कारंचित्रस्वस्तिकभूषणं वस्त्रप्रक्षालनंकर्मविक्रयंक्र
यमेवच ३४ पादसंवाहनंचैवस्नानंचाभ्यंगपूर्वकं विप्रस्त्रीणांचयःसेवांस्वस्त्रीद्वाराचकारह ३५ धनेनापिस्वकीयेन
विप्रकार्याणिसर्वदा चकारकपटंत्यक्त्वापूर्वपुण्यप्रभावतः ३६

गावहापोष्यानदींगता यत्रदेवाश्चऋषयोयत्र-
साक्षान्महेश्वरइत्यादि ३१ धनपालाख्यस्यस्थले धनदासेतिवापाठः ३२ ३३ ३४ ३५ ३६

३७ ३८ ३९ ४० ४१ ४२ एवमुक्तलक्षणानांद्विजानांइति तत्रद्विजलक्षणमाह पाद्मे लक्ष्मीरुवाच कीदृशोब्राह्मणःप्रोक्तःकथंपू
ज्योमलिम्लुचे किंफलंलभतेमर्त्यःपूजनाच्चद्विजन्मनः विष्णुरुवाच देवोमुनिर्द्विजोराजावैश्यःशूद्रोविडालकः पशुर्म्लेच्छोथचांडालोविप्रोदशविधःस्मृतः
भिक्षाश्यध्यापकश्चैवसंतुष्टोविजितेंद्रियः वेदशास्त्रार्थतत्वज्ञोविप्रोदेवःप्रकीर्तितः अकृष्टफलमूलाशीवनवासरतःसदा कुरुतेहरहःकर्मसविप्रऋषिरुच्यते
तपःसत्यमहिंसाच्चषट्कर्माणिदिनेदिने नभवेत्काललोपश्चसवैब्राह्मणउच्यते अश्ववाहनतत्वज्ञःसंग्रामेनचभीःक्वचित् आरंभेनीतिमान्शूरःक्षत्रियोसौप्र-
कीर्तितः लोहकर्मणिनिष्णातःपशूनांप्रतिपालकः कृषिवाणिज्यकर्ताचसविप्रोवैश्यउच्यते स्नेहलाक्षातिलानीलीक्षारंक्षीरंघृतंमधु मद्यादिविक्रयीवि

मलमासेविशेषेणस्नानदानदयापरः सजातोदैवयोगेनकुष्ठीकुत्सितदेहवान् ३७ तस्यपत्नीचखंजाक्षीनाम्नामानवती
शुभा धनदासस्यशूद्रस्यचिंतामनसिजायते ३८ एवंचिंतयतस्तस्यकदाचित्कालपर्यये सिद्धेनागत्यकथितंश्वस्तेमृत्यु
र्भविष्यति ३९ सदारस्यद्विजानांतुप्रसादात्त्वंसभार्यया स्वर्गंगमिष्यसिक्षिप्रंविमानवरमास्थितः ४० इतिश्रुत्वावचस्त
स्यधनंतेनत्रिधाकृतम् दत्तःपुत्रायएकोंशःपुत्रीभ्याम्परोर्पितः ४१ तृतीयोद्विजसात्कृत्वातीर्थेगत्वार्पितस्तया धन
कोटिंविसृज्यैवंकृतकृत्यस्ततोभवत् ४२ एवंद्विजानांशुश्रूषाइहलोकेपरत्रच सर्वकामप्रदामोक्षसाधिकाशूद्रजेष्व
पि ४३

प्रःसशूद्रःपरिकीर्तितः स्तेयप्रियोऽदयोलुब्धोदांभिकोलोकवंचकः हिंस्रकर्माभिकामश्चविप्रोमार्जारउच्यते भक्ष्याभक्ष्यसमो
यस्तुसमोदारान्ययोरपि कृत्याकृत्यंनजानातिकृतघ्नोब्राह्मणःस्मृतः वापीकूपतडागानांक्षेत्राणांचविनाशकः स्नानसंध्याविहीनश्चसविप्रोम्लेच्छ
उच्यते क्रूरोलुब्धःप्रमादीचपरद्रव्यापहारकः निर्दयःसर्वभूतेषुविप्रश्चांडालउच्यते इतिहासपुराणज्ञंशांतंदांतमलोलुपं तद्भक्तिंकुर्वतांनृणांगंगास्ना
नंदिनेदिने पुराणधर्मकथनैर्यःसमुद्धरतेनरं संसारसागरेमग्नं हरिरेवनसंशयः एवंविधंद्विजवरंमलमासेतुयोर्चयेत् चंदनाक्षतपुष्पैश्चधूपदी
पोपहारकैः नैवेद्यैर्विविधैर्भक्ष्यैस्तांबूलादिविलेपनैः पूजयेत्प्रत्यहंविप्रंसर्वशास्त्रार्थपारगंइत्यादि ४३ ७९ ७९

५४ इतिपुरुषोत्तममाहात्म्यटीकायामेकोनविंशोऽध्यायः १९ ॥ गोमाहात्म्यप्रसंगमाह १ २ ३ ४ ५ ६ ७

एवंकुर्वंतिसद्भक्तिंमलमासेतुयेनराः नारीवामुच्यतेपापात्नगर्भंप्रविशंतिते ५४ इतिश्रीपद्मपुराणसारोद्धारेश्रीपुरुषोत्तममाहात्म्येएकांतरोपवासव्रतनक्तव्रतद्विजसेवामाहात्म्यवर्णनंनामैकोनविंशोऽध्यायः १९ ॥ श्रीलक्ष्मीरुवाच भगवन्योगिनांश्रेष्ठसर्वधर्माःश्रुतामया अधुनाश्रोतुमिच्छामिगवांपूजनमुत्तमम् १ कथमेषापवित्रागौःकथंपूज्याचकिंफलम् तत्सर्वंब्रूहिमेदेवमलमासफलाप्तये २ श्रीविष्णुरुवाच शृणुदेविप्रवक्ष्यामिप्रथमंपूजनंगवां गवामंगेषुतिष्ठंतिभुवनानिचतुर्दश ३ गावःपवित्रमतुलंगावोमंगलमुच्यते गावोभूमिश्चभूतानिस्थावराणिचराणिच ४ नीराजयतियोगानिगवांपुच्छेनभाग्यवान् अलक्ष्मीःकलहोरोगस्तदंगाद्यातिदूरतः ५ गोमयंयमुनासाक्षात्गोमूत्रंनर्मदाशुभा क्षीरंगंगासमंयासांकिंपवित्रमतःपरम् ६ गोभिर्विप्रैश्चदेवैश्चसतीभिःसत्यवादिभिः अलुब्धैर्दानशीलैश्चसप्तभिर्धार्यतेमही ७ वेदाःशास्त्राणिधर्माश्चपुराणानीतिहासकम् आब्रह्मस्तंबपर्यंतंगोषुतिष्ठंतिनित्यशः ८ नान्यत्पश्यामिलोकेस्मिन्पावनंहिमलिम्लुचे विप्रागावश्चदानंचपरोपकरणंतथा ९ गावःपवित्राःश्रेष्ठाश्चपावनाजगदुत्तमाः दधिदुग्धघृतैर्यासामिहयज्ञःप्रवर्तते १० तेनयज्ञमशेषांहिगोमूलंसंप्रचक्षते गावोधिकास्तपस्विभ्यःसदासर्वेभ्यएवच ११ गोभिस्तुल्यंनपश्यामिधनंकिंचिदिहोच्यते कीर्तनंश्रवणंदानंदर्शनंचापिसुंदरि १२ स्पर्शनंपूजनंचैवमार्जनंचप्रदक्षिणम् गवांप्रपश्यतेदेविसर्वपापहरंपरम् १३ ब्राह्मणाश्चैवगावश्चकुलमेकंद्विधाकृतम् एकत्रमंत्रास्तिष्ठंतिहविरेकत्रतिष्ठति १४ गावोलक्ष्म्याःसदामूलंगोषुमंत्रोनविद्यते स्वाहास्वधावषट्कारा गोषुनित्यंप्रतिष्ठिताः १५ अग्न्यागाराणिविप्राणांदेवतायतनानिच पूज्यंतेशकृतायासांकिंपवित्रमतःपर १६

८ ९ १० ११ १२ १३ १४ १५ १६

१७ १८ १९ २० २१ २२ २३ २४ २५ २६ दानयोग्यगवां लक्षण सुशीलामिति २७

गावोयज्ञस्यनेत्रेवैगावोयज्ञस्यवैमुखम् अमृतंत्वक्षयंदिव्यंक्षीरंगावोवहंतिच १७ अमृतंचैवगोक्षीरमित्युवाचप्र
जापतिः अमृतायननंचैताः सर्वलोकनमस्कृताः १८ योगंतुवांछतिस्वर्गंगोपूजांसकरोतिवै अधिमासेविशेषेणसु
भक्त्यायवसादिना १९ प्रदक्षिणीकृतागावोयेनमासेमलिम्लुचे प्रदक्षिणीकृतातेनसशैलासवनावनिः २० आदित्य
दुहितागौर्हिपृथ्वीयंपरिकीर्तिता श्रेयोर्थेसर्वलोकानामुत्पन्नाक्रतुसिद्धये २१ गोभ्योयज्ञाःप्रवर्त्तंतेगोभ्योयज्ञाःसमु-
त्थिताः गोभ्योवेदाःसमुत्तीर्णाःसषडंगपदक्रमाः २२ तृणानिखादंतिवसंत्यरण्येपिबंतितोयान्यपरिग्रहाणि दुह्यंति
वाह्यंतिपुनंतिविश्वंगवांरसैर्जीवतिजीवलोकः २३ स्पृष्टाश्चगावःशमयंतिपापंदत्ताश्चगावस्त्रिदिवंनयंति संरक्षिताश्चो
पनयंतिवित्तंगोभिर्नतुल्यंधनमस्तिकिंचित् २४ सायंचास्नातिददातिलक्ष्मींपापापहामित्रविवर्धनाच सएवनित्यं·
परिभुज्यतेचगोभिर्नराणामिहसिद्धतंत्रः २५ तृणानिशुष्काणिवनेचरित्वापीत्वासुतोयान्यमृतंस्रवंति यद्गोमयाद्याश्चपु-
नंतिलोकान्गोभिर्नतुल्यंभुवनेषुदेवि २६ सुशीलांलक्षणवतींयुवतींवत्ससंयुताम् बहुदुग्धवतींस्निग्धांधेनुंदद्याद्विचक्ष
णः २७ एकवर्णांबहुवर्णांवासवत्सांचपयस्विनीम् पुष्टांगींप्रेमशीलांचप्रदद्याद्ब्राह्मणायगाम् २८ कृशांचमृतवत्सांच-
वंध्यांरोगजरान्विताम् हीनांगामधिकांगांचनदद्याद्ब्राह्मणायगाम् २९ एकशृंगींचलच्छृंगांस्फुटिताक्षींगलत्खुराम् त्रिस्त
नींपुष्पितांदुष्टांनदद्याद्ब्राह्मणायगाम् ३० अल्पस्तनींविदुग्धांचत्यतिश्रांतांतथैवच बह्वाहारांस्वल्पदुग्धांशृंगोत्क्षेप-
णतत्पराम् ३१ अमेध्यभक्षणांधेनुंनदद्याद्ब्राह्मणायगाम् शृंगहीनांतथावस्त्रालंकारादिविवर्जिताम् ३२

२८ दानायोग्यगामाह कृशामित्यादिना २९ पुष्पितांगर्भवतीम् ३० ३१ ३२

मासस्त ४
पुरु.मा.१३
अ.२०

३३ ३४ गोदानेअनेकविधनिर्णयमाह गोरिति ३५ ३६ ३७ ३८ ३९ ४० ४१ ४२ ४३ ४४ ४५ ४६
गोप्रार्थनामाह यालक्ष्मीः सर्वभूतानांयाच देवे व्यवस्थिताः धेनुरूपेण सादेवीममपापंव्यपोहतु विष्णोर्वक्षसियालक्ष्मीःस्वाहाचैवविभावसौ

योदद्यान्नोपयुक्तार्थांजीर्णांधेनुंचनिष्फलां तमसंप्रविशेद्दाताद्विजंक्लेशेनयोजयेत् ३३ होमार्थमग्निहोत्रस्ययोगांद
द्याद्गुणान्विताम् सरत्नपूर्णापृथिवीतेनदत्तानसंशयः ३४ गौरेकस्यैवदातव्याश्रोत्रियस्यविशेषतः साहितारयतेपूर्वा
न्सप्तसप्तत्रिसप्तच ३५ एकाह्येकस्यदातव्याबहूनांनकदाचन साविक्रीताविभक्ताचदहत्यासप्तमंकुलम् ३६ सा.
यैर्न्यायार्जितादत्ता कृत्स्नंसंतारयेत्कुलम् अन्यायेनार्जिताधेनुर्नस्यात्फलप्रदायिनी ३७ विधिवत्तुयदादत्तासत्पात्रेगोःसदक्षि
णा तदातारयतेजंतून्कुलानामयुतैःशतैः ३८ अपात्रेसातुगौर्दत्ता दातारंनरकंनयेत् कुलैकविंशतियुतंगृहीतारंतुपातये
त् ३९ गौर्ताधेनुर्हिरण्यंचपात्रेदत्तमनंतकम् तुलापुरुषदानंचपददानंतिलास्तथा ४० देशकालौविचार्याथपात्रंवित्तंस्वकं
तथा गोदानंचततोदेयंविप्रानाहूयचांतिके ४१ श्रीफलंचकरेधृत्वाकृत्वाधेनोःप्रदक्षिणां नमस्कृत्यचतद्धामपादेस्थाप्यंफ
लंहितत् ४२ देशकालौसमुच्चार्यगणेशंपूजयेत्ततः संकल्पंचततःकुर्याद्दातुदानंमहाजनः ४३ आदौसंपूजयेद्धेनुंप्रार्थये
च्चततःपरम् संपूज्यविधिवद्विप्रंततोदानंसदक्षिणम् ४४ मयाचब्रह्मणापूर्वंशिवेनचमहर्षिभिः विचार्यगोगुणान्नित्यं
प्रार्थनेयंकृतापरा ४५ पुनःश्रीफलमादायकरेधृत्वासदक्षिणाम् सहपत्न्यासुपुत्रेणप्रार्थयेद्धेनुमुत्तमां ४६ यालक्ष्मीत्या
दिनागावै प्रार्थयित्वाततःपरम् स्वधायापितृमुख्यानांसाधेनुर्वरदास्तुमे गावोममाग्रतःसंतुगावोमेसंतुपृष्ठतः गावोमेहृदयेसं
तुगवांमध्येवसाम्यहम् पंचगावःसमुत्पन्नामथ्यमानेमहोदधौ तासांमध्येतुयानंदातस्यैधेन्वैनमोनमः याधेनुः .१ ५२
तमस्यच सात्तुकामप्रदादेवीममेहचपरत्रच याधेनु र्जमदग्नेश्चवसिष्ठस्यचयास्मृता विश्वामित्रस्ययाधेनुःसामेपापंव्यपोहतु २

र्थयित्वानुततःपूजांसमारभेदिति गोपूजामंत्रानाह आगच्छवरदेदेविगोलोकात्पापनाशिनि तवास्यांसंततोभानःसान्निध्यंक्रियतांस्वयं इत्यावाहनं प्रसन्ननेत्रांचितसर्वगात्रांपात्रींपयोब्धेश्चसवत्सयुक्तां सुवर्णरूपांचितपादशृंगींतांकामधेनुंमनसास्मरामि इतिध्यानं यदनंतशिरोरत्नभूतंभूमंडलंहिगौः त्वदासनंतदेवाहंरचयामिसदानघे इत्यासनं पाद्यंगृहाणदेवेशिसर्वदेवनमस्कृते त्वदंघ्रिस्पर्शनेनेदंजलंगांगंभवेदिति इतिपाद्यं इदमर्घ्यंमयादेवि गंधपुष्पादिमिश्रितं स्वीकृत्येदंकामदुघेपूरयास्मान्मनोरथान् इत्यर्घ्यं गंगाजलेनशुद्धेनकुरुपानंमहेश्वरि तृषार्तानांपितॄणांमेतृषादोषंनिवारय इत्याचमनं एवंगंधाक्षतपुष्पाणिसमर्प्य अंगपूजांकुर्यात् शृंगमूलेगवांनित्यंब्रह्मविष्णूसमाश्रितौ शृंगाग्रेसर्वतीर्थानिस्थावराणिचराणिच शिरोमध्येमहादेवःस्थितस्तंपूजयेन्मुदा ललाटाग्रेस्थितादेवीनासावंशेतुषण्मुखः कंबलाश्वतरौनागौ नासापुटसमाश्रितौ कर्णयोरश्विनौदेवौचक्षुषोःशशिभास्करौ दंतेषुवायवःसर्वेजिह्वायांवरुणास्थि

विष्णुवत्पूजयेद्धेनुंब्राह्मणंचतथैवहि ४७

तः सरस्वतीचहुंकारेयमयक्षौचगंडयोः मासपक्षौचगंडयोरितिवापाठः संध्येद्वेओष्ठयोश्चैवग्रीवायामिंद्रसंस्थितः रक्षांसिकुक्षिदेशेषु साध्याश्चोरसिसंस्थिताः चतुष्पात्सकलोधर्मःस्वयंजंघासुसंस्थिताः खुरमध्येतुगंधर्वाःखुराग्रेषुचपन्नगाः खुराणांपश्चिमेभागेगणाश्चाप्सरसांस्थिताः रुद्राश्चैकादशेपृष्ठेवसवःसर्वसंधिषु श्रोणीतटस्थापितरःसोमोलांगूलमाश्रितः आदित्यरश्मयोबालेपिंडीभूयव्यवस्थिताः हुताशनःस्वयंसर्पिः ब्राह्मपागुल्फसंस्थिताः त्रयस्त्रिंशच्चदेवानांकोट्योरोमसुसंस्थिताः हृदयेपृथिवीज्ञेयासशैलवनकानना चत्वारःसागराःपूर्णा येगवांस्युःपयोधराः ब्रह्मांडमुदरंज्ञेयंगवांनैवात्रसंशयः साक्षाद्गंगाचगोमूत्रेगोमयेयमुनास्थिता क्षीरेसरस्वतीप्रोक्तानर्मदादधिसंस्थिता रोमकूपेषुतीर्थानिसर्वाणीत्युपधार्यच एभिर्मंत्रैश्चविधिवदंगानिपूजयेत्क्रमात् इत्यंगपूजा वनस्पतिरसोद्भूतो गंधाढ्योगंधउत्तमः आघ्रेयःसर्वदेवानांधूपोयंप्रतिगृह्यतां इतिधूपम् दीपंभक्त्याप्रयच्छामिकामधेन्वैघृतोद्भवं त्राहिमांनिरयाद्घोराद्दी

पज्योतिर्नमोस्तुते इतिदीपं नैवेद्यंगृह्यतांदेविभक्तिंमेह्यचलांकुरु ईप्सितंमेवरंदेहि परत्रेहपरांगतिं इतिनैवेद्यं पूगीफलंमहद्दिव्यंनागवल्लीदलैर्युतम् क्रमुकेनसमायुक्तंतांबूलंप्रतिगृह्यतां इतितांबूलं हिरण्यगर्भगर्भस्थंहेमबीजंविभावसोः अनंतपुण्यफलदमतःशांतिंप्रयच्छमे इतिदक्षिणाम् नीराजनंप्रयच्छामितुभ्यंदेव्यैपरात्मने पंचवर्तिसमोपेतंत्रैलोक्यतिमिरापहम् इतिनीराजनं मंत्रपुष्पांजलिमिमं तुभ्यंदेव्यैसनातने प्रयच्छविपुला

अथांगपूजाकर्तव्याधेनोर्भक्तिमतारमे पृथगंगेषुदेवानांस्थानानिक्रमतोर्चयेत् ४८ येषांपूजनमात्रेणसद्योमुच्येतपातकात् ततोनिर्मलतोयेनधेनुपुच्छेहितर्पणम् ४९ कर्तव्यंविधिनादेवितुष्टाश्युर्येनपूर्वजाः तर्पणानंतरंविप्रंसंपूज्यविधिवत्तथा ५० नामगोत्रंसमुच्चार्यततोगोदानमाचरेत् इमांतुभ्यंप्रदास्यामिधेनुंत्रैलोक्यमातरम् ५१ स्वर्णशृंगींरौप्यखुरांताम्रपृष्ठोपशोभितां कांस्योपदोहनांकंठघंटाभरणभूषितां ५२ रक्तवस्त्रेणसंवीतांमालेकनकमंडिताम् रक्तनेत्रींसवत्सांचसर्वावयवसुंदराम् ५३ गृहाणपरयाप्रीत्याप्रीयतामनयाहरिः इत्युक्त्वादक्षिणेपाणौसजलंपुच्छमर्पयेत् ५४ स्वकर्णेनिक्षिपेत्पश्चात्गृहीत्वातुलसीदलं ताम्रपात्रेघृतंकृत्वामध्येपुच्छंनिधायच ५५ सकुशंसतिलंवारिगृहीत्वादानमाचरेत् अनेनैवतुमंत्रेणपात्रहस्तेजलंक्षिपेत् ५६ पात्रंवामनसिध्यात्वातोयमप्सुविनिक्षिपेत् उद्दिश्यवासुदेवंचप्रीयतामितिचाब्रवीत् ५७ अथदानमंत्रः यज्ञसाधनभूतायाविश्वस्याघौघनाशिनी विश्वरूपधरोदेवःप्रीयतामनयागवा ५८

न्भोगानंतेमुक्तिंददस्वमे इतिमंत्रपुष्पं नमोधेन्वैमहामायेयज्ञसंततिकारके हविर्धानिदेववत्सेत्वामहंशरणंगतः इतिप्रार्थना नमस्तेसर्वपापघ्ने नमस्तेमुक्तिदायिनि नमस्तेसर्वकल्याणि नमस्तेदेववल्लभे त्वद्दानात्पातकंनष्टंइमोक्षैकसाधनं महाधनंप्रयच्छाशुयेनसौख्यंलभाम्यहं इतिक्षमाप्येतिपूजाक्रमः ४७ देवानांस्थानानितिपूर्वश्लोकव्याख्यायामुक्तानि ४८ तर्पणंगोत्रोच्चारपूर्वकंपित्रादिनित्यतर्पणक्रमेणदेवर्षिपितृतर्पणमित्यर्थः ४९ ५० ५१ ५२ ५३ ५४ ५५ ५६ ५७ ५८

५९ ६० ६१ ६२ ६३ ६४ इतिपुरुषोत्तममाहात्म्यटीकायांविंशोऽध्यायः २० ७ अथगोमाहात्म्यप्रसंगेनविश्वामित्रवसि

दक्षिणांचततोदद्याद्द्विगुणांधेनुमूल्यतः वित्तशाठ्यंनकुर्वीतस्वर्णंवाशक्तिमात्रकम् ५९ अनुव्रज्यततोधेनुंब्राह्मणेनसमन्वितः
तृणंदद्यान्मासमात्रंविप्रायान्नंचतद्दिने ६० अनेनविधिनाधेनुंयोविप्रायप्रयच्छति सर्वकामसमृद्धात्माविष्णुलोकेमहीयते ६१
सर्वेषामपिपापानांज्ञातानामविजानतां प्रायश्चित्तमिदंप्रोक्तमृषिभिस्तत्वदर्शिभिः ६२ गावःस्वर्गस्यसोपानंगावोधन्याःस
नातनाः गावःसुरभयोनित्यंगावोगुग्गुलसन्निभाः ६३ गावःप्रतिष्ठाभूतानांगावःस्वस्त्ययंमहत् लोकाःकामदुघाःमाता
गोदानादनघेश्चिरं ६४ इतिश्रीसप्तपुराणसारोद्धारेश्रीपुरु०माहात्म्येगोपूजनगोदानमाहात्म्यकथनंनामविंशोऽध्यायः
२० ७ सूतउवाच वसिष्ठस्ययदैश्वर्यंकामधेनोःप्रसादतः दृष्ट्वाऽतिलज्जितोजातोविश्वामित्रःप्रतापवान् १ त
स्याश्चैवापमानेनपराजयमवाप्तवान् ततस्तस्यानुग्रहेणमलमासव्रतेनच २ त्रिशंकुमनयत्स्वर्गंब्रह्मर्षित्वमवाप्तवान्
ऋषयऊचुः विश्वामित्रोनृपःपूर्वंब्रह्मर्षित्वमवापह ३ तत्सर्वंविस्तरेणैवब्रूहित्वंसूतनंदन सूतउवाच शृण्वंतुऋ
षयःसर्वेकथांपापप्रणाशिनीम् ४ नारदेनपुराप्रोक्तास्कंदायपरिपृच्छते पुरासत्ययुगेविप्रानारदोदिव्यदर्शनः ५ पर्यट
न्वसुधामेकोकैलासमुपजग्मिवान् स्कंदोमासहितंदेवंननामभक्तितत्परः ६ तत्रचायमभूत्प्रश्नोयन्मांपृच्छथसत्तमाः
नारदउवाच शृणुस्कंदप्रवक्ष्यामिकथामेतांमनोरमाम् ७ यथासीत्कौशिकोविप्रोविश्वामित्रोमहीपतिः पुरात्रेतायुग
स्यादौगाधिर्नाममहीपतिः ८ तस्यपुत्रोमहातेजाविश्वामित्रोजितेश्वरः कर्णकुब्जपुरेरम्येकौशिकानांमहत्तरः ९

ष्ठवादप्ररत्यादिकथाप्रसंगमाह यत्ऐश्वर्यंआसीत् तदैश्वर्यमितिशेषः १ तस्याःकामधेन्वाः तस्याःकामधेनुरूपायाःश्रीगायत्र्याः २
३ ४ ५ ६ ७ ८ जितेश्वरःजीताःईश्वराःअखिलभूमंडलराजानोयेन ९ ७ ७ ७

१० अनेकपशून् व्याघ्रवराह मृगशशशल्लक शलभ महिषरूरुव प्लवंगमातंगचमरिसिंहादीन् ११ बहुशोभासमन्वितम् शालतालतमालाम्रक
दंबरखर्जूरपनसबकुलामलकादिवृक्षैः फलपुष्पवृक्षैश्चशोभितं १२ कुशलप्रश्नमाह स्कांदे नचास्तिकुशलंराजन् अष्टांगेषुमहीपते अमात्यान्सुवि
नीतांस्त्वंरक्षस्यात्मसमन्वितान् चारैःपश्यतिलोकांस्त्वंचारैर्वैस्त्रिशुभाशुभम् तस्करेभ्यःखलेभ्यस्त्वंसदारक्षसिवैप्रजाम् षडांशंगृह्यसेलोकादंड्यादंडे.
नवैत्रसन् बालान्वृद्धांस्त्रियोविप्रान्विभज्यांस्तेभुनक्तिहि मातरंपितरंवृद्धंनत्वाकार्यंकरोषिकिमिति १३ १४ १५ १६ राजवचनमाह स्कां

धनुर्वेदस्यतत्वज्ञोवेदवेदांगपारगः एकस्मिन्दिवसेराजामृगलिप्सुर्महातपाः १० सेनयासहितःशूरोमहारण्यंविवेशह तत्रा
ऽनेकपशून्हत्वामध्यान्हसमयेतदा ११ वसिष्ठस्याश्रमंप्राप्तोबहुशोभासमन्वितम् दृष्ट्वानत्वामुनिःश्रेष्ठंनिषसादतदाज्ञया१२
कृत्वाकुशलसंप्रश्नंगंतुकामंनृपोत्तमम् तदावसिष्ठोमेधाविराजानंवाक्यमब्रवीत् १३ आतिथ्यसमयेप्राप्तमातिथ्यायवृ-
णोम्यहम् भुक्त्वापीत्वाक्षणंस्थित्वापश्चाद्व्रजमहीपते १४ अतिथिंगृहमापन्नंयोनपूजयतेनरः पुष्पैःपत्रैःफलैरन्नैस्तस्य-
जन्मनिरर्थकम् १५ तस्माद्भुक्त्वानृपश्रेष्ठगम्यतांयदिरोचते प्रार्थयामिमहीपालप्रार्थनानविहन्यताम् १६ एतन्मुनिवचःश्रु-
त्वाराजावचनमब्रवीत् ससैन्यस्यसामात्यस्यत्वय्यातिथ्येनास्तिशक्तिते १७ श्रुत्वानरपतेर्वाक्यंमहद्गर्वेणसंयुतम् मुनि
र्विहस्यमनसापुनःप्रोचेनराधिपम् १८ निमंत्रयेत्वांराजेंद्रससैन्यंसपरिग्रहम् दिनानिदशकंकिंचिन्नीवारान्भुज्यतामि
ति १९ राजन्सेनांसमादायशीघ्रमागम्यतामिति यावच्चतुर्विधंभोज्यंशीघ्रंसंपादयामहे २० कौशिकोबाढमित्युक्त्वा
शीघ्रमेवागतोवनं मुनेःपरिक्षामादातुंतपसोहितपोनिधेः २१

दे अक्षोहिणीनांदशकंसैन्यंमत्सार्द्धमागतं मयाविरहितास्थातुंक्षणमेकंन
शक्यते पुत्रपौत्रांस्तथामात्यान्सेवकान्सुहृदांस्तथा त्यक्त्वायश्चात्मभोजीस्यात्सयातिनरकंध्रुवं तस्मादेकाकिनाविद्वान्मयाभोक्तुंनशक्यते नीवारभो
जिनोयूयंफलमूलाशनाद्विजाः तेषांनृपतयोगेहेभवंत्यतिथयःकथं देयाज्ञांतेनविप्रेंद्रससैन्यस्यनशक्तितेइति १७ १८ १९ २० २१

२२ २३ २४ पुरवर्णनंस्कांदे यस्मिन्नेवहिदृश्यंते भोगाःसर्वेमनोरमाः गेहेगेहेसुरम्याणिवनान्युपवनानिच वाप्योवैडूर्यसोपानाःपद्मोत्पलसुगंधिनीः शय्यासनानिहेमानिमृदूत्तरच्छदानिच गेहेगेहेसमानानिराजतुल्यानिसर्वशः मुक्तादामविलंबीनिवितनानिसहस्रशः तुल्यावतीवरम्याणिसंगीतध्वनितानिच सर्वेऋतुगणायत्रराजंतेवेश्मवेश्मनि स्ववेश्याचारुसर्वांग्योरूपेणातिमनोहराः मुखवासेनवैश्यासांसुरभिःक्रियतेगृहेपरिखापुष्करयुतारम्यायत्रैवराजते स्फाटिकंगोपुरंयत्ररम्यंवैडूर्यशोभितम् सभाचत्वरशोभाढ्यंजलयंत्रविराजितम् गेहेगेहेवनोद्यानं पारिजातोपशोभितं

गतेनृपतिशार्दूलेवसिष्ठोमनसास्मरन् विश्वकर्मातदागत्यकृतांजलिरभाषत २२ किंकार्यंकथ्यतांविप्र धन्योऽनुगृही
तोस्म्यहम् सर्वकार्यंकृतंविद्धियद्भवद्भिर्नियुज्यते २३ वसिष्ठश्चाब्रवीत्तूर्णंनगरंक्रियतामिति सार्वभौमस्यनृपतेर्योग्यसर्व
पुरोत्तमं २४ विश्वकर्माततश्चक्रेपुरंसुरपुरोपमम् उत्तमांतांपुरींदृष्ट्वादेवानामपिदुर्लभाम् २५ प्रेषयामासवैशिष्यंनृपस्या
नयनायवै ससैन्यंनृपमानीयवासयामासतत्पुरे २६ भक्ष्यैर्भोज्यैस्तथालेह्यैश्चोष्यैश्चविविधैर्नृपः भोजितोपरयाभक्त्या
भोजनैर्भुविदुर्लभैः २७ नंदिनीसौरभेयीयाभोज्यानिविविधानिच ददातिमुनिनाज्ञप्ताप्रत्यहंनूतनान्यल २८ दिनानिदश
कंसर्वेनृपोपचारपूजिताः मेनिरेस्वसुखंसर्वंनभूतनभविष्यति २९ एकादशेदिनेप्राप्तेविश्वामित्रोमहीपतिः पप्रच्छ
सेवकान्सर्वान्भोजनंक्वानुपच्यते ३० तेसेवकाःसमाकर्ण्यप्रोचुःप्रांजलयोनृपम् सूदाअपिनदृश्यंतेधूम्रोपीहनदृश्यते ३१ ए
कापर्णकुटीमध्येधेनुस्तिष्ठतिपिंगला साददातीहमनसाचिंतितंसफलोह्यमा ३२ नोदृष्टानश्रुताक्वापिधेनुःसर्वांगसुंदरी

नतादृक्कौशिकपुरीनकौबेरीनवारुणी नवाभोगवतीरम्यास्वस्थायातपसोबलात्इति २५ २६ २७ २८ नृपोपचारानाह राजार्हैर्भक्ष्यभोज्यैश्चययुस्तेपरमांमुदम् राजास्वपत्नियादृश्यांशय्यायांभोगसंयुतः नादृश्यामपरोलोकः सामात्यश्चोत्तमाधमाःइति २९ ३० ३१ ३२ चारवाक्यं मनसेप्सितानिभोज्यानि याददातिसुरोत्तम देवासुराणांयक्षाणांमनुष्याणांचरक्षसाम् गेहेदृष्टाश्रुताचापिधेनुःकामफलप्रदा सा

ददातीह तत्सर्वं गजाश्वानांच भोजनम् वस्त्राणि भूषणान्येव ददाति मनसेप्सितं तस्मात्सर्वप्रयत्नेन प्रेक्षणार्हा महीपते सएवजगतीनाथो धेनुर्यस्यास्ति मंदिरे अन्येसर्वेमहीपाला नाममात्रैकधारकाः नैतादृशोमुनिः क्वापिनदृष्टोनचसंश्रुतः तपसासफलाःसर्वेभवंत्येवमनोरमाः नैतादृक्कचनरो-

एकायस्यगृहेतिष्ठेत्सएवजगतीपतिः ३३ तेषांवाक्यंतदाकर्ण्यसन्नद्धोनृपतीश्वरः नंदिन्याग्रहणेचित्तंकृत्वायःक्षीणमंगलः ३४ मुनेःपार्श्वमुपागम्यराजावचनमब्रवीत् विश्वामित्रउवाच याचाविगर्हितारात्राभिनिवेदानुशासनं ३५ तथापिया चेविप्रेंद्रधेनुंकामफलप्रदाम् राज्ञोवचनमाकर्ण्यवसिष्ठोवाक्यमब्रवीत् ३६ होमधेनुंनवेदातुंक्षमोस्मिजगतीपते धेनुरेषा परेषांवैमुनीनांकर्मसाधिनी ३७ तस्माद्व्रजमहीपालयदिकल्याणमिच्छसि धेनुग्रहणलोभेनकार्तवीर्योमृतिंगतः ३८ प्रोवाचवचनंवेगात्प्रोत्फुल्लनयनोनृपः बलादहंगृहीष्यामितदात्वंकिंकरिष्यसि ३९ तस्माद्देहिद्विजश्रेष्ठनोचेन्नेष्याम्यहंबलात् राज्ञोवचनमाकर्ण्यकृत्वाहास्यंमुनीश्वरः ४० प्रोवाचनत्वयानेतुंशक्यंवज्रभृतास्वयम् बलान्नेतुयदाशक्या विलंबःक्रियते कथं ४१ मत्तोनैवभयंकिंचित्क्षमावंतोवयंयतः विश्वामित्रस्तदारुष्टोधेन्वाग्रहणमादिशत् ४२ बध्वातांवत्ससंयुक्तांनेतुंतेसेवकैर्यदा नीयमानातदाधेनुःकोपादरुणलोचना ४३ मुनेःपार्श्वमुपागम्यनंदिनीवाक्यमब्रवीत् कथंत्यक्षसिमांविद्वन्त्यक्तुंयोग्यास्मिनप्रभो ४४ दृष्ट्वाधेनुंसाश्रुनेत्रांमुनिर्वाक्यमथाब्रवीत् क्षमावंतोवयंमातःक्षमामांबाधतेध्रुवम् ४५ अयंहिबलवान्राजाबलात्त्वान्नयतिध्रुवम् विनात्वयावयंमातर्भविष्यामोऽतिदुःखिताः ४६ इत्युक्तासाश्रुनेत्रंतंस्थितंप्रोवाचनंदिनी विषादःक्रियतेकस्माज्जितक्रोधोभवान्स्फुटः ४७ आत्मानंमोचयिष्यामिभवत्सेवाकरीसदा भविष्यामिनसंदेहोसदात्वत्सार्थवर्तिनी ४८

लोकेधेनुर्नैतादृशीक्वचित् नैतादृश्यस्त्रियोस्म्यानेदृशाःपरिचारकाः इति ३३ ३४ ३५ ३६ ३७ ३८ ३९ ४० ४१
शेवकानितिशेषः ४२ तेसेवकाः नेतुमुद्युक्ताः अभवन्इतिशेषः ४३ ४४ ४५ ४६ ४७ ४८ [illegible] [illegible]

४९ ५० ५१ ५२ ५३ निर्जघ्नुरित्यत्रविशेषः एकैकस्मिन्दशदशधेनांर्योद्धामहाबलाः परिवव्रुः विशालाक्षाः छिंदिभिंदीतिवादिनः गजंगृह्य

ईदृशानांनृपेंद्राणांयदिलक्षंसमाव्रजेत् तथापिगृहीतुंशक्यानभवामिकदाचन ४९ विलोकयमुनिश्रेष्ठनिहनिष्यामितेरिपून्
इत्युक्तवतितांधेनुंजगृहूराजसेवकाः ५० गतागृहीतातैःसार्द्धयोजनार्द्धंविचक्षणा वसिष्ठस्याश्रमेमाभूद्रक्तधारात्वखंडिता
५१ विचार्यैवंगतादूरंयुक्ताराजन्यसेवकैः मार्गेगच्छतिसाधेनुःक्रोधसंरक्तलोचना ५२ ससर्जयोद्धान्रोमभ्यःशृंगेभ्योपि
सहस्रशः निःश्वसेभ्यःखुराग्रेभ्यः पुच्छाग्रेभ्यश्चवालधेः ५३ विनिसृतामहायोद्धाःप्रगृहीतशरासनाः निर्जघ्नुःक्रोधताम्राक्षा राजसैन्यंचतुर्विधम् ५४ हत्वाराज्ञोदशाक्षोणिमितसैन्यंमहाबला समागत्याग्रतस्तस्थौमुनेस्तस्यमहात्मनः ५५ निहत्यवीरान्सकलान्महाबलान्रेजेनिघोराकिलसौरभेयी विनष्टदर्पोपिबलेनराजावसिष्ठनाशायमनोदधार ५६ विश्वामित्रोवसिष्ठस्यपार्श्वमागत्यसत्वरः प्रोवाचातीवदुष्टात्माहंतुकामोमुनीश्वरम् ५७ विश्वामित्रउवाच विप्राधममयासार्द्धंकुरुयुद्धं
महत्तरम् शस्त्रास्त्रविदुषासार्द्धंशस्त्रास्त्रविदुषोह्यसि ५८ श्रुत्वामहीपतेर्वाक्यंवसिष्ठोवाक्यमब्रवीत् वसिष्ठउवाच
वयंहिब्राह्मणास्तातक्षमावंतस्तपस्विनः ५९ ब्राह्मणानांक्षमारूपक्षत्रियाणांबलंतथा वैश्यानांतुधनंरूपंशूद्राणांकर्मकौशलम् ६० युद्धंवदंतिराजानःप्रार्थितोन्नृपसत्तमः धेन्वाविनिहतंसैन्यंममकिंतत्रदूषणम् ६१ युद्धंश्रद्धास्तितेभूपयदियुद्धं
ददामिते पालाशोब्रह्मदंडोयंस्थापितोद्यधरातले ६२ छेत्तुंशक्त्यस्तिचेद्भूपछेद्यतांयदिरोचते जयोपराजयोत्रैवभविष्यतिनिसंशयः ६३ छिन्नेदंडेजितोसित्वंनोच्छिन्नेत्तिपराजयः वसिष्ठवचनंश्रुत्वाविश्वामित्रोतिगर्वितः ६४

त्वाचरणे गजस्योपरि चिक्षिपुः अश्वंअश्वोपरितदास्यंदनोपरिवैरथम् रथिनःस्यंदिनःशूराः क्षणेननिधनंगताः भक्षितायोगिनीवृंदैर्योनिरंध्रसमुद्भवैरिति ५४ ५५ ५६ ५७ ५८ ५९ ६० ६१ ६२ ६३ ६४

६५ ६६ ६७ ६८ ६९ ७० ७१ ७२ ७३ ७४

ब्रह्मदंडंद्विधाकर्तुंमनश्चक्रेविनष्टधीः शस्त्राण्यस्त्राणिमुमुचेब्रह्मदंडजिघांसया ६५ भस्मसात्तानिसर्वाणिकृतानि
ब्रह्मतेजसा शस्त्रास्त्रहीनोनृपतिर्विषण्णोविगतप्रभः ६६ व्रीडितोनीचनम्रास्योनिश्चक्रामतपोवनं धिग्बलंक्षत्रियबलंब्रा
ह्मणस्यमहद्बलम् ६७ तापसैकेनविप्रेणनिर्जिताःक्षत्रियारणे तपसाराध्यधातारंब्राह्मणत्वंवृणोम्यहम् ६८ इत्युक्त्वास्त्रा
णिसंत्यज्यतद्युवैगंधमादने गत्वाचाराधयत्कंवैपरमेणसमाधिना ६९ तपसातापितैर्देवैःप्रार्थितश्चपितामहः जगाममुनि·
भिःसार्द्धंपर्वतंगंधमादनम् ७० तत्रदृष्ट्वानृपंधाताप्रसन्नोवाक्यमब्रवीत् वरंवरयराजेंद्रवरंयन्मनसेच्छसि ७१ धातुर्व
चनमाकर्ण्यविश्वामित्रउवाचतं सिद्धयःसंतुमेसर्वाःब्रह्मतेजसमन्विताः ७२ धिग्बलंक्षत्रियबलंब्राह्मणस्यमहद्बलम्
तस्माद्वृणोमिब्रह्मत्वंयदिदास्यसिमेपितः ७३ जितक्रोधेनब्रह्मत्वंराजन्दातुंहिशक्यते तस्माद्गच्छवसिष्ठंत्वंसदास्यति
प्रसादितः ७४ इत्युक्त्वानृपतिंवरंदत्वोविधाताराजर्षिस्त्रिभुवनवंदितस्कृतोचे ब्रह्मत्वनहिममपाणिपद्मसंस्थमित्युक्त्वा
मुनिसहितस्तिरोदधेसः ७५ अंतर्हितेविदधतिविश्वामित्रोतिदुर्मनाः मनसाचिंतयामासमिथ्यैवाचरितंतपः ७६ यस्मृ
ह्यानपस्तप्तंसएवोक्तोस्वयंभुवा ब्रह्मत्वदाताविप्रर्षिःसएवास्तिनचापरः ७७ किंकरोमिमुनेःपार्श्वंगमिष्यामिमहात्मनः
त्यक्त्वामानंचदर्पंचगच्छाम्येवतदंतिकम् ७८ विचार्यैवंनृपश्चित्तेवसिष्ठस्यांतिकोययौ नत्वांघ्रिंप्रणिपातेनविश्वामित्रोब्र
वीद्वचः ७९ तपसातोषितोधातासर्वसिद्धिप्रदोभवत् ब्रह्मत्वमेकमादिष्टंभवतेतिमुनीश्वरः ८० ब्रह्मत्वंदेहिमेब्रह्मन्तपो·
मेसफलंकुरु इतिराज्ञोवचःश्रुत्वावसिष्ठोवाक्यमब्रवीत् ८१

५६

७५ ७६ ७७ ७८ ७९ ८० ८१

अत्रविशेषःस्कांदे ब्रह्मत्वंतपसानैवलभ्यतेहिकथंचन तपसालभ्यतेसर्वंत्रैलोक्यंसचराचरम् ब्रह्मत्वंलभ्यतेचेह तपसान्नृपसत्तम भवंतिब्राह्मणाः
सर्वेक्षत्रियाद्यापराजनाः राजर्षित्वमनुप्राप्यतपसानात्रसंशयः वसिष्ठतनयाःप्रोचुः शतंहास्यविचक्षणाः तपःसिद्धिमवाप्नोतिराज्यंपूर्वजनार्जि

ब्रह्मत्वंदुर्लभंतातजन्मनातपसानहि तस्माद्गच्छमहीपालकुरुराज्यंयथेप्सितम् ८२ तच्छ्रुत्वानिःश्वसन्क्रुद्धोगुप्त
रूपेणतत्सुतान् शतंवैघातयामासवसिष्ठंहंतुमुद्यतः ८३ सलीनोवृक्षखंडेषुमुनिमुद्वीक्षयन्नृपः वसिष्ठस्यवधाकां
क्षीमार्जारीमूषकंयथा ८४ तस्यांरात्रौवसिष्ठोपिमूत्रोत्सर्गायनिःसृतः चंद्रज्योत्स्नासमालक्ष्यशिष्यान्प्रतिवचोऽब्र-
वीत् ८५ उत्तिष्ठंत्विहभोशिष्या श्चंद्रज्योत्स्नांहिपश्यतः निर्मलादृश्यतेत्संतांविश्वामित्रतपोयथा ८६ इत्याकर्ण्यमु
नेर्वाक्यंविश्वामित्रोमहातपाः आत्मानंगर्हयामासधिगिदस्कमहत्तपः ८७ मयानिपातिताःपुत्रा मुनेरस्यशतंपुरा त-
थापिमेतपःस्तोतिजितक्रोधोऽतिधार्मिकः ८८ इत्युक्त्वाखड्गमुत्सृज्यववंदेमुनिसत्तमं पापोहंपापपूर्णोस्मित्राहिमां
शरणागतम् ८९ ब्रह्मत्वकांक्षिणासाधोमयादुष्टेनघातिताः तवपुत्रास्तथाक्रोधस्तवचेतसिनाभवत् ९० विश्वा-
मित्रोस्म्यहंपापस्तवघातार्थमागतः तथाकृतास्तुतिर्मेद्यतपसस्तेहितर्पितः ९१ मांशपस्वमुनिश्रेष्ठशापार्होद्यास्मि-
सांप्रतम् ब्रह्मत्वकांक्षयात्वद्यअत्रत्वमपिहापितम् ९२ इत्युक्त्वान्यपतत्पादौसाश्रुनेत्रोमहातपाः तंविलोक्यवसि
ष्ठोपिकृपापूर्णइवाभवत् ९३ वसिष्ठस्तमुवाचाथब्रह्मत्वंप्राप्स्यसेनृप आराधयविशेषेणगायत्रींवेदमातरम् ९४
वर्षायुतानामंतेत्वंब्रह्मत्वंप्राप्स्यसिध्रुवं मदीयवाक्यमादायगच्छस्वत्वंहिमालयं ९५ तं द्वयोःस्फरवंसदामुंद्स्वब्रह्मत्वमप
। उर्णादूर्णंसदासूतेसूत्रंकार्पासमेवाहि ब्रह्मसूत्रंतुकार्पासंजायतेनूर्णसंभवम् वृथासंतापितोस्यात्माब्रह्मत्वपरिलिप्सयाइति ८२
गुप्तरूपेणकिमिदंराक्षसदेहसंचारेण तत्सुतान्वसिष्ठपुत्रान् ८२ ८३ ८४ ८५ ८६ ८७ ८८ ८९ ९० ९१ ९२ ९३ ९४ ९५
९६

इतिश्रीपुरुषोत्तममाहात्म्यटीकायामेकविंशोऽध्यायः २१ छ १ २ ३ ४ उद्वाहयत् विवाहमकरोत् प्रजाहाहाकारमाह रा-
ज्ञानरक्षितोलोक स्तदानष्टो भवेत्क्षणात् नचैवंचकुरन्येचैनकरिष्यंतिचापरे यथाकुमारेणकृतंराजकर्मविगर्हितं तथान्येपिकरिष्यंतिकुमा

इत्युक्तोमुनिवचसाऽतिहृष्टदेहापापात्मापरमुपनीनयामविष्टः संत्यक्त्वासभवनमतीवमोहयुक्तः स्वांभार्यांसु
तसहितामरण्यवासे ९६ इतिश्रीसप्तपुराणसारोद्धारेश्रीपुरुषोत्तममासमाहात्म्येविश्वामित्रवसिष्ठवादप्रवृ
त्तोविश्वामित्रतपोवनगमनवर्णनंनामैकविंशोऽध्यायः २१ छ नारदउवाच शृणुस्कंदप्रवक्ष्यामिक
थांतस्यमहात्मनः यथात्रिशंकुश्चांडालःपापिष्ठःस्वर्गमेयिवान् १ पुराकृतयुगेराजामांधातृतनयोमहान् अनरण्य
इतिख्यातस्तस्यसत्यव्रतःसुतः २ सत्रिशंकुत्वमापन्नोराज्ञःकोपात्तथागुरोः एकस्मिन्दिवसेसत्यव्रतोत्यंतपराक्रमी
३ ददर्शविचरन्स्वीयेपत्तनेचारुलोचनाम् वेदिकायांसमासीनांवैश्यवर्यस्यकस्यचित् ४ गंधर्वेणविवाहेनस्वयमुद्वा
हयद्बलात् प्रजाहाहेतिचुक्रुशुर्नृपोप्यत्यंतकोपितः ५ तत्याजतनयंज्येष्ठमेकमेवविचक्षणः दूरंगच्छदुराचारनगरा
न्मेनिजालयात् ६ प्रजापीडनकृत्पापंनपुत्रेणास्तिमत्कृती नवारितोवसिष्ठेनशास्त्रज्ञोनृपनंदनः ७ पप्रच्छपितरंपु-
त्रःक्ववसामिमहीपते चांडालैःसहदुष्टात्मन्वसत्यक्तेमहीभुजा ८ नत्वाकुमारोनृपतिंचांडालवसतिंगतः नवारि-
तोवसिष्ठेनराजानातिविचक्षणः ९ अविचारान्नरपतेर्वसिष्ठस्याविचारतः परित्यागात्कुमारस्यनावर्षत्पाकशासनः
१० यदाद्वादशवर्षाणितदानष्टाभवन्प्रजाः एकस्मिन्नेवसमयेविश्वामित्रस्यवैसुताः ११ चत्वारोवेदविद्वांसःक्षु-
धयातिप्रपीडिताः विश्वामित्रेगतेदूरंतपसेतिमहात्मनि १२ गायत्र्याराधनार्थायब्रह्मत्वपरिलिप्सया प्रोचुःप्रांजल
यःसर्वेमातरमतिबालकाः १३

गातिचलोकस्याइति ५ ६ ७ ८ ९ १० ११ १२ १३

त्यजत्यर्धविचक्षणइत्यत्रविशेषवाक्यमाह स्कांदे विक्रीयतनयंमाताजीव्यतांयदिरोचते मरिष्यामोवयासर्वेक्षुधयातिप्रपीडिताः अर्थेनकुरुतेकार्यमि
यंपौरातनीश्रुतिः त्यजेदेकंकुलस्यार्थेग्रामस्यार्थेकुलंत्यजेत् ग्रामंजनपदस्यार्थेत्यात्मार्थेपृथिवींत्यजेत् तस्माद्विक्रीयतनयान्मातर्जीवयथासुखं अन्यथा
निधनंयास्येगमिष्यामस्त्वयासमं अयोध्यायांमहात्मानोधान्यवंतोमहत्तराः गृण्हंतिमनुजाःसर्वेदासार्थंसमुपागतान् तस्माद्विक्रीयमांमातःपूर्वंभक्षय
पश्चाद्विक्रीयतान्सर्वान्नोचेद्दूर्षतिवासवइति १४ १५ १६ १७ सफलत्वंविशिनष्टि स्कांदे मात्रर्थेयोपित्रर्थेचैविक्रीणातिसुतस्तनुंसयाति

विक्रीयतनयंजीवयावदागमनंपितुः सर्वनाशेसमुत्पन्नेत्यजत्यर्धंविचक्षणः १४ श्रुत्वावेदनिधेर्वाक्यंमातावचनमब्र
वीत् पितृहीनान्कथंबालान्विक्रियामिदुराशया १५ विक्रीतेतनयेतातोमांशपेन्नात्रसंशयः वेदनिधिरुवाच नकरि
ष्यतिवैकोपंपितामेत्यतकोपनः १६ आगत्यतपसोतेमांमोचयिष्यतिविक्रयात् सर्वेयदामरिष्यामस्तदाकोरक्षयिष्यति
१७ पशवन्मांगलेबध्वाविक्रीयस्वयथासुखम् भविष्यतिनमेदोषोजन्ममेसफलंभवेत् १८ तस्माद्विक्रीयमांमातःसोदरा
न्मेद्यपोषय श्रुत्वापुत्रस्यवचनंपुत्राणांजीवनेच्छया १९ जगामशीघ्रंसाकेतेधनधान्यसमागमे गलेबध्वातुतनयंविक्रीया
र्थंसुदुर्बला २० साश्रुनेत्रसुतैर्युक्ताक्षुत्क्षामैःक्षुधयान्वितैः नीयमानासुतान्बालास्वयंसत्यव्रतेनसा २१ ज्ञात्वातांब्राह्म-
णींबालान्क्षुधयापरिपीडितान् नत्वापप्रच्छतांयांतींविनयाद्ब्रह्मनंदनः २२ कासिकस्यासिमातस्त्वंकथयस्वयथातथं गलेब-
ध्वासुतंज्येष्ठंविक्रिणासिकथंनिजं २३ वैष्णवंधामपुनरावृत्तिवर्जितं पुन्नाम्नोनरकाद्यस्मात्त्रायतेपितरंसुतः तस्मात्पुत्रइतिप्रोक्तः
स्वयमेवस्वयंभुवा जीवंतंतारयेद्दुःखात्सपुत्रःश्रेष्ठउच्यते तस्माद्विक्रीयमांमातःसोदरान्मेद्यपोषय विक्रीतोहंतथामातःपुनःप्राप्स्यामिदर्शनं
ति १८ १९ २० २१ २२ निजंस्त्रीयं अहोपुत्राभवंतिसततंवत्सभामातृणांशुभं अहंपुत्रोस्मिन्नृपतेरनरण्यमहीपतेःनिष्कासितोस्मि
नगरान्बहिस्तिष्ठामिसांप्रतं कारणंमेभवस्त्वमेयदिस्याच्छ्रवणक्षमं कथयत्वंपुरोमातःमत्वामांसौरसोप्युतेइति २३ ६९ ६९

२४ २५ २६ २७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५

ब्राह्मण्युवाच सत्यव्रतश्शृणुष्वाद्यवृत्तांतंसर्वमादितः विश्वामित्रोमहातेजाममभर्ताप्रतापवान् २४ वसिष्ठस्या-
श्रमेयातोमृगेप्सुःपृतनास्युतः आतिथ्यंकृतवान्सोपिबहुमानपुरःसरम् २५ वैभवंचमुनेर्दृष्ट्वाराजानेर्ष्यापरायणः वनं
जगामतपसेब्रह्मत्वपरीलिप्सया २६ त्यक्त्वावनेमांतनयैःसमेतांतपःकरोत्येवसुदुश्चरंमुनिः गतेमुनौभोससुतातपो-
ग्रंश्रुत्वास्थिताहंबहुवत्सराणि २७ वन्यैःफलैर्वृत्तिकराप्रशस्तैस्तथाविधाभ्याससुरैर्विहीना तथास्थितायाऽनरण्य
सूनोर्जातात्यनावृष्टिनिरंतरासा २८ क्षुधातुराजीवितकांक्षयाहंज्येष्ठसुतंक्रेतुमिहागतास्मि २९ नारदउवाच श्रु-
त्वातस्यास्तुवचनंप्रोवाचनृपनंदनः सत्यव्रतउवाच माविषादमिमंमातर्निशामयनिवेदितम् ३० राज्ञानिष्काशित-
श्चापिनम्रोसत्यव्रतोस्म्यहम् वसामिनगराभ्यासेपुष्कलानांसमीपतः ३१ नमेऽन्नंविद्यतेकिंचित्राज्यभ्रष्टोस्मिसांप्रतं
मांसाशीमृगयासक्तोचरामिगहनेवने ३२ मोचयत्वंसुतंशीघ्रंगलेबद्धंशुचिस्मिते भरिष्येहंयथाशक्त्यायावदागमनं
मुनेः ३३ मुनेरागमनात्सम्याग्यथेष्टंगम्यतांगृहे इत्युक्त्वामोचयामासगलेबद्धंद्विजार्भकम् ३४ मोदितोनृपपुत्रेणगले
बद्धोमुनेऽर्भकः तदाप्रभृतिलोकेस्मिन्गालवत्वंगतोर्भकः ३५ विश्वामित्रसुतान्भार्यांगृहमानीयमाधवीम् विधि-
वत्पूजयामासदानमानेनसुव्रतः ३६ इत्थंपूजयतस्तस्यव्यतीयुःसप्तवैसमाः तोयाभावाद्गतानाशंजीवाःस्थलजलौक-
सः ३७ प्रत्यहंमृगयायातिमृगान्हत्वावनेचरान् संस्कृतेनैवमांसेनभोजयामासतान्द्विजान् ३८ एकस्मिन्दिवसेमांसं
नलब्धंद्विजसूनुना तदाचरंतींददृशेगुरोर्धेनुंपयोधराम् ३९ एषाधेनुर्ममगुरोर्वसिष्ठस्यमहात्मनः एतस्याःकिलमांसेन
भरिष्येतान्मुनेःसुतान् ४०

३६ ३७ ३८ ३९ ४०

४१ ४२ ४३ ४४ ४५ ४६ ४७ ४८ ४९ ५० ५१ ५२ हेमुनिश्रेष्ठब्रह्मदंडहतः अहंचांडालोस्मित्व
च्चरणौकथंस्पृशामि मयादैवबलेन विगर्हितंकर्मकृतं तच्छृणु यदाद्वादशवर्षाणि अनावृष्टिरभवत्तदाफलपुष्पधान्यहीनंभूतलमासीत् सर्वेपक्ष

निहत्यतांवनेमांसंगृहीत्वागृहमागमत् भोजयामासतान्विप्रान्स्वयंचबुभुजेनृपः ४१ विज्ञातार्थोवसिष्ठस्तंशशा
पातीवकोपितः चांडालकर्मयोगेनचांडालोभवसत्वर ४२ इत्युक्तमात्रोमुनिनासद्यश्चांडालतांगतः राजचिह्नैर्विरहितो
चिंतामापदुरत्ययाम् ४३ चिंतायुक्तोपितनयान्पोषयामासवैमुनेः एतस्मिन्नेवसमयेविश्वामित्रोमहातपाः ४४ वेदमात
रमाराध्यब्रह्मलब्ध्वागतोनृपः लब्ध्वावरंमहातेजाविधितुल्योभवत्तदा ४५ विचिन्वन्तनयान्भार्यांसाकेतेउपजग्मि
वान् मलिम्लुचस्यप्रथमेदिवसेमुनिसत्तमः ४६ विलोक्यतनयान्भार्यांविश्वामित्रोऽतिहर्षितः पप्रच्छसत्ववृत्तांतंसाकेता-
गमनंप्रति ४७ श्रुत्वामुनिःप्रसन्नात्माब्रह्मदंडंदुरत्ययम् दूरीकर्तुंमनश्चक्रेतपसस्तस्यकिल्बिषम् ४८ एतस्मिन्नेवसमयेत्रि
शंकुर्नृपसत्तमः मांसमादायवेगेनस्वगृहंसमुपागतः ४९ दृष्ट्वागतंमुनिश्रेष्ठदूरतःप्रणनामच गतप्रभोपिचांडालोराहु-
ग्रस्तइवांशुमान् ५० आगतंनृपतेःपुत्रंप्रोवाचमुनिसत्तमः धन्योसिनृपशार्दूलसफलंजीवितंतव ५१ परिष्वजचमांभू
पमाविचारयकिंचन श्रुत्वातस्यमुनेर्वाक्यंत्रिशंकुर्वाक्यमब्रवीत् ५२ कथंस्पृशामिचरणौचांडालोस्मिमुनीश्वर

पक्ष्यादयः मृतप्रायाः भूतलेभ्रमंति एतस्मिन्समयेविश्वामित्रभार्यासत्यवतीज्येष्ठंगलेबध्वाविक्रेतुं अन्यैस्त्रिभिः पुत्रैः समेताअयोध्यायांचांडा
लगृहसमीपेमयादृष्टा तदामयाविचारितं यः क्षत्रियः दुःखान्ब्राह्मणंनमोचयेत् सजीवन्मृतः नरकंचयाति इतिविचार्यमयोक्तं हेमातः एनंबद्धं पु
अहंराजपुत्रः त्यक्तनृपासनोस्मि मन्निकटे अन्नंनास्ति मांसंभक्षयामि तस्मात्यूयंमांसंभक्षथ विचारं माकुरुथाः दुर्भिक्षेमांसेनापि कलेवररक्ष
णं इत्युक्तासामत्कास्थित पर्णकुटीमध्येनिवासंकृतवती अहंचदिवारात्रौतान्रक्षयामि पिशितान्नैः भरामिच एवंनिवसतांतेषांसप्तवर्षा-

स्कं॰पो॰र्ण
धर्मस्कंध
६०१

ष्यगमन् अष्टमेवर्षेमयाएकदिने अतीवभ्रमणेकृतेपि मांसंनोलब्धं तदाअरण्यान्क्षुधातुरः जलेप्सुः अहंनिवृत्तः अहंक्षुधितानांद्विजन्मनांवदनं
कथंद्रक्ष्यामीतिचिंतयन् किंचयेषांगृहे ब्राह्मणाः क्षुधितास्तिष्ठंति तेषांनिरयवास इतिच तस्मात्कलेवरंत्यक्ष्ये इतिविचार्यशिरश्छेदार्थंय।
गृण्हामि तावताद्दूरेचरंतीम् वसिष्ठधेनुपुष्टांदृष्ट्वा मनस्यचिंतयं एनांनिहन्मिपूर्वंकुपितोवसिष्ठः शापंदास्यति नहन्मिचेत्तदाक्षुधिताःब्राह्मणाः
शपेयुः तस्माद्धन्मीतिनिश्चित्य दैवनोदितः तांधेनुंहत्वा मांसमानीय सत्यवतीकरे समर्पितं साचसर्वान्संभोज्य स्वयंबुभुजे अहंतुनभुक्तवान् वसि

मासस्त॰४
पुरु॰मा॰१३
अ॰२२

इत्युक्त्वाकथयामाससर्ववृत्तांतमादितः ५३ दृष्ट्वासाश्रुंनरपतिसुतंसाश्रुनेत्रांश्चबालान्भार्यांदृष्ट्वाभुवनविदितं
याजयिष्येश्वमेधम् ५४ नारदउवाच विश्वामित्रवचःश्रुत्वात्रिशंकुर्वाक्यमब्रवीत् चांडालस्यकथंचाश्वमेधेवैयो-
ग्यताभवेत् ५५ निवर्ततेकथंशापादत्यंतंगुरुणारुषा श्रुत्वात्रिशंकोर्वचनंमुनिःप्रोवाचसस्मितम् ५६ राजपुत्रशृणु
ष्वाद्यकथयामिमहत्तरम् व्रतंपापौघशमनंब्रह्मशापनिकृंतनम् ५७ नातःपरतरंदानंनातःपरतरामखाः नातःपर
तरोयोगोतीर्थस्नानंनचाधिकम् ५८ मलिम्लुचस्यादिवसःप्रथमोपरिवर्तते कुरुस्नानमयासार्द्धंशापमुक्तोभविष्यसि
५९ ध्मातंध्मातंयथालोहंमलंत्यजतिभूपते दिनेदिनेनरस्नानपरित्यजतिपातकम् ६० मलिम्लुचेकुरुस्नानंशापान्मु
क्तोभविष्यसि पूर्वाकृतिवयोरूपोराजन्तुल्योभविष्यसि ६१

ष्ठोपिपादन्यासज्ञानेन मन्निकटमागत्योवाच हेदुष्ट परदाराभिहर
णगोवधेनच पितुश्चापरितोषेण त्रिशंकुर्भवदुर्मते चांडालसदृशाकारा प्राप्तश्चांडालतांभवान् एवंशापंदत्वा मुनौयाते चांडालदेहंदृ-
अतिदुर्मनाःसन् देहंत्यक्तुमुद्युक्तः परंतु यदिदेहंत्यजामि तर्हिब्राह्मणाः अत्यंतदुःखिताः भवेयुः तेनिर्दये दुर्भिक्षकाले कथंवर्तेयुः तस्मात्वि-
श्वामित्रस्वगृहंयाते तस्मैपुत्रान्समर्प्यकलेवरंत्यक्ष्ये एवंविचार्यकलेवरंधारितं अतः हेविश्वामित्र तनयान्भार्यांचगृहाणदेहंत्यजामि तवपादयोःस्पर्शार्हो ५९
नैवास्मि इत्युक्त्वाअश्रुपरीताक्षः दूरतएवननामेति भुवनविदितंअश्वमेधंत्रिशंकोःशुद्ध्यर्थंयाजयिष्येकारयामीति ५४ ५५ ५६ ५७ ५८ ५९
६० ६१

६२ ६३ ६४ ६५ ६६ ६७ ६८ ६९ ७० ७१ परदाराभिहरणात् परस्त्रीहरणात् ७२ ७३ ७४ पूर्वोक्तकस्मिन्परदाराहरणदोषस्यनिराकरणंकरोति वैश्यसुतामिति तथाच स्कांदे अनुल्लंघितमर्यादा याचस्यात्कुलनंदिनी कन्यैवतांपुराज्ञेया परिणेतुर्नदूषणं अनुल्लंघितमर्यादांज्ञात्वैवनृपनंदनः जहारकन्यांविप्रर्षेतत्रशंकाभवेत्कथं अनुल्लंघितमर्यादा अकृतसप्तपदीक्रमणा रत्नभोजीसदाराजाकथ्यतेमुन

नविचारस्त्वयाकार्यः सत्यंतेव्याहृतंमया मलिम्लुचोद्भवंपुण्यंकथितुंनैवशक्यते ६२ इत्युक्तोविधिनासर्वंचक्रेस्नानंमहीपतिः पूर्णेमलिम्लुचेजातेदिव्यायुधसमन्वितः ६३ दिव्यभूषांबरधरोद्वितीयइवभास्करः दृष्ट्वाशापविनिर्मुक्तंराहुमुक्तंनिशाकरम् ६४ परिरेभेत्रिशंकुंतंविश्वामित्रोमहातपाः एतस्मिन्नेवकालेतुरावणोमाययास्वयम् ६५ निजघानमहारण्येष्वनरण्यंमहाभुजम् युद्धंकृत्वामहातेजा दिनानामेकविंशतिः ६६ हत्वानृपंततोराज्यंस्वाधीनमकरोद्यदा सत्यव्रतंपुरस्कृत्य विश्वामित्रोमुनिस्तदा ६७ रावणांतिकमागत्यवचनंचेदमब्रवीत् राज्यंदेहिमहाराजतत्पुत्रायकुलोचितं ६८ संभारास्क्रियतांशीघ्रंराज्यंदातुंसमंत्रिणः कुलोचितंमयादत्तंराज्यमेतत्त्रिशंकवे ६९ रावणस्यवचःश्रुत्वाविधिंचक्रेमुनिस्तदा सिंहासनेनृपंस्थाप्यस्वयंपूजितुमुद्यतः ७० तावद्वसिष्ठोपौलस्त्यंवाक्यमेतदुवाचह नराज्यार्होऽस्तिरक्षेशत्रिशंकोयंस्कमंदधीः ७१ परदाराभिहरणाद्गुरोर्दोग्ध्रीवधेनच पितुश्चापरितोषेणत्रिशंकुत्वमुपागतः ७२ मयाशप्तःपुरैवायंचांडालत्वमुपागतः कथमर्हस्ससौराज्यंसाकेतानांयशःकरं ७३ वसिष्ठवचनात्सद्यःसंदिग्धोरावणोयदा विश्वामित्रस्तदोवाचवाक्यंरोषसमन्वितः ७४ नायंशंकुयुतोराजन्नाज्ञानाद्भाषितोह्यसि ज्ञात्वावैश्यसुतारम्यांजहारनृपनंदनः ७५ ब्राह्मणार्थंहतागौश्चतत्रशंका भवेत्कथम्

विमानवैः रत्नभूताहार्याकन्या तत्रशंकाभवेत्कथमिति ७५ ब्राह्मणार्थमित्यत्रविशेषः दशाधर्मगतेनैव हताधेनुर्महात्मना ब्राह्मणार्थंयदाविद्वन् तत्रशंकाभवेत्कथं वृद्धौचमातापितरौ साध्वीभार्यासुतःशिशुः गुरुंप्रपन्नंविप्रंचयोनत्तेयात्सब्रह्महा एतेत्यकार्यकृतेनभ

र्व्यामनुरब्रवीत् तस्मादनेनविप्रार्थेहृताधेनुर्गुरोर्यदा नत्रिशंकुर्हिविप्रर्षेधिक्कारययथोचितं स्वद्रव्यंपितृद्रव्यंचमातृद्रव्यंगुरोः सदा तदाप्तस्त्व
द्रव्यंस्यादितिवेदविदोविदुः तस्मादनेननिहृताब्राह्मणार्थेगुरोश्चगौः ब्राह्मणार्थेगवार्थेयाविकर्मकुरुतेनृप सत्कर्मतत्परिज्ञेयंइतिवेदविदोविदुः
ब्राह्मणार्थेहृताधेनू राजपुत्रेणसर्वथा नतत्रशंकुर्विप्रेंद्र पुण्यंगोःसर्वसंमितमिति निष्कासितोपुराराज्ञानकथंवारितस्त्वया सिंहासनस्थंराजानंकु
र्वाणंकिल्बिषंकुधीः नवारयंतियेसभ्यास्तेसर्वेपापभागिनइति ७६ त्वयाअज्ञानाद्यदाशप्तइतिशेषः तदासइति स्कांदे शप्तोज्ञानात्त्वयाविप्ररा·

यदाऽज्ञानात्परित्यक्तोराजासौराजनंदनः ७६ तदाप्रभृतिपर्जन्योनववर्षधरातले त्वयाज्ञानाद्यदाशिष्यश्चांडालत्वमवा
पसः ७७ प्रायश्चित्तकृतंविद्वन्राजपुत्रेणधीमता स्नातोमलिम्लुचोऽनेनब्रह्मशापनिकृंतनः ७८ पौलस्त्योपितदाश्रु
त्वास्नातंमलिम्लुचंनृपम् नत्वाददौमहद्राज्यंप्रीतःस्फीतंजनावृतम् ७९ इक्ष्वासंस्थापितेराज्येरावणेनदुरात्मना व-
सिष्ठोमनसाकिंचिद्दुर्मनाइवलक्षितः ८० रावणःप्रत्युवाचाथवसिष्ठंमुनिपुंगवम् नविस्मयस्त्वयाकार्योमासमलिम्लुचंप्र
ति ८१ ब्रह्मशापाद्विनिर्मुक्तोजातोऽसौमुनिपुंगव मातृहापितृहाबंधुघ्नभ्रातृहागुरुघातकः ८२ एतत्पापंज्वलंतीहम
लमुक्स्नानमात्रतः शृणुविद्वन्प्रवक्ष्यामिममवृत्तंपुरातनम् ८३ तच्छ्रुत्वागतसंदेहोभविष्यसिद्विजोत्तम·

जपुत्रोनिमंदया पुत्रेशिष्येतथाबालेब्राह्मणेयोषितिनृपे अपराधशतेनापिहितंतेषुसमाचरेत् इति ७७ ७८ पौलस्त्योरावणः नृपंत्रिशंकुं
स्फीतंसमृद्धं ७९ ८० ८१ ८२ ८३ पूर्ववृत्तांतंकिमित्यपेक्षायामाह स्कांदे पुरासत्ययुगेजयकनाम्नावैश्यः अहं धान्यरसपशुकाष्ठकृषिकु
शीदतिलसर्षपतैलयंत्रादिव्यापारेणातीवधनंसंपादितं तथापिलोभाविष्टचित्तेनैकदानौकासुबहुभांडानिगृहीत्वा अर्णवंगतः तत्रद्वादशवर्षाणिव्यापा
रंकृतवान् तेनषष्टिकोटिमितंस्वर्णंमयाउपार्जितं शतंतरंडाः संपूर्णाः यदागृहंनिवृत्तः तदाकश्चित्द्विजः वृद्धः ममपार्श्वमागत्य शतंसुवर्णंकन्या-
दानार्थंदीयतामिति मांअयाचत आहच तदास्यानित्येत्वद्धनेनसहवियोगोभविष्यति तस्मात्मेधनंयच्छ तवश्रेयोभविष्यति उपार्जितवित्तस्य·

विंशांशयः देवद्विजार्थेनार्पयेत् तदानेनचित्तेनवियोगः भवेन्नात्रसंदेहः तच्छ्रुत्वा अहंकिंचिन्नोचिवान् तदाविप्रेगतेरुष्टाः ममसेवकाः मेनिर्भर्त्सनांचक्रिरे ततः तद्ब्राह्मणस्य अन्वेषणंभूरिकृतंसनप्राप्तः अहंपश्चात्तापंगतोस्मि ततः शतनौकाभिः सहगृहागमनसमये अर्णवमध्येमासचतुष्टयंजातं एकदा अकस्मात् महावायूत्पातेन ममतरंडस्यकूपस्थंभोभग्नः तेनसर्वेसेवकाः अहंचभग्नाशोजातः तरंडस्य शतखंडा अभवन् तदामहाफलकासंस्थितस्य वायुनाभ्रममाणस्यमम एकविंशतिदिनानिजातानि नष्टसंज्ञोहं दैवात् समुद्रस्येकंद्वीपमुपसादितः जीवितशेषःसामुद्रद्वीपमासाद्य सूर्यरश्मिभिः तापितः तदालब्धसंज्ञः समुद्रफलकायत्तः मंदंमंदंमहत्तरे द्वीपेजलान्वेषणार्थंभ्रममाणेन मयाएकसरोवरंदृष्टं तत्रामृतोपमंजलंपीतंस्वस्थचित्तःसन् निद्रांप्राप्तः तदाबकदाल्भ्योमुनिःतस्मिन्महातीर्थेस्नानार्थंचागतः तत्रकृतंमांदृष्ट्वा अत्रमनुष्यागमनं कुतइति तर्कयन् निद्राभंगेदोषइतिविचार्य वारुणमंत्रान्पठन्स्नानंकृतवान् तदातन्मंत्रपाठश्रवणेन प्रबुद्धोहं बकदाल्भ्यमुनिंदृष्ट्वा तत्पार्श्वमागत्य दंडवन्नत्वा कृतांजलिःसन् अग्रेसंस्थितः तदामुनिः त्वंकोसि कुतइहागतः सर्वंकथयेतिमांपप्रच्छ तदा अशेषतःमयाकथितं स्ववृत्तांतं आकर्ण्य मुनिःप्रोवाच हे वैश्य विषादंमाकुरु यदाविप्रेणशतस्वर्णंयाचितं तदात्वया नैवदत्तंउतनिर्भर्त्सितः विप्रःक्लिश्यसन्स्वगृहंगतः तवापराधात्सागरे नौभग्ना अन्येतरंडाःसर्वेबंधुनासमंस्वभवनंगताः विजयाख्योतवभ्राता तवनाशंश्रुत्वाउद्विग्नःसन् शीघ्रंसर्वधनदानंकृत्वा गृहान्निर्गतःसगंधमादनेगत्वातपः करिष्यति अधिकमासशतंस्नानंकृत्वा मार्कंडेयप्रसंगेन पार्षदत्वंप्राप्य हरेः सार्द्धंक्रीडिष्यति इतिबकदाल्भ्यवचःश्रुत्वा तस्यांघ्रिपंकजंनत्वा प्रार्थनांकृतवानस्मि हे बकदाल्भ्य यथामार्कंडेयप्रसंगेन ममानुजोविजयः मोक्षंप्राप्तः तथातवानुग्रहेण ममापिमोक्षोभवेदेव मनुग्रहाण तदाप्रीतोमुनिर्मांप्राह हेजयवैश्य त्वमपिमलिम्लुचशतोद्भवंपुण्यं अर्जय तेनधर्मराजगृहे तवबंधुनासह समागमो भवितानात्रसंदेहः तवोपार्जितंद्रव्यंविजयेन सत्पात्रेभ्यःसमर्पितं तेनपुण्येनतवैतत् द्वीपप्राप्तिर्जाता अनाशनात्त्वयाचीर्णंपुण्यंक्रतुशतोद्भवं मलिम्लुचशतंहे मयासहमहत्सरे पार्षदत्वंहरेः शीघ्रंप्राप्स्यसेनात्रसंशयः श्रुत्वातस्यमुनेर्वाक्यंस्थितोद्वीपेसमुक्तिदे सार्द्धद्विशतवर्षैस्तेशतंस्नातामलिः बकदाल्भ्यप्रयोगेनस्नातोहंभक्तिसंयुतः आयुःशेषेमृतिंप्राप्तो गतोसौचयमांतिकम् तस्मिन्नेवक्षणेप्राप्तो विजयोपिममानुजः ततःयमे

नपूजितौद्वौवैकुंठेजयविजयनामानौपार्षद्प्रवरौजातौ ततःकुमारशापतःहिरण्यकशिपुहिरण्याक्षौजातौतौन्नृसिंहवराहरूपिणाहतौ
हलोकविश्रुतः कुंभकर्णः संजातः सः मेसहोदरः विजयः अहंच वैश्यजन्मनिमलिम्लुचशतघ्नकर्ता तस्मात् हेवसिष्ठ मलिम्लुचसदृशंविष्णुसाध
पापमोचकंच अन्यच्च त्रिशंकेनयदामलिम्लुचःस्नातः तदासर्वपातकान्मुक्तोजातः तस्माद्येनंत्रिशंकुंराज्येनिवेशाय अस्यराजसूयाश्वमेधभाक्

इत्युक्त्वापूर्ववृत्तांतंकथयामासचादितः ८४ लब्ध्वाराज्यंमहेंद्राद्द्विजानिचरकराद्राजपुत्रोविरेजेविश्वामित्रप्रसादाद्दि
नकरकुलजस्तेजसासत्समानः पश्चान्नत्वागुरुंस्वंस्वकुलवरभुवंपालयामासराज्यंयज्ञैरिष्ट्वासदेहः सुरपतिसदनंप्रा
पराजात्रिशंकुः ८५ इतिश्रीसप्तपुराणसारोद्धारेश्रीपुरुषोत्तममासमा० त्रिशंकुस्वर्गप्राप्तिकथनंनाम द्वाविंशोऽध्या
यः २२ छ स्कंदउवाच त्रिशंकोश्चरितंदिव्यंविश्वामित्रस्यधीमतः चरितंत्रिदशैःपूज्यंश्रुतंयुष्मत्प्रसादतः १
च्यवनोपिकथंरूपप्राप्तवान्मुनिसत्तमः मलिम्लुचप्रसादेनकथयस्वविशेषतः २ नारदउवाच पुरासत्ययुगेब्रह्म
न्पुलोमानामदानवः विश्वकर्मसुतांदिव्यांरूपयौवनशालिनीम् ३ क्रीडंतींविपिनेबालांपुलोमासखिनिर्वृताम्
दृष्ट्वाययाचेस्थपतिंदेहिकन्यांमहामते ४ पुलोम्नोवाक्यमाकर्ण्यविश्वकर्माततोब्रवीत् पृष्ट्वापितामहंदास्येमया
दातुंनशक्यते ५ गतेपुलोम्निदैत्येंद्रेभृगुर्विप्रर्षिसत्तमः दृष्ट्वापुलोमांसुदतींमन्मथस्यवशागतः ६ विश्वकर्माणमाग·
त्यकन्यांयाचेस्मरातुरः स्थपतेदेहिमांकन्यांनोचेच्छापंददाम्यहम् ७ भृगोर्वचनमाकर्ण्यस्थपतिर्वाक्यमब्रवीत् पुलोम्नाया
चितश्चास्मिकन्यांदातुंनशक्यते ८

पुत्रोभविना इत्युक्त्वामुनिशार्दूलंराज्यंदत्वात्रिशंकवेगतस्त्रिलोकेलंकायांरावणोराक्षसैःसममिति
८४ स्वंस्वकीयंगुरुंविश्वामित्रंस्वकुलवरभुवंकुलगुरुंवसिष्ठंयज्ञैःअश्वमेधयज्ञैः ८५ इतिपुरु०मा०टीकायांद्वाविंशोऽध्यायः २२ छ
१ २ ३ पुलोमानाम्नींविश्वकर्मसुतांस्थपतिंविश्वकर्माणं ४ पुलोम्नःदानवस्य ५ ६ ७ ८ छ छ

९ १० दास्येदास्यति ११ १२ १३ १४ १५ १६ अग्निप्रश्ने विशेषः स्कांदे पप्रच्छकुंडमध्यस्थंज्वलंतमनलंक्रुधीः कस्येयंचारु
सर्वांगीकथ्यतांत्रिदशेश्वर भृगोर्भार्यायदैवेयंहरिष्येनात्रसंशयः नहरिष्येहिजात्यस्यत्वन्यस्ययदिजामिनि पृष्टेसत्यंहिनोब्रूतेसयातिनरकंध्रुवं

गत्वापृच्छामिब्रह्माणमयात्वयायुवयोःसमं कथयिष्यतियद्ब्रह्मातत्करिष्येध्रुवंवचः ९ भृगुर्निशम्यतद्वाक्यंद्रुहिणां
तिकमागमत् नारदस्यमुखेनापिविज्ञप्तिंकृतवान्सुधीः १० ब्रह्माविज्ञप्तिमाकर्ण्यनारदवाक्यमब्रवीत् दास्येपुलो
मांविप्रर्षेभृगवेलोकसुंदरीं ११ श्रुत्वातदाहृष्टमनाःस्वतपोवनमाविशत् विश्वकर्माऽपिचतथापप्रच्छचपितामहम्
१२ पुलोम्नायाचितश्चास्मिभृगुणाजगतीपते कस्मैददामिसुदतींतद्वदस्वचसत्वरम् १३ भृगवेदीयतांकन्याभि·
स्युवाचपितामहः भृगवेप्रददौकन्यांविश्वकर्मामुदान्वितः १४ तत्कुलादानवोतस्या हरणायमनोदधे यदीत्सेका
किनींद्रक्ष्येपुलोमामंबुजेक्षणां १५ हरिष्येत्रनसंदेहोसमक्षंह्रियतेकथम् दृष्ट्वैकदापुलोमांतांभृगोराश्रममध्यगां
१६ अग्निंकुंडस्थितंदृष्ट्वाज्ञात्वाभार्यांभृगोरिति पुलोमादानवःक्रुद्धोमृगराजोमृगीमिव १७ रुदंतीतातनातेतित्रा
त्रैतिकरुणंसती नीयमानाबलाद्बालात्रातारंनाधिगच्छति १८ नीयमानांस्वजननींनिशम्यातिरुषान्वितः तस्योद
रगतंशीघ्रंच्यवनत्वमुपागमत् १९ उदरान्निस्सृतोबालःप्रज्वलत्पंचमासिकः तत्तेजसाविनिर्दग्धोदानवेंद्रोमहाब·
लः २० भस्मीभूतःपतद्भूमौपुलोमादानवस्तदा पुलोमाव्यथितंबालंविलोक्यातिरुरोदह २१ निशाम्यरुदितंसाध्व्या
ब्रह्मालोकपितामहः शीघ्रमागत्यससुतांस्नुषामाश्वासयत्तदा २२

मौनमालंब्यतिष्ठेत तस्यपापंतथाविधम्
नान्यंकथयदेवानामग्रणीस्त्वंसदामतः धर्मसंकटमापन्नोजातवेदा महातपाः भृगोरियंकृताचारापुलोम्नोकथयत्तदेति १७
१८ १९ २० पुलोमादानवः पुलोमा भृगुभार्या २१ २२ ६५ ६५ ६५

२३ २४ २५ २६ २७ २८ २९ ३० ३१ ३२ ३३

व्यथितोयत्नतोबालोच्यवनाख्योनिरास्थिकः भविष्यत्यतिरूपाढ्योमलिम्लुचनिषेवनात् २३ एवंकथयतस्तत्रभृगुः
स्नात्वासमागतः तदापत्नीस्ववृत्तांतंयथाऽऽसीन्हरणादिकम् २४ वन्हिनाकथितंचैवकथयित्वारुरोदह अश्रुपाता
त्समुत्पन्नानाम्नाक्रोशवतीनदी २५ श्रुत्वाभृगुस्तदासर्वंशशापाग्निंरुषान्वितः सर्वभक्षोभवस्त्वाद्यवन्हेमच्छापतःस-
दा २६ वन्हिस्तद्वाक्यमाकर्ण्यक्रोधात्प्रोवाचतंप्रति पृष्टेनकथितंसत्यंदूषणंतत्रकिंकृतम् २७ मिथ्याशप्तोस्मिविप्रेंद्र-
नशपामित्वांद्विजम् सर्वदेवमुखंभूत्वासर्वभक्षोभवामिकिम् २८ इत्युक्त्वामुनिवरसन्निधौचवन्हिःसञ्जहौत्रिभुवनतो
निजंस्वरूपम् शांतोग्निःसकलमुनिगृहाग्निहोत्रान्नोभोक्तुंक्वचिदपिमनश्चकारकश्चित् २९ कृतेनभार्ययासाकंभृगुः
स्वाश्रममावसत् वन्हिनाशेसमुत्पन्नेलोकाःप्रव्यथिताभृशम् ३० ब्रह्मणोंतिकमागम्यप्रोचुर्दुःखंस्वकीयकम् ब्रह्मास-
स्मारमनसादेवदेवंहुताशनम् ३१ स्मृतमात्रोतिसहसासंप्राप्तोहुताशनः तमाभाष्यतदाब्रह्माहेवन्हेकोपमाकु
रु ३२ अंतर्धानंगतेत्वंहिसर्वमंतरधीयत सर्वभक्ष्योपिभृगुणायदिशप्तोसिसांप्रतम् ३३ तथापिकथयिष्यामिव्र-
तमेकंमहीतले अधिमासेकुरुस्नानंसर्वदेवगणैर्वृतः ३४ यत्राशक्तसर्वभक्षोपिपवित्रस्त्वंभविष्यति बादमुक्त्वाततोवन्हिः
सद्यःप्रादुर्बभूवह ३५ सर्वदेवगणैःसार्द्धंकृत्वास्नानंमलिम्लुचे दृष्ट्वावन्हिंजगत्सर्वंहृष्टंस्थावरजंगमम् ३६ हृष्टादेव
गणाःसर्वेभृगुश्चेतसिलज्जितः च्यवनोपिमहातेजामांसमेदोकृतिश्चिरम् ३७ जातमात्रस्तपस्तेपेब्रह्मचारीजितेंद्रियः
वर्षाणामयुतंसार्द्धंतपस्तप्तमहत्तरम् ३८ पिपीलिकावृतोदेहोवाल्मीकइवदृश्यते तृणैरावेष्टितोमूर्ध्निपार्श्वगुल्मल-
तावृतः ३९

३४ ३५ ३६ ३७ ३८ ३९ ४० ४१

४० ४१ ४२ ४३ ४४ ४५ ४६ ४७ ४८ ४९

तत्रैकदामहीपालोवैवस्वतमनोःसुतः शर्यातिर्भार्ययासार्द्धंव्यचरत्पुष्पितेनवे ४० सुकन्यातस्यतनयाव्यचरत्
सखिसंयुता तत्रापश्यद्विशालाक्षीवाल्मीकंचितनंवने ४१ तन्मध्येज्योतिषिंदृष्ट्वाकन्याविस्मयमागता वाल्मीकेदृश्य
तेकिंचित्खद्योताभंसुमध्यमा ४२ कटकेनविभेदेनतदासुस्रावशोणितं तदैवसर्वसैन्यानांमूत्ररोधोबभूवह ४३ मूत्ररो
धंतदादृष्ट्वाराजाप्रोवाचसेवकान् केनापराधोहिकृतोमुनेरस्यमहात्मनः ४४ यत्कोपान्मूत्रकृच्छ्रेणपीड्यंतेसर्वसैनिकाः
सुकन्योवाच राजन्वनेभ्रमंत्यामेवाल्मीकस्थावलोकितः ४५ तस्मिन्ज्योतिषिसंवीक्ष्यशलाकाप्रेरितामया तस्मात्सु
स्रावरुधिरंततोहिंनाहमागता ४६ इत्यापराधंमेजातंतंप्रसादयमाचिरम् इत्याकर्ण्यततोराजातयासार्द्धंसुकन्यया ४७
ऋषेःसमीपमागत्यप्रार्थयामासभूपतिः अजानंत्याऽनयाकिंचित्कृतंकर्मजुगुप्सितं ४८ तत्क्षंतव्यंत्वयाविप्रवाक्यप्रसा
दःप्रदीयताम् श्रुत्वेत्थंनृपतेर्वाक्यंच्यवनोमुनिसत्तमः ४९ पप्रच्छकस्यकन्येयंनापराधःकृतोनया ज्ञात्वामुनेर्मनोभावं
शर्यातिर्नृपसत्तमः ५० ददौकन्यांवरारोहांमन्योरुत्तारणायवै दत्वाकन्यांविशालाक्षींराजास्वपुरमाययौ ५१ सुकन्या
पिपतिंप्रेम्णासेवयामासवैसदा एकदाऋतुस्नातांप्रियांदृष्ट्वामुनिःस्वयम् ५२ नासत्यदस्रौसस्माररूपयौवनकांक्ष-
या स्मृतमात्रौतुभिषजौमुनिपार्श्वमुपागतौ ५३ तौपादावनतौदृष्ट्वाच्यवनोवाक्यमब्रवीत् शर्यातेस्तनयासाध्वीमयो-
द्वाप्रमदोत्तमा ५४ ऋतुस्नाताधुनाजाता रंतुंकांक्षतिसुव्रता वृद्धोहंऋतुदानायनकल्पोस्मिसुरोत्तमौ ५५ यौवनंदीय
तांमह्यंप्रमदानामभीप्सितम् यज्ञभागभुजौदेवौकरिष्यामिनसंशयः ५६ मुनेर्वचनमाकर्ण्यप्रोचतुर्भिषजोत्तमौ दास्या
मियौवनंतुभ्यंमरसमानंसुदुर्लभम् ५७

५० ५१ ५२ ५३ ५४ ५५ ५६ ५७

वृत्तांतमाह पुराश्ववदनौ सूर्यतनयौ उभौसर्वतो निरादरौ जातौ तदा हिमालयंगत्वा देहनाशार्थंकृतनिश्चयौ अनशनव्रतं कृतवंतौ समादिनानि
जातानि तदैव नारदस्तत्रागत्य प्रोवाच हेभिषजाधीशौ दिव्यरूपोपलब्धये दिव्यंव्रतं कथयामि प्रत्यक्षंजायते श्रद्धानानुमानेषुजायते ममापिपू-
र्ववृत्तांतं कथयामिभिषग्वरौ अवंतिकानगरे यक्षनाम्नोब्राह्मणस्यगृहे गुणवतीनाम्नीशूद्रीदासी अभवत्तस्याउदरे अहंसमुत्पन्नः च-
ब्दिकोजातः तदाब्राह्मणगृहे वर्षाकालेनिवासार्थं महातपस्विनोब्राह्मणाः आगताः तदाधनाढ्यः अस्मत्स्वामीतान् पूजयामास तेषांशुश्रूषार्थं
मममाताउपादिष्टी पंचाब्दिकोप्यहंतेषांसेवनतत्परः अभवंतदैव अधिमासेसंप्राप्ते मंदाकिन्यांतैर्मुनिभिः साकंस्नानमपि कृतवान् तन्मह-
मपि अश्रौषं तेनाहंनिर्मलांगः निर्मलमतिश्चमेजाता ततः निर्मलंमां द्वादशाक्षरमंत्रंदत्वातेगताः अहंचमातुः समीपेमंत्रमाराधयन्स्थि-

इत्युक्त्वासत्यवृत्तांतंकथयित्वापुरातनम् प्रोचतुर्मुनिशार्दूलौयौवनप्राप्तिहेतवे ५८ अधिमासेमयास्नातंपूर्णमासं
सरोवरे रूपयौवनशोभाढ्यौजातौसौंदर्यगर्वितौ ५९ अधिमाससमंनास्तिईप्सितंफलदायकम् तस्मान्मासंचसं-
प्राप्तंकुरुस्नानंमहामुने ६० रूपयौवनसंयुक्तःस्थिरस्त्वंभविष्यसि तयोर्वचनमाकर्ण्यच्यवनोमुनिसत्तमः ६१
नासत्यदस्रौसहितौस्नात्वामानससरोवरे रूपयौवनसंपन्नोजातोऽधिकप्रसादतः ६२

तः ततः सर्पदंशेनमममातुः मरणेजाते विष्णोरनुग्रहंमन्यमानः तत्पारलौकिकंकृत्वा गृहान्निर्गत्य समलोष्टाश्मकांचनः निराशी.
मज्जनंकुर्वन् ब्रह्मकल्पांतेसर्वेस्थावरजंगमाः विष्णुदेहंप्रविष्टाः विष्णुःवटपत्रोपरिसुप्तः ततःसहस्रवर्षांते विष्णुः ब्रह्माणं ससर्ज ब्रह्मण उ-
त्संगादहंजातः अधिमासप्रतापेननारदत्वंप्राप्तं तस्मात् हेभिषजाधीशौ अधिमासेस्नानंप्रकुर्वंतौ रूपलावण्याढ्यौ भविष्यतः यदि
दुर्लभंशुभरूपंइच्छसि तदाअधिमासे स्नानंकुरु इत्युक्त्वानारदोब्रह्मलोकंजगाम ततः अधिमासेसरोवरे मासपर्यंतंस्नानंकृतवंतौ रूपयौवन
शोभाढ्यौ सौंदर्यगर्वितौजातौ तस्मात् हेच्यवन प्राप्तेऽस्मिन्अधिमासेस्नानं कुर्विति ५८ ५९ ६० ६१ ६२

६३ ६४ ६५ ६६ ६७ ६८ ६९ ७० ७१ ७२ ७३ ७४

रूपंसमवयेप्राप्तेत्रयोत्थ्याश्रममागताः समानावयवान्सर्वान्सर्वलक्षणलक्षितान् ६३ दृष्ट्वाचिंतयतीबालासुकन्यासापतिव्रता कथंजानामिभर्तारंसमानाकृतयस्त्रयः ६४ विचार्यैवंतयासाध्वीप्रोवाचवचनंतदा नमस्करोमिरूपाढ्यौतुल्यकानामधीश्वरौ ६५ नाहंजानामिभर्तारमन्येपितृसमाःखलु तस्मात्त्वंकथ्यतांमह्यंभर्तारंमेप्रदर्शय ६६ नासत्यदस्त्रौतच्छ्रुत्वाप्रोवाचवचनंतदा वरंवरयसुश्रोणिवरंयन्मनसेप्सितम् ६७ तयोर्वचनमाकर्ण्यसुकन्यावाक्यमब्रवीत् भर्तारंदीयतांमह्यंसदैवस्थिरयौवनम् ६८ अश्विनीकुमारावूचतुः इमंतुच्यवनंसाध्विरूपयौवनशोभितं एवंदृष्ट्वातुतंबालाभर्तारंस्वमनोहरम् ६९ सुकन्यापूजयत्कांतंबहुमानपुरःसरम् भिषग्वरौजग्मतुःशक्रच्यवनाशिषसंयुतौ ७० च्यवनोपिस्वसौंदर्यसर्वसिद्धिसमन्वितः बुभुजेविषयान्सर्वान्भार्ययासमशीनलम् ७१ एतत्तेसर्वमाख्यातंयत्पृष्टोहंत्वयापुरा च्यवनस्यस्वरूपाप्तिरधिमासप्रभावतः ७२ च्यवनस्यरुरुःपुत्रःशुनकस्तस्यचात्मजः शुनकस्यात्मजाःसर्वेशौनकाद्यामहर्षयः ७३ अश्वमेधंयदाचक्रेशर्यातिर्नृपसत्तमः तस्मिन्यज्ञेमुनिर्भागंनासत्यायददौमुदा ७४ तदाशक्रोऽतिकोपेनहंतुंवज्रंसमाददे सवज्रंस्तंभयामासभुजमिंद्रस्यभार्गवः ७५ च्यवनोपिस्तुतःसर्वैर्मोचयामासवासवम् यज्ञभागभुजौदेवौकृतौशक्रेणसादरम् ७६ देवदुंदुभयोनेदुर्निपेतुःपुष्पवृष्टयः पूर्णेश्वमेधेतेसर्वेस्वस्वमाश्रममाययुः ७७ एतद्वःकथितमशेषतोमुनींद्रा यत्पृष्टःसदसिसुरेंद्रमानभंगः भागाप्तिर्भिषजमधीशयोःकृताया विख्याताच्यवनमुनेश्चकीर्तिरेषा ७८ इतिश्रीसप्तपुराणसारोद्धारेश्रीपु० मा० अधिकमासस्नानयोगेनच्यवनऋषेःस्वरूपप्राप्तिवर्णनंनामत्रयोविंशोऽध्यायः २३

७५ ७६ ७७ ७८ इतिश्रीपुरुषोत्तममाहात्म्यटीकायांत्रयोविंशोऽध्यायः २३

हेसूत १ प्रापनत् इतिशेषः २ ३ वेदध्वनिनामक ऋषिः ४ ५ ६ ७ ८ ९ १० तेनबटुना ११ १२ १३
१४ नानाविधंचिंतनमाह स्कंदेदृष्ट्वालोकाअपिमांसर्वेगर्हिष्यंतिचनित्यदा ममोदरंकथंजातंनजानेकेनहेतुना नस्पृष्टोस्तिममैवांगेस्वप्ने
हृदःपुमान् कथंत्यक्ष्याम्यहंदेहंव्याधिर्नोचेन्महत्तरं तदापृच्छामिभिषजंभेषजंमेसुखप्रदं विचार्यैवंतदाबाला पुनर्धैर्यंसमादधे यदिपश्यतिमांक

शौनकउवाच त्वयानुपंचमेऽध्यायेपुरावैकथितंमम अधिमासप्रसादेनबटुर्मुक्तोमहाभयात् १ बटुःकस्यसुतोब्रह्मन्कथंप्रेतत्वमागतः अधिमासप्रसादेनकथंमुक्तिंचकथ्यताम् २ सूतउवाच शृण्वंतुऋषयःसर्वेकथांपौराणिकींशुभाम् कथितानारदेनैवस्कंदायपरिपृच्छते ३ पुरात्रेतायुगेविप्रोवेदध्वनिसुतोबटुः शांडिल्यगोत्रसंभूतोमहत्सत्त्वोमहातपाः ४ भगिनीतस्यविख्यातानाम्नावेदवतीशुभा कर्मयोगेनसाबालावैधव्यत्वमुपागता ५ भ्रातुःपार्श्वेस्थितासाध्वीतपस्तपतिदुश्चरम् ब्रह्मचारीबटुःशश्वदूर्ध्वरेतामहातपाः ६ दैवात्कदाचिच्चबटुर्ज्वरेणातीवपीडितः तदाचस्खलितरेतोपरिधानेसुकोमले ७ प्रातर्वेदवतीस्नातुंगंगायांनिर्गतायदा बटुस्तांप्रत्युवाचाथभगिनींभावसंयुतः ८ वस्त्रंमदीयंभगिनीज्वरस्वेदयुतं शुचिः प्रक्षाल्यकार्यंविधिनामयास्नातुंनशक्यते ९ इत्युक्त्वावसनंगृह्यगतासावरवर्णिनी ऋतुस्नानशुभाचारापृष्टहनिसुमध्यमा १० अजानंतितदाबालादत्तंतेनाप्यजानता परिधायाऽशुचिर्वस्त्रंसस्नौदैवविमोहिता ११ वस्त्रलग्नंमहद्रेतस्तस्यायोनिमुपास्पृशत् जलार्द्ररुधिरंदृष्ट्वाप्रविष्टंतद्वरांगके १२ प्रविष्टमात्रंसुश्रोणीदधौगर्भंरविप्रभं मनसाचिंतयद्बालाविधिनाकिमिदंकृतं १३ मयानालोकितःस्वप्नेनकदाचिन्नरर्षभः कथंमेविकृतिर्जाताकुलदूषणकारिणी १४ नानाविधंचिंतयंतीगूढारहसिसंस्थिता दशमेमासिसंप्राप्तेनिशीथेनिजमंदिरे १५

श्चिन्महोदरसमन्वितां निंदिताहंभविष्यामिवृद्धानांपुरतःसदारोग-
श्चेद्दशमासेनसम्यग्विज्ञायतेमया गर्भवत्कुरुतेनित्यंश्यामोजातोममस्तनो गर्भश्चेन्मुक्तिमायातिदशमासान्नसंशयः विचार्यैवंतदाबालादुः

खेनमहतावृता रुदन्नेवचसेद्धे हे मंदभाग्येनाकिंकृतम् इत्युक्त्वामृगशावाक्षीरुरोदसुभृशंतदा हानाथकिंकृतंकर्मदुःखिताकिंकुलस्त्रियः गू-
हमानानिजांगानिगूढारहसिसंस्थिता नबुबोधजनाः केचित्तस्याश्चोदरविक्रियांइति १५ विस्मयमाह दृष्ट्वासुतंशुभाचाराविस्मिताविधिनोनि-
किंकृतंममैवंनमयापुत्रस्योत्पादनंकथं हादैवकिंकृतंधात्रात्वयासर्वंविबुध्यसे किंकरोमिक्वगच्छामिकमोक्ष्यामिचबालकम् भर्तृहीनाक-

प्रसूयततदाबालामृगांकसदृशंसुतं विस्मितामृगशावाक्षीरुरोदसुभृशंतदा १६ पश्चावसातदाकाशेवाणींदूतेनभाषि-
ताम् माशुचोमृगशावाक्षि विष्णुनाप्रेषितोस्म्यहम् १७ अयंतेसुभगःपुत्रस्तवराजीवलोचनः भविष्यतिमहाभाग्ये-
पिप्पलादोमहानृषिः १८ अस्यपुण्यप्रभावेनभर्त्राभ्रातृसमन्विता मदीयेभुवनेसाध्वीमोदयंतीरमासमं १९ एनंमुंच
शुचोमात्वंपिप्पलोस्तिसदैवतः इतोस्तियोजनार्द्धेनमुंचमात्वंविचारय २० इत्युक्त्वासगतोनाकेदूतस्त्वामतिशोभने व्यचिंत-
यत्तदाबालारुदंत्याकिंमयाश्रुतम् २१ श्रुतमेतद्यदासत्यमसत्यंवायदाभवेत् तथापिपरिमोक्तव्योबालोमेपिप्पलस्थले २२
इतिस्नात्वासातनयंस्वयंस्नाताशुचिस्मिता वस्त्रेणाच्छाद्यविधिनानिर्गतागहनेवने २३ योजनार्द्धेमहावृक्षंपिप्पलस्यमह-
त्तरम् विलोक्यरुदतीबालावृक्षमूलेमुमोचह २४ चुंबतीचारुनयनंपुत्रस्नेहादुवाचह किमकारित्वयापूर्वंपातकंहिमयास-
मम् २५ कथंत्यक्ष्यामिविपिनेत्वापुत्राद्यसुनिर्दया पुत्राःपुण्येनलभ्यंतेइतिजल्पंतिपंडिताः २६ किंकरोमिनशक्ताहंरक्षितुं
त्वांकथंचन विनासंगेनसंजातंविधिनैवविनिर्मितम् २७ इत्युक्त्वासुविशालाक्षीरुरोदसुभृशंतदा रुदित्वासुचिरंकालं
पुनर्धैर्यविलंबयत् २८

धंगेहेशक्त्यास्थापयितुंचिरम् यदिपश्यंतिमेबालंबांधवाश्चसहोदराः ताडयिष्यंतिमांगा-
ढंविधिनाकिमिदंकृतम् हाहादेवजगन्नाथपातकंकिमिदंकृतमिति १६ १७ १८ स्यास्यसीतिशेषः १९ २० अतिशोभनेहे-
लक्ष्मि २१ मेमया २२ स्नात्वास्नापयित्वा २३ २४ २५ २६ २७ २८ ६९ ६९

२९ मुखंरक्षतु माहेशो नासिकांनृहरिःसदा इत्यादि वनस्थदेवताः सर्वाः वृक्षाणामपिदेवताः अग्निश्चपवनश्चैवदिशश्चविदिशस्तथा रक्षंतुत्वां

त्यक्षामित्वांविशालाक्षांविधिनैवंप्रणोदितम् रक्षतुत्वांरमानाथः सर्वव्यापीसदाशिवः २९ रक्षांविधायबालस्यमुक्त्वामूलेवनस्पतेःजगामशनकैःसाध्वीपुनःपश्यतिबालकम् ३० इत्येवंमनसिविचिंतयंतिबाला तंबालंशुभ्रनयनंसुचारुवक्त्रम् गच्छंतीगुरुजनलज्जयागृहंसाशोकेनोद्विग्नमनाहिजगामसुभ्रूः ३१ स्नेहत्वाददतिविह्वलेनसामृतावैपैशाच्यंप्रतिदिनदुःखदंप्रपेदे तनुज्ञाताबटुइनिनाशनःस्वसायाः पैशाचींगतिमिहमंदधीःप्रपेदे ३२ मुक्त्वावेदवतीबालंवृक्षमूलेयदागता रुरोदबालःसुभृशंमातात्यक्तोमहावने ३३ रुदंतंबालकंदृष्ट्वावृक्षस्थाकपिकन्यका मृतंस्वंबालमुत्सृज्यतंबालंसमुपाददे ३४ स्तनंमुमोचतद्वक्त्रे विधिनासंप्रणोदितं बालंचुचुंबेजननींमत्वास्वांकमुपागतं ३५ पुपोषवानरीबालंपरमेणसमाधिना ववृधेबालकस्तद्वत्कलाभिश्चंद्रमायथा ३६ अश्वत्थफलवृक्षेणवानर्यापर्यतःपरां पुष्टिमापमहाराजबालोबालार्कसन्निभः ३७ एवंपंचाब्दिकोजातस्तदावानरनंदिनी मृतायमपुरंयाताबालस्नेहसमन्विता ३८ बालोपिमातरंदृष्ट्वामृतांशोकयुतःस्वयम् रुरोदसुभृशंतत्रलालितश्चसुलक्षणः ३९ रुदंतंबालकंवीक्ष्यवनस्थाःसर्वदेवताः रक्षांविदधिरेसर्वेवानराःसमुपागताः ४० तस्मिन्नवसरेकापिच्छमन्नारदमागतं दृष्टवान्बालकंसम्यवानरैःपरिवारितम् ४१ तंविलोक्यमयातत्रक्षणमात्रंविचारितम् शांडिल्यगोत्रसंभूतोबालोयंवटुनंदिनः ४२ एनंत्यक्त्वाअरण्येचबालकंमृतमातरम् निर्दयत्वंममैवस्यान्निर्दया निष्फलाःक्रियाः ४३ एवंविचार्यतंबालंगृहीत्वाकरपंकजे प्रातःशांडिल्यभवनेबालमाश्वासयन्पथि ४४

सदावत्सपक्षिणःपशवस्तथेति ३० ३१ ३२ ३३ ३४ ३५ ३६ अश्वत्थाश्वत्थफलवृक्षाणिचतेषांसमाहारः तेनपर्यंतः आसमंताद्भागेनपरांउत्तमांपुष्टिं ३७ ३८ ३९ ४० ४१ मयानारदेनेति स्कंदंप्रति नारदोक्तिः ४२ ४३ ४४ ६७

४५ ४६ ४७ ४८ हेमुनिपुंगव पिप्पलादंअकार्यमितिमंतव्यं नकिंतुकार्यमेव ४९ वाच्यया वागेंद्रियपटुतया मयानारदेन·

शांडिल्योपिचमांदृष्ट्वापरमादरसंयुतः दृष्ट्वासंपूज्यविधिनाबालकेनसमन्वितः ४५ प्रणाम्यपरयाभक्त्यामांप्रपच्छमुनी
श्वरः कस्यायंतनयःस्वामिन्कुतोलब्धस्त्वयाधुना ४६ शांडिल्यवचनंश्रुत्वामयैवोक्तोमहातपाः तवपौत्रोस्तिविप्रर्षेबटु·
वीर्यसमुद्भवः ४७ एनंगृहाणविप्रर्षेमयादत्तंमहत्तरम् मात्रापिरहितंचिप्रंवानर्यापरिवर्द्धितम् ४८ कुरुद्विजातिसंस्का
रेणाकार्यंमुनिपुंगव मयासहविधानेनपिप्पलादंकृतलक्षणम् ४९ इत्युक्त्वाद्विजसंस्कारैःसंस्कृत्याद्विजपुंगवैः विधायवा·
चयायुक्तंगायत्रीपाठितोमया ५० गायत्रीपठनादेवविधानेनविचक्षणः शांडिल्योपिमुदाबालंपुपोषपरमद्युतिम् ५१
वेदानध्यापयामासशास्त्राणिविविधानिच पिप्पलादोमहानासीद्विद्याविनयसंयुतः ५२ ब्रह्मचर्यव्रतपरस्तीर्थाटनपरा
यणः तीर्थाटनप्रसंगेनविंध्यपर्वतकानने ५३ पिशाचमिथुनंदूरप्रधावंतंददर्शह पिशाचीपुत्रपुत्रेतिगायंतीगगनेचरन्
५४ पिप्पलादोपितौदृष्ट्वाक्रोधव्याकुललोचनः भयसन्त्रस्तहृदयोमनसाचिंतयत्तदा ५५ किंकरोमिक्वगच्छामिपिशा
चौसमुपागतौ भक्षयिष्यंतिमांनूनंजातंजन्मनिरर्थकम् ५६ इतिचिंतयतस्तस्यशीघ्रमभ्याशमागतौ ज्वलत्कष्टोदुरा
चारौतंदृष्ट्वाप्रेमपूरितौ ५७ दूरंस्थित्वाप्यधावक्तौस्रवदश्रुकुलेक्षणौ पुत्रंदृष्ट्वातयोरासीन्मतिरत्यंतनिर्मला ५८ तदालिं
गनमिच्छंतौस्थितौप्रेमभरालसौ पिप्पलादोपितौदृष्ट्वानिर्भयःसमपद्यत ५९ प्रोवाचप्रणतोवाग्मीस्थितःप्रेताग्रतस्तदा यु
वांशीघ्रतरौप्राप्तौममभक्षणतत्परौ ६० कथंनभक्षतेयूयंपितराविवसंस्थितौ पिप्पलादवचःश्रुत्वाप्रोचतुस्तौनिशाचरौ ६१
त्वान्दृष्ट्वाविप्रवर्याद्यगतःक्रोधःकिलावयोः कस्त्वंकस्यासितनयःकिमर्थमिहचागतः ६२ ५० ५१ ५२ ५३ ५४

५५ ५६ अभ्याशंसमीपं ५७ रुत्वेतिशेषः ५८ ५९ ६० ६१ ६२ ५१ ६२

६३ ६४ ६५ ६६ ६७ ६८ आदिशब्देनज्वरार्तबटुवीर्ययुक्तवस्त्रपरिधानेनवेदवत्यागर्भधारणं ततोदशमासांतेप्रसूतस्यबालस्यपिप्पलवृक्षतलेत्यागादिकं ६९ ७० ७१ ७२ पिशाचाः शृणुमद्वृत्तांतंयदिस्पृष्टवंतिसादरं नारदस्यवचः श्रुत्वाबाल्यावस्थायदामम तदामयाधृतंचित्तेमातापित्रोर्विमोक्षणं नमातुर्मेपराधोस्तिनापितुर्मेस्तिकश्चन विधिनायेनमेभाविविधवानाभविष्यति निरर्थकंहिसंजातोऽस्मि।

सत्यंकथयविप्रर्षेसत्यंसर्वत्रपूज्यते तयोस्तद्वचनंश्रुत्वापिप्पलादोब्रवीद्वचः ६३ मात्रात्यक्तोऽतिगहनेजातमात्रोगृहं वने पिप्पलादोरुदन्बालोवानर्याहंप्रपोषितः ६४ पंचाब्दिकोयदाजातस्तदावानरनंदिनी मृतामांसापरित्यज्यगतावैवस्वतांतिकम् ६५ कुर्वंतंमांरोदनंतुनारदः समुपागतः मांदृष्ट्वाकरुणोविप्रोदेवर्षिः परमद्युतिः ६६ गृहीत्वामांकरेतत्रशांडिल्याश्रममानयत् शांडिल्यंप्राहधर्मात्मापौत्रोयंप्रतिगृह्यताम् ६७ बटुवीर्यात्समुत्पन्नोवेदवत्यांविधेर्बलात् तौचास्यमातापितरौपैशाचींयोनिमागतौ ६८ इत्याद्युवाचदेवर्षिः शांडिल्योपिमुदान्वितः पौत्रंमत्वातिप्रेमेणासंस्कारान्सञ्चकारह ६९ ततोहंनिर्गतोगेहात्पश्यन्सर्वत्रचेश्वरम् गृहस्थेनातिसक्तोस्मिविरक्तोस्मिमहामते ७० तीर्थाटनपरस्थास्मिमोक्षार्थंमातृतातयोः ज्ञात्वायः पितरौप्रेतौतयोर्मोक्षंनचिंतयेत् ७१ सपुत्रः कृमिवत्ज्ञेयोमृतोसौनरकंव्रजेत् एतदेवमहद्दुःखंनान्यद्दुःखंनिशाचरौ ७२ तस्माद्भक्षयमांशीघ्रंभाविनैवान्यथाभवेत् सूतउवाच श्रुत्वापिशाचस्तद्वाक्यंपुत्रेणैवंचप्रेरितम् ७३

यौपितरौमम तयोर्मोक्षेणशंकास्ति तीर्थानिचभ्रमामहे तयोर्दर्शनमाकांक्षीभ्रमामिगहनेवने येषांमातापितादुःखी तेषांजन्मनिरर्थकम् सर्वार्थसाधकोदेहोयाभ्यांदत्तोमहत्तरः पित्रोर्दुर्गतिमालक्ष्यमोक्षार्थंनयतेत्कृतः सएवकृमिवत्ज्ञेयस्तयोर्नैवांतरेकश्चित् मातापित्रोश्चमोक्षार्थंभ्रमंतंवसुधातले भक्षयध्वंनमेचिंतादेहनाशनसंभवा एकएवमहाचिंतानान्यंमनसिसंस्थितम् मातापित्रोर्नमेमोक्षोजातोमत्तोमहात्मनोरिति ७३ ५ ५ ५ ५

७४ ७५ ७६ ७७ ७८ ७९ ८० ८१ ८२ ८३ ८४ ८५

रुरोदसभृशंदीनपुत्राधिपरिपीडितः रुदित्वासचिरंकालंपुत्रायेवचनंब्रवीत् ७४ अहंवेदवतीपुत्रजननीतवनिर्दया
मयात्यक्तोसिबाल्येत्वंलोकवाद्विभीतया ७५ पुत्रतारयमांशीघ्रंपितरंतवसुव्रत पिशाचत्वेमहद्दुःखंनान्नंतोयंनावि
द्यते ७६ स्वमातुर्वचनंश्रुत्वापिप्पलादोतिदुःखितः रुरोदसभृशंदीनोननामचरणौतयोः ७७ पिशाचश्चपिशाचीचस
मुत्थायमुनीश्वर ममार्जपरमप्रीतौप्रफुल्लनेत्रपंकजौ ७८ शोकंमाकुरुपुत्रत्वंशोकपारंनलभ्यते तस्मादुत्तिष्ठशीघ्रंत्वंमो
क्षोपायंकुरु स्वतः ७९ श्रुत्वातयोस्तुवचनंमनसाचिंतयत्तदा मुक्तिःकेनप्रकारेणपित्रोर्मेअक्षयागतिः ८० तस्यज्ञाता-
त्रिकालज्ञोनारदोऽस्तिनचापरः इत्येवंचिंतयित्वातुमांसंस्मारमुनीश्वरः ८१ तस्याहंचिंतितंज्ञात्वागतस्तस्यांतिकंद्रुतम्
दृष्ट्वामांसचिरंनत्वापादयोरश्रुलोचनः ८२ यथाहंतारितोदुःखात्पितरावपितारय नारदउवाच शृणुवत्सप्रवक्ष्या-
मिपित्रोर्मोक्षविधिंशुभम् ८३ अधिमाससमायातोभवतोभाग्यकारणात् इतःपंचदिनेविद्वन्एतयोःपुण्यसञ्चयात् ८४
आगमिष्यतिपापानांपावनोहिमलिम्लुचः मलमोचयतेशीघ्रंनराणांशतजन्मना ८५ तस्मिन्स्नातिजलेशीतेसस्नातःसप्त-
सागरे अधिमाससमोनान्यःकश्चिदन्योजगत्त्रये ८६ नृणांसुपायोमोक्षस्यतस्माद्दृस्यामिसुव्रत पिशाचीचपिशाचश्चगृ
हीत्वापुलहाश्रमे ८७ कुरुस्नानंविशेषेणसर्वेमोक्षंगमिष्यथ इत्युक्त्वाहंद्विजस्याग्रेगतोनारायणाश्रमे ८८ पिप्पलादःस्व-
पितरौगृहीत्वागान्मयोदिते पुलहाश्रमेविशेषेणस्नात्वातेगण्डकीजले ८९ स्नात्वामासेतुसंपूर्णेतेनपुण्यप्रभावतः विमानं
विबुधैर्युक्तमुत्ततारचअंबरात् ९० दृष्ट्वाविमानंज्वलनार्कसन्निभंसविस्मितोभूत्किलपिप्पलादः तत्रस्थितास्तेविबुधा
स्तमूचु धन्यस्त्वयातारितःपितृवर्गः ९१

८६ ८७ ८८ ८९ ९० ९१ ९२

९२ ९३ ९४ ९५ इतिपुरुषोत्तममाहात्म्यटीकायांचतुर्विंशोऽध्यायः २४ ६७ १ २ ३ अनेकगुणैः शांतमैत्र्यादिगुणैः ४

मुक्त्वाशरीरंपितरौतदीयौदिव्यस्वरूपौवरभूषणाढ्यौ स्वरांगनाभिःपरिवीज्यमानौगतौविमानेनमुरारिधिष्ण्यम् ९२ स
पिप्पलादोपिपरिक्रमेणपृथ्वींपुनातीसहपितृसंघैः समंप्रियायाःप्रियपुत्रपौत्रैर्मलिम्लुचस्नानवशाद्विमुक्तः ९३ एतन्म
यातेकथितंसमग्रंपृष्टःपुराहंत्रिपुरारिसूनो संकीर्तितःपुण्यफलप्रदोसौमोक्षोवटोश्चापिहिवेदवत्सा ९४ शृण्वंतियेमो
क्षविधिंवटोश्चाधिमासतःप्राप्तवरप्रभावं तेवैगमिष्यंतिहरेर्निवासंस्नानेधिमासस्यफलंलभंते ९५ इतिश्रीसप्तपु
राणसा॰ श्रीपुरु॰ मा॰ वटुवेदवतीपिशाचयोर्मुक्तिकथनंनामचतुर्विंशोऽध्यायः २४ ६७ सूतउवाच श्रुत्वाव
टोश्चचरितंकुमारोतीवविस्मितः पप्रच्छभूयोदेवर्षिंनारदंदिव्यदर्शनं १ स्कंदउवाच कथितंभवतापूर्वंप्रह्लादोसुरसत्त
मः अधिमासप्रसादेनपार्षदत्वमुपागतः २ संक्षेपात्कथितंपूर्वंतन्ममाचक्ष्वविस्तरात् नारदउवाच शृणुवत्सप्रवक्ष्या
मिविस्तरेणयथातथम् ३ एकदाहंसमायातोप्रह्लादस्यपुरींप्रति प्रह्लादंभगवद्भक्तंतथानेकगुणैर्युतं ४ पुरंदृष्ट्वामुदा-
युक्तःपुनर्द्वारवतीमगात् आगतंनारदंदृष्ट्वावसुदेवोब्रवीद्वचः ५ कुतःसमागतोसिब्रह्मन्नदृष्टस्त्वममाखिलं नारदउवाच
स्वस्थलादहमायातःकृष्णदर्शनहेतवे ६ प्रह्लादस्यपुरीयादृक्तादृक्दृष्टानकुत्रचित् तद्दर्शनात्सचित्रोहंजातस्त्वानक
दुंदुभे ७ नारदस्यमुखाच्छ्रुत्वाप्रह्लादस्यपरांस्तुतिम् पप्रच्छप्रणयाविष्टोद्भुतंद्रुहिणनंदनम् ८ वसुदेवउवाच अ-
सुरस्यकथंविष्णोर्भक्तिस्त्रैलोक्यदुर्लभा एतन्मेसंशयंब्रह्मन्छेत्तुमर्हस्यशेषतः ९ नारदउवाच पुरासत्ययुगेब्रह्मन्-
ब्राह्मणोवेदपारगः भृगुवंशसमुत्पन्नोनाम्नायज्ञनिधिःस्मृतः १० तपस्तेपेचसलिलेवर्षाणामयुतंतदा तपसाक्षीणसर्वां
गःकृशोधमनिसंततः ११

५ ६ ७ ८ ९ १० ११ ६७

६८

१२ १३ १४ १५ १६ तस्याधिमासस्यस्नानयोगेनदासीपुत्रोपिनारदत्वंप्राप्तः साकथाविस्तारेणत्रयोविंशाध्यायस्थाऽपंचाशतश्लो

चरन्सर्वाणितीर्थानिविष्णुदर्शनलालसः एकदामार्गमध्येतंदत्तात्रेयोब्रवीद्वचः १२ किमर्थंक्लिश्यसेब्रह्मन्नात्मानंजग
दीश्वरं भक्त्यासंतुष्यतेदेवोनतपोभिः कथंचन १३ दत्तात्रेयवचःश्रुत्वाप्रोवाचयज्ञनिधिस्तदा भक्तिःसंजायतेकेनतन्मेवदमु
नीश्वर १४ दत्तात्रेयउवाच तवभाग्यान्मुनिश्रेष्ठसमायातोमलिम्लुचः विष्णुमासःसविज्ञेयःकोटियज्ञफलप्रदः १५
तन्मासेकुरुतेस्नानंतीर्थेशीतलवारिणा सस्नातःसर्वतीर्थेषुतेनात्मापावितोध्रुवम् १६ तस्यस्नानप्रसादेनदासीपुत्रोपि
नारदः देवर्षित्वंसमापन्नोनियमस्यनुपालनात् १७ माक्लेशयशरीरंत्वंसततंमुनिसत्तम अधिमासकृतंस्नानंतेनासौसु
फलंतपः १८ कृतवीर्येणनृपतातपस्तप्तंमहत्तरम् वर्षाणामयुतंपूर्णंनप्रसन्नोभवद्धरिः १९ नाम्नापद्मिनितद्भार्यास्नानं
चक्रेमलिम्लुचे मासद्वादशकंपूर्णंविधिनैवयथोदितम् २० तदाविष्णुःप्रसन्नोभूत्कार्तवीर्यसुतप्रदः अजेयःकार्तवीर्योभू
त्सदेवासुरमानवैः २१ अधिमासप्रसादेनजितोराजादशाननः तत्वयाविस्मयःकार्यःकुरुस्नानंमलिम्लुचे २२ यज्ञनिधि
रुवाच कृतवीर्यसुतःकश्चित्कस्मिन्वंशसमुद्भवः कस्मिन्नाराधितोविष्णुस्तन्मेवदसविस्तरात् २३ दत्तात्रेयउवाच यदुवंश
समुत्पन्नोहैहयोऽतीवधार्मिकः कृतवीर्योभवत्पुत्रस्तस्यभूपाग्रणीर्महान् २४ अपुत्रःसतपस्तेपेमन्त्रैराश्रममाययौ वेद
श्रीपद्मिनीभार्यावार्यमाणापिसाययौ २५ नत्वात्रिमनुसूयांचतदाज्ञप्तोमहत्तपः चक्रेप्रमदयायुक्तोमनस्याधायकेशवं २६
एवंसंतप्यतस्तस्यवर्षाणामयुतंगतं नतथापिप्रसन्नोभूत्केशवःकेशिसूदनः २७ कृतवीर्योभवत्क्षीणोमेदमांसविवर्जितः
अस्थिस्नायुमयंकांतंदृष्ट्वाचात्यंतदुःखिता २८ पद्मिनीपद्मपत्राक्षीत्यनुसूयांतिकंगता नत्वाऽनुसूयांरुदतीप्रोवाचार्ता
वदुःखिता २९

कव्याख्यायांकथिताविज्ञेया १७ १८ १९ २० कार्तवीर्यस्यासौसुतस्सुतंप्रददातीति २१ २२ २३ २४ २५ २६
२७ २८ २९

मातर्मैतप्यतोभर्तुर्वर्षाणामयुतंगतम् भर्ताममातिसंजातोक्षीणांगःक्षीणकल्मषः २९ प्रसन्नोनास्तिदेवेशःकारणंत·
द्विचिंत्यतां अनसूयावाच नैवप्रसन्नोभगवान्येनकेनप्रजायते ३० तपसाऽतिप्रियत्वेनभक्त्यातुष्यतिकेशवः भक्तिंकु·
रुसदावत्सेभद्र्याकमलापतेः ३१ तवैवभाग्यात्सुभगेअद्यतःपंचमेहनि अधिमासःसमायातोकेशवस्यातिवल्लभः ३२ य·
स्मिन्स्नानंजपोहोमःस्वाध्यायःपितृतर्पणं सर्वंकोटिगुणंबालेभवत्येवनसंशयः ३३ तस्मिन्स्नानंकुरुशुभेविधिंतस्यमयो
दितम् भक्त्याद्वादशवर्षाणिप्रसन्नस्तेभविष्यति ३४ इत्युक्ताकथयत्सर्वंविधिंवेदविदोदितम् श्रुत्वाविधिंतथाचक्रेस्नानं·
मासिमलिम्लुचे ३५ कंदमूलफलाहाराविष्णुपूजनतत्परा एकादशीव्रतासक्ताविरक्ताविषयप्रति ३६ अनुसूयाप्रसादेनस्ना
नंकृत्वामलिम्लुचे संपूर्णद्वादशेमासेप्रसन्नोभूज्जनार्दनः ३७ गरुडोपरिचारूढोप्रादुरासीच्चतुर्भुजः प्रोवाचघनगंभीरोवरंवर
यसुव्रते ३८ त्वयाहंतोषितोभद्रेअधिमासेशुभमज्जनात् श्रुत्वाविष्णोस्तुवचनंप्रसन्नापद्मलोचना ३९ प्रोवाचप्रणताभूमौपतिंदे
हिवरोत्तम विष्णुःप्रोवाचविप्रेंद्रवरंवरयवांछितम् ४० त्वसत्यातोषितश्चास्मिअधिमासेषुमज्जनात् श्रुत्वाविष्णोश्चवच·
नंराजाप्रीतमनास्तदा ४१ वरंवव्रेनृपश्रेष्ठसर्वेषामपिदुर्लभम् पुत्रंदेहिमहाविष्णोत्रैलोक्येप्यपिपूजितं ४२ संग्रामेसर्वजंतू
नामजेयमतिभीषणम् एकेनैवत्वयाजंतुशक्यंनान्यैश्चराचरैः ४३ सहस्राबाहवोयस्ययुद्धतःसहसाभवेत् सर्वसिद्धियुतंपु
त्रंयदितुष्टोसिकेशव ४४ कृतवीर्यवचःश्रुत्वाप्रोवाचजगदीश्वरः एवंविधःसुतःशूरोभविष्यतितथोदितः ४५ विप्रैःसमंयदा
वीर्यंकरिष्यतिविनष्टधीः तदातंचैहनिष्यामिभूत्वाभार्गवनंदनः ४६ इत्युक्तांतर्दधेविष्णूराजास्वपुरमागमत् पद्मिन्यांत
नयंलेभेकार्तवीर्यंमहाबलम् ४७

४८ ४९ ५० ५१ ५२ ५३ ५४ ५५ ५६ ५७ ५८ ५९ चिविधाचिंतनमाह यदासुरोभविष्यामिविष्णोर्द्वे
षीनदाध्रुवम् भविष्यामियतः पापयोनौपापाहिमेमतिः पापबुद्धौहरेद्वेषोवैष्णवानांचनिंदकः द्वेषात्तस्यापिनरकंभवत्येवनसंशयः पूर्वंमयातपन्थी

एतत्तेकथितंविप्रयत्पृष्टोऽहंत्वयानघ तस्मात्कुरुमहाभागस्नानंमासिमलिम्लुचे ४८ स्नानतःसिद्धयःसर्वा भविष्यं
तिनसंशयः इत्युक्त्वांतर्दधेसद्योदत्तात्रेयोमहातपाः ४९ ततोयज्ञनिधिःस्कंददध्यौचित्तंमलिम्लुचे अधिमासंतुप्रथम
मक्षारलवणेनवै ५० द्वितीयंमलमासंतुचकारैकांतरेणवै हविष्यान्नेनतृतीयंचतुर्थंफलभोजनैः ५१ एकान्नेनपंचमंवै
पयोभक्ष्येणचापरम् सप्तमंतुयवाहारैरष्टमंदानभोजनैः ५२ चांद्रायणेननवमंदशमंपत्रभक्षणैः एकादशंतुमौनेनद्वा
दशंजलपानतः ५३ भूमिशायीब्रह्मचारीनित्यंविष्णोःप्रपूजकः एकदाजान्हवीतीरेमायापुर्यांमहात्मनः ५४ कुर्व
तःसेवनंविष्णोरगस्त्यस्तत्रचागतः विष्णुसेवांप्रकुर्वाणोदृष्ट्वागस्त्यंमहामुनिं ५५ ननाममनसामौनीनाभ्युत्थानपरस्प
रम् नमस्कारक्रियाहीनंदृष्ट्वागस्त्यश्चुकोपह ५६ भोभोयज्ञनिधेमूढमांनजानासिमंदधीः नाभिवादयसेयस्माद्दृष्ट्वामां
समुपागतम् ५७ तस्मादसुरयोनौत्वंभविष्यसिदुरात्मनि श्रुत्वाशापंमुनेस्तस्यमौनव्रतपरायणः ५८ नचक्रेत्वभिवा
दंचसेवाभंगभयाद्द्विजः यातेमुनौस्वनियमान्कृत्वापूर्णान्समंदधीः ५९ चिंतयित्वासविविधंमरणायकृतोद्यमः स्ना
त्वाजान्हवितोयेऽसौदर्भानास्तीर्यसंस्थितः ६० एवमन्नंजलंहित्वासंस्थितोदिनपंचकं तपसातस्यविप्रर्षेश्चकंपेभुवनत्र
यम् ६१ देवादीन्कंपितान्दृष्ट्वाविष्णुःप्रोवाचतान्प्रति शृणुध्वंभोःसुराःसर्वेज्ञातंवोदुःखकारणं ६२ इत्युक्त्वासर्ववृत्तां
तंकथयित्वासविस्तरात् सर्वदेवगणैःसार्द्धमगस्त्येनसमन्वितः ६३

पौंस्नातामासामलिम्लुचाः सर्वेनिष्फलतांयाताशापा
त्तस्यमहामुनेइति ६० ६१ ६२ सर्ववृत्तांतंयज्ञनिधेः अगस्तिशापादिकम् ६३ ६४ ६५

मासस्त ४
पुरु·मा· १३
अ· २५

६४ ६५ ६६ ६७ ६८ ६९ ७० ७१ ७२ ७३ ७४ ७५ ध्रुववृत्तांतमाह स्कांदे ब्रह्मानारदंप्रत्याह पुरासत्ययुगे विशालनगरे कहोत्रब्राह्मणभार्या विशालाक्षी पुत्रार्थंदिव्यवर्षशतं विष्णोस्तपस्तप्तवती प्रसन्नोविष्णुः वरंवरयेत्युवाच तदाविशालाक्षीउवाच हेईश परमधार्मिकः तस्योपरि अन्यः महीपतिः नभवेत् एवंराजा उततदंते पितृभ्यांसह मुक्तिंप्राप्नुयादेवं पुत्रंदेहि हेस्त्रि विप्राणांराज्यंन·

विप्रपार्श्वमुपागम्यवाक्यमेतदुवाचह उत्तिष्ठोत्तिष्ठविप्रर्षेवरंवरय माचिरम् ६४ कुंभयोनेर्वचःसत्यंकृतायास्यसिमत्सदम् हिरण्यकशिपोर्गेहेदैत्यराजस्यधीमतः ६५ भावितस्यैवतनयोप्रल्हादेतिसमाख्यया भक्तराजेतिविख्यातांत्वं·सर्वत्रगमिष्यसि ६६ गर्भस्थस्यापितेज्ञानंदास्यत्येवहिनारदः यदाहठेनचपितात्वांहंतुंप्रपतिष्यति ६७ तदात्वद्रक्षणार्थायकृत्वारूपंनृसिंहकं घातयिष्यामितंपापंमद्भक्तेदुःखपातिनम् ६८ स्थापयिष्यामिराज्येत्वांदैत्यदानवपूजिते मद्भक्तानांवरिष्ठस्त्वंतदारम्यभविष्यसि ६९ तस्मादुत्तिष्ठविप्रर्षेमात्यजस्वकलेवरम् दैत्ययोनौभवत्कीर्तिंगायंति सर्वमानवाः ७० इत्युक्तःसद्विजश्रेष्ठोतथेत्युक्त्वासमुत्थितः विष्णुरंतर्दधेसद्योविप्रोयज्ञनिधिस्ततः ७१ सएवदैत्येंद्रगृहेजातोप्रल्हादसंज्ञया एतत्तेसर्वमाख्यानंयत्पृष्टोऽहंत्वयाऽनघ ७२ पूर्वजन्मकृतांभक्तिंनविस्मारसदैत्यराट् पूर्वजन्मनियेभक्तास्तेभविष्यंतिपार्षदाः ७३ सूतउवाच देवर्षेर्वचनंश्रुत्वावस्कदेवोऽतिहर्षितः अधिमासव्रतंचक्रेनारदेनोपदिष्टितं ७४ स्कंदोपिनारदमुखाच्छ्रुत्वाऽऽख्यानमनुत्तमं प्रहर्षंपरमंलेभेनारदोगतवांस्ततः ७५ सूतउवाच तस्मात्सर्वप्रयत्नेनत्वधिमासव्रतंचरेत्

क्षत्रियापांतत् स्मृतं उतराज्यांते नूनंनरकमस्ति तथापि तवभक्त्या व्रतचर्यया प्रसन्नोस्मि इहजन्मनि कृयज्ञनामकः तवपुत्रः भविष्यति समार्कंडेयोपदेशेन अधिकमास शतस्नानेन कल्पांतरे ध्रुवजन्म प्राप्यराज्यंकृत्वा सुताभ्यांसह ध्रुवपदंप्राप्स्यति इत्युक्त्वाविष्णुः अंतर्दधे ततः कहोत्रात् विशालाक्षीगर्भंदधौ पूर्णमासे बालंप्रसुवे तस्यकृयज्ञइति नामकरणंचकार

नः प्राप्तद्विजातिसंस्कारः विषयेषु विरक्तः गायत्रीब्रह्मजपन् कियद्भिर्दिवसैः पितरौ मृतौ तदा तत्सारलौकिकं कृत्वा तीर्थयात्रार्थं त्रिवारं भूप्रदक्षिणां कृत्वा गंधमादने दशसहस्रवर्षं तपश्चचार तत्रैकदा मार्कंडेयः कृयज्ञं तपोनिष्ठं दृष्ट्वा प्रोवाच हे सुयज्ञ पूर्वं त्वयाचातपस्तप्तं विष्णुना वरोपि दत्तः अतः मलमासशतस्य स्नानं कुरु तदा विष्णुप्रसन्नो भविष्यतीत्युक्त्वा गतः कृयज्ञोपि विधिना शतमलमासस्नानं चकार तदा प्रसन्नो विष्णुः तमुवाच हे कृयज्ञ तवमातापि पूर्वं तपस्तप्तवती अतः द्वितीये कल्पे उत्तानपादगृहे त्वं पुत्रत्वं प्राप्य बालत्वे एव नारदोपदेशेन ममाराधनं करिष्यसि सुनीतिनामा ते माता-

अधिमासप्रसादेन ध्रुवोपि ध्रुवतां गतः ७६ अधिमासेपि ये स्नानं करिष्यंतीह मानवाः सर्वपापविनिर्मुक्तास्तेपि यांति हरेः पदम् ७७ मानुषं जन्म संप्राप्य भुक्तिमुक्तिफलप्रदम् अधिमासेषु न स्नाति तेनात्मा वंचितः खलु ७८ तस्मात्सर्वं परित्यज्य स्नानं दानं समाचरेत् अणुकृतं भवेद्भूरि कालपात्रप्रसंगतः ७९ कालपात्रप्रसंगेन या कथा कथिता पुरा रमायै विष्णुना दिव्या तां शृणुध्वं द्विजोत्तमाः ८० इति श्रीसप्तपुराणसारोद्धारे श्रीपुरुषोत्तममासमाहात्म्ये पूर्वजन्मकृतअधिमासपुण्ययोगेन प्रह्लादस्य पार्षदत्वप्राप्तिवर्णनं नाम पंचविंशोऽध्यायः २५ ५ ९

विष्णुरुवाच सत्पात्रेषु च यद्दत्तं तत्सर्वमक्षयं भवेत् कुपात्रेषु च यद्दत्तं तत्सर्वं निष्फलं तथा १ लक्ष्मीरुवाच पात्रभूतः कथं ज्ञेयो योत्यपात्रः कीदृशो मतः पात्रेऽपात्रे च यद्दत्तं तत्फलं वद मेऽच्युत २

विशालाक्षी भविष्यति सुहोत्रोपि उत्तानपादाख्यो नृपः भविष्यति त्वं च षट्त्रिंशत्सहस्रवर्षं भुवः राज्यं कृत्वा मातृभ्यां सह मोक्षं प्राप्स्यसि इत्युक्त्वांतर्दधे स कृयज्ञः अधिकशतस्नानपुण्येन ध्रुवजन्म लब्ध्वा ध्रुवपदं प्राप्त इति ७६ ७७ ७८ ७९ ८० इति श्रीपुरुषोत्तममाहात्म्यटीकायां पंचविंशोऽध्यायः २५ ५ अथ कुपात्रदानफलमाहास्मिन्नध्याये १ २

इत्येवमिति पात्रापात्रलक्षणं विस्तरात्कथयामीति प्रतिज्ञातं तत्रकीदृशंपात्रापात्रलक्षणमिति जिज्ञासायां तल्लक्षणान्याह विष्णुः पात्रापात्रविचारस्तुबुधैः कार्यःप्रयत्नतः यथादासीसुतैर्दत्तंश्राद्धंवंध्यासुतमैथुनं विष्णुत्वंचतथादानमपात्रेचेदवर्जितं अकालेयाकृतासंध्यातर्पणंतिलवर्जितम् निष्फलंचतथादानमपात्रेचेदवर्जितं संध्यास्नानपरिभ्रष्टोसालस्योनिजकर्मणि वेदाध्ययनहीनश्च द्यूतकर्मरतश्चयः दासीप्रियोनृतालापीविधुरःकुष्टसंयुतः हीनांगःपतितोयश्चतथाज्ञातिबहिष्कृतः राजसेवापरोयश्चक्रयविक्रयकृत्तथा द्विजःकुपात्रभूतोयंतद्दत्तंनिष्फलंस्मृतं सदाचारपरोधीरोस्यः स्वकर्मणि वेदशास्त्रेषुसंपन्नः शांतोदांतोजितेंद्रियः श्रोत्रियोममभक्तश्चपात्रभूतोद्विजःस्मृतः अन्यच्चपुराणसंहितायां क्षमास्पृहादयासत्यं दानंशीलंतपःश्रुतं एतदष्टांगमुद्दिष्टंपरमंपात्रलक्षणं स्वाध्यायाढ्यंयोनिमंतंप्रशांतंचैतानस्थंपापभीरुंबहुज्ञं स्त्रीषुक्षांतंधार्मिकंगोशरण्यंव्रतैःकतंतादृशंपात्रमाहुः ब्रह्मचारीभवेत्पात्रंपात्रंवेदस्यपारगः पात्राणामुत्तमंपात्रंशूद्रान्नंयस्यनोदरे किंचिद्वेदमयंपात्रंकिंचित्पात्रंतपोमयं असंकीर्णंच-

सूतउवाच इत्येवंरमयापृष्टोभगवान्विष्णुरव्ययः

यत्पात्रंतत्पात्रंतारणेक्षमं नाश्मपात्रेजलेक्षिप्तंयथातरतिनिर्भयम् नतथाताम्रयंथिश्चतोयंक्षिप्तं व्रजत्यधः पुराणशब्दवेत्तारंबोधकंश्रोतृणांनृणां तंपात्रंदानमानस्यसत्यमाहुर्मुनीश्वराः स्वकष्टोपार्जितंद्रव्यंयेनजीवोद्विजीवति तत्परीक्ष्यधियासम्यक्सत्पात्रेविनियोजयेत् नविद्ययाकेवलयातपसावापिपात्रता यत्रवृत्तइमेचोभेतद्धिपात्रंप्रचक्षते ब्राह्मणोष्टविधःप्रोक्तः पांथकश्रुतिभिःप्रिये तेषांपरंपरश्रेष्ठोविद्यावेत्ताविशेषतः ब्राह्मणानांकुलेजातोजातिमात्रोद्विजोभवेत् अनुपेतःक्रियाहीनोजातिमात्रःसउच्यते षट्कर्मनिरतोविप्रःश्रोत्रियोनामधर्मवित् वेदवेदांगतत्वज्ञः शुद्धात्मापापवर्जितः शेषश्रोत्रियवत्प्राज्ञः सानूचानइतिस्मृतः अनूचानगुणैर्युक्तोयज्ञस्वाध्यायतत्परः भ्रूणइत्युच्यतेशिष्टैःशेषभोजीजितेंद्रियः वैदिकंलौकिकंचैवसर्वज्ञानमवाप्यच आश्रमस्थोवशीदांतऋषिकल्पइतिस्मृतः ऊर्ध्वरेतातपस्वीचनियताशीरसंशयी शापानुग्रहशक्तश्चसत्यसंधोभवेदृषिः ध्यानस्थोनिष्क्रियोदांतस्तुल्यमृत्कांचनोमुनिः अयाचितव्रतंयस्यविष्णुभक्तिपरायणः ब्रह्मवेत्तामहालगाद्यष्टमोर्हि ग

तमः त्रिशुक्लानामपिविप्रेंद्राः पूज्यंतेसवनादिषु प्रतिग्रहसमर्थोहिकृत्वाविप्रः प्रतिग्रहं सतारयतिदातारमात्मानंचस्वतेजसा तस्मात्पात्रायदातव्यं स्वल्पंवामहदप्युत समंचद्विगुणंचैव साहस्रंचतथाक्षयं पात्रभेदतयाकांते भवत्येवफलंमहत् समंफलंतुमूर्खाय दातुर्भवतिदानतः सबंधिनेचविप्रायदत्तंद्विगुणतामियात् सहस्रगुणमाचार्येदत्तंस्याच्चकुटुंबिने निस्पृहायचशांतायदत्तमक्षय्यतांव्रजेत् वक्ष्यमाणांस्तुषट्देवि ब्राह्मणानृषिसत्तमः अब्राह्मणानितिब्रूयान्नित्यंशातातपः कलौ आद्यस्तुप्रथमःप्रोक्तोऽदातासंध्याविवर्जितः द्वितीयोराजभृत्यश्चसंध्याहीनोथमत्सरी क्रयविक्रयकर्ताचपूर्ववत्तृतियोमतः सर्वयाजीचतुर्थः स्याद्द्वादशाशीकुचैलकः ग्रामस्थानांचसर्वेषांश्राद्धकार्येचतत्परः सूतकान्नंचयोभुंक्तेसंध्याहीनस्तुपंचमः ग्रामस्यनगरस्यापिदूतत्वंचकरोतियः निद्रांचकुरुतेनित्यंस्नानदानविवर्जितः सषष्ठोब्राह्मणः प्रोक्तस्तेभ्योदत्तंनिरर्थकम् तस्मात्पात्रगतंदानंहर्षयुक्तंप्रजायते सगुणंनिर्गुणंवापिब्राह्मणंवेदपारगं नातिक्रमेद्गृहासन्नंतस्मैदेयंयथारुचिः यस्यचैकगृहेमूर्खोदूरेचापिगुणान्वि-

पात्रापात्रलक्षणंवैकथयित्वासविस्तरात् ३ तत्फलंसेतिहासंचकथयामासवैहरिः विष्णुरुवाच पात्रेदत्तंतुयद्दानंवर्धतेशुक्लचंद्रवत् ४ अपात्रेनिष्फलंज्ञेयंह्यग्निभस्महुतयथा अत्रतेकथयिष्यामिइतिहासपुरातनम् ५

तः बहुश्रुतायदातव्यंनास्तिमूर्खेव्यतिक्रमः ब्राह्मणातिक्रमोनास्तिविप्रेविद्याविवर्जिते ज्वलंतमग्निमुत्सृज्य कथंभस्मनिहूयते जामात्रेभागिनेयायदौहित्रायतथैवच सकामैर्दीयतेदानंनिष्कामैस्तुसुपात्रके जामात्रेदीयतेदानंदुहितुःसुखमिच्छता स्वसृसुखंतथोद्दिश्यभागिनेयायदीयते सर्वलोकोक्तिमुत्सृज्यपुंसाशुद्धफलेप्सुना सुलक्षणायपात्राय दत्तस्यांतोनविद्यते दात्राक्रोधोनकर्तव्योदानकर्मणिसर्वदा तेनमत्सुपकारायनदेयंदानमुत्तमम् एतादृशायपात्रायगुप्तदानंमहाफलं लोकैर्नज्ञायतेयद्वत्तथादेयंसुपात्रके उप्तंबीजंभूमिमध्येमत्यसंदर्शयतेचयत् कुलंवा पक्षिणश्चान्येभक्षयंतितद्दानरात् गोरक्षकान्वाणिजकान्तथाकारुकुशीलवान् प्रेष्यान्वार्धुषिकांश्चैवविप्रान्शूद्रवदाचरेत् रुदत्यन्नेदीयमानंकिंमयादुष्कृतंकृतं अश्रोत्रियस्यविप्रस्योदरेमेतोभविष्यति सन्यासिनेनदातव्यंविनापक्वान्नमंदिरे यतस्तद्धस्तगंद्रव्यंदातारंनरकंनयेत् मयापात्राणिप्रोक्तानिदानार्थंप्रकृतायहिद्विति ३ ४ ५

६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७

आसीत्पुराकृतयुगेब्राह्मणोवेदपारगः सोमदत्तेतिविख्यातोममभक्तिपरायणः ६ तत्पत्नीसोमदत्तीचपतिभक्तिपराय
णा तस्यैकस्तनयोजातः स्वानुरूपगुणान्वितः ७ गृहभारंस्कृतेन्यस्यतपसेनिर्गतोवनम् प्रविष्टःसोमदत्तश्चवनमध्येऽ
तिदारुणे ८ तत्रद्वौपुरुषौदृष्ट्वातत्कालमरणोन्मुखौ तयोःपार्श्वेद्विजोगत्वातावुवाचाथविस्मितः ९ कौयुवांकथ्यतांम-
त्स्यांकिमर्थंवनमागतौ इत्युक्तौसोमदत्तेनप्रवक्तुंनैवशेकतुः १० तृषार्तावितिविज्ञात्वाबभूवदययार्द्रधीः कमंडलुस्थितंतो-
यंकर्पूरोशीरवासितं ११ पानीयंयत्नतस्ताभ्यांपाययित्वाद्विजोत्तमः विज्वरौतावुभौदृष्ट्वापुनर्वाक्येदमब्रवीत् १२ कौयु
वांकुतआयातावुच्यतांपुरुषोत्तमौ तयोरेकउवाच अहंवसामिविप्रेंद्रनगरेनागसाह्वये १३ नाम्नातुयमुनादत्तोशु-
क्लवृत्तिंकरोम्यहम् चतुर्दशसुविद्यासुनिष्णातोवैष्णवःपरः १४ समित्कुशफलार्थोहमागतोत्रमहावने ग्रीष्मदाहेन
तप्तोहंतृषयाबहुपीडितः १५ पतितोहंद्विजश्रेष्ठतदात्रमरणोन्मुखः रक्षिताहिममप्राणाजलदानेनमृत्युतः १६ किंबहू-
क्तेनभोविप्रप्राणदानंत्वयाकृतम् स्वस्त्यस्तुतेगमिष्यामिस्वगृहंत्वत्प्रसादतः १७ मयायद्यत्कृतंकर्म अग्निहोत्रादिकं
द्विज तदुत्पन्नंचयत्पुण्यंतद्दशांशंददाम्यह १८ इत्युक्त्वाप्रददौतस्मैपुण्यंगेहंततोगतः इतरउवाच पुराहंब्रह्मदाया
दोनाम्नाद्वैरथोद्विजः १९ अभक्ष्यभक्षकोवेश्यागामीचौर्यकरःसदा स्त्रियमेकांगृहीत्वाहंनिर्गतोस्मिगृहाद्बहिः २०
विचरामिवनेत्वस्मिन्सर्वप्राणिविहिंसकः दशवर्षाणियातानिग्रामेस्मिन्ममतिष्ठतः २१ उपवासत्रयंजातंनाप्तमामं-
हिंसांप्रतम् स्त्रियाद्यप्रेरितोहंवैपिशितार्थेमहावने २२ मृगपृष्ठगतश्चाहंमांसलोभीशरासनः आगतोस्मिन्महाघोरेवने
जलविवर्जिते २३ पीडितोस्मितृषात्यर्थंतप्तोहंरविरश्मिभिः रक्षिताहिममप्राणाजलदानेनमृत्युतः २४

१८ १९ २० २१
२२ २३ २४

२५ २६ २७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ एवमिति पापिनां पुण्यशीलानां-
चगतिंप्रोवाचेत्युक्तं तत्रकीदृशींगतिंप्रोवाचेत्यत्र स्कांदे यमउवाच शृणुष्वद्विजशार्दूलकथयामिसमासतः दंडार्हागौरवार्हाश्चेनयंतिमनुजायथा अनि-

स्वस्त्यस्तुतेगमिष्यामिस्वगृहंत्वत्प्रसादतः इत्युक्त्वास्वगृहंयातोदृष्टोदेवरथोद्विजः २५ विष्णुरुवाच तोजीवयित्वाजलदानतस्तुनारायणस्याश्रममाजगाम स्वर्गापवर्गप्रदमीश्वरंमांजहौशरीरंहृदिसन्निधाय २६ अथागताप्रियेतत्रयमदूताश्चदारुणाः गृहीत्वासोमदत्तंतंनिन्युःसूर्यसुतांतिकम् २७ भीमरूपंयमंदृष्ट्वासोमदत्तोऽब्रवीत्तदा सोमदत्तउवाच यत्पृच्छामितुश्रेष्ठतद्वदस्वजनांतकृत् २८ पापिनोयेदुराचारादेवब्राह्मणनिंदकाः त्वदीयमीदृशंरूपंतेपश्यंतिनराधमाः २९ सदाचाररतायेचसुरभूसुरपूजकाः पश्यंतितेसौम्यरूपंवदत्येवंमहाजनाः ३० मयातुनकृतंपापंस्वल्पंवाबहुलंप्रभो भीषणंक्रूरमत्युग्रंरूपंतेदृष्टवान्कथम् ३१ यमउवाच सत्यमुक्तंत्वयाविप्रनासत्यंविद्यतेक्वचित् सुशीलोसिविपापोसिसर्वंजानाम्यहंद्विज ३२ त्वयायच्चरितंपापंसहसातच्छृणुष्वमे गच्छतातपसेरण्यंतृषार्तोब्राह्मणोत्वया ३३ जीवयित्वांबुदानेनमूर्छितोमरणोन्मुखो नपारेकस्त्वनाचारपरःपातककृद्दूरः ३४ नित्यंकरोतिपापानितिष्ठत्यद्यापिभूतले इदमेवत्वयापापंकृतमज्ञानतोद्विज ३५ अतस्त्वमपिविप्रेंद्रजलपात्रप्रदानतः कुपानेनरकेतावत्तिष्ठयावत्समर्त्यगः ३६ श्रुत्वासूर्यसुतस्यैवंवचनंभयविह्वलः ब्राह्मणःसोमदत्ताख्योयमंवचनमब्रवीत् ३७ सोमदत्तउवाच पापेनाल्पीयसादेवईदृशंदुःखमश्नुते ज्ञात्वापापानिकुर्वंतिगतिस्तेषांचकावद ३८ एवंविप्रवचःश्रुत्वायमस्तस्मैसविस्तरात्

रोगदश्चैवकृतघ्नोनास्तिकःशठः स्वर्णस्तेयीसुरापीचसमेदंड्योनसंशयः वेदार्थनिंदकोयस्तुतथाविश्वासघातकः परदाररतोयस्तुसमे० हिंसकोऽसत्यवादीचरसविक्रयकृद्विजः परद्रोहकरोनित्यंसमेदं० कूटसाक्ष्यप्रदोयश्चवृथाद्वेषपरायणः द्विजदेवस्वहारीचसमेदं० भेदकृच्छिवविष्णोश्चशिशुघ्नोगुरुदारगः दासीप्रियोनरोयश्चसमेदं०सदास्पृशति

योवह्निंब्राह्मणंस्करश्मिंयतिं अभक्ष्यभक्षकोयश्चसमेदं॰ पूर्वंपंचमहायज्ञाद्योभ्रात्यन्तोद्विजाधमः फलंमूलंपयोवापिसमेदं॰ परद्रव्या।
चौरपरायणः वृद्धापमानदोयश्चसमेदं॰ धर्मपत्नींपरित्यज्यकुलीनांशीलसंयुतां अन्यांसंगृह्यतेयस्तु समेदं॰ निरापराधांभगिनींमातरंदुहितांस्नुषां
परित्यजतियोमूढःसमेदं॰ रतिंकरोत्यमायांयोश्राद्धेत्वथचपर्वणि योश्नात्ययाज्ञियंमांसंसमेदं॰ दानविघ्नकरोयश्चतीर्थोपल्यचकारकः दुःप्रतिग्र
हकृन्नित्यंसमेदं॰ जयंत्यांशिवरात्र्यांचयोनरोहरिवासरे नकरोत्युपवासंहिसमेदं॰ नस्नातःकार्तिकोयेनमाघमासोथमाधवः नकृतावैष्णवं
क्तिःसमेदं॰ नाधिमासव्रतंयेनकृतंविष्णोरतिप्रदं सत्पात्रेनार्पितंवित्तंसमेदं॰ कुपात्रदानदोयश्चद्यूतकर्मरतश्चयः अशास्त्रविहिताचारीसमेदं॰
अधुनाशृणुविप्रेंद्रमत्तःपूजांलभंतिये तानहंसंप्रवक्ष्यामिकृतकृत्योभविष्यसि स्वाचारनिरतोयश्चविष्णुभक्तिपरोनिशं तीर्थस्नानरतोयस्तुम
त्तःसन्मानमर्हति गुरुवाक्यरतोनित्यंब्रह्मचर्यपरायणः मितभाषीहविष्याशीमत्तःसन्मानमर्हति अमायांश्राद्धदोनित्यंअग्निहोत्रपरायणः विष्णुपा·

पापिनांपुण्यशीलानांगतिंप्रोवाचतत्रवै ३९ तदाब्रुवत्यर्कसुते आविर्भूतंशतार्कभं विमानंसहसातत्रह्यप्सरा
दिनिषेवितम् ४० दृष्ट्वातत्सहसोत्थाययमस्त्वपश्यदासनात् पूजयामासतंभक्त्यापुरुषंसूर्यसन्निभम् ४१

दोदकस्नायीमत्तःस॰ सत्पात्रदानदोनित्यंपरस्त्रीषुपराङ्मुखः पंचयज्ञपरोनित्यंमत्तःस॰ऊर्ज्जादिपुण्यमासेषुमलमासेविशेषतः विष्णुव्रतंकृतंयेनमत्तःस
जान्हवीजलमादायसेतुबंधेश्वरंशिवं यःस्नापयतिविप्रेंद्रमत्तःस॰ काश्यांपंचनदेतीर्थेयःस्नातःकार्तिकेनरः विधिनाश्रद्धयानित्यंमत्तःस॰ रेवायांमा
मासेमेषसंस्थेदिवाकरे सुस्नानोविधिनायोसौमत्तःस॰ त्रिवेण्यांमकरस्थेर्केमाघमासिजितेंद्रियः विधिनाश्रद्धयानित्यंमत्तःस॰यमुनायांसहोमासिवृ
कोपगतेरवौ यस्तत्रविधिनास्नातोमत्तःस॰ कृष्णायामधिकेमासिब्रह्मचर्यान्वितोन्वहं भक्त्यास्नातोनरोयस्तुमत्तःस॰ हेमंतेचैवचीराणिजलदानंतुमाधवे वर्षासुस
द्मंरम्यंमत्तःस॰ मनसापिनगृण्हातिपरस्वंपरमार्तिदं स्वशक्त्यादीयतेतेभ्योमत्तःस॰ श्रद्धयापूजितौयेनदेवौमाधवकेशवौ महादानानिदत्तानिमत्तःस॰ हव्ये
नर्पितादेवाकव्येनपितरोऽखिलाः स्वाहूतैर्ब्राह्मणायेनमत्तःस॰ पतिव्रतानुयानारीपतिसुश्रुषणेरता पतिंविनानजानातिमत्तःसन्मानमर्हतिइति ३९ ४
४१

४२ ४३ ४४ ४५ ४६ ४७ ४८ ४९ ५० ५१ ५२ वसामीति विविधानिपापानि कानि तान्याह· स्कांदे कृतानितुभ्यंपापानिराजेंद्रकथयाम्यहं ब्राह्मणानांहृतंवित्तंलोभेनमहतान्नृप वृत्तयोपहृतास्तेषांबहवस्तर्जितामया अप्राप्तयौवनाः कन्याबह्वोभुक्तामयाबलात् दिवानिशंसुरापानान्दुर्वृत्तेनकृतंमया नाराधितोमयाविष्णुःसर्वार्तिनाशनोहरिः भेदितानितडागानिबहवश्छेदिताद्रुमाः नद

तंपूजयित्वाविधिनार्कपुत्रःसमागतश्चात्मपदेनिविष्टः एवंसमस्तैरमरैश्चपूजितोविमानगोविष्णुपदंजगाम ५२ विष्णुरुवाच विस्मितःसोमदत्ताख्योब्राह्मणोयममब्रवीत् कोयंदेवेशपुण्यात्मागतःकुत्रचतद्वद ५३ यमउवाच शृणुष्वद्विजशार्दूलकथयामिसमासतः सुकीर्तिरितिविख्यातोराजापरमधार्मिकः ५४ सकदाचिद्वनंयातोमृगयासक्तमानसः अश्वारूढोददर्शाग्रेमृगंपरमसुंदरम् ५५ तेनराज्ञामृगोविद्धोमार्गणेनदृढेनच बाणप्रहारसंयुक्तःसवनेऽदर्शनंययौ ५६ समग्रंतुबलंत्यक्त्वासराजानुजगामतं सदैवसददर्शाग्रेराक्षसंभीमविक्रमम् ५७ धनुषायोजितोबाणःतद्वधार्थंसुकीर्तिना तंदृष्ट्वाभयसंत्रस्तःत्राहित्राहीतिचाब्रवीत् ५८ वधार्होहंनतेराजन्हतोहंस्वेनकर्मणा यद्यन्मयाकृतंकर्मतस्येदंभुज्यतेफलम् ५९ इत्याकर्ण्यवचस्तस्यसुकीर्तिरवनीपतिः धनुषायोजितबाणंतूणीरेप्राक्षिपत्पुनः ५० सविस्मयोत्फुल्लविलोचनस्तुतंराक्षसंप्राहविशालदेहं त्वंकोसिपापेनचकेनरक्षःवदस्वशीघ्रमरणागतोसि ५१ विष्णुरुवाच श्रुत्वैवंराजवचनंरक्षःप्राहकृतांजलिः अहंपूर्वंभवद्राजानाम्नादेवांतकोनृपः ५२ वसामिकांचन्यावत्यांकर्णाटविषयेनघ मयाकुबुद्धिनातत्रपापानिविविधानिच ५३

त्तंविप्रमुख्येभ्योवित्तंस्वल्पमपिनृप ऋषीणामाश्रमस्थानिचौर्यवृत्त्याफलानिच हृतानिनृपशार्दूलदैवोपहतचेतसा धर्मोपदेशकर्तारोगरदानेननाशिताः प्रजापीडाकृतास्वर्थेप्राणिनोबहवोहताः नकृतंचमयाश्राद्धंमातापित्रोस्तुतुष्टिदं नकांजान्हवीस्नानंनकृतंतिलतर्पणम् नटवेश्याचारणेभ्योवसुदत्तंमयानृप अर्पितंबहुलंवित्तंधर्मध्वस्तेद्विजेयथा एवंविधस्यमेराजन्गतमायुर्वृथाखिलमिति ५३

५४ ५५ ५६ ५७ ५८ ५९ किंचिदितिस्पष्टार्थः अन्ययथामयाकर्मकृतंतथायोनिमवाप्तवानिति यदुक्तंतत्र येनकर्मणायांयो·
निमवाप्तवान् तामाह स्कांदे ब्रह्मस्वहरणाद्राजन्जातोहंनीलगर्दभः जातोहंशूकरोग्रामेपरस्त्रीमुखचुंबनात् वायसत्वंहिसंप्राप्तमशुच्यन्नस्यभोजना
त् गरदानेनसंप्राप्तमुरगत्वंमहावने गजत्वंमद्यपानाच्च कपित्वंद्विजवंचनात् कुपात्रदानतोराजन्जातोहंकृकलासकः बहुधान्यस्यहरणान्जातोहंमू
षकोगिरौ चातकत्वंहिसंप्राप्तंजलाश्रयविभेदनात् जातोहंसारमेयोत्रयज्ञीयपिशिताशनात् प्रजापीडनतःप्राप्तमुलूकत्वंवनेमम प्रासादभंजनाद्रा
जन्वृश्चिकत्वंगतोस्म्यहं एवंबहुविधाःप्राप्तायोनयोद्यकृताम येमि ६० स्कृतमिति अत्रविशेषःस्कांदे विप्रेभ्योनमयादत्तंजलमन्नंफ·

कृतानिचततःपश्चान्मृत्युकालोत्युपस्थितः तदायमभटाउग्राभीषणाःपाशपाणयः ५४ चंडदंडकरानिन्युर्बध्वामां
यमसन्निधौ मांदृष्ट्वाचित्रगुप्तस्तुयममाहकृतांजलिः ५५ यावंतिसंतिपापानिक्षुद्राणिचमहांत्यपि कृतान्यने
नसर्वाणिनपुण्यंतिलमात्रकम् ५६ एवंश्रुत्वाचित्रगुप्तस्यवाक्यंदृष्ट्वाग्रेमांक्रोधरक्तांतनेत्रः दंतैर्दंतान्खादयन्का
श्यपेयोदूतानाहैनंभृशंताडयध्वं ५७ यमस्यवचनंश्रुत्वादूतानिर्दयमानसाः ताडयामासुरत्युग्रामुद्गरैर्लोहयष्टिभिः
५८ ततोमांदक्षिणद्वारिसर्वेषुनिरयेषुच निक्षिप्यबहुवर्षाणितदंतेयमदूतकाः ५९ किंचित्पापावशेषेणनानायो
निषुविक्षिपुः सोहंयथाकृतकर्मतथायोनिमवाप्तवान् ६० नमयासुकृतंकिंचित्कृतंराजर्षिसत्तम अतोनप्राप्यते
सौख्यंभुज्यतेपापजंफलम् ६१

लानिच अतोनप्राप्यतेराजन्जलमन्नंफलंप्रियम् यावत्सवननिपातांतेभ्रमत्याकाशमं
डलम् आधावत्सकलांपृथ्वीनादत्तमुपतिष्ठति श्वःकार्यमद्यकुर्वीतपूर्वाह्णेवापराह्णिकं नहिप्रतीक्षतेमृत्युःकृतंवास्यनवाकृतं नकाल
स्यप्रियःकश्चिदप्रियोवानविद्यते आयुष्येकर्मणिक्षीणेप्रसह्यहरतेजनम् यथाधेनुसहस्रेषुवत्सोविंदतिमातरम् तथापूर्वकृतंक·
र्मकर्तारमनुगच्छतीति ६१ ६२ ६३ ६४ ६५ ६६ ६७

६२ ६३ ६४ ६५ ६६ ६७ ६८ ६९ ७० ७१ ७२ ७३

यावत्स्वस्थमिदंशरीरमरुजंयावज्जरादूरतोयावच्चेंद्रियशक्तिरप्रतिहतायावत्क्षयोनायुषः आत्मश्रेयसितावदेवसुधि
याकार्यःप्रयत्नोमहान्संदीप्तेभवनेहिकूपखननंप्रत्युद्यमःकीदृशः ६२ स्मरामिबहुजन्मानितवसान्निध्यतोनृप यमेनापि
पुराप्रोक्तंमत्कृताविविधयातनाम् ६३ निरयेषुचसर्वेषुयोनीषुविविधासुच स्वल्पपापावशेषेणब्रह्मरक्षोभविष्यामि ६४ क-
र्णाटविषयांतेचकाननेगिरिगह्वरे क्षुधातृषार्दितोनित्यंतत्रातिष्ठामिसर्वदा ६५ राजात्वदन्वयोद्भूतःसुकीर्तिरितिविश्रुतः क-
दाचिन्मृगयासक्तआगमिष्यतितद्वने ६६ तस्यसंदर्शनात्पूर्वाधिकालज्ञोभविष्यसि सतेददातिचेत्पुण्यमधिमासव्रतोद्भवं ६७
तदैवदिव्यदेहस्त्वंभूत्वादिव्यविमानगः सत्कृतोसुरसंघैश्चविष्णुलोकंहियास्यसि ६८ तदद्यघटितंसर्वंप्रसादात्तवभूपते
तारयस्वमहाबाहोदयासाराहिसाधवः ६९ इत्युक्त्वामलिनोदीनोरुरोदातीवदुःखितः इत्याकर्ण्यवचस्तस्यसुकीर्तिर्दयया-
र्द्रधीः ७० प्राहदास्यामितेपुण्यमधिमासव्रतोद्भवम् इत्युक्त्वाधिमलेतोयेस्नात्वाचैवयथाविधि ७१ सकुशंजलमादाय
प्रत्युवाचाथराक्षसम् विष्णुप्रियेऽधिकेमासेशतयज्ञफलप्रदे ७२ प्रतिपद्दिनमारभ्यदर्शांतंयदनुष्ठितम् विष्णुव्रतंतदु
त्पन्नंश्रेयस्तुभ्यंददाम्यहम् ७३ तत्प्रतिगृह्यतारक्षःश्रेयवान्भवसर्वदा इत्युक्त्वासकुशंतोयंप्रक्षिप्तंरक्षसःकरे ७४ प्र-
तिगृह्णामिसंप्राहराक्षसोहृष्टमानसः तस्मिन्नेवक्षणेतत्रविमानंपरमाद्भुतम् ७५ प्रादुर्भूतंविष्णुदूतैर्युक्तंगंधर्वसेवि
तं पूर्वदेहपरित्यज्यराक्षसोदिव्यरूपधृक् ७६ तद्विमानंसमारुह्यराजानंप्रत्यभाषत धन्योस्मिकृतकृत्योस्मितारि
तोहंत्वयानघ ७७ स्वस्त्यस्तुतेगमिष्यामिप्रसादात्तेपदंहरेः इत्युक्त्वाप्रययौविष्णुलोकंराजास्वकंपुरम् ७८ सदायदाया
तिविसंक्रमाख्यस्तदास्तदासौव्रतमादरेण राजासुकीर्तिःप्रकरोतिभक्त्यासोप्यंतकालेहरिलोकगोभूत् ७९

७४ ७५ ७६
७७ ७८ ७९

८० ८१ ८२ ८३ ८४ ८५ ८६ ८७ ८८ ८९ ९० इतिपुरुषोत्तममाहात्म्यटीकायांषड्विंशोऽध्यायः २६

यमउवाच नमेचराक्षसंविद्धिसत्कृतोयोमयाद्विज हंसयुक्तविमानेनवैष्णवंशाश्वतंपदं ८० जगामाधिकमासस्यव्र
तपुण्यप्रभावतः अतःपुण्येच्छुभिर्भक्त्यात्वधिमासव्रतंचरेत् ८१ मलमासव्रतंगंगास्नानमेकादशीव्रतं विष्णुनामस्मृति
श्चैवसारमेतत्कलौयुगे ८२ विष्णुप्रीतिकराधर्मास्त्वयासर्वेह्यनुष्ठिताः कुपात्रदानजंपापंत्वयाप्राप्तमजानतः ८३ यस्मैद
त्तंत्वयातोयंमासमात्रंसजीवति तावत्त्वंतिष्ठविप्रेंद्रकुंभिपाकेसुदारुणे ८४ विष्णुरुवाच इत्युक्तोयमराजेनकिंचिद्भ
यसमन्वितः अवश्यमितितंप्राहसोमदत्तोद्विजोत्तमः ८५ तदायमानुजैःक्षिप्तःकुंभीपाकेद्विजोरमे मासादनंतरंमुक्तः
कुंभीपाकाख्यसंकटात् ८६ पापान्मुक्तोद्विजोभातिराहुमुक्तःशशांकवत् तस्मिन्नेवक्षणेतत्रविमानपरमाद्भुतं ८७
तदर्थंप्रेषितंदेवैसहितंमामकैर्भटैः तस्मिन्नेवक्षणेतत्रविमानेतंद्विजोत्तमं ८८ स्थापयित्वाहिदिव्यांगरागैरंजितमर्कभं
तदात्मानंसौम्यरूपंकृत्वातत्रागमद्यमः ८९ तंसोमदत्तंकमलायताक्षंदिव्येविमानेखलुसंप्रविष्टं तआनयामासुरदी
नसत्वाःपदंमदीयंसुरसंघसत्कृतं ९० इतिश्रीसप्तपु॰सारो॰श्रीपुरुषोत्तममा॰ कुपात्रदानफलनिरूपणंनामषड्विंशो
ऽध्यायः २६ ६७ श्रीलक्ष्मीरुवाच पात्रेर्पितंतुयद्दानंवर्धतेशुक्लचंद्रवत् इत्युक्तंभवतापूर्वंपुनःपृच्छामितद्वद
१ पात्रभूतेद्विज श्रेष्ठेदत्तंतद्वर्धतेकथं सत्पात्रदानतःकेनश्रेयःप्राप्तंकथंवद २ श्रीविष्णुरुवाच पुरास्वायंभुवेकल्पेस
ह्यपर्वतकानने निषादोहिंसकोनाम्नातत्रासीत्कांतयासह ३ दैवात्तत्रसमायातोब्राह्मणोवृष्टिपीडितः मार्गभ्रष्टःक्षुधा
क्रांतोविद्धांघ्रिःकंटकाश्मभिः ४ तंदृष्ट्वासहसोत्थायकृतांजलिपुटोब्रवीत् हिंसकउवाच अद्यमेसफलंजन्मकृतार्थो
स्मितवागमात् ५ अथसत्पात्रदानफलप्रसंगमाह १ २ ३ ४ ५ ६ ७

६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८

आगच्छद्विजशार्दूलपवित्रंकुरुमद्गृहं आतिथ्यंतेकरोम्यद्ययथाज्ञापयसीहमां ६ ब्राह्मणउवाच क्षुधितोहंनिषादा
द्यकिंचिद्भोज्यंप्रयच्छमे दिनत्रयमतिक्रांतमद्यमेभोजनंविना ७ सिद्धान्नंनैवभोक्ष्येहंत्वदीयेसदनेस्थित आमंददासि
चेन्मह्यंपाकंकृत्वासरित्तटे ८ भोभोनिषादभोक्ष्यामिनान्यथाममभोजनम् निषादउवाच यद्यत्तवप्रियंविप्रतत्करोमिन
संशयः ९ इत्युक्त्वाछत्रमादायपालाशपर्णनिर्मितं पात्राण्युपस्करंसाग्निःसरित्तटमुपागतः १० कुरुपाकक्रियांविप्रक्षिप्रंभुं
क्ष्वयथासुखम् विष्णुरुवाच ततःपाकक्रियांकृत्वाकृतविप्रेणभोजनम् ११ यावत्कालंकृतंतेनपाककर्मचभोजनम्
तावत्कालंनिषादेनधृतंछत्रंद्विजोपरि १२ ततोविप्रेणसहितःस्वकुटींसमुपागतः निषादोरजनीतत्रप्रवृत्ताऽतिभयानका
१३ निद्रयाविह्वलीभूतोब्राह्मणोव्याधमब्रवीत् ब्राह्मणउवाच व्याधोहंनिद्रयात्यर्थंनिद्रास्थानंप्रयच्छमे १४ तस्यै-
वंवचनंश्रुत्वाव्याधःकांतामुवाचह व्याधउवाच शृणुप्रियेद्यमद्वाक्यंयद्वक्ष्यामितवाग्रतः १५ आवयोरतिथिस्त्वायंपूजनी
यःप्रयत्नतः निद्रार्दितोयमत्यर्थंनान्यस्थानंकुटींविना १६ निद्राविष्टोऽतिथिस्तस्यतत्रनिद्राभविष्यति पतिवाक्यंनिशम्यैवं
क्रोधात्प्रोवाचसांगना १७ निषादपत्न्युवाच कोयंकस्यातिथिर्मूढकुत्रस्थःकुतआगतः अहमत्रैवतिष्ठामिस्वपाम्यत्रैवना
न्यथा १८ किमनेनमयाकार्यंत्वयाचामूढबुद्धिना बहिस्त्वमेवसंतिष्ठयथेच्छसितथाकुरु १९ आकर्ण्यैवंप्रियावाक्यंनिषा-
दोप्यब्रवीच्चतां निषादउवाच किंमांवदसिदुष्टेत्वंअधमपापवल्लभे २० असूनपिप्रदास्यामिदेवब्राह्मणहेतवे किंपुनः
पर्णकुटिकांतुच्छांतुच्छजनप्रियाम् २१ त्वमद्यशयनेतत्रखट्वायांस्वपकर्कशे मदीयमद्यशयनंतत्रायंचस्वपेद्द्विजः २२ श्रु
त्वैवंवचनंतस्यस्वपत्न्येवंचसाब्रवीत् ततोनिषादस्तंविप्रमिदमाहवरानने २३

१९ २० २१ २२ २३

२४ २५ २६ २७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७

स्वपत्नमर्द्धखट्वायांमदीयेशयनेशुभे तमाहब्राह्मणःकांतेपरस्त्रीशयनेकथम् २४ स्वमत्यांहिमयाव्याधतदाचक्ष्वविनांतरम् परस्त्रीस्पर्शदोषेणबहवोनरकंगताः २५ द्विजवाक्यंनिशम्यैवंनिषादोबाढमहरः तदावंशशलाकाभिःकृतातावृत्तुमध्यतः २६ पत्नीतस्यतुपूर्वेर्द्धेसुप्तोविप्रस्तदुत्तरे प्रगृहीतधनुर्बाणोनिषादस्तुबहिःस्थितः २७ प्रचंडवातेनचतोयदस्याघनांधकारःप्रबभूवतत्र तदानिषादस्तुभुजंगमेनदष्टस्त्वगाद्योनिधनंहिशीघ्रं २८ विष्णुरुवाच तस्मिन्नेवक्षणेतत्रद्विजोपिनिधनंगतः तावुभावपिदूतैश्चनीतौसूर्यसुतांतिकं २९ उभौतौपुरतोदृष्ट्वाचित्रगुप्तंयमोऽब्रवीत् किमाभ्यांचरितंपापंपुण्यंवाऽचक्ष्वतन्मम ३० चित्रगुप्तउवाच देवानेनब्राह्मणेनपुण्यमेवकृतंकिल दुष्कृतंचैकमेवदज्ञानमस्यप्रमादतः ३१ निषादेनापिचरितंस्वकर्मैवंमहामते अयमेवकृतोधर्मस्तस्मान्नदानसंभवः ३२ यमउवाच दुष्कृतंकृतवान्कर्मद्विजोयंज्ञानदुर्बलः अतोयंरौरवेक्षेप्योदिव्यवर्षशतंभवेत् ३३ शुकोभूत्वाततोभूमौलोहपंजरयंत्रितः चिरंस्थास्यत्ययंयत्रकृतपापमनुस्मरन् ३४ अनन्यगतिकेकालेदेशेसत्पात्रदानतः दिव्यलोकेनिषादोयमप्सरोगणसेवितः ३५ दिव्यवर्षशतंदूताःसंतिष्ठतुममाज्ञया नृपोभूत्वाततोभूयश्चिरंस्थास्यतिभूतले ३६ एकत्रवासोभवितातत्रवैशुकभूपयोः विष्णुरुवाच प्रभुवाक्यंनिशम्यैवंदिव्यलोकेतुतंभटाः ३७ निषादंप्रापयामासुर्द्विजन्मानंतुरौरवे तावुभौकर्मयोगांतेभूतलंसमुपागतौ ३८ शुकयोन्यांसमुत्पन्नोब्राह्मणोदुष्प्रतिग्रही सुबाहुरितिविख्यातोविदर्भविषयाधिपः ३९ तस्यपत्न्यांसमुत्पन्नोनिषादःपूर्वपुण्यतः ३८ ३९ मातुर्गर्भप्रवेशादिप्रसूत्यंतक्रममाह स्कांदे विष्णुरुवाच स्वर्गलोकाच्च्युतोजंतुर्मुक्तोवानिरयालयात् इहलोकेप्रपततिधान्येतोयेथवाप्रिये सतथाकारनामेतिकर्मणाप्रेरितःकिल तत्कर्मणानुरूपे

यापुरुषेणैवभुज्यते शरीरेतस्यरेतस्त्वंमेकविंशतिभिर्दिनैः सएवगच्छतिरमेप्रेरितोयस्तुकर्मणा रेतोभूतस्तुवैजंतुर्लिंगद्वारेण मानिनि स्त्रियोयोनौप्रविशति ऋतुकालेरजोस्त्रजः मिश्रितस्त्वेकरात्रेण कलिलत्वंहिगच्छति दिवसैःपंचभिस्तत्रबुद्बुदत्वंहिगच्छति अहोभिर्दशभिर्मांसगोलकंधातुमिश्रितंघनत्वंयातितन्मांसंक्रमाद्विंशतिभिर्दिनैः पंचविंशतिभिर्दोवैबलंपुष्टिश्चजायते तथामासेतुसंपूर्णेपंचतत्त्वानिधारयेत् मासद्वयेचसंजातेत्वचामेदश्चजायते

मातुर्गर्भप्रवेशादिप्रसूत्यंतंक्रमेणच ४० राज्ञस्तस्यैवसदने लोहपंजरयंत्रितः राज्ञोनुगै रक्ष्यमाणः शुकस्तत्रैवतिष्ठति ४१ एकत्रवासिनौजातौपूर्वसंबंधतःप्रिये ४२ यदांगणंयातिसराजपुत्रःक्रीडार्थमायाच्छिशुभिर्वयस्यैः तंवीक्ष्यशब्दःप्रकरोति कीरोदत्तंद्विजेभ्योनचलभ्यतेतत् ४३ श्रुत्वाकीरस्यवचनंनृपश्चनृपमंत्रिणः विस्मयंपरमंजग्मुःकिमनेनोच्यतेमुहुः ४४ दृष्ट्वैवराजपुत्रंतनान्यंदृष्ट्वाऽवभाषते एवंपरस्परंसर्वेप्रवदंतिसविस्मयाः ४५ वर्षत्रयमतिक्रांतमेवंतस्यप्रभाषतः तदायदृच्छयातत्रवसिष्ठोमुनिरागमत् ४६ तंदृष्ट्वासहसोत्थायएकबाहुःपरमासनात् पूजयित्वार्घविधिनाभोजयित्वाततःपरम् ४७ कृतांजलिपुटोभूत्वाप्रोवाचसनरोत्तमः एकबाहुरुवाच धन्योहंकृतकृत्योहंमुनींद्रतवदर्शनात् ४८ बहुजन्मार्जितंपुण्यंफलितंमेमुनीश्वर सोपस्करमिदंराज्यंत्वदधीनंमयाकृतं ४९ वसिष्ठउवाच धन्योसिनृपशार्दूलइदमेवनवोचितं अयमेवपरोधर्मोयद्गोविप्रपालनं ५० एकबाहुरुवाच लब्धंसमीहितंसर्वंत्वत्प्रसादान्मयामुने किंचिद्विज्ञापयाम्यद्यतदाचक्ष्वमुनीश्वर ५१

मज्जास्थिनी त्रिभिर्मासैश्चतुर्भिः केशदर्शनं कर्णाक्षीनासिकाकुक्षि जायतेमासिपंचमे कंठरंध्रोदरंदृष्टिःषष्ठेगुह्यंचसप्तमे अंगप्रत्यंगसहितोमासेपूर्णेहिसप्तमे अष्टमेमासिगर्भस्थोविंदतेगर्भवेदनांजातिस्मरत्वंलभतेस्वकर्मस्मर्यतेतदा संपूर्णेनवमेमासिमरुताकर्षितोहिसः बहिरागच्छतितदायोनिद्वारेणगर्भतः रेताधिकेभवेत्पुत्रोरक्ताधिक्येचकन्यका तसोरक्तसमत्वेनभवतीहनपुंसकः एवंपंचात्मकोदेहोनिर्मीयतेस्वेनकर्मणेति ४० ४१ ४२ ४३ ४४ ४५ ४६ ४७ ४८ ४९ ५० ५१

५२ ५३ ५४ ५५ ५६ ५७ ५८ ५९ ६० ६१ ६२ ६३

कुमारमेनंसंवीक्ष्यशुकःपंजरसंस्थितः उच्चैर्वदतिकल्याणद्विजदत्तंनलभ्यते ५२ एवंप्रभाषतस्तस्यगतंवर्षत्रयंमुने यदेव
पश्यतिसुततद्वैवायंप्रभाषते ५३ नान्यथामुनिशार्दूलकिमिदंतद्वदस्वमे भविष्यंचापिपुत्रस्यइतिसंप्रार्थितोमुनिः ५४ ध्या-
त्वामुहूर्तमात्रंतुप्रत्युवाचनराधिपम् वसिष्ठउवाच त्वयाराजेंद्रयत्पृष्टंतत्सर्वंकथयाम्यहं ५५ भविष्यंत्वत्सुतस्यापिशुक
वाक्यस्यनिर्णयम् राजन्तवकुमारोयंनिषादःपूर्वजन्मनि ५६ सत्याद्रिकाननेआसीत्कांतयासहितोध्रुवं शुकंतुब्राह्मणं
विद्धिपूर्वजन्मनिपार्थिव ५७ अतिवृष्ट्यार्दितश्चायंकदाचिद्दैवयोगतः मार्गभ्रष्टःक्षुधार्तश्चनिषादस्थानमागतः ५८ कंटका
श्माग्निविद्धांगंम्रियमाणंद्विजोत्तमं तंदृष्ट्वासहसातेननिषादेनमहीपते ५९ श्रद्धयापूजितःसम्यक्परमान्नैश्चतर्पितः तद्दि
नेह्यधिमासस्यराजन्दर्शातिथिःस्थिता ६० शयनार्थंगृहंतस्मैदत्त्वारात्रौस्वयंबहिः उपविष्टोधनुर्बाणकरोवर्षतिमाधवे ६१
तदायंकालसर्पेणदष्टःपंचत्वमागतः तस्मिन्नेवक्षणेराजन्विप्रोपिनिधनंगतः ६२ अधिमासस्यमाहात्म्यंतथासत्पात्रदान
तः दिव्यलोकेस्थितश्चायंदिव्यवर्षशतंनृप ६३ पुण्यशेषेणसंप्राप्तंकुमारत्वंतवाधुना दुःप्रतिग्रहपापेनद्विजस्तुनरकेस्थितः
६४ दिव्यवर्षशतंप्राप्तंशुकत्वंपापशेषतः वर्ततेपंजरस्थोयमधुनासदनेतव ६५ सूर्योपासनयाकर्मस्मरतेपूर्वमात्मनः य
दिपश्यत्ययंराजन्क्रीडंतंराजनंदनम् ६६ पूर्वकर्मतदास्मृत्वाद्विजदत्तंनलभ्यते इत्युच्यतेऽनिशंतेनतदर्थंत्वंनिबोधय
६७ ब्राह्मणेभ्योहियद्दत्तंतदेवान्ननलभ्यते अन्नमेवनिषादेनपुरादत्तंद्विजन्मने ६८ तत्फलंत्ववनीशत्वंप्राप्तंचान्नेनवैकथं
दीयतेद्विजजातिभ्योनदेवप्राप्यतेनरैः ६९ इतिलोकापवादोयंमृषैवपरिकीर्तितः ७० राज्यंनदत्तंनचमंदिराणिनघोटका-
वासपदामतंगाः नकोशरथ्यंनचभृत्यवर्गोद्विजातयेन्नंसकृदेवदत्तम् ७१

६४ ६५ ६६ ६७ ६८ ६९ ७० घोटकाः अश्वाः मातंगाः हस्तिनः ७१

कीरोशुकः ७२ ७३ ७४ ७५ ७६ ७७ ७८ ७९ निरघःनिष्पापः ८० ८१ ८२ ८२ ८३

अनेनलब्धंकिलभूपतित्वंनैवान्यथाकेवलमन्नदानात् स्मृत्वेतिकीरोवदतीतिनित्यंदत्तंद्विजेभ्योनचलभ्यतेतत् ७२ अ-
तःपरंप्रवक्ष्यामिभविष्यंतनुजस्यते दशवर्षसहस्राणिप्रदिष्टमायुरस्यवै ७३ तत्तोधिकतरंराज्यंधर्मेणैवप्रशास्यते दुहिता
मागधेशस्यनाम्नाचंद्रवतीशुभा ७४ पत्नींतामाप्यतस्यांवैपुत्रानुत्पादयिष्यति सुशीलान्गुणसंपन्नान्शक्रतुल्यपराक्र-
मान् ७५ इष्ट्वाबहुविधान्यज्ञान्संतर्प्यचहुताशनम् राज्यभारंसुतेन्यस्यगंतावैशाश्वतंपदम् ७६ इत्युक्तंहिनरव्या-
घ्रभविष्यतनुजस्यते वर्षेस्मिन्वर्ततेराजन्मासःसंक्रांतिवर्जितः ७७ प्रीतयेवासुदेवस्यपूर्वोक्तविधिनाचर श्रेयस्त-
दुद्भवराजन्शुकायास्मैप्रदीयताम् ७८ तेनायंनिरघोभूत्वापदंयास्यत्यनामयं त्वमपिश्रद्धयावत्सयावज्जीवंव्रतंचर
७९ व्रतप्रभावान्निरघोविष्णुलोकमवाप्स्यसि स्वस्त्यस्तुतेगमिष्यामिस्वाश्रमंमुनिसेवितम् ८० इत्युक्त्वानृपशार्दूलंव-
सिष्ठःस्वाश्रमंययौ विष्णुरुवाच वसिष्ठस्याज्ञयाराजासुबाहुर्व्रतमुत्तमम् ८१ चकाराधिकमासस्यश्रेयस्तज्जनितंप्रि-
ये शुकायप्रददौराजादयार्द्रीकृतमानसः ८२ तदैवसपरित्यज्यपूर्वदेहंद्विजोत्तमः दिव्यदेहधरोभूत्वाममलोकंगतःप्रि-
ये ८३ तंदृष्ट्वाविस्मितोराजाव्रतभक्तिंपरांदधौ प्राप्तेथषोडशेवर्षेगुणसिंधौमहोन्नते ८४ राज्यभारंसुतेन्यस्यसुबाहु-
स्तपसेवनम् गतस्त्वाराधयामासतत्रमांभक्तियोगतः ८५ मत्सदंपरमंलेभेत्यक्त्वेमंपांचभौक्तिकम् तत्सुतोपिविशाला-
क्षिकृत्वाराज्यमकंटकम् ८६ दशवर्षसहस्रांतेशाश्वतंमत्सदंगतः निषादेनापिदेवेशिपदंप्राप्तमनामयम् ८७ सत्पात्रदा-
नतस्तस्माद्वरंदानंसुपात्रकम् पात्रापात्रंविचार्यादौततोदानंसमाचरेत् ८८

गुणसिंधौ गुणसिंधुनामकेपुत्रे ८४ ८५ ८६ ८७ सत्पात्रदानेनइतिवास्यपूर्वश्लोकेनसंबंधः ८८

८९ ९० ९१ ९२ इतिश्रीपुरुषोत्तममाहात्म्येसप्तविंशोऽध्यायः २७ ७ अथास्मिन्नध्यायेस्त्रीधर्मान्निरूपयति तत्रसाधारणाः

महादानेविशेषेणकुर्यात्पात्रविचारणां कुलपूज्योपिसंत्याज्योदुर्वृत्तश्चेद्द्विजःप्रिये ८९ स्नेहेनवाथलोभेनतस्मैदानं·
ददातियः रौरवंनरकंयातियावदाभूतसंप्लवम् ९० नाधिमासात्परंकिंचिद्यथापापप्रणाशनम् पात्रदानसमंपुण्यंनहिना
स्तिजगत्त्रये ९१ पतिव्रताऽपियानारीपतिभक्तिपरायणा अधिमासव्रतेनैवयातिविष्णोःपरंपदम् ९२ इतिश्रीसत·
पुराणसारोद्धारेपुरुषोत्तममासमाहात्म्येसत्पात्रदानफलनिरूपणंनामसप्तविंशोऽध्यायः २७ ७ सूतउवा
च स्त्रीधर्मान्संप्रवक्ष्यामियेनसास्वर्गमाप्नुयात् पतिव्रतातुयानारीपतिवाक्यपरायणा १ भर्त्रनुगामिनीसाध्वी
स्वर्लोकेवसतिंलभेत् पतिवाक्योल्लंघनेननारीनिरयमाप्नुयात् २ ऋषयऊचुः स्तुतापतिव्रतानारीत्वयापूर्वंतपो
निधे तल्लक्षणानिसर्वाणिसमासेनवदस्वमे ३ सूतउवाच नोदितोनारदेनेत्थंपुरातनमुनिःस्वयं पतिव्रतायाःस
र्वाणिलक्षणान्याहशूकराः ४ श्रीनारायणउवाच शृणुनारदवक्ष्यामिसतीनांव्रतमुत्तमम् कुरूपोवाकुवृत्तोवाऽ
स्त्वभावोऽथवैपतिः ५ रोगान्वितःपिशाचोवाक्रोधनोवाऽपिमद्यपः वृद्धोवाप्यविदग्धोवामूकोंधोबधिरोऽपिवा ६
रौद्रोवाथदरिद्रोवाकदर्यःकुत्सितोऽपिवा कातरःकितवो चापिललनालंपटोपिवा ७ सततंदेववत्पूज्यःसाध्व्यावाक्का
यकर्मभिः नजातुविषमंभर्तुःस्त्रियाकार्यंकथंचन ८ बालयावायुवत्यावावृद्धयावाऽपियोषिता नस्वतंत्रेणकर्तव्यंकिंचि
त्कार्यंगृहेष्वपि ९ अहंकारंविहायाथकामक्रोधौचसर्वदा मनसोरंजनंपत्युःकार्यंनान्यस्यकुत्रचित् १० सकामंवीक्षि
ताऽप्यन्यैःप्रियवाक्यैःप्रलोभिता स्पृष्टावाजनसंमर्देनविकारमुपैतिया ११ ७ ७ ७

र्वस्त्रीधर्माः १ २ ३ ४ ५ ६ ७ ८ ९ १० ११

१२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२ २३ २४

यावंतोरोमकूपाःस्युःस्त्रीणांगात्रेषुनिर्मिताः तावद्वर्षसहस्राणिनाकंताःपर्युपासते १२ पुरुषंसेवनेनान्यंमनोवाक्कायकर्म-
भिः लोभितापिपरेणार्थैःसासतीलोकभूषणा १३ अन्येनप्रार्थितावापिबलेनाविधृताऽपिवा वस्त्राद्यैर्वासितावाऽपिनैवा-
न्यंभजतेसती १४ वीक्षितावीक्षितेवान्यैर्हासितानहसत्यपि भाषिताभाषितेनैवसासाध्वीसाधुलक्षणा १५ रूपयौवन
संपन्नागीतेनृत्येऽतिकोविदा सानुरूपंनरंदृष्ट्वानयातिविकृतिंसती १६ सुरूपंतरुणंरम्यंकामिनीनांचवल्लभं यानेच्छति
परंकांतंविज्ञेयासामहासती १७ देवोमनुष्योगंधर्वःसतीनांनापरःप्रियः अप्रियंनैवकर्तव्यंपत्युःपत्न्याकदाचन१८भुंक्तेभुं
क्तेथयापत्यौदुःखितेदुःखितातथा मुदितेमुदिताऽत्यर्थंप्रोषितेमलिनांबरा १९ सुप्तेपत्यौचयाशेतेपूर्वमेवप्रबुध्यते प्र
विशेच्चैवयावन्हौयातेभर्तरिपंचतां २० नान्यंकामयतेचित्तेसाविज्ञेयापतिव्रता भक्तिंश्वशुरयोःकुर्यात्पत्युश्चापिविशेषतः
२१ धर्मकार्येनुकूलत्वमर्थकार्येऽपिसंचये गृहोपस्करसंस्कारेसक्तायाप्रतिवासरम् २२ क्षेत्राद्वनाद्वाग्रामाद्वाभर्तारंगृ
हमागतम् प्रत्युत्थायाभिनंदेतआसनेनोदकेनच २३ प्रसन्नवदनानित्यंकालेभोजनदायिनी भुक्तवंतंतुभर्तारंनवदेद-
प्रियंक्वचित् २४ आसनेभोजनेदानेसन्मानेप्रियभाषणे दक्षयासर्वदाभाव्यंभार्ययागृहमुख्यया २५ गृहव्ययनिमि
त्तंचयद्द्रव्यंप्रभुणार्पितम् निर्वृत्यगृहकार्यंसाकिंचिद्बुध्यावशेषयेत् २६ त्यागार्थमर्पितेद्रव्येलोभात्किंचिन्नधारयेत्
भर्तुराज्ञांविनानैवस्वबंधुभ्योदिशेद्धनम् २७ अन्यालापमसंतोषंपरव्यापारसंकथाः अतिहासातिरोषंचक्रोधंचपरिव-
र्जयेत् २८ यच्चभर्तानपिबतियच्चभर्तानखादति यच्चभर्तानचाश्नातिसर्वंतद्वर्जयेत्सती २९ तैलाभ्यंगंतथास्नानंशरी
रोद्वर्तनंक्रियाम् मार्जनंचैवदंतानांकुर्यात्पतिमुदेसती ३०

२५ २६ २७ २८ २९ ३०

अथरजस्वलाधर्मानाह ३१ ३२ ३३ ३४ ३५ यावत्नस्नातातावन्नशुद्ध्यति ३६ अन्यपुरुषदर्शनेनतादृशरूपस्वभावंसंता-
नंभवेदतोन्यंनपश्येदिति ब्रह्मकूर्चंदर्भपिंजूलगनंतोयं ३७ ३८ अथगर्भिणीस्त्रीधर्मानाह गर्भिणीति ३९ ४० ४१

त्रेताप्रभृतिनारीणांमासिमास्यार्तवंमुने तदादिनत्रयंत्यक्त्वाशुद्धास्याद्गृहकर्मणि ३१ प्रथमेहनिचांडाली द्वितीये
ब्रह्मघातिनी तृतीयेरजकीप्रोक्ताचतुर्थेऽहनिशुद्ध्यति ३२ स्नानशौचंतथागानंरोदनंहसनंतथा यानमभ्यंजनंनारी
द्यूतंचैवानुलेपनम् ३३ दिवास्वप्नंविशेषेणतथावैदंतधावनम् मैथुनंमानसंवापिवाचिकंदेवतार्चनम् ३४ वर्जयेच्च-
नमस्कारंदेवतानांरजस्वला रजस्वलायाःसंस्पर्शंसंभाषांचतथासह ३५ त्रिरात्रंस्वमुखंनैवदर्शयेच्चरजस्वला स्ववाक्यं
श्रावयेन्नैवयावत्स्नातानशुद्ध्यति ३६ स्नात्वाऽन्यंपुरुषंनारीनपश्येच्चरजस्वला ईक्षेतभास्करंदेवंब्रह्मकूर्चंततःपि-
बेत् ३७ केवलंपंचगव्यंचक्षीरंवात्मविशुद्धये यथोपदेशंनियतावर्तयेतवरांगना ३८ गर्भिणीचेद्भवेन्नारीतदानि
यमतत्परा अलंकृताशुभयाताभर्तुःप्रियहितेरता ३९ निष्ठप्रसन्नवदनास्वधर्मनिरताशुचिः कृतरक्षासुभूषाचवा
स्तुपूजनतत्परा ४० कुस्त्रीभिर्नाभिभाषेतशूर्पवातंचवर्जयेत् मृतवत्सादिसंसर्गंपरपाकंचसुंदरी ४१ नवीभत्सं
किंचिदीक्षेन्नरौद्रांशृणुयात्कथाम् गुरुंवात्युष्णमाहारमजीर्णंनसमाचरेत् ४२ अनेनविधिनासाध्वीशोभनंपु-
त्रमाप्नुयात् अन्यथागर्भपतनंस्तंभनंवाप्रपद्यते ४३ हीनांनिजगुणैरन्यांसपत्नींनैवगर्हयेत् ईर्ष्यारागसमुद्भूते
विद्यमानेपिमत्सरे ४४ अप्रियंनैवकर्तव्यंसपत्नीभिःपरस्परम् नगायेदन्यनामानिनकुर्यादन्यवर्णनम् ४५ नवे
सेद्रहसःपत्युःस्थेयंवल्लभसन्निधौ निर्दिष्टंचमहीभागेवल्लभाभिमुखावसेत् ४६ नावलोक्यादिशःस्वैरंनावलोक्यः
परोजनः विलासैरवलोकंस्यात्पत्युराननपंकजं ४७

४२ ४३ साधारणधर्माः ४४ ४५ ४६ ४७

४८ ४९ ५० ५१ ५२ ५३ ५४ अथप्रोषितभर्तृकास्त्रीधर्मानाह प्रस्थानाभिमुखइति ५५ ५६ ५७

कथ्यमानाकथाभर्तुःश्रोतव्यासादरंस्त्रिया पत्युःसंभाषणस्याग्रेनान्यस्संभाषयेत्स्वयम् ४८ आहूतासत्वरंगच्छेद्गति
स्थानंरतोत्सुका पत्यौगायतिसोत्साहंश्रोतव्यंहृष्टचेतसा ४९ गायंतंचपतिंदृष्ट्वाभवेदानंदनिर्भरा भर्तुःसमीपेन-
स्थेयंसोद्वेगव्यग्रचित्तया ५० कलहोनविधातव्यःकलियोग्येपियोस्त्रिया भर्त्सितानिंदिताऽत्यर्थंताडिताऽपिपतिव्र
ता ५१ व्यथितापिभयंत्यक्त्वाकंठंगृह्णीतवल्लभम् उच्चैर्नरोदनंकुर्यान्नैवाक्रोशेच्चतंप्रति ५२ पलायनंनकर्तव्यंनिजगेहा
द्बहिःस्त्रिया उत्सवादिषुबंधूनांसदनंयदिगच्छति ५३ लब्ध्वानुज्ञांतदापत्युर्गच्छेदध्यक्षरक्षिता नवसेत्सुचिरंतत्रप्र-
त्यागच्छेद्गृहंसती ५४ प्रस्थानाभिमुखेपत्यौनासन्मंगलभाषिणी नवार्योसौनिषेधोक्त्यानकार्यंरोदनंतदा ५५ अक्त
लोद्वर्तनंनित्यंपत्यौदेशांतरंगते बंधूजीवनरक्षार्थंकर्मकुर्यादनिंदितं ५६ श्वश्रूश्वशुरयोःपार्श्वेनिद्राकार्यानचान्यतः
प्रत्यहंपतिवार्ताचतयान्वेष्याप्रयत्नतः ५७ दूताःप्रस्थापनीयाश्चपत्युःक्षेमोपलब्धये देवतानांप्रसिद्धानांकर्तव्यमुपया
चनम् ५८ एवमादिविधातव्यंसत्याप्रोषितकांतया अभ्यक्षालनमंगानांमलिनांबरधारणं ५९ तिलकांजनहीनत्वंगंध-
माल्यादिवर्जनम् नखरोम्णामसंस्कारोदशनानाममार्जनम् ६० उच्चैर्हासपरैर्नर्मपरचेष्टादिचिंतनम् स्वेच्छापर्यटनंचै
वपरपुंसागमर्दनम् ६१ अदनंचैकवस्त्रेणनिर्लज्जत्वंयथागतिः इत्यादिदोषाःकथितायोषितोनित्यदुःखदाः ६२ निर्वृ
त्यगृहकार्याणिहरिद्रालेपनैस्तनुं प्रक्षाल्यशुचितोयेनकुर्यान्मंडनमुज्वलम् ६३ समीपंप्रेयसोगच्छेद्विकसन्मुखपं
कजा अनेननारीवृत्तेनमनोवाग्देहसंयुता ६४ आहूतागृहकार्याणित्यक्त्वागच्छेच्चसत्वरं किमर्थंव्याहृतास्वामिन्-
सुप्रसादोविधीयतां ६५ ५८ ५९ ६० ६१ ६२ पुनःसाधारणधर्माः ६३ ६४ ६५ ७

६६ ६७ ६८ ६९ वर्धिनीमृत्तिकाजलपात्रं दृषदं पाषाणं ७० ७१ ७२ ७३ ७४ ७५

माचिरंतिष्ठतेद्वारिनद्वारमुपसेवयेत् स्वामिनादापितंकिंचित्कस्मैचिन्नददात्यपि ६६ सेवयेद्भर्तुरुच्छिष्टमिष्टमन्नंफला
दिकम् महाप्रसाद इत्युक्त्वामोदमानानिरंतरम् ६७ सुखसुप्तंसुखासीनंरममाणंयदृच्छया आतुरेष्वपिकार्येषुपतिं
नोत्थापयेत्क्वचित् ६८ नैकाकिनीक्वचिद्गच्छेत् ननग्नास्नानमाचरेत् भर्तृविद्वेषिणींनारींसाध्वीनोभाषयेत्क्वचित् ६९
नोलूखलेनमुसलेनवर्द्धिन्यांदृषद्यपि नयंत्रकेऽपिदेहल्यांसतीचोपविशेत्क्वचित् ७० तीर्थस्नानार्थिनीनारीपतिपादो
दकंपिबेत् शंकरादपिविष्णोर्वापतिरेवाधिकःस्त्रियः ७१ व्रतोपवासनियमंपतिमुल्लंघ्ययाचरेत् आयुष्यंहरतेभर्तुर्मृ
तानरकमृच्छति ७२ उक्ताप्रत्युत्तरंदद्यान्नारीक्रोधेनतत्परा सरमाजायतेग्रामे शृगालीनिर्जलेवने ७३ स्त्रीणांहिपरम-
श्चैकोनियमःसमुदाहृतः अभ्यर्च्यभर्तुश्चरणौभोक्तव्यंचसदास्त्रिया ७४ याभर्तारंसमुत्सृज्यरहश्चरतिकेवलम्
ग्रामीवासूकरीभूयात्वल्गुलीवाथविड्भुजा ७५ याहुंकृत्वाऽप्रियंब्रूतेसामूकाजायतेखलु यासपत्नींसदेर्ष्येतदुर्भगा
साऽन्यजन्मनि ७६ याभर्तारंपरित्यज्यमिष्टमश्नातिकेवलम् उलूकीजायतेक्रूरावृक्षकोटरशायिनी ७७ दृष्टिंविलु
प्यभर्तुर्याकंचिदन्यंसमीक्षते काणावाथविमुखीचापिकुरूपाचैवजायते ७८ बाह्यादागतमालोक्यत्वरिताचजलास-
नैः तांबूलैर्व्यजनैश्चैवपादसंवाहनादिभिः ७९ अतिप्रियतरैर्वाक्यैर्भर्तारंयास्कसेवते पतिव्रताशिरोरत्नंसानारी-
कथिताबुधैः ८० भर्तादेवोगुरुर्भर्ताधर्मतीर्थव्रतानिच तस्मात्सर्वंपरित्यज्यपतिमेकंसमर्चयेत् ८१ जीवहीनोयथा
देहःक्षणादशुचितांव्रजेत् भर्तृहीनातथायोषित्सुस्नाताप्यशुचिःसदा ८२ अमंगलेभ्यःसर्वेभ्योविधवात्यत्यमंगला वि
धवादर्शनात्सिद्धिर्जातुक्वापिनजायते ८३

७६ ७७ ७८ ७९ ८० ८१ अथविधवास्त्रीधर्माः ८२ ८३

७९

८४ ८५ ८६ ८७ ८८ ८९ ९० ९१ ९२ ९३ ९४ ९५

विहायमातरंचैकामाशीर्वाद्प्रदायिनीं अन्याशिषमपिप्राप्तस्त्यजेदाशीविषोपमां ८४ कन्याविवाहसमयेवाच
येयुरितिद्विजाः भर्तुःसहचरीभूयाज्जीवतोऽजीवतोऽपिवा ८५ तस्माद्भर्तानुयातव्योदेहवच्छाययास्त्रिया एवंसता
सदास्थेयंभक्त्यापत्यनुकूलया ८६ व्यालग्राहीयथाव्यालंबिलादुद्धरतेबलात् एवमुत्क्रम्यदूतेभ्यःपतिंस्वर्गंनयेत्स
ती ८७ यमदूताःपलायंतेसतीमालोक्यदूरतः अपिदुष्कृतकर्माणमुत्सृज्यपतितंपतिम् ८८ यावत्त्वलोमसंख्या-
स्तितावत्कोट्ययुतानिच भर्त्रास्वर्गसुखंभुंक्तेरममाणापतिव्रता ८९ शीलभंगेनदुर्वृत्ताःपातयंतिकुलत्रयम् पितुः
कुलंतथापत्युरिहामुत्रचदुःखिताः ९० अनुयातिनभर्तारंयदिदैवात्कथंचन तत्रापिशीलंसंरक्ष्यंशीलभंगात्पतत्य
धः ९१ तद्वैगुण्यात्पितास्वर्गात्पतिःपततिनान्यथा विधवाकबरीबंधोभर्तृबंधायजायते ९२ शिरसोवपनंकार्यंत
स्माद्विधवयासदा एकाहारःसदाकार्योनद्वितीयःकदाचन ९३ पर्यंकशायिनीनारीविधवापातयेत्पतिम् तस्मा
द्भूशयनंकार्यंपतिसौख्यसमीहया ९४ नैवांगोद्वर्तनंकार्यंनताम्बूलस्यभक्षणम् गंधद्रव्यस्यसंभोगोनैवकार्यस्तया
क्वचित् ९५ तर्पणंप्रत्यहंकार्यंभर्तुःकुशतिलोदकैः तत्पितुस्तत्पितुश्चापिनामगोत्रादिपूर्वकम् ९६ श्वेतवस्त्रंस-
दाधार्यमन्यथारौरवंव्रजेत् इत्येवंनियमैर्युक्ताविधवापिपतिव्रता ९७ श्रीनारायणउवाच नैतादृशंदैवतमस्तिकिं
चित्सर्वेषुलोकेषुसदैवतेषु यदापतिस्तुष्यतिसर्वकामाल्लभ्यात्स्वकामंकुपितश्चहन्यात् ९८ तस्मादपत्यंविधवाश्च
भोगाःशय्यासनान्यद्भुतभोजनानि वस्त्राणिमाल्यानितथैवगंधाःस्वर्गेचलोकेविविधाश्चकीर्तिः ९९ पत्यौगतेनुया-
नारीगृहेतिष्ठतिसूनवे स्नुषाधीनातुसानारीशुनीवपरवेश्मनि १००

९६ ९७ ९८ ९९ १००

१०१ १०२ १०३ इतिश्रीपुरुषोत्तममाहात्म्यटीकायांअष्टाविंशोऽध्यायः २८ ६९ अथकांस्यपात्रदानमाहात्म्यंप्रस्तौति सूतउवा-
चेत्यादिना १ अव्यक्तंगुप्तम् २ एतत्पौरुषोत्तमम् ३ ४ श्रीपुरुषोत्तमं पुरुषोत्तमस्वरूपंध्यायन् ततोतद्व्रतपूर्णताकारकंदा

मितंपिताददात्येवमितंभ्रातामितंसुतः अमितस्यप्रदातारंभर्तारंकानुनभजेत् १०१ भर्तुःशुश्रूषणंस्त्रीणांभुक्ति
मुक्तिप्रदायकम् यस्मैतुष्यतिवैभर्तासाभगासैवकथ्यते १०२ यारंजयतिभर्तारंसारंजयतिकेशवम् स्त्रीणामेषप
रोधर्मोभर्तारंसेवयेत्सदा १०३ इतिश्रीसमपुराणसारोद्धारेश्रीपुरुषोत्तममासमाहात्म्येस्त्रीधर्मनिरूपणंनामाष्टा
विंशोऽध्यायः २८ ६९ सूतउवाच कांस्यपात्रस्यदानंवैमलमासेविशिष्यते नारायणेनकथितंनारदायवि
पृच्छते १ नारदउवाच सर्वदानाधिकंकांस्यसंपुटंपरिकीर्तितम् एतत्कारणमव्यक्तंवदमेबदरीपते २ श्री
नारायणउवाच एकदैतद्व्रतंब्रह्मन्नर्चीकरद्रमापुरा तदापृच्छन्महादेवंकिंदेयंदानमुत्तमम् ३ येनसंपूर्णताया-
नियतंमेपौरुषोत्तमं तन्मेवददयासिंधोसर्वेषांहितहेतवे ४ तच्छ्रुत्वामनसिध्यायन्ध्यायंश्रीपुरुषोत्तमम् उमामजो
गदच्छंभुःसर्वलोकहितैषिणीम् ५ श्रीमहादेवउवाच नशक्यंकिंचिदेवास्तिदानंश्रीपुरुषोत्तमे व्रतपूर्णविधिंकर्तुं
मपर्णेयदित्वेच्छसि ६ यद्यद्दानंगिरिसुतेत्युत्तमंपरिकीर्तितम् श्रीकृष्णवल्लभेमासितत्सर्वंगौणतांगतम् ७ तस्मा
देतादृशंदानंनैवास्तिक्वापिसुंदरि येनतेव्रतसंपूर्तिर्भवेच्छ्रीपुरुषोत्तमे ८ पुरुषोत्तममासेस्मिन्व्रतसंपूर्णहेतवे
ब्रह्मांडसंपुटाकारंतदर्हंदेयमंगने ९ नशक्यंतत्तुकेनापिदातुंक्वापिवरानने तस्मादेतत्प्रतिनिधिंकृत्वाकांस्यस्य-
संपुटम् १० तन्मध्येपूरयित्वैवापूपांस्त्रिंशन्मितान्मुदा सप्ततंतुभिरावृत्यसंपूज्यविधिवत्प्रिये ११ नंवकिंकथनीयमितिध्या
यन् ५ हेअपर्णेहेपार्वति छंदसिवेदे ६ ७ ८ अर्हंयोग्यं ९ ब्रह्मांडदानफलदायकंकांस्यसंपुटदानमित्यतआह नशक्यमिति १० ११

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

१२ १३ १४ मुनिर्नारदः इतिहासांतरमाह विष्णुनेति १५ १६ पूर्वंत्रिंशत्कांस्यसंपुटदानप्रसंगमुक्त्वा समर्थस्यप्रत्यहं त्रयस्त्रिंशत्कांस्यपात्रदानप्रसंगमाह एकैकस्मैइति १७ अर्द्धोदये अर्द्धोदयाख्यपर्वविशेषे १८ अथप्रत्यहमेकैककांस्यपात्रदानप्रसंगमाह त्रिंशदिति १९ पूर्वंप्रियंकरस्यभार्या मंजुभाषिणीनाम्नी या आसीत् सामलमासेप्रत्यहंकांस्यपात्रदानेन शक्रभंस्कतं प्राप अत्रप्रसिद्धाकथा पुराणसंहितायां पुरामालवदेशेउज्जयिनीनगरे धर्मवल्लभोनामनृपः स्वधर्मेणप्रजां रंजयामास तन्नगरे प्रियंकरोनामकश्चिद्दास्यकरः अनपत्यः आसीत् एकदाप्रियंकरभार्या मंजुभाषिणी क्षिप्रायां-

देयंविप्रायविदुषेव्रतसंपूर्णहेतवे एवंत्रिंशन्मितान्येवदेयानितानिवैभवे १२ इत्याकर्ण्यवचोरम्यंधूर्जटेरुपकारकम्
अवीभवदुमाहृष्टासर्वलोकहितैषिणी १३ त्रिंशत्कांस्यानिविद्वद्भ्यः संपुटानिव्यतीर्यसा पूर्णव्रतविधिंकृत्वामुमोदातीव
नारद १४ सूतउवाच इत्याकर्ण्यमुनिर्विप्राः परंहर्षमवापह विष्णुनाकथितंलक्ष्म्यैस्तच्छृणुध्वंद्विजोत्तमाः १५ पूजांतेप्रा-
र्थयेद्विष्णुंततोब्राह्मणपूजनम् ब्राह्मणान्भोजयेत्पश्चात्त्रयस्त्रिंशत्सपत्निकान् १६ एकैकस्मिन्प्रदातव्यंकांस्यपात्रंसमोदकं
तेभ्योआशीर्गृहीत्वातुस्वयंभुंजीतवाग्यतः १७ सूतउवाच अर्द्धोदयेपुष्कराख्येतुलापुरुषदानतः तत्पुण्यंप्राप्यतेनूनंकांस्य
पात्रप्रदानतः १८ त्रिंशन्मासकृतपापंमासैकेनलयव्रजेत् कांस्यपात्रंघृतयुतंप्रत्यहंयः प्रयच्छति १९ प्रियंकरस्यभार्या-
प्रियाऽऽसीत्सामंजुभाषिणी

स्नात्वा समागतान् पौरान्दृष्ट्वा सस्मितं प्रोवाच मंजुभाषिण्युवाच हेपौराः पूजनपात्रहस्ताः यूयंकुतगाः किमर्थंत कथय पौराऊचुः रेरेमूढे किंन जानासि अयंपुरुषोत्तममासः यत्रस्नानार्चनकांस्यादिदानेनच वैकुंठप्राप्तिर्भवति तच्छ्रुत्वा मंजुभाषिणीगृहमागत्य पतिमुवाच हेकांत आवाभ्यांकिमपिसुकृतंनकृतं सदापराधीनतयाकालोगमितः मलमासेस्मिन् दानादिकर्मापिनकृतं प्रियंकरउवाच हेकांते किमेवंलप्य अहंसर्वंजानामि किंकरोमि सर्वंद्रव्यवशं तद्द्रव्यंप्राप्यतेपुण्यैः पुण्यंद्रव्यंविनानहि तयोरेवंप्रवदतोरात्रिःप्रहरतांगता ततःप्रियंकरःस्वस्वामिगृहे अश्वशालायां अश्वबंधनार्थंकीलखननेप्रयासंकृतवान् तदाभूमिगतंकांस्यपात्रंविनिर्गतं तत्कांस्यपात्रंतेनदानार्थंरक्षितं तद्भार्याचस्वामिनीवस्त्राणां

क्षालनार्थंगता तत्रमार्गस्थितो ताम्रसंभवंढबुकः प्राप्तः ततः वस्त्रक्षालनंकृत्वा सत्वरंगृहमागत्यस्वामिनःकरेढबुकंसमर्पयामासस्वामिनाच कांस्यपात्रं पत्न्यैदर्शितं ततःढबुकंकांस्यपात्रंचैकीकृत्य त्विनोविचारंचक्रतुः हेस्त्रि स्वस्यद्रव्यनयास्वामिद्रोहः कथंकार्यः आवांभाषाबंधेनउदरार्थंस्थितौ यत्किंचित्प्राप्यतेस्माभिस्तत्तेनैवचनसंशयः तस्मादेतद्द्रव्यंबालेगृहीत्वास्वामिनोंतिके गच्छावोयेनतुष्येतससत्यप्रियईश्वरः इतिनिश्चित्यस्वामिन्यग्रेगत्वा भगवन्नेतद्द्रव्यं प्राप्तमावाभ्यांगृह्यतामिति वणिक्जनोपिढबुकंकांस्यपात्रस्थंदृष्ट्वा तौप्रति आह एतत्तवैवेत्युक्त्वा पुनरर्पयामास तत्प्रभृतितौ अतीवा· स्वस्थानंचागतौ ततः प्रातः मंजुभाषिणी क्षिप्रायांस्नानार्थं गंतुंपतिं प्रार्थितवती पतिश्च इदंकांस्यपात्रंढबुकंचगृहीत्वा गच्छस्व कृत्तावकमिदंस्वस्वंद्रव्यंविप्रोगृहीष्यति येनकेनाप्युपायेन स्नात्वादत्वैहिमेतिकं इतिभर्त्राप्रेषितासा क्षिप्रायांस्नात्वा महाकालंसमभ्यर्च्य स्तुत्वापौराणिकायढबुकं

मलमासेन्वहंकांस्यं दानेनापस्कृतंशक्तम् २० त्रयस्त्रिंशदपूपांश्च कांस्यपात्रसमन्वितान् प्रदद्याद्गुरवेब्रह्मन्घृतशर्करयासह २१ अधिमासेतुसंप्राप्तेपापमुक्त्यैजनार्दनम् उद्दिश्यापूपदानेनघृतेनसहरुक्मकम् २२ विष्णुप्रीत्यैप्रदद्याच्चपृथ्वीदानफलंलभेत् त्रयस्त्रिंशदपूपांश्चदानाहोंश्चदिनेदिने २३

त्रंदत्वा कथांश्रुत्वा गृहमागत्याह कृतकृत्यास्मीत्येवंपतिंमभाषत एवंमासपर्यंतं व्रतंकर्तुं उद्योगं कृतवती परंतु द्वितीयेदिवसेदातुं कांस्यपात्रंनविद्यते तेनव्याकुलचित्ताशंभो स्वमंदिरेसुष्वाप तदाशिवप्रेरितोनंदसूक्ष्मरूपेण गृहंप्रविश्य किंचिद्द्रव्यंनिचिक्षेपे तदामंजुभाषिणीस्वामिवत्संबंधनार्थंयदागता तदातत्रद्रव्यंदृष्ट्वागृहीत्वाभर्त्रेप्रापच्छत् प्रियंकरोपिवृत्तांतकथनपूर्वकं तद्धनं वणिजःपुरःक्षिप्तं वणिक्जनोपि तद्धनेनममेतिविचार्यपुनस्तस्मैसमर्प्य प्रोवाच स्वव्यापारतयाप्राप्तं मम्पृतं तद्धनंविदुः प्रियंकरस्वभार्यस्त्वंगृहीत्वेदंधनंमुदा कुरुपुण्यादिकंकर्मव्यापारंचतथाकुरु एवंवचनंश्रुत्वा धनंप्रगृह्य मौल्येनत्रिंशत्कांस्यपात्राणि गृहीत्वा प्रत्यहंकांस्यपात्रदानंस्नानादिकंचमासपर्यंतं मंजुभाषिणीव्रतंचकारतेनपुत्रादिसंपत्तिं प्राप्यांतेतौमुक्तिंगताविति २० अशक्तस्यैककांस्यपात्रस्थितत्रयस्त्रिंशदपूपदानमाह त्रयस्त्रिंशादिति २१ २२ अथशक्तिमतोदानप्रसंगमाह कांस्यपात्रेत्रयस्त्रिंशदपूपान्सुवर्णगुडसंयुक्तान् निधायदिनेदिनेप्रदद्यादिति २३

दानसमयेमंत्रमाह अधिमासेत्विति २४ २५ २६ २७ अपूपपूरितकांस्यपात्रदानप्रसंगमुक्तान्नपूरितकांस्यदानमाह गृहाणेति २८

सुवर्णगुडसंयुक्तान् कांस्यपात्रेनिधायच अधिमासेतुसंप्राप्तेशक्रेसूर्यादिदैवते २४ नरकोत्तारणायैवमयादानंप्रदीयते त्रयस्त्रिंशदपूपांश्च घृतशर्करयासह २५ सदक्षिणामयातुभ्यंकांस्यपात्रेण दापिताः दातादिवाकरोदेवोगृहीताचदिवाकरः दानेनानेनविप्रेंद्रसूर्योमेप्रियतामिति २६ प्रीयतांदेवदेवेशब्रह्मशंभुजनार्दनाः तेषांप्रसादात्सकलाममसंतुमनोरथाः २७ गृहाणपरमान्नेनकांस्यपात्रंप्रपूरितं सघृतंगुडसंयुक्तंप्रीतोभवदिवाकर २८ त्वयादत्तमिदंपात्रंपरमान्नेनपूरितम् सघृतंप्रतिगृण्हामिप्रीयतांमेदिवाकरः २९ द्वादश्यामलमासस्यक्षयपातेशक्रेन्हिवा दुर्बलेनापिकर्तव्यंत्रयस्त्रिंशदपूपकम् ३० मलमासेतुसंप्राप्तेएकस्मिंश्चशुभेदिने निष्किंचनेनदातव्यंघृतशर्करयासह ३१ मासानांमलमासोयंमलिनःपापसंभवः तस्यपापस्यशांत्यर्थमन्नदानंकरोतियः ३२ यावंतिचैवछिद्राणिअपूपादिषुभोद्विजाः तावद्वर्षसहस्राणिस्वर्गलोकेमहीयते ३३ मोदकेनयुतंकांस्यपात्रंगोधूमपूरितं सदक्षिणंब्राह्मणायप्रदद्याद्विधिनानरः ३४ दानकालेइमंमंत्रमुच्चरेदंबुजेक्षणे मयायदर्जितंपापंज्ञानतोऽज्ञानतोपिच ३५ तस्यपापस्यशांत्यर्थंकांस्यपात्रंददाम्यहम् दानेनानेनमेदेवपरमात्माजनार्दनः ३६ प्रसादात्तवविप्रेंद्रप्रसन्नोस्तुदयानिधिः एवमुच्चार्यविप्रायदातव्यंकांस्यभाजनम् ३७ माघमासेताम्रपात्रंसुवर्णतिलसंयुतं दत्वायातिस्वर्गलोकंपितृभिःसहितोनरः ३८ जलप्रदस्तुवैशाखेकार्तिकेदीपदानतः नरःस्वर्गपुरंयातिगंधर्वगणसंयुतः ३९ कांस्यप्रदोधिकेमासेब्रह्मलोकेमहीयते मुनयोतःप्रशंसंतिकांस्यपात्रंविसंक्रमे ४०

अतिदुर्बलेन कांस्यपात्रंविनाप्यपूपदानंकर्तव्यमित्याह द्वादश्यामित्यादिना २९ ३० ३१ ३२ ३३ धान्यपूरितकांस्यदानमाह ३४ ३५ ३६ ३७ ३८ ३९ ४०

४१ अतिसमर्थविषयमाह हेप्रियेलक्ष्मि मलमासेमत्यहं त्रयस्त्रिंशद्ब्राह्मणेभ्यः पृथक्पृथक् एकैकंकांस्यपात्रंचकारान् अपूपादिपूरितं द्या
दिति ४२ मंत्रः ४३ चत्वारिंशन्माषात्मकंपलप्रमाणं ४५ इतिपुरुषोत्तममासमाहात्म्यटीकायामेकोनत्रिंशोऽध्यायः २९ ७ अथ

तिलपात्रंवरंमाघेवैशाखेप्रवरंजले कार्तिकेप्रवरोदीपः कांस्यपात्रंविसंक्रमे ४१ त्रयस्त्रिंशत्संख्यकेभ्योब्राह्मणेभ्यो
पृथक्पृथक् एकैकंकांस्यपात्रंचप्रदद्यात्मत्यहंप्रिये ४२ कांस्येब्रह्माशिवोलक्ष्मीः कांस्यमेवविभावसुः कांस्यंविष्णुम
यंयस्माद्दत्तःशांतिप्रयच्छमे ४३ घृतांतेकांस्यपात्रंवाचतुःषष्टिपलैर्युतम् सवत्सांगांचवैदद्यात्तस्यपुण्यमनंतकम् ४४
इतिश्रीसप्तपुराणसारोद्धारेश्रीपुरुषोत्तममासमाहात्म्येकांस्यदानप्रसंगवर्णनंनामैकोनत्रिंशोऽध्यायः २९ ७
सूतउवाच उद्यापनविधानंवैप्रवक्ष्यामिविशेषतः यदुक्तंदृढधन्वानंपुरावाल्मीकिनामुदा १ दृढधन्वोवाच अथसम्य
ग्वद ब्रह्मन्नुद्यापनविधिंमुने पुरुषोत्तममासीयव्रतीनांकृपयानृणाम् २ वाल्मीकिरुवाच समासतःप्रवक्ष्यामिमा
सेश्रीपुरुषोत्तमे उद्यापनविधिंसम्यग्व्रतसंपूर्णहेतवे ३ कृष्णपक्षेचतुर्दश्यांनवम्यांपुरुषोत्तमे अष्टम्यांवाथकर्तव्यमुद्या
पनमुदीरितम् ४ यथालब्धोपचारेणमासेऽस्मिन्पुरुषोत्तमे पुण्येऽस्मिन्प्रातरुत्थायकृत्वापूर्वाह्णिकाःक्रियाः ५ समाहि
तमनाभूत्वात्रिंशद्विप्रान्निमंत्रयेत् सपत्नीकान्सदाचारान्विष्णुभक्तिपरायणान् ६ यथाशक्त्यथवासप्तपंचवित्तानु
सारतः ततोमध्याह्नसमयेद्रोणमानेनभूपते ७ तदर्धेनतदर्द्धेननिजशक्त्यानुसारतः पंचधान्येनकुर्वीतसर्वतोभद्रमुत्त
मम् ८ चत्वारःकलशास्थाप्याहैमावाराजताःशुभाः ताम्रावामृन्मयाशुद्धाअव्रणामंडलोपरि ९ चतुर्दिक्षुचतुर्व्यूहश्री
तयेश्रीफलान्विताः सहस्त्रवेष्टितानागवल्लीदलसमन्विताः १० मलमासव्रतोद्यापनविधानमाह सूतउवाचेत्यादिना १ २ ३

उदीरितंवक्ष्यमाणप्रकारेणकथितं ४ ५ ६ द्रोणमानंआढकचतुष्टयात्मकं आढकमानंतोला २१३ मा·४ द्वादशशेरात्मकोद्रोणोभवति ७
८ ९ १०

११ १२ १३ जपार्थिना यजमानेन चतुर्व्यूहदेवता मंत्रजपार्थमित्यर्थः हस्तमुद्रा पवित्रीति प्रसिद्धा आदिशब्देनासन मालाकंकणादिकमपिग्राह्यम् १४ प्रायश्चित्तं हेमाद्रिसंकल्पपूर्वकं प्रायश्चित्तगोदानं दशविधंस्नानं १५ पूर्वोक्तविधिना षष्ठाऽध्यायोक्तविधिना १६ १७ १८ १९

वासुदेवंहलधरंप्रद्युम्नंदेवमुत्तमम् अनिरुद्धंचतुर्थंवैस्थापयेत्कलशेषुच ११ पुरुषोत्तममवतारंमध्येस्थापितंपुरुषोत्तमम् सराधंदेवदेवेशंकलशेनसमन्वितम् १२ ततआनीयतन्मध्येमंडलोपरिविन्यसेत् आचार्यंवैष्णवंकृत्वा वेदवेदांगपारगम् १३ विप्राश्चत्वारएवात्रवरणीयाजपार्थिना द्वेद्वेवस्त्रेचदातव्येहस्तमुद्रादिसंयुते १४ आचार्यंसमलंकृत्यवस्त्रभूषादिभिर्मुदा ततोदेहविशुद्ध्यर्थंप्रायश्चित्तंसमाचरेत् १५ ततःपूर्वोक्तविधिनापूजाकार्यासहस्तिया चतुर्व्यूहजपःकार्योवृतैर्विप्रैश्चतुर्विधैः १६ चतुर्दिक्षुप्रकर्तव्यादीपाश्चत्वारउद्धृताः अर्घ्यदानंततःकार्यंनारिकेलादिभिःक्रमात् १७ पंचरत्नसमायुक्तेजानुभ्यामासक्तभूतलः स्वपाणिपुटमध्यस्थैर्यथालब्धैःफलैःशुभैः १८ श्रद्धाभक्तिसमायुक्तःसपत्नीकोमुदान्वितः अर्घ्यंदद्यात्प्रहृष्टेनमनसाश्रीहरिंस्मरन् १९ अर्घ्यमंत्रः देवदेवनमस्तुभ्यं पुराणपुरुषोत्तम गृहाणार्घ्यंमयादत्तंराधयासहितोहरे २० अर्घ्यंदत्त्वाहरिंभक्त्यानत्वाश्रीपुरुषोत्तमम् चतुर्थ्यंतैर्नाममंत्रैस्तिलहोमंचकारयेत् २१ ततस्तदंतेतन्मंत्रैःकार्येतर्पणमार्जने नीराजयेत्ततोदेवंध्यानपुष्पांजलिंततः २२ नमस्कारंततःकुर्यात्साष्टांगंगृहिणीयुतः पूर्णपात्रंततोदद्याद्ब्राह्मणेसहिरण्यकम् २३ आचार्यायततोदद्याद्दक्षिणांविपुलांमुदा आचार्यंतोषयेद्भक्त्यावस्त्रैराभरणैरपि २४ सपत्नीकंततोदद्यादृत्विग्भ्योदक्षिणांपराम् घृतपात्रंतिलपात्रंधेनुदानंतथैवच २५ उमामहेश्वरंदद्याद्दंपत्योःपरिधापकम् पदमष्टविधंदद्यादुपानद्युगलंतथा २६

२० नाममंत्रैः वासुदेवायनमः संकर्षणायनमः प्रद्युम्नायनमः अनिरुद्धायनमइति २१ २२ २३ २४ २५ २६

श्रीमद्भागवतमिति अत्रविशेषोवृहन्नारदोक्तमाहात्म्ये श्रीमद्भागवतं साक्षाद्भगवद्रूपमद्भुतं योदद्याद्वैष्णवायैव पंडितायद्विजन्मने सकोटिकुलमुद्धृत्यत्वप्सरोगणसेवितः विमानमधिरुह्येतिगोलोकंयोगिदुर्लभं महादानानियान्यष्टौ छंदोदानानियानिच श्रीमद्भागवतदानस्यकलांनार्हंतिषोडशीमिति पूर्वाध्यायोक्तकांस्यपात्रदानादत्रविशेषप्रकारांतरमाह कांस्यानीति २७ २८ २९ प्रत्येकसंपुटस्यतौल्यमानमाह सार्द्धप्रस्थद्वयमिति प्रस्थमानंद्विसप्ततितोल्यभारात्मकंनिर्धनस्यतुनैवंनियमइत्याह निर्धनेनेति ३० अपूपकरणाशक्तौतत्सामग्रीदातव्येत्याह अथवेति ३१ ३२

श्रीमद्भागवतंदद्याद्भक्तिश्रेष्ठवैष्णवायच कांस्यानिसंपुटान्येवत्रिंशद्देयानिसर्वथा २७ त्रिंशत्त्रिंशदपूपैश्चमध्येसंपूरितानिच प्रत्यपूपंतुयावंतिछिद्राणिपृथिवीपते २८ तावद्वर्षसहस्राणिवैकुंठेवसतेनरः ततःप्रयातिगोलोकंनिर्गुणंयोगिदुर्लभम् २९ सार्द्धप्रस्थद्वयंकांस्यसंपुटंपरिकीर्तितम् निर्धनेनयथाशक्त्या कार्याणिघृतपूर्तये ३० अथवापूपसामग्रीमपक्वांसफलांपराम् तत्राधायप्रदेयानिपुरुषोत्तमप्रीतये ३१ निमंत्रितानांविप्राणांसस्त्रीकाणांनराधिप संकल्पंचप्रकुर्वीतपुरुषोत्तमसन्निधौ ३२ अथप्रार्थना श्रीकृष्णजगदाधारजगदानंददायक ऐहिकामुष्मिकान्कामानखिलान्पूरयाशुमे ३३ इतिसंप्रार्थ्यदेवेशंभोजयेद्ब्राह्मणान्मुदा संपूज्यविधिवद्भक्त्यासभार्यान्घृतपायसैः ३४

३३ घृतपायसैरिति घृतपायससाहचर्येण अन्येषामपिग्रहणं वृहन्नारदोक्तमाहात्म्ये भविष्येचसपत्नीकान्द्विजान्भक्त्याभोजयेद्घृतपायसैः भोजनस्यतुसंकल्पमाचरेद्विधिनाव्रती द्राक्षाभिःकदलीभिश्चचूतैश्चपनसैरपि कपित्थैर्नारिकेलैश्चनारिंगैर्दाडिमीफलैः कूष्मांडैर्बहुबीजैश्चशृंगवेरसमूलकैः घृतपाचितपक्वान्नैःशष्कुलैश्चमाषकैर्वटैः शर्कराघृतपूरैश्चफाणितैःखंडमंडकैः उर्वालुकर्कटीशाकैरार्द्रकैश्चसुनिंबकैः अन्यैश्चविविधैःशाकै रान्नैःपक्वैः पृथक्पृथक्चतुर्द्धाभोजनैरेवंषड्रसैःसहसंगतैः वासितान्गौरसांस्तत्र परिवेश्यमृदुब्रुवन् इदंस्वादुमुदाभोज्यं भवदर्थंप्रकल्पितं यान्यतांरोचतेब्रह्मन्यन्मयापाचितंप्रभो धन्योस्म्यनुगृहीतोस्मि पावितंममंदिरं विसर्जयेत्ततोविप्रान्दत्वाताम्बूलदक्षिणेइति ३४

तांबूलपदार्थानाह बृहन्नारदीये एलालवंगकर्पूरजातिबीजाक्तिजानिच कस्तूरीमुरमांसीचचूर्णचखादिरंक्रमम् एतैश्चमिलितंदेयंतांबूलंभगवत्प्रिय
मिति ३५ चैणवीः दंशपात्राणि अलंकृत्यसौभाग्यपदार्थैः संपूर्य ३६ यस्यस्मृत्याचनामोक्त्यातपःपूजाक्रियादिषु न्यूनंसंपूर्णतांयातिसद्योवंदे
तमच्युतमिति भूतेभ्यः गोश्वानकीटपतंगदीनमनुष्येभ्यइति ३७ ३८ ३९ उपहारंपूजितसामग्री ४० एवंबृहन्नारदीयोक्तमुद्यापनंवि-

भोजयित्वामुदाविप्रान्देयात्तांबूलदक्षिणाः परितोष्यसपत्नीकान्हस्तेदद्याच्चमोदकान् ३५ पत्नीभ्योवैणवीर्दद्या
दलंकृत्यविधानतः आसीमांतमनुव्रज्यब्राह्मणांस्तान्विसर्जयेत् ३६ यस्यस्मृत्येतिमंत्रेणनमस्कृत्यजनार्दनम् अन्नं
विभज्यभूतेभ्योयथाभागमकुत्सयन् ३७ भुंजीतस्वजनैःसार्द्धंमिथ्यावादविवर्जितः दर्शस्यदिवसेप्राप्तेकुर्याज्जागरणं
निशि ३८ राधिकासहितंहैमपूजयेत्पुरुषोत्तमम् पूजांतेचनमस्कृत्यसपत्नीकोमुदान्वितः ३९ व्रतीविसर्जयेद्देवंसरा
धंपुरुषोत्तमम् आचार्यायततोदद्यादुपहारंसमूर्तिकम् ४० सूतउवाच उद्यापनंप्रवक्ष्यामिमलांतरमतःपरम् वि
ष्णुनाकथितंलक्ष्म्यैतच्छृणुध्वंद्विजोत्तमाः ४१ विष्णुरुवाच उद्यापनविधिंदेविकथ्यमानंमयाशृणु कृष्णपक्षेच
तुर्दश्यांनित्यंतावत्समाचरेत् ४२ सर्वोपस्करसंयुक्तोव्रतीपूजागृहंविशेत् नित्यपूजांप्रकुर्वीतकुर्यात्संकल्पकंततः
४३ शुक्लप्रतिपदारभ्ययन्मयाचरितंव्रतम् अधिमासस्यदेवेशविधिनाप्रीतयेतव ४४ उद्यापनंकरिष्येहंतस्याद्यम
धुसूदन निर्मायपंचभिर्धान्यैःसर्वतोभद्रमंडलम् ४५ शोभितंवनमालाभिर्वितानध्वजराजितम् बहुदीपसमाकीर्णं
किंकिणीघरशोभितं ४६ दर्पणैश्चामरैश्चैवकलशैश्चसमावृतं कदलीस्तंभशोभाढ्यंचतुरस्रंसुमंगलम् ४७

धानंनिरूप्येदानीं
स्कांदीयंविष्णुप्रोक्तंनिरूपयतिसूतउवाचेत्यादिना अत्रमलद्वयेपिफलतात्पर्यमेकमेवद्वयोरन्यतमेनकर्तव्यमित्यर्थः ४१ नित्यंस्वकीयाह्निकम्
४२ नित्यपूजांप्रत्यहंयथापूजनंक्रियते तथापूजांप्रकुर्वीततत:अनंतरं ४३ संकल्पमाह शुक्लेतिसार्द्धेन ४४ ४५ ४६ ४७

४८ ४९ ५० ५१ ५२ ५३ एवमुक्तप्रकारेण चतुर्कुंभस्थदेवतापूजनंनिरूप्य मतांतरमाह एवमिति एवंद्वादशकुंभेषुजनार्दनंप॰
येत् अत्रविशेषः स्कांदे मंडलंसप्तधान्येनसर्वतोभद्रसंज्ञकं त्रिंशत्संख्याघटास्तत्रस्थाप्यास्तोयप्रपूरिताः सवस्त्राःसफलाश्चैवमध्येस्वर्णमयःशु
भः ताम्रमयोमृण्मयोवाघटस्तत्रयजेद्धरिम् विभवेसतिकर्तव्योमासेमासेप्रयत्नतः नोचेद्द्वादशेमासिकर्तव्योयंविधिक्रमः आयुष्यमस्थिरंमत्वा

तन्मध्येस्थापयेत्कुंभंजलयुक्तंततःपरम् लक्ष्मीनारायणंदेवंपूर्णपात्रोपरिन्यसेत् ४८ पूर्वादिषुचतुर्दिक्षुकलशान्ज
लपूरितान् पंचपल्लवसंयुक्तान्पंचरत्नसमन्वितान् ४९ स्थापयेदव्रणांस्तत्ररक्तसूत्रैश्चवेष्टितान् कुंडंतत्रप्रकुर्वीतस्थंडि
लंवासलक्षणम् ५० संस्थाप्यविधिनातत्रपावकंचततोग्रहान् साधिप्रत्यधिदेवत्यानीशान्यांस्थापयेद्व्रती ५१
ग्रहाणांपूजनंकुर्याच्छौनकोक्तविधानतः ततश्चावाहयेदिंद्रंकलशेपूर्वदिक्स्थिते ५२ त्रातारमितिमंत्रेणदक्षिणेचयमं
तथा पश्चिमेवरुणंदेवंकुबेरमुत्तरेतथा ५३ एवंद्वादशकुंभेषुपूजयेद्वाजनार्दनम् एवंसर्वंप्रकर्तव्यंकल्पितपरमासने ५४
ममपूजांप्रकुर्वीतपूर्वोक्तविधिनानरः स्त्रीपुंसोर्भूषणानीहसूक्ष्माणिवसनानिच ५५ तथाभोजनपात्राणिव्रतीमह्यं
समर्पयेत् कर्मकृत्वाज्यभागांतंततोहोमंसमाचरेत् ५६ सिताज्यपायसान्नेनकेवलेनघृतेनवा अष्टोत्तरसहस्रंवाशतम
ष्टोत्तरंनरः ५७ तद्विष्णोरितिमंत्रेणद्वादशाक्षरकेनवा पूर्णाहुतिविधानेनसर्वकर्मसमाचरेत् ५८ सप्तप्रदक्षिणाःकृत्वा
स्तुत्वादानानिदापयेत्

मासेमासेप्रकारयेत् त्रिंशद्भिर्हायनैःपूर्णंसर्वेमासाभवंतिहि ५४ ममेतिविष्णूक्तिः ५५ ५६ ५७
तद्विष्णोरितिवैदिकोमंत्रः द्वादशाक्षरोतांत्रिकोवैदिकश्च ॐनमोभगवतेवासुदेवायेति ५८ दानानिकानिइत्यपेक्षायामाह पाद्मोक्तमाहात्म्ये स्व
वर्णरजतंक्षौमंवस्त्रमाविकमौर्णिकं पयस्विनीसवत्सागौर्नानोपस्करसंयुता कंबलाजिनरत्नानि वासांसिविविधानिच दंपतीपरिधानंचपदमष्टविधंत
था तिलपात्रंघृतपात्रंजलपात्रमुपानहौ मुखावलोकनार्थंवैकांस्यपात्रंससर्पिषम् शालग्राममूर्तिदानंछत्रदानंतथैवच सवस्त्रंवंशपात्रंचपादुकां

चकमंडलुम् कुंडलंमुद्रिकायुक्तंदेयंचविदुषेतया सप्तधान्यस्यदानानि ह्युपवीतस्यचैवहि तांबूलस्यफलानांचदानंतत्रसमाचरेत् स्तुतेस्यत्र विष्णुस्तोत्रमाह तत्रैवपूर्ववत् पूजनंकृत्वा स्तोत्रमेतदुदीरयेत् नमःपुरुषोत्तमाख्यनमस्तेविश्वभावन नमस्तेस्तुहृषीकेशमहापुरुषपूर्वज येनेदमखिलंजातंयत्रसर्वंप्रतिष्ठितम् लयमेष्यतियत्रैवतंप्रपन्नोस्मिकेशवं परेशपरमानंदपरात्परतरःप्रभुः चिद्रूपश्चित्सरिज्ञेयःसमेकृष्णःप्रसीदतु कृष्णंकमलपत्राक्षंरामंरघुकुलोद्भवं नृसिंहंवामनंविष्णुंस्मरन्यातिपरांगतिं वासुदेवंवराहंचकंसकेशिनिषूदनं पुराणपुरुषंयज्ञपुरुषंप्रणतोस्म्यहं अनादिनिधनंदेवंशंखचक्रगदाधरम् त्रिविक्रमंहलधरंप्रणतोस्मिसनातनं यइदंकीर्तयेन्नित्यंस्तोत्रंपापप्रमुक्तमोचनं सर्वपापविनिर्मुक्तोविष्णुलोकेमहीयते इस्तुत्वाततोविष्णुंब्राह्मणांश्चप्रपूजयेदिति शय्यादानमितितल्लक्षणमाह स्कांदीयमाहात्म्ये ततःशय्यांसमानीयसारदारुमयींदृढां दंतपत्रान्वि

शय्यादानंसविधिनाकर्तव्यंव्रतपूर्तये ५९ तथैवकुर्याद्गोदानंपूर्वोक्तविधिनानरः गोदानानंतरंदेविसपत्नीकान्द्विजोत्तमान् ६० भोजयेद्विविधान्नैश्चपायसाज्यसितादिभिः कलशस्थैश्चपानीयैःप्रकुर्यादभिषेचनम् ६१ आचार्यायैवतत्सर्वंप्रदेयंव्रतिनाध्रुवम् दिवसस्याष्टमेभागेस्वयंभुंजीतवाग्यतः ६२

दिव्यपट्टैरलंकृताम् सहतूलीप्रतिच्छन्नांशुभगंडोपधानिकाम् प्रच्छादनपटीयुक्तांधूपगंधादिवासिताम् तांबूलंकुंकुमाक्षोदकर्पूरागरुचंदनम् दीपकोपानहच्छत्रचामरासनभोजनम् पार्श्वेषुस्थापयेद्भक्त्यासप्तधान्यानिचैवहि शय्यामेवंविधांकृत्वासर्वोपस्करसंयुताम् तस्यांसंस्थापयेन्मूर्तिं मदीयांप्रतिमांप्रिये ततःसंप्रार्थयेद्विप्रंबद्धकरसंपुटैः देवदेवजगन्नाथदामोदरदयानिधे त्वामहंरमयायुक्तंवरशय्यासनेस्थितम् आचार्यायप्रदास्यामिव्रतसंपूर्णहेतवे त्वद्दानेनरमाकांतममसंतुमनोरथाः एवंसंप्रार्थ्यप्रागादौविधिनाचार्यमर्चयेत् तुभ्यंदास्यामिविप्रेंद्रवरशय्यासनंप्रभो प्रतिगृह्यद्विजश्रेष्ठमद्व्रतंसफलंकुरु इत्युच्चार्यव्रतीतस्यप्रक्षेप्यसकुशंजलमिति ५९ गोदानमाहात्म्यंविंशतितमेऽध्याये पूर्वंप्रतिपादितंतेनविधिना ६० ६१ ६२

६३ नियमइति नियमत्यागस्यविधानमाह बृहन्नारदोक्तमाहात्म्ये दृढधन्वानंप्रतिवाल्मीकिरुवाच अशेषपापनाशार्थंप्रीतयेगरुडध्वज गृहीतनियमत्यागश्चोच्यतेविधिपूर्वकः नक्तभोजीनरोराजन्ब्राह्मणान्भोजयेन्नृप अयाचितेव्रतेचैवस्वर्णदानंसमाचरेत् अमावास्यामनशनोप्रदद्याद्गांसदक्षिणां धात्रीस्नायीनरोयस्तुदधिवाक्षीरमेवच फलानांनियमेराजन्फलदानंसमाचरेत् तैलस्थानेघृतंदेयंघृतस्थानेपयस्तथा धान्यानांनियमेराजन्गोधूमान्शालितंदुलान् भूमौचशयनेराजन्सतूलींसपरिच्छदां सखट्वांचात्मनो यस्यस्यंतर्यामीप्रियोजनः पत्रभोजीनरोयस्तुभोजनंघृतशर्करं मौनेघंटांस्तिलांश्चैवसहिरण्यान्प्रदापयेत् दंपत्योर्भोजनंचैवसस्नेहंचसुभोजनं नखकेशधरोराजन्आदर्शंदापयेद्बुधः उपानहौप्रदातव्येउपानहविवर्जनात् लवणस्यपरित्यागेदातव्याविविधारसाः दीपदानेनरोदद्यात्सान्नयुक्तंचदीपकम् दीपंचसघृतंताम्रंकांचनीवर्तिसंयुतं पलमात्रं

यस्यान्नस्यकृतोयेननियमः प्रथमेदिने तदन्नंहिभोक्तव्यंभूतायामेवभामिनि ६३ फलाहारस्यवान्यस्य
त्युपवासस्यवाप्रिये नियमोयत्कृतोयेनकार्यस्तेनसएवहि ६४ रात्रौजागरणंकार्यमशक्तस्तुयथासुखं चित्तशुध्यं
नकुर्वीतनकुर्याच्छक्तितोऽधिकं ६५ अथप्रभातेसंजातेस्नात्वानित्यंसमाचरेत् भास्कराभिमुखोभूत्वाअर्चयेन्मंडलहरेः ६६

प्रदेयंस्याद्व्रतसंपूर्णहेतवे एकांतरोपवासेनकुंभानष्टौप्रदापयेत् सवस्त्रान्कांचनोपेतान् मृण्मयानथकांचनान् मासांतेमोदकांस्त्रिंशच्छ्रोपानहंसंयुतान् अनड्वांश्चैवदातव्योधौरेयस्तुधुरक्षमः सर्वेषामप्यलाभेतुयथोक्तकरणंविना द्विजवाक्यंस्मृतंराजन्संपूर्णव्रतसिद्धिदमिति ६४ जागरणमिति जागरणेविशेषःपाद्मे रात्रौजागरणंकार्यंपुराणश्रवणेनच गीततालमृदंगाद्यैस्तूर्यवाद्यैरनेकधा· जितेंद्रियोवशीशुद्धोपाखंडालापवर्जितः अर्घ्यंदद्याच्चंद्रमसेश्रद्धाभक्तियुतोव्रती कृतांजलिपुटोभूत्वाप्रार्थयेत्तदनंतरम् तिष्ठन्पूर्वमुखोभूत्वापश्यन्निंदुंचसत्तमः नमःशुक्लांशवेतुभ्यंद्विजराजायतेनमः रोहिणीपतयेतुभ्यंपुरुषोत्तमतेनमइति पुरुषोत्तमहरमेयन्मयापूर्वसंचितं पूजितस्त्वंवसिष्ठेनविश्वामित्रेणजन्हुना नाम्नावाविष्णुमंत्रेणयथासंख्याजपेनच प्रीयतांमेरमाकांतदेहिमेवांछितंफलमिति यथाशक्तितपश्चकर्तव्यइति ६५ हरेःसूर्यस्य ६६ ६७

६७ ६८ ६९ ७० ७१ ७२ ७३ ७४ ७५ ७६ ७७
७८ ७९ ८० कौशिकस्यात्मजइति अत्रप्रसिद्धाकथा ग्रनराजे युधिष्ठिरंप्रति मार्कंडेयउवाच शृणुधर्मभृतांश्रेष्ठकौशिको

ताम्रपात्रेतनस्तोयंकृत्वासाक्षतपुष्पकम् अर्घ्यंदद्याद्व्रतीमत्त्रंमंत्रैरेभिःपृथक्पृथक् ६७ पद्मनाभगदापाणेदा
मोदरवरप्रद गृहाणार्घ्यंमयादत्तंसूर्यमंडलगाच्युत ६८ पुरुषोत्तमकंसारेकालीयदमनप्रभो गृहाणार्घ्यंमयाद
त्तंसूर्यमंडलगाच्युत ६९ एवमर्घ्यत्रयंदत्वाकांस्यपात्रत्रयंततः प्रीतयेधर्मराजस्यपितॄणांभास्करस्यच ७० एक
मेकंप्रदातव्यंब्राह्मणेभ्यःपृथक्पृथक् ततःसंप्रार्थयेद्देवंसूर्यमंडलगंप्रभुम् ७१ मयायद्देवदेवेशमलमासव्रतं
कृतम् ब्रह्मचर्यादिनियमैःसहितंप्रीतयेतव ७२ तत्सर्वमक्षयंभूयात्प्रसादात्तवकेशव एवंप्रसाद्यदेवेशंपुराण
त्तमथार्चयेत् ७३ ब्राह्मणान्भोजयेद्भक्त्यास्वयंभुंजीतवाग्यतः उद्यापनंविनादेविव्रतंभवतिनिष्फलम् ७४ सू
तउवाच एवमेवपुराप्रोक्तंमार्कंडेयेनधीमता युधिष्ठिरायतत्रत्वांविशेषंप्रवदाम्यहम् ७५ युधिष्ठिरउवाच अधि-
मासस्यमाहात्म्यंमार्कंडेयमुनेवद जपयज्ञादिकंपुण्यमुद्यापनविधिंचनः ७६ मार्कंडेयउवाच मलमासस्तुमासा
नांमलिनःपापसंभवः तस्यपापविशुद्ध्यर्थंमलमासव्रतंकुरु ७७ प्रतिपत्तिथिमारभ्यत्वमावास्यावधिर्भवेत् स्नानंदानं
व्रतंकुर्यात्सूर्वोक्तविधिनानृप ७८ उपोष्यचचतुर्दश्यांसर्वपापैःप्रमुच्यते दारिद्रेणव्यतीपातेप्यथवाद्वादशीदिने ७९ पौर्ण
मास्यांचतुर्दश्यांनवम्यांवानृपोत्तम अष्टम्यांवाथकर्तव्यंव्रतंशोकविनाशनम् ८० यथालाभोपचारेणसमर्थःपूर्णमाचरेत्

नामचैद्विजः महातपध्यानरतःसत्यसंधोजितेंद्रियः विष्णुभक्तःसदाविप्रोवेदधर्मपरायणः तस्यसूनुर्महाक्रूरोद्विजोमैत्रेयनामकः कामांधः

स्वजनत्रासीसाधुद्वेषकरोधमः एकदाहयमारुह्यप्रयातोनागरंप्रति व्यवसायिस्वरूपेणसौराष्ट्रंनगरोत्तमम् भृत्यैश्चसहितोविप्र वधंकृत्वास्वहस्ततः शस्त्रास्त्रकर्मभिर्घोरैर्धनंचल्हनवान्बहु हाहाकारोमहान्जातो विप्रवंशकुलाधमः तस्यापंचमहच्छ्रुत्वाचागतैर्यष्टिकिंकरैः ताडितोमुद्गरैर्घोरैःकृमिकुंडेनिपातितः एतन्नारदवाक्याच्चकौशिकेनततःश्रुतं लांछनंब्रह्महत्यानांत्वत्कुलेमुनिसत्तम तस्यापपरिहारार्थंव्रतंनेदंसमाचरेत् ब्रह्महत्यासुरापानंस्तेयंगुर्वंगनागमम् कोटिजन्मार्जितंपापंतत्क्षणाद्व्रतयोगतः प्रणश्यतिनसंदेहोमलमा-

कौशिकस्यात्मजःपूर्वंमैत्रेयोब्राह्मणाधमः ८१ मलमासव्रतोत्पन्नपुण्यग्रहणयोगतः ब्रह्महत्यादोषमुक्तो दिव्यदेहमवाप्तवान् ८२ तस्माद्व्रतंमासमेकंकुर्याद्व्रतैर्विचित्रकैः अंतेभूतदिनेप्राप्तेउपोष्यसुसमाहितः ८३ कृत्वानित्यविधिंपश्चाद्धुत्वानियमतस्ततः त्रिंशद्ब्रह्मनिरतान्ततोविप्रान्निमंत्रयेत् ८४ ततोमध्याह्नवेलायांकृत्वामाध्याह्निकीःक्रियाः उत्तमंमंडपंकृत्वातूर्यनादसमन्वितम् ८५ तन्मध्येसर्वतोभद्रंतन्मध्येकुंभमुत्तमम् पंचरत्नादिसहितंतत्रदेवंप्रपूजयेत् ८६ षोडशैरुपचारैश्चस्वस्तिवाचनपूर्वकम् ततस्त्रिंशच्चनामानिपूजयेच्चयथाविधि ८७ जिष्णुंविष्णुंमहाविष्णुंहरिंकृष्णमधोक्षजम् केशवंमाधवंराममच्युतंपुरुषोत्तमम् ८८ गोविंदंवामनंश्रीशंश्रीकृष्णंविश्वसाक्षिणम् नारायणंमधुरिपुमनिरुद्धंत्रिविक्रमम् ८९ ५ ५

सस्यकौशिक तस्मात्कुरुत्वंविप्रेंद्रब्रह्महत्यांतरिष्यसि मार्कंडेयउवाच तच्छ्रुत्वाकौशिकोवाक्यंनारदस्यमहात्मनः मलमासव्रतंचक्रे पुण्यंतद्व्रतसंभवम् दत्तंत्रिवार्षिकंतत्रकौशिकेनसुतायतत् दिव्यदेहस्तदाजातोव्रतस्यास्यप्रभावतः निष्पापश्चतदादृष्टोमैत्रेयःकौशिके नचेति ८१ भूतदिनेचतुर्दशीदिने ८२ ८३ ८४ ८५ ८६ नामानिवक्ष्यमाणानिसंतितैरितिशेषः ८७ नामान्याहचतुर्भिः ८८ ८९

९० ९१ ९२ ९३ ९४ ९५ ९६ ९७ ९८ ९९ १००

वासुदेवंजगद्योनिंशेषतल्पगतंतथा संकर्षणंचप्रद्युम्नंदैत्यारिंविश्वतोमुखम् ९० जनार्दनंधराधारंश्रीधरंचसमर्चयेत् कुंभस्थितेकांस्यपात्रेपूजयेच्चजनार्दनम् ९१ पीतेनवस्त्रयुग्मेनह्युपवीतेनचैवहि आवाहनादिपुष्पांतंपूजयेच्चयथाविधि ९२ ताम्रपात्रस्थिततोयंचंदनाक्षतपुष्पकैः अर्घ्यंदद्यात्सपत्नीकोनारिंगादिफलैर्युतम् ९३ पंचरत्नसमायुक्तंजानुनीस्थाप्यभूतले आरोप्यभालेहस्तौचश्रद्धाभक्तिसमन्वितः ९४ अधिमासेतुसंप्राप्तेशुभेसूर्यादिदैवते देवदेवमहादेवप्रलयोत्पत्तिकारक ९५ गृहाणार्घ्यंमयादत्तंकृपांकृत्वाममोपरि स्वयंभुवेनमस्तुभ्यंब्रह्मणेमिततेजसे ९६ नमोस्तुतेप्रियानंतब्राह्मणानांदयांकुरु एवंस्तुत्वाजगन्नाथंगंधपुष्पोपहारकैः९७ पूजयित्वाजगन्नाथंचतुर्षुप्रहरेषुच तथाजागरणंकुर्यात्कीर्तनश्रवणादिभिः ९८ ततःप्रभातसमयेत्वमावास्यादिनेनृप विष्णुंचपूजयेद्भक्त्यापश्चाद्धोमंसमाचरेत् ९९ समित्तिलाज्यचरुणापायसेनहुतेनृप अतोदेवेतिषट्केनअयुतंवासहस्रकम् १०० पूर्णाहुतिंततःकृत्वाहोममशेषंसमापयेत् गुरोःपूजांततःकुर्याद्वस्त्रधान्यादिसप्तकैः १०१ प्रदद्याद्धेनुनासार्द्धंप्रतिमांचतथानृप त्रयस्त्रिंशदपूपांश्चकांस्यपात्रसमन्वितान् १०२ प्रदद्याद्गुरवेराजन्घृतशर्करयासह ब्राह्मणान्पूजयेत्पश्चाद्वस्त्रालंकारचंदनैः १०३ कलिंगोवाससीदद्यात्त्रयस्त्रिंशच्चकुंभकान् कांस्यपात्रसमायुक्तानपूपान्घृतसंयुतान् १०४ वटकैःसहराजेंद्रयथाशक्त्याचदक्षिणां ब्राह्मणान्भोजयेत्पश्चाद्भक्ष्यभोज्यफलादिभिः १०५

१०१ १०२ १०३ १०४ भक्ष्यभोज्यफलादिभिरिति फलादीनि पूर्वंचतुस्त्रिंशच्छ्लोकव्याख्यायामोक्तानि १०५

१०६ १०७ १०८ इतिश्रीपुरुषोत्तममासमाहात्म्यटीकायांत्रिंशोऽध्यायः ३० ६९ अयास्मिन्नध्यायेमाहात्म्यश्र

विसर्जयेत्ततोविप्रान्दत्वातांबूलदक्षिणे असंक्रांतंव्रतंनारीयाकरोतिहरिप्रियम् १०६ दारिद्र्यंपुत्रशोकंच वैधव्यंनभवेत्कदा एवंविधोपिपुरुषोयदिकुर्यान्मलिम्लुचे १०७ एतत्तेकथितंपार्थगुह्याद्गुह्यतरंपरम् वाजपेयायुतफलंश्रोतावक्तालभेद्ध्रुवम् १०८ इतिश्रीसप्तपुराणसारोद्धारेश्रीपुरुषोत्तममासमाहात्म्ये पुरुषोत्तममासव्रतोद्यापनविधिकथनंनामत्रिंशोऽध्यायः ३० ६९ सूतउवाच एवंयःकुरुतेभक्त्यास्वामीष्टंसर्वमाप्नुयात् गुह्याद्गुह्यतरंचैतन्नवाच्यंयस्यकस्यचित् १ श्रोतव्यमेतत्सततंपुराणमभीष्टदंपावनमादरेण श्लोकैकमात्रश्रवणेनपुंसामघानिसर्वाणिनिहंतिविप्राः २ गंगादिसर्वतीर्थेषुमज्जतोयत्फलंभवेत् तत्फलंशृण्वतस्तस्यमाहात्म्यंमुनिसत्तमाः ३ इलांप्रदक्षिणीकुर्वन्यत्पुण्यंलभतेनरः तत्पुण्यंशृण्वतस्तस्यमाहात्म्यंपौरुषोत्तमम् ४ ब्राह्मणोब्रह्मवर्चस्वीक्षत्रियोवसुधाधिपः वैश्योधनपतिर्भूयाच्छूद्रःसत्तमतांलभेत् ५ येन्येकिरातहूणाद्याःपशुचर्यापरायणाः तेसर्वेमुक्तिमायांतिश्रुत्वामाहात्म्यमुत्तमम् ६ पुरुषोत्तममाहात्म्यंलेखयित्वाद्विजन्मने संपूज्यवस्त्रभूषाभिर्विधिनायःप्रयच्छति ७ कुलत्रयंसमुद्धृत्यगोलोकंयातिदुर्लभम् लिखित्वाधारयेद्यस्तुगृहेमाहात्म्यमुत्तमम् ८ तद्गृहेसर्वतीर्थानिविलसंतिनिरंतरम् लक्ष्मीरुवाच प्रसादात्तवदेवेशश्रुतंव्रतफलंमहत् ९

वणफलंप्रतिपादयति सूतउवाचेत्यादिना १ अघानिपापानि २ ३ इलांपृथिवीम् ४ ५ ६ ७ ८ ९

माहात्म्यमितिशेषः १० ११ १२ १३ १४ १५ देवरात इतिस्पष्टार्थः अत्रप्रसिद्धांकथा
माह स्कांदोक्तमाहात्म्ये अत्रैवोदाहरंतीममितिहासंपुरातनम् आसीत्किरातनगरे ब्राह्मणोज्ञानदुर्बलः दरिद्रोरसविक्रेता देव
धर्मपराङ्मुखः संध्यास्नानपरिभ्रष्टो वैश्यावृत्तिपरायणः देवरात इति ख्यातो विश्वस्तघ्नतवंचकः कदाचिद्दैवयोगेन प्रतिष्ठानमु
पागतः दृष्ट्वा शिवालयंतत्ररम्यं साधुजनावृतम् मार्गश्रमार्दितो विप्रो रात्रौ तत्रैवसंस्थितः तस्मिन्शिवालयेनित्यं पुराणार्थी द्विजो

अधुनाश्रोतुमिच्छामि त्वत्कथाश्रवणोद्भवम् विष्णुरुवाच शृणुप्रिये प्रवक्ष्यामि यच्चत्वंश्रोतुमिच्छ-
सि १० मत्कथाश्रवणात्सद्यो निष्पापोजायतेनरः पापमतिंपरित्यज्य सन्मतिंलभतेध्रुवम् ११ राजसू
येनयत्पुण्यमग्निष्टोमशतेनच तत्पुण्यंलभतेनूनं मत्कथाश्रवणान्नरः १२ सर्वतीर्थावगाहेनगवामयु
तदानतः यत्फलंलभतेनूनंमत्कथाश्रवणाद्भवेत् १३ अष्टांगयोगतोदेवि यांगतिंलभतेध्रुवम् तांग
तिंसमवाप्नोतिमत्कथाश्रवणान्नरः १४ काश्यांमरणमात्रेणयांगतिंप्राप्यतेनरः मत्कथाश्रवणेनापि
गतिंतामेवप्राप्यते १५ देवरातःपुराविप्रोसर्वधर्मपराङ्मुखः मासमाहात्म्यश्रवणान्निष्पापोमत्पदं
ययौ १६

नमः पूजयित्वाशिवंभक्त्या पुराणंपापनाशनम् समाचष्टेतितत्रस्थान्निष्कामोवैष्णवींकथाम् देवरातस्तदैका
तेज्वरेणातिप्रपीडितः संस्थितोमासपर्यंतमप्राशान्याश्रयोद्विजः शृणोतिसततंतत्रकथांपापप्रणाशिनीम् मासांतरेणसहसासद्वि
जोनिधनंगतः तदायमभटैरुग्रैर्बद्ध्वापाशैःसुदारुणैः नीयमानंतुतंदृष्ट्वायमलोकेभयप्रदे तदामदाज्ञयादूता मामकाःकमलास

ने निर्भर्त्सयित्वा दूतांस्तान् छित्वा पाशांश्च दारुणान् देवरातं समारोप्य विमाने परमाद्भुते आनीतो यत्पदे दिव्ये पुनरावृत्तिवर्जिते मास
मात्रं विशालाक्षि कथाश्रवणपुण्यत इति १६ १७ १८ १९ २० २१ २२ २३
२४ २५ शूद्र इति कश्चिद्भूते निंदनात् निंदाकरणात् राक्षसो जातः ततः विष्णुशर्मब्राह्मणस्यानुग्रहेण तदुक्तकथायाः

अतः पुराणश्रवणं सदा कार्यं मनीषिभिः पुराणश्रवणाद्देव जायते निर्मला मतिः १७ बुध्या निर्मलया
नूनं मयि भक्तिर्हि जायते मद्भक्त्या प्राप्यते नूनं मदीयं परमं पदम् १८ मत्कथाश्रवणं कुर्यात्सर्वकालं सु
खेप्सुभिः सततं श्रवणेशक्तः पुण्यमासदिनेषु च १९ तत्राप्यशक्तो मनुजोधिमासे भक्त्या पुराणश्र
वणं प्रकुर्यात् शून्यः कृतो येन सरोजनेत्रे सरौरवाख्यं निरयं प्रयाति २० मलमासस्य माहात्म्यं शृण्व
ति ये नराः शुचि पुत्रपौत्रादिकं तेषां सौख्यं भवति सर्वदा २१ एकाध्यायमपि श्रुत्वा भक्तिभावेन मानवः
सर्वतीर्थेषुकृस्नातो जातोद्य न संशयः २२ मलमासे विशेषेण प्रत्यहं श्रवणं बुधैः कर्तव्यं सर्वथा भ
क्त्या त्रिंशन्मासात्मकफलम् २३ प्राप्नुवंति महात्मानो नात्र कार्या विचारणा मलमासो गतो येषां श्रवणे
न विना ऽनघे २४ त्रिलोकस्थो मलः सर्वस्तेषां पतति मस्तके तस्मात्सर्वप्रयत्नेन कथाश्रवणमाचरेत् २५

वणयोगतः राक्षसत्वात् विनिर्मुक्तः वैकुंठं गतवानित्युत्तरेणान्वयः अत्रप्रसिद्धमितिहासमाह पुराणसंहितायां लक्ष्मीं प्रति विष्णुरु-
वाच अस्ति भरतखंडे नर्मदानामनदी तत्तीरे शेमुषीनामपुरं तत्र मणिमान्नामकः ब्रह्मण्यः शरण्यः राजा आसीत् तत्पुरे सकुटुंबकः कश्चि:

वेदाध्ययनतत्परः शिवपूजकः विष्णुशर्माब्राह्मणः आसीत् सैकदा यात्रोद्देशेनैकाकी गृहान् निगतः तीर्थानिकुर्वन् स्वेच्छया प्रभासक्षेत्रमागत्य सोमनाथंसंपूज्य विधिनाश्राद्धंचकृत्वा दरिद्रत्वयोगात् ब्राह्मणभोजनकरणे तस्यनिकटे द्रव्यंनासीत् तदातीवमनसि चिंतयामास तदैवकश्चिद्वैश्यपुत्रः विष्णुशर्माणमाह वैश्यपुत्रउवाच हेविप्र शृणुमद्वाक्यं किमर्थंत्वमवानसि चिंतातुरंचपश्यामि मानसंतवसांप्रतम् विष्णुशर्मोवाच निःस्वोस्मिविद्ययायुक्तः श्रद्धास्तिविप्रभोजने विनाद्रव्यंकथंसास्यात्तस्माच्चिंतातुरोस्म्यहम् विद्यातोपिधनंचात्रमेधंज्ञातंमयाधुना धनार्थंच प्रयत्नोवै कर्तव्योनात्रसंशयः वैश्यपुत्रउवाच हेद्विज अहमपि त्वत्सदृशःनिर्धनोस्मि धनार्जनार्थंस्वगृहान्निर्गतः रत्नादीनांपरिक्षायांममज्ञानमस्ति परंतुसंगतिर्नास्ति एतस्मिन्नंतरेतत्रकश्चिद्वैश्यः आगत्य विष्णुशर्माणंवैश्यपुत्रंचाह अस्माकंस्वामीकुबेरसदृशः धनीअस्ति सयातिनावमारूढोरत्नद्वीपंप्रतिद्रुतम् तस्यैवापेक्षितश्चासीन्रत्नादीनांपरिक्षकः विद्यावान्ब्राह्मणः कश्चिदपेक्ष्योस्तिस्वसंगृहे तदर्थमाग

शूद्रः कश्चिद्राक्षसोभूत्कथाश्रवणनिंदनात् ·

तोस्म्यद्ययुवांपृच्छामिसादरम् यदिवांधनलिप्साचेत्तर्ह्यागंतव्यमेवहि मत्स्वामीदास्यतेद्रव्यंयथान्यायंपणेनहि तौविचार्यगतौशीघ्रंयत्रास्तेधनपालकः धनपालसमंतौचनौकावेगात्समाश्रितौ वाताधीनतयानौकागच्छतिप्रत्यहंद्रुतम् स. क्षुद्रजलकल्लोलैर्हन्यमानाइतस्ततः सर्वेस्मरंतिदेवेशंपरमात्मानमव्ययम् एकस्तत्रसमायातः पर्वतोयोजनायतः तत्तीरेसंस्थितानौका प्रातःकालोभवत्तदा नौकांतःकेचिदुत्तीर्णाः पर्वतंद्रष्टुमुत्सुकाः विष्णुशर्मातदोत्तीर्णोगृहीतुंपुष्पसंचयम् पुनर्नावंसमारूढालोकाःसर्वेस्वपर्वतात् विष्णुशर्मापुष्पार्थंदूरंगतः तत्रमार्गभ्रष्टोजातः ततःभ्रमन्तीरमागत्य तांनौकामदृष्ट्वाभृशंरुरोद अहोममस्मरणंकेनापिनकृतमित्यादिविलप्य सर्वकालकृतमत्वा तृषार्तःसन् निर्झरणंगत्वा पानार्थंजलंयावद्ग्रहीत्तावदेकोराक्षसः तत्रागत्योवाच भोविप्र एतद्विषजलंमापिब किंचत्वद्दर्शनात् ममदुष्टदुर्गता·

अतः उत्तमजलं दर्शयामीत्युक्त्वा तेनसाकंसरोवरंजगाम तत्रविष्णुशर्मास्नानसंध्यावंदनं देवपूजनंश्रीमद्भागवतपूजनंकृत्वा जलंपीत्वा विष्णुंतुष्टाव तदाप्रसन्नोविष्णुः द्विजसमीपेनारदंप्रेषयामास तदानारदः द्विजसमीपमागत्य हेद्विजेंद्र त्वंगृहंप्राप्स्यसि चिंतांमाकुरु इत्युवाच द्विजश्चनारदंदृष्ट्वा प्रोवाच हेनारद तवदर्शनं देवानामपिदुर्लभंमन्ये तन्मेजातंकिंभाग्यं किंचपरलोके परोपकारकंवचनं वदामि हेनारद अनेनराक्षसेन विषात् मेप्राणाः रक्षिताः राक्षसत्वात्भक्षणमपिनकृतं अतः उपकार इयंजातं उत्तमंजलंचदर्शितं अतएनं दयांकर्तुंअर्हसि यथायंराक्षसंदेहंत्यक्त्वा मानुषोभवेत् केनकर्मणाराक्षसत्वंप्राप्तइतिचवद नारदउवाच पुरायंवैराटनगरे बालिशोनामशूद्रः कदाचिद्दैवयोगेनबलात्कारेण स्वकुटुंबेन शुक्लेश्वरसमीपेचंदनायां स्नानार्थंआनीतः तत्रैकोब्राह्मणः शुक्लेश्वरस्य मंडपमध्ये पुरुषोत्तममास माहात्म्यकथांजनसमूहे चक्रे तत्रायंशूद्रः श्रवणार्थमागत्य क्षणंस्थित्वा कथांनिंदामकरोत् शूद्रउवाच अरेविप्रजनान् कथंवंचनंकरोषि कथालापे

विष्णुशर्माप्रसादेनकथाश्रवणयोगतः २६

नचौरवत्धनंकथंगृण्हासि हेद्विजाधम द्वादशमासेषु त्रयोदशमासंवृथाब्रूषे अहोलोकाअपिबालिशाः वंचकवाक्यविश्वासेन कष्टार्जितधनस्यनानादानप्रसंगेनव्ययंव्यर्थंकुर्वंति उपविश्यासनेभव्येकथामात्रेण केवलैः स्वकुटुंबंपुष्णासि कृष्यर्थेनश्रमस्तव अस्माकंकिंगतंचात्रनाहंदद्मिकपर्दिकां एवंवदतिशूद्रेवैजनाःसर्वेसमुत्थिताः स्वंस्वंवेश्मगताःसर्वेगतः पौराणिकोपिच शुक्लेश्वरगणस्त्वेकोधृत्वाशूद्रंपथिस्थितम् घातयित्वात्रिशूलेन शापोदत्तः शिवाज्ञया भूत्वाशूद्रोनजानीषे विष्णोर्माहात्म्यमुत्तमम् निंदसेचपुनस्तद्वै तस्माद्रक्षोभवाधुना क्षणमात्रंश्रुताविष्णोः कथानेनदुरात्मना तस्मादनुग्रहः कालेनारदात्तेभविष्यति इत्युक्त्वातदैवतत्र शुक्लेश्वरगणस्तदा सोयंकालःसमायातः सत्संगेन शुभोनृणाम् रक्षःशृणु वचोमह्यं मयप्रभृतिचाहृतः इमंनयद्विजंत्वस्यास्कंधेकृत्वाचपर्वतात् शीघ्रंग्रामेद्विजंस्थापय

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

ततोग्रेवैशाखः पुरुषोत्तममासः भविता तत्रविष्णुशर्ममुखात् तन्माहात्म्यंमासपर्यंतंसंश्रुत्य चंदना तटसंस्थितं शुक्लेश्वरंनत्वा मुक्तोभविष्यसि इत्युक्त्वा नारदोंतर्दधे राक्षसः विष्णुशर्माणंसंपूज्य अमौल्यरत्नानि अर्पयामास ततः सत्वरं द्विजंस्वस्कंधे आदाय अंतरिक्षमार्गेण तर्णं तद्गृहंपाय पाययामास ततः राक्षसः द्विजंप्रणिपत्य ममोद्धारंकुरु इत्याह विष्णुशर्मोवाच रेमहाबुद्धे त्वंनिर्मलेपिप्पलवृक्षेतिष्ठ अहंपुस्तकंगृहीत्वा प्रातः

राक्षसत्वाद्विनिर्मुक्तोवैकुंठंगतवान्तदा तस्मान्निंदानकर्तव्याकथायाःश्रवणस्यच २७ तन्मासेयत्कृतंपुण्यं तदानंत्यायकल्पते पुष्पंपत्रंफलंतोयंहेमवस्त्रघृतादिकम् २८ पुरुषोत्तममासस्यमाहात्म्यंविष्णुवल्लभम् द्वादश्यामपिश्रोतव्यमखंडव्रतहेतवे २९ तुलस्यश्वत्थगोयस्तुकुर्याद्मासस्यपूजनम् सतीत्वानरकघोरंयातिब्रह्मसनातनम् ३० वाचकंतोषयेद्भक्त्यावस्त्रैराभरणैःशुभैः संतुष्टोवाचकोयस्यसप्राप्नोतिशुभंफलम् ३१ यःश्रावयतिमाहात्म्यंमलमाससमुद्भवम् वेदव्यासःसविज्ञेयोनात्रकार्याविचारणा ३२ [illegible]हरेरित्यभिधीयते पुराणवाचकेदत्तंतदानंत्यायकल्पते ३३ इत्येतद्वर्णितंदेवि मलमासकथानकम् [illegible]त्रेण कृतार्थोजायतेजनः ३४

तेकथानकंकथयिष्ये एवमुक्त्वाविप्रः धनंगृहीत्वा कुटुंबमेलनं कृत्वा राक्षसाय कथांश्रावयामास राक्षसोपि पिप्पलमध्यगः कथांश्रुत्वा राक्षसयोनितः मुक्तोऽभवत् ततः दिव्यालंकारभूषितः दिव्यवपुः विमानमारुह्य शिवंपूजयित्वा सर्वेषांपश्यतांवैकुंठंजगामेति २६ २७ २८ द्वादश्यामित्यनेनान्यद्वादशीषु यथा [illegible] नंच नकुर्वंतितद्दिनेरोमहर्षणसुतस्य मरणयोगात्तथात्रपुरुषोत्तममासे नायंनिषेधः मासपर्यंतंश्रवणाभावे द्वादश्यामपीतिनिश्चयत्वसूचनम् २९ ३० ३१
३२ ३३ ३४

३५ ३६ सएवइतिहासः कृष्णद्वैपायनेनेतिशेषः मुनिभ्यः शौनकादिभ्यः ३७ ३८ ३९

सूतउवाच इतिश्रीकृष्णनाथेनलक्ष्म्यैवृत्तंनिवेदितम् प्रसन्नहृदयालक्ष्मीः कृष्णोक्तंतच्चकारह ३५
लक्ष्मीकेशवसंवादोह्ययमेवचशंभुना स्कंदायकथितस्तेनभृगवेपरमर्षये ३६ भृगुणाऋषिवर्याय
कृष्णद्वैपायनायच सएवकथितोमह्यंमुनिभ्यःकथितोमया ३७ यएतच्छृणुयान्नित्यंशृणोत्यधिक
मासकम् सर्वपापविशुद्धात्माविष्णुलोकंसगच्छति ३८ माहात्म्यपुस्तकंयस्यगृहेतिष्ठतिपूजितम्
भूतप्रेतपिशाचादिभयंतस्यनजायते ३९ शाकिनीडाकिनीचैवपूतनाभैरवादयः पलायंतेग्रहाः
सर्वेमाहात्म्यस्यास्यपूजनात् ४० व्याघ्रसर्पभुजंगाश्चतस्कराब्रह्मराक्षसाः उपघाताश्चयेचान्ये
नकुर्वंतिचपीडनम् ४१ पृष्टंयन्मुनयोमह्यंभवद्भिर्वीतकल्मषैः कथितंतत्समासेनमयाव्याससंप्र-
सादतः ४२ यूयंतुसर्वेसर्वज्ञामत्प्रतिष्ठाकृताहिवः अहंधन्यतमोलोकेजातोस्मिकथयाहरेः ४३ व्या
सपूजांचयेकुर्युर्भावेनैवसपुस्तकम् वासोहिरण्यरत्नाद्यैस्तेयांतिपरमंपदम् ४४ येश्रोष्यंतिकथा
मिमांहरिमुखात्संनिःसृतांपावनींपापमोक्षवरदायिनींधनबलद्रव्यादिदात्रींपराम्

४० ४१ वीतकल्मषैः गतपापैः ४२ ४३ ४४ चयंसमूहम् ४५

४६ ४७ ४८ सूतसूनुः रोमहर्षणपुत्रःउग्रश्रवाःसूतः इत्यमितिव्यासोक्तिः ४९ ५० ५१

तेयास्यंतिविहायपातकचयंमोक्षंजनाःसर्वदाभुक्त्वासर्वसुखंमहीतलगतंस्थित्वाविमानोत्तमे ४५
व्यासउवाच मासोत्तमस्यमहिमानमनंतपुण्यंश्रुत्वाऽकविस्मितधियोमुनयश्चसर्वे ऊचुश्चसूततनयं
विनयेनविष्वक्सेनांघ्रिसेवनविधौनिपुणानितात ४६ ऋषयऊचुः सूतसूतचिरंजीवकीर्ति-
स्तेचास्तुपावनी त्वन्मुखामृतपानेनकृतार्थाःस्मोवयंभृशम् ४७ विष्टरश्रवसएवपवित्रायावदे-
वचितनाभकविकीर्तिः तावदत्रमुनिवर्यसमाजेश्रीहरेर्वदकथांकमनीयाम् ४८ इत्थंद्विजाशीर्वच-
नंप्रगृह्यप्रदक्षिणीकृत्यद्विजान्समग्रान् नत्वागमद्देवनदींस्वकीयंकृत्यंविधातुंसचसूतसूनुः ४९
अन्योन्यमूचुर्निमिषालयस्थावरिष्ठमाहात्म्यमिदंपुराणम् मासस्यदिव्यंपुरुषोत्तमस्यसमीहिता-
र्थार्पणकल्पवृक्षम् ५० इत्युक्त्वामुनयःसर्वेसंपूज्यविविधार्हणैः सूतनम्यगताःसर्वेविमलाःस्वं
स्वमाश्रमम् ५१ इतिश्रीसप्तपुराणसारोद्धारेश्रीपुरुषोत्तममासमाहात्म्येमाहात्म्यश्रवणफल-
कथननामैकत्रिंशोऽध्यायः ३१ ७ ७ ७ ७

इतिश्रीसप्तपुराणसारोद्धारेश्रीपुरुषोत्तममासमाहात्म्येमाहात्म्यश्रवणफलस्यटीकायांएकत्रिंशोऽध्यायः ३१ श्रीयदुकुलोजयति ०

पाद्मं पद्मपुराणोक्तं मलमासमाहात्म्यं द्विविधं स्कांदं एकत्रिंशदध्यायात्मकं द्वितीयं षड्विंशदध्यायात्मकं १ २ सप्तमहात्म्यानि मिलित्वा द्विशताध्यायानि भवंति तानि अनेकविधकथायुक्तानि तेषामध्यायानां सारांशं सप्तपुराणसारोद्धारेतिनामकम् ३ ४ संपूर्णैरितिहासैः कुत्रचित् विस्तरभिया ग्रंथविस्तारभयेन देशसूचकैः मुख्यनामनिर्देशकैरितिहासैः यथा प्रियंकरस्य भार्या पिपाऽऽसो-

अथग्रंथालंकारः पुराणसंहितोक्तं वै मलमासमहात्मकम् पाद्मं च द्विविधं स्कांदं भाविष्योत्तरजं
तथा १ तथा बृहन्नारदीयं कालिकोक्तं तथैव च एवं सप्त माहात्म्यानि विलोक्य बहुविस्तरात्
२ द्विशताध्याययुक्तानि नानाचित्रकथानि च तेषां सारांशमादाय सारोद्धारेतिसंज्ञकम् ३
मथितं हि मया सम्यक् आर्षवाक्यैर्न संशयः एकत्रिंशैस्तथाऽध्यायैरितिहासैः समन्वितम् ४ संपू
र्णैर्विस्तरभिया कुत्रचिद्देशसूचकैः माहात्म्यमधिमासस्य हरिकृष्णेन धीमता ५ पंडितानां हिता
यैव पदार्थज्ञापनाय च सर्वपदार्थज्ञानाय कृतमेतन्न संशयः ६ अन्यथा कृतकार्यास्ते प्राङ्निबं
धैर्भवंतु वै कुत्रचित्स्वलितं चेत्स्यात्क्षंतव्यं मम साहसम् ७ छ छ छ

ऽसा मंजुभाषिणी मलमासेऽन्वहं कांस्यदानेनापकलंकभामिनि ५ एतन्माहात्म्यं सर्वपदार्थानां सर्वपुराणोक्तेतिहासानां दानव्रतयोग्यपदार्थानां च ज्ञानाय कृतं नतु स्वबुद्धिकौशल्यदर्शनार्थं ६ येषां अस्मिन्सारोद्धाराख्ये माहात्म्ये वक्तुमिच्छा नास्ति ते प्राक् निबंधैः पूर्वोक्तपुराणसंहिताद्युक्तमाहात्म्यैः कृतकार्या भवंतु ७ इतिपुरुषोत्तममाहात्म्यं त्रयोदशमं संपूर्णं १३ छ

अथ कार्तिके वर्ज्यानि·

परद्रव्येच्छांत्यजेत्·
परक्रियाम्·
परापवादान्-
परशय्यां·
परान्नम्-
पर्युषितान्नम्·
पलाडुम्-
पापिसंसर्गम्·
परपुरुषसंगं·
परस्त्रीसंगम्-
परपैशून्यम्·
परोत्कर्षासहनम्-
परदोषानुकीर्तनम्-
परानिष्टचिन्तिनम्-
असत्प्रलापम्-
अगम्यागमनम्-
अभोज्यान्नंनभोक्तव्यम्-
अनुक्तंनसमाचरेत्-
आमिषपदार्थंत्यजेत्·
असच्छास्त्रंनपठेत्·
शास्त्रेऽविश्वासंत्यजेत्-

चौर्यम्-
मिथ्यावादं-
दुष्टसंसर्गम्-
दुष्टभाषणम्-
मांसं-
मृतवत्सादुग्धं·
रजस्वलादृष्टान्नम्-
नीचाहृतजलं
गुडमिश्रंगव्यम्-
राजमाषान्·
कांस्यपात्रे पानंभोजनम्-
द्विदलान्नं·
वृंताकम्-
पलांडुम्-
मूलकं·
तैलम्-
दुषितान्नं-
जंबीरम्-
दिवामदनसेवनम्-
नित्यमदनसेवनम्-
रसविक्रयम्·

एवमादीनि त्यजेत्·

अथ कार्तिके कर्तव्यानि·

निसस्नतारकस्नानं
राधादामोदरपूजनम्·
विष्णुहरि शिवनामस्मरणं·
इंद्रियजयम्·
मनोनिग्रहम्·
सर्वभूतेषुदयाम्·
इश्वरध्यानम्·
ईश्वरपूजनम्
सत्यभाषणम्·
हविष्यान्नभोजनम्·
नक्तव्रतम्·
धारणापारणाव्रतम्·
मौनव्रतम्·
ब्रह्मचर्यव्रतम्·
सत्समागमम्·
धात्रीपूजनम्·
धात्रिछायांविष्णुपूजनम्·
नित्यकथाश्रवणम्·
भूमिदानम्·

मातापितासेवनम्·
गुरुसेवनम्·
नित्यंदेवदर्शनम्·
देवमंदिरेगानम्·
देवालयेनित्यदीपदानम्·
चतुष्पथेदीपदानम्·
ब्राह्मणायदीपदानं
गोशालायांदीपदानं
तुलसीपूजनम्·
अश्वत्थपूजनम्·
देवब्राह्मणगोपूजनम्·
देवप्रदक्षिणाकरणं·
तुलसीवृक्षप्रदक्षिणां·
अश्वत्थप्रदक्षिणां
ब्राह्मणभोजनम्·
अन्नदानम्·
गोवृषमहिषीगजदानम्·
स्वर्णधातुरत्नदानम्·
अनाथरक्षणम्·

इत्यादिसद्धर्ममाचरेत्·

श्रीगणेशायनमः अथकार्तिकमाहात्म्यंसटीकंप्रारभ्यते इहखलुभगवान् श्रीवेदव्यासः सकलपुरुषार्थसाधनप्रकाशकं श्रीकार्तिकमासमाहात्म्यंप्रतिपादकंप्रकरणंकथामयंसरइव पृथिव्यांप्रतिष्ठापयामास तत्रग्रंथारंभे ऽशेषप्रत्यूहोपशांतये ऽभिमतदेवतानमस्कारलक्षणंमंगलमाचरणीयमित्यन्यान्पौराणिकानुपशिक्षयन् स्वयमाचरति नारायणमिति अत्रनारायणपदेनांतर्यामिजलशायिश्रीकृष्णग्रहणात् तदुक्तंनारोजीवसमूहःस्यादयन तत्प्रवर्तनमित्यंतर्यामिनोग्रहणम् तथा आपोनाराइतिप्रोक्ताआपोवैनरसूनवः अयनंतस्यताःपूर्वंतेननारायणस्मृतइति जलशायिनोग्रहणम् इतरयोस्तुप्रसिद्धम् यथाहि श्रीभागवते ताविमौवैभगव·

श्रीगणेशायनमः नारायणंनमस्कृत्यनरंचैवनरोत्तमम् देवींसरस्वतींव्यासंततोजयमुदीरयेत् १ ऋषयऊचुः सूतनःकथितंपुण्यंमाहात्म्यमाश्विनस्यच भूयोन्यच्छ्रोतुमिच्छामोकार्तिकस्यचवैभवम् २ कलौकलुषचित्तानांनराणांपापकर्मणाम् संसाराब्धौनिमग्नानांमनायासेनकागतिः ३ कोधर्मःसर्वधर्माणामाधिको मोक्षसाधकः इहापिमुक्तिदोनृणामेतत्वंकथयप्रभो ४

वतो हरेरंशाविहागतौ भारव्ययायचभुवः कृष्णौयदिकुरूद्वहौ तत्रैव अर्जुनेतिनरोवेशः कृष्णोनारायणःस्वयमितिनरपदेनहिरण्यगर्भव्यष्टिजीवमुन्यर्जुनानांग्रहणं नरोजेमनुजेर्जुने इतिमेदिनी नरोत्तमंनॄन् उत्तमयति श्रवणादिनाश्रेष्ठत्वंगमयतीति नरोत्तमोव्यासः तत्संप्रदायप्रवर्तकत्वात्तंचनमस्कृत्य देवींसरस्वतीं तदुपदेशाद्यांसरस्वतींवाचंदेवींद्योतनात्मिकांचनमस्कृत्य· व्यासमितिपाठे नरोत्तमममितिप्रत्येकंसंबंधनीयं जयपत्यनेनाविद्यांतत्कार्यंसंसारंचेनिजयोग्रंथस्तमुदीरयेत् इतिशीक्षा जयशब्देनेतिहासपुराणादीनांग्रहणमिति १ सूतेति २ कलुषंपापंचित्तेयेषांतेकलुषचित्ताः कलुषंवृजिनैनोघमंहोदुरितदुष्कृतमित्यमरः कलुषंमलमिश्रंचित्तंयेषांतेकलुषो नेच्छआविलइत्यमरः ३ ४

५ सत्यभामाकृष्णसंवादेनयः कार्तिकवैभवःसतु पाद्मोत्तरखंडे प्रसिद्धः ६ सूर्यारुणसंवादेनयः कार्तिकवैभवः

सूतउवाच भवद्भिर्यदहंपृष्टस्तदेतत्पृष्टवान्मुनिः नारदोब्रह्मणःपुत्रोब्रह्माणंतुजगद्गुरुम् ५ तथैव
सत्यभामाचश्रीकृष्णंजगदीश्वरम् अपृच्छत्कार्तिकस्यैववैभवंश्रवणोत्सुका ६ बालरविस्त्वेवमृषिभियद्
त्कंऋषिसंसदि श्रीसूर्यारुणसंवादरूपेणातिमनोहरम् ७ कैलासेशंकरेणैवकार्तिकस्यचवैभवः वर्णि
तः षण्मुखस्याग्रे नानाख्यानसमन्वितः ८ पृथुपानेनारदेनकथितंचमहात्म्यकं कार्तिकस्यचविप्रेंद्रश्रुत्वा
ब्रह्ममुखात्पुरा ९ एकदानारदोयोगीसत्यलोकमुपागतः पप्रच्छविनयेनैवसर्वलोकपितामहम् १० श्री
नारदउवाच पापेंधनस्यघोरस्यशुष्कार्द्रस्यचभूरिशः कोवह्निर्दहतेब्रह्मन्तद्भवान्वक्तुमर्हसि ११ नाज्ञा
तंत्रिषुलोकेषुब्रह्मांडांतर्गतस्ययत् विधनेतवदेवेशत्रिविधस्यस्कनिखिलम् १२ मासानांप्रवरोमासोदे
वानामुत्तमोत्तमः तीर्थानितद्विशेषेणकथयस्वपितामह १३ ब्रह्मोवाच मासानांकार्तिकःश्रेष्ठःदेवा
नांमधुसूदनः तीर्थंनारायणाख्यंहित्रितयंदुर्लभंकलौ १४ नारदउवाच भगवंस्तवदासोस्मिभक्तोस्मिहरिवल्ल
भ वैष्णवान्ब्रूहिमेधर्मान्सर्वज्ञोसिपितामहः १५ आदौकार्तिकमाहात्म्यंवक्तुमर्हसिमेप्रभो दीपदानस्यमा
हात्म्यंव्रतीनांनियमास्तथा १६

दोक्तः सनत्कुमारसंहितायांविस्तरतया प्रतिपादितः ७ ८ ९ १० ११ १२ १३ १४ १५ १६

१७ १८ १९ अथकार्तिकव्रतप्रशंसामाह वैभवमित्यादिना २० २१ २२ २३ २४

गोपीचंदनमाहात्म्यंतुलस्याश्चतथाविभो धात्र्याश्चैवचमाहात्म्यंविधिंस्नानादिकस्यच व्रतारंभःकदाकार्य
उद्यापनविधिंतथा १७ यत्किंचिद्दृष्टगतंधर्मंतत्सर्वंवक्तुमर्हसि येनाहंत्वत्प्रसादेनपदंयास्याम्यनामयं १८ सूतउ
वाच इतिपुत्रवचःश्रुत्वाब्रह्माहर्षसमन्वितः राधादामोदरंस्मृत्वाप्रोवाचतनुजंप्रति १९ ब्रह्मोवाच साधुपृ
ष्टंत्वयापुत्रलोकोद्धरणहेतवे कथयामिनसंदेहःकार्तिकस्यचवैभवम् २० एकतःसर्वतीर्थानिसर्वेयज्ञाःसद
क्षिणाः कार्तिकस्यतुमासस्यकलांनार्हन्तिषोडशीम् २१ एकतःपुष्करेवासोकुरुक्षेत्रेहिमालये एकतःका
र्तिकोपुत्रसर्वपुण्याधिकोमतः २२ स्वर्णानिमेरुतुल्यानिसर्वदानानिचैकतः एकतःकार्तिकोवत्ससर्वदाके
शवप्रियः २३ यत्किंचित्क्रियतेपुण्यंविष्णुमुद्दिश्यकार्तिके तस्यक्षयंनपश्यामिमयोक्तंतवनारद २४ सोपा
नभूतंस्वर्गस्यमानुष्यंप्राप्यदुर्लभम् तथात्मानंसमादध्यान्नभ्रश्येतयथापुनः २५ दुष्प्राप्यंप्राप्यमानुष्यंकार्तिको
क्तंचरेन्नयः धर्मधर्मभृतांश्रेष्ठसमातृपितृघातकः २६ कार्तिकःखलुवैमासःसर्वमासेषुचोत्तमः पुण्यानांपरम
पुण्यंपावनानांचपावनम् २७ अस्मिन्मासेत्रयस्त्रिंशद्देवाःसन्निहितामुने अत्रस्नानानिदानानिभोजनानिव्रता
निच २८ तिलधेनुहिरण्यंचरजतंभूमिवाससी गोप्रदानानिकुर्वंतिसर्वभावेननारद २९ तानिदानानिदत्तानिगृ
ण्हंतिविधिवत्सुराः यत्किंचिद्दत्तंविप्रेद्भतपश्चैवतथाकृतं ३० तदक्षय्यफलंप्रोक्तंविष्णुनाप्रभविष्णुना पापा
नांमोक्षणंचैवकार्तिकेमासिशस्यते ३१

२५ २६ २७ २८ २९ ३० ३१

३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९ ४० ४१ अथस्वतः स्नानार्चनं कर्तुमशक्तस्यधनिनोकार्तिकव्रताचरण प्रकारमाह अशक्तइति ४२ अथनिर्धनस्याशक्तस्यव्रताचरणमाह द्रव्यदानइति ४३ ४४ नियमपूर्वकं आश्विनीपौर्णिमामारभ्यका·

तस्माद्यत्नेनविप्रेंद्र कार्तिकेमासिदीयते यत्किंचित्कार्तिकेदत्तंविष्णुमुद्दिश्यमानवैः ३२ तदक्षयंहिलभतेअन्नदानं विशेषतः यथानदीनांविप्रेंद्र शैलानांचैवनारद ३३ उदधीनांचविप्रर्षेक्षयोनैवोपपद्यते दानंकार्तिकमासेतुयत्किंचिद्दीयतेमुने ३४ नतस्यास्तिक्षयोविप्रपापस्यातिसहस्रधा संप्राप्तेकार्तिकेदक्षापरान्नंयस्तुवर्जयेत् ३५ दिनेदिने·तिकृच्छ्रस्यफलंप्राप्नोत्ययत्नतः नकार्तिकसमोमासोनकृतेनसमंयुगं ३६ नवेदसदृशंशास्त्रंनतीर्थंगंगयासमं नचान्नसदृशंदानंनसुखंभार्ययासमं ३७ न्यायेनोपार्जितंद्रव्यंदुर्लभंदानकारिणाम् दुर्लभंमर्त्यधर्माणांतीर्थेचप्रतिपादनं ३८ कार्तिकेमुनिशार्दूलशालिग्रामशिलार्चनं स्मरणंवासुदेवस्यकर्तव्यंपापभीरुणा ३९ एतादृशंकार्तिकंचअकृतेनैवयोनयेत् पूर्वकृतस्यपुण्यस्यक्षयमाप्नोत्यसंशयं ४० नारदउवाच अशक्तेनकथंकार्यंकार्तिकव्रतमुत्तमं येनतत्फलमाप्नोतितन्मेवदपितामह ४१ ब्रह्मोवाच अशक्तस्तुयदामर्त्यस्तदेवंव्रतमाचरेत् अन्यस्मैद्रविणंदत्वाकारयेत्कार्तिकव्रतं ४२ तस्मात्पुण्यंप्रगृह्णीतदानसंकल्पपूर्वकं द्रव्यदानेप्यशक्तश्चेद्यदादेवर्षिसत्तम ४३ तदातेनप्रकर्तव्यंपानंतीर्थजलस्यच तत्राप्यशक्तोयोमर्त्यःसतुनित्यंहरेर्मुदा ४४ स्मरणंचप्रकर्तव्यंनाम्नोनियमपूर्वकं अखंडितंतदातेनकार्तिकव्रतजंफलम् ४५

र्तिकीपूर्णिमापर्यंतंप्रत्यहंयावत्संख्याकंनामस्मरणंक्रियते तथैवकर्तव्यंनन्यूनाधिक्यमिति प्रत्यहं·न्यूनाधिकजपस्यनिष्फलत्वस्मरणात् तेननामस्मरणेन भवतीतिशेषः ४५ ५ ५ ५

४६ ४७ ४८ ४९ ५० ५१ ५२ ५३ ५४ ५५ इतिकार्तिकमाहात्म्यटीकायांप्रथमोऽध्यायः १

विष्णोःशिवस्यवाकुर्यादालयेहरिजागरं शिवविष्णुगृहाभावेसर्वदेवालयेष्वपि ४६ दुर्गाटव्यांस्थितोवाथयदि-
वापद्गतोभवेत् कुर्यादश्वत्थमूलेतुतुलसीनांवनेष्वपि ४७ विष्णुनामप्रबंधानांगायनंविष्णुसन्निधौ गोसहस्रप्र-
दानस्यफलमाप्नोतिमानवः ४८ वाद्यकृत्पुरुषश्चापिवाजपेयफलंलभेत् सर्वतीर्थावगाहोत्थंनर्तकःफलमाप्नु-
यात् ४९ सर्वमेतल्लभेत्पुण्यमेतेषांद्रव्यदःपुमान् श्रवणाद्दर्शनाद्वापिषडंशंफलमाप्नुयात् ५० आपद्गतोयदा-
प्यंभोनलभेत्कुत्रचिन्नरः व्याधितोवायथाकुर्याद्विष्णोर्नाम्नापिमार्जनम् ५१ उद्यापनविधिंकर्तुमशक्तोयोव्रतस्थि-
तः ब्राह्मणान्भोजयेत्पश्चाद्व्रतसंपूर्णहेतवे ५२ अशक्तोदीपदानायपरदीपंप्रबोधयेत् तस्यवारक्षणंकुर्याद्वाता-
दिभ्यःप्रयत्नतः ५३ श्रीविष्णोःपूजनाभावेतुलसीधात्रिपूजनं सर्वाभावेव्रतीकुर्याद्ब्राह्मणानांगवामपि ५४
तस्याप्यभावेमनसिविष्णोर्नामानुकीर्तनम् नारदउवाच ब्रह्मन्ब्रूहिविशेषेणधर्मान्कार्तिकसंभवान् ५५
इतिश्रीचतुःपुराणसारसंग्रहेकार्तिकमासमाहात्म्येकार्तिकव्रतप्रशंसावर्णनंनामप्रथमोऽध्यायः १ ६९
ब्रह्मोवाच अथकार्तिकमासस्यधर्मान्वक्ष्यामिनारद संप्राप्तंकार्तिकंदृष्ट्वापरान्नंयस्तुवर्जयेत् १ सतुमोक्ष-
मवाप्नोतिनात्रकार्याविचारणा सर्वेषामेवधर्माणांगुरुपूजापरामता २ गुरुशुश्रूषयासर्वंप्राप्नोतिऋषिसत्तम गु-
रौतुष्टेचतुष्टाःस्युर्देवाःसर्वेसवासवाः ३ गुरौरुष्टेचरुष्टाःस्युर्देवाःसर्वेसवासवाः कार्तिकेमासिसंप्राप्तेकृत्वाकर्माणि
भूरिशः ४ अकृत्वागुरुशुश्रूषांनरकानेवविंदति यःकिंचिद्दास्यमादिष्टोगुरुणातत्समाचरेत् ५

अथकार्तिकेकर्तव्यधर्मानाह अथेति १ २ वासवइंद्रः ३ ४ गुरुसेवाऽकरणेऽनिष्टफलमाह अकृत्वेति ५

६ ७ गुरुसेवाप्रसादात्सर्वं प्राप्नोतीत्यत्र दृष्टांतमाह मेधावी कपिलः क्रमतिः इतित्रयः शिष्याः गौतमस्यगुरो उत्तमसेवया देवत्वं प्राप्ताः अत्रप्रसिद्धा कथा स्कांदसारोद्धारोक्त कार्तिकमाहात्म्ये पुराभागीरथीतीरे सिद्धाश्रमे गौतमऋषेस्त्रयः शिष्याः मेधावीकपिलः क्रमतिरितितेबाल्यादेवगुरुसेवातत्पराः आसन् एकदागौतमः तानाहूयउवाच हेशिष्याः वनेशीघ्रंगत्वा समित्पुष्पफलकुशाञानीयतां तेचफलादिकंस्वल्पंगृहीत्वामध्याह्ने गुरुनिकटंप्राप्ताः तदागौतमोतिक्रुद्धः सन्नुवाच हेशिष्याः यूयंप्रातरेवगताः अधुनातुमध्याह्नोजातः फलादिकमपिस्वल्पमानीतं तर्हि एतावताकालेन किंकृतं हेदुर्वृत्ताः यदिजीवितुमिच्छत तदापुनः वनंगत्वा फलादीनि बहून्यादाय सत्वराःसमागच्छत तच्छ्रुत्वा भीताः क्षुत्क्षामकंठाः पुनरेववनंययुः तत्रवनाद्वनंगच्छंतः पश्चिमाभिमुखाः तृषयापरिपीडिताः एकस्मिन्सरोवरेस्नानं संध्यांचकृत्वा जलंपीत्वा फलादीनिविचिन्वंतः अति

आजन्मतोगुरुणांविप्रनतद्वाक्यंतुलंघयेत् यदिदुःखादिकंप्राप्तंगुरुंतुशरणंव्रजेत् ६ मातृत्वेचपितृत्वेचगुरुमेवस्मरेद्बु
धः गुरोर्नप्राप्यतेयत्तन्नान्यत्रापिहिलभ्यते ७ गुरुप्रसादात्सर्वंतुप्राप्नोत्येवनसंशयः मेधावीकपिलश्चैवक्रमति
श्चमहातपाः गौतमस्यगुरोःसम्यक्सेवयाऽमरतांगताः ८

भयंकरंवनंविविशुः तदानींरात्रिश्चजाता सिंहव्याघ्रादीनां नादाश्चबभूवुः तदाभीताःमिथःप्रोचुः अहोकष्टं महांधकारयुक्तेस्मिन्वने फलादीनि नपश्यामः दिशोनजानीमः किंगृहीत्वागुरुसन्निधिंगच्छामः नःकथंभवे दितिभयातुराः इतस्ततोभ्रमंतः तृणगुल्मसमावृते कूपेपतिताः तत्रसर्पैर्दष्टाः मृत्युंप्रापुः अथगौतमःतान् अनागतान् ज्ञात्वास्वात्मानं बहुविनिंद्य प्रातःभार्ययासाकं वनेतान् मृगयन् एकस्मिन् कूपे मृतान्दृष्ट्वा विललाप तदासर्पाः स्वपापेनैवैतेमृताः किमर्थंशोकः कार्य इतिगौतमं शांतवनंचक्रुः अथगौतमउवाच कर्मणामनसावाचापापमेभिःकदाचन नकृतंशिष्यवर्यैस्तैर्भवद्भिर्लोकनिष्ठुरैः वृथासंघातितास्तेतुकालमृत्युर्नचागतः तस्मान्नदोषोयुष्माकंनचैषामपिपन्नगाः कर्तैषांयमएवात्रयमंतस्माच्छपाम्यहं इत्युक्त्वाजलमादाययमंशप्तुंसमुद्यतः तदायमःसहसैवतत्रागत्योवाचहेऋषे एषांअकालमरणंन किंतुसर्पदंशनिमित्तेन महामृत्युकालएवोपस्थितस्तस्माद्विचार्य शापंदेहि नात्रममापराधः तदागौतमउवाच एवंस

ति एतैः सच्छिष्यैर्विनाममजीवितेनकिंप्रयोजनं अतःमयायत्पुण्यमुपार्जितं यच्चतपस्तप्तं तेनपुण्येन तवकृपयाच एतेजीवनंप्राप्नुवंतु एवमुक्तेतेसह सोत्थायसंदृष्टाः अग्रतःगुरुंयमंचदृष्ट्वाववंदिरे गौतमःप्रीत्यातानालिंग्यातितुष्टः युष्माकंवरंदास्यामीत्युवाच सर्वान्वेदांश्चशास्त्राणि समस्तांगानि सुव्रताः इतिहासपुराणानिमत्प्रसादादवाप्स्यथ गुरुणैवंवरेदत्तेसेंद्रागुरुस्तान्ततः गौतमंप्रेतराजंचतांश्चविप्रानुवाचह इंद्रोहमस्मिभद्रंवःशृणुध्वं वचनंमम एतैर्द्विजैरतीवहिजितालोकाश्चसर्वशः ममलोकमितस्तस्माद्गंतुमर्हथसुव्रताः गौतमस्यप्रसादेनसदेहाएवगच्छतु सामर्थ्यमेषांलोकेच

तस्मात्सर्वप्रयत्नेन कार्तिकेविष्णुतत्परः गुरुसेवांप्रकुर्वीत ततोमोक्षमवाप्नुयात् ९ नरेभ्योवैष्णवंधर्मंयोददातिद्विजो
त्तमः ससागरमहीदानेतत्पुण्यंलभतेहिसः १० तिलधेनुंहिरण्यंचरजतंभूमिवाससी गोप्रदानानिदास्यंतिसर्वभा
वेनसुव्रत ११ सर्वेषामेवदानानांकन्यादानंविशिष्यते सहस्रमेवधेनूनांशतंचानडुहांसमम् १२ दशानडुत्समंया
नंदशयानसमोहयः हयदानसहस्रेभ्योगजदानंविशिष्यते १३ गजदानसहस्राणांस्वर्णदानंचतत्समम् स्वर्णदानस
हस्राणांविद्यादानंचतत्समम् १४ विद्यादानात्कोटिगुणंभूमिदानंविशिष्यते भूमिदानसहस्रेणगोप्रदानंविशिष्यते
१५ गोप्रदानसहस्रेभ्योह्यन्नदानंविशिष्यते अन्नाधारमिदंप्रोक्तंतस्माद्देयंतुकार्तिके १६ परान्नवर्जनाद्देवलभ्यंचां
द्रायणंफलम् दिनेदिननिकृच्छ्रस्यफलंप्राप्नोतिमानवः १७

तवकीर्तिस्तथाmम कीर्तिश्चलोकेख्यातास्यात् गुरुपूजाफलंतथा इत्युक्त्वातान्विमानेचारोप्य दिवंययौयमः स्वपुरं गौतमश्चस्वाश्रमं ययाविति

८ ९ यत्पुण्यमितिशेषः १० ११ कन्यादानफलमुक्तं अष्टवर्षाभवेद्गौरी नववर्षाचरोहिणी दशवर्षाभवेत्कन्याअतऊर्ध्वंरजः स्वला गौरींब्रह्मलोकंरोहिणींसूर्यलोकं कन्यांस्वर्गलोकं रजस्वलांयमलोकं ददाति यावंतिचैवरोमाणि कन्यायास्तुतनौस्मृत तावद्वर्षसहस्राणि रुद्रलोकेमहीयते इति अनडुहांवृषभाणांसमंतुल्यं १२ यानंरथं हयः अश्वः १३ १४ १५ १६ १७ ५९

संधानंमद्योत्पादनं मांसं पशुपक्षिमांसं एतत् क्षत्रियादिविषयं १८ प्रवृत्तानामनिषिद्धानां १९ २० २१ २२ २३ २४
कार्तिके पुष्करे वासो महाफलदायक इति कैमुतिकन्यायेनाह पुष्करमिति यः स्मरेत् तस्य लक्षकोटिगुणं पुण्यं भवेत्तर्हि निवासकरणेना

कार्तिकेवर्जयेन्मांसंसंधानंचविशेषतः राक्षसींयोनिमाप्नोतिसकृन्मांसस्यभक्षणात् १८ प्रवृत्तानांतुभक्ष्याणां
कार्तिकेनियमेकृते अवश्यंविष्णुरूपत्वंप्राप्यतेमोक्षदंपदम् १९ ब्राह्मणेभ्योमहींदत्वाग्रहणेसूर्यचंद्रयोः यत्फल-
लभतेवत्सतत्फलंभूमिशायिनः २० भोजनंद्विजदंपत्योःपूजयेच्चविलेपनैः कंबलानिचरत्नानिवासांसिविविधानिच
२१ तूलिकाश्चप्रदातव्याःप्रच्छादनपटैःसह उपानहावातपत्रंकार्तिकेदेहिसद्व्रत २२ कार्तिकेक्षितिशायीचह-
न्यात्पापंयुगार्जितम् जागरंकार्तिकेमासियःकरोत्यरुणोदये २३ दामोदराग्रेदेवर्षेगोसहस्रफलंलभेत् नदीस्ना
नंकथाविष्णोर्वैष्णवानांचदर्शनम् २४ नभवेत्कार्तिकेयस्यहरेत्पुण्यंदशाब्दिकं पुष्करंयःस्मरेत्प्राज्ञःकर्मणामनसा
गिरा २५ कार्तिकेमुनिशार्दूललक्षकोटिगुणंभवेत् प्रयागेमाघमासेतुपुष्करंकार्तिकेतथा २६ अवंतीमाधवेमासि
हन्यात्पापंयुगार्जितम् धन्यास्तेमानवालोकेकलिकालेविशेषतः २७ येकुर्वंतिनरानित्यंप्रीत्यर्थंहरिपूजनं तारि
तास्तैश्चपितरोनरकान्नसंशयः २८ क्षीरादिस्नपनंविष्णोःक्रियतेपितृकारणात् कल्पकोटिदिवंप्राप्यवसंति-
त्रिदिवैःसह २९ कार्तिकेनार्चितोयैस्तुकृष्णस्तुकमलेक्षणः जन्मकोटिषुविप्रेंद्रनतेषांकमलागृहे ३० अहोमु
ष्टाविनष्टास्तेपतिताःकलिकंदरे यैर्नार्चितोहरिर्भक्त्याकमलैरसितैःसितैः ३१ ६९ ६९

तिफलंभवेदिति किंवक्तव्यं पुष्करक्षेत्र २५ २६ २७ २८ २९ ३० ३१ . ६९

८

श्वेतःश्वेतनृपः पुष्करार्चनयोगेनकमलपूजनेन मुक्तिंप्राप अत्रप्रसिद्धाकथाब्राह्मे पुराकाश्मीरदेशेश्वेतोनामनृपः इष्टापूर्तकर्मनिष्ठः महावैष्णवः राज्येपुत्रमभिषिच्य पुष्करक्षेत्रेगत्वा अतितीव्रेणतपसास्वशरीरमशोषयन्नस्तौत् स्तुत्यतेस्वदेहान्निर्गत महाभयंकरं पुरुषंदृष्ट्वा त्वंकोसि कुतआगतोसीत्यपृच्छत् तदा व्याधउवाच हेराजन् त्वंपूर्वजन्मनिजनस्थानीयोनृपः मृगयायां मृगरूपधरंमुनिंहतवान् तेनब्रह्महाजातः एकदारात्रौ ब्रह्महत्याभयान्मुक्तो भवामीति विचिंत्य परमभक्त्या कार्तिकेकमलैर्विष्णुंपूजयामासियत्नदेवउदरव्याधितःकंठगतेनप्राणेननारायणीनाम्नींस्वपत्नींसंस्मरन् मृतःतेनपुण्येनत्वंस्वर्गंगतः अहमपिस्वेनतेजसाकल्पपर्यंतंतत्रतवनिकटेस्थितः ततःकल्पांतेइदानींसः त्वंकाश्मीरदे-

पद्मेनैकेनदेवेशंयोर्चयेत्कमलापतिम् वर्षायुतसहस्रस्यपापस्यकुरुतेक्षयम् पुष्करार्चनयोगेनश्वेतोमुक्तिमवा
पह ३२ अपराधसहस्राणितथासप्तशतानिच पद्मेनैकेनदेवेशःक्षमतेप्रणतोर्चितः ३३ तुलसीपत्रलक्षेणका
र्तिकेयोर्चयेद्धरिम् पत्रेपत्रेमुनिश्रेष्ठमौक्तिकंलभतेफलम् ३४ मुखेशिरसिदेहेतुकृष्णोच्चीर्णांतुयोवहेत् तुल-
सींकृष्णनिर्माल्यैर्योगात्रंपरिमार्जयेत् ३५ सर्वरोगैस्तथापापैर्मुक्तोभवतिमानवः शंखोदकंहरेर्भक्तिर्निर्माल्यपा
दयोर्जलम् ३६ चंदनंधूपशेषंचब्रह्महत्यापहारकम् ३६ कार्तिकेमासिविप्रेंद्रप्रातःस्नानपरायणः विप्रेभ्यश्चा
न्नदानंतुकुर्याच्छक्त्यनुसारतः ३७ सर्वेषामेवदानानामन्नदानंविशिष्यते अन्नेनजायतेलोकोन्नेनैवाभिव-
र्द्धते ३८

शे रुमनसःराज्ञः गृहेश्वेतनाम्नाजातः अत्रापिविष्णोराराधनस्तोत्रपाठेनत्वंशुद्धः अतःव्याधरूपेणतवदेहादहंनिर्गतः शुद्धश्चजातः तच्छ्रुत्वाविस्मितोराजा व्याधमुवाच हेव्याध यतस्त्वया ममजन्मांतरंस्मारितं तस्मान्मत्प्रसादेनत्वंधर्मव्याधोभविष्यसि इत्युक्त्वा विमानमारुह्य परंस्थानमवाप तस्मात् सहस्रकमलैःपूजाकार्तिकेमधुसूदने नतेषांपुनरावृत्तिःकल्पकोटिशतैरपीति ३२ ३३
३४ विष्णोर्निर्माल्यमाहात्म्यमाह मुखइति ३५ ३६ अन्नदानप्रशंसामाह कार्तिकइति ३७ ३८ ६२

३९ ४० सत्यकेतुर्विषयेकथामाह स्कांदे पुरासत्यजिन्नामब्राह्मणः धर्मशीलः सर्वकामेभ्यःनिस्पृहः सदातीर्थयात्रापरः नान्येषुरमते
चित्तंगंगांनित्यंस्मरत्यसौ भागीरथीकृनिष्णातःविशेषेणमहामुनिः सःतीर्थयात्रांकुर्वन् एकदाविशालानगरींगत्वा जनैर्दर्शितंसत्यकेतुगृहं
प्रविवेश तदासत्यकेतुः तृट्परीतंक्षुधाविष्टं भोजनमिच्छंतंसत्यजितंदृष्ट्वा उत्थाय अर्घ्यपाद्यपूजांकृत्वोवाच हेद्विजोत्तम तवागमनेनाद्यमम-
जन्मसाफल्यंजातं पितरस्तृप्ताः देवाश्चसुप्रीताजाताः हेद्विजेंद्र इच्छितंभोजनंकुरु त्वयिभुक्तेमे किंचित्कर्तव्यंनावशिष्यते तवदर्शनादप्रा-
प्यंनहिविद्यते तदासत्यजिदुवाच हेसत्यकेतोतवशुश्रूषया वाक्येनच तृप्तोस्मि किंच अन्नदातारः लोकेबहवःसंति तन्नत्वयासदृशःकोपिनदृ-
ष्टः त्वंगृहस्थाश्रमिणांमध्येश्रेष्ठोसि त्वयागंगायात्राकृतानवा तदासत्यकेतुरुवाच हेद्विजमद्गृहे अतिथीनांअन्नदाता अन्यःकोपिनास्ति ने-

अन्नंहिसर्वभूतानांप्राणभूतंपरंविदुः अन्नदःसर्वदालोकेसर्वयज्ञादिकृद्भवेत् ३९ तीर्थस्नानेनकिंतस्यदेवया-
त्रादिनापिकिम् सर्वंसंपाद्यतेब्रह्मन्अन्नदानान्नसंशयः ४० सत्यकेतुर्द्विजःपूर्वंचान्नदानेनकेवलम् सर्व
पुण्यफलंप्राप्यमोक्षंप्रापसुदुर्लभम् ४१ कार्तिकव्रतनिष्ठस्तु कुर्याद्गोदानमुत्तमम् व्रतंसंपूर्णतांयाति
गोदानेननसंशयः ४२ ॥ ॥ ॥ ॥ ॥

नाद्यापि भागीरथीस्नानंनजातं तच्छ्रुत्वासत्यजित् तं विनिंदन् त्वयाभागीरथीस्नानंनकृतम् अतःत्वद्गृहे यन भोक्ष्यामीत्युक्त्वा गृहान्निर्ग-
त्य स्नानार्थंभागीरथींगतः तदैवगंगाअंतर्हिताऽभवत् सयदाजलंनापश्यत् तदाकृतांजलिःगंगांतुष्टाव हेदेवि मयाअणुमात्रोप्यपराधः
नकृतः मेदर्शनंदेहि अन्यायंक्षंतुमर्हसि इतिस्तुतागंगा प्रत्यक्षमूर्ती द्विजंमाह हेसत्यजित् त्वं सत्यकेतुगृहंगत्वा तंप्रसाद्य अन्नंभु- १
क्त्वा पुनरागच्छ तदन्नभोजनेन बहवोमोक्षंगताः इतिगंगावचःश्रुत्वा सत्यकेतुगृहे भोजनंकृत्वातदनुज्ञातःगंगायामागतः गंगांदृष्ट्वास्ना-
नंचकार एवंसत्यकेतुः केवलमन्नदानपुण्येनसद्गतिंप्राप्नोति ४१ ४२ ॥ ॥ ॥

कश्चित्कृशर्मानामब्राह्मणः वेदवेदांगपारगः शांतः जितेंद्रियः सर्वयज्ञकर्ताधनीनित्यदानपरः सर्वेषांहितेरतः पुराणवक्ताबंधूनांहितकृत् बहुपुत्रवान् आसीत् सचउत्तरवयसि गृहभारंपुत्रान्समर्प्य वनंगत्वाश्रीविष्णुं आराधयन्स्वोग्रतपसा स्वर्गंप्रापतत्रैकदायमदूतैः पराजितान् देवदूतान् प्रति इंद्रःप्रोवाच हेदूताधर्मिष्ठाः ममाज्ञयादिवंयांतु पापिष्ठाः नरकंयांतु तत्रापिये गोप्रदातारः तेपापिनोपिदिवंयांतु गोदानेन पापराशिर्नश्यति एतदिंद्रवचःश्रुत्वाकृशर्मा ब्राह्मणः स्वपुत्रानुपदेष्टुं अंतरिक्षमार्गेण पुत्रान्संबोध्य प्रोवाच हेपुत्राः यूयंयदि स्वर्गंईप्सथ तदा मद्वाक्यात् गोदानं कर्तव्यं गोदानात्परमन्यदानं त्रिलोके नास्तीति उक्त्वागतः तेपुत्राश्चअशरीरवाक्यं श्रुत्वा विस्मिताः संतः सर्वेपिसविधिना गोप्रदानंचक्रुः तेन सद्गतिं प्राप्ताः ४३ ४४ पुष्करविषये प्रसिद्धाकथा सारोद्धारे पुरानंदिग्रामे पुष्करनामानौ द्वौब्राह्मणौ निवसतः तत्रैकोपुण्यात्मा

गोदानात्परमंदानंसंसारार्णवतारकम् नास्तिनारदलोकेस्मिन्कृशर्माब्राह्मणोयथा ४३ कार्तिकेमासिविप्रें
द्रदत्वादानान्यनेकशः हरिस्मृतिविहीनश्चेन्नपुनातिकदाचन ४४ नामस्मरणमाहात्म्यंमयावक्तुंनशक्यते
पुष्करेणयथापूर्वंनारकीयाश्चमोचिताः ४५

अपरः पापी अथैकदायमः पापिपुष्करानयने दूतानाज्ञापयत् तेच तंविहाय पुण्यवंतं पुष्करं आनीतवंतः तदायमः दूतान्निर्भर्त्स्य बहुसन्मानपूर्वकं पुष्करमुवाच हेपुष्कर तवानयने ममाज्ञानत्वं पुनर्गच्छ तदा पुष्करउवाच हेयम अहं नरकान्द्रष्टुमिच्छामि यत्र पापिनो यातना मनुभूयंते ततोयमदर्शितं हाहाकाररवाकुलं अतिदुःखितं नारकीयगणं दृष्ट्वाऽतिसंत्रस्तोदयापरः पुष्करः तानुवाच हेनारकाः पूर्वंकिमपि नविचारितं अधुना हाहाकरणेन किंप्रयोजनं सर्वपापक्षयकरं भगवन्नामापि नगृहीतं नारकाऊचुः हेपुष्कर त्वयोक्तंसत्यं क्षणंतिष्ठ तवांगस्पर्शवायुना स्माकंसुखं भविष्यति तदा एतैः किंप्रयोजनं त्वंगच्छेति यमेनोक्तः पुष्करउवाच हेयम एतान्मोचयित्वाऽहंगंतुं नोत्सहे अतः मयासर्वभूतात्मा भगवान्गोविंदः आराधितस्तेन पुण्येन एते नारकाः मुक्ताभवंतु एवमुक्त्वा गोविंदगोविंदेतिविष्णोर्नामस्मरणंअकरोत् तदैवसर्वेनारकाः मुक्ताः दिव्यरूपधराः तवकीर्तिरतुला भविष्यतीतिपु

ष्करमुक्तवंतः वैकुंठंययुः पुष्करोपियममामंत्र्य नाममहिम्नैव परंपदंगतवानिति ४५ नामस्मरणमंत्रमाह गोविंदेति ४६ कार्तिकेभा-
गवतपारायणमाह श्लोकार्द्धमिति ४७ ४८ ४९ ५० यथाजडोनामकब्राह्मणः गीताध्यायश्रवणेन मुक्तोऽभू-
त् अत्रप्रसिद्धा कथा सारोद्धारे विदर्भनगरे कौशिकान्वयः जडोनाम ब्राह्मणः स्वधर्मं विहाय परस्त्रीगामी मद्यपी चौर्यकर्मरतः आसी-
त् सएकदा उत्तरदिक्तः चौर्येणानीतधनंगृहीत्वा आगच्छन् मार्गे तरोर्मूले चौरैर्घातितः ततः तत्पुत्रः पितरंनित्यं अन्वेषयन् वार्तामपि
नोपलब्धवान् ततःपितुः पारलौकिकंकर्म कर्तुं संभारान्गृहीत्वा वाराणशींगंतुमुपचक्रमे मार्गेसप्ताष्टौनिवासान् नीत्वाएकस्मिन् तरोर्मूले

गोविंदगोविंदहरेमुरारेगोविंदगोविंदमुकुंदकृष्ण गोविंदगोविंदरथांगपाणेगोविंददामोदरमाधवेति ४६
श्लोकार्द्धंश्लोकपादंवानित्यंभागवतोद्भवम् कार्तिकेयःपठेन्मर्त्यः श्रद्धाभक्तिसमन्वितः ४७ यैर्नश्रुतंभागवतंपु-
राणंनाराधितोवैपुरुषःपुराणः हुतंमुखेनैवधरामराणांतेषांवृथाजन्मगतंनराणाम् ४८ कार्तिकेमासिविप्रेंद्र
यस्तुगीतांपठेन्नरः तस्यपुण्यफलंवक्तुंममशक्तिर्नविद्यते ४९ गीतायास्तुसमंशास्त्रंनभूतंनभविष्यति सर्वपा-
पहरानित्यंगीतैकामोक्षदायिनी ५० एकेनाऽध्यायपाठेनसर्वपापकृतोपिच मुच्यतेनरकाद्घोरात्जडोवैब्राह्म-
णोयथा ५१

यत्र पूर्वंपितानिहतः तत्र संध्यांकृत्वा गीतायाः तृतीयाऽध्यायंजजाप.
तदैव घोरशब्दंश्रुत्वा आकाशात् पतंतं विमानवरसंस्थितं दिव्यरूपधरं पितरं दृष्ट्वा प्रणम्य वृत्तांतमपृच्छत् सचपिता आह हे पुत्र य-
दर्थं वाराणशीं गंतव्यं तत्सर्वं अद्यकृतं त्वंकृतकार्योऽसि निवर्तस्व गीताध्याय पठनेनत्वयाहं मोचितः किंच हे पुत्र मम भ्राता अन्येम-
दन्वयाश्च नरकं प्रतिपेदिरे तेसर्वेत्वया गीतापठन पुण्यदानेन मोचितव्याः इत्युक्त्वा आशिषंदत्वा विष्णुपदंययौ पुत्रोपिकालेन यम-
लोकंगत्वा गीतापाठजंपुण्यंदत्वा नारकीयान्मोचयित्वा स्वयमपि परपदंययाविति ५१ ५ ५ ६

अथकार्त्तिके शालिग्रामशिलादानप्रशंसामाह शालिग्रामेति ५२ ५३ ५४ यथाब्राह्मणीविवाहात् पंचमदिवसे भर्त्तृमरण योगेन विधवाजाता परंतु शालिग्राम शिलादानेन भर्ताजीवनंप्राप तेनसधवाजाता अत्र प्रसिद्धा कथा सारोद्धारे गोदातीरे कश्चिद्वैश्यः महापापरतः दुराचारः आसीत् सकदाचित् ऋणग्राहिणंब्राह्मणं खड्गेनाघातयत् ततः मरणांतेरौरवनरके पतितः अथधर्मचारोनाम तत्पुत्रः पित्रार्जितंधनं यज्ञदानव्रतजपतपइष्टापूर्तपरोपकारादि सन्मार्गेण व्ययंचकार एकदा धर्मचारवैश्यगृहे लोमशमुनिरागत्य त्वंशालिग्रामशिलादानपुण्येन पितरंरौरवान्मोचयेत्युपदिदेश तदासः शिलादानंव्यर्थमिति मत्वा ऋषिवचनमनादृत्य तूष्णींस्थितः कालेन ममारच लोमशोपि तूष्णींययौ सधर्मचारवैश्यः शिलायाअनादरात् विप्रवाक्यस्य लंघनात् मन्वंतरंनरकयातनां भुक्त्वा कर्मशेषेणानेकपशुयोनिं

शालिग्रामशिलादानंयःकुर्यात्कार्त्तिकेमुने तस्यपुण्यस्यविश्रांतिर्विष्णुनाननिरूपिता ५२ शालग्रामंसमभ्यर्च्य
श्रोत्रियायमहामुने दानंयःकुरुतेविप्रतस्यपुण्यफलंशृणु ५३ सप्तसागरपर्यंतभूदानाद्यत्फलंभवेत् शालग्रामशिला
दानात्तत्फलंसमवाप्नुयात् ५४ शालिग्रामशिलादानात्कार्त्तिकेब्राह्मणीयथा विधवासधवाजाताविवाहेपंचमेहनि ५५

भुक्त्वा स्त्रीजन्मानिचभुक्त्वा एकादशेजन्मनि याजकब्राह्मणस्य कन्या अभवत् तद्यापिता प्राप्तयौवनांकन्यां दृष्ट्वा समानकुलगोत्रायविवाहमकरोत् अथ तद्भर्ता पंचमेह्नि वमनरोगतः मृतः तदायाजकः जामातरं मृतंदृष्ट्वा जामाताकेनजीवेदिति क्षणमात्रं विचार्य कार्त्तिके शालग्रामस्य दानंजीवने कारणमिति मत्वा सुलक्षणं मनोहरंशालिग्रामं पुत्र्याहस्तेन विप्राय दापयामास तदातत्क्षणादेव पतिःजीवनंप्राप ततःतौ दंपती चिरकालं चिक्रीडतुः कालांतरे सायाजकसुता शालग्राम दानपुण्येन स्त्रीजन्माद्विनिर्मुक्तासती विष्णुयशनामकब्राह्मणजन्मलब्ध्वा प्रतिवर्षं कार्त्तिकेशालिग्राम दानपुण्येन मोक्षंप्रापेति ५५ [illegible] [illegible] [illegible] [illegible]

शिलादानप्रसंगेन शिलालक्षणमाह पाद्मे चक्रांकितंहिरण्यागंरश्मिजालंविनिर्दिशेत् सुवर्णरेखाबहुलंस्फटिकद्युतिशोभितम् अतिस्निग्धासिद्धिकरी कृष्णाकीर्तिंददातिच पांडुरापापदहनीपीतापुत्रफलप्रदा नीलाप्रयच्छतेलक्ष्मींरक्तारोगप्रदायिनी रूक्षाउद्वेगजननीवक्रादारिद्र्यभागिनी एकंसुदर्शनंज्ञेयंलक्ष्मीनारायणंद्वयं तृतीयंचाच्युतंविद्याच्चतुर्थंतुजनार्दनम् पंचमंवासुदेवंच षष्ठंप्रद्युम्नमेवच संकर्षणंसप्तमंच अष्टमंपुरुषोत्तमम् नवमंचनवव्यूहं दशमंतुदशात्मकम् एकादशंचानिरुद्धंद्वादशंद्वादशात्मकम् अतऊर्ध्वंतुचक्राणि

तस्मात्तुकार्तिकेमासिस्नानदानपुरःसरम् शालग्रामशिलादानंकर्तव्यंनात्रसंशयः ५६ इतिश्रीचतुःपुराणसारसंग्रहेकार्तिकमासमाहात्म्येकार्तिकव्रतिधर्मनिरूपणंनामद्वितीयोऽध्यायः २ छ छ ब्रह्मोवाच भूयःशृणुष्वविप्रेंद्रकार्तिकस्यचवैभवम् दशमीदिनमारभ्यदशम्यांतुसमापयेत् १ पौर्णमासींसमारभ्यपौर्णमास्यांसमापयेत् आश्विनस्यहरिदिनेसमारभ्यतुभक्तिमान् २ दामोदरंनमस्कृत्यकुर्यात्संकल्पमादितः दामोदरनमस्तेस्तुसर्वपापविनाशन ३ कार्तिकस्यव्रतंकर्तुमनुज्ञांदातुमर्हसि निर्विघ्नंकुरुदेवेशआमासंपुरुषोत्तम ४ इतिसंप्रार्थ्यविधिनाकार्तिकव्रतमाचरेत् अनूरुंवदताप्रोक्तंभास्करेणश्रुतंमया ५ कलौचस्वर्गगमनकारणंभूसतांहितत् सूर्यउवाच द्वादशानांतुमासानांमार्गशीर्षोतिपुण्यदः ६ तस्मात्पुण्यफलप्रोक्तोवैशाखोनर्मदातटे ततोलक्षगुणःप्रोक्तःप्रयागेमाघमासकः ७ तस्मान्महाफलःप्रोक्तःकार्तिकोजलमात्रके एकतःसर्वदानानिव्रतानिनियमास्तथा ८

दृश्यतेऽनंतसंज्ञके खंडितेत्रुटितेभग्नेशालग्रामेनदोषभाक् एवंदामोदरादिमूर्तीनांलक्षणंवर्तते ग्रंथविस्तरभयान्नोच्यतइति ५६ इतिकार्तिकमाहात्म्यटीकायांद्वितीयोऽध्यायः २ छ अथकार्तिकमासव्रतंकदाआरंभणीयंकदाच समापनीयमित्यपेक्षायामाह भूयइत्यादिना आश्विनस्येतिशेषः १ २ ३ ४ अनूरुंगरुडाग्रजं मयाब्रह्मणा ५ ६ ७ ८

९ १० ११ १२ १३ १४ सामान्यतो व्रतारंभसमाप्तिकालमुक्त्वा उपासनापरत्वेनविशेषमाह गृहीत्वा

एकतःकार्तिकस्नानंब्रह्मणातुलयाधृतं संततिश्चैवसंपत्तिःकलौयेषांप्रजायते ९ अवश्यंतैःकृतंविद्धिकार्ति
कस्नानमादरात् स्नानंचदीपदानंचतुलसीवनपालनम् १० भूमिशय्याब्रह्मचर्य्यंतथाद्विदलवर्जनम् विष्णुसंकी-
र्तनंसत्यंपुराणश्रवणंतथा ११ कार्तिकेमासिकुर्वंतिजीवन्मुक्तास्तएवहि नकार्तिकसमंधर्म्यमर्थ्यंनोकार्ति
कात्परम् १२ नकार्तिकसमंकाम्यंमोक्षदानंनकार्तिकात् युधिष्ठिरेणधर्मार्थमर्थार्थंचधुलेणच १३ श्रीकृष्णे
ननुकामार्थंमोक्षार्थंनारदेनच कृतमेतद्व्रतंतस्माच्छ्रेष्ठंकृष्णप्रियंचहि १४ अरुणउवाच ब्रूहिभास्करस
र्वात्मन्कदारभ्यव्रतंकृतम् सफलंजायतेसम्यक्काचपूज्यात्रदेवता १५ भास्करउवाच अहंविष्णुश्चशर्व
श्चदेवीविघ्नेश्वरस्तथा एकोहंपंचधाजातोनाट्येसूत्रधरोयथा १६ अस्माकंसर्वएवैतेभेदाधिष्ठिखगेश्वर तस्मा
त्सौरैश्चगाणेशैः शाक्तैःशैवैश्चवैष्णवैः १७ कर्तव्यंकार्तिकस्नानंसर्वपापापनुत्तये सूर्यस्यप्रीतयेकार्यंतुलासं
स्थेदिवाकरे १८ इषपूर्णांसमारभ्ययावत्कार्तिकपूर्णिमा तावत्स्नानंविधातव्यंशिवसंतुष्टयेनरैः १९ देवीप
क्षंसमारभ्यमहारात्रिचतुर्दशी तावत्स्नानंविधातव्यंदेवीसंप्रीयतामिति २० गणपक्षंसमारभ्यकृष्णायांका
र्तिकेभवेत् चतुर्थीतावद्देवस्यात्स्नानंगणपतुष्टये २१ एकादशींसमारभ्यत्वाश्विनस्यासितेतराम् एकाद-
श्यांकार्तिकस्यशुक्लायांपरिपूर्यते २२ कृतंयेनतुतस्यस्यात्परितुष्टोजनार्दनः नकार्तिकसमोमासोनकाशीस
दृशीपुरी २३ नप्रयागसमंतीर्थंनदेवःकेशवात्परः प्रसंगाद्वाबलात्कारैर्ज्ञात्वाज्ञात्वाकृतंभवेत् २४

दिना १५ १६ १७ १८ १९ २० २१ २२ २३ २४

अशक्तस्य कार्तिकस्नानफलग्रहणप्रकारमाह स्नानार्थमिति द्वाभ्यां २५ २६ प्रावरणं हिमानिलनिवारणवस्त्रं (रजाई दुलाई लेफ) इतिप्रसिद्धं नीशारः स्यात्प्रावरणे हिमानिलनिवारणे इत्यमरः २७ शुल्बजां ताम्रजां शल्वं ताम्रे यज्ञकर्मण्याचारे जलसन्निधाविति मेदिनी मृज्जां मृण्मयीं चित्रजातां कागदोपरिचित्रितांपिष्टविचित्रिताम् रंगावल्यादिना भूमौ निर्मितां २८ २९ आढ्यः युक्तः ३० ३१ ३२ ब्राह्मणमाहात्म्यमाह सनत्कुमारसंहितायां अविद्यो वा सविद्यो वा ब्राह्मणो मामकी तनुः प्रायः कलियुगे विप्राः शू-

स्नानंकार्तिकमासस्यनपश्येद्यमयातनाम् स्नानार्थंचेन्नसामर्थ्यंदत्वान्यस्मैधनादिकम् २५ स्नानस्यतस्यहस्तस्यगृहणात्पुण्यभाग्भवेत् अथवाकार्तिकस्नानंयेकुर्वंतिद्विजानयः २६ तेषांप्रावरणंदत्वास्नानजंफलमाप्नुयात् राधादामोदरःपूज्यःकार्तिकेतुविशेषतः २७ स्वर्णस्यवाथरौप्यस्याप्यभावेशुल्बजामपि मृज्जांवाचित्रजातांवाथवापिष्टविचित्रिताम् २८ दामोदरस्यराधायास्तुलस्याधोर्चयंतिये मूर्तिंतेतुनराज्ञेयाजीवन्मुक्तानसंशयः २९ अपिपापसहस्राढ्यःकार्तिकस्नानतोनरः मुक्तोवश्यंसभवतिनात्रकार्याविचारणा ३० तुलस्यभावेकर्तव्यापूजाधात्रीनलेखग मुख्यपूजाविधानंतुकर्तव्यंसूर्यमंडले ३१ अप्रत्यक्षाःसर्वदेवाःप्रत्यक्षोभगवानयं सर्वेदेवाःकालवशाःकालकालोदिवाकरः ३२ एतदाराधनेशक्तःप्रतिमांपूजयेन्नरः प्रतिमातोधिकंपुण्यंब्राह्मणस्यतुपूजने ३३

द्राचारपरायणाः वाममार्गरताः प्रायः संध्यास्नानविवर्जिताः ईदृशा अपि संपूज्या ब्रह्मबीजसमुद्भवाः ब्रह्मबीजेष्वपिश्रेष्ठः कृतोपनयनस्तु यः संध्याकर्ताततः श्रेष्ठः स्नानकर्ता ततोधिकः उत्कृष्टस्तु ततोज्ञेयः स्यात्साचारेणसंयुतः ततोप्यधीतशास्त्रस्तुवेदवेत्ता ततोपि च वेदार्थवित्ततः श्रेष्ठः सदाचारपरायणः अपरान्नरुचिस्स्वस्त्रीनिरतः क्रोधवर्जितः मध्यान्हेप्रयतः संध्यां यः करोति द्विजोत्तमः अयाचितव्रतोहोमीदेवब्राह्मणपूजकः विभज्याशी सत्यवादीद्विजोयत्रतुतिष्ठति कलिकालोपसर्गाद्यालतस्यलेनविशंतिहि तस्मा सर्वप्रयत्नेन कार्तिके द्विजमर्चयेदिति ३३ ५

१२

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

दानपात्रमाह सनत्कुमारसंहितायां मोक्षार्थैकाकिनेदद्याद्दानंद्रव्यच्युतायच सपत्नीकायधर्मार्थेविशेषेणकुटुंबिने यत्सेवाकारिणेदत्तंदत्तंवार्धुषिकायच दासीशायचयद्दत्तंयद्दत्तंछद्मकारिणे तीर्थप्रतिग्राहिणेचयद्दत्तंतीर्थभोजिने धनुर्धरायचयद्दत्तंदत्तंयत्सेतभोजिने वैद्यविद्याजीविनेच तथानक्षत्रसूचिने ईदृशेदीयतेदानंयेनासौनरकेव्रजेदिति गोलक्षणमाह कपिलागोषुचश्रेष्ठा तदभावेतु पिंगला तदभावेसिता तस्या अभावेच सितेतरा तदभावेचयाकाचिद्दोग्ध्रीवत्सेनसंयुताइति ३४ ३५ ३६ ३७ अश्वत्थवटयोरुत्पत्तिमाह सनत्कुमारसंहितायां ब्रह्मणाचपुरासृष्टाः सर्वेदेवाः सवासवाः मिलित्वासर्वएवैतेब्रह्माणंवाक्यमब्रुवन् ब्रह्मन्सर्वाधिकोरुद्रः सर्वदेवेषुपठ्यते कर्तुंतद्दर्शनंदेवगच्छामो भवतासह इत्युक्त्वादेवताःसर्वेकैलासंजग्मुरादरात् नदृश्यतेद्वारपालःशिवस्याभ्यंतरेस्थितः गंतव्यंवानगंतव्यमस्माभिःशिवसन्निधौ एवंचिंतयमानैस्तैर्नारदोमुनिसत्तमः पुरोदृष्टोदेववृंदैस्तंप्रणम्योचुरुत्तमं देवाऊचुः मुनेवेदविदांश्रेष्ठब्रूहिप्रश्नंसुशोभनम् किंकरोतिमहादेवोगंतव्यंवानवांतरे नारदउवाच चंद्रनाशदशायांतु देवाःसंप्रस्थितागृहात् तस्मात्कश्चिन्महाविघ्नोभवतांसंभविष्यति किंकरोतिशिवश्चेतिप्रश्नेरतिदशाविभोः तस्मात्संभोगकार्येऽयंवर्ततेत्रिपुरांतकः इंद्रउवाच सर्वेषामेवदुःखानांनाशकर्तादिवस्पतिः मय्यागतेकथंनाशोदेवतानांभविष्यति विभीषणायदेवानांयत्नानंकुरुतेमुनिः इतींद्रस्यवचःश्रुत्वाव्याकुलोभून्मुनिस्तदा कथंमद्वचनंसत्यंभविष्यत्यद्यवज्रिणी अद्यमद्वचनंशीघ्रंयदिसत्यंभविष्यति राधादामोदरमुदे करिष्येकार्तिकव्रतं एवंसंचिंत्यमनसातूष्णीभूतोमुनीश्वरः इंद्रोविचार्यदेवैःकिमिदानींविधीयतां ततइंद्रउवाच

दरिद्रोदानपात्रंस्याद्विद्यावांस्तुविशेषतः विप्राभावेपूजनीयागावः कृष्णा मनोहराः ३४ विष्णोर्मूर्तिर्जंगमतः स्था
वरातुप्रशस्यते शूद्रस्थापितमूर्तीनांनमस्कारंकरोतियः ३५ पितृभिर्निरयंयातिदशपूर्वैर्दशापरैः शूद्रार्चितस्य
संस्पर्शाद्दहेदासप्तमंकुलम् ३६ तस्माद्विचार्यविप्रैर्यास्थापितातांसमर्चयेत् ततोपियादेवताभिः कृतासाभु-
क्तिमुक्तिदा ३७ मूर्त्यभावेपूजनीयोऽश्वत्थोवाथवटोयवा

+ टीप.--चंद्रनाशो राहुः

दंवन्हेमद्वचनंशृणु गृहीत्वाविप्ररूपंत्वंशिवस्याभ्यंतरेव्रज यदिप्रसंगोस्त्यस्माकंतदावार्तानिगद्यतां यदिनास्तिप्रसंगश्चेद्याचकत्वेनयाहिव अवध्यत्वादताड्यत्वाद्भिक्षुकत्वेनतंव्रज इतिदेवेंद्रवचनंश्रुत्वावन्हिस्तथाकरोत् अभ्यंतरंददर्शेशंशिवयासहसंगतम् शिवयापिचहृष्टःसलज्जिताभोगमत्यजत् कोसिकोसीतिसंस्पृष्टोभिक्षुकोहंक्षुधातुरः वृद्धोस्म्यंधोस्मिदीनोस्मिभोजनंदीयतांमम तेनाहृष्टर्मित्वापार्वतीतमभोजयत् सोपिभुक्त्वासमाचारंवक्तुंसंप्रस्थितोबहिः तस्मिन्नेवक्षणेगुप्तोनारदःपार्वतींययौ शिरोनिधायपार्वत्याःपादयोःसरुरोदह अहोबालककिंजातंतच्छीघ्रमभिधीयतां करोमिनिष्कृतिंतस्यसाध्यासाध्यस्यवान्यथा मातर्वक्तुंनशक्नोमित्युपहासस्यकारणंकृतंयथेंद्रादिदेवैस्तथाकोन्यःकरिष्यति इतिश्रुत्वावचस्तस्यपुनःपुनरपृच्छत मुद्रयित्वाततोनेत्रेकराभ्यांसमुनीश्वरः उवाचवचनंनीचंमूर्खोसौगद्गदाक्षरम् इंद्रोयंयुवयोर्भोगंदेवताभ्योत्यवर्णयत् युवयोश्चकृतानिंदातांश्रुत्वादुःखितोस्म्यहम् भोगविच्छित्तयेवन्हिःप्रेषितोद्विज-

अश्वत्थरूपीविष्णुःस्याद्वटरूपीशिवोयतः ३८

रूपकः जगन्मातासिदेवित्वंकातेस्याद्दुपहास्यता इतितस्यावचःश्रुत्वापार्वतीक्रुद्धमानसा स्फुरदोष्ठारक्तनेत्रादृष्ट्वातांनारदोययौ गत्वादेवानुवाचेदंसंभोगाद्विरतोहरः आगम्यतांदर्शनार्थंदूरतोसौविलोकितः वन्हेर्मुनेर्वचःश्रुत्वादेवेंद्रःसगणोययौ प्रणिपत्यमहादेवंकृतांजलिपुरोभवत् दृष्ट्वातथाविधंशक्रंपार्वतीवाक्यमब्रवीत् यावंतःसंतिदेवानांज्ञातयःसर्वएवते अजानंतःस्त्रीसुखानिशाखिनःसंतुसस्त्रियः इतिदेवीवचःश्रुत्वाकंपिताःसर्वदेवताः ब्रह्मविष्णुमहेशाद्यास्तुष्टुवुर्जगदंबिकाम् ततोदेवीप्रसन्नाभूद्देवेंद्रंवाक्यमब्रवीत् देवामद्वचनंमिथ्यात्रिलोकेपिनजायते तस्मादेकांशतोवृक्षायूयंसर्वेभवंतुवै इतिदेव्यावचःश्रुत्वाजातादेवास्तुपादपाः अश्वत्थरूपीभगवान्वटरूपीसदाशिवः पालाशोभूद्विधाताचआम्रःशुक्रोबभूवह इंद्राणीसालताज्ञेयादेवानांयोषितस्तथा मालत्याद्याःपुष्पलताउर्वश्याद्याप्सरसोभवन्निति ३८

तुलसीशाकंक्वचिद्देशेप्रसिद्धं ३९ ४० ननुविष्ठाभक्षणतत्पराः गावःकथंजाताइत्यपेक्षायामाह सनत्कुमारसंहितायां एकदाब्रह्मा गंगाद्वारमागत्य कार्तिकस्नानतत्परान् विष्णुभक्तिरतान् ऋषीन्दृष्ट्वा अतिकोपसंतप्तः सन् जगत्कर्तारंमांविहाय विष्णुःकथंआराध्यते तद्दध्वंनोचेच्छापंददामीत्युवाच तदात्रस्तैः ऋषिभिः ध्यातःविष्णुः प्रत्यक्षीभूयब्रह्माणमुवाच हेब्रह्मन् त्वंनिमित्तमात्रंविघ्नपालकोनारायणएव अतःकार्तिकेविप्रैः पूज्यते ब्रह्मावदति अहंजगद्गुरुः एवंद्वयोर्विवदतोः कस्यापिपराजयः नजातःतदाविष्णुः आवयोः सामर्थ्यशिवः वेत्तितत्रनिर्णयोभविष्यति तथेत्युक्त्वा ब्रह्माविष्णुश्चकाशिकांजग्मतुः तत्रशिवंप्रणम्य आवयोर्मध्येकःश्रेष्ठः हेप्रभोत्वंसत्यंब्रूहि इत्यूचतुः तदाशिवउवाच एतन्मममहालिंगंकियदूर्ध्वंतलेकियत् योज्ञास्यत्येतदंतंसलोकेपूज्योभविष्यति तस्मादेकत्रयाहित्वंब्रह्मन् विष्णोत्वमेकतः एतद्वचःसमाकर्ण्यवेधाश्चोपरिसंययौ अधस्ताज्जगतोविष्णुर्ययौपंचशतंसमाः विश्रांतःखेदखिन्नश्चनप्राप्तोंतस्ततस्यच

कार्तिकेतुलसीशाकंतांबूलंवानराधमः अज्ञानात्ज्ञानतोवापिभुंजानोनिरयंव्रजेत् ३९ शालग्रामशिलाचक्रेनित्यंसन्निहितोहरिः तस्मात्सर्वप्रयत्नेनशालग्रामंप्रपूजयेत् ४० रुद्रशापवशाद्गावोविष्ठाभक्षणतत्पराः तथापिताःपूजनीयालोकद्वयफलप्रदाः ४१

पुनःपरावृत्यययौप्रणमत्रुद्रमादरात् रुद्रउवाच हेविष्णो किंदृष्टं विष्णुरुवाच हेशिव पंचशतंसमाः भ्रमन्नपि तदंतोनदृष्टः अतएवत्वन्निकटेतूष्णींस्थितोस्मि ब्रह्मावर्षसहस्राणिययाचूर्ध्वंसदुःखितः विचारयन्मनस्येवकिंकर्तव्यंमयाधुना विष्णुनांतोयदाप्राप्तस्तदाश्रेष्ठोभविष्यति नप्राप्तश्चेत्तदातुल्यौजायेतांतौशिवाज्ञया तस्माच्छद्मकरिष्यामियथास्यांलोकपूजितः इतिनिश्चित्य कामधेनुंकेतकंचाह युवयोः शिवलिंगस्यांतोमयादृष्टः इतिशिवसमीपेसाक्षिर्दातव्या युवयोर्मनोरथंकरिष्यामि इत्युक्त्वाताभ्यांसह शिवसमीपंएत्यहास्यंकृत्वोवाच सहस्रवर्षैर्लिंगांतोमयादृष्टस्तथाखिलः एषाधेनुःकेतकोयंउभौतत्रैवसंस्थितौ पृच्छ्येतौमहादेवत्वयाशपथपूर्वकं शिवउवाच कृतघ्नानांतुयत्पापंयुवयोर्मस्तकेपतेत् यद्यसत्यंप्रभाषेतलिंगांतोवीक्षितोमुना धेनुके

नकावूचतुः हेशिव ब्रह्माते लिंगांतं गतः तच्चास्माभिर्विलोकितं शिवउवाच मिथ्याब्रूतेयोऽधमोमांविष्ठापततितन्मुखे अपवित्रंमुखंतस्मात्तद्भविष्यत्यसंशयं: शृणुकेतकतेपुष्पैर्नरोमामर्चयिष्यति लक्ष्मीसंततिहीनोसौरौरवंनरकंव्रजेत् शृणुब्रह्मन्नरोयस्तुजनस्त्वांपूजयिष्यति सद्योभवत्यसौकुष्ठीदरिद्रोमृतसंततिः शृणुविष्णोमहाभाग कार्तिकेस्मिन्जितंत्वया तस्मात्त्वत्प्रीतयेलोकैः कृतंभवतिचाक्षयमिति ४१ पालाशे· पालाशपत्रे अचविशेषः पाद्मे यः करोतिनरोनित्यं कार्तिकेपत्रभोजनम् नदुर्गतिमवाप्नोति यावदिंद्राश्चतुर्दश सर्वकामफलंतस्य सर्वतीर्थे-

ब्रह्मांशकसमुद्भूते पालाशेयस्तुभोजनम् कुर्यात्कार्तिकमासेसौविष्णुलोकंप्रयास्यति ४२
अश्वत्थरूपीभगवान्वटरूपीसदाशिवः तस्मात्सर्वप्रयत्नेनकार्तिकेश्वत्थमर्चयेत् ४३ या
नारीकार्तिकेमासिलक्षंकुर्यात्प्रदक्षिणाः राधादामोदरंपूज्यमंदवारेचतत्तले ४४ दंपतीभो
जयेद्राधादामोदरस्वरूपिणौ भोजयित्वासपत्नीकास्पश्चाद्भुंजीतवाग्यतः ४५ वंध्यापिल
भतेपुत्रंइतरासांतुकाकथा सदासन्निहितोविष्णुर्द्विपत्सुब्राह्मणेयथा ४६ बोधिद्रुमेपाद
पेषुशालग्रामेशिलासुच तस्मादश्वत्थमूलेवैकर्तव्यंविष्णुपूजनम् ४७ छ छ

फलंलभेत् नचापिनरकंपश्येद्ब्रह्मपत्रेषुभोजनात् ब्रह्माएषस्मृतःसाक्षात्पालाशःसर्वकामदः मध्यमंवर्जयेत्पत्रं कार्तिकेशिखिवाहन ब्रह्माविष्णुश्चरुद्रश्चत्रयोदेवास्त्रिपत्रके ऐश्वरंवर्ज्ययेत्पत्रं ब्रह्माविष्णुरनुत्तमं सर्वपुण्यमवाप्नोतिशेषपत्रेषुभोजनात् भोजनान्मध्यपत्रेषुकपिलापयसस्तथा प्राशनान्मुनिशार्दूल नरोनरकमाप्नुयात् भोजनंब्रह्मपत्रेषुकार्तिकेमुक्तिदायकम् मौनीपालाशभोजीचहन्यात्पापंयुगार्जितम् ४२ ४३ ४४ ४५ द्विपत्सुद्विपदेषुमनुष्यमात्रेषुब्राह्मणेविष्णोर्वासः ४६ बोधिद्रुमेऽश्वत्थवृक्षे ४७

शनिवासरे अश्वत्थपूजास्पर्शेन कर्तव्या अन्यवारे शनिव्यतिरिक्त रव्यादिषड्वारे अश्वत्थस्पर्शं यदिकुर्यात्तदा दरिद्रःस्यात् अत्रप्रसिद्धां कथामाह यदासमुद्रमथनात् ज्येष्ठा लक्ष्मीश्चासन्ना लक्ष्मीर्विष्णवेदत्ता ज्येष्ठाउद्दालकायदत्ता साउद्दालकस्यवेदध्वनिनिनादितमति पवित्रमाश्रमंविलोक्य अतिदुःखितासती पतिमुवाच हेस्वामिन् तवाश्रमेममशिरः पीडाभवति अत्रनवसामि यत्रद्यूतमद्य व्यसनिनः परदाराभिगामिनः कलहकारिणः वसंति तादृशंस्थलंमेदेहि इतिज्येष्ठावचःश्रुत्वा उद्दालकः भृशंदुःखितःसन् अस्याः त्यागेनैवममसुखंभवेदितिविचार्य भार्यामुवाच हेकांते मद्वचनंशृणु अद्यअश्वत्थाधःस्थिराभव तवयथायोग्यंस्थलंविलोक्यतत्रत्वांनयामि माशंकः इत्थमाश्वास्य पलायनमचीकर

अश्वत्थपूजास्पर्शेनकर्तव्याशनिवासरे अन्यवारेश्वत्थसंगाद्दरिद्रोजायतेनरः ४८ स्नानंजागरणंदीपंतुलसी
वनपालनम् कार्तिकेमासिकुर्वंतितेनराविष्णुमूर्तयः ४९ समार्जनंविष्णुगृहेस्वस्तिकादिनिवेदनम् विष्णोः
पूजांचयेकुर्युर्जीवन्मुक्तास्तेनराः ५० स्नानकालंप्रवक्ष्यामितीर्थादिषुचयत्फलम् स्नानधर्मांश्चयेकेचित्तान्
सर्वान्मेनिबोधत ५१ इतिश्रीचतुःपुराणसारसंग्रहे कार्तिकमासमाहात्म्ये कार्तिकवैभववर्णनंनाम तृतीयो
ऽध्यायः ३ छ ब्रह्मोवाच नाडिद्वयावशिष्टायांरात्र्यांगच्छेज्जलाशयं तुलसीमृत्तिकायुक्तःसवस्त्रक
लशोमुने १ आगत्यतोयनिकटेतीरेसंस्थाप्यपात्रकम् पादप्रक्षालनंकृत्वादेशकालादिचोच्चरेत् २

त् सापिसायंकालपर्यंतं स्थित्वा निराशासती करुणंरुरोद तदाश्रुत्वा तद्रोदनं विष्णुःश्रियासहसमाययौ हेज्येष्ठे अलक्ष्मीःअद्यशनि वासरोस्ति अतः सप्तमेसप्तमेऽहनि तवभगिनीमेलनायागमिष्यति अन्यवारेषुयैः पिप्पलःस्पृश्यते तद्गृहंव्रज शनिवारेयैः अश्वत्थः स्पृष्टः तत्रमास्मिया-यास्यति एवमाश्वास्यहरिर्वैकुंठंजगाम तस्मान्मंदवारंविनाश्वत्थः नस्पृश्यइति ४८ ४९ आदिशब्देनलेपनादि ५० मेमत्तः ५१ इतिकार्तिकमाहात्म्यटीकायांतृतीयोऽध्यायः ३ छ अथस्नानकालनिरूपणपूर्वकं स्नानकर्तव्यविधानमाह नाडीति नाडीघटिका १ २

३ मयासह लक्ष्म्यासह ४ ५ अर्घमंत्रानाह गृहाणेति ६ ७ ८ काशीस्थपंचनदीसंगम स्मरणमाह किरणाइ

स्मरेद्गंगादिकानद्योविष्णुशर्वादिदेवताः नाभिमात्रेजलेस्थित्वामंत्रमेतमुदीरयेत् ३ कार्तिकेहंकरिष्यामिप्रातः
स्नानंजनार्दन प्रीत्यर्थंतवदेवेशदामोदरमयासह ४ नित्येनैमित्तिकेकृत्वाकार्तिकेपापनाशन स्नानंचार्घप्रदा
स्यामिनिर्विघ्नंकुरुकेशव ५ तीर्थादिदेवताभ्यश्चक्रमादर्घ्यादिदापयेत् गृहाणार्घ्यंमयादत्तंराधयासहितोहरे
६ नमःकमलनाभायनमस्तेजलशायिने नमस्तेस्तुहृषीकेशगृहाणार्घ्यंनमोस्तुते ७ व्रतिनःकार्तिकेमासिस्ना
तस्यविधिवन्मम गृहाणार्घ्यंमयादत्तंदनुजेंद्रनिषूदन ८ किरणाधूतपापाचपुण्यतोयासरस्वती गंगाचयमुनाचै
वपंचनद्यःपुनंतुमाम् ९ अन्यासांचनदीनांचदद्यादर्घ्यंयथाविधि जान्हवीस्मरणंकुर्यात्सर्वतीर्थेषुमानवः १०
नान्यत्तीर्थेतुजान्हव्यास्मरणीयंकदाचन एतान्मंत्रान्समुच्चार्यमलस्नानंसमाचरेत् ११ मृत्स्नानंचपितृस्नानंगु
रुस्नानंतपःपरम् ततस्तुपावमानीभिरभिषिंचेत्स्वमस्तकम् १२ अघमर्षणकंकृत्वास्नानांगंतर्पणंतथा ततः
पुरुषसूक्तेनजलंशिरसिसिंचयेत् १३ ततस्तुबहिरागत्यतीर्थंशिरसिनिक्षिपेत् तीर्थंपीत्वात्रिवारंतुतुलसींगृह्य
पाणिना १४ ततोजलाद्विनिष्क्रम्यचांचलंपीडयेद्बहिः यन्मयादूषितंतोयंशारीरमलसंचयैः १५ तद्दोषपरिहारा
र्थंयक्ष्माणंतर्पयाम्यहम् वस्त्रनिष्पीडनंकृत्वाकुर्यात्स्वतिलकादिकम् १६ सूतउवाच शृणुध्वंऋषयःसर्वे
कार्तिकस्नानजंफलम् अरुणंप्रतिसूर्येणयदुक्तंचसविस्तरम् १७ अरुणउवाच कस्मिंस्तीर्थेविशेषेणफलंका
र्तिकसंभवम् क्षेत्रेवाएतदाख्याहिभगवन्स्नानयोगतः १८

ति कथंभूता सरस्वतीपुण्यतोया ९ १० १५

मलस्नानंप्रथमस्नानं ११ मृत्स्नानं मृत्तिकालेपन पूर्वकंस्नानं पितृस्नानंपितृसूक्तेनस्नानं गुरुस्नानंमहास्नानं १२ १३ १४ १५ १६ १७
१८

अत्रोष्णोदकग्रहणं क्रमेण फलप्रदर्शनार्थं नतुविधिरशक्तविषयश्च १९ २० २१ २२ २३ २४ २५ सरोवरं मानस

सूर्यउवाच यत्रकुत्रापिकर्तव्यंजलेस्नानंतुकार्तिके उष्णोदकेनकर्तव्यंस्नानंकुत्रापिकार्तिके १९ ततोदशगुणं
पुण्यंशीततोयनिमज्जनात् ततःशतगुणंपुण्यंबहिःकूपोदकेकृतम् २० कूपात्सहस्रगुणितंफलंवापीनिषेकतः
ततोयुतगुणंपुण्यंतडागस्नानतोभवेत् २१ ततोदशगुणंपुण्यंनिर्झरेषुनिमज्जनात् ततोधिकतरंपुण्यंनदीस्नानस्य
कार्तिके २२ नद्यादशगुणंप्रोक्तंतीर्थस्नानेखगोत्तम ततोदशगुणंपुण्यंनद्योर्यत्रचसंगमः २३ नदीत्रयस्यसंयोगेपु
ण्यस्यांतोनविद्यते सिंधुःकृष्णाचवेणीचयमुनाचसरस्वती २४ गोदावरीविपाशाचनर्मदातमसामही कावेरीशर
यूक्षिप्रातथाचर्मण्वतीनदी २५ वितस्तावेदिकाशोणोवेत्रवत्यपराजिता गंडकीगोमतीपूर्णाब्रह्मपुत्रासरोवरम्
२६ वाग्मतीचशतद्रुश्चतथाबदरिकाश्रमः दुर्लभाःकार्तिकेत्वेतेतीर्थान्यथनिबोधमे २७ सर्वेभ्यश्चस्थलेभ्यश्च
आर्यावर्तंतुपुण्यदम् कोल्हापुरीततःश्रेष्ठाततःकांचीद्वयंस्मृतम् २८ अनंतसेनवसतिर्वराहक्षेत्रमेवच चक्रक्षे
त्रंततःपुण्यंमुक्तिक्षेत्रंततोधिकम् २९ अवंतिकाततःश्रेष्ठाततोबदरिकाश्रमः अयोध्याचततःश्रेष्ठागंगाद्वारंत-
तोधिकम् ३० ततःकनखलंतीर्थंततोमधुपुरीवरा एकोपिकार्तिकोमासोमथुरायमुनाजले ३१ यैःस्नातस्तेतुवै
कुंठेबहुकालंवसंतिहि राधादामोदरस्तत्रस्वयंस्नातस्तुकार्तिके ३२ अतोमधुपुरीश्रेष्ठायमुनाचविशेषतः द्वाराव
तीततःश्रेष्ठाप्रत्यहंस्नातिकेशवः ३३ षोडशस्त्रीसहस्रेणसार्द्धंयादवसंयुतः द्वारकायांमृत्तिकायास्तिलकोयेनम
स्तके ३४

सरोवरं नारायणसरोवरंवा २६ २७ कांचिद्वयंशिवकांचिविष्णुकांचितीर्थे २८ वराहक्षेत्रं व्यंकटस्थं
लं २९ ३० ३१ ३२ ३३ गोपीचंदनमाहात्म्यमाह द्वारकायामिति ३४

३५ विंध्याचलनिवासिनीस्थलं ३६ तीर्थराजेप्रयागराजे ३७ ३८ ३९ ४० ४१ काशिप्रशंसामाह ततइति मासस्त·४
४२ ४३ तस्यांगंगायां पंचनदंतीर्थं पंचनदमाहात्म्यं अरुणंप्रतिसूर्यउवाच मयातत्रतपस्तप्तंप्रस्वेदात्किरणानदी गभस्तीशाद· का·मा·८
धोभागेगंगयासहसंगता धूतपापापितत्रैवचंद्रांशकसमुद्भवा रुद्रांशकसमुद्भूतास्वयंभागीरथीस्थिता विष्णोरंशसमुद्भूतायमुनायत्रसं। अ·४

धार्यतेसौनरोज्ञेयोजीवन्मुक्तोनसंशयः द्वारकास्नानमाहात्म्यंनवक्तुंशक्यतेमया ३५ गोविंदार्पितचित्तानांजायतेपु
ण्यभास्करा ततोभागीरथीश्रेष्ठायत्रविंध्येनसंगता ३६ तस्माद्दशगुणंपुण्यंतीर्थराजेत्रजायते कलौदशसहस्रां
तेविष्णुस्त्यक्ष्यतिमेदिनीम् ३७ तदर्द्धंजान्हवीतोयंनदधेदेवतागणाः यावत्तिष्ठतिगंगात्रतावत्तीर्थानिसंतिच ३८
स्वस्वस्थानेन्नृणांपापंतावदेवहरंतिच यदैवगंगानष्टास्यात्कोवातत्पापमाहरेत् ३९ विचार्यैवंकृततीर्थानिगमिष्यंति·
धरातले तस्मान्मुनीश्वराःसर्वेयावत्तिष्ठतिजान्हवी ४० तावच्चक्रियतांधर्मस्ततोभूमौनिलीयताम् समाधिंगृत्यसु
दृढांयावत्कृतयुगंभवेत् ४१ अन्यथाकलिकालेनभ्रंशनीयोभवेत्सुधीः ततःश्रेष्ठतराकाशीयस्यानाशोनजायते
४२ यदाश्रयेणगंगापिसर्वपापंव्यपोहति काशिकायांनैवनाशोब्रह्मण्यपिमृतेसति ४३ यद्दर्शनार्थंगंगापिजा
ताचोत्तरवाहिनी तस्यांपंचनदंतीर्थंत्रिषुलोकेषुविश्रुतम् ४४ आगतेकार्तिकेमासिरौरवंनरकंगताः आक्रोशंते
नुपितरोवंशेस्माकंभविष्यति ४५ कश्चिद्भाग्यवतांश्रेष्ठोगत्वापंचनदेशुभे अस्माकंतर्पणंकुर्यान्नरकार्णवतारकम्
४६

ना ब्रह्मांशसंभवायत्रदृश्यतेतुसरस्वती तीर्थंपंचनदंनामभूमावेकंविराजते सर्वतीर्थानिगच्छंतितत्तीर्थेदिनेखलु यात्रा·
र्थंकाशिकास्थानिनयांतिक्वापिसारथे तानिसर्वाणिचायांतिस्नातुंपंचनदेशुभे मणिकर्ण्यपिचायातिपुर्यादीनांचकाकथा दुर्लभोमानुषो· १६
देहोदुर्लभाकाशिकापुरी तत्रापिकार्तिकेमासिपंचगंगंसुदुर्लभमिति ४४ ४५ ४६ ४७ ४८

४७ ४८ अत्रसर्वत्रपंचनदशब्देन काञ्चीस्थपंचगंगातीर्थं ग्राह्यं नतु कावेरीतटस्थमिति ४९ कार्तिकेकावेरीस्नानमाहात्म्यमाह

तीर्थराजादितीर्थानिप्राप्तेकार्तिकमासके स्नानार्थंपंचगंगंतुसमायांतिनसंशयः ४७ कृत्वातुलक्षपापानिस्नात्वापंचनदेशुभे
बिंदुमाधवमभ्यर्च्यविलयंयांतितत्क्षणात् ४८ यैःस्नातंकार्तिकेमासिसकृत्पंचनदेशुभे सर्वतीर्थकृतात्
स्नानात्फलंकोटिगुणंभवेत् ४९ ब्रह्मोवाच कार्तिकेमासिकावेर्य्यांयःस्नानंकर्तुमिच्छति तावतावैविमुक्ताघो
विष्णुसायुज्यमाप्नुयात् ५० कावेर्य्याश्चैवमाहात्म्यंकोवदेत्परमुत्तमम् अत्रतेवर्णयिष्यामिइतिहासंपुरातनम् ५१
कावेर्य्याविषयेब्रह्मन्सावधानमनाःशृणु गौतम्याउत्तरेतीरेविष्णुपादाब्जसंभवा ५२ गंगात्रैलोक्यपापघ्नीवर्ततेलोकपूजिता
सागंगाचिंतयामासकदाचित्पापशंकिता ५३ सर्वलोकाःसमागत्यमयिपापंत्यजंतिहि तत्पापंतुकथंगच्छेदिति
चिंतापरातदा ५४ प्रष्टुंजगामकैलासंगिरिजावल्लभंभवं तत्रदृष्ट्वामहारुद्रंप्रोवाचहरिपादजा ५५ गंगोवाच
महारुद्रनमस्तेस्तुत्वांप्रष्टुमहमागता सर्वलोकाःसमागत्यमयिपापंत्यजंतिहि ५६ तत्पापंतुमयासोढुंनशक्यंपार्वतीपते
येनोपायेनतत्पापंनागच्छेन्ममतद्वद ५७ एवंगंगावचःश्रुत्वाप्रत्याहपरमेश्वरः रुद्रउवाच पापनिर्हरणायादौ
पद्मनाभांघ्रिपंकजात् ५८ प्रादुर्भूतासित्वंदेवीकिमर्थंतप्यतेत्वया पापप्रहाराधिपत्यंकल्पितंतवविष्णुना ५९
तथापिपापनिर्हारेउपायंतेब्रवीम्यहम् कवेश्चतनयादेवीकावेरीसरितांवरा ६० सर्वोत्कृष्टाचसर्वेषांहरेर्बलवशात्तु
सा सर्वपापप्रहरणेसामर्थ्यंतत्रवर्तते ६१ कार्तिकेमासिकावेर्य्यांयःस्नानंकुरुतेनरः सतुपापविनिर्मुक्तोयाति
विष्णोःपरंपदम् ६२

ब्रह्मोवाचेत्यादिनां ५० ५१ ५२ ५३ ५४ भवंशिवम्
५५ ५६ ५७ ५८ ५९ ६० तत्रतस्यां ६१ ६२ ६३ ६४

६३ ६४ ६५ ६६ ६७ तुलास्नानं तुलासंक्रांतिप्रवेशकालमारभ्य वृश्चिकार्कप्रवेशकालपर्यंतंस्नानं ६८ ६९
अन्यतीर्थक्षेत्रस्थितपुरुषस्यकावेरीस्नानजंपुण्यप्राप्त्युपायमाह इतिहासमिति ७० अथकार्तिकस्नाने उत्तमादिकाललक्षणमाह रात्रि

तस्मात्तांगच्छदेवित्वंततोपापाद्विमोक्ष्यसे इत्युक्त्वासानदागच्छत्कावेरींपापहारिणीम् ६३ तज्जलस्पर्शमात्रेण
कार्तिकेविष्णुपादजा निर्धूतपातकागंगाजगामस्वनिकेतनम् ६४ कार्तिकेप्रतिवर्षंतुगंगात्रैलोक्यपावनी स्नातुं
भक्त्यासमायातिकावेरींपापहारिणीम् ६५ तज्जलस्पर्शमात्रेणकार्तिकेविष्णुपादजा निर्धूतपातकागंगाजगामस्व
निकेतनम् ६६ कार्तिकेप्रतिवर्षंतुगंगात्रैलोक्यपावनी स्नातुंभक्त्यासमायातिकावेरींपुण्यदांशुभां ६७ तस्मात्त्व
त्तुलास्नानंकावेर्यांशस्यतेबुधैः यःकावेर्यांतुलास्नानंभक्त्यातुकुरुतेमुने ६८ विमुक्तदुरितःसद्यस्ततोयातिपरांग
तिम् तस्मात्स्नानंतुकावेर्यांकार्तिकेमासिशस्यते ६९ इतिहासमिमंश्रुत्वाकार्तिकव्रततत्परः सकावेरीस्नानफलं
प्राप्नोतिचपरांगतिम् ७० रात्रिशेषेभवेत्स्नानमुत्तमंविष्णुतुष्टिकृत् सूर्योदयेमध्यमंस्याद्यावन्नास्तातुकृत्तिका
७१ तावदेवभवेत्स्नानमन्यथातन्नकार्तिकम् स्नानंस्त्रीभिर्विधातव्यंगृहीत्वाज्ञांधवस्यच ७२ अपृष्ट्वायत्कृतंध
र्म्यंभर्तारंतत्क्षयंनयेत् स्त्रीणांनास्त्यपरोधर्मोभर्तारंप्रोज्झ्यकश्चन ७३ कुर्यात्सहस्रपापानिभर्त्राज्ञांयासमाचरेत्
सैषाधर्मवतीलोकेनजायेतव्रतादिना ७४ दरिद्रःपतितोमूर्खोदीनोपियदिचेत्पतिः तादृशःशरणंस्त्रीणांतस्यागान्नि
रयंव्रजेत् ७५ कलौवत्समनुष्याणांशैथिल्यंस्नानकर्मणि तथापिकथयिष्यामिस्नानंकार्तिकमाघयोः ७६ यस्यह
स्तौचपादौचवाङ्मनश्चसुसंयतं विद्यातपश्चकीर्तिश्चसतीर्थफलभाक्नरः ७७

शेषइति ७१ धवस्यस्वभर्तुः ७२
प्रोज्झ्यत्यक्त्वा ७३ ७४ ७५ ७६ ७७ ७८ ७९

७८ ७९ स्नानभेदानाह स्नानमिति ८० मेघांबुभास्करं मेघांबु मेघधाराजलं तत्र स्नानं भास्करं सूर्यतापोद्भवं ८० ८१ ८२
८३ ८४ पुराप्रभंजनो नाम नृपः मृगयायां गुल्मांतरे स्थितां वत्सं पाययंतीं मृगीं विव्याध तदा मृगी उवाच हे नृप तनयस्य स्तनं प्रयच्छंतीत्वया हता अतस्त्वं व्याघ्ररूपत्वमाप्नुहि तदा शापेन त्रस्तो राजा प्रांजलिः सन्नुवाच हे मृगि व्याघ्ररूपं भुक्त्वा मानुषं कदा प्राप्स्यामि तदूचे मृगी उवाच हे नृप कार्तिके पुष्करे यदा नंदया सह तव संवादो भविष्यति तदा मुक्तो भविष्यसि एवमुक्त्वा सा मृता नृपोपि वर्षशतं व्याघ्ररूपेण वने परिभ्रमन्

अश्रद्दधानः पापात्मा नास्तिकश्छिन्नमानसः हेतुवादी च पंचैते न तीर्थफलभागिनः ७८ प्रातरुत्थाय यो विप्रस्तीर्थे स्नायी सदा भवेत् सर्वपापविनिर्मुक्तः परं ब्रह्माधिगच्छति ७९ स्नानं चतुर्विधं प्रोक्तं स्नानविद्भिर्मनीषिभिः वायव्यं वारुणं दिव्यं ब्राह्मं चेति तथा स्मृतम् ८० वायव्यं गोरजः स्नानं वारुणं सागरादिषु ब्राह्मं ब्राह्मणमंत्रोक्तं दिव्यं मेघांबुभास्करम् ८१ स्नानानां चैव सर्वेषां विशिष्टं तत्र वारुणं ब्राह्मणः क्षत्रियो वैश्यो मंत्रवत्स्नानमाचरेत् ८२ तूष्णीमेव हि शूद्रस्य स्त्रीणां चैव तथा स्मृतम् बालाच तरुणी वृद्धा नरनारीनपुंसकाः ८३ पापैः सर्वैः प्रमुच्यंते स्नानात्कार्तिकमाघयोः स्नाता वै कार्तिके लोकाः प्राप्नुवंतीप्सितं फलम् ८४ पुष्करे तीर्थवर्ये तु नंदायाः संगमे पुरा प्रभंजनश्च मुक्तोभूत्तद्दैवव्याघ्रजन्मतः ८५

कदा मुक्तिर्भविष्यतीति चिंतयन् एकदा नंदानाम कीं गां दृष्ट्वा खादितुमारेभे तदा नंदा अनेकविधसत्यप्रतिज्ञां कृत्वा वत्सं पाययित्वा पुनः व्याघ्रसमीपं आगत्य अनेकविधधर्मभाषणेनोपदेशं चकार तदा व्याघ्र उवाच हे नंदे अहं पूर्वं मृग्या शप्तः व्याघ्ररूपो जातः परं त्वद्वत्स संपर्कोपदेशेन जात स्मरणः पुनर्नृपत्वमापन्नः नाहं व्याघ्रः एतस्मिन्नंतरे धर्मस्तत्रागत्य नंदामुवाच हे नंदे त्वं नंदानाम सरस्वती नदी भविष्यसि किंच ऊर्जे पुष्करे मासमात्रं स्नानं कुरु ततो मुक्तिर्भविष्यति इत्युक्त्वांतर्हितः प्रभंजनोपि वसिष्ठोपदेशेन कार्तिकसेवनान्मुक्तिं प्रापेति ८५ ५ ५ ५

८६ इतिकार्तिकमाहात्म्यटीकायांचतुर्थोऽध्यायः ४ ९ अथकार्तिकव्रतिनामान्हिकंपरिपृच्छति नारदउवाच १ स्तोत्रैः
भा :स्मरणाख्यैः तथाचसनत्कुमारसंहितायां ब्रह्मामुरारिस्त्रिपुरांतकारी भानुःशशीभूमिसुतोबुधश्च गुरुश्चशुक्रः शनिराहुकेतवः कुर्वंतुसर्वेमम
प्रभातं पृथ्वीसगंधासरसास्तथापःस्पर्शीचवायुर्ज्वलितंचतेजः नभश्चशब्दंमहतासहैवकुर्वंतिस० भृगुर्वसिष्ठःक्रतुरंगिराश्चमनुःपुलस्त्यः
पुलहश्चगौतमः रैभ्योमरीचिश्च्यवनश्चदक्षः कुर्वंतु० सनत्कुमारःसनकःसनंदनःसनातनोप्यासुरिपिंगलौच सप्तस्वराःसप्तरसातलानिकु

नंदायायचनेनैवकार्तिकेसापरंययौ एवंस्नानविधिःप्रोक्तःकिंभूयःश्रोतुमिच्छसि ८६ इतिश्रीचतुःपुराणसा
रसंग्रहेकार्तिकमासमाहात्म्येकार्तिकस्नानविधिनिरूपणंनामचतुर्थोऽध्यायः ४ ९ नारदउवाच कदा
स्नानंप्रकर्तव्यंकथंस्थेयंदिनावधि आन्हिकंतत्समाचक्ष्वविशेषेणपितामह १ ब्रह्मोवाच रात्र्यांतुर्यांश
शेषायामुदतिष्ठेत्सदाव्रती विष्णुंस्तुत्वाबहुस्तोत्रैर्दिनकार्यंविचारयेत् २ ग्रामनैर्ऋत्यदिग्भागेमलोत्सर्गंयथावि
धि ब्रह्मसूत्रंदक्षकर्णेस्थाप्यतत्रउदङ्मुखः ३ अंतर्धायतृणंभूमौशिरःप्रावृत्यवाससा वक्त्रंनियम्यवस्त्रेणासं
गःसोदकभाजनः ४ कुर्यान्मूत्रपुरीषंतुरात्रौचेद्दक्षिणामुखः ततउत्थायचागच्छेत्समीपंकलशस्यहि ५ गंध
लेपक्षयकरंमृत्तिकाशौचमाचरेत् एकालिंगेकरेतिस्रउभयंमृद्द्वयंस्मृतम् ६ मूत्रशौचेत्विदंज्ञेयंविष्ठाशौचमतःशृ
णु पंचापानेथवासप्तदशवामकरेतथा ७ उभयोःसप्तदातव्याःपादयोर्मृत्तिकात्रयं एतच्छौचंगृहस्थस्यद्विगुणंब्र
ह्मचारिणः ८

र्वंतुसर्वे० सप्तार्णवाःसप्तकुलाचलाश्चसप्तर्षयोद्वीपवनानिसप्त भूरादिकृत्वाभुवनानिसप्त कुर्वंतुसर्वे०
इत्थंप्रभातेपरमंपवित्रंपठेत्स्मरेद्यःशृणुयाच्चतद्वत् दुःस्वप्ननाशस्त्विहसुप्रभातंभवेच्चनित्यंभगवत्प्रसादादिति २ दिग्नियमेविकल्पः
पाद्मे प्रागुदीचींव्रजेद्ग्रामाद्बहिरिति ३ असंगः एकाकी ४ ५ ६ ७ ८ ९

९ १० ११ १२ १३ १४ १५ १६ १७ इष्टदेवगृहं स्वोपास्यदेवतामंदिरं तथाचसनत्कुमारः गृहीत्वार्चनसामग्रीं ततोहरिगृहंव्रजेत् तदभावेशिवगृहेदेव्यावा भास्करस्यच अथवातुगणेशस्यस्थानेपिप्पलसन्निधौ गोष्ठेवाथन-

यानग्रस्थस्यत्रिगुणंयतीनांचचतुर्गुणम् एतच्छौचंदिवाप्रोक्तंरात्रावर्द्धंसमाचरेत् ९ मार्गस्थस्य
तदर्धंस्यात्स्त्रीशूद्राणांतदर्धकम् शौचकर्मविहीनस्यसमस्तानिष्फलाक्रियाः १० दंतजिह्वाविशुद्धिं
चततःकुर्यादंताद्वितः आयुर्बलंयशोवर्चःप्रजाःपशुवसूनिच ११ ब्रह्मप्रज्ञांचमेधांचत्वन्नोदेहिवनस्पते
दंतकाष्ठंतुगृह्णीयाद्द्वादशांगुलसंमितम् १२ क्षीरवृक्षस्यनग्राह्यंकार्पासस्यतथैवच कंटकस्य
चवृक्षस्यदग्धवृक्षस्यचैवहि १३ सद्यासनंमृदुतरंदंतधावनमादितः उपवासेनवम्यांचषष्ठ्यांश्राद्धदिनेरवौ
१४ ग्रहणेप्रतिपद्दर्शेनकुर्याद्दंतधावनम् कुर्याद्द्वादशगंडूषान्नुक्तेदंतधावने १५ दंतान्विशोध्य
विधिवत्मुखंसंमार्ज्यवारिणा ललाटेचोर्ध्वपुंड्रंतुधृत्वाचाचम्यवारिणा १६ देवालयेनदीतीरेराजमार्गे
विशेषतः दत्वाचाकाशदीपंतुतुलसीसन्निधावथ १७ गृहीत्वार्चनसामग्रीमिष्टदेवगृहंव्रजेत् ततोगायेन
नृत्येनपूजांकृत्वातुबुद्धिमान् १८ पठित्वाविष्णुनामानिकुर्य्यान्नीराजनंहरेः नाडिद्वयावशिष्टायांरात्र्यां
गच्छेज्जलाशयम् १९

दीतीरेगत्वापूजांसमाचरेदिति नृत्येन सविधिनृत्यंकुर्यादथवा तांडवेनापिनृत्यंतिकार्तिके विष्णुसन्निधौ यद्यानद्धापिगायंतियांतितेवैष्णवंपदमिति १८ १९ ५ ५ ५

उक्तविधिनापूर्वं चतुर्थाऽध्यायोक्तविधिना तिलकंयथोक्तंऊर्ध्वपुंड्रंकार्यं तद्विधिमाह ब्राह्मे ऊर्ध्वपुंड्रप्रमाणंचनरस्यांगुलिभेदनं तत्तत्स्थानेषुमंत्रांश्चकथयामिफलानिच पर्वताग्रेनदीतीरेविष्णुक्षेत्रेविशेषतः गोमत्यांद्वारकायांच मृत्स्नापुण्यप्रदामला सिंधुतीरेतुवल्मीकेतुलसीमूलमृत्तिका एतामृदःसदाग्राह्यावर्जनीयान्यमृत्तिका अंगुष्ठःपुष्टिदःप्रोक्तः तर्जन्यायुर्विवर्द्धिनी अनामिकाकामदाच मुक्तिदाचप्रदेशिनी एतैरंगुलिभेदैश्चकारयेन्ननखैःस्पृशेत् श्यामःशांतिकरःप्रोक्तः रक्तोवश्यकरस्तथा ऐश्वर्यंपीतमित्याहुर्वैष्णवंश्वेतमुच्यते वर्तिदीपाकृतिर्वापिवेणुपत्राकृतिस्तथा पद्मस्यमुकुलाकारंकुमुदस्ययथाभवेत् मत्स्यकूर्माकृतिर्वापिशंखाकारमतःपरम् नवांगुलंमध्यमाहुरष्टांगुलमतःपरम् षट्सप्तपंचभिर्वापि कुर्यादंगुलसंख्यया ललाटेकेशवंविंद्यान्नाभौनारायणंन्यसेत् माधवंहृदिविन्यस्यगोविंदंकंठकूपके उदरेदक्षिणेपार्श्वेविष्णुरित्यभिधीयते

तत्रोक्तविधिनास्नानंकुर्याद्वैकार्तिकव्रती वस्त्रनिष्पीडनंकृत्वाकुर्याच्चातिलकंतथा २० ततःसंध्यामुपासीतस्व
सूत्रोक्तेनवर्त्मना ततःकार्योजपोदेव्यायावदर्कोदयोभवेत् २१ एतत्प्रोक्तंरात्रिशेषकृत्यंदिनमथोच्यते यस्मिन्
कृतेकार्तिकोयंसकलःसफलोभवेत् २२ विष्णोःसहस्रनामाद्यंसंध्यांतेचपठेत्ततः देवालयेसमागत्यपुनः
पूजनमारभेत् २३ नृत्यगानादिकार्येषुप्रहरंदिवसंनयेत् ततःपुराणश्रवणंयामार्धंसम्यगाचरेत् २४

तत्पार्श्वेबाहुमध्येचसंस्मरेन्मधुसूदनं त्रिविक्रमंकर्णमूलेवामकुक्षौतुवामनं श्रीधरंबाहुकेवामेहृषीकेशंतुकंधरम् अधरेपद्मनाभंतुत्रिकेदामोदरंन्यसेत् द्वादशैतानिनामानिवासुदेवंचमूर्धनि दंडाकारंसुशोभंचमध्येसच्छिद्रमंदिरं अच्छिद्रमूर्ध्वपुंड्रंतुयेकुर्वंतिद्विजाधमाः बाह्वोर्दशांगुलंप्रोक्तंनवदेविन्यसेत् नाभ्यादौसप्तषट्कंवाभालेनासादिकेशवं नतद्धोमंनतद्दानंनतज्जाप्यंसुरार्चनं विनाचचोर्ध्वपुंड्रेणविप्रेणयदनुष्ठितं हृच्चक्रेदक्षिणेबाहौ शंखमेकंतथाधरे मध्येपद्मद्वयंधार्यंनारायणचतुष्टयं शंखद्वयंवामबाहौचक्रमेकंतथाधरे मध्येगदाद्वयंधार्यंनारायणचतुष्टयं गोपीचंदनपुंड्रंतुस्त्री·
र्मःसनातनः पुंड्रंविनातुयानारीभर्तुरायुःक्षयंभवेत् तस्मात्सर्वप्रयत्नेनकारयेदूर्ध्वपुंड्रकमिति २० देव्याःगायत्र्याः २१ २२ २३ संध्यांते·
प्रातःसंध्यांते २४

२५ अतिथिविषयेविशेषः वैश्वदेवस्यांतरेषुयत्रागच्छतिभिक्षुकः चांडालोवाथचोरोवाविष्णुरूपीनसंशयः सायंकालउषःकालेवैश्वदेवस्य
चांतरे अतिथिर्विमुखोयातिसतिदुःखस्यभाजनमिति २६ हविष्यभोजनं हविष्यान्नभोजनंकुर्यात् हविष्यान्नमाह सनत्कुमारसंहितायां हैमंति
कंसिताःस्विन्नंधान्यंमुद्गायनास्तिलाः कलापकंगुनीवारावास्तुकंहिलमोचिका षष्टिकाःकलशाकंचमूलकंकेमुकेतरत् कंदःसैंधवसामुद्रेगव्येच
दधिसर्पिषी पयोनुद्धृतसारंचपनसाम्रहरीतकी पिप्पलीजीरकंचैव नारिंगंचैवतिंतिणी कदलीलवलीधात्रीफलान्यगुडमैक्षवं अतैलपकंमुनयो
हविष्याणिप्रचक्षतइति आमिषान्नमाह तत्रैवसर्वथैवनभोक्तव्य मामिषान्नंतुकार्तिके दग्धमन्नंद्विपकंचमसूरान्नंसवल्कलम् उद्दालकाःपर्युषित-
मन्नमामिषमुच्यते वृंताकानिपटोलानितुंबिकाचकलिंगकम् बिंबीफलानित्रपुसंफलंशाकेषुचामिषं दोरकातुलसीचिल्लीछत्राकंपोत्तपत्रकं चक्रवर्ती-

पौराणिकस्यपूजांतुतुलसीपूजनंतथा कृत्वामाध्याह्निकंकर्मभुंजीतद्विदलोज्झितम् २५ बलिदानंवैश्वदेवमतिथी
नांसमर्पणम् कृत्वाभुंक्तेतुयोमर्त्यःकेवलंचामृतंहितत् २६ यथाशक्तिद्विजा भोज्याःप्रत्यहंवाथपर्वणि हविष्य
भोजनंकुर्यादामिषंपरिवर्जयेत् २७ भक्षयेत्तुलसींवक्त्रशुद्ध्यर्थंतीर्थवारिणा संसारव्यवहारेणदिनशेषंसमाप-
येत् २८ सायंकालेपुनर्गच्छेद्विष्णोर्देवालयंप्रति संध्यांकृत्वाप्रयुंजीततत्रदीपान्यथाबलम् २९ विष्णुंप्रणम्यगृह
स्येकृत्वानीराजनंशुभम् स्तोत्रपाठादिकंकुर्वन् आद्ययामेतुजागरम् ३०

राजगिरिःपत्रशाकेषुचामिषं गृंजरंरक्तमूलंचपलांडुंलशुनंतथा सर्वदैवामिषाणिस्युः कार्तिकेसूरणंत्यजेत् पाद्मे प्राण्यंगमामिषंचूर्णंफलेजंवीरमा
मिषं धान्येमसूरिकाःप्रोक्ताअन्नंपर्युषितंतथा अजागोमहिषीक्षीरादन्यदुग्धादिचामिषं द्विजक्रीतारसाःसर्वेलवणंभूमिजंतथा ताम्रस्थितपञ्चगव्य
जलंपल्वलसंस्थितं आत्मार्थंपाचितंचान्नमामिषंचोच्यतेबुधैरिति २७ मुखशुद्ध्येविशेषः दंतोच्छिष्टंशलाकाभिर्निर्हरेन्नैवपीडयेत् दंतवद्दंतसंलग्न
मुच्छिष्टंतुदंतवत् तन्निष्कासनतश्चेत्स्यात्कदाचिद्रुधिरागमः चांद्रायणत्रयंकुर्यात्तस्यसंशुद्धिहेतवे इति २८ २९ ३०

ऋतौर्ईयाद्गच्छेत् ३१ अनृतावपितया कामयमानः यदिभार्यांगच्छेत्तदादोषभाग्नभवति ३२ ३३ ३४ इतिकार्तिकमाहात्म्य-
टीकायांपंचमोऽध्यायः ५ छ अथकार्तिकव्रतिनांकर्तव्यव्रतदानधर्मानाह शृण्विति १ २ ३ अलांबुंभाषायांदुधैया वा

यामेतुप्रथमेतीतेनिद्रांकुर्याद्विचक्षणः ब्रह्मचर्यव्रतंकुर्याद्भार्यामीयादृतौतथा ३१ तयाकामयमानोवाभार्यांग-
च्छेन्नदोषभाक् एवंप्रतिदिनंकुर्यादामासंतुयथाविधि ३२ एवंतुकार्तिकेमासियःकुर्यात्परमंव्रतम् सर्वपापविनिर्मु
क्तोयातिविष्णोःसलोकताम् ३३ रोगापहंपातकनाशकृत्परंसद्बुद्धिदंपुत्रधनादिसाधकम् मुक्तेर्निदानंनहिकार्तिक-
व्रताद्विष्णुप्रियादन्यदिहास्तिभूतले ३४ इतिश्रीचतुःपुराणसारसंग्रहे कार्तिकमासमाहात्म्येनित्यकर्मकथ
ननामपंचमोऽध्यायः ५ छ ब्रह्मोवाच शृणुनारदवक्ष्यामिकार्तिकस्यव्रतंमहत् यच्छ्रुत्वासर्वपापे-
भ्योमुक्तोमोक्षमवाप्स्यसि १ कार्तिकेमासिसंप्राप्तेनिषिद्धानिचवर्जयेत् तैलाभ्यंगंपरान्नंचतथावैतैलभोजनम्
२ फलानिबहुबीजानिधान्यानिद्विदलान्यपि वर्जयेत्कार्तिकेमासिनात्रकार्याविचारणा ३ अलांबुंगृंजरंचैव
वृंताकंबृहतीफलं अन्नंपर्यूषितंवापिभिस्सटंचमसूरिकम् ४ पुनर्भोजनमाध्वंचपरान्नंकांस्यभोजनम् नखव
र्मचछत्राकंकांजिदुर्गंधमेवच ५ गणान्नंगणिकान्नंचतथावैग्रामयाजिनः शूद्रान्नंशूद्रसंपर्कंसूतकान्नंतथैवच
६ श्राद्धान्नंऋतुशात्याश्वजातकंनामकंतथा श्लेष्मातकफलंचैववर्जयेत्कार्तिकव्रती ७ निषिद्धेषुचपत्रेषुभोजनं
नैवकारयेत् मधुपालाशकदलीजंबूप्लक्षमकूरिका ८ छ छ छ

दुध्याभोपला इतिप्रसिद्धं बृहतीफलं डोरलीफलंभिस्सटं दग्धान्नं भिःसटादग्धिका इत्यमरः ४ माध्वं मधु कांस्यभोजनं कांस्यपा
त्रेभोजनं नखं नखलाख्यं गंधद्रव्यं चर्ममसूरिका ५ ६ श्लेष्मातकं भोकरेइतिप्रसिद्धम् ७ ८ छ

वनभोजनं उद्यानस्थितधात्रीछायायांभोजनम् ९ १० ११ १२ १३ १४ १५ १६ १७

एतत्पत्रेषुभोक्तव्यंपुष्करेनकदाचन कार्तिकेमासिसंप्राप्तेयःकुर्याद्वनभोजनम् ९ सयातिपरमंलोकंविष्णोर्देव
स्यचक्रिणः प्रातःस्नानंतुकर्तव्यंतथैवहरिपूजनम् १० कथायाःश्रवणंचैवकार्तिकेशस्यतेमुने गोपीचंदनदानंतु
गोदानंश्रोत्रियायच ११ कर्तव्यंकार्तिकेमासितेनमोक्षमवाप्नुयात् कदलीफलदानंतुदानंधात्रीफलस्यच १२
वस्त्रदानंतथाकुर्याच्छीतार्तायद्विजन्मने शाकादिदानंकुर्वीतचान्नदानंविशेषतः १३ शालग्रामस्यदानंचकर्तव्यं
तुद्विजन्मने पौराणिकाययोदद्यादामान्नंघृतपायसम् १४ सचैश्वर्यमवाप्नोतिशतब्राह्मणभोजनम् कमलैः
पूजयेद्यस्तुकार्तिकेकमलाप्रियं १५ सतुपुण्यमवाप्नोतिनात्रकार्याविचारणा कार्तिकेतुलसीपत्रंयोभक्त्याविष्ण
वेर्पयेत् १६ संसाराच्चविनिर्मुक्तोयातिविष्णोःपरंपदम् कार्तिकेकेतकीपुष्पैरर्चयेद्गरुडध्वजम् १७ पूजितोजन्म-
साहस्रंनात्रकार्याविचारणा शंखदानंतुयःकुर्यात्तथाचक्रांकितस्यच १८ तस्यपापानिनश्यंतिदानमात्रान्नसं
शयः गीतापाठंतुयःकुर्यात्कार्तिकेविष्णुवल्लभे १९ तस्यपुण्यफलंवक्तुंनालंवर्षशतैरपि श्रीमद्भागवतस्यापिश्र-
वणंयःसमाचरेत् २० सर्वपापविनिर्मुक्तोपरंनिर्वाणमृच्छति एकादश्यांनिराहारमुपवासंकरोतियः २१ पूर्व-
जन्मशतात्पापान्मुच्यतेनात्रसंशयः शालग्रामस्यनैवेद्यंकोटियज्ञफलंलभेत् २२ अन्यदेवस्यनैवेद्यंभुक्त्वाचान्द्रा-
यणंचरेत् पूजाकालेतुदेवस्यघंटानादंकरोतियः २३ हरेस्तृप्तिंपरांयातिमनुजोनात्रसंशयः परान्नंवर्जयेद्यस्तुका
र्तिकेविष्णुतुष्टये २४ दामोदरस्यप्रीतिंस सम्यक्प्राप्नोतिमानवः अध्वगंतुपरिश्रांतंकालेचगृहमागतम् २५

चक्रांकितस्य गोमतीचक्रस्य १८ १९ २० २१ २२ २३ २४ २५

२६ २७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६

योतिथिंपूजयेद्भक्त्याजन्मसाहस्रनाशनम् निंदांकुर्वंतियेमूढा वैष्णवानांमहात्मनां पतंतिपितृभिःसार्द्धंमहारौ-
रवसंज्ञके २६ दृष्ट्वाभागवतान्विप्रान्सन्मुखोनव्रयातिहि नगृण्हातिहरिस्तस्यपूजांद्वादशवार्षिकीं २७ निंदांभ-
गवतःशृण्वन्तत्परस्यजनस्यच ततोनापैतियःसोपिहरेःप्रियतमोनहि २८ प्रदक्षिणान्तुयःकुर्यात्कार्तिकेकेशवस्य
हि पदेपदेश्वमेधस्यफलंप्राप्नोत्यसंशयः २९ दंडप्रणामंयःकुर्यात्कार्तिकेकेशवाग्रतः राजसूयाश्वमेधानांफलंप्रा-
प्नोत्यसंशयः ३० कुटुंबभोजनंचैवकार्तिकेभक्तिसंयुतः कारयेद्विप्रशार्दूलतस्यपुण्यमनंतकम् ३१ परस्त्रीसंगमं
यस्तुकार्तिकेकुरुतेनरः तस्यपापस्यविश्रांतिर्यावद्वक्तुंनशक्यते ३२ तुलसीमृत्तिकापुंड्रंललाटेयस्यदृश्यते यमस्तं-
नेक्षितुशक्तः किमुदूताभयंकराः ३३ शाकंवालवणंवापियत्किंचिद्वाभविष्यति तद्देयंकार्तिकेमासिप्रीत्यर्थंशार्ङ्गध-
न्वनः ३४ इत्यादिबहवोधर्माःकार्तिकेविष्णुवल्लभाः यथाशक्त्याप्रकुर्वीतधर्मंदेवस्यतुष्टिदम् ३५ हरिसंतुष्टये-
कार्यस्त्यागोवास्वेष्टवस्तुनः मासांतेद्विजवर्याय दद्यात्तद्व्रतपूर्तये ३६ सर्वव्रतानिचैकत्रसत्यव्रतमथैकतः तस्मा
त्सर्वप्रयत्नेनसत्यंभाषेतसर्वदा ३७ अन्यधर्मेष्वधिकृतिः कुलजातिविभागतः अधिकारीकार्तिकेतुसर्वएवजनो
भवेत् ३८ गोग्रासःकार्तिकेमासिविशेषाद्येस्तुदीयते तेषांपुण्यफलंवक्तुंनशक्नोतिपितामहः ३९ विष्णुदेवाल-
यंप्रातःसंमार्जयतिकार्तिके तस्यवैकुंठभवनेजायतेसुदृढंगृहम् ४० दद्यात्कार्तिकमासेतुधर्मकाष्ठानिभूरिशः
नतत्पुण्यस्यनाशोस्तिकल्पकोटिशतैरपि ४१ सुधादिलेपयेद्यस्तुकार्तिकेविष्णुमंदिरे चित्रादिकंलिखेद्वापिमो
दतेविष्णुसन्निधौ ४२ देवालयेवातीर्थेवाकृतोदुष्टैर्नृपैःकरः तंमोचयंतियेलोकास्तेषांधर्मःसनातनः ४३

३७ ३८ ३९ ४० ४१ ४२ ४३ [illegible] [illegible]

२१

गभस्तीश्वरस्य काशीस्थो विज्ञेयः ४४ उपांगानि वत्सद्वादशी यमत्रयोदशी नरकचतुर्दशी दीपोत्सवी बलिप्रतिपद्यमद्वितीया कूष्मांडनवमी प्र-
बोधोत्सव तुलसी मंगलद्वादशी वैकुंठचतुर्दशी त्रिपुरीपौर्णिमा व्रतानि अंगानि स्नान दीपजागर व्रतपूजादानादीनि ४५ ४६ शृंगं जीवकनामकं
वनस्पतिविशेषं कूर्चशीर्षो मधुरकः शृंगं ह्रस्वांगजीवका इत्यमरः सौवीरकं बदरीफलं उन्मादिकं उन्मादप्रतिपादकं वस्तु ४७ ४८ ४९

कार्तिकेमासियोविप्रोगभस्तीश्वरसन्निधौ शतरुद्रीजपंकृत्वामंत्रसिद्धिःप्रजायते ४४ वाराणस्यांतुयैःस्थित्वात्रि
वर्षंकार्तिकव्रतम् सोपांगंसांगंयैर्मर्त्यैः कृतंभक्त्यैकतत्परैः ४५ इहलोकेफलंतेषांप्रत्यक्षंजायतेकिल संपत्त्या-
चैवसंतत्यायशोभिर्धर्मबुद्धिभिः ४६ पलांडुंशृंगमासंचशय्यासौवीरकंतथा राजिकोन्मादिकंचापिपटान्नंचविवर्ज
येत् ४७ धात्रीफलंभानुवारेपरदेशागमंतथा तीर्थंविनासदैवेहवर्जयेत्कार्तिकव्रती ४८ देववेदद्विजातीनांगुरु-
गोव्रतिनांतथा स्त्रीराजमहतांनिंदांवर्जयेत्कार्तिकव्रती ४९ नरकस्यचतुर्दश्यांतैलाभ्यंगंचकारयेत् अन्यत्रका-
र्तिकेमासितैलस्नानंविवर्जयेत् ५० नालिकांमूलकंचैवकूष्मांडंचकपित्थकम् रजस्वलांत्यजम्लेच्छपतितव्रतिकैस्त
था द्विजद्विड्वेदबाह्यैश्चनवदेत्सर्वदाव्रती ५१ एभिर्दृष्टंचकाकैश्चसूतिकान्नंचतद्भवेत् द्विपाचितंचदग्धान्नंनै
वाद्याद्वैष्णवव्रती ५२ क्रमात्कूष्मांडबृहतीतरुणीमूलकंतथा श्रीफलंचकलिंगंचफलंधात्रीभवंतथा ५३ नारि
केलमलाबुंचपटोलंबृहतीफलं चर्मवृंताकचवलीशाकंतुलसिजंतथा ५४ शाकान्येतानिवर्ज्यानिक्रमात्प्र-
तिपदादिषु एवमेवहिमाघेपिकुर्य्यात्त्रिनियमान्व्रती ५५ कार्तिकव्रतिनःपुण्यंयथोक्तव्रतकारिणः नसमर्थोभवे-
द्वक्तुंब्रह्मापीहचतुर्मुखः ५६ छ छ छ छ

५० नालिकां कमलनालिकासदृशादंडशाकं विवर्जयेदिति पूर्वेण संबंधः ५१ ५२ ५३ ५४ ५५ ५६

इतिकार्तिकमाहात्म्यटीकायांषष्ठोऽध्यायः ६ छ अथकार्तिकव्रतधर्मश्रवणेनात्युत्सुकोनारदः दीपमाहात्म्यंविज्ञातुंब्रह्माणमुवाच
भगवन्निति १ २ तेत्वत्तः ३ नष्टाःनष्टानि ४ ५ ६ ७ ८ ९ १० ११ १२

इतिचतुःपुराणसारसंग्रहे कार्तिकमाहात्म्ये कार्तिकव्रतनिरूपणन्नामषष्ठोऽध्यायः ६ छ नारदउवाच भ
गवन्कृतकृत्योस्मितवपादसमाश्रयात् श्रोतव्यंनेहभूयोमेविद्यतेदेवसत्तम १ तथापिभगवन्किंचित्प्रष्टव्यंमेत्हृदि
स्थितम् त्वद्वाक्यामृतपीतस्यनमेतृप्तिर्हिजायते २ दीपदानस्यमाहात्म्यंश्रोतुमिच्छामितेप्रभो येनचापिपुरादत्तस्त
द्दत्स्वचतुर्मुख ३ ब्रह्मोवाच प्रातःस्नात्वाशक्तिर्भूत्वादीपंदद्यात्प्रयत्नतः तेनपापानिनष्टांस्युस्तमांसीवभगोदये
४ आजन्माद्यत्कृतंपापंस्त्रियावापुरुषेणच तत्सर्वंनाशमायातिकार्तिकेदीपदानतः ५ अत्रतेवर्णयिष्यामिइतिहा
संपुरातनम् श्रवणात्सर्वपापघ्नंदीपदानफलप्रदम् ६ पुराद्रविडदेशेतुब्राह्मणोबुद्धनामकः तस्यभार्याभवद्दुष्टाअ
नाचाररतामुने ७ तस्याःसंसर्गदोषेणक्षीणायुर्मृतिमाप्तवान् पत्यौमृतेपिसापत्नीअनाचारेविशेषतः ८ रताभून्न
हितस्यास्तिलज्जालोकापवादतः कृतबंधुविहीनासासदाभिक्षान्नभोजना ९ नसंस्कारान्नमल्पंवाभुक्त्वापर्युषितना
शिनी परपाकरतानित्यंतीर्थयात्रादिवर्जिता १० कथायाःश्रवणंचैवनश्रुतंतुतयाद्विज एकदाब्राह्मणःकश्चित्तीर्थ
यात्रापरायणः ११ तस्यागृहंसमागच्छद्विद्वान्वैकुत्सनामकः अनाचाररतांतांतुदृष्ट्वाब्रह्मर्षिसत्तमः १२ कोपेनरक्त
चक्षुःसन्नुवाचासतींस्त्रियम् कुत्सउवाच वक्ष्यामिसांप्रतंमूढेमद्वाक्यमवधारय १३ दुःखहेतुमिमंदेहंपूय
शोणितपूरितम् पंचभूतात्मकंचैवकिंचपुष्णासिदूतिके १४ जलबुद्बुदवद्देहोनाशमायातिनिश्चितम् अनित्यंदेह
माश्रित्यत्वंनित्यंमन्यसेत्हृदि १५

१३ १४ १५ छ छ

१६ १७ १८ १९ २० २१ २२ हेविधवे द्यूते द्यूतकर्मणि २३ २४

तस्मादंतस्थितंमोहंत्यजमूढविचारतः स्मरसर्वोत्तमंदेवंकुरुश्रवणमादरात् १६ कार्त्तिकेमासिसंप्राप्तेस्नानदाना·
दिकंकुरु दामोदरस्यप्रीत्यर्थंदीपदानंतथाकुरु १७ लक्षवर्त्यादिकंचैवलक्षपद्यादिकंतथा प्रदक्षिणांतुदेवस्यनमस्का
रंतथैवच १८ धारणंपारणंचैवकुरुभक्त्याहिकार्त्तिके विधवानांव्रतमिदंसधवानांतथैवच १९ सर्वपापप्रशमनंसर्वो
पद्रवनाशनम् तत्रापिकार्त्तिकेमासिदीयतांदीपमुत्तमम् २० दीपंहरेःप्रियकरंकार्त्तिकेमासिनिश्चयम् महापातक
कृद्वापिदीपदानात्प्रमुच्यते २१ पुराकश्चिद्द्विजवरोनाम्नाहारिकरोह्यभूत् अधर्मविषयासक्तःशश्वद्वेश्यारतोद्विजः
२२ पितृवित्तक्षयकरःवंशच्छेदकुठारकः कदाचित्तेनविधवेद्यूतेपितृधनंमहत् २३ हारितंद्विजशार्दूलततोदुःखीस
चाभवत् कदाचित्साधुसंसर्गात्तीर्थयात्राप्रसंगतः २४ अयोध्यामागतोवत्सेमहापापकरोद्विजः कार्त्तिकेमासिसं
प्राप्तेश्रीमद्द्विजगृहेसदा २५ द्यूतव्याजेनतेनात्रदीपोदत्तोहरेःपुरः ततःकालांतरेविप्रोमृतोमोक्षमवाप्तवान् २६ म·
हापातककृद्वापिगतवानभयंहरेः तत्स्मात्त्वंकार्त्तिकेमासिदीपदानंतथाकुरु २७ तथान्यान्यपिदानानिकुरुभक्तिसम·
न्विता इत्यादिश्याथतांकुत्सोजगामान्यंगृहंद्विजः २८ सापिकुत्सवचःश्रुत्वापश्चात्तापेनसंयुता व्रतंतुकार्त्तिकेमासि
करिष्यामीतिनिश्चिता २९ पतंगोदयवेलायांकार्त्तिकेस्नानमंभसि दीपदानंकृतंचैवमासमेकंचकारसा ३० ततः
कालांतरेचैवगतायुर्मृतिमागता दीपदानस्यमाहात्म्यंमहापापकृतापिसा ३१ स्वर्गमार्गगतासास्त्रीकालेमोक्षम·
चापह तस्मान्नारदमाहात्म्यंदीपदानस्यकोवदेत् ३२ कार्त्तिकेदीपदानंतुमहापुण्यफलप्रदं कार्त्तिकव्रतनिष्ठोर्यादी
पदानादिकृन्नरः ३२

२५ २६ २७ २८ २९ पतंगःसूर्यः ३० ३१ ३२

३३ ३४ एवंस्वदीपदान माहात्म्य मुक्त्वा परदीपप्रबोध माहात्म्यंप्रस्तौति ३५ ३६ ३७ ३८ अत्रप्रसिद्धाकथाम।
ह सारोद्धारे पुराइंदुमतीनामवेश्या पुरस्थानांसदाप्रियाचासीत् एकदासालंकृतासा गृहद्वारमासाद्य रात्रौप्रहरपर्यंतं स्थितात्यभूत् तत्रै
क॰। जारोनागतः तदासाचिंताव्याकुलमानसासती गृहमध्येचागत्य देवस्यदीपंदत्वा सुष्वाप एतस्मिन्नंतरेतैलपानार्थंचैका मूषि-

कार्तिकेदीपदानंतुमहापुण्यफलप्रदं कार्तिकव्रतनिष्ठोयःदीपदानादिकृन्नरः ३३ दीपदानस्येतिहासंशृण्वन्तेमोक्षमाप्नुयात् परदीपप्रबोधस्यमाहात्म्यंशृणुनारद ३४ स्वस्यापिशक्तिराहित्येपरस्यापिप्रबोधनम् यःकुर्याल्लभतेसोपिनात्रकार्याविचारणा ३५ दीपार्थवर्तिकांतैलपात्रंवायोददातिहि सहायंवाथकुरुतेददतांदीपमुत्तमं ३६ स्वतमोक्षमवाप्नोतिनात्रकार्याविचारणा कार्तिकेदीपदानस्यमहिमाकोनुवर्णयेत् ३७ स्वस्यापिशक्तिराहित्ये परदीपंप्रबोधयेत् सोपितत्फलमाप्नोतिनात्रकार्याविचारणा ३८ वेश्याचेंदुमतीनामतस्यागेहेथमूषिका परदीपप्रबोधेनमोक्षंपापस्कदुर्लभम् ३९ तस्मात्सर्वप्रयत्नेनपरदीपंप्रबोधयेत् तेनमोक्षमवाप्नोतिमूषिकावन्नसंशयः ४० परदीपप्रबोधस्यफलमीदृग्विधंमुने साक्षाद्दीपप्रदानस्यमाहात्म्यंकोनुवर्ण्यते ४१ नारदउवाच कार्तिकेदीपदानस्यमाहात्म्यंचमयाश्रुतम् परदीपप्रबोधस्यमाहात्म्यमपिवैश्रुतं ४२ इदानींश्रोतुमिच्छामि व्योमदीपस्यवैभवम् ब्रह्मोवाच आकाशदीपमाहात्म्यंशृणुपुत्रसमाहितः ४३ यस्यश्रवणमात्रेणदीपदाने मतिर्भवेत् संप्राप्तेकार्तिकेमासि प्रातःस्नानपरायणः ४४

का तत्रागत्यतैलंपीत्वा पश्चात्प्राजाता तदा-
दैवयोगात् तैलपानप्रसंगेन दीपस्य प्रबोधनंजातं देवस्यप्रदक्षिणापिकृतातेनपुण्यप्रभावेन मूषिकादेहंविसृज्य मनुष्यजन्मप्राप्य
पुत्रपौत्रादिसुखंभुक्त्वा चांतेमोक्षंप्रापेति ३९ ४० ४१ ४२ व्योमदीपस्य आकाशदीपस्य ४३ ४४

४५ ४६ ४७ ४८ ४९ ५० ५१ ५२ ५३ लुब्धकः इतिशे-

आकाशदीपंयोदद्यात्तस्यपुण्यंवदाम्यहम् सर्वलोकाधिपोभूत्वासर्वसंपत्समन्वितः ४५ इहलोकेसुखंभुक्त्वा
चांतेमोक्षमवाप्नुयात् स्नानदानक्रियापूर्वंहरिमंदिरमस्तके ४६ आकाशदीपोदातव्यःमासमेकंतुकार्तिके
कार्तिकेशुक्लपौर्णम्यांविधिनोत्सर्जयेद्व्रतम् ४७ यःकरोतिविधानेनकार्तिकेव्योम्निदीपकम् नतस्यपुनरावृत्तिः
कल्पकोटिशतैरपि ४८ अत्रतेवर्णयिष्यामिइतिहासंपुरातनम् यस्यश्रवणमात्रेणव्योमदीपफलंलभेत् ४९
पुरातुनिष्ठुरोनामलुब्धकोलोककंटकः यमुनातीरवासीचकालमृत्युरिवापरः ५० वनेचरन्मृगान्सर्वान्हृ-
त्वावृत्तिमकल्पयत् पथिकान्बाधतेनित्यंचोरवृत्त्याधनुर्धरः ५१ कश्चिद्ग्रामंजगामाशुचौर्यार्थंकार्तिकेमुने तस्मि
न्विदर्भनगरेराजासुकृतिनामकः ५२ चंद्रशर्माख्यविप्रस्यवचनात्कार्तिकेसुधीः चकारव्योमदीपंतुहरिमंदिर
मस्तके ५३ दीपंदत्वामहाभक्त्याअशृणोच्चकथांनिशि एतस्मिन्नेवकालेतुचौर्यार्थंसमुपागतः ५४ राज्ञादत्तं
व्योमदीपंपश्यन्क्षणमतिष्ठत तदानींदैवयोगेनगृध्रोजवसमन्वितः ५५ शीघ्रमागत्यजग्राहतैलपात्रंसदीप
कम् स्वमुखेनैवसंगृह्यवृक्षाग्रंचसमाश्रयत् ५६ तत्रपीत्वातुतैलंचदीपंस्थाप्यसपक्षिराट् वृक्षाग्रंतुसमास्था
यक्षणमात्रमतिष्ठत ५७ तदानींदैवयोगेनगृहीतुंपक्षिसत्तमम् मार्जारोप्यारुहद्वृक्षंपक्षिणाधिष्ठितंतुय
त् ५८ तदग्रेसुखदीपंचपश्यन्क्षणमतिष्ठत आकाशदीपमाहात्म्यंकथितंचंद्रशर्मणा ५९ राज्ञेसुकृति
नाम्नेचतौवैशुश्रुवतुःक्षणम् खगमार्जारकौतत्रस्वस्वचांचल्यदोषतः ६०

षः ५४ जवोवेगः ५५ ५६ ५७ ५८ ५९ ६० ६१

६१ ६२ ६३ ६४ ६५ ६६ ६७ ६८ ६९ ७०

मार्जारोजगृहेतत्रशाखांतरगतंखगं दैवेनचोदितौवृक्षाच्छिलायांपतितौतदा ६१ भग्नगात्रौमृतौतत्रपक्षिमा
र्जारकौभुवि दिव्यदेहसमायुक्तौयानारूढौदिवंगतौ ६२ ततस्सर्वंलुब्धकोदृष्ट्वाचौर्यार्थंसमुपागतः निवृत्तोदुष्टभा
वेनकथांकथयतंमुनिम् ६३ चंद्रशर्माणमाभाष्यइदंवचनमब्रवीत् चंद्रशर्मन्मयादृष्टंचौर्यार्थंह्यागतेनच ६४ राज्ञा
स्कृतिनादत्तंव्यामदीपमनोहरम् तदानींदैवयोगेनखगःपात्रंप्रगृह्यच ६५ तैलंपीत्वातुतत्पात्रंसदीपंतुमनो·
हरम् वृक्षाग्रेस्थापयित्वाचतत्रक्षणमतिष्ठत ६६ मार्जारोप्यागतस्तत्रगृहीतुंपक्षिपुंगवम् दैवेनप्रेरितौतौचड
भेशाखेसमाश्रिते ६७ त्वन्मुखात्कथ्यमानांतुकथांशुश्रुवतुःक्षणम् पश्चाच्चांचल्यदोषेणमार्जारोत्यगृहीतखगम्
६८ तौवृक्षात्पतितौमृत्युंप्रापितौक्षणमात्रतः उभौतौदिव्यरूपौचयानारूढौदिवंगतौ ६९ तदाश्चर्यमहदृष्ट्वात्वा
प्रष्टुंसमुपागतः तौकौपुराचमार्जारखगौतद्वदभोद्विज ७० तिर्यग्योनिसमापन्नौमुक्तौकेनचकर्मणा इतिलुब्धवचः
श्रुत्वाचंद्रशर्माब्रवीत्तदा ७१ शृणुलुब्धप्रवक्ष्यामितयोर्वृत्तांतमंजसा मार्जारोपिपुरापापीतथाश्रीवत्सगोत्रजः ७२
देवशर्माइतिप्रोक्तोदेवद्रव्यापहारकः अहोबलनृसिंहस्यपूजाकर्तृत्वमापसः ७३ तस्मिन्देवालयेप्राप्तंतैलंद्र-
व्यादिकंतथा अपहृत्यचतेनैवकुटुंबंपोषयत्यसौ ७४ आयुर्नीत्वैवमेवासौततःपंचत्वमागतः तस्मात्पापात्कालसू
त्रंमहारौरवरौरवम् ७५ निरुच्छ्वासंतथाप्राप्यअसिपत्रवनंक्रमात् छिद्यमानोमहाकायैर्यमदूतैर्भयंकरैः ७६
अनुभूयचतान्सर्वान्ब्रह्मराक्षसतांगतः ततस्तुश्वानयोनौचचांडालोभूत्कुकर्मकः ७७ एवंजन्मशतंप्राप्यभूयोमा
र्जारतांगतः आकाशदीपमाहात्म्यंश्रुत्वेदानींतुदैवतः ७८

लुब्धवचः लुब्धकवचः ७१ ७२ ७३ ७४ ७५ ७६ ७७
७८

७९ ८० ८१ ८२ ८३ ८४ ८५ स्कनंदःस्ककृतिनामकः ८६ ८७

निर्मुक्ताखिलपापस्तत्र गमद्धरिमंदिरम् गृध्रोयंतुपुराविप्रःमिथिलेवेदपारगः ७९ शर्यातिरितिविख्यातोनाम्ना·
लोकेमहाप्रभुः दासीसंगंचकारासौवेश्यासंगंतथैवच ८० तेनदोषेणमहतापंचत्वमगमत्तदा कुंभीपाकेमहाघोरे
स्थित्वायुगचतुष्टयम् ८१ कर्मशेषेणभूमौचगृध्रत्वमगमत्तदा दैवेनचोदितोगृध्रोतैलपानार्थमागतः ८२ दत्त्वा
काशदीपंचश्रुत्वाचैवहरेःकथां विध्वस्ताखिलपापस्तुजगामहरिमंदिरम् ८३ इत्येतत्सर्वमाख्यातंलुब्धगच्छयथा·
सुखम् व्याधोप्यस्यवचःश्रुत्वागत्वाचैवस्वमंदिरम् ८४ व्रतंचाकाशदीपस्यचकारविधिवन्मुने आयुःशेषंतदानीत्वा
जगामहरिमंदिरम् ८५ स्कनंदोपिमहाराजाऐश्वर्यसमुपागतः चकारविधिनामासंचंद्रशर्मोक्तमार्गतः ८६ प्रा·
तःस्नात्वाशुचिर्भूत्वाकार्तिकेमासिवैनृपः कोमलैस्तुलसीपत्रैःसमभ्यर्च्यजनार्दनम् ८७ रात्रौदद्याद्व्योमदीपं
मंत्रेनानेनवैनृप दामोदरायविघ्नायविश्वरूपधरायच ८८ नमस्कृत्वाप्रदास्यामिव्योमदीपंहरिप्रियम् निर्विघ्नं
कुरुदेवेशयावन्मासंसमाप्यते ८९ व्रतेनानेनदेवेशत्वयिभक्तिःप्रवर्द्धतु इतिमंत्रेणराजासौदीपदानंचकारह ९०
ब्राह्मेमुहूर्तेचपुन र्व्योमदीपंददानिहि विष्णोःपूजाकृताप्रातःप्रातःस्नानंचकारह ९१ उत्सर्गस्यविधिंकृत्वाव्यो
म्निदीपंसमाप्यच ब्राह्मणान्भोजयित्वाचव्रतंविष्णोःसमर्पयत् ९२ तेनपुण्यप्रभावेनसराजामुनिसत्तम शर
दांशनसाहस्रमिहभोगान्मनोहरान् ९३ सपुत्रपौत्रस्वजनैर्बुभुजेसहभार्यया ततश्चांतेद्विजवरविमानंसुमनोहरम् ९४
स्त्रीभिःसहसमारुह्यमोक्षमार्गगतोमुने चतुर्भुजःपीतवासाःशंखचक्रगदाधरः ९५

८८ ८९ ९० ९१ उत्सर्गस्य रषोत्सर्गस्य ९२ ९३ द्विजवर नारद ९४ ९५

९६ मनुजैरितिशेषः ९७ ९८ अथाकाशदीपस्यवैभवं वक्तुं पुनरितिहासांतरमाह अथेति ९९ १०० १०१ २ ३ अभ्रादिकरंडेषु अभ्रक कागद कांचाना मन्यतमनिर्मितेषु कुरंडेषु लोकेकंदिलइतिख्यातेषु ४ ५ यापौर्णिमातः लोलया लक्ष्म्या १०६ अन्य दितिशेषः १०७ अत्र प्रसिद्धाकथासनत्कुमारसंहितायां पुराविंध्याद्रौ हेलिकोनाम द्विजवर्यः आसीत् तस्यचित्रभानुमनोजवाख्यौ द्वौपुत्रौ ध-

विष्णुलोकेविष्णुरिवप्रोच्यमानःसदामरैः क्रीडयामासराजासौयथाकामंमहामनाः ९६ तस्मात्तुकार्तिकेमासि मानुष्यंप्राप्यदुर्लभम् आकाशदीपोदातव्योविधानेनहरेःप्रियः ९७ दास्यंतियेकार्तिकमासिमर्त्याःव्योमप्रदीपंह रितुष्टयेत्र पश्यंतितेनैवकदापिदेवंयमंमहाक्रूरमुखंमुनींद्र ९८ अथान्यच्चप्रवक्ष्यामिव्योमदीपस्यवैभवं वाल-खिल्यैःपुराप्रोक्तंतच्छृणुष्वद्विजोत्तम ९९ वालखिल्याऊचुः कृष्णादिमासक्रमतःकार्तिकस्यादिमासतः आकाशदीपदानंतुकुर्वंतुऋषिसत्तमाः १०० तुलायांतिलतैलेनसायंसंध्यासमागमे आकाशदीपंयोदद्यान्मासमेकं निरंतरम् १ सश्रीकायश्रीपतयेश्रियानसवियुज्यते आकाशदीपवंशस्तुविंशद्धस्तोत्तमोभवेत् १०२ मध्यमोन वहस्तःस्यात्कनिष्ठःपंचहस्तकः यथादूरस्थितैर्लोकैर्दृश्यतेतत्तथाचरेत् ३ तथाभ्रादिकरंडेषुदीपदानंविशिष्यते वंशस्यनवमांशेनलंबाकार्यापताकिका ४ मयूरपिच्छमुष्टिंवाकलशंचोपरिन्यसेत् विष्णुप्रीतिकरोदीपःपित्रुद्धारस्य-कारकः ५ एकादश्यास्तुलार्काद्वादीपदानमतोपिवा दामोदरायनभसितुलायांलोलयासह ६ प्रदीपंतेप्रयच्छामि नमोनंतायवेधसे आकाशदीपसद्दशांपितुरुद्धारकंनहि ७ हेलिकस्यचद्वौपुत्रौतत्रैकस्तुपिशाचकः

र्मपरायणावपिदैवेनद्यूतवेश्यारतौ अभूतांतेन व्यसनेन पितृद्रव्ये व्ययी भूते चौर्यंचक्रतुः तत्रापिलोकैर्ज्ञातौ तदातं देशांत्यक्त्वाघोरंवनंययतुःत स्मिन्वने एका भिल्लकन्या ननानी नामकी तौतरुणौ द्विजपुत्रौ दृष्ट्वा स्वगृहेस्थापितवती पितृ द्रव्यंच समर्पितवती साननानी पितृनिमित्तं-

२५

दीपदानंचक्रे एकदातयास्वपितुः श्राद्धेपरमान्नेनद्वौ भ्रातरौ भोजितौ तत्रमनोजवः अतिभोजन दोषेण मृत्युंप्राप्य तामिस्त्रनरके निक्षिप्तोपि ननान्याः दीपदान साहाय्यकरण पुण्ययोगान्निर्गतः सन् पिशाचयोनिं प्राप्तः सपिशाचः तत्रैव निवसन् ननानीदेहमाससाद तदाननानीवस्त्रालंकारान्त्यक्त्वा नग्नाबभ्राम तदा चित्रभानुः तांगृहीत्वाकाश्यांगत्वा आकाशदीपदानपुण्येनांऽमनोजवाख्यं भ्रातरं पिशाचयोनितः मुक्तमकरोत् तदासः ननान्याः पुत्रोऽभूत् ततस्त्रयः स्वस्वेन काशीवासंकृत्वा मोक्षमवापुरिति १०८ १०९ ११० ११ १२ कूटागारे धान्य

व्योमदीपपुण्यदानान्मोक्षंप्रापसुदुर्लभम् ८ नमःपितृभ्यः प्रेतेभ्योनमोधर्मायविष्णवे नमोयमायरुद्रायकांतारपतयेनमः ९ मंत्रेणानेनयेमर्त्याः पितृभ्यःस्वेतुदीपकं प्रयच्छंतिगतायेस्युर्नरकेयांतितेपिवै ११० उत्तमांगतिंगच्छंतिदीपदानंमयेरितम् लक्ष्मीसंततिसिद्ध्यर्थमारोग्यायप्रदीपयेत् ११ कार्त्तिकेकृष्णपक्षेतुद्वादश्यादिषुपंचसु तिथीषूक्तःपूर्वरात्रेनृणांनीराजनोविधिः १२ ब्रह्मविष्णुशिवादीनांभवनेषुविशेषतः कूटागारेषुचैत्येषुसभासुचनदीषुच १३ प्राकारोद्यानवापीषुप्रतोलीनिष्कुटेषुच मंदुरासुविविक्तासुहस्तिशालासुचैवहि १४ प्रदोषसमयेदीपान्दद्याद्देवंमनोहरान् कृतंयैःकार्त्तिकेमासिदीपदानंविधानतः ११५ दृश्यंतेयेरत्नभाजस्तेतएवप्रकीर्त्तिताः दीपदानासमर्थश्चेत्परदीपंनुरक्षयेत् १६ योवेदाभ्यासिनेदद्याद्दीपार्थंतैलमादरात् कोवातस्यफलंवक्तुंभुविनिश्चलिमानवः १७ दीपान्दद्याद्बहुविधान्कार्त्तिकेविष्णुसन्निधौ कार्त्तिकेमासिसंप्राप्तेगगनेस्वच्छतारके ११८

राशिगृहे स्यान्निकायः पुंजराशीतूत्करः कूटमस्त्रियामित्यमरः अथवा मायानिश्चलयंत्रेषु केतवानृतराशिषु आयोधने शैलशृंगे शीरांगे कूटमस्त्रियामित्यमरः चैत्येषु यज्ञायतनेषु १३ प्रतोलीग्रामाभ्यंतरमार्गः निष्कुटेषु गृहा गृहारामास्तु निष्कुटा इत्यमरः मंदुरासु अश्वशालासु १४ १५ १६ १७ बहुविधान्घृततैलादिनाकृतान् ११८

१९ २० २१ दीपमितिशेषः २२ २३ पंचनदे पंचनदक्षेत्रे काशीस्थे दक्षिणदेशे कावेरीतटस्थितकुंभकोणनिकटस्थे
वा २४ १२५ २६ पांचालदेशेसिंहविक्रमराज्ञः नगरे हरिकरो नामद्विजः २७ अयोध्यायांकार्तिके हरेर्मंदिरे द्यूतप्रसंगेन

रात्रौलक्ष्मीः समायातिद्रष्टुंभुवनकौतुकम् यत्रयत्रचदीपान्सापश्यत्याब्धिसमुद्भवा १९ तत्रतत्ररतिंकुर्यान्नांधकारेकदाचन तस्माद्दीपःस्थापनीयःकार्तिकेमासिवैसदा १२० लक्ष्मीरूपार्थिनांप्रोक्तंदीपदानंविशेषतः देवालयेनदीतीरेराजमार्गेविशेषतः २१ निद्रास्थलेदीपदानात्तस्याश्रीःसर्वतोमुखी दुर्बलस्यालयंवीक्ष्यदीपशून्यतुयोददेत् २२ विप्रस्यवान्यवर्णस्यविष्णुलोकेमहीयते कीटकंटकसंकीर्णेदुर्गमेविषमस्थले २३ कुर्याद्योदीपदानानिनरकंसनगच्छति दद्याद्रात्रौपंचनदेदीपंयोविधिपूर्वकम् २४ तस्यवंशेप्रजायंतेबालकाःकुलदीपकाः पितृपक्षेन्नदानेनज्येष्ठाषाढेचवारिणा १२५ कार्तिकेतत्फलंतेषांपरदीपप्रबोधनात् बोधनात्परदीपस्य वैष्णवानांचसेवनात् २६ कार्तिकेफलमाप्नोतिराजसूयाश्वमेधयोः पुराहरिकरोनामद्विजःपापरतःसदा २७ कृतंद्यूतप्रसंगेनदीपदानंहिकार्तिके तेनपुण्यप्रभावेनस्वर्गंप्रापद्विजोत्तमः २८ आकाशदीपदानेनपुरावैधर्मनंदनः विमानंवरमारुह्यविष्णुलोकंययौनृपः २९ यःकुर्यात्कार्तिकेविष्णोःपुरःकर्पूरदीपकम् प्रबोधिन्यांविशेषेणतस्यपुण्यंवदाम्यहम् १३० कुलेतस्यप्रसूतायेपुरुषास्तेहरिप्रियाः क्रीडित्वासुचिरंकालमंतेमुक्तिंव्रजंतिच ३१ दीपकोज्वलतेयस्यदिवारात्रौहरेर्गृहे एकादश्यांविशेषेणसयातिहरिमंदिरम् ३२ लुब्धकोपिचतुर्दश्यांदीपंदत्वाशिवालये भक्त्याविनापरेलिंगेशिवलोकंजगामसः ३३

दीपः कृतः २८ विदर्भदेशेधर्मनंदनोनृपः १२९ १३० ३१ ३२ १३३

१३४ इतिकार्तिकमाहात्म्यटीकायांसप्तमोऽध्यायः ७ छ अथतुलसीमाहात्म्यं नारदउवाच १ २ ३ ४ ५

गोपः कश्चिदमावास्यांदीपंप्रज्वाल्यशार्ङ्गिणः मुहुर्जयजयेत्युक्त्वासचराजेश्वरोभवत् १३४ इतिश्रीचतुःपुराण
सारसंग्रहेकार्तिकमासमाहात्म्येदीपदानमाहात्म्यवर्णनंनामसप्तमोऽध्यायः ७ छ नारदउवाच
भूयःकथयतृप्तिर्हिनास्तिमेकमलासन त्वद्वागमृतपानेनतृषाभूयःप्रवर्तते १ ब्रह्मोवाच प्रातःस्नात्वाशुचि
र्भूत्वाकार्तिकेविष्णुतत्परः देवंदामोदरंपूज्यकोमलैस्तुलसीदलैः २ सतुमोक्षमवाप्नोतिनात्रकार्याविचारणा
भक्त्याविरहितोयस्तुस्वर्णादिभिरर्चयेत् ३ तस्यपूजांनगृण्हातिनात्रकार्याविचारणा सर्वेषामपिवर्णानांभ-
क्तिरेषापरास्मृता ४ भक्त्याविरहितंकर्मनविष्णोःप्रियकारणम् भक्त्यासंपूजितोनित्यंतुलस्यास्तुदलार्धतः ५
स्वयंप्रत्यक्षमायातिभगवान्हरिरीश्वरः विष्णुदासःपुराभक्त्यातुलसीपूजनेनच विष्णुलोकंगतःशीघ्रंचोलोगो-
णत्वमागतः ६ तुलस्याःशृणुमाहात्म्यंपापघ्नंपुण्यवर्द्धनम् यत्पुराविष्णुनाप्रोक्तंरमायैतद्वदाम्यहम् ७ संप्रा
प्तेकार्तिकेमासितुलस्याःपूजनंहरेः येकुर्वंतिनराभक्त्यातेयांतिपरमंपदम् ८ तस्मात्सर्वप्रयत्नेनतुलस्याःकोम
लैर्दलैः पूजनीयोमहाभक्त्यासर्वक्लेशविनाशनः ९ रोपितातुलसीयावत्कुरुतेमूलविस्तरम् तावद्युगसह
स्राणिब्रह्मलोकेमहीयते १० तुलसीपत्रसंयुक्तजलेस्नानंचरेद्यदि सर्वपापविनिर्मुक्तोमोदतेविष्णुमंदिरे ११
वृंदावनंचकुरुतेरोपणार्थंमहामुने तावत्तेवविमुक्ताघोब्रह्मभूयायकल्पते १२ तुलसीकाननंब्रह्मन्गृहेयस्याव
तिष्ठति तद्गृहंतीर्थभूतंतुनयांतियमकिंकराः १३

विष्णुदासः ब्राह्मणः चोलनृपः इयंकथासवि-
स्तरतोग्रेवक्ष्यते ६ ७ ८ ९ १० ११ १२ १३

१४ १५ १६ १७ १८ १९ २० २१ २२

सर्वपापहरंपुण्यंकामदंतुलसीवनम् रोपयतिनराःश्रेष्ठाःस्तेनपश्यंतिभास्करीम् १४ तुलसीकाष्ठसंयुक्तंगंधंयोधारयेन्नरः तद्देहंनस्पृशेत्पापंक्रियमाणंतथैवच १५ तुलसीविपिनच्छायायत्रचैवभवेद्द्विज तत्रश्राद्धंप्रकर्तव्यंपितॄणांतृप्तिहेतवे १६ यन्मुखेतुलसीपत्रंकर्णेशिरसिदृश्यते यमस्तंनेक्षितुंशक्तोकिमुदूताभयंकराः १७ तुलस्यामहिमायस्तुशृणुयान्नित्यमादृतः सर्वपापविमुक्तात्माब्रह्मलोकंसगच्छति १८ अत्रैवोदाहरंतीममितिहासंपुरातनम् तुलस्याविषयेब्रह्मन् श्रवणात्पापनाशनं १९ पुराकाश्मीरदेशेतुब्राह्मणौसंबभूवतुः हरिमेधाःसुमेधाख्यौविष्णुभक्तिपरायणौ २० सर्वभूतदयायुक्तौसर्वतत्वार्थवेदिनौ कदाचित्तौद्विजवरौतीर्थयात्रापरायणौ २१ गच्छंतावेकतोविप्रौकांतारेश्रमविव्हलौ तुलसीकाननंतत्रददर्शतुररिंदमौ २२ तयोःसुमेधास्तंदृष्ट्वातुलसीकाननंमहत् प्रदक्षिणीकृत्यतदाववंदेभक्तिसंयुतः २३ दृष्ट्वैतद्धरिमेधास्तुउवाचपरयामुदा ज्ञात्वातुलस्यामाहात्म्यतत्फलंचपुनःपुनः २४ हरिमेधाउवाच किमर्थंविप्रदेवेषुतीर्थेषुचव्रतेषुच स्थितेषुविप्रमुख्येषुप्रणामंकृतवानसि २५ सुमेधाउवाच शृणुविप्रमहाभागसाधुवाक्यमुदीरितम् आतपोबाधतेआवांगत्वास्मिन्वटसन्निधौ २६ तस्यच्छायांसमाश्रित्यतेवक्ष्यामियथार्थतः एवमुक्तःसुमेधास्तुहरिमेधेनसंयुतः २७ वटंजगामधर्मज्ञोमहत्कोटरसंयुतम् तत्रविश्राम्यसोविप्रःहरिमेधमुवाचह २८ श्रूयतांविप्रशार्दूलतुलस्यास्तूत्तमांकथाम् परमेशप्रसादेनसंजातायापयोनिधौ २९ पुरादुर्वाससःशापाद्गतैश्वर्येपुरंदरे ममंथुःक्षीरजलधिंब्रह्माद्याःससुरासुराः ३०

२७

२३ २४ २५ २६ २७ २८ २९ ३०

३१ ३२ ३३ ३४ मंडला मंडलाकृतिः ३५ ३६ ३७ ३८ विप्रहे हरिमे

ऐरावतःकल्पतरुःचंद्रमाःकमलातथा उच्चैःश्रवाःकौस्तुभश्चतथाधन्वंतरिर्हरिः ३१ हरीतक्यादयश्चापिदिव्याऔषधयस्तथा अजायतद्विजश्रेष्ठलोकश्रेयोविधायकाः ३२ ततःपीयूषकलशमजरामरदायकम् कराभ्यांकलशंविष्णुःधारयन्स्तुतलंपरम् ३३ अवेक्ष्यमनसासद्यःपरांनिर्वृत्तिमापह तस्मिन्पीयूषकलशेआनंदास्रोदबिंदवः ३४ अपतन्तुलसीसद्यःसमजायतमंडला सर्वलक्षणसंपन्नासर्वाभरणभूषिता ३५ तत्रोत्पन्नातथालक्ष्मीं तुलसींचददुहरेः देवाब्रह्मादयस्तेहिजगृहेभगवान्हरिः ततोतीवप्रियकरातुलसीजगतांपतेः ३७ सातुदेवगणैःसर्वैःविष्णुवत्पूज्यतेप्रिया नारायणोजगन्नातातुलसीतस्यवल्लभा ३८ तस्मात्तस्यानमस्कारःमयाविप्रकृतस्ततः इत्येवंवदतस्तस्यसुमेधस्यमहात्मनः ३९ आरादृश्यतमहत्विमानंसूर्यवर्चसम् तदानींवटवृक्षस्तुपपातपुरतोमुने ४० तथैवतस्माद्वृक्षाच्चपुरुषौद्वौविनिर्गतौ द्योतयंतौदिशःसर्वास्तेजसासूर्यसन्निभौ ४१ प्रणामंचक्रतुस्तौहिहरिमेधसुमेधयोः हरिमेधसुमेधौतौतौदृष्ट्वाभयविह्वलौ ४२ ऊचतुर्विस्मयाविष्टौतावुभौदेवसन्निभौ हरिमेधसुमेधावूचतुः युवांकौदेवसंकाशौभवंतौसर्वमंगलौ ४३ मंदारमालांतरुणांधारयंतौतथामरौ नमस्कार्यौतथावाभ्यांपूज्यौचसुररूपिणौ ४४ इत्युक्तौब्राह्मणाभ्यांतौऊचतुर्वृक्षनिर्गतौ युवामेवपितामाताआवयोश्चतथागुरुः ४५ बंध्वादयस्तथावांयूयमेवनसंशयः ज्येष्ठउवाच अहंतुदेवलोकस्य आस्तीकोनामनामतः ४६ अप्सरोगणसंवीतःकदाचिन्नंदनंवनम् क्रीडार्थमगमन्नद्यौविषयासक्तचेतनः ४७

ध ३९ ४० ४१ तौवृक्षनिर्गतौदृष्ट्वा ४२ ४३ ४४ ४५ ४६ ४७

रेभिरेत्र्यालिंगितवत्यः ४८ तपतः तपश्चर्यांकुर्वतःरोमशस्योपरिइतिशेषः ४९ ५० ५१ ५२ ५३ ५४ ५५

रेभिरेदेववनितायथाकामंमयासह मुक्तामल्लिकमाल्यानिनिपेतुस्तानियोषिताम् ४८ तपतोरोमशस्यैवतद्द
क्षाकुपितोमुनिः योषिद्भर्तापराधंमेयासांवैपरतंत्रता ४९ अयमेवदुराचारःशापार्हइतिचाब्रवीत् त्वंब्रह्म
राक्षसोभूत्वावटवृक्षेचरेतिमाम् ५० प्रसादितोमयासोथविशापमपिदत्तवान् तुलसीपत्रमाहात्म्यंविष्णोर्ना
मतथाद्विज ५१ यदाशृणोषिसद्यस्त्वंविमुक्तिंयास्यसीपराम् इतिशप्तस्तुमुनिनाचिरकालंसुदुःखितः ५२
वसाम्यत्रवटेदैवाज्ज्ञातादर्शनतोध्रुवम् मुक्तिर्जाताविप्रशापाद्द्वितीयस्यकथांशृणु ५३ अयंमुनिवरःपूर्वंगु
रुशुश्रूषणेरतः गुरोराज्ञामनादृत्यब्रह्मराक्षसतांगतः ५४ युष्मत्प्रसादादधुनाब्रह्मशापाद्विमोचितः तीर्थ
यात्राफलंचैवयुवाभ्यामिहसाधितम् ५५ उत्तरोत्तरपुण्यानिवर्धतीवदिनेदिने इत्युक्त्वातौमुनिवरौप्रणम्य
चपुनःपुनः ५६ तावनुज्ञाप्यभौधामजग्मतुःपरयामुदा ततस्तौतीर्थयात्रार्थंपरमौमुनिपुंगवौ ५७ शंसंतौतु
लसीपुण्यंजग्मतुर्मुनिपुंगवौ एवंनारदमाहात्म्यंतुलस्याःकोनुवर्णयेत् ५८ तस्मान्नारदमासेस्मिन्कार्तिके
हरितुष्टिदे कर्तव्यातुलसीपूजानात्रकार्याविचारणा ५९ एवमंगव्रतान्येवप्रोक्तानिमुनिसत्तम उपांगानिप्र
वक्ष्यामिवालखिल्योदितानिच ६० इतिश्रीचतुःपुराणसारसंग्रहेकार्तिकमासमाहात्म्येतुलसीमाहात्म्य
वर्णननामाष्टमोऽध्यायः ८ ६९ वालखिल्याऊचुः कार्तिकस्यासितेपक्षेद्वादशीवत्ससंज्ञिता गो
धूलिकालसंयुक्ताद्वादशीवत्सपूजने १

५६ ५७ ५८ ५९ व्रतानीतिशेषः ६० इतिश्री
कार्तिकमासमाहात्म्यटीकायांअष्टमोऽध्यायः ८ ६९ अथवत्सद्वादशीविधानमाह कार्तिकस्येति १ ६९

वटेवटवृक्षछायायां २ युधिष्ठिरेतिसंबोधनंकृष्णोक्तिः सचसंवादः भविष्योत्तरोक्तोवालखिल्यैरत्रोक्तइति ३ शकुनावलोकनमाह दिनांतइति ४ ५ ६ ७ ८ पंचदीपेषु विशेषतोशुभाशुभनिरीक्षणमाह पक्षमिति ९

वत्सपूजावटेचैवकर्तव्याप्रथमेहनि सवत्सांतुल्यवर्णांचशालिनींगोपयस्विनीं चंदनादिभिरालिप्यपुष्पमालाभिरर्चयेत् २ तद्दिनेतैलपक्वंचस्थालीपक्वंयुधिष्ठिर गोक्षीरंगोघृतंचैवदधिक्षीरंचवर्जयेत् ३ दिनांतेसूर्यबिंबार्धादुभयत्रयदीदलं ततोनीराजनंकार्य्यंनिरीक्षेच्चशुभाशुभम् ४ नानादीपान्प्रकल्प्यादौस्वर्णपात्रादिसंस्थितान् नीराजयेद्दीपपूर्वंनिरीक्षेतशुभाशुभम् ५ स्थापयित्वासर्वदीपानुत्तराभिमुखान्न्यसेत् मुख्यादीपानवप्रोक्ता अन्यानपिचकल्पयेत् ६ ज्वालाचेद्दक्षिणासंस्थासनेजस्काशिखान्विता स्थिराचेत्सौख्यदाप्रोक्ताविपरीतातुदुःखदा ७ कार्तिकेकृष्णपक्षेतुद्वादश्यादिषुपंचसु तिथिषूक्तःपूर्वरात्रेनृणांनीराजनोविधिः ८ पक्षंसंसूचयन्त्यादौद्वितीयोमासमेककम् तृतीयेऋतवेप्रोक्ताचतुर्थेत्वयनंतथा ९ वर्षंतुपंचमेदीपेशुभाशुभंविनिर्णयेत् सूर्यांशसंभवादीपाअंधकारविनाशकाः १० त्रिकालेमांदीपयंतुदिशंतुचशुभाशुभं अभिमंत्र्यचमंत्रेणततोनीराजयेत्क्रमात् ११ आदौदेवांस्ततोविप्रान्हस्तिनश्चतुरंगमान् ज्येष्ठान्श्रेष्ठान्जघन्यांश्चमातृमुख्याश्चयोषितः १२ ततोनीराजितान्दीपान्स्वस्वस्थानेषुविन्यसेत् रूक्षैर्लक्ष्मीविनाशःस्यात्श्वेतैरन्नक्षयोभवेत् अतिरक्तेषुयुद्धानिमृत्युः कृष्णाशिखेषुच १३

दौप्रथमदीपं ९ दीपाभिमंत्रणेमंत्रः सूर्यांशसंभवाइति १० ११ १२ १३

अत्रप्रसिद्धाकथा सनत्कुमारसंहितायां पुरा हृषीकेशोनाम आभीरः अष्टसहस्रगवांपालकः आसीत्तस्य एकांगीनामकन्याजाता पुत्राभावे पुत्रोत्पत्त्यै दानधर्मादिकं अतीवचकार तेनपुत्रोजातः तदातत्पुरोहितः दुंदुभिनामकः काणः लोभी तत्रागत्य लोभेच्छया अयं मूलजात इतिमिथ्यैवावदत् तदाभीतः पिताकन्यामवदत् हे एकांगी नयेमंबालकंशीघ्रंमुखे दत्वाघृतंमधु क्षिपस्वतूर्णंगंगायामस्माकंसुखवृद्धये तदा एकांगीतमादाय दययामहावृक्षस्यकोटरे आस्थापयत् वारंवारंसमागत्यदिवसेषुनिशासुच तस्मैपयःपाययित्वापुनर्यातिस्वकंगृहं जातोसौवर्षमात्रेणकलभाषीसबालकः एकांग्यपिचसंजातायौवनाक्रांतदेहिका एकदादुंदुभिःपुरोहितः एकांगींकामवासनयाप्रार्थयत् तदासाधिक्कारंकृतवती तेन द्वेषेणदुंदुभिः तत्पितरमुवाच हे हृषीकेश इयंतवकन्यायवनैःसहक्रीडंती मयादृष्टा यवनाद्बालकोजातः सचकोटरेस्थापितः गत्वापश्य अहो

एकांगीनामगोपालातयैतच्चव्रतंकृतम् धनधान्यसमायुक्ताजातावर्षत्रयेणसा १४ तस्माद्गोपूजनंकार्यंद्वाद
श्यांकार्तिकस्यतु एतद्गोव्रतमाहात्म्यंश्रुत्वाकुर्वंतियेनराः १५ तेगोव्रतप्रभावेनगोभिर्विच्युताभुवि गोपराधः
कृतोयःस्यात्सव्रताद्विलयंव्रजेत् १६ वालखिल्याऊचुः कृष्णपक्षेचतुर्दश्यांमासिचाश्वयुजेतथा दीपोत्सव-
समीपेतुव्रतमेतत्समाचरेत् १७

नवकुलंनष्टं अस्यास्त्यागएवउचितः अन्यथा बहिष्कारोभवेत् एवंश्रुत्वाहृषीकेशः पुरोहितोक्तप्रकारेण एकांगींतत्सुतंच वृषस्यपृष्ठेबध्वावनेअत्यजत् सवृषोपिदैवयोगेनतामादायहरिद्वारंययौ बंधश्च शिथिलतांप्राप्तः तदाएकांगीतत्रकुटिंबध्वा तृणविक्रयंकृत्वा तेनद्रव्येणभ्रातरंवृषभंच पुष्णाति कार्तिकेमासेआगतेस्नानार्थंदेशदेशतः लोकाः आययुः ते इमांगोपालिकांज्ञात्वा दानार्थमानीताःगावः रक्षणायददुः अनयापिगवां सेवा भूयसी आरब्धा ततः वैष्णवैः तयाच द्वादश्यां गोपूजाकृता एवंवर्षत्रयमकरोत् तत्रदैवयोगात्हृषीकेशःपुरोहितेनदुंदुभिनासहआगतः तत्रस्वकन्यांदृष्ट्वाऽतिविस्मितोभूत्वा तथाज्ञातवृत्तांतः तस्याःविवाहमकरोत् दुंदुभिश्च-धिक्कृतः सापिशापंददौ अद्यप्रभृतिकाणेविश्वासकारकाः तेअवश्यंविलयंयांति इतिशप्त्वा बालकंपित्रेदत्वा गोव्रतमुपदिश्य भर्त्रासहस्वयंजगामेति

१४ १५ १६ १७

अथत्रयोदशीविधानमाह प्रातरिति १८ १९ यमदीपंबहिर्दद्यादितिवापाठः २० हेमनकस्येतिहासः सनत्कुमारसंहितायांविशेषतः वर्णितोस्ति २१ एकदेतिशेषः २२ २३ सःपुरुषःप्रानेयः आनीतव्यः नोस्माकंउत्सवे अपमृत्यौप्राप्तेपि २४ मंत्रमाह

प्रातःस्नात्वात्रयोदश्यांकृत्वावैदंतधावनं निराचनियमंकृत्वागोविंदेभक्तितत्परः १८ कार्यएतद्व्रतस्यांतेतयागोवर्दनोत्सवः त्रिमुहूर्ताधिकाग्राह्यापरवेधोनदोषभाक् १९ आश्विनस्यासितेपक्षेत्रयोदश्यांनिशामुखे यमदीपंबलिंदद्यादपमृत्युर्विनश्यति २० पुराहेमनकस्यैवबालकश्चापमृत्युतः मुक्तोभूदाश्विनेकृष्णात्रयोदश्यांदयावशात् २१ दूताऊचुः यथानजीविताद्भ्रश्येदीदृशोतुमहोत्सवे ततोपायंब्रूहियमकृपांकृत्वास्मदग्रतः २२ यमउवाच आश्विनस्यासितेपक्षेत्रयोदश्यांनिशामुखे प्रतिवर्षंतुयोदद्याद्गृहद्वारेसुदीपकम् २३ मंत्रेणानेनभोदूताःसमानेयत्सनोत्सवे प्राप्तेपमृत्यावपिचशासनंक्रियतांमम २४ मृत्युनापाशदंडाभ्यांकालेनचमयासह त्रयोदश्यांदीपदानात्सूर्यजःप्रीयतामिति २५ मंत्रेणानेनयोदीपंद्वारदेशेप्रयच्छति उत्सवेचापमृत्योश्चभयंतस्यनजायते २६ बालखिल्याऊचुः पूर्वविद्धचतुर्दश्यामाश्विनस्यासितेतरे पक्षेप्रत्यूषसमयेस्नानकुर्यात्प्रयत्नतः २७ अरुणोदयतोन्यत्ररिक्तायांस्नातियोनरः तस्याह्निकभवोधर्मोनश्यत्येवनसंशयः २८ तथाकृष्णचतुर्दश्यामाश्विनेर्कोदयेत्पुरा यामिन्याःपश्चिमेयामेतैलाभ्यंगोविशिष्यते २९ यदाचतुर्दशीनस्याद्विदिनेचोदिधूदये दिनद्वयेभवेच्चापितदापूर्वैवगृह्यते ३० बलात्काराद्दृढाद्वापिशिष्टत्वान्नकरोतिचेत् तैलाभ्यंगंचतुर्दश्यांरौरवंनरकंव्रजेत् ३१ तैलेलक्ष्मीजलेगंगादीपावल्याश्चतुर्दशी प्रातःस्नानंहियःकुर्याद्यमलोकंनपश्यति ३२

मृत्युनाइति २५ २६ अथचतुर्दशीविधानमाह पूर्वविद्धचतुर्दश्यामिति २७ २८ २९ ३० ३१ ३२

प्रपुन्नाडं टाकलाइतिख्यातं प्रपुन्नाडस्त्वेडगजोदद्रुघ्नश्चक्रमर्दकः पद्माट उरणाख्यश्चेत्यमरः ३३ त्रिवारंमंत्रपठनंकृत्वा स्नानमध्ये· स्नानजलमध्ये भ्रामयेत् एवंपुनर्द्विः मंत्रपठनंनववारमित्यर्थः मंत्रमाह सीताइति सीता हलरचितारेखातस्याः लोष्टं मृत्तिकापिंडः तेनसमायुक्तं सीतालांगलपद्धतिरित्यमरः लोष्टानिलेष्टवः पुंसीत्यमरः ३४ ३५ श्वानबलिमाह स्नात्वेति ३६ स्नानांगतर्पणं स्वस्वशाखाप्रसिद्धं ३७ अथयमतर्पणमंत्रानाह ॐयमायनमः इत्यादि ३८ ३९ ४० ४१ यमतर्पणंतुपूर्वमेवोक्तं भीष्मतर्पणं चाग्रेभीष्मपंचकव्रते कथयि

अपामार्गमथोतुंबीप्रपुन्नाडमथापरम् भ्रामयेत्स्नानमध्येतुनरकस्यक्षयायवै ३३ वारत्रयंत्रिवारंचपठित्वा मंत्रमुत्तमम् सीतालोष्टसमायुक्तसकंटकदलान्वितम् ३४ हरपापमपामार्गभ्राम्यमाणःपुनःपुनः अपामार्गप्रपुन्नाडंभ्रामयेच्छिरसोपरि ३५ स्नात्वार्द्रवाससादद्याद्दीपकंमृत्युपुत्रयोः शुनकौश्यामशबलौभ्रातरौयमसेवकौ तुष्टौस्यातांचतुर्दश्यांदीपदानेनमृत्युजौ ३६ इष्टबंधुजनैःसार्द्धमेतत्स्नानंसमाचरेत् स्नानांगतर्पणं कृत्वायमसंतर्पयेत्ततः ३७ यमायधर्मराजायमृत्यवेचांतकायच वैवस्वतायकालायसर्वभूतक्षयायच ३८ औदुंबरायदध्नायनीलायपरमेष्ठिने वृकोदरायचित्रायचित्रगुप्तायतेनमः ३९ चतुर्दशैतेमंत्राःस्युःप्रत्येकं चनमोन्विताः एकैकेनतिलैर्मिश्रान्दद्यात्त्रीनुदकांजलीन् ४० यज्ञोपवीतिनाकार्यंप्राचीनावीतिनाथवा देवत्वंचपितृत्वंचयमस्यास्तिद्विरूपता ४१ जीवत्पितापिकुर्वीततर्पणंयमभीष्मयोः

नरकायनरकासुरायदीपः प्रदातव्यः अत्रविशेषःसारोद्धारे पुरासौवीरदेशेतुवेश्याभूद्द्विजनप्रिया नाम्नालीलावतीपुण्या हरिभक्तिप
कदाचित्सासमायाता वसिष्ठस्याश्रमंमुदा चतुर्दशीमहात्म्यंसापप्रच्छविनयान्विता वसिष्ठउवाच एवंव्रतंत्रयोदश्यांकृत्वारात्रौवि ३०
धूदये स्नातव्यंतिलतैलेननरैर्नरकभीरुभिः नारकीतिचसाप्रोक्तातिथिर्लोकेषुविश्रुता पूर्वंवराहदेवाच्चजातोनरकनामकः धरण्यांसतुपापात्मा

देवान्सर्वान्जिगायच ऐश्वर्यंचैवदेवानांहृतवान्पापचेतनः तदानींदेवताःसर्वेकृष्णंशरणमाययुः तैःप्रार्थितश्चश्रीकृष्णोवधार्थंनरकस्यच जगामयत्रपापात्मानरकोधरणीसुतः सामात्यंनरकंहत्वा चतुर्दश्यांतुकार्त्तिके सर्वोत्तमस्तदाकृष्णश्चतुर्दश्यावरंददौ येकरिष्यंतिचाभ्यंगंवस्त्रदानादिकंचयन् तेषांयशश्चकीर्तिंचपुत्रैश्वर्यंददाम्यहम् इतितस्यैवरान्दत्वाप्रसिद्धासाततोभुवि तस्मिन्दिनेमहालक्ष्मीस्तैलेसन्निहितायतः विष्णुपादाब्जसंभूतागंगालोकमलापहा तस्मिन्नुष्णोदकेदेवीसन्निधानंप्रकुर्वति विधूदयेत्रयोदश्यांभवेद्यदिचतुर्दशी नरकीतिचसाप्रोक्ताव्याप्ति

नरकायप्रदातव्योदीपःसंपूज्यदेवताः ४२ अत्रैवलक्ष्मीकामस्याविधिःस्नानेमयोच्यते इषेभूतेचदर्शेचका-
र्त्तिकेप्रथमेदिने ४३ यदास्वातितदाभ्यंगस्नानंकुर्याद्विधूदये ऊर्जशुक्लद्वितीयायांतिथौचस्वातियुग्मगे ४४
मानवोमंगलस्नायीनैवलक्ष्म्यावियुज्यते दीपैर्नीराजनादत्रशैषादीपावलिःस्मृता ४५ इंदुक्षयेपिसंक्रांतौरवौपा-
तेदिनक्षये अत्राभ्यंगोनदोषायप्रातःपापापनुत्तये ४६ माषपत्रस्यशाकंवैभुक्त्वातस्मिन्दिनेनरः प्रेताख्यायां
चतुर्दश्यांसर्वपापैःप्रमुच्यते ४७ इषासितचतुर्दश्यामिंदुक्षयतिथावपि दर्शादौस्वातिसंयुक्तेतदादीपावलि-
र्भवेत् ४८ कुर्यात्संलग्नमेतच्चदीपोत्सवदिनत्रयम् महाराजोबलिःप्रोक्तस्तुष्टेनहरिणातथा ४९ वरंयाचस्वभ-
द्रंतेयद्यन्मनसिवर्तते इतिविष्णुवचःश्रुत्वाबलिर्वचनमब्रवीत् ५० आत्मार्थंकिंयाचनीयंसर्वंदत्तंमयातथालो-
कार्थंयाचयिष्यामिशक्तश्चेद्देहितच्चमे ५१

नस्यसितेतरे व्यतीपातेचवैधृत्यांमातापित्रोर्दिनेपिवानारकीचतुर्दशीचेत्स्यात्स्नातव्यंतिलतैलतः स्नातव्यंतिलतैलेन नारीभिश्चनरैरपि यतिभिर्विधवाभिश्चनिष्कामैर्वाविधानतः कार्यमभ्यंजनंतत्रचान्यथानिरयंव्रजेदिति ४२
लक्ष्मीकामस्यस्नानकालमाह ४३ ४४ ४५ ४६ माषपत्रस्यशाकंमाषपर्णिशाकंमहाराष्ट्रभाषायांरानउडीदइतिख्यातं हयपुच्छीतु
कांबोजीमाषपर्णीमहासहाइत्यमरः ४७ दीपोत्सवोदिनत्रयमाह इषेति ४८ ४९ ५० ५१

५२ ५३ इयंस्त्रीलक्ष्मीः ५४ ५५ दीपावलिःदीपानांपंक्तिः ५६ ५७ ५८ ५९ ६० महारात्रिरि

मयाद्यतेधरादत्तावामनच्छद्मरूपिणे त्रिभिःपदैस्त्रिदिवसैःसाचाक्रांतायतस्त्वया ५२ तस्मादेतद्बलेराज्यमस्तुघस्रत्रयेहरे मद्राज्येयेदीपदानंभुविकुर्वंतिमानवाः ५३ तेषांगृहेतवस्त्रीयंसदातिष्ठतुसुस्थिरा ममराज्येगृहेयेषामंधकारःपतिष्यति ५४ लक्ष्मीसंतानांधकारःसदापततुतद्गृहे चतुर्दश्यांचयेदीपान्नरकायददंतिच ५५ तेषांपितृगणाःसर्वेनरकेनवसंतिच बलिराज्यंसमासाद्ययैर्नदीपावलिःकृता ५६ तेषांगृहेकथंदीपाःप्रज्वलिष्यंतिकेशव बलिराज्येतुयेलोकाःशोकानुत्साहकारिणः ५७ तेषांगृहेसदाशोकःपतेदितिनसंशयः चतुर्दशीत्रयेराज्यंबलेरस्त्वितियाचयेत् ५८ पुरावामनरूपेणप्रार्थयित्वाधरामिमां ददावतिथयेंद्रायबलिंपातालवासिनं ५९ कृत्वादैत्यपतेरित्थंहरिणाताद्दिनत्रयम् तस्मान्महोत्सवंचात्रसर्वथैवहिकारयेत् ६० महारात्रिःसमुत्पन्नाचतुर्दश्यांमुनीश्वराः अतस्तदुत्सवःकार्यःशक्तिपूजापरायणैः ६१ बलिराज्यंसमासाद्ययक्षगंधर्वकिंनराः औषध्यश्चपिशाचाश्चमंत्राश्चमणयस्तथा ६२ सर्वएवप्रहृष्यंतिनृत्यंतिचनिशामुखे तत्तन्मंत्राश्चसिद्ध्यंतिबलिराज्येनसंशयः ६३ बलिराज्यंसमासाद्ययथालोकाःप्रहर्षिताः तथातद्दिनमध्येतुलोकाःस्युर्हर्षिताःभृशम् ६४ तुलासंस्थेसहस्रांशौप्रदोषेभूतदर्शयोः उल्काहस्तानराःकुर्युःपितॄणांमार्गदर्शनम् ६५ नरकस्थास्तुयेप्रेतास्तेमार्गंतुव्रजनात्सदा पश्यंत्येवनसंदेहःकार्योत्रमुनिपुंगवैः ६६ आश्विनेमासिभूतादितिथयःकीर्तितास्त्रयः दीपदानादिकार्येषुग्राह्यामध्यान्हकालिकाः ६७

ति महारात्रिनामकीदेवीयामलतंत्रप्रसिद्धा ६१ ६२ ६३ ६४ उल्काहस्ताःतेजःपुंजहस्ताः ६५ ६६ ६७

मासतत्त्व.४
का.मा.८
अ.९

३१

६८ अथदीपोत्सवीविधानप्रसंगमाह कौमोदिनीति द्विजाः वालखिल्याः कौमोदिनीशब्दार्थमाह पाद्मे विष्णुनाचस्वयंवत्सतुष्टेनबलये पुनः उपकारकरंदत्तमस्कराणांमहोत्सवं तदाप्रभृतिसेनानीःप्रवृत्ताकौमुदीसदा कुशब्देनमहीज्ञेयामुदहर्षेततोद्वयम् धातुज्ञैर्निगमज्ञैश्चतेनैषा कौमुदीस्मृता कौमोदंतेजनायस्मान्नानाभावैःपरस्परम् हृष्टास्तुष्टाःसुखापन्नास्तेनैषाकौमुदीस्मृता कुमुदानिबल्लेर्यस्माद्दीयंतेतेनषण्मुख अर्था

यदिस्युःसंगवाद्वोगेताश्चतिथयस्त्रयः दीपदानादिकार्येषुकर्तव्याःपूर्वसंयुताः ६८ ऋषयऊचुः कौमोदिव्या
स्त्कमाहात्म्यंपृष्टुमिच्छामहेद्विजाः तस्मिन्दिनेतुकिंभोज्यंकस्यपूजांतुकारयेत् ६९ किमर्थंक्रियतेसातुतस्याःकादेव
ताभवेत् किंचतत्रभवेद्देयंकिन्नदेयंविशेषतः ७० प्रहर्षःकोत्रनिर्दिष्टःक्रीडाकात्रप्रकीर्तिता दीपाचल्याःफलं
सर्वंवदतुऋषिसत्तमाः ७१ वालखिल्याऊचुः ततःप्रभातसमयेत्वमायांतुमुनीश्वराः स्नात्वादेवान्पितॄन्भ
क्त्यासंपूज्याथप्रणम्यच ७२ कृत्वातुपार्वणश्राद्धंदधिक्षीरघृतादिभिः दिवातत्रनभोक्तव्यमृतेबालातुराज्ज-
नात् ७३ ततःप्रदोषसमयेपूजयेदिंदिराक्रमाम् कुर्यान्नानाविधैर्वस्त्रैःस्वच्छं लक्ष्म्याश्चमंडपे ७४ नानापुष्पैः
पल्लवैश्चचित्रैश्चापिविचित्रितम् तत्रसंपूजयेल्लक्ष्मींदेवांश्चापिप्रपूजयेत् ७५ संपूज्यादेवनार्योपिबहुभिश्चोपचा
रकैः पादसंवाहनंकुर्याल्लक्ष्म्यादीनांतुभक्तितः ७६ अस्मिन्नहनिसर्वेपिविष्णुनामोचिताःपुरा बलिकारागृहा
द्देवैर्लक्ष्मीश्चापिविमोचिता ७७ लक्ष्म्यासार्द्धंततोदेवाजग्मुःक्षीरोदधौपुनः प्रसुप्ताबहुकालंतेसुखंतस्मान्मुनी
श्वराः ७८ रचनीयाःसूत्रगर्भाःपर्यंकाश्चसतूलिकाः दुग्धफेनोपमैर्वस्त्रैरास्तृताश्चयथादिशम् ७९

यपार्थिवैः पुत्रतेनैषा कौमुदीस्मृता ६९ ७० ७१ ७२ ७३ इंदिरांलक्ष्मीं ७४ ७५
देवनार्यः सरस्वती कालीगौर्याद्याः ७६ ७७ ७८ कथंभूताःपर्यंकाः सूत्रगर्भाः ७९

८० अथलक्ष्मीप्रबोधोत्सवप्रसंगमाह अतइत्यादिना ८१ ८२ ८३ ८४ ८५ ८६ ८७ ८८

स्थापयेत्तान्सुरान्लक्ष्मींवेदघोषसमन्वितः लक्ष्मीर्दैत्यभयान्मुक्तासुखंसुप्तांबुजोदरे ८० अतोत्रविधिवत्कार्यातुष्ट्यैतुसुखकामिका तदन्हिपद्मशय्यायांपद्मासौख्यविवृद्ध्ये ८१ कुर्यात्तस्यगृहंमुक्तातत्पद्माक्वापिनव्रजेत् नकुर्वंतिनराइत्थंलक्ष्म्यायेसुखकामिकाम् ८२ धनचिंताविहीनास्तेकथंरात्रौस्वपंतिहि तस्मात्सर्वप्रयत्नेनलक्ष्मींसंपूजयेन्नरः ८३ सतुदारिद्र्यनिर्मुक्तःस्वजातौस्यात्प्रतिष्ठितः जातिपत्रलवंगैलात्वक्कर्पूरसमन्वितम् ८४ पाचयित्वागव्यदुग्धंसितांदत्वायथोचितां लड्डुकांस्तस्यकुर्वीततांश्चलक्ष्मींसमर्पयेत् ८५ अन्यच्चतुर्विधंभक्ष्यंयालक्ष्मीःप्रीयतामिति अप्रबुद्धेहरौपूर्वंस्त्रीभिर्लक्ष्मींप्रबोधयेत् ८६ प्रबोधसमयेलक्ष्मींबोधयित्वाभुनक्तिया पुमान्वावत्सरंयावत्लक्ष्मीस्तंनैवमुंचति ८७ अभयंप्राप्यविप्रेभ्योविष्णुभीताःसुराद्विषः सुप्तोक्षीरोदधौज्ञात्वालक्ष्मीःपद्माश्रितास्तथा ८८ त्वंज्योतिःश्रीरविश्चंद्रोविद्युत्सौवर्णतारकाः सर्वेषांज्योतिषांज्योतिर्दीपज्योतिःस्थितेनमः ८९ यालक्ष्मीर्दिवसेपुण्येदीपावल्यांचभूतले गवांगोष्ठेतुकार्तिक्यांसालक्ष्मीर्वरदामम ९० दीपदानंततःकुर्यात्प्रदोषेचततोल्मुकं भ्रामयेत्स्वस्यशिरसिसर्वारिष्टनिवारणं ९१ दीपवृक्षास्तथाकार्याःशक्त्यादेवगृहादिषु चतुष्पथेश्मशानेचनदीपर्वतवेश्मसु ९२ वृक्षमूलेषुगोष्ठेषुचत्वरेषुगृहेषुच वस्त्रैःपुष्पैःशोभितव्याराजमार्गस्थभूमयः ९३ सर्वंपुरमलंकृत्यप्रदोषेतदनंतरम् ब्राह्मणान्भोजयित्वादौसंभोज्यचबुभुक्षितान् ९४ अलंकृतेनभोक्तव्यंनववस्त्रोपशोभिना ततोपरान्हसमयेघोषयेन्नगरंनृपः ९५

दीपोत्सवीप्रार्थना त्वंज्योतिरिति द्वाभ्यां ८९ ९० उल्मुकंप्रज्वलत्काष्ठं ९१ ९२ ९३ ९४ ९५

९६ शुभाशुभंपश्येदिति तत्रावलोकनप्रकारमाह बालरुष्टौराजशोकस्तेषांतुष्टौनृपेसुखं बालयुद्धेराजयुद्धंरोदने राज्यनाशनंयष्टिकादिकृता न्अन्यदारोहंतिबालकाः तदाराज्ञोजयोवाच्यः परराष्ट्रविमर्दनं लिंगंधृत्वाक्रीडनेतुव्यभिचारोमहान्भवेत् अन्नंयदागोपयंति दुर्भिक्षंतत्रचादिशेत् एवंबालकृतांचेष्टांबुध्वाचास्यफलंवदेत् ९७ ९८ ९९ १०० १०१ १०२ सुखरात्रिका कर्तव्या इतिशेषः अत्रविशेषःब्राह्मे नारदउवाच येनस्त्रियःसुरूपाःस्युःसुभगाःसुप्रजास्तथा पतिव्रतपराब्रह्मंस्तद्व्रतंब्रूहिमेप्रभो श्रीब्रह्मोवाच श्रूयतांब्राह्मणश्रेष्ठसुखरात्रिशुभंव्रतं यन्मयाकस्यचिन्नोक्तंरहस्यंशिवशर्मदं ऊर्जेमासिचतुर्दश्यांकृष्णायांव्रतमुत्तमं यस्याचरणमात्रेणस्त्रियःसौभाग्यवर्द्धनाः स्त्रियसार्द्ध

अद्यराज्यंबलेर्लोकाययथेच्छंक्रीड्यतामिति यथेच्छंक्रीड्यतांबालाइत्याज्ञाप्यनृपेणतु ९६ तेभ्योदद्यात्क्रीडनकं
ततः पश्येच्छुभाशुभम् बलिराज्येप्रकर्तव्यंयद्यन्मनसिवर्तते ९७ जीवहिंसासुरापानमगम्यागमनंतथा
चौर्यंविश्वासघातश्चपंचैतानिमुनीश्वराः ९८ बलिराज्येतुनरकद्वाराण्युक्तानिसंत्यजेत् ततोर्द्धरात्रसमयेस्वयंरा
जाव्रजेत्पुरम् ९९ अवलोकयितुंरम्यंपद्भ्यामेवशनैःशनैः बलिराज्यप्रमोदंचदृष्ट्वास्वगृहमाव्रजेत् १०० एवंग
तेनिशीथेचजनेनिद्रार्द्धलोचने एवंनगरनारीभिःशूर्पडिंडिमवादनैः १०१ निष्कास्यतेप्रहृष्टाभिरलक्ष्मीःस्वगृ
हांगणात् दंडैकरजनीयोगेदर्शःस्यात्तुपरेहनि १०२ तदाविहायपूर्वेद्युःपरेह्निसुखरात्रिका येवैष्णवावैष्णवा
श्चबलिराज्योत्सवंनराः १०३

जगद्योनिःशेतेविष्णुःसुखान्वितः तस्यांरात्रौजनैस्तस्मात्संप्रोक्ताजनसुप्तिका तस्यांधातुमयैर्वर्णैर्भगवत्पंचरंगकैः निजालयेजीवदात्रींलिखित्वासुखरात्रिकां ब्रह्मविष्णुशिवादीनांमूर्तिंचविलिखेत्ततः सौभाग्यहेतवेभर्तुरनुज्ञांप्रतिगृह्य व्रतार्थंकल्पयेत्तस्याःपूजोपकरणानिच ततःसुगंधद्रव्येणगात्रमुद्वर्त्ययत्नतः स्त्रीभिःसुखोदकंस्नानं कर्तव्यंद्विजसत्तम स्नात्वावस्त्रंमनोहारिपरिधाययथाविधि सुखरात्र्याःप्रतिष्ठांकारयित्वाद्विजन्मना पूजनीयाविधानेनगंधपुष्पाक्षतादिभिः स्त्रीभिःसखीसंयुताभिःसुख

रात्र्यादि देवताः सुखरात्री गृहस्थायादेवता लिखितामया पूजागृण्हातुमद्दत्तांताः प्रयच्छंतुमेसुखं सुखरात्रिनमस्तुभ्यंजीवदात्रेसुखप्रदे शिवप्रियेगृहाणेमां पूजांवैरक्षबालकान् रूपंदेहिजयंदेहिविद्यांदेहिसुखंधनम् प्रनान्प्रयच्छमेकामान्समस्तान्सुखमादरात् इतिसंप्रार्थ्यतांदेवीं गीतवादित्रनिःस्वनैः लक्ष्मीपूजाततःकार्याधवयुक्तिभिरादरात् त्रिभिःपूजोपहारेणमंत्रैरेभिर्हरिप्रियां जयदेविजगन्मातर्विष्णोर्वक्षसिसंस्थिते रमेनमोस्तुतेमंत्रसौभाग्यंदेहिनिश्चलं जागर्तियोमहालक्ष्मीदीपमालासुभूतले हरिवक्षःस्थितारम्यासादेवीवरदास्तुमे इतिस्तुत्वाभगवतींमहा

नकुर्वंतिवृथा तेषांधर्माःस्युर्नात्रसंशयः रात्रौजागरणंकुर्यात्पुराणपठनादिभिः १०४ द्यूतेनवाहरेरग्रेगीतया वादयैवच १०५ इतिश्रीचतुःपुराणसारसंग्रहे कार्तिकमासमाहात्म्ये वत्सद्वादशीयमत्रयोदशीनरकचतुर्दशीदीपावलीकृत्यवर्णननाम नवमोऽध्यायः ९ ७ ब्रह्मोवाच प्रतिपद्युभयेभ्यंगंकृत्वानीराशनंततः सुवेषःसत्कथागीतैर्दानैश्चादिवसंनयेत् १ शंकरस्तुपुराद्यूतंससर्जसुमनोहरम् कार्तिकेशुक्लपक्षेतुप्रथमेहनिसत्यवत् २ बलिराज्यदिनस्यापिमाहात्म्यंशृणुतत्वतः स्नातव्यंतिलतैलेननरैर्नारीभिरेवच ३ यदिमोहान्नकुर्वीतसयातियमसादनं पुराकृतयुगस्यादौदानवेंद्रोबलिर्महान् ४ तेनदत्तावामनायभूमिःस्वमस्तकान्विता तदानींभगवान्साक्षात्तुष्टोबलिमुवाचह ५ कार्तिकेमासिशुक्लायांप्रतिपद्यायतोभवान् भूमिंमेदत्तवान्भक्त्यातेनतुष्टोस्मितेनघ ६ वरंददामितेराजन्नित्युक्त्वादाद्वरंतदा त्वन्नाम्नैवभवेद्राजन्कार्तिकीप्रतिपत्तिथिः ७

लक्ष्मींसुखप्रदां भर्त्रासहक्रीडनीयंदीपावल्यांजयेच्छया द्यूतंपत्याश्रितंस्त्रीभिरित्याहपुरुषोत्तमः इत्थंविधानेनपतिव्रतायाकरोतिहृद्यांसुखरात्रिकाख्यं व्रतंसपुत्राधनधान्ययुक्तासभर्तृकासाभवतीहसत्यमिति १०३ १०४ १०५ इतिकार्तिकमाहात्म्यटीकायांनवमोऽध्यायः ९ ७ अथद्यूतप्रतिपदाबलिराज्यप्राप्तिप्रसंगमाह प्रतिपदिति १ २ ३ ४ ५ ६ ७

८ प्रतिपद्वेधनिर्णयमाह प्रतिपदिति ९ १० ११ १२ १३ १४ मूर्तिंकुर्यादित्यत्र कामूर्तिः कीदृशीवेत्यपेक्षायामाह ब्राह्मे
ब्रह्मोवाच अस्मिन्दिनेन्यदपियत्कृत्यंवेदविदांवर तत्सर्वंसंप्रवक्ष्यामिशृणुभागवतोत्तम ततोबलेर्गृहद्वारेस्थाप्योगोमयमूर्तिभृत् मुनेश्रीबाल
गोवर्द्धनोमहान् बलिराजस्यराज्येधद्वारपालोभवप्रभो स्वबालकपालनार्थेत्वंगोवर्द्धनगोपते इतिसंस्थाप्यगोपालं गोवर्द्धनसमन्वितम्

एतस्यांयेकरिष्यंतितैलस्नानादिकार्चनम् तदक्षयंभवेद्राजन्नात्रकार्याविचारणा ८ तदाप्रभृतिलोकेस्मिन्प्रसिद्धा
प्रतिपत्तिथिः प्रतिपत्पूर्वविद्धानोकर्तव्यातुकथंचन ९ तत्राभ्यंगंनकुर्वीतअन्यथामृतिमाप्नुयात् प्रतिपद्यांयदाद
र्शोमुहूर्तप्रमितंभवेत् १० मांगल्यंतद्दिनेचेत्स्यात्वित्तादितस्यनश्यति बलेश्चप्रतिपच्चैतद्यदिविद्धंभविष्यति ११
तस्यांयदिसचार्तिक्यंनारीमोहात्करिष्यति नारीणांतत्रवैधव्यंप्रजानांमरणंध्रुवम् १२ अविद्धाप्रतिपच्चेत्स्यात्मु
हूर्तमपरेहनि उत्सवादिककृत्येषुसैवप्रोक्तामनीषिभिः १३ प्रतिपत्स्वल्पमात्रापियदिनस्यात्परेहनि पूर्वविद्धा-
तदाकार्याकृतानोदोषभाग्भवेत् १४ तद्दिनेगृहमध्येतुकुर्यान्मूर्तिंतदांगणे गोमयेनचतत्रापिदध्यंतत्पुरतःक्षि
पेत् १५ आर्तिक्यंतत्रसंस्थाप्यएवंकुर्याद्विधानतः अभ्यंगंयेनकुर्वीततस्यांतुमुनिपुंगव १६ नमांगल्यंभवे
त्तेषांयावत्स्याद्वत्सरंध्रुवम् योयादृशेनरूपेणतस्यांतिष्ठेच्छुभेदिने १७ आवर्षंतद्भवेत्तस्यतस्मान्मंगलमाचरे
त् यदीच्छेत्स्वशुभान्भोगान्भोक्तुंदिव्यान्मनोहरान् १८ कुरुदीपोत्सवंरम्यंत्रयोदश्यादिकेषुच शंकरश्चभ-
वानीचक्रीडयाद्यूतमास्थिते १९ गौर्याजित्वापुराशंभुर्नग्नोद्यूतेविसर्जितः अतोर्थंशंकरोदुःखीगौरीनित्यंसुखस्थि
ता २०

प्रतिष्ठापूर्वकंध्यानंभक्त्यासंपूजयेन्मुने गोपालमूर्तेविश्वेश शक्रोत्सवविभेदक गोवर्द्धनकृतच्छत्र पीडांमेहरगोकुले
इतिसंपूज्य भक्ष्यभोज्यैः बांधवादीन्भोजयित्वा स्वयंभुंजीतेति १५ १६ १७ १८ १९ २०

मासस्त.४
का.मा.८
अ.१०

२१ गोवर्द्धनपूजाप्रसंगमाह भवान्याइति २२ २३ २४ २५ २६ २७ २८ २९ अथ

द्यूतंनिषिद्धंसर्वत्रहित्वाप्रतिपदंबुधाः प्रथमंविजयोयस्यतस्यसंवत्सरंसुखम् २१ भवान्याभ्यर्थितालक्ष्मीर्धेनु
रूपेणसंस्थिता प्रातर्गोवर्द्धनःपूज्योद्यूतंरात्रौसमाचरेत् २२ भूषणीयास्तदागावोवर्ज्यावहनदोहनात् गोवर्द्धन-
धराधारगोकुलत्राणकारक २३ विष्णुबाहुकृतोच्छ्रायगवांकोटिप्रदोभव यालक्ष्मीर्लोकपालानांधेनुरूपेणसं
स्थिता २४ घृतंवहतियज्ञार्थेममपापंव्यपोहतु अग्रतःसंतुमेगावोगावोमेसंतुपृष्ठतः २५ गावोमेहृदयेसंतुग
वांमध्येवसाम्यहम् इतिगोवर्द्धनपूजा सद्भावेनैवसंतोष्यदेवान्सत्पुरुषान्नरान् २६ इतरेषामन्नपानैर्वाक्यदा
नेनपंडितान् वस्त्रैस्तांबूलधूपैश्चपुष्पकर्पूरकुंकुमैः २७ भक्ष्यैरुच्चावचैर्भोज्यैरंतःपुरनिवासिनः ग्राम्यैर्वृषभदा
नैश्चसामंतान्नृपतिर्धनैः २८ पदातिजनसंघांश्चग्रैवेयैःकटकैःशुभैः स्वनामांकैश्चतान्राजातोषयेत्सज्जनान्पृथक्
२९ यथार्थंतोषयित्वातुततोमल्लान्नरांस्तथा वृषभान्माहिषांश्चैवयुध्यमानान्परैःसह ३० राजानश्चापियोधां
श्चपदातीन्समलंकृतान् मंचारूढःस्वयंपश्येत्नटनर्तकचारणान् ३१ युद्धापयेद्वासयेच्चगोमहिष्यादिकंचयत्
वत्सानाकर्षयेद्गोभिरुक्तिप्रत्युक्तिवादनात् ३२ ततोपरान्हसमयेपूर्वस्यांदिशिसुव्रत मार्गपालींप्रबध्नातिदुर्ग-
स्तंभेथपादपे ३३ कुशकाशमयींदिव्यांलंबकैर्बहुभिःप्रिये वीक्षयित्वागजानश्वान्मार्गपाल्यास्तलेनयेत् ३४ गा
वोवृषांश्चमहिषान्महिषीर्घंटकोत्कटान् कृतहोमैर्द्विजेंद्रैस्तुबध्नीयान्मार्गपालिकां ३५ नमस्कारंततःकुर्यान्मं
त्रेणानेनसुव्रत मार्गपालेनमस्तुभ्यंसर्वलोकसुखप्रदे तलेतवसुखेनाश्वागजागावश्चसंतुमे ३६

३४

युद्धक्रीडादर्शनप्रसंगमाह यथार्थमिति ३० ३१ ३२ अथमार्गपालीविधानमाह ततइति ३३ ३४ ३५ ३६

३७ अथबलिपूजाप्रसंगमाह कृत्वेति ३८ पंचरंगैःकर्तव्यतामाह जिह्वाताल्वक्षिणीप्रांते करयोःपादयोस्तले रक्तवर्णेनास्यकेशाः कृष्णेनै वसमालिखेत् सर्वांगंपीतवर्णेनशस्त्राद्यंनीलवर्णतः वस्त्राद्यंश्वेतवर्णेनयथाशोभंप्रकल्पयेत् सर्वाभरणशोभाढ्यंद्विभुजंनृपचिन्हितम्

मार्गपालीतलेपुत्रयांतिगावोमहावृषाः राजानोराजपुत्राश्चब्राह्मणाश्चविशेषतः ३७ मार्गपालींसमुल्लंघ्यनीरु
जःसुखिनोहिते कृत्वैतत्सर्वमेवेहरात्रौदैत्यपतेर्बलेः ३८ पूजांकुर्यात्ततःसाक्षाद्भूमौमंडलकेकृते बलिमालि
ख्यदैत्येंद्रंवर्णकैःपंचरंगकैः ३९ सर्वाभरणसंपूर्णंविंध्यावलिसमन्वितं कूष्मांडमयजंभोरुमधुदानवसंवृतं
४० संपूर्णंकृष्टवदनंकिरीटोत्कटकुंडलम् द्विभुजंदैत्यराजानंकारयित्वास्वकेपुनः ४१ गृहस्यमध्येशालायां
विशालायांततोर्चयेत् मातृभ्रातृजनैःसार्द्धंसंतुष्टोबंधुभिःसह ४२ कमलैःकुमुदैःपुष्पैःकल्हारैःरक्तकोत्पलैः गंध
पुष्पान्ननैवेद्यैःसक्षीरैर्गुडपायसैः ४३ मद्यमांससुरालेह्यचोष्यभक्ष्योपहारकैः मंत्रेणानेनराजेंद्रःसमंत्रीसपुरो
हितः ४४ पूजांकरिष्यतेयोवैसौख्यंस्यात्तस्यवत्सरम् बलिराजनमस्तुभ्यंविरोचनसुतप्रभो ४५ भविष्येंद्रसुरा
रातेपूजेयंप्रतिगृह्यताम् एवंपूजाविधानेनरात्रौजागरणंनरः ४६ कारयेद्वेक्षणंरात्रौनटनृत्यकथानकैः लोकै
श्चापिगृहस्यांतेसपर्याशुक्लतंदुलैः ४७ संस्थाप्यबलिराजानंफलैःपुष्पैःप्रपूजयेत् बलिमुद्दिश्यवैतत्रकार्यंस
र्वंचसुव्रत ४८ यानियान्यक्षयाण्याहुर्मुनयस्तत्त्वदर्शिनः यदत्रदीयतेदानंस्वल्पंवायदिवाबहु ४९ तदक्षयंभवे
त्सर्वंविष्णोःप्रीतिकरंशुभम् रात्रौयेनकरिष्यंतिनवपूजांबलेनराः ५०

लोकोलिखेद्गृहस्यांतः शय्यायांशुक्लतंदुलैरिति ३९ ४० ४१ ४२ ४३ ४४ ४५ ४६ नृपकृत्य
मुक्त्वा जनकृत्यमाह लोकैरिति ४७ ४८ ४९ ५० ५१ ५१

५१ उपकारकं महोत्सवं अहोरात्रस्यविशेषणं ५२ ५३ ५४ ५५ ५६ ५७ ५८ अथगोक्रीडनप्र-

तेषांचश्रोत्रियोधर्मः सर्वस्त्वामुपनिष्ठतु विष्णुनाचस्वयंवत्सतुष्टेनबलयेपुनः ५१ उपकारकरंदत्तमस्कराणांम
होत्सवम् एकमेवमहोरात्रंवर्षेवर्षेचकार्तिके ५२ दत्तंदानवराजस्यआदर्शमिवभूतले यः करोतिनृपोराज्येत
स्यव्याधिभयंकुतः ५३ सुभिक्षंक्षेममारोग्यंतस्यसंपदनुत्तमा नीरुजश्चजनाःसर्वेसर्वोपद्रववर्जिताः ५४
कौमुदीक्रियतेयस्माद्भावंकर्तुंमहीतले योयादृशेनभावेनतिष्ठत्यस्यांचसुव्रत ५५ हर्षदुःखादिभावेनतस्यव
र्षंप्रयातिहि रुदितेरोदितंवर्षंप्रहृष्टेतुप्रहर्षितम् ५६ भुक्तौभोग्यंभवेद्वर्षंस्वस्थेस्वस्थंभविष्यति वैष्णवीदानवी
चेयंतिथिःप्रोक्ताचकार्तिके ५७ दीपोत्सवंजनितसर्वजनप्रमोदं कुर्वंतियेशुभतयाबलिराजपूजाम् दानोप-
भोगसुखबुद्धिमतांकुलानांहर्षंप्रयातिसकलंप्रमुदाचवर्षं ५८ बलिपूजांविधायैवंपश्चाद्गोक्रीडनंचरेत् गवां
क्रीडादिनेयत्ररात्रौदृश्येतचंद्रमाः ५९ सोमोराजापशून्हंतिसुरभीपूजकांस्तथा प्रतिपद्दर्शसंयोगेक्रीडनंतुग-
वांमतम् ६० परविद्धासुयःकुर्यात्पुत्रदारधनक्षयः अलंकार्यास्तदागावोगोग्रासादिभिरर्चिताः ६१ गीतवा
दित्रनिर्घोषैर्नयेन्नगरबाह्यतः आनीयचततःपश्चात्कुर्यान्नीराजनेविधिम् ६२ अथचेत्प्रातिपत्स्वल्पानारीनीराज
नंचरेत् द्वितीयायांततःकुर्यात्सायंमंगलमालिकाः ६३ एवंनीराजनंकृत्वासर्वपापैःप्रमुच्यते प्रतिपत्पूर्वविद्धैवयष्टि
काकर्षणेभवेत् ६४ कुशकाशमयींकुर्याद्यष्टिकांसुदृढांनृपा देवद्वारेनृपद्वारेथवानेयाचतुष्पथे ६५ तामेकतोराजपु
त्राहीनवर्णास्तथैकतः गृहीत्वाकर्षयेयुस्तेयथासारमुहुर्मुहुः ६६

संगमाह बलिपूजामिति ५९ परविद्धायामनिष्टफ-
लमाह सोमइत्यादिना ६० ६१ ६२ ६३ अथयष्टिकाकर्षणेनजयाजयज्ञानप्रसंगमाह प्रतिपदिति ६४ ६५ ६६

६७ ६८ ६९ इतिकार्तिकमाहात्म्यटीकायांदशमोऽध्यायः १० छ नारदउवाच १ अथयमद्वितीयाविधानमाह यदीति यमद्वितीयाख्यायाः प्रयोजनंवक्तुमन्यासामप्याह पाद्मे स्कंदेनास्तिथयो नूनंद्वितीयाद्याश्चविश्रुताः मासैश्चतुर्भिश्चननः प्रावृट्कालेसुखावहाः प्रथमाश्रावणेमासितथाभाद्रपदेपरा तृतीयाऽश्वयुजेमासिचतुर्थीकार्तिकेभवेत् कलुषाश्रावणेमासितथाभाद्रपदेऽमला अश्विनेप्रेतसंचराकार्तिकेयाम्यकामता पुरावृत्रवधेवृत्तेप्राप्तराज्येपुरंदरे ब्रह्महत्यापनोदार्थमश्वमेधःप्रकीर्तितः क्रोधादिंद्रेणवज्रेण ब्रह्महत्यानिषूदिता षड्विधासाक्षितौक्षिप्तावृक्षतोयमहीतले नार्यांभ्रूणहरेवन्हौसंविभज्ययथाक्रमं तत्सापश्रवणात्पूर्वंद्वितीयायादिनेनघ नारीवृक्षनदी

समसंख्याद्वयोःकार्यास्सर्वेपिबलवत्तराः जयोत्रहीनजातीनांजयोराज्ञस्तुवत्सरम् ६७ उभयोःपृष्ठतःकार्या
रेखासाकर्षकोपरि रेखांनेयोनयेत्तस्यजयोभवतिनान्यथा ६८ जयचिन्हमिदंराजानिदधीतप्रयत्नतः ६९
इतिश्रीचतुःपुराणसारसंग्रहेकार्तिकमासमाहात्म्येकार्तिकशुक्लप्रतिपदामाहात्म्यवर्णनंनामदशमोऽध्यायः १० छ नारदउवाच भगवन्प्रष्टुमिच्छामित्वामहंविनयान्वितः तद्व्रतंब्रूहिमेमर्त्योमृत्युंयेननपश्यति १ ब्रह्मोवाच यदिपृच्छसिविप्रेंद्रव्रतानामुत्तमंव्रतम् व्रतंयमद्वितीयाख्यंशृणुत्वंमृत्युनाशनम् २

भूमिवन्हिभ्रूणहनस्तया कलुषीभवनंजातात्स्यतोऽर्थंकलुषास्मृता मधुकैटभयोरक्तेपुराप्राप्तामेदिनी अष्टांगुलापवित्रासानारीणांतुरजो नद्यःप्रावृणमलाःसर्वावन्हेरूर्ध्वंमषीमलः निर्यासमलिनोवृक्षाःसंगाद्भ्रूणहनोमलाः कलुषाणिचरंत्यस्यांतेनैषाकलुषामता देवर्षिपितृधर्माणांनिंदकानास्तिकाःशठाः तेषांसावाङ्मलास्पृता द्वितीयातेननिर्मला अनध्यायेषुशास्त्राणिपाठयंतिपठंतिच सांख्यकास्तार्किकाः श्रौतास्तेषांशब्दापशब्दजान् मलास्पूताद्वितीयायांततोर्थेनिर्मलाचसा कृष्णस्यजन्मनावत्सत्रैलोक्यंपावितंभवेत् नभस्येतेननिर्दिष्टानिर्मला : अग्निष्वात्ताबर्हिषदआज्यपाःसोमपास्तथा पितॄन्पितामहान्प्रेतसंचारात्प्रेतसंचरा प्रेतास्तुपितरःप्रोक्तास्तेषांतस्यांतुसं

वृ·ज्यो·र्ण
धर्मस्कंध
२९७

चरः पुत्रपौत्रैस्तु दौहित्रैः स्वधामंत्रैस्तु पूजिताः श्राद्धदानमखैस्तृप्ता यांत्यतः प्रेतसंचरा महालयेतुप्रेतानां संचारो भुवि दृश्यते तेनैषाप्रेतसंचाराकीर्तिताशिखिवाहन यमस्य क्रियते पूजा यतोऽस्यां पावकेनरैः तेनैषायाम्यका प्रोक्ता सत्यंसत्यंमयोदितम् सनत्कुमारसंहितायां अस्यां निजगृहे देवि न भोक्तव्यं कदाचन ये भुंजते दुराचारा नरके ते पतंति च श्रावणेतु पितृव्यस्य कन्याहस्तेन भोजनम् १०

मासस्त·४
का·मा·८
अ·११

कार्तिके मासि शुक्लायां द्वितीयायां मुनीश्वर कर्तव्यं तद्विधानेन सर्वमृत्युनिवारणम् ३ ब्राह्मे मुहूर्ते चोत्थाय द्वितीयायां मुनीश्वर मनसा चिंतयेदात्महितं नैवाहितं स्मरेत् ४ प्रातः स्नानं ततः कुर्याद्दंतधावनपूर्वकं ततः शुक्लांबरधरः शुक्लमाल्यानुलेपनः ५ कृतनित्यक्रियो हृष्टः कुंडलांगदभूषितः औदुंबरतरुं गत्वा कृत्वा मंडलमुत्तमं ६ पद्ममष्टदलं कृत्वा तस्मिन्नौदुंबरे शुभे विधिं विष्णुं च रुद्रं च वरदां च सरस्वतीम् ७ वीणापुस्तकसंयुक्तां पूजयेत्स्वस्थमानसः चंदनागरुकस्तूरीकुंकुमैर्द्विजसत्तम ८ पुष्पैर्धूपैश्च नैवेद्यैर्नारिकेलफलादिभिः ततो मृत्युविनाशार्थं साष्टकारां पयस्विनीं ९ विप्राय वेदविदुषे गां दद्यात्सवत्सकां अपमृत्युविनाशार्थं संसारार्णवतारकां १० हे विप्र त्वामिमां सौम्यां धेनुं संप्रददाम्यहं इतिमंत्रेण गां दद्याद्विप्राय ब्रह्मवादिने ११ तदलाभे तु विप्राय भक्त्या दद्यादुपानहौ ततः पूजां समाप्याथ भक्तिमान्पुरुषोत्तमे १२ ज्ञातिश्रेष्ठान्वयोवृद्धान्सम्यग्भक्त्याभिवादयेत् नानाविधैः फलै रम्यैस्तर्पयेत्स्वजनानपि १३ ततः सोदरसंपन्ना भगिनी या भवेन्मुने तस्या गृहं समागत्य सम्यग्भक्त्याभिवादयेत् १४

भाद्रमासके पितुर्भ्रातुः स्वसुः कन्ये आश्विने तु तयोः क्रमात् अवश्यं कार्तिके मासि भोक्तव्यं भगिनी करादिति २ ३ ४ ५ ६ ७ ८ ९ १० ११ गोदानाभावे ब्राह्मे कार्तिकमाहात्म्ये विशेषः तदलाभे चोदकुंभं सहिरण्यं सदक्षिणं औदुंबरविधानेन संप्रदद्याद्द्विजन्मन इति १२ १३ १४ ध ध ध

३६

१५ १६ १७ १८ १९ २० २१ २२ २३

भगिनीस्त्वंभगेभद्रेत्वदंघ्रिसरसीरुहम् श्रेयसेयनमस्कर्तुंआगतोस्मितवालयम् १५ इत्युक्त्वाभगिनींतांतुविष्णु
बुद्ध्याभिवादयेत् नदातुभगिनीश्रुत्वाभ्रातुर्वचनमुत्तमम् १६ भगिन्याभ्रातरंवाक्यंवक्तव्यंप्रतिनारद अद्यभ्रा
तरहंभ्रातस्त्वत्तोधन्यास्मिमंगला १७ भोक्तव्यंतेद्यमद्गेहेस्वायुषेकुलदीपक कार्तिकेशुक्लपक्षस्याद्वितीयायां
सहोदर १८ यमोयमुनयापूर्वंभोजितःस्वगृहेर्चितः अस्मिन्दिनेयमेनापिनारकीयाश्चमोचिताः १९ अपिबद्धाः
कर्मपाशैःस्वेच्छयापर्यटंतिते स्वस्रोर्नरोवेश्मनियोनभुंक्तेयमद्वितीयादिनमत्रलब्ध्वा तंपापिनंप्राप्यवयंसुहृष्टाः
प्रभक्षयामोद्यचभक्ष्यहीनाः २० इतिपापारटंतीहब्रह्महत्यादयस्तथा तस्माद्भ्रातर्मद्गृहेतुभोजनंकुरुकार्तिके
२१ शुक्लायांतुद्वितीयायांविश्रुतायांजगत्त्रये अस्यांनिजगृहे पुत्र भुज्यतेनबुधैरपि २२ इत्युक्तःसतथेत्युक्त्वा-
भगिनींपूजयेद्व्रती प्रहृष्टात्सुमहाभागवस्त्रालंकारभूषणैः २३ अग्रजामभिवंद्याथआशिषंचप्रगृह्यच सर्वाभ-
गिन्यः संतोष्यावस्त्रालंकारदानतः २४ अभावेस्वस्यतुस्वसुः पितृव्याःस्वपितुःस्वसा तस्यागृहंसमागत्यकु
र्याद्भोजनमादरात् २५ एवंयःकुरुतेपुत्रद्वितीयांयमनामिकां अपमृत्युविनिर्मुक्तःपुत्रपौत्रादिभिर्वृतः २६ इहभु
क्त्वातुविपुलान्भोगानन्यान्यथेप्सितान् अंतेमोक्षमवाप्नोतिनान्यथामद्वचोभवेत् २७ व्रतान्येतानिसर्वाणिदाना
निविविधानिच गृहस्थस्यैवयुज्यंतेतस्माद्गार्हस्थ्यमाश्रयेत् २८ कथायमद्वितीयायाःव्रतस्थःशृणुयान्नरः तस्यस
र्वाणिपापानिनश्यंतीत्याहमाधवः२९ सूतउवाच कार्तिकेचद्वितीयायांपूर्वाह्णेयममर्चयेत् भानुजायांनरःस्ना-
त्वायमलोकंनपश्यति ३०

२४ २५ २६ २७ २८ २९ भानुजायांयमुनायां ३०

३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९ ४०

कार्तिकेशुक्लपक्षेतुद्वितीयायांतुशौनक यमोयमुनयापूर्वंभोजितःस्वगृहेर्चितः ३१ द्वितीयायांमहोत्सर्गोना
रकीयाश्वतर्पिताः पापेभ्योविप्रयुक्तास्तेमुक्ताःसर्वेनिबंधनात् ३२ अन्नाशितास्वसंतुष्टाःस्थिताःसर्वेयदृच्छया
तेषांमहोत्सवोवृत्तोयमराष्ट्रसुखावहः ३३ अतोयमद्वितीयेयंत्रिषुलोकेषुविश्रुता तस्मान्निजगृहेविप्रनभोक्तव्यं
ततोबुधैः ३४ स्नेहेनभगिनीहस्ताद्भोक्तव्यंबलवर्द्धनं ऊर्जेशुक्लद्वितीयायांपूजितस्तर्पितोयमः ३५ महिषासन
मारूढोदंडमुद्गरभृत्प्रभुः वेष्टितःकिंकरैर्हृष्टैस्तस्मैयाम्यात्मनेनमः ३६ यैर्भगिन्यःसुवासिन्योवस्त्रदानादितो·
षिताः नतेषांवत्सरंयावत्कलहोनरिपोर्भयं ३७ धन्यंयशस्यमायुष्यंधर्मकामार्थसाधनम् व्याख्यातंसकलपु
त्रसरहस्यंमयानघ ३८ यस्यांतिथौयमुनयायमराजदेवःसंभोजितःप्रतितिथौस्वसृसौहृदेन तस्मात्स्वसुःकरत
लादिहयोभुनक्तिप्राप्नोतिवित्तशुभसंपदमुत्तमांसः ३९ सूतउवाच अत्रविशेषःसंप्रोक्तोवालखिल्यैर्मह
र्षिभिः तदहंसंप्रवक्ष्यामिशृणुध्वंमुनिसत्तमाः ४० वालखिल्याऊचुः कार्तिकस्यासितेपक्षेद्वितीयायमसं
ज्ञिता तत्रापरान्हेकर्तव्यंसर्वथैवयमार्चनम् ४१ प्रत्यहंयमुनागत्ययमंसंप्रार्थ्य यत्सुरा भ्रातर्ममगृहेयाहिभो
जनार्थंगणावृतः ४२ अद्यश्वोवापरश्वोवाप्रत्यहंवदतेयमः कार्यव्याकुलचित्तानामवकाशोनजायते ४३ तदै
कदायमुनयाबलात्कारान्निमंत्रितः सगतःकार्तिकेमासिद्वितीयायांमुनीश्वराः ४४ नारकीयजनान्मुक्त्वागणैःस
हरवैःसुतः कृतातिथ्योयमुनयानानापाकाःकृताःखग ४५ कृताभ्यंगोयमुनयातैलैर्गंधमनोहरैः उद्वर्तनंला·
पयित्वास्नापितःसूर्यनंदनः ४६

४१ ४२ ४३ ४४ ४५ ४६

३७

४७ ४८ ४९ ५० ५१ ५२ वीरेशःकाशीक्षेत्रस्थः ५३ ५४ ५५

ततोलंकारकंदत्तंनानावस्त्राणिचंदनम् माल्यानिचप्रदत्तानिमंचोपरिउपाविशत् ४७ पक्वान्नानिविचित्राणि
कृत्वासास्वर्णभाजने यमायाभोजयद्देवीयमुनाप्रीतमानसा ४८ भुक्त्वायमोपिभगिनीमलंकारैःसमर्चयत् नाना
वस्त्रैस्ततःप्राहवरंवरयभामिनि ४९ इतितद्वचनंश्रुत्वायमुनावाक्यमब्रवीत् यमुनोवाच प्रतिवर्षंसमागच्छ
भोजनार्थंतुमद्गृहे ५० अद्यसर्वेमोचनीयाःपापिनोनरकाद्यम येद्यैवभगिनीहस्तात्करिष्यंतिचभोजनम् ५१
तेषांसौख्यंप्रदेहित्वमेतदेववृणोम्यहम् यमउवाच यमुनायांतुयःस्नात्वासंतर्प्यपितृदेवताः ५२ भुंक्तेचभ
गिनीगेहेभगिनींपूजयेदपि कदाचिदपिमद्द्वारंनसपश्यतिभानुजे ५३ वीरेशैशानदिग्भागेयमतीर्थंप्रकीर्तितम्
तत्रस्नात्वाचविधिवत्संतर्प्यपितृदेवताः ५४ पठेदेतानिनामानिआमध्यान्हेनरोत्तमः सूर्यस्याभिमुखोमौनीद्:
तच्चित्तःस्थिरासनः ५५ यमोनिहंतापितृधर्मराजोवैवस्वतोदंडधरश्चकालः भूताधिपोदत्तकृतानुसारीकृतांतमे
तद्दशभिर्जपंति ५६ ततोयमेश्वरपूज्य भगिनीगृहमाव्रजेत् मंत्रेणानेनचतयाभोजितःपूर्णमादरात् ५७ भ्रात
स्त्वचानुजाताहंभुंक्ष्वभक्तमिदंशुभम् प्रीतयेयमराजस्ययमुनायाविशेषतः ५८ ततःसंतोष्यभगिनींवस्त्रालंकार
णादिभिः स्वप्नेपियमलोकस्यभविष्यतिनदर्शनम् ५९ नृपैःकारागृहेयेचस्थापिताममवासरे अवश्यंतेप्रेष
णीयाभोजनार्थंस्वसुर्गृहे ६० विमोक्तव्यामयापापानरकेभ्योद्यवासरे येद्यवंदींकरिष्यंतितेताड्याममसर्वथा
६१ कनीयसीस्वसानास्तितदाज्येष्ठागृहंव्रजेत् तदभावेसपत्नायाःपितृव्यास्तदभावतः ६२

५६ ५७ ५८ ५९ ६० ६१ भगिन्यभावेउपायमाह तदभावइति ६२

६३ ६४ ६५ ६६ ६७ ६७ ६८ ६९ ७०

तदभावेमातृष्वसामातुलस्यात्मजातथा सापत्नगोत्रसंबंधैःकल्पयेदथवाक्रमम् ६३ सर्वाभावेमाननीयाभगि
नीकाचिदेवहि गोनद्याद्यथवालस्याभ्रभावेसतिकारयेत् ६४ तदभावेप्यरण्यादिकल्पयित्वासहोदरां अस्यानि
जगृहेदेवीनभोक्तव्यंकदाचन ६५ येभुंजंतेदुराचारानरकेतेपतंतिच एवमुक्त्वाधर्मराजोययौसंयमिनींततः ६६
तस्मादृषिवराः सर्वेकार्तिकव्रतकारिणः भुंजंतिभगिनीहस्तात्सत्यंसत्यंनसंशयः ६७ यमद्वितीयांयःप्राप्य
भगिनीगृहभोजनम् नकुर्याद्वर्षजंपुण्यंनश्यतीतिरवेःश्रुतिः ६८ यातुभोजयतेनारीभ्रातरंभ्रातृकेतिथौ अ·
र्चयेच्चापितांबूलैर्नसावैधव्यमाप्नुयात् ६९ भ्रातुरायुःक्षयोनूनंनभवेत्तत्रकर्हिचित् अपराह्नव्यापिनीसाद्वि
तीयाभ्रातृभोजने ७० अज्ञानाद्यदिवामोहान्नभुक्तंभगिनीगृहे प्रवासिनाद्यभावाद्वाज्वरितेनाथवांदिना ७१
एतदाख्यानकंश्रुत्वाभोजनस्यफलंभवेत् कार्तिकेतुविशेषेणधात्रीछायांसमाश्रितः ७२ भोजनंकुरुतेयस्तुसवै·
कुंठमवाप्नुयात् ७३ इतिश्रीचतुःपुराणसारसंग्रहेकार्तिकमासमाहात्म्येयमद्वितीयामाहात्म्यवर्णनंनामैका
दशोऽध्यायः ११ ६९ शौनकउवाच कार्तिकस्यचमाहात्म्यमहत्पुण्यफलप्रदम् कदाधात्रीसमुत्प
न्नाकथंसाख्यातिमागता १ कस्मादियंपवित्राचकस्मात्पापप्रणाशिनी आमर्दकीकृताकेनकथयस्वात्रविस्तरा
त् २ सूतउवाच कथयामिद्विजश्रेष्ठयथाचेयंहिपुण्यदा ऊर्जशुक्लचतुर्दश्यांधात्रीपूजांसमाचरेत् ३

७१ ७२ ७३ इतिकार्तिकमाहात्म्यटीकायामेकादशोऽध्यायः ११ ६९ अथधात्रीछायाभोजनमाहात्म्यश्रवणो
नात्युत्सुकोमुनिः तद्विशेषमाहात्म्यंपरिपृच्छति शौनकउवाच १ आसमंतात्पापंमर्दयतीतिआमर्दकी २ ३

४ ५ अष्टोत्तरंशतंयथाभवति तथा ६ ७ दद्यादितिशेषः भवतीतिचशेषः ८ कथामितिशेषः ९ १० देवाधिदेवेशः

आमर्दकीमहावृक्षः सर्वपापप्रणाशनः वैकुंठाख्यचतुर्दश्यांधात्रीछायांगतोनरः ४ पूजयेत्तत्रदेवेशंराधयासहितंहरिम् प्रदक्षिणांततः कुर्याच्छतमष्टोत्तरंतथा ५ सुवर्णरजतैर्वापिफलैरामलकैस्तथा शतमष्टोत्तरंकुर्यादेकैकेनप्रदक्षिणां ६ साष्टांगंप्रणतोभूत्वाप्रार्थयेत्परमेश्वरम् धात्रीछायांसमाश्रित्यशृणुयाच्चकथामिमाम् ७ ब्राह्मणान्भोजयेत्पश्चाद्यथाशक्त्याचदक्षिणाम् ब्राह्मणेषुचतुष्टेषुतुष्टोमोक्षप्रदोहरिः ८ अत्रतेकथयिष्यामि महापुण्यफलप्रदाम् आमर्दकीफलंवक्तुंब्रह्माचापिनपार्यते ९ एकार्णवेपुराजातेनष्टेस्थावरजंगमे नष्टेदेवासुरगणेप्रणष्टोरगराक्षसे १० तत्रदेवाधिदेवेशः परमात्मासनातनः जजापब्रह्मपरममात्मनःपरमाव्ययम् ११ ततोस्यब्रह्मजपतःनिगमच्छ्वसितात्मनः तद्दर्शनानुरागेणनेत्राभ्यामगमज्जलम् १२ प्रेमाश्रुभरनिर्भिन्नः भूयोबिंदुःपपातसः तस्माद्बिंदोःसमुत्पन्नः स्वयंधात्रीनगोमहान् १३ शाखाप्रशाखाबहुलोफलभारेणपीडितः सर्वेषामेववृक्षाणामादिरोहः प्रकीर्तितः १४ ब्रह्मातमसृजत्पूर्वंतत्पश्चाच्चासृजत्प्रजाः देवदानवगंधर्वयक्षराक्षसपन्नगान् १५ असृजत्भगवान्देवोमानुषांश्चतथामलान् आजग्मुस्तत्रदेवास्तेयत्रधात्रीहरिप्रिया १६ तांदृष्ट्वाते महाभागाःपरमंविस्मयंगताः नजानीमइमंवृक्षंचिंतयंतोमुहुर्मुहुः १७ एवंचिंतयतांतेषांवागुवाचाशरीरिणी आमर्दकीनगोह्येषप्रवरोवैष्णवोयतः १८ अस्यवैस्मरणादेवलभेद्गोदानजंफलम् दर्शनाद्विगुणंपुण्यंत्रिगुणंभक्षणात्तथा १९

ब्रह्मा ब्रह्म ब्रह्मरूपंमाहाविष्णुं ११ १२ धात्रीनगः धात्रिवृक्षः
१३ पीडितः अतिभारेणनम्रइत्यर्थः आदिरोहः आदिवृक्षः १४ १५ १६ १७ १८ १९

वृ॰ज्यो॰र्ण॰
धर्मस्कंध॰
३००

२० स्कंधोमूलाच्छाखावधिभागः अस्त्रीप्रकांडः स्कंधः स्यान्मूलाच्छाखावधिस्तरोःइत्यमरः २१ सवितारः द्वादशसूर्याः प्रशाखासु
इंद्रादिलोकपालाः पर्णेषुत्रयस्त्रिंशत्कोटयः देवताः पुष्पेषु मरुतः मरुद्गणाः २२ प्रजानांपतयः दक्षादयः २३ २४ २५

तस्मात्सर्वप्रयत्नेनसेव्याआमर्दकीसदा सर्वपापहराप्रोक्तावैष्णवीपापनाशिनी २० तस्यामूलेस्थितोविष्णुस्त
दूर्ध्वेचपितामहः स्कंधेचभगवान्रुद्रःसंस्थितःपरमेश्वरः २१ शाखासुसवितारश्चप्रशाखासुचदेवताः पर्णे-
षुदेवताःसंतिपुष्पेषुमरुतस्तथा २२ प्रजानांपतयःसर्वेफलेष्वेवंव्यवस्थिताः सर्वदेवमयीत्येषाधात्रीवैकथिता
मया २३ अतःसापूजनीयाचसर्वकामार्थसिद्धये एकदानारदोयोगीब्रह्मणःपुरतःस्थितः २४ नमस्कृत्वाजग
न्नाथंपप्रच्छातीवविस्मितः श्रीनारदउवाच यथाप्रियसुतुलसीकाननंसर्वदाहरेः २५ तथाधात्रीवनंमासे
कार्तिकेश्रीहरिप्रियम् ब्रह्मोवाच धात्रीवनेहरेःपूजाधात्रीछायासुभोजनम् २६ कार्तिकेमासियःकुर्यात्त
स्यपापंविनश्यति तीर्थानिमुनयोदेवायज्ञाःसर्वेपिकार्तिके २७ नित्यंधात्रींसमाश्रित्यतिष्ठंत्यर्केतुलास्थिते यत्किं
चित्कुरुतेपुण्यंधात्रीछायासुमानवः २८ तत्कोटिगुणितंभूयान्नात्रकार्याविचारणा अत्रैवोदाहरंतीममितिहा
संपुरातनम् २९ अयोध्यानगरेकश्चिद्वैश्यश्चासीद्द्विजोत्तम पुत्रदारविहीनश्चदैवाद्दारिद्रपीडितः ३० भिक्षया
चोदराग्निंसशमयामासनारद कदाचिद्वणिजोवैश्योयथाचेत्क्षुत्प्रपीडितः ३१ भिक्षाप्रचणकान्गृह्यधात्रीछा
यामगात्किल तत्रतान्भक्षयामासकार्तिकेमासिनारद ३२ केचिदुर्वरितास्तेषुचणकास्तत्रनारद वैश्येनतेनद-
त्ताहिक्षुत्क्षामायद्विजातये ३३ तेनपुण्यप्रभावेनराजासीद्धनिकःक्षितौ तस्माद्दानंप्रकर्तव्यंकार्तिकेमासिसर्वदा ३४

२६ २७ २८ २९ ३० ३१ ३२ तत्रधात्रीछायायां ३३ ३४ ५

मासस्त॰४
का॰मा॰८
अ॰१२

३५ ३६ ३७ ३८ ३९ ४० ४१ ४२ ४३ ४४

धात्रीवनेमुनिश्रेष्ठसर्वकामार्थसिद्धये धात्रीछायांसमाश्रित्यकार्तिकेचहरेः कथाम् ३५ यःशृणोतिसपापेभ्यो
मुच्यतेद्विजसूनुवत् नारदउवाच कोभूद्द्विजसुतोब्रह्मन्किंपापंकृतवान्पुरा ३६ तस्यजाताकथंमुक्तिरेतद्वि
स्तरतोवद ब्रह्मोवाच पुराद्विजवरश्चासीत्कावेर्यासुन्दरेतटे ३७ देवशर्मेतिविख्यातोवेदवेदांगपारगः तस्य
पुत्रोदुराचारस्तमाहचपिताहितम् ३८ इदानींकार्तिकोमासःवर्ततेहरिवल्लभः तत्रस्नानंचदानंचव्रतानिनियमान्कु
रु ३९ तुलसीपुष्पसहितांकुरुपूजांहरेःसुत दीपदानंचविविधंनमस्कारंप्रदक्षिणाम् ४० एवंपितुर्वचःश्रुत्वा·
पुत्रःक्रोधसमन्वितः पितरंप्राहदुष्टात्माचलदोष्ठोविनिंदयन् ४१ पुत्रउवाच नकरिष्याम्यहंतातकार्तिकेपुण्य
संग्रहम् इतिपुत्रवचःश्रुत्वासक्रोधःप्राहतंसुतम् ४२ मूषकोभवदुर्बुद्धेवनेवृक्षस्यकोटरे इतिशापभयाद्भीतो
नत्वापितरमब्रवीत् ४३ दुर्योनेर्मममुक्तिःस्यात्कथंतद्वदमेगुरो इतिप्रसादितोविप्रःप्राहनिष्कृतिकारणम् ४४
यदोर्जव्रतजंपुण्यंशृणोषिहरिवल्लभम् तदातेभवितामुक्तिस्तत्कथाश्रवणात्सुत ४५ सपित्राचैवमुक्तस्तत्·
क्षणान्मूषकोऽभवत् बहुवर्षसहस्राणिगह्वरेविपिनेवसन् ४६ एकदाकार्तिकेमासिविश्वामित्रःसशिष्यकः
स्नात्वानद्यांहरिंचार्च्यधात्रीछायांसमाश्रितः ४७ कथयामासमाहात्म्यंशिष्येभ्यश्चोर्जसंभवम् तदाकश्चिद्दुरा
चारोव्याधोगान्मृगयांचरन् ४८ दृक्षाऋषिगणान्हंतुंकृतेच्छुःप्राणिघातकः तेषांदर्शनमात्रेणसद्बुद्धिरभवत्त·
दा४९ अथोवाचद्विजान्नत्वाभवद्भिःक्रियतेत्रकिम् तेनैवमुक्तोविप्रेंद्रोविश्वामित्रस्तमब्रवीत् ५०

४५ ४६ ४७ ४८ ४९ ५० ५१ ५२ ५३

विश्वामित्रउवाच सर्वेषामेवमासानांकार्तिकःश्रेष्ठउच्यते यस्मिन्यत्क्रियतेकर्मवर्धतेवटबीजवत् ५१ कार्तिके
मासियःकुर्यात्स्नानंदानंचपूजनम् विप्राणांभोजनंचैवतदक्षय्यफलंभवेत् ५२ व्याधप्रयुक्तमाकर्ण्यधर्मंचऋषि
णाद्विजः मौषकंदेहमुत्सृज्यदिव्यदेहोभवत्तदा ५३ विश्वामित्रंप्रणम्याथस्ववृत्तांतंनिवेद्यच अनुज्ञातोथऋषि
णाविमानस्थोदिवंययौ ५४ विस्मितोगाधिपुत्रस्तुव्याधश्चैवविशेषतः व्याधोप्यूर्जव्रतंकृत्वाजगामहरिमंदिरम्
५५ तस्मात्सर्वप्रयत्नेनकार्तिकेकेशवाग्रतः धात्रीछायांसमाश्रित्यकथाश्रवणमाचरेत् ५६ मूषकोपिचदुर्यो
नेर्मुक्तऊर्जकथाश्रुतेः शृणुयाच्छ्रावयेद्योवामुक्तिभागीनसंशयः ५७ धात्रीछायांसमाश्रित्यवनभोजनमाचरेत् आ
दौकृत्वातथास्नानमुदकेवनसंस्थिते ५८ कृत्वाकर्माणिनित्यानिमाधवंपूजयेत्ततः धात्रीछायांसमाश्रित्यहरौभक्ति
समन्वितः ५९ शृणुयाच्चकथांदिव्यांमासमाहात्म्यशंसनीं ततस्तुब्राह्मणान्भक्त्याभोजयेद्ब्रह्मवित्तमान् ६०
ततोभुंजीतविप्रेंद्रस्वयंहरिमनुस्मरन् एवंकृतेव्रतेविप्रकार्तिकेहरिवल्लभे ६१ यत्पापंनश्यतेपुत्रसावधानमनाःशृ
णु हरेर्नार्पितभोगाच्चभोजनेसूर्यदर्शनात् ६२ रजस्वलावाक्श्रवणपापात्भोजनकेतया भोजनावसरेचान्यस्पर्श
दोषस्तुयद्भवेत् ६३ निषिद्धभोजनात्तस्माद्भोजनेचान्नदूषणात् शूद्रस्यापितथात्यागात्पुण्यकालेहरिप्रिये ६४ एतै
र्यत्साधितंपापंतत्सर्वंनश्यतिध्रुवम् तस्मात्सर्वप्रयत्नेनधात्र्यांभोजनमाचरेत् ६५ कार्तिकेमासियोविप्रोधात्रीमा·
लांतुयोवहेत् तथैवतुलसीमालांतस्यपुण्यमनंतकम् ६६ धात्रीछायांसमाश्रित्यदीपमालार्पणंनरः करिष्यतिवि
शेषेणतस्यपुण्यमनंतकम् ६७

४०

६८ ६९ ७० ७१ ७२ ७३ ७४ ७५ ७६ अंतेवैकुंठं

राधादामोदरौपूज्यौतुलस्यधोविशेषतः तुलस्यभावेकर्तव्यापूजाधात्रीतलेशुभा ६८ धात्रीछायातलेयेनसकृदु
कृतंतुकार्तिके दंपतीभोजनंदत्तमन्नदोषात्प्रमुच्यते ६९ संपूर्णकार्तिकेयस्तुसंपूज्यामलकींशुभाम् राधादामोद
रप्रीत्यैभोजनीयौचदंपती पश्चात्स्वयंतुभुंजीतनश्रीस्तस्यक्षयंव्रजेत् ७० यःकश्चिद्वैष्णवोलोकेधत्तेधात्रीफलंमुने
प्रियोभवतिदेवानांमनुष्याणांचकाकथा ७१ धात्रीफलविलिप्तांगोधात्रीफलसमन्वितः धात्रीफलकृताहारोनरोना
रायणोभवेत् ७२ धात्रीफलानियोनित्यंवहतेकरसंपुटे तस्यनारायणोदेवोवरमिष्टंप्रयच्छति ७३ श्रीकामःसर्वदा
स्नानंकुर्यादामलकैर्नरः तुष्यत्यामलकैर्विष्णुरेकादश्यांविशेषतः ७४ नवम्यांदर्शसप्तम्यांसंक्रांतौरविवासरे चंद्र
सूर्योपरागेचस्नानमामलकैस्त्यजेत् ७५ धात्रीछायासमाश्रित्यकुर्यात्पिंडंतुयोनरः प्रयांतिपितरोमुक्तिंप्रसादान्
माधवस्यतु ७६ मूर्ध्निपाणौमुखेचैवबाह्वोःकंठेतुयोनरः धत्तेधात्रीफलंवत्सधात्रीफलविभूषितः ७७ यावल्लुठ
तिकंठस्थाधात्रीमालानरस्यहि तावत्तस्यशरीरेतुप्रीत्यालुंठतिकेशवः ७८ धात्रीफलंचतुलसीमृत्तिकाद्वारकोद्भ
वा सफलंजीवितंतस्यत्रितयंयस्यवेश्मनि ७९ यावद्दिनानिवहतेधात्रीमालांकलौनरः तावद्युगसहस्राणिवैकुं
ठेवसतिर्भवेत् ८० मालायुग्मंवहेद्यस्तुधात्रीतुलसिसंभवम् योनरःकंठदेशेतुकल्पकोटिदिवंवसेत् ८१ धा
त्रीछायांगतोयस्तुद्वादश्यांपूजयेद्धरिम् तत्रैवभोजनंयस्तुब्राह्मणानांचकारयेत् ८२ स्वयंचतत्रभुंक्तेयःसूपभक्षा
दिकंतथा नतस्यपुनरावृत्तिःकल्पकोटिशतैरपि ८३ तुलस्याश्चैवधात्र्याश्चफलैःपत्रैर्हरिंयजेत् तुलसीधात्रीयुक्ताहि
सिक्केसान्त्वकार्तिके ८४

यातीत्यर्थः ७७ ७८ ७९ ८० ८१ ८२ ८३ ८४

धर्मदत्तकथां चाग्रे विस्तरेणवक्ष्यति ८५ ८६ ८७ ८८ अथवनभोजनविधानमाह समाइति ८९ ९० ९१

विलयंयांतिपापानिब्रह्महत्यादिकानिच धर्मदत्तोद्विजःपूर्वंयथामुक्तिमवापह ८५ नारदउवाच कार्तिकेमा-
सिसासेव्यापूजनीयासदानरैः चातुर्मास्येनसेव्यासाइत्युक्तंभवतापुरा ८६ तस्मात्सर्वमशेषेणकथयस्वममाग्रतः
ब्रह्मोवाच कार्तिकेमासिविप्रर्षेशुक्लायांदशमीशुभा ८७ नहिनारभ्यसासेव्यादैवेपित्र्येचकर्मणि दशम्या
रभ्यतस्तैःफलकैर्मधुसूदनम् ८८ पूजयंतिनरायेवैतेवैवैकुंठगामिनः समाप्तेकार्तिकघ्नेवनभोजनमाच-
रेत् ८९ दशम्यांवाथद्वादश्यांपौर्णमास्यामथापिवा पंचम्यांवामहाभागवनभोजनमाचरेत् ९० सर्वोपस्कर
संयुक्तःवृद्धबालैश्चसंयुतः वनंप्रवेशयेद्धीमान्धात्रीवृक्षैःसुशोभितम् ९१ चूतैर्बकैस्तथाश्वत्थैः पिचुमंदैः
कदंबकैः न्यग्रोधतिंतिणीवृक्षैःसमंतात्परिशोभितम् ९२ तत्रगत्वामहाप्राज्ञपुण्याहंकारयेत्पुरा वास्तुपी
ठंतथापूज्यधात्रीमूलेतुकारयेत् ९३ वेदिकांचतुरस्रांचहस्तमात्रायतांशुभाम् तयोपवेदिकांकृत्वावेदिकाग्रे
महामते ९४ उपवेशायदेवस्यस्थलंकार्यंतुधातुभिः वेदिकापश्चिमेभागेकारयेत्कुंडमंडपम् ९५ मेखलात्रय
संयुक्तंपिप्पलछदसंयुतम् हस्तमात्रायतंसौम्यएवंकुंडंतुकारयेत् ९६ पश्चात्स्नात्वाततोजस्वादेवपूजांसमाच
रेत् पश्चादग्निंसमाधायहोमंकुर्याद्यथाविधि ९७ पायसाज्यगुडस्रूपपालाशसमिधातथा ग्रहाणांवास्कंदे
देभ्योचरुंकृत्वाप्रयत्नतः ९८ धात्रीशांतिस्तथाकांतिर्मायाप्रकृतिरेवच विष्णुपत्नीमहालक्ष्मीरमामाकमलात
था ९९ इंदिरालोकमाताचकल्याणीकमलातथा सावित्रीचजगद्धात्रीगायत्रीसुधृतिस्तथा १००

९२ ९३ ९४ ९५ पिप्पलछदसंयुतं योनिसहितं हे सौम्यनारद ९६ ९७ ९८ अथधात्रीनामानि धात्रीति ९९ १००

१०१ २ ३ ४ १०५ बलिप्रदानमंत्रानाह सूपेत्यादिना ६ ७ ८ ९ ११० अथपूर्णाहुत्यादिकृ

अंतज्ञाविश्वरूपाचस्कृपात्याब्धिसंभवा प्रधानदेवताभिस्कररक्षाहोमंसमारभेत् १०१ संस्रष्टेतिचमंत्रेणकृष
भंमेतिमंत्रतः अपूपंगुडसूपाभ्यांसंयुतंजुहुयाद्बुधिः २ अष्टोत्तरशतंहुत्वामूलमंत्रेणपायसम् ततोग्रहादिदे·
वांस्कयथासंख्येनहोमयेत् ३ धात्रीहोमेमहाप्राज्ञरक्षाहोमेतुपायसम् ततःस्विष्टकृतंहुत्वाबलिदानंसमाच
रेत् ४ इंद्रादिलोकपालांश्चरक्षापूज्याप्रयत्नतः धात्रीवृक्षस्यसर्वत्रवेदिकासंयुतस्यच १०५ सूपेनगुडमिश्रे·
णबलिंपश्चान्निवेदयेत् देवीधात्रिनमस्कभ्यंगृहाणबलिमुत्तमम् ६ मिश्रितंगुडसूपाभ्यांसर्वमंगलदायिनि
पुत्रान्देहिमहाप्राज्ञान्यशोदेहिशुभप्रदम् ७ प्रज्ञांमेधांचसौभाग्यंविष्णुभक्तिंचदेहिमे नीरोगंकुरुमेनित्यं
निष्पापंकुरुसर्वदा ८ वर्चस्कंकुरुमांदेविधनवंतंतथाकुरु इतितांप्रार्थयेद्देवींप्रादक्षिण्याद्बलिंन्यसेत् ९ ब·
लिप्रदानकालेतुयेकुर्वंतिप्रदक्षिणम् तेयांतिविष्णुसालोक्यंपितृभिःसार्द्धमेवच ११० ततःपूर्णाहुतिंकृत्वाहो
मशेषसमापयेत् धात्रीवृक्षस्यमूलस्थंमंदस्मितरमापतिम् ११ तेयांतिविष्णुसायुज्यंयेपश्यंतीहचक्षुषा वैश्व
देवंततःकृत्वापूजयेद्वनदेवताः १२ गंधाक्षतांततोदत्वाविप्रेभ्यःपद्मसंभव ब्राह्मणान्भोजयेत्पश्चात्स्वयंभुंजी
तबंधुभिः १३ गृहंप्रवेशयेत्पश्चात्वृद्धान्बालादिकैःसह ब्रह्मचारीभवेद्रात्रौक्षितिशायीभवेत्ततः १४ ग्रा
मस्थैश्चैवमीलित्वास्वयंवाकारयेद्बुधः सर्वपापविमुक्त्यर्थंवनभोजनमुत्तमम् ११५ कृत्वैवंसकलंकर्मकृष्णा
यचसमर्पयेत् अश्वमेधसहस्रस्यराजसूयशतस्यच ११६

स्यमाह ततइति १११ ११२

११३ ११४ ११५ अथवनभोजनकर्मणः फलश्रुतिमाह कृत्वेति ११६ ६९

अथधात्रीस्नानफलमाह स्नानादित्यादिना ११७ १८ १९ १२० २१ २२ २३
२४ १२५ १२६ अथधात्रीस्पर्शफलमाह संस्पृशन्निति १२७ १२८ अथधात्रीवृक्षरोपण-

यत्फलंसमवाप्नोतितत्फलंवनभोजने अतोधात्रीमहाभागपवित्रापापनाशनी १७ धात्रीचैवनृणांधात्रीधा
त्रीवत्कुरुतेक्रियाम् ददात्यायुःपयःपानात्स्नानाद्धर्मसंचयम् १८ अलक्ष्मीनाशनंस्नानमात्रैर्निर्वाणमाप्नुया
त् विघ्नानिनैवजायंतेधात्रीस्नानेनवैनृणाम् १९ तस्मात्त्वंकुरुविप्रेंद्रधात्रीस्नानंहियत्नतः प्रयास्यसिहरेर्धाम-
देवत्वंप्राप्यनारद १२० यत्रयत्रमुनिश्रेष्ठधात्रीस्नानंसमाचरेत् तीर्थेवापिगृहेवापितत्रतत्रहरिःस्थितः १२१ धा
त्रीस्नानेनविप्रर्षेयस्यास्थीनिकलेवरे प्रक्षाल्यंतेमुनिश्रेष्ठनसगर्भंगृहंवसेत् २२ धात्रीजलेनविप्रेंद्रयेषांकेशाश्च
रंजिताः तेनराःकेशवंयांतिनाशयित्वाकलेर्मलम् २३ धात्रीफलंमहापुण्यंस्नानंपुण्यतमंस्मृतम् पुण्यात्पुण्य
तरंवत्सभक्षणेमुनिसत्तम २४ नगंगानगयाकाशीनवेणीनचपुष्करं एकेवाहियथापुण्याधात्रीमाधववासरे १२५
धात्रीस्नानंहरेर्नामतथैवैकादशीव्रत गयाश्राद्धंतथावत्ससमानिमुनयोविदुः २६ संस्पृशन्यस्तुवैधात्रीमहन्यह
निमानवः मुच्यतेपातकैःसर्वैर्मनोवाक्कायसंभवैः २७ धात्रीफलैरमावास्यासप्तमीनवमीषुच रविवारेचसंक्रां
तौनस्नायान्मुनिसत्तम २८ यस्मिन्गृहेमुनिवरधात्रीतिष्ठतिसर्वदा तस्मिन्गृहेनगच्छंतिप्रेतकूष्मांडराक्षसाः
१२९ धात्रीफलकृतांमालांकंठस्थांयोवहेन्नहि सवैष्णवोनविज्ञेयोविष्णोर्भक्तिपरोयदि १३० नत्याज्यातुल
सीमालाधात्रीमालाविशेषतः तथापद्माक्षमालापिधर्मकामार्थमीप्सुभिः १३१

फलमाह यस्मिन्निति १२९ अथधात्रीफलधारणमाहात्म्यमाह धात्रीफलकृतामिति १३० १३१

१३२ १३३ १३४ १३५ इतिश्रीकार्तिकमाहात्म्यटीकायांद्वादशोऽध्यायः १२ छ अथकार्तिकमाहात्म्यंचक्रुमितिहासंप्रस्तौति श्रियइति एकदेतिशेषः १ २ ३ ४ ५ ६ ७ ८ ९ कारुण्यतामाह हानाथ·

यावद्दिनानिवहतेधात्रीमालांकलौनरः तावद्युगसहस्राणिवैकुंठेवसतिर्भवेत् १३२ सर्वदेवमयीधात्रीवासुदेवम
नःप्रिया आरोपणीयासेव्याचपूजनीयासदानरैः ३३ एतत्तेसर्वमाख्यातंधात्रीमाहात्म्यमुत्तमम् श्रोतव्यंचसदाभ
क्तैश्चतुर्वर्गफलप्रदम् ३४ धात्रीछायांसमाश्रित्यकार्तिकेन्नंभुनक्तियः अन्नसंसर्गजंपापमावर्षंतस्यनश्यति १३५
इतिश्रीचतुःपुराणसारसंग्रहेकार्तिकमासमाहात्म्येधात्रीमाहात्म्यवर्णनंनामद्वादशोऽध्यायः १२ छ सूतउ
वाच श्रियःपतिमथामंत्र्यगतेदेवर्षिसत्तमे हर्षोत्फुल्लाननासत्यावासुदेवमथाब्रवीत् १ सत्यभामाउवाच धन्या
स्मिकृतकृत्यास्मिसफलंजीवितंमम दानंव्रतंतपोवापिकिंतुपूर्वंकृतंमया २ येनाहंमर्त्यजादेवतवांगार्द्धहराऽभवं
भवांतरेचकिंशीलाकाचाहंकस्यकन्यका ३ तवाहंवल्लभाजातातद्वदस्वममाखिलं श्रीकृष्णउवाच शृणुष्वैकम-
नाःकांतेयथात्वंपूर्वजन्मनि ४ पुण्यव्रतंकृतवतीतत्सर्वंकथयामिते आसीत्कृतयुगस्यांतेमायापुर्यांद्विजोत्तमः ५
आत्रेयोदेवशर्मेतिवेदवेदांगपारगः तस्यातिवयसश्चासीन्नाम्नागुणवतीसुता ६ अपुत्रःसस्वशिष्यायचंद्रनाम्नेददौ·
सुतां तमेवपुत्रवन्मेनेसचतंपितृवद्वशी ७ तौकदाचिद्वनंयातौकुशेध्महरणार्थिनौ निहतौरक्षसातौचकृतांतसमरूपि
णा ८ स्वल्पपुण्यप्रभावेनविष्णुलोकंगतावुभौ ततोगुणवतीश्रुत्वारक्षसानिहतावुभौ ९ पितृभर्तृजदुःखार्ताकारुण्यंपर्य
देवयत् सागृहोपस्करान्सर्वान्विक्रीयाशुभकर्मतत् १०

हापितस्त्यक्त्वागतस्त्वंक्वमयाविना बालाहंकिंकरोम्यद्यत्वनाथाभवतोर्विना
कोनुमामास्थितांगेहे भोजनाच्छादनादिभिः अकिंचित्कुशलांस्नेहासालयेत्पतिदूषितां हतभाग्याहतसुखाहताशाहतजीविता शरणंकंप्रयाम्यद्ययो
मेदुःखंप्रमार्जति १०

११ १२ १३ १४ १५ १६ १७ १८ १९

तयोश्चक्रेयथाशक्तिपारलौकींततःक्रियां तस्मिन्नेवपुरेचक्रेचासंसामृतजीविनी ११ व्रतद्वयंतयासम्यगाजन्म-
मरणात्कृतं एकादशीव्रतसम्यक्सेवनकार्तिकस्यच १२ इत्थंगुणवतीसम्यक्प्रत्यब्दंव्रतिनीत्यभूत् कदाचि
त्सरुजासाथकृशांगीज्वरपीडिता १३ स्नातुंगंगांगताकांतेकथंचिच्छनकैस्तदा यावज्जलांतरंगताकंपिताशी
तपीडिता १४ तावत्साविह्वलाऽपश्यद्विमानंयातमंबरात् अथसातद्विमानस्थावैकुंठभुवनंययौ १५ कार्ति
कव्रतपुण्येनमत्सान्निध्यंगताभवत् अथब्रह्मादिदेवानांयदाप्रार्थनयाभुवम् १६ आगतोहंगणाःसर्वेयाता-
स्तेपिमयासह एतेहियादवाःसर्वेमद्गणाएवभामिनि १७ पितातेदेवशर्माभूत्सत्राजिदभिधोह्ययं यश्चंद्रना-
मासोक्रूरस्त्वंसागुणवतीशुभा १८ कार्तिकव्रतपुण्येनबहुमत्प्रीतिदायिनी मद्द्वारियत्त्वयापूर्वंतुलसीवाटिका
कृता १९ तस्मादयंकल्पवृक्षस्तवांगणगतःशुभे आजन्ममरणात्पूर्वंयत्कृतंकार्तिकव्रतम् २० कदाचिदपि-
तेनत्वंमद्वियोगंनयास्यसि सत्योवाच मासानांतुकथंनामसमासःकार्तिकोवरः २१ कथंतेदेवदेवेशाका
रणंतत्रकथ्यताम् श्रीकृष्णउवाच साधुपृष्टंत्वयाकांतेशृणुष्वैकाग्रमानसा २२ पृथोर्वैन्यस्यसंवादंमहर्षे-
र्नारदस्यच एवमेवपुरापृष्टोनारदःपृथुनाब्रवीत् २३ नारदउवाच शंखनामाभवत्पूर्वमसुरःसागरात्मजः
इंद्रादिलोकपालानामधिकारान्जहारह २४ सुवर्णाद्रिगुहादुर्गंसास्थितास्त्रिदशादयः तद्वीक्षायांबभूवुस्तेतदा
दैत्योविचारयत् २५ हृताधिकारास्त्रिदशामयायद्यपिनिर्जिताः लक्ष्यंतेबलयुक्तास्तेकरणीयंमयाऽत्रकिम् २६

२० २१ २२ २३ २४ २५ २६ २७

२७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६

ज्ञातंतत्तुमयादेवावेदमंत्रबलान्विताः तान्हरिष्येततःसर्वेबलहीनाभवंतिवै २७ इतिमत्वाततोदैत्योविष्णुमालक्ष्यनिद्रितम् सत्यलोकाज्जहाराशुवेदानादिस्वयंभुवः २८ नीतास्तेनततेवेदास्तद्भयात्तेनिराक्रमन् तोयानिविविशुर्यज्ञमंत्रबीजसमन्विताः २९ तान्मार्गमाणःशंखोपिसमुद्रांतर्गतोभ्रमन् नददर्शतदादैत्यःकांचिदेकत्रसंस्थितान् ३० अथदेवैःस्तुतोविष्णुर्बोधितस्तानुवाचह विष्णुरुवाच वरदोहंसुरगणागीतवाद्यादिमंगलैः ३१ ऊर्जस्यशुक्लैकादश्यांभवद्भिःप्रतिबोधितः अतश्चैषातिथिर्मान्यासातीवप्रीतिदामम ३२ वेदाःशंखहताःसर्वेतिष्ठंत्युदकसंस्थिताः तानानयाम्यहंदेवाहत्वासागरनंदनं ३३ अद्यप्रभृतिवेदास्तेमंत्रबीजसमन्विताः प्रत्यब्दंकार्तिकेमासिविश्रमंत्यप्सुसर्वदा ३४ कालेस्मिन्येप्रकुर्वंतिप्रातःस्नानंनरोत्तमाः तेसर्वेयज्ञावभृथैःस्नाताःस्युर्नसंशयः ३५ अद्यप्रभृत्यहमपिभवामिजलमध्यगः भवंतोपिमयासार्द्धमायांतुसमुनीश्वराः ३६ कार्तिकव्रतिनांचेद्ररक्षाकार्यात्वयासदा इत्युक्त्वाभगवान्विष्णुःशफरीतुल्यरूपधृक् खात्पपातांजलौविंध्यवासिनःकस्यपश्यतः ३७ हत्वाशंखासुरंविष्णुर्बदरीवनमागमत् तत्राहूयऋषीन्सर्वानिदमाज्ञापयत्प्रभुः ३८ विष्णुरुवाच जलांतरविशीर्णांस्तेयूयंवेदान्प्रमार्गथ आनयध्वंचत्वरिताःसागरस्यजलांतरात् ३९ तावत्प्रयागंतिष्ठामिदेवतागणसंयुतः नारदउवाच ततस्तैस्सर्वमुनिभिस्तपोबलसमन्वितैः ४० उद्धृताश्चसबीजास्तेवेदायज्ञसमन्विताः तेषुयावन्मितंयेनलब्धंतावद्धितस्यतत् ४१ ससएवऋषिर्जातस्तत्प्रभृतिपार्थिव अथसर्वेपिसंगम्यप्रयागमुनयोययुः ४२

३७ ३८ ३९ ४० ४१ ४२

४३ ४४ ४५ ४६ ४७ ४८ ४९ ५० ५१ ५२

विष्णवेसविधात्रेतेलब्धान्वेदान्न्यवेदयन् लब्ध्वावेदान्समग्रांस्तुब्रह्माहर्षसमन्वितः ४३ अयजद्वाजिमेधेनदेव
र्षिगणसंयुतः यज्ञांतेदेवताःसर्वेविज्ञप्तिंचक्रुरंजसा ४४ देवाऊचुः देवदेवजगन्नाथविज्ञप्तिंशृणुनःप्रभो हर्ष-
कालोयमस्माकंतस्मात्त्वंवरदोभव ४५ स्थानेऽस्मिन्द्रुहिणोवेदान्नष्टान्प्रापपुनस्त्वयं यज्ञभागान्वयंप्राप्तास्त्वत्प्र
सादाद्रमापते ४६ स्थानमेतद्विनःश्रेष्ठंपृथिव्यांपुण्यवर्धनम् भुक्तिमुक्तिप्रदंचास्तुप्रसादाद्भवतःसदा ४७ कालो
प्ययंमहापुण्योब्रह्मघ्नादिविशुद्धिकृत् दत्ताक्षयकरंचास्तुवरमेवंददस्वनः ४८ विष्णुरुवाच ममाप्येतद्धृतं
देवायद्भवद्भिरुदाहृतम् तथास्तुसकलंत्वेतद्ब्रह्मक्षेत्रमितिप्रथम् ४९ सूर्यवंशोद्भवोराजागंगामत्रनयिष्यति
सासूर्यकन्ययाचात्रकालिंद्यायोगमेष्यति ५० यूयंचसर्वेब्रह्माद्यानिवसंतुमयासह तीर्थराजेतिविख्यातंतीर्थ
मेतद्भविष्यति ५१ सर्वपापानिनश्यंतितीर्थराजस्यदर्शनात् सूर्येमकरगेप्राप्तेस्नायिनांपापनाशनः ५२ कालो
प्येषमहापुण्यफलदोस्तुसदानृणाम् सालोक्यादिफलंस्नानैर्माघेमकरगेरवौ ५३ नारदउवाच एवंदेवान्
देवदेवस्तदुक्त्वातत्रैवांतर्धानमागात्स्ववेधाः देवाःसर्वेप्यंशकैस्तत्रतिष्ठंश्चांतर्धानंप्रापुरिंद्रादयस्ते ५४ का
र्तिकेतुलसीमूलेयोर्चयेद्धरिमीश्वरम् भुंक्तेहनिखिलान्भोगानंतेविष्णुपुरंव्रजेत् ५५ इतिश्रीपाद्मादिचतुःपु
राणसारसंग्रहेकार्तिकमासमाहात्म्येसत्यभामापूर्वजन्मवृत्तांतकथनपूर्वकप्रयागतीर्थप्रसंगवर्णनंनाम-
त्रयोदशोऽध्यायः १३ छ पृथुरुवाच यत्त्वयाकथितंब्रह्मन्व्रतमूर्जस्यविस्तरात् तत्रयात्तुलसीमूलेवि
ष्णोःपूजात्वयोदिता १ ५३ ५४ ५५ इतिकार्तिकमाहात्म्यटीकायांत्रयोदशोऽध्यायः १३ छ अथतुलसीमाहात्म्यंवक्तु-
मितिहासंप्रस्तौतियत्त्वयेति १

५४

२ ३ ४ ५ ६ ७ ८ ९ १०

तेनाहंप्रष्टुमिच्छामिमाहात्म्यंतुलसीभवम् कथंसातिप्रियातस्यदेवदेवस्यशार्ङ्गिणः २ कथमेषासमुत्पन्ना
कस्मिन्स्थानेचनारद एवंब्रूहिसमासेनसर्वज्ञोसिमतोमम ३ नारदउवाच शृणुराजन्नवहितोमाहात्म्यंतुलसी
भवम् सेतिहासंपुरावृत्तंतत्सर्वंकथयामिते ४ पुराशक्रःशिवंद्रष्टुमगात्कैलासपर्वतम् सर्वदेवैःपरिवृतोऽ·
प्सरोगणसेवितः ५ यावद्गतःशिवगृहंतावत्तत्रसहदृष्टवान् पुरुषंभीमकर्माणंदंष्ट्राननातिभीषणम् ६ सपृष्टस्ते·
नकस्त्वंभोः क्वगतोजगदीश्वरः एवंपुनःपुनःपृष्टःसतदानोक्तवान्नृप ७ ततःक्रुद्धोवज्रपाणिस्तंनिर्भर्त्स्यवचो
ब्रवीत् रेमयापृच्छ्यमानोपिनोत्तरंदत्तवानसि ८ अतस्त्वांहन्मिवज्रेणकस्तेत्रातास्तिदुर्मते इत्युदीर्यततोवज्री
वज्रेणाभ्यहनद्दृढम् ९ तेनास्यकंठोनीलत्वमगाद्वज्रंचभस्मताम् ततोरुद्रःप्रजज्वाल तेजसाप्रदहन्निव १० दृष्ट्वा
बृहस्पतिस्तूर्णंकृतांजलिपुटोभवत् इंद्रंचदंडवद्भूमौकृत्वास्तोतुंप्रचक्रमे ११ बृहस्पतिरुवाच नमोदेवाधिप
तयेत्र्यंबकायकपर्दिने त्रिपुरघ्नायशर्वायनमोंधकनिषूदिने १२ विरूपायातिरूपायबहुरूपायशंभवे यज्ञवि
ध्वंसकर्त्रेचयज्ञानांफलदायिने १३ कालांतकायकालायकालभोगिधरायच नमोब्रह्मशिरोहंत्रेब्राह्मणायनमो
नमः १४ नारदउवाच एवंस्तुतस्तदाशंभुर्धिषणेनजगादतम् संहरन्नयनज्वालांत्रिलोकीदहनक्षमाम्
१५ वरंवरयभोब्रह्मन्प्रीतस्तुत्यानयातव इंद्रस्यजीवदानेनजीवेतित्वंप्रथांव्रज १६ बृहस्पतिरुवाच यदि
तुष्टोसिदेवत्वंपाहींद्रंशरणागतम् अग्निरेषशमंयातुभालनेत्रसमुद्भवः १७ ७ ७

कृत्वाकल्पयित्वेत्यर्थः ११ १२ १३ १४ १५ १६ १७ ७

अथजलंधरोत्पत्तिप्रसंगमाह ईश्वरउवाचेति १८ सिंधुगंगायाः सिंधुनामनद्याः १९ २० २१ २२ २३ २४ कूर्चे·

ईश्वरउवाच पुनःप्रवेशमायातिभालनेत्रेकथंशिखी एनंत्यक्ष्याम्यहंदूरेयथेंद्रंनैवपीडयेत् १८ नारदउ·
वाच इत्युक्त्वातंकरेधृत्वाप्राक्षिपल्लवणार्णवे सोपतात्सिंधुगंगायाःसागरस्यचसंगमे १९ तावत्सबालरूपत्व·
मगात्तत्ररुरोदच रुदतस्तस्यशब्देनप्राकंपधरणीमुहुः २० स्वर्गाद्याःसत्यलोकांतास्तत्स्वनाद्बधिरीकृताः श्रुत्वा
ब्रह्माययौतत्रकिमेतदितिविस्मितः २१ तावत्समुद्रस्योत्संगेतंबालंसददर्शह दृष्ट्वाब्रह्माणमायांतंसमुद्रोपि
कृतांजलिः २२ प्रणम्यशिरसाबालंतस्योत्संगेन्यवेशयत् भोब्रह्मन्सिंधुगंगायांजातोयंममपुत्रकः २३ जा
तकर्मादिसंस्कारान्कुरुष्वाद्यजगद्गुरोः नारदउवाच इत्थंवदतिपाथोधौसबालःसागरात्मजः २४ ब्रह्मा
णमग्रहीत्कूर्चेविधुन्वंस्तंमुहुर्मुहुः धुन्वतस्तस्यकूर्चेतुनेत्राभ्यामगमज्जलं २५ कथंचिन्मुक्तकूर्चोथब्रह्माप्रोवा
चसागरम् ब्रह्मावाच नेत्राभ्यांविधृतंयस्मादनेनैतज्जलंमम २६ तस्माज्जलंधरइतिख्यातोनाम्नाभविष्य
ति अनेनैवेशतरुणःसर्वशस्त्रास्त्रपारगः २७ अवध्यःसर्वभूतानांविनारुद्रंभविष्यति यतएषसमुद्भूतस्तत्रैवा
तंगमिष्यति २८ नारदउवाच इत्युक्त्वाशुक्रमाहूयराज्येतंचाभ्यषेचयत् आमंत्र्यसरितांनाथंब्रह्मांतर्धान
मागमत् २९ अथतद्दर्शनोत्फुल्लनयनःसागरस्तदा कालनेमिसुतांवृंदांतद्भार्यार्थमयाचत ३० तेकालनेमि·
प्रमुखास्ततोसुरास्तस्मैसुतांतांप्रददुःप्रहर्षिताः सचापितांप्राप्यसुहृद्वरांवशीशशासगांशुक्रसहायवान्बली ३१
इतिश्रीचतुःपुराणसारसंग्रहेकार्तिकमासमाहात्म्येजलंधरोत्पत्तिवर्णनंनामचतुर्दशोऽध्यायः १४ छ

श्मश्रौ २५ २६ २७ २८ २९ ३० ३१ इतिकार्तिकमाहात्म्यटीकायांचतुर्दशोऽध्यायः १४

अथजलंधरस्यदिग्विजयप्रसंगमाह यइति १ २ ३ ४ नखर्वः अखर्वः मौलिर्यस्यउच्चमुकुटइत्यर्थः अखर्वाः

नारदउवाच येदेवैर्निर्जिताःपूर्वंदैत्याःपातालसंस्थिताः तेपिभूमंडलंयातानिर्भयास्तमुपाश्रिताः १ कदाचिच्छि
न्नशिरसंराहुंदृष्ट्वासदैत्यराट् पप्रच्छभार्गवंतत्रतच्छिरच्छेदकारणम् २ सशशंससमुद्रस्यमथनंदेवकारितम् रत्ना
पहरणंचैवदैत्यानांचपराभवम् ३ सश्रुत्वाक्रोधरक्ताक्षःस्वपितुर्मथनंतदा दूतंसंप्रेषयामासघस्मरंशक्रसन्निधौ ४
दूतस्त्रिविष्टपंगत्वासुधर्मांप्राविशद्द्रुतम् जगादाखर्वमौलिस्तदेवेंद्रंवाक्यमद्भुतम् ५ घस्मरउवाच जलंधरो
ब्धितनयःसर्वदैत्यजनेश्वरः दूतोऽहंप्रेषितस्तेनसयदाहशृणुष्वतत् ६ कस्मात्त्वयाममपितामथितःसागरोद्रिणा
नीतानिसर्वरत्नानितानिशीघ्रंप्रयच्छमे ७ इतिदूतवचःश्रुत्वाविस्मितस्त्रिदशाधिपः उवाचघस्मरंरौद्रंभयघोषसमन्वि
तः ८ इंद्रउवाच शृणुदूतमयापूर्वंमथितःसागरोयथा अद्रयोमद्भयात्त्रस्ताःस्वकुक्षिस्थाःकृतास्तया ९ अ-
न्येपिमद्द्विषस्तेनरक्षितादितिजाःपुरा तस्माद्यत्तत्प्रजातंतुमयाप्यपहृतंकिल १० शंखोप्येवंपुरादेवानांद्विषत्साग
रात्मजः ममानुजेननिहतःप्रविष्टःसागरोदरम् ११ तद्गच्छकथयस्वास्यसर्वंमथनकारणम् नारदउवाच इत्यं
विसर्जितोदूतस्तदेंद्रेणागमद्भुवं १२ तदिदंवचनंसर्वंदैत्यायाकथयत्तदा तन्निशम्यतदादैत्योरोषात्संस्फुरिताधरः
१३ दैत्यसेनासमायुक्तोययौयोद्धुंत्रिविष्टपम् ततोयुद्धंमहान्जातःदेवदानवसंक्षयः १४ तत्रयुद्धेमृतान्दैत्यान्
भार्गवस्तूदतिष्ठयत् विद्ययाऽमृतजीविन्यामंत्रितैस्तोयबिंदुभिः १५ देवानपितथायुद्धेतत्राजीवयदंगिराः दि
व्योषधीःसमानीयद्रोणाद्रेःसपुनःपुनः १६ दृष्ट्वादेवांस्तथायुद्धेपुनरेवसमुत्थितान् जलंधरःक्रोधवशोभार्गवं
वाक्यमब्रवीत् १७

बालखर्वाः अखर्वेषुमौलिरिवमौलिः शिरोमणिः अत्युच्चदेहवानित्यर्थः खर्वोह्रस्वश्चवामनइत्यमरः ५ ६ ७ ८ ९ १०
यमानुजेनविष्णुना ११ , १२ १३ . १४ १५ १६ १७

१८ १९ २० २१ २२ शक्रचेष्टितंकैलासेवज्रेणभीमपुरुषहननादि २३ २४ २५ २६
२७ इतिकार्तिकमाहात्म्यटीकायांपंचदशोऽध्यायः १५ छ नारदउवाच १ २ भुजंगारियानाय गरुडवाहनाय·

जलंधरउवाच मयायुद्धेहतादेवाउत्तिष्ठंतिकथंपुनः तवसंजीविनीविद्यानैवान्यत्रेतिविश्रुतम् १८ शुक्रउवाच दिव्यौषधीःसमानीयद्रोणाद्रेरंगिराःसुरान् जीवयत्येषतच्छीघ्रंद्रोणाद्रिंत्वमपाहर १९ नारदउवाच इत्युक्तःसतुदैत्येंद्रोनीत्वाद्रोणाचलंतदा प्राक्षिपत्सागरेतूर्णंपुनरागान्महाहवं २० अथदेवान्हतान्दृष्ट्वाद्रोणाद्रिमगमद्गुरुः तावत्तत्रगिरींद्रंतुनददर्शसुरार्चितः २१ ज्ञात्वादैत्यहृतंद्रोणंधिषणोभयविह्वलः आगत्यदूराद्व्याजन्हेश्वासाकुलितविग्रहः २२ पलायध्वंमहादेवानायंजेतुंक्षमोयतः रुद्रांशसंभवोह्येष स्मरध्वंशक्रचेष्टितं २३ श्रुत्वातद्वचनंदेवाभयविह्वलितास्तदा दैत्येनवध्यमानास्तेपलायंतेदिशोदश २४ देवान्विद्रावितान्दृष्ट्वादैत्यैःसागरनंदनः शंखभेरीजयरवैःप्रविवेशामरावतीम् २५ प्रविष्टेनगरींदैत्येदेवाःशक्रपुरोगमाः सुवर्णाद्रिगुहांप्राप्तान्यवसन्दैत्यतापिताः २६ ततश्चसर्वेष्वसुरोधिकारेष्विंद्रादिकानांविनिवेशयत्तदा शुंभादिकान्दैत्यवरान्पृथक्पृथक्स्वयंसुवर्णाद्रिगुहामगात्पुनः २७ इतिश्रीचतुःपुराणसारसंग्रहेकार्तिकमासमाहात्म्येजलंधरोपाख्यानेजलंधरविजयप्राप्तिर्नामपंचदशोऽध्यायः१५ छ नारदउवाच पुनर्दैत्यंसमायांतंदृष्ट्वादेवाःसवासवाः भयप्रकंपिताःसर्वेविष्णुंस्तोतुंप्रचक्रमुः १ नमोमत्स्यकूर्मादिनानास्वरूपैःसदाभक्तकार्योद्यतायार्तिहंत्रे विधात्रादिसर्गस्थितिध्वंसकर्त्रेगदाशखपद्मारिहस्तायतेस्तु २ रमावल्लभायासुराणांनिहंत्रेभुजंगारियानायपीतांबराय मखादिक्रियापाककर्त्रेविकर्त्रेशरण्यायतस्मैनताःस्मोनताःस्मः ३

३ ६७ ६२ ६१ ६५ ६२

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

दैत्येनसंतापितायेअमर्त्याः देवास्तेषांदुःखएवाचलः पर्वतः तस्यध्वंसने छेदने दंभोलिर्वज्रंतस्मै ४ ५ ६ ७ ८

नमोदैत्यसंतापितामर्त्यदुःखाचलध्वंसदंभोलयेविष्णवेते भुजंगेशतल्पेशयायार्कचंद्रद्विनेत्रायतस्मैननाऽस्मोन
नाऽस्मः ४ नारदउवाच संकष्टनाशननामस्तोत्रमेतत्पठेन्नरः सकदाचिन्नसंकष्टैःपीड्यते कृपयाहरेः ५ इ
तिदेवाःस्तुतिंयावत्कुर्वंतिदनुजद्विषः तावत्सुराणामापत्तिर्विज्ञाताविष्णुनातदा ६ सहसोत्थायदैत्यारिःसक्रोधः
खिन्नमानसः आरूढोगरुडंवेगाल्लक्ष्मींवचनमब्रवीत् ७ श्रीभगवानुवाच जलंधरेणतेभ्रात्रादेवानांकदनं
कृतम् तेराहूतोगमिष्यामियुद्धायाद्यत्वरान्वितः ८ श्रीरुवाच अहंतेवल्लभानाथभक्तश्चयदिसर्वदा तत्क
थंममभ्रातायुद्धेवध्यःकृपानिधे ९ श्रीभगवानुवाच रुद्रांशसंभवत्वाच्चब्रह्मणोवचनादपि प्रीत्याचतवनैवा
यंममवध्योजलंधरः १० नारदउवाच इत्युक्त्वागरुडारूढःशंखचक्रगदासिभृत् विष्णुर्वेगाद्ययौयोद्धुंयत्रदे
वाःस्तुवंतिते ११ अथारुणानुजात्युग्रपक्षवातप्रपीडिताः वात्याविमर्दितादैत्याबभ्रमुःखेयथाघनाः १२ ततो
जलंधरोदृष्ट्वादैत्यान्वात्याप्रपीडितान् उद्वृत्तनयनःक्रोधात्ततोविष्णुंसमभ्ययात् १३ ततःसमभवद्युद्धंविष्णुदै
त्येंद्रयोर्महत् आकाशंकुर्वतोबाणैस्तदानिरवकाशवत् १४ विष्णुर्दैत्यस्यबाणौघैर्ध्वजंछत्रंधनुर्हयान् चिच्छे
दतंचहृदयेबाणेनैकेनताडयत् १५ ततोदैत्यःसमुत्पत्यगदापाणिस्त्वरान्वितः आहत्यगरुडंमूर्ध्निपातयामासभू
तले १६ विष्णुर्गदांस्वखड्गेनचिच्छेदप्रहसन्निव तावत्सहृदयेविष्णुंजघानदृढमुष्टिना १७ ततस्तौबाहुयुद्धेन
युयुधातेमहाबलौ बाहुभिर्मुष्टिभिश्चैवजानुभिर्नादयन्महीं १८ एवंतौसुचिरंयुद्धंकृत्वाविष्णुःप्रतापवान् उवाचदैत्य-
राजानंमेघगंभीरनिःस्वनः १९

९ १० ११ अरुणानुजोगरुडः १२ १३ १४ १५ १६ १७ १८ १९

२० भावुकभगिनीभर्तः २१ २२ २३ २४ शेषादीन् संकर्षणादीन् २५ २६ २७ २८ २९

विष्णुरुवाच वरंवरयदैत्येंद्रप्रीतोस्मितवविक्रमात् अदेयमपितेदद्मियत्तेमनसिवर्तते २० जलंधरउवाच
यदिभावुकतुष्टोसिवरमेनंददस्वमे मद्भगिन्यासहात्रत्वंमद्गृहेसगणोवस २१ नारदउवाच तथेत्युक्त्वासभगवान्स
र्वदेवगणैःसह तदाजलंधरपुरमगमद्रमयासह २२ जलंधरस्तुदेवानामधिकारेषुदानवान् स्थापयित्वामहाबाहुः
पुनरागान्महीतलम् २३ देवगंधर्वसिद्धेषुयत्किंचिद्रत्नसंयुतम् तदात्मवशगंकृत्वातिष्ठत्सागरनंदनः २४ पातालभु
वनेदैत्यंनिशुंभंसमहाबलम् स्थापयित्वासशेषादीनानयत्कूललंबली २५ देवगंधर्वसिद्धाद्यान्सर्पराक्षसमानुषा
न् स्वपुरेनागरान्कृत्वासशासभुवनत्रयम् २६ एवंजलंधरःकृत्वादेवान्स्ववशवर्तिनः धर्मेणपालयामासप्रजाः
पुत्रानिवौरसान् २७ नकश्चिद्व्याधितोनैवदुःखीनैवकृशस्तथा नदीनोदृश्यतेतस्मिन्धर्माद्राज्यंप्रशासति २८
एवंमहींशासतिदानवेंद्रेधर्मेणसम्यक्कादिदृक्षयाहम् कदाचिदागामथतस्यलक्ष्मींविलोकितुंश्रीरमणंचसेवि॰
तुम् २९ इतिश्रीचतुःपुराणसारसंग्रहेकार्तिकमासमाहात्म्येजलंधरसभायांनारदागमनंनामषोडशोऽध्या
यः १६ छ नारदउवाच समांप्रोवाचविधिवत्संपूज्यचतुभक्तिमान् संप्रहस्यतदावाक्यंस्नेहपूर्वंच
वैनृप १ कुतआगम्यतेब्रह्मन्किंचिद्दृष्टंत्वयाप्रभो यदर्थमिहचायातस्तदाज्ञापयमांमुने २ नारदउवाच ग
तःकैलासशिखरंदैत्येंद्राहंयदृच्छया तत्रोमयासमासीनंदृष्टवानस्मिशंकरम् ३ योजनायुतविस्तीर्णेकल्पवृक्ष॰
महावने कामधेनुशताकीर्णेचिंतामणिसुदीपिते ४

इतिश्रीकार्तिकमाहात्म्यटीकायांषोडशोऽध्यायः १६ छ नारदउवाच समामिति १ २ ३ ४

५ ६ ७ ८ ९ १० ११ १२ १३ १४

तद्दृष्ट्वामहदाश्चर्यंविस्मयोमेभवत्तदा क्वापीदृशीभवेदृद्धिस्त्रैलोक्येवानवेतिच ५ नदातथापिदैत्येंद्रसमृद्धिःसंस्मृ
तामया तद्विलोकनकामोस्मित्वत्सान्निध्यमिहागतः ६ त्वत्समृद्धिमिमांपश्यन्स्त्रीरत्नरहितांध्रुवम् तर्कयामिशि
वादन्यास्त्रिलोक्यांनसमृद्धिमान् ७ अप्सरोनागकन्याद्यायद्यपित्वद्गृहेस्थिताः तथापितानपार्वत्यारूपेणसदृशा
ध्रुवम् ८ यस्यालावण्यजलधौनिमग्नश्चतुराननः स्वधैर्यममुचत्पूर्वंतयाकान्योपमीयते ९ वीतरागोपिहियया
मदनारिःस्वलीलया सौंदर्यगहनेभ्रामिशफरीरूपयापुरा १० यस्याःपुनःपुनःपश्यन्रूपंधातापिसर्जने ससर्जा
प्सरसस्तासांतत्समैकापिनाभवत् ११ अतःस्त्रीरत्नसंभोक्तुःसमृद्धिस्तस्यसावरा तथानतवदैत्येंद्रसर्वरत्नाधि
पस्यच १२ एवमुक्त्वातमामंत्र्यगतेसतिसदैत्यराट् तद्रूपश्रवणादासीदनंगज्वरपीडितः १३ अथसंप्रेषयामा
ससदूतंसिंहिकासुतं त्र्यंबकायापिचतदाविष्णुमायाविमोहितः १४ कैलासमगमद्राहुःकुर्वन्शुक्लेंदुवर्च
सम् कार्ष्ण्येनकृष्णपक्षेंदुवर्चसंस्वांगजेनतं १५ निवेदितस्तदेशायनंदिनाप्रविवेशसः त्र्यंबकभ्रूलतासंज्ञा
प्रेरितोवाक्यमब्रवीत् १६ राहुरुवाच देवपन्नगसेव्यस्यत्रैलोक्याधिपतेःप्रभोः सर्वरत्नेश्वरस्यत्वमाज्ञां
शृणुवृषध्वज १७ श्मशानवासिनोनित्यमास्थिभारवहस्यच दिगंबरस्यतेभार्याकथंहैमवतीशुभा १८
अहंरत्नाधिनाथोस्मिसाचस्त्रीरत्नसंज्ञिका तस्मान्ममैवसायोग्यानैवभिक्षाशिनस्तव १९ नारदउवाच
वदत्येवंतदाराहौभ्रूमध्याच्छूलपाणिनः अभवत्पुरुषोरौद्रस्तीव्राशनिसमस्वनः २०

१५ १६ १७ १८ १९ अथकीर्तिमुखोत्पत्तिप्रसंगमाह वदतीति २०

२१ २२ २३ २४ २५ २६ २७ २८ २९ ३०

सिंहास्यःप्रललजिह्वःसज्वलन्नयनोमहान् ऊर्ध्वकेशःशुष्कतनुर्न्नृसिंहइवचापरः २१ सतंस्वादितुमायांतंदृष्ट्वा
राहुर्भयातुरः अधावतसवेगेनबहिःसचदधारतम् २२ सचराहुर्महाबाहोमेघगंभीरयागिरा उवाचदेवदेवत्वंपा
हिमांशरणागतम् २३ ब्राह्मणंमांमहादेवखादितुंसमुपागतः महादेवोवचःश्रुत्वाब्राह्मणस्यतदाब्रवीत् २४
नैवासौवध्यतामेतिदूतोयंपरवान्यतः मुंचेतिपुरुषःश्रुत्वाराहुंतत्याज्यसोंबरे २५ राहुंत्यक्त्वाथपुरुषस्तदारुद्र
व्यजिज्ञपत् पुरुषउवाच क्षुधामांबाधतेत्यंतंक्षुत्क्षामश्चास्मिसर्वथा २६ किंभक्षयामिदेवेशतदाज्ञापय
मांप्रभो ईश्वरउवाच भक्षयस्वात्मनःशीघ्रंमांसंत्वंहस्तपादयोः २७ नारदउवाच सशिवेनैवमाज्ञप्तश्च
खादपुरुषःस्वकम् हस्तपादोद्भवंमांसंशिरःशेषोयथाभवत् २८ दृष्ट्वाशिरोवशेषंतंसुप्रसन्नस्तदाशिवः उवा
चभीमकर्माणंपुरुषंजातविस्मयः २९ ईश्वरउवाच त्वंकीर्तिमुखसंज्ञोहिभवमद्द्वारिगःसदा त्वदर्चायेनकुर्वं
तिनैवतेमेप्रियंकराः ३० नारदउवाच तदाप्रभृतिदेवस्यद्वारिकीर्तिमुखःस्थितः नार्चयंतीहयेपूर्वंतेषामर्चावृ
थाभवेत् ३१ राहुर्विमुक्तोयस्तेनसोपितद्बर्बरस्थले अतःसबर्बरोद्भूतइतिभूमौप्रथांगतः ३२ ततःसराहुःपुन
रेवजातमात्मानमस्मिन्निति मन्यमानः समेत्यसर्वंकथयांबभूवजलंधरायैवविचेष्टितंतत् ३३ इतिश्रीचतुःपु
राणसारसंग्रहेकार्तिकमासमाहात्म्येजलंधरोपाख्यानेदूतवाक्यकथनंनामसप्तदशोऽध्यायः १७ छ
नारदउवाच जलंधरस्तुतच्छ्रुत्वाकोपाकुलितविग्रहः निर्जगामाशुदैत्यानांकोटिभिःपरिवारितः १

३१ बर्बरस्थलेभारंगीोषधीस्थले अंगारवल्लीबालेयशाकबर्बरवर्द्धका इत्यमर. ३२ ३३ इतिका०टी० सप्तदशोऽध्यायः १७ छ १

२ ३ ४ ५ ६ ७ ८ ९ १० चक्रनिर्मितावशेषेण ११

गच्छतोस्याग्रतःशक्रोराहुर्दृष्टिपथेभवत् मुकुटश्चापतद्भूमौवेगात्प्रस्खलितस्तदा २ दैत्यसैन्यावृतैस्तस्यविमा
नानांशतैस्तदा व्यराजतनभःपूर्णंप्रावृषीवयथाघनैः ३ तस्योद्योगंतदादृष्ट्वादेवाःशक्रपुरोगमाः अलक्षितास्त-
दाजग्मुःशूलिनंतंव्यजिज्ञपुः ४ देवाऊचुः नजानासिकथंस्वामिन्देवापत्तिमिमांविभो नदस्मद्रक्षणार्थाय
जहिसागरनंदनम् ५ नारदउवाच इतिदेववचःश्रुत्वाप्रहस्यवृषभध्वजः महाविष्णुंसमाहूयवचनंचेदमब्रवी
त् ६ ईश्वरउवाच जलंधरःकथंविष्णोनहतःसंगरेत्वया नद्भूहंचापियातोसित्यक्त्वावैकुंठमात्मनः ७ वि-
ष्णुरुवाच तवांशसंभवत्वाच्च भ्रातृत्वाच्चतथाश्रियः नमयानिहतःसंख्येत्वमेनंजहिदानवम् ८ ईश्वरउवाच
नायमेभिर्महातेजाःशस्त्रास्त्रैर्वध्यतेमया देवैःस्वस्वतेजोंशंशस्त्रार्थंदीयतांमम ९ नारदउवाच अथविष्णु
मुखादेवाःस्वतेजांसिददुस्तदा तान्येकस्थगतानीशोदृष्ट्वास्वंचामुचन्महः १० तेनाकरोन्महादेवोमहसांशस्त्रमुत्त
मम् चक्रंसुदर्शनंनामज्वालामालातिभीषणम् ११ ततःशेषेणचतदावज्रंचकृतवान्हरिः तावज्जलंधरोहृ-
ष्टःकैलासतलभूमिषु १२ हस्त्यश्वरथपत्तीनांकोटिभिःपरिवारितः तंदृष्ट्वालक्षिताजग्मुर्देवाःसर्वेयथागताः १३
गणाश्चसमसज्जंतयुद्धायातित्वरान्विताः नंदीभवक्त्रसेनानीमुखाःसर्वेशिवाज्ञया १४ अवतेरुर्गणावेगात्कैला
साद्युद्धदुर्मदाः ततःसमभवद्युद्धंकैलासोपत्यकाभुवि १५ प्रमथाधिपदैत्यानांघोरंशस्त्रास्त्रसंकुलं भेरीमृदंग
शंखौघानिःस्वनैर्वीरहर्षणैः १६ गजाश्वरथशब्दैश्चनादिताभूर्व्यकंपत शक्तितोमरबाणौघमुसलप्रासपट्टि-
शैः १७

१२ १३ १४ अद्रेरधःसंनिहिताभूमिरुपत्यकेत्युच्यते १५ १६ १७

१८ १९ २० २१ २२ २३ २४ २५ २६ २७

व्यराजतनभःपूर्णमुल्काभिरिवसंवृतम् निहतैरथनागाश्वपत्तिभिर्भूर्व्यराजत १८ वज्राहताचलशिरःशकलैरिवसंवृता प्रमथाहतदैत्यौघैर्दैत्याहतगणैस्तथा १९ वसासृङ्मांसपंकाढ्याभूरगम्याभवत्तदा प्रमथाहतदैत्यौघान्भार्गवःसमजीवयत् २० युद्धेपुनःपुनस्तत्रमृतसंजीविनीबलात् तंदृष्ट्वाव्याकुलीभूतागणाः सर्वेभयान्विताः २१ शशंसुर्देवदेवायतत्सर्वंशुक्रचेष्टितम् अथरुद्रमुखात्कृत्याबभूवातीवभीषणा २२ तालजंघादरीवक्त्रास्तनापीडितभूरुहा सायुद्धभूमिमासाद्यभक्षयंतीमहासुरान् २३ भार्गवंस्वभगेधृत्वाजगामांतर्हितानभः विधृतंभार्गवंदृष्ट्वादैत्यसैन्यगणास्तदा २४ अम्लानवदनाहर्षान्निजघ्नुर्युद्धदुर्मदाः अथाभज्यतदैत्यानांसेनागणभयार्दिता २५ वायुवेगेनाहतेवप्रकीर्णातृणसंततिः भग्नांगणभयात्सेनांदृष्ट्वामर्षयुताययुः २६ निशुंभशुंभौसेनान्यौकालनेमिश्चवीर्यवान् त्रयस्तेवारयामासुर्गणसेनांमहाबलाः २७ मुंचंतःशरवर्षाणिप्रावृषीवबलाहकाः ततोदैत्यशरौघास्तेशलभानामिवव्रजाः २८ रुरुधुःखंदिशःसर्वागणसेनामकंपयन् गणाःशरशतैर्भिन्नारुधिरासारवर्षिणः २९ वसंतेकिंशुकाभासानप्राज्ञायतकिंचन पतिताःपात्यमानाश्चभिन्नाश्छिन्नाःसहस्रशोगणाः ३० त्यक्त्वासंग्रामभूमिंतेसर्वेपिविमुखाभवन् ३१ ततःप्रभग्नंस्वबलंविलोक्यशैलादिलंबोदरकार्तिकेयाः त्वरान्वितादैत्यवरान्प्रसह्यनिवारयामासुरमर्षिणस्ते ३२ इतिश्रीचतुःपुराणसारसंग्रहेकार्तिकमासमाहात्म्येजलंधरोपाख्यानेरुद्रसेनापराभवोनामाष्टादशोऽध्यायः १८ छ

व्रजाः समूहाः २८ २९ ३० ३१ इतिश्रीकार्तिकमासमाहात्म्येऽष्टादशोऽध्यायः १८ छ

१ २ ३ ४ ५ ६ शैलादिंनंदिनं ७ ८ ९ १०

नारदउवाच तेगणाधिपतीन्दृष्ट्वानंदीभमुखषण्मुखान् अमर्षादभ्यधावंतःद्वंद्वयुद्धायदानवाः १ नंदि
नंकालनेमिश्चशुंभोलंबोदरंतथा निशुंभःषण्मुखंवेगादभ्यधावतदंशितः २ निशुंभःकार्तिकेयस्यमयूरंपं
चभिःशरैः हृदिविव्याधयोगेनमूर्छितःसपपातच ३ ततःशक्तिधरःशक्तिंयावज्जग्राहरोषितः तावन्निशुंभोवे
गेनस्वशक्त्यातमपातयत् ४ नंदीश्वरःशरव्रातैःकालनेमिमवध्यत सप्तभिश्चहयान्केतुंत्रिभिःसारथिमच्छि
नत् ५ कालनेमिस्ततःक्रुद्धोधनुश्चिच्छेदनंदिनः तदपास्यसशूलेनतंवक्षस्यहनद्बली ६ सशूलभिन्नहृद
योहतास्वोहतसारथिः अद्रेःशिखरमामुच्यशैलादिंसोप्यपातयत् ७ अथशुंभोगणेशश्चरथमूषकवाहनौ
युध्यमानौशरव्रातैःपरस्परमविध्यताम् ८ गणेशस्ततदाशुंभंहृदिविव्याधपत्रिणा सारथिंचत्रिभिर्बा
णैःपातयामासभूतले ९ ततोतिक्रुद्धःशुंभोपिबाणषष्ट्यागणाधिपम् मूषकंचत्रिभिर्विद्ध्वाननादजलदस्वनः
१० मूषकःशरभिन्नांगश्चचालदृढवेदनः लंबोदरश्चपतितःपदातिरभवन्नृप ११ ततोलंबोदरःशुंभंहत्वापर
शुनाहृदि अपातयत्तदाभूमौमूषकंचारुहत्पुनः १२ कालनेमिर्निशुंभश्चाप्युभौलंबोदरंशरैः युगपज्जघ्नतुः
क्रोधात्तोत्रैरिवमहाद्विपम् १३ तंपीड्यमानमालोक्यवीरभद्रोमहाबलः अभ्यधावतवेगेनभूतकोटियुत
स्तदा १४ कूष्मांडभैरवाश्चापिवेतालायोगिनीगणाः पिशाचयोगिनीसंघागणाश्चापितमन्वयुः १५ ततःकिल
किलाशब्दैःसिंहनादैःसघर्घरैः भेरीतालमृदंगैश्चपृथिवीसमकंपत १६ ततोभूतान्यधावंतभक्षयंतिस्मदानवान्
उत्पतंत्यापतंतिस्मननृतुश्चरणांगणे १७

११ १२ १३ १४ १५ १६ १७

१८ १९ २० २१ २२ २३ २४ २५ २६ २७

नंदीचकार्तिकेयश्चसमाश्वस्यत्वरान्वितौ निजघ्नतूरणेदैत्यान्निरंतरशरव्रजैः १८ छिन्नभिन्नाहतैर्दैत्यैः पतितै
र्भक्षितैस्तदा व्याकुलासाभवत्सेनाविषण्णवदनातदा १९ प्रविध्वस्तांतदासेनांदृष्ट्वासागरनंदनः रथेनाग्नि
पताकेनगणानभिययौबली २० हस्त्यश्वरथसंह्रादाः शंखभेरीस्वनास्तथा अभवन्सिंहनादाश्चसेनयोरुभ
योस्तदा २१ जलंधरशरव्रातैर्नीहारपटलैरिव द्यावापृथिव्योराच्छिन्नमंतरंसमपद्यत २२ गणेशंपंचभि
र्विद्धाशैलादिंनवभिः शरैः वीरभद्रंचविंशत्याननादजलदस्वनः २३ कार्तिकेयस्तदादैत्यंशक्त्याविव्याधसत्व
रः युयुधेशक्तिनिर्भिन्नः किंचिद्व्याकुलमानसः २४ ततः क्रोधपरीताक्षः कार्तिकेयंजलंधरः गदयाताडया
माससचभूमितलेपतत् २५ तथैवनंदिनंवेगादपातयतभूतले ततोगणेश्वरः क्रुद्धोगदापरशुनाहनत् २६
वीरभद्रस्त्रिभिर्बाणैर्हृदिविव्याधदानवम् सताभिन्नहयान्केतुंधनुश्छत्रंचाविच्छिदे २७ ततोतिक्रुद्धोदैत्यें
द्रः शक्तिमुद्यम्यदारुणाम् गणेशंपातयामासरथंचान्यमथारुहत् २८ अभ्ययादथवेगेनवीरभद्ररुषान्वितः
ततस्तौसूर्यसंकाशौयुयुधातेपरस्परम् २९ वीरभद्रः पुनस्तस्यहयान्बाणैरपातयत् धनुश्चिच्छेददैत्येंद्रः
पुप्लुवेपरिघायुधः ३० सवीरभद्रंत्वरयाभिगम्यजघानदैत्यः परिघेणमूर्ध्नि सचापिवीरः प्रविभिन्नमूर्धाप
पातभूमौरुधिरंसमुद्गिरन् ३१ इतिश्रीचतुःपुराणसारसंग्रहे कार्तिकमासमाहात्म्येजलंधरोपाख्यानेवी
रभद्रपतनंनामैकोनविंशोऽध्यायः १९ छ छ छ छ

२८ २९ ३० ३१ इतिश्रीकार्तिकमासमाहात्म्यटीकायां एकोनविंशोऽध्यायः १९ छ

१ २ ३ ४ ५ ६ ७ ८ ९ १०

नारदउवाच पतितंवीरभद्रंतुदृष्ट्वारुद्रगणाभयात् अगमंस्तेरणंहित्वाक्रोशमानामहेश्वरं १ अथको
लाहलंश्रुत्वागणानांचंद्रशेखरः अभ्ययाद्वृषभारूढः संग्रामंप्रहसन्निव २ रुद्रमायांतमालोक्यसिंहना·
दैर्गणाःपुनः निवृत्ताःसंगरेदैत्यान्निजघ्नुःशरवृष्टिभिः ३ दैत्याश्चभीषणंदृष्ट्वासर्वेचैवविदुद्रुवुः कार्तिकव्र
तिनंदृष्ट्वापातकानीवतद्भयात् ४ अथजलंधरोदैत्यान्निवृत्तान्प्रेक्ष्यसंगरे रोषादधावच्चंडीशंमुंचन्बाणा
न्सहस्रशः ५ शुंभोनिशुंभोश्वमुखोकालनेमिर्बलाहकः खङ्गरोमाप्रचंडश्चघस्मराद्याःशिवंययुः ६
बाणांधकारसंछन्नंदृष्ट्वागणबलंशिवः बाणजालमवाच्छिंदत्स्वबाणैरावृणोन्नभः ७ दैत्यांश्चबाणवात्या
भिःपीडितानकरोत्तदा प्रचंडबाणजालौघैरपातयतभूतले ८ खङ्गरोम्णःशिरःकायात्तदापरशुनाच्छिन·
त् बलाहकस्यचशिरःखट्वांगेनाकरोद्द्विधा ९ बध्वाचघस्मरंदैत्यंपाशेनाभ्यहनद्युधि वृषभेणहताःकेचित्
केचिद्बाणैर्निपातिताः १० नशेकुरसुराःस्थातुंगजाःसिंहार्दिताइव ततःक्रोधपरीतात्मावेगाद्रुद्रंजलंध
रः ११ आह्वयामाससमरेतीक्ष्णाशनिसमस्वनः जलंधरउवाच युध्यस्वचमयासार्द्धंकिमेभिर्निहतैस्तव १२
यच्चकिंचिद्बलंतेस्तितद्दर्शयजटाधर इत्युक्त्वाबाणसप्तत्याजघानवृषभध्वजं १३ तान्प्राप्तान्निशितैर्बाणैश्चि
च्छेदप्रहसन्निव ततोहयान्ध्वजंछत्रंधनुश्चिच्छेदशक्तिभिः सच्छिन्नधन्वाविरथोगदामुद्यम्यवेगवान्
अभ्यधावच्छिवस्तावद्गदांबाणैर्द्विधाच्छिनत् १५ तथापिमुष्टिमुद्यम्यययौरुद्रंजिघांसया तावच्छिवेनबा
णौघैःक्रोशमात्रमपाकृतः १६

११ १२ १३ १४ १५ १६

१७ १८ १९ २० २१ २२ २३ २४ २५ २६

ततोजलंधरोदैत्योमत्वारुद्रंबलाधिकम् ससर्जमायांगांधर्वीमद्भुतांरुद्रमोहिनीं १७ ततोजगुश्चननृतुर्गंधर्वा
प्सरसांगणाः तालवेणुमृदंगाद्यान्वादयंतिस्मचापरे १८ तंदृष्ट्वामहदाश्चर्यंरुद्रोनादविमोहितः पतितान्यपिश
स्त्राणिकरेभ्योनविवेदसः १९ एकाग्रीभूतमालोक्यरुद्रंदैत्योजलंधरः कामार्तःसजगामाशुयत्रगौरीस्थिता·
भवत् २० युद्धेशुंभनिशुंभाख्यौस्थापयित्वामहाबलौ दशदोर्दंडपंचास्यस्त्रिनेत्रश्चजटाधरः २१ महावृषभ·
मारूढःसबभूवजलंधरः अथोरुद्रंसमायांतमालोक्यभववल्लभा २२ अभ्याययौसखीमध्यात्तद्दर्शनपथेभव
त् यावद्ददर्शचार्वंगीपार्वतीदनुजेश्वरः २३ तावत्सवीर्यंमुमुचेजडांगश्चाभवत्तदा अथज्ञात्वातदागौरीदानवं
भयविह्वला २४ जगामांतर्हितावेगात्सातदोत्तरमानसे तामदृष्ट्वाततोदैत्यःक्षणाद्विद्युल्लतामिव २५ जवे
नागात्पुनर्युद्धंयत्रदेवोवृषध्वजः पार्वत्यपिभयाद्विष्णुंसस्मारमनसातदा २६ ताचद्ददर्शतंदेवंसूपविष्टंसमीप·
गम् पार्वत्युवाच विष्णोजलंधरोदैत्यःकृतवान्परमाद्भुतं २७ तत्किंनविदितंतेस्तिचेष्टितंतस्यदुर्मतेः विष्णु
रुवाच तेनैवदर्शितःपंथावयमप्यन्वयामहे २८ नान्यथासभवेद्वध्यःपातिव्रत्यसुरक्षितः नारदउवाच जगा
मविष्णुरित्युक्त्वापुनर्जालंधरंपुरम् २९ अथरुद्रश्चगंधर्वानुगतःसंगरेस्थितः अंतर्धानंगतांमायांदृष्ट्वासबुबुधेत·
दा ३० ततोभवोविस्मितमानसःपुनर्जगामयुद्धायजलंधरंरुषा सचापिदैत्यःपुनरागतंशिवंदृष्ट्वाशरौघैःसमवाकिर
द्रणे ३१ इतिश्रीचतुःपु॰सारसं॰कार्तिकमासमा॰जलंधरोपा॰शिवजलंधरयुद्धवर्णनंनामविंशोऽध्यायः २०

२७ २८ २९ ३० ३१ इतिकार्तिकमाहात्म्यटीकायांविंशोऽध्यायः २० ५२

१ २ ३ ४ ५ ६ ७ वृंदामोहनाय विष्णुमाया प्रदर्शनप्रसंग माह ततइत्यादिना

नारदउवाच विष्णुर्जलंधरंगत्वातद्दैत्यपुरभेदनम् पातिव्रत्यस्यभंगायवृंदायाश्चाकरोन्मतिम् १ अथवृं
दारकादेवीस्वप्नमध्येददर्शह भर्तारंमहिषारूढंतैलाभ्यक्तंदिगंबरम् २ कृष्णप्रसूनभूषाढ्यंक्रव्यादगणसेवि
तम् दक्षिणाशागतंमुंडंतमसाप्यावृतंतदा ३ स्वपुरंसागरेमग्नंसहसैवात्मनासह ततःप्रबुद्धासाबालातत्स्व
प्नंप्रविचिन्वती ४ ददर्शोदितमादित्यंसच्छिद्रंनिष्प्रभंमुहुः तदनिष्टमितिज्ञात्वारुदतीभयविह्वला ५ कुत्रचि
न्नालभच्छर्मगोपुराट्टालभूमिषु ततःसखीद्वययुतानगरोद्यानमागमत् ६ तत्रापिसाभ्रमद्बालानालभत्कुत्रचि
त्सुखम् वनाद्वनांतरंयातानैववेदात्मनस्तदा ७ ततःसाभ्रमतीबालाददर्शातीवभीषणौ राक्षसौसिंहवद
नौदंष्ट्राननविभीषणौ ८ तौदृष्ट्वाविह्वलातीवपलायनपराभवत् ददर्शतापसंशांतंसशिष्यंमौनमास्थितम्
९ ततस्तत्कंठमासृत्यनिजांबाहुलतांभयात् मुनेमांरक्षशरणमागतास्मीत्यभाषत १० मुनिस्तांविह्वलांदृ
ष्ट्वाराक्षसानुगतांतदा हुंकारेणैवतौघोरौचकारविमुखौरुषा ११ तौहुंकारभयत्रस्तौदृष्ट्वाचविमुखौगतौ
प्रणम्यदंडवद्भूमौवृंदावचनमब्रवीत् १२ वृंदोवाच रक्षिताहंत्वयाघोराद्भयादस्मात्कृपानिधे किंचिद्वि
ज्ञप्तुमिच्छामिकृपयातन्निशामय १३ जलंधरोहिमद्भर्तारुद्रंयोद्धुंगतःप्रभो सतत्रास्तेकथंयुद्धेतन्मेकथय
सुव्रत १४ नारदउवाच मुनिस्तद्वाक्यमाकर्ण्यकृपयोर्ध्वमवैक्षत तावत्कपीसमायातौप्रणम्यचाग्र
तःस्थितौ १५ ततस्तद्भ्रूलतासंज्ञानियुक्तौगगनंगतौ गत्वाक्षणार्द्धादागत्यप्रपाताग्रतःस्थितौ १६

८ ९ १० ११ १२ १३ १४ १५ १६

१७ १८ १९ २० २१ २२ २३ २४ २५ २६

शिरःकबंधेहस्तौचदृष्ट्वाब्धितनयस्यसा पपातमूर्छिताभूमौभर्तृव्यसनदुःखिता १७ कमंडलूदकैःसिक्ता
मुनिनाश्वासितानदा स्वभर्तृभालेसाभालंकृत्वादीनारुरोदह १८ वृंदोवाच यःपुरासुखसंवादैर्विनोदय·
सिमांप्रभो सकथंनवदस्याद्यवल्लभांमामनागसाम् १९ येनदेवाःसगंधर्वानिर्जिताविष्णुनासह सकथंताप·
सेनाद्यत्रैलोक्यविजयीहतः २० नारदउवाच रुदित्वेतितदावृंदातंमुनिंवाक्यमब्रवीत् वृंदोवाच
कृपानिधेमुनिश्रेष्ठजीवयैनंममप्रियं २१ त्वमेवास्यमुनेशक्तोजीवनायमतोमम नारदउवाच इतितद्वाक्यमा
कर्ण्यप्रहसन्मुनिरब्रवीत् २२ मुनिरुवाच नायंजीवयितुंशक्तोरुद्रेणनिहतोयुधि तथापित्वत्कृपाविष्ट
एनंसंजीवयाम्यहम् २३ नारदउवाच इत्युक्त्वांतर्दधेविप्रस्तावत्सागरनंदनः वृंदामालिंग्यतद्वक्त्रंचुचुंब
प्रीतमानसः २४ अथवृंदापिभर्तारंदृष्ट्वाहर्षितमानसा रेमेतद्वनमध्यस्थातद्युक्ताबहुवासरम् २५ कदाचि·
त्सुरतस्यांतेदृष्ट्वाविष्णुंतमेवच निर्भर्त्स्यक्रोधसंयुक्तावृंदावचनमब्रवीत् २६ वृंदोवाच धिक्त्वदीयंहरे
शीलंपरदाराभिगामिनः ज्ञातोसित्वंमयासम्यक्मायाप्रच्छन्नतापसः २७ यौत्वयामाययाह्यस्थौस्वकीयौद·
र्शितौमम तावेवराक्षसौभूत्वाभार्यांतवहरिष्यतः २८ त्वंचापिभार्यादुःखार्तोवनेकपिसहायवान् भ्रमसर्पेश्व
रेणायंयस्तेशिष्यत्वमागतः २९ इत्युक्त्वासातदावृंदाप्राविशद्धव्यवाहनं विष्णुनावार्यमाणापितस्यामासक्तमा
नसः ३० ततोहरिस्तामनुसंस्मरन्मुहुर्वृंदाचितोभस्मरजोवगुंठितः तत्रैवतस्थौसुरसिद्धसंघैःप्रबोध्यमानोपि·
ययौनशांतिम् ३१

२७ २८ २९ ३० ३१

५२

इतिकार्तिकमाहात्म्यटीकायामेकविंशोऽध्यायः २१ ७ १ २ ३ ४ ५ ६

इतिश्रीचतुःपुराणसारसंग्रहे कार्तिकमासमाहात्म्येजलंधरोपाख्यानेवृंदाग्निप्रवेशवर्णनंनामैकविंशोऽध्यायः
२१ ७ नारदउवाच ततोजलंधरोदृष्ट्वारुद्रमद्भुतविक्रमं चकारमाययागौरींत्र्यंबकमोहयन्निव
१ रथोपरिस्थितांबद्धांरुदंतींपार्वतींशिवः निशुंभशुंभमुखाद्यैश्चवध्यमानांददर्शसः २ गौरींतथाविधांदृष्ट्वा
शिवोप्युद्विग्नमानसः अवाङ्मुखःस्थितस्तूष्णींविस्मृत्यस्वपराक्रमम् ३ ततोजलंधरोवेगात्त्रिभिर्विव्याधसाय
कैः आपुंखमग्नैस्तंरुद्रंशिरस्युरसिचोदरे ४ ततोजज्ञेसतांमायांविष्णुनाचप्रबोधितः रौद्ररूपधरोजातोज्वा-
लामालातिभीषणः ५ तस्यातीवमहारौद्ररूपंदृष्ट्वामहासुराः नशेकुःसंमुखेस्थातुंभेजिरेतेदिशोदश ६
ततःशापंददौरुद्रस्तयोःशुंभनिशुंभयोः ममयुद्धादपक्रांतौगौर्यावध्यौभविष्यथः ७ पुनर्जलंधरोवेगाद्ववर्षनि
शितैःशरैः बाणांधकारैःसंछन्नंतदाभूमितलंमहत् ८ यावद्रुद्रश्चचिच्छेदतस्यबाणगणंजवात् तावत्सपरिघे
णाशुजघानवृषभंबली ९ वृषस्तेनप्रहारेणपरावृत्तोरणांगणात् रुद्रेणाकृष्यमाणोपिनतस्थौरणभूमिषु १०
ततःपरमसंक्रुद्धोरुद्रोरौद्रवपुर्धरः चक्रंसुदर्शनंवेगाच्चिक्षेपादित्यवर्चसम् ११ प्रदहद्रोदसीवेगात्पपातवसु
धातले जहारतच्छिरःकायान्महदायतलोचनम् १२ रथात्कायःपपातास्यनादयन्वसुधातलम् तेजश्चनिर्गतं
देहात्तद्रुद्रेलयमागमत् १३ वृंदादेहोद्भवंतेजस्तद्गौर्यांविलयंगतम् अथब्रह्मादयोदेवाहर्षादुत्फुल्ललोचनाः
१४ प्रणम्यशिरसारुद्रंशशंसुर्विष्णुचेष्टितं देवाऊचुः महादेवत्वयादेवारक्षिताःशत्रुजाद्भयात् १५

७ ८ ९ १० ११ १२ १३ १४ १५

१६ १७ १८ १९ २० २१ २२ २३ २४ २५

किंचिदन्यत्समुद्भूतंतत्रकिंकरवामहे वृंदालावण्यसंभ्रांतोविष्णुस्तिष्ठतिमोहितः १६ ईश्वरउवाच गच्छध्वंश
रणंदेवाविष्णोर्मोहापनुत्तये शरण्यांमोहिनींमायांसावःकार्यंकरिष्यति १७ नारदउवाच इत्युक्त्वांतर्दधेदेवः
सर्वभूतगणैस्तदा देवाश्चतुष्टुवुर्मूलप्रकृतिंभक्तवत्सलाम् १८ देवाऊचुः यदुद्भवाःसत्वरजस्तमोगुणाःसर्गस्थि
तिध्वंसनिदानकारिणः यदिच्छयाविश्वमिदंभवाभवौतनोतिमूलप्रकृतिंनताःस्मताम् १९ याहित्रयोविंशतिभेद
शब्दिताजगत्यशेषेसमधिष्ठितापरा यद्रूपकर्माणिजडास्त्रयोपिदेवानविद्युःप्रकृतिंनताःस्मताम् २० यद्भक्ति
युक्ताःपुरुषास्तुनित्यंदारिद्र्यभीमोहपराभवादीन् नप्राप्नुवंत्येवहिभक्तवत्सलासदैवमूलप्रकृतिंनताःस्मताम् २१
नारदउवाच स्तोत्रमेतत्त्रिसंध्यंयःपठेदेकाग्रमानसः दारिद्र्यमोहदुःखानिनकदाचित्स्पृशंतितम् २२ इत्थंस्तु
वंतस्तेदेवास्तेजोमंडलमास्थितम् ददृशुर्गगनंतत्रज्वालाव्याप्तदिगंतरम् २३ तन्मध्याद्भारतींसर्वेशुश्रुवुर्व्योमचा
रिणीम् शक्तिरुवाच अहमेवत्रिधाभिन्नातिष्ठामित्रिविधैर्गुणैः २४ गौरीलक्ष्मीस्वराचेतिरजःसत्वतमोगुणैः
तत्रगच्छतताःकार्यंविधास्यंतिचवःसुराः २५ नारदउवाच श्रृण्वतामितितांवाचमंतर्धानमगान्महः देवानांवि
स्मयोत्फुल्लनेत्राणांतत्तदानृप २६ ततःसर्वेपितेदेवागत्वातद्वाक्यनोदिताः गौरींलक्ष्मींस्वरांचैवप्रणेमुर्भक्तितत्पराः
२७ ततस्तास्तान्सुरान्दृष्ट्वाप्रणतान्भक्तवत्सलाः बीजानिप्रददुस्तेभ्योवाक्यान्यूचुश्चभूमिप २८ देव्यऊचुः
इमानितत्रबीजानिविष्णुर्यत्रावतिष्ठते निर्वपध्वंततःकार्यंभवतांसिद्धिमेष्यति २९

२६ २७ २८ २९

५३

३० इतिकार्त्तिकमाहात्म्यटीकायांद्वाविंशोऽध्यायः २२ छ अथतुलसीमाहात्म्यंवक्तुंतुलस्याद्युत्पत्तिप्रसंगमाह क्षिप्तेभ्यइति

नारदउवाच ततस्तुहृष्टाःसुरसिद्धसंघाःप्रगृह्यबीजानिविचिक्षिपुस्ते वृंदान्वितोभूमितलेसयत्रविष्णुःसदा
तिष्ठतिसौख्यहीनः ३० इतिश्रीचतुःपुराणसारसंग्रहेकार्तिकमासमाहात्म्येजलंधरमुक्तिकथनंनामद्वाविंशो
ऽध्यायः २२ छ नारदउवाच क्षिप्तेभ्यस्तत्रबीजेभ्योवनस्पत्यस्त्रयोभवन् धात्रीचमालतीचैवतु
लसीचनृपोत्तम १ धात्र्युद्भवास्मृताधात्रीमाभवामालतीस्मृता गौरीभवाचतुलसीतमःसत्वरजोगुणाः २
स्त्रीरूपिण्योवनस्पत्योदृष्ट्वाविष्णुस्तदानृप उत्तस्थौसंभ्रमाद्वृंदारूपातिशयविभ्रमः ३ दृष्ट्वायाचयतोमोहा
त्कामासक्तेनचेतसा तंचापितुलसीधात्र्योरागेणैवव्यलोकताम् ४ यच्चलक्ष्म्यापुराबीजमीर्ष्ययैवसमर्पितं
तस्मात्तदुद्भवानारीतस्मिन्नीर्ष्यापराभवत् ५ अतःसाबर्बरीत्याख्यामवापाथविगर्हिताम् धात्रीतुलस्यौतद्रा
गात्तस्यप्रीतिप्रदेसदा ६ ततोविस्मृतदुःखोसौविष्णुस्ताभ्यांसहैवतु वैकुंठमगमद्धृष्टःसर्वदेवनमस्कृतः ७
कार्तिकोद्यापनेविष्णोस्तस्मात्पूजाविधीयते तुलसीमूलदेशेस्यप्रीतिदासायतःस्मृता ८ तुलसीकाननंराजन्
गृहेयस्यावतिष्ठते तद्गृहंतीर्थरूपंतुनायांतियमकिंकराः ९ सर्वपापहरंनित्यंकामदंतुलसीवनम् रोपयंतिनराः
श्रेष्ठास्तेनपश्यंतिभास्करीम् १० दर्शनंनर्मदायास्तुगंगास्नानंतथैवच तुलसीवनसंसर्गःसममेवत्रयंस्मृतम्
११ रोपणात्पालनात्सेकाद्दर्शनात्स्पर्शनान्नृणाम् तुलसीदहतेपापंवाङ्मनःकायसंचितम् १२ तुलसीमंज
रीभिर्यःकुर्याद्धरिहरार्चनम् नसगर्भगृहंयातिमुक्तिभागीनसंशयः १३ पुष्कराद्यानितीर्थानिगंगाद्याःसरितस्तथा
वासुदेवादयोदेवास्तिष्ठंतितुलसीदले १४

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४

१५ १६ १७ १८ १९ २० २१ २२ २३ इतिकार्तिकमा·

तुलसीमञ्जरीयुक्तोयस्तुप्राणान्विमुंचति यमोपिनेक्षितुंशक्तोयुक्तंपापशतैरपि १५ विष्णोःसायुज्यमाप्नोतिस
त्यंसत्यंनृपोत्तम तुलसीकाष्ठजंयस्तुचंदनंधारयेन्नरः १६ तद्देहंनस्पृशेत्पापंक्रियमाणमपीहयत् तुलसीविपिन
छायायत्रयत्रभवेन्नृप १७ तत्रश्राद्धंप्रकर्तव्यंपितॄणांदत्तमक्षयम् धात्रीफलविमिश्रैश्चतुलसीपत्रमिश्रितैः १८
जलैःस्नातिनरस्तस्यगंगास्नानफलंस्मृतम् देवार्चनंनरःकुर्याद्धात्रीपत्रैःफलैस्तथा १९ सुवर्णमणिमुक्तौघैरर्चनस्या
प्नुयात्फलम् तीर्थानिमुनयोदेवायज्ञाःसर्वेपिकार्तिके २० नित्यंधात्रींसमाश्रित्यतिष्ठंत्यर्केतुलास्थिते द्वादश्यां
तुलसीपत्रंधात्रीपत्रंतुकार्तिके २१ लुनातिसनरोगच्छेन्निरयानतिगर्हितान् धात्रीतुलस्योर्माहात्म्यमपिदेवश्चतु
र्मुखः नसमर्थोभवेद्वक्तुंयथादेवस्यशार्ङ्गिणः २२ धात्रीतुलस्युद्भवकारणंयःशृणोतियःश्रावयतेचभक्त्या
विधूतपाप्मासहपूर्वजैःस्वैःस्वर्गंव्रजत्यग्र्यविमानसंस्थैः २३ इतिश्रीचतुःपुराणसारसंग्रहेकार्तिकमासमा
हात्म्येधात्रीतुलस्युत्पत्तिवर्णनंनामत्रयोविंशोऽध्यायः २३ ६७ पृथुरुवाच यदूर्जव्रतिनःपुंसःफलमह
दुदाहृतम् तत्पुनर्ब्रूहिमाहात्म्यंकेनचीर्णमिदंशुभम् १ नारदउवाच आसीत्सह्याद्रिविषयेकरवीरपुरे
पुरा ब्राह्मणोधर्मवित्कश्चिद्धर्मदत्तेतिविश्रुतः २ विष्णुव्रतकरःसम्यक्विष्णुपूजारतःसदा कदाचित्कार्तिके
मासिहरिजागरणायसः ३ रात्र्यांतुर्यावशेषायांजगामहरिमंदिरम् हरिपूजोपकरणान्प्रगृह्यव्रजतातदा ४
तेनदृष्टा समायातारक्षसीभीमदर्शना तांदृष्ट्वाभयवित्रस्तःकंपितावयवस्तदा ५

समाहात्म्यटीकायांत्रयोविंशोऽध्यायः २३ ६७ १ २ ३ ४ ५

६ ७ ८ ९ १० ११ १२ १३ १४ १५

पूजोपकरणैःसर्वैःपयोभिश्चाहनद्वयात् संस्पृत्यतद्धरेर्नामतुलसीयुक्तवारिणा ६ सोहनस्पातकंयस्मात्तस्मा
त्तस्यात्क्षणाल्लयम् अथसंस्मृत्यसापूर्वजन्मकर्मविपाकजाम् ७. स्वांदशामब्रवीद्विप्रंदंडवत्प्रणम्यसा क-
लहोवाच पूर्वकर्मविपाकेनदशामेतांगतास्म्यहम् ८ तत्कथंनुपुनर्विप्रप्रयास्याम्युत्तमांगतिम् नारदउवाच
तान्दृष्ट्वाप्रणतांसम्यग्वदमानांस्वकर्मतत् ९ अतीवविस्मितोविप्रस्तदावचनमब्रवीत् धर्मदत्तउवाच केनक
र्मविपाकेनत्वंदशामीदृशींगता १० कुत्रत्याकाचकिंशीलातत्सर्वंकथयस्वमे कलहोवाच सौराष्ट्रनगरेब्रह्मन्
भिक्षुर्नामाभवद्द्विजः ११ तस्याहंगृहिणीपूर्वंकलहाख्यातिनिष्ठुरा नकदाचिन्मयाभर्तुर्वचसापिशुभंकृतम् १२
नार्पितंतस्यमिष्टान्नंभर्तुर्वंचनशीलया कलहप्रिययानित्यंमयोद्विग्नमनायदा १३ परिणेतुंयदान्यांसमतिंचक्रेप-
तिर्मम ततोगरंसमादायप्राणास्त्यक्तामयाद्विज १४ अथबद्ध्वावध्यमानांमांनिन्युर्यमकिंकराः यमश्चमांतदा
दृष्ट्वाचित्रगुप्तमपृच्छत १५ यमउवाच अनयाकिंकृतंकर्मचित्रगुप्तविलोकय प्राप्नोत्वेषाचतत्कर्मशुभंवायदि
वाऽशुभम् १६ कलहोवाच चित्रगुप्तस्तदावाक्यंभर्त्सयन्मामुवाचसः चित्रगुप्तउवाच अनयानुकृतंकर्म
शुभंकिंचिन्नविद्यते १७ मिष्टान्नंभुंजमानेयंनभर्तरितदर्पितम् अतश्चवल्गुलीयोन्यांस्वविष्ठादात्रतिष्ठतु १८
भर्तृद्वेषात्तदाप्येषानित्यंकलहकारिणी विष्ठादांसूकरींयोनिंतस्मात्तिष्ठत्वियंहरे १९ पाकभांडेसदाभुंक्तेभुंक्तेवै
कायतस्ततः तस्माद्देषाबिडाल्यस्तुस्वजातापत्यभक्षिणी २० भर्तारमपिचोद्दिश्यत्वात्मघातःकृतोऽनया त
स्मात्प्रेतशरीरेपितिष्ठत्वेकातिनिंदिता २१

१६ १७ १८ १९ २० २१

२२ २३ सत्याद्रिशिखरे ब्रह्मणोयज्ञेस्वराशापाद्देवाः नदीरूपाअभवन् तत्र कृष्णा कृष्णतनुः साक्षाद्वेणादेवोमहेश्वरः तत्संगमप्रभावं

अतश्चैषामरुद्देशंप्रापितस्याभटैरियम् तत्रप्रेतशरीरस्याचिरंतिष्ठत्वियंततः २२ ऊर्ध्वंयोनित्रयंचैषाभुनक्तुकलहका
रिणी कलहोवाच साहंपंचशताब्दानिह्येतदेहस्थिताकिल २३ क्षुत्तृड्भ्यांपीडिताविश्यशरीरंवाणिजस्यच
आयातादक्षिणंदेशंकृष्णावेण्योश्चसंगमम् २४ तत्तीरंसंश्रितायावत्तावत्तस्यशरीरतः शिवविष्णुगणैर्दूरमपकृ
ष्टाबलादहम् २५ ततःक्षुत्क्षामयादृष्टोमयाहित्वंद्विजोत्तम त्वद्दत्ततुलसीवारिसंसर्गगतपापया २६ तत्कृतंकु
रुविप्रेंद्रकथंमुक्तिमियाम्यहम् योनित्रयाद्भवादस्माच्चप्रेतदेहतः २७ इत्थंविचिंत्यकलहावचनंद्विजाग्रणी
स्तत्कर्मपाकभयविस्मयदुःखयुक्तः यद्ग्लानिदर्शनकृपाचलचित्तवृत्तिर्ध्यात्वाचिरंसवचनंनिजगाददुःखात् २८
इतिश्रीचतुःपुराणसारसंग्रहेकार्तिकमासमाहात्म्येधर्मदत्तेतिहासकथनंनामचतुर्विंशोऽध्यायः २४ ६७
धर्मदत्तउवाच विलयंयांतिपापानितीर्थदानव्रतादिभिः प्रेतदेहस्थितायास्तेतेषुनैवाधिकारिता १ त्वद्ग्ला
निदर्शनादस्मात्खिन्नंचममामानसं नचैवनिर्वृत्तिमायातित्वामनुद्धृत्यदुःखिताम् २ तस्मादाजन्मजनितंयन्मया
कार्तिकव्रतम् तत्पुण्यस्यार्द्धभागेनसद्गतिंत्वमवाप्नुहि ३ नारदउवाच इत्युक्त्वाधर्मदत्तोसौयावत्तामभ्यषे
चयत् तुलसीमिश्रतोयेनश्रावयन्द्वादशाक्षरम् ४ तावत्प्रेतत्वनिर्मुक्ताज्वलदग्निशिखोपमा दिव्यरूपधराजा
तालावण्येनयथेंदिरा ५ ततःसादंडवद्भूमौप्रणनामाथतंद्विजम् उवाचसातदावाक्यैर्हर्षगद्गदभाषिणी ६
कलहोवाच त्वत्प्रसादाद्द्विजश्रेष्ठविमुक्तानिरयादहं पापाब्धौमज्जमानायास्त्वंनौभूतोसिमेध्रुवं ७

तुनालंवक्तुंचतुर्मुखइति २४

२५ २६ २७ २८ इतिकार्तिकमाहात्म्यटीकायांचतुर्विंशोऽध्यायः २४ ६७ १ २ ३ ४ ५ ६ नौर्नौकारूपः ७

८ ९ १० ११ १२ १३ १४ १५ १६ १७

नारदउवाच इत्थसावदतीविप्रंददर्शायांतमंबरात् विमानंभास्वरंयुक्तंविष्णुरूपधरैर्गणैः ८ अथसातद्विमा
नाग्र्यद्वास्थाभ्यामवरोपिता पुण्यशीलसुशीलाभ्यामप्सरोगणसेविता ९ तद्विमानंतदापश्यद्धर्मदत्तःसविस्मयः
पपातदंडवद्भूमौदृष्ट्वातौविष्णुरूपिणौ १० पुण्यशीलसुशीलौचतमुत्थाप्यानतंद्विजम् समभ्यनंदतुर्वाक्यमूचतु
र्धर्मसंयुतम् ११ गणावूचतुः साधुसाधुद्विजश्रेष्ठयस्त्वंविष्णुरतःसदा दीनानुकंपीसर्वज्ञोविष्णुव्रतपरायणः
१२ आबालत्वाच्छुभंत्वेतद्यत्त्वयाकार्तिकव्रतम् कृतंतस्यार्द्धदानेनपुण्यंद्वैगुण्यमागमत् १३ जन्मांतरशतोद्भूतं
पापंतद्विलयंगतम् स्नानैरेवगतंपापंयदस्याःपूर्वकर्मजम् १४ हरिजागरणाद्यैश्चविमानमिदमास्थिता वैकुंठं
नीयतेसाधोनानाभोगयुतात्वियम् १५ दीपदानभवैःपुण्यैस्तेजसारूप्यमास्थिता तुलसीपूजनाद्यैश्चकार्तिकव्रत
कैःशुभैः १६ विष्णुसान्निध्यगाजातात्वयादत्तैःकृपानिधे त्वमप्यस्यभवस्यांतेभार्याभ्यांसहयास्यसि १७ वै
कुंठभुवनंविष्णोःसान्निध्यंचसरूपताम् तेधन्याःकृतकृत्यास्तेतेषांचसफलोभवः १८ यैर्भक्त्याराधितोविष्णु
र्धर्मदत्तयथात्वया सम्यगाराधितोविष्णुःकिंप्रयच्छतिदेहिनां १९ औत्तानचरणिर्येनध्रुवत्वेस्थापितःपुरा य
न्नामस्मरणादेवदेहिनोयांतिसद्गतिं २० ग्राहग्रहीतोनागेंद्रोयन्नामस्मरणात्पुरा विमुक्तःसन्निधिंप्राप्तोजातोयंजय
संज्ञकः २१ यतस्त्वयार्चितोविष्णुस्तत्सान्निध्यंप्रयास्यसि बहून्यब्दसहस्राणिभार्याद्वययुतस्ततः २२ ततःपुण्य
क्षयेजातेपदायास्यसिभूतलम् सूर्यवंशोद्भवोराजाविख्यातस्त्वंभविष्यसि २३ नाम्नादशरथस्तत्रभार्याद्वययुतः
पुनः तृतीययानयाचापियातेपुण्यार्द्धभागिनी २४

१८ १९ २० २१ २२ २३ २४

२५ २६ २७ इतिकार्तिकमाहात्म्यटीकायांपंचविंशोऽध्यायः २५ छ अथभक्तिमाहात्म्यंवक्तुमितिहासं

तत्रापितवसान्निध्यंविष्णुर्यास्यतिभूतले आत्मानंतवपुत्रत्वेप्रकल्प्यामरकार्यकृत् २५ तवजन्मव्रतादस्माद्विष्णु
संतुष्टिकारकात् नयज्ञानचदानानिनतीर्थान्यधिकानिवै २६ धन्योसिविप्रमुख्ययतस्त्वयेतद्व्रतंकृतंतुष्टिकरंजगद्गु
रोः यदर्धभागात्सफलामुरारेः प्रणीयतेस्माभिरियंसलोकताम् २७ इतिश्रीचतुःपुराणसारसंग्रहेकार्ति
कमासमाहात्म्येधर्मदत्तोपाख्यानेकलहामोक्षकथनंनामपंचविंशोऽध्यायः २५ छ नारदउवाच
इत्थंतद्वचनंश्रुत्वाधर्मदत्तःसविस्मयः प्रणम्यदंडवद्भूमौवाक्यमेतदुवाचह १ धर्मदत्तउवाच आराधयं
तिसर्वेपिविष्णुंभक्तार्तिनाशनम् यज्ञैर्दानैर्व्रतैस्तीर्थैस्तपोभिश्चयथाविधि २ विष्णुप्रीतिकरंतेषांकिंचित्सान्निध्यकारकम्
यत्कृत्वातानिचीर्णानिसर्वाण्यपिभवंतिहि ३ गणावूचतुः साधुपृष्टंत्वयाविप्रशृणुष्वेकाग्रमानसः
सेतिहासकथांपुण्यांकथ्यमानांपुराभवाम् ४ कांचिपुर्यांपुराचोलश्चक्रवर्तीनृपोभवत् यस्याख्ययैवतेदेशाश्चोलाइतिप्रथांगताः
५ यस्मिञ्छासतिभूचक्रंदरिद्रोवापिदुःखितः पापबुद्धिःसरुग्वापिनैवकश्चिदभून्नरः
६ यस्याप्युन्नतयज्ञस्यताम्रपर्ण्यास्तटावुभौ स्वर्णयूपैःशोभाढ्यावास्तांचैत्ररथोपमौ ७ सकदाचिद्गाद्राजा
त्वनंतशयनंद्विज यत्रासौजगतांनाथोयोगनिद्रामुपाश्रितः ८ तत्रश्रीरमणंदेवंसंपूज्यविधिवन्नृपः मणिमुक्ताफलैर्दिव्यैःस्वर्णपुष्पैश्चशोभनैः
९ प्रणम्यदंडवद्भूमावुपविष्टःसतत्रवै तावद्ब्राह्मणमायातमपश्यद्देवसन्निधौ
१० देवार्चनार्थंपाणौतुतुलस्युदकधारिणम् स्वपुरीवासिनंतत्रविष्णुदासाह्वयंद्विजम् ११

प्रस्तौति इत्थमित्यादिना १ २ ३ ४ ५ ६ ७ ८ ९ १० ११

१२ १३ १४ वराकोसिदरिद्रोसिकपर्दिकातुल्योसिवा १५ १६ १७ १८ १९ २० २१

सतत्राभ्येत्यविप्रर्षिर्देवदेवमपूजयत् विष्णुसूक्तेनसंस्नाप्यतुलसीमंजरीदलैः १२ तुलसीपूजयातस्यरत्नपू-
जांपुराकृताम् आच्छादितांसमालोक्यराजाक्रुद्धोऽब्रवीदिदम् १३ चोलउवाच माणिक्यस्वर्णपूजात्रशोभा
ढ्यायाकृतामया विष्णुदासकथंसेयमाच्छन्नातुलसीदलैः १४ विष्णुभक्तिंनजानासिवराकोसिमतोमम यस्त्वि
मामतिशोभाढ्यांपूजामाच्छादयस्यहो १५ इतितद्वचनंश्रुत्वासक्रोधःसद्विजोत्तमः राज्ञोगौरवमुल्लंघ्यजगादव
चनंतदा १६ विष्णुदासउवाच राजन्भक्तिंनजानासिगर्वितोसिनृपश्रिया कियद्विष्णुव्रतंपूर्वंत्वयाचीर्णंवद
स्वतत् १७ गणावूचतुः तद्ब्राह्मणवचःश्रुत्वाप्रहस्यसनृपोत्तमः विष्णुदासंतदागर्वादुवाचवचनंद्विजम् १८
राजोवाच इत्थंचेद्दर्पसेविप्रविष्णुभक्त्यातिगर्वितः भक्तिस्तेकियतीविष्णोर्दरिद्रस्याधनस्यच १९ यज्ञदानादिकंनै
वविष्णोस्तुष्टिकरंकृतम् नापिदेवालयंपूर्वंकृतंविप्रत्वयाक्वचित् २० ईदृशस्यापितेगर्वएषातिष्ठतिभक्तितः त-
च्छृण्वंतुवचोमेद्यसर्वेप्येतेद्विजातयः २१ साक्षात्कारमहंविष्णोरेववादोगमिष्यति पश्यंतुसर्वेपिततोभक्तिंज्ञास्यं
तिचावयोः २२ गणावूचतुः इत्युक्त्वासनृपोगच्छन्निजराजगृहंतदा आरभद्वैष्णवंसत्रंकृत्वाचार्यंतुमुद्गलम्
२३ ऋषिसंघसमाजुष्टंबह्वन्नंबहुदक्षिणम् यत्रब्रह्मकृतंपूर्वंगयाक्षेत्रेसमृद्धिमत् २४ विष्णुदासोपितत्रैवतस्थौ
देवालयेव्रती यथोक्तनियमान्कुर्वन्विष्णोस्तुष्टिकरान्सदा २५ माघोर्जयोर्व्रतंसम्यक्तुलसीवनपालनम् एकाद-
श्यांहरेर्जाप्यंद्वादशाक्षरविद्यया २६ उपचारैःषोडशभिर्नृत्यगीतादिमंगलैः नित्यंविष्णोस्तथापूजांव्रतान्येतानिसोक
रोत् २७

२२ २३ २४ २५ २६ २७

२८ २९ ३० इतिश्रीकार्तिकमाहात्म्यटीकायांषड्विंशोऽध्यायः २६ छ १ २ ३ ४

नित्यंसंस्मरणंविष्णोर्गच्छन्भुविस्वपन्नपि सर्वभूतस्थितंविष्णुमपश्यत्समदर्शनः २८ माघकार्तिकयोर्नित्यंविशे
षनियमानपि अकरोद्विष्णुतुष्ट्यर्थंसोद्यापनविधिंतथा २९ एवंसमाराधयतोःश्रियःपतिंतयोश्चचोलेश्वरविष्णु·
दासयोः अगाद्विकालःसुमहान्व्रतस्थयोस्तन्निष्ठसर्वेंद्रियकर्मणोस्तदा ३० इतिश्रीचतुःपुराणसारसंग्रहेका
र्तिकमासमाहात्म्येचोलराजविष्णुदासब्राह्मणविवादकथनंनामषड्विंशोऽध्यायः २६ छ नारदउवाच
कदाचिद्विष्णुदासोथकृत्वानित्यविधिंद्विज सपाकमकरोत्तावद्दहरत्कोप्यलक्षितः १ तमदृष्ट्वाप्यसौपाकंपुनर्नैवा
करोत्तदा सायंकालार्चनस्यासौव्रतभंगभयाद्विजः २ द्वितीयेऽह्निपुनःपाकंकृत्वायावत्सविष्णवे उपहारार्पणंकर्तुं
गतःकोप्यहरत्पुनः ३ एवंसप्तदिनंतस्यपाकंकोप्यहरन्नृप ततःसविस्मयश्चाथमनस्येवमधारयत् ४ अहोनि·
त्यंसमभ्येत्यकःपाकंहरतेमम क्षेत्रसंन्यासिनःस्थानंनत्याज्यंममसर्वथा ५ पुनःपाकंविधायान्नभुज्यतेयदिचेन्म·
या सायंकालार्चनंचैवपरित्याज्यंकथंभवेत् ६ यदिपाकंविधायैवभोक्तव्यंतुमयानतत् अनिवेद्यहरौसर्वंवैष्ण
वैर्नैवभुज्यते ७ उपोषितोहंसप्ताहंतिष्ठाम्यत्रव्रतस्थितः अद्यसंरक्षणंसम्यक्पाकस्यात्रकरोम्यहम् ८ इतिपा
कंविधायासौतत्रैवालक्षितःस्थितः तावद्ददर्शचांडालंपाकान्नहरणेस्थितम् ९ क्षुत्क्षामंदीनवदनमस्थिचर्माव
शेषितम् तमालोक्यद्विजाग्र्योभूत्कृपयान्वितमानसः १० विलोक्यान्नहरंविप्रस्तिष्ठतिष्ठेत्यभाषत कथमश्ना
सितद्रूक्षंघृतमेतद्गृहाणभोः ११ छ छ छ छ

५ ६ ७ ८ ९ १० ११ छ

१२ १३ १४ १५ १६ १७ १८ १९

इत्थंवदंतंविप्राग्र्यमायांतंसविलोक्यच वेगादधावत्तद्भीत्यामूर्छितश्चपपातह १२ भीतंसंमूर्छितंदृष्ट्वाचांडालंसद्विजाग्रणीः वेगादभ्येत्यकृपयास्ववस्त्रांतैरवीजयत् १३ अथोत्थितंतमेवासौविष्णुदासोव्यलोकयत् साक्षान्नारायणंदेवंशंखचक्रगदाधरम् १४ तंदृष्ट्वासात्त्विकैर्भावैरावृतोद्विजसत्तमः स्तोतुंचैवनमस्कर्तुंनदानालं बभूवसः १५ अथशक्रादयोदेवास्तत्रैवाभ्याययुस्तदा गंधर्वाप्सरसश्चापिजगुश्चननृतुर्मुदा १६ विमानशतसंकीर्णंदेवर्षिशतसंकुलम् गीतवादित्रनिर्घोषस्थानंतदभवत्तदा १७ ततोविष्णुःसमालिंग्यस्वभक्तंसात्त्विकव्रतम् सारूप्यमात्मनोदत्वानयद्वैकुंठमंदिरम् १८ विमानवरसंस्थंतंगच्छंतंविष्णुसन्निधिम् दीक्षितश्चोलनृपतिर्विष्णुदासंददर्शसः १९ वैकुंठभुवनंयांतंविष्णुदासंविलोक्यसः स्वगुरुंमुद्गलंवेगादाहूयेत्थंवचोब्रवीत् २० चोलउवाच यस्यस्पर्द्धयामयाचैवयज्ञदानादिकंकृतम् सविष्णुरूपधृग्विप्रोयातिवैकुंठमंदिरं २१ दीक्षितेनमयासम्यक्सत्रेस्मिन्वैष्णवेत्वया हुतमग्नौकृताविप्रादानाद्यैःपूर्णमानसाः २२ नैवाद्यापिसमेदेवःप्रसन्नोजायतेध्रुवम् विष्णुदासस्यभक्त्यैवसाक्षात्कारंददौहरिः २३ ६५ ६५

२० २१ २२ २३ ६५ ६५ ६५

६ ७ ८ ९ १० ११ १२ १३ १४ १५

मरुत्तेनकदाचित्तावाहूतौयज्ञकर्मणि जग्मतुर्यज्ञकुशलौदेवर्षिगणपूजितौ ६ जयस्तत्राभवद्ब्रह्मायाजको
विजयोभवत् ततोयज्ञविधिंकृत्स्नंपरिपूर्णंचचक्रतुः ७ मरुत्तोवभृथस्नातस्ताभ्यांवित्तंददौबहु तत्समादाय
तौवित्तंजग्मतुःस्वाश्रमप्रति ८ यजनायपृथग्विष्णोस्तुष्ट्यर्थंतौततोमुनी तद्धनंविभजंतौतुपस्पर्धातेपरस्परं
९ जयोऽब्रवीत्समोभागःक्रियतामितितद्वसः विजयश्चाब्रवीन्नैतद्यल्लब्धंयेनतस्यतत् १० ततोऽशपज्जयः
क्रोधाद्विजयंलुब्धमानसम् गृहीत्वानददास्येतत्तस्माद्ग्राहोभवेतितम् ११ विजयस्तस्यतंशापंश्रुत्वासोप्यशपच्च
तम् मदभ्राताशपस्त्वंमांतस्मान्मातंगतांव्रज १२ ततस्तावूचतुर्विष्णुंदृष्ट्वानित्यार्चनोविभुम् शापयोश्चनिवृ-
त्तिंतौययाचातेरमापतिम् १३ जयविजयावूचतुः भक्तावावांकथंदेवग्राहमातंगयोनिगौ भविष्यावःकृपा-
सिंधोतच्छापोविनिवर्त्यताम् १४ श्रीभगवानुवाच मद्भक्तयोर्वचोऽसत्यंनकदाचिद्भविष्यति मयापिनान्य-
थाकर्तुंशक्यतेतत्कदाचन १५ प्रल्हादवचसास्तंभेप्याविर्भूतोह्यहंपुरा तथांबरीषवाक्येनजातोगर्भेस्वयंकि-
ल १६ तस्माद्युवामिमौशापावनुभूयस्वयंकृतौ लभतांमत्पदंनित्यमित्युक्त्वांतर्दधेहरिः १७ गणावूचतुः
ततस्तौग्राहमातंगावभूतांगंडकीतटे जातिस्मरौतुतद्योन्यामपिविष्णुव्रतेस्थितौ १८ कदाचित्सगजःस्नातुंकार्ति-
केगंडकींगतः तावज्जग्राहतंग्राहःसंस्मरन्शापकारणम् १९ ग्राहग्रस्तोह्यसौनागःसस्मारश्रीपतिंतदा तावदा-
विर्भवद्विष्णुश्चक्रशंखगदाधरः २० ततस्तौग्राहमातंगौचक्रंक्षिप्त्वासमुद्धृतौ दत्त्वैवनिजसारूप्यंवैकुंठमनयद्वि-
भुः २१

१६ १७ १८ १९ २० २१

२२ २३ २४ २५ आरनालंकांजि २६ २७ २८ २९ ३०

ततःप्रभृतितत्स्थानंहरिक्षेत्रमितिस्मृतम् चक्रसंघर्षणाद्यस्मिन्प्रावाणोपिहिलांछिताः २२ नाश्रुभोविस्मृतो
लोकेजयश्चविजयस्तथा नित्यंविष्णुप्रियौह्यास्थौपृष्ठौयौहित्वयाद्विज २३ अतस्त्वमपिधर्मज्ञनित्यंविष्णुव्रते
स्थितः त्यक्तमात्सर्यदंभोपिभवस्वसमदर्शनः २४ तुलामकरमेषेषुप्रातःस्नायीसदाभव एकादशीव्रतेनिष्ठनु·
लसीवनपालकः २५ ब्राह्मणानयगाश्चापिवैष्णवांश्चसदाभज मसूरिकामारनालंवृंताकान्यपिखादमा २६
एवंत्वमपिदेहांतेतद्विष्णोःपरमंपदम् प्राप्नोषिधर्मदत्त त्वंतद्भक्त्यैवयथावयम् २७ तावज्जन्मव्रतादस्माद्विष्णु
संतुष्टिकारकात् नयज्ञानचदानानिनतीर्थान्यधिकानिवै २८ धन्योसिविप्राग्र्ययतस्त्वयैतद्व्रतंकृतंतुष्टिकरंजग·
द्गुरोः यदर्धभागात्तफलामुरारेःप्रणीयतेऽस्माभिरियंसलोकताम् २९ नारदउवाच इत्थंतौधर्मदत्तंतमुपदि
श्यविमानगौ तयाकलहयासार्द्धंवैकुंठभवनंगतौ ३० धर्मदत्तोप्यसौज्ञातप्रत्ययस्तद्व्रतेस्थितः देहांतेतद्विभोः
स्थानंभार्याभ्यांसंयुतोभ्ययात् ३१ इतिहासमिमंपुराभवंशृणुतेश्रावयतेचयः पुमान् हरिसान्निधिकारणींमतिं
लभतेसौकृपयाजगद्गुरोः ३२ इतिश्रीचतुःपुराणसारसंग्रहेकार्तिकमासमाहात्म्येधर्मदत्तमोक्षप्राप्तिकथनं
नामाष्टाविंशोऽध्यायः २८ ॥छ॥ श्रीकृष्णउवाच इतितद्वचनंश्रुत्वापृथुर्विस्मितमानसः संपूज्यना
रदंसम्यक्विससर्जतदाप्रिये १ पुरावंतीपुरेकश्चिद्विप्रआसीद्धनेश्वरः ब्रह्मकर्मपरिभ्रष्टःपापकर्मास्कदुर्मतिः २
देशाद्देशांतरंगच्छन्क्रयविक्रयकारणात् माहिष्मतीपुरीमागात्कदाचित्सधनेश्वरः ३

३१ ३२ इतिकार्तिकमाहा
त्म्यटीकायामष्टाविंशोऽध्यायः २८ ॥छ॥ १ अथसंसर्गपुण्यप्राप्तिर्भवतीतितामितिहासेनप्रकटीकरोति पुरेति २ ३

४ ५ ६ ७ ८ ९ १० ११ १२ १३

महिषेणकृतापूर्वंतस्मान्माहिष्मतीतिसा यस्यांवैप्रगताभातिनर्मदापापनाशिनी ४ कार्त्तिकव्रतिनस्तत्रनानादे
शागतान्नरान् सद्रव्यविक्रयं कुर्वन्मासमेकमुवाससः ५ सनित्यंनर्मदातीरेभ्रमन्विक्रयकारणात् ददर्शब्राह्म·
णान्स्नानजपदेवार्चनेस्थितान् ६ कांश्चित्पुराणंपठतःकांश्चिच्छ्रवणेरतान् नृत्यगायनवादित्रविष्णुश्रवणतत्प
रान् ७ उद्यापनविधौसक्तान्कांश्चिज्जागरणेरतान् विप्रगोपूजनरतान्दीपदानरतांस्तथा ८ ददर्शकौतुकाविष्ट·
स्तत्रतत्रधनेश्वरः नित्यंपरिभ्रमंस्तत्रदर्शनस्पर्शभाषणात् ९ वैष्णवानांतथाविष्णोर्नामश्रावादिसोलभत् एवंमा·
संस्थितस्तस्याःनर्मदायास्तटेद्विजः १० तावत्कृष्णाहिनादष्टोविह्वलःसपपातह अथदेहंपरित्यक्तंतंबध्वायम
किंकराः ११ यमाज्ञयाकुंभिपाकेचिक्षिपुस्तंधनेश्वरम् यावत्क्षिप्तस्तत्रासौतावच्छीतलतांययौ १२ कुंभीपाको
यथावन्हिःप्रल्हादक्षेपणात्पुरा यमस्तकौतुकंदृष्ट्वातमानीयपप्रच्छच १३ तावदभ्यागतस्तत्रनारदःप्राहसत्वरम्
नारदउवाच नैवायंनिरयान्भोक्तुमर्होत्र्यरुणनंदन १४ यस्मादंतेस्वसंजातंकर्मयन्निरयापहम् यःपुण्यकर्मि·
णांकुर्याद्दर्शनस्पर्शभाषणम् १५ ततःषडंशमाप्नोतिपुण्यस्यानिरतंनरः सख्यंतुतैस्तुसंसर्गंकृतवान्वैधनेश्वरः १६
कार्त्तिकव्रतिभिर्मासंतेषांपुण्यांशभागयम् तस्मादकामपुण्योहियस्तयोनिःस्थितोत्ययम् १७ विलोक्यनिरयान्सर्वा
न्पापभोगप्रदर्शकान् १८ श्रीकृष्णउवाच इत्युक्त्वागतवतिनारदेससौरिस्तद्वाक्यश्रवणाद्विबुद्धतत्त्वकर्मा
तंविप्रंपुनरनयन्स्वकिंकरेणतान्सर्वान्निरयगणान्प्रदर्शयिष्यन् १९ ततोधनेश्वरंनीत्वानिरयान्प्रेतपोऽब्रवीत्
दर्शयिष्यंस्तुतान्सर्वान्यमानुज्ञाकरस्तदा २०

१४ १५ १६ १७ १८ १९ २०

२१ २२ २३ २४ २५ २६ २७ २८ २९ इतिकार्तिकमाहा०

प्रेतपउवाच पश्येमान्निरयान्घोरान्धनेश्वरमहाभयान् एषुपापकरानित्यंपच्यंतेयमकिंकरैः २१ अकामात्पातकंशुष्कंकामादार्द्रमुदाहृतम् आर्द्रशुष्कादिभिःपापैर्द्विप्रकारानवस्थितान् २२ चतुराशीतिसंख्याकैःपृथग्भेदैरवस्थितान् यत्प्रकीर्णमपांक्तेयंमलिनीकरणंतथा २३ जातिभ्रंशकरंतद्वदुपपातकसंज्ञकं अतिपापंमहापापसमथापातकंस्मृतम् २४ एभिःसततसुपच्यंतेनिरयेषुयथाक्रमं कार्तिकव्रतिभिर्यस्मात्संसर्गोत्यभवत्तव २५ तत्पुण्योपचयादेतेनिर्हृता निरयाःखलु श्रीकृष्णउवाच दर्शयित्वेतिनिरयान्प्रेतपस्तमथाहरत् २६ धनेश्वरंयक्षलोकंयक्षस्त्वाभूत्सतत्रहि धनदस्यानुगःसोयंधनयक्षेतिविश्रुतः २७ सूतउवाच इत्युक्त्वावासुदेवोसौसत्यभामामतिप्रियम् सायंसंध्याविधिंकर्तुंजगामजननीगृहम् २८ ब्रह्मोवाच एवंप्रभावःखलुकार्तिकोयंमुक्तिप्रदोभुक्तिकरश्चयस्मात् मयात्यनेकार्जितपातकानिघ्नतस्यसंदर्शयतोपिमुक्तिम् २९ इतिश्रीचतुःपुराणसारसंग्रहेकार्तिकमासमाहात्म्येधनेश्वरयक्षजन्मप्राप्तिवर्णनन्नामैकोनत्रिंशोऽध्यायः २९ छ नारदउवाच अद्भुतोयंत्वयाप्रोक्तोमहिमाकार्तिकस्यतु स्वस्यकर्तुमसामर्थ्येकथमेतत्फलंभवेत् १ ब्रह्मोवाच नास्तिकर्तुंस्वसामर्थ्यमुपायात्प्राप्यतेफलम् द्रव्यंदत्वाब्राह्मणायगृण्हीयात्फलमुत्तमम् २ शिष्याद्वाभृत्यवर्गाद्वास्त्रीभ्योवापान्वकारयेत् तस्मादपिफलंगृण्हन्फलभाग्जायतेनरः ३ नारदउवाच अदत्तान्यपिपुण्यानिप्राप्यंतेकेनचित्क्वचित् एतदिच्छाम्यहंश्रोतुंकौतुकंममवर्तते ४ ब्रह्मोवाच अदत्तान्यपिपुण्यानिलभंतेपातकान्यपि येनोपायेनतद्वक्ष्येशृणुष्वैकमनाद्विज ५ टीकायामेकोनत्रिंशोऽध्यायः २९ छ १ २ आप्तान् आप्तवर्गात् ३ ४ ५

यत् यस्यराष्ट्रेकृतंतत्फलंतस्यराष्ट्रेजायते पुरेनगरस्थं ६ लिप्यतइतिशेषः ७ कर्मणःफलपाककालमाह अज्ञानादिति ८ अथपापपुण्ययोर्विभागांशमा
ह षण्मासमिति ९ १० ११ षष्ठांशः इत्यत्रफलार्धइतिवापाठः १२ १३ एवंधर्मे १४ १५ १६

सुकृतंवादुष्कृतंवाकृतमेकेनयत्कृते जायतेतस्यतद्राष्ट्रेत्रेतायांतुपुरेभवेत् ६ द्वापरेवंशमध्येतुकलौकर्तैवकेवलं अज्ञानाद्यत्कृतंकर्मबाल्येस्वप्नेतुतत्फलम् ७ अज्ञानाद्यच्चतारुण्येबाल्येतस्यफलंभवेत् ज्ञानपूर्वंकृतंकर्मआजन्मांतंचतत्फलम् ८ षण्मासंपापिसंगेननरःपापीप्रजायते पापिनांवाधर्मिणांवासंसर्गाद्दशमासिकं ९ भोजनादेकपंक्तौत्वविंशांशः पुण्यपापयोः एकासनेद्वयोर्वासात्सहस्रांशेनलिप्यते १० योवैयस्यान्नमश्नातिसभुंक्तेतस्यकिल्बिषम् जपादौपापिसंसर्गात्षोडशांशोविनश्यति ११ परस्यस्तवनाद्योनादेकपात्रस्थभोजनात् एकशय्याप्रवरणात्षष्ठांशःपुण्यपापयोः १२ पुरुषोहरतेसर्वंभार्यायाश्चौरसस्यच अर्धंशिष्यात्तुर्यांशंपापपुण्यंतथैवच १३ भर्तुराज्ञाकरीनारीभर्तुरर्द्धंवृषंहरेत् यद्धस्तपक्वंभुंजीयाद्दशांशंतदघंहरेत् १४ वर्षाशनंतुयोदत्तेतदर्धांशस्यभागयं वर्षाशनार्द्धंपुण्यंतुभुंक्तेवर्षाशनीनरः १५ पुरोहितस्यषष्ठांशंपापंवापुण्यमेववा यजमानोभुनक्त्येवतद्दशांशंपुरोहितः १६ उद्योगीत्वनुमंतात्वयश्चोपकरणप्रदः षष्ठांशंपुण्यपापानांउपद्रष्टाद्दशांशकम् १७ यद्धस्तात्कारयेत्कर्मनान्नमस्मैप्रयच्छति विनाभृतकशिष्याभ्यांषष्ठांशंपुण्यमाहरेत् १८ व्यवहारात्तथाप्रीत्यानित्यंसंभाषणादिभिः दशांशं पुण्यपापानांलभतेनात्रसंशयः १९ संसर्गपुण्ययोगेन एकदंतोद्विजाधमः

१७ १८ १९ अत्रप्रसिद्धाकथासनत्कुमारे पुरावाराणस्यांभरद्वाजकुले कर्मदत्तोनामद्विजस्तस्य एकदंतोनामपुत्रः आसीत् सविद्वानपि दैवयोगात्पतिव्रतांस्वांभार्यांत्यक्त्वा वेश्यायामहर्निशमासक्तमनाः सन् पितृद्रव्याभावे चौर्यकर्माकरोत् एवंदुष्कर्मणाक्षीणवित्तः देशाद्देशांतरेभ्रमन् कदाचिद्यमुनायामागतः तत्रकार्तिक

स्नानार्थमागतान् दानधर्मव्रतपूजाकथाश्रवणपठनरतान् ब्राह्मणादीन्पश्यन् मासंनिन्येततः कदाचित्सर्पदंशेनमृतःसन्यमलोकंगतः त
अनमकराहकेकुंभीपाकेनिक्षिप्तोपिशीतलजलह्रदवत्स्करवंमेने तदायमः कस्यकर्मण इदंफलमिति विचारयति तदैवनारदः आगत्योवाच

नरकान्विविधान्दृष्ट्वास्वर्गंप्रापतदैवहि २० नारदउवाच ईदृशंकार्तिकव्रतमस्मायासंमहत्फलम् नकु·
र्वंतिजनाः केचित्किमर्थंवैपितामह २१ ब्रह्मोवाच स्वसृष्टिवृद्ध्येवेधाधर्माधर्मौससर्जह धर्ममेवानुति
ष्ठंतः प्राप्नुवंतिशुभांगतिम् २२ अधर्ममनुतिष्ठंतोयांतितेऽधोगतिंनराः पुण्यकर्मफलंनाकोनरकस्त्वद्विपर्ययः २३
तयोःपालनकर्तारौद्वावेवविधिनाकृतौ शतक्रतुयमौतौच पुण्यपापानुसारिणौ २४ गुरुतल्पादयःपुत्राःकाम
स्यप्रथिताभुवि क्रोधस्यपितृघाताद्याःलोभस्यतनयाञ्छृणु २५ ब्रह्मस्वहरणाद्याश्च एतेनरकनायकाः कृतायमे·
नतैर्व्याप्तामनुजानांहिकुर्वते २६ व्रतादिधर्मकृत्यंयैस्तैर्मुक्तास्तेहिकुर्वते २७ श्रद्धामेधाविघातिन्यौवर्तेतेभुविसर्व
दा ताभ्यांव्याप्तस्तुमनुजः श्रीविष्णोःश्रवणादिकम् २८ नकरोतिसदुर्मेधायेनाधंयातिवैतमः कृष्णेनसत्यभा·
मायैयदुक्तंतद्वदामिते २९ अध्यापनाद्याजनाद्वाप्येकपंक्त्यशनादपि तुर्यांशंपुण्यपापानांपरोक्षंलभतेनरः ३०
एकासनादेकयानान्निश्वासस्यांगसंगतः षडंशफलभागीस्यान्नियतंपुण्यपापयोः ३१ स्पर्शनाद्भाषणाद्वापिपरस्य
स्तवनादपि दशांशंपुण्यपापानांनित्यंप्राप्नोतिमानवः ३२ दर्शनश्रवणाभ्यांचमनोध्यानात्तथैवच परस्यपुण्यपा·
पानांशतांशंप्राप्नुयान्नरः ३३

अनेन सज्जनैः सार्द्धं स्नानादिना कालिंद्यां कार्तिको मासः नीतः तेनसंसर्गपुण्ये
नायंस्वर्गफलमर्हति तच्छ्रुत्वायमस्तंनरकान् दर्शयित्वा स्वर्गंप्रेषयदिति २० २१ २२ २३ २४ अथकामक्रोधलो
भानांतनयानाह गुरुतल्पादयइति २५ २६ २७ २८ मतांतरमाह कृष्णेनेति २९ ३० ३१ ३२ ३३

३४ ३५ ३६ ३७ ३८ ३९ ४० ४१ ४२

परस्यनिंदांपैशून्यंधिक्कारंचकरोतियः तत्कृतंपातकंप्राप्यस्वपुण्यंप्रददातिसः ३४ कुर्वतःपुण्यकर्माणि
सेवांयःकुरुतेनरः पत्नीभृतकशिष्येभ्योयदन्यःकोपिमानवः ३५ तस्यसेवानुरूपंचद्रव्यंकिंचिन्नदीयते सोपिसे
वानुरूपेणतत्पुण्यफलभाग्भवेत् ३६ एकपंक्तिस्थितंयस्तुलंघयेत्परिवेषणम् तत्पुण्यस्यषडंशंचलभेद्यस्तुवि-
लंघितः ३७ स्नानसंध्यादिकंकुर्वन्यःस्पृशेद्वाथभाषते सकर्मपुण्यषष्ठांशंदद्यात्तस्मैविनिश्चितम् ३८ धर्मोद्देशे
नयोद्रव्यमपरंयाचतेनरः तत्पुण्यकर्मजंतस्यधनदस्त्वाप्नुयात्फलम् ३९ अपहृत्यपरद्रव्यंपुण्यकर्मकरोतियः
कर्मकृत्पापभाक्तत्रधनिनस्तद्भवंफलम् ४० नापकृत्यऋणंयस्तुपरस्याम्रियतेनरः धनीतत्पुण्यमादत्तेतद्धनस्यानुरू
पतः ४१ बुद्धिदाताऽनुमंताचयश्चोपकरणप्रदः बलकृच्चापिषष्ठांशंप्राप्नुयात्पुण्यपापयोः ४२ प्रजाभ्यःपुण्य
पापानांराजाषष्ठांशमुद्धरेत् शिष्याद्गुरुःस्त्रियोभर्तापितापुत्रात्तथैवच ४३ स्वपतेरपिपुण्यस्ययोषिदर्धमवाप्नुया
त् चित्तस्यानुव्रताशश्वद्भर्तृतुष्टिकारिणी ४४ परहस्तेनदानादिकुर्वतःपुण्यकर्मणः विनाभृतकपुत्राभ्यांकर्ता-
षष्ठांशमुद्धरेत् ४५ वृत्तिदोवृत्तिसंभोक्तुःपुण्यंषष्ठांशमुद्धरेत् आत्मनोवापरस्यापियदिसेवांनकारयेत् ४६
इत्यंत्यदत्तान्यपिपुण्यपापान्यायांतिनित्यंपरसंचितानि कलौत्वयंवैनियमोनकार्यःकर्तैवभोक्ताखलुपुण्यपापयोः
४७ कलौज्ञानंहृदंनास्तिकलौगर्वेणसत्क्रिया कलौदंभान्वितोयोगोनश्यत्येवनसंशयः ४८

४३ ४४ ४५ ४६ ४७ ४८ ४९ ५०

तपोनिष्ठ इति अत्रप्रसिद्धाकथा ब्राह्मे त्रेतायुगेतपोनिष्ठनामब्राह्मणः दंभीइंद्रसह आसीत् एकदाभिक्षार्थीसंचरतः तस्यबलाकाव्योम्निगच्छति पुरीषपातयामासतस्यपात्रेन्नमध्यतः वियन्मार्गात्सपाताथबलाकातेनवीक्षिता कोपदृष्ट्याबलाकासागतप्राणाऽभवत्क्षणात् तदालोक्यप्रदुष्टोसौस्वप्रभावेनगर्वितः सएकदाचरन्भिक्षांजगामैकंनिवेशनम् पतिव्रतायाः कस्याश्चिन्भिक्षांदेहीतिचाब्रवीत् सातापसंसमालोक्यभर्तुश्शुश्रुषणेरता भिक्षार्थेनांतरंलेभेनित्यकर्मक्रियाकुला भोजयामासभर्तारंविनीतातत्प्रियैषिणी वस्त्रांतरेणसाचक्रेक्षुद्भ्रमंतुनिवारणम् सतापसोपि क्रोधेनतस्थौस्थाणुरिवाचलः सापितंभोजयित्वाथकृतशौचंनिजंपतिम् शय्यासमाश्रितंदृष्ट्वाव्यधात्पादानुमार्जनम् पादसंवाहनंवाक्यंसानुकूलंप्रियंहितम् प्रेमभावेनसंबंधमुवाचप्रहसन्मुखी ततोनिद्रामुपगतेसाभर्तरिनिजेसती देवीचान्नस्यपात्रंवैगृहीत्वानिर्ययौबहिः तामसौदित्सतींभिक्षांद्विरीक्ष्यकुपितेक्षणः हुंकारोच्चारणंकृत्वानजग्राहतदर्पितम् तदातमाहसासाध्वीस्वपदन्यस्तलोचना पतिव्रतोवाच नाहंबलाकायादग्धात्वयारम्यास्कतापस नभविष्यतितेभीष्टंमनसोन्नंप्रगृह्यतां ब्रह्मोवाच ततःसुविस्मितोविप्रोभिक्षापात्रंविहायतत् रोमांचितांगोवचनमाहबद्धांजलिःसतीं तापसउवाच बलाकांपततीमध्यावियन्मार्गान्निपातिताम् मातःकथंनुजानीषेतन्ममाचक्ष्वकारणम् पतिव्रतोवाच नमंत्रादिकृतोविप्रनचनैसर्गिकोमम प्रभावएषसामान्योयस्ययस्याच्युतोहृदि अग्नौक्रियावतांविष्णुःपुत्राणांपितरोहरिः स्त्रीणांभर्तृषुसंस्थोहिआचार्येपाठशालिनाम् ब्राह्मणेसर्ववर्णानांविष्णुरुक्तोमनीषिभिः प्रतिमास्वल्पबुद्धीनांयोगिनांहृदयेहरिः सोयंपुराणपुरुषःप्रत्यक्षंदैवतंमम पितामातागुरुर्गोप्ताबांधवाःसुहृदात्मभूः सर्वःसर्वमयोभूमौब्रह्मन्भर्तामेस्फुटम् तस्यशुश्रुषयाज्ञानमिदंलोकद्वयंचमे नारीभर्तुर्वशाचाहमसंभाष्येतराद्विज नाधिकारस्त्वयावक्तुंएतावदपिसांप्रतम् प्रसंगादेतदुदितंतन्मेविष्णुःप्रसीदतु शुश्रुषायदितेधर्मेप्रतिसंप्रतितापस गत्वावाराणशींपृच्छमांसविक्रयकारिणम् सूनागारस्थितंव्याधंसतेधर्मंप्रवक्ष्यति एतावदुक्त्वासाचांतर्गृहंगता-

तपोनिष्ठःपुरादंभीसतीशुश्रूषप्रभावतः

तापसोपिवाराणशींगत्वा व्याधगृहंगतवान् समालोक्यतमायांतंतापसंसोभ्यधावत व्याधस्त्वागत्यतंविप्रंनमश्चक्रेविनीतवत् निनायस्वगृहंपश्चात्संपूज्यविधिवच्चतम् प्रोवाचप्रहितापूर्वंसत्याममगृहेधुना ब्रह्मोवाच तस्यवाक्यमथाकर्ण्यविस्मितोतीवतापसः प्रोवाचत्वंजानासिकथंधर्मव्याधपतिव्रताम् धर्मव्याधउवाच नमंत्रादिकृतःसोयंनचनैसर्गिकोमम प्रभावोयंनमस्यामि पितरौतन्ममेदृशः ज्ञानमप्रतिमंसम्यक् त्रिकालिकमविप्लुतम् तथाधर्मरहस्यंचजानामिपितृसेवया इत्युक्त्वाउपदेश—मिच्छंतं तापसंपुनरुवाच वर्णानामुत्तमोविप्रःसर्ववर्णैरभिष्टुतः तस्मान्नैवोपदेष्टव्याः अधमैःकर्हिचित्द्विज तस्मात्त्वंगच्छभोविप्र बिंदुनामऋषिंप्रति ज्ञानवान्धर्मशीलश्चसतेज्ञानंप्रदास्यति इत्याकर्ण्यवचस्त

पित्रोःपूजादर्शनेनचोर्जसेवीपरंगतः ४९ नारदउवाच भगवन्श्रोतुमिच्छामिव्रतानामुत्तमंव्रतम् विधिं
मासोपवासस्यफलंचास्ययथोचितम् ५० ब्रह्मोवाच साधुनारदसर्वंतेयत्पृष्टंप्रब्रुवेनघ भक्त्यामतिमतां
श्रेष्ठश्शृणुष्वगदतोमम ५१ सुराणांचयथाविष्णुस्तपतांचयथारविः मेरुःशिखरिणांयद्वद्वैनतेयश्चपक्षिणाम्
५२ श्रेष्ठंसर्वव्रतानांतुतद्वन्मासोपवासनम् सर्वव्रतेषुयत्पुण्यंसर्वतीर्थेषुचैवहि ५३ सर्वदानोद्भवंचैवयज्ञैश्चभूरिदक्षिणैः नतत्पुण्यमवाप्नोतियन्मासपरिलंघनात् ५४ गुरोराज्ञांततोलब्ध्वाकुर्यान्मासोपवासनं अति
कृच्छ्रंचपाराकंकृत्वाचांद्रायणंततः ५५

स्यनमस्कृत्वानिमंत्र्यचययौपंचनदंतीर्थंमुनींद्रंप्रत्यभाषत तापसउवाच मयाक्रोधेनविप्रर्षेर्ध्वंसितंपूर्वसंचितं इदानींकृपयाब्रूहियेनमोक्षमवाप्नुयाम् बिंदुऋषिरुवाच सर्वेषामेवधर्माणांकार्तिकःप्रवरःस्मृतः तथाहेतापसप्राणिनांपापानि सर्वतीर्थानिहरंति सर्वतीर्थानांपातकं मकरेर्केप्रयागराजोहरति प्रयागराजपापं कार्तिकेपंचनदंतीर्थंहरति तस्मात्त्वंपंचनदंगत्वा कार्तिकव्रतंकुरु तच्छ्रुत्वातापसः तत्रगत्वासविधिव्रतंकृत्वा विमानेनविष्णुलोकंययाविति ४९ अथमासोपवासव्रतविधान प्रसंगमाह नारदउवाचेत्यादिना यावत्समाप्ति ५० ५१ ५२ ५३ ५४ ५५ ५६

५६ ५७ ५८ ५९ ६० ६१ ६२ ६३

मासोपवासंकुर्वीतज्ञात्वादेहबलाबलम् वानप्रस्थोयतिर्वापिनारीवाविधवामुने ५६ मासोपवासंकुर्वीतगुरोर्वि
प्राज्ञयाततः आश्विनस्यामलेपक्षेएकादश्यामुपोषितः ५७ व्रतमेतत्तुगृह्णीयाद्यावत्त्रिंशद्दिनानितु अच्युतस्या
लयेभक्त्यात्रिकालंपूजयेद्धरिम् ५८ नैवेद्यधूपदीपाद्यैःपुष्पैर्नानाविधैरपि मनसाकर्मणावाचापूजयेद्गरुडध्वजम्
५९ कुर्वन्नरस्त्रीविधवावादृढभक्तिर्जितेंद्रियः नारीवाविधवासाध्वीवासुदेवंसमर्चयेत् ६० स्मृत्यालोकनगंधादि
स्वादितंपरिकीर्तितम् अन्यस्यवर्जयेद्ग्रासंग्रासानांसंप्रमोक्षणम् ६१ गात्राभ्यंगंशिरोभ्यंगंतांबूलंसविलेपनम्
व्रतस्थोवर्जयेत्सर्वंयच्चान्यच्चनिराकृतम् ६२ नव्रतस्थःस्पृशेत्किंचिद्विकर्मस्थंनचालपेत् देवतायतनेतिष्ठन्नह
स्यश्चाचरेद्व्रतम् ६३ कृत्वामासोपवासंतुयथोक्तविधिनानरः अन्यूनाधिकमेवंतुव्रतंत्रिंशद्दिनैरिति ६४ ततो
र्चयेदेवपुण्यंद्वादश्यांगरुडध्वजम् वस्त्रदानादिभिश्चैवभोजयित्वाद्विजोत्तमान् ६५ दद्याच्चदक्षिणांतेभ्यः प्रणिप
त्यक्षमापयेत् विप्रान्क्षमापयित्वातुविसृज्याभ्यर्च्यपूज्यच ६६ एवंमासोपवासांतेकृत्वाविप्रांस्त्रयोदश का
रयेद्वैष्णवंयज्ञमेकादश्यामुपोषितः ६७ ततोनुभोजयेद्विप्रान्नमस्कारपुरःसरम् तांबूलवस्त्रयुग्मानिभोजना·
च्छादनानिच ६८ योगपट्टानिसूत्राणिशय्यासोपस्करांतथा दत्वाचैवद्विजाग्र्येभ्यः पूजयित्वाविसर्जयेत् ६९
विधिर्मासोपवासस्ययथावत्परिकीर्तितः अतःपरंप्रवक्ष्यामिनवम्यांद्वितियोविधिः ७० ऋषिभ्योवालखिल्येभ्य
प्रोक्तस्तंशृणुनारद ७१ इतिश्रीचतुःपुराणसारसंग्रहेकार्तिकमासमाहात्म्येअदत्तपुण्यपापफलप्राप्तिवर्णनपूर्वक
मासोपवासव्रतविधिकथनंनामत्रिंशोऽध्यायः ३० ६४ ६५ ६६ ६७ ६८ ६९ ७० ७१ इतिकार्तिकमा
हात्म्यटीकायांत्रिंशोऽध्यायः ३०

६३

अथकूष्मांडनवमीविधानंतुलसीविवाहविधानंचाह कार्तिकइति १ २ ३ ४ ५ ६ ७

वालखिल्याऊचुः कार्तिकेशुक्लनवमीत्रेताभूद्द्वापरंयुगम् पूर्वापराण्हगाग्राह्याक्रमाद्दानोपवासयोः १ अत्र
कूष्मांडकोनामहतोदैत्यस्तुविष्णुना तद्रोमभिःसमुद्भूतावल्ल्यःकूष्मांडसंभवाः २ तस्मात्कूष्मांडदानेनफलमा-
प्नोतिनिश्चितम् अस्यामेवनवम्यांतुकुर्यात्कृष्णोत्सवंनरः ३ स्वशाखोक्तेनविधिनातुलस्याःकरपीडनम् कन्यादा
नफलंतस्यजायतेनात्रसंशयः ४ कार्तिकेशुक्लनवमीमवाप्यविजितेंद्रियः हरिंविधायसौवर्णंतुलस्यासहितंशु
भम् ५ पूजयेद्विधिवद्भक्त्याव्रतीतत्रदिनत्रयम् एवंयथोक्तविधिनाकुर्याद्वैवाहिकंविधिं ६ आस्यांत्रिरात्रमत्रे
वनवम्यामनुरोधतः मध्यान्हव्यापिनीग्राह्यानवमीपूर्वविद्धिता ७ धात्र्यश्वत्थौयएकत्रपालयित्वासमुद्वहेत्
ननश्यतेतस्यपुण्यंकल्पकोटिशतैरपि ८ कनकस्यसुतापूर्वमेकादश्यांकिशोरिका चकारभक्तितोसायंतुल-
स्युद्वाहजंविधिम् ९ तेनवैधव्यदोषेणनिर्मुक्तासीत्सुलोचना तस्मात्सायंप्रकर्तव्यस्तुलस्युद्वाहजोविधिः १०
अवश्यमेवकर्तव्यःप्रतिवर्षंतुवैष्णवैः विधिंतस्यप्रवक्ष्यामियथासांगक्रियाभवेत् ११ विष्णोस्तुप्रतिमांकुर्या
त्पलस्यस्वर्णजांशुभाम् तदर्द्धार्द्धंतदर्द्धार्द्धंयथाशक्त्याप्रकल्पयेत् १२ प्राणप्रतिष्ठांकृत्वैवतुलसीविष्णुरूपयोः
ततउत्थापयेद्देवंपूर्वोक्तैश्चस्तवादिभिः १३ उपचारैःषोडशभिःपूजयेत्पुरुषोक्तिभिः देशकालौततःस्मृत्वागणे
शंतत्रपूजयेत् १४ पुण्याहंवाचयित्वाथनांदीश्राद्धंसमाचरेत् वेदवाद्यादिनिर्घोषैर्विष्णुमूर्तिंसमानयेत् १५
तुलसीनिकटेसातुस्थाप्याचांतर्हितापटैः आगच्छभगवन्देवअर्चयिष्यामिकेशव १६

८ ९ १० ११ १२ उत्थापयेदित्यत्र उत्तिष्ठोत्तिष्ठगोविंदेतिवक्ष्यमाणमंत्रेणोत्थापयेदिति १३ १४ १५ १६

१७ १८ १९ २० २१ २२ २३ २४ २५ २६

तुभ्यंदास्यामितुलसींसर्वकामप्रदोभव दद्याच्चिवारमर्घ्यंचपाद्यंविष्टरमेवच १७ ततश्चाचमनीयंचत्रिरुक्त्वा
चप्रदापयेत् ततोदधिघृतंक्षीरंकांस्यपात्रपुटीकृतम् १८ मधुपर्कंगृहाणात्वंवासुदेवनमोस्तुते हरिद्रालेपना·
भ्यंगकार्यंसर्वंविधायच १९ गोधूलिसमयेपूज्यौतुलसीकेशवौपुनः पृथक्पृथक्तथाकार्यौसंमुखौमंगलंपठेत्
२० ईषद्दृश्येभास्करेतुसंकल्पंतुसमुच्चरेत् स्वगोत्रप्रवरानुक्त्वातथात्रिपुरुषादिकम् २१ अनादिमध्यनिधनत्रैलो·
क्यप्रतिपालक इमांगृहाणतुलसींविवाहविधिनेश्वर २२ पार्वतीबीजसंभूतांवृंदाभस्मनिसंस्थिताम् अनादि
मध्यनिधनांवल्लभांतेददाम्यहम् २३ पयोघटैश्चसेवाभिःकन्यावद्वर्धितामया त्वत्प्रियांतुलसींतुभ्यंददामित्वंगृ
हाणभो २४ एवंदत्वाचतुलसींपश्चात्तौपूजयेत्ततः रात्रौजागरणंकुर्याद्विवाहोत्सवपूर्वकम् २५ ततःप्रभातस
मयेतुलसींविष्णुमर्चयेत् वन्हिसंस्थापनंकृत्वाद्वादशाक्षरविद्यया २६ पायसाज्यक्षौद्रतिलैर्जुत्यादष्टोत्तरंशतम्
ततःस्विष्टकृतंहुत्वादद्यात्पूर्णाहुतिंततः २७ आचार्यंचसमभ्यर्च्यहोमशेषंसमापयेत् चतुरोवार्षिकान्मासान्नि
यमोयेनयःकृतः २८ कथयित्वाद्विजेभ्यस्तत्तथान्यत्परिपूरयेत् इदंव्रतंमयादेवकृतंप्रीत्यैतवप्रभो २९ न्यूनंसंपू·
र्णतांयातुत्वत्प्रसादाज्जनार्दन रेवतीतूर्यचरणेद्वादशीसंयुतेनरः ३० नकुर्यात्पारणंकुर्वन्व्रतंनिष्फलतांव्रजेत् त
तोयेषांपदार्थानांवर्जनंतुकृतंभवेत् ३१ चातुर्मास्येथवाचोर्जेब्राह्मणेभ्यःसमर्पयेत् ततःसर्वंसमाश्नीयाद्यद्यत्त्यक्तंव्रते
स्थितम् ३२ दंपतीभ्यांसहैवात्रभोक्तव्यंचद्विजैःसह ततोभुक्त्युत्तरंयानिगलितानिदलानिच ३३

जुत्यादितिप्रयोगश्चार्षः जुहुयादिति २७ २८ २९ ३० ३१ ३२ ३३

कोलिफलंबदरीफलं कर्कंधूर्बदरीकोलिरित्यमरः ३४ ३५ ३६ ३७ ३८ ३९ ४० ४१

तानिभुक्त्वातुलस्याश्चस्वयंपापैःप्रमुच्यते इक्षुदंडंतथाधात्रीफलंकोलिफलंतथा ३४ भुक्त्वातुभोजनस्यांते
तस्योच्छिष्टंविनश्यति एषुत्रिषुनभुक्तंचेदेकैकमपियेनतु ३५ ज्ञेयउच्छिष्टभाग्वर्षंनरोसौनात्रसंशयः ततःसा
यंपुनःपूज्योइक्षुदंडैश्चशोभितैः ३६ तुलसीवासुदेवौचकृतकृत्योभवेत्ततः ततोविसर्जनंकृत्वादत्वादाद्यादिकं
हरेः ३७ वैकुंठंगच्छभगवन्तुलसीसहितःप्रभो मत्कृतंपूजनंगृह्यसंतुष्टोभवसर्वदा ३८ गच्छगच्छसुरश्रे
ष्ठस्वस्थानेपरमेश्वर यत्रब्रह्मादयोदेवास्तत्रगच्छजनार्दन ३९ एवंविसृज्यदेवेशमाचार्यायप्रदापयेत् मूर्त्या
दिकंसर्वमेवकृतकृत्योभवेन्नरः ४० प्रतिवर्षंतुयःकुर्यात्तुलसीकरपीडनम् भक्तिमान्धनधान्यैःसंयुक्तोभव
तिनिश्चितम् ४१ इहलोकेपरत्रापिविपुलंसयशोलभेत् ४२ इतिश्रीचतुःपुराणसारसंग्रहेकार्तिकमासमा
हात्म्येकूष्मांडनवमीतुलसीविवाहविधिवर्णनंनामैकत्रिंशोऽध्यायः ३१ छ वालखिल्याऊचुः
कार्तिकस्यामलेपक्षेस्नात्वासम्यग्यतव्रतः एकादश्यांतुगृह्णीयाद्व्रतंपंचदिनात्मकम् १ शरपंजरसुप्तेनभी
ष्मेणतुमहात्मना राजधर्मामोक्षधर्मादानधर्मास्ततःपरम् २ कथिताःपांडुदायादैःकृष्णेनापिश्रुतास्तदा
ततःप्रीतेनमनसावासुदेवेनभाषितम् ३ धन्यधन्योसिभीष्मत्वंधर्माःसंश्रावितास्त्वया एकादश्यांकार्तिक
स्ययाचितंचजलंत्वया ४ अर्जुनेनसमानीतंगांगंबाणस्यवेगतः तुष्टानितवगात्राणितस्मादद्यादिनावधि ५
पूर्णांतेसर्वलोकास्त्वांतर्पयंत्वर्घ्यदानतः तस्मात्सर्वप्रयत्नेनममसंतुष्टिकारकम् ६

४२ इतिकार्तिकमाहात्म्यटीकायामेकत्रिंशोऽध्यायः ३१ छ अथभीष्मपंचकव्रतमाह कार्तिकस्येति १ २ ३ ४ ५ ६

७ ८ ९ १० पापपुरुषःदेयः पापपुरुषदानविधिमाह पाद्मे पापस्यप्रतिमाकार्यारौद्रवक्त्रातिभीषणा खड्गहस्तातिवि
कांतालोहदंष्ट्राकरालिनी तिलप्रस्थोपरिस्थाप्यकृष्णवस्त्राभिवेष्टिता रक्तपुष्पकृतापीडाज्वलत्कांचनकुंडला संपूज्यपरयाभक्त्याधर्मराज

एतद्व्रतंप्रकुर्वंस्तुभीष्मपंचकसंज्ञितम् कार्तिकस्यव्रतंकृत्वानकुर्याद्भीष्मपंचकम् ७ समग्रंकार्तिकव्रतंह्यथान
स्यभविष्यति अशक्तश्चेन्नरोभूयादसमर्थश्चकार्तिके ८ भीष्मस्यपंचकंकृत्वाकार्तिकस्यफलंभवेत् सत्यव्रता
यशुचयेगांगेयायमहात्मने ९ भीष्मायैतद्ददाम्यर्घ्यमाजन्मब्रह्मचारिणे सव्येनानेनमंत्रेणतर्पणंसार्ववर्णिकं
१० व्रतांगत्वात्पूर्णिमायांप्रदेयःपापपूरुषः अपुत्रेणप्रकर्तव्यंसर्वथाभीष्मपंचकम् ११ यःपुत्रार्थंव्रतंकुर्या
त्सस्त्रीकोभीष्मपंचकम् प्रदत्वापापपुरुषंवर्षमध्येसुतंलभेत् १२ अवश्यमेवकर्तव्यंतस्माद्भीष्मस्यपंचकं
विष्णुप्रीतिकरंप्रोक्तंमयाभीष्मस्यपंचकम् १३ सूतउवाच शृण्वंतुऋषयःसर्वेविशेषोभीष्मपंचके कार्ति
केयायरुद्रेणपुराप्रोक्तःसविस्तरात् १४ ईश्वरउवाच प्रवक्ष्यामिमहापुण्यंव्रतंव्रतवतांवर भीष्मेणैतद्य
तःप्राप्तंव्रतंपंचदिनात्मकं १५ सकाशाद्वासुदेवस्यतेनोक्तंभीष्मपंचकम् व्रतस्यास्यगुणान्वक्तुंकःशक्तःके
शवादृते १६ कार्तिकेशुक्लपक्षेतुशृणुधर्मंपुरातनम् वसिष्ठभृगुगर्गाद्यैश्चीर्णंकृतयुगादिषु १७ अंबरीषेण
भोगाद्यैश्चीर्णंत्रेतायुगादिषु ब्राह्मणैर्ब्रह्मचर्येणजपहोमक्रियादिभिः १८ क्षत्रियैश्चतथावैश्यैःसत्यशौचप
रायणैः दुष्करंसत्यहीनानामशक्यंबालचेतसाम् १९

नामभिः इममुच्चारयेन्मंत्रंगृहीतकुसुमांजलिः
यदन्यजन्मनिकृतमिहजन्मनिवापुनः पापंप्रशममायातुतवपापप्रसादतः एवंसंपूज्यविधिवत्प्रतिमांतांचकांचनीम् कृत्वापूजांयथाश
क्त्याब्राह्मणायनिवेदयेदिति ११ १२ १३ १४ १५ १६ १७ १८ १९

२० २१ २२ २३ २४ २५ २६ २७ २८ २९

दुष्करंभीष्ममित्याहुर्नशक्यंप्राकृतैर्नरैः यस्मात्करोतिविप्रेंद्रतेनसर्वंकृतंभवेत् २० व्रतंचैतन्महापुण्यंमहापात
कनाशनम् अतोनरैःप्रयत्नेनकर्तव्यंभीष्मपंचकम् २१ कार्तिकस्यामलेपक्षेस्नात्वासम्यग्विधानतः एकादश्यां
तुगृह्णीयाद्व्रतंपंचदिनात्मकम् २२ प्रातःस्नात्वाविशेषेणमध्यान्हेचतथाव्रती नद्यांनिर्झरगर्तेवासमालभ्यचगोम
यम् २३ यवव्रीहितिलैःसम्यक्पितॄन्संतर्पयेत्क्रमात् स्नात्वामौनंनरःकृत्वाधौतवासादृढव्रतः २४ भीष्मायो
दकदानंचअर्घ्यंचैवप्रयत्नतः पूजाभीष्मस्यकर्तव्यादानंदद्यात्प्रयत्नतः २५ पंचरत्नंविशेषेणदत्वाविप्रायप्रय
तः वासुदेवोपिसंपूज्योलक्ष्मीयुक्तःसदाप्रभुः २६ पंचकेपूजयित्वातुकोटिजन्मानितुष्यति यत्किंचित्कुरुतेमर्त्यः
पंचधातुप्रकल्पयेत् २७ संवत्सरव्रतानांचलभतेसकलंफलम् कृत्वातूदकदानंतुतथार्घ्यस्यचदापनम् २८ मंत्रे
णानेनयःकुर्यान्मुक्तिभागीभवेन्नरः वैयाघ्रपादगोत्रायसांकृत्यप्रवरायच २९ अनपत्यायभीष्मायउदकंभीष्मव-
र्मणे वसूनामवतारायशंतनोरात्मजायच अर्घ्यंददामिभीष्मायआजन्मब्रह्मचारिणे ३० इत्यर्घ्यमंत्रः अ
नेनविधिनायस्तुपंचकंतुसमापयेत् अश्वमेधसमंपुण्यंप्राप्नोत्यत्रनसंशयः ३१ पंचाहमपिकर्तव्यंनियमंचप्रयत्नतः
नियमेनविनायत्रनभाव्यंवरवर्णिना ३२ उत्तरायणहीनायभीष्मायप्रददौहरिः उत्तरायणहीनोपिशुक्लग्नोवि-
नाशभः ३३ ततःसंपूजयेद्देवंसर्वपापहरंहरिम् अनंतरंप्रयत्नेनकर्तव्यंभीष्मपंचकम् ३४ स्नापयेत्तजलैर्भक्त्या
मधुक्षीरघृतेनच तथैवपंचगव्येनगंधचंदनवारिणा ३५ चंदनेनसुगंधेनकुंकुमेनाथकेशवम् कर्पूरोशीरमिश्रेण
लेपयेद्गरुडध्वजम् ३६

३० ३१ ३२ ३३ ३४ ३५ ३६

३७ ३८ ३९ ॐनमोविष्णवेस्वाहेति ४० ४१ ४२ प्रत्येकदिनेपृथक्कृत्यमाह प्रथमे:

अर्चयेद्विविधैःपुष्पैर्गंधधूपसमन्वितैः गुग्गुलुंघृतसंयुक्तंदद्यात्कृष्णायभक्तिमान् ३७ दीपकंतुदिवारात्रौदद्यात्पं
चदिनानितु नैवेद्यंदेवदेवस्यपरमान्नंनिवेदयेत् ३८ एवमभ्यर्चयेद्देवंसंस्मृत्वाचप्रणम्यच ॐनमोवासुदेवायेति
जपेदष्टोत्तरंशतम् ३९ जुहुयाच्चघृताभ्यक्तैस्तिलैर्व्रीहियवादिभिः षडक्षरेणमंत्रेणस्वाहाकारान्वितेनच ४० उपा
स्यपश्चिमांसंध्यांप्रणम्यगरुडध्वजम् जपित्वापूर्ववन्मंत्रंक्षितिशायीभवेत्सदा ४१ सर्वमेतद्विधानंतुकार्यंपंचदिनानि
तु विशेषोत्रव्रतेत्वस्मिन्यदन्यूनंशृणुष्वतत् ४२ प्रथमेन्हिहरेःपादौपूजयेत्कमलैर्व्रती द्वितीयेबिल्वपत्रेणजानुदेशंस
मर्चयेत् ४३ ततोनुपूजयेच्छीर्षंमालत्याचक्रपाणिनः कार्तिक्यांदेवदेवस्यभक्त्यातद्गतमानसः ४४ अर्चित्वानंतरंहृ-
षीकेशमेकादश्यांसमासतः निःप्राश्यगोमयंसम्यगेकादश्यामुपावसेत् ४५ गोमूत्रंमंत्रवद्भूमौद्वादश्यांप्राशयेद्व्रती
क्षीरंचैवत्रयोदश्यांचतुर्दश्यांतथादधि ४६ संप्राश्यकायशुद्ध्यर्थंलंघयित्वाचतुर्दिनं पंचमेदिवसेस्नात्वाविधि
वत्पूज्यकेशवं ४७ भोजयेद्ब्राह्मणान्भक्त्यातेभ्योदद्याच्चदक्षिणाम् पापबुद्धिंपरित्यज्यब्रह्मचर्येणधीमता
४८ मद्यंमांसंपरित्यज्यमैथुनंपापकारिणम् शाकाहारेणमुन्यन्नैःकृष्णार्चनपरोनरः ४९ ततोनक्तंसमश्नीया
त्पंचगव्यपुरःसरम् एवंसम्यक्समाप्यंस्याद्यथोक्तफलमाप्नुयात् ५० मद्यपोयस्पिबेन्मद्यंजन्मनोमरणांतिकम्
एतद्भीष्मव्रतंकृत्वाप्राप्नोतिपरमंपदम् ५१ स्त्रीभिर्वाभर्तृवाक्येनकर्तव्यंधर्मवर्धनम् विधवाभिश्चकर्तव्यंमोक्ष
सौख्याभिवृद्धये ५२ अयोध्यायांपुराकश्चिदतिथिर्नामवैनृपः वसिष्ठवचनात्कृत्वाव्रतमेतत्सुदुर्लभम् ५३ ह्रीतिपंचाभिः

४३ ४४ ४५ ४६ ४७ व्रतनियमानाह पापबुद्धिमिति ४८ ४९ ५० ५१ ५२ ५२ ५३

६६

५४ ५४ ५५ ५५ ५६ ५७ इतिकार्तिकमाहात्म्यटीकायांद्वात्रिंशोऽध्यायः ३२ ६ अथप्रबोधोत्सवविधानमाह प्र

भुक्त्वेहनिखिलान्भोगानंतेविष्णुपुरंव्रयौ इत्थंकुर्याद्व्रतंनित्यंपंचकंभीष्मसंज्ञितम् ५४ नियमेनोपवासेनपंचगव्ये
नवापुनः पयोमूलफलाहारैःहविष्यैर्व्रततत्परः ५५ पूर्णमासीदिनेप्राप्तेपूजांकृत्वातुपूर्ववत् ब्राह्मणान्भोज‑
येद्भक्त्यागांचदद्यात्सवत्सकां ५६ यद्भीष्मपंचकमितिप्रथितंपृथिव्यामेकादशीप्रभृतिपंचदशीनिरूढम् उक्तंनभो
जनपरस्यनदानिषेधस्तस्मिन्व्रतेशुभफलंप्रददातिविष्णुः ५७ इतिश्रीचतुःपुराणसारसंग्रहेकार्तिकमासमाहा
त्म्येभीष्मपंचकव्रतमाहात्म्यवर्णनंनामद्वात्रिंशोऽध्यायः ३२ ६ ईश्वरउवाच प्रबोधिन्याश्चमाहात्म्यं
पापघ्नंपुण्यवर्धनम् मुक्तिदंतत्त्वबुद्धीनांशृणुष्वसुरसत्तम १ तावद्गर्जंतिसेनानिगंगाभागीरथीक्षितौ यावत्प्राप्ता‑
तिपापघ्नीकार्तिकेहरिबोधिनी २ तावद्गर्जंतितीर्थानिआसमुद्रसरांसिवै यावत्प्रबोधिनीविष्णोस्तिथिर्नाप्यानि
कार्तिके ३ अश्वमेधसहस्राणिराजसूयशतानिच एकेनैवोपवासेनप्रबोधिन्यायथाऽभवत् ४ दुर्लभंचैवदु
ष्प्राप्यंत्रैलोक्येसचराचरे तदपिप्रार्थितंविप्रददातिप्रतिबोधिनी ५ ऐश्वर्यंसंततिंज्ञानंराज्यंचसुरवसंपदः द‑
दात्युपोषिताविप्रहेलयाहरिबोधिनी ६ मेरुमंदरतुल्यानिपापान्युपार्जितानिच एकेनैवोपवासेनदहतेहरिबोधि
नी ७ उपवासंप्रबोधिन्यांयःकरोतिस्वभावतः विधिनानरशार्दूलयथोक्तंलभतेफलम् ८ पूर्वजन्मसहस्रेषुपा
पंयत्समुपार्जितम् जागरेणप्रबोधिन्यांदह्यतेतूलराशिवत् ९ शृणुषण्मुखवक्ष्यामिजागरस्यचलक्षणम् तस्य‑
विज्ञानमात्रेणदुर्लभोनजनार्दनः १० गीतंवाद्यंचनृत्यंचपुराणपठनंतथा धूपंदीपंचनैवेद्यंपुष्पगंधानुलेपनम् ११

बोधिन्याइति १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ ६

१२ १३ १४ १५ १६ १७ १८ १९ २० २१

फलमर्घ्यंचश्रद्धाचदानमिंद्रियसंयमम् सत्यान्वितंविनिंदंचमुदायुक्तंक्रियान्वितम् १२ साश्चर्यंचैवप्रोत्साहमाल
स्यादिविवर्जितम् प्रदक्षिणादिसंयुक्तंनमस्कारपुरःसरम् १३ नीराजनसमायुक्तमनिर्विण्णेनचेतसा यामेयामे
महाभागकुर्वन्नीराजनंहरेः १४ एतैर्गुणैःसमायुक्तंकुर्याज्जागरणंविभोः एकाग्रमनसायस्तुनपुनर्जायतेभुवि १५
यएवंकुरुतेभक्त्यावित्तशाठ्यविवर्जितः जागरंवासरेविष्णोर्लीयतेपरमात्मनि १६ पुरुषसूक्तेनयोनित्यंकार्तिकेअर्च
येद्धरिम् वर्षकोटिसहस्राणिपूजितस्तेनकेशवः १७ यथोक्तेनविधानेनपंचरात्रोदितेनवै कार्तिकेत्वर्चयेन्नित्यंमु
क्तिभागीभवेन्नरः १८ नमोनारायणायेतिकार्तिकेयोर्चयेद्धरिम् समुक्तोनारकैर्दुःखैःपदंगच्छत्यनामयम् १९ ह
रेर्नामसहस्रंचगजराजस्यमोक्षणम् कार्तिकेपठतेयस्तुपुनर्जन्मनविंदति २० युगकोटिसहस्राणिमन्वंतरशतानि
च द्वादश्यांकार्तिकेमासिजागरीवसतेदिवि २१ कुलेतस्यचयेजाताःशतशोथसहस्रशः प्राप्नुवंतिपदंविष्णोस्त
स्मात्कुर्वीतजागरम् २२ कार्तिकेपश्चिमेयामेस्तवगानंकरोतियः श्वेतद्वीपेतुवसतेपितृभिःसहसुव्रत २३ नैवेद्य
दानंहरये कार्तिकेदिनसंक्षये युगानिवसतेस्वर्गेतावंतिमुनिसत्तमाः २४ अक्षयंमुनिशार्दूलमालतीकमलार्चनं
अर्चयेद्देवदेवेशंसयातिपरमंपदम् २५ कार्तिकेशुक्लपक्षेतुकृत्वात्वेकादशींनरः प्रातर्दत्वाशुभान्कुंभान्सया
तिममंदिरम् २६ अत्रैवतुप्रकर्तव्यःप्रबोधस्तुहरेःखग हतःशंखासुरोदैत्योनभसःशुक्लपक्षके २७ एकादश्यां
ततोविष्णुश्चातुर्मास्येप्रसुप्तवान् क्षीरांभोधौजागृतोसावेकादश्यांतुकार्तिके २८

२२ २३ २४ २५ २६ २७ २८

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

२९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ ब्रह्मांशभूतायाः मोहिन्याः आत्मप्रसिद्धाकथा सारोद्धारे पुरारुक्मांगदोनृपः परमवैष्णवः आसीत् तस्यहृदशासनादेकादशीव्रतेन सर्वजनाः वैकुंठंययुः यमलोकश्चशून्यः अभूत्तदायमः क्रुद्धः सन् रुक्मांगदेनसह युद्धमकरोत् तत्रयुद्धे पराजितोयमः ब्रह्मलोकंगत्वा रुक्मांगदं एकादशीव्रत भ्रष्टंकुरु नोचेत्प्राणान् त्यक्ष्यामीति ब्रह्माणंप्रार्थयामा-

अतःप्रबोधनंकार्यमेकादश्यांतुवैष्णवैः उत्तिष्ठोत्तिष्ठगोविंदउत्तिष्ठगरुडध्वज उत्तिष्ठकमलाकांतत्रैलोक्यंमंग-
लंकुरु २९ इत्युक्त्वाशंखभेर्यादिप्रातःकालेतुवादयेत् वीणावेणुमृदंगादिनृत्यगीतादिकारयेत् ३० उत्थापयित्वा
देवेशंपूजांतस्यविधायच सायंकालेप्रकर्तव्यस्तुलस्युद्वाहजोविधिः ३१ सर्वदैकादशीपुण्याविशेषात्कार्तिकी
स्मृता यानिकानिचपापानिब्रह्महत्यादिकानिच ३२ अन्नमाश्रित्यतिष्ठंतिसंप्राप्तेहरिवासरे सकेवलमघंभुं
क्तेयोभुंक्तेहरिवासरे ३३ तस्मात्सर्वप्रयत्नेनकुर्यादेकादशीव्रतम् नकुर्याद्यदिमोहेनउपवासंनराधमः ३४ नर
केनियतंवासोपितृभिःसहतस्यवै सूतकेमृतकेवापिनोपवासंत्यजेद्बुधः ३५ दशमीवेधसंयुक्तात्याज्याचैकाद
शीव्रते गांधार्यापिपुरातस्यामुपवासःकृतोगुह ३६ तस्याःपुत्रशतंनष्टंतस्मात्तांवेधजांत्यजेत् एकादशीमुपवसे
त्स्नानदानपुरःसरम् ३७ रुक्मांगदोपिराजर्षिर्मोहिन्याःसंगमेनच इहलोकेसुखंभुक्त्वाचांतेविष्णुपुरंययौ ३८
इतिप्रबोधोत्सवः

* * *

स तदाब्रह्मा यममाश्वास्य सर्वमोहकारिणीं एकां स्त्रियं निर्मायतामुवाच त्वं रुक्मांगदं गत्वा तं मोहयित्वा पुनर्ममांतिकं आगच्छ सातथेत्युक्त्वा राजानंगत्वा मोहयामास राजापि तयासह अहर्निशंक्रीडन् हरिदिनमपि नस्मृतवान् तदाशिक्षकाभावात् लोकाअपि विसस्मरुः एकदाकार्तिके हरिदिनी व्रतंसस्मार तदापश्चात्तापं कुर्वन् मोहिनी रूपया विष्णुलोकं ययौ इति ३८

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

स्कं·ज्यो·र्ण·
धर्मस्कंध·
३२९

अथद्वादशीव्रतविधानमाह द्वादशीति ३९ ४० ४१ शिक्ये आलंबमानरज्जुपंजरे यावत्परिमितंअन्नं तिष्ठति तावन्मात्रेणान्नेन

अथद्वादशीमाहात्म्यं द्वादशीपुण्यदाप्रोक्तासर्वाघौघविनाशिनी किंदानैः किंतपोभिश्चकिमुपोष्यैर्व्रतैश्चकिम् ३९
किमिष्टैश्चैवपुत्रैश्चद्वादशीयेनसेविता गंगायांचैवदुर्भिक्षेप्रत्यहंकोटिभोजनात् ४० यत्फलं
तदवाप्नोतिद्वादश्यामेकभोजनात् यद्दत्तंचाहितेदानंद्वादश्यांतुसितेशुभे ४१ शिक्येशिक्येचवैकस्यकतिब्राह्मणभोजनम्
तदहंनैवजानामिमहिमानंहिस्कन्न ४२ शालिग्रामशिलादानंयःकुर्याद्द्वादशीदिने सप्तद्वीपवतीभूमिंगंगायांचरविग्रहे ४३ दत्वायत्फलमाप्नोतितत्फलंलभतेनरः पंचामृतैस्तुयोविष्णुंभक्त्यासंस्नापयेद्द्विज ४४ ससर्वंकुलमुद्धृत्यविष्णुलोकेमहीयते शुक्लेकार्तिकमासस्यद्वादश्यांपरमोत्सवे ४५ प्रातरारभ्ययःकुर्यात्स्नानदानादिकंतथा सतुमोक्षमवाप्नोतिनात्रकार्याविचारणा ४६ द्वादश्यांकार्तिकेमासिस्नान
संध्यादिकर्मच कृत्वादामोदरंपूज्यभक्तिश्रद्धासमन्वितः ४७ यस्तस्यांसूपनैवेद्यंनददातिनराधमः नरकेनिय
तंवासोभवतीत्यनुशुश्रुम ४८ तस्मात्सूपस्यनैवेद्यंद्वादश्यांकार्तिकेशुभे दद्याद्भक्तियुतोब्रह्मन्नुचान्यथानर
कंव्रजेत् ४९ यस्तस्यांदंपतीनांतुभोजनंकुरुतेनरः नतस्यफलविस्थांनिर्मयावक्तुंनशक्यते ५० धात्रीछायांगतो
यस्तुद्वादश्यांपूजयेद्धरिम् तत्रैवभोजनंयत्कुब्राह्मणानांतुकारयेत् ५१ स्वयंचतत्रभुंक्तेयःसूपभक्ष्यादिकंतथा
नतस्यपुनरावृत्तिःकल्पकोटिशतैरपि ५२ एवंप्रातर्विधायाथपूजांदामोदरस्यहि रात्रौपुनःप्रकर्तव्यंपूजाकर्म
हरेर्द्विज ५३ तुलसीसन्निधौकृत्वापताकाध्वजशोभितं पुष्पमालासमाकीर्णंनानारत्नोपशोभितं ५४

यत्ब्राह्मणभोजनं भवतितेनपुण्येन एकस्यकतिब्राह्मणभोजनंभवतितन्महिमानमहंनैवजानामीति ४२ ४३ ४४ ४५ ४६ ४७ ४८ ४९ ५० ५१ ५२ ५३ ५४

मासस्क·५
का·मा·८
अ·३२

६८

५५ ५६ ५७ ५८ ५९ ६० ६१ ६२ ६३ ६४

मुक्तादामभिराच्छन्नंकृत्वामंडपमुत्तमं पूजयेद्विष्णुमव्यग्रस्तद्गतैकाग्रमानसः ५५ पंचरात्रोक्तमार्गेणगंध-
पुष्पाक्षतादिभिः नवनीतंदधिक्षीरंतथैवचघनंघृतम् ५६ विविधैःखाद्यनैवेद्यैर्जलेनचसुगंधिना युक्तंनिवे-
दयेद्विष्णोस्तांबूलंसलवंगकम् ५७ पुष्पाणिचविचित्राणिसुगंधीनिबहूनिच प्रोक्षयित्वाचविधिवत् अर्पयि-
त्वादलैःशुभैः ५८ तुलस्याश्चापिधात्र्याश्चफलैश्चापिप्रपूजयेत् नीराजनंततःकृत्वामंत्रपुष्पंसमर्पयेत् ५९
अभिषेकंविनासर्वपूजांकृत्वाविधानतः विष्णोःपूजांसमाप्याथब्राह्मणानांप्रपूजनम् ६० कुर्याद्भक्तियुतोवि-
प्रदद्याच्चैवफलादिकम् तांबूलंचततोदत्वादक्षिणांशक्तितोर्पयेत् ६१ ततोवृद्धान्पितॄन्मातॄःपूजयित्वाविधा-
नतः ततःस्वयंस्वभार्याभिर्नैवेद्यंभक्षयेत्सुधीः ६२ इत्येवंतुविधानेनयःकुर्याद्द्वादशीव्रतं नतस्यलोकाःक्षी-
यंतेकल्पकोटिशतैरपि ६३ पुत्रपौत्रैःपरिवृतोभुक्त्वाभोगान्मनोहरान् भोगांस्ततोव्रजेन्मोक्षंअतीतकुलसप्तभिः
६४ तस्मान्नारदमाहात्म्यंद्वादश्याःकार्तिकस्यच नमयाशक्यतेवक्तुंकिमन्यैर्मनुजैरपि ६५ द्वादश्यास्तूत्तमं
पुण्यंमाहात्म्यंयःपठेन्नरः शृणुयाद्वामुनिश्रेष्ठसयातिपरमांगतिम् ६६ राजर्षिरंबरीषोपिचकारैतद्व्रतंशुभम्
यथाविधितपोनिष्ठतेनमोक्षमवाप्तवान् ६७ इतिश्रीचतुःपुराणसारसंग्रहेकार्तिकमासमाहात्म्येप्रबोधोत्स-
वद्वादशीतिथिकृत्यवर्णनंनामत्रयस्त्रिंशोऽध्यायः ३३ ६८ नारदउवाच व्रतानामपिसर्वेषांब्रह्मन्नु-
द्यापनंस्मृतम् अभावेतूद्यापनस्यफलंनैवाप्नुयात्क्वचित् १ ६५ ६६ ६७ इतिकार्तिकमाहा-
त्म्यटीकायांत्रयस्त्रिंशोऽध्यायः ३३ ६८ अथोद्यापनविधिंविज्ञातुंनारदस्यप्रश्नः व्रतानामिति १ ६८

कृतव्रतफलास्यर्थंकुर्यादुद्यापनंबुधः अन्यथानिष्फलंयातिकृतंव्रतमनुत्तमम् २ कार्तिकेपिव्रतंदेवव्रतानामु
त्तमंव्रतम् नतस्योद्यापनाभावेव्रतोक्तफलमाप्नुयात् ३ तस्मात्कार्तिकमासस्यचोद्यापनविधिंप्रभो वदमेशि
ष्यवर्यायप्रपन्नायानुवर्तिने ४ ब्रह्मोवाच अथोर्जोद्यापनंवक्ष्येसर्वपापप्रणाशनम् तच्छृणुष्वमहाभ·
क्त्यासविधानंसमासतः ५ ऊर्जेशुक्लचतुर्दश्यांकुर्यादुद्यापनंव्रती व्रतसंपूर्णतार्थायविष्णुप्रीत्यर्थहेतवे ६
तुलस्याप्युपरिष्टात्तुकुर्यान्मंडपिकां शुभाम् कदलीस्तंभसंयुक्तांनानाधातुविचित्रिताम् ७ दीपमालाश्चतुर्दि
क्षुकार्यानवकशोभना सतोरणांचतुर्द्वारांपुष्पचामरशोभिताम् ८ द्वारेषुद्वारपालांश्चपूजयेन्मृन्मयान्पृथ·
क् जयश्चविजयश्चैवचंडश्चैवप्रचंडकः ९ नंदश्चैवसुनंदश्चकुमुदःकुमुदाक्षकः एतान्चतुर्षुद्वारेषुपूजये·
द्भक्तिसंयुतः १० तुलसीमूलदेशेतुसर्वतोभद्रसंज्ञितम् चतुर्भिर्वर्णकैःसम्यक्शोभाढ्यसमलंकृतम् ११ त·
स्योपरिष्टात्कलशंपूर्णरत्नसमन्वितम् तत्रसंपूजयेद्देवंशंखचक्रगदाधरम् १२ कौशेयपीतवसनंलक्ष्म्यायुक्तंप्र
पूजयेत् इंद्रादिलोकपालांश्चमंडपेपूजयेद्व्रती १३ तस्यामुपवसेद्भक्त्याशांतप्रणतमानसः रात्रौजागरणंकुर्या·
न्गीतवाद्यादिमंगलैः १४ गीतंकुर्वंतियेभक्त्याजागरेचक्रपाणिनः जन्मांतरशतोद्भूतैस्तेमुक्ताःपापसंचयैः १५
ततस्तुपूर्णमास्यांतुसपत्नीकान्द्विजोत्तमान् त्रिंशन्मितानथैकंवाब्राह्मणांश्चनिमंत्रयेत् १६ प्रातःस्नानंततः
कृत्वादेवपूजांतथैवच स्थंडिलंचततःकृत्वासमाधायाग्निमत्रहि १७

त्रिंशन्मितानथैकंवाइत्यत्रतदर्द्धंवाइतिपाठः

६१

१८ १९ २० २१ २२ २३ २४ २५ २६ २७

अतोदेवेतिमंत्रेणजुहुयात्तिलपायसं प्रीत्यर्थंदेवदेवस्य देवानांचपृथक्पृथक् १८ होमशेषंसमाप्याथब्रा
ह्मणान्पूज्यभक्तितः ब्राह्मणेभ्योयथाशक्त्याप्रदद्याद्दक्षिणांनरः १९ ततोगांकपिलांतत्रपूजयेद्विधिवद्व्रती
सवत्सांगांतथादद्याद्विप्रायचकुटुंबिने २० गुरुंव्रतोपदेष्टारंवस्त्रालंकारभूषणैः सपत्नीकंसमभ्यर्च्यतांश्चवि
प्रान्क्षमापयेत् २१ युष्मप्रसादाद्देवेशःप्रसन्नोस्तुसदामम व्रतादस्माच्चयत्पापंसप्तजन्मकृतमया २२ तत्स
र्वंनाशमायातुस्थिरामेचास्तुसंततिः मनोरथास्तुसकलाः भूयाद्भक्तिर्हरौमम २३ सतांसमागमोभूयान्ममजन्म
निजन्मनि इतिक्षमाप्यतान्विप्रान्प्रसाद्यचविसर्जयेत् २४ प्रतिमांतां गुरोर्दद्यात्सवस्त्रांमुनिपुंगव ततः
सुहृद्गुरुयुतःस्वयंभुंजीतभक्तिमान् २५ द्वादश्यांप्रतिबुद्धोसौत्रयोदश्यांयुतःसुरैः दृष्टोर्चितश्चतुर्दश्यांत·
स्मात्पूज्यास्तिथाविह २६ पूजयेद्देवदेवेशंसौवर्णंगुर्वनुज्ञया परात्रपौर्णमास्यांतुयात्रास्यात्पुष्करस्यतु २७
वरान्दत्त्वायतोविष्णुर्मत्स्यरूपोभवत्ततः तस्यांदत्तहुतजप्तंतदक्षय्यफलंलभेत् २८ कार्तिकेमासिकर्तव्योवि
धिरेषहिनारद एवंयःकुरुतेसम्यक्कार्तिकस्यव्रतंनरः २९ यत्फलंतदवाप्नोतिव्रतंकृत्वातुकार्तिके तेधन्या
स्तेसदापूज्यास्तेषांवैसफलोदयः ३० विष्णुभक्तिरतायेस्युःकार्तिकेव्रतचारिणः देहस्थितानिपापानिविलयंया
तितत्क्षणात् ३१ क्वयामोद्यभवत्येषयदूर्जव्रतकृन्नरः इतिसर्वाणिपापानिरटंतीहपुनःपुनः ३२ तस्मात्कार्तिक·
मासस्यसदृशंनहिविद्यते सर्वपापस्यदहनेऽग्नेःसदृशउच्यते ३३ ऊर्जोद्यापनमाहात्म्यंशृणुयाच्छ्रद्धयान्वितः
श्रावयेद्वापुमान्यस्तु विष्णुसायुज्यमाप्नुयात् ३४

२८ २९ ३० ३१ ३२ ३३ ३४

३५ ३६ इतिकार्तिकमाहात्म्यटीकायांचतुस्त्रिंशोऽध्यायः ३४ छ अथवैकुंठचतुर्दशीव्रतविधानमाह वैकुंठाख्यचतुर्द·

नारदउवाच ऊर्जेव्रतोद्यापनादावशक्तःसिद्धिभाक्कथम् कथंविमुच्यतेजंतुर्दुःखसंसारसागरात् ३५ ब्रह्मोवाच शृणुयादूर्जमाहात्म्यंनियमेनशुचिःपुमान् सोद्यापनफलंप्राप्यविष्णुलोकेवसेच्चिरम् ३६ इतिश्रीचतुःपुराणसारसंग्रहेकार्तिकमासमाहात्म्येव्रतोद्यापनविधिकथनंनामाऽध्यायश्चतुस्त्रिंशः ३४ छ ब्रह्मोवाच वैकुंठाख्यचतुर्दश्याःमाहात्म्यंतेवदाम्यहम् वालखिल्यैःपुराप्रोक्तंसंक्षेपेणशृणुष्वतत् १ वालखिल्याऊचुः कार्तिकस्यासितेपक्षेचतुर्दश्यांसमागमत् वैकुंठेशस्तुवैकुंठाद्वाराणस्यांकृतेयुगे २ रात्र्यांतुर्यांशशेषायांस्नात्वासोमनकर्णिके गृहीत्वाहेमपद्मानांसहस्रंवैततोव्रजत् ३ अतिभक्त्यापूजयितुंशिवयासहितंशिवम् विधायपूजांवैश्वेशींततःपद्मैरपूजयत् ४ सहस्रसंख्याकृत्वादावेकनाम्नाततःपरं आरब्धंपूजनंतेनशिवस्तद्भक्तिमैक्षत ५ एकंपद्मंपद्ममध्यान्निलियात्तंहरेणतु ततःपूजितवान्विष्णुरेकोनंकमलंत्वभूत् ६ इतस्ततस्तेनदृष्टंपद्मंतिष्ठतिनक्वचित् कमलेषुभ्रमोजातोऽथवानामस्क्रमेभ्रमः ७ क्षणंविचार्यसहरिर्नेमेनामभ्रमोभवत् पद्मेचैवभ्रमोजातोविचार्यैवपुनःपुनः ८ सहस्रपद्मसंकल्पःपूजार्थंतुकृतोमया अर्च्यःकथंमहादेवएकोनकमलैर्मया ९ यद्यानेतुगमिष्यामिभंगःस्यादासनस्यतु अतःपरंकिंविधेयंचिंतोद्विग्नोहरिस्तदा १० एकःप्रकारउत्पन्नोहृदयेऽस्यमुनीश्वराः पुंडरीकाक्षइत्येवंमांवदंतिमुनीश्वराः ११ नेत्रंमेपद्मसदृशंपद्मार्थेत्वर्पयाम्यहम् इतिनिश्चित्यमनसादत्वातर्जनिकांसतु १२

श्याइति १ २ असौविष्णुः ३ शिव·यापार्वत्या ४ ५ ६ ७ ८ ९ १० ११ १२

१३ १४ १५ १६ १७ १८ १९ २० महादेवतिथौचतुर्दश्यां २१ २२ २३ २४ २५ कमल
प्रसंगेनान्येषांपुष्पाणामपिपूजामाहात्म्यमाह पाद्मे सरोरुहाणितुलसीकेतकीमुनिपुष्पकम् मालतीदमनकंचैवकार्तिकेकेशवार्चने
केतकीपुष्पकेणैवपूजितोगरुडध्वजः समाःसहस्रंसुप्रीतोजायतेगरुडध्वजः विहायसर्वपुष्पाणिमुनिपुष्पेणकेशवं कार्तिकेयोर्चयेद्भ

> नेत्रमध्यात्तदुत्पाट्यमहादेवस्तुपूजितः ततोमहेश्वरस्तुष्टोवाक्यमेतदुवाचह १३ महादेवउवाच वत्स
> मेनास्तिमद्भक्तस्त्रैलोक्येसचराचरे राज्यंदत्तंत्रिलोक्यास्तेभवत्वंलोकपालकः १४ अन्यंवरयभद्रंतेवरंयन्म-
> नसेप्सितम् अवश्यमेवदास्यामिनात्रकार्याविचारणा १५ मद्भक्तिंतुसमालंब्ययेद्विषंतिजनार्दनम् तेमद्भ
> क्तानराविष्णोव्रजेयुर्नरकंध्रुवम् १६ विष्णुरुवाच त्रैलोक्यरक्षाकरणंममादिष्टमहेश्वर दुर्मदाश्चमहास
> त्वादैत्याभार्याःकथंमया १७ शिवउवाच एतत्सुदर्शनंचक्रंमहादैत्यनिकृंतनम् गृहाणभगवन्विष्णोमया
> तुभ्यंनिवेदितम् १८ अनेनसर्वदैत्यानांभगवन्कदनंकुरु एवंचक्रंहरेर्दत्वाततोवचनमब्रवीत् १९ शिवउ
> वाच वर्षेचहेमलंबाख्येमासेश्रीमतिकार्तिके शुक्लपक्षेचतुर्दश्यामरुणाभ्युदयंप्रति २० महादेवतिथौब्राह्मे
> मुहूर्तेमनकर्णिके स्नात्वाविश्वेश्वरलिंगंवैकुंठादेत्यपूजितम् २१ सहस्रकमलैस्तस्माद्भविष्यतिममप्रिया विख्या
> तासर्वलोकेषुवैकुंठाख्याचतुर्दशी २२ अन्यंवरंप्रयच्छामिशृणुविष्णोवचोमम पूर्वरात्रेषुतेपूजाकर्तव्यासर्वजाति
> भिः २३ उपवासंदिवाकुर्यात्सायंकालेतवार्चनं पश्चान्ममार्चनंकार्यमन्यथानिष्फलंभवेत् २४ आत्थ्यातुहरिपूजायां
> रात्रिव्याप्ताचतुर्दशी अरुणोदयवेलायांशिवपूजांसमाचरेत् २५ सहस्रकमलैर्विष्णुरादौयैःपूजितोनरैः पश्चाच्छि
> वःपूजितस्तेजीवन्मुक्तास्तएवहि २६

क्त्यावाजिमेधफलंलभेत् मालतीमालयायेनकार्तिकेपुष्पमंडपं केशवस्यकृतंवत्सवस-

त्रिर्दिवितस्यन्च दमनकेनापिदेवेशंसंप्राप्तेमधुमाधवे गोशतस्यमुनिश्रेष्ठअर्चनाल्लभतेफलमिति २६ २७ २८ २९ ३० ३१
अथगंगालोपेविशेषः सनत्कुमारसंहितायां चतुर्दशाब्दंदुर्भिक्षंमहामारीसमुद्भवः गोवधश्चापिसर्वत्रमृत्तिकाभस्मसन्निभा गांगतोयांतुयाधा-

सायंस्नात्वापंचनदेबिंदुमाधवमर्चयेत् स्नात्वायोविष्णुकांच्यांवानंतसेनंसमर्चयेत् २७ रुद्रकांच्यांततःस्नात्वा
प्रणवेशंसमर्चयेत् आदौस्नात्वावन्हितीर्थेयजेन्नारायणंततः २८ रेतोदकेततःस्नात्वाकेदारेशंसमर्चयेत् आ
दौस्नात्वासूर्यपुत्र्यांवेणीमाधवमर्चयेत् २९ जान्हव्यांस्तुततःस्नात्वासंगमेशंप्रपूजयेत् सर्वाःश्रियस्तस्यवश्याः
सत्यंविष्णोर्मयोदितम् ३० एवंतस्मैवरान्दत्वात्स्वंतर्धानंययौशिवः तस्मात्सर्वप्रयत्नेनपूज्यौहरिहरावुभौ
३१ कलौदशसहस्राणिविष्णुस्त्यजतिमेदिनीम् तदर्द्धंजान्हवीतोयंतदर्द्धंग्रामदेवताः ३२ कार्त्तिक्यांपूर्णि
मायांतुकुर्यात्त्रैपुरमुत्सवम् दीपोदेयोवश्यमेवसायंकालेशिवालये ३३ त्रिपुरोनामदैत्येंद्रःप्रयागेतपआस्थि
तः तपसातस्यसंतुष्टोददौब्रह्मावरंपरम् ३४ देवासुरमनुष्येभ्योनतेमृत्युर्भविष्यति इतिलब्धवरोदैत्योवि
श्वकर्मविनिर्मितम् ३५ त्रिपुराख्यंविमानंतमारुह्यभुवनत्रयम् यदावैपीडयामासतदादेवैःस्तुतोहरः ३६
त्रिपुरंघातयामासबाणेनैकेनशत्रुहा कार्त्तिक्यांपूर्णिमायांतुसर्वेदेवाःप्रतुष्टुवुः ३७ तस्मिन्दिनेसर्वदेवैर्दी
पादत्ताहरायच सर्वथैवप्रदेयाश्चदीपास्तुहरतुष्टये ३८ विंशतिःसप्तशतकाःसहिताःदीपवर्तयः ददद्दी-
पंपूर्णिमायांसर्वपापैःप्रमुच्यते ३९

रापतेद्भागीरथ्याश्रमे हरिद्वाराच्चवायव्ये तस्यालोपोभविष्यति भा
गीरथ्यांगतायांतुमर्कटीतंतुसन्निभाः भविष्यंतिजलेकीटास्तोयंनीलीनिभंनयेति ३२ अथत्रैपुरोत्सवप्रसंगमाह कार्त्तिक्यामिति
३३ ३४ ३५ ३६ ३७ ३८ ३९ ४० ४१

४० ४१ ४२ नक्तात् नक्तव्रतात् ४३ इतिकार्तिकमाहात्म्यटीकायांपंचत्रिंशोऽध्यायः ३५ ६९ अथअंत्यांति-
पुष्करणीमाहात्म्यमाह याइति पौर्णिमांताः त्रयोदशीमारभ्यपौर्णिमापर्यंतमित्यर्थः १ २ ३ संस्थिताःसंस्थितानि ४ संपूर्णकार्ति-

पौर्णिमायांतुसंध्यायांकर्तव्यस्त्रिपुरोत्सवः दद्यादनेनमंत्रेणप्रदीपांश्चसुरालये ४० कीटाःपतंगामशकाश्च-
वृक्षाजलेस्थलेयेविचरंतिजीवाः दृष्ट्वाप्रदीपंनचजन्मभागिनोभवंतिनित्यंश्वपचाहिविप्राः ४१ कार्यस्त-
स्मात्पौर्णिमास्यांत्रिपुरायमहोत्सवः कार्तिक्यांकृत्तिकायोगेयःकुर्यात्स्वामिदर्शनम् ४२ सप्तजन्म-
भवेद्विप्रोधनाढ्योवेदपारगः अत्रकृत्वावृषोत्सर्गंनक्तात्शैवपुरंव्रजेत् ४३ इतिश्रीचतुःपुराणसार
संग्रहेकार्तिकमासमाहात्म्येवैकुंठचतुर्दशीत्रिपुरीपौर्णिमाव्रतविधानकथनंनामपंचत्रिंशोऽध्यायः ३५

६९ ब्रह्मोवाच यास्तिस्रस्तिथयःपुण्याअंतिकेशुक्लपक्षके कार्तिकेमासिविप्रेंद्रपौर्णिमां-
ताःशुभावहाः १ अंतिपुष्करणीसंज्ञासर्वपापक्षयावहा कार्तिकेमासिसंपूर्णेयोवैस्नानंचकारह २
तिथिष्वेतासुयःस्नायात्पूर्णमेवफलंभवेत् सर्वेवेदास्त्रयोदश्यांगत्वाजंतून्पुनंतिहि ३ चतुर्दश्यांसयज्ञा-
श्चदेवाजंतून्पुनंतिहि पौर्णम्यांसर्वतीर्थानिविष्णुनासहसंस्थिताः ४ ब्रह्मघ्नान्वासुरापान्वासर्वान्
जंतून्पुनंतिहि ऊष्णोदकेनयःस्नायात्कार्तिक्यादिदिनत्रये ५ रौरवंनरकंयातियावदिंद्राश्चतुर्दश अमा-
सनियमाशक्तःकुर्यादेतद्दिनत्रये ६ तेनपूर्णफलंप्राप्यमोदतेविष्णुमंदिरे योवैदेवान्पितॄन्विष्णुगुरून्-
द्विषन्मानवः ७ नस्नानादिकरोत्यद्धासयातिनरकंध्रुवम् कुटुंबभोजनंयस्तुगृहस्थस्तुदिनत्रये ८

कमासे उष्णोदकस्नाननिषेधोक्तितत्रापिदिनत्रयंत्ववश्यंवर्जयेदित्याह ऊष्णोदकेनेति ५ ६ ७ ८

९ १० कैश्चित् मनुजैः दिनत्रये गीतासहस्रनाम पठनेनकमलपूजादिनाच देवत्वंप्राप्तं कैश्चित्सिद्धत्वमिति ११ तस्मादितिशे

सर्वान्पितॄन्समुद्धृत्यसयातिपरंपदम् गीतापाठंतुयः कुर्यादंतिमेचदिनत्रये ९ दिनेदिनेश्वमेधानांफल·
मेतिनसंशयः सहस्रनामपठनंयःकुर्यात्तुदिनत्रये १० नपापैर्लिप्यतेक्वापिपद्मपत्रमिवांभसा देवत्वंमनु
जैः कैश्चित्कैश्चित्सिद्धत्वमेवच ११ तस्यपुण्यफलंवक्तुंकः शक्तोदिविवाभुवि योवैभागवतंशास्त्रंशृणोतिच
दिनत्रयम् १२ कैश्चित्प्राप्तोब्रह्मभावोदिनत्रयनिषेवणात् ब्रह्मज्ञानेनवामुक्तिः प्रयागमरणेनवा १३ अथ
याकार्तिकेमासिदिनत्रयनिषेवणात् कार्तिकेहरिपूजांतुयः करोतिदिनत्रये १४ नतस्यपुनरावृत्तिः कल्पको
टिशतैरपि कार्तिकेमासिविप्रेंद्रसर्वमंत्यदिनत्रये १५ पुण्यंतत्रापिवैशेष्यंपौर्णम्यांवर्ततेऽनघ प्रातःका
लेसमुत्थायशौचंस्नानादिकंचरेत् १६ समाप्यसर्वकर्माणिविष्णुपूजांसमाचरेत् उद्यानेचागृहेवापिकार्ति
क्यांविष्णुतत्परः १७ मंडपंतत्रकुर्वीतकदलीस्तंभमंडितम् चूतपल्लवसंवीतंइक्षुदंडैःसुमंडितम् १८ चि
त्रवस्त्रैःस्वलंकृत्यतत्रदेवंप्रपूजयेत् चूतपल्लवपुष्पाद्यैःफलाद्यैःपूजयेद्धरिम् १९ शृणुयादूर्जमाहात्म्यंनिय
मेनशुचिःपुमान् संपूर्णमथवाध्यायमेकश्लोकमथापिवा २० मुहूर्तंवापिशृणुयात्कथांपुण्यांदिनेदिने यदि
प्रतिदिनंश्रोतुमशक्तःस्यात्तुमानवः २१

षः तस्यदिनत्रयस्य १२ १३ १४ १५
अथाशक्तस्य एकदिनात्मकमपि कार्तिकव्रतमाह पुण्यमिति १६ १७ १८ १९ २० २१

२२ अथपुराणश्रवणफलंवक्तुं पुराणज्ञलक्षणंतद्धर्मांश्चाह पुराणज्ञइति २३ २४ २५ अथश्रोतॄणांलक्षणानितद्धर्मां
श्चाह श्रद्धाभक्तिसमायुक्ताइत्यादिना २६ २७ २८ भवंतीतिशेषः अन्यतः भोगांतरे इतिउत्तरेणसंबंधः २९ व्यासधर्ममाह

पुण्यमासेथवापुण्यतिथौसंशृणुयादपि तेनपुण्यप्रभावेन पापान्मुक्तोभवेन्नरः २२ पुराणज्ञःशुचिर्दक्षःशां
तोविगतमत्सरः साधुःकारुणिकोवाग्मीवदेत्पुण्यांकथांसुधीः २३ व्यासासनंसमारूढोयदापौराणिकोभवे
त् आसमाप्तेःप्रसंगस्यनमस्कुर्यान्नकस्यचित् २४ नदुर्जनसमाकीर्णेनशूद्रश्वापदावृते देशेनद्यूतसदनेव
देत्पुण्यकथांसुधीः २५ श्रद्धाभक्तिसमायुक्तानान्यकार्येषुलालसाः वाग्यताःशुचयोदक्षाःश्रोतारःपुण्यभा
गिनः २६ अभक्तायेकथांपुण्यांशृण्वंतिमनुजाधमाः तेषांपुण्यफलंनास्तिदुःखंस्याज्जन्मजन्मनि २७ पौरा
णिकंचमासांतेपूजयेद्भक्तितत्परः गंधमाल्यैस्तथावस्त्रै रलंकारैर्धनेनच २८ शृण्वंतिचकथांभक्त्यानदरिद्रा
नपापिनः कथायांकीर्त्यमानायांयेगच्छंत्यन्यतोनराः २९ भोगांतरेप्रणश्यंतितेषांदाराश्चसंपदः उच्चासनस
मारूढोननरःप्रणतोभवेत् ३० विषवृक्षस्तथास्वापेवनेचाजगरोभवेत् कथायांकीर्त्यमानायांविघ्नंकुर्वंतियेन
राः ३१ कोट्यब्दनरकान्भुक्त्वा भवंतिग्रामसूकराः येश्रावयंतिमनुजाःकथांपौराणिकींशुभाम् ३२ कल्पकोटि
शतंसाग्रंतिष्ठंतिब्रह्मणःपदम् आसनार्थंप्रयच्छंतिपुराणज्ञस्ययेनराः ३३ कंबलाजिनवासांसिमंचंफलकमेव
वा परिधानीयवस्त्राणिप्रयच्छंतिचयेनराः ३४

उच्चासनेसमारूढइति उच्चासनसमारूढः नरः
प्रणतः नम्रः नभवेत् यदिभवेच्चेज्जन्मांतरे विषवृक्षः भवेत् ३० स्वापेशयने कृते अजगरः भवेत् ३१ ३२ ३३ ३४

३५ ३६ पुराणश्रवणफलप्रशंसामाह यत्फलमिति ३७ ३८ अथकार्तिकमाहात्म्यश्रवणफलमाह यएतदित्यादिना ३९

भूषणादिप्रयच्छंतिवसेयुर्ब्रह्मसद्मनि वाचकेपरितुष्टेतुतुष्टास्युःसर्वदेवताः ३५ अतःसंतोषयेद्भक्त्याभक्तिश्रद्धान्वितःपुमान् तस्यपुण्यफलंपूर्णंभवत्येवनसंशयः ३६ यत्फलंसर्वयज्ञेषुसर्वदानेषुयत्फलं सकृत्पुराणश्रवणात्तत्फलंविंदतेनरः ३७ कलौयुगेविशेषेणपुराणश्रवणादृते नास्तिधर्मःपरःपुंसांनास्तिमुक्तिपथःपरः ३८ पुराणश्रवणाद्विष्णोर्नास्तिसंकीर्तनात्परम् यएतदूर्जमाहात्म्यंशृणुयाच्छ्रावयेदपि ३९ सतीर्थराजबदरीगमनस्यफलंलभेत् सर्वरोगापहंसर्वपापनाशकरंशुभम् ४० श्रुत्वाचैकपदंयोवैअगम्यागमनेरतः कन्याविक्रिस्वसाविक्रित्युभयंतुविमोचयेत् ४१ माहात्म्यमेतदाकर्ण्यपूजयेद्यस्तुपाठकम् गोभूहिरण्यवस्त्रैश्चविष्णुतुल्योयतोहिसः ४२ धर्मशास्त्रंपुराणंचवेदविद्यादिकंचयत् पुस्तकंवाचकायैवदातव्यंधर्ममिच्छता ४३ पुराणविद्यादानाद्ध्यनंतफलभोजिनः इदंयःपठतेभक्त्याश्रुत्वाचैवावधारयेत् ४४ मुच्यतेसर्वपापेभ्योविष्णुलोकंसगच्छति नकस्यापीदमाख्येयंश्रद्धाहीनायदुर्मतेः ४५ अपूजयित्वागुरुमथबुद्ध्याधर्मप्रवक्तारमनन्यबुद्धिः भुक्त्वातुभोगान्नरकेषुचैवततोहिसर्वंनपुनातिचैव ४६ तस्मात्संपूजयेद्भक्त्यागुरुंतत्त्वावबोधकं माहात्म्यस्यचलेशोयंतवचोक्तोमयानघ ४७ नशक्यतेहिसंपूर्णंवक्तुंवर्षशतैरपि पुराकैलासशिखरेपार्वत्यैप्रोक्तवान्शिवः ४८ कार्तिकस्यतुमाहात्म्यंयावद्वर्षशतंवदन् तथापिनांतमगमदशक्तोविररामह ४९ पुत्रार्थीचधनार्थीचराज्यार्थीस्वफलंलभेत् किमत्रबहुनोक्तेनमोक्षार्थीमोक्षमाप्नुयात् ५०

४० ४१ ४२ ४३ ४४ ४५ ४६ ४७ ४८ ४९
५०

५१ आसीद्दिनिशेषः ५२ ५३ ५४ ५५ ५६ ५७ ५८ इतिश्रीकार्तिकमासमाहात्म्यटीकायांपुराणश्रवणमहिमावर्णनंना

सूतउवाच इत्युक्तोब्रह्मणाचैवनारदोप्रेमनिर्भरः भूयोभूयोनमस्कृत्य यथौयाद्दच्छिकोमुनिः ५१ कथितंशंकरेणापिपुत्रायहितकाम्यया पितुस्तद्वाक्यमाकर्ण्यषण्मुखोहर्षनिर्भरः ५२ कृष्णेनसत्यभामायैकार्तिकस्यचवैभवः कथितस्तेनसंतुष्टासत्याव्रतमथाकरोत् ५३ ऋषयोवालखिल्येभ्यःश्रुत्वामाहात्म्यमुत्तमम् ऊर्जव्रतपराजातास्तस्मादूर्जोतिवल्लभः ५४ अधीत्वासर्वशास्त्राणिपयःसारमिवोद्धृतम् नानेनसदृशंशास्त्रंविष्णुप्रीतिकरंशुभं ५५ व्यासउवाच इत्युक्त्वातानृषीन्सर्वान्सूतोवैधर्मवित्तमः विररामततस्तेतुपूजांचक्रुस्तदामहत् ५६ तेपुनःस्वाश्रमंगत्वात्दृष्टास्तेपरमर्षयः यथासूतेनोपदिष्टंतथाचक्रुर्व्रतंशुभं ५७ अनेनविधिनायेवैकुर्वंतिकार्तिकव्रतं तेसर्वपापनिर्मुक्ताःगच्छंतिविष्णुमंदिरं ५८ इतिश्रीचतुःपुराणसारसंग्रहेकार्तिकमासमाहात्म्येपुष्करणीसंज्ञिकातिमातिथित्रयमाहात्म्यकथनपूर्वकपुराणश्रवणमहिमावर्णनंनामषट्त्रिंशोऽध्यायः ३६ ॥ पाद्मंसनत्कुमारोक्तंतथाब्राह्मपुराणजं स्कांदीयसारोद्धारोक्तंमाहात्म्यंकार्तिकस्यच १ विलोक्यतेभ्यःसारांशंगृहीत्वासंग्रहःकृतः अनेनसंग्रहेणैवविशेषात्ज्ञानसंभवः २ भविष्यतिपदार्थानांसर्वंकोवेदनिश्चयं अनेनभगवान्विष्णुःप्रसन्नोस्तुसदामम ३ इतिश्रीज्योतिर्विकुलावतंसव्यंकटरामात्मजहरिकृष्णविनिर्मितबृहज्ज्योतिषार्णवेअष्टमेधर्मस्कंधेचतुर्थेमासस्तबकेकार्तिकमासमाहात्म्यवर्णनंनामअष्टमंमाहात्म्यंसंपूर्णम् ८ ॥

मषट्त्रिंशोऽध्यायः ३६ ॥ श्रीराधादामोदरार्पणमस्तु ॥ श्रीरस्तु शुभम् ॥ ॥

७४

इतिश्रीमासस्तबकेकार्तिकमासमाहात्म्यसमाप्त·

इतिश्रीज्योतिर्वित्कुलावतंसव्यंकटरामात्मजहरिकृष्णविनिर्मिते बृहज्ज्योतिषार्णवे अष्टमेधर्मस्कंधेचतुर्थेमासस्तबकेपुरुषोत्तममासमाहात्म्यनिरूपणंनामत्रयोदशंमाहात्म्यं १३ संपूर्णं सर्वश्लोकसंख्या २२१५ श्रीरस्तु

यह पुस्तक मुंबईमे पं० श्रीधरशिवलालजीके ज्ञानसागर छापखानामें छाप्यो· संवत् १९४५ शके १८११ मिति आश्विन शुक्ल १०

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

इतिश्रीमासस्तवकेपुरुषोत्तममाहात्म्यंसमाप्तं.

अ॰	श्लो	
		जातेनिपृथुनाशृष्टेनारदः नदुसन्निंवक्रुमादौइंद्रवज्रपातेनक्रुद्धस्यशिवस्यक्रोधाग्निनाजलंधरोत्पत्तिप्रसंगंवर्णयामास श्लोकाः२१
१५	१	ततोजलंधरस्यदिग्विजयेजयप्राप्तिवर्णनंबृहस्पतेर्जीवनाम्प्राप्तिकारणञ्च वर्ण्यते·
१६	१	युद्धपराजितैर्देवैःस्तुतोविष्णुःप्रकटोभूत्वायुद्धंचकार श्लो·२९
१७	१	जलंधरसभायांनारदोपदेशेनस्त्रीरत्नस्य पार्वत्याःग्रहणार्थंराहुप्रेषणंतेनक्रुद्धस्यशिवस्यभ्रूमध्यात्कीर्तिमुखगणोत्पत्तिवर्णनं·श्लो·३३
१८	१	ततःदेवासुरसंग्रामेरुद्रसेनापराभववर्णनं·३२
१९	१	वीरभद्रपतनंचश्लो·३१
२०	१	ततोजलंधरशिवयोर्महायुद्धं· ३१
२१	१	वृंदायाःपातिव्रत्यभंगेनजलंधरस्यहननंभविष्यतीतिविचार्यविष्णुर्मायाप्रदर्शनंकृतवान्ततोमिथस्तयोःशापःबभूवतद्वर्णनम्·श्लोकाः३१
२२	१	ततोयुद्धेजलंधरंहत्वाप्रसन्नतयास्थितस्यशिवस्याज्ञयाविष्णुप्रबोधनायदेवाःआदिशक्तिंतुष्टुवुःततस्तुष्टःदेव्यःविष्णुप्रबोधनार्थंबीजानिददुः श्लो॰ ३०
२३	१	तद्बीजेभ्यः धात्रीमालतीतुलस्युत्पत्तिः श्लो॰ २३
२५	१	धर्मदत्तस्यकार्तिकपुण्यदानात्कलहायाःपिशाचजन्मतोमुक्तिः·क्रमेणश्लोकाः२९।२७
२६	१	विष्णुभक्तिमाहात्म्यकथनेचोलराजविष्णुदासद्विजेतिहासवर्णनम्· श्लोकाः ३० - ३२
२८	१	जयविजययोः कार्तिकेगंडकीस्नानेनविष्णोर्द्वारपालत्वप्राप्तिर्जातेतिवर्णनम्· श्लो॰ ३२
२९	१	कार्तिकव्रतिनांसंसर्गपुण्येनधनेश्वरस्ययक्षजन्मप्राप्तिर्जातेतिवर्णनं· श्लोकः २९
३०	१	अदत्तपुण्यपापप्राप्तिवर्णनं
	४९	पतिव्रताख्यानं·
	५०	मासोपवासव्रतविधानं·श्लो·७१
३१	१	कूष्मांडनवमीविधिः
	४	तुलसीविवाहविधिकथनं·श्लो·४२
३२	१	भीष्मपंचकव्रतविधानम्श्लो·५७
३३	१	प्रबोधिनीएकादशीमाहात्म्यं·
	३९	द्वादशीविधानं·श्लो॰ ६७
३४	१	कार्तिकव्रतोद्यापनविधिःश्लो·६७
३५	१	वैकुंठचतुर्दशीमाहात्म्यं
	३३	त्रिपुरोत्सवविधानं· श्लो· ४३
३६	१	अंतिमपुष्करिणीत्र्यतिथिमाहात्म्यंपुराणश्रवणविधिश्चनिरूपितः श्लोकाः५८

इतिश्रीकार्तिकमाहात्म्यविषयानुक्रमणिकासमाप्तः ॥. ॥

इतिकार्तिकमासमाहात्म्यानुक्रमणिकासमाप्ता ॥ छ ॥

अ·	श्लो	
	१११	पंचदिनेषुदीपदानं·
	११३	कार्तिकेदीपकरणेस्थलान्याह·
	१२७	दीपदानेहरिकरब्राह्मणेतिहासः
	१३०	कर्पूरदीपदानादिफलं श्लो· १३४
८	१	तुलसीमाहात्म्यकथनप्रसंगेन हरिमेधसुमेध ब्राह्मणेतिहासःश्लो· ६०
९	१	वत्सद्वादशीविधानं·
	४	पंचदीपेशकुनावलोकनं
	१४	वत्सद्वादशीव्रतेनएकांगीगोपालिकायाःधनधान्यसुखप्राप्तिवर्णनं·
	२०	यमत्रयोदशीविधानंहेमनकस्येतिहासश्च·
	२७	नरकचतुर्दशीविधानं·
	६९	दीपावलीविधानंतत्रकौमुदीशब्दार्थः
	७२	पार्वणश्राद्धादिकरणं·
	७४	सायंमहालक्ष्मीमहाकालीमहासरस्वतीपूजा·
९	७७	लक्ष्मीप्रबोधोत्सवकरणं·
	८८	दीपोत्सवनीराजनं
	९६	बलिराज्यबालक्रीडाशुभाशुभशकुनावलोकनं
	९९	अर्द्धरात्रेऽलक्ष्मीबहिर्निष्कासनं·
	१०३	स्करवराग्निघ्नतकथनं·श्लो०१०५
१०	१	द्यूतप्रतिपद्वर्णनम्·
	३	बलिराज्यप्रतिपन्निरूपणं·
	९	प्रतिपत्तिथिनिर्णयः
	११	अंगणेगोमयमूर्तिपूजनं
	२२	गोवर्द्धनपूजा·
	३०	बहुमहिषवृषभाणांयुद्धक्रीडादर्शनं
	३३	मार्गपालीविधिः
	३८	रात्रौबलिपूजाविधानं
	५९	गोक्रीडावर्णनं
	६९	यष्टीशाकुनावलोकनं श्लो· ६९
११	१	यमद्वितीयाव्रतविधानंश्लो· ७३
१२	१	धात्रीमाहात्म्यंतत्र·
	४	धात्रीप्रदक्षिणानिर्णयः
	१०	धात्रीवृक्षोत्पत्तिः
	२१	धात्र्यांदेवतानिवासवर्णनं·
	२६	धात्रीछायामाहात्म्यंतत्रवैश्येतिहासः कथाश्रवणेनमूषकमुक्तिकथनं·
	५८	धात्रीछायायांभोजनमाहात्म्यं·
	६२	धात्रीछायासुभोजनेनकोदोषःनश्यतीत्याह·
	६६	धात्रीमालाधारणं·
	६७	धात्रीछायायांदीपमालार्पणं·
	६९	धात्रीछायायांदंपतिभोजनफलं·
	७१	धात्रीफलमाहात्म्यं
	७४	आमलकस्नानफलंवर्ज्यकालश्च·
	७६	धात्रीछायायांपिंडदानफलं·
	७७	धात्रीफलधारणेत्र्यंगानि·
	८२	धात्रीछायायांब्राह्मणभोजनफलं·
	८७	धात्रीपूजायांतिथयः
	९०	वनभोजनविधानं·
	१२५	धात्रीस्पर्शमाहात्म्यं·
	१२९	गृहेधात्रीवृक्षमाहात्म्यंश्लो·१३५
१३	१	सत्यभामाकृष्णसंवादेसत्यभामायाःपूर्वजन्मनिकार्तिकव्रतपुण्येनकृष्णभर्तृप्राप्तिर्जातेतिवर्णनं·
	२१	कृष्णःसर्वेषांमध्येकार्तिकःप्रवरःकथमिति पृष्टःसत्यभामांप्रतिशंखासुराख्यानेनकार्तिकप्रवरत्वनिरूपणं कृतवान्·
	४०	प्रयागस्थानमाहात्म्यं·श्लो० ५५
१४	१	तुलसीकथमुत्पन्नाकथंचहरिप्रिया


सूत·
शौनक
संवाद
ब्रह्मा·
नारद
संवाद·
कृष्ण
सत्यभा·
श्रीसूर्य
वालखि·
नारद·
पृथुराजा
तुलसी
पूजन·
ब्राह्मण·
स्त्रिया
शिव·
षण्मु·
ऋषिशि·
यम·
गौतम
धनेश्वर·
स्नान·

अथमासस्तबकेकार्तिकमासमाहात्म्यंसटीकंप्रा०


आकाश
दीप.
सुनंद
भिछु
द्यूतक्रीडा
दीप.
मूस.
गोवत्सपूजन.
लक्ष्मी
पूजनं.
धात्रीपू.
पु.
स्त्री.
जलंधर.
शिव.
तुलसी
वि.
शिवपू.
विष्णु.

अथकार्तिकमासमाहात्म्यविषयानुक्रमणिका·

अ·	श्लो	विषयः
१	१	मंगलाचरणं
	२	कार्तिकवैभवंज्ञातुंशौनकप्रश्नः
	५	प्रश्नोत्तरंवक्तुंसूतोक्तिः
	२०	ब्रह्मनारदसंवादेप्रस्तावेन कार्तिकव्रतप्रशंसनम्·
	५१	आपत्कालेकार्तिकव्रतकरणनिर्णयः श्लोकाः५५
२	१	ब्रह्मानारदंप्रतिकार्तिकव्रतधर्मानाह
	८	तत्रगुरुशुश्रूषाप्रसंगेनगौतमशिष्याणांमेधाविकपिलसुमतीनामितिहासः
	१०	व्रतधर्माः
	४१	अन्नदानप्रसंगेनसत्यकेतुद्विजाख्यानं
	४३	गोदानप्रसंगेनसुशर्मब्राह्मणेतिहासः
	४५	नामस्मरणप्रसंगेन पुष्करेतिहासकथनं·
	५१	गीतापठनमाहात्म्यप्रसंगेनजडब्राह्मणेतिहासकथनं·
	५५	शिलादानप्रसंगेनब्राह्मणीकथाकथनम्· श्लोकाः ५६
३	१	कार्तिकव्रतारंभावसानकालनिर्णयपूर्वकव्रतवैभववर्णनं· श्लो० ५१
४	१	स्नानकालनिरूपणपूर्वकस्नानविधिः
	१८	कूपतीर्थादिषुउत्तरोत्तराधिक्यपुण्यदायकस्नानकाल इतिनिरूपणं·
	५०	तुलार्केकावेरीस्नानफलनिरूपणं·
	५३	पंचनदतीर्थमाहात्म्यं·
	७१	स्नानेउत्तममध्यमाधमकाललक्षणंभर्तृप्रशंसाच·
	७७	तीर्थस्नानफलभाक्मनुष्यलक्षणं·
	८०	चतुर्विधस्नानलक्षणं·
५	१	उषःकालमारभ्यदिनकृत्यनिरूपणं·
	३	मूत्रपुरीषोत्सर्जनविधिः
	११	दंतधावनादिविधिः
	२०	स्नानादिकृत्यं·
	२७	हविष्यान्नआमिषान्ननिरूपणं·
	२८	मुखशुद्ध्यादिशयनांतंकर्म श्लो·३४
६	१	कार्तिकेकर्तव्याकर्तव्यव्रतदाननिरूपणं श्लोकाः ५६
७	१	विष्णुमंदिरेदीपदानमाहात्म्येकुत्सद्विजकथानकं
	३४	परदीपप्रबोधमाहात्म्येइंदुमतीवेश्येतिहासकथनंआकाशदीपदानमाहात्म्यम्
	४३	खगमार्जारकथानकंतत्रैवचंद्रशर्मसुनंदनृपसंवादेनकार्तिकव्रतधर्मनिरूपणंदीपमाहात्म्यंचवर्णितं·
	९९	आकाशदीपदानविधिः
	१०८	आकाशदीपदानेनपिशाचमुक्तिकथनं